शब्दकल्पद्रुमः ।

पञ्चमकाण्डम् ।

श, तालव्यशकारः । स तु शवर्गीयप्रथमवर्णः । अघोषविवृतश्वासमहाप्राणः । अस्योच्चारणस्थानं तालु । इति मुग्धबोधव्याकरणे ॥ (तथा च शिक्षायाम् । १७ ।

"कुहा । चवाविचुयशास्तालव्या ओष्ठजावुपू ॥")

अस्य स्वरूपं यथा,—

"शकारं परमेशानि ! शृणु वर्णं शुचिस्मिते ! ।
रक्तवर्णप्रभाकारं स्वयं परमकुण्डली ॥
चतुर्व्वर्गप्रदं देवि ! शकारं ब्रह्मविग्रहम् ।
पञ्चदेवमयं वर्णं पञ्चप्राणात्मकं प्रिये ! ॥
रजःसत्त्वतमोयुक्तं त्रिबिन्दुसहितं सदा ।
त्रिशक्तिसहितं वर्णमात्मादितत्त्वसंयुतम् ॥"
इति कामधेनुतन्त्रम् ॥ * ॥

(वङ्गीयवर्णमालायाम्) तल्लेखनप्रकारो यथा,

"कुञ्चिता वामतो दक्षगता च शोभनिस्तथा ।
पुनरूर्द्ध्वगता तासु वह्निचन्द्रदिवाकराः ।
मात्रा भवानी विज्ञेया ध्यानमस्य प्रचक्षते ॥"
इति वर्णोद्धारतन्त्रम् ॥ * ॥

तद्वाचकानि यथा,—

"शः सव्यश्च कामरूपी कामरूपी महामतिः ।
मौद्गलनामा कुमारोऽस्थि श्रीकण्ठो ह्यर्क्किमनः ॥
हृदयः शयनं शान्ता सुभगा विस्फुलिङ्गिनी ।
कल्पर्द्धयो महालक्ष्मीर्महेन्द्रः कुलकौलिनी ॥
वाङ्कुसो वियद्दक्षं हृदनुन्नाङ्कुशः खलः ।
वामोरुः पुण्डरीकात्मा कान्तिः कल्याण-
वाचकः ॥"
इति योगिनीतन्त्रे १भागे ७पटले वर्णाभिधानम् ॥

(काव्यादावस्य प्रथमप्रयोगे सुखं फलम् । यथा, वृत्तरत्नाकरटीकायाम् ।

"शः सुखं समु खेदम् ॥"

धात्वनुबन्धविशेषः । यथा, कविकल्पद्रुमः ।

"————वो हृतादिः श् तुदादिकः ॥"

एतेन तुदी श् व्यथे तुदति इति स्यात् ॥)

शं, क्ली, शुभम् । इति त्रिकाण्डशेषशब्दरत्नावल्यौ ॥ (यथा, देवीभागवते । ३ । १८ । ७ ।

"न च हर्म्ये वने शं मे दीर्घिकायां न पर्व्वते ॥")

शं, [म्] व्य, कल्याणम् । (यथा, राजेन्द्रकर्ण-पूरे । ५१ ।

"यः कीर्त्ति भवती भवतो नृपगुणैर्वः शन्तनुः शन्तनुः ॥")

शुभम् । शास्त्रम् । इति शब्दरत्नावली ॥

शः, पुं, शिवः । शस्त्रम् । इति शब्दरत्नावली ॥

शंयुः, त्रि, (शं शुभमस्यास्तीति । शं + "कंशंभ्यां बभयुस्तितुतयसः ।" ५ । २ । १३८ । इति युस् ।) शुभान्वितः । इति त्रिकाण्डशेषः ॥ (यथा, भट्टिः । ४ । १८ ।

"कुर्व्वाणा पश्यतः शंयून् स्रग्विणो हृष्टमानसा ॥")

पुं, बृहस्पतिपुत्रोऽग्निविशेषः । यथा, महा-भारते । ३ । २१८ । २ ।

"आहुतिष्वेव यस्याग्ने र्हविषाज्यं विधीयते । सोऽग्निर्बृहस्पतेः पुत्रः शंयुर्नाम महाव्रतः ॥")

शंवः, पुं, मुषलाग्रस्थलौहमण्डलकः । वज्रम् । इति धरणिः ॥

शंवः, त्रि, (शमस्यास्तीति । शं + "कंशंभ्या-मिति ।" ५ । २ । १३८ । इति वः ।) शुभा-न्वितः । इति त्रिकाण्डशेषः ॥

शंवरं, क्ली, (शं वृणोतीति । वृ + अच् ।) जलम् । इत्यमरः ॥

शंस, उ हिंसास्तुत्योः । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् । क्त्वावेट् ।) ताल-व्यादिः । उ, शंसित्वा शस्त्वा । यः शंसति सतामिति हलायुधः ॥ अनेकार्थत्वात् कथने-ऽप्ययम् । यथा रघौ । शशंस वाचा पुनरुक्त-येवेति । न मे ह्रिया शंसति किञ्चिदी-प्सितमित्यादि च । इति दुर्गादासः ॥

शंसा, स्त्री, (शंस + अः । स्त्रियां टाप् ।) वाक्यम् । वाञ्छा । इति मेदिनी ॥ प्रशंसा । इति शब्दरत्नावली ॥

शंसितः, त्रि, (शंस + क्तः ।) निश्चितः । इति हलायुधः ॥ हिंसितः । स्तुतः । इति शन्स-धातोः क्तप्रत्ययेन निष्पन्नमेतत् ॥ (यथा, महाभारते । १ । ११८ । २५ ।

"ब्राह्मणाश्च महात्मानः सोमपाः शंसित-व्रताः ॥")

शंस्ता, [ऋ] पुं, (शंस + "तृन्तृचौ शंसि-क्षदादिभ्यः संज्ञायां चानिटौ ।" उणा० २ । ९४ । इति तृन् । यद्वा, छन्दसि "पसितस्क-भितस्तभितेति ।" ७ । २ । ३४ । इति निपातनात् साधुः ।) स्तोता । होता । इति संक्षिप्तसारोणादिवृत्तिः ॥ (प्रशास्ता । यथा, ऋग्वेदे । १ । १६२ । ५ ।

"होताध्वर्युरावया अग्निमिन्धो ग्रावग्राभ उत शंस्ता सुविप्रः ॥"

"शंस्ता प्रशास्ता ।" इति तद्भाष्ये सायणः ॥)

शंस्थः, त्रि, (शं शुभे तिष्ठतीति । शम् + स्था + "स्थः कच ।" ३।२।७७ । इति कः ।) शुभा-न्वितः । शंपूर्व्वस्थाधातोर्डप्रत्ययेन निष्पन्न-मिदम् ॥

शंस्थाः, त्रि, (शं + स्था + "स्थः कच ।" ३।२। ७७ । इति क्विप् ।) शुभान्वितः । शम्-पूर्व्वस्थाधातोः क्विप्प्रत्ययेन निष्पन्नमेतत् ॥

शंस्यः, त्रि, (शंस + ण्यत् । "ईडवन्दवृशंसदुहां ण्यतः ।" ६।१।२१४ इत्याद्युदात्तः ।) हिंस्यः । स्तुत्यः । शन्सधातोः घ्यण्प्रत्ययेन निष्पन्नमेतत् ॥

शक, ङ ङ त्रासशङ्कयोः । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-त्रासे अक०-शङ्कायां सक०-सेट् ।) त्रासो भयम् । शङ्का संशयारोपः । ङ, शक्यते व्याघ्राज्जनेन । ङ, शङ्कते पुरुषत्वं स्थाणौ । स्थाणुर्व्वा पुरुषो वा इति संशय-मारोपयतीत्यर्थः । इति दुर्गादासः ॥

शक, न इर् ऊ शक्तौ । इति कविकल्पद्रुमः ॥ (स्वा०-पर०-अक०-सक०-च-वेट् ।) न, शक्नो-त्यशक्यमप्यारीन् विजेतुं य इति हलायुधः । इर्, अशकत् अशकीत् अशाक्षीत् । ऌदित्त्वे-नाम्रानित्यं ङ इत्यन्ये । ऊ, शकिष्यति शक्ष्यति । पृथक्पाठाद्दाद्यो न स्वादिः । द्वावे-वानिमावित्यन्ये । षष्ठस्वरानुबन्धः केषाञ्चि-दनुरोधात् । द्वावेव सकर्म्मकौ । तथा च ।

शक्योऽस्य मन्युर्भवता विनेतुमिति रघुः । रजः- परिणामभेदो न शक्यते प्रत्याख्यातुमिति तत्त्व- कौमुद्यां वाचस्पतिमिश्रः । शक्या सखेनापि सुदीऽमराणामिति नैषधम् । इति दुर्गादासः ॥

शक,य ष शक्तौ । इति कविकल्पद्रुमः ॥ (दिवा० उभ०-सक०-सेट् ।) शक्तिर्दिवादिपक्षे क्षमा स्वादिपक्षे सामर्थ्यम् । य ष, शक्यति शक्यते दुःखं दीनः । इति दुर्गादासः ।

शकः, पुं, (शक + अच् ।) जातिभेदः । नृपभेदः । इति मेदिनी ॥ स च नृपः शकादित्यः इति शालिवाहन इति च नाम्ना ख्यातः । तस्य मरणदिनावधि वत्सरगणनाङ्कः शकाब्देति नाम्ना पञ्जिकायां लिख्यते । स च म्लेच्छ- जातिविशेषः । सत्ययुगे सगरराजेनास्य मस्त- कार्द्धं मुण्डयित्वा वेदशास्त्रत्वमकारि । यथा,—

"ततः शकान् सयवनान् काम्बोजान् पारदां- स्तथा ।
पह्लवांश्चापि निःशेषान् कर्त्तुं व्यवसितो नृपः ॥
ते वध्यमाना वीरेण सगरेण महात्मना ।
वशिष्ठं शरणं जग्मुः सर्व्वतःपरिवेष्टितम् ॥
वशिष्ठस्तदाश्रयात् समयं स्थाप्य तान्नृपः ।
सगरं वारयामास तेभ्यो दत्त्वाभयं तदा ॥
सगरस्तां प्रतिज्ञान्तु निशम्य सुमहावलः ।
धर्म्मं जघान तेषां वै वेषान्यत्वं चकार ह ॥
अर्द्धं शिरः शकानान्तु मुण्डयामास भूपतिः ।
यवनानां शिरः सर्व्वं काम्बोजानामपि द्विज ॥
पारदा मुक्तकेशाश्च पह्लवाः श्मश्रुधारिणः ।
निःस्वाध्यायवषट्काराः सर्व्वांस्तांश्चकार ह ॥"
इति पाद्मे स्वर्गखण्डे सगरोपाख्यानम् १५ अः ॥

देशभेदः । इति विश्वः ॥ (यथा, मार्कण्डेये । १२०।११ ।
"तुषारान् बर्ब्बरान् चीरान् पह्लवान् पारदान् शकान् ।
एतान् जनपदान् सह प्लावयन्तोदधिं गता ॥")

शकटः, पुं क्ली, (शक्नोति भारं वोढुमिति । शक् + "शकादिभ्योऽटन् ।" उणा० ४।८१। इति अटन् ।) यानविशेषः । गाडी इति भाषा ॥ तत्पर्य्यायः । अनः २ । इत्यमरः ॥ चक्रः ३ । इति शब्दरत्नावली ॥ विष्णुध्वस्तासुरविशेषः । द्विसहस्रपलपरिमाणम् । तत्पर्य्यायः । भारः २ आचितः ३ शाकटीनः ४ शलाटः ५ । इति हेमचन्द्रः ॥ यथा,—

"शकटः शाकिनी गावो जालमस्यन्दनं वनम् ।
अनूपः पर्व्वतो राजा दुर्भिक्षे नव वृत्तयः ॥"
इति भरतः ॥

तिनिशवृक्षः । इति शब्दचन्द्रिका ॥ (व्यूह- विशेषः । यथा, मनुः । ७ । १८७ ।
"दण्डव्यूहेन तन्मार्गं यायात्तु शकटेन वा ॥"
शकटनामकासुरः । यथा, भागवते । १० । ३ । १० ।
[illegible]
[illegible]

काषि यान्ति शिशवाश्चितामना:
सूर्य्यसप्रपिठराम्बुपायिनः ॥")

शकटहा, [न्] पुं, (शकटं हन्तीति । हन् + क्विप् ।) श्रीकृष्णः । इति हेमचन्द्रः ॥ (एतद्वि- वरणं भागवते १० स्कन्धे ७ अध्याये तथा हरिवंशे ६१ अध्याये च द्रष्टव्यम् ॥) शकट- नाशके, त्रि ॥

शकटाह्वा, स्त्री, (शकटमिति आह्वा यस्याः ।) रोहिणीनक्षत्रम् । तस्याः पञ्चतारामयशकटा- कृतित्वात् ॥

शकलं, क्ली, (शक्नोतीति । शक् + "शकिशम्यो- र्नित् ।" उणा० १ । १११ । इति कलः ।) त्वक् । खण्डम् । (यथा, रघुः । २ । ४६ ।
"अथान्धकारं गिरिगह्वराणां
दंष्ट्रामयूखैः शकलानि कुर्व्वन् ॥")
रागवस्तु । वल्कलम् । इति मेदिनी ॥ शल्कम् । आँश इतिभाषा । इतिशकलिन्शब्ददर्शनात्॥

शकलः, पुं, क्ली, (शक् + कलः ।) एकदेशः । (यथा, मनुः । ६ । २८ ।
"प्रतिगृह्य पुटेनैव पाणिना शकलेन वा ॥")
खण्डम् । यथा,—
"भित्तं शकलखण्डे वा पुंस्यर्द्धोऽर्द्धं समेंऽशके॥"
इत्यमरः ॥
(यथा, मनुः । १ । १३ ।
"ताभ्यां स शकलाभ्याञ्च दिवं भूमिञ्च निर्म्ममे॥")

शकली, [न्] पुं, (शकलमस्यास्तीति । इनिः ।) मत्स्यः । इत्यमरः ॥

शकान्तकः, पुं, (शकस्य म्लेच्छजातिविशेषस्य अन्तकः ।) विक्रमादित्यराजः । इति केचित् ॥

शकारः, पुं, राज्ञः असूढायाः स्त्रिया भ्राता । यथा, साहित्यदर्पणे ३ परिच्छेदे ॥
"मदमूर्खताभिमानी दुष्कुलतैश्वर्य्यसंयुक्तः ।
सोऽयमनूढाभ्राता राज्ञः श्यालः शकार
इत्युक्तः ॥"

शकारिः, पुं, (शकस्य म्लेच्छजातिविशेषस्यारिः शत्रुः ।) विक्रमादित्यराजः । स तु उज्जयनी- देशाधिपतिः । यथा,—
"साहसाङ्कः शकारिः स्याद्विक्रमादित्य इत्यपि॥"
इति जटाधरः ॥

शकुनं, क्ली, (शक्नोति शुभाशुभं विज्ञातुमनेनेति । शक् + "शकेरुनोन्तोन्युनयः ।" उणा० ३।४९। इति उनः ।) शुभाशुभनिमित्तम् । इति मेदिनी ॥ सगुन इति हिन्दीभाषा । फललक्षणम् । इत्यजयपालः ॥ * ॥ अथ शुभशकुनानि ।
"कीर्त्तनात् श्रवणाद्विलोकनात्
स्पर्शनात् समधिकं समीहितम् ।
मङ्गलाय ददति स्वभावतः
स्यात् प्रयाणसमयेऽपि तद्ध्रुवम् ॥
दध्याज्यदूर्वाक्षतपूर्णकुम्भाः
सिद्धान्नसिद्धार्थकचन्दनानि ।
आदर्शशङ्खामिषमीनमृत्स्ना-
गोरोचनागोमयगोमयानि ॥
गीर्व्वाणवीणाफलभद्रपीठ-
पुष्पाञ्जनालङ्करणायुधानि ।
ताम्बूलयानासनवर्द्धमान-
ध्वजातपत्रव्यजनाम्बराणि ॥
अम्भोजभृङ्गारसमृद्धवह्नि-
गजाजवाहाः कुशचामराणि ।
रत्नानि चामीकररूप्यताम्र-
सद्वैडकाद्योषधयः सुराश्च ॥
वनस्पतेर्नूतनशाकमेवं
माङ्गल्यपञ्चाशदिदं प्रदिष्टम् ।
शुभेषु कार्य्येष्वशुभेषु चैव
कार्य्ये गतानां शुभदाः सदैव ॥
एतानि दृष्ट्वा शुभदर्शनानि
कुर्व्वन्ति हृष्टः पथि दक्षिणेन ।
सव्यक्षिलोकादशुभावहानि
त्यक्तानि वामेन शुभा भवन्ति ॥
गान्धारषड्जर्षभस्तथान्ये
स्वरेषु गम्भीरमनोरमा ये ।
वादित्रवेदध्वनिगीतनृत्य-
मित्यादिशस्तं किल यत्र रौद्रम्
आदाय रिक्तं कलसं जलार्थी
यदि व्रजेत् कोऽपि सहाध्वगेन ।
पूर्णं समादाय निवर्त्ततेऽसौ
यथा कृतार्थः पथिकस्तथैव ॥ *
अङ्गारभस्मेन्धनरज्जुपङ्क-
पिण्याककार्पासतुषास्थिविष्ठाः ।
कृष्णायसानेस्करकृष्णधान्य-
पाषाणकेशा भुजगौषधानि ॥
तैलं गुड़ं चर्म्म वसा विभिन्नं
रिक्तञ्च भाण्डं लवणं तृणञ्च ।
तक्रार्गला शृङ्खलहस्तिवाताः
कार्य्ये क्वचित् त्रिंशदिमे न शस्ताः
स्वपादयानस्खलनं नृपाणां
भङ्गः क्वचिद्यानपलायनञ्च ।
द्वाराभिघाताध्वगशस्त्रपाताः
प्रस्थानविघ्नं कथयन्तु यातुः ॥
मार्ज्जारयुद्धारवदर्शनानि
कलिः कुटुम्बस्य परस्परञ्च ।
चित्तस्य कालुष्यकरञ्च सर्व्वं
गन्तुः प्रयाणप्रतिषेधनाय ॥
दृष्टे शवे रोदनशब्दहीने
सहार्थसिद्धिः कथितोद्यमेषु ॥
प्रवेशयोगेषु शवः शयस्थे
दुःखं सदीर्घामयवा ददाति ॥
गण्डूषमात्रसंयुता शराषा-
मत्स्यगर्भे चेत् प्रविगत्य कस्मात् ।
भवेत् तदामासितभोग्यभावी
यः कौतुकी तेन निरूप्यमेतत् ॥
हस्तिकर्णं झटिति दन्तधावनं
संमुखं पतति यत्र वामरं ।
भोजनं भवति तत्र वाञ्छितं
व्यासभाषितमिदं हि शास्त्रम् ॥"

इति वसन्तराजशाकुने विचारिताः शुभावहाः॥
अथ नराङ्गितविचारः।
"अथाभिधास्ये द्विपदेषु तावत्
प्रधानभावात् शकुनं नराणाम्।
नैमित्तिकं यत् प्रतिभाव्य सर्व्वं
फलं शुभाशोभनयोर्ब्रवीति॥
नरोऽभिरूपः सितवस्त्रमाल्यो
वाचं प्रशस्तां मधुराञ्च जल्पन्।
एवंविधा योषिदपि प्रयाणे
प्रवेशकाले च करोति सिद्धिम्॥*॥
वसद्विकेशो हतमानगर्व्वः
खिन्नाङ्गनग्नान्त्यजतैलदिग्धाः।
रजस्वला गर्भवती रुदन्ती
मलान्वितोन्मत्तजराधवाश्च॥
दीनो द्विपत्क्षुत्क्षविमुक्तकेशाः
क्रमेलकस्थाः खरसैरिभस्थाः।
सव्याससिसाक्रन्दनपुंसकाद्या
दुःखावहाः सर्व्वसमीहितेषु॥*॥
पृथ्वीपतिर्ब्राह्मणहर्षयुक्तो
वेश्या कुमारी सुहृदः सुकेशाः।
भार्य्या नराश्चाश्वहयाधिरूढाः
शुभाय दृष्टाः शकुनोद्यमेषु॥*॥
कृष्णाम्बराः कृष्णविलेपनाढ्याः
कृष्णां स्रजं मूर्द्ध्नि विधारयन्ती।
दृष्टा सकोपा यदि कृष्णवर्णा
नारी नरैस्तद्विपदो भवन्ति॥*॥
श्वेताम्बरा श्वेतविलेपनाढ्या
मालां सितां मूर्द्ध्नि विधारयन्ती।
दृष्टा प्रहृष्टा यदि गौरवर्णा
नारी नरैः स्यात्तदभीष्टसिद्धिः॥
धृतातपत्रः सुविशुक्लवासाः
पुष्पान्वितश्चन्दनचर्च्चिताङ्गः।
स्निग्धावयुक्तः कृतभोजनो वा
विप्रः पठन् यच्छति सर्व्वसिद्धिम्॥
अभ्युपगच्छति यस्य हि याने
स्त्रीपुरुषोऽप्यथवा फलहस्तः।
सर्व्वसमीहितसिद्धिरवश्यं
तस्य नरस्य भवत्यचिरेण॥"
इति वसन्तराजशाकुने नराङ्गितेङ्गित-संज्ञम्॥*॥
"गच्छेति पृष्टे पुरतस्तथैव
वागीदृशी केनचिदुच्यमाना।
सर्व्वाशिषश्चातिशयेन ताभ्य-
श्चित्तस्य तुष्टिर्विजयाय पुंसाम्॥
सिद्धा स्थिराया जहि छिन्दि भिन्दि
इत्यादयः शत्रुवधोद्यतानाम्।
क्व यासि मा गच्छत चैवमाद्याः
प्रयोजनारम्भनिवारणार्थाः॥
स्थैर्य्यं स्थिरार्थादृगमनं तदर्था-
द्वाक्यान्निवृत्तिर्विनिवर्त्तितार्थात्।
लाभं जयं भङ्गमसङ्गलं वा
बुध्येत तत्तत्प्रतिपादनार्थात्॥
उग्रं भवेद्रोदनमग्रभागे
भयं भवेद्वह्निविभागभूते।
नैर्ऋत्यकोणे रणमार्गरोधो
वायव्यकोणे रुदितं सस्नेहे॥
मृत्युः सुतानां रुदितेन पृष्ठे
लाभो भवेत्तच्च निवर्त्तनेन।
मृत्युस्तदाये रुदितेन शत्रुः
सिद्धिं विधत्ते रुदितं रिपूणाम्॥"
इति वसन्तराजशाकुने नराङ्गिते उपश्रुतिप्रकरणम्॥*॥ वकचक्रवाकटङ्कटिट्टिभकारण्डवभासभारद्वाजमयूरकपिञ्जललावकगृध्रोलूककपोतगोवत्सकुक्कुटकलविङ्कभारतीचासखञ्जनकाकपिङ्गलारूपाणिशकुनानि घोटकवृषभमहिषखरगोमहिष्यजाजमेषैडकोष्ट्रछुछुन्दरीमूषिकमार्जारवानरमृगवराहशशकालाश्वनकुलवृश्चिकपिपीलिकापक्षी कुक्कुरादिरूपशकुनानिच वसन्तराजशाकुने द्रष्टव्यानि। हस्तिशशकसृगालषट्पदशरभसर्परूपाणि शकुनानि तत्तच्छब्दे द्रष्टव्यानि॥

शकुनः, पुं, (शक + उनः।) पक्षिमात्रम्। (यथा, महाभारते। १। ७२। १०॥
"तं वने विजने गर्भे सिंहव्याघ्रसमाकुले।
दृष्ट्वा शयानं शकुनाः समन्तात् पर्य्यवारयन्॥")
पक्षिविशेषः। गृध्र इति ख्यातः। इति मेदिनी॥ कश्यपपत्नीताम्रायाः श्येनगृध्रादयः पुत्त्राः। इति श्रीभागवतम्॥ गृध्रस्याशुभफलं यथा,—
"वामेऽपसव्ये पुरतश्च पृष्ठे
युद्धं विभेदं मरणं श्रियश्च।
गृध्रः स्थितः सन् कुरुते क्रमेण
शब्दोऽपसव्योऽस्य विपत्तिहेतुः॥"
इति वसन्तराजशाकुनम्॥
विप्रभेदः। इत्युणादिकोषः। तद्विवरणं भागवते उक्तम्। गीतविशेषः। तत्तु उत्सवादिषु मङ्गलार्थगेयम्। इत्यजयपालः॥ शुभशंसी। इति शब्दरत्नावली॥

शकुनज्ञा, स्त्री, (शकुनं जानातीति। ज्ञा + कः। स्त्रियामाप्।) ज्येष्ठी। इति त्रिकाण्डशेषः॥ शकुनज्ञातरि, त्रि॥ (यथा, कथासरित्सागरे। ३१। ५३।
"प्रादक्षिण्यमाङ्घ्रिपदापि स्मसख्या शकुनज्ञया।
स्वतन्त्रोऽभिनवारूढो युवतीनां मनोभवः॥")

शकुनिः, पुं, (शक्नोति उन्नेतुमात्मानमिति। शक + "शकेरुनोन्तोन्त्युनयः।" उणा० ३।४९ इति उनिः।) पक्षी। इत्यमरः॥ (यथा, मनुः। ५। ११।
"क्रव्यादान् शकुनीन् सर्वांस्तथा ग्राम-निवासिनः।
अनिर्द्दिष्टांश्चैकशफांष्टिट्टिभञ्च विवर्जयेत्॥")
चिल्लपक्षी। इति हेमचन्द्रः॥ सौबलः। स तु कौरवमातुलः। (अयं हि दुर्य्योधनमन्त्री। द्यूते पाण्डवान् जित्वा वनं प्रेषयामास। अयं हि कौरवयुद्धे सहदेवेन निहतः।.. [illegible] महाभारते शल्यपर्व्वणि द्रष्टव्यम्॥) ववाद्येकादशकरणान्तर्गताष्टमकरणम्। इति मेदिनी॥ तत्करणजातफलम्।
"परजनधनहर्त्ता वञ्चकः क्रूरचेष्टः
करधृतकरवालो व्याहतस्वामिपक्षः।
अतिशयपरदारासक्तचित्तः सरोषो
भवति शकुनिजन्मा मानवः शीघ्रकर्म्मा॥"
इति कोष्ठीप्रदीपः॥*॥
दुःसहपुत्त्रः। यथा,—
"दुःसहस्याभवत् भार्य्या निर्म्माष्टिर्नामनामतः।
जाता कलेस्तु पाप्मायां ऋतौ चण्डालदर्शनात्॥
तयोरपत्यान्यभवन् जगद्व्यापीनि षोडश।
अष्टौ कुमाराः कन्याश्च तथाष्टावतिभीषणाः॥
दन्ताकृष्टिस्तथोक्तिश्च परिवर्त्तस्तथा परः।
अङ्गधुक् शकुनिश्चैव गण्डप्रान्तरतिस्तथा॥"
तस्य पञ्च पुत्त्रा यथा,—
"श्येनकाककपोतांश्च गृध्रोलूकौ च वै सुतान्।
अवाप शकुनिः पञ्च जगृहुस्तान् सुरासुराः॥
श्येनं जग्राह वै मृत्युः काकं कालो गृहीत-वान्।
उलूकं निर्ऋतिश्चापि जग्राहातिभयावहम्॥
गृध्रं व्याधिस्तदीशोऽथ कपोतञ्च स्वयं यमः।
एतेषामेव चैवोक्ताः कृताः पापोपपादने॥
तस्मात् श्येनादयो यस्य निलीयन्ते शिरस्यथ।
तेनात्मरक्षणायालं शान्तिः कार्य्या द्विजोत्तम॥
गेहे प्रसूतिरेतेषां तद्वन्नीड़निवेशनम्।
न शस्तं वर्जयेद्गेहं कपोताक्रान्तमस्तकम्॥
श्येनः कपोतो गृध्रो वा कौशिको वा गृहे द्विजः।
प्रविष्टः कथयन्त्यन्तं वसतां तत्र वेश्मनि॥
ईदृक् परित्यजेद्गेहं शान्तिं कुर्य्याद्विजोत्तम।
स्वप्नेऽपि हि कपोतस्य दर्शनं न प्रशस्यते॥"
इति मार्कण्डेयपुराणे दुःसहवंशोत्पत्तिनामाध्यायः॥*॥ विकुक्षिपुत्त्रः। तथा,—
"वैवस्वतमनोरासीदिक्ष्वाकुः पृथिवीपतिः।
तस्य पुत्त्रशतं चासीद्विकुक्षिर्ज्येष्ठ उच्यते॥
सोऽयोध्याधिपतिर्वीरस्तस्य पञ्चदश स्मृताः।
शकुनिप्रमुखाः पुत्त्रा रक्षिता रोमहर्षिताः॥"
इति वह्निपुराणे सगरोपाख्याननामाध्यायः॥

शकुनिप्रपा, स्त्री, (शकुनीनां पक्षिणां पानार्थं या प्रपा।) पक्षिणः पानीयशाला। तत्पर्य्यायः। श्रीपदः २। इति हारावली॥

शकुनी, स्त्री, श्यामापक्षी। इति राजनिर्घण्टः॥ चटकी। इति केचित्॥ (पक्षीरूपधारिणी पूतना। यथा, महाभारते। ५। १३०। ४५।
"वनेन हि हता बाल्ये पूतना शकुनी तथा।"
तथा च हरिवंशे। ६२। १—२।
"कस्यचित्त्वथ कालस्य शकुनी [illegible]
धात्री कंसस्य भोजस्य पूतना [illegible]
पूतना नाम शकुनी [illegible]
प्राजगामार्द्धरात्रे [illegible]

शकुनेश्वर, पुं, (शकुनीनां पक्षिणामीश्वरः ।) गरुडः । इति धनञ्जयः ॥

शकुन्त, पुं, (शक्नोति उत्पतितुमिति । शक + "शकादिभ्योऽन्तः ।" उणा॰ ३।२८ । इति [illegible] ।) पक्षी । इत्यमरः ॥ (यथा, महाभारते । १ । ७२ । ११ ।
"सिंहव्याघ्रे [illegible] मांसभक्षिणः । पर्यरक्षन्त तां तत्र शकुन्ता मेनकात्मजाम् ॥")
कीटभेदः । भासपक्षी । इति मेदिनी ॥

शकुन्तला, स्त्री, (शकुन्तैः पक्षिभिर्लायते पाल्यते इति । ला + कः । स्त्रियामाप् ।) [illegible] दुष्मन्तराजस्य [illegible] पत्नी भरतः [illegible] । [illegible] यथा —
"[illegible] शकुन्तैः परिरक्षिता । शकुन्तलेति नामास्याः कृतञ्चापि ततो मया ॥"
इति महाभारते ।१।७२।१५।
[illegible] महाभारते आदिपर्व्वणि ६८ [illegible] ॥

शकुन्तलात्मज, पुं, (शकुन्तलाया आत्मजः पुत्रः ।) [illegible] । यथा —
"[illegible] शकुन्तलात्मजः ॥"
इति हेमचन्द्रः ॥

शकुनि, पुं, (शक्नोति उत्पतितुमिति । शक + [illegible] ।) [illegible] । इत्यमरः ॥ (यथा, [illegible] । १ । २९ । १ ।
"[illegible]
[illegible] शकुनः ॥")
[illegible] । [illegible] ॥

शकुल, पुं, (शक्नोति [illegible] । शक + "[illegible] ।" उणा॰ १ । ९२ । इति [illegible] ।) मत्स्यविशेषः । इत्यमरः ॥ [illegible] इति भाषा ॥ (यथा, महाभारते । ३ । १२ । [illegible] ।
"[illegible] शकुलाश्चयः । [illegible] ॥")
[illegible] । [illegible] । [illegible] । [illegible] । इति राज [illegible] ॥

शकुलगण्ड, पुं, शकुलस्य गण्ड इव गण्डो यस्य [illegible] । इति [illegible] ॥

शकुलार्भक, पुं, [illegible] । इत्यमरः ॥

शकुलाक्षी, स्त्री, [illegible] । इति [illegible] ॥

शकुलादनी, स्त्री, [illegible] ।
[illegible] । [illegible] । [illegible] इति ।
[illegible] । [illegible] इति [illegible] । [illegible]
[illegible] । [illegible] । इति [illegible] ।
[illegible] । [illegible] । इति [illegible] । [illegible]
[illegible] । इति [illegible] ॥

शकुलार्भक, पुं, (शकुलस्य अर्भक इव ।) गडकमत्स्य । इत्यमरः ॥ (गड़ुइमाछ इति भाषा ॥)

शकुली, स्त्री, (शकुल + ङीष् ।) मत्स्यविशेषः । सृगाल् इति भाषा । महाशकुल इति केचित् । अस्या आकारो गुणाश्च ।
"शकुली रोहिताकारा भूमौ प्रायश्चरत्यसौ । गुर्व्वी पाके च मधुरा भेदिका दोषकोपना ॥"
इति राजवल्लभः ॥
पुस्तकान्तरे शकली इति च पाठः ॥ (नदीविशेषः । यथा, मार्कण्डेये । ५७ । २३ ।
"धूमेरजा शक्तिमती शकुली त्रिदिवा क्रमुः । स्कन्धपादप्रसूता वै तामाप्यावेगवाहिनी ॥")

शकृत्, क्ली, (शक्नोति मर्द्दितुमिति । शक् + "शकेर्ऋतिन् ।" उणा॰ ४ । ५८ । इति ऋतिन् ।) विष्ठा । इत्यमरः ॥ यथा, (भागवते । ३ । २० । १९ ।
"स दृष्ट्वा चस्माद्धृदयः शकृन्मूत्रं विमुञ्चति ॥")

शकृत्करि, पुं, स्त्री, (शकृत् करोतीति । शकृत् + कृ + "स्तम्बशकृतोरिन् ।" ३।२।२४ । इति इन् ।) वत्सः । इत्यमरः ॥ दम्यादिरिति विद्याविनोदः ॥

शकृत्कारः, त्रि, मलत्यागकारकः । शकृत् करोतीत्यर्थे शकृच्छब्दात् कृधातोः अच् (अण्) प्रत्ययेन निष्पन्नः ॥

शकृद्द्वारं, क्ली, (शकृतो द्वारम् ।) मलद्वारम् । तत्पर्य्यायः । अपानम् २ पायुः ३ गुदम् ४ च्युतिः ५ अधोमर्म्म ६ त्रिवलीकः ७ वली ८ । इति हेमचन्द्रः ॥

शक्कर, पुं, वृषः । इति हेमचन्द्रः ॥

शक्करि, पुं, वृषः । इति त्रिकाण्डशेषः ॥

शक्करी, स्त्री, छन्दोभिदः । नदीभिदः । मेखला । इति मेदिनी ॥ सा च सप्तदशपञ्चविंशतिपर्य्यन्तोऽन्तर्गतचतुर्द्दशच्छन्दः । यथा,—
"उक्त्यात्युक्तया तथा मध्या प्रतिष्ठान्या सुपूर्व्विका ।
गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च ॥
त्रिष्टुप् च जगती चैव तथातिजगती मता ।
शक्करी सातिपूर्व्वा स्यादष्ट्यत्यष्टी तथा मता ॥
धृतिश्चातिधृतिश्चैव कृतिः प्रकृतिराकृतिः ।
विकृतिः संकृतिश्चापि तथा भिकृतिरुत्कृतिः ॥
इत्युक्ताः समवृत्तानां छन्दसां क्रमशः कृताः ॥"
तत्र [illegible] मन्ति ।
तेषां नामानि [illegible] ।
[illegible] । १ ।
[illegible] । २ ।
[illegible] । ३ ।
[illegible] । ४ ।
[illegible]
[illegible]
[illegible] ।७
इति छन्दोमञ्जरी ॥
[illegible] ॥

शक्त, त्रि, (शक + क्तः ।) [illegible] । समर्थः । तत्पर्य्यायः । [illegible] ।

इति हेमचन्द्रः ॥ (यथा, मनुः । ९
"भ्रातॄणां यस्तु नेहेत धनं शक्तः [illegible]
न निर्भाज्यः स्वकादंशात् किञ्चिद्दत्त्वा [illegible]

प्रियंवदः । इति शक्तशब्दटीकायां [illegible]

शक्तव:, पुं, भृष्ट, भ्रष्टयवादिचूर्णम् । भाषा । यथा,—
"धाना भ्रष्टयवे भृष्ट स्त्रियां [illegible]
केचित्तु शक्तुरस्त्रीति वसुरा [illegible]

अस्य विवरणं शक्तुशब्दे द्रष्टव्यम् ॥

शक्ति:, स्त्री, (शक + क्तिन् ।) [illegible] सामर्थ्यम् । यथा,—
"या देवी सर्व्वभूतेषु शक्तिरूपेण [illegible]
इति देवीमाहात्म्यटीकायां [illegible]
शक्यते जेतुमनया । सा [illegible]
भेदात्त्रिविधा । तत्र प्रभुत्वे [illegible]
दण्डो प्रभुशक्तिः १ । विक्रमेण [illegible]
रणमुत्साहशक्तिः २ । सन्ध्यादीनां [illegible]
साध्यं यथावस्थानं मन्त्रशक्तिः ३ ॥
सामर्थ्यम् । तत्पर्य्यायः । द्रविणम् २ तरः ३ बलम् ४ शौर्य्यम् ५ स्थाम: ७ [illegible]
शुष्म: ८ प्राणः १० । इत्यमरः ॥ युगम् ११ १२ । इति शब्दरत्नावली ॥ ऊर्ज्जः १३ । जटाधरः ॥ आयुः । सा तु [illegible]
इति नानार्थे अमरभरतौ ॥ गौरी । मेदिनी ॥ लक्ष्मीः । इति शब्दमाला
त्रिशक्तिर्यथा,—
"एषा त्रिशक्तिरुद्दिष्टा [illegible]
एषा श्वेता परा सृष्टिः सात्त्विकी [illegible]
एषैव रक्ता रजसि वैष्णवी परिकीर्त्तिता
एषैव कृष्णा तमसी रौद्री देवी [illegible]
परमात्मा यथा देवो एक एव त्रिधा ।
प्रयोजनवशाच्छक्तिरेकैव त्रिविधाभवत् ॥
इति वाराहे [illegible]
अपि च ।
"बिन्दुः शिवात्मकस्तत्र बीजं शक्त्यात्मकं [illegible]
तयोर्योगे भवेन्नादस्ताभ्यो जातास्त्रिशक्तयः
इति [illegible]
[illegible] ।
"इच्छा क्रिया तथा ज्ञानं गौरी ब्राह्मी तु [illegible]
त्रिधा शक्तिः स्थिता यत्र तत्परं ज्योतिरो[illegible]
इति गौरक्षसंहिता ॥

अष्ट शक्तयो यथा,—
"इन्द्राणी वैष्णवी शान्ता ब्रह्माणी ब्रह्मशा[illegible]
कौमारी नारसिंही च वाराही [illegible]
माहेश्वरी महामाया भैरवी भीमदर्शनी ।
षष्ठी च [illegible] सर्व्वा [illegible] प्रकृत्युद्भवा [illegible]
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे [illegible]
११८ अध्यायः ॥

नव शक्तयो यथा,—
"तत्र पद्मे चाष्टदले मध्ये च भक्तिपूर्व्वकम् ।
वैष्णवीञ्चैव ब्रह्माणीं रौद्रीं माहेश्वरीं तथा ॥
नारसिंहीञ्च वाराहीमिन्द्राणीं कार्त्तिकीं तथा ।
सर्वशक्तिस्वरूपाञ्च प्रधानां सर्वमङ्गलाम् ॥
नवशक्तीश्च संपूज्य घटे देवांश्च पूजयेत् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६१ अध्यायः ॥*॥
पञ्चाशद्विष्णुशक्तयो यथा,—
"कीर्त्तिःकान्तिस्तुष्टिपुष्टी धृतिः शान्तिः क्रिया दया ।
मेधा सहर्षा श्रद्धा स्याल्लज्जा लक्ष्मीः सरस्वती ॥
प्रीती रती रमा प्रोक्ताः क्रमेण स्वरशक्तयः ।
जया दुर्गा प्रभा सत्या चण्डा वाणी विलासिनी॥
विरजा विजया विश्वा विनदा सुनदा स्मृतिः ।
ऋद्धिः समृद्धिः शुद्धिश्च भक्तिर्मुक्तिर्मतिः क्षमा ॥
रमोमा क्लेदिनी क्लिन्ना वसुदा वसुधा परा ।
परा परायणा सूक्ष्मा सन्ध्या प्रज्ञा प्रभा निशा ॥
अमोघा विद्युता चेति शक्तयः सर्वकामदाः ।
एताः प्रियतमाङ्केषु निषण्णाः सस्मितानना ॥
विद्युद्दामसमानाङ्ग्यः पङ्कजाभयबाहवः ॥"*॥
पञ्चाशद्रुद्रशक्तयो यथा,—
"गुणोदरी स्याद्विरजा शाल्मली तदनन्तरम् ।
लोलाक्षी वर्त्तुलाक्षी च दीर्घघोणा समीरिता ॥
सदीर्घमुखीगोमुख्यौ दीर्घजिह्वा तथैव च ।
कुण्डोदर्य्यर्द्धकेश्यौ च तथा विकृतमुख्यपि ॥
ज्वालामुखी ततो ज्ञेया पश्चादुल्कामुखी ततः ।
सुश्रीमुखी चैव विद्यामुख्येताः स्वरशक्तयः ॥
महाकालीसरस्वत्यौ सर्व्वसिद्धिसमन्विते ।
गौरी त्रैलोक्यविद्या स्यान्मन्त्रसिद्धिस्ततः परम्॥
आत्मशक्तिर्भूतमाता तथा लम्बोदरी स्मृता ।
[illegible]
[illegible]
स्याद्दृक्कालीयोगिन्यौ शङ्खिनी गर्ज्जिनी तथा॥
कालरात्रिश्च कुब्जिन्या कपर्द्दिन्यपि वज्रया ।
जया च सुमुखेश्वर्य्यौ रेवती माधवी ततः ॥
वारुणी वायवी प्रोक्ता पश्चाद्रक्षोविदारिणी ।
ततश्च सहजा लक्ष्मीर्व्यापिनी माययान्विता ॥
एता रुद्राङ्कपीठस्थाः सिन्दूरारुणविग्रहाः ॥
रक्तोत्पलकपालाभ्यामलङ्कृतकराम्बुजाः ॥"
इति प्रपञ्चसारः ॥ * ॥
कुलशक्तयो यथा,—
"शक्तयः परमेशानि ! विदग्धाः सर्वयोषितः ।
नटी कापालिकी वेश्या मालिनी कुङ्कुमालिनी॥
चाण्डाली च कुलाली च रजकी नापिताङ्गना ।
गोपिनी योगिनी शूद्रा ब्राह्मणी राजकन्यका ।
कोचाङ्गना च देवेशि ! तथैव शङ्खकारिणी ।
एताः षड्विंशतिः कन्या देवानामपि दुर्लभाः ।
दैवज्ञा व्याधवामा च तथा मांसापहारिणी ।
बौद्धा च यवनी देवि तथा रसपसारिणी ॥
वेश्या चतुर्विधा प्रोक्ता द्विविधा कुङ्कुमालिनी ॥
धीवरी द्विविधा प्रोक्ता तथैव गणिकाङ्गना ॥
कुम्भकारी द्विधा प्रोक्ता तथैव गोपिनी स्मृता ।
वातवैद्याङ्गना देवि यवनी द्विविधा स्मृता ॥
बौद्धकन्या त्रिधा देवि तथा कोचाङ्गना प्रिया ।
पूर्व्वोक्ताभिः सहैकत्र चतुःषष्टिश्च शक्तयः ॥"
इति रेवतीतन्त्रे ३ पटलः ॥ * ॥
अपि च ।
"पश्वाचारेण देवेशि ! कुलशक्तिं प्रपूजयेत् ।
नटी कापालिकी वेश्या रजकी नापिताङ्गना ॥
ब्राह्मणी शूद्रकन्या च तथा गोपालकन्यका ।
मालाकारस्य कन्या च नव कन्याः प्रकीर्त्तिताः॥
विशेषवैदग्ध्ययुताः सर्व्वा एव कुलाङ्गनाः ।
रूपयौवनसम्पन्ना शीलसौभाग्यशालिनी ।
पूजनीया प्रयत्नेन ततः सिद्धिर्भवेद् ध्रुवम् ॥"
इति गुप्तसाधनतन्त्रे १ पटलः ॥ * ॥
तस्याः प्रशंसा यथा ।
"शक्तिं विना महेशानि ! सदाहं शवरूपकः ।
शक्तियुक्तो यदा देवि ! शिवोऽहं सर्वकामदः ॥
शक्तियुक्तं जपेन्मन्त्रं न मन्त्रं केवलं जपेत् ।
सावित्रीसहितो ब्रह्मा सिद्धोऽभून्नगनन्दिनि ॥
द्वारवत्यां कृष्णदेवः सिद्धोऽभूत् सत्यया सह ।
तथा कोचवधूसङ्गान्मम सिद्धिर्वरानने ॥
ईश्वरोऽहं महादेवि ! केवलं शक्तियोगतः ।
शक्तियोगेन देवेशि ! यदि सिद्धिर्न जायते ॥
तदैव परमेशानि मम वाक्यं वृथा भवेत् ।
यद्दत्तं जलगण्डूषं शक्तिवक्त्रे सुरेश्वरि ! ॥
सिन्धुरूपं महेशानि । तज्जलं नात्र संशयः ।
स्त्रीयेष्टदेवीभावेन भोजयेत्ताञ्च यत्नतः ॥
शक्तिश्च कथ्यते देवि शृणुष्व सुरसुन्दरि ।
वर्षोदशाब्दादूर्द्ध्वं या पञ्चविंशतिवार्षिकी ॥
अप्रसूता विशेषेण पञ्चमेऽपि भवेत् प्रिये ।
सुन्दरी तु विशेषेण प्रसूता वाप्रसूतिका ॥
अवश्यं पञ्चमं कुर्य्यात् शक्तिमात्रे महेश्वरि ॥"
इति शक्तिकागमसर्व्वस्वम् ॥ * ॥
तस्या उत्पत्तिमाहात्म्यादि यथा,—
नारायण उवाच ।
"सह वृद्धा बुद्धिमन्तो न वक्तुमुचितं सुराः ।
सर्व्वं शक्त्यालया विश्वे शक्तिमन्तो हि जीविनः॥
ब्रह्मादितृणपर्य्यन्तं सर्व्वं प्राकृतिकं जगत् ।
सत्यं नित्यं विना माञ्च मया शक्तिः प्रकाशिता ॥
आविर्भूता च सा मत्तः सृष्टौ देवी महेच्छया ।
तिरोहिता च सा शेषे सृष्टिसंहरणे मयि ॥
सृष्टिकर्त्री च प्रकृतिः सर्व्वेषां जननी परा ।
मम तुल्या च मन्माया तेन नारायणी स्मृता ॥
सुचिरञ्च तपस्तप्तं शम्भुना ध्यायता च माम् ।
तेन तस्मै मया दत्ता तपसां फलरूपिणी ॥
शतञ्च लोकशिक्षार्थमस्या न स्वार्थमेव च ।
स्वयं व्रतानां तपसां फलदात्री जगन्मयी ॥
मायया मोहिताः सर्व्वे किमस्या वास्तवं व्रतम् ।
साध्यमस्या व्रतफलं कल्पे कल्पे पुनः पुनः ॥
सुरेश्वरा यदंशाश्च ब्रह्मविष्णुमहेश्वराः ।
कलाः कलांशरूपास्ते सर्व्वे च सुरादयः ॥
मृदा विना कुलालश्च घटं कर्त्तुं यथाक्षमः ।
विना स्वर्णं स्वर्णकारः [illegible]ः ॥
विना शक्त्या तथाहञ्च स्वसृष्टिं कर्त्तुमक्षमः ।
शक्तिप्रधाना सृष्टिश्च सर्व्वदर्शनसम्मता ॥
अहमात्मा च निर्लिप्तोऽदृश्यः साक्षी च देहिनाम् ।
देहाः प्राकृतिकाः सर्व्वे नश्वराः पाञ्चभौतिकाः॥
अहं नित्यशरीरी च भानुविग्रहविग्रहः ।
सर्व्वाधारा च प्रकृतिः सर्व्वात्माहं जगत्सु च ॥
अहमात्मा मनो ब्रह्मा ज्ञानरूपी महेश्वरः ।
पञ्च प्राणाः स्वयं विष्णुर्बुद्धिः प्रकृतिरीश्वरी ॥
शक्त्यो निद्रादयश्चैताः सर्व्वाश्च प्रकृतेः कलाः ।
सा च शैलेन्द्रकन्येयमिति वेदनिरूपितम् ॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डे ७ अध्यायः ॥*॥
अपि च ।
"सा शक्तिः सृष्टिकाले च पञ्चधा चेश्वरेच्छया
राधा पद्मा च सावित्री दुर्गा देवी सरस्वती ॥
प्राणाधिष्ठातृदेवी या कृष्णस्य परमात्मनः ।
प्राणाधिकप्रियतमा सा राधा परिकीर्त्तिता ॥
ऐश्वर्य्याधिष्ठातृदेवी सर्व्वमङ्गलकारिणी ।
परमानन्दरूपा च सा लक्ष्मीः परिकीर्त्तिता ॥
विद्याधिष्ठातृदेवी या परमेशस्य दुर्लभा ।
वेदशास्त्रयोगमाता सा सावित्री प्रकीर्त्तिता ॥
बुद्ध्यधिष्ठातृदेवी या सर्व्वशक्तिस्वरूपिणी ।
सर्व्वज्ञानात्मिका सर्व्वा सा दुर्गा दुर्गनाशिनी ॥
रागाधिष्ठातृदेवी या शास्त्रज्ञानप्रदा सदा ।
कृष्णकण्ठोद्भवा या च सा च देवी सरस्वती ॥
पञ्चधादौ स्वयं देवी मूलप्रकृतिरीश्वरी ॥
ततः सृष्टिक्रमेणैव बहुधा कलया च सा ।
योषितः प्रकृतेरंशाः पुमांसः पुरुषस्य च ॥"
इति च ब्रह्मवैवर्त्ते गणेशखण्डे ४० अध्यायः ॥*॥
ब्रह्माणीशक्त्युत्पत्तिर्यथा ।
"ततो ब्रह्मादयो देवा भयं जग्मुः सवासवाः ।
यदि स्यान्निर्जितो देवः क्षयः सर्व्वदिवौकसाम्॥
एतस्मिन्नन्तरे शक्र ! ब्रह्मा चिन्तयते क्रियाः ।
स्त्रीरूपधारिणी भूत्वा सहायत्वं महेश्वरि ॥
क्षिप्रं कुरु स्वकार्य्यं त्वं एवं विश्वेश्वरे रणे ।
ततो द्योतितवान् शम्भुः स्वशक्तिं किरणोज्ज्वलाम् ॥
ब्रह्मरूपधरां किन्तु ललनाकारविग्रहाम् ।
हंसस्यन्दनमारूढा स्वकीयायुधधारिणी ॥
तर्ज्जयन्ती महौजेन दानवानां भयङ्करी ।
तस्या घोराणि कर्म्माणि दृष्ट्वा स विस्मयं शिवः
का पुनः स्रष्टुः सुखे वा महातिप्रतिपक्षजित् ।
तस्याः शक्तिं द्वितीयाञ्च सृजामि अपराजिताम् ॥"
इति देवीपुराणे रुरुवधे ब्रह्माण्युत्पत्तिः ॥*॥
नन्दार्तौर्थे शक्तिमन्त्रविचारनिर्णयो यथा ।
"योऽसावनादिमध्यान्त[illegible]यः परः ।
तस्यैव परमानन्दा म[illegible]ामिनी ॥
तत्प्रभावेण प्राप्नोति[illegible]कं फलम् ।
मन्त्राणां देवश[illegible]रा शक्तिः ॥"
इति देवीपु[illegible]प्रदेशः

प्रकृतिः। यथा,—
"प्रधानं प्रकृतिः शक्तिर्नित्या चाविकृतिस्तथा।
एतानि तस्या नामानि पुरुषं या समाश्रिता॥"
तस्या गुणानाह।
"सत्त्वं रजस्तमश्चेति विज्ञेयाः प्रकृतेर्गुणाः।"
इति भावप्रकाशः॥ * ॥
शक्तिविषयकपुष्पाणि यथा,—
"अथ पुष्पं प्रवक्ष्यामि कर्मयोगे महेश्वरि।
शृणुष्व परया भक्त्या यथोक्तं ब्रह्मणा पुरा॥
कमले करवीरे च कुसुम्भे तुलसीदयम्।
शाल्मलीके केतकी च कुमारीचम्पकोत्पलम्॥
कुन्दमन्दारपुन्नागपाटलानागचम्पकम्।
आरग्वधं कर्णिकारं पावन्ती नवमल्लिका॥
सौगन्धिकं मकोरण्डं पलाशाशोकसंज्ञकाः।
भिन्तुवारो ह्यपामार्गवापुलीकस्य कामजम्॥
व्याघ्रवेल्लं दमनकं मरुवकं ततः परम्।
लवङ्गं जलकर्पूरं तगरञ्च जवा तथा॥
शिवपुष्पं द्रोणपुष्पं कामराजं सुकेतकम्।
अन्यानि वनपुष्पाणि जलजस्थलजानि च।
गिरिजानि देशजानि नानापुष्पाण्यतः परम्॥"
इति प्रपञ्चसारः॥
शक्तिग्रहः, पुं, (शक्तिं गृह्णातीति। शक्ति+ग्रह+"शक्तिलाङ्गलाङ्कुशेति।" ३।२।९। इत्यस्य वार्त्तिकोक्त्या अच्।) शिवः। कार्त्तिकेयः। शक्तिं गृह्णाति यः इत्यर्थे शक्तिशब्दपूर्वकग्रहधातोरच्प्रत्ययेन निष्पन्न इति केचित्॥ (शक्तेः पदार्थेषु बोधकतायाः ज्ञानम्।) शब्दशक्तिज्ञानम्। यथा।
"पश्चात् शब्दात् अयमर्थो बोद्धव्य इतीच्छा शक्तिरिति तार्किकाः। तज्ज्ञानन्तु व्याकरणादिभ्यः। अतएव।
'शक्तिग्रहं व्याकरणोपमान-
कोषाप्तवाक्याद्व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति
सान्निध्यतः सिद्धपदस्य वृद्धाः॥'
इति प्राञ्चः।" इति दुर्गादासः॥
शक्तिग्राहक, पुं, व्याकरणोपमानादिः। शक्तिग्रहीता च। शक्तिं ग्राहयति गृह्णाति च इत्यर्थे ग्राहग्रहधातोर्ण्वुल् (वुञ्) प्रत्ययेन निष्पन्नमेतत्॥
शक्तिधरः, पुं, (धरतीति। धृ+अच्। शक्तेर्धरः।) कार्त्तिकेयः। इत्यमरः॥ (यथा, हरिवंशे। ७१।८
"स्कन्देन रूपवा चैव वाक्येन चरितेन च।
भाति शक्तिधरस्तुल्यो न तु कश्चन मानुषः॥")
शक्तिधरः, त्रि, (यथा, बृहत्संहितायाम्। ५८।४१।
"स्कन्दः कुमाररूपः शक्तिधरो बर्हिकेतुश्च॥")
शक्तिपर्णः, पुं, सप्तपर्णवृक्षः। इति शब्दरत्नावली॥
शक्तिपाणिः, पुं, (शक्तिरस्त्रविशेषः पाणौ यस्य।) कार्त्तिकेयः। इति हलायुधः॥
शक्तिभृत्, पुं, (शक्तिं बिभर्त्तीति। भृ+क्विप्। तुक् च।) कार्त्तिकेयः। इति हेमचन्द्रः॥
शक्तिमान्, त्रि॥

शक्तिहेतिकः, त्रि, (शक्तिर्हेतिः प्रहरणास्त्रं यस्य।) शक्त्यस्त्रधारियोद्धा। तत्पर्य्यायः। शाक्तीकः२। इत्यमरः। शक्त्यायुधधरः३। इति शब्दरत्नावली॥
शक्तुः, पुं, स्त्री, (शक+बाहुलकात् तुन्।) भर्जितयवादिचूर्णम्। छातु इति भाषा। यथा,—
"धाना भ्रष्टयवे भूम्नि स्त्रियां पुं भूम्नि शक्तवः।
केचित्तु शक्तुरस्त्रीति वन्धुरा भूमनि स्त्रियम्॥"
इति जटाधरः।
अस्य गुणाः।
"यवानां शक्तवो रूक्षा लेखना वह्निवर्द्धनाः।
वातलाः कफरोगघ्ना वातवर्चोऽनुलोमनाः॥
धानासंज्ञास्तु तेऽप्येव दुर्जरा लेखनाः स्मृताः।
गुर्व्वी पिण्डीकृतात्यर्थं लघ्वी सैव विपर्य्ययात्।
शक्तूनामाशु जीर्य्येत मृदुत्वादवलेहिका॥"
इति राजवल्लभः।
अथ शक्तवः।
"धान्यानि भ्राष्ट्रभृष्टानि यन्त्रपिष्टानि शक्तवः।"
तत्र यवशक्तवः।
"यवजाः शक्तवः शीता दीपना लघवः सराः।
कफपित्तहरा रूक्षा लेखनाश्च प्रकीर्त्तिताः॥
ते पीता बलदा वृष्या बृंहणा भेदनास्तथा।
तर्पणा मधुरा रुच्याः परिणामे बलावहाः॥
कफपित्तश्रमक्षुत्तृड्व्रणनेत्रामयापहाः।
प्रशस्ता घर्मदग्धानां व्यायामार्त्तशरीरिणाम्॥
अथ चणकयवशक्तवः।
"निस्तुषैश्चणकैर्भृष्टैस्तुर्य्यांशैश्च यवैः कृताः।
शक्तवः शर्करासर्पिर्युक्ता ग्रीष्मेऽतिपूजिताः॥"
अथ शालिशक्तवः।
"शक्तवः शालिसम्भूता वह्निदा लघवो हिमाः।
मधुरा ग्राहिणो रुच्याः पथ्याश्च बलशुक्रदाः॥
न भुक्त्वा न रदैश्छित्त्वा न निशायां न वा बहून्।
न जलान्तरितान् न द्विः शक्तूनद्यान्न केवलान्॥
पृथक्पानं पुनर्दानं सामिषं पयसा निशि।
दन्तच्छेदनमुष्णञ्च सप्त शक्तुषु वर्जयेत्॥"
इति भावप्रकाशः।
अक्षय्यतृतीयायां तद्भक्षणफलम्। ज्योतिषे।
"शक्तून् खादति यस्तत्र रिपवो नाशं प्रयान्ति भुवं
भुङ्क्ते यस्तु निरामिषं स हि भवेत् जन्मान्तरे पण्डितः।"
इति तिथ्यादितत्त्वम्।
मेषसंक्रान्त्यां तद्दानविधिर्यथा। स्मृतिः।
"मेषादौ शक्तवो देया वारिपूर्णाश्च गर्गरी।"
महार्णवे।
"यो ददाति हि मेषादौ शक्तूनम्बुघटान्वितान्।
पितॄनुद्दिश्य विप्रेभ्यः सर्व्वपापैः प्रमुच्यते।
विप्रेभ्यः पादुके छत्रं पितृभ्यो विषुवे शुभम्॥"
इति तिथ्यादितत्त्वम्।
चातुर्मास्यव्रते प्रातःस्नानस्य घृतशक्तवो दक्षिणा यथा। नारदीयम्।
"नित्यस्नाने वर्हिर्दद्यात्त्रिखण्डे घृतशक्तवः॥"
नित्यस्नाने प्रातःस्नाने। इति मलमासतत्त्वम्॥

शक्तुकः, पुं, विषभेदः। तस्य लक्षणम्।
"यद्ग्रन्थिः शक्तुकेनेव पूर्णमध्यः स
इति भाव
शक्तुफला, स्त्री, शमीवृक्षः। इत्यमरः॥
शक्तुफली, स्त्री, शमीवृक्षः। इति शब्द
शक्त्वर्द्दः, पुं, (शक्तेर्वर्द्दः।) शमदारा कु
ग्रीवास्त्पन्नो धर्म्मः स्वेदो निखामय।
"कुक्षौ ललाटे ग्रीवायां यदा धर्म्मः
शक्त्यर्द्दं तं विजानीयादायतोच्छ्वासम
इति रा
शक्तिः, पुं, वशिष्ठमुनेर्ज्येष्ठपुत्रः। इति
(यथा, महाभारते। १।१७७।३।
"अपश्यद्दर्जितः संख्ये मुनिं प्रतिमुखा
शक्तिं नाम महाभागं वशिष्ठकुलवर्द्ध
ज्येष्ठं पुत्रं पुत्रशतात् वशिष्ठस्य महा
अयं हि इक्ष्वाकुवंशीयं कल्माषपादन
अशपत्। स च नृपतो राक्षसो भूत्वा
ममभक्षयत्। एतद्वृत्तान्तस्तु महाभारते
अध्याये द्रष्टव्यः॥)
शक्रः, त्रि, प्रियंवदः। इत्यमरटीकायां
शक्नुः, त्रि, प्रियवदः। इत्यमरः॥
शक्मा, [न्]पुं, (शक+"अश्रिशकिभ्यां
उणा० ४।१४६। इति मनिन्।)
शकधातोरौणादिकमनिन्प्रत्ययेन निष्प
सिद्धान्तकौमुदी॥ (इन्द्रः। इत्युज्ज्वल
१४६॥ क्ली, शक्यतेऽनेनाभिमतं प्राप्
तीष्टं साधयितुं वा शक्यते कर्त्तुमि
शक+मनिन्। कर्म्म। इति निघण्टुः।
यथा, ऋग्वेदे। ८।३४।३।
"दुहन्ति शक्मना पयः॥"
"शक्मना कर्म्मणा।" इति तद्भाष्ये साय
शक्यः, त्रि, (शक+"शकिसहोश्च।" ३।१
इति यत्) समर्थनीयः। (यथा, रघुः।
"शक्योऽस्य मन्युर्भवता विनेतुं
गाः कोटिशः स्पर्शयता घटोध्नीः॥"
शक्याश्रयः। (यदा भावे यत् स्यात्
क्लीवलिङ्गः स्यात्। यथा, गीतायाम्।१
"नहि शक्यं देहभृता त्यक्तुं कर्म्माण्यशे
तथाच रामायणे। २।१२।५।
"तानि सर्व्वाणि संयत्तु शक्यं राम जितं
पुं, वाच्योऽर्थः। यथा,—
"शक्योऽर्थोऽभिधया ज्ञेयः लक्ष्यो लक्षणय

व्यङ्ग्यो व्यञ्जनया ज्ञेयस्तिस्रः शब्दस्य शक्
इत्यलङ्कारशास्
अन्यच्च।
"शक्यं सादृश्यबुद्धिस्तु भवेदुपमितेर्गुणः
इति भाषापरिच्छे
अपि च। ईश्वरसङ्केतः शक्तिस्तया अर्थबो
पद वाचकम्। यथा गोत्वादिविशिष्टबो
गवादिपदं तद्वोध्योऽर्थो गवादिर्वाच्यः स
नुस्याये इत्युच्यते।" इति शक्तिवादः॥

शक्यतावच्छेदकं त्रि,(शक्यतायाः अवच्छेदकम्।) शक्यार्थे आसमानधर्म्मः । यथा ।
"एवञ्च नाहत्वधर्म्मस्य शक्यतावच्छेदकत्वे दृष्टान्तः ।" इति शक्तिवादः ॥

शक्रः, पुं, (शक्नोति दैत्यान् नाशयितुम् । शक + "स्फायितञ्चीति ।" उणा० २।१३। इति रक् ।) इन्द्रः । इत्यमरः ॥ (यथा, रघुः । ३ । ३९ ।
"धनुर्भृतामग्रत एव रक्षिणां
जहार शक्रः किल गूढविग्रहः ॥")
कुटजवृक्षः । अर्ज्जुनवृक्षः । इति मेदिनी ॥
ज्येष्ठानक्षत्रम् । यथा,—
"शक्रो निरृतिस्तोयं विश्वविरिञ्चौ हरिर्वसु-वरुणः ।
अजपादोऽहिर्बुध्नः पूषा चेतीश्वरा भानाम् ॥"
इति ज्योतिस्तत्त्वम् ॥
चतुर्द्दशेन्द्रा यथा,—
"विश्वभुक् च विपश्चिच्च सुचित्तिः शिखिरेव च ।
विभुर्मनोजवश्चैव तथोजस्वी बलिस्तथा ॥
अद्भुतश्च तथा शान्तिस्तथा विश्वरो वृषः ।
ऋतधामा दिवः स्वामी शुचिः शक्राश्चतुर्द्दश ॥"*
ब्राह्मदिनमासाब्देषु इन्द्राणां नाशसंख्या यथा ।
"ब्राह्मे दिने वै नश्यन्ति चतुर्द्दश पुरन्दराः ।
शतानि मासि चत्वारि विंशत्या सहितानि च ।
अब्दे पञ्चसहस्राणि चत्वारिंशच्छतानि च ॥"
इत्याद्ये वह्निपुराणे गणभेदनामाध्यायः ॥*॥
इन्द्रत्वप्राप्तिकारणं यथा,—

इन्द्र उवाच ।

"रमाकान्तभवत्प्रीत्यै कृतं क्रतुशतं पुरा ।
तेन पुण्येन सम्प्राप्तं मया पौरन्दरं पदम् ॥
इदानीं नूतनः कोऽपि जातो दिवि पुरन्दरः ।
न तेन धर्म्मो विहितो न तेन क्रतवः कृताः ।
मम सिंहासनं दिव्यं कथमाक्रान्तमच्युत ॥
इत्येवं वदतस्तस्य श्रुत्वा वाक्यं रमापतिः ।
उन्मीलितस्मिताक्षोऽसावुवाच मधुरं वचः ॥

श्रीभगवानुवाच ।

देवाद्यो मनुष्यान्ता मम सेवापरायणाः ।
मद्याजनरता लोका मद्भक्तिस्तुतिपाठकाः ॥
मन्मूर्त्तिषु कृतध्याना मत्कथाश्रवणा इह ।
मत्पादोदकनैवेद्यभोजिनोऽन्वहमेव ये ॥
मन्नामकीर्त्तनपरा मम स्मृतिपरायणाः ।
मन्मन्त्रजापका नित्यमनन्याश्रयसम्पदः ॥
किं विधित्वं किमिन्द्रत्वं देवत्वमपरं किमु ।
तेषामलभ्यं यत्किञ्चित् दुर्लभं नास्ति संसृतौ ॥
किं दानैरल्पफलदैः किं तपोभिः किमध्वरैः ।
सेव्यमानैः क्षितितले स मम प्रीतिमान् सदा ॥

इन्द्र उवाच ।

भगवन् कर्म्मणा केन स त्वत्प्रीतिपरो भवेत् ।
तद्वदस्व महाबाहो प्रपन्नभयभञ्जन ॥

श्रीभगवानुवाच ।

अनेकधा मद्भजनं मम प्रीतिकरं परम् ।
यद्भक्त्या तत् पदं लेभे तत् शृणुष्व पुरन्दर ॥
जपत्वष्टादशाध्यायगीतानां श्लोकपञ्चकम् ।
तथा भक्त्या नु मत्प्राप्तं तव साम्राज्यमुत्तमम् ॥"
इति पाद्मोत्तरखण्डे ८६ अध्यायः ॥
(समर्थे, त्रि । यथा, ऋग्वेदे । ४ । १६ । ६ ।
"विश्वानि शक्रो नर्य्याणि विद्वा-
नपो रिरेच सखिभिर्निकामैः ॥"
"विद्वान् जानन् शक्रः समर्थ इन्द्रः ।" इति तद्भाष्ये सायणः ॥)

शक्रक्रीडाचलः, पुं, (शक्रस्य क्रीडाचलः क्रीडापर्व्वतः ।) सुमेरुपर्व्वतः । इति हलायुधः ॥

शक्रगोपः, पुं, इन्द्रगोपकीटः । इति जटाधरः ॥ (यथा, हरिवंशे । ६६ । ५ ।
"नवशष्पाभिरामाणि शक्रगोपाकुलानि च ।
नष्टदावाग्निमार्गाणि वनानि प्रचकाशिरे ॥")

शक्रजः, पुं, (शक्राज्जायते इति । जन + डः ।) काकः । इति त्रिकाण्डशेषः ॥ इन्द्रजाते, त्रि ॥

शक्रजातः, पुं, (शक्राज्जातः ।) काकः । इति शब्दरत्नावली ॥ इन्द्रजाते, त्रि ॥

शक्रजित्, पुं, (शक्रं जितवानिति । जि + क्विप् ।) रावणपुत्रः । इति त्रिकाण्डशेषः ॥ (यथा, रघुः । १३ । ८२ ।
"अपि प्रभुः सानुशयोऽधुना स्यात्
किमुत्सुकः शक्रजितोऽपि हन्ता ॥")
इन्द्रजेतरि, त्रि, ॥

शक्रद्रुमः, (शक्रस्य पुं द्रुमः ।) देवदारुवृक्षः । इति भावप्रकाशः ॥

शक्रधनुः, [स्] क्ली, (शक्रस्य धनुः ।) इन्द्रधनुः । इत्यमरः ॥ शर्ण्डा इति रामधनुक इति च भाषा ।
"इन्द्रायुधं शक्रधनुः कौशिकायुधमित्यपि ।
ऐरावतं रोहितं स्यादवक्रं यदि तद्धनुः ॥"
इति शब्दरत्नावली ।
(यथा, महाभारते । ५ । २६ । ११ ।
"यथाकाशे शक्रधनुः प्रकाशते
न चैकवर्णं न च विद्म किन्नु तत् ॥")

शक्रध्वजः, पुं, (शक्रस्य ध्वजः ।) इन्द्रध्वजः । (यथा, आर्य्यासप्तशत्याम् । २६८ ।
"ते चेटिनः क्व सम्प्रति शक्रध्वज ! यैः कृतस्तवोच्छ्रायः ।
ईषां वा मेढिं वाधुनातनास्त्वां विधित्सन्ति ॥")
तद्विवरणं यथा,—

नृपवाहन उवाच ।

"भगवन् श्रोतुमिच्छामि तस्य उत्थापनं यथा ।
क्रियते दिन ऋक्षे च द्रव्यमन्त्रविधिं वद ॥

अगस्त्य उवाच ।

ब्रह्मणा कथितं शक्र बृहस्पतिसमीपतः ।
यथा तथा प्रवक्ष्यामि विधिं केतोः समुच्छ्रये ॥

बृहस्पतिरुवाच ।

शुभाह्नि ऋक्षे करणे मुहूर्त्ते शुभमङ्गले ।
दैवज्ञः सूत्रधारश्च वनं गच्छेत् सहायवान् ॥
देवीप्रतिष्ठाविधिना यात्राया या प्रचोदिता ।
गत्वा वृक्षं शुभं पुष्पं धवार्ज्जुनप्रियङ्करम् ॥
उदुम्बरशक्रशाखे च पत्रैर्न शोभना द्रुमः ।
ध्वजार्थं वर्जयेदेव देवोद्यानजान् द्रुमान् ॥
कन्या सर्व्वे नु वा वृक्षाः करमानेन कल्पयेत् ।
पञ्चादशकरा ज्येष्ठ नव पञ्च कराधरा ॥
श्मशानस्थं क्रिमिचितं तथा पक्षिनिकेतनम् ।
वल्मीकपिहितवनस्थं सुशुष्ककोटरान्तरम् ॥
कुब्जाश्च वटनिकाश्च तथा स्त्रीनामगर्जितान् ।
विद्युद्वज्रहताञ्चैव दग्धांश्च परिवर्जयेत् ॥
अनामे चन्दनं चाम्रं शालशाकमयं तथा ।
कर्त्तव्यं शक्रचिह्नार्थं न चान्यं वृक्षजं क्वचित् ॥
शुभभूमिभवं ग्राह्यं शुभतोयं शुभावहम् ।
ततः संपूजयेद्वृक्षं प्राङ्मुखोदङ्मुखोऽपि वा ॥
नमो वृक्षपते वृक्ष त्वामर्च्चयति पार्थिवः ।
ध्वजार्थं तत्त्वतो नाथ अन्यथा उपगम्यताम् ॥
राजा देवो वनिस्थश्च युगहस्ते तथैव च ।
वासवानां सहावृक्षं कृत्वा चान्यत्र गम्यताम् ॥
ध्वजार्थं देवराजस्य न चाशिष्टश्च अत्र च ।
पूजयित्वा ततो वृक्षं बलिं भूताय दापयेत् ॥
प्रभाते छेदयेद्वृक्षं शुभस्वप्नादिदर्शनैः ।
शङ्खाम्बरधरश्चैव समुद्रतरणं नदी ॥
वृक्षान् नम्रान् शुभान् चारोनारोहेत् देवता-
लयम् ।
देवी द्विजस्तथा साधुर्निग्रन्थश्च हरेरपि ॥
प्रतिमा पूजिता स्वप्ने चिरं सिद्धिफलप्रदा ।
स्वप्नसांसदधिलाभं रुधिरं घृतरोदनम् ॥
अगम्यागमनं दृष्ट्वा आशु सिद्धिफलप्रदम् ।
द्रुमास्तिलं धनं धान्यं शत्रुनाशं यथा शुभम् ॥
फलं पुष्पं सिता दूर्व्वा स्वप्ने लब्धा जयावहाः ।
शङ्खास्तथा दन्तिलाभा राज्यप्रदायकाः ॥
गौः सवत्सा नवसुता दृष्टा पुत्रफलप्रदा ।
पङ्कस्योद्धरणं कूपे व्याधिमोचकरं चिरात् ॥
एवं स्वप्नान् शुभान् दृष्ट्वा तथा छिन्देत पाद-
पम् ।
उदङ्मुखः प्राङ्मुखो वा मधुवच्चाक्रपशुना ॥
पूर्व्वोत्तरे च पतनं शस्तोऽशब्दोऽव्रणः शुभः ।
अलग्नपादपे चान्ये अन्यथा तु परित्यजेत् ॥
अष्टाङ्गुलं त्यजेत् मूले अग्रे तन्तु जले क्षिपेत् ।
तथा तमानयेद्वक्ष्ये शकटेन हयैरपि ॥
युवानैर्बलसम्पन्नैर्नेयं तत्पुरतः परम् ।
नीयमाना यदा यष्टी समा वा चतुरस्रका ॥
हन्ता वा भङ्गमाधत्ते राज्ञः पुत्रं पुरोहितम् ।
आरभङ्गे बलं भिन्द्याद्राज्यनाशं चयं तथा ॥
अर्थस्य अक्षभङ्गेन शान्तिस्तत्र तु कारयेत् ।
इन्द्रनैच्छ्रयमन्त्रेण जातवेदसमापि वा ॥
तथा नीत्वा शुभे लग्ने पुरस्तादुपवेशयेत् ।
द्वारशोभां पथरथ्या गृहे हट्टे च कारयेत् ॥
यदा पटहनादाश्च वेश्यागर्द्धद्विजातयः ।
सङ्कुलैर्वेदशब्दैश्च ता नेया यत्र उच्छ्रयेत् ॥
तत्रस्थाश्चित्रकर्म्मावनिर्म्मितैस्तान्तु वेष्टयेत् ।
वस्त्रैरप्रज्जरीमाल्यैः शुभैः शक्तैर्यथाक्रमम् ॥
नन्दोपनन्दसंज्ञाश्च कुमार्य्यः प्रथमांशगाः ।
देवौ जयविजयाख्याः षोडशांशव्यवस्थिता ।

अधिके शक्रजयिनो तथार्यमा देवतेर्दण्डाः ।
ध्वजपरिमाणार्थे सपरिधिः प्रथमं पिटम् ॥
षोडशांशविहीनानि कुर्य्याच्छेषाणि बुद्धिमान् ।
रसनां विचित्रवर्णां प्रथमां दद्यात् स्वयम्भूः ॥
सुरक्तां चतुरस्राञ्च विश्वकर्म्मा द्वितीयतः ।
अष्टासान्तु स्वयं शक्रो नीलरक्तां प्रदापयेत् ॥
कृष्णं यमेन वृत्तञ्च वरुणेन सहस्रिकम् ।
मञ्जिष्ठाजलदाकारं वासुदेवो मसूरकम् ॥
नीलवर्णञ्च तं दद्यात् स्कन्दो बहुविचित्रितम् ।
वृत्तन्तु दहनो दद्यात् सुवर्णाभं तथाष्टमम् ॥
वैदूर्य्यमष्टममिन्द्रो ग्रैवेयं दापयेद् बुधः ।
चक्राङ्गाकृतिन्तु सूर्य्यो विश्वेदेवाः पद्मनिभम् ॥
ऋषयो नियमं दद्युर्नीलं नीलोत्पलाभासम् ।
गुरुणा शुक्रेण ततो विशालं मूर्द्धनी न्यस्तम् ॥
अन्यैर्विचित्राणि बहुमातृभिः स्वानि रूपाणि ।
यद्येकेनैव दत्तन्तु केतोस्तत्तस्य भूषणम् ॥
तदेव तं विजानीयाद्यन्त्रादिभिस्तमुच्छ्रयेत् ।
प्रथमं प्रविशमाना भूमिं यष्टिर्हन्ति राष्ट्रम् ॥
बालानां तालशब्देन देशविघातं समाचष्टे ।
नृपवधकरा विशीर्णा शुभावहा सर्व्वसान्द्रा च ॥
शम्भुसूर्य्ययमशक्रसोमधनदवारुणैः ।
वर्ज्जीयत्नृपिमन्त्राय होतव्या दधि चाक्षताः ॥
शक्रस्कन्दगुरुरुद्रमप्सरादि प्रपाठयेत् ।
हुत्वा तु विधिवद्वह्निज्वाला लक्षेत बुद्धिमान् ॥
सुतेजाः सुमना दीप्तः संहतो रुचिरप्रभः ।
रक्ताशोकसमाकारो रथभेरीस्वनः शुभः ॥
शङ्खदुन्दुभिमेघानां नादाः शस्तास्तु पावके ।
ततः सकदलीचुदण्डान् पताकानि समुच्छ्रये ॥
अन्याश्च विविधाः शोभाः शक्रकेतुसमुच्छ्रये ।
प्रोष्ठपदे तु अष्टम्यां शुक्लायां शोभने ऋक्षे ॥
आश्विने वाथ शुक्लायां श्रवणेनाथ उच्छ्रयेत् ।
पौरजनलम्नहन्दैः पटभेरीनिनादितम् ॥
वितानध्वजशोभाढ्यं पताकाभिः समुज्ज्वलम् ।
विप्रैश्शक्रमन्त्रेण सिंहरवाकृतेन च ॥
दृढमातृकरम्यस्थ शुभतोरणमाकुलम् ।
अविलम्बितमुत्थानमभग्नपिठकं समम् ॥
न द्रुतं वा समुत्थाप्य केतुं वासवज विभो ।
उच्छ्रित रचयेत्प्राज्ञः काकोलूककपोतयोः ॥
न समुत्थापन दद्यादन्येषामपि पक्षिणाम् ।
यस्मादेशेन न कुर्य्यात् सुधे केतोर्यथाविधि ॥
तथा सुसमस्थितं पूज्यं सुवयन्वसुयन्वितम् ।
रात्रौ जागरञ्च कुर्य्यादिन्द्रमन्त्रानुकीर्त्तनम् ॥
पुरोहितः सदैवज्ञः शुभशान्तिरतः सदा ।
कृतपाता नृप हन्यात् पताका सचिवोत्तमम् ॥
पिटकं युवराजस्य सचिवमनुक्रम्यते ।,
राष्ट्रं तोरणपातेन ध्वजे भङ्गयो भवेत् ॥
पतिते शक्रदण्डे तु नृपमन्यं समादिशेत् ।
क्रमिजालञ्च उद्याने मत्रभात्तस्कराद्भयम् ।
कुसुमं सम्भते शान्तिर्नृपस्य नगरस्य च ॥
यावत्तिष्ठति तिष्ठन्ति तावत् पौराः सदा
हृष्टाः ।
केतोर्निरता यत्नेन भूयोयाहिमकान्याय ॥

पाते तु तथैव कुर्य्यादुत्थाने यादृशी पूजा ।
रात्रौ शुभकृत् पातनं नो दृष्टं काककपोतैः ॥
याति नृपं सहराष्ट्रं यथैव कारयेत् केतुम् ।
नगरे वा पुरे खेटे यद्येवं कुर्व्वते पौराः ॥
पुरे नगरस्य द्वारे वृषसिंहखगोत्थितम् ।
केतु समस्तघोराणां नाशनं अभयं महत् ॥
एवं पूर्व्वं हरिः केतुं प्राप्तवान् वृषवाहनात् ।
तथा ब्रह्मसुतेनैव ब्रह्मणः शक्रमागतः ॥
तेन सोमस्य तद्वृत्तं ततो दक्षे समागतम् ।
तदाप्रभृति कुर्व्वन्ति नृपा अद्यापि उच्छ्रयम् ॥
एवं यः कारयेद्राजा केतुं विजयकारकम् ।
तस्य पृथ्वी बलोपेता सद्वीपा वशगा भवेत् ॥"
इत्याद्ये देवीपुराणे इन्द्रध्वजलक्षणम् २१
अध्यायः ॥
शक्रनन्दनः, पुं, (शक्रस्य नन्दनः ।) अर्ज्जुनः
इति जटाधरः । (इन्द्रपुत्रमात्रमपि । शक्रं
नन्दयतीति । नन्दि+ल्युः ।) इन्द्रानन्द-
कारके, त्रि ॥
शक्रपर्य्यायः, पुं,(शक्रस्य पर्य्यायो नाम यस्य ।)
कुटजवृक्षः । इति रत्नमाला । इन्द्रवाचकश्च ॥
शक्रपादपः, पुं,(शक्रस्य पादपः ।)देवदारुवृक्षः ।
इत्यमरः ॥ कुटजवृक्षः । इति राजनिर्घण्टः ॥
शक्रपुष्पिका,स्त्री,(शक्रपुष्पी+स्वार्थे कन् । अत
इत्वम् ।) अग्निशिखावृक्षः । इति रत्नमाला ॥
शक्रपुष्पी, स्त्री, अग्निशिखावृक्षः । इत्यमरः ॥
शक्रबीजं, क्ली, इन्द्रयवः । इति राजनिर्घण्टः ॥
शक्रभवनं, क्ली, (शक्रस्य भवनम् ।) स्वर्गः । इति
त्रिकाण्डशेषः ॥
शक्रभित्, [द्] पुं, (शक्रं भिनत्तीति । भिद्+
क्विप् ।) इन्द्रजित् । स च रावणपुत्रः । इति
शब्दरत्नावली ॥
शक्रभूभवा, स्त्री, इन्द्रवारुणी । इति शब्द-
चन्द्रिका ॥
शक्रमाता, स्त्री, (शक्रस्य मातेव ।) भार्गी ।
इति राजनिर्घण्टः । इन्द्रजननी च ॥
शक्रमातृका, स्त्री, (शक्रस्य मातृकेव ।) शक्र-
ध्वजाङ्गयष्टिविशेषः । यथा, कालिकापुराणम् ।
"कुमार्य्यः पञ्च कर्त्तव्याः शक्रस्य नृपसत्तम ।
. . . .
. . . .
मातृकार्द्धप्रमाणा तु यन्त्रे हस्तद्वय तथा ॥
एवं कृत्वा कुमारीश्च मातृकां केतुमेव च ।
एकादश्यां सिते पक्षे यष्टीनामधिवासनम् ॥"
इति तिथ्यादितत्त्वम् ॥
शक्रमूर्द्धा, [न्] स्त्री, (शक्रस्येव मूर्द्धा यस्य ।)
वल्मीकः । इति त्रिकाण्डशेषः ॥
शक्रवल्ली, स्त्री, (शक्रप्रिया वल्ली ।) इन्द्र-
वारुणी । इति राजनिर्घण्टः ॥
शक्रवाहनः, पुं, (शक्रं वाहयतीति । वह+
णिच्+ल्युः ।) मेघः । इति शब्दचन्द्रिका ॥
शक्रशरासनं, क्ली, (शक्रस्य शरासनम् ।) इन्द्र-
धनुः । इति हलायुधः ॥

शक्रशाखी, [न्] पुं, (शक्रनामकः
कुटजवृक्षः । इति भावप्रकाशः ॥
शक्रशाला, स्त्री, प्रतिश्रयः । इति भूरि
पुस्तकान्तरे सत्रशाला इति पाठश्च
शाला ।) इन्द्रगृहञ्च ॥
शक्रशिरः,[स्]क्ली, (शक्रस्य शिर इव ।)
इति राजनिर्घण्टः ॥ इन्द्रमस्तकञ्च ।
शक्रसारथिः, पुं, (शक्रस्य सारथिः ।)
इति हलायुधः ॥
शक्रसुतः, पुं, (शक्रस्य सुतः ।) वालि
इति हलायुधः ॥ इन्द्रपुत्रमात्रञ्च ॥
शक्रसुधा, स्त्री, (शक्रस्य सुधेव ।) पाल
शब्दचन्द्रिका ॥ कुन्दुरुखोटी इति भ
शक्रसृष्टा, स्त्री, (शक्रेण सृष्टा ।) ह
इति त्रिकाण्डशेषः ॥
शक्राख्यः, पुं, (शक्रस्य आख्या यस्य ।)
इति त्रिकाण्डशेषः । इन्द्रनामके, त्रि,
शक्राणी, स्त्री, (शक्रस्य पत्नी । ङीप् । आ
शची । इति शब्दमाला ॥ (यथा,
भारते । ५ । ११ । २२ ।
"बृहस्पतिरथोवाच शक्राणीं भयमोहित
शक्राशनं, क्ली, (शक्रेण अश्यते इति ।
ल्युट् ।) भङ्गा । भाङ् इति भाषा
गुणाः ।,
"शक्राशनन्तु तीक्ष्णोष्णं मोहकृत् कुष्ठन
बलमेधाग्निकृत् श्लेष्मदोषहारि रसाय
इति राजव
अन्यत् विजयाशब्दे द्रष्टव्यम् । इन्द्रभोज
शक्राशनः, पुं, (शक्र इति नाम अश्नुते
तीति । अश+ल्युः ।) कुटजवृक्षः । इति
चन्द्रिका ॥
शक्राह्वः, पुं, (शक्रस्य आह्वा यस्य ।) इन्द्र
इति राजनिर्घण्टः । इन्द्रनामके, त्रि ॥
शक्तिः, पुं, (शक+बाहुलकात् क्तिन् ।)
वज्रम् । हस्ती । पर्व्वतः । इति संक्षिप्त
णादिवृत्तिः ॥
शक्रोत्थानं, क्ली, (शक्रस्य शक्रध्वजस्य उत्था
शक्रध्वजोत्सवः । अस्य विधिर्लिख्यते ।
श्रीशौर्व्व उवाच ।
"अथातः शृणु राजेन्द्र शक्रोत्थानध्वजोत्स
यत्कृत्वा नृपतिर्याति नो कदाचित् पराभ
रवौ हरिस्थे द्वादश्यां श्रवणे सितपक्षके ।
आराधयेन्नृपः सम्यक् सर्व्वविघ्नोपशान्तये ।
राजोपरिचरो नाम वसुनामापरस्तु यः ।
नृपस्तेनायमतुलो यज्ञः प्रावर्त्तितः पुरा ।
प्राविट्काले च नभसि द्वादश्यामसितेतरे
पुरोहितो बहुविधैर्वाद्यैस्तूर्य्यैः समन्वितः ।
प्रथमं शक्रकेत्वर्थे वृक्षमामन्त्र्य वर्द्धयेत् ।
सांवत्सरो वार्द्धकिश्च कृतकौतुकमङ्गलः ॥
उद्याने देवतागारे श्मशाने मार्गमध्यतः ।
ये जातास्तरवस्तांस्तु वर्जयेद्वासवध्वजे ॥
बहुवल्लीयुतं शुष्कं बहुकण्टकसंयुतम् ।

वृक्षादनीयुक्तं लताच्छन्नं तरुं त्यजेत् ॥
सवामममाकीर्णं कोटरैर्वहुभिर्युतम् ।
नानलविध्वस्तं तरुं यत्नेन वर्जयेत् ॥
दोषसंघाच ये वृक्षा पतिष्ठन्ना पतिभ्रशाः ।
न् सदा वर्जयेद्वीरः सर्व्वदा शक्रपूजने ॥
र्जुनोऽप्यश्वकर्णश्च प्रियको धव एव च ।
ाडुम्बरश्च पञ्चेते केत्वर्थे सत्तमाः स्मृताः ॥
न्ये च देवदार्व्याद्याः शालाद्यास्तरवस्तथा ।
परिग्राह्या नापशस्ताः कदाचन ॥
व वृक्षं ततो रात्रौ स्पृष्ट्वा मन्त्रमिमं पठेत् ॥
ानि वृक्षे तु भूतानि तेभ्यः स्वस्ति नमोऽस्तु वः।
पहारं गृहीत्वेमं क्रियतां वासवध्वजः ॥
ार्थिवस्त्वां वरयते स्वस्ति तेऽस्तु नगोत्तम ।
ध्वजार्थं देवराजस्य पूजेयं प्रतिगृह्यताम् ॥
ातोऽपरेऽह्नि तं छित्त्वा मूलमष्टाङ्गुलं पुनः ।
ज्जले क्षिपेत्तदग्रस्य छित्त्वैवं चतुरङ्गुलम् ॥
ातो नीत्वा पुरद्वारं केतुं निर्म्माय तत्र वै ।
शुक्लाष्टम्यां भाद्रपदे केतुं वेदीं प्रवेशयेत् ॥
द्वाविंशद्धस्तमानस्तु अधमः केतुरुच्यते ।
द्वाविंशत्तु ततो ज्यायान् द्वाचत्वारिंशदेव च ॥
ततोऽधिकः समाख्यातो द्विपञ्चाशत्तयोत्तमः ।
कुमार्य्यः पञ्च कर्त्तव्याः शक्रस्य नृपसत्तम ! ॥
शालमय्यस्तु ताः सर्व्वास्त्वपराः शक्रमातृकाः ।
केतोः पादप्रमाणेन कार्य्याः शक्रकुमारिकाः ॥
मातृकार्द्धप्रमाणात्तु यन्त्रं हस्तद्वयं तथा ।
एवं कृत्वा कुमारीश्च मातृकां केतुमेव च ॥
एकादश्यां सिते पक्षे यष्टिं तामधिवासयेत् ।
अधिवास्य ततो यष्टिं गन्धद्वारादिमन्त्रकैः ॥
द्वादश्यां मण्डलं कृत्वा वासवं विस्तृतात्मकम् ।
अच्युतं पूजयित्वा तु शक्रं पश्चात् प्रपूजयेत् ॥
शक्रस्य प्रतिमां कुर्य्यात् कानकीं दारवीं तथा ।
अन्यतैजसभूतां वा सर्व्वाभावे तु मृण्मयीम् ॥
तां मण्डलस्य मध्ये तु पूजयित्वा विशेषतः ।
ततः शुभे मुहूर्त्ते तु केतुमुत्थापयेन्नृपः ॥
वज्रहस्त सुरारिघ्न बहुनेत्र पुरन्दर ।
क्षेमार्थं सर्व्वलोकानां पूजेयं प्रतिगृह्यताम् ॥

एह्येहि सर्व्वामरसिद्धसंघै-
रभिष्टुतो वज्रधरामरेश ! ।
समुत्थितस्त्वं श्रवणाद्यपादे
गृहाण पूजां भगवन् नमस्ते ॥

एवमुक्तरतन्त्रोक्तैर्दहनप्लवनादिभिः ।
इति मन्त्रेण तन्त्रेण नानानैवेद्यवेदनैः ॥
आपूपैः पायसैः पानैर्गुडैर्धानाभिरेव च ।
भक्ष्यैर्भोज्यैश्च विविधैः पूजयेत् श्रीविवृद्धये ॥
वटेषु दशदिक्पालान् ग्रहांश्च परिपूजयेत् ।
साध्यादीन् सकलान्देवान् मातृः सर्वास्त्वनु-
क्रमात् ॥
ततः शुभे मुहूर्त्ते तु ब्राह्मणैर्वर्द्धकिसंयुतः ।
केतोरुत्थानभूमिन्तु यज्ञवेद्याश्च पश्चिमे ।
विप्रैः पुरोहितैः सार्द्धं यन्त्रश्लिष्टं समातृकम् ।
रज्जुभिः पञ्चभिर्बद्धं यन्त्रश्लिष्टं समातृकम् ।
कुमारीभिश्च संयुक्तं दिक्पालानाञ्च पेटकैः ॥”

पेटकैः स्थाने पट्टकैरिति च पाठः ।
“वृहद्भिरतिकान्तैश्च नानाद्रव्यसुपूरितैः ।
यथावर्णैर्ध्वजादिशयोजितैर्वस्त्रवेष्टितैः ॥
युक्तं तं किङ्किणीजालैर्वृहद्घण्टैश्च चामरैः ।
भूषितं वहुरत्नैश्च माल्यैर्वहुविधैस्तथा ॥
वहुपुष्पैः सुगन्धैश्च भूषितं रत्नमालया ।
चित्रमाल्याम्बरधरैश्चतुभिरपि तोरणैः ॥
उत्थापयेन्महाकेतुं राजामात्यैः शनैः शनैः ।
तमुत्थाप्य महाकेतुं पूजितं मण्डलान्तरे ॥
प्रतिमां तां नयेन्मूलं केतोः शक्रं विचिन्तयन् ।
यजेत्तं पूर्व्ववत्तत्र शचीं मातलिमेव च ॥
जयन्तं तनयं तस्य वज्रमैरावतं तथा ।
ग्रहांश्चाप्यथ दिक्पालान् सर्वांश्च गणदेवताः ।
अपूपाद्यैः पूजयेत्तु वलिभिः पायसादिभिः ।
पूजितानाञ्च देवानां शक्रहोमं समाचरेत् ॥
होमान्ते तु वलिं दद्यात् वानवाय महात्मने ॥
तिलं घृतं चाक्षतञ्च पुष्पं दूर्व्वां तथैव च ।
एतैस्तु जुहुयाद्देवान् स्वैः स्वैर्मन्त्रैर्नरोत्तमः ॥
ततो होमावसाने तु भोजयेदपि ब्राह्मणान् ।
एवं संपूजयेन्नित्यं सप्तरात्रं दिने दिने ॥
ब्राह्मणैः सहितो राजा वेदवेदाङ्गपारगैः ।
सर्व्वत्र शक्रपूजासु यज्ञेषु परिकीर्त्तितः ॥
त्रातारमिति मन्त्रोऽयं वासवस्य प्रियः सदा ।
एवं कृत्वा दिवाभागे शक्रोत्थापनमादितः ॥
श्रवणर्क्षयुतायान्तु द्वादश्यां पार्थिवः स्वयम् ।
अन्त्यपादे भरण्यान्तु निशि शक्रं विसर्जयेत् ॥
सुप्तेषु सर्व्वलोकेषु यथा राजा न पश्यति ।
पश्यन्मासान्मृत्युमाप्नोति राजा दृष्ट्वा विसर्जनम् ॥
शक्रस्य नृपशार्द्दूल तस्मान्नेक्षेत तं नृपः ।
विसर्ज्जनस्य मन्त्रोऽयं पुराविद्भिरुदीरितः ॥
सार्द्धं सुरासुरगणैः पुरन्दर शतक्रतो ।
उपहारं गृहीत्वेमं महेन्द्रध्वज गम्यताम् ॥
सूतके तु समुत्पन्ने वारे भौमस्य वा शनेः ।
भूमिकम्पादिकोत्पाते वासवं न विसर्जयेत् ॥
उत्पाते सप्तरात्रन्तु तथोपप्लवदर्शने ।
व्यतीत्य शनिभौमौ च ह्यन्यर्क्षेऽपि विसर्जयेत् ॥
मृतके त्वथ संप्राप्ते व्यतीते सूतके पुनः ।
तस्मिंस्तस्मिन् दिने चैव सूतकान्ते विसर्जयेत् ॥
तथा रक्षेन्नृपः केतुं पतन्ति शकुना यथा ।
न केतौ नृपशार्द्दूल यावन्नापि विसर्जनम् ॥
शनैः शनैः पातयेत्तु यथोत्थापनमादितः ।
कृतं तथान्यथा भग्ने केतौ मृत्युमवाप्नुयात् ॥
विसृष्टं शक्रकेतुं तं सालङ्कारं तथा निशि ।
क्षिपेदनेन मन्त्रेण त्वगाधे सलिले नृपः ॥
तिष्ठ केतो महाभाग यावत् संवत्सरं जले ।
भवाय सर्व्वलोकानामन्तरायविनाशक ! ॥
उत्थापयेत्तूर्य्यरवैः सर्व्वलोकस्य वै पुरः ।
रक्षा विसर्जयेत् केतुं विशेषोऽयं प्रपूजने ॥
एवं यः कुरुते पूजां वासवस्य महात्मनः ।
स चिरं पृथिवीं भुक्त्वा वासवं लोकमाप्नुयात् ॥
न तस्य राज्ये दुर्भिक्षं नेतयो नाप्यधर्म्मकृत् ।
स्थास्यन्ति मृत्युर्नाकाले जनानां तत्र [illegible]गते ॥

तत्तुल्यः कोऽपि नान्योऽस्ति प्रियः शक्रस्य
पार्थिव ! ।
तस्य पूजा सर्वपूजा केशवाद्याश्च तत्रगाः ॥
सकलकलुषहारि व्याधिदुर्भिक्षनाशि
सकलभवनिवेशं सर्वसौभाग्यकारि ।
सुरपतिगृहगामीद्वार्च्चनं शक्रकेतोः
प्रतिशरदमनेकैः पूजयेत् श्रीविवृद्धे ॥”
इति श्रीकालिकापुराणे ८८ अध्यायः ॥

शक्रोत्सवः, पुं, (शक्रस्योत्सवः ।) इन्द्रस्य उत्सवः । तत्पर्य्यायः । ध्वजोत्थानम् २ । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । १ । ६३ । २७ ।
“वरदानमहायज्ञैस्तथा शक्रोत्सवेन च ।
संपूजिता मघवता वसुचेदीश्वरो नृपः ॥”)
अस्य विवरणं शक्रोत्थानशब्दे द्रष्टव्यम् ॥

शक्तः, पुं,(शक + “मूङ्शक्याविभ्यः क्तः ।”उणा० ४ । १०८ । इति क्तः ।) प्रियंवदः । इति शक्त-शब्दटीकायां भरतः ॥

शक्वरः,पुं, वृषः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

शक्वरी, स्त्री, (शक्नोति कर्म्माणि कर्त्तुमिति । शक+“स्नामदिपदीति ।”उणा० ४ । ११२ । इति वनिप् ।“वनो रच ।” ४ । १ । ७ । इति ङीब्रौ ।) अङ्गुली । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ नदीविशेषः । मेखला । छन्दोभेदः । इति मेदिनी ॥ स तु चतुर्द्दशाक्षरपादवृत्तम् । तद्भेदा यथा । असंवाधा १ वसन्ततिलकम् २ सिंहोद्धता ३ अपराजिता ४ प्रहरणकलिका ५ वासन्ती ६ लोला ७ नान्दीमुखी ८ । इति छन्दोमञ्जरी ॥ (ऋक् । यथा, ऋग्वेदे । १० । ७१ । ११ ।
“ऋचां त्वः पोषमास्ते पुपुष्वान्
गायत्रं त्वो गायति शक्वरीषु ॥”* ॥
शक्नोति क्षीरादिप्रदानेन तद्वन्तं प्रीणयितुं स्पर्शनेन वा पापमपनेतुमिति । शक + वनिप् । ङीब्रौ च । गौः । इति निघण्टुः । २ । ११ ॥)

शक्वा,[न्] पुं, (शक्नोतीति । शक् + “स्नामदिपदीति ।” उणा० ४ । ११२ । इति वनिप् ।) हस्ती । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

शङ्कः, पुं, शकटादिवाहकवृषभः । यथा,—
“स्कन्धवाहस्तु शङ्कश्च ऋङ्गी गौरवधूर्त्तिलः ।”
इति हारावली ॥

शङ्करः, पुं, (शं कल्याणं करोतीति । शम् + कृ + “शमिधातोः संज्ञायाम् ।” ३ ।२ । १४ । इति अच् ।) शिवः । इत्यमरः ॥ अस्य व्युत्पत्तिर्यथा,—
“सदा ध्यानाच्च भक्तानां भवनं यन्निरामयम् ।
भूतनाथत्वमप्यस्मात्तेनाहं शङ्करः स्मृतः ॥”
इति स्कन्दपुराणम् ॥
अस्य भस्मास्थिधारणकारणं यथा,—
“विसृज्य तान् ब्रह्मविष्णुमयान् वृषभ[illegible]
आदाय सगणान् सर्वान् कामरूपा[illegible]
उग्रतारां ततो देवीं गणांश्च मा[illegible]

अन्त्यं मध्यं परार्द्धञ्च दशवृद्ध्या यथाक्रमम् ॥”

इति भरतधृतब्रह्माण्डपुराणवचनम् ॥७॥

धर्म्मशास्त्रप्रयोजकमुनिविशेषः । यथा,—

“मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः ।
यमापस्तम्बसम्वर्त्ताः कात्यायनबृहस्पती ॥
पराशरव्यासशङ्खलिखिता दक्षगोतमौ ।
शातातपो वशिष्ठश्च धर्म्मशास्त्रप्रयोजकाः ॥”

इति याज्ञवल्क्यवचनम् ॥

शङ्खक, क्ली, वलयः । इति मेदिनी ॥

शङ्खकः, पुं क्ली, (शङ्ख + स्वार्थे कन् ।) कम्बुः ।
शिरोरोगे, पुं । इति मेदिनी ॥ तस्य लक्षणादि यथा,—

शनैश्चरः । इति मेदिनी ॥

शनैश्चरः, पुं, (शनैर्मन्दं मन्दं चरतीति । चर गतौ + पचाद्यच् ।) शनिः । इत्यमरः । अस्य स्तोत्रं यथा,—
"नीलाञ्जनचयप्रख्यं रविसूनुं महाग्रहम् ।
छायाया गर्भसम्भूतं वन्दे भक्त्या शनैश्चरम् ॥
व्यासभाषितमिदं स्तोत्रं यः पठेत् प्रयतो नरः ।
दिवा वा यदि वा रात्रौ शान्तिस्तस्य न संशयः ॥"
इति व्यासभाषितस्तोत्रम् ॥

शप, स्व, शीकारः । शप् करोति । इति सिद्धान्तकौमुदी ॥

शप, य ञ शी } क्रोशे । इति कविकल्पद्रुमः ।
शप, शो ञ } (दिवा०-भ्वा०-उभ०-सक०-अनिट् ।) द्वौ तालव्यादी । य ञ, शप्यति शप्यते । शो, शप्ता । शो, अशाप्सीत् । ञ, शपति शपते । क्रोश उक्तिविशेषः । निर्भर्त्सनमिति चतुर्भुजः । सत्यपथोऽसौ शपथानशप्यत् । क्रोशो भ्वादिपक्षे शान्तिदानम् । शपते । अत्रेऽपि शपथार्थोपलक्षणार्थमिति निदमात् शपथे चात्मनेपदं अन्यत्र परस्मैपदम् । कृष्णाय शपते गोपी । मलेति त्वां शपाप मा । इति रघौ । अहं शपामि यदि किञ्चिदपि स्मरामि । इति वाचा शरीरस्पर्शनात् इति पाणिनीयाः । केचित्तु शपते निन्दार्थमात्मनेपदं अन्यत्र विभाषा इत्याहुः । मैव प्रतिवाचमदत्त केशवः शपमानाय न चेदिभूभुजे । इति माघः । इति दुर्गादासः ॥

शप, पुं, शपथः । इति हेमचन्द्रः ॥ निर्भर्त्सनम् आलिङ्गनम् । इति [illegible] ॥

शपथः, पुं, (शप क्रोशे + "शीङ्शपिरुगमि" इति । उणा० ३ । ११३ । इति अथ ।) शपनं यद्वत् [illegible] मिथ्याभि-वचनम् । [illegible] । इति भाष्यम् । वाचा शरीरस्पर्शनम् । इति सर्वानन्दः । अथवा [illegible] । इति रमानाथः । इति भरतः ॥ तत्पर्य्यायः । शपनम् २ । इत्यमरः ॥ शपः ३ । इति हेमचन्द्रः ॥ सत्यम् ४ समयः ५ शापः ६ प्रत्ययः ७ अभिषङ्गः ८ । इति जटाधरः ॥ * ॥ चतुष्पाद्व्यवहारस्य क्रियापादाङ्गम् । यथा अथ शपथः ।
"युक्तिष्वप्यवसन्नासु शपथैरेनमर्दयेत् ।
अर्थकालबलापेक्षमग्न्यम्बुसुकृतादिभिः ॥"
अर्थस्य विवादास्पदस्य बलं बह्वल्पभावः । कालस्य च बलं पुण्यापुण्यत्वम् । तदपेक्षं यथा स्यादित्यर्थः । दूर्वाकरत्वस्य पुत्रादिस्पर्शस्य चाग्रे दर्शनीयत्वात् । अत्र मयैतत् कृतं न वा इति प्रतिज्ञामुच्चार्य्याग्नौ जले वा हस्तं प्रक्षिपेत् । एतन्मिथ्यात्वे मम सुकृतं नश्येदिति वा ब्रूयात् । न त्वग्निपरीक्षां जलपरीक्षां वा कुर्य्यात् इत्यभिप्रायवर्णनं युक्तम् । तस्या महाभियोगविषयकत्वेन शपथसमभिव्याहारानर्हत्वात् । सुकृतादिभिरित्यादिना दूर्वासत्याभ्युपगमः । तथा च विष्णुः । सर्व्वेष्वेवार्थजातेषु मूल्यं कनकं प्रकल्पयेत् । तत्र कृष्णलोने शूद्रं दूर्वाकरं शापयेत् । द्विकृष्णलोने तिलकरम् । त्रिकृष्णलोने जलकरम् । चतुःकृष्णलोने स्वर्णकरम् । पञ्चकृष्णलोने सीतोद्धृतमष्टीकरम् सुवर्णार्द्धोने कोषो देयः । शूद्रस्य यथासमये विहिता क्रिया तथा द्विगुणेऽर्थे राजन्यस्य त्रिगुणेऽर्थे वैश्यस्य चतुर्गुणेऽर्थे ब्राह्मणस्येति । कृष्णलः काञ्चनरत्तिका तन्मूल्यादूने कृष्णलोने एवमन्यत्र । मनुः ।
"सत्येन शापयेद्विप्रं क्षत्त्रियं वाहनायुधैः ।
गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्व्वैस्तु पातकैः ।
पुत्त्रदारस्य वाप्येव शिरांसि स्पर्शयेत् पृथक् ॥"
ब्राह्मणेन मयैतत् कृतं न कृतं चेति प्रतिज्ञामुच्चार्य्य सत्यमिति वक्तव्यम् । तथैव क्षत्त्रियेण वाहनायुधं स्प्रष्टव्यम् । तथैव वैश्येन गोबीजकाञ्चनानामन्यतमं स्प्रष्टव्यम् । शूद्रेण तु पूर्व्वोक्तं सर्व्वमेव स्प्रष्टव्यम् । तेषां वृथाकृतस्पर्शानां पातकहेतुत्वात् पातकशब्देन निर्देशः । हलायुधोऽप्येवम् । दैवक्रियाविषयमाह नारदः ।
"अरण्ये निर्ज्जने रात्रावन्तर्वेश्मनि साहसे ।
न्यासापहरणे चैव दिव्या सम्भवति क्रिया ॥"
बृहस्पतिः ।
"देवब्राह्मणपादांश्च पुत्त्रदारशिरांसि च ।
एते तु शपथाः प्रोक्ता मनुना स्वल्पकारणे ।
साहसेष्वभिशापे च दिव्यानि तु विशोधनम् ॥"
अत्र शपथदिव्ययोः पृथक्त्वप्रतीतेः शपथे न दिव्यधर्म्माः । किन्तु वैधे कर्म्मणि तत्र शौचार्थं स्नानाचमनादिकार्य्यम् । दिव्यानि तु दिव्यतत्त्वे कथितानि अत्र लिखितानि । अत्राभियुक्तेन शपथः कर्त्तव्य इत्युक्ते उभयेच्छया अभियोक्तापि । इत्याह नारदः ।
"अभियोक्ता शिरोवर्त्ती सर्व्वत्रैव प्रकीर्त्तितः ।
इच्छयान्यतरः कुर्य्यादितरो वर्त्तयेच्छिरः ॥"
इतरः शपथकर्म्मभिन्नः । तथा कात्यायनः ।
"आचतुर्द्दशकादह्नो यस्य नो राजदैविकम् ।
व्यसनं जायते घोरं स ज्ञेयः शपथे शुचिः ॥"
व्यसनमापत् । घोरमतिपीडाकरम् । तथा च कोषाधिकारे यस्य पक्षेदित्युपक्रम्य विष्णुः ।
"रोगोऽग्निर्ज्ञातिमरणं राजातङ्कमथापि वा ।
तमशुद्धं विजानीयात्तथा शुद्धं विपर्य्ययात् ॥"
कात्यायनः ।
"तस्यैकस्य न सर्व्वस्य जनस्य यदि तद्भवेत् ।
रोगोऽग्निर्ज्ञातिमरणमृणं दद्यात् दमञ्च सः ।
ज्वरातिसारविस्फोटगूढास्थिपरिपीडनम् ।
नेत्ररुग्गलरोगश्च तथोन्मादः प्रजायते ।
शिरोरुग्भुजभङ्गश्च दैविका व्याधयो नृणाम् ॥"
तस्यैकस्येति न तु देशव्यापकमरणादिः । मनुः ।
"न वृथा शपथं कुर्य्यात् स्वल्पेऽप्यर्थे नरो बुधः ।
वृथा हि शपथं कुर्व्वन् प्रेत्य चेह च नश्यति ।
कामिनीषु विवाहेषु गवां भक्ष्ये तथेन्धने ।
ब्राह्मणाभ्युपपत्तौ च शपथे नास्ति पातकम् ॥"
कामिनीष्विति रहसि कामिनीसन्तोषार्थं वृथा शपथः । एवं विवाहसिद्ध्यर्थं गोभक्षार्थं आवश्यकहोमेन्धनार्थं ब्राह्मणरक्षार्थमिन्धनादौ । यमः ।
"वृथा तु शपथं कृत्वा कीटस्य वधसंयुतम् ।
अनृतेन च युज्येत वधेन च तथा नरः ।
तस्मात् शपथं कुर्य्यान्नरो मिथ्यावधेप्सितम् ॥"
कीटस्येति प्राणिमात्रोपलक्षणम् । तदवधेन वृथाशपथकर्त्ता युज्यत इत्यर्थः । इति व्यवहारतत्त्वम् ॥

शपनं, क्ली, (शप क्रोशे + ल्युट् ।) शपथः । इत्यमरः ॥ गालिः । इति त्रिकाण्डशेषः ॥

शप्तः, पुं, (शप + क्तः ।) तृणविशेषः । इति शब्दचन्द्रिका ॥ उलु इति भाषा ॥ अभिशापप्राप्ते, त्रि ॥ (यथा, भागवते । १ । १८ । ४१ ।
"निशम्य शप्तमतदर्हं नरेन्द्रं
स ब्राह्मणो नात्मजमभ्यनन्दत् ॥")

शफं, क्ली, गवादीनां खुरः । (यथा, याज्ञवल्क्ये । १ । २०४ ।
"हेमशृङ्गी शफै रौप्यैः सुशीला वस्त्रसंयुता ।
सकांस्यपात्रा दातव्या क्षीरिणी गौः सदक्षिणा ॥")
वृक्षमूलम् । इति मेदिनी ॥

शफरः, पुं, स्त्री, मत्स्यविशेषः । इत्यमरः ॥ पुं इति भाषा ॥ (यथा,—
"कैवर्त्तकर्कशकरात् शफरयुवतोऽपि
जाले पुनर्निपतितः शफरो विपाकः ॥"
यथा च ।
"अगाधजलसञ्चारी विकारी न च रोहितः ।
गण्डूषजलमात्रेण शफरी फर्फरायते ॥"
इत्युद्भटः ।)

शफराधिपः, पुं, (शफराणां मत्स्यानां अधिपः ।) इल्लीशमत्स्यः । इति त्रिकाण्डशेषः ॥ तत्पर्य्यायः । इल्लिशः, २ वारिकर्पूरः ३ गाङ्गेयः ४ जलतालः ५ । इति त्रिकाण्डशेषः ।

क शब्दकृतौ। कविकल्पद्रुमः॥ (चुरा०-
-अक०-सेट्।) क, शब्दयति। सोपसर्ग-
विस्कृतौ मतः। प्रशब्दयति गभीरमत्वर्थं
ः स्फुटीकरोतीत्यर्थः। इति दुर्गादासः॥
,पुं,(शब्द+भावे घञ्। यद्वा, शप आक्रोशे
"शाशपिभ्यां ददनौ।"उणा० ४।९७। इति
। पकारस्य वकारः।)श्रोत्रग्राह्यगुणपदार्थ-
।पः।तत्पर्य्यायः। निनादः२ निनदः ३ ध्वनिः
।नः ५ रवः ६ स्वनः ७ स्वानः ८ निर्घोषः९
ादः १० नादः ११ निस्वानः १२ निस्वनः
आरवः १४ आरावः १५ संरावः १६
ावः १७। इत्यमरः॥ संरवः १८ रावः १९
न शब्दचन्द्रिका॥ घोषः २०। इति जटा-
ः॥ स च ध्वन्यात्मको वर्णात्मकश्च। यथा,
कण्ठसंयोगादिजन्या वर्णास्ते कादयो
मताः।
ः शब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते॥
ीचीतरङ्गन्यायेन तदुत्पत्तिस्तु कीर्त्तिता।
दम्बगोलकन्यायादुत्पत्तिः कस्यचिन्मते॥
त्पन्नः को विनष्टः क इति बुद्धेरनित्यता।
ायं क इति बुद्धिस्तु साजात्यमवलम्बते॥
शौषधमित्यादौ सजातीयेऽपि दर्शनात्।"
इति भाषा परिच्छेदः॥
व्दं निरूपयति।
शब्दो ध्वनिश्च वर्णश्च मृदङ्गादिभवो ध्वनिः।'
त्रं: शब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते॥"
इति॥
ोवृत्तिराकाशसमवेतः। दूरस्थशब्दस्याग्र-
ाणादाह श्रोत्रोत्पन्न इति कण्ठसंयोगादिजन्या
ार्णास्ते कादयो मता इति। ननु मृदङ्गाद्यव-
च्छेदेनोत्पन्नं शब्दं श्रोत्रे कथमुत्पत्तिरतः आह
ीचीतरङ्गन्यायेन तदुत्पत्तिस्तु कीर्त्तिता इति।
प्राद्यशब्दस्य बहिर्दशदिगवच्छिन्नोऽन्यः शब्द-
स्तेनैव शब्देन जन्यते तेन चापरस्तद्व्यापक
एवं क्रमेण श्रोत्रोत्पन्नो गृह्यते इति। कदम्ब-
गोलकन्यायादुत्पत्तिः कस्यचिन्मते इति आद्य-
शब्दात् दशदिक्षु दश शब्दा उत्पद्यन्ते। तत-
श्चान्ये दश शब्दा उत्पद्यन्ते इति भावः।
अस्मिन् कल्पे गौरवादुक्तं कस्यचिन्मते इति।
ननु शब्दस्य नित्यत्वादुत्पत्तिः कथमतः आह।
उत्पन्नः को विनष्टः क इति बुद्धेरनित्यता इति।
शब्दानामुत्पादविनाशप्रत्ययशालित्वादनित्यत्व-
मित्यर्थः। ननु स एवायं ककार इत्यादिप्रत्य-
भिज्ञानाच्छब्दानां नित्यत्वम्। इत्यत्रोत्पाद-
विनाशबुद्धिभ्रमरूपा इत्यत आह सोऽयं क
इति बुद्धिस्तु साजात्यमवलम्बते। तदेवौष-
धमित्यादौ सजातीयेऽपि दर्शनात् इति। तत्र
प्रत्यभिज्ञानस्य तज्जातीयत्वं विषयः। ननु
तत्तद्व्यक्तिभेदो विषयः उत्पत्त्यादिविरोधात्।
इत्यत्र द्वयोरपि बुद्धोर्न भ्रमत्वमिति। ननु
सजातीयत्वे सोऽयमिति प्रत्यभिज्ञायां भासते
इति कुत्र दृष्टमित्यत आह तदेवेति। तदौषधं
मया क्रतं तदेवान्येनापि कृतमित्यादिदर्शना-
दिति भाव इति सिद्धान्तमुक्तावली॥ * ॥
दशविधशब्दा यथा,—
"षड्जर्षभगान्धारमध्यमः पञ्चमस्तथा।
अतः परन्तु विज्ञेयो निषादो धैवतस्तथा।
इष्टश्चानिष्टशब्दश्च संहतः प्रविभागवान्॥
इत्याश्वमेधिकपर्व्व॥
शब्दविशेषाणां नामविशेषा यथा,—
"शब्दो गुणानुरागोत्थः प्रशादः शीत्कृतं
नृणाम्।
पर्द्दनं गुदजे शब्दे कर्द्दनं कुक्षिसम्भवे॥
क्ष्वेड़ा तु सिंहनादोऽथ क्रन्दनं सुभटध्वनिः।
कोलाहलः कलकलस्तुमुलो व्याकुलो रवः॥
मर्म्मरो वस्त्रपर्णादेर्भूषणानान्तु शिञ्जितम्।
हेषा ह्रेषा तुरङ्गाणां गजानां गर्ज्जबृंहिते॥
विस्फारो धनुषां हम्भारम्भे गोर्जलदस्य च।
स्तनितं गर्ज्जितं गर्ज्जिः स्वनितं रसितादि च॥
कूजितं स्याद्विहङ्गानां तिरश्चां रुतवाशिते।
वृकस्य रेषणं रेवा बुक्कनं भषणं शुनः॥
पीड़ोत्तानान्तु कणितं मणितं रतकूजितम्।
प्रक्वाणः प्रक्वणस्तन्त्र्या मद्दलस्य तु गुन्दलः॥
चोत्ननन्तु कीचकानां भेर्य्या नादस्तु दद्दुरः।
तारोऽत्युच्चैर्ध्वनिर्मन्द्रो गम्भीरो मधुरः कलः॥
काकली तु कलः सूक्ष्म एकतालो लयानुगः।
काकुर्ध्वनिविकारः स्यात् प्रतिश्रुत्तु प्रतिध्वनिः॥"
इति हेमचन्द्रः॥
अथैकार्थानुलोमविलोमसमशब्दाः। नयन १
नर्त्तन २ कनक ३ कण्टक ४ सहिम ५ कलह
६ कालिका ७ सरस ८ सहास ९ मध्यम १०
मदस्य ११ नवेन १२ तावता १३ तारता १४
विभवि १५ करक १६ कम्बुक १७ काश्चिका १८
नन्दन १९ दलाद २० दभद २१ योग्ययो: २२
लगुल २३ नुततनु २४ हावबहा २५ पतदातप २६
दरभैरव २७ कलपुलक २८ वरकैरव २९ वरपौरव
३० तरुपौरुत ३१ रदसोदर ३२ नदमेदन ३३
दम्पतीपदम् ३४ नहाकहान ३५ माधवबहव-
वधमा ३६ नन्दनन्दन ३७ तहित ३८ समास
३९ कारिका ४० पादपा ४१ जलज ४२ नाना
४३ मम ४४।*॥ अथान्यार्थकानुलोमविलोम-
शब्दाः। वन्दे १ देवे २ लिख ३ रवौ ४ मानो ५
हंसा ६ लीवा ७ यामा ८ विभु ९ घट १०
रम ११ यम १२ कम्य १३ राधा १४ राधया
१५ रुचाना १६ नन्दक १७ मानिका १८
कामिनी १९ रात्रि २० भारती २१ हासिका
२२ गगन २३ वरदा २४ भार्गव २५ कटकम्
२६ दीनरक्षा २७ महोरगा २८ दातापिना
२९ दिमाविका ३० मदालिशा ३१ दसराज
३२ हरिदेवे ३३ मन्यादामा ३४ मोदिवल्लन ३५
मन्दनयन ३६ नन्दकुदर ३७ महमानुल ३८
रमणिमर्दन ३९ मायनद्दनिव ४० नवसार-
सनद ४१ सार ४२ दन ४३ दुदा ४४ गदा ४५
दमि ४६ सदा ४७ समा ४८ मूल ४९ [illegible] ५०
विभा ५१ ॥*॥ अथ संस्कृतप्राकृतसमपुंलिङ्ग-
शब्दाः। आहार १ हार २ विहार ३ सार
४ समर ५ सम्भोग ६ रोग ७ असुर ८ संहार
९ अमर १० वार ११ वारण १२ गण १३
टङ्कार १४ भार १५ आकर १६ लोल १७
उल्लोल १८ विलास १९ वायस २० हर २१
अहङ्कार २२ होर २३ अङ्कुर २४ नीहार २५
उरग २६ राग २७ भाल २८ तरल २९
गोविन्द ३० कन्द ३१ उदर ३२ तरुण ३३
तरणि ३४ दास ३५ मोह ३६ सन्दोह ३७
मास ३८ खुर ३९ खर ४० तर ४१ मल ४२
मङ्गर ४३ आरम्भ ४४ हास ४५ कर ४६
करि ४७ किरि ४८ कीर ४९ कोल ५० कल्लोल
५१ धीर ५२ मल ५३ मलय ५४ करीर ५५
वामदेव ५६ असि ५७ वीर ५८ नर ५९ नरक
६० करङ्क ६१ दण्ड ६२ चण्डाल ६३ रङ्ग ६४
दर ६५ सरल ६६ कलङ्क ६७ कम्बल ६८
आकार ६९ पङ्क ७० खल ७१ वकुल ७२
कुरङ्ग ७३ देह ७४ सन्देह ७५ सङ्ग ७६ पर
७७ कुरर ७८ तरङ्ग ७९ चारु ८० ससार ८१
भङ्ग ८२ अरि ८३ हरि ८४ परिणाह ८५
कण्ठ ८६ कुण्ठ ८७ अहि ८८ दाह ८९ परि-
मर ९० रवि ९१ हाहा ९२ मञ्जु ९३ मञ्जीर
९४ वाह ९५ अचल ९६ कुल ९७ कुमार ९८
कुम्भ ९९ कुम्भीर १०० मार १०१ विरल १०२
कवल १०३ नार १०४ कन्दर १०५ उदार
१०६ पार १०७ जम्बीर १०८ केशरि १०९
वराह ११० मुरारि १११ काल ११२ काकोल
११३ कुन्तल ११४ चमूरु ११५ विराम ११६
वाल ११७ आलोल ११८ वाहु ११९ रण १२०
मङ्गर १२१ घोल १२२ भार १२३ संसार १२४
केरल १२५ समीरण १२६ टङ्क १२७ ताल
१२८ आसार १२९ चामर १३० कुलीर १३१
तुरङ्ग १३२ सुर १३३ कङ्काल १३४ कन्दल १३५
कराल १३६ विकाल १३७ पूर १३८ हेरम्ब
१३९ कम्बु १४० विधु १४१ सिन्धु १४२ बुध
१४३ धनुर्धन्य १४४ कुन्द १४५ इन्द्र १४६
मन्दर १४७ समीर १४८ समूह १४९ गन्ध
१५० भीम १५१ पङ्क १५२ महर १५३
किरीट १५४ तमाल १५५ गुञ्ज १५६ हिल्लाल
१५७ तोमर १५८ सर्वांवह १५९ विम्ब १६०
पुष्प १६१ डिण्डीर १६२ पिण्ड १६३ वर १६४
संहर १६५ कोण १६६ काण १६७ संरम्भ
१६८ सोम १६९ दम्भ १७० विकार १७१
दास १७२ वसन्त १७३ चाम्र १७४ वेमन्त
१७५ वाम १७६ वामन १७७ वामर १७८
वामार १७९ मार १८० मरम १८१ हिरण
१८२ वखर १८३ [illegible] ॥ अथ
संस्कृत[illegible] हेला १
हिला २ [illegible] ३ [illegible] का [illegible]
६ [illegible] ९ [illegible]
[illegible] ११ [illegible]

[illegible] १३ [illegible] १६ धारणी १७ गोणी १८ [illegible] १९ [illegible] २० मणी २१ वीणा २२ [illegible] २३ [illegible] २४ वेणी २५ [illegible] २६ [illegible] २७ [illegible] २८ [illegible] २९ [illegible] ३० [illegible] ३१ रामा ३२ [illegible] ३३ वसुन्धरा ३४ [illegible] ३५ कराली ३६ चामुण्डा ३७ चण्डा ३८ [illegible] ३९ [illegible] ४० [illegible] ४१ ॥०॥ अथ [illegible] । वन १ फन २ [illegible] ३ मूल ४ [illegible] ५ [illegible] ६ कुल ७ [illegible] ८ [illegible] ९ [illegible] १० [illegible] ११ गभीर १२ [illegible] १३ [illegible] १४ कमल १५ चोर १६ [illegible] १७ [illegible] १८ [illegible] १९ [illegible] २० रजत [illegible]

[illegible]

कृति २४ छाया २५ जाया २६ कया २७ कान्ता २८ धात्री २९ रात्रि ३० रति ३१ गति ३२ कम्बरा ३३ धारणा ३४ धारा ३५ तारा ३६ कारा ३७ जरा ३८ धरा ३९ भाजि ४० राजि ४१ रजनी ४२ मर्त्ति ४३ कीर्त्ति ४४ कन्या ४५ तटी ४६ नटी ४७ नारी ४८ मारी ४९ दरी ५० दामी ५१ घटिका ५२ खटिका ५३ जटा ५४ कथा ५५ रथा ५६ शिखा ५७ संध्या ५८ कालिन्दी ५९ कलिका ६० कला ६१ काली ६२ कराली ६३ दुर्गा ६४ ॥०॥ अथ निरोष्ठक्लीबलिङ्गशब्दाः । चरण १ कारण २ चक्र ३ चक्षु ४ लक्षण ५ तक्र ६ रजत ७ शत ८ शरीर ९ चीर १० नीर ११ चक्षि १२ सीर १३ धन १४ कनक १५ निधान १६ ध्यान १७ सन्धान १८ दान १९ नलिन २० नगर २१ गात्र २२ छत्र २३ नेत्र २४ चलि २५ दात्र २६ चालिङ्गन २७ स्थान २८ शिरः २९ चरित्र ३० जल ३१ स्थल ३२ स्थान ३३ कनक ३४ तिल ३५ कीलाल ३६ जाल ३७ चलक ३८ लाल ३९ दैन्य ४० लिङ्ग ४१ चङ्ग ४२ लाचक्ष ४३ हिरण्य ४४ सैन्य ४५ चक्ष ४६ चजिन ४७ यान ४८ चरक् ४९ काञ्चन ५० चानन ५१ कानन ५२ हाटक ५३ नाटक ५४ नाट्य ५५ तैल ५६ चेल ५७ रसातल ५८ चन्दन ५९ सदन ६० स्नान ६१ निदान ६२ दधि ६३ चन्दन ६४ चत्वर ६५ लक्षण ६६ लल ६७ शस्त ६८ शास्त्र ६९ दल ७० [illegible] ७१ ॥०॥ अथ निरोष्ठक्रियापदानि । चाराध्ये १ चस्ति २ नचास्ति ३ निन्दति ४ [illegible] ५ चागमति ६ [illegible] ७ ध्यायति ८ चर्चति ९ याचते १० दाति ११ वदति १२ [illegible] १३ [illegible] १४ [illegible] १५ गच्छति १६ [illegible] १७ [illegible] १८ नयति १९ चायाति २० [illegible] २१ [illegible] २२ [illegible] २३ [illegible] २४ [illegible] २५ याति २६ जयति २७ [illegible] २८ [illegible] २९ । इति कविकल्पलतायां १ स्तबके ७ कुसुमम् ॥

शब्दकार, त्रि, (शब्दं करोतीति । कृ + अण् । [illegible] ।" ३ । २ । २४ । इति [illegible] ।) शब्दं करोति यः । यथा, "[illegible] ।
[illegible] शब्दकार [illegible]
[illegible] ॥"
इति भट्टौ ५ सर्गः ॥

शब्दग्रह, पुं, (शब्दं गृह्णातीति । ग्रह + [illegible] ।" ३ । ३ । ५८ । इति [illegible] ।) कर्णः । इत्यमरः ॥ [illegible]
शब्दन, त्रि, [illegible] ।" ३ । २ । १४८ । इति [illegible] । [illegible] ।) [illegible]

शब्दभेदी, [न्] पुं, (शब्दमनुसृत्य भेत्तुं शीलमस्य । भिद् + णिनिः ।) अर्ज्जुनः । इति त्रिकाण्डशेषः ॥ पायुः । इति केचित् ॥ वाणविशेषः । इति रामायणम् ॥

शब्दवेधी, [न्] पुं, (शब्दमनुसृत्य वेद्धुं शीलमस्य । विध + णिनिः ।) अर्ज्जुनः । इति [illegible] ॥ दशरथराजः । यथा,—
"शब्दशब्देन कौशल्ये कुमारेण धनुष्मता ।
कुमारः शब्दवेधीति मया पापमिदं कृतम् ॥"
इति वाल्मीकीये रामायणे ६३ अध्यायः ॥ शब्दवेधी इत्ययं शब्दकीर्त्तिनेति यावत् । इति तट्टीका ॥

शब्दाधिष्ठानं, क्ली, (शब्दस्य अधिष्ठानं [illegible] स्थानम् ।) कर्णः । इति हेमचन्द्रः ॥

शम, उ भ य इर् शमे । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-अक०- सेट् । क्त्वावेट् ।) उ, शमित्वा शान्त्वा ॥ भ य शाम्यति । इर्, अशमत् अशमीत् । पुषादित्वान्नित्यं ङ इत्यन्ये । शमः शान्तीभावः । शशाम वृष्ट्यापि विना दवाग्निरिति रघुः । शम इति पदस्य [illegible] मभवे शान्तीकरणेऽप्ययमिति चतुर्भुजः ।
"वरेण शमितुं लोकानलं दग्धुं हि तपः ।"
इति कुमारसम्भवम् ।
'यचो निशम्याधिपतिर्दिवौकसाम् ।'
इत्यादावनेकार्थत्वात् तुल्येत्यर्थः ॥ [illegible] इत्यत्र चाशब्दस्य व्यवस्थावाचित्वात् [illegible] नित्यं ह्रस्वः शमयति । इति दुर्गादासः ।

शम, ङ क भ आलोचे । इति कविकल्पद्रुमः ॥ (चुरा०-आत्म०-उभ०-इति केचित्-सक०-सेट् ।) आलोचः प्रणिधानम् । [illegible] वाशब्दस्य व्यवस्थावाचित्वात् [illegible] ह्रस्वाभावः । ङ क, शामयते [illegible] शामयति शामयते ।
"निशामय तदुत्पत्तिं [illegible]
[illegible] ।" इति दुर्गादासः ॥

शम, पुं, (शम्यन इति । शम + [illegible] नोदात्तोपदेशेति [illegible] ।) शान्ति । [illegible] (यथा, राजतरङ्गिण्याम् । ४ । १९ ।
"[illegible] तस्य [illegible]
[illegible] ।")
मोक्ष । इति त्रिकाण्डशेषः ॥ पाणि । [illegible] शमशब्दोऽकारान्तो [illegible] रामाश्रमः ॥ [illegible] इति राजनिर्घण्टः ॥ [illegible] इति वेदान्तसारः ॥ [illegible] इति भगवद्गीतादशमाध्यायस्य [illegible] [illegible] । (यथा, गीतायाम् । [illegible]
"बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः ।"
[illegible] ।) [illegible] ॥ यथा, [illegible] । ३ । ११ । २ ।
"[illegible]
[illegible]

म्मनिवृत्तिः । यथा, गीतायाम् । ६ । ३ ।
गारूढस्य तस्यैव शमः कारणमुच्यते ॥"
: उपरमः सर्व्वकर्म्मभ्यो निवृत्तिः ।" इति
द्भाष्यम् ॥ शान्तरसस्य स्थायिभावः । यथा,
हित्यदर्पणे । ३ । २३८ ।
न्तः शमः स्थायिभाव उत्तमः प्रकृति-
र्म्मतः ॥"
३ न. । यथा, राजतरङ्गिण्याम् । २ । ५६ ।
भवन्निर्म्मलं व्योम देवौकल्यैः सह क्रमात् ।
कं भूपालयोगेन दुर्भिक्षस्य शमं ययौ ॥")
कः त्रि, (शमयतीति । शम + णिच् + ण्वुल् ।
[illegible] ेति ।" ७ । ३ । ३४ । इति न
धः ।) शान्तिकारकः । शान्तशमघाती-
कप्रत्ययेन निष्पन्नमेतत् ॥
थः पुं, (शम + "ट्वगमिदमिभ्यथ ।" इति
थः । इत्युज्ज्वलदत्तः । ३ । ११४ ।) शान्तिः ।
त्यमरः ॥ मन्त्री । इति मेदिनी ॥
नं, क्ली. (शम + ल्युट् ।) यज्ञार्थपशुहननम् ।
त्यमरः ॥ शान्तिः । इति मेदिनी ॥ (यथा,
नौ । ५ । १ । ३८ । "वातस्य शमनं
ोपनं वा ।" इति काशिका ॥) चर्व्वणम् ।
ति धरणिः ॥ हिंसा । इति हेमचन्द्रः ॥
प्रतिसंहारः । यथा, मार्कण्डेये । ९८ ।
१३ ।
"निमिषकोटादिमयः कालरूपः क्षयात्मकः ।
प्रसीद स्वेच्छया रूपं स्वतेजःशमनं कुरु ॥"
निवारकः । यथा, तत्रैव देवीमाहात्म्ये ।
"दुर्वृत्तवृत्तशमनं तव देवि ! शीलम् ॥")
शमनः, पुं, (शमयति पापिनां कर्म्म चालोचय-
तीति । कर्त्तरि ल्युः ।) यमः । इत्यमरः ॥ मृग-
भेदः । इति शब्दचन्द्रिका ॥ कलायः । इति
राजनिर्घण्टः ॥
शमनस्वसा, [ऋ] स्त्री. (शमनस्य यमस्य
स्वसा ।) यमुना । इत्यमरः ॥
शमनी, स्त्री. (शमयति नृणां व्यापारान् । शम +
ल्युः । स्त्रियां ङीप् ।) रात्रिः । इति शमनी-
षदशब्ददर्शनात् ॥ (शाम्यते अनेन इत्यर्थे
करणे ल्युटि शान्तिकारके, त्रि । यथा, भाग-
वते । ३ । २४ । ३८ ।
"मातुराध्यात्मिकीं विद्यां शमनीं सर्व्वकर्म्म-
णाम् ॥")
शमनीषदः, पुं, (शमन्यां सीदतीति । सद +
क्विप् ।) निशाचरः । राक्षसः । इति त्रिकाण्ड-
शेषः ॥
शमलं, क्ली, (शम + "वृषादिभ्यश्चित् ।" उणा०
१ । १११ । इति कलः ।) विष्ठा । इत्यमरः ॥
पापम् । इति संक्षिप्तसारोणादिवृत्तिः ॥ (यथा,
भागवते । २ । ७ । ३ ।
"हन्ते यदानुगमनं [illegible] ॥")
शमान्तकः, पुं, (शमस्य शान्तेरन्तकः ।) काम-
देवः । इति त्रिकाण्डशेषः ॥
शमिः, स्त्री, शिम्बा । इति हेमचन्द्रः ॥

शमितः, त्रि, (शम + क्तः ।) शान्तः । इत्यमरः ॥
शमिरः, पुं, शमीवृक्षः । इति शब्दरत्नावली ॥
शमिरोहः, पुं, शिवः । इति त्रिकाण्डशेषः ॥
शमी स्त्री, वृक्षविशेषः । शाँइ इति भाषा ।
(यथा, शाकुन्तले । ३ ।
"अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव ॥")
तत्पर्य्यायः । सक्तुफला २ शिवा ३ । इत्यमरः ॥
सक्तुफली ४ । इति शब्दरत्नावली ॥ शान्ता ५
तुङ्गा ६ कचरिपुफला ७ केशमथनी ८ ईशानी ९
लक्ष्मीः १० तपनतनया ११ इष्टा १२ शुभ-
करी १३ हविर्गन्धा १४ । मेध्या १५ दुरितदमनी
१६ शङ्कुफलिका १७ समुद्रा १८ मङ्गल्या १९
सुरभिः २० पापशमनी २१ भद्रा २२ शङ्करी
२३ केशहन्त्री २४ शिवाफला २५ सुपत्रा २६
सुखदा २७ । अस्य गुणाः । रूक्षत्वम् । कषा-
यत्वम् । रक्तपित्तातिसारनाशित्वञ्च । तत्फल-
गुणाः । गुरुत्वम् । स्वादुत्वम् । रूक्षत्वम् ।
उष्णत्वम् । केशनाशित्वञ्च । इति राज-
निर्घण्टः ॥ अपि च ।
"शमी शक्तुफला तुङ्गा केशहन्त्री शिवाफला ।
मङ्गल्या च तथा लक्ष्मीः शमीरः स्वल्पिका
स्मृता ॥
शमी तिक्ता कटुः शीता कषाया रेचनी लघुः ।
कफकासश्वासकुष्ठार्शःकृमिजित् स्मृता"
इति भावप्रकाशः ॥
शिम्बा । छिमड़ा इति भाषा । इत्यमरः ॥
वागुजिः । इति मेदिनी ॥ (कर्म्म । यथा, ऋग्-
वेदे । ६ । २ । २ ।
"ईडे यज्ञेभिः शशमे शमीभिः ।"
"शमीभिः कर्म्मभिः कृच्छ्रचान्द्रायणादिभिः ॥"
इति तद्भाष्ये सायणः ॥)
शमी, [न्] त्रि, शान्तः । शमो विद्यतेऽस्य इत्यर्थे
इन्प्रत्ययेन निष्पन्नमिदम् ॥
शमीकः, पुं, मुनिविशेषः । यथा,—
"[illegible] प्रविवेश तमाश्रमम् ।
ददर्श मुनिमासीनं शान्तं मीलितलोचनम् ॥"
इति श्रीभागवते । १ । १८ ॥
तस्यार्थः । [illegible] । तं [illegible]
[illegible] तस्मिन् मुनिं शमीकम् । इति श्रीधर-
स्वामी ॥
शमीगर्भः, पुं, (शम्याः गर्भः ।) ब्राह्मणः । वह्निः ।
इति हेमचन्द्रः ॥
शमीधान्यं, क्ली, (शमीं तद्वदाकृतिं तद्वद् धान्यम्)
माषादि । इत्यमरः ॥ तत्पर्य्यायगुणाः ।
"शमीजाः शिम्बिजाः शिम्बिभवाः सूप्याश्च
वैदलाः ।
वैदला मधुरा रूक्षाः कषायाः कटुपाकिनः ।
वातलाः कफपित्तघ्ना बद्धमूत्रमलाः हिमाः ।
ऋते मुद्गमसूराभ्यामन्ये त्वाध्मानकारकाः ॥"
[illegible]
न तु [illegible] । [illegible]
[illegible] । इति [illegible]

अपि च ।
"शूकधान्यं शमीधान्यं समातीतं प्रशस्यते ।
परतो वातकृद्रूक्षं प्रायेणाभिनवं गुरु ॥
यवगोधूममाषाश्च तिलाश्चाभिनवा हिताः ।
पुराणा विरसा रूक्षा न तथार्थकरा मताः ॥"
इति राजवल्लभः ॥
शमीपत्रा, स्त्री, (शम्याः पत्राणीव पत्राणि
यस्याः ।) लज्जालुवृक्षः । इति जटाधरः ॥
शमीरः, पुं, (ह्रस्वा शमी । "कुटीशमीशुण्डाभ्यो
रः ।" ५ । ३ । ८८ । इति रः ।) ह्रस्वा शमी ।
इत्यमरः ॥
शम्पा, स्त्री, विद्युत् । इत्यमरः ॥
शम्पाकः, पुं, आरग्वधः । इत्यमरः ॥ विपाकः ।
यावकः । इति हेमचन्द्रः ॥ (हस्तिनापुरवासी
कश्चिद्ब्राह्मणः । यथा, महाभारते । १२ ।
१७६ । २३ ।
"इत्येतद्धास्तिनपुरे ब्राह्मणेनोपवर्णितम् ।
शम्पाकेन पुरा मह्यं तस्मात्त्यागः परो मतः ॥"
शम्पातः, पुं, आरग्वधः । इति शब्दरत्नावली ॥
शम्ब, गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-
सक०-सेट् ।) शम्बति । इति दुर्गादासः ॥
शम्बः, पुं, (शम् + "शलिवन् ।" उणा० ४ । ९४ ।
इति वन् । यद्वा, शमस्त्यस्येति । शं + "कंशंभ्यां
बभयुस्तितुतयसः ।" ५ । २ । १३८ । इति वः ।)
वज्रम् । (यथा, ऋग्वेदे । १० । ४२ । ७ ।
"उग्रो यः शम्बः पुरुहूत तेन ।"
"शम्ब इति वज्रनाम ।" इति तद्भाष्ये सायणः ॥)
मुषलाग्रस्थलौहमण्डलकम् । इति मेदिनी ॥
लौहकाञ्ची । इति हेमचन्द्रः ॥ अनुलोमकर्ष-
णम् । इति सिद्धान्तकौमुद्यां भरतः ॥
दरिद्रः । इति संक्षिप्तसारोणादिवृत्तिः ॥ भाग्य-
वति, त्रि । इति [illegible] ॥
शम्बरं, क्ली, सलिलम् । धनम् । चित्रम् । इति
नानार्थरत्नमाला ॥ चित्रम् । बौद्धव्रतविशेषः ।
इति सिद्धान्तचन्द्रिका ॥ (बलम् । यथा, ऋग्वेदे ।
२ । २४ । २ । "अवदद् मन्युना शम्बराणि ॥"
"शम्बराणि [illegible] अवाद् [illegible] : सर्व्व-
[illegible] ॥" इति तद्भाष्ये सायणः ॥)
शम्बरः, पुं, मृगविशेषः । दैत्यविशेषः । इति
मेदिनी ॥ (यथा, ऋग्वेदे । १ । ५१ । ६ ।
"[illegible] शम्बरम् ॥"
"शम्बरं [illegible] ।" इति तद्भाष्ये
सायणः ॥ यथा च महाभारते । १ । ६५ । २२ ।
"शम्बरो नमुचिश्चैव पुलोमा चेति विश्रुतः ।
असिलोमा च केशी च दुर्जयश्चैव दानवः ॥")
मत्स्यविशेषः । शैलविशेषः । जिनभेदः । इति
[illegible] ॥ [illegible]
[illegible]
[illegible]

शम्बरचन्दनं, क्ली, (शम्बरनामकं चन्दनम् ।) चन्दनविशेषः । तत्पर्य्यायः । कैरातम् २ बहलगन्धम् ३ बर्व्वरम् । ४ गन्धकाष्ठम् ५ कैरातकम् ६ शीतगन्धम् । ७ । अस्य गुणाः । शीतलत्वम् । तिक्तत्वम् । कषायत्वम् । श्लेष्मानिलश्रमपित्तविस्फोटपामादिकुष्ठदाहतापविमोहनाशित्वञ्च इति राजनिर्घण्टः ॥

शम्बरसूदनः, पुं, (शम्बरं सूदयतीति । सूद + ल्युः ।) कामदेवः । इति हलायुधः ॥

शम्बरारिः, पुं, (शम्बरस्यारिः ।) कामदेवः । इत्यमरः ॥

शम्बरी, स्त्री, आखुपर्णी । इति मेदिनी ॥ माया इति शब्दरत्नावली ॥

शम्बलः, पुं, क्ली, कूलम् । पाथेयम् । मत्सरः । इति मेदिनी ॥

शम्बाकृतं, त्रि, (शम्ब + "कृञो द्वितीयतृतीयशम्बबीजात् कृषौ ।" ५ । ४ । ५८ इति डाच् ।) द्विवारकृष्टक्षेत्रम् । तत्पर्य्यायः । द्विगुणाकृतम् २ द्वितीयाकृतम् ३ द्विहल्यम् ४ द्विसीत्यम् ५ । इत्यमरः ॥

शम्बुः, पुं, शम्बूकः । यथा,—
"शम्बूकः शम्बुकोऽपि च पुंसि कालस्तु सर्व्वदा । कलायेन विना शेषो दृश्यते पत्त्रविस्तरे ॥"
इति द्विरूपकोषः । इत्यमरटीकायां भरतः ॥

शम्बुकः, पुं, (शम्बु + स्वार्थे कन् ।) शम्बूकः यथा,
"शम्बूकः शम्बुकोऽपि च पुंसि कालस्तु सर्व्वदा । कलायेन विना शेषो दृश्यते पत्त्रविस्तरे ॥"
इति द्विरूपकोषः । इत्यमरटीकायां भरतः ॥

शम्बूकः, पुं, शम्बुकः । इति शब्दरत्नावली ॥

शम्बूकः, पुं, स्त्री, (शम् + "शम्बूकादयश्चेति" उणा० ४ । ४१ । इति ऊकः वुगागमश्च निपात्यते ।) जलजन्तुविशेषः । शामुक इति भाषा । तत्पर्य्यायः । जलशुक्तिः २ । इत्यमरः ॥ शम्बुका ३ शम्बुकः ४ शम्बूकः ५ शाम्बुकः ६ शम्बुः ७ शाम्बूकः ८ । इति शब्दरत्नावली ॥ जलशुक्तिः ९ दुर्वा १० पङ्कमण्डूकः ११ । इति हारावली ॥ [illegible] । घोङ्गः । [illegible] । (यथा, उत्तरचरिते । २ ।
"[illegible]
[illegible] ।
शम्बूक एव [illegible]
[illegible] ॥")
इति मेदिनी ॥ दैत्यविशेषः । गजः । इति [illegible] । इति राजनिर्घण्टः ॥

शम्बूका, स्त्री, (शम्बूक + टाप् ।) जलशुक्तिः । इति राजनिर्घण्टः ॥

शम्भलः, पुं, [illegible] । [illegible] यथा,—
"[illegible] ।
[illegible]
[illegible] ।
पताकाध्वजचित्राद्यैर्यथेन्द्रस्यामरावती ॥
यत्रास्ते षष्टितीर्थानां सम्भवः शम्भलेऽभवत् ।
मर्त्त्ये मोक्षः स्थितो कर्क्कोरककस्य यथाश्रयः ॥
वनोपवनसन्तानानाकुसुमसद्रुमैः ।
शोभितं शम्भलग्रामं मन्ये सौघोपमं भुवि ॥
महीमावाप्य भगवान् निजजन्मकृतोद्यमः ।
शम्भलग्रामविप्रर्षिमाविवेश परात्मकः ॥
सुमत्यां विष्णुयशसा गर्भमाधत्त वैष्णवम् ।
द्वादश्यां शुक्लपक्षस्य माधवे मासि माधवः ॥
जातो ददृशतुः पुत्त्रं पितरौ हृष्टमानसौ ।
धात्री माता महाषष्ठी नाडीच्छेत्री तदाम्बिका ।
गङ्गोदकक्लेदमोक्षा सावित्री मार्ज्जनोद्यता ।
तस्य विष्णोरनन्तस्य मातृकादात् पयःसुधाम् ॥
सुमतिस्तं सुतं लब्ध्वा विष्णुं जिष्णुं जगत्प्रभुम् ।
पूर्णकामा विप्रमुख्यानाहूयादात् गवां शतम् ॥
तं बालकं नराकारं विष्णुं मत्वा मुनीश्वराः ।
कल्किं कल्कविनाशार्थमाविर्भूतं विदुर्बुधाः ।
नामाकुर्व्वंस्ततस्तस्य कल्किरित्यभिविश्रुतम् ॥"
इति कल्किपुराणे १ अध्यायः ॥

शम्भली, स्त्री, (शम्भं कल्याणयुक्तं नायकादिकं भाति प्रकाशतीति । भा + कः । गौरादित्वात् ङीप् ।) कुट्टनी । इत्यमरः ॥

शम्भुः, पुं, (शं मङ्गलं भवत्यस्मादिति । शम् + भू + "मितद्र्वादिभ्य उपसंख्यानम् ।" ३ । २ । १८० इत्यस्य वार्त्तिकोक्त्या डुः ।) शिवः । इत्यमरः ॥ (यथा, भागवते । ४ । ७ । ५७ ।
"एतद्भगवतः शम्भोः कर्म्म दक्षाध्वरद्रुहः ।
श्रुतं भागवतात् शिष्यादुद्धवान्मे बृहस्पतेः ॥"
एकादशरुद्राणामन्यतमः । यथा, विष्णुपुराणे । १ । १५ । १२३—१२४ ।
"हरश्च बहुरूपश्च त्र्यम्बकश्चापराजितः ।
वृषाकपिश्च शम्भुश्च कपर्द्दी रैवतस्तथा ॥
मृगव्याधश्च सर्व्वश्च कपाली च महामुने ।
एकादशैते कथिता रुद्रास्त्रिभुवनेश्वराः ॥")
ब्रह्मा । (यथा, महाभारते । १ । ६४ । ४५ ।
"तामुवाच महाराज भूमिं भूमिपतिः प्रभुः ।
प्रभवः सर्व्वभूतानामीशः शम्भुः प्रजापतिः ॥")
बुद्धः । इति मेदिनी ॥ विष्णुः । इति हलायुधः ॥ (यथा महाभारते । १३ । १४९ । ७ ।
"विश्वक् शम्भुरिकत्व विभुर्दामोदरोऽपि च ॥")
सिद्धः । इति शब्दरत्नावली ॥ श्वेतार्कः । इति वैद्यकचन्द्रिका ॥ (अग्निः । यथा, महाभारते । ३ । २२० । ३ ।
"शम्भुमग्निमथ प्राहुर्ब्राह्मणा वेदपारगाः ।
आवसथ्यं द्विजाः प्राहुर्दीप्तमग्निं महाप्रभम् ॥"
सुखस्य भावयितरि, त्रि । यथा, ऋग्वेदे । १ । [illegible] ।
"मयुश्च शम्भु मानवम् ॥"
"शं सुखं भुवतं भावयितारौ ।" इति तद्भाष्ये सायणः ॥)

शम्भुतनयः, पुं, (शम्भोस्तनयः ।) कार्त्तिकेयः । इति शब्दरत्नावली ॥ गणेशश्च ॥

शम्भुनन्दनः पुं, (शम्भोर्नन्दनः ।) गणेशः । इति शब्दरत्नावली ॥ कार्त्तिकेयश्च ॥

शम्भुप्रिया, स्त्री, (शम्भोः प्रिया ।) आमलकी इति शब्दचन्द्रिका ॥ दुर्गा च ॥

शम्भुवल्लभं, क्ली, (शम्भोर्वल्लभम् ।) श्वेतकमल[illegible] इति राजनिर्घण्टः ॥ शिवप्रिये, त्रि ॥

शम्या, स्त्री, (शम्यतेऽनयेति । शम + यत् । टाप् ।) युगकीलकः । इत्यमरः ॥ (यथा, ऋग्वेदे । [illegible] ३ । १३ ।
"उद्द उर्म्मिः शम्या इन्त्वापो योक्त्राणि मुञ्चत ।"
दक्षिणहस्तगृहीततालविशेषः । इति [illegible] शास्त्रम् ॥ (दण्डयष्टिः । इति मेधातिथि[illegible] यथा मनुः । ८ । २३७ ।
"शम्यापातास्त्रयो वापि त्रिगुणो नगरस्य तु[illegible]

शम्याक्षेपः, पुं, (शम्यायाः क्षेपो यत्र ।) [illegible]क्षिप्तयष्टिप्राप्तियावद्भूप्रदेशः । यथा,—
"भ्रामयित्वा बहुगुणं यष्टिः क्षिप्ता [illegible]
भुवः प्रदेशं यावन्तं शम्याक्षेपः स उच्यते ॥"
इति मार्कण्डेयपुराणे विविशचरिते [illegible]ध्यायः ॥ (यज्ञविशेषः । यथा, महाभा[illegible] ३ । ९० । ५ ।
"पुण्यश्चाख्यायते दिव्यं शिवमग्निशिरो[illegible]
सहदेवोऽयजत् यत्र शम्याक्षेपेण भारत ॥"
"बलवता क्षिप्ता शम्या लगुडविशेषो याव[illegible] पतेत् तावान् यज्ञमण्डपो यस्मिन् यज्ञे [illegible]क्षेपस्तेन ।" इति तट्टीकायां नीलकण्ठः ॥)

शयः, पुं, (शेते सर्व्वमस्मिन्निति प्रायो बाहु[illegible]धीनत्वात् । शी + "पुंसि संज्ञायां घः ।") हस्तः । इत्य[illegible]मरः ॥ शय्या । सर्पः । इति मेदिनी ॥ निद्रा[illegible] पणः । इति विश्वः ॥

शयण्डः, त्रि, (शेते इति । शी + षण्डन् । [illegible] कल्पः । १ । १२८ ।) निद्राशीलः । इत्यु[illegible]णादिकोषः ॥ (पुं, विषयः । देशः । इत्युणादि[illegible] टीका । १ । १२८ ॥)

शयतः, पुं, निद्रालुः । इति संक्षिप्तसारोणा[illegible] वृत्तिः ॥

शयथः, पुं, (शेते इति । शीङ् + "शीङ्शपि[illegible] जीविप्राणिभ्योऽथः ।" उणा० ३ । ११३ । [illegible] अथः ।) अजगरः । मृत्युः । निद्रालुः । [illegible] हेमचन्द्रः ॥ वराहः । मत्स्यः । इति संक्षि[illegible] सारोणादिवृत्तिः ॥ (मरणम् । यथा ऋग्वेदे । ६ । १७ । ८ ।
"विश्वायुः शयथे जघान ॥"
"शयथे शयननिमित्ते चरणायितव्ये ।" [illegible] तद्भाष्ये सायणः ॥)

शयनं, क्ली, (शी + ल्युट् ।) निद्रा । शय्या । इत्यमरः ॥ (यथा, महाभारते । १ । १४४ । [illegible]
"आसनानि च दिव्यानि यानानि शयनानि च ।
विधानस्यानि पाण्डूनां यथा तुष्येत वै पिता ॥")
मैथुनम् । इति मेदिनी ॥ अथ सर्व्वदेवानां शयन[illegible] कालः ।

पुलस्त्य उवाच ।
[illegible]ढ़ी समायाति शयने चोत्तरायणम् ।
स्वपिति देवेशो भोगिभोगे श्रियः पतिः ॥
[illegible] विभौ तस्मिन् देवगन्धर्व्वगुह्यकाः ।
[illegible]नां मातरश्चापि प्रसुप्ताश्चाप्यनुक्रमात् ॥
नारद उवाच ।
[illegible] सुरादीनां शयने विधिमुत्तमम् ।
[illegible] पुरस्कृत्य जनार्द्दनम् ॥
पुलस्त्य उवाच ।
[illegible]नाभिगते सूर्य्ये शुक्लपक्षे तपोधन ।
[illegible] जगत्स्वामिशयनं परिकल्पयेत् ॥
[illegible] कृत्वा संपूज्य केशवम् ।
[illegible]पवीतकञ्चैव सम्यक् संपूज्य च द्विजान् ॥
[illegible] ब्राह्मणेभ्यश्च द्वादश्यां प्रयतः शुचिः ।
[illegible] पीताम्बरधरं स्वस्तिनिद्रां समानयेत् ॥
[illegible] ततः कामः स्वपते शयने शुभे ।
[illegible]न्धानां सुगन्धानां कुसुमैः परिकल्पिते ॥
[illegible] ततो यक्षाः स्वपन्ति सुखशीतले ।
[illegible] सुखास्तीर्णोपधानके ॥
[illegible]र्णमाश्चामुमानाथः स्वपते चर्म्मसंस्तरे ।
[illegible] च जटाभारं समुद्ग्रथ्यान्यचर्म्मणा ॥
[illegible]तो दिवाकरो राशिं संप्रयाति च कर्कटम् ।
[illegible] रजनी भवते दक्षिणायनम् ॥
[illegible] प्रतिपदि तथा नीलोत्पलदलेऽनघ ।
[illegible] स्वपिति देवानां दर्शयन् मार्गमुत्तमम् ॥
विश्वकर्म्मा द्वितीयायां तृतीयायां गिरेः सुता ।
[illegible]चतुर्थ्यान्तु पञ्चम्यामपि धर्म्मराट् ॥
[illegible] स्कन्दश्च स्वपिति सप्तम्यां भगवान् रविः ।
[illegible] तथाष्टम्यां नवम्यां कमलालया ॥
[illegible] भुजगेन्द्राश्च स्वपन्ति वायुभोजनाः ।
एकादश्यान्तु कृष्णायां साध्या ब्रह्मन् स्वपन्ति हि ॥
[illegible] क्रमस्ते गदितो निशायां शयने मुने ।
स्वपत्सु तेषु देवेषु प्रावृट्कालः समाययौ ॥
कङ्काः समं वलाकाभिरारोहन्ति नगोत्तमान् ।
वायसाश्चापि कुर्व्वन्ति नीडानि मुनिपुङ्गव ।
[illegible] स्वपन्त्येता ऋतौ गर्भभरालसाः ।
यस्यां तिथ्यां प्रस्वपिति विश्वकर्म्मा प्रजापतिः ।
द्वितीया सा शुभा पुण्या सुपुण्या शयनोदिता ॥
तस्यां तिथावभ्यर्च्च्य हरिं श्रीवत्साङ्कं चतुर्भुजम् ।
पर्य्यङ्कस्थं समं लक्ष्म्या गन्धपुष्पादिभिर्मुने ॥
ततो देवाय शय्यायां फलानि प्रक्षिपेत् क्रमात् ।
सुरभीणि निवेद्येत्थं विज्ञाप्यो मधुसूदनः ॥
यथा हि लक्ष्म्या न वियुज्यसे त्वं
त्रिविक्रमानन्त जगन्निवास ।
तथास्त्वशून्यं शयनं सदैव
त्वस्माकमेवेह तव प्रसादात् ॥
तदा त्वशून्यं तव देव तल्पं
स्वयं हि लक्ष्म्या शयने सुरेश ।
सत्येन तेनामितवीर्य्य विष्णो
गार्हस्थ्यनाशो मम चास्तु देव ॥
इत्युच्चार्य्य प्रणम्येशं प्रसाद्य च पुनः पुनः ।
नक्तं भुञ्जीत देवर्षे तैलक्षारविवर्ज्जितम् ॥
द्वितीयेऽह्नि द्विजाग्र्याय फलं दद्याद्विचक्षणः ।
लक्ष्मीधर प्रीयतां मे इत्युच्चार्य्य निवेदयेत् ॥
अनेन तु विधानेन चातुर्म्मास्यव्रतं चरेत् ।
यावद्वृश्चिकराशिस्थः प्रतिभाति दिवाकरः ।
ततो विबुध्यन्ति सुराः क्रमशः क्रमशो मुने ॥
नभस्ये मासि च तथा या स्यात् कृष्णाष्टमी शुभा ।
युक्ता मृगशिरेणैव सा तु कामाष्टमी स्मृता ॥
तस्यां सर्व्वेषु लिङ्गेषु तिथौ स्वपिति शङ्करः ।
वसते सन्निधाने तु तत्र पूजाक्षया स्मृता ॥"
इति वामने १६ अध्यायः ॥४॥
अथ हरिशयनादिव्यवस्था । भविष्यनारदीययोः ।
"मैत्राद्यपादे स्वपितीह विष्णु-
र्वैष्णवमध्ये परिवर्त्तते च ।
पौष्णावसाने च सुरारिहन्ता
प्रबुध्यते मासचतुष्टयेन ॥"
मैत्रमनुराधा । वैष्णवं श्रवणा । पौष्णं रेवती । भविष्ये ।
"निशि स्वापो दिवोत्थानं सन्ध्यायां परिवर्त्तनम् ।
अन्यत्र पादयोगे तु द्वादश्यामेव कारयेत् ॥"
इत्यत्र नक्षत्रयोगप्राप्तौ फलातिशयः । एतद्विधानं वामनपुराणे ।
"एकादश्यां जगत्स्वामिशयनं परिकल्पयेत् ।
शेषाहिभोगपर्य्यङ्कं कृत्वा संपूज्य केशवम् ॥
अनुज्ञां ब्राह्मणेभ्यश्च द्वादश्यां प्रयतः शुचिः ।
लब्ध्वा पीताम्बरधरं देवं निद्रां समानयेत् ॥"
अनुज्ञां लब्ध्वा इत्यन्वयः । एकादशीसमये दिवाशयनीयकल्पनं रात्रौ द्वादशीक्षणे निद्रेति । विष्णुधर्म्मोत्तरे ।
"स्वास्तीर्णशयनं कृत्वा प्रीणयेच्छेषशायिनम् ।
आषाढ़शुक्लद्वादश्यां विष्णुलोके महीयते ॥"
स्वास्तीर्णशयनं शोभनास्तरणयुक्तं खट्टादि । वराहपुराणे श्रीभगवानुवाच ।
"अन्यत्तु संप्रवक्ष्यामि कर्म्म संसारमोचनम् ।
कदम्बकुटजश्चैव धवकोऽर्ज्जुनकस्तथा ॥
एभिरभ्यर्च्चनं कुर्य्याद्विधिदृष्टेन कर्म्मणा ।
ततः संस्थापनं कृत्वा मम मन्त्रविधिः स्मृतः ।
नमो नारायणायोक्ता इमं मन्त्रमुदीरयेत् ॥
पश्यन्तु मेघानपि मेघश्यामं
ह्युपागतं सिच्यमानं महीमिमाम् ।
निद्रां भगवान् गृह्णातु लोकनाथ
वर्षास्विमं पश्यतु मेघवृन्दम् ॥
ज्ञात्वैव पश्यैव च लोकनाथ मासा-
श्चत्वारि वैकुण्ठस्य च पश्य नाथ ।
आषाढ़शुक्लद्वादश्यां सर्व्वशान्तिकरं शिवम् ॥
य एतेन विधानेन भूमि ! मे कर्म्म कारयेत् ।
स पुमान् न प्रशश्येत संसारेषु युगे युगे ॥"
शयने कुटजविधानात् विष्णुधर्म्मोत्तरीयनिषेधोऽन्यत्र । धवकः कपित्थः । संस्थापनं समापनम् । भूमि इति पृथिव्याः सम्बोधनम् ।
"एवमुक्तेन मन्त्रेण कृष्णं सुप्यादयेत्ततः ।
सुप्ते त्वयि जगन्नाथ जगत् सुप्तं भवेदिदम् ।
विबुद्धे त्वयि बुध्येत जगत् सर्व्वं चराचरम् ॥"
इति मन्त्रेण पूजयेत् ॥४॥
"प्राप्ते भाद्रपदे मासि एकादश्यां सितेऽहनि ।
कटदानं भवेद्विष्णोर्म्महापूजा प्रवर्त्तते ॥"
कटदानं पार्श्वपरिवर्त्तः । कामरूपीयनिबन्धे ।
"एवं संपूज्य विधिवद् भाद्रस्य द्वादशीदिने ।
मन्त्रेणानेन देवेशं पार्श्वेन परिवर्त्तयेत् ॥
वासुदेव जगन्नाथ प्राप्तेयं द्वादशी तव ।
पार्श्वेन परिवर्त्तस्व सुखं स्वपिहि माधव ॥
त्वयि सुप्ते जगन्नाथ जगत्सर्व्वं चराचरम् ॥"
ब्रह्मपुराणे ।
"एकादश्यान्तु शुक्लायां कार्त्तिके मासि केशवम् ।
प्रसुप्तं बोधयेद्रात्रौ श्रद्धाभक्तिसमन्वितः ॥"
रात्रौ प्रसुप्तमित्यन्वयः । बोधनन्तु दिवैव ॥
"कृत्वा वै मम कर्म्माणि द्वादश्यां मत्परो नरः ।
ममैव बोधनार्थाय इमं मन्त्रमुदीरयेत् ॥
महेन्द्ररुद्रैरभिनूयमानो
भवानृषिर्व्वन्दितवन्दनीयः ।
प्राप्ता तवेयं किल कौमुदाख्या
जागृष्व जागृष्व च लोकनाथ ॥
मेघा गता निर्म्मलपूर्णचन्द्रः
शारद्यपुष्पाणि च लोकनाथ ।
अहं ददानीति च पुण्यहेतो-
र्जागृष्व जागृष्व च लोकनाथ ॥
एवं कर्म्माणि कुर्व्वीरन् द्वादश्यां ये यशस्विनि ।
मम भक्ता नरश्रेष्ठास्ते यान्ति परमां गतिम् ॥"
अत्र मन्त्रद्वयपाठान्तरम् ।
"उत्तिष्ठोत्तिष्ठ गोविन्द त्यज निद्रां जगत्पते ।
त्वया चोत्थीयमानेन उत्थितं भुवनत्रयम् ॥"
इति सम्प्रदायागतस्तृतीयः श्लोक इति वाचस्पतिमिश्राः ॥ शयनोत्थानमन्त्रास्तु कल्पतरुप्रभृतिग्रन्थसंवादाल्लिखिताः । तदेवं द्वादश्यां एकादश्यां वा रेवत्यन्तपादयोगवशाद्दिवोत्थानं नक्षत्रयोगाभावे तु द्वादश्यामेव कारयेदिति गुरुचरणाः । जीमूतवाहनस्तु भविष्ये ।
"आ-भा-का-सितपक्षेषु मैत्रश्रवणरेवती ।
आदिमध्यावसानेषु प्रस्वापावर्त्तबोधनम् ॥"
आ-भा-का-सितपक्षेषु आषाढ़-भाद्र कार्त्तिकशुक्लपक्षेषु । एषाञ्च द्वादश्यां प्राप्तौ मुख्यकल्पः । भविष्यपुराणम् ।
"निशि स्वापो दिवोत्थानं सन्ध्यायां परिवर्त्तनम् ।
अन्यत्र पादयोगे तु द्वादश्यामेव कारयेत् ॥"
विष्णुधर्म्मोत्तरे ।
"विष्णुर्दिवा न स्वपिति न रात्रौ प्रतिबुध्यते ।
द्वादश्यामृक्षसंयोगे पादयोगो न कारणम् ॥
अप्राप्ते द्वादशीऋक्षे उत्थानशयने हरेः ।
पादयोगेन कर्त्तव्येनाहोरात्रं विचिन्तयेत् ॥"
वचनान्तरम् ।
"रेवत्यन्तो [illegible] रात्रौ द्वादश्या च समन्वितः ।
[illegible]

दिनान्ते त्रिधा विभक्तदिनतृतीयभागे दिवो-
त्थानमित्यनुरोधात् । अतएव ।

"रात्रौ त्रिशोधो विनिहन्ति पौरान्
प्रातो दिवा राष्ट्रकुलं नृभर्त्तुः ।
सन्ध्याद्वये स्वल्पफला धरित्री
भवेन्नराणामपि रोगदुःखम् ॥"

इति स्मृतिः ॥ वराहपुराणे ।
"द्वादश्यां सन्धिसमये नक्षत्राणामसम्भवे ।
आ भा-का-मित्रपक्षेषु शयनावर्त्तनादिकम् ॥"
अटैव शयनादौ कालचतुष्टयम् । द्वादश्यां निशादौ नक्षत्रयोगः । तदभावेऽपि निशाद्य-भागेन तिष्यन्तरे पादयोगः । तस्याप्यभावेऽपि सन्ध्यायां नक्षत्रमात्रयोगः तस्याप्यभावे द्वादश्यां सन्ध्यायामिति । विष्णुधर्म्मोत्तरे ।
"किं तस्यैवाद्यपादेन दशम्यंशेन यो दिवा ।
पौष्णशेषेण किं तेन प्रतिपद्यय यो निशि ॥"
इति दशमीप्रतिपदोर्निषेधात् एकादश्यादि-पौर्णमास्यन्तानां तिथीनामभ्यनुज्ञानम् ॥ * ॥
पद्मपुराणे सर्व्वदेवशयनादिकमुक्तं यथा,—
"प्रतिपद्यभिधोक्ता पवित्रारोहणे तिथिः ।
श्रिया देव्या द्वितीया तु तिथीनामुत्तमा स्मृता ॥
तृतीया तु भवान्याश्च चतुर्थी तत्सुतस्य च ।
पञ्चमी सोमराजस्य षष्ठी प्रोक्ता गुहस्य च ॥
सप्तमी भास्करस्योक्ता दुर्गायाश्चाष्टमी स्मृता ।
मातृणां नवमी प्रोक्ता दशमी वासुकेस्तथा ॥
एकादशी ऋषीणाञ्च द्वादशी चक्रपाणिनः ।"
चक्रपाणिन इति छन्दोऽनुरोधात् इत्यध्यात् ।
"त्रयोदशी त्वनङ्गस्य शिवस्योक्ता चतुर्द्दशी ।
मम चैव मुनिश्रेष्ठ पौर्णमासी तिथिः स्मृता ॥
यस्य यस्य तु देवस्य यदुक्तं तिथिषु या ।
तस्य देवस्य तस्यां च शयनावर्त्तनादिकम् ॥"
अत्र हरिशयनाद्याषाढादिविधानात् तथाह-रमीदृक्षेवामपि तथा । ज्योतिषेऽपि ।
"भजति यदा मिथुनं विभाय
चक्रे शार्ङ्गधरश्चिरं निशि सुप्तः ।
भजति यदा मिथुनं दिवाकरः
[illegible] ॥"
[illegible] । पूर्व-[illegible] मिथुने संक्रान्ते इति [illegible] । हरि-[illegible] । [illegible] ।
"[illegible] पादाभ्यां संविशेद्धरिः ।
[illegible]
[illegible]
[illegible] ॥"
[illegible]

ब्रह्मपुराणे यद्यप्येकादश्यां प्रबोधसमयः । तेन वराहपुराणे द्वादश्यां प्रबोधाभिधानम् । यम-स्मृतौ कार्त्तिक्यां प्रबोधाभिधानम् सर्व्वसमञ्जस-मिति । एवमेव श्रीदत्तोपाध्यायाः । कल्पतरुस्तु एकादश्यामेव शयनं प्रबोधञ्च । यमस्मृतावा-षाढ़ी कार्त्तिक्यश्चेयमिति व्युत्पत्त्या न तत्प्रत्य-यानुपपत्तिः । अपवादविषयके क्वचिदुत्सर्ग-प्रवृत्तेरित्याह । श्रीभगवद्वाक्यम् ।
"मच्छयने मदुत्थाने मत्पार्श्वपरिवर्त्तने ।
फलमूलजलाहारी हृदि शल्यं समार्पयेत् ॥"
फलाहारपदमनशनपरम् । तेन सर्व्वथा अन-शनपरत्वम् । इत्येकादशीतत्त्वम् ॥ * ॥
मर्त्त्यानां शयनविधिनिषेधौ यथा,—

सूत उवाच ।

"उपास्य पश्चिमां सन्ध्यां हुत्वाग्नींस्तानुपास्य च
भृत्यैः परिवृतो भुक्त्वा नातिक्षुत्सोऽथ संविशेत् ॥
शुचिं देशं विविक्तन्तु गोमयेन तु लेपयेत् ।
प्रागुदक्प्रवणे चैव संस्वपेत सदा बुधः ॥
प्राक्शिराश्च स्वपेन्नित्यं तथा वै दक्षिणाशिराः ।
स्वपेदुदक्शिरा नैव तथा प्रत्यक्शिरा न च ।
न चान्तर्द्धानहीने तु न तिर्य्यक् च कदाचन ॥
शून्यालये श्मशाने तु एकवृक्षे चतुष्पथे ।
महादेवगृहे चापि मातृवेश्मनि न स्वपेत् ॥
न यक्षनागायतने स्कन्दस्यायतने तथा ।
गर्भेषु च विना दीक्षां न स्वपेच्च कथञ्चन ॥
धान्यगेहे च विप्राणां गुरूणाञ्च तथोपरि ।
नाशुची पर्णकीर्णे तु नाशुचिर्नाशिरस्तथा ॥
दिने सन्ध्यौ न नग्नश्च नोत्तरापरमस्तकः ।
आकाशे पर्व्वते शून्ये न च चैत्यद्रुमे तथा ॥
न तु द्वारेऽभ्रमाकीर्णे नार्द्रपादस्त्वधावितः ।
पालाशे शयने नैव वहुदारकृते न च ॥
न दग्धे विद्युता चैव वह्निसृष्टे जले तथा ।
न स्वपेत् सन्ध्ययोर्नित्यं न शिरस्यासने कटे ॥
एवं स्वपन् नरो नित्यं सुखम्येह परत्रभाक् ।
व्यत्यये च भवेद्दुःखी मृतो नरकमश्नुते ॥"
इति वह्निपुराणे आह्निकतपोनामाध्यायः ॥ * ॥
अपि च । सति सूर्य्ये शय्या च न पातनीया सूर्य्योदयात् पूर्व्वमुत्थापनीया । तथा च स्मृतिः ।
"आस्फोटाट्टशय्यानि निर्व्वाणिमलिनानि च ।
सूर्य्यास्तमितकर्पानि लक्ष्म्या विरमन्ति सम्यक्-मम् ॥
आसनं वसनं शय्या जायापत्यं कमण्डलु ।
आत्मनः शुचिरेतानि न परेषां कदाचन ॥"
न कदाचन स्वत्वनुमतिं विना अन्यदायित्वानु-पपत्तेः । व्यास ।
"सन्धौ देशे विविक्ते तु गोमयेनोपलिप्तके ।
प्रागुदक्प्रवणे चैव संविशेत्तु सदा बुधः ॥
माङ्गल्यं पूर्णकुम्भञ्च शिरःस्थाने निधापयेत् ।
वैदिकैर्गारुडैर्मन्त्रै रक्षां कृत्वा स्वपेत्ततः ॥"
गर्गः ।
"स्वगृहे प्राक्शिराः शेते श्वाशुरे दक्षिणा-
शिराः ।

प्रत्यक्शिराः प्रवासे तु न कदाचिदुदक्शि[राः] ॥"
मार्कण्डेयपुराणे ।
"प्राक्शिराः शयने विद्यात् ध[नमायुश्च दक्षिणे] ।
पश्चिमे प्रबलां चिन्तां हानिं मृत्युं तथो[त्तरे] ॥"
तथा ।
"नमस्कृत्वाव्ययं विष्णुं समाधिस्थः स्वपे[न्निशि] ॥"
मार्कण्डेयः ।
"शून्यागारे श्मशाने च एकवृक्षे चतुष्प[थे] ।
महादेवगृहे चापि शर्करालोष्टपांशुषु ॥
धान्यगोविप्रदेवानां गुरूणाञ्च तथोपरि ।
न चापि भग्नशयने नाशुचौ नाशुचिः स्व[पेत्] ।
नार्द्रवासा न नग्नश्च नोत्तरापरमस्तक[ः] ।
नाकाशे सर्व्वशून्ये च न च चैत्यद्रुमे तथा ॥"
न स्वपेदित्यर्थः । इत्याह्निकाचारतत्त्वम् ।
अन्यच्च ।
"भुक्त्वा च विधिवन्मन्त्रैर्द्विजो भुक्त्वाऽथवा [...]
सदाह्वदाम्भवजनः स्वपेत् शुष्कपदो निशि ।
नोत्तराभिमुखः स्यात् पश्चिमाभिमुखो [...]

न चाकाशे न नग्नो वा नाशुचिर्नासने क्वचि[त्] ।
न शीर्णायान्तु खट्वायां शून्यागारे न दे[वा]लये ।
नापि वंशे च पालाशे शयने वा कदाच[न] ॥"
इति कौर्म्मे उपविभागे १८ अध्यायः ॥
अपि च ।
"कृतपादादिशौचश्च भुक्त्वा सायं ततो गृ[हम्] ।
गच्छेत् शय्यां समन्ताच्च अथवा दारुनि[र्मिताम्] ।
शाल्मलस्य कदम्बस्य नीपमन्दारकस्य च ।
किंशुकस्य वटस्याथ तथा कुशमयस्य च ।
आरोहणाद्भवेत् पापं तस्मात्तेषु न च [...]

मरोहशय्यां सुप्ते वा अदर्ण परमेश्वरि ॥
न शुक्रे नापवित्रे च न तृणे न च भूतले ।
तूलिकायां तथा वस्त्रे शय्याभावे स्वपेद्[...]
स्वपेच्च पट्टवस्त्रे च कलङ्को कम्बलेषु च ।"
इति मत्स्यसूक्ते ४४ पटल[ः] ।
अपि च ।
"सूर्य्येणाभ्युदितो यस्तु त्यक्तः सूर्य्येण वा [...]
अन्यत्रातुरभावाच्च प्रायश्चित्तीयते नरः ॥"
इति विष्णुपुराणे ३ अंशे ११ अध्या[यः] ।
यस्मिन् सुप्ते सूर्य्य उदेति स सूर्य्येणाभ्यु[दितः] ।
यस्मिन् सुप्ते अस्तं याति स सूर्य्येण त्य[क्तः] ।
सूर्य्योदयास्तसमययोः स्वपन् प्रायश्चि[त्ती] पातकी भवेदित्यर्थः । इति तस्य टीका ।
किञ्च ।
"श्यामानदी समुक्तानस्तान् [...]
[...]
ततस्तद्द्विगुणान् ३२ वामे पद्मात् [...]
[...]
वामदिशायामनलो नाभेर्द्दूरेऽस्ति [...]

तस्माच्च वामपार्श्वे शयीत मुक्त[...]
इति आयुर्वे[द...]

, क्ली, (शेतेऽस्यामिति। शी + अधिकरणे [illegible]) शय्या। इत्यमरः॥ (यथा, [illegible] ।११।५।
परिचयनशयनैद्रतन्द्रः कथञ्चित्
[illegible] शयनीये शर्वरीं किं करोतु॥") [illegible] त्रि॥ (यथा, रामायणे। २। [illegible] ।२१।
[illegible] शयनीयस्ते पर्य्यङ्को हेमभूषितः।
[illegible] प्रहृष्टः प्रतिभाति मे॥")
[illegible]यकं, क्ली, (शयनीयमेव। स्वार्थे कन्।) [illegible]। इति शब्दरत्नावली॥ (यथा, कथा-[illegible] ।२३।१७७।
कलिङ्गसेनायाः सुप्तायाः शयनीयके।
मदनवेगं तं स्वरूपे स्थितमैक्षत॥")
[illegible]कादशी, स्त्री, (शयनाय शयनस्य वा एका-[illegible]) श्रीहरेः शयनसम्बन्धितिथिः। सा [illegible]। तद्विवरणं शयनशब्दे [illegible]ब्दे च द्रष्टव्यम्॥
[illegible] पुं, (शी + शानच्। ततः कन्। यद्वा, [illegible] शीङ्भियः।" इति आनक्।) सर्पः। [illegible]णादिकोषः॥ कृकलासः। इति हेमचन्द्रः॥
[illegible]लुः, त्रि, (शयनशीलः। शी + "शीङो ग्रहणं [illegible]म्। ३। २। १५८। इत्यस्य वार्त्तिकोक्त्या [illegible]लुच्।) निद्रालुः। इत्यमरः॥ (यथा, [illegible]वे। २। ८०।
[illegible] नग्नत्वयोः प्रमादतः।
[illegible] नोपशयस्तोऽपि शयालुर्न शयुर्न शान्॥"
[illegible]यालुः, पुं, (शी + आलुच्। अजगरः।) कुक्करः। [illegible] हारावली॥
[illegible]यित, त्रि, (शी + क्तः।) निद्रालुः। इत्यमरः॥ (कृतशयनः। यथा, कथासरित्सागरे। ५६। १८७।
"तयोः स्वपितयोः स्वामि भुङ्क्ते भोजितयो-स्तयोः।
शये शयितयोस्तेन स्थानमीदृग्विधं मम॥")
वसन्तकुसुमे, पुं। यथा, —
"वसन्तकुसुमः शेलुः शयितो द्विजकुत्सितः॥"
इति शब्दमाला॥
शयने, क्ली॥
शयितवान्, त्रि, निद्रालुः। शीङ्धातोः क्तवतु-प्रत्ययेन निष्पन्नमेतत्॥
शयुः, पुं, (शेते इति। शी + उः।) अजगरः। इत्यमरः। (सर्पविशेषः। यथा, ऋग्वेदे। १। २१२। १६॥
"याभिर्नरा शयवे याभिरत्रये॥"
"हे नरा नेतारावश्विनौ पुरा पूर्वस्मिन् काले शयवे एतत्संज्ञकाय ऋषये।" इति तद्-भाष्यम्॥ शयाने, त्रि। यथा, ऋग्वेदे। ४। १८। १२।
"कस्ते मातरं विधवामचकत्
शयुं कस्त्वामजिघांसच्चरन्तम्॥"
"कस्त्वत्तोऽन्यः शयुं शयानं चरन्तं [illegible] वा त्वां जिघांसत्।" इति तद्भाष्यम्॥)

शयुनः, पुं, अजगरः। इत्युणादिकोषः॥
शय्या, स्त्री, (शी शयने + "संज्ञायां समजेति।" ३। ३। ९९। इति क्यप्।) गुम्फनम्। इति मेदिनी॥ शीयते यत्र सा। तत्पर्य्यायः। शय-नीयम् २ शयनम् ३। इत्यमरः॥ तल्पम् ४। इति जटाधरः॥ शयनीकम् ५। इति शब्द-रत्नावली॥ तस्या गुणाः।
"सुखशय्यासनं सेव्यं निद्रापुष्टिधृतिप्रदम्।
श्रमानिलहरं शस्तं विपरीतमतोऽन्यथा॥
भूशय्यानिलपित्तघ्नी बृंहणी शुक्रवर्द्धिनी।
खट्टा तु वातला प्रोक्ता पट्टी रूक्षोऽतिवा-तलः॥"
इति राजवल्लभः॥ *॥
अपि च।
"त्रिदोषशमनी खट्टा तूली वातकफापहा।
भूशय्या बृंहणी हृद्या काष्ठपट्टी तु वातला॥"
अन्यत् पुनराह।
"भूशय्या वातलातीव रूक्षा पित्तास्रनाशिनी।
सुशय्याशयनं हृद्यं पुष्टिनिद्राधृतिप्रदम्।
श्रमानिलहरं हृद्यं विपरीतमतोऽन्यथा॥"
इति भावप्रकाशः॥ *॥
तद्गमनविधानं यथा,—
"कृतपादादिशौचस्तु भुक्त्वा सायं ततो गृही।
गच्छेत् शय्यामस्फुटितामपि दारुमयीं नृप॥
नाविशालां न वै भग्नां नासमां मलिनां न च।
न च जन्तुमयीं शय्यामधिगच्छेदनास्तृताम्॥"
इति विष्णुपुराणे ३ अंशे ११ अध्यायः॥ *॥
तद्दानफलं यथा। याज्ञवल्क्यः।
"गृहधान्याभयोपानच्छत्रमाल्यानुलेपनम्।
यानं वृक्षं प्रियं शय्यां दत्त्वात्यन्तं सुखी भवेत्॥"
प्रियं यद्यस्य धर्म्मादि। प्रतिग्रहसमर्थेन शय्या न प्रत्याख्येया। यथा याज्ञवल्क्यः।
"कुशाः शाकं पयो मत्स्या गन्धाः पुष्पं दधि क्षितिः।
मांसशय्यासनं धानाः प्रत्याख्येयं न वारि च॥"
मृतोद्देश्यकदत्तशय्याग्रहणे दोषो यथा। ब्रह्म-पुराणम्।
"शय्यालङ्कारवस्त्रादि प्रतिगृह्य मृतस्य च।
नरकान्न निवर्त्तन्ते धेनुं तिलमयीं तथा॥" *॥
सा च धौतानाङ्गिरोदैवतका। यथा,—
"छत्रं कृष्णाजिनं शय्यां रथमासनमेव च।
उपानहौ तथा दानं तथा यत् प्राग्विवर्जितम्।
धौतानाङ्गिरसन्त्वेतत् प्रतिगृह्णीत मानवः॥"
इति शुद्धितत्त्वम्॥ *॥
पुष्पाभिषेके शय्यावहनं यथा,—
"सर्व्वरत्नमलङ्कारं पट्टं यात्रां [illegible]।
[illegible]॥
[illegible]।
[illegible]॥"
इति देवीपुराणे [illegible] पुष्पाभि-षेकनामाध्यायः॥
शर, क्ली, (शृ + अप्।) जलम्। इति मेदिनी।

शरः, पुं, (शृणात्यनेनेति। शॄ गि हिंसे + "ऋदो-रप्।" ३। ३। ५७। इति अप्।) वाणः। इत्यमरः॥ (यथा, रघुः। १। ६१।
"तव मन्त्रकृतो मन्त्रैर्दूरात् प्रशमितारिभिः।
प्रत्यादिश्यन्त इव मे दृष्टलक्ष्यभिदः शराः॥")
दध्यग्रभागः। इति मेदिनी॥ दुग्धशरस्य नामान्तरम्। सन्तानिका। दधिशरस्य नामा-न्तरम्। दधिसारः। दधिस्नेहः। कट्टरञ्च। इति रत्नमालादयः॥ तृणविशेषः। कांड़ा इति हिन्दी भाषा। (यथा, महाभारते। १। १३८। १५।
"आचार्य्यः कलसाज्जातो द्रोणः शस्त्रभृतां-वरः।
गौतमस्यान्ववाये च शरस्तम्बाच्च गौतमः॥")
तत्पर्य्यायः। इषुः २ काण्डः ३ वाणः ४ मुञ्जः ५ तेजनः ६ गुन्द्रकः ७। इति रत्नमाला॥ उत्-कटः ८ शायकः ९ क्षुरः १० इक्षुरः ११ क्षुरिकापत्रः १२ विशिखः १३। अस्य गुणाः। मधुरत्वम्। सतिक्तत्वम्। कोष्णत्वम्। कफ-श्रान्तिमदापहत्वम्। बलवीर्य्यकारित्वम्। नित्य निषेवितत्वेत् किञ्चिद्वातकारित्वञ्च। इति राज-निर्घण्टः॥ अपि च।
"भद्रमुञ्जः शरो वाणस्तेजनश्चक्षुवेष्टनः।
मुञ्जो मुञ्जातको वाणः स्थूलदर्भः सुमेधसः॥
मुञ्जद्वयन्तु मधुरं तुवरं शिशिरं तथा।
दाहतृष्णाविसर्पास्रमूत्रवस्त्यक्षिरोगजित्।
दोषत्रयहरं वृष्यं मेखलासूपयुज्यते॥"
इति भावप्रकाशः॥
उशीरं। महापिण्डीतरुः। इति च राज-निर्घण्टः॥ हिंसा। इति शृधात्वर्थदर्शनात्॥ (ज्योतिषोक्तपञ्चमाङ्कः। यथा साहित्यदर्पणे। ४। २६४।
"वेदवह्निशराःशुद्धे रिपुशाणाग्निसायकाः॥")
शरजं, क्ली, (शरात् जायते यत् तत्। जन् + डः।) हैयङ्गवीनम्। इति हेमचन्द्रः॥ नवनीतम्। इति केचित्॥
शरजन्मा, [न्] पुं, (शरे शरवणे जन्म यस्य।) कार्त्तिकेयः। इत्यमरः॥ (यथा, रघुः, ।३।२३।
"उमावृषाङ्कौ शरजन्मना यथा
यथा जयन्तेन शचीपुरन्दरौ।
तथा नृपः सा च सुतेन मागधी
ननन्दतुस्तत्सदृशेन तत्समौ॥")
शरटः, पुं, (शृ + शकादित्वात् अटन्।) कृकला-सः। इति रत्नमाला॥ कृकलासः। इत्य-मरटीका॥ (यथा,—
"महत्य वल्यां शरटः प्रविष्टः॥"
इति [illegible]।)
शरणं, क्ली, (शृणाति दुःखमनेनेति। शृ + ल्युट्।) [illegible]। (यथा, महाभारते। १। १०८। [illegible]
"[illegible]।
[illegible]॥"
रक्षिता। इत्यमरः॥ (यथा, [illegible]

"त्वत्र संसारसमारंभत्र शरणं पार्व्वतीरमणम्।
शिवमिदि श्रुतिमिदं विश्वमिदं तव निदेश-
कम्॥")

रक्षणम्। वधः। इति मेदिनी॥ घातकः।
इति शब्दरत्नावली॥

शरणा, स्त्री, प्रसारणी। इति शब्दरत्नावली॥

शरणागतः, त्रि, (शरणमागतः प्राप्तः।) शरणा-
पन्नः। तत्पर्य्यायः। शरणापेक्षः२ अभिपन्नः३
शरणार्थी ४। इति त्रिकाण्डशेषः॥ तद्रक्षणा-
रक्षणयोः गुणदोषौ यथा,—
"शरणागतञ्च भीतञ्च दीनञ्च शरणागतम्।
यो न रक्षत्यधर्म्मिष्ठः कुम्भीपाके पतेद्युगम्॥
राजसूयशतानाञ्च रक्षिता लभते फलम्।
परमैश्वर्य्ययुक्तश्च धर्म्मेण स भवेदिह॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ४४ अध्यायः॥०॥
अपि च।
"शरणागतरक्षां यः प्राणैरपि धनैरपि।
कुरुते मानवो प्राज्ञो तस्य पुण्यं निशामय॥
सर्व्वपापविनिर्मुक्तो ब्रह्महत्यावृतोऽपि।
प्राप्नोत्यन्ते परं मोक्षं योगिनामपि दुर्लभम्॥"
इति पाद्मे क्रियायोगसारे गङ्गामाहात्म्ये नाम
८ अध्यायः॥ अन्यच्च।
"श्रोत्रियं ब्राह्मणादीनां यदि यजेत् शरणागतम्।
ब्रह्महत्यासमं तस्य पापमाहुर्मनीषिणः॥
पापेषु निष्कृतिर्दृष्टा महापातकिनामपि।
शरणागतघातकस्य न दृष्टा निष्कृतिः क्वचित्॥"
इति वह्निपुराणे दानारम्भानिर्णयनामाध्यायः॥

शरणार्थी, [न्] त्रि, (शरणं अर्थयते इति।
अर्थ+णिनि।) शरणागतः। इति हेम-
चन्द्रः॥ (यथा, महाभारते। २। १४२। १०।
"शरणञ्च इह त्वामद्यैव शरणार्थिनः।
त्रायस्व मन्दस्य वधो शुभो नाहितो भुवे॥")

शरणार्थकः, त्रि, (शरणार्थमर्थयति आकाङ्क्ष-
ति। अर्थ+ण्वुल्।) शरणापन्नः। इति
त्रिकाण्डशेषः।

शरणिः, स्त्री, पन्थाः। इत्यमरः॥ [illegible]
[illegible] इदम् [illegible]
[illegible]
"[illegible]।"
[illegible]
[illegible]
[illegible]। इति
[illegible] (हिमा
[illegible]। १। ३१। २६।
"[illegible]।"
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] (शरणि+वा ङीष्।) पन्थाः।
[illegible]। इति शब्दरत्नावली॥ [illegible]।
[illegible]।

शरण्डः, पुं, पक्षी। कामुकः। इति शब्दरत्नावली॥
धूर्त्तः। शरटः भूषणभेदः। इति मेदिनी॥
चतुष्पात्। इति संक्षिप्तसारोणादिवृत्तिः॥

शरण्यः, त्रि, (शृणाति भयमिति। शॄ हिंसा-
याम् +"शॄरम्योश्च।" उणा० ३।१०१। इति
अन्यः। यद्वा, शरणमिव। शरण+"शाखा
दिभ्यो यः।" ५।३।१०३। इति यः।) रक्षा-
कर्त्ता यथा,—
"ध्येयं सदा परिभवघ्नमभीष्टदोहं
तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम्।
भृत्यार्त्तिहं प्रणतपालभवाब्धिपोतं
वन्दे महापुरुष ते चरणारविन्दम्॥"
इति श्रीभागवतम्॥

शरण्या, स्त्री, (शरण्य+टाप्।) दुर्गा। यथा
"विपाग्निभयघोरेषु शरण्यं स्मरणादुयतः।
शरण्या तेन सा देवी पुराणे परिपठ्यते॥"
इति देवीपुराणे देवीनिरुक्ताध्यायः॥

शरण्युः, पुं, वारिदः। वातः। इति विश्वः॥
मरण्युः। इति शब्दमाला॥

शरत्, [द्] स्त्री, (शॄ हिंसायाम्+("शॄ दृभ-
सोऽदिः॥" उणा० १।१२८। इति अदिः।)
वत्सरः। (यथा, रघुः। १०। १।
"पृथिवीं शासतस्तस्य पाकशासनतेजसः।
किञ्चिदूनमनूनर्द्धेः शरदामयुतं ययौ॥")
ऋतुविशेषः। स आश्विनकार्त्तिकमासद्वया-
त्मकः। इत्यमरः॥ तत्पर्य्यायः। शारदा २
कालप्रभातः ३। इति शब्दरत्नावली॥ काल-
प्रभातम् ४। इति त्रिकाण्डशेषः॥ वर्षाव-
सानः ५ मेघान्तः ६ प्रावृडत्ययः ७। (यथा,
रघुः। ४। २४।
"सरितः कुर्व्वती गाधाः पथश्चाश्यानकर्द्दमान्।
यात्रायै चोदयामास तं शक्तेः प्रथमं शरत्॥")
तत्र जलगुणाः।
"वर्षासु नाभसं वारि श्रुवतीक्षितमेव वा।
सर्व्वं शरदि हेमन्ते तडागं सारसन्तु वा॥*"॥
तत्र वाय्वायुर्यथा,—
"वसन्ते दक्षिणो वातो भवेत् वर्षासु पश्चिमः।
उत्तरः शारदे काले पूर्व्वो हेमन्तशैशिरे॥"
इति राजनिर्घण्टः॥०॥
अपि च।
"शारदस्नानभिष्यन्दि लघु तत्परिकीर्त्तितम्।
हैमन्तिकं जलं स्निग्धं बल्यं हृद्यं हितं गुरु॥"
इति राजवल्लभः॥०॥
वैद्यकमते भाद्राश्विनमासात्मकः। केचित्तु।
"कन्याघटस्थ समाख्याते रवौ राशिषु संक्र-
मात्॥
यौवनो हैवतो प्रोक्तः प्रावृट् मिथुनकर्कटौ।
सिंहकन्ये स्मृता वर्षा तुलावृश्चिकयोः शरत्।
धनुर्मकरौ च हेमन्तो वसन्तः कुम्भमीनयोः॥"
अन्ये तु।
"शिशिरः पुष्पसमयो ग्रीष्मो वर्षा शरद्धिमः।
माघादिमासयुग्मैः स्युः रवे षट् क्रमादमी॥"

तस्या गुणाः।
"शरदुष्णा पित्तकर्त्री [illegible]
इति भावप्रकाशः।
तत्र जातफलम्।
"नरः शरत्प्रकालब्धजन्मा
भवेत् सुकर्मा मनुजस्तरस्वी।
शुचिः सुशीलो गुणवान् सुमानी
धनान्वितो राजकुलप्रपन्नः॥"
इति कोष्ठीप्रदीपः॥
तत्र वर्णनीयानि यथा। चन्द्रपटुता। [illegible]
पटुता। जलशुष्कता। अगस्त्यः। हंसः।
सर्पः। सप्तच्छदः। पद्मम्। [illegible]
शिखिपक्षमदपातः। इति कविकल्पलता॥

शरत्कामी, [न्] पुं, (शरदि शरत्काले कामं
कुक्कुरीमिति। कम+णिङ्+णिनिः) कुक्कुरः।
इति शब्दरत्नावली॥

शरत्पद्मं, क्ली, (शरदः पद्मम्।) सिताम्बुजम्।
इति राजनिर्घण्टः॥

शरत्पर्व्व, [न्] क्ली, (शरदः पर्व्व।) कोजागर
पूर्णिमा। यथा,—
"कोजागरः शरत्पर्व्व शारदी पूर्णिमा [illegible]
इति [illegible]।

शरत्पुष्पं, क्ली, (शरदः पुष्पम्।) पाटुकम्।
इति राजनिर्घण्टः॥ शरदुद्भवकुसुमञ्च।

शरद्, स्त्री, (शॄ+अदिः।) शरत्। इत्यमर।

शरदन्तः, पुं, (शरदः तदाख्य-ऋतोरन्तो यत्र।)
हेमन्तः। राजनिर्घण्टः॥ इति।

शरदा, स्त्री, वत्सरः। शरदृतुः। इति श-
ब्दरत्नावली॥

शरदिजं, त्रि, (शरदि जायते यत्। जन+
"प्रावृट्शरत्कालदिवां जे।" ६।३।१५।
सप्तम्या अलुक्।) शरत्कालजातम्। य
"नद्यः प्रावृषिजास्तु पीनसकफश्वासाति
[illegible]
पथ्या वातकफापहाः शरदिजा हेमन्त
[illegible]
सन्तापं शमयन्ति संविदधते शैशिरे [illegible]
स्तृष्णादाहभ्रमिश्रमार्त्ति शमदा ग्रीष्मे [illegible]
गुरु
इति राजनिर्घ

शरदुदाशयं, क्ली, शरत्कालीनसरोवरम् य
"शरदुदाशये साधुजातसत्-
सरसिजोदरश्रीमुषा दृशा।
सुरतनाथ तेऽशुल्कदासिका
वरद निघ्नतो नेह किं वधः॥"
इति श्रीभागवते। १०।३
शरदुदाशये शरत्कालीनसरसि। इति श्री

शरधिः, पुं, (शरा धीयन्तेऽस्मिन्निति। श
धा+"कर्म्मण्यधिकरणे च।" ३।३।
इति किः।) तूणः। इति हेमचन्द्रः॥ (
राजेन्द्रकर्णपूरे। २२।

वाङ्गे कवचं निबध्य शरधिं कृत्वा पुरो माधवं
सः केरवबान्धवोदयधिया धुन्वन् धनुर्धावती ॥")

…ङ्खा, स्त्री पुं, (शरस्य पुङ्खेव आकृतिर्यस्याः ।) लोहचाकृतिवृक्षविशेषः । शरफोंका इति ख्यातभाषा । तत्पर्य्यायः । काण्डपुङ्खा २ बाण…।३ इषुपुङ्खिका ४ शायकपुङ्खा ५ इषुपुङ्खा तस्या गुणाः । कटुत्वम् । उष्णत्वम् । कृमि-गुल्मरुजापहत्वम् । श्वेतायाः गुणाधिक्यत्वञ्च । …ते राजनिर्घण्टः ॥ अपि च ।
"… पुङ्खो यकृत्प्लीहगुल्मव्रणविषापहः ।
…क्तः कषायः कासास्रज्वरश्वासहरो लघुः ॥"
इति भावप्रकाशः ॥

…शस्य पक्षे, पुं ॥ (क्ली, यन्त्रविशेषः । यथा, …श्रुते । १ । ७ । "तेषां गण्डूपदशरपुङ्खसर्प-
डिशमुखे द्वे द्वे एषणव्यूहनचालनाह-
…णार्थमुदिश्यते ॥")

…र(ल)भः, पुं, (शृणाति हिनस्तीति । शॄ हिंसायाम् + "कृशृशलिकलिगर्दिभ्योऽभच् ।" उणा० ३ । १२२ । इति अभच् ।) मृगेन्द्रविशेषः । इत्यमरः ॥ तत्पर्य्यायः । महास्कन्धः २ महास्कन्धी ३ महामनाः ४ अष्टपादः ५ महासिंहः ६ मनस्वी ७ पर्व्वताश्रयः ८ । इति राजनिर्घण्टः ॥ अस्य लक्षणं यथा,—
"अष्टपादूर्द्ध्वनयन ऊर्द्ध्वपादचतुष्टयः ।
तं सिंहं हन्तुमागच्छन्मुनेस्तस्य निवेशनम् ॥"
इति महाभारतम् ।१२।११७ । १२ ॥
करभः । (यथा, ऋतुसंहारे । १ । २३ ।
"भ्रमति गवययूथः सर्व्वतस्तोयमिच्छन्
शरभकुलमजिह्मं प्रोद्धरत्यम्बु कूपात् ॥")
वानरविशेषः । इति मेदिनी ॥ उष्ट्रः । इति जटाधरः ॥ (विष्णुः । यथा, महाभारते । १३ । १४८ । ५२ ।
"अतुलः शरभो भीमः समयज्ञो हविर्हरिः ॥"
दनुपुत्रविशेषः । यथा, तत्रैव ।१ । ६५ । २६ ।
"शरभः शलभश्चैव सूर्य्याचन्द्रमसौ तथा ।
एते ख्याता दनोर्व्वंशे दानवाः परिकीर्त्तिताः ॥"
नागविशेषः । यथा, तत्रैव । १ । ५७ । ११ ।
"विहङ्गः शरभो मेदः प्रमोदः संहतापनः ॥")

शरभूः, पुं, (शरे शरवणे भूरुत्पत्तिर्यस्य ।) कार्त्तिकेयः । इति हेमचन्द्रः ॥

शरमयं, त्रि, (शरस्य विकारोऽवयवो वा । शर + "नित्यं वृद्धशरादिभ्यः ।" ४ । ३ । १४४ । इति मयट् ।) शरनिर्म्मितम् । यथा,—
"शरमयबर्हिषा कुशमयबर्हिर्व्वाधवत् ।" इति स्मृतिः ॥

शरमल्लः, पुं. (शरे शरवणे मल्ल इव ।) पक्षिविशेषः । इति शब्दचन्द्रिका ॥ गोशालिक इति भाषा (शरे बाणनिक्षेपादौ मल्लः ।) बाणयोद्धा च ॥

शरयुः,) स्त्री, नदीविशेषः । इति द्विरूप-
शरयूः,) कोषः ॥ दन्त्यसादिरयं शब्दः । इति बहुसम्मतः ॥

शरलः, त्रि, विनीतः । स्वच्छहृदयः । वृक्षविशेषे पुं । इति सारस्वताभिधानम् ॥ दन्त्यसादिरप्ययमिति बहुसम्मतः ॥

शरलकं, क्ली, जलम् । इति शब्दचन्द्रिका ॥

शरवणोद्भवः, पुं, (शरवणे उद्भवो यस्य ।) कार्त्तिकेयः । इति केचित् ॥ (यथा, महाभारते । ३ । २३१ । ८ ।
"ब्रह्मचारी ब्रह्मचारी च शूरः शरवणोद्भवः ॥")

शरवाणिः, पुं, शरमुखम् । पदातिः । शरजीवी । इति हेमचन्द्रः ॥

शरव्यं, क्ली, (शरवे हिंसायै बाणशिक्षायै वा साधु । शरु + "उगवादिभ्यो यत् ॥" ५।१।२। इति यत् । यद्वा, शरान् व्ययति । व्ये + डः ।) लक्ष्यम् । इत्यमरः ॥ (यथा, माघे, । ७ । २४ ।
"विदधाति जनतामनःशरव्य-
व्यधपटुमन्मथचापनादशङ्काम् ॥")

शराघातः, पुं, (शरस्याघातः ।) बाणाघातः । तत्पर्य्यायः । प्रचलाकः २ । इति जटाधरः ॥

शराटिः, स्त्री, (शरं जलं अटति प्राप्नोतीति । अट् + इन् ।) शरालिपक्षी । इति शब्दरत्नावली ॥

शराडिः, स्त्री, शरालिपक्षी । इति शब्दरत्नावली ॥

शरातिः, स्त्री, (शरं जलमततीति । अत + इन् ।) शरालिपक्षी । इत्यमरटीकायां रामाश्रमः ॥

शराभ्यासः, पुं, (शराणामभ्यासः ।) बाणशिक्षा । तत्पर्य्यायः । उपासनम् २ । इत्यमरः ॥ विकर्षणम् ३ खुरली ४ शस्त्राभ्यासः ५ । इति शब्दरत्नावली ॥

शरारिः, पुं, (शरं जलं ऋच्छतीति । ऋगतौ + "अच इः ।" इति इः ।) शरालिपक्षी । तत्पर्य्यायः । आटिः २ आडिः ३ । इत्यमरः ॥ आडी 8 शराडी ५ आडिका ६ शराली ७ शरालिः ८ शराटिः ९ शरालिका १० । इति शब्दरत्नावली ॥ (यथा, ऋतुसंहारे । ४ । ९ ।
"प्रफुल्लनीलोत्पलशोभितानि
शरारिकादम्बविघट्टितानि ।
प्रसन्नतोयानि सशैवलानि
सरांसि चेतांसि हरन्ति यूनाम् ॥")
अस्य गुणाः । पवनापहत्वम् । स्निग्धत्वम् । स्पष्टमलत्वम् । हृद्यत्वम् । वातरक्तहरत्वम् । हिमत्वञ्च । इति राजवल्लभः ॥ अपि च ।
"हंससारसकाचाक्षबकक्रौञ्चशरारिकाः ।
नन्दीमुखीसकादम्बाः बलाकाद्याः प्लवाः स्मृताः ॥
प्लवाः पित्तहराः स्निग्धा मधुरा गुरवो हिमाः ।
वातश्लेष्मप्रदाश्चापि बलशुक्रकराः सराः ॥"
इति भावप्रकाशः ॥

शरारुः, त्रि, (शृणातीति । शॄ + "शॄवन्द्योरारुः ।" ३।२।१७३ । इति आरुः ।) हिंस्रः । इत्यमरः ॥

शरारोपः, पुं, (शरस्यारोपो यस्मिन् ।) धनुः । इति जटाधरः ॥

शरालिः, स्त्री, शरारिपक्षी । इति शब्दरत्नावली ॥

शरालिका, स्त्री, शरारिपक्षी । इति शब्दरत्नावली ॥

शराली, स्त्री, शरारिपक्षी । इति शब्दरत्नावली ॥

शरावः, पुं क्ली, (शरं जलं अवति रक्षतीति । अव रक्षणे + अण् ।) मृत्पात्रविशेषः । शरा इति भाषा । तत्पर्य्यायः । वर्द्धमानकः २ । इत्यमरः ॥ मार्त्तिकः ३ सरावः ४ शालाजिरम् ५ पार्थिवम् ६ मृत्कांस्यम् ७ । इति शब्दरत्नावली ॥ (यथा, आर्य्यासप्तशत्याम् । १२६ ।
"उदितेऽपि तुहिनगहने गगनप्रान्ते न दीप्यते तपनः ।
कठिनघृतपूरपूर्णे शरावशिरसि प्रदीप इव ॥")
कुडवद्वयपरिमाणम् । तत्तु चतुःषष्टितोलकात्मकम् । सेर इति भाषा । तत्पर्य्यायः । मानिका २ । इति शब्दमाला वैद्यकपरिभाषा च ॥

शरावती, स्त्री, (शरास्तृणविशेषाः सन्त्यस्यामिति । शर + मतुप् । "शरादीनाञ्च ।" ६ । ३ । १२० । इति दीर्घः ।) नदीविशेषः । इत्यमरः ॥ (यथा, महाभारते । ६ । ९ । २० ।
"शरावतीं पयोष्णीञ्च वेण्णां भीमरथीमपि ॥"
लवस्य राजधानी । यथा, रघुः । १५ । ९७ ।
"स निवेश्य कुशावत्यां रिपुनागाङ्कुशं कुशम् ।
शरावत्यां सतां सूक्तैः जनिताश्रुलवं लवम् ॥")

शरावार्द्धं, क्ली, (शरावस्य अर्द्धम् ।) कुडवपरिमाणम् । तत्तु द्वात्रिंशत्तोलकात्मकम् । आधसेर इति भाषा । इति वैद्यकपरिभाषा ॥

शराश्रयः, पुं, (शराणामाश्रयः ।) तूणः । इति हेमचन्द्रः ॥

शरासनं, क्ली, (शरा अस्यन्ते क्षिप्यन्तेऽनेनेति । अस + करणे ल्युट् ।) धनुः । इत्यमरः ॥ (यथा, रघुः ३ । ५२ ।
"स एवमुक्त्वा मघवन्तमुन्मुखः
करिष्यमाणः सशरं शरासनम् ॥"
पुं, धृतराष्ट्रपुत्राणामन्यतमः । यथा, महाभारते । १ । ११७ । ४ ।
"चित्रोपचित्रौ चित्राक्षश्चारुचित्रः शरासनः ॥")

शरास्यं, क्ली, (शरा अस्यन्तेऽनेनेति । अस् + ण्यत् ।) धनुः । यथा,—
"चिच्छेद तस्य तान् बाणान् शरास्यञ्च महा-
…
युयुधातेऽतिसंरब्धौ परस्परवधैषिणौ ॥"

इति मार्कण्डेयपुराणे जैमिनिखण्डं पुराणं परिपूर्णम् ॥

शरिमा, [न्] पुं, (शृणाति यौवनमिति शॄ + "ह्रभृधृसृस्तृशृभ्य इमनिच् ।" उणा० ४।१४७। इति इमनिच् ।) प्रसवः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

शरी, स्त्री. एरकातृणम् । इति भावप्रकाशः ॥

शरीरं, क्ली, (शॄ + "कॄशॄपॄकटिपटिशौटिभ्य ईरन् ।" उणा० ४ । ३० । इति ईरन् ।) शीर्य्यते रोगादिना यत् । तत्पर्य्यायः । कलेवरम् २ गात्रम् ३ वपुः ४ संहननम् ५ वर्ष्म ६ विग्रहः ७ कायः ८ देहः ९ मूर्त्तिः १० तनुः ११ तनूः १२ । इत्यमरः ॥ चेतम् १३ पुरम् १४ घनः १५ अङ्गम् १६ पिण्डम् १७ । इति राजनिर्घण्टः ॥ भूतात्मा १८ स्वर्गलोकेशः १९ स्कन्धः २० पञ्जरः २१ कुलम् २२ बलम् २३ पाप्मा २४ । इति जटाधरः ॥ स्कन्धम् २५ । इति शब्दरत्नावली ॥ इन्द्रियायतनम् २६ भूः २७ मूर्त्तिमत् २८ करणम् २९ बेरम् ३० सञ्चरः ३१ बन्धः ३२ पुद्गलम् ३३ । इति हेमचन्द्रः ॥ * ॥ शरीरधर्म्मा यथा,—

"शरीरे भस्मसाद्भूते प्रतिविम्बः स चात्मनः ।
जीवस्तदान्तरोऽस्य उवाच विनयं विभुम् ॥

जीव उवाच ।

सदुक्तिर्व्वा कटूक्तिर्व्वा कोपः सन्तोष एव च ।
लोभो मोहश्च कामश्च क्षुत्पिपासादिकश्च यत् ॥
स्थौल्यं कार्श्यञ्च नाशश्च दृश्यादृश्यं समुद्भवम् ।
सर्व्वं शरीरधर्म्मश्च न जीवस्य न चात्मनः ॥
सत्त्वं रजस्तम इति शरीरं त्रिगुणात्मकम् ।
तच्च नानाप्रकारञ्च प्रबोध कथयामि ते ॥
किञ्चित् सत्त्वातिरिक्तञ्च किञ्चिदेव रजोऽधिकम् ।
तमोऽतिरिक्तं किञ्चिच्च न समं कुत्रचिन्मुने ॥
सत्त्वादया च सुखेच्छा कर्म्मेच्छा च रजोगुणात् ।
तमोगुणाज्जीवहिंसा कोपोऽहङ्कार एव च ॥
कोपात् कटूक्तिर्निर्दय कटुकथा मधुना भवेत् ।
तथा चाप्रियता सद्यः शत्रुः कः कस्य भूतले ॥
को वा प्रियोऽप्रियो वा कः किं मित्रं को रिपुर्भुवि ।
इन्द्रियाणि च लोभानि सर्व्वत्र शत्रुमित्रयोः ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २४ अः ॥ * ॥

अथ स्त्रीपुंसयोः सर्व्वाङ्गानि पादादिशिरःपर्य्यन्तानि । प्रपदम् १ अङ्घ्रिः २ गुल्फः ३ पार्ष्णिः ४ जङ्घा ५ जानु ६ ऊरुः ७ वङ्क्षणः ८ कटिः ९ त्रिकम् १० नितम्बः ११ स्फिक् १२ वस्तिः १३ उपस्थः १४ ककुन्दरम् १५ जघनम् १६ उदरम् १७ नाभिः १८ वलिः १९ स्तनः २० चूचुकम् २१ क्रोडम् २२ रोम २३ कक्षः २४ पक्ष २५ वक्षः २६ दोः २७ पार्श्वः २८ स्कन्धः २९ कूर्परः ३० करः ३१ प्रकोष्ठः ३२ ३३ अङ्गुलिः ३४ अङ्गुष्ठः ३५ करभः ३६ नखः ३७ पर्व्व ३८ चपेटकः ३९ कण्ठः ४० शिरोधिः ४१ श्मश्रु ४२ मुखम् ४३ ओष्ठः ४४ चिबुकम् ४५ हनुः ४६ सृक्कम् ४७ तालु ४८ रदः ४९ जिह्वा ५० नासा ५१ भ्रूः ५२ गण्डः ५३ लोचनम् ५४ अपाङ्गः ५५ तारा ५६ कर्णः ५७ भालः ५८ मस्तकम् ५९ केशः ६० । इति कविकल्पलता ॥ * ॥

परमेश्वरशरीरतो देवानामुत्पत्तिर्यथा,—

"सर्व्वे देवाः सपितरो ब्रह्माद्याश्चाण्डमध्यगाः ।
विष्णोः सकाशादुत्पन्ना इतीयं वैदिकी श्रुतिः ॥
अग्निस्तथाश्विनौ गौरी गजवक्त्रो भुजङ्गमः ।
कार्त्तिकेयस्तथादित्यो मातरो दुर्गया सह ॥
दिशो धनपतिर्विष्णुर्धर्म्मो रुद्रः शशी तथा ।
पितरश्चेति सम्भूताः प्राधान्येन जगत्पतेः ॥
हिरण्यगर्भस्य तनौ सर्व्व एव समुद्भवाः ।
पृथक् पृथक् ततो गर्व्वं वहमानाः समन्ततः ॥
अहं योग्यस्त्वहं याज्य इति तेषां स्वनो महान् ।
श्रूयते देवसमितौ क्षुब्धसागरसन्निभः ॥
तेषां विवदमानानां वह्निरुत्थाय पार्थिव ।
उवाच मां यजस्वेति ध्यायध्वं मामिति ब्रुवन् ॥
प्राजापत्यमिदं नूनं शरीरं मद्विना कृतम् ।
विनाशमुपपद्येत यतो नाहं महानहम् ॥
एवमुक्त्वा शरीरन्तु त्यक्त्वा वह्निर्व्विनिर्ययौ ।
निर्गतेऽपि ततस्तस्मिंस्तच्छरीरं न शीर्य्यते ॥
ततोऽश्विनौ मूर्त्तिमन्तौ प्राणापानशरीरगौ ।
आवां प्रधानावित्येवमूचतुर्याज्यवत्तरौ ॥
एवमुक्त्वा शरीरं तौ विहाय क्वचिदास्थितौ ।
तयोरपि क्षयं कृत्वा वीर्णं तत्पुरमास्थितः ॥
ततश्च वागब्रवीद्गौरी प्राधान्यमपि संस्थितम् ।
साप्येवमुक्त्वा देहात्तु निश्चक्राम बहिः शुभा ॥
तया विनापि तत् सेवं वागूनं व्यवतिष्ठते ।
ततो गणपतिर्व्वाक्यमाकाशाख्योऽब्रवीत्तदा ॥
न मया रहितं किञ्चिच्छरीरस्थोऽपि दूरतः ।
कालान्तरेत्येवमुक्त्वा सोऽपि निष्क्रम्य देहतः ॥
पृथग्भूतस्तथाप्येतच्छरीरं नाप्यनीनशत् ।
विना सांख्यश्च तस्येन तथापि न विशीर्य्यते ॥
शुषिरैस्तु विहीनन्तु दृष्ट्वा चैवं व्यवस्थितम् ।
शरीरधातवः सर्व्वे ते मूर्त्यूर्ध्वांशमेव हि ॥
अस्माभिर्व्यतिरिक्तस्य न शरीरस्य धारणम् ।
भवतीत्येवमुक्त्वा ते जहुः सर्व्वं शरीरिणः ॥
तैर्व्यपेतमपि चैवं पुरुषेण प्रपाल्यते ।
तद्दृष्ट्वा त्वब्रवीत् स्कन्दः सोऽहङ्कारः प्रकीर्त्तितः ॥
मया विना शरीरस्य सम्भूतिरपि नेष्यते ।
एवमुक्त्वा शरीरात्तु सोऽप्यपेतः पृथक् स्थितः ॥
तेनापेतेन तत् चैवं विना मुक्तवदास्थितम् ।
तद्दृष्ट्वा कुपितो भानुः स आदित्यः प्रकीर्त्तितः ॥
मया विना कथं चैवमिमं क्षणमपीष्यते ।
एवमुक्त्वाथ यातः स तच्छरीरं न शीर्य्यते ॥
ततः कामादिरुत्थाय गणो मातृकसञ्ज्ञितः ।
न मया व्यतिरिक्तस्य शरीरस्य व्यवस्थितिः ॥
एवमुक्त्वा च यातस्तु शरीरं तच्च शीर्य्यते ।
ततो मायाब्रवीत् कोपात् सा च दुर्गा प्रकीर्त्तिता ॥
न मयास्य विना भूतिरित्युक्त्वान्तर्दधे पुनः ।
ततो दिशः समुत्तस्थुरूचुश्चैव वचो महत् ॥
नास्माभी रहितं कार्यं भवतीति न संशयः ।
चतस्र आगताः काष्ठा अपयाताः क्षणात्तदा ॥
ततो धनपतिर्व्वायुर्मर्त्यं तत्पक्षसम्भवः ।
शरीरस्येति सोऽप्येवमुक्त्वा सूक्ष्मानगोऽभवत् ॥
ततो विष्णोर्मनो ब्रूयात् नायं देहो मया विना ।
क्षणमप्युत्सहे स्थातुमित्युक्त्वान्तर्दधे पुनः ॥
ततो धर्म्मोऽब्रवीत् सर्व्वमिदं पालितवानहम् ।
इदानीं मय्युपगते कथमेतद्भविष्यति ॥
एवमुक्त्वा गते धर्म्मे तच्छरीरं न शीर्य्यते ।
ततोऽब्रवीन्महादेवोऽथाव्यक्तो भूतनायकः ॥
महत्संज्ञो मया हीनं शरीरं नो भवेद्यथा ।
एवमुक्त्वा गतः शम्भुस्तच्छरीरं न शीर्य्यते ॥
तद्दृष्ट्वा पितरश्चोचुस्तन्मात्रा यावदस्मभिः ।
प्राणान्तरैभिरेतच्च शरीरं शीर्य्यते ध्रुवम् ॥
एवमुक्त्वा तु तं देहं त्यक्त्वान्तर्द्धानमागताः ।
अग्निः प्राणः अपानश्च आकाशश्चैव धातवः ॥
चैवं तद्वत्त्वहङ्कारो भानुः कामादयो मया ।
काष्ठा वायुर्विष्णुधर्म्मौ शम्भुश्चैवेन्द्रियार्थकाः ॥
एतैर्मुक्तन्तु तत् चैवं मुक्तावच्च समस्थितम् ।
सोमेन पाल्यमानन्तु पुरुषेणेन्दुरूपिणा ॥
एवं व्यवस्थिते सोमे पोड़शात्मन्यथाक्षरे ।
प्राग्वत्तच्च गुणोपेतं चेत्समुत्थाय यद्भवेत् ॥
प्रागवस्थं शरीरन्तु दृष्ट्वा सर्व्वप्रपालितम् ।
ताः चैवदेवताः सर्व्वा वैलक्ष्यं भावमाश्रिताः ॥
तमेव तुष्टुवुः सर्व्वास्तं देवं परमेश्वरम् ।"

इति वाराहे महातपोपाख्यानमामाध्याय ॥ * ॥

शरीरार्थं यथा,—

"शरीरमापः सोमश्च त्रिविधं चात्ममुच्यते ।
प्राणो ह्यग्निस्तथादित्यस्त्रिभोक्ता एक एव तु ॥"

इति गारुड़े २१५ अध्याय. ॥ * ॥

मानसकायिकक्लेशसाध्यव्रतं यथा,—

धरण्युवाच ।

"कथमाराध्यसे देव भक्तिमद्भिर्नरैर्विभो ।
स्त्रीभिर्वा सर्व्वमेतन्मे शंस त्वं भूतभावन ॥

वाराह उवाच ।

भावसाध्यस्त्वहं देवि न वित्तैर्न जपैरहम् ।
साध्यस्तथापि भूतानां कायक्लेशं वदामि ते ॥
कर्म्मणा मनसा वाचा मच्चित्तो यो नरो भवेत् ।
तस्य व्रतानि वक्ष्येऽहं विविधानि निशामय ॥
अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यमकल्कता ।
एतानि मानसान्याहुर्व्रतानि तु धराधरे ॥
एकभक्तं तथा नक्तमुपवासादिकञ्च यत् ।
तत् सर्व्वं कायिकं पुंसां व्रतं भवति नान्यथा ॥"

इति वाराहे सत्यतपोपाख्याननामाध्याय ॥

शरीरजः, पुं, (शरीरात् जायते इति । जन + डः ।) रोगः । कामदेवः । (यथा महाभारते । १ । १०० । ५६ ।

तं दातुं वरं दाशाय शान्तनुः।
जेन तीव्रेण दह्यमानोऽपि भारत ॥")
। इति धरणिः। (यथा, महाभारते।
। २४ । ४ ।
न सृष्टो मया राजन् पराशरशरीरजः।
तोविपुलो धर्मो निःसंशयमनुत्तमम् ॥")
जाते, त्रि। यथा,—
ौरजैः कर्मदोषैर्याति स्थावरतां नरः।
चकैः पक्षिमृगतां मानसैरन्त्यजातिताम् ॥"
इति प्रायश्चित्ततत्त्वम् ॥
संस्कारः, पुं, (शरीरस्य संस्कारः।) देह-
ारकर्म। शरीरस्य शोधनं मार्जनञ्च ॥
. वरणं क्ली, (शरीरस्य आवरणम्।) चर्म।
। राजनिर्घण्टः ॥ कायवेष्टनञ्च ॥ (वर्म।
।, महाभारते। ७। १८५। ४२।
चित्रैर्विविधाकारैः शरीरावरणैरपि।
चवेव रथैर्भग्नै र्हतैश्च गजवाजिभिः ॥")
री [न्] पुं, (शरीरमस्यास्तीति। शरीर+
नेः।) शरीरविशिष्टः। तत्पर्य्यायः।
ोऽङ्गी च प्राणी तु शरीरिजन्तुजन्तवः।
पभृच्चेतनो जन्मी चित्तन्तु हृदयं मनः ॥"
इति जटाधरः ॥
णं यथा,—
र्भाशयगतं शुक्रमार्त्तवं जीवसंश्रयः।
कृतिः सविकारा च तत् सर्वं गर्भसंज्ञकम् ॥
ालेन वर्द्धितो गर्भो यदङ्गोपाङ्गसंयुतः।
वेशस्तु स मुनिभिः शरीरीति निगद्यते ॥"
ङ्गोपाङ्गसंयुतः अङ्गाङ्गोपाङ्गः।
तस्य त्वङ्गान्युपाङ्गानि ज्ञात्वा सुश्रुतशास्त्रतः।
ास्तकादभिधीयन्ते शिष्याः शृणुत यत्नतः ॥
ाद्यमङ्गं शिरः प्रोक्तं तदुपाङ्गानि कुन्तलाः।
ास्यान्तसंमुद्रय ललाटभ्रूयुगं तथा ॥
नेत्रद्वयं तयोरन्तर्गते द्वे कनीनिके।
दृष्टिद्वयं कृष्णगोलौ श्वेतभागौ च वर्त्मनि ॥
पक्ष्माण्यपाङ्गौ गण्डौ च कर्णौ तच्चास्कुलीद्वयम्।
पालिद्वयं कपोलौ च नासिका च प्रकीर्त्तिता ॥
ओष्ठाधरौ च सृक्वौ मुख तालु हनुद्वयम्।
दन्ताश्च दन्तवेष्टाश्च रसना चिबुकं गलः ॥
द्वितीयमङ्गं ग्रीवा तु यया मूर्द्धा विधार्य्यते।
तृतीयं बाहुयुगलं तदुपाङ्गान्यथो ब्रुवे।
[illegible] मतौ स्कन्धौ प्रगण्डौ [illegible]।
[illegible] प्रकोष्ठयुगलं तथा ॥
मणिबन्धौ तले हस्तौ तयोरङ्गुल्यो दश।
[illegible] दश [illegible] प्रकीर्त्तिताः।
चतुर्थमङ्गं वक्षस्तु तदुपाङ्गान्यथ ब्रुवे।
स्तनौ पुंसस्तथा नार्य्याः [illegible]
[illegible] नार्य्याः [illegible]
[illegible]
हृदयं [illegible]
[illegible]
[illegible]
[illegible]

चेतनास्थानमुत्तममिति अयमभिप्रायः।
"चेतनानामधिष्ठानं मनो देहश्च सेन्द्रियः।
केशलोमनखाग्रान्तर्मलं द्रव्यगुणैर्विना ॥"
इत्युक्तवता चरकेण सकलं शरीरं चेतनास्थान-
मुक्तं तदपेक्षया हृदयं विशेषतश्चेतनास्थान-
मिति।
"कक्षयोर्वंक्षणौ मध्ये लवणी समुदाहृते।
कक्षे उभे समाख्याते तयोः स्यातां च वंक्षणौ ॥
उदरं पञ्चमं भागं षष्ठं पार्श्वद्वयं मतम्।
सप्तष्ठवंशं पृष्ठन्तु समस्तं सप्तमं स्मृतम् ॥*॥
उपाङ्गानि च कथ्यन्ते तानि जानीहि यत्नतः।
शोणिताज्जायते प्लीहा वामतो हृदयादधः ॥
रक्तवाहिशिराणां स मूलं ख्यातो महर्षिभिः।
हृदयाद्वामतोऽधश्च फुप्फुसो रक्तफेनजः ॥
अधो दक्षिणतश्चापि हृदयाद्यकृतः स्थितिः।
तत्तु रञ्जकपित्तस्य स्थानं शोणितजं मतम् ॥
अधस्तु दक्षिणे भागे हृदयात् क्लोम तिष्ठति।
जलवाहिशिरामूलं तृष्णाच्छादनकृन्मतम् ॥"
क्लोम तिलकं एतत्तु वातरक्तजम्। अवाह च
वृद्धवाग्भटः।
"रक्तादनिलसंयुक्तात् कालीयकमसुद्भवः।"
इति।
"मेदःशोणितयोः सारात् वृक्कयोर्युगलं भवेत्।
तौ तु पुष्टिकरौ प्रोक्तौ जठरस्थस्य मेदसः ॥
उक्ताः मार्द्धत्रयो व्यामाः पुंसामन्त्राणि
सूरिभिः।
अर्द्धव्यामेन हीनानि योषितोऽन्त्राणि निर्द्दिशेत्
उण्डुकश्च कटी चापि त्रिकं वस्तिश्च वंक्षणौ।
[illegible] वीर्य्यमूत्रयोः।
स एव गर्भस्याधानं कुर्य्याद्गर्भाशये स्त्रियाः।
शङ्खनाभ्याकृतिर्योनिस्त्र्यावर्त्ता सा च कीर्त्तिता
तस्यास्तृतीये त्वावर्त्ते गर्भशय्या प्रतिष्ठिता।
[illegible] कफासृङ्मांसमेदसाम् ॥
वीर्य्यवाहिशिराधारौ तौ मतौ पौरुषावहौ।
गुदस्य मानं सर्व्वस्य सर्व्वे स्याच्चतुरङ्गुलम् ॥
तत्र स्युर्वलयस्त्रिस्रः [illegible]निभास्तु ताः।
प्रवाहिणी भवेत् पूर्व्वा सार्द्धाङ्गुलमिता मता ॥
उत्सर्जिनी तु तदधः सा सार्द्धाङ्गुलसम्मिता।
तस्या अधःसंवरणी स्यादेकाङ्गुलसम्मिता ॥
[illegible]
[illegible]
[illegible]
योषितः।
[illegible]
[illegible]
[illegible]
[illegible]
इति भावप्रकाशः ॥
(देहवान्। [illegible]। यथा, मनुः। १। [illegible]।
"[illegible]
[illegible]
[illegible]

शरुः, पुं, (शृ हिंसायाम्+"शृस्वृस्निहित्रप्य-
सीति।" उणा० १। ११। इति उः।) क्रोधः।
वज्रम्। इति मेदिनी ॥ वाणः। इति हेम-
चन्द्रः ॥ आयुधम्। इति सिद्धान्तकौमुद्या-
मुणादिवृत्तिः ॥ (हिंसा। यथा, ऋग्वेदे। ६।
२७। ६।
"वृचीवन्तः शरवे पत्यमानाः।"
"शरवे हिंसायै।" इति तद्भाष्ये सायणः ॥
गन्धर्व्वविशेषः। यथा, महाभारते। १।
१२३। ५५।
"विश्वावसुर्भुमन्युश्च सुचन्द्रश्च शरुस्तथा ॥"
हिंसके, त्रि। यथा, तत्रैव। ७। ७१। १।
"दिवा नक्तं शरुमस्मद्युयोतम् ॥"
"शरुं हिंसकम्।" इति तद्भाष्ये सायणः ॥)
शरेष्टः, पुं, आम्रः। इति जटाधरः ॥
शर्करकः, पुं, (शर्करा+"वुञ्छण्कठेति।" ४।
२। ८०। इत्यनेन कः।) मधुरजम्बीरः। इति
राजनिर्घण्टः ॥
शर्करजा, स्त्री, (शर्कराज्जायते इति। जन+डः।
स्त्रियां टाप्।) सिताखण्डः। इति राज-
निर्घण्टः ॥
शर्करा, स्त्री, खण्डविकृतिः। चिनी इति भाषा।
तत्पर्य्यायः। सिता २। इत्यमरः। शर्क्कोपला ३
शुक्ला ४ सितोपला ५। इति रत्नमाला ॥
मीनाण्डी ६ श्वेता ७ मत्स्यण्डिका ८ अच्छि-
च्छदा ९ सुमिकता १० गुडोद्भवा ११। अस्या
गुणाः। मधुरत्वम्। शीतलम्। पित्तदाह-
श्रमरक्तदोषभ्रान्तिकृमिकोपनाशित्वञ्च। इति
माधारणशर्करागुणाः ॥ ० ॥
अथ शर्कराविशेषगुणाः।
"स्निग्धा पुण्ड्रकशर्करा हितकरी चौति रुच-
प्रोचके
चक्षुष्या बलवर्द्धनी सुमधुरा तृष्णा च वंशि-
गुणा।
हृष्या दग्धिबलप्रदा [illegible]
शीतला
स्निग्धा कान्तिकरी रसा[illegible]
पित्तजित्।"
इति पद्मे [illegible]गुणाः ॥ १ ॥
"यावनाली हिमोद्भवा हिमा[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
इति [illegible] ॥ २ ॥
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
इति [illegible] ॥ ३ ॥

अपि च।
"मत्स्यण्डिकाः खण्डसिता गुणश्रेष्ठा यथोत्तरम्
विमलाः शीतलाः स्निग्धा गुर्व्वः स्वादुतराः सराः॥
तथास्तृपाक्षतचीणरक्तपित्तानिलापहाः।
मत्स्यण्डी ग्राहिणी बल्या कषाया वातजिद्गुरुः॥
खण्डं गुरु सरं रुच्यं वातघ्नं बलपुष्टिदम्।
सितोपला सरा गुर्वी वातघ्नी न कफप्रदा॥"
इति पथ्यापथ्यविवेकः॥*॥

अन्यच्च।
"शर्करा ज्वरपित्तास्रमूर्च्छाछर्दिव्यपापहा।
तृष्णाघ्नस्तद्रजस्तु ज्वरदाहास्रपित्तनुत्॥
समिकाफाणितगुडखण्डमत्स्यण्डिकासिताः।
निर्म्मला मधुराः श्रेयाः शीतवीर्य्या यथोत्तरम्।
यथा यथैषां वैमल्य भवेच्छैत्यं तथा तथा॥"
इति राजवल्लभः॥*॥

किञ्च।
"खण्डस्तु सिकतारूपं सुश्वेतं शर्करा सिता।
सिता सुमधुरा रुच्या वातपित्तास्रदाहजित्।
मूर्च्छाछर्दिज्वरान् हन्ति सुशीता शुक्रकारिणी॥*॥
मधुमधुसिता शीता रक्तपित्तहरी लघुः।
सितोपला सरा लघ्वी वातपित्तहरी हिमा॥*॥
मधुजा शर्करा रुच्या कफपित्तहरी गुरुः।
छर्द्यतीसारतृड्दाहरक्तहृत्तुवरा हिमा॥
यथा यथैषां नैर्म्मल्य मधुरत्वं तथा तथा।
स्नेहलाघवशैत्यानि सरत्वञ्च तथा तथा॥"
इति भावप्रकाशः॥३॥
उपला। कर्परांशः। (यथा, महाभारते। ७। ५५। २।
"ततो वायुर्महान् शीघ्रो नीचैः शर्करवर्षणः॥")
शर्कराश्वितदेशः। रोगभेदः। शकलम्। इति मेदिनी॥ शर्करारोगस्य निदानचिकित्सादिकं अश्मरीशब्दे द्रष्टव्यः॥ (कूर्म्मचक्रस्य पुच्छदेशस्थितदेशविशेषः। यथा, मार्कण्डेये। ५८। ३५।
"नारचुरा इड्डलकाः शर्कराः शाल्मवेश्मकाः॥")

शर्कराचल, पुं, (शर्करामयोऽचलः।) दानार्थकल्पितशर्करामयाचलविशेषः। अस्य विवरणं अचलशब्दे द्रष्टव्यम्॥

शर्कराधेनु, स्त्री, (शर्कराभिर्निर्म्मिता धेनुः।) दानार्थशर्करानिर्म्मितधेनुः। तद्विधिर्यथा,—
श्रीहोतोवाच।
"[illegible] शर्कराधेनुं शृणु राजन् यथार्थतः।
[illegible] महीपाल कृष्णाजिनकुशोत्तरे॥
धेनुं शर्करया राजन् कृत्वा भारचतुष्टयम्।
उत्तमा कथ्यते सद्भिस्तुरीयेण कनिष्ठकम्॥
अर्द्धेन मध्यमा प्रोक्ता कनिष्ठा भारकेण तु।
अष्टमं वा प्रकुर्वीत चतुर्थांशेन वत्सकम्॥
[illegible] नृपसत्तम।
[illegible] न चोदयेत्॥
सर्व्वबीजानि संस्थाप्य चतुर्दिक्षु समन्ततः।
सौवर्णमुखशृङ्गाणि मौक्तिकानयने तथा॥
गुडेन तु मुखं कार्य्यं जिह्वा पिष्टमयी तथा।
कम्बलं पट्टसूत्रेण कण्ठाभरणभूषितम्॥
इक्षुपादां रौप्यखुरां नवनीतमयस्तनीम्।
प्रशस्तपत्रश्रवणां सितचामरभूषिताम्॥
पञ्चरत्नसमायुक्तां वस्त्रैराच्छादितां तथा।
गन्धपुष्पैरलङ्कृत्य ब्राह्मणाय कुटुम्बिने॥
श्रोत्रियाय दरिद्राय साधुवृत्ताय धीमते।
वेदवेदाङ्गविदुषे आहिताग्नेर्विशेषतः॥
अदुष्टाय प्रदातव्या न तु मत्सरिणे नृप।
अयने विषुवे पुण्ये व्यतीपाते शशिक्षये॥
एषु पुण्येषु कालेषु यदृच्छया वा सदार्पयेत्।
सत्पात्रन्तु द्विजं दृष्ट्वा आगतं श्रोत्रियं गृहे॥
तादृशाय प्रदातव्या पुच्छदेशे विगृह्य च।
पूर्व्वाभिमुखमासाद्य अथवा स उदङ्मुखः॥
गां पूर्व्वाभिमुखीं कृत्वा वत्समुत्तरतो न्यसेत्।
दानकाले तु ये मन्त्रास्तान् पठित्वा समर्पयेत्॥
संपूज्य विधिवद्विप्रं मुद्रिकाकर्णभूषणैः।
स्वशक्त्या दक्षिणां दत्त्वा वित्तशाठ्यविवर्जितः॥
हस्ते तु दक्षिणां दत्त्वा गन्धपुष्पसचन्दनाम्।
धेनुं समर्पयेत्तस्य मुखञ्च न विलोकयेत्॥
एकाहं शर्कराहारो ब्राह्मणस्त्रिदिनं वसेत्।
सर्व्वपापहरा धेनुः सर्व्वकामप्रदायिनी।
सर्व्वकामसमृद्धस्तु जायते नात्र संशयः॥
दीयमानां प्रशंसन्ति ते यान्ति परमां गतिम्
य इदं शृणुयाद्भक्त्या पठते वापि मानवः।
मुच्यते सर्व्वपापेभ्यो विष्णुलोकं स गच्छति॥"
इति वाराहे शर्कराधेनुमाहात्म्यनामाध्यायः॥

शर्कराप्रभा, स्त्री, (शर्करेव प्रभा यस्याः।) जिनानां नरकविशेषः। यथा,—
"रत्नशर्करावालुकापङ्कधूमतमःप्रभा।
महातमःप्रभा चेत्यधोऽधो नरकभूमयः॥"
इति हेमचन्द्रः॥

शर्करार्बुदः, पु, क्ली (शर्करावदर्बुदः।) क्षुद्ररोगविशेषः। तल्लक्षणं यथा,—
"प्राप्य मांसं शिरा स्नायुं मेदः श्लेष्मा तथानिलः
ग्रन्थिं करोत्यसौ भिन्नो मधुसर्पिर्वसानिभम्॥
तत्रोपचारमत्यर्थं तत्र वृद्धिं गतोऽनिलः।
मांसं विशोष्य ग्रथितां शर्करां जनयत्यतः॥
दुर्गन्धक्लिन्नमत्यर्थं नानावर्णं ततः शिराः।
स्रवन्ति सहसा रक्तं तं विन्द्याच्छर्करार्बुदम्॥"
शर्करा वालुकातुल्या। तच्चिकित्सा यथा,—
"मेदोऽर्बुदविधानेन साधयेच्छर्करार्बुदम्॥"
इति भावप्रकाशः।

शर्करावान्, [त्] त्रि, (शर्करा विद्यतेऽस्मिन्। "देशे लुबिलचौ च।"५।२।१०५। इति मतुप्।) कपरांशबहुलदेशः। तत्पर्य्यायः। शर्करा २ शर्करिलः ३ शार्करः ४। इत्यमरः॥

शर्करासप्तमी, स्त्री, (शर्कराया दानविधायिका सप्तमी।) वैशाखशुक्ला सप्तमी। तत्र व्रतविधिर्यथा,—
ईश्वर उवाच।
"शर्करासप्तमीं वक्ष्ये तद्वत् कल्मषनाशिनी
आयुरारोग्यमैश्वर्यं ययानन्तं प्रजायते॥
माधवस्य सिते पक्षे सप्तम्यां शुक्लपक्षतः।
प्रातः स्नात्वा तिलैः शुक्लैः शुक्लमाल्यानुलेपनैः।
स्थण्डिले पद्ममालिख्य कुङ्कुमेन सकर्णिक
तस्मै नमः सवित्रे तु गन्धपुष्पं निवेदयेत्।
स्थापयेदुदकुम्भञ्च शर्करापात्रसंयुतम्॥
शुक्लवस्त्रैरलङ्कृत्य शुक्लमाल्यानुलेपनैः।
सुवर्णाश्वसमायुक्तं मन्त्रेणानेन पूजयेत्॥
विश्ववेदमयो यस्मात् वेदवादीति पठ्यते
त्वमेवामृतसर्व्वस्वमतः शान्तिं प्रयच्छ मे।
पञ्चगव्यं ततः पीत्वा स्वपेत्तत् पार्श्वतः क्षि
सौरसूक्तं स्मरन्नास्ते पुराणश्रवणेन च॥
अहोरात्रे गते पश्चात् अष्टम्यां कृतनैत्यिक
तत् सर्व्वं वेदविदुषे ब्राह्मणाय निवेदयेत्।
भोजयेच्छक्तितो विप्रान् शर्कराघृतपायसैः
भुञ्जीतातैललवणं स्वयमप्यथ वाग्यतः॥
अनेन विधिना सर्व्वं मासि मासि समाचरे
संवत्सरान्ते शयनं शर्कराकलसान्वितम्॥
सर्व्वोपस्करसंयुक्तं तथैकां गां पयस्विनीम्
गृहञ्च शक्तितो दद्यात् समस्तोपस्करान्वि
सहस्रेणाथ निष्काणां कृत्वा दद्यात् शतेन
दशभिर्व्वाथ निष्काणां तदर्द्धेनाथ शक्तितः
सुवर्णाश्वः प्रदातव्यः पूर्व्ववन्मन्त्रवाचनम्।
वित्तशाठ्यं न कुर्व्वीत कुर्व्वन् दोषं समश्नुते
अमृतं पिबतो वक्त्रात् सूर्य्यस्यामृतविन्दवः
निपेतुर्ये तदुत्थास्ते शालिमुद्गेक्षवः स्मृताः
शर्करापरमस्तस्मादिक्षुसारोऽमृतात्मक।
इष्टा रवेरतः पुण्या शर्करा हव्यकव्ययोः॥
शर्करा सप्तमी चैषा वाजपेयफलप्रदा।
सर्व्वदुःखोपशमनीं पुत्रसन्ततिवर्द्धनीम्॥
यः कुर्य्यात् परया भक्त्या स परं ब्रह्म ग
कल्पमेकं वसेत् स्वर्गे ततो याति सहस्र प
इदमनघं शृणोति यः स्मरेद्वा
परिपठतीह दिवाकरस्य लोके।
मतिमपि च ददाति सोऽपि
देवैरमरवधूजनमालया च पूज्यः॥"
इति मात्स्ये ७२ अध्या

शर्करिक, त्रि, (शर्करा विद्यते अस्मि "कुमुदनड्वेतसेभ्यो ड्मतुप्" "वुञ्छण्कठजिलेति।"४।२।८०। इति कु दिलात् ठक्।) शर्करावान्। इति सि कौमुदी॥

शर्करिलः, त्रि, (शर्करा विद्यते अस्मिन्। "लुबिलचौ च।"५।२।१०५। इति इल शर्करावान्। इत्यमरः॥

शर्करी, स्त्री, छन्दोविशेषः। नदी। मेखला। इत्यभिधानमेदिनी॥ लेखनी। इति ध मुद्राङ्कितमेदिनीहेमचन्द्रौ. रेफशून्यद्वि मध्यपाठः। अस्या विवरणं शर्करी द्रष्टव्यम्॥

...दकं, क्ली. (शर्करायुक्तमुदकम्।) शर्करा-जलम्। मिछरिपाना इति भाषा। यथा,—
"...न शीतमेनैव छौनिता शुभ्रशर्करा।
...कर्पूरसारेणैव समन्विता॥
शर्करोदकमाख्यं तत् प्रसिद्धं विदुषां मते।
...न्यांतं शुक्लं शिशिरं सरम्॥
... हृद्यं लघु स्वादु वातपित्तास्रनाशनम्।
...परम्॥"
इति भावप्रकाशः॥
..., पुं, (शृधु शब्दकुत्सायाम् + घञ्।) अपा-...। शृधधातोर्घञ्प्रत्ययेन निष्पन्नमेतत्॥
...। यथा, ऋग्वेदे। ४। १। १२।
"प्र शर्द्ध आर्त्त प्रथमं विपन्या॥"
...वेगः।" इति तद्भाष्ये सायणः॥
...। यथा, तत्रैव। १। ६४। १।
"वृष्णे शर्द्धाय सुमखाय वेधसे।"
शर्द्धाय समूहाय।" इति तद्भाष्ये सायणः॥
... बलशीले, त्रि। यथा, तत्रैव।१।३७।४।
'प्रवः शर्द्धाय घृष्वये त्वेषद्युम्नाय शुष्मिणे॥"
"...य प्रसहनशीलाय।' इति तद्भाष्ये सायणः॥
..., पुं, (शर्द्धं जहातीति। हा + "एजि: ...।" ३। २। २८। इत्यत्र। वातशुनीति-...प्विति।" खश्। "अरुर्द्विषदजन्तस्यति।" ...। ३। ६७। इति मुम्।) माषः यथा।
...र्द्धलं जहाति इति शर्द्धंजहो माषः।
इति मुग्धबोधव्याकरणटीकायां दुर्गादासः॥
...नं, क्ली, (शर्द्ध + ल्युट्।) अधोवायुः। इति मनुटीकायां कल्लूक-भट्टः॥ वातकर्म्म इति भाषा॥
...र्व्व, हिंसे। गतौ। इति कविकल्पद्रुमः॥ शर्व्वति। इति दुर्गादासः॥
...र्म्म,[न्] क्ली, (शॄ + "सर्व्वधातुभ्यो मनिन्॥" उणा० ४। १४४। इति मनिन्।) सुखम्। इत्यमरः॥ (यथा, ऋग्वेदे। ४। ३५। ४।
"तस्मा अग्निर्भारतः शर्म्म यं सत्।"
"शर्म्म सुखम्।" इति तद्भाष्ये सायणः॥ यथाच कथासरित्सागरे। ७८। ४८।
"स्वामिभक्तस्तदेतस्य शर्म्मोपायमिमं शृणु॥")
तद्वति, त्रि॥ गृहम्। इति निघण्टुः।३।४॥
(यथाच ऋग्वेदे। ३। १३। ४।
"स नः शर्म्माणि वीतयेऽग्निर्यच्छतु शन्तमा।"
"शर्म्माणि शर्म्मशब्दो गृहवाची छाया शर्म्मेति तन्नामसु पाठात्।" इति तद्भाष्ये सायणः॥)
शर्म्मा,[न्] पुं, (शृणात्यशुभमिति। शॄ + "सर्व्व-धातुभ्यो मनिन्।" उणा० ४। १४४। इति मनिन्।) ब्राह्मणस्योपाधिविशेषः। यथा,—
"शर्म्मवर्म्मादिकं कार्य्यं शर्म्मा तर्पणकर्म्मणि।
शर्म्मणोऽक्षय्यकाले च पितॄणां दत्तमक्षयम्॥"
शर्म्मन्नित्यनेन गोत्रसम्बन्धनामानि पितॄनां परिकल्पयन्नित्येकवाक्यतया शर्म्मान्तं नाम प्रतीयते। तथा च विष्णुपुराणम्।

"ततश्च नाम कुर्व्वीत पितैव दशमेऽहनि।
देवपूर्व्वं नराख्यं हि शर्म्मवर्म्मादिसंयुतम्॥"
देवाख्यं पूर्व्वं नराख्यं नरनाम तच्च विशिष्टं शर्म्मयुतम्। एतच्च विप्रपरम्।
"शर्म्मा देवश्च विप्रस्य वर्म्म त्राता तु भूभुजः।
भूतिर्दत्तश्च वैश्यस्य दासः शूद्रस्य कारयेत्॥"
इति यमवचनात्॥
अत्र चकारेण देवशर्म्मणोः समुच्चयः। अत्रापि शर्म्मान्तनामाह शातातपः॥
"शर्म्मान्तं ब्राह्मणस्य स्याद्वर्म्मान्तं क्षत्रियस्य च।
धनान्तञ्चैव वैश्यस्य दासान्तं चान्त्यजन्मनः॥"
इति त्वाहतत्त्वम्॥
(तथा च विष्णुपुराणे। ३। १०। ८—९।
"ततश्च नाम कुर्व्वीत पितैव दशमेऽहनि।
देवपूर्व्वं नराख्यं हि शर्म्मवर्म्मादिसंयुतम्॥
शर्म्मेति ब्राह्मणस्योक्तं वर्म्मेति क्षत्रसंश्रयम्।
गुप्तदासात्मकं नाम प्रशस्तं वैश्यशूद्रयोः॥"
"दशमेऽहनि अतीते इति शेषः तथाशौ-चान्तोपलक्षणम्। अत्रैव कालान्तरमप्याह। यथा,—
"नामधेयं दशम्याञ्च केचिदिच्छन्ति पार्थिव।
द्वादश्यामथवा रात्र्यां मासे पूर्णे तथापरे॥"
इति॥
देवपूर्व्वं कुलदेवतानामपूर्व्वकं कुलदेवतासम्बन्धं नाम कुर्य्यात् इति शङ्खोक्तेः। नराख्यं पुरुष-वाचकम्। तच्च प्रान्ते शर्म्मवर्म्मादिसंयुतम्। यथा, सोमशर्म्मा इन्द्रवर्म्मा चन्द्रवर्म्मा चन्द्रगुप्तः शिवदासः इत्यादि।" इति तट्टीकायां स्वामी॥
"तत्रादौ नाम निर्णयः।
"शर्म्मेति ब्राह्मणस्योक्तं वर्म्मेति क्षत्रसंश्रयम्।
गुप्तदासात्मकं नाम प्रशस्तं वैश्यशूद्रयोः॥"
इत्यत्रेति पदस्वरसेन यद्यपि शर्म्मपदात्मकमेव नामावगम्यते तथापि तावन्मात्रं न नाम किन्तु तद्युक्तमिति निर्णीयते द्व्यक्षरं चतुरक्षरं इत्यादि-गृह्यदर्शनात्। एवञ्च हरिशर्म्मा नारायण-शर्म्मेत्यादि सिध्यति शर्म्मपदमात्रात्मकत्वात् तथाक्षरचतुरक्षरता न स्यादेव। तथाच नारा-यणादिपदशर्म्मपदाभ्यां निर्णीतमेव नाम द्व्यक्ष-रादिकन्तु शर्म्मपूर्व्वप्रतिकमात्रमेव अतएव दानादौ नामोच्चारणे चैत्रशर्म्मणे इत्येव श्रूयते। गोभिलः।
"शर्म्मवर्म्मादिकं कार्य्यं शर्म्मा तर्पणकर्म्मणि।
शर्म्मणोऽक्षय्यकाले स्यादेवं कुर्व्वन्न मुह्यति॥"
इदमप्युत्तरप्रतीकमात्रपरमुक्तग्रह्येन सहैकमूल-त्वात्। एतेन शर्म्म मुखनीयमिति कर्कदर्शनात् शर्म्मपदमर्थपरं तेन शुभङ्करेत्याद्येव नामेत्यपास्तं गोभिलविरोधात्। कर्कन्तु पूर्व्वप्रतीकमात्रपरम्। तेन शुभङ्करशर्म्मा भीमशर्म्मेत्यादि सिध्यति एवञ्च हव्यकव्ये चैतादृशमेव नाम तेषां प्रयोज्यम्। अपवादकाभावादिति। अत्रैव मनुः।
"मङ्गल्यं ब्राह्मणस्य स्यात् क्षत्रियस्य बलान्वितम्।
वैश्यस्य धनसंयुक्तं शूद्रस्य तु जुगुप्सितम्॥

शर्म्मवद्ब्राह्मणस्य स्याद्राज्ञो रक्षासमन्वितम्।
स्त्रीणां सुखोद्यमक्रूरं विस्पष्टार्थं मनोहरम्।
मङ्गल्यं दीर्घवर्णान्तमाशीर्व्वादाभिधानवत्॥"
शर्म्मवर्म्मप्रभृतीनि उत्तरपदानि कार्य्याणीति मनुटीकापि। स्त्रीनामन्तु यशोदादेव्यादि स्त्रीणां दास्यमित्यपि पूर्व्वप्रतीकमात्रपरम्। वैश्यस्य गुप्तान्तमिति तु पराशरः। एवञ्च दानादौ चैत्रशर्म्मणे ब्राह्मणायेत्यादि स्वरूपं वाक्यम्॥" इत्याह्निकतत्त्वम्॥ ०॥)
शर्म्मरः, पुं, वस्त्रभेदः। इति धरणिः॥
शर्म्मरा, स्त्री, दारुहरिद्रा। इति धरणिः॥
शर्य्या, स्त्री, रात्रिः। यथा,—
"त्रियामा शर्व्वरी शर्य्या क्षणिनी क्षणदा क्षपा।"
इति भरतधृतवाचस्पतिः॥
(इषुः। यथा, ऋग्वेदे।१।१४।४।
"शर्य्याममना सनुष्युन्।" "शर्य्या इषवः शर-मय्यः। इति यास्कः॥" इति तद्भाष्ये सायणः॥
अङ्गुलिः। यथा, तत्रैव।८।११०।५।
"शर्य्याभिर्नभरमाणो गभस्त्योः।"
"शर्य्याभिरङ्गुलीभिः।" इति तद्भाष्ये सायणः॥
शर्य्यातिः पुं, वैवस्वतमनुपुत्रः। तस्य पुत्र आनर्त्तः यथा,—
"आनर्त्तो नाम शर्य्यातेः सुकन्या नाम दारिका।
आनर्त्तस्याभवत् पुत्त्रो रोचमानः प्रतापवान्।
आनर्त्तो नाम देशोऽभून्नगरी च कुशस्थली॥"
इति मात्स्ये १२ अध्यायः॥
(अस्य विशेषविवरणं भागवते ८। १३॥ एव ९। १। अध्याये च द्रष्टव्यम्॥)
शर्व, हिंसे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) शर्वति। इति दुर्गादासः॥
शर्वः पुं, (शृणाति सर्वाः प्रजाः संहरति प्रलये संहारयति वा भक्तानां पापानि। शॄ "कॄ + गॄ शॄ दॄभ्यो वः।" उणा० १।१५५। इति वः।) शिवः। इति हेमचन्द्रः॥ (यथा, रघुवंशे। ११। ९३।
"कतिचिदवनिपालः शर्व्वरीः शर्व्वकल्पः॥")
दन्त्यसादिरप्ययम्। विष्णुः। यथा,—
"शर्वः सर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः।"
इति तस्य सहस्रनामस्तोत्रम्॥
शर्वरं, क्ली, तमः। कन्दर्पः। इति संक्षिप्तसारो-णादिवृत्तिः॥
शर्वरी, स्त्री, (शृणाति चेष्टामिति। शॄ + "कॄगॄ-शॄवृचतिभ्यः ष्वरच्।" उणा० २। १२३। इति ष्वरच्। षित्वात् ङीष्।) रात्रिः। इत्यमरः॥ (यथा, ऋग्वेदे। ५। ५२। ३।
"अतिस्कन्दन्ति शर्वरीः॥")
योषित्। इति मेदिनी॥ हरिद्रा। इति विश्वः॥ सन्ध्या। इति संक्षिप्तसारोणादिवृत्तिः॥
शर्वला, स्त्री, तोमरास्त्रम्। इत्यमरटीकायां रायमुकुटः॥ दन्त्यसादिरप्ययम्॥
शर्वाणी, स्त्री, (शर्वस्य भार्य्या। "इन्द्रवरुण-भवेति।" ४।१।४९। इति ङीष्।) पार्वती।

इति हेमचन्द्रः ॥ (यथा, कथासरित्सागरे। १। ५८।
"निपत्य पादयोस्ताभ्यां जयया सह बोधिता।
शापान्तं प्रति शर्व्वाणी शनैर्वचनमब्रवीत् ॥")
दन्त्यसादिरप्ययं शब्दः ॥

शर्शरीकः, पुं, (शृ + "शृपॄभ्यां ईकन् चाभ्यासस्य।" उणा० ४। १८। इति ईकन् द्वित्वमभ्यासस्य रुक् च।) हिंस्रः। खलः। इत्युणादिकोषः ॥ अश्वः। मङ्गलाभरणम्। अग्निः। इति संक्षिप्तसारोणादिवृत्तिः ॥

शल, वेगे। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट्।) शलति। इति दुर्गादासः ॥

शल, क ङ श्लाघे। इति कविकल्पद्रुमः ॥ (चुरा०-आत्म०-सक०-सेट्।) क ङ, शालयते पण्डितं धीरः। इति दुर्गादासः ॥

शल, ङ चलने। स्नृतौ। इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सक०-च-सेट्।) ङ, शलते। चलनं कम्पः। स्नृतिरिह संवरणम्। इति दुर्गादासः ॥

शल, ज गतौ। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट्।) ज, शालः शलः। इति दुर्गादासः ॥

शलं, क्ली, (शल + "ज्वलितिकसन्तेभ्यो णः।" ३। १। १४०। इति णः।) शल्लकीलोम। सजारुकाँटा इति भाषा। तत्पर्य्यायः। शलली २ शललम् ३। इत्यमरः ॥

शलः, पुं, शल्लकम्। भृङ्गी। सेत्रभेदः। ब्रह्मा। इति मेदिनीशब्दरत्नावल्यौ ॥ कुन्तास्त्रम्। इति त्रिकाण्डशेषः ॥ उष्ट्रः। इति हेमचन्द्रः ॥ (वासुकिवंशीयसर्पविशेषः। यथा, महाभारते। १। ५७। ५।
"कोटिशो मानसः पूर्णः शलः पालो हलीमकः"
शन्तनुराजपुत्त्रः। यथा, भागवते ।९।२२।१८।
"शलश्च शन्तनोरासीत् गङ्गायां भीष्म आत्मवान्।"
शल्यराजः। यथा, भागवते। १। १५। १६।
"शकृविगसंमलहेभ्यसराक्षिकाद्यैः ॥"
कंसामात्यः। यथा, तत्रैव। १०। ३६। २१।
"ततो मुष्टिकचाणूरशलतोशलकादिकान् ॥")

शलकः, पुं, मर्कटः। इति त्रिकाण्डशेषः ॥ माकड़्सा इति भाषा ॥

शलङ्गः, पुं, लोकपालः। लवणविशेषः। इत्युणादिकोषः ॥

शलभः, पुं, (शल + "कृशृशलिकलिगर्द्दिभ्योऽभच्।" उणा० ३। १२२। इति अभच्।) कीटविशेषः। फड़िं इति पतङ्गपाल इति च भाषा। तत्पर्य्यायः। पतङ्गः २। इत्यमरः ॥ पताङ्गः ३ पताङ्गः ४। इति शब्दरत्नावली ॥ इतिशिष्टिषः। यथा,—
"...मनसा मूषिकाः खगाः।
राजानः शङ्केत ईतयः स्मृताः ॥"
इति ज्योतिस्तत्त्वम् ॥

(असुरविशेषः। यथा, हरिवंशे। ३। ८८।
"शरभः शलभश्चैव विप्रचित्तिश्च वीर्य्यवान् ॥")

शललं, क्ली, (शल चलनसंवरणयोः + वृषादित्वात् कलः।) शलम् इत्यमरः ॥

शलली, स्त्री, (शलल + गौरादित्वाज्जातित्वाद्वा ङीप्।) शलम् इत्यमरः ॥ शली। इति राजनिर्घण्टः ॥

शलाका, स्त्री, (शल + "बलाकादयश्च।" उणा० ४।१४। इति आकः। स्त्रियां टाप्।) शल्यम्। मदनवृक्षः। शारिका। शल्लकी। छत्रादिकाष्ठी। (यथा, गुरुगीतायाम्।
"अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥")
शरः। इति मेदिनी ॥ आलेख्यकूर्चिका। इति हेमचन्द्रः ॥ अस्थि। इति शब्दचन्द्रिका ॥

शलाकापरि, व्य, शलाकाक्रीड़ायां पराजयः। यथा। "अक्षशलाकासंख्याः परिणा।" २।१।१०। द्यूतव्यवहारे पराजये एवायं समासः। अक्षे विपरीतं वृत्तम्। अक्षपरि। एवं शलाकापरि। एकपरि। इति सिद्धान्तकौमुदी ॥ अपि च। "नन्वेकस्याक्षस्य शलाकाया वा द्यूतेऽन्यथापातनमित्यर्थे अक्षपरि शलाकापरि इत्यव्ययीभावेऽव्यासिस्तयोरव्ययगर्भत्वेऽपि अव्ययपूर्व्वत्वाभावात्।" इति शब्दशक्तिप्रकाशिका ॥

शलाकापुरुषाः, पुं, बौद्धानां त्रिषष्टिदेवपुरुषाः। तत्र द्वादश चक्रवर्त्तिनः। चतुर्विंशतिर्जिनाः। नव वासुदेवाः। नव बलदेवाः। नव प्रतिवासुदेवाश्च। यथा,—
"यः सर्व्वमण्डलस्येशो राजसूयश्च योऽयजत्।
चक्रवर्त्ती सार्व्वभौमस्ते तु द्वादश भारते ॥
आर्षभिर्भरतस्तत्र सगरस्तु सुमित्रभूः।
मघवा वैजयिरथाश्वसेननृपनन्दनः ॥
सनत्कुमारोऽथ शान्तिकुन्थुररोजिना अपि।
सुभूमस्तु कार्त्तवीर्य्यः पद्मः पद्मोत्तरात्मजः ॥
हरिषेणो हरिसुतो जयो विजयनन्दनः।
ब्रह्मसूनुर्ब्रह्मदत्तः सर्व्वे चेक्ष्वाकुवंशजाः ॥
प्राजापत्यस्त्रिपृष्ठोऽथ द्विपृष्ठो ब्रह्मसम्भव।
स्वयम्भू रुद्रतनयः सोमभूः पुरुषोत्तमः ॥
शैविः पुरुषसिंहोऽथ महाशीरः समुद्भवः।
स्यात् पुरुषपुण्डरीको दत्तोऽग्निः सिंहनन्दनः ॥
नारायणो दाशरथिः कृष्णस्तु वसुदेवभूः।
वासुदेवा अमी कृष्णा नव शुक्ला बलास्त्वमी ॥
अचलो विजयो भद्रः सुप्रभश्च सुदर्शनः।
आनन्दो नन्दनः पद्मो रामो विष्णुद्विषस्त्वमी ॥
अश्वग्रीवस्तारकश्च मेरको मधुरेव च।
निशुम्भबलिप्रह्लादलङ्केशमगधेश्वराः।
जिनः सह त्रिषष्टिः स्युः शलाकापुरुषा अमी ॥"
इति हेमचन्द्रः ॥

शलाटः, पुं, शकटपरिमाणम्। यथा,—
"तुलापलशतं तासां विंशत्या भार आचितः।
शकटः शाकटोनश्च शलाटस्ते दशाचितः ॥"
इति हेमचन्द्रः ॥

शलाटुः, त्रि, अपक्वफलम्। इत्यमरः।२।४।१(यथा, सुश्रुते। १। ४३।
"मदनशलाटुचूर्णान्येवं वा वकुलरथ्यकोषयुक्तानि मधुलवणयुक्तानीति ॥")

शलाटुः, पुं, मूलविशेषः। इत्युणादिकोषः ॥ इति राजनिर्घण्टः ॥

शलामौलिः, पुं, उष्ट्रः। इति हेमचन्द्रः ॥

शलालु, क्ली, सुगन्धिद्रव्यविशेषः। सिद्धान्तकौमुदी ॥

शलालुकः, त्रि, शलालुना क्रीतं वस्तु। यथा "शलालुनोऽन्यतरस्याम्।" ४। ४। ५४। इ पक्षे ठक्। शलालुकः। शलालुकी। शालालुकः। शालालुकी। शलालु सुगन्धिद्रव्यविशेषः। इति सिद्धान्तकौमुदी ॥

शली, स्त्री, (शलं शल्लकीलोम अस्त्यस्या इति शल + अच्। ङीप्।) स्वल्पशल्यकः। तत्पर्य्यायः। शलली २ श्वाविन्३। अस्य मांसगुणाः। गुरुत्वम्। स्रोग्धत्वम्। शीतलत्वम्। कफपित्तनाशित्वञ्च। इति राजनिर्घण्टः ॥

शल्कं, क्ली, (शल चलने स्नृतौ + "इण्भीकापाशल्यतिमर्च्चिभ्यः कन्।" उणा० ३। ४३ इति कन्।) खण्डम्। वल्कलम्। इत्यमरः। मत्स्यत्वक्। आँइस इति भाषा। यथा,—
"शल्कं स्यात् वल्कले खण्डे शल्कन्तु मत्स्यवल्कले।
इति भरतधृतकोषः।
(यथा, महाभारते। १२। ३६। २३।
अभक्ष्या ब्राह्मणैर्मत्स्याः शल्कैर्ये वै विवर्जिताः ॥")

शल्कलं, क्ली, मत्स्यवल्कलम्। वृक्षत्वक्। शल धातोः कलच्प्रत्ययेन निष्पन्नमेतत्। इति सिद्धान्तकौमुदी ॥

शल्कली, [न्]पुं, (शल्कलमस्यास्तीति। शल्कल इनिः।) (मत्स्यः। इति हेमचन्द्रः ॥

शल्की, [न्] पुं, (शल्कमस्यास्तीति। शल्क इनि।) मत्स्यः। इति हेमचन्द्रः ॥

शल्पदा, शल्पपर्णिका, } स्त्री, मेदा। इतिराजनिर्घण्टः

शल्भ, ङ कथने। इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट्।) ङ शल्भते। कथन प्रशंसा। इति दुर्गादासः ॥

शल्मलिः, पुं, शाल्मलीवृक्षः। (यथा, वाजसनेयसंहितायाम्। २३। १३। "शाल्मलिर्वृद्ध्या" "शाल्मलिर्वृक्षविशेषो वृद्ध्या त्वामवतु शल्कैर्वनस्पतीनां वर्षिष्ठं वर्द्धते इति श्रुतेः।" इति तद्भाष्यम् ॥)

शल्मली, स्त्री, शाल्मलिवृक्षः। यथा,—
"शल्मलिः स्यात् शाल्मलिश्च शाल्मली शल्मली तथा।"
इति भरतद्विरूपकोषः

शल्य, क्ली, (शलति चलतीति। शल + "शल्यशमर्णसिपर्णसीति।" उणा० ४। १०७। इ

।) स्तेन । दृढ । यथा, रघुः । ९ । ७५ ।
"शल्यप्रोतं प्रेक्ष्य सकृपां मृगीं त्वं
शस्त्रादस्माच्च हृदयात् विनिर्गतोऽसि ।"
पातकम् । इति मेदिनी । वंशशलाका । इति
राः । दुःखदम् । दुर्वाक्यम् । इति शब्द-
रत्नावली । पापम् । इति विश्वप्रकाशः ।
शि । यथा । अथ शल्योद्धारविधिः ।
"भूमिविना शल्यं भूमिमध्ये
निखाय नीलावधि शल्यमस्ताम् ।
शल्योद्धिमत्सामयम् । मुक्ताम्
प्रासादगेहं प्रयत्नादिभिः ॥
दूर्वाप्रवालाक्षतपुष्पपाणिः
शुचिः शुचिं दैवविदं समीक्ष्य ।
एकादिभिरेभी मधुरस्वरेण
शल्यस्य तत्त्वं भवनं महेशः ॥
ततः प्रश्नादिमौ वर्णः समायातौ महतोऽपि वा ।
तस्मात् पृष्ठापरादेव शल्यानां ज्ञानमादिशेत् ॥
अत्रैव धरणी धारिणी मही च सदमन्दरम् ।
। भूमं मम इत्येव मस्यां वह्निप्रियान्तकः ॥"
वह्निप्रिया स्वाहा ।
"मध्येनानेन काठिन्यसविस्मया विसाभवित् ।
तथा मदनमिव तथा यथा दिनिर्यावत् ॥
अ-क-च-ट-त-प-शाः श-ष-सा नव चेत् प्रश्ना-
क्षराणि जायन्ते ।
प्रागादिकोष्ठे नवके वर्णास्ते शल्यमाख्यान्ति ॥
प्रश्ने अकारः पुरतो नरास्थि
तथोति शल्यं मरणप्रदायि ।
कोणांशदण्डोरगरींतुमृत्यु-
प्रदे ककारः खरशल्यमग्नौ ॥
याम्यां चकारः प्रबलास्थि वेश्म
प्रभोर्विनाशं प्रकरोति शल्यम् ।
रक्षोदिशि श्वास्थिरटस्थितानां
मरणद्वयं वक्ति सुनिश्चितं तत् ॥
त: पाश्चिदिग्यस्थि शिशोर्ब्रवीति
मृत्युं प्रवासाद्गृहमेव शल्यम् ।
पो वायुकोणे नरलपमस्थि
टारिद्रमित्रसयक्षादिधत्ते ॥"
"धनपदिशि शकारः प्राह विप्रास्थि वित्त-
क्षयकृदथ षकारो वक्ति वस्त्रास्थि गर्भो ।
तदिह कुलविनाशं गोधनानाश्च हानिं
वितरति गृहनाथस्यापि गुप्तस्य देवैः ॥
यो मध्यभागे भणितं कपालं
कालायसं चाह कुलक्षयाय ।
यत्नादपास्यान्यधना प्रमाणं
सर्वत्र तथ्यं कथयामि शल्ये ॥
धन्वन्तरौ जलेशानि शल्यं शार्द्धकरं कटौ ।
वज्रान्तकाकुबेरेषु पुरुषे मध्यवानयोः ॥"
देवीपुराणम् ।
"पुरुषाधःस्थितं शल्यं न गृहे दोषदं भवेत् ।
प्रासादे दोषदं शल्यं भवेद्यावज्जलान्तकम् ॥
गृहारम्भेऽतिकण्डूतिः स्वाम्यङ्गे यदि जायते ।

शल्यं तत्स्थानितत् दशाद्वे भवेदपि वा ॥"
इति ज्योतिस्तत्त्वम् ॥ ८ ॥
तत्र शल्यानि यथा,—
"करी न हरिणश्चैव चन्दनी न कन्यामृग
अविर्न मूषिकः सर्पः कुक्कुटो च वर्जयेत् ।
शृगालो न भवत्यस्मा हरिचन्दने सुप्तमयः
स न ग्रामबालकमो भवति मम शल्यानि च ॥"
इति गारुडे १०० अध्यायः ॥
शल्यः, पुं, (शल + यत् ।) मद्रदेशः ।
राजविशेषः । इत्यमरः ॥ (यथा, भारते, ८।३।२३।
"हत्वा शरास्त्र महिषसैन्यानां
गोपुत्रमान्यान्तमर्दयाम ॥")
कृपरोदः । स तु युधिष्ठिरमातुलः । (यथा हि
दुर्योधनेन चातुर्यात् वशीकृतः कुरुपाण्डव-
युद्धे दुर्योधनपक्षं समाश्रयत् । यथा, महा-
भारते । ५ । ८ । २१६ ।
"मद्रराजस्तु राजानमायान्तं पाण्डवान् प्रति
उपहारैर्वस्त्रापि यथाक्रमं च सुयोधनः ॥
यदि न वरं वद्य माद्रेयं क्रियतां मम ।
शल्यस्तस्मै प्रतिज्ञाय जगामोदिश्य पाण्डवान् ॥"
कर्णार्जुनयोर्द्वैरथयुद्धे शल्यस्य कर्णस्य सारथ्य-
करणे प्रतिज्ञा । यथा, तत्रैव । ५ । ८ । १०-४४ ।
युधिष्ठिर उवाच ।
"सुकृतं ते कृतं राजन् ! प्रहृष्टेनान्तरात्मना ।
दुर्योधनस्य यद्वीर त्वया वाच्या प्रतिश्रुतम् ॥
एकं त्विच्छामि भद्रं ते क्रियमाणं महीपते ।
राजन्नकर्त्तव्यमपि कर्त्तुमर्हसि साधुम ॥
मम त्ववेक्षया वीर शृणु विज्ञापयामि ते ।
भवानिह महाराज वासुदेवसमो युधि ॥
कर्णार्जुनाभ्यां संप्राप्ते द्वैरथे राजसत्तम ।
कर्णस्य भवता कार्य्यं सारथ्यं नात्र संशयः ॥
तत्र पाल्योऽर्जुनो राजन् यदि मत्प्रियमिच्छसि ।
तेजोवधश्च ते कार्य्यः सौतेरस्मज्जयावहः ।
अकर्त्तव्यमपि ह्येतत् कर्त्तुमर्हसि मातुल ॥
शल्य उवाच ।
शृणु पाण्डव भद्रं ते यद्ब्रवीषि दुरात्मनः ।
तेजोवधनिमित्तं मां सूतपुत्रस्य संयुगे ॥
अहं तस्य भविष्यामि संग्रामे सारथिर्ध्रुवम् ।
वासुदेवेन हि समं नित्यं मां स हि मन्यते ॥
तस्याहं कुरुशार्दूल प्रतीपमहितं वचः ।
ध्रुवं सन्दर्शयिष्यामि योद्धुकामस्य संयुगे ॥
यथा च हृतदर्पश्च हृततेजाश्च पाण्डव ।
भविष्यति सुखं हन्तुं सत्यमेतद्ब्रवीमि ते ॥"
युधिष्ठिरस्तु एनं वृतवान् । एतद्वृत्तान्तस्तु
महाभारते शल्यपर्वणि १०अध्याये द्रष्टव्यः ॥)
सीमा । शलाका । इति हेमचन्द्रः ॥ विल्व-
वृक्षः । मत्स्यभेदः । इति राजनिर्घण्टः ॥ ॥
शल्यनिःसरणौषधं यथा,—
"रुद्र लाङ्गलिकामूलं हिज्जलस्य तथैव च ।
तेन व्रणमुखं लिप्तं शल्यो निःसरति व्रणात् ।
चिरकालप्रविष्टोऽपि तेन मार्गेण शङ्कर ॥"
इति गारुडे १८३ अध्यायः ॥

शल्य, पुं, क्ली, शल्यविशेषः । शेल इति भाषा ।
तत्पर्य्यायः । शङ्कु २ । इत्यमरः ॥ दीर्घादन्ध
३ शलः ४ कुन्तः ५ विषाङ्कुरः ६ । इति
त्रिकाण्डशेषः ॥
शल्यकः, पुं, (शल्य इव । शल्य + इवार्थे कन् ।)
मदनद्रुमः । इति शब्दरत्नावली ॥ शल्य-
जन्तुः । इति राजनिर्घण्टः ॥ (यथा, मनुः ।
५ । १८ ।
"श्वाविधं शल्यकं गोधां खड्गकूर्मशशांस्तथा ।
भक्ष्यान् पञ्चनखेष्वाहुरनुष्ट्रांश्चैकतोदतः ॥")
शल्यकण्ठः, पुं, (शल्यं तदंशोम कण्ठेऽपि यस्य)
शल्यकी । इति शब्दचन्द्रिका ॥
शल्यलोम, [न्] क्ली, (शल्यस्य लोम ।) शल्यकी
इति राजनिर्घण्टः ॥
शल्यारिः, पुं, (शल्यस्य परिस्रावकत्वात् ।)
युधिष्ठिरराजः । इति हेमचन्द्रः ॥
शल्ल, ङ शल्लम् । इति कविकल्पद्रुमः ॥ (भ्वा०-पर
सक०-सेट् ।) शल्ली । इति दुर्गादासः ॥
शीकायामुच्यम् ॥
शल्लं, क्ली, त्वक् । इति शब्दरत्नावली ॥
शल्लः, पुं, भेकः । इति शब्दरत्नावली ॥
शल्लकं, क्ली, (शल्लक । स्वार्थे कन् ।)त्वक् । इति
शब्दरत्नावली ॥
शल्लकः, पुं, शोणकवृक्षः । इति जटाधरः ॥
(शल्यकोऽस्त्रः । यथा, रामायणे । १ ।
१०७ ।
"शल्याः पतन्त्या भेधा गोधाकच्छपशल्लकाः ।
शशाय शल्योऽपि हि सिंहतुण्डकरोहिताः ॥"
शल्लकी, स्त्री, पशुविशेषः । सजारु इति बङ्ग-
भाषा । साहिम इति हिन्दीभाषा ॥ तत्-
पर्य्यायः । श्वावित् २ शल्यका ३ शल्यः ४ ।
इति जटाधरः ॥ कण्टकपादः ५ छेदारः ६ ।
इति शब्दरत्नावली ॥ शल्यकः ७ शल्यमृगः ८
वक्रशल्यः ९ विलेशयः १० । अस्या मांस-
गुणाः ।
"शल्यमांसं गुरु स्निग्धं शीतलं कफपित्तजित् ॥"
इति राजनिर्घण्टः ॥
भावप्रकाशोक्तगुणाः विलेशयशब्दे द्रष्टव्याः ॥
हस्तिविशेषः । (यथा, रामायणे । २ । ५५ ।८।
"क्रोशमात्रं ततो गत्वा नीलं प्रेक्ष्य च काननम् ।
शल्लकीबदरीमिश्रं राम वन्यैश्च यामुनैः ।
स पन्थाश्चित्रकूटस्य गतस्य बहुशो मया ॥")
तत्पर्य्यायः । गजभक्ष्या २ सुवहा ३ सुरभिः ४
रसा ५ महेरणा ६ कुन्दुरुकी ७ ह्लादिनी ८ ।
इत्यमरः ॥ गजभक्षा ९ सुरभी १० महेरुणा ११
महारणा १२ ह्लादिनी १३ सिल्लकी १४
सल्लकी १५ । इति भरतः ॥ [illegible]मा १६
शिल्लकी १७ । इति टीकान्[illegible] [illegible]की १८
सिल्हभूमिका १९ । इति [illegible]
सूवी २० कुन्ती २१ [illegible]
शल्लकीद्रवः, पुं, सि[illegible]
शल्वः, पुं, स[illegible]

शव. विकारे। गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।)शवति चित्तं कामः। इति दुर्गादासः॥

शव. क्ली. (शवति गच्छतीति। शव+अच्।) जलम्। इति मेदिनी॥

शवः पुं. क्ली. (शवति दर्शनेन चित्तं विकरोतीति। शव विकारे+अच्।) मृतशरीरम्। तत्पर्य्यायः। कुणपः २। इत्यमरः॥ क्षितिवर्द्धनः ३। इति शब्दरत्नावली॥ मृतकम् ४। इति वाराहपुराणम्॥ तद्दाहविधिर्यथा,—

"अष्टमेऽह्नि समुद्दिश्य स्नात्वा मृत्युवशं गतम्।
मद्गतश्चित्तं मत्वा मम्माय विविधानपि॥
घृतेनैकमसमायुक्तं कृत्वा वै देहशोधनम्।
[illegible] तत् सर्वं परिकल्प्य च॥
दक्षिणायां शिरः कृत्वा भूमौ तं निधाय च।
[illegible] कारयेत्॥
[illegible] पुण्या [illegible] च्युताः।
[illegible]

वराह उवाच।
[illegible]

इति [illegible]

वराह उवाच।
शृणु सुन्दरि! तत्त्वेन यस्मात् त्वं परिपृच्छसि।
कथयिष्यामि ते ह्येतद् शोभनं पापनाशनम्॥
एकाहारं दिनान् सप्त त्रिदिनं चाप्युपोषितः।
पञ्चगव्यं ततः पीत्वा शीघ्रं मुच्यति किल्बिषात्॥
शवे स्पृष्टेऽपराधस्य एष ते कथितो विधिः।
सर्व्वथा वर्जनीयो वै सर्व्वभागवतेन तु॥
य एतेन विधानेन प्रायश्चित्तं समाचरेत्।
विमुक्तः सर्व्वपापेभ्यः अपराधो न विद्यते॥"

अपिच।

वराह उवाच।
"स्पृष्ट्वा तु मृतकं देवि! योऽमत्सुविष्टेषु तिष्ठति।
शतं वर्षसहस्राणि गर्भेषु परिवर्त्तते॥
दश वर्षसहस्राणि चण्डालश्चैव जायते।
अन्धः सप्तसहस्राणि मण्डूकश्च शतं समाः॥
मक्षिका त्रीणि वर्षाणि टिट्टिभैकादशं समाः।
दश वै सप्त चाब्दानि लकलाभो भवेत् समाः॥
हस्ती वर्षशतश्चैव खरो द्वाविंशको भवेत्।
मार्ज्जारो नव वर्षाणि वानरो दश पञ्च च॥
एवं स चात्मदोषेण मम कर्म्मपरायणः।
प्राप्नोति सुमहद्दुःखं देवि! एष न संशयः॥
ततो हरिवचः श्रुत्वा दुःखेन परिपृच्छति।
सर्व्वसंसारमोक्षाय प्रत्युवाच वसुन्धरा॥
किमिदं भाषसे देव मानुषाणां दुरासदम्।
वाक्यं भीषणश्चैव मम कर्म्मप्रसीदकम्॥
आचाराच्च परिभ्रष्टस्तव कर्म्मपरायणः।
तरन्ति येन दुर्गाणि प्रायश्चित्तं तथा वद॥
श्रुत्वा पृथ्व्यास्ततो वाक्यं लोकनाथो जनार्द्दनः।
धर्म्मसंरक्षणार्थाय प्रत्युवाच वसुन्धराम्॥

वराह उवाच।
स्पृष्ट्वा तु मृतकं भूमे मम कर्म्मपरायणः।
एकाहारं ततस्तिष्ठेत् दिनानि दश पञ्च च॥
ततः एवं विधिं कृत्वा पञ्चगव्यन्तु प्राशयेत्।
मत्प्रसादात् विशुद्धात्मा कर्म्मणा च न लिप्यते॥
एतत्ते कथितं देवि स्पृष्ट्वा मृतकमेव च।
दोषश्चैव विशुद्ध्यर्थं यत्त्वया पूर्व्वपृच्छितम्॥
य एतेन विधानेन प्रायश्चित्तं समाचरेत्।
अपराधविनिर्मुक्तो मम लोकं स गच्छति॥"

इति वाराहे मृतकस्पर्शनप्रायश्चित्तनामाध्यायः॥०॥ शवानुगमनाशौचं यथा। कूर्म्मपुराणम्।

"प्रेतीभूतं द्विजं विप्रो योऽनुगच्छति कामतः।
स्नात्वा सचैलं स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यति॥
एकाहात् क्षत्रिये शूद्रे त्र्यहात् वैश्ये च स्यात् शूद्रेऽनु।
शूद्रे दिनत्रयं प्रोक्तं प्राणायामशतं पुनः॥"

[illegible]
[illegible]

"[illegible]

अनुगम्याम्भसि स्नात्वा स्पृष्ट्वाग्निं घृतभुक् शुचिः॥"

तत्प्रमादादनुगमने कथञ्चनेत्यभिधानात्। अभ्यसि न गृह्णतोदके॥ * ॥ शूद्रस्य शवदहने दोषो यथा,—

"मृतब्राह्मणदेहांश्च दैवात् शूद्रा [illegible]
पदप्रमाणवर्षञ्च तेषाञ्च नरके स्थितिः॥
ततस्तेषाञ्च साहाय्यं करोति हरिरूपिणी।
ददाति मुक्तिं तेभ्योऽपि क्रमेण च [illegible]
जन्म पुण्यवतां गेहे कारयित्वा च भारते।
स्थानं ददाति [illegible]"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे शवदूषितगृहजलाशयादीनां शुद्धिर्यथा,—

ब्रह्मपुराणम्।
"येषामभक्ष्यं मांसञ्च तच्छरीरैर्युतश्च यत्।
वापीकूपतडागेषु जलं सर्व्वञ्च दुष्यति॥"
तच्छरीरैर्मृतशरीरैः। उत्तरवचनेनात्। यथा,—
"सकुणपं सकर्द्दमं तेभ्यस्तोयमपास्य तत्।
प्रक्षिपेत् पञ्चगव्यञ्च समन्त्रं सपशुद्धिकम्।
अपास्य कुणपं तेभ्यो यद्धतोयेभ्य एव वा।
शतं पञ्चशतं विंशत् तोयकुम्भान् समुद्धरेत्।"
वापी ससोपाना। निःसोपानः कूपः। [illegible] पद्माकरः। शतादिजलाञ्जल्याद्यपेक्षया [illegible]स्यस्य सर्व्वोद्धारणाभिधानात्। एवं समये शुद्धाविःसार्य्यते अन्यथा गृहस्य स्यात्॥ यथा, बृहन्मनुः।
"स्वगृहपतिताद्यास्या मृताद्येद्विजसद्मनि।
शौचं तत्र प्रवक्ष्यामि मनुना भाषितं यथा॥
दशरात्राच्छुनि प्रेते मासात् शूद्रे भवेच्छुचि।
द्वाभ्यान्तु पतिते गेहे अन्त्ये मासचतुष्टयम्।
अत्यन्त्ये वर्जयेद्गेहमित्येवं मनुरब्रवीत्॥"
द्वाभ्यां मासाभ्यां मासशब्दपाठात्। [illegible] अन्त्यजाः श्वपाकाः। [illegible]म्लेच्छाः॥ यमः।
"द्विजस्य मरणे वेश्म विशुध्यति दिनत्रयात्।
दिनैकेन बहिर्भूमिरग्निप्रोक्षणलेपनैः॥"
यथात्र काशीनाथतर्कालङ्कारभट्टाचार्यसम्मतः।
"गृहशुद्धिं प्रवक्ष्यामि अन्तस्थशवदूषिते।
प्रोत्सृज्य मृण्मयं पात्रं सिद्धमन्नं तथैव च।
गृहादपास्य तत् सर्व्वं गोमयेनोपलेपयेत्।
गोमयेनोपलिप्याथ छागेनाघ्रापयेद्बुधः।
ब्राह्मणैर्म्मन्त्रपूतैश्च हिरण्यकुशवारिभिः।
सर्व्वमभ्युक्षयेद्वेश्म ततः शुध्यत्यसंशयः॥"
अत्र मस्त्रादिदर्शि गायत्री। देवलः।
"पञ्चधा वा चतुर्द्धा वा भूरमेध्या विदर्य्यते।
दुष्टा द्विधा त्रिधा वापि शुध्यते मलिनैकधा।
दहन खननं भूमिरुपलेपनवापने।
पर्जन्यवर्षणाद्यपि शौचं पञ्चविधं स्मृतम्।
प्रसूते गर्भिणी यत्र म्रियते यत्र मानुषः।
चाण्डालैरुषितं यत्र यत्र विन्यस्यते शवः।
विण्मूत्रोपहतं यत्र कुणपो यत्र दृश्यते।

[illegible]

[illegible]

[illegible]

यथा,—

[illegible]

इति [illegible]

(शशिनः कला । चन्द्रकला । यथा,—
"कमलिनी मलिनी दिवसात्यये
शशिकला विकला चणदात्यये ।
इति विधिर्विदधे प्रमदामुखम्
भवति विघ्नतमः क्रमशो जनः ॥"
इत्युद्भटः ॥)

शशिकान्तं, क्ली, (शशी कान्तो यस्य ।) कुमुदम् । इति राजनिर्घण्टः ॥

शशिकान्तः, पुं, (शशी कान्तो यस्य ।) चन्द्रकान्तमणिः । इति राजनिर्घण्टः ॥ यथा, (बृहत्संहितायाम् । ८० । ४ ।
"वैदूर्य्यविपुलकविमलक-
राजमणिस्फटिकशशिकान्ताः ॥")

शशिध्वजः, पुं, (शशी ध्वजे यस्य ।) भल्लाटपुरराजः । यथा,—
"ततः शशिध्वजो राजा युद्धादाहूय पुत्रकान् ।
सुशान्ताया मतिं बुद्ध्वा रमां प्रादात् स कल्कये ॥
विशाखयूपभूपाय रुचिराश्च संयुगम् ।
शश्याकपत्रवेणापि भल्लाटं पुरमाययुः ॥"
इति कल्किपुराणे २५ अध्यायः ॥

शशिप्रभं, क्ली, (शशिनः प्रभेव प्रभा यस्य ।) कुमुदम् । इति शब्दमाला ॥ मुक्ता । इति राजनिर्घण्टः ॥ चन्द्रप्रभायुक्ते, त्रि ॥ (चन्द्रप्रभासदृशे च, त्रि । यथा महाभारते । १ । ८६ । ४ ।
"तस्या वासः समुद्धूतं मारुतेन शशिप्रभम् ॥")

शशिप्रभा, स्त्री, (शशिनः प्रभा ।) ज्योत्स्ना । इति जटाधरः ॥

शशिभूषणः, पुं, (शशी भूषणं यस्य) शिवः । इति शशिशेखरशब्ददर्शनात् ॥

शशिलेखा, स्त्री, चन्द्रकला । गुडूची । वृत्तभेदः । इति मेदिनी ॥ तद्वृत्तस्य लक्षणादि यथा,—
"मौ मौ यौ चेत् भवेतां समाष्टकैश्चन्द्रलेखा ।
विच्छेदे ते मुरारे पाण्डुप्रकाशा कृशाङ्गी
म्लानच्छायं दुकूलं न भ्राजते बिभ्रती सा ।
राधाम्भोदस्य मध्ये लीला यथा चन्द्रलेखा
विद्वानो त्वां स्मरन्ती धत्ते भृशं जीवयोगम् ॥"
इति छन्दोमञ्जरी ॥

शशिवाटिका, स्त्री, पुनर्नवा । इति राजनिर्घण्टः ॥

शशिशेखरः, पुं, (शशी शेखरे यस्य ।) शिवः । इति हलायुधः ॥ (यथा, कथासरित्सागरे । १ । २२ ।
"तस्याः स्तुतिवशो हृष्टस्तामङ्कमधिरोप्य सः ।
विश्रं प्रिय करोमीति बभाषे शशिशेखरः ॥")
बुद्धभेदः । तत्पर्य्यायः । हेरम्बः २ हेवकः ३ चक्रसम्बरः ४ देवः ५ वज्रकपाली ६ नियुश्री ७ वज्रटीकः ८ । इति त्रिकाण्डशेषः ॥

शशी, [न्] पुं, (शशोऽस्त्यस्येति । शश + इनिः ।) चन्द्रः । यथा,—
"हिमांशुश्चन्द्रमाश्चन्द्रः शशी चन्द्रो हिमद्युतिः ॥"
भरतधृतनाममालायाम् ॥
(यथा च ।

"शशिनस्तुल्यवंशोऽपि निर्द्धनः परिभूयते ॥")
मद्यहृद्विशेषः । इति हेमचन्द्रः ॥

शशोर्णं, क्ली, (शशस्य ऊर्णा । अभिधानात् क्लीवत्वम् ।) शशस्य लोम । इत्यमरः ॥

शश्वत्, व्य, (शश + बाहुलकाद्वत् ।) पुनःपुनः इत्यमरः ॥ (यथा, गीतायाम् । ९ । ३१ ।
"क्षिप्रं भवति धर्म्मात्मा शश्वच्छान्तिं निगच्छति ॥")

शषं, वधे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) शषति । इति दुर्गादासः ॥

शष्कुलः, पुं, छित्तिः । इति शब्दचन्द्रिका ॥ डरकरमुचा इति भाषा ॥

शष्कुली, स्त्री, (शष्कुल + गौरादित्वात् ङीष्) तिलतण्डुलमाषमिश्रितयवागुः । इति शब्दचन्द्रिका ॥ कर्णरन्ध्रम् । इति शब्दरत्नावली ॥ मत्स्यभेदः । सौरी । इति हिन्दी भाषा । अस्या गुणाः ।
"शष्कुली ग्राहिणी रूक्षा मधुरा तुवरा स्मृता ।"
इति भावप्रकाशः ॥
(पिष्टकविशेषः । यथा, महाभारते । १२ । २२८ । ६२ ।
"पायसं कृसरं मांसमपूपानथ शष्कुलीः ॥")

शष्पं, क्ली, (शष हिंसायाम् + "खष्पशिल्पशष्पवाष्परूपपर्पतल्पाः ।" उणा० ३ । २८ । इति पत्वं निपात्यते ।) बालतृणम् । इत्यमरः ॥ (यथा, रघुवंशे । २ । २६ ।
"गङ्गाप्रपातान्तविरूढशष्पं
गौरीगुरोर्गह्वरमाविवेश ॥")

शस, उ वधे । इति कविकल्पद्रुमः ॥(भ्वा०-पर०-सक०-सेट् । क्त्वावेट् ।) उ, शसित्वा शस्त्वा । इति दुर्गादासः ॥

शस, इ ङ आशिषि । आङ्पूर्व्वकोऽयम् । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) इ, आशंस्यते । ङ, आशसते । आशीरिष्टार्थशंसनम् । इच्छायामित्यन्य । इति दुर्गादासः ॥

शसनं, क्ली, (शस + ल्युट् ।) यज्ञार्थपशुहननम् । इति शसनशब्दटीकायां रामाश्रमः ॥ (शस्यते हन्यतेऽत्र इत्यधिकरणे ल्युटि इत्याख्यानम् । यथा, ऋग्वेदे । १० । ८८ । १४ ।
"मित्रक्रुवो यच्छसने न गावः ।"
"शसने विशसनस्थाने ।" इति तद्भाष्ये सायणः)

शस्कुला, स्त्री, पिष्टकविशेषः । पुली पिटा इति भाषा । (यथा, महाभारते । ७ । ६२ । ७ ।
"मोदकान् पूरिकापूपान् धानाधमकशस्कुली. ॥")
अस्या गुणाः ।
"पर्पटाश्चपरी रूक्षाः शस्कुल्य. कफपित्तलाः ॥"
काञ्जिकयुक्ततिलशस्कुली त्याज्या यथा,—
"मांसैरिक्षुविकारांश्च काञ्जिकैस्तिलशस्कुलीम्
मूलकं माषसूपेन मधुना च न भक्षयेत् ॥"
इति राजवल्लभः ॥

हत्या तल्लक्षणप्रायश्चित्तं यथा ।
पायसपूपशष्कुलीकृशरसंयावशिषु
निर्य्यासामिषप्रभवाणां भक्षणे
वासः । अकामतस्तदर्द्धम् । क्षत्त्रियादीनां पादहानिः । इति प्रायश्चित्तविवेकः ॥

शस्त, इ र मु स्वप्ने । इति कविकल्पद्रुमः (भ्वा०-पर०-अक०-सेट् ।) इ, शंस्यते । पाठेऽपि अस्य उपधात्वाभावात् इदनुबन्धो वैदेपूजारणभेदार्थः । मु, शंस्ति वैदिकः । इति दुर्गादासः ॥

शस्तं, क्ली, (शस् + क्तः ।) कल्याणम् । (यथा, महाभारते । १३ । १० । ४२ ।
"लक्षयित्वा पुरोधास्तु बहुशस्तं
शरीरम् । इति त्रिकाण्डशेषः ॥

शस्तः, त्रि, कल्याणयुक्तः । स्तुतः । इत्यमरः प्रशस्तः । इति मेदिनी ॥ (यथा, भाग ३ । २८ । १५ ।
"क्रियायोगेन शस्तेन नातिहिंस्रेण नित्य
निहतः । यथा, महाभारते । ३ । ४० ।
"शक्राभिषेके सुमहद्धनुर्ज्ञनदनिस्वनम् ।
प्रसह्य दानवाः शस्तास्त्वया ...

शस्तकं, क्ली, अङ्गुलित्राणम् । यथा,—
"अङ्गुलित्रं शस्तकञ्च तथा चाङ्गुष्ठरक्षकम्
इति शब्दरत्नावली

शस्तकेशकः, त्रि, (शस्ताः केशा यस्य
प्रशस्तकेशयुक्तः । इति शब्दरत्नावली ।

शस्त्रं, क्ली, (शस्यते हिंस्यते अनेन । "दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे ।" इति ष्ट्रन् ।) लोहम् । अस्त्रम् । इत्यमर
शस्त्रास्त्रैर्बहुधा मुक्तैरित्यादिदर्शनात्
स्तयोः कश्चिद्भेदमाह । येन कराच्युतेन
तत् शस्त्रं खड्गादि । येन क्षिप्तेन
तदस्त्रं काण्डादि । इति तट्टीकाया
तत्पर्य्यायः ।
"अस्त्रे शस्त्रं प्रहरणमुद्दामो हेतिरायुध
इति शब्दरत्ना
"एकैकमस्त्रं शस्त्रञ्च दैत्यैर्मुक्तं सहस्रधा ।
चिच्छेद लीलयैवेशो जगतां मधुसूदन ।
इति विष्णुपुराणे ५ अंशे ३० अध्याय
अस्त्रं मन्त्राभिमन्त्रितम् । शस्त्रं तदितर
तट्टीका ॥ राज्ञां शस्त्राचार्य्यो यथा,—
"शस्त्रयुक्ते पाणियुक्ते मयुक्ते युक्तधारि
शस्त्राचार्य्यो निरुद्वेगः कुशलश्च विशिष्य
तदगारनियुक्तस्य लक्षणं यथा,—
"स्थापनाज्ञाततत्त्वज्ञः सततं प्रतिजागर
राज्ञः स्यादायुधागारे दक्षः कर्मसु चोद
इति मात्स्ये १८८ अध्या
शस्त्रचिकित्सा यथा । "अथातोऽपोपहर
मध्यायं व्याख्यास्यामः । त्रिविधं कर्म्म ।
कर्म्म प्रधानकर्म्म पश्चात्कर्म्मेति । तद्व
मल्पपदेक्ष्यामः । अस्मिन् शास्त्रे शस्त्र

(शशिनः कला । चन्द्रकला । यथा,—
"कमलिनी मलिनी दिवसात्यये
शशिकला विकला घनदात्यये ।
इति विधिविदधे प्रमदामुखम्
भवति विज्ञतमः क्रमशो जनः ॥"
इत्युद्भटः ॥)

शशिकान्तं, क्ली, (शशी कान्तो यस्य ।) कुमुदम् । इति राजनिर्घण्टः ॥

शशिकान्तः, पुं, (शशी कान्तो यस्य ।) चन्द्रकान्तमणिः । इति राजनिर्घण्टः ॥ यथा, (बृहत्संहितायाम् । ८० । ४ ।
"वैदूर्य्यविपुलकविमलक-
राजमणिस्फटिकशशिकान्ताः ॥")

शशिध्वजः, पुं, (शशी ध्वजे यस्य ।) भल्लाटपुरराजः । यथा,—
"ततः शशिध्वजो राजा सुहृदादाङ्य पुत्रकान् ।
सुशान्ताया मतिं बुद्धा रमां प्रादात् स कल्कये ॥
विशाखयूपभूपाय रुचिराश्व सयुगम् ।
शय्यासनग्रपेयादि भल्लाटं पुरमाययुः ॥"
इति कल्किपुराणे २५ अध्यायः ॥

शशिप्रभं, क्ली, (शशिनः प्रभेव प्रभा यस्य ।) कुमुदम् । इति शब्दमाला ॥ मुक्ता । इति राजनिर्घण्टः ॥ चन्द्रप्रभायुक्ते, त्रि ॥ (चन्द्रप्रभासदृशे च, त्रि । यथा महाभारते । १ । ८६ । ४ ।
"तस्या वासः समुद्धूतं मारुतेन शशिप्रभम् ॥")

शशिप्रभा, स्त्री, (शशिनः प्रभा ।) ज्योत्स्ना । इति जटाधरः ॥

शशिभूषणः, पुं, (शशी भूषणं यस्य) शिवः । इति शशिशेखरशब्ददर्शनात् ॥

शशिलेखा, स्त्री, चन्द्रकला । गुडूची । वृत्तभेदः । इति मेदिनी ॥ तद्वृत्तस्य लक्षणादि यथा,—
"नौ मौ यौ चेत् भवेतो समाष्टकैश्चन्द्रलेखा ।
विच्छेदे ते मुरारे पाण्डुप्रकाशा कृशाङ्गी
श्यामस्याये दुकूलं न भ्राजते विभ्रती सा ।
राधाभीरस्य मध्ये शोभां यया चन्द्रलेखा
विद्याना त्वां स्मरन्ती धत्ते भुवनीयवेगम् ॥"
इति छन्दोमञ्जरी ॥

शशिवाटिका, स्त्री, पुनर्नवा । इति राजनिर्घण्टः ॥

शशिशेखरः, पुं, (शशी शेखरे यस्य ।) शिवः । इति हलायुधः ॥ (यथा, कथासरित्सागरे । १ । २२ ।
"तस्याः स्तुतिभिर्वा हृष्टस्तामङ्कमधिरोप्य सः ।
किन्ते प्रियं करोमीति पप्रच्छ शशिशेखरः ॥")
बुद्धभेदः । तत्पर्य्यायः । हेरम्बः २ हेवज्रः ३ चक्रसम्बरः ४ देवः ५ वज्रकपाली ६ निगुम्भी ७ वज्रटीकः ८ । इति त्रिकाण्डशेषः ॥

शशी [न्] पुं, (शशोऽस्यास्तीति । शश + इनि, चन्द्रः । यथा,—
"हिमांशुश्चन्द्रमाश्चन्द्रः शशी चन्द्रो हिमद्युतिः ॥"
इत्यमरटीकायां भरतधृतशब्दार्णवः ॥
"दशः च हिमोरुदेहः ।

"शशिमस्तुल्यवंशोऽपि निर्द्धनः परिभूयते ॥")
मद्गुरविशेषः । इति हेमचन्द्रः ॥

शशोर्णं, क्ली, (शशस्य ऊर्णा । अभिधानात् क्लीवत्वम् ।) शशस्य लोम । इत्यमरः ॥

शश्वत्, अव्य, (शश + बाहुलकात् वत् ।) पुनःपुनः इत्यमरः ॥ (यथा, गीतायाम् । ९ । ३१ ।
"क्षिप्रं भवति धर्म्मात्मा शश्वच्छान्तिं नियच्छति ॥")

शष, बधे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) शषति । इति दुर्गादासः ॥

शष्कुलः, पुं, छित्तिः । इति शब्दचन्द्रिका ॥ डरकरमूषा इति भाषा ॥

शष्कुली, स्त्री, (शष्कुल + गौरादित्वात् ङीष्) तिलतण्डुलमाषमिश्रितयवागुः । इति शब्दचन्द्रिका ॥ कर्णरन्ध्रम् । इति शब्दरत्नावली ॥ मत्स्यभेदः । सौरी । इति हिन्दी भाषा । अस्या गुणाः ।
"शष्कुली ग्राहिणी हृद्या मधुरा तुवरा स्मृता ।"
इति भावप्रकाशः ॥
(पिष्टकविशेषः । यथा, महाभारते । १२ । २२८ । ६२ ।
"पायसं कृसरं मांसमपूपानथ शष्कुलीः ॥")

शष्पं, क्ली, (शष हिंसायाम् + "खष्पशिल्पशष्पबाष्परूपपर्पतल्पाः ।" उणा० ३ । २८ । इति पत्वं निपात्यते ।) बालतृणम् । इत्यमरः ॥ (यथा, रघुवंशे । २ । २६ ।
"गङ्गाप्रपातान्तविरूढशष्प
गौरीगुरोर्गह्वरमाविवेश ॥")

शस,उ बधे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् । क्त्वावेट् ।) उ, शसित्वा शस्त्वा । इति दुर्गादासः ॥

शस, इ ङ आशिषि । आङ्पूर्व्वकोऽयम् । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) इ, आशंस्यते । ङ, आशंसते । आशीरिष्टाय-शंसनम् । इच्छायामित्यन्ये । इति दुर्गादासः ॥

शसनं, क्ली, (शस + ल्युट् ।) यज्ञार्थपशुहननम् । इति शसनशब्दटीकायां रामाश्रमः ॥ (शस्यते हन्यतेऽत्र इत्यधिकरणे ल्युटि इत्यास्थानम् । यथा, ऋग्वेदे । १० । ८८ । १४ ।
"मित्रक्रुवो यच्छसने न गावः ।"
"शसने विशसनस्थाने ।" इति तद्भाष्ये सायणः

शस्कुली, स्त्री, पिष्टकविशेषः । पुरी पिठा इति भाषा । (यथा, महाभारते । ३ । ६२ । ७ ।
"मोदकान् पूरिकापूपान् धानाधमक-
शस्कुलीः ॥")
अस्या गुणाः ।
"पर्पटाश्चणी कृशा शष्कुल्य कफपित्तला ॥"
काञ्जिकयुक्ततिलशष्कुली त्याज्या यथा,—
"मांसैरिक्षुविकारैश्च काञ्जिकैस्तिलशष्कुलीम्
भूभृद्यो मासमूपेन मधुना च न भक्षयेत् ॥"
इति राजवल्लभः ॥

यथा तद्वधप्रायश्चित्तं यथा ।
[illegible]
निर्व्यासामिषप्रभवाणां भक्षणे
वाम । अकामतस्तदर्द्धम् । क्षत्रियादीनां पादहानिः । इति प्रायश्चित्तविवेकः ॥

शस्त, इ र सु स्वप्ने । इति
(भ्वा०-पर०-अक०-सेट् ।) इ, [illegible]
पाठेऽपि अस्य उपधात्वाभावात्
इदनुबन्धो वेदपूमारणभेदार्थः । सु, शंस्ति । वैदिकः । इति दुर्गादासः ॥

शस्तं, क्ली, (शस् + क्तः ।) कल्याणम् । (यथा, महाभारते । १३ । १० । ४२ ।
"वाचयित्वा पुरोधास्तु मङ्गशस्तं [illegible]
शरीरम् । इति त्रिकाण्डशेषः ॥

शस्तः, त्रि, कल्याणयुक्तः । स्तुतः । इत्यमरः ॥ प्रशस्तः । इति मेदिनी ॥ (यथा, मार्क० ३ । २९ । १५ ।
"क्रियायोगेन शस्तेन नातिहिंस्रेन नित्यशः
निहतः । यथा, महाभारते । ३ । १० । ११
"शक्राभिषेके सुमहद्धनुर्ज्वलदनिस्तम् ।
प्रसह्य दानवाः शस्तास्त्वया शक्रं नरद्यमौ ।"

शस्तकं, क्ली, अङ्गुलित्राणम् । यथा,—
"अङ्गुलित्रं शस्तकञ्च तथा चाङ्गुष्ठवेष्टनम् ।
इति शब्दरत्नावली ॥

शस्तकेशकः, त्रि, (शस्ताः केशा यस्य सः) प्रशस्तकेशयुक्तः । इति शब्दरत्नावली ॥

शस्त्रं, क्ली, (शस्यते हिंस्यते अनेन । "दाम्नीशसियुयुजेति ।" ३ । २ .
मिदिशसिभ्यः क्तः ।" उणा० ४ । १६१ ।
क्तः । यद्वा, "दाम्नीशसयुयुजेति ।" ३ । २ .
इति ष्ट्रन् ।) लौहम् । अस्त्रम् । इत्यमरः ॥
शस्त्राण्यैकधा मुक्तैरित्यादिदर्शनात् [illegible]
स्तयो कश्चिद्भेदमाह । येन करष्टेन
तत् शस्त्रं खड्गादि । येन क्षिप्तेन
तदस्त्रं काण्डादि । इति [illegible]
तत्पर्य्यायः ।
"अस्त्रं शस्त्रं प्रहरणमुग्रास्त्रो हेतिरायुधम् ।
इति शब्दरत्नावली ॥
"एकैकमस्त्रं शस्त्रञ्च देवैर्मुक्तं महस्रधा ।
चिच्छेद लीलयैवेशो जगतां मधुसूदन ॥"
इति विष्णुपुराणे ५ अंशे ३०
अस्त्रं मन्त्राभिमन्त्रितम् । शस्त्रं तदितरत् तट्टीका ॥ राज्ञां शस्त्राचार्य्यो यथा,—
"यन्त्रयुक्तं पाणियुक्तं अयुक्तं युक्तधारितं ।
शस्त्राचार्य्यो निरुद्वेगः कुशलश्च विशिष्यते ।
तदगारनियुक्तस्य लक्षणं यथा,—
"स्थापना ज्ञातितत्त्वज्ञः सततं प्रतिजागरः ।
राज्ञः स्यादायुधागारे दक्षः कर्म्मसु [illegible]
इति मात्स्ये १८८
शस्त्रचिकित्सा यथा ।
अध्यायं व्याख्यास्यामः । विविधं कर्म्म ।
कर्म्म प्रधानकर्म्म पश्चात्कर्म्मेति ।
त्यपदेक्ष्यामः । अस्मिन् शास्त्रे [illegible]

न्यात् शस्त्रकर्मैव तावत् पूर्व्वमुपदेच्यामः
तभाराश्च । तच्च शस्त्रकर्माष्टविधम् ।
यथा । छेद्यं भेद्यं लेख्यं वेध्यमेष्यमाहार्य्यं
राव्यं सीव्यमिति ॥*॥ अतोऽन्यतमं कर्म
कर्षता वैद्येन पूर्व्वमेवोपकल्पयितव्यानि ।
। यन्त्रशस्त्रक्षाराग्निशलाकाशृङ्गतुम्ब-
कालावूजाम्ववोष्ठपिचुप्रोतसूत्रपत्रपट्टमधु-
वसापयस्तैलतर्पणकाषायालेपनकल्कव्यज-
तोष्णोदककटाहादीनि परिकर्म्मिणश्च
ग्धाः स्थिरा वलवन्तः। ततः प्रशस्तेषु तिथि-
णमुहूर्त्तनक्षत्रेषु दध्यक्षतान्नपानरत्नैरग्निं
ान् भिषजश्चार्च्चयित्वा कृतवलिमङ्गलस्वस्ति-
वनं लघु भुक्तवन्तं प्राङ्मुखमातुरमुपवेश्य
यित्वा प्रत्यङ्मुखो वैद्यो मर्म्मशिरास्नायु-
थ्यस्थिधमनीः परिहरन्ननुलोमं शस्त्रं निद-
ापूयदर्शनात् सकृदेवापहरेच्छस्त्रमाशु च।
हत्स्वपि च पाकेषु द्व्यङ्गुलं त्र्यङ्गुलं वा शस्त्र-
मुक्तम् । तत्रायतो विशालः समः सुविभक्त
ते व्रणगुणाः । भवतश्चात्र ।
यतश्च विशालश्च सुविभक्तो निराश्रयः ।
सकालकृतश्चापि व्रणः कर्म्मणि शस्यते ॥
र्य्यमाशु क्रिया शस्त्रतैक्ष्ण्यमस्वेदवेपथू ।
संमोहश्च वैद्यस्य शस्त्रकर्म्मणि शस्यते ॥"
ेन वा व्रणेनाशुध्यमाणेनान्तरावुद्धाविध्य
परान् व्रणान् कुर्य्यात् । भवन्ति चात्र ।
यतो यतो गतिं विद्यादुत्सङ्गो यत्र यत्र च ।
त्र तत्र व्रणं कुर्य्याद्यथा दोषो न तिष्ठति ॥"
त्र भ्रूगण्डशङ्खललाटाक्षिपुटौष्ठदन्तवेष्टकक्षा-
िक्षवङ्क्षणेषु तिर्य्यक्छेद उक्तः ॥
चन्द्रमण्डलवच्छेदान् पाणिपादेषु कारयेत् ।
र्द्धचन्द्राकृतींश्चापि गुदे मेढ्रे च बुद्धिमान् ॥"
न्यथा तु शिरास्नायुच्छेदनादतिमात्रं वेदना,
चिराद्व्रणसंरोहो मांसकन्दी प्रादुर्भावश्चेति ।
ूढ़गर्भोदराशोऽश्मरीभगन्दरमुखरोगेष्वभुक्त-
तः कर्म्म कुर्व्वीत । ततः शस्त्रमवताय्य शीता-
भिरद्भिरातुरमाश्वास्य समन्तात् परिपीड्या-
ल्या व्रणमभिमृज्य प्रक्षाल्य कषायेण प्लोते-
नोदकमादाय तिलकल्कमधुसर्पिःप्रगाढ़ामौषध
युक्तां वर्त्तिं प्रणिदध्यात् । ततः कल्केनाच्छाद्य
नातिस्निग्धां नातिरूक्षां नातिघनां कवलिकां
दत्त्वा वस्त्रपट्टेन वध्नीयाद्वेदनारक्षोघ्नै र्धूपैर्धूपये
द्रक्षाभिश्च मन्त्रै रक्षां कुर्व्वीत । ततो गुग्गुल्व-
गुरुसर्ज्जरसवचागौरसर्षपचूर्णैर्लवणनिम्बपत्रघ्य
मिश्रैराज्ययुक्तैर्धूपैर्धूपयेत् । आज्यशेषेण चास्य
प्राणान् समालभेत । उदकुम्भाच्चापो गृहीत्वा
प्रोक्षयन् रक्षाकर्म्म कुर्य्यात्तद्वक्ष्यामः ॥*॥
"कृत्यानां प्रतिघातार्थं तथा रक्षोभयस्य च ।
रक्षाकर्म्म करिष्यामि ब्रह्मा तदनुमन्यताम् ॥
नागाः पिशाचा गन्धर्व्वाः पितरो यक्षराक्षसाः ।
अभिद्रवन्ति ये ये त्वां ब्रह्माद्या घ्नन्तु तान् सदा ॥
पृथिव्यामन्तरीक्षे च ये चरन्ति निशाचराः ।
दिक्षु वास्तुनिवासाश्च पान्तु त्वां ते नमस्कृताः ।
पान्तु त्वां मुनयो ब्राह्मा दिव्या राजर्षयस्तथा ।
पर्व्वताश्चैव नद्यश्च सर्व्वाः सर्व्वेऽपि सागराः ॥
अग्नी रक्षतु ते जिह्वां प्राणान् वायुस्तथैव च ।
सोमो व्यानमपानं ते पर्ज्जन्यः परिरक्षतु ॥
उदानं विद्युतः पान्तु समानं स्तनयित्नवः ।
वलमिन्द्रो वलपतिर्मनुर्मन्ये मतिं तथा ॥
कामांस्ते पान्तु गन्धर्व्वाः सत्त्वमिन्द्रोऽभिरक्षतु ।
प्रज्ञां ते वरुणो राजा समुद्रो नाभिमण्डलम् ॥
चक्षुः सूर्य्यो दिशः श्रोत्रे चन्द्रमाः पातु ते मनः ।
नक्षत्राणि सदा रूपं छायां पान्तु निशास्तव ॥
रेतस्त्वाप्याययन्त्वापो रोमाण्योषधयस्तथा ।
आकाशं स्वानि ते पातु देहं तव वसुन्धरा ॥
वैश्वानरः शिरः पातु विष्णुस्तव पराक्रमम् ।
पौरुषं पुरुषश्रेष्ठो ब्रह्मात्मानं ध्रुवो भ्रुवौ ॥
एता देहे विशेषेण तव नित्या हि देवताः ।
एतास्त्वां सततं पान्तु दीर्घमायुरवाप्नुहि ॥
स्वस्ति ते भगवान् ब्रह्मा स्वस्ति देवाश्च कुर्व्व-
ताम् ।
स्वस्ति ते चन्द्रसूर्य्यौ च स्वस्ति नारदपर्व्वतौ ॥
स्वस्त्यग्निश्चैव वायुश्च स्वस्ति देवाः सहेन्द्रगाः ।
पितामहकृता रक्षा स्वस्त्यायुर्वर्द्धतां तव ।
ईतयस्ते प्रशाम्यन्तु सदा भव गतव्यथः ॥"
इति स्वाहा ॥
"तैर्व्वेदात्मकैर्मन्त्रैः कृत्वा व्याधिविनाशनैः ।
मयैवं कृतरक्षस्त्वं दीर्घमायुरवाप्नुहि ॥"*॥
ततः कृतरक्षमातुरमागारं प्रवेश्याचारिक-
मादिशेत् । ततस्तृतीयेऽहनि विमुच्यैवं वध्नी-
याद्वस्त्रपट्टेन । न चैनं त्वरमाणोऽपरेद्युर्मोक्ष-
येत् । द्वितीयदिवसे परिमोक्षणाद्विग्रथितो
व्रणश्चिराद्रुपसंरोहति तीव्ररुजश्च भवति । अत
ऊर्द्धं दोषकालवलादीनवेक्ष्य कषायालेपनवन्धा-
हाराचारान् विदध्यात् । न चैनं त्वरमाणः
सान्तर्दोषं रोपयेत् स ह्यल्पेनाप्यपचारेणाभ्य-
न्तरमुत्सङ्गं कृत्वा भूयोऽपि विकरोति । भवन्ति
चात्र ।
"तस्मादन्तर्व्वहिश्चैव सुशुद्धं रोपयेद्व्रणम् ।
रूढ़ेऽप्यजीर्णव्यायामव्यवायादीन् विवर्ज्जयेत् ॥
हर्षं क्रोधं भयञ्चापि यावदास्थैर्य्यसम्भवात् ।
मासान् षट् सप्त वा नूनं विधिरेषः प्रशस्यते ॥
हेमन्ते शिशिरे चैव वसन्ते चापि मोक्षयेत् ।
त्र्यहात् त्र्यहाच्छरद्ग्रीष्मवर्षास्वपि च बुद्धि-
मान् ॥
अतिपातिषु रोगेषु नेच्छेद्विधिमिमं भिषक् ।
प्रदीप्तागारवच्छीघ्रं तत्र कुर्य्यात् प्रतिक्रियाम् ॥
या वेदना शस्त्रनिपातजाता
तीव्रा शरीरं प्रदुनोति जन्तोः ।
घृतेन सा शान्तिमुपैति सिक्ता
कोष्णेन यष्टीमधुकान्वितेन ॥"
* इति सुश्रुते ५ अध्यायः ॥
शस्त्रः, पुं, (शसत्यनेनेति । शस वधे + "अमिचि
मिदिशसिभ्यः क्त्रः ।" उणा० ४।१६३। इति क्त्रः।
यद्वा, शास्तीति ।" ३।२।१८२।
इति ष्ट्रन् ।) खड्गः । यथा,—
"रिष्टिः खड्गस्तरवारिः शस्त्रो भद्रात्मजः
सः ।
इति त्रिकाण्डशेषः ॥
शस्त्रकं, क्ली, (शस्त्रमेव । स्वार्थे कन् ।) लोहम्
इत्यमरः ॥
शस्त्रकोशतरुः, पुं, (शस्त्रस्य खड्गस्य कोश इव
तरुः ।) महापिण्डीतरुः । इति राजनिर्घण्ट
शस्त्रजीवी, [न्] (शस्त्रेण जीवतीति । जीव +
णिनिः ।) शस्त्राजीवः । इति हेमचन्द्रः ॥
(यथा, बृहत्संहितायाम् । १७ । २४ ।
"रविजेन सिते विजिते
गणमुख्याः शस्त्रजीविनः क्षत्रम् ॥")
शस्त्रधारणजीवकः, त्रि, (शस्त्रधारणेन जीव-
तीति । जीव + ण्वुल् ।) शस्त्राजीवः । इति
शब्दरत्नावली ॥
शस्त्रपाणिः, त्रि, (शस्त्रं पाणौ यस्य ।) शस्त्र-
हस्तः । यथा,—
"उल्काहस्तोऽग्निदो ज्ञेयः शस्त्रपाणिश्च
घातकः ।
केशाकेशिगृहीतश्च युगपत् पारदारिकः ॥"
इति व्यवहारतत्त्वम् ॥
अपि च ।
"अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः ।
क्षेत्रदारापहारी च षडेते आततायिनः ॥"
इति प्रायश्चित्तविवेकः ॥
शस्त्रभृत्, त्रि, शस्त्रधारी । शस्त्रं विभर्त्तीति
भृधातोः क्विप्प्रत्ययेन निष्पन्नमेतत् ॥ (यथा,
रघुः । २ । ४० ।
"शस्त्रेण रक्ष्यं यदशक्यरक्षं
न तद्यशः शस्त्रभृतां क्षिणोति ॥")
शस्त्रमार्जः, पुं, (शस्त्राणि मार्ष्टीति । मृज + अण् ।)
शस्त्रमार्जनकर्त्ता । सिकलिगर इति भाषा ।
तत्पर्य्यायः । असिधावकः २ । इत्यमरः ॥ शस्त्र-
मार्जः ३ असिधावः ४ । इति शब्दरत्नावली ॥
शानाजीवः ५ भ्रमासक्तः ६ । इति हेम-
चन्द्रः ॥
शस्त्रहतः, त्रि, (शस्त्रेण हतः ।) शस्त्राघातेन
मृतः । तस्याशौचादि यथा । व्याघ्रः ।
"क्षतेन म्रियते यस्तु तस्याशौचं भवेद्विधा ।
आमसाहात् त्रिरात्रं स्यात् दशरात्रमतः परम् ॥
शस्त्राघाते त्र्यहादूर्द्ध्वं यदि कश्चित् प्रमीयते ।
अशौचं प्राकृतं तत्र सर्व्ववर्णेषु नित्यशः ॥"
अत्र शस्त्रघातपदं क्षतेतरशस्त्राघातपरं पारि-
भाषिकशस्त्राघातपरमपि । यथा, देवीपुराणे ।
"पश्चिमस्यमगैर्यं तु दंष्ट्रिशृङ्गिनखैर्हताः ।
पतनानशनप्रायैर्वज्राग्निविषबन्धनैः ।
मृता जलप्रवेशेन ते वै शस्त्रहताः स्मृताः ।
अन्यथा क्षतं विना पतनादिभिर्मृतान्
दिनत्रयेण ... ...
... ...
... ...

शस्त्रघातप्रदर्शनदर्शनापि तथायुक्तत्वात् पारि-
भाषिकत्वादेव न प्रकरणनियमः ॥*॥
"क्रोधात् प्रायं विषं वह्निं शस्त्रमुद्बन्धनं जलम्।
गिरिवृक्षप्रपातञ्च ये कुर्वन्ति नराधमाः ॥
महापातकिनो ये च पतितास्ते प्रकीर्त्तिताः।
पतितानां न दाहः स्यान्नान्त्येष्टिर्नास्थिसञ्चयः॥
न चाश्रुपातः पिण्डो वा कार्य्यं श्राद्धादिकं क्वचित्
एतानि पतितानाञ्च यः करोति विमोहितः।
तप्तकृच्छ्रद्वयेनैव तस्य शुद्धिर्न चान्यथा ॥"*॥
तदिदम् मरीचिः।
"विषशस्त्रश्वापदाहितिर्य्यग्ब्राह्मणघातिनाम्।
चतुर्द्दश्यां क्रिया कार्य्या अन्येषान्तु विगर्हिता॥"
इति शुद्धितत्त्वम् ॥

शस्त्रहतचतुर्द्दशी, स्त्री, (शस्त्रहतानां चतुर्द्दशी। युद्धादिहतानां श्राद्धादिकर्म्मणि प्रशस्ततया-स्यास्तथात्वम्।) शौणाश्विनकृष्णचतुर्द्दशी। गौणकार्त्तिककृष्णचतुर्द्दशी च। यथा, लिङ्ग-पुराणम्।
"दीपमालां तथा कृष्णचतुर्द्दश्यां शिवाग्रतः।
चतुष्पथे च नद्याञ्च चत्वरेषु गृहेषु च।
एकविंशकुलोपेतो वसेच्छिवपुरे नरः॥"
अत्र शस्त्रहतानामुल्कादानं अन्येषान्तु दर्शे।
इति संवत्सरकौमुदी ॥*॥ अन्यच्च। अथ शस्त्रहतचतुर्द्दशी तत्र विष्णुः। युद्धहतानां श्राद्धकर्म्मणि चतुर्द्दशी प्रशस्ता। युद्धहताना-मेवेति न नियमार्थमिदम्। ब्रह्मपुराणे।
"प्रायोऽनशनशस्त्राग्निविषाद्युद्बन्धिनास्तथा।
चतुर्द्दश्यान्तु कर्त्तव्यं तृप्त्यर्थमिति निश्चयः॥"
प्रायो महापथगमनम्। वायुपुराणे।
"युवानस्तु गृहे यस्य मृतास्तेषान्तु दापयेत्।
शस्त्रेण तु हता ये वै तेषां दद्याच्चतुर्द्दशीम्॥"
युवान एव पित्रादयो मृता इत्यर्थः। मरीचिः।
"विषशस्त्रश्वापदाहितिर्य्यग्ब्राह्मणघातिनाम्।
चतुर्द्दश्यां क्रिया कार्य्या अन्येषान्तु विगर्हिता॥
ब्राह्मणकर्त्तृकघातोऽप्यस्तीति ब्राह्मणघाती ये च वेश्मात्पर्य्येतृता इति ब्रह्मपुराणवचनात्। न तु कर्त्तृब्राह्मणघातः तस्य पतितत्वात् अन्येषाम-शस्त्रादिहतानाम्। एतच्च शस्त्रहतश्राद्धं विष्ण्वादिभिः सामान्यप्रकरणनिखननात् सकल-कृष्णपक्षसाधारणं पित्रादीनामेव पार्व्वणविधि-प्रकरणात् पार्व्वणविधिना कार्य्यम्।
"सपिण्डीकरणादूर्द्ध्वं यत्र यत्र प्रदीयते।
तत्र तत्र त्रयं कुर्य्याद्वर्ज्जयित्वा मृताहनि॥"
इति गोभिलवचनाच्च ॥*॥
ननु अन्येषान्तु विगर्हिता इति वचनात्। कथं चतुर्द्दश्यां पार्व्वणविधिः। न यस्य पुत्रादिकस्य पितामहः शस्त्रहतस्तस्य चैपुत्रविशेषविधिरुपपद्यते। तत्र यस्य द्वौ शस्त्रहतौ एको वा तेनापि द्वे पुरु-षे चैकवत्समेन पार्व्वणं कर्त्तव्यम्। यथा, मनुः।
"पिता यस्य तु वृत्तः स्यात् जीवेच्चापि पिता-महः।
पितुः स नाम सङ्कीर्त्त्य कीर्त्तयेत् प्रपितामहम्॥"
तथा हारीतः।
"पितामहेऽपि जीवे वै पितर्य्येव समापयेत्॥"
नन्वेकोद्दिष्टमेव श्रूयते। यथा शङ्खः।
"सपिण्डीकरणादूर्द्ध्वमृते कृष्णचतुर्द्दशीम्।
प्रतिसंवत्सरादन्यदेकोद्दिष्टं न कारयेत्॥"
यमः,
"सपिण्डीकरणादूर्द्ध्वं यत् पितृभ्यः प्रदीयते।
एकोद्दिष्टविधानेन तत् कार्य्यं शस्त्रघातिने॥"
भविष्यपुराणे।
"समत्वमागतस्यापि पितुः शस्त्रहतस्य च।
चतुर्द्दश्यान्तु कर्त्तव्यमेकोद्दिष्टं न पार्व्वणम्॥
चतुर्द्दश्यान्तु यच्छ्राद्धं सपिण्डीकरणे कृते।
एकोद्दिष्टविधानेन तत्कार्य्यं शस्त्रघातिने॥"*॥
उच्यते। एषां वचनानाममूलकत्वात् समूलत्वे-ऽपि पार्व्वणाशक्तविषयाण्येतानि विष्ण्वादिवच-नेषु पार्व्वणावगतेः। भ्रात्रादीनान्तु शस्त्रहता-नामेकोद्दिष्टविधिना कार्य्यम्।
"अपुत्रा ये मृताः केचित् स्त्रियो वा पुरुषाश्च ये।
तेषामपि च देयं स्यादेकोद्दिष्टं न पार्व्वणम्॥
इत्यापस्तम्बवचनेन पार्व्वणनिषेधात्। तच्च न सकलकृष्णपक्षसाधारणं विष्ण्वादिवचनेषु श्राद्ध-शब्दस्य पार्व्वणपरत्वोक्तेः। किन्त्वाश्विनमासीय-कृष्णपक्षविषयम्। ब्रह्मपुराणे प्रायोऽनशने-त्यादिना सकलकृष्णपक्षसाधारणं श्राद्धमभि-धाय चाश्विने। तर्पणीयाश्चतुर्द्दश्यां लुप्तपिण्डो-दकक्रिया। इति यत् पुनरभिधानं तच्छस्त्र-हतभ्रात्रादिविषयं अतएव तत्रैवामावास्यायां पितरः पूज्या नान्दीमुखा अपीति हृतप्रपिता-महादीनामपि श्राद्धं दर्शितम्। इयञ्च चतु-र्द्दश्यामशस्त्रहतश्राद्धनिन्दा आश्विनमासीय-पक्षश्राद्धादिकल्पव्यतिरिक्तसामान्यकृष्णपक्षवि-हितश्राद्धकाम्यश्राद्धविषया प्रकरणभेदेन श्राद्ध-कर्म्मभेदात् सामान्यविशेषन्यायात् इतरथा चतुर्द्दश्यां मत्कान्तियादेऽशस्त्रहतनिन्दा स्यात्। अतएव कृष्णपक्षे दशम्यादौ वर्ज्जयित्वा चतु-र्द्दशीमिति मनुवचनेऽपि चतुर्द्दशीवर्ज्जनं दर्श-श्राद्धादिव्यतिरिक्तश्राद्धविषयम् ॥*॥ ननु शस्त्रादिहतानां श्राद्धनिषेधः श्रूयते। तथा छागलेयः।
"शस्त्रविप्रहतानाञ्च शृङ्गिदंष्ट्रिसरीसृपैः।
आत्मनस्त्यागिनाञ्चैव श्राद्धमेषां न कारयेत्॥"
सत्यं बुद्धिपूर्व्वहतानामेव। प्रमादमृतानान्तु श्राद्धादिकमाहाङ्गिराः।
"अथ कश्चित् प्रमादेन म्रियतेऽग्न्युदकादिभिः।
अशौचं तस्य कर्त्तव्यं कर्त्तव्या चोदकक्रिया॥"
अबुद्धिपूर्व्वमपि शृङ्ग्यादिभिः क्रीडां कुर्व्वतां मृतानां न कर्त्तव्यम्। यथा, ब्रह्मपुराणम्।
"शृङ्गिदंष्ट्रिनखिव्यालविषवह्निस्त्रिया जलैः।
आदरात् परिहर्त्तव्यः कुर्व्वन् क्रीडां मृतस्तु यः॥"
परिहर्त्तव्यः श्राद्धादौ शास्त्रानुमत्या बुद्धिपूर्व्व-मृतानामपि कर्त्तव्यम्। यथाह वृहस्पतिः।
"वृद्धः शौचस्मृतेर्लुप्तः प्रत्याख्यातभिषक्क्रियः।
आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनादिभिः।
तस्य त्रिरात्रमशौचं द्वितीये त्वस्थिसञ्चयः।
तृतीये तूदकं कृत्वा चतुर्थे श्राद्धमिष्यते॥"
एवं [illegible]
सत्या बुद्धिपूर्व्वकमृता अपि श्राद्धार्हाः
लुप्तपिण्डोदकत्वमिति चेत् गौणमिति ब्रूमः
बुद्धिपूर्व्वं पिण्डोदकक्रियालोपादिति।
श्राद्धविवेकः॥

शस्त्रहस्तः, पुं, शस्त्रं हस्ते यस्य सः। इति पाणिशब्ददर्शनात्॥

शस्त्राजीवः, त्रि, (शस्त्रेण आजीवतीति। आ-जीव+अच्।) असिजीवी। तत्पर्य्यायः। काण्डपृष्ठः २ आयुधीयः ३ आयुधिकः ४। इत्यमरः॥ काण्डस्पृष्टः ५। इति तट्टीका॥ काण्डपृष्टः ६ शस्त्रधारणजीवकः ७। शब्दरत्नावली॥

शस्त्राभ्यासः, पुं, (शस्त्राणां अभ्यासः।) अस्त्र-शिक्षा। तत्पर्य्यायः। खुरली २। इति त्रिकाण्डशेषः॥

शस्त्रायसं, क्ली, (शस्त्रार्थं यदायसम्।) लौहम्। इति राजनिर्घण्टः॥

शस्त्री, स्त्री, (शस + ष्ट्रन्। स्त्रियां ङीष्।) छुरिका। इति मेदिनी॥ (यथा, माघे।४।४।
"शस्त्रीश्यामैरंशुभिराशु द्रुतमभ्र-
च्छायामृच्छति नीली सलिलस्य॥")

शस्त्री, [न्] त्रि, शस्त्रविशिष्टः। अस्त्रधारी। शस्त्रशब्दादिन्प्रत्ययेन निष्पन्नमेतत्॥ (यथा, कामन्दकीयनीतिसारे। ७। ३७।
"वामशस्त्रानुगतः प्रविशेच्च
सङ्कटेषु गहनेषु न तिष्ठेत्॥")

शस्म, क्ली, वाक्क्षणम्। इत्यमरटीकायां भरत। प्रतिभाहानिः। इति जटाधरः॥

शस्यं, क्ली, (शस + "तकिशसिचतियतिभ्यः" ३।१।९७। इत्यस्य वार्त्तिकोक्त्या यत्।) इत्यादि निष्पन्नम्। तत्पर्य्यायः। फलम् २। इत्यमरः। वृक्षाणां लतादीनाञ्च फलं निष्पत्तिमात्रं धान्यादिकं शस्यं सस्यपदवाच्यं इत्यन्यः। फलति निष्पद्यते फलं फलनिष्पत्तौ पचादित्वात् अच्। सस्ति स्वपिति सस्यं सस स्वप्ने इति यः। सस्यं हिदन्त्यम्। यास्यकत्रिक इव मौरहस्यमनोहरो देश इति मदनकौमुद्यात्।
"अंशनं सोसकं सस्यं पद्मं साचा च माषसम्।"
इत्युत्पत्तिविवेकाच्च॥ तालव्यादिदन्त्यान्तमपि हि मनसु हिंसास्तुत्योरित्यस्मात् तव्य श्रेत्यपि यत् शस्यं तत् क्रियावाच्योऽपि मनोऽप्य दृश्यते। तालव्या अपि दन्त्याश्च शस्यसूकर-पामेव इत्युत्पभेदः। इति तट्टीकायां भरत॥ चेतस्यधान्यादि। यथा,—
"शस्यं क्षेत्रगतं प्राहुः सतुषं धान्यमुच्यते।

...मं त्रिपुषमिन्दुमं भिवनत्रमुदाहृतम् ॥"
इति स्मृतिः ॥
...नि यथा,—
"... यवाश्चैव गोधूमाश्चाणवस्तिला: ।
... मुद्गाश्च कोरदूषाः सतीनकाः ॥"
... दीर्घशालयः ।
माषा मुद्गा मसूराश्च निष्पावाः सकुलत्थकाः ।
... ...श्चैव शाला: सप्तदश स्मृताः ॥
...। औषधीनान्तु ग्राम्याणां जातयो मुने ॥"
...नि यथा,—
"...पध्यो यज्ञियाश्चैव ग्राम्यारण्याश्चतुर्दश ।
... ... यथा माषा गोधूमाश्चाणवस्तिलाः ॥
प्रियङ्गुसप्तमा ह्येते अष्टमास्तु कुलत्थकाः ।
... ... नीवारा जर्त्तिलाः सगवेधुकाः ।
... वेणुयवाः प्रोक्तास्तथा मर्कटका मुने ।
... ... स्मृता ह्येता औषध्यस्तु चतुर्दश ॥"
इति विष्णुपुराणे १ अंशे ६ अध्यायः ॥*॥
नवशस्यसम्भोगनक्षत्राणि यथा,—
"अनुराधा मृगशिरो रेवती चोत्तरात्रयम् ।
हस्ता चित्रा मघा पुष्या श्रवणा च पुनर्व्वसुः ॥
रोहिणी नवशस्यादिनवद्रव्याशनादिषु ।
प्रशस्तं नवपीठादिसम्भोगं यद्वविद्वदेत् ॥"*॥
नवशस्यश्राद्धादिकालो यथा,—
"शरद्वसन्तयोः केचिन्नवयज्ञं प्रचक्षते ।
धान्यपाकवशादन्ये श्यामाको वनिनः स्मृतः ॥"
इत्यनेन शरद्वसन्तविहितनवशस्येष्टेः ।
"श्यामाकैर्व्रीहिभिश्चैव यवैरन्योन्यकालतः ।
प्रागयज्ञं सुव्यतिवश्यं न लवाग्रयणात्ययः ॥"
इति कालान्तरदर्शनात् श्राद्धेऽपि तथा ।
आग्रयणं नवशस्येष्टिः ।
"वृश्चिके शुक्लपक्षे तु नवान्नं शस्यते बुधैः ।
अपरे क्रियमाणं हि धनुष्येव क्षतं भवेत् ॥
धनुषि यत् क्षतं श्राद्धं मृगनेत्रासु रात्रिषु ।
पितरस्तत्र गृह्णन्ति नवान्नामिषकाङ्क्षिणः ॥"
अपरे कृष्णपक्षे ।
"पौषे चैत्रे कृष्णपक्षे नवान्नं नाचरेद्बुधः ।
भवेत् जन्मान्तरे रोगी पितॄणां नोपतिष्ठते ॥
यद्यपि व्रीहिपाके च यवपाके च पार्थिव ।
न तावाद्यौ महाराज विना श्राद्धं कथञ्चन ॥"
इति विष्णुधर्म्मोत्तरवचने श्राद्धं प्रति व्रीहियव-
पाकयोर्निमित्तत्वं प्रतीयते । तथापि नवोदके
नवान्ने च इति शातातपवचने पूर्व्वोक्तवचनेषु
वचनेषु च नवान्नस्य श्रुतत्वेन नवान्नत्वेनैवोभयमाधा-
रणं निमित्तं लाघवात् । अभिलापवाक्ये नवा-
न्नागमनिमित्तमिति नियोज्यम् । न तु यवान्ना-
गमादि । वृश्चिके शुक्लपक्षे च इति तु धनुरादि-
पर्य्युदस्तेतरगौणकालमध्ये वृश्चिकस्य प्राशस्त्य-
मात्रार्थं न तु श्राद्धान्तरार्थमिति । इति मल-
मासतत्त्वम् ॥ अन्यत् नवान्नशब्दे द्रष्टव्यम् ॥
शस्यध्वंसी, [न्] पुं, (शस्यानि ध्वंसयतीति ।
ध्वंस + णिनिः ।) तुन्नवृक्षः । इति शब्द-
चन्द्रिका ॥ शस्यनाशकेऽ, त्रि ॥

शस्यमञ्जरी, स्त्री, (शस्यस्य मञ्जरी ।) अभिनव-
निर्गतधान्यादिशीर्षकम् । शीष इति भाषा ॥
तत्पर्य्यायः । कणिशम् २ । इत्यमरः ॥ कणिशः
३ कणिषः ४ । इति तट्टीका ॥
शस्यशूकं, क्ली, (शस्यस्य शूकम् ।) शस्यस्य
तीक्ष्णाग्रम् । शुङ्गा इति भाषा । तत्पर्य्यायः ।
किंशारुः २ । इत्यमरः ॥
शस्यसम्बरः, पुं, सालवृक्षः । इत्यमरः ॥
शस्यात्, त्रि, शस्यभक्षकः । शस्यं अत्ति इत्यर्थे
अदधातोः कर्त्तरि क्विप्प्रत्ययेन निष्पन्नमेतत् ।
इति मुग्धबोधव्याकरणम् ॥
शस्याकः, पुं, शुद्धशमीवृक्षः । इति शब्दरत्ना-
वली ॥
शांशपः, पुं, शिंशपाया विकारश्चमसः । शिंशपा-
शब्दादण्प्रत्यये इकारस्य आडादेशेन निष्पन्न-
मेतत् । इति सिद्धान्तकौमुदी ॥
शांशपायनः, पुं, मुनिविशेषः । इति पुराणम् ॥
(यथा, विष्णुपुराणे । ३ । ६ । १८ ।
"काश्यपः संहिताकर्त्ता सावर्णिः शांश-
पायनः ॥")
शाकं, क्ली, पुं, (शक्यते भोक्तुमिति । शक + घञ् ।)
पत्रपुष्पादि । साग इति हिन्दीभाषा । तत्-
पर्य्यायः । हरितकम् २ शिग्रुः ३ । इत्यमरः ॥
सिग्रुः ४ । इति तट्टीका ॥ हारितकम् ५ इति
शब्दरत्नावली ॥ अथ शाकवर्गः । तत्र शाक-
निरूपणम् ।
"पत्रं पुष्पं फलं नालं कन्दं संस्वेदजं तथा ।
शाकं षड्विधमुद्दिष्टं गुरु विद्यात् यथोत्तरम् ॥"
अथ शाकानां गुणाः ।
"प्रायःशाकानि सर्व्वाणि विष्टम्भीनि गुरूणि च ।
रूक्षाणि बहुवर्च्चांसि सृष्टविण्मारुतानि च ॥
शाकं भिनत्ति वपुरस्थि निहन्ति नेत्रं
वर्णं विनाशयति रक्तमथापि शुक्रम् ।
प्रज्ञाक्षयश्च कुरुते पलितश्च नूनं
हन्ति स्मृतिं गतिमिति प्रवदन्ति तज्ज्ञाः ॥
शाकेषु सर्व्वे निवसन्ति रोगाः
सहेतवो देहविनाशनाय ।
तस्माद्बुधः शाकविवर्ज्जनञ्च
कुर्य्यात्तथाम्लेषु स एव दोषः ॥"
इति भावप्रकाशः ॥
अपि च ।
"सर्व्वशाकमचाक्षुष्यमलक्ष्मीयममैथुनम् ।
ऋते पटोलवास्तूककाकमाचीपुनर्नवाः ॥"
इति राजवल्लभः ॥
शाकः, पुं, वृक्षविशेषः । सेगीन् इति भाषा ।
तत्पर्य्यायः । शाकवृक्षः २ शाकाख्यः ३ खर-
पत्रः ४ अर्ज्जुनोपमः ५ । इति रत्नमाला ॥
क्रकचपत्रः ६ शरपत्रः ७ घनिपत्रः ८ अहि-
रुहः ९ श्रेष्ठकाष्ठः १० स्थिरसारः ११ गृह-
द्रुमः १२ । अस्य गुणाः । सारकत्वम् । पित्त-
दाहश्रमापहत्वञ्च । अस्य वल्कलगुणाः । कफ-
नाशित्वम् । मधुरत्वम् । रूचत्वम् । कषाय-

त्वञ्च । इति राजनिर्घण्टः ॥ * ॥ शक्तिः । इति
मेदिनी ॥ शिरीषवृक्षः । इति शब्दरत्नावली ॥
नृपभेदः । इति विश्वः ॥ द्वीपविशेषः । तस्य
विवरणं यथा,—
सूत उवाच ।
"शाकद्वीपस्य वक्ष्यामि यथावदिह निश्चयम् ।
कथ्यमानं निबोधध्वं शाकद्वीपं द्विजोत्तमाः ॥
जम्बूद्वीपस्य विस्ताराद्द्विगुणस्तस्य विस्तरः ।
विस्ताराद्द्विगुणश्चापि परिणाहः समन्ततः ॥
तेनावृतः समुद्रोऽयं द्वीपेन लवणोदधिः ।
तत्र पुण्या जनपदाश्चिराच्च म्रियते जनः ॥
कुत एव च दुर्भिक्षं क्षमातेजोयुतेष्विह ।
तत्रापि पर्व्वताः शुभ्राः सप्तैव मणिभूषिताः ॥
शाकद्वीपादिद्वीपेषु सप्त सप्त नगास्तिषु ।
ऋज्वायताः प्रतिदिशं निविष्टा वर्षपर्व्वताः ॥
रत्नाकराद्रिनामानः शोभावन्तो महार्चिताः ।
समाचिताः प्रतिदिशं द्वीपविस्तारमानतः ॥
उभयत्रावगाढाश्च लवणक्षीरसागरौ ।
शाकद्वीपे तु वक्ष्यामि सप्त दिव्यान् महाचलान् ॥
देवर्षिगन्धर्व्वयुतः प्रथमो मेरुरुच्यते ।
प्रागायतः स सौवर्ण उदयो नाम पर्व्वतः ॥
तत्र मेघास्तु वृष्ट्यर्थं प्रभवन्ति च यान्ति च ।
तस्यापरेण सुमहान् जलधारो महागिरिः ॥
सैव चन्द्रः समाख्यातः सर्व्वौषधिसमन्वितः ।
तस्मान्नित्यमुपादत्ते वासवः परमं जलम् ॥
नारदो नाम सैवोक्तो दुर्गशैलो महाचितः ।
तत्राचले समुत्पन्नौ पूर्व्वं नारदपर्व्वतौ ॥
तस्यापरेण सुमहान् श्यामो नाम महागिरिः ।
यत्र श्यामलमापन्नाः प्रजाः पूर्व्वमिमाः किल ॥
स एव दुन्दुभिर्नाम श्यामः पर्व्वतसत्तमः ।
शब्दमृत्युः पुरा तस्मिन् दुन्दुभिस्ताडितः सुरैः ॥
रत्नमालान्तरमयः शाल्मलश्चान्तरालकृत् ।
तस्यापरेण रजतो महानस्तो गिरिः स्मृतः ॥
सैव सोमक इत्युक्तो देवैर्यत्रामृतं पुरा ।
सम्भृतञ्च हृतञ्चैव मातुरर्थे गरुत्मता ॥
तस्यापरे चाम्बिकेयः सुमनाश्चैव स स्मृतः ।
हिरण्याक्षो वराहेण तस्मिन् शैले निसूदितः ॥
आम्बिकेयात् परो रम्यः सर्व्वौषधिसमन्वितः ।
विभ्राजस्तु समाख्यातः स्फाटिकः स महा
गिरिः ॥
यस्माद्विभाजते नित्यं विभ्राजस्तेन स स्मृतः ।
सैवेह केशवेत्युक्तो यतो वायुः प्रवायति ॥
तेषां वर्षाणि वक्ष्यामि पर्व्वतानां द्विजोत्तमाः ।
शृणुध्वं नामतस्तानि यथावदनुपूर्व्वशः ॥
द्विनामान्येव वर्षाणि यथैव गिरयस्तथा ।
उदयस्योदयं वर्षं जलधारेति विश्रुतम् ॥
नाम्ना शान्तभयश्चाम वर्षं तत् प्रथमं स्मृतम् ।
द्वीतीयं जलधारस्य सुकुमारमिति स्मृतम् ॥
तदेव शैशिरं नाम वर्षं संपरिकीर्त्तितम् ॥
रैवतस्य तु कौमारं तथैव च सुखोदयम् ।
श्यामपर्व्वतवर्षन्तु मणीचकमिति स्मृतम् ॥
आनन्दकमिति प्रोक्तं तदेव सुनिभिः शुभम् ।

शस्त्राघातपश्वदंष्ट्रादपि तथाभूतत्वात् पारिभाषिकत्वादेव न प्रकरणनियमः ॥०॥
"क्रोधात् प्रायं विषं वह्निं शस्त्रमुद्बन्धनं जलम् ।
गिरिवृक्षप्रपातञ्च ये कुर्व्वन्ति नराधमाः ॥
महापातकिनो ये च पतितास्ते प्रकीर्त्तिताः ।
पतितानां न दाहः स्यान्नान्त्येष्टिर्नास्थिसञ्चयः ॥
न चाश्रुपातः पिण्डौ वा कार्य्यं श्राद्धादिकं क्वचित् ।
एतानि पतितानाञ्च यः करोति विमोहितः ।
तप्तकृच्छ्रद्वयेनैव तस्य शुद्धिर्न चान्यथा ॥"०॥
तदेव मरीचिः ।
"विषशस्त्रश्वापदाहितिर्य्यग्ब्राह्मणघातिनाम् ।
चतुर्द्दश्यां क्रिया कार्य्या अन्येषान्तु विगर्हिता ॥"
इति शुद्धितत्त्वम् ॥

शस्त्रहतचतुर्द्दशी, स्त्री, (शस्त्रहतानां चतुर्द्दशी । युद्धादिहतानां श्राद्धादिकर्म्मणि प्रशस्ततयास्यास्तथात्वम् ।) कोजागरकृष्णचतुर्द्दशी । कौमुदीकृष्णचतुर्द्दशी च । यथा, लिङ्गपुराणम् ।
"दीपमाला तथा कृष्णचतुर्द्दश्यां निशामुखे ।
चतुर्थ्यां च तथा चाष्टम्यां अर्द्धेन्दु च ।
[illegible] नरः ॥"
अत्र शस्त्रहतानाम् [illegible] दर्शे ।
इति [illegible] । अथ शस्त्रहतचतुर्द्दशी तत्र विष्णुः । युद्धहतानां श्राद्धकर्म्मणि चतुर्द्दशी प्रशस्ता । युद्धहतानामेवेति न नियमार्थमिदम् । ब्रह्मपुराणे ।
"दंष्ट्रिशस्त्रविषाग्निभिर्विपन्नानां तथा ।
चतुर्द्दश्यान्तु कर्त्तव्यं श्राद्धमेषामिति स्थितम् ॥"
[illegible] । वायुपुराणे ।
"युवानस्तु मृतं यस्य शस्त्रेणैवाप्त दापयेत् ।
[illegible] चतुर्द्दशीम् ॥"
[illegible] । मरीचिः ।
"विषशस्त्रश्वापदाहितिर्य्यग्ब्राह्मणघातिनाम् ।
चतुर्द्दश्यां क्रिया कार्य्या अन्येषान्तु विगर्हिता ॥"
[illegible]
[illegible] कार्य्यम् ।
"[illegible] प्रदीयते ।
[illegible] ॥"
इति [illegible] ॥०॥
[illegible]
[illegible] मत ।
[illegible] ॥"

तथा हारीतः ।
"पितामहेऽपि जीवे वै पितय्र्येव समापयेत् ॥"
तन्त्रेकोद्दिष्टमेव श्रूयते । यथा शङ्खः ।
"सपिण्डीकरणादूर्द्ध्वं मृते सचतुर्द्दशीम् ।
प्रतिसंवत्सरादन्यदेकोद्दिष्टं न कारयेत् ॥"
यमः
"सपिण्डीकरणादूर्द्ध्वं यत् पितृभ्यः प्रदीयते ।
एकोद्दिष्टविधानेन तत् कार्य्यं शस्त्रघातिने ॥"
भविष्यपुराणे ।
"समत्वमागतस्यापि पितुः शस्त्रहतस्य च ।
चतुर्द्दश्यान्तु कर्त्तव्यमेकोद्दिष्टं न पार्व्वणम् ॥
चतुर्द्दश्यान्तु यच्छ्राद्धं सपिण्डीकरणे कृते ।
एकोद्दिष्टविधानेन तत्कार्य्यं शस्त्रघातिने ॥"०॥
उच्यते । एषां वचनानामसूलकत्वात् समूलत्वेऽपि पार्व्वणाप्रतविषयाश्चैतानि विष्णादिवचनेषु पार्व्वणावगतेः । भ्रात्रादीनान्तु शस्त्रहतानामेकोद्दिष्टविधिना कार्य्यम् ।
"अपुत्रा ये मृताः केचित् स्त्रियो वा पुरुषाश्च ये ।
तेषामपि च देयं स्यादेकोद्दिष्टं न पार्व्वणम् ॥
इत्यापस्तम्बवचनेन पार्व्वणनिषेधात् । तत्र न सकलकृष्णपक्षसाधारणं विष्णादिवचनेषु श्राद्धस्य पार्व्वणत्वोक्तेः । किन्त्वाश्विनमासीयकृष्णपक्षविषयम् । ब्रह्मपुराणे प्रायोऽश्वयनेत्यादिना सकलकृष्णपक्षसाधारणं श्राद्धमभिधाय भाषिते । तत्रैतीयाचतुर्द्दश्यां लुप्तपिण्डोदकक्रिया । इति यत् पुनरभिधानं तच्छस्त्रहतभ्रात्रादिविषयं अतएव तत्रैवामावास्यायां पितरः पुत्र्या माल्दीमुक्ता यान्तीति प्रपितामहादीनामपि श्राद्धं दर्शितम् । अयञ्च चतुर्द्दश्यामशस्त्रहतश्राद्धनिन्दा आश्विनमासीयपक्षश्राद्धादिकम्यर्थनिषिद्धसामान्यकृष्णपक्षविहितत्वाच्छ्राद्धविषया प्रकरणभेदेन श्राद्धकर्म्मभेदात् सामान्यविशेषन्यायात् इतरथा चतुर्द्दश्यां सकामित्यादेरशस्त्रहतनिन्दा स्यात् अतएव कृष्णपक्षे दशम्यादौ वर्ज्जयित्वा चतुर्द्दशीमिति मनुवचनेऽपि चतुर्द्दशीवर्ज्जनं दर्शश्राद्धादिकनिषिद्धश्राद्धविषयम् ॥०॥ ननु शस्त्रादिहतानां श्राद्धनिषेधः श्रूयते । तथा हारीतः ।
"सर्व्वविषहतानाञ्च शृङ्गिदंष्ट्रिसरीसृपैः ।
आत्मनस्त्यागिनाञ्चैव श्राद्धमेषां न कारयेत् ॥"
सत्यं बुद्धिपूर्व्वहतानामेव । प्रमादमृतानान्तु श्राद्धादिकमाहाङ्गिराः ।
"यत्र क्वचित् प्रमादेन म्रियतेऽग्न्युदकादिभिः ।
यस्यैव तस्य कर्त्तव्यं कर्त्तव्या चोदकक्रिया ॥"
बुद्धिपूर्व्वमपि महारादिभिः क्रीडां कुर्व्वतां मरणे न वर्ज्जनम् । यथा, ब्रह्मपुराणम् ।
"शृङ्गिदंष्ट्रिनखिव्यालविषवह्निस्त्रिया जलैः ।
आदरात् परिहर्त्तव्यः कुर्व्वन् क्रीडां मृतस्तु यः ॥"
[illegible] बुद्धिपूर्व्व-
[illegible] कर्त्तव्यम् । तथाच ब्रह्माण्डे ।
"हस्तः श्रीवत्समूर्त्तिस्तुः ॥ [illegible]
आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनादिभिः
अस्य त्रिरात्रमशौचं द्वितीये त्वस्थिसञ्चयः ।
तृतीये तूदकं कृत्वा चतुर्थे श्राद्धमिष्यते ॥"
एवं क्रीडाव्यतिरेकेणाबुद्धिपूर्व्वं मृताः शास्त्रमत्या बुद्धिपूर्व्वकमृता अपि श्राद्धाः कथं लुप्तपिण्डोदकत्वमिति चेत् गौणमिति ब्रूम । बुद्धिपूर्व्वं पिण्डोदकक्रियालोपादिति । श्राद्धविवेकः ॥

शस्त्रहस्तः, पुं, शस्त्रं हस्ते यस्य सः । [illegible] पाणिशब्ददर्शनात् ॥

शस्त्राजीवः, त्रि, (शस्त्रेण आजीवतीति । आ-जीव+अच् ।) असिजीवी । तत्पर्य्यायः । काण्डपृष्ठः २ आयुधीयः ३ आयुधिकः ४ इत्यमरः ॥ काण्डस्पृष्टः ५ । इति तट्टीका ॥ काण्डपृष्ठः ६ शस्त्रधारणजीवकः ७ । इति शब्दरत्नावली ॥

शस्त्राभ्यासः, पुं, (शस्त्राणां अभ्यासः ।) अस्त्रशिक्षा । तत्पर्य्यायः । खुरली १ । इति त्रिकाण्डशेषः ॥

शस्त्रायसं, क्ली, (शस्त्रार्थं यदायसम् ।) लोहम् । इति राजनिर्घण्टः ॥

शस्त्री, स्त्री, (शस्+ष्ट्रन् । स्त्रियां ङीप् ।) छुरिका । इति मेदिनी ॥ (यथा, माघे ।
"शस्त्रीश्यामैरंशुभिराशुद्रुतमम्भ-
श्छायामृच्छति नीली सलिलस्य ॥")

शस्त्री, [न्] त्रि, शस्त्रविशिष्टः । अस्त्रधारी । शस्त्रशब्दादिन्प्रत्ययेन निष्पन्नमेतत् ॥ (यथा, कामन्दकीयनीतिसारे । ७ । १७ ।
"आमशस्त्रानुगतः प्रविशेत
सङ्कटेषु गहनेषु न तिष्ठेत् ॥")

शस्प, क्ली, बालतृणम् । इत्यमरटीकायां भरतप्रतिभाष्टानिः । इति जटाधरः ॥

शस्यं, क्ली, (शस+"तकिशसिचतियतिजनिभ्यो यद्वाच्यः" । ३ । १ । ९७ । इत्यस्य वार्त्तिकोक्त्या यत् ।) वृक्षादिनिष्पन्नम् । तत्पर्य्यायः । फलम् २ । इत्यमरः ॥ वृक्षाणां लतादीनाञ्च फलं निष्पत्तमपि धान्यादिकं शस्यं शस्यपदवाच्यं इत्यतः फलति निष्पद्यते फलं फलमित्यतो यथादिदम् । शस्ति अपि तु शस्यं शस शु र स्तौ इति यः शस्यं हिंसनीयम् । धान्यकलिकादिवत् इव नीरसमसमीक्ष्यो देश इति नन्दकीयेयात् ।
"संमतं मौलकं शस्यं पष्टं माषा च भार्य-
सम् ॥"
इत्युपदिदेशाथ ॥ तामस्यादिदन्ता [illegible] हि शस्यं हिंसात्यत्वोरित्यस्मात् [illegible] कर्त्तापि यत् शस्यं तत् क्रियानाम्नेऽपि धर्त्तनि दर्शने । तामस्या अपि दस्याश्च शस्यात् पामर इत्युक्तिः । इति तट्टीकायां भरतः स्वैवभ्यास्यादि । यथा —
"शस्यं देवगतं प्राक् कृतं शास्त्रुकर्म ।

नाम्नं विजुषमित्युक्तं सिद्धमन्त्रमुदाहृतम् ॥"
इति स्मृतिः ॥
ग्राम्यशस्यानि यथा,—
"व्रीहयश्च यवाश्चैव गोधूमाश्चाणवस्तिलाः ।
प्रियङ्गवो ह्युदाराश्च कोरदूषाः सचीनकाः ॥"
उदाराः दीर्घशालयः ।
"माषा मुद्गा मसूराश्च निष्पावाः सकुलत्थकाः ।
आढ़क्यश्चणकाश्चैव शणाः सप्तदश स्मृताः ॥
इत्येता ओषधीनान्तु ग्राम्याणां जातयो मुने ॥"
ग्राम्यारण्यशस्यानि यथा,—
"ओषध्यो यज्ञियाश्चैव ग्राम्यारण्याश्चतुर्द्दश ।
व्रीहयश्च यवा माषा गोधूमाश्चाणवस्तिलाः ॥
प्रियङ्गुसप्तमा ह्येते अष्टमास्तु कुलत्थकाः ।
श्यामाकास्त्वथ नीवारा जर्त्तिलाः सगवेधुकाः ॥
तथा वेणुयवाः प्रोक्तास्तथा मर्कटका मुने ।
ग्राम्यारण्याः स्मृता ह्येता ओषध्यस्तु चतुर्द्दश ॥"
इति विष्णुपुराणे १ अंशे ६ अध्यायः ॥*॥
नवशस्यसम्भोगनक्षत्राणि यथा,—
"अनुराधा मृगशिरो रेवती चोत्तरात्रयम् ।
हस्ता चित्रा मघा पुष्या श्रवणा च पुनर्व्वसुः ॥
रोहिणी नवशस्यादिनवद्रव्याशनादिषु ।
प्रशस्तं नवपीठादिसम्भोगं ग्रहविद्वदेत् ॥"*॥
नवशस्यश्राद्धादिकालो यथा,—
"शरद्वसन्तयोः केचिन्नवयज्ञं प्रचक्षते ।
धान्यपाकवशादन्ये श्यामाको वनिनः स्मृतः ॥"
इत्यनेन शरद्वसन्तविहितनवशस्येष्टेः ।
"श्यामाकैर्व्रीहिभिश्चैव यवैरन्योन्यकालतः ।
प्रागयत्तं युज्यतेऽवश्यं न त्वयाग्रयणात्ययः ॥"
इति कालान्तरदर्शनात् श्राद्धेऽपि तथा ।
आग्रयणं नवशस्येष्टिः ।
"वृश्चिके शुक्लपक्षे तु नवान्नं शस्यते बुधैः ।
अपरे क्रियमाणं हि धनुष्येव कृतं भवेत् ॥
धनुषि यत् कृतं श्राद्धं मृगनेत्रासु रात्रिषु ।
पितरस्तत्र गृह्णन्ति नवान्नामिषकाङ्क्षिणः ॥"
अपरे कृष्णपक्षे ।
"पौषे चैवं कृष्णपक्षे नवान्नं नाचरेद्बुधः ।
भवेत् जन्मान्तरे रोगी पितृणां नोपतिष्ठते ॥
यद्यपि व्रीहिपाके च यवपाके च पार्थिव ।
न तावाद्यो महाराज विना श्राद्धं कथञ्चन ॥"
इति विष्णुधर्म्मोत्तरवचने श्राद्धं प्रति व्रीहियवपाकयोर्निमित्तत्वं प्रतीयते । तथापि नवोदके नवान्ने च इति शातातपवचने पूर्व्वोक्तवहुषु वचनेषु च नवान्नस्य श्रुतेर्नवान्नत्वेनैवोभयसाधारणं निमित्तं लाघवात् । अभिलापवाक्ये नवान्नागमनिमित्तमिति नियोज्यम् । न तु यवान्नागमादि । वृश्चिके शुक्लपक्षे च इति तु धनुरादिपर्य्युदस्तेतरगौणकालमध्ये वृश्चिकस्य प्राशस्त्यभावार्थं न तु श्राद्धान्तरार्थमिति । इति मलमासतत्त्वम् ॥ अन्यत् नवान्नशब्दे द्रष्टव्यम् ॥

शस्यध्वंसी, [न्] पुं, (शस्यानि ध्वंसयतीति । ध्वंस+णिनिः ।) तुन्नवृक्षः । इति शब्दचन्द्रिका ॥ शस्यनाशके, त्रि ॥

शस्यमञ्जरी, स्त्री, (शस्यस्य मञ्जरी ।) अभिनवनिर्गतधान्यादिशीर्षकम् । शीष इति भाषा ॥ तत्पर्य्यायः । कणिशम् २ । इत्यमरः ॥ कणिशः ३ कणिषः ४ । इति तट्टीका ॥

शस्यशूकं, क्ली, (शस्यस्य शूकम् ।) शस्यस्य तीक्ष्णाग्रम् । शुङा इति भाषा । तत्पर्य्यायः । किंशारुः २ । इत्यमरः ॥

शस्यसम्बरः, पुं, सालवृक्षः । इत्यमरः ॥

शस्याद्, त्रि, शस्यभक्षकः । शस्यं अत्ति इत्यर्थे अदधातोः कर्त्तरि क्विप्प्रत्ययेन निष्पन्नमेतत् । इति मुग्धबोधव्याकरणम् ॥

शस्यारुः, पुं, क्षुद्रशमीवृक्षः । इति शब्दरत्नावली ॥

शांशपः, पुं, शिंशपाया विकारश्चमसः । शिंशपाशब्दादण्प्रत्यये इकारस्य आकारादेशेन निष्पन्नमेतत् । इति सिद्धान्तकौमुदी ॥

शांशपायनः, पुं, मुनिविशेषः । इति पुराणम् ॥ (यथा, विष्णुपुराणे । ३ । ६ । १८ ।
"काश्यपः संहिताकर्त्ता सावर्णिः शांशपायनः ॥")

शाकं, क्ली, पुं, (शक्यते भोक्तुमिति । शक+घञ् ।) पत्रपुष्पादि । साग इति हिन्दीभाषा । तत्पर्य्यायः । हरितकम् २ शिग्रुः ३ । इत्यमरः ॥ सिग्रुः ४ । इति तट्टीका ॥ हारितकम् ५ इति शब्दरत्नावली ॥ अथ शाकवर्गः । तत्र शाकनिरूपणम् ।
"पत्रं पुष्पं फलं नालं कन्दं संस्वेदजं तथा ।
शाकं षड्विधमुद्दिष्टं गुरु विद्यात् यथोत्तरम् ॥"
अथ शाकानां गुणाः ।
"प्रायःशाकानि सर्व्वाणि विष्टम्भीनि गुरूणि च
रूक्षाणि बहुवर्च्चांसि सृष्टविण्मारुतानि च ॥
शाकं भिनत्ति वपुरस्थि निहन्ति नेत्रं
वर्णं विनाशयति रक्तमथापि शुक्रम् ।
प्रज्ञाक्षयञ्च कुरुते पलितञ्च नूनं
हन्ति स्मृतिं गतिमिति प्रवदन्ति तज्ज्ञाः ॥
शाकेषु सर्वं निवसन्ति रोगाः
सहेतवो देहविनाशनाय ।
तस्माद्बुधः शाकविवर्जनञ्च
कुर्य्यात्तथाम्लेषु स एव दोषः ॥"
इति भावप्रकाशः ॥
अपि च ।
"सर्वशाकमचाक्षुष्यमलङ्घ्यममैथुनम् ।
ऋते पटोलवास्तूककाकमाचीपुनर्नवाः ॥"
इति राजवल्लभः ॥

शाकः, पुं, वृक्षविशेषः । सेगोन् इति भाषा । तत्पर्य्यायः । शाकवृक्षः २ शाकाख्यः ३ खरपत्रः ४ अर्जुनोपमः ५ । इति रत्नमाला ॥ क्रकचपत्रः ६ शरपत्रः ७ घनपत्रः ८ अहिरुहः ९ श्रेष्ठकाष्ठः १० स्थिरसारः ११ गृहद्रुमः १२ । अस्य गुणाः । सारकत्वम् । पित्तदाहश्रमापहत्वञ्च । अस्य वल्कलगुणाः । कफनाशित्वम् । मधुरत्वम् । रूक्षत्वम् । कषायत्वञ्च । इति राजनिर्घण्टः ॥ * ॥ शक्तिः । इति मेदिनी ॥ शिरीषवृक्षः । इति शब्दरत्नावली ॥ नृपभेदः । इति विश्वः ॥ द्वीपविशेषः । तस्य विवरणं यथा,—
सूत उवाच ।
"शाकद्वीपस्य वक्ष्यामि यथावदिह निश्चयम् ।
कथ्यमानं निबोधध्वं शाकद्वीपं द्विजोत्तमाः ॥
जम्बुद्वीपस्य विस्तराद्द्विगुणस्तस्य विस्तरः ।
विस्ताराद्द्विगुणश्चापि परिणाहः समन्ततः ॥
तेनावृतः समुद्रोऽयं द्वीपेन लवणोदधिः ।
तत्र पुण्या जनपदाश्चिराच्च म्रियते जनः ॥
कुत एव च दुर्भिक्षं क्षमातेजोयुतेष्विह ।
तत्रापि पर्वताः शुभ्राः सप्तैव मणिभूषिताः ॥
शाकद्वीपादिद्वीपेषु सप्त सप्त नगास्त्रिषु ।
ऋज्वायताः प्रतिदिशं निविष्टा वर्षपर्वताः ॥
रत्नाकराद्रिनामानः शोभावन्तो महाचिताः ।
समाचिताः प्रतिदिशं द्वीपविस्तरमानतः ॥
उभयत्रावगाढ़ाश्च लवणक्षीरसागरौ ।
शाकद्वीपे तु वक्ष्यामि सप्त दिव्यान् महाचलान् ॥
देवर्षिगन्धर्वयुतः प्रथमो मेरुरुच्यते ।
प्रागायतः स सौवर्ण उदयो नाम पर्वतः ॥
तत्र मेघास्तु वृष्ट्यर्थं प्रभवन्ति च यान्ति च ।
तस्यापरेण सुमहान् जलधारो महागिरिः ॥
सैव चन्द्रः समाख्यातः सर्व्वौषधिसमन्वितः ।
तस्मान्नित्यमुपादत्ते वासवः परमं जलम् ॥
नारदो नाम सैवोक्तो दुर्गशैलो महाचितः ।
तत्राचले समुत्पन्नौ पूर्वं नारदपर्व्वतौ ॥
तस्यापरेण सुमहान् श्यामो नाम महागिरिः ।
यत्र श्यामत्वमापन्नाः प्रजाः पूर्वमिमाः किल ॥
स एव दुन्दुभिर्नाम श्यामः पर्वतसत्तमः ।
शब्दमृत्युः पुरा तस्मिन् दुन्दुभिस्ताड़ितः सुरैः ॥
रत्नज्वालान्तरमयः शाल्मलश्चान्तरालकृत् ।
तस्यापरेण रजतो महानस्तो गिरिः स्मृतः ॥
सैव सोमक इत्युक्तो देवैर्यत्रामृतं पुरा ।
सम्भृतञ्च हृतञ्चैव मातुरर्थे गरुत्मता ॥
तस्यापरे चाम्बिकेयः सुमनाश्चैव स स्मृतः ।
हिरण्याक्षो वराहेण तस्मिन् शैले निसूदितः ॥
आम्बिकेयात् परो रम्यः सर्वौषधिसमन्वितः ।
विभ्राजस्तु समाख्यातः स्फाटिकः स महागिरिः ॥
यस्माद्विभाजते नित्यं विभ्राजस्तेन स स्मृतः ।
सैवेह केशवेत्युक्तो यतो वायुः प्रवायति ॥
तेषां वर्षाणि वक्ष्यामि पर्वतानां द्विजोत्तमाः ।
शृणुध्वं नामतस्तानि यथावदनुपूर्वशः ॥
द्विनामान्येव वर्षाणि यथैव गिरयस्तथा ।
उदयस्योदयं वर्षं जलधारेति विश्रुतम् ॥
नाम्ना शान्तभयन्नाम वर्षं तत् प्रथमं स्मृतम् ।
द्वितीयं जलधारस्य सुकुमारमिति स्मृतम् ॥
तदेव शैशिरं नाम वर्षं संपरिकीर्त्तितम् ॥
रैवतस्य तु कौमारं तथैव च सुखोदयम् ।
श्याम[illegible]ंस्तु मणीचकमिति स्मृतम् ॥
[illegible]ति प्रोक्तं तदेव मुनिभिः शुभम् ।

सोमकस्य शुभं वर्षं द्वितीयं कुसुमोत्तरम् ॥
तदेव शिवमित्युक्तं वर्षं सोमकसंज्ञितम् ।
आम्बिकेयस्य मेदाकं द्विसकश्चैव तत् स्मृतम् ॥
सेतुवर्षतकस्यापि महाद्रुममिति स्मृतम् ।
तदेव ध्रुवमित्युक्तं वर्षं विभ्राजसंज्ञितम् ॥
द्वीपस्य परिणाहश्च ह्रस्वदीर्घत्वमेव च ।
जम्बुद्वीपेन सङ्ख्यातस्तस्य मध्ये वनस्पतिः ॥
शाको नाम महांस्तस्य प्रजा महानुगाः ।
एतेषु देवगन्धर्वाः सिद्धाश्च सह चारणैः ॥
विहरन्ति रमन्ते च दृश्यमानाश्च तैः सह ।
तत्र पुण्या जनपदाश्चातुर्वर्ण्यसमन्विताः ॥
तेषु नद्यस्तु वै सप्त प्रतिवर्षं समुद्रगाः ।
द्विनामवत्यस्ताः सर्वा गङ्गाः सप्तविधाः स्मृताः ॥
प्रथमा सुकुमारीति गङ्गा शिवजला शुभा ।
अनुतप्ता च नाम्नैषा नदी संपरिकीर्त्तिता ॥
सुकुमारी तपःसिद्धा द्वितीया नामतः सती ।
नन्दा च पावनी चैव तृतीया परिकीर्त्तिता ॥
शिवस्रोका चतुर्थी स्यात् द्विविधा च पुनः
स्मृता ।
इक्षुश्च पञ्चमी ज्ञेया तथैव च पुनः कुहूः ॥
धेनुका च मता चैव षष्ठी संपरिकीर्त्तिता ।
सुकृता च गभस्ती च सप्तमी परिकीर्त्तिता ॥
एताः सप्त महाभागाः प्रतिवर्षं शिवोदकाः ।
पावयन्ति जनं सर्वं शाकद्वीपनिवासिनम् ॥
अभिगच्छन्ति ताश्चान्या नदीनद्यः सरांसि च ।
बहूदकपरिस्रावा यतो वर्षति वासवः ॥
तासान्तु नामधेयानि परिमाणं तथैव च ।
न शक्यं परिसंख्यातुं पुण्यास्ताः सरिदुत्तमाः ॥
ताः पिबन्ति सदा हृष्टा नदीर्जनपदास्तु ते ।
ये ते शान्तभयाः प्रोक्ताः प्रमोदाये ति वै
शिवाः ॥
आनन्दाश्च सुखाश्चैव क्षेमकेय ध्रुवैः सह ।
वर्णाश्रमाचारयुता देशास्ते सप्त विश्रुताः ॥
अरोगा बलिनश्चैव सर्वे मरणवर्जिताः ।
अवसर्पिणी न तेष्वस्ति तथैवोत्सर्पिणी पुनः ॥
न तत्रास्ति युगावस्था चतुर्युगकृता क्वचित् ।
त्रेतायुगसमः कालस्तदा तत्र प्रवर्त्तते ॥
शाकद्वीपादिषु ज्ञेयं पञ्चस्वेतेषु सर्वशः ।
देशस्य तु विचारेण कालः स्वाभाविकः स्मृतः ॥
न तेषु सङ्करः कश्चिद्वर्णाश्रमकृतः क्वचित् ।
धर्म्मस्याव्यभिचारेण एकान्तसुखिताः प्रजाः ॥
न तेषु माया लोभो वा ईर्ष्यासूया भयं तथा ।
विपर्ययो न तेष्वस्ति तद्वै स्वाभाविकं स्मृतम् ॥
कालो न तेषु तेष्वस्ति न दण्डो न च दाण्डिकः ।
स्वधर्म्मेण च धर्म्मज्ञास्ते रक्षन्ति परस्परम् ॥"
इति मात्स्ये १०२ अध्यायः ॥ * ॥
अपि च । एष परस्तात् क्षीरोदात् परित
उपवेष्टितः शाकद्वीपो द्वात्रिंशल्लक्षयोजनायामः
समानेन दधिमण्डोदेन परीतः । यस्मिन् शाको
नाम महीरुहः स्वक्षेत्रव्यपदेशकः । यस्य ह
महासुरभिगन्धस्तं द्वीपमनुवासयति ।
तस्यापि प्रैयव्रत एवाधिपतिर्नाम्ना मेधातिथिः
सोऽपि विभज्य सप्तवर्षाणि पुत्रनामानि तेषु
स्वात्मजान् पुरोजवमनोजववेपमानधूम्रानीक-
चित्ररेफबहुरूपविश्वाधारसंज्ञान् निधायाधि-
पतीन् स्वयं भगवत्यनन्त आवेशितमतिस्तपोवनं
प्रविवेश । एतेषां वर्षमर्यादा गिरयो नद्यश्च
सप्त सप्तैव । ईशान उरुशृङ्गो बलभद्रः शत-
केशरः सहस्रस्रोतो देवपालो महानस इति ।
अनघा आयुर्दा उभयस्पृष्टिरपराजिता पञ्चपदी
सहस्रस्रुतिर्निजधृतिरिति । तद्वर्षपुरुषा ऋत-
व्रतसत्यव्रतदानव्रतानुव्रतनामानो भगवन्तं
वाय्वात्मकं प्राणायामविधूतरजस्तमसः परम-
समाधिना यजन्ते । इति श्रीभागवते ५ स्कन्धे २०
अध्यायः ॥ * ॥ युधिष्ठिरविक्रमादित्यशालि-
वाहनादिमनुजपतीनामतीताब्दः । तस्य
प्रमाणं दिनपञ्जिकायां द्रष्टव्यम् ॥ (शक्तिः ।
कर्म्म । यथा, ऋग्वेदे । ६ । २४ । ४ ।
"शचीवतस्ते पुरुशाक शाका
गवामिव स्रुतयः सञ्चरणीः ॥"
"हे पुरुशाक बहुकर्म्मन्निन्द्र शचीवतः प्रज्ञा-
वतस्ते त्वदीयाः शाकाः शक्तयः कर्म्माणि वा ।"
इति तद्भाष्ये सायणः ॥ * ॥ समर्थे, त्रि । यथा,
ऋग्वेदे । ५ । ३० । १० ।
"सत्रा इन्द्रो अत्रजदस्य शाकै-
र्यदी सोमासः सुषुता अमन्दन् ॥"
"शाकैः शक्तैर्मरुद्भिः सह ।" इति तद्भाष्ये
सायणः ॥)
शाकचुक्रिका, स्त्री, चिञ्चा । इति राजनिर्घण्टः ।
शाकट, त्रि, (शकट + अण् ।) शकटस्येदम् ।
शकटवोढा । इति मेदिनी ॥
शाकटः, पुं, श्लेष्मातकवृक्षः । इति राजनिर्घण्टः ॥
(शकटं वहतीति । शकट + "शकटादण् ।"
४ । ४ । ८० । इत्यण् ।) युगादिवोढा । तत्-
पर्य्यायः । युग्यः २ प्रासङ्ग्यः ३ । इत्यमरः ॥
शाकटाख्यः, पुं, (शाकट इति आख्या यस्य ।)
धवद्रुमः । इति रत्नमाला ॥
शाकटायनः, पुं, (शकटस्यापत्यं पुमान् । शकट +
"नडादिभ्यः फक् ।" ४।१।९९। इति फक् ।) अष्ट-
शाब्दिकान्तर्गतशाब्दिकविशेषः । यथा,—
"इन्द्रश्चन्द्रः काशकृत्स्ना पिशली शाकटा-
यनः ।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः ॥"
इति कविकल्पद्रुमः ॥
(अयन्तु नाम च धातुजमाह । यथा,
कातन्त्रे तत्सु उणादयो भूतेऽपि दृश्यन्त इत्यत्र
त्रिलोचनः ।
"नाम च धातुजमाह निरुक्ते
व्याकरणे शकटस्य च तोकः ।
यन्न पदार्थविशेषसमुत्थं
प्रत्ययतः प्रकृतेश्च तदूह्यम् ॥")
शाकटिकः, त्रि, शकटगामी । शकटेन गच्छति
अर्थे ठक्प्रत्ययेन निष्पन्नमेतत् । इति सिद्धान्त-
कौमुदी । (यथा, बृहत्संहितायाम् । १०।४।
"रोहिण्यां शोणभद्र-
काशीपाञ्चालशाकटिकाः ॥")
शाकटीनः, पुं, विंशतितुलापरिमाणम् । तत्-
पर्य्यायः । भारः २ आचितः ३ शकटः ।
शलाटः ५ । इति हेमचन्द्रः ॥
शाकतरुः, पुं, (शाकाख्यस्तरुः ।) शाकवृक्षः ।
इति शब्दमाला ॥ सागौन इति हिन्दी भाषा ॥
शाकपत्रः, पुं, शिग्रुः । इति राजनिर्घण्टः ॥
शाकपार्थिवः, पुं, मधुयष्टिः । इति शब्दचन्द्रिका ॥
शाकम्भरी, स्त्री, (शाकेन बिभर्त्ति । भृ + खच्
ङीप् ।) दुर्गा । यथा,—
"ततोऽहमखिलं लोकमात्मदेहसमुद्भवैः ।
भरिष्यामि सुराः शाकैरावृष्टेः प्राणधारकैः ।
शाकम्भरीति विख्यातिं तदा यास्याम्यहं भुवि ।
तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरम् ।"
इति मार्कण्डेयपुराणे नारायणीस्तुतिः ।
अपि च ।
"भूयः सुरास्त्विष्ययुगे निरामना-
विरीक्ष्य मारीचवहे समागिता ।
लोकान् भरिष्यामि समुद्भवैः शाकै-
स्तदा भविष्यामि शाकम्भरीति ।"
इति वामने ५१ अध्यायः ।
नगरविशेषः । साम्भरीति ख्यातः । इति देशिका ॥
शाकम्भरीयं, क्ली, आजमेरप्रदेशान्तर्गतसाम्भर-
नगरीयजलाशयविशेषोद्भवलवणम् । साम्भर
इति ख्यातम् । तत्पर्य्यायगुणा यथा,—
"शाकम्भरीयं कथितं गडाख्यं रोमकं तथा ।
गडाख्यं लघु वातघ्नमत्युष्णं भेदि पित्तलम् ।
तीक्ष्णं व्यवायि सूक्ष्मञ्चाभिष्यन्दि कटुपाकि
च ।"
इति भावप्रकाशः ।
शाकयोग्यः, पुं, (शाकस्य योग्यः ।) धान्यकम् ।
इति राजनिर्घण्टः ॥
शाकराजः, पुं, (शाकानां राजा निर्द्दिष्टः ।
"राजाहःसखिभ्यष्टच् ।" ५।४।९१। इति टच् ।)
वास्तूकम् । इति राजनिर्घण्टः ॥
शाकलः, } पुं, शकलेन प्रोक्तमधीयते इत्य-
शाकलकः, } र्थेऽणि शाकलाः । ततस्तेषां सङ्घः ।
"शाकलाद्वा ।" ४ । ३ । १२८ । इति वुञ् ।
परम्परासम्बन्धोऽङ्कः । इति सिद्धान्तकौमुदी ।
(द्वीपविशेषः । यथा, महाभारते । २।२६।६ ।
"शाकलद्वीपवासाश्च सप्तद्वीपेषु ये नृपाः ।
अर्ज्जुनस्य च सैन्यैस्तैर्विग्रहस्तुमुलोऽभवत् ॥")
शाकलिकः, त्रि, शकलसम्बन्धी । ("यकलोप-
साभ्यामुपसंख्यानम् ।" ४ । २ । २ । इत्यस्य
वार्त्तिकोक्त्या शाकलिकः कार्द्दमिकः । अण्
अपीति ठञिकारः ।) शाकलं । कारम् ।
इति सिद्धान्तकौमुदी ॥
शाकविल्वः, पुं, (शाकं बिल्व इव ।) वार्त्ताकुः ।
इति जटाधरः ॥
शाकविल्वकः, पुं, (शाकविल्व + स्वार्थे कन् ।)
वार्त्ताकुः । इति त्रिकाण्डशेषः ॥

शाकवीरः, पुं, (शाकेषु वीरः ।) वास्तूकशाकः । इति त्रिकाण्डशेषः ॥ जीवशाकः । इति राजनिर्घण्टः ॥

शाकवृक्षः, पुं, (शाकाख्यो वृक्षः ।) तरुविशेषः । इति रत्नमाला ॥ सेगोन इति भाषा । अस्य पर्य्यायगुणौ शाकशब्दे द्रष्टव्यौ ॥

शाकशाकटं, क्ली, (शाकानां भवनं क्षेत्रम् । शाक+“भवने क्षेत्रे शाकटशाकिनौ ।” इति शाकटः ।) शाकक्षेत्रम् । इति हेमचन्द्रः ॥

शाकशाकिनं, क्ली, (शाकानां भवनं क्षेत्रम् । शाक+शाकिनः ।) शाकक्षेत्रम् । इति हेमचन्द्रः ॥

शाकश्रेष्ठः, पुं, (शाकेषु श्रेष्ठः ।) वास्तूकशाकम् । इति शब्दरत्नावली ॥

शाकश्रेष्ठा, स्त्री, (शाकेषु श्रेष्ठा ।) जीवन्ती । डोड़ीक्षुपः । वार्त्ताकुः । इति राजनिर्घण्टः ॥

शाका, स्त्री, हरीतकी । इति केचित् ॥

शाकाख्यं, क्ली, (शाक इति आख्या यस्य ।) पत्रपुष्पादि । इत्यमरः ॥
“व्यञ्जनयोग्यं पत्रपुष्पादि शाकपदवाच्यम् । आदिना फलमूलादिग्रहः । यदुक्तम् ।
“मूलपत्रकरीराग्रफलकाण्डाधिरूढकम् ।
त्वक् पुष्पं कवकञ्चैव शाकं दशविधं स्मृतम् ॥”
तत्र मूलं मूलकादेः । पत्रं पटोलादेः । करीरं वंशाङ्कुरादि । अग्रं वेत्रादेः । फलं कुष्माण्डादेः काण्डं उत्पलादिनाडी । अधिरूढं तालास्थिमज्जा । अधिरूढोऽङ्कुर इति केचित् । त्वक् मातुलुङ्गादेः । पुष्पं कोविदारादेः । कवक छत्त्रिका । शक्यते भोक्तुमनेनेति शाकम् । श्यति सामर्थ्यं तनूकरोति शो तनूकरणे बाहुल्यात् कः शाकमित्यन्ये ।” इति तट्टीकायां भरतः ॥

शाकाख्यः, पुं, (शाक इति आख्या यस्य ।) शाकवृक्षः । इति रत्नमाला ॥ अस्य पर्य्यायगुणौ शाकशब्दे द्रष्टव्यौ ॥

शाकाङ्गं, क्ली, (शाकस्य अङ्गमिव ।) मरिचम् । इति राजनिर्घण्टः ॥

शाकाम्लं, क्ली, (शाके अम्लो यस्य ।) वृक्षाम्लम् । इति राजनिर्घण्टः ॥

शाकाम्लभेदनं, क्ली, (शाकाम्लं भेदनञ्च ।) चुक्रम् । इति राजनिर्घण्टः ॥

शाकालाबुः स्त्री, राजालाबुः । इति राजनिर्घण्टः ॥

शाकाष्टका, स्त्री, (शाका अष्टौ प्रदेया यत्र ।) शाकोपकरणकश्राद्धार्हाष्टमी । सा च गौणफाल्गुनकृष्णाष्टमी । तद्विवरणं मांसाष्टकाशब्दे द्रष्टव्यम् ॥

शाकिनी, स्त्री, शाकोऽस्यत्रेति । शाक+इनिः । शाकयुक्ता भूमिः । यथा,—
“शकटः शाकिनी गावो जालमस्पन्दनं वनम् ।
अनूपं पर्व्वतो राजा दुर्भिक्षे नव वृत्तयः ॥”
शकटो धान्यादिवहनद्वारेणोपजीव्यः ।
“पत्रं पुष्पं फलं कन्दं नालं संस्वेदजं तथा ।
शाकं षड्विधमुद्दिष्टं गुरु विद्यात् यथोत्तरम् ॥”
इति वैद्योक्तशाकयोगात् शाकिनीक्षेत्रवाटिका शाकाद्याहरणेन । गावो दुग्धादिना । जालं मत्स्याद्याहरणेन । अस्पन्दनं स्वस्थानादत्यागः ऋणादिनाशेन । व्ययाधिक्यनिवृत्त्या च । वनं फलपुष्पाद्याहरणेन । अनूपं बहूदकदेशः सतृणालशालूकाद्याहरणेन । पर्व्वतो गैरिकमृदाद्याहरणेन । राजा भैक्षादिना । इत्याह्निकतत्त्वम् ॥२॥ दुर्गाया अनुचरीविशेषः । यथा,—
“डाकिनी योगिनी चैव खेचरी शाकिनी तथा
दिक्षु पूज्या इमा देव्यः सुसिद्धाः फलदायिकाः ॥”
इति कात्यायनीकल्पः ॥
“ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ।
ततः परशिवो देवि षट्शिवाः परिकीर्त्तिताः ॥
मूलाधारे तु ब्रह्माणं डाकिनीसहितं न्यसेत् ।
सर्व्वत्र वाचरीमुद्रा वादिसान्तं सबिन्दुकम् ॥
स्वाधिष्ठानाख्यचक्रे तु सविष्णुं राकिणीं तथा ।
बादिलान्तं प्रविन्यस्य नाभौ तु मणिपूरके ॥
डादिफान्तार्णसहितं रुद्रञ्च लाकिनीं तथा ।
अनाहते कादिठान्तं ईश्वरं काकिनीं तथा ॥
विशुद्धाख्ये महाचक्रे षोड़शस्वरसंयुतम् ।
सदाशिवं शाकिनीन्तु विन्यसेत् पूर्व्ववत्ततः ॥
आज्ञाचक्रे तु देवेशि ह-क्ष-वर्णसमन्वितम् ।
परं शिवं ब्रह्मरूपं हाकिनीसहितं न्यसेत् ॥”
इति तारान्यासभेदः । इति तन्त्रसारः ॥

शाकुणः, त्रि, परोत्तापी । इति शब्दमाला ॥

शाकुनः, पुं, (शकुनमधिकृत्य कृतो ग्रन्थः । शकुन+अण् ।) पशुपक्ष्यादिरूपशकुनद्वारा मनुष्यशुभाशुभनिश्चायकग्रन्थः । तस्येमौ श्लोकौ ।
“शुभाशुभज्ञानविनिर्णयाय
हेतुर्नृणां यः शकुनः स उक्तः ।
गतिः स्वरालोकनभावचेष्टां
संकीर्त्तयामो द्विपदादिकानाम् ॥
लोकोऽमुना शाकुनसंज्ञकेन
ज्ञानेन विज्ञातसमस्तकार्य्यः ।
नापायकूपे पतति प्रसर्पन्
शास्त्रं हि दिव्या दृगतीन्द्रियेषु ॥”
इति वसन्तराजशाकुने १ सर्गः ॥
(शकुनस्यायमिति । शकुन+“तस्येदम् ।” ४ । ३ । १२० । इति अण् । पक्षिसम्बन्धी । यथा, मनुः । ३ । २६८ ।
“द्वौ मासौ मत्स्यमांसेन त्रीन्मासान् हारिणेन तु औरभ्रेणाथ चतुरः शाकुनेनाथ पञ्च वै ॥”)

शाकुनिकः, पुं, (शाकुनान् हन्तीति । शकुन+“पक्षिमत्स्यमृगान् हन्ति ।” ४ । ४ । ३५ । इति ठक् ।) पक्षिहन्ता । पाखिमारा इति चिड़िमार इति च भाषा । तत्पर्य्यायः । जीवान्तकः २ । इत्यमरः ॥ (यथा, मनुः । ८ । २६० ।
“व्याधान् शाकुनिकान् गोपान् कैवर्त्तान् मूलखानकान् ॥”)

शाकुनेयः, पुं, (शकुनेरपत्यम् । शकुनि+“शुभ्रादिभ्यश्च ।” ४ । १ । १२३ । इति ढक् ।) क्षुद्रोलूकपक्षी । इति राजनिर्घण्टः ॥ शकुनीपुत्त्रो वृकासुरः । यथा भागवते । १० । ८८ । २८ ।
“शाकुनेय भवान् व्यक्तं श्रान्तः किं दूरमागतः ।
क्षणं विश्राम्यतां पुंस आत्मायं सर्व्वकामधुक् ॥”
शकुनसम्बन्धिनि, त्रि ॥

शाकुन्तलेयः, पुं, (शकुन्तलाया अपत्यमिति । शकुन्तला+“स्त्रीभ्यो ढक् ।” ४ । १ । १२० । इति ढक् ।) भरतराजः । इति जटाधरः ॥ शकुन्तलासम्बन्धिनि, त्रि ॥

शाकुलिकः, त्रि, शकुलान् हन्ति यः । शकुलशब्दात् “पक्षिमांसमृगान् हन्ति ।” ४ । ४ । ३५ । इति ठक्प्रत्ययेन निष्पन्नमेतत् । इति सिद्धान्तकौमुदी ॥

शाक्करः, पुं, (शक्कर एव । स्वार्थे अण् ।) अनड्वान् । इति हेमचन्द्रः ॥

शाक्तः, त्रि, शक्तिर्देवता अस्य । (शक्ति+“सास्य देवता ।” ४।२।२४ । इत्यण् ।) शक्त्युपासकः । अस्य प्रशंसा यथा,—
“स्वर्गे मर्त्त्ये च पाताले नास्ति शाक्तात् परः प्रियः ।
सौराणां गाणपत्यानां वैष्णवानां तथैव च ॥
तदन्ते चैव शाक्ताः स्युः क्रमशः क्रमशः प्रिये ।
शृणु देवि वरारोहे नास्ति शाक्तात् परो जनः ॥
शाक्तोऽपि शङ्करः साक्षात् परं ब्रह्मस्वरूपभाक् ।
आराधिता येन काली तारा त्रिभुवनेश्वरी ॥
षोड़शी चैव मातङ्गी छिन्ना च वगलामुखी ।
आराधिता महेशानि स शिवो नात्र संशयः ॥
अतिगोप्यं महेशानि शाक्तानां परमं पदम् ।
यो जानाति महीमध्ये स शिवो नात्र संशयः ॥
ब्रह्माद्यर्च्चितपादाब्जं यो भजेत् सततं मुदा ।
स यात्यचिरकालेन मुक्तिमन्दिरमेव हि ॥
पार्व्वतीचरणद्वन्द्वभजनाकिङ्करो भवेत् ।
स्वर्गभोगश्च मोक्षश्च शाक्तानां न भवेत् किमु ॥
शाक्तानाञ्चैव निन्दां ये कुर्व्वन्ति हि नराधमाः ।
तेषां लोहितपानं वै कुर्व्वन्ति भैरवीगणाः ॥
भैरवाश्चैव भैरव्यः सदा हिंसन्ति पामरान् ।
शाक्तान् हिंसन्ति गर्ज्जन्ति निन्दन्ति बहुजल्पकाः ॥
छिनत्ति तेषां देवेशि शिरांसि हरवल्लभा ।
शाक्तेभ्य उत्तमो नास्ति स्वर्गे मर्त्त्ये रसातले ॥
शाक्तस्तु शङ्करो ज्ञेयस्त्रिनेत्रश्चन्द्रशेखरः ।
स्वयं गङ्गाधरो भूत्वा विहरेत् क्षितिमण्डले ॥”
देवीं प्रति शिववाक्यम् ।
“मदंशाश्चैव ये भूतास्ते शैवा नात्र संशयः ।
त्वदंशाश्चैव शाक्ताश्च सत्यं वै गिरिनन्दिनि ।
बहुवर्षसहस्रान्ते शैवाः शक्तिपरायणाः ।
शाक्ता वै शङ्करा देवि यस्य कस्य कुलोद्भवाः ॥
चाण्डाला ब्राह्मणाः शूद्राः क्षत्त्रिया वैश्यसम्भवाः ।

एते शाक्ता जगद्धात्रि न मनुष्याः कदाचन ॥
पश्यन्ति मानुषान् लोके केवलं कर्म्मचक्षुषा ।
ब्राह्मणैः क्षत्त्रियैर्वैश्यैः शूद्रैरेव च जातिभिः ॥
वाममार्गप्रभावेण कर्त्तव्यं जपपूजनम् ।
ये शाक्ता ब्राह्मणा देवि क्षत्त्रिया ब्राह्मणाः स्मृताः ॥
वैश्याश्च ब्राह्मणा देवि सर्व्वे शूद्राश्च ब्राह्मणाः ।
ब्राह्मणाः शङ्कराश्चापि विनिश्चायन्ति शेखराः ॥"
इति मुण्डमालातन्त्रे २।३।४।७ पटलाः ॥*॥
"शाक्ता एव द्विजाः सर्व्वे न शैवा न च वैष्णवाः ।
उपासन्ते यतो देवीं गायत्रीं परमाक्षरीम् ॥"
इति निर्व्वाणतन्त्रे ३ पटलः ॥
शक्त्युपासनानन्तरमन्योपासननिषेधो यथा,—
"अम्यायाराधनं कृत्वा नान्यस्याराधनं चरेत् ।
अन्यस्य स्मरणाद्देवि योगिनीशापमालभेत् ॥"
इति गन्धर्व्वतन्त्रे २ पटलः ॥*॥
तस्य बाह्यान्तरस्नानं यथा,—
"शाक्तस्याभ्यन्तरस्नानमुक्तं श्रीपद्मलोचने ।
स्नानप्रकारो द्विविधो बाह्याभ्यन्तरभेदतः ॥
आन्तरं स्नानमत्यन्तं रहस्यमपि सादरात् ।
कथयामि भयध्वस्त्यै चतुर्व्वर्गफलाप्तये ॥
मस्तिष्कमनुस्मृत्य चरणद्वयमध्यतः ।
अशक्यं सच्चिदानन्दप्रभावं भावगोचरम् ॥
त्रिमुक्तिसाधनं पुंसां स्मरणादेव योगिनाम् ।
तेन प्लावितमात्मानं भावयेत् भयशान्तये ॥"
इति विश्वसारतन्त्रे २ पटलः ॥*॥
तस्य कुशविशेषो यथा,—
"सर्व्वेन्या रजतं धार्य्यं स्वर्णं धार्य्यमनामया ।
एष एव कुशः शाक्ते न दर्भो वनसम्भवः ॥"
इति श्यामारहस्यम् ॥
(शक्तिमान् । यथा, ऋग्वेदे । ७ । १०३ । ५ ।
"यच्छाक्तस्येव वदति शिक्षमाणः ॥"
"शिक्षमाणः शिक्ष्यमाणः शिष्यः शाक्तस्येव शक्तिमतः शिक्षकस्य वाचं यथा अनुवदति तद्वत् ।" इति तद्भाष्ये सायणः ॥)
शाक्तीक, पुं, (शक्तिः प्रहरणमस्य । शक्ति + "शक्तियष्ट्योरीकक् ।" ४।४।५९। इति ईकक् ।) शक्तिधारकः । तत्पर्य्यायः । शाक्तीकः २ ।
इत्यमरः ॥
शाक्रः, त्रि, शक्रसम्बन्धकः । इति शक्तिसम्बन्धात् व्याकरणेन निष्पन्नम् ॥
शाक्यः, पुं, (शकोऽभिजनमस्येति । शक + "शण्डिकादिभ्यो ञ्यः ।" ४।३।९२। इति ञ्यः ।) बुद्धः । इति हलायुधः ॥
शाक्यमुनि, पुं, शाक्यवंशावतीर्णबुद्धमुनिविशेषः । इत्यमरः ॥ अस्य सप्त पर्य्याया गौतमशब्दे द्रष्टव्याः । पर्य्यायान्तरं यथा । सर्व्वार्थसिद्धः २ श्वेतकेतुः ३ अर्हत्केतुः ४ महामुनिः ५ पञ्चज्ञानः ६ अर्कदर्शी ७ महाबोधिः ८ महाबलः ९ दशबलः १० त्रिमूर्त्तिः ११ सिद्धार्थः १२ मङ्गलः १३ । इति शब्दरत्नावली ॥ शाक्यवंशत्वात् शाक्यः शाक्यवंशी मुनिर्येति शाक्यमुनिः । तथा हि शाको वृक्षविशेषः तत्र भवा विद्यमानाः शाक्याः । पितुः शापेन केचिदिक्ष्वाकुवंश्या गौतमवंशजकपिलमुनेराश्रमे शाकवृक्षे कृतवासाश्च शाक्या उच्यन्ते । तदुक्तम् ।
"शाकवृक्षप्रतिच्छन्नं वासं यस्मात् प्रचक्रिरे ।
तस्मादिक्ष्वाकुवंश्यास्ते भुवि शाक्या इति श्रुताः ॥"
इत्यमरटीकायां भरतः ॥
शाक्यसिंहः, पुं, (शाक्यः सिंह इव ।) शाक्यमुनिः । इत्यमरः ॥
शाक्री, स्त्री, दुर्गा । यथा,—
"इन्द्राणी इन्द्रजननी शाक्री शक्रपराक्रमा ।
यस्माच्छक्रकरा देवी तस्मात्तेनोपगीयते ॥"
इति देवीपुराणे देवीनिरुक्ताध्यायः ॥
शक्रपत्नी च ॥
शाख, ऋ व्याप्तौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) ऋ, अशशाखत् । इति दुर्गादासः ।
शाखः, पुं, कृत्तिकापुत्त्रः । यथा,—
"अवाप चानिलात् पुत्त्रमग्नितुल्यगुणं पुनः ।
अग्निपुत्त्रः कुमारस्तु शरस्तम्बे व्यजायत ॥
तस्य शाखो विशाखश्च नैगमेयश्च पृष्ठजः ।
अपत्यं कृत्तिकानाञ्च कार्त्तिकेयस्ततः स्मृतः ॥"
इति मात्स्ये ५ अध्यायः ॥
चित्तिः । इति शब्दचन्द्रिका ॥
शाखा, स्त्री, (शाखति गगनं व्याप्नोतीति । शाख + अच् । टाप् ।) वृक्षाङ्गविशेषः । डाल इति भाषा । (यथा, दुर्गापूजापद्धतौ ।
"शाखाच्छेदोद्भवं दुःखं न च कार्य्यं त्वया प्रभो ! ॥")
तत्पर्य्यायः । लता २ । इत्यमरः ॥ लहा ३ । इति जटाधरः । शिखा ४ । इति भरतधृतमेदिनी ॥ पक्षान्तरम् । बाहुः । वेदभागः । इति मेदिनी ॥ (यथा, मनौ । ३ । १४५ ।
"यत्नेन भोजयेच्छ्राद्धे बह्वृचं वेदपारगम् ।
शाखान्तगमथाध्वर्य्युं छन्दोगन्तु समाप्तिकम् ॥")
ग्रन्थभेदः । इति धरणिः ॥ अन्तिकः । इति विश्वः ॥ (प्रकारः । यथा, गीतायाम् । २ । ४१ ।
"बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम् ॥")
शाखाकण्टः, पुं, (शाखायां कण्टो यस्य ।) स्नुहीवृक्षः । इति राजनिर्घण्टः ॥
शाखानगरं, क्ली, (शाखेव नगरम् ।) मूलनगरादन्यत् पुरम् । इत्यमरः ॥ (यथा, महाभारते । १२ । ८७ । ८ ।
"शाखानगरमर्हन्तु सहस्रपतिरुत्तमः ॥")
मूलनगरेऽसम्मितस्य जनौघस्य स्थानाय मूलनगरस्य समीपेऽन्यत्र वा यदन्यत् पुरं नगरान्तरं क्रियते तत् शाखानगरं मूलनगरस्य तरुस्थानीयस्य शाखेव । अभिष्यन्दि रमणमप्यत्र । स्यादभिष्यन्दि रमणं शाखानगरमित्यपि । इति त्रिकाण्डशेषः । इति तट्टीकायां भरतः ॥ अपि च । यथा, शब्दरत्नावल्याम् ।
"आरभ्य मूलनगरादपरं नगरं हि यत् ।
तदभिष्यन्दि रमणं शाखानगरमित्यपि ॥"
शाखापित्तः, पुं, पाणिपादाङ्गमूलदाहः । इति राजनिर्घण्टः ॥
शाखापुरं, क्ली, (पुरस्य शाखा अभिधानात् पूर्व्वनिपातः । शाखेव पुरमिति वा ।) शाखानगरम् । तत्पर्य्यायः । उपपुरम् २ । इति
शाखाम्ला, स्त्री, (शाखायामम्ला यस्याः ।) वृक्षाम्ला । इति राजनिर्घण्टः ॥
शाखामृगः, पुं, (शाखाया मृग ।) वानरः । इत्यमरः ॥ (यथा,—
"मुक्ताफलाय करिणं हरिणं पलाय
सिंहं निहन्ति भुजविक्रमसूचनाय ।
का नीतिरीतिरियती रघुवंशवीर !
शाखामृगो जरति यस्तव बाणमोक्ष ॥"
इत्युद्भटः ।)
शाखारण्डः, पुं, स्वशाखां ... ध्ययनकर्त्ता । तत्पर्य्यायः । अन्यशाखकः २ । इति हेमचन्द्रः ॥
शाखारथ्या, स्त्री, षोडशहस्तप्रस्थपथः । यथा,—
"धनूंषि चैव चत्वारि शाखारथ्यास्तु निर्म्मिताः ।
त्रिकराश्चोपरथ्यास्तु द्विकराश्चुपरथ्यकाः ॥"
इति देवीपुराणे गोपुरद्वारलक्षणनामाध्यायः ॥
शाखालः, पु, (शाखां लाति आश्रयतीति ला + कः ।) वानीरवृक्षः । इति राजनिर्घण्टः ॥
शाखाशिफा, स्त्री, (शाखायाः शिफा ।) वटादीनां शाखासम्बन्धिशिफा । नाम्ना इति ख्याता । तरोर्मूलादारभ्य अग्रं यावत् लतागुडूच्यादिः । इति भरतः ॥ तत्पर्य्यायः । अवरोहः २ । इत्यमरः ॥
शाखी, [न्] पुं, (शाखाऽस्त्यस्येति । शाखा + इनिः ।) वृक्षः । इत्यमरः ॥ (यथा,—
"सीताया हृदि यच्छिरीषकुसुमप्राये वसद्वर्द्धितं
पौलस्त्यस्य नितान्तकुण्ठकुलिशे वक्षःस्थले वर्द्धितम् ।
आपुङ्खं निममज्ज मन्मथशरस्तत्रैव
कः शाखी सखि ! यस्य पुष्पमभवत् ... स्यायुधम् ।"
इत्युद्भटः ।)
वेदः । तुरुष्कास्यजनः । इति मेदिनी ॥ राजभेदः । इति हेमचन्द्रः ॥
शाखोटः, पुं, वृक्षविशेषः । स्याओडा इति भाषा ॥ तत्पर्य्यायः । पिशाचद्रुः २ खरफलः ३ कर्कशच्छदः ४ । इति त्रिकाण्डशेषः ॥ भूतवृक्षः ५ सकटः ६ अक्षधरः ७ । इति भूरिप्रयोगः ॥ गवाक्षी ८ घूकावासः ९ वृक्षपत्रः १० पीतः ११ कैशिकीजः १२ धीरनाशनः १३ । अस्य गुणाः । तिक्तत्वम् । उष्णत्वम् । पित्तकारित्वम् । वातहारित्वम् । इति राजनिर्घण्टः ॥ अपि च ।
"शाखोटः पीतफलकी भूतावासः खरच्छद

ह्नोटी रक्तपित्तार्शोवातश्लेष्मातिसारजित् ॥"
इति भावप्रकाशः ॥
यः, त्रि, शाखासम्बन्धी । शाखाशब्दात्
प्रत्ययेन निष्पन्नमेतत् ॥
रं, क्ली, (शक्कर+अण् ।) छन्दोभेदः । इति
दिनी ॥ अस्य रूपान्तरं शाक्करं शाकरञ्च ॥
क्करी देवतास्य इत्यर्थे अणि आर्द्रानक्षत्रम् ।
था, हहत्संहितायाम् । ७१ । ७ ।
र्शे तु मूषकाद्यं व्यसुत्वमेव शाक्करे ॥")
रः, पुं, (शक्करस्यायं वाहनत्वात् । शक्कर+
ण् ।) वलीवर्द्दः । इति मेदिनी ॥ (शक्कर-
म्बन्धिनि, त्रि । यथा, कथासरित्सागरे ।
६ । २०१ ।
वैषां तद्गुहाद्वारप्रासानां शाक्करा
गणाः ॥")
रिः, पुं, शक्करस्यापत्यं पुमान् । शक्कर+
ञ् ।) कार्त्तिकेयः । गणेशः । इति मेदिनी ॥
चौ, स्त्री, शङ्खोचनमत्स्यः । इति शब्द-
रत्नावली ॥
ः, त्रि, शङ्खसम्बन्धि । शङ्खशब्दात् अण्प्रत्य-
न निष्पन्नमेतत् ॥
हिकः, पुं, (शङ्खकरणं शिल्पमस्य इति । शङ्ख
-ठक् ।) जातिविशेषः । शाँखारि इति
षा । तत्पर्यायः । काम्बविकः २ । इत्यमरः ॥
ङ्खकारः ३ काम्बजकः ४ । इति शब्दरत्ना-
ली ॥ शङ्खवादकः । तत्पर्यायः । शङ्खध्मः २ ।
ति जटाधरः ॥
ठा, स्त्री, गुण्ठा । इति रत्नमाला ॥
टः, पुं, वस्त्रभेदः । इत्यमरभरतौ ॥ यथा,—
दूरतः शोभते मूर्खो लम्बशाटपटावृतः ।
तावच्च शोभते मूर्खो यावत् किञ्चिन्न भाषते ॥"
इति चाणक्यशतकम् ॥
टकः, पुं क्ली, (शाट+स्वार्थे कन् ।) पटः ।
यथा, कथासरित्सागरे । ५३ । ३८ ।
"स राजवन्दिनामा तद्दत्त्वा शाटकमग्रहीत्॥")
नाटकभेदः । इत्यमरभरतौ ॥
टिका, स्त्री, शाटी । इत्यमरटीकायां भरतः॥
टी, पुं स्त्री, वस्त्रभेदः । शाड़ी इति भाषा ।
इत्यमरः ॥ अस्या निर्माल्यत्वं निर्माल्यशब्दे
द्रष्टव्यम् ॥
ट्यायनं, क्ली, प्रकृतकर्म्मवैगुण्यप्रशमनार्थहोमः ।
यथा । यत्तु प्रकृतकर्म्मवैगुण्यप्रशमनाय शाट्या-
यनहोमाभिधानं भवदेवभट्टसम्मतं तन्न प्रामा-
णिकं तथादपि महाप्रामाणिकैर्भट्टनारायण-
चरणैर्गोभिलभाष्ये तदप्रमाणीकृतत्वात् ।
छन्दोगपरिशिष्टेऽपि प्रायश्चित्तार्थं प्रकारत्रय-
मात्रमुक्तम् । यथा,—
"यत्र व्याहृतिभिर्होमः प्रायश्चित्तात्मको भवेत् ।
चतस्रस्तत्र विज्ञेयाः स्त्रीपाणिग्रहणे यथा ॥
अपि वाज्ञातमित्येषा प्राजापत्यापि वाहुतिः ।
होतव्या त्रिविकल्पोऽयं प्रायश्चित्तविधिः
स्मृतः ॥"

त्रिविकल्प इत्यनेन कल्पान्तरनिषेधात् गोभि-
लीयकर्म्मणि शाट्यायनहोमो न युक्तः । किन्तु
व्यस्तसमस्तमहाव्याहृतिभिश्चतसृभिः प्राय-
श्चित्तहोमो युक्तः । त्रिशारदप्रभृतयोऽप्येवम् ।
शाट्यायनहोमस्य समूलत्वेऽपि शाख्यन्तरीय-
त्वम् । इति तिथ्यादितत्त्वम् ॥
शाट्यायनः, पुं, मुनिविशेषः । इति पुराणम् ॥
शाठ्यं, क्ली, (शठस्य भावः । शठ+ष्यञ् ।)
शठता । (यथा । "शठे शाठ्यं समाचरेत् ॥")
तत्पर्य्यायः । कपटः २ व्याजः ३ दम्भः ४
उपधिः ५ छद्म ६ कैतवम् ७ कुसृतिः ८
निकृतिः ९ । इत्यमरः ॥ नय अयथार्थ-
व्यवहारे । शठ वधे क्लेशकैतवे तालव्यादिः
अल् तस्य कर्म्म शाठ्यं ष्यञः । कपटादि-
पटकं छद्मनि कुसृत्यादित्रयं चित्तकौटिल्ये
इत्येके । कपटादिपटकं वञ्चनमात्रफलम् ।
कुसृत्यादित्रिकन्तु हिंसाफलमिति भेदः । इति
सर्व्वानन्दो मधुश्च । नवैवैकार्था इति बहवः ।
इति भरतः ॥ अपि च ।
"अस्त्रियां कपटो व्याज उपधिर्दम्भ एव च ।
कूटं कल्कं छलं छद्म मिषकैरवकैतवम् ॥
अथ शाठ्यञ्च शठता कुसृतिर्निकृतिश्च सा ।
हिंसाफले चतुष्कं स्यात् शाठ्यपर्य्याय ईरितः॥
पूर्व्वः कपटपर्य्यायः फले वञ्चनमात्रके ।
उभयोरेकपर्य्याय इति केचित् प्रचक्षते ॥"
इति शब्दरत्नावली ॥
शाड, ऋ ङ श्लाघे । इति कविकल्पद्रुमः ॥(भ्वा०
आत्म०-सक०-सेट् ।) ऋ, अशशाड़त् । ङ,
शाड़ते गुणिनं गुणी । अन्तःस्थतृतीय-
युक्तादिरयमिति कस्यचिद्भ्रमः । इति दुर्गा-
दासः ॥
शाड्वलः, पुं, शाद्वलः । इति केचित् ॥
शाणं, क्ली, (शणेन निर्म्मितमिति । शण+अण् ।)
शणनिर्म्मितवस्त्रम् । यथा । क्षौमं शाणं वा
ब्राह्मणस्य कार्पासं क्षत्त्रियस्य आविकं वैश्यस्य ।
क्षुमा अतसी तस्या इदं क्षौमं तसरादि ।
शाणं शणतन्तुभवं तदुभयं ब्राह्मणस्य । इति
संस्कारतत्त्वम् ॥
शाणः, पुं, (शण्यते श्रायते गुणादिरत्रेति ।
शण+घञ् ।) कषपट्टिका । कष्टिपाथर इति
भाषा । तत्पर्य्यायः । निकषः २ कषः ३ । इत्य-
मरः ॥ शानः ४ निकसः ५ कसः ६ । इति
भरतः ॥ शाकपः ७ । इति शब्दरत्नावली ॥
माषचतुष्टयम् । चारि मासा इति भाषा ॥
तत्पर्य्यायः । निष्कः २ टङ्कः ३ । इति वैद्यक-
परिभाषा । यथा,—
"माषैश्चतुर्भिः शाणः स्यात् धरणः स निगद्यते ।
टङ्कः स एव कथितस्तद्द्वयं कोल उच्यते ॥"
इति भावप्रकाशः ॥
लौहादीनां निकषः । शानपाथरः इति भाषा ।
इति मेदिनी ॥ करपत्रम् । करात् इति भाषा !
इति विश्वः ॥

शाणाजीवः, पुं, (शाणेन आजीवतीति । आ+
जीव+अच् ।) अस्त्रमार्जकः । यथा,—
"शाणाजीवः शस्त्रमार्जो भ्रमासक्तोऽसिधा-
वकः ॥"
इति हेमचन्द्रः ॥
शाणिः, पुं, पट्टहस्तः । यथा,—
"पट्टे राजगणः शाणिश्चिसिः ककुद्यटपद्यकः ॥"
इति शब्दमाला ॥
शाणितः, त्रि, तीक्ष्णीकृतः । निशितः । शतस्याणः
शाणशब्दादितप्रत्ययेन निष्पन्नमेतत् ॥
शाणी, स्त्री, (शणस्य विकारः । शण+अण् ।
टिड्ढेति ङीप् ।) शणसूत्रमयी पट्टिका ।
यथा,—
"शाणीप्रायाणि वस्त्राणि शमीप्राया महो-
रुहाः ।
शूद्रप्रायास्तथा वर्णा भविष्यन्ति कलौ युगे ॥"
इति विष्णुपुराणे ६ अंशे १ अध्यायः ॥
शाणी शणसूत्रमयी पट्टिका तत्तुल्यानि
वस्त्राणि । इति तट्टीका ॥ (यथा, महाभारते ।
३ । १९४ । १९ ।
"वस्त्राणां प्रवरा शाणी धान्यानां कोर-
दूषकः ॥")
प्रावरणान्तरम् । ताम्बु इति भाषा । इति
मेदिनी ॥ छिद्रवस्त्रम् । यथा । शाणी गोणी
छिद्रवस्त्रे । इति हेमचन्द्रः ॥ हस्तकटाक्षादि-
सूचना । इशारा इति पारस्यभाषा । इति
शब्दरत्नावली ॥
शाणीरं, क्ली, शोणनदमध्यस्थतटः । दर्द्दरीनदी-
तटः । इति विश्वः ॥
शाण्डिल्यः, पुं, विल्ववृक्षः । इत्यमरः ॥ (यथा,
महागणपतिस्तोत्रे । ९ ।
"हेरम्बं प्रणमामि यस्य पुरतः शाण्डिल्यमूले
श्रिया
बिभ्रत्याम्बुरुहे समं मधुरिपुस्ते शङ्खचक्रे
वहन् ॥")
वह्निभेदः । (शण्डिलस्य मुनेर्गोत्रापत्यमिति ।
शण्डिल+"गर्गादिभ्यो यञ् ।" ४ । १ । १०५ ।
इति यञ् ।) मुनिविशेषः । इति मेदिनी ॥
स तु गोत्रकारः भक्तिसूत्रकारश्च । तत्सूत्र-
भाष्याद्यश्लोको यथा,—
"प्रपद्य परमं देवं श्रीस्वप्नेश्वरसूरिणा ।
शाण्डिल्यशतसूत्रीयं भाष्यमाभाष्यतेऽधुना ॥"
शातं, क्ली, (शो+क्तः "शाच्छोरन्यतरस्याम् ।"
७ । ४ । ४१ । इति पक्षे इत्वाभावः ।) सुखम् ।
तद्वति, त्रि । इत्यमरः ॥ (विनाशः । यथा,
सुश्रुते । ४ । १ ।
"पाणिप्रासं पाणिदाहं नखशातं करोति च ॥")
शातः त्रि, (शो+क्तः दुर्व्वलः ।) निशितः ।
इति मेदिनी ॥ धुस्तूरः इत्यमरः ॥
शातकुम्भं, क्ली, (शातकुम्भे पर्व्वते भवम् । शात-
कुम्भ+अण् ।) काञ्चनम् । (यथा, माघे ।
८ । ८ ।

"दूरगतेनकुम्भनिमग्नसुमती
वपुरङ्कमनङ्गुरः पर्वति ॥")
भूसुरः। इत्यमरः ॥
शातकुम्भः पुं, करवीरवृक्षः। इति मेदिनी ॥
शातकौम्भं, क्ली, स्वर्णम्। इति भरतद्विरूपकोषः॥
(सुवर्णनिर्म्मिते, त्रि। यथा, रामायणे। २।
९।११।
"तत्र शातकौम्भानां कुम्भानामभिवर्षमाणम्")
शातनं, क्ली, शातनम्। विनाशनम्। यथा,—
"स्वर्णं मर्त्त्यस्य शातनं पद्मशातनम्।
श्रीदमाशाय तिष्ठन्ति यथा कपिशमालिनः ॥"
इति सारमञ्जरी ॥
(शेः श्री, त्रि। यथा, रघुः। ३।४२।
"स पूर्वतः पर्वतपक्षशातनं
ददर्श देवं नरदेवसम्भवः ॥")
शातपत्रक, पुं, (शातयत् पत्रमिव। कन्।)
चन्द्रकान्तः। यथा,—
"चन्द्रिका कौमुदी ज्योत्स्ना प्रकाशो द्योत
आतपः।
चन्द्रिका चन्द्रिकादाय प्रकाशे शातपत्रकः॥"
इति शब्दचन्द्रिका॥
शातभीरुः, पुं, मल्लिकाभेदः। मल्लिकाभेदः।
यथा,—
"शातभीरुर्मदयन्ती भूमिमल्लीस्वमल्लिका॥"
इति रत्नमाला॥
शातमानं, त्रि, (शतमान+"शतमानविंशति-
कैन।" ५।१।२७। इति अण्।) शत-
मानेन क्रीतम्। इति सिद्धान्तकौमुदी॥
शातला, स्त्री, (शातं छेदं लातीति ला+कः।)
[illegible]। [illegible] इति ख्याता। इत्यमर-
टीकायां भरतः॥
शात्रवः, पुं, (शत्रोर्भावः समूहो वा। शत्रु+
अण्।) शत्रुभावः। शत्रुसमूहः। इति
मेदिनी॥ (शत्रुसम्बन्धिनि, त्रि। यथा, रघुः।
४।४४।
"[illegible] [illegible]।
[illegible] [illegible] ॥")
[illegible] (शत्रु। स्वार्थे अण्।) शत्रुः।
[illegible] (यथा, माघे। १४।४४।
"[illegible]
[illegible] ॥")
[illegible]

"शाद्वलेषु यदा शिश्ये वनान्ते वनगोचरा।
कुथास्तरणयुक्तेषु किं स्यात् सुखतरं ततः ॥")
शान, अ तेजे। इति कविकल्पद्रुमः॥ (भ्वा०-
उभ०-सक०-सेट्।) शानस्तीक्ष्णीकरणम्।
अ, शीशांमति शीशांसते खड्गं कर्म्मकारः।
इति दुर्गादासः॥
शानः, पुं, शाणः। इत्यमरटीकायां भरतः॥
शा(ष)नपादः, पुं, पारिपात्रपर्वतः। (अस्य
विवरणं हरिवंशे १३१ अध्याये द्रष्टव्यम्॥)
चन्दनघर्षणपाषाणः। इति महाभारते हरि-
वंशः॥ चन्दनपिढ़ि इति भाषा॥
शानी, स्त्री, इन्द्रवारुणी। इति शब्दचन्द्रिका॥
शान्तः, त्रि, (शम+क्तः। "वा दान्तशान्तेति।"
७।२।२७। इति निपातितः।) उपशमं
प्रापितः। शमोपगमः। इति भरतः॥ तत्-
पर्य्यायः। शमितः २। इत्यमरः॥ श्रान्तः ३
जितेन्द्रियः ४। इति हेमचन्द्रः॥ शमान्वितः ५।
इति मेदिनी॥
शान्तः, पुं, अभियुक्तः। रसभेदः। इति मेदिनी॥
शान्तरसस्य लक्षणादि यथा,—
"शान्तः शमः स्थायिभाव उत्तमप्रकृतिर्मतः।
कुन्देन्दुसुन्दरच्छायः श्रीनारायणदेवतः॥
अनित्यत्वादिनाशेषवस्तुनिःसारता तु या।
परमार्थस्वरूपं वा तस्यालम्बनमिष्यते॥
पुण्याश्रमहरिक्षेत्रतीर्थरम्यवनादयः।
महापुरुषसङ्गाद्यास्तस्योद्दीपनरूपिणः॥
रोमाञ्चाद्याश्चानुभावास्तथा स्युर्व्यभिचारिणः।
निर्वेदहर्षस्मरणमतिभूतदयादयः॥"
यथा,—
"रथ्यान्तश्चरतस्तथा धृतजरत्कन्थालवस्या-
ध्वगैः
सत्रासञ्च सकौतुकञ्च सदयं दृष्टस्य तैर्नागरैः।
निर्व्याजीकृतचित्सुधारसमुदा निद्रायमाणस्य
मे
निःशङ्कं करटः कदा करपुटीभिक्षां विलुण्ठि-
ष्यति॥"
वृष्टिस्तु महाभारतादौ द्रष्टव्या।
"निरहङ्काररूपत्वात् दयावीरादिरेष नो।"
दयावीरादौ हि जीमूतवाहनादौ अन्तरा
मलयवत्याद्यनुरागादेरन्ते च विद्याधरचक्र-
वर्त्तित्वाद्याप्तेर्दर्शनादहङ्कारोपशमो न दृश्यते।
शान्तस्तु सर्व्वप्रकारेणाहङ्कारप्रशमैकरूपत्वात्
तत्रान्तर्भावमर्हति। अतश्च नागानन्दे शान्त-
रसस्याप्रधान्यमपास्तम्। ननु।
"न यत्र दुःखं न सुखं न चिन्ता
न द्वेषरागौ न च काचिदिच्छा।
रसः स शान्तः कथितो मुनीन्द्रैः
सर्व्वेषु भावेषु शमप्रधानः॥"
इत्येवंरूपस्य शान्तस्य मोक्षावस्थायामेवात्म-
स्वरूपापत्तिलक्षणायां प्रादुर्भावात्। तत्र
सञ्चार्य्यादीनामभावात् कथं रसत्वमित्युच्यते
युक्तवियुक्तदशायामवस्थितो यः शमः स एव

यतः रसतामेति तदस्मिन् सञ्चार्य्या-
न विरुद्धाः। यथास्मिन् [illegible]
वैषयिकसुखपरत्वान्न विरोधः।
"यच्च कामसुखं लोके यच्च दिव्यं
तृष्णाक्षयसुखस्यैते नार्हतः षोड
सर्व्वाकारमहङ्काररहितत्वं व्रजन्ति
अन्तर्भावमर्हन्ति दयावीरादय
आदिशब्दात् [illegible]
रतिप्रभृतयः। तत्र देवताविषया
"कदा वाराणस्यामिह सुरधुनी
वसानः कौपीनं शिरसि नि[illegible]
अयि गौरीनाथ त्रिपुरहर शम्भो
प्रसीदेति क्रोशन्निमिषमिव नेष्यामि
इति साहित्यदर्पणे
शान्तं, [मृ] व्य वारणम्। इति मे
शान्तनवः, पुं, (शान्तनोरपत्यं पुमान्
अण्।) शान्तनुराजपुत्रः। भी
त्रिकाण्डशेषः॥ (यथा, महाभार
८०।
"तथा भीष्मः शान्तनवो गङ्गायां
वसुवीर्य्यात् समभवत् महावीर्य्यः
शान्तनुः, पुं, द्वापरयुगस्य चन्द्रवंशीय
राजः। स तु गङ्गायां भीष्मं जनया
पिता प्रदिपः। यथा,—
"जयसेनस्तत्तनयो राधिकोऽतोऽ
ततयाक्रोधनस्तस्मात् देवातिथि
ऋक्षस्तस्य दिलीपोऽभूत् प्रतीपस्त
देवापिः शान्तनुस्तस्य बाह्लीक इति
यं यं कराभ्यां स्पृशति जीर्णं यौवनं
शान्तिमाप्नोति चैवाग्र्यां कर्म्मणा
बाह्लीकात् सोमदत्तोऽभूत् भूरिभूरि
शन्तनु शान्तनोरासीत् गङ्गायां भीष्म
इति श्रीभागवते ९ स्कन्धे २२ अ
तत्पर्य्यायः। महाभीष्म २। इति श
प्रातीपः ३ इति त्रिकाण्डशेष
प्रतिपः ५। इति शब्दरत्नावली॥ (
रिति पाठस्तु बहुभिराहृत।) श
रत्नमाला॥
शान्ता, स्त्री, दशरथराजकन्या। दशर
लोमपादाय राज्ञे प्रदत्ता। सा च
भार्य्या। इति रामायणम्॥ (हर
चरिते १ अङ्के।
"कन्यां दशरथो राजा शान्तां नाम
[illegible]
अपत्यकृतिकां राज्ञे लोमपादाय द
शमीभेदः। तत्पर्य्यायः। शमा २ दु
राज्ञिता ४ जया ५ विजया ६। दू
शमीवत्। इति राजनिर्घण्टः॥
शान्तिः, स्त्री, (शम+क्तिन्।) शान्ति
प्रशमः। चित्तोपशमः। इति भरत।

इन्द्रियोपरमः। इति चण्डिटीकायां नागोजी-भट्टः ॥ तत्पर्य्यायः। शमथः २ शमः ३। इत्यमरः॥ प्रशमः ४ उपशमः ५ प्रशान्तिः ६। इति शब्दरत्नावली ॥ क्षमाश्रयः ७। इति हेमचन्द्रः ॥ तल्लक्षणं यथा,—

"यत्किञ्चिदस्तु संप्राप्य स्वल्पं वा यदि वा बहु।
या तुष्टिर्जायते चित्ते शान्तिः सा गद्यते बुधैः॥"

इति पद्मपुराणे क्रियायोगसारे १५ अध्यायः ॥ भद्रम्। इति हेमचन्द्रः ॥ गोपीविशेषः। यथा,

राधिकोवाच।

"शान्त्या गोप्या युतस्त्वञ्च दृष्टोऽहं रासमण्डले।
वसन्तपुष्पशय्यायां माल्यवान् चन्दनोक्षितः ॥
रत्नप्रदीपयुक्तश्च रत्ननिर्म्माणमन्दिरे।
रत्नभूषितभूषाढ्यो रत्नभूषितया सह ॥
तया दत्तञ्च ताम्बूलं भुक्तवांश्च पुरा विभो।
सद्यो मच्छब्दमाकर्ण्य तिरोधानं कृतं तया ॥
शान्तिर्देहं परित्यज्य भयाद्दीना त्वयि प्रभो।
ततस्तस्याः शरीरञ्च गुणश्रेष्ठं बभूव ह ॥
संविभज्य त्वया दत्तं प्रेम्णा प्रबदता पुरा।
विश्वे विषयिणि किञ्चित् सत्त्वरूपाय विष्णवे॥
शुद्धसत्त्वस्वरूपायै महालक्ष्म्यै पुरा विभो।
त्वन्मन्त्रोपासकेभ्यश्च वैष्णवेभ्यश्च किञ्चन।
तपस्विभ्यश्च धर्म्माय धर्म्मिष्ठेभ्यश्च किञ्चन ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ८ अध्यायः॥*॥ दुर्गा यथा,—

"उत्पत्तिस्थितिनाशेषु रजादित्रिगुणा मता।
सर्व्वथा सर्व्ववेत्तृत्वाच्छान्तित्वाच्छान्तिरुच्यते॥"

इति देवीपुराणे देवीनिरुक्ताध्यायः ॥*॥ धर्म्मद्वारा ग्रहदौःस्थ्यदुःस्वप्नादिसूचितैहिका-निष्टहेतुदुरितनिवृत्तिः। यथा,—

"यथा शस्त्रप्रहाराणां कवचं विनिवारकम्।
तथा दैवोपघातानां शान्तिर्भवति वारणम्॥"

बालग्रहभूतग्रहनराधिपप्रबलतरशत्रुदुःसह-रोगाभिभवाद्भुतदुःस्वप्नग्रहदौःस्थ्यादिनिमित्तकं शान्तिकर्म्मापि मलमासे कर्त्तव्यम्। शुद्धकाल-प्रतीक्षायामसहत्वे नानन्यगतिकत्वात्। अत-एवात्मानं सततं गोपायीत इति श्रुतौ सतत-मित्युक्तम्। इति मलमासतत्त्वम् ॥ * ॥ उप-सर्गशान्तिगाथा यथा,—

"एषामिन्द्रो महावीर्य्यस्त्रैलोक्यस्येश्वरोऽभवत्।
शतं क्रतूनामाहृत्य सुशान्तिर्नाम नामतः ॥
तस्योपसर्गनाशाय नामाक्षरविभूषिता।
अद्यापि मानवैर्गाथा गीयतेऽत्र महीतले ॥
सशान्तिर्देवराट् शान्तः सुशान्तिं न प्रयच्छति।
सहितः शिवसत्याद्यैस्तथैव वशवर्त्तिभिः ॥"

इति मार्कण्डेयपुराणे उत्तममन्वन्तरसमाप्ता-ध्यायः ॥*॥

अथाद्भुतशान्तिः। तत्राद्भुतनिरूपणम्। अद्भुतसागरे आथर्व्वणाद्भुतवचनम्। प्रकृति-विरुद्धमद्भुतमापदः प्राक्प्रबोधाय देवा सृज-न्तीति। तेनापज्ज्ञानाय भूम्यादीनां पूर्व-स्वभावप्रच्यवो दैवकर्त्तृकोऽद्भुत इति। एतच्च बुधोदयपर्व्वणि ग्रहादीनां गणितागम्यितत्वेन प्रकृतानामपि यदुत्पातत्वं तन्मतम्। तत्कार-णञ्च गर्गसंहितावार्हस्पत्ययोः।

"अतिलोभादसत्याद्वा नास्तिक्याद्वाप्यधर्म्मतः।
नरापचारान्नियतमुपसर्गः प्रवर्त्तते ॥
ततोऽपचारान्नियतमपवर्ज्जन्ति देवताः।
ताः सृजन्त्यद्भुतांस्तांस्तु दिव्यनाभसभूमिजान्॥
त एव त्रिविधा लोके उत्पाता देवनिर्म्मिताः।
विचरन्ति विनाशाय रूपैः सम्बोधयन्ति च ॥"

तांश्च परं न दर्शयेदित्याह विष्णुः। नोत्पातं दर्शयेदिति। तत्र वेलानक्षत्रमण्डलनिरूपणम् यथा, दीपिकायाम्।

"प्राग्दिविचतुर्भागैर्यूनिशीरद्भुतेषु सर्व्वेषु।
अनिलाग्निशक्रवरुणा मण्डलपतयः शुभा-शुभैश्च ॥"

वेलामण्डलः।

"पर्य्यमृणादिचतुष्कचन्द्रतुरगादित्वेषु वायु-र्भवेत्
देवेज्याजविशाखयाम्ययुगले पित्राह्वये चानलः।
विश्वादित्रयधातृमैत्रयुगलेष्विन्द्रो भवेन्मण्डलः
सर्पापान्त्यशतान्त्यमूलयुगलेशानेष्वपामीश्वरः॥
पवनदहनौ नेष्टौ योगस्तयोरतिदोषदः।
सुरपतिवरुणौ शस्तौ योगस्तयोरतिशोभनः ॥
सवरुणमरुन्मिश्रः शक्रस्तथाग्निसमायुतः।
फलविरहितः सेन्द्रो वायुस्तथाग्नियुतोऽम्बुपः॥
यन्मण्डलेऽद्भुतं जातं शान्तिस्तद्दैवतान्वया।
तथा शान्तिद्वयं कार्य्यं मण्डलद्वयजाद्भुते ॥*"॥

विष्णुधर्म्मोत्तरे।

"ग्रहर्क्षवैकृतं दिव्यं आन्तरीक्षं निबोध मे।
उल्कापातो दिशां दाहः परिवेशस्तथैव च ॥
गन्धर्व्वनगरञ्चैव वृष्टिश्च विकृता तथा।
एवमादीनि लोकेऽस्मिन् नाभसानि विनिर्द्दि-शेत् ॥
चरस्थिरभवं भौमं भूकम्पमपि भूमिजम्।
जलाशयानां वैकृत्यं भौमं तदपि कीर्त्तितम् ॥
भौमं चाल्पफलं ज्ञेयं चिरेण परिपच्यते।
नाभसं मध्यफलदं मध्यकालफलप्रदम्।
दिव्यं तीव्रफलं ज्ञेयं शीघ्रकारी तथैव च ॥*॥
शीतोष्णताविपर्य्यासः ऋतूनां रिपुजं भयम्।
पुष्पे फले च विकृते राज्ञो मृत्युं तथा दिशेत् ॥
अकालप्रभवा नार्य्यः कालातीताः प्रजास्तथा।
विकृताः प्रसवाश्चैव युग्मप्रसवनं तथा ॥
हीनाङ्गाः अधिकाङ्गाश्च जायन्ते यदि वा त्रयः।
पशवः पक्षिणश्चैव तथैव च सरीसृपाः।
विनाशं तस्य देशस्य कुलस्य च विनिर्द्दिशेत् ॥
प्रदोषे कुक्कुटारावो हेमन्ते चापि कोकिलाः।
अर्कोदयेऽर्काभिमुखः श्वारावो नृभयं दिशेत् ॥
उलूको वसते यत्र निपतेद्वा तथा गृहे।
ज्ञेयो गृहपतेर्मृत्युर्धननाशस्तथैव च ॥
गृध्रः कङ्कः कपोतश्च उलूकः श्येन एव च।
चिल्लश्च चर्म्मचिल्लश्च भासः पाण्डर एव च ॥
गृहे यस्य पतन्त्येते गेहं तस्य विपद्यते।
पञ्चत्वमासात्तथा वर्षान्मृत्युः स्याद्गृहमेधिनः।
पत्न्याः पुत्रस्य वा मृत्युर्द्रव्यञ्चापि विनश्यति ॥
ब्राह्मणाय गृहं दत्त्वा दत्त्वा तन्मूल्यमेव वा।
गृह्णीयाद्यदि रोचेत शान्तिञ्चेमां प्रयोजयेत् ॥
इमां वक्ष्यमाणाम् ॥ * ॥
"मांसास्थीनि समादाय श्मशानाद्गृध्रवायसाः
श्वा शृगालोऽथवा मध्ये पुरस्य प्रविशन्ति चेत्।
विकिरन्ति गृहादौ च श्मशानं सा मही भवेत्।
चौरेण हन्यते लोकः परचक्रसमागमः ॥
संग्रामश्च महाघोरो दुर्भिक्षं मरकं तथा।
अद्भुतानि प्रदृश्यन्ते तत्र देशस्य विद्रवः ॥
अकाले फलपुष्पाणि देशविद्रवकारणम् ॥"

मत्स्यपुराणे।

"अतिवृष्टिरनावृष्टिर्दुर्भिक्षादिभयं मतम्।
अनृतौ तु दिनादूर्द्धं वृष्टिर्ज्ञेया भयाय च ॥
निरभ्रे चाथ रात्रौ वा श्वेतं यस्योत्तरेण तु।
इन्द्रायुधं ततो दृष्ट्वा उल्कापातं तथैव च ॥
दिग्दाहपरिवेशौ च गन्धर्व्वनगरं तथा।
परचक्रभयं विद्याद्देशोपद्रवमेव च ॥"

मासो वनकुक्कुटः ॥*॥ कंसनिधनसूचने हरि-वंशः ॥

"वक्रमङ्गारकश्चक्रे चित्रायां घोरदर्शनः।
चलत्यपर्व्वणि मही गिरीणां शिखराणि च ॥"

वाणोत्पाते स एव।

"दक्षिणां दिशमास्थाय धूमकेतुः स्थितोऽभवत्
वक्रमङ्गारकश्चक्रे कृत्तिकासु भयङ्करः ॥" *॥

कृत्यचिन्तामणौ।

"त्यक्ताशौचविवेकतत्त्ववसुधा लोकाः क्षुधा-पीड़िताः
विप्रा वेदहतास्तथा प्रचलिता बह्वाशिनो दुःखिताः।
क्षौणीमन्दफला नृपाश्च विकलाः संग्रामघोरा मही
प्रेताघातदुरन्तपीड़िततरा दैवेन्यराष्ट्रैर्युता॥
रक्तं शस्त्रोद्योगो मांसास्थिवशादिभिर्मरकः।
धान्यहिरण्यत्वक्फलकुसुमाद्ये वर्षिते भयं विद्यात्।
अङ्गारपांशुवर्षे विनाशमुपयाति तन्नगरम् ॥
उपलं विनाजलधरैर्विकृता वा यदा प्राणिनो दृश्याः।
छिद्रं वाप्यतिवृष्टिं शस्यानामीतिसंजननम् ॥"

बुधकौशिकसंवादे।

"वल्गाः प्रपाते च फलं शरटस्य प्ररोहणे।
शीर्षे राजश्रियोऽवाप्तिर्भाले चैश्वर्य्यमेव च ॥
कर्णयोर्भूषणावाप्तिर्नेत्रयोर्बन्धुदर्शनम्।
नासिकायाञ्च सौगन्ध्यं वक्त्रे मिष्टान्नभोजनम्।
कण्ठे चैव श्रियोऽवाप्तिर्भुजयोर्विभवो भवेत्।
धनलाभो बाहुमूले करयोर्धनसञ्चिदः ॥
स्तनमूले च सौभाग्यं हृदि सौख्यविवर्द्धनम्।
पृष्ठे नित्यं महीलाभः पार्श्वयोर्बन्धुदर्शनम् ॥
कटिद्वये वस्त्रलाभो गुह्ये मृत्युसमागमः।

अहं चार्कवशो नित्यं गृहे रोगभयं भवेत् ॥
[illegible]
वामदक्षिणयोः पादे भ्रमणं नियतं भवेत् ॥
[illegible] पतने मरणस्य च ।
[illegible] प्रजायते ॥
[illegible] मरणस्य प्रयाणकम् ।
निवासार्थ [illegible] व्याधिपीड़ा विपर्य्यये ॥
[illegible] यदि जायते ।
[illegible] भवेत् ॥
[illegible] च पातनम् ।
[illegible] जायते ध्रुवम् ॥ * ॥
[illegible]

भूदोषशान्तयेऽर्थाय शस्तं चैत्यादियन्तनम् ।
कुर्य्यात् होमं तथा दानं श्राद्धं क्रोधविवर्ज्जनम् ॥
भूदोषे सर्व्वभूतेषु मैत्रीं कुर्व्वन्ति पण्डिताः ।
सर्व्वेष्वेतेषु [illegible] तथैव च ॥
गृहपूजाञ्च कुर्व्वीत सर्व्वपीड़ासु मानवः ।
एवं शाम्यन्त्यशेषाणि घोराणि द्विजसत्तम ।
प्रयतानां मनुष्याणां गृहदोषास्त्वनेकशः ॥" * ॥
लोकवादाय तत्रैवोक्तं यथा,—
"आकाशाद्देवतानाञ्च देव्यादीनाञ्च लौकिकात् ।
पृथिव्यां मतिलोके च लोकवादा इति स्मृताः ॥"
ते च सर्व्वभूतडाकिन्याद्यभिभवशान्त्यर्थं लौकिकौषधमन्त्रादयः । विषहरीमङ्गलचण्डिकागीतादयः । चैत्यवृक्षादौ क्षेत्रपालकुलदेवतापूजा च ॥ * ॥ तथा चापस्तम्बः । स्त्रीभ्योऽवरवर्णेभ्यो धर्म्मशेषान् प्रतीयादित्येके इति । धर्म्मशेषान् श्रुतिस्मृतिसदाचारेष्वप्रसिद्धान् इति नारायणोपाध्यायाः ॥ भूदोषस्य पापं विना भूमौ गोमलं निर्य्यास दुग्धोत्सर्गः । चैत्यः पूर्व्वत्र ख्यातो ग्रामप्रधानतरुः । तथा च ग्रामोत्पाते हरिवंशे ।
"चैत्यकश्चापि स्याथ निपपात महीतले ।
अर्च्चितः सर्व्वकन्याभिरिदीनचानां महाद्रुमः ॥"
इत्यतो मत्स्याणीम् । अतिपादय पूज्यमतिक्रम्य भावनम् ॥ * ॥ मत्स्यपुराणम् ।
"चाकस्मिकान्तरुदनात् प्रभाते दुःखदायकं ।
काकी मैथुनमासक्ता सैतो वा यदि दृश्यते ॥
उलूको वसते यत्र निपतेत् वा तथा गृहे ।
मृत्यो व्याधिभयं दुःखमागमस्तथैव च ॥" * ॥
वराहसंहितायाम् ।
"क्रोडासुरसो रतिमांसलुब्धौ
भीतौ श्वभ्रोः पतितौ विचक्षुः ।
नाशौ च्युततरस्य विनाशहेतु-
र्दीव्यः समुत्पादय चाहुराद्यौ ॥
गृहे पतितिकायान्तु कुर्य्यात्सामनदर्पणम् ।
देवाः कपोता इति वा नमन्ति मन्त्रैः प्रसृष्टैः ॥
मावद देया विविधा द्विजानां
सकाञ्चना वस्त्रयुगोपरीयाः ।
एवं कृते पापमुपैति शान्तिं
मृगैर्हि भेयायि निवेदितं तत् ॥"
द्विजैः पक्षिभिः । अग्निना धूम इति ॥ * ॥
मुद्गलभौमे ।
[illegible]
[illegible] मत्स्यपुराणे ।
[illegible]

"नमस्ते सर्व्वलोकेश नमस्ते भृगुनन्दन ।
कवे सर्व्वार्थसिद्ध्यर्थं गृहाणार्घ्यं नमोऽस्तु ते ॥
एवं शुक्रोदये कुर्व्वन् यात्रादिषु च मानवः ।
सर्व्वान् कामानवाप्नोति [illegible]
नमस्तेऽङ्गिरसां नाथ वाक्पतेऽथ बृहस्पते ।
क्रूरग्रहैः पीड़ितानाममृताय नमो नमः ।
संक्रान्तावपि कौन्तेय यात्रारम्भे दिने तथा ।
कुर्व्वन् बृहस्पतेः पूजां सर्व्वान् कामान् समश्नुते."
वैष्णवामृते व्यासः ।
"ग्रहयज्ञैः शान्तिकैश्च किं क्रियन्ते [illegible]
महाशान्तिकरः [illegible]
उत्पादान् दारुणात् पुंसां दुर्निमित्तान्तरे
तुलस्या पूजितो मत्या महाशान्तिकरो हरिः ॥
अत्र ब्रह्मपुराणीयो मन्त्रः ।
"नमस्ते बहुरूपाय विष्णवे परमात्मने स्वाहा ॥"
छन्दोगपरिशिष्टम् । [illegible]
गोदृक्षभार्य्यासु गमने यमजजनने विकृतिजनने वा काककङ्कगृध्रकपोतक्रुरमध्यानां गृहप्रवेशे मातुरस्योपरि [illegible] गृहद्वारारोहणे सर्व्वेषु च भुतेषु कल्पदृष्टेन [illegible] विष्णाग्र्याहुतीर्जुहोति अद्भुताय भीमाय विष्णवे रुद्राय वायवे सूर्य्याय सर्व्वविश्वेभ्यो देवेभ्यः स्वाहेति स्थालीपाका[illegible]दिति ॥ * ॥ कपोतं विशिनष्टि शौनकः ।
"रक्तपादः कपोताख्यो धवलग्रीवः [illegible]
स चेत्पतेत् विशिखशालासमीपके [illegible]
मध्ये तु गृहमध्ये वा वल्मीकस्योपरि [illegible]
कल्पदृष्टेन विधिना गृह्योक्तेन प्रायश्चित्त[illegible]
हुतोः अद्भुतदोषप्रशमनार्थाः [illegible]
अद्भुताय नमो स्वाहा इत्यादिमन्त्रैः [illegible]
[illegible]
कुर्य्यात् । छन्दोगपरिशिष्टम् । [illegible]
पायसेन ब्राह्मणान् भोजयित्वा गौरं [illegible]
शान्तिर्भवतीति । [illegible]
तां गां दत्वा दोषशान्तिर्भवतीति ।
गौतमम् ।
"गौर्द्विजिष्टतमा लोके वेदेष्वपि निगद्यते ।
न ततोऽन्यद्वरं यस्मात् तस्माद्गौर्वरमुच्यते ॥"
छन्दोगपरिशिष्टम् । [illegible] प्रायश्चित्तं न कुर्य्यात् तस्य गृहपतेर्नाश[illegible] नाशो वा भवति तस्मात् प्रायश्चित्तं कर्त्तव्यं [illegible] पक्षं वामदेव्यगानं शान्तिः शान्तिरिति । [illegible] समाप्तौ । वामदेव्यगानं शान्तिः [illegible] प्रकरणसमाप्त्यर्थां । [illegible]
"[illegible] निमित्ते [illegible]

ह:।
च न दोषं जनयन्त्युत्पातान् शान्त्यभाव-
कृतान्।
पपुष्पफलैः शोकैर्विंशाद्याटैभिः समासैः॥"
। प मत्स्यपुराणम्।
शाशनिस्वनोकम्पसन्ध्यादिग्दाहनिस्वनाः।
वेगरजोधूमरक्ताकास्तमयोदयाः॥
भ्योऽथ रसस्नेहमधुपुष्पफलोद्गमाः।
ाधिमदवृद्धिश्च शिवाये मधुमाधवे॥१॥
तेरुल्कापातकलुषं कपिलार्केन्दुमण्डलम्।
ग्निस्वनं स्फोटं धूमरेणुनिराकुलम्॥
यथारुणा सन्ध्या नभः क्षुब्धार्णवोपमम्।
तोयाम्बुसंशोषं दृष्ट्वा ग्रीष्मे शुभं वदेत्॥२॥
ायुधपरिवेषौ विद्युच्छुष्कविरोहणम्।
पोहर्त्तनबैकृत्यं रसनं दरणं क्षितेः॥
ुदपानसरसां वृद्ध्यूहा सवनप्लवाः।
नद्यादिरोहणानां वर्षासु न भयावहम्॥"
रेवं ये वर्षावर्णनायाम्।
चित् कन्दरस्थामाद्रां गिरीन्द्राभरणं
क्वचित्।"
दर्शनात् वर्षासु गिरीन्द्रोद्गमो न भयावहः।
दिव्यस्त्रीभूतगन्धर्वविमानाद्भुतदर्शनम्।
हनघवतारार्णां दर्शनञ्च दिवाम्बरे॥
तवादित्वनिर्घोषो वनपर्वतसानुषु।
ससृद्धी रसोत्पत्तिरपापाः शरदि स्मृताः॥३॥
तानिलतुषारत्वं नर्द्दनं मृगपक्षिणाम्।
ोयचादिसत्त्वानां दर्शनं वागमानुषी॥
ो धूमान्धकाराय शनभा वनपर्वताः।
ैः सूर्योदयास्तत्वं हेमन्ते शोभना मताः॥४॥
हिमपातानिलोत्पातविरूपाद्भुतदर्शनम्।
दाञ्जनाभमाकाशं तारोल्कापातपिञ्जरम्॥
वा गर्भोद्भवाः स्त्रीषु गोऽजाश्वमृगपक्षिणाम्।
वाङ्कुरलतानाञ्च विकाराः शिशिरे शुभाः॥५॥
हुस्वभावजा ह्येते दृष्टाः स्वर्त्तौ शुभावहाः।
हतावन्यत्र चोत्पाता दृष्टास्ते भृशदारुणाः॥६॥
न्मत्तानाञ्च या गाथा शिशूनां चेष्टितञ्च यत्।
स्त्रियो यच्च प्रभाषन्ते तत्र नास्ति व्यतिक्रमः॥
ेष्वरति देवेषु पयाद्गच्छति मानुषान्।
ादेशिता वाग्वदति सत्या ह्येषा सरस्वती॥"
हस्पतिः।
ज्योतिर्ज्ञानं तथोत्पातमविदित्वा तु ये नृपान्
श्रावयन्त्यर्थलोभेन विनेयास्तेऽपि यत्नतः॥"
विनेया दण्डनीयाः। इति ज्योतिस्तत्त्वम्॥७॥
श्रीमदिव्याकारीचोत्पातशान्तिर्मात्स्ये २०२
अध्यायावधि २१२ अध्यायपर्यन्तं द्रष्टव्या।
तथा देवीपुराणे महाभ्युदयपादे सर्वदैवाकी-
सर्वोत्पातशान्तिसमाताध्याये चण्डीशब्दे च
द्रष्टव्या। तन्त्रोक्ता शान्तिः षट्कर्मशब्दे
द्रष्टव्या॥८॥ अथ शान्तिकपौष्टिककर्म्मदिनम्।
तत्र वाराः रविसोमबुधबृहस्पतिशुक्राणां तत्र
नक्षत्राणि उत्तराषाढ़ा उत्तरफल्गुनी उत्तर-
भाद्रपत् रोहिणी चित्रा अनुराधा मृगशिरः
रेवती पुष्या अश्विनी हस्ता। तत्र चन्द्रः
शोभनः। लग्नं शोभनम्। इति ज्योतिषतत्त्वम्

शान्तिः, पुं, कृत्तार्हद्विशेषः। जिनचक्रवर्त्तिविशेषः
इति हेमचन्द्रः॥ दशमन्वन्तरे इन्द्रः। यथा,—
"धर्म्मपुत्रस्य पुत्रांस्तु दशमस्य मनोः शृणु।
सुक्षेत्रयोत्तमौजाय भूमिश्रेष्ठश्च वीर्यवान्॥
शतानीको निरमित्रो वृषसेनो जयद्रथः।
भूरिद्युम्नः सुवर्म्माय शान्तिरिन्द्रः प्रतापवान्॥
आपो मूर्त्तिर्हविष्मांश्च सुकृतिश्चाव्ययस्तथा।
नाभागोऽप्रतिमश्चैव सौरभा ऋषयस्तथा॥
प्राणाख्याः शतसंख्याश्च देवतानां गणास्तथा।
शान्तिशत्रुस्त्रं हरिश्च गदया घातयिष्यति॥"
इति गारुडे ८७ अध्यायः॥

शान्तिकामः, त्रि, (शान्तिं कामयते इति।
कम + णिङ् + अण्।) शान्त्यभिलाषी। यथा,
"श्रीकामः शान्तिकामो वा ग्रहयज्ञं समा-
चरेत्।
वृष्ट्यायुःपुष्टिकामो वा तथैवाभिचरन्नपि॥"
इति संस्कारतत्त्वम्॥

शान्तिगृहं, क्ली, (शान्तेर्गृहम्।) शान्त्याश्रयः।
यत्रान्ते शान्तिकुम्भजलेन स्नानस्य गृहम्।
तत्पर्य्यायः। आथर्व्वणम् २। इति हेमचन्द्रः॥
(यथा, बृहत्संहितायाम्। ४९। ५।
"कण्ठेषु निबध्नीयात् पुरार्थं शान्तिगृहगानाम्"

शान्त्वं, क्ली, सान्त्वम्। इत्यमरटीकासारसुन्दरी।

शान्त्वतिः, स्त्री ब्राह्मयष्टिका। इति शब्द-
चन्द्रिका॥ पुस्तकान्तरे ज्यावनिरिति च पाठः

शापः, पुं, (शपनमिति। शप + घञ्।) आक्रोशः।
(यथा रघुः। ५। ५६।
"संमोचितः सत्त्ववता त्वयाहं
शापाच्चिरप्रार्थितदर्शनेन॥")
दिव्यम्। इति मेदिनी॥ आक्रोशस्य पर्य्यायः।
अकरणिः २। इत्यमरः॥ अजीवनिः ३
अजननिः ४ अवग्रहः ५ निग्रहः ६। इति
भरतः॥ अभिसम्पातः ७। इति ग्रन्थान्तरम्॥
शेपस्य पर्य्यायः। शपनम् २ शपथः ३। इत्य-
मरः॥ मिथ्याभिशंसनम् ४। इति शब्दरत्ना-
वली॥ (उपद्रवः। यथा, रामायणे।१।२६।३५
"उवास रजनीं तत्र ताड़काया वने सुखम्।
मुक्तशापं वनं तच्च तस्मिन्नेव तदाहनि।
रमणीयं विबभ्राज यथा चैत्ररथं वनम्॥"
"मुक्तशापं अपगतोपद्रवम्।" इति तट्टीका॥
जलम्। यथा, ऋग्वेदे। १०। २८। ४।
"प्रतीपं शापं नद्यो वहन्ति।"
"नद्यो गङ्गाद्याः सरितः प्रतीपं प्रतिकूलं शापं
उदकं वहन्ति।" इति तद्भाष्ये सायणः॥)

शापटिकः, पुं, मयूरः। इति केचित्॥

शापास्त्रः, पुं, (शाप एव अस्त्रं यस्य।) मुनिः।
इति त्रिकाण्डशेषः॥

शाफरिकः, पुं, (शफरान् हन्तीति। शफर +
"पक्षिमत्स्यमृगान् हन्ति।" ४।४।३५। इति
ठक्।) मत्स्यघातकः। इति केचित्॥

शाब्दः, त्रि, (शब्दस्यायमिति। शब्द + अण्।)
शब्दसम्बन्धी। यथा। एकः शाब्दोऽपरश्चार्थः।
इति दायभागः॥ (शब्दमयः। यथा, भाग-
वते। २। २। २।
"शाब्दस्य हि ब्रह्मण एष पन्था
यन्नामभिर्ध्यायति धीरपार्थैः॥")
सरस्वत्यां स्त्री, शाब्दी। इति केचित्॥

शाब्दबोधः, पुं, (शाब्दः शब्दसम्बन्धी बोधः।)
शब्दार्थज्ञानम्। न्यायमते पदार्थज्ञानजन्य-
ज्ञानम्। तस्य करणं पदज्ञानम्। तस्य कारणं
पदशक्तिज्ञानम्। कदाचित् लक्षणाज्ञानम्।
एवं आकाङ्क्षायोग्यतासत्तितात्पर्य्यज्ञानञ्च।
यथा,—
"पदज्ञानन्तु करणं द्वारं तत्र पदार्थधीः।
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी॥"
इति भाषापरिच्छेदः॥ ॥
शाब्दबोधप्रकारं दर्शयति पदज्ञानन्त्विति।
न तु ज्ञायमानं पदं करणं पदाभावेऽपि मौनि-
श्लोकादौ शाब्दबोधात्। पदार्थधीरिति पद-
जन्यपदार्थस्मरणं व्यापारः। अन्यथा पदज्ञान-
वतः प्रत्यक्षादिना पदार्थोपस्थितावपि शाब्दबो-
धापत्तेः। तत्रापि वृत्त्या पदजन्यत्वं बोध्यं अन्यथा
घटादिपदात् समवायसम्बन्धेन आकाश-
स्मरणे जाते आकाशस्यापि शाब्दबोधापत्तेः।
वृत्तिः शक्तिलक्षणान्यतरसम्बन्धः। अतैव शक्ति-
ज्ञानस्य उपयोगः। एवं शक्तिग्रहाभावे
पदज्ञानेऽपि तत्सम्बन्धेन स्मरणानुपपत्तेः।
पदज्ञानस्य हि सम्बन्धिज्ञानविधयार्थस्मार-
कत्वम्। ६। शक्तिश्च पदेन सह पदार्थस्य
सम्बन्धः। अस्माच्छब्दादयमर्थो बोद्धव्य इती-
श्वरेच्छारूपा आधुनिके नाम्नि शक्तिरस्त्येव
एकादशेऽहनि पिता नाम कुर्य्यादितीश्वरे-
च्छायाः सत्त्वात् आधुनिके तु सङ्केते न शक्ति-
रिति सम्प्रदायः। नव्यास्तु ईश्वरेच्छा न शक्तिः
किन्त्विच्छैव तेनाधुनिकसङ्केतेऽपि शक्तिरस्तीति
वदन्ति।७। शक्तिग्रहश्च व्याकरणादितः।
तथा हि।
"शक्तिग्रहं व्याकरणोपमान-
कोषाप्तवाक्याद्व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति
सान्निध्यतः सिद्धपदस्य वृद्धाः॥"
धातुप्रकृतिप्रत्ययादीनां शक्तिग्रहो व्याकरणाद्
भवति क्वचित्तु सति बाधके त्यज्यतेऽपि। यथा,
वैयाकरणैराख्यातस्य कर्त्तरि शक्तिरुच्यते।
चैत्रः पचतीत्यादौ कर्त्रा सह चैत्रस्याभेदान्वय-
स्तत्र गौरवात् त्यज्यते किन्तु कृतौ शक्तिर्ल-
लाघवात्। कृतिश्चैत्रादौ प्रकारीभूय भासते।
न च कर्त्तुरनभिधानाच्चैत्रादिपदानन्तरं तृतीया
स्यादिति वाच्यं कर्त्तृसंख्यानभिधानस्य तत्र
तन्त्रत्वात्। संख्याभिधानयोग्यस्य धर्म्मत्वावच्छिन्न-
वकृतः। प्रथमान्तपदोपस्थाप्यकर्त्तृत्वादौ त्वस्य
विशेषणत्वतात्पर्य्यविषयत्वमतः तेन चैत्र इव

गम्यतीत्यादौ न चैव संख्यान्वयः। यत्र कर्मादौ न विशेषणान्वतात्पर्यं तद्वारणाय द्वयमात्रेति। यद्वा धात्वर्थातिरिक्ताविशेषणत्वं द्वयमदन्तार्थः तेन चैत्र इव गच्छतीत्यत्र चैत्रादिस्थारम्भं स्तोकं पचतीत्यादौ स्तोकादेर्वारणाय च द्वितीयदलम्। तस्य द्वितीयान्तोपस्थाप्यत्वाभावात्‌। एवं व्यापारेऽपि न धात्वर्थत्वात्‌। रथो गच्छति इत्यादौ तु व्यापारे आख्यातार्थेऽन्वयः। जानाति इत्यादौ तु आख्याते जानातीत्यादौ प्रतियोगित्वेनिरूढ़लक्षणा। उपमानाद्यथा शक्तिग्रहस्तदीयम्॥ ०॥ एवं कोषादपि शक्तिग्रहः सति बाधके क्वचित्त्यज्यते यथा नीलादिपदानां नीलरूपादौ नीलादिविशिष्टे च शक्तिः [illegible] तथापि लाघवात्‌ नीलादौ [illegible] नीलादिविशिष्टे [illegible]॥ ०॥ एवमाप्तवाक्यादपि। यथा, कोकिलः पिकपदवाच्य इत्यादिशब्दात्‌ पिकादिशक्तिग्रहः॥ ०॥ एवं व्यवहारादपि। यथा, प्रयोजकवृद्धेन घटमानयेत्युक्तं तत्‌ श्रुत्वा प्रयोज्यवृद्धेन घट आनीतः [illegible] घटानयनरूपं कार्यम्‌। [illegible] [illegible]

[illegible]

पङ्कजपदमवयवशक्त्या पङ्कजनिकर्तृरूपमर्थं बोधयति समुदायशक्त्या च पद्मत्वेन रूपेण पद्मं बोधयति। यत्र अवयवार्थरूढ्यर्थयोः स्वातन्त्र्येण बोधस्तद्यौगिकरूढं यथोद्भिदादिपदम्‌। तत्र हि कर्मभेदनकर्त्ता तरुगुल्मादिरपि बुध्यते। इति सिद्धान्तमुक्तावली॥

शाब्दिकः, पुं, (शब्दं करोतीति। शब्द+"शब्ददर्दुरं करोति।" ४।४।३४। इति ठक्‌।) शब्दशास्त्रवित्ता। वैयाकरणः। आदिशाब्दिका यथा,—
"इन्द्रश्चन्द्रः काशकृत्स्ना पिशली शाकटायनः।
पाणिन्यमरजैनेन्द्राः जयन्त्यष्टादिशाब्दिकाः॥"
इति कविकल्पद्रुमः॥
मध्यशाब्दिका यथा। क्रमदीश्वरः। सर्ववर्मा। पद्मनाभमिश्रः। वोपदेवः। सङ्क्षिप्तानन्दः। भरतमल्लिकप्रभृतयः॥ शब्दसम्बन्धिनि, त्रि॥

शाम, [न्‌] क्ली, साम। इत्यमरटीकासारसुन्दरी॥

शामनं, क्ली,(शमनमेव। स्वार्थे अण्‌।)मारणम्‌। शान्तिः। इति केचित्‌॥

शामनः, पुं, (शमन एव। प्रज्ञाद्यण्‌।) शमनः। इति पुराणम्‌॥

शामनी, स्त्री, (शमनस्य यमस्येयमिति। शमन+अण्‌। ङीप्‌।) दक्षिणा दिक्‌। इति राजनिर्घण्टः॥

शामित्र, क्ली, यज्ञम्‌। पशुबन्धनम्‌। यज्ञपात्रम्‌। इति केचित्‌॥ (शमितुरिदम्‌। शमितृ+अण्‌। पशुहिंसनम्‌। यथा, भागवते। १।१६।८।
"इहोपहूतो भगवान्‌ मृत्युः शामित्रकर्म्मणि।
न कश्चिन्म्रियते तावद्‌ यावदास्ते इहान्तकः॥")

शामीलं क्ली, (शम्याः विकारः। "शम्याष्ट्लञ्‌।" ४।३।१४२। इति ट्लञ्‌।) भस्म। इति सिद्धान्तकौमुदी॥

शामीली, स्त्री, स्रुक्‌। इति सिद्धान्तकौमुदी॥

शाम्बरी, स्त्री, शम्बरदैत्यनिर्मितमाया। इन्द्रजालादिमाया। इत्यमरभरतौ॥

शाम्बविकः, पु, शाङ्खिकः। इति जटाधरः।

शाम्बुकः, पु, शम्बूकः। इति शब्दरत्नावली॥ शामुक इति भाषा॥

शाम्बूकः, पुं, शम्बूकः। इत्यमरटीकायां भरतः॥

शाम्भवं, क्ली, (शम्भोरुपदेशाय इदम्‌। अण्‌।) देवदारु। इति राजनिर्घण्टः॥

शाम्भवः, पुं, कर्पूरः। विषभेदः। गुग्गुलुः। इति राजनिर्घण्टः॥ विषभेदः। इति शब्दचन्द्रिका॥ शम्भुपुत्रः। शम्भुपुत्रकः। शम्भुसम्बन्धिनि, त्रि॥ यथा, कथासरित्सागरे। १२।११०।
"तत्र च सविशन्तदेव वदतः शाम्भवा गणाः॥")

शाम्भवी, स्त्री, नीलदूर्वा। इति राजनिर्घण्टः॥ दुर्गा। यथा,—
"शाम्भवीं देवमाता च विष्णा सर्व्वसिद्धा
सदा॥"
इति स्कन्दपुराणे दुर्गास्तोत्रम्‌॥

शायकः, पुं, (शाययति शत्रून्‌। शी+णिच्‌+ण्वुल्‌। यद्वा, शेते तूणीरे इति। शी+ण्वुल्‌।) बाणः। इति जटाधरः॥ (यथा, नैषधचरिते। ४।१०१।
"प्रियसखीनिवहेन सहाथ सा
व्यरचयद्गिरमर्द्धसमस्यया।
हृदयमर्म्मणि मन्मथशायकैः
क्षततमा बहु भाषितुमक्षमा॥")
खड्गः। इत्यमरटीकायां स्वामी॥

शार, त्‌ क दौर्ब्बल्ये। इति कविकल्पद्रुमः॥(चुरा०-पर०-अक०-सेट्‌।) अशशारत्‌। इति दुर्गादासः॥

शारं, त्रि, (शॄ+घञ्‌।) कर्बुरवर्णः। इत्यमर[illegible]

शारः, पुं, (शीर्य्यतेऽनेन शृणाति वा। शॄ+"शॄ वायुवर्णनिवृत्तेषु।" ३।३।२१। इति वार्त्तिकोक्त्या घञ्‌।) वायुः। इत्यमरः। अक्षोपकरणम्‌। इति मेदिनी॥ [illegible] कर्बुरवर्णः। कुशे, स्त्री। इति केचित्‌॥

शारङ्गः, पुं, (शीर्य्यते आतपैः। शॄ+"शॄङ्गारकादिभ्यश्च।" उणा० १।११८। इति अङ्गच्‌।) चातकः। (यथा,—
"अष्टौ मासान्‌ जलधर तवापेक्षया [illegible]
शारङ्गोऽहं निरवधिपतत्स्वातिनीराभिलाषी[illegible]
आस्तां तावत्‌ सलिलकणिकालाभमात्रं [illegible]
वर्षारम्भप्रथमसमये दारुणो वज्रपातः॥"
इत्युद्भटः।)
हरिणः। (यथा, शाकुन्तले। १।
"एष राजेव दुष्मन्तः शारङ्गेणातिरंहसा।")
हस्ती। भृङ्गः। मयूरः। कर्बुरवर्णविशिष्टे, त्रि। इत्यमरटीकायां मुकुटादयः॥

शारङ्गी, स्त्री, (शारङ्ग+ङीप्‌।) वाद्य[illegible]विशेषः। इति शब्दरत्नावली॥

शारदं, क्ली,(शरदि भवम्‌। शरद्‌+"सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्‌"। ४।३।१६। इति अण्‌।) श्वेतकमलम्‌। इति राजनिर्घण्टः॥(यथा, महाभारते। २।६१।३४।
"शारदोत्पलपत्राक्ष्या शारदोत्पलगन्धया।
शारदोत्पलसेविन्या रूपेण श्रीसमानया॥")
शस्यम्‌। इति मेदिनीशब्दरत्नावल्यौ॥

शारदः पुं, (शरद्‌+अण्‌।) वासः। बकुलः। हरिमुद्गः। इति राजनिर्घण्टः॥ वत्सरः। इति मेदिनी॥ पीतमुद्गः। इति हेमचन्द्रः॥ [illegible] इति सिद्धान्तकौमुदी॥

शारदः, त्रि, (शरदि भवः। शरद्‌+अण्‌।) शरत्कालः। (यथा, मनौ। ६।११।
"वासन्तशारदैर्मेध्यैर्मुन्यन्नैः स्वयमाहृतैः।")
नूतनः। अप्रतिभः। इति मेदिनी॥ [illegible] इति विश्वः॥

शारदा स्त्री, सरस्वती। इति त्रिकाण्डशेषः॥ (यथा, महिम्नस्तोत्रे।
"लिखति यदि गृहीत्वा शारदा सर्व्वकालं"।)
दुर्गा (यथा, मार्कण्डेये। १०।२।१२।

माया नारायणीशानी शारदेत्यम्बिकेति च ॥")

...स्य व्युत्पत्तिर्यथा,—

शरत्काले पुरा यस्मात् नवम्यां बोधिता सुरैः।
शारदा सा समाख्याता पीठे लोके च नामतः॥"
इति तिथ्यादितत्त्वम् ॥

वीणाविशेषः। इति शब्दरत्नावली ॥ ब्राह्मी। शारिवा। इति राजनिर्घण्टः ॥

शारदिकं, क्ली, (शरद्+"श्राद्धे शरदः।" ४।३।१२। इति ठञ्।) श्राद्धम्। इति सिद्धान्तकौमुदी ॥

शारदिकः, पुं, (शरद्+"विभाषा रोगातपयोः।" ४।३।१३। इति ठञ्।) रोगः। आतपः। इति सिद्धान्तकौमुदी ॥

शारदी, स्त्री, (शारद+ङीप्।) तोयपिप्पली। सप्तपर्णः। इति मेदिनी ॥ कोजागरपूर्णिमा। इति शब्दरत्नावली ॥ शरत्कालीने, त्रि। यथा, स्कान्दभविष्ययोः।

'शारदीचण्डिकापूजा त्रिविधा परिगीयते।
सात्त्विकी राजसी चैव तामसी चेति तां शृणु॥
सात्त्विकी जपयज्ञाद्यैर्नैवेद्यैश्च निरामिषैः।
माहात्म्यं भगवत्याश्च पुराणादिषु कीर्त्तितम् ॥
पाठस्तस्य जपः प्रोक्तः पठेद्देवीमनाः प्रिये।
राजसी बलिदानेन नैवेद्यैः सामिषैस्तथा॥
सुरामांसाद्युपहारैर्जपयज्ञैर्विना तु या।
विना मन्त्रैस्तामसी स्यात् किरातानाञ्च सम्मता॥"
इति तिथ्यादितत्त्वम् ॥

संवत्सरसम्बन्धिनी। यथा, ऋग्वेदे।१।१३१।४।
"यदिन्द्रशारदीरवातिरः सा महानो अवातिरः॥")

शारदीयमहापूजा, स्त्री, (शारदीया महापूजा।) शरत्कालीनदुर्गामहापूजा। यथा,—

"शारदीया महापूजा चतुःकर्ममयी शुभा।
तां तिथित्रयमासाद्य कुर्य्यात् भक्त्या विधानतः॥"
इति तिथ्यादितत्त्वम् ॥

अपि च।

"इते घोरे महावीरे सुरासुरभयङ्करे।
देवीमुपासका देवाः प्रभृता राक्षसास्तथा॥
समेताः सर्वदेवास्ते देवीं भक्त्या तुतोषिरे।
बलिञ्च ददुर्भूतानां सद्दियाजामिषेण च॥
एवं तस्मिन् दिने वत्स प्रेतभूतसमाकुलम्।
कृतवान् सर्वदेवश्च पूजाञ्च शाश्वतीर्महान्॥
जलदान्ते आश्विने मासि महिषासुरनिबर्हिणीम्।
देवीं संपूजयित्वा तु अष्टमीष्वर्द्धरात्रिषु॥
ये घातयन्ति सदा भक्त्या ते भवन्ति महाबलाः।
बलिञ्च ये प्रयच्छन्ति सर्वभूतविनाशनम्॥
तेषान्तु तुष्यते देवी यावत् कल्पन्तु शाङ्करम्।
क्रीडन्ति विविधैर्भोगैर्देवलोके सुदुर्लभे॥
यावद्भूर्वायुराकाशं जलं वह्निशशिग्रहाः।
तावच्च चण्डिकापूजा भविष्यति सदा भुवि॥

प्रावृट्काले विशेषेण आश्विने ह्यष्टमीषु च।
महाशब्दो नवम्यास्तु लोके ख्यातिं गमिष्यति॥
इन्द्र उवाच।
आश्विने घातिते घोरे नवमी प्रतिवत्सरम्।
श्रोतुमिच्छाम्यहं तात उपवासव्रतादिकम्॥
महाव्रतं महापुण्यं शङ्कराद्यैरनुष्ठितम्।
कर्त्तव्यं देवराजेन्द्र देवीभक्तिसमन्वितैः॥
कन्यासंस्थे रवौ शक्र शुक्लामारभ्य नन्दिकाम्।
अयाची त्वथ चैकाशी नक्ताशी चाथ वायुदः॥
प्रातःस्नायी जितद्वन्द्वः त्रिकालं शिवपूजकः।
जपहोमसमायुक्तः कन्यकां भोजयेत् सदा॥
अष्टम्यां नवगेहानि दारुजानि शुभानि च।
एवं वा वित्तभावेन कारयेत् सुरसत्तम॥
तस्मिन् देवी प्रकर्त्तव्या हैमी वा राजती च वा।
मृन्मयी लक्षणोपेता खड्गे शूलेऽथ पूजयेत्॥
सर्वोपहारसम्पन्नो वस्त्ररत्नफलादिभिः।
कारयेद्रथदोलादीन् पूजाञ्च बलिदैवकीम्॥
पुष्पादिद्रोणबिल्वाम्रजातीपुन्नागचम्पकैः।
विचित्रां कारयेत् पूजां अष्टम्यामुपवासयेत्॥
दुर्गाग्रतो जपेन्मन्त्रमेकचित्तः सुभावितः।
तदर्द्धयामिनीशेषे विजयार्थं नृपोत्तमैः॥
पञ्चाब्दं लक्षणोपेतं गन्धधूपस्रगर्च्चितम्।
विधिवत् कालि कालीति जप्त्वा खड्गेन घातयेत्॥
तस्योत्थं रुधिरं मांसं गृहीत्वा पूतनादिषु।
नैरृताय प्रदातव्या महाकौशिकमन्त्रितम्॥
तस्याग्रतो नृपः स्नायाच्छत्रुं कृत्वा तु पिष्टजम्।
खड्गेन घातयित्वा तु दद्यात् स्कन्दविशाखयोः॥
ततो देवीं स्नापयेत् प्राज्ञः क्षीरसर्पिर्जलादिभिः।
कुङ्कुमागुरुकर्पूरचन्दनैश्चाक्षधूपकैः॥
हैमानि पुष्परत्नानि वासांसि स्वाहतानि च।
निवेद्यं सुप्रभूतन्तु देयं देव्याः सुभावितैः॥
अश्वमेधमवाप्नोति भक्तिमान् सुरसत्तम।
महानवम्यां पूजेयं सर्वकामप्रदायिका॥
सर्वेषु सर्ववर्णेषु तव भक्त्या प्रकीर्त्तिता।
कृत्वाप्नोति यशो राज्यं पुत्रायुर्धनसम्पदः॥"
इति देवीपुराणे २८।३० अध्यायात् सङ्कलितं न तु सक्रमकम्॥

शारिः, पुं, (शॄ हिंसायाम्+इञ्।) अक्षोपकरणम्। पाशकादिदेवलम्। गुटिका। इति मेदिनी॥ तत्पर्य्यायः। शारः २ खेलनी ३। इति हेमचन्द्रः॥

शारिः, स्त्री, (शॄ+"अः शकुनौ।" उणा० ४।१२७। इति इञ्।) शकुनिकाभेदः। युद्धार्थंगजपर्य्याणम्। व्यवहारान्तरम्। इति मेदिनी॥ कपटः। इति धरणिः॥

शारिका, स्त्री, (शारिरिव। स्वार्थे कन्।) पक्षिविशेषः। मयना इति भाषा। तत्पर्य्यायः। पीतपादा २ गोराटी ३ गोकिराटिका ४। इति हेमचन्द्रः॥ सारिका ५ शारी ६ चित्रलोचना ७ शारिः ८। इति शब्दरत्नावली॥ मदनशारिका ९ शलाका १०। इति जटाधरः॥ वीणादिवादनम्। तत्पर्य्यायः। कोणः २। इति हेमचन्द्रः॥

शारिफलं, क्ली, पुं, (शारीणां खेलनीनां फलम्।) शारिपट्टः। शारिखेलनाधारः। छक् इति भाषा। तत्पर्य्यायः। अष्टापदम् २। इत्यमरः॥ फलकः ३। इतिशब्दरत्नावली॥ आकर्षः ४. शारिफलकः ५ विन्दुतन्त्रः ६ अष्टापीठी ७। इति जटाधरः॥

शारिफलकः, पुं, क्ली, (शारीणां फलकः।) शारिफलम्। इति जटाधरः॥

शारिवा, स्त्री, श्यामलता। तत्पर्य्यायः। गोपी २ श्यामा ३ अनन्ता ४ उत्पलशारिवा ५। इत्यमरः॥ पञ्च श्यामलतायाम्। नागजिह्वायामिति केचित्। गोप्यादिद्वयं श्यामलतायां अनन्तादिद्वयं अनन्तमूले इति केचित्। गुपू रक्षणे गोपायादित्वादीप् गोपा च।

'गोपी श्यामा गोपपत्नी गोपा गोपालिकापि च।'
इति वाचस्पतिः।

"एकं वा शारिवामूलं सर्वव्रणविशोधनम्।"
इति वैद्यकम्। इति भरतः॥

अस्या गुणः। वायुपित्तरक्ततृष्णाच्छर्दिज्वरनाशित्वम्। इति राजवल्लभः॥

शारिशृङ्खला, स्त्री, (शारीणां शृङ्खला यत्र।) पाशकविशेषः। यथा,—

"चुत्तुरी तिन्तिड़ी द्यूतं पञ्चमी शारिशृङ्खला।
नयपीठी चाष्टकाष्ठी नयः स्याज्जयपुत्रकः।
एते पाशकभेदाः स्युर्जयकोलाहलोऽपि च॥"
इति शब्दरत्नावली॥

शारी, स्त्री, (शॄ+इञ्। वा ङीप्।) कुशा। इति केचित्॥ (शकुनिकाभेदः। यथा, आर्य्यासप्तशत्याम्। ६२३।

"सा विरहदहनदूना मृत्वा मृत्वापि जीवति वराकी।
शारीव कितव भवतानुकुलिता पातिताक्षेण॥")

शारीरं, क्ली, वृषः। (शरीरे भवः। शरीर+अण्।) शरीरजाते, त्रि। इति मेदिनी॥*॥

शारीरदण्डो यथा,—

"धिग्दण्डं प्रथमं कुर्य्यात् वाग्दण्डं तदनन्तरम्
तृतीयं धनदण्डञ्च वधदण्डमतः परमिति॥"
वधदण्डोऽपि शारीरो ब्राह्मणव्यतिरिक्तानाम्।
इति मिताक्षरायां व्यवहारकाण्डम्॥*॥

शारीरदुःखं यथा,—

"आध्यात्मिको वै द्विविधः शारीरो मानसस्तथा।
शारीरो बहुभिर्भेदैर्भिद्यते श्रूयताञ्च सः॥
शिरोरोगप्रतिश्यायज्वरशूलभगन्दरैः।
गुल्मार्शश्वयथुश्वासच्छर्य्यादिभिरनेकधा॥
तथाक्षिरोगातीसारकुष्ठाङ्गामयसंज्ञकैः।
भिद्यते देहजस्तापो मानसं श्रोतुमर्हसि॥
कामक्रोधभयद्वेषलोभमोहविषादजः।

शोकासूयावमानेर्ष्यामात्सर्य्यादिभयस्तथा ॥
मानसोऽपि द्विजश्रेष्ठ तापो भवति नैकधा ।
इत्येवमादिभिर्भेदैस्तापो ह्याध्यात्मिकः स्मृतः ॥
दुःखं सहस्रशो भेदैर्भिद्यते मुनिसत्तम ।
सुकुमारतनुर्गर्भे जन्तुर्बहुमलावृते ॥
उल्वसंवेष्टितो भुग्नपृष्ठग्रीवास्थिसंहतिः ।
अत्यम्लकटुतीक्ष्णोष्णलवणैर्मातृभोजनैः ॥
अतितापिभिरत्यर्थं वर्द्धमानातिवेदनः ।
प्रसारणाकुञ्चनादौ नाङ्गानां प्रभुरात्मनः ॥
शकृन्मूत्रमहापङ्कशायी सर्व्वत्र पीडितः ।
निरुच्छ्वासः सचैतन्यः स्मरन् जन्मशतान्यथ ॥
आस्ते गर्भेऽतिदुःखेन निजकर्म्मनिबन्धनः ।
जायमानः पुरीषासृङ्मूत्रशुक्राविलाननः ॥
प्राजापत्येन वातेन पीड्यमानास्थिबन्धनः ।
अधोमुखो वै क्रियते प्रबलैः सूतिमारुतैः ॥
क्लेशान्निष्क्रान्तिमाप्नोति जठरान्मातुरातुरः ।
मूर्च्छामवाप्य महतीं संस्पृष्टो बाह्यवायुना ॥
विज्ञानभ्रंशमाप्नोति जातश्च मुनिसत्तम ।
कण्टकैरिव तुन्नाङ्गः क्रकचैरिव दारितः ॥
पूतिव्रणान्निपतितो धरण्यां कृमिको यथा ।
कण्डूयनेऽपि चाशक्तः परिवर्त्तेऽप्यनीश्वरः ॥
स्नानपानादिकाहारमप्याप्नोति परेच्छया ।
अशुचिः स्रस्तरे सुप्तः कीटदंशादिभिस्तथा ॥
भक्ष्यमाणोऽपि नैवैषां समर्थो विनिवारणे ।
जन्मदुःखान्यनेकानि जन्मनोऽनन्तराणि च ॥
बालभावे यदाप्नोति आधिभौतादिकानि च ।
अज्ञानतमसाच्छन्नो मूढान्तःकरणो नरः ॥
न जानाति कुतः कोऽहं क्व वा गन्ता किमात्मकः ॥"

इति विष्णुपुराणे ६ अंशे ५ अध्यायः ॥ अथातः शरीरसंख्याव्याकरणं शारीरं व्याख्यास्यामः । शुक्रशोणितं गर्भाशयस्थमात्मप्रकृतिविकारसंमूर्च्छितं गर्भ इत्युच्यते । तञ्च चेतनावस्थितं वायुर्विभजति । तेज एनं पचति । आपः क्लेदयन्ति । पृथिवी संहन्ति । आकाशं विवर्द्धयति । एवं विवर्द्धितः स यदा हस्तपादजिह्वाघ्राणकर्णनितम्बादिभिरङ्गैरुपेतस्तदा शरीरमिति संज्ञां लभते । तच्च षडङ्गं शाखाश्चतस्रो मध्यं पञ्चमं षष्ठं शिर इति ॥२॥ अतः परं प्रत्यङ्गानि वक्ष्यन्ते । मस्तकोदरपृष्ठनाभिललाटनासाचिबुकबस्तिग्रीवा इत्येता एकैकाः । कर्णनेत्रभ्रूशङ्खांसगण्डकक्षस्तनवृषणपार्श्वस्फिग्जानुबाहूरुप्रभृतयो द्वे द्वे । विंशतिरङ्गुलयः । स्रोतांसि च वक्ष्यमाणानि । एष प्रत्यङ्गविभाग उक्तः ॥३॥ तस्य पुनः संख्यानम् । त्वचः कलाः धातवो मला दोषा यकृत्प्लीहानौ फुप्फुस उण्डुको हृदयमाशया अन्त्राणि वृक्कौ स्रोतांसि कण्डरा जालानि कूर्च्चा रज्जवः सेवन्यः सङ्घाताः सीमन्ता अस्थीनि सन्धयः स्नायवः पेश्यो मर्म्माणि सिरा धमन्यो योगवहानि स्रोतांसि च ॥४॥ त्वचः सप्त । कलाः सप्त । आशयाः सप्त । धातवः सप्त । सप्त सिराशतानि । पञ्च पेशीशतानि । नव स्नायुशतानि । त्रीण्यस्थिशतानि । द्वे दशोत्तरे सन्धिशते । सप्तोत्तरं मर्म्मशतम् । चतुर्व्विंशतिर्धमन्यः । त्रयो दोषास्त्रयो मलाः । नव स्रोतांसि इति समासः ॥५॥ विस्तारोऽत ऊर्द्ध्वम् । त्वचोऽभिहिताः कला धातवो मला दोषा यकृत्प्लीहानौ फुप्फुस उण्डुको हृदयं वृक्कौ च ॥६॥ आशयास्तु वाताशयः पित्ताशयः श्लेष्माशयो रक्ताशय आमाशयः पक्वाशयो मूत्राशयः स्त्रीणां गर्भाशयोऽष्टम इति ॥७॥ सार्द्धत्रिव्यामान्यन्त्राणि पुंसां स्त्रीणामर्द्धव्यामहीनानि । श्रवणनयनवदनघ्राणगुदमेढ्राणि नव स्रोतांसि नराणां बहिर्मुखान्येतान्येव स्त्रीणामपराणि च त्रीणि द्वे स्तनयोरधस्ताद्रक्तवहञ्च ॥८॥ षोडश कण्डरास्तासाञ्चतस्रः पादयोस्तावत्यो हस्तग्रीवापृष्ठेषु । तत्र हस्तपादगतानां कण्डराणां नखाः प्ररोहा ग्रीवाहृदयनिबन्धिनीनां अधोभागगतानां मेढ्रं श्रोणिपृष्ठनिबन्धिनीनां अधोभागगतानां बिम्बः मूर्द्धोरुवक्षोंऽसपिण्डादीनाञ्च मांससिरास्नाय्वस्थिजालानि प्रत्येकं चत्वारि चत्वारि । तानि मणिबन्धगुल्फसंश्रितानि परस्परनिबद्धानि परस्परसंश्लिष्टानि परस्परगवाक्षितानि चेति । यैर्गवाक्षितमिदं शरीरम् ॥९॥ षट् कूर्च्चास्ते हस्तपादग्रीवामेढ्रेषु । हस्तयोर्द्वौ पादयोर्द्वौ ग्रीवामेढ्रयोरेकैकः । महत्यो मांसरज्जवश्चतस्रः पृष्ठवंशमुभयतः पेशीनिबन्धनार्थं द्वे बाह्ये आभ्यन्तरे च द्वे ॥१०॥ सप्त सेवन्यः । शिरसि विभक्ताः पञ्च जिह्वाशेफसोरेकैका ताः परिहर्त्तव्याः शस्त्रेण ॥११॥ चतुर्द्दशास्थ्नां संघाताः । तेषां त्रयो गुल्फजानुवङ्क्षणेषु । एतेनेतरसक्थिबाहू च व्याख्यातौ । त्रिकशिरसोरेकैकः ॥१२॥ चतुर्द्दशैव सीमन्ताः । ते चास्थिसंघातवद्गणनीया यतस्तैर्युक्ता अस्थिसंघाताः । ये ह्युक्ताः संघातास्तु खल्वष्टादशैकेषाम् ॥१३॥ त्रीणि सषष्टान्यस्थिशतानि वेदवादिनो भाषन्ते । शल्यतन्त्रे तु त्रीण्येव शतानि । तेषां सविंशमस्थिशतं शाखासु । सप्तदशोत्तरं शतं श्रोणिपार्श्वपृष्ठोरःसु । ग्रीवां प्रत्यूर्द्ध्वं त्रिषष्टिः । एवमस्थ्नां त्रीणि शतानि पूर्य्यन्ते । एकैकस्यान्तु पादाङ्गुल्यां त्रीणि त्रीणि तानि पञ्चदश । तलकूर्च्चगुल्फसंश्रितानि दश । पार्ष्ण्यामेकम् । जङ्घायां द्वे । जानुन्येकम् । एकमूराविति । त्रिंशदेवमेकस्मिन् सक्थ्नि भवन्ति । एतेनेतरसक्थिबाहू च व्याख्यातौ । श्रोण्यां पञ्च तेषां गुदभगनितम्बेषु चत्वारि । त्रिकसंश्रितमेकम् । पार्श्वे षट्त्रिंशदेकस्मिन् द्वितीयेऽप्येवम् । पृष्ठे त्रिंशत् । अष्टावुरसि । द्वे अक्षकसंज्ञे । ग्रीवायां नवकम् । कण्ठनाड्यां चत्वारि । द्वे हन्वोः । दन्ता द्वात्रिंशत् । नासायां त्रीणि । एकं तालुनि । गण्डकर्णशङ्खेष्वेकैकम् । षट् शिरसि । एतानि पञ्चविधानि भवन्ति । तद्यथा । कपालरुचकतरुणवलयनलकसंज्ञानि । तेषां जानुनितम्बांसगण्डतालुशङ्खशिरःसु कपालानि । दशनास्तु रुचकानि ॥ घ्राणकर्णग्रीवाक्षिकोषेषु तरुणानि । पाणिपादपार्श्वपृष्ठोदरोरःसु वलयानि । शेषाणि नलकसंज्ञानि ॥१४॥ भवन्ति चात्र ।

"अभ्यन्तरगतैः सारैर्यथा तिष्ठन्ति भूरुहाः ।
अस्थिसारैस्तथा देहा ध्रियन्ते देहिनां ध्रुवम् ।
तस्माच्चिरविनष्टेषु त्वङ्मांसेषु शरीरिणाम् ।
अस्थीनि न विनश्यन्ति साराण्येतानि देहि-
नाम् ।
मांसान्यत्र निबद्धानि सिराभि
अस्थीन्यालम्बनं कृत्वा न शीर्य्यन्ते पतन्ति व
सन्धयस्तु द्विविधाश्चेष्टावन्तः स्थिराश्च ।
"शाखासु हन्वोः कट्याञ्च चेष्टावन्तस्तु सन्ध
शेषास्तु सन्धयः सर्व्वे विज्ञेया हि स्थिरा बुधै
संख्यातस्तु दशोत्तरे द्वे शते । तेषां शाख
स्वष्टषष्टिरेकोनषष्टिः । कोष्ठे । ग्रीवां प्रत्
त्र्यशीतिः । एकैकस्यां पादाङ्गुल्यां त्रयस्त्र
द्वावङ्गुष्ठे ते चतुर्द्दश ।
एवं सप्तदशैकस्मिन् सक्थ्नि भवन्ति । ए
नेतरसक्थिबाहू च व्याख्यातौ । त्रयः कटी
कपालेषु । चतुर्व्विंशतिः पृष्ठवंशे । तावन्त
पार्श्वयोः । उरस्यष्टौ । तावन्त
त्रयः कण्ठे । नाडीषु
दश । दन्तपरिमाणा दन्तमूलेषु । एकः
लके नासायाञ्च । द्वौ वर्त्ममण्डलजौ नेत्राश्र
गण्डकर्णशङ्खेष्वेकैकः । द्वौ हनुसन्धी । द्व
परिष्टाद्भ्रुवोः शङ्खयोश्च । पञ्च शिरःक
लेषु । एको मूर्द्ध्नि ॥ ते एते सन्ध
ऽष्टविधाः ।
वायसतुण्डमण्डलशङ्खावर्त्ताः । तेषामङ्गुलि
बन्धगुल्फजानुकूर्परेषु कोराः सन्धयः ।
वङ्क्षणदशनेषूदूखलाः ।
सामुद्गाः । ग्रीवापृष्ठवंशयोः प्रतराः । शि
कटीकपालेषु तुन्नसेवनी ।
वायसतुण्डाः । कण्ठहृदयनेत्रक्लोमना
मण्डलाः । श्रोत्रशृङ्गाटकेषु शङ्खावर्त्ताः ।
तेषां नामभिरेवाकृतयः प्रायेण व्याख्याता
"अस्थ्नान्तु सन्धयो ह्येते केवलाः
पेशीस्नायुसिराणान्तु सन्धिसंख्या न
नवस्नायुशतानि । तासां शाखासु षट्
द्वे शते त्रिंशच्च कोष्ठे । ग्रीवां प्रत्यूर्द्ध्वं
एकैकस्यान्तु पादाङ्गुल्यां षट्
त्रिंशत् । तावन्त एव तलकूर्च्चगुल्फेषु ।
एव जङ्घायाम् । दश जानुनि ।
ऊरौ । दश वङ्क्षणे ।
सक्थ्नि भवन्ति । एतेनेतरसक्थिबा
व्याख्यातौ । षष्टिः कट्याम् । अशीतिः पृ
पार्श्वयोः षष्टिः । उरसि त्रिंशत् ।
ग्रीवायाम् । मूर्द्ध्नि चतुस्त्रिंशत् ।
स्नायुशतानि व्याख्यातानि ॥१५॥ भवन्ति
"स्नायुश्चतुर्व्विधा विद्यात्तास्तु सर्व्वा निबो

नवत्यो वृत्ताश्च पृथ्व्यश्च शुषिरास्तथा ॥
नवत्यः शाखासु सर्व्वसन्धिषु चाप्यथ ।
ास्तु कण्डराः सर्व्वा विज्ञेयाः कुशलैरिह ॥
पक्वाशयान्तेषु वस्तौ च शुषिराः खलु ।
र्लोरसि तथा पृष्ठे पृथुलाश्च शिरस्य च ॥
ंथा फलकास्तीर्णा बन्धनैर्बहुभिर्युता ।
रक्षमा भवेदप्सु न्रयुक्ता सुसमाहिता ॥
मेव शरीरेऽस्मिन् यावन्तः सन्धयः स्मृताः ।
युभिर्बहुभिर्बद्धास्तेन भारसहा नराः ॥
स्थीनि न वा पेश्यो न शिरा न च सन्धयः ।
ापादितास्तथा ह्यन्ते यथा स्नायुः शरीरिणम् ॥
स्नायूः प्रविजानाति वाह्याश्चाभ्यन्तरास्तथा ।
गूढं शल्यमाहर्त्तुं देहाच्छक्नोति देहिनाम् ॥" ॥

 पेशीशतानि भवन्ति । तासां चत्वारि
तानि शाखासु । कोष्ठे षट्षष्टिः । ग्रीवां
र्ध्वं चतुस्त्रिंशत् एकैकस्यान्तु पादाङ्गुल्यां
स्तिस्रस्ताः पञ्चदश । दश प्रपदे । पादो-
रे कूर्च्चसन्निविष्टास्तावत्य एव । दश गुल्फ-
लयोः । गुल्फजान्वन्तरे विंशतिः । पञ्च
ानुनि । विंशतिरूरौ । दश वङ्क्षणे । शतमेव-
कस्मिन् सक्थ्नि भवन्ति । एतेनेतरसक्थि-
ाहू च व्याख्यातौ । तिस्रः पायौ । एका
ढ्रे । सेवन्यां चापरा । द्वे वृषणयोः । स्फिचोः
च पञ्च । द्वे वस्तिशिरसि । पञ्चोदरे ।
ाभ्यामेका । पृष्ठोर्द्धसंनिविष्टाः पञ्च पञ्च
ीर्घाः । षट् पार्श्वयोः । दश वक्षसि । अक्ष-
ांसौ प्रति समन्तात् सप्त । द्वे हृदयामाश-
योः । [illegible]
[illegible]
 तालुनि । एका जिह्वायाम् । ओष्ठयोर्द्वे ।
ोणायां द्वे । द्वे नेत्रयोः । गण्डयोश्चतस्रः ।
र्णयोर्द्वे । चतस्रो ललाटे । एका शिरसी-
ेवमेतानि पञ्च पेशीशतानि ॥ * ॥
"सिरास्नायुस्थिपर्व्वाणि सन्धयश्च शरीरिणाम् ।
शीभिः संवृतान्यत्र बलवन्ति भवन्त्यतः ॥"
स्त्रीणान्तु विंशतिरधिका । दश तासां स्तनयो-
रेकैकस्मिन् । पञ्च पञ्च यौवने तासां परिवृद्धिः ।
अपत्यपथे चतस्रस्तासां प्रसृतेऽभ्यन्तरतो द्वे
मुखाश्रिते वाह्ये च प्रवृत्ते द्वे । गर्भच्छिद्र-
संश्रितास्तिस्रः । शुक्रार्त्तवप्रवेशिन्यस्तिस्र एव ।
पित्तपक्वाशयमध्ये गर्भाशयो यत्र गर्भस्तिष्ठति ।
तासां बहलपेलवस्थूलाणुपृथुवृत्तह्रस्वदीर्घस्थिर-
मृदुश्लक्ष्णकर्कशभावाः सन्ध्यस्थिसिरास्नायु-
प्रच्छादका यथादेशं स्वभावत एव भवन्ति ॥*
भवति चात्र ।
"पुंसां पेश्यः पुरस्ताद्याः प्रोक्ता लक्षण-
मुष्कजाः ।
स्त्रीणामावृत्य तिष्ठन्ति फलमन्तर्गतं हि ताः ॥"
मर्म्मसिरा धमनीस्रोतसामन्यत्र प्रविभागः ॥
"शङ्खनाभ्याकृतिर्योनिः त्र्यावर्त्ता सा प्रकीर्त्तिता ।
तस्यास्तृतीये त्वावर्त्ते गर्भशय्या प्रतिष्ठिता ॥
यथा रोहितमत्स्यस्य मुखं भवति रूपतः ।
तत्संस्थानां तथारूपां गर्भशय्यां विदुर्बुधाः ॥
आभुग्नोऽभिमुखः शेते गर्भो गर्भाशये स्त्रियाः ।
स योनिं शिरसा याति स्वभावात् प्रसवं प्रति ॥
त्वक्पर्य्यन्तस्य देहस्य योऽयमङ्गविनिश्चयः ।
शल्यज्ञानादृते नैष वर्ण्यतेऽङ्गेषु केषुचित् ॥
तस्मान्निःसंशयं ज्ञानं हर्त्रा शल्यस्य वाञ्छता ।
शोधयित्वा मृतं सम्यक् द्रष्टव्योऽङ्गविनिश्चयः ॥
प्रत्यक्षतो हि यद्दृष्टं शास्त्रदृष्टञ्च यद्भवेत् ।
समासतस्तदुभयं भूयो ज्ञानविवर्द्धनम् ॥"
तस्मात् समस्तगात्रमविषोपहतं अदीर्घव्याधि-
पीड़ितमवर्षशतिकं निःसृष्टान्त्रपुरीषं पुरुष-
मवहन्त्यामापगायां निबद्धं पञ्जरस्थं मुञ्ज-
वल्कलकुशशणादीनामन्यतमेनावेष्टिताङ्गं अप्र-
काशे देशे कोथयेत् । सम्यक्प्रकुथितञ्चोद्धृत्य
ततो देहं सप्तरात्राद्उशीरवालवेणुवल्कलकूर्च्चा-
नामन्यतमेन शनैः शनैरवघर्षयंस्त्वगादीन्
सर्व्वानेव वाह्याभ्यन्तराङ्गप्रत्यङ्गविशेषान् यथो-
क्तान् लक्षयेच्चक्षुषा । श्लोकौ चात्र भवतः ।
"न शक्यश्चक्षुषा द्रष्टुं देहे सूक्ष्मतमो विभुः ।
दृश्यते ज्ञानचक्षुर्भिस्तपश्चक्षुर्भिरेव च ॥
शरीरे चैव शास्त्रे च दृष्टार्थः स्याद्विशारदः ।
दृष्टश्रुताभ्यां सन्देहमवापोह्याचरेत् क्रियाः ॥"

षष्ठोऽध्यायः ।

अथातः प्रत्येकमर्म्मनिर्द्देशं शारीरं व्याख्या-
स्यामः । सप्तोत्तरं मर्म्मशतम् । तानि मर्म्माणि
पञ्चात्मकानि । तद्यथा । मांसमर्म्माणि
सिरामर्म्माणि स्नायुमर्म्माणि । अस्थिमर्म्माणि ।
सन्धिमर्म्माणि चेति । न खलु मांससिरा-
स्नायुस्थिसन्धिव्यतिरेकेणान्यानि मर्म्माणि
भवन्ति यस्मान्नोपलभ्यन्ते । तत्रैकादश मांस-
मर्म्माणि । एकचत्वारिंशत् शिरामर्म्माणि ।
सप्तविंशतिः स्नायुमर्म्माणि । अष्टावस्थि-
मर्म्माणि । विंशतिः सन्धिमर्म्माणि । तदेतत्
सप्तोत्तरं मर्म्मशतम् ॥*॥ तेषामेकादशैकस्मिन्
सक्थ्नि भवन्ति । एतेनेतरसक्थिबाहू च
व्याख्यातौ । उदरोरसोर्द्वादश । चतुर्द्दश पृष्ठे
ग्रीवां प्रत्यूर्द्ध्वं सप्तत्रिंशत् । तत्र सक्थिमर्म्माणि
क्षिप्रतलहृदयकूर्च्चकूर्च्चशिरोगुल्फेन्द्रवस्तिजान्वा-
ण्युर्व्वीलोहिताक्षाणि विटपञ्चेति । एतेनेतर-
सक्थि व्याख्यातम् ॥*॥ उदरोरसोस्तु । गुद-
वस्तिनाभिहृदयस्तनमूलस्तनरोहितापस्तम्भा-
पस्तम्भौ चेति । पृष्ठमर्म्माणि तु कटीकतरुण-
कुकुन्दरनितम्बपार्श्वसन्धिबृहत्यंसफलकान्यंसौ
चेति । बाहुमर्म्माणि तु क्षिप्रतलहृदयकूर्च्चकूर्च्च-
शिरोमणिबन्धेन्द्रवस्तिकूर्परकक्षधरलोहिताक्षाणि
कक्षधरश्चेति । एतेनेतरो बाहुर्व्याख्यातः ।
अत ऊर्द्ध्वं मर्म्माणि जत्रुणो धमन्योऽष्टौ मातृकाः ।
द्वे कृकाटिके । द्वे विधुरे । द्वौ फणौ । द्वाव-
पाङ्गौ । द्वावावर्त्तौ । द्वावुत्क्षेपौ । द्वौ शङ्खौ ।
एका स्थपनी । पञ्च सीमन्ताः । चत्वारि
शृङ्गाटकान्येकोऽधिपतिरिति । तत्र तलहृद-
येन्द्रवस्तिगुदस्तनरोहितानि मांसमर्म्माणि ।
नीलधमनी-मातृकाशृङ्गाटकापाङ्गस्थपनीफण-
स्तनमूलापलापापस्तम्भहृदयनाभिपार्श्वसन्धि-
बृहतीलोहिताक्षोर्व्व्यः सिरामर्म्माणि । आणि-
विटपकक्षधरकूर्च्चकूर्च्चशिरोवस्तिक्षिप्रांसविधु-
रोत्क्षेपाः स्नायुमर्म्माणि । कटीकतरुणनित-
म्बांसफलकशङ्खास्त्वस्थिमर्म्माणि । जानुकूर्पर-
सीमन्ताधिपतिगुल्फमणिबन्धकुकुन्दरावर्त्तकृका-
टिकाश्चेति सन्धिमर्म्माणि । तान्येतानि पञ्च
विकल्पानि मर्म्माणि भवन्ति । तद्यथा । सद्यः-
प्राणहराणि । कालान्तरप्राणहराणि । विशल्य-
घ्नानि । वैकल्यकराणि । रुजाकराणीति । तत्र
सद्यःप्राणहराण्येकोनविंशतिः । कालान्तर-
प्राणहराणि त्रयस्त्रिंशत् । त्रीणि विशल्य-
घ्नानि । चतुश्चत्वारिंशद्वैकल्यकराणि । अष्टौ
रुजाकराणीति ॥ * ॥ भवन्ति चात्र ।
"शृङ्गाटकान्यधिपतिः शङ्खौ कण्ठशिरागुदम् ।
हृदयं वस्तिनाभी च घ्नन्ति सद्योहतानि तु ॥
वक्षोमर्म्माणि सीमन्ततलक्षिप्रेन्द्रवस्तयः ।
कटीकतरुणे सन्धी पार्श्वजौ बृहती च या ॥
नितम्बाविति चैतानि कालान्तरहराणि तु ।
उत्क्षेपौ स्थपनी चैव विशल्यघ्नानि निर्द्दिशेत् ॥
लोहिताक्षाणि जानूर्व्वी कूर्च्चा विटपकूर्पराः ।
कुकुन्दरे कक्षधरे विधुरे सकृकाटिके ॥
अंसांसफलकापाङ्गा नीले मन्ये फणौ तथा ।
वैकल्यकरणान्याहुरावर्त्तौ द्वौ तथैव च ॥
गुल्फौ द्वौ मणिबन्धौ द्वौ द्वे द्वे कूर्च्चशिरांसि च
रुजाकराणि जानीयादष्टावेतानि बुद्धिमान् ।
क्षिप्राणि विद्धमात्राणि घ्नन्ति कालान्तरेण च ॥"
मर्म्माणि नाम मांससिरास्नायुस्थिसन्धिसन्नि-
पातास्तेषु स्वभावत एव विशेषेण प्राणास्तिष्ठन्ति
तस्मान्मर्म्मस्वभिहतास्तांस्तान् भावानापद्यन्ते ।
तत्र सद्यःप्राणहराण्याग्नेयान्यग्निगुणेष्वाशु
क्षीणेषु क्षपयन्ति । कालान्तरप्राणहराणि
सौम्याग्नेयान्यग्निगुणेष्वाशु क्षीणेषु क्रमेण च
सोमगुणेषु कालान्तरेण क्षपयन्ति । विशल्य-
प्राणहराणि वायव्यानि शल्यमुखनिरुद्धो याव-
दन्तर्व्वायुस्तिष्ठति तावज्जीवत्युद्धृतमात्रे तु
शल्ये मर्म्मस्थानाश्रितो वायुर्निष्क्रामति तस्मात्
सशल्यो जीवत्युद्धृतशल्यो म्रियते । वैकल्य-
कराणि सौम्यानि सोमो हि स्थिरत्वाच्छैत्याच्च
प्राणावलम्बनं करोति । रुजाकराण्यग्निवायु-
गुणभूयिष्ठानि विशेषतश्च तौ रुजाकरौ ।
पाञ्चभौतिकीञ्च रुजामाहुरेके । केचिदाहु-
र्म्मांसादीनां पञ्चानामपि समस्तानां विहता-
नाञ्च समवायात् सद्यःप्राणहराणि । एक-
हीनानामन्यतमानां वा कालान्तरप्राणहराणि ।
द्विहीनानां विशल्यप्राणहराणि । त्रिहीनानां
वैकल्यकराणि । एकस्मिन्नेव रुजाकराणीति ।
यतश्चैतानीति मर्म्मस्वपीहैतेषु मांसादि-
समस्तं भवति ॥ * ॥

"चतुर्व्विधा यास्तु शिराः शरीरे
प्रायेण ता मर्म्मसु सन्निविष्टाः।
स्नायुस्थिमांसानि तथैव सन्धीन्
सन्तर्प्य देहं प्रतिपालयन्ति॥
ततः क्षते मर्म्मणि ताः प्रवृद्धः
समन्ततो वायुरभिस्तृणोति।
विवर्द्धमानस्तु स मातरिश्वा
रुजः सुतीव्राः प्रतनोति काये॥
रुजाभिभूतन्तु पुनः शरीरं
प्रलीयते नश्यति चास्य संज्ञा।
अतो हि शल्यं विनिहन्तुमिच्छन्
मर्म्माणि यत्नेन परीक्ष्य कर्षेत्॥"

एतेन शेषं व्याख्यातम्। तत्र सद्यःप्राणहरमन्ते विद्धं कालान्तरेण मारयति। कालान्तरप्राणहरमन्ते विद्धं वैकल्यमापादयति। विशल्यप्राणहरमन्ते विद्धं कालान्तरेण क्लेशयति रुजाञ्च करोति। रुजाकरमतीव्रवेदनं भवति। तत्र सद्यःप्राणहराणि सप्तरात्राभ्यन्तरान्मारयन्ति। कालान्तरप्राणहराणि पक्षान्मासाद्वा। तेष्वपि तु क्षिप्राणि कदाचिदाशु मारयन्ति। विशल्यप्राणहराणि वैकल्यकराणि च कदाचिदत्यभिहतानि मारयन्ति॥ * ॥ अत ऊर्द्धं प्रत्येकशो मर्म्मस्थानान्यनुव्याख्यास्यामः। तत्र पादाङ्गुष्ठाङ्गुल्योर्मध्ये क्षिप्र नाम मर्म्म तत्र विद्धस्याक्षेपकेण मरणम्। मध्यमाङ्गुलीमनुपूर्व्वेण मध्ये पादतलस्य तलहृदयं नाम तत्रापि रुजाभिर्मरणम्। क्षिप्रस्योपरिष्टादुभयतः कूर्च्चो नाम यत्र पादस्य भ्रमणवेपने भवतः। गुल्फसन्धेरध उभयतः कूर्च्चशिरो नाम तत्र रुजाशोफौ। पादजङ्घयोः सन्धाने गुल्फो नाम तत्र रुजस्तब्धपादता खञ्जता वा। पार्ष्णिं प्रति जङ्घामध्ये इन्द्रवस्तिर्नाम तत्र शोणितक्षयेण मरणम्। जङ्घोर्व्वोः सन्धाने जानु नाम तत्र खञ्जता जानुन ऊर्द्धमुभयतस्त्र्यङ्गुलमाणिर्नाम तत्र शोफाभिवृद्धिः स्तब्धसक्थिता च। ऊरुमध्ये ऊर्व्वी नाम तत्र शोणितक्षयात् सक्थिशोषः। ऊर्व्व्या ऊर्द्धमधोवङ्क्षणसन्धेरूरुमूले लोहिताक्षं नाम तत्र लोहितक्षयेण पक्षाघातः। वङ्क्षणवृषणयोरन्तरे विटपं नाम तत्र षाण्ड्यमल्पशुक्रता वा भवति। एवमेतान्येकादशसक्थिमर्म्माणि व्याख्यातानि। एतेनेतरसक्थिबाहू च व्याख्यातौ। विशेषतस्तु यानि सक्थ्नि गुल्फजानुविटपानि तानि बाहौ मणिबन्धकूर्परकक्षधराणि। यथा वङ्क्षणवृषणयोरन्तरे विटपमेवं वक्षःकक्षयोर्मध्ये कक्षधरं तस्मिन् विद्धे त एवोपद्रवाः। विशेषतस्तु मणिबन्धे कुण्ठता। कूर्पराख्ये कुणिः। कक्षधरे पक्षाघातः। एवमेतानि चतुश्चत्वारिंशच्छाखासु मर्म्माणि व्याख्यातानि॥ * ॥ अत ऊर्द्धमुदरोरसोर्म्मर्म्मस्थानान्यनुव्याख्यास्यामः। तत्र वातवर्च्चोनिरसनं स्थूलान्त्रप्रतिबद्धं गुदं नाम मर्म्म तत्र सद्योमरणम्। अल्पमांसशोणितोऽभ्यन्तरतः कट्यां मूत्राशयो वस्तिर्नाम तत्रापि सद्योमरणमश्मरीव्रणादृते। तत्राप्युभयतो भिन्ने न जीवति एकतो भिन्ने मूत्रस्रावी व्रणो भवति। स तु यत्नेनोपक्रान्तो रोहति। पक्वामाशययोर्मध्ये सिराप्रभवा नाभिर्नाम तत्रापि सद्य एव मरणम्। स्तनयोर्म्मध्यमधिष्ठायोरस्यामाशयद्वारं सत्त्वरजस्तमसामधिष्ठानं हृदयं नाम तत्र सद्य एव मरणम्। स्तनयोरधस्तात् द्व्यङ्गुलमुभयतः स्तनमूले नाम मर्म्मणी तत्र कफपूर्णकोष्ठतया कासश्वासाभ्यां म्रियते। स्तनचुचुकयोरूर्द्ध्वं द्व्यङ्गुलमुभयतः स्तनरोहितौ नाम तत्र लोहितपूर्णकोष्ठतया कासश्वासाभ्याञ्च म्रियते। अंसकूटयोरधस्तात् पार्श्वोपरिभागयोरपलापौ नाम तत्र रक्तेन पूयभावं गतेन मरणम्। उभयोर्व्वोरसो नाड्यौ वातवहे अपस्तम्भौ नाम तत्र वातपूर्णकोष्ठतया कासश्वासाभ्याञ्च मरणम्। एवमेतान्युदरोरसोर्द्वादश मर्म्माणि व्याख्यातानि॥ * ॥ अत ऊर्द्धं पृष्ठमर्म्माण्यनुव्याख्यास्यामः। तत्र पृष्ठवंशमुभयतः प्रतिश्रोणिकाण्डमस्थिनी कटीकतरुणे नाम मर्म्मणी तत्र शोणितक्षयात् पाण्डुर्व्विवर्णो हीनरूपश्च म्रियते। पार्श्वजघनबहिर्भागे पृष्ठवंशमुभयतो नातिनिम्ने कुकुन्दरे नाम मर्म्मणी तत्र स्पर्शाज्ञानमधःकाये चेष्टोपघातश्च। श्रोणीकाण्डयोरुपर्य्याशयाच्छादनौ पार्श्वान्तरप्रतिबद्धौ नितम्बौ नाम तत्राधःकायशोषो दौर्ब्बल्याच्च मरणम्। अधःपार्श्वान्तरप्रतिबद्धौ जघनपार्श्वमध्ययोस्तिर्य्यगूर्द्ध्वञ्च जघनात् पार्श्वसन्धी नाम तत्र लोहितपूर्णकोष्ठतया म्रियते। स्तनमूलादुभयतः पृष्ठवंशस्य बृहती नाम तत्र शोणितातिप्रवृत्तिनिमित्तैरुपद्रवैर्म्रियते। पृष्ठोपरि पृष्ठवंशमुभयतस्त्रिकसम्बद्धे अंसफलके नाम तत्र बाह्वोः स्वापः शोषो वा। बाहुमूर्द्धग्रीवामध्येऽंसपीठस्कन्धनिबन्धनावंसौ नाम तत्र स्तब्धबाहुता। एवमेतानि चतुर्द्दश पृष्ठमर्म्माणि व्याख्यातानि॥ * ॥ अत ऊर्द्धं जत्रुगतानि व्याख्यास्यामः। तत्र कण्ठनाडीमुभयतश्चतस्रो धमन्यो द्वे नीले द्वे च मन्ये व्यत्यासेन तत्र मूकता स्वरवैकृतमरसग्राहिता च। ग्रीवायामुभयतश्चतस्रः सिरामातृकास्तत्र सद्योमरणम्। शिरोग्रीवयोः सन्धाने कृकाटिके नाम तत्र चलमूर्द्धता। कर्णपृष्ठतोऽधःसंश्रिते विधुरे नाम तत्र बाधिर्य्यम्। घ्राणमार्गमुभयतः स्रोतोमार्गप्रतिबद्धे अभ्यन्तरतः फणे नाम तत्र गन्धाज्ञानम्। भ्रूपुच्छान्तयोरधोऽक्ष्णोर्बाह्यतोऽपाङ्गौ नाम तत्रान्ध्यं दृष्ट्युपघातो वा। भ्रुवोरुपरिनिम्नयोरावर्त्तौ नाम तत्राप्यान्ध्यं दृष्ट्युपघातश्च। भ्रुवोःपुच्छान्तयोरुपरिकर्णललाटयोर्म्मध्ये शङ्खौ नाम तत्र सद्योमरणम्। शङ्खयोरुपरि केशान्त उत्क्षेपौ नाम तत्र सशल्यो जीवति पाकात् पतितशल्यो वानोद्धृतशल्यः। भ्रुवोर्म्मध्ये स्थपनी नाम तत्रोत्क्षेपवत्। पञ्च सन्धयः शिरसि विभक्ताः सीमन्ता नाम तत्रोन्मादभयचित्तनाशैर्म्मरणम्। घ्राणश्रोत्राक्षिजिह्वासन्तर्पणीनां सिराणां मध्ये सिरासन्निपाताः शृङ्गाटकानि तानि चत्वारि मर्म्माणि तत्रापि सद्योमरणम्। मस्तकाभ्यन्तरोपरिष्टात् सिरासन्धिसन्निपातो रोमावर्त्तोऽधिपतिस्तत्रापि सद्योमरणम्। एवमेतानि सप्तत्रिंशदूर्द्ध्वजत्रुगतानि मर्म्माणि व्याख्यातानि॥ * ॥ भवन्ति चात्र।

"ऊर्व्व्यः शिरांसि विटपे च सकक्षपार्श्वे
एकैकमङ्गुलमितं स्तनपूर्व्वमूलम्।
विद्ध्यङ्गुलद्वयमितं मणिबन्धगुल्फं
त्रीण्येव जानु-सपरं सह कूर्पराभ्याम्॥
हृद्वस्तिकूर्च्चगुदनाभि वदन्ति मूर्द्ध्नि
चत्वारि पञ्च च गले दश यानि च द्वे।
तानि स्वपाणितलकुञ्चितसम्मितानि
शेषाण्यवेहि परिविस्तरतोऽङ्गुलार्द्धम्॥
एतत् प्रमाणमभिवीक्ष्य वदन्ति तज्ज्ञाः
शस्त्रेण कर्म्मकरणं परिहृत्य सद्यः।
पार्श्वाभिघातितमपीह निहन्ति तद्धि
तस्माद्धि मर्म्मसदनं परिवर्ज्जनीयम्॥
छिन्नेषु पाणिचरणेषु सिरा नराणां
सङ्कोचमीयुरसृगल्पमतो निरेति।
प्राप्यातिमात्रमनुयान्ति मनुष्याः
संछिन्नशाखतरुवन्निधनं न यान्ति॥
क्षिप्रेषु तत्र सतलेषु हतेषु रक्तं
गच्छत्यतीव पवनश्च रुजं करोति।
एवं विनाशमुपयान्ति हि तत्र विद्धा
वृक्षा इवायुधनिपातनिकृत्तमूलाः॥
तस्मादनयोरभिहतस्य तु पाणिपादं
छेत्तव्यमाशु मणिबन्धनगुल्फदेशे।
मर्म्माणि शल्यविषयार्द्धमुदाहरन्ति
यस्माच्च मर्म्मसु हता न भवन्ति सद्यः।
जीवन्ति तत्र यदि वैद्यगुणेन केचित्
ते प्राप्नुवन्ति विकलत्वमसंशयं हि।
सम्भिन्नजर्ज्जरितकोष्ठशिरःकपाला
जीवन्ति शस्त्रनिहतैश्च शरीरदेशैः।
छिन्नैश्च सक्थिभुजपादकरैरशेषैर्
येषां न मर्म्मपतिता विविधाः प्रहाराः॥

सोममारुततेजांसि रजःसत्त्वतमांसि च।
मर्म्मसु प्रायशः पुंसां भूतात्मा चावतिष्ठते।
मर्म्मस्वभिहतास्तस्मान्न जीवन्ति शरीरिणः।
इन्द्रियार्थेष्वसंप्राप्तिर्म्मनोबुद्धिविपर्य्ययः।
रुजश्च विविधास्तीव्रा भवन्त्याशुहरे हते।
हते कालान्तरघ्ने तु ध्रुवो धातुक्षयो नृणाम्।
ततो धातुक्षयाज्जन्तुर्व्वेदनाभिश्च नश्यति।
हते वैकल्यजनने केवलं वैद्यनैपुणात्।
शरीरं क्रियया युक्तं विकलत्वमवाप्नुयात्।
विशल्यघ्नेषु विज्ञेयं पूर्व्वोक्तं यच्च कारणम्।
रुजाकराणि मर्म्माणि क्षतानि विविधा रुजः।
कुर्व्वन्त्यन्ते च वैकल्यं कुवैद्यवशगो यदि।
छेदभेदाभिघातेभ्यो दहनाद्दारणादपि।
उपघातं विजानीयान्मर्म्मणान्तुल्यलक्षणम्।

मर्माभिघातस्तु न कश्चिदस्ति
योऽल्पात्ययो वापि निरत्ययो वा।
प्रायेण मर्मस्वभिताडितास्तु
वैकल्यमृच्छन्त्यथवा म्रियन्ते॥
मर्माण्यधिष्ठाय हि ये विकारा
मूर्च्छन्ति काये विविधा नराणाम्।
प्रायेण ते कृच्छ्रतमा भवन्ति
नरस्य यत्नैरपि साध्यमानाः॥ ॥"

सप्तमोऽध्यायः।

अथातः सिरावर्णविभक्तिनाम शारीरं व्याख्यास्यामः। सप्त सिराशतानि भवन्ति। याभिरिदं शरीरमारामं इव जलहारिणीभिः केदार इव च कुल्याभिरुपस्निह्यते अनुगृह्यते चाकुञ्चनप्रसारणादिभिर्विशेषैः। द्रुमपत्रसेवनीनामिव च तासां प्रतानास्तासां नाभिर्मूलं ततश्च प्रसरन्त्यूर्द्ध्वमधस्तिर्यक् च ॥१॥ भवन्ति चात्र।

"यावत्यस्तु सिराः काये सम्भवन्ति शरीरिणाम्
नाभ्यां सर्वा निबद्धास्ताः प्रतन्वन्ति समन्ततः॥
नाभिस्थाः प्राणिनां प्राणाः प्राणान्नाभिर्व्युपाश्रिता।
सिराभिरावृता नाभिश्चक्रनाभिरिवारकैः॥"

तासां मूलसिराश्चत्वारिंशत्। तासां वातवाहिन्यो दश। पित्तवाहिन्यो दश। कफवाहिन्यो दश। दश रक्तवाहिन्यः। तासान्तु वातवाहिनीनां वातस्थानगतानां पञ्चसप्ततिशतं भवति। तावत्य एव पित्तवाहिन्यः। पित्तस्थाने कफवाहिन्यश्च। कफस्थाने रक्तवाहिन्यश्च। यकृत्प्लीह्नोरेवमेतानि सप्तसिराशतानि तत्र वातवाहिन्यः सिरा एकस्मिन् सक्थ्नि पञ्चविंशतिः। एतेनेतरसक्थिबाहू च व्याख्यातौ। विशेषतस्तु कोष्ठे चतुस्त्रिंशत्तासां गुदमेढ्राश्रिताः। श्रोण्यामष्टौ। द्वे द्वे पार्श्वयोः। षट् पृष्ठे। तावत्य एव चोदरे। दश वक्षसि। एकचत्वारिंशज्जत्रुण ऊर्द्ध्वम्। तासां चतुर्दश ग्रीवायाम्। कर्णयोश्चतस्रः। नव जिह्वायाम्। षट् नासिकायाम्। अष्टौ नेत्रयोः। एवमेतत् पञ्चसप्तत्यधिकशतं वातवहानां सिराणां व्याख्यातम्। एष एव विभागः शेषाणामपि। विशेषतस्तु पित्तवाहिन्यो नेत्रयोर्दश। कर्णयोर्द्वे। एवं रक्तवहाः कफवहाश्च। एवमेतानि सप्तसिराशतानि सविभागानि व्याख्यातानि॥ ॥ भवन्ति चात्र।

"क्रियाणामप्रतीघातममोहं बुद्धिकर्मणाम्।
करोत्यन्यान् गुणांश्चापि स्वाः सिराः पवनश्चरन्॥
यदा तु कुपितो वायुः स्वाः सिराः प्रतिपद्यते।
तदास्य विविधा रोगा जायन्ते वातसम्भवाः॥
भ्राजिष्णुतामन्नरुचिमग्निदीप्तिमरोगताम्।
संसर्पत् स्वाः सिराः पित्तं कुर्याच्चान्यान् गुणानपि॥
यदा प्रकुपितं पित्तं सेवते स्ववहाः सिराः।
तदास्य विविधा रोगा जायन्ते पित्तसम्भवाः॥
स्नेहमङ्गेषु सन्धीनां स्थैर्य्यं बलमुदीर्णताम्।
करोत्यन्यान् गुणांश्चापि बलासः स्वाः सिराश्चरन्॥
यदा तु कुपितः श्लेष्मा स्वाः सिराः प्रतिपद्यते।
तदास्य विविधा रोगा जायन्ते श्लेष्मसम्भवाः॥
धातूनां पूरणं वर्णं स्पर्शज्ञानमसंशयम्।
स्वाः सिराः सञ्चरद्रक्तं कुर्य्याच्चान्यान् गुणानपि॥
यदा तु कुपितं रक्तं सेवते स्ववहाः सिराः।
तदास्य विविधा रोगा जायन्ते रक्तसम्भवाः॥
न हि वातं सिराः काश्चिन्न पित्तं केवलं तथा।
श्लेष्माणं वा वहन्त्येता अतः सर्ववहाः स्मृताः॥
प्रदुष्टानां हि दोषाणामुच्छ्रितानां प्रधावताम्।
ध्रुवमुन्मार्गगमनमतः सर्ववहाः स्मृताः॥
तत्रारुणा वातवहाः पूर्य्यन्ते वायुना सिराः।
पित्ताद् उष्णाश्च नीलाश्च शीता गौर्य्यः स्थिराः कफात्।
असृग्वहास्तु रोहिण्यः सिरा नात्युष्णशीतलाः॥
अत ऊर्द्ध्वं प्रवक्ष्यामि न विध्येद् याः सिरा भिषक्।
वैकल्यं मरणञ्चापि व्यधात्तासां ध्रुवं भवेत्॥
सिराशतानि चत्वारि विद्याच्छाखासु बुद्धिमान्।
षट्त्रिंशञ्च शतं कोष्ठे चतुःषष्टिञ्च मूर्द्धनि॥
शाखासु षोडश सिराः कोष्ठे द्वात्रिंशदेव तु।
पञ्चाशज्जत्रुणश्चोर्द्ध्वमवेध्याः परिकीर्त्तिताः॥"

तत्र सिराशतमेकैकस्मिन् सक्थ्नि भवति तासां जालन्धरा त्वेका तिस्रश्चाभ्यन्तराः। तत्रोर्वीसञ्ज्ञे द्वे लोहिताक्षसञ्ज्ञा चैकैतास्त्ववेध्याः। एतेनेतरसक्थिबाहू च व्याख्यातावेवमशस्त्रकृत्याः षोडश शाखासु। द्वात्रिंशत् श्रोण्यां तासामष्टावशस्त्रकृत्याः। द्वे द्वे विटपयोः कटीकतरुणयोश्च। अष्टावष्टावेकैकस्मिन् पार्श्वे तासामेकैकामूर्द्ध्वगां परिहरेत्। पार्श्वसन्धिगते च द्वे। चतस्रो विंशतिश्च पृष्ठवंशमुभयतस्तासामूर्द्ध्वगामिन्यौ द्वे द्वे परिहरेद् बृहती सिरे। तावत्य एवोदरे तासां मेढ्रोपरि रोमराजीमुभयतो द्वे द्वे परिहरेत्। चत्वारिंशद्वक्षसि तासां चतुर्दशाशस्त्रकृत्याः। हृदये द्वे द्वे। द्वे स्तनमूले। स्तनरोहितापलापस्तम्भेषूभयतोऽष्टौ। एवं द्वात्रिंशदशस्त्रकृत्याः पृष्ठोदरोरःसु भवन्ति। चतुःषष्टिशिराशतं जत्रुण ऊर्द्ध्वं भवति तत्र षट्पञ्चाशच्छिरोधरायां तासामष्टौ चतस्रश्च मर्म्मसञ्ज्ञाः परिहरेत्। द्वे कृकाटिकयोः। द्वे विधुरयोः। एवं ग्रीवायां षोडशाव्यध्याः। हन्वोरुभयतोऽष्टावष्टौ तासान्तु सन्धिधमन्यौ द्वे द्वे परिहरेत्। षट्त्रिंशज्जिह्वायां तासामधः षोडशाशस्त्रकृत्याः रसवहे द्वे वाग्वहे च द्वे। द्विर्द्वादश नासायां तासामौपनासिक्यश्चतस्रः परिहरेत्। तासामेव च तालुन्येकां मृदावुद्देशे। अष्टात्रिंशदुभयोर्नेत्रयोस्तासामेकैकामपाङ्गयोः परिहरेत्। कर्णयोर्दश तासां शब्दवाहिनीमेकैकां परिहरेत्। नासानेत्रगतास्तु ललाटे षष्टिस्तासां केशान्तानुगताश्चतस्रः। आवर्त्तयोरेकैका स्थपन्यां चैका परिहर्त्तव्या। शङ्खयोर्दश तासां शङ्खसन्धिगतामेकैकां परिहरेत्। द्वादश मूर्द्ध्नि तासामुत्क्षेपयोर्द्वे परिहरेत् सीमन्तेष्वेकैकामधिपतावेकामिति। एवमशस्त्रकृत्याः पञ्चाशज्जत्रुण ऊर्द्ध्वमिति। भवन्ति चात्र।

"व्याप्नुवन्त्यभितो देहं नाभितः प्रसृताः सिराः।
प्रतानाः पद्मिनीकन्दाद्बिसादीनां यथा जलम्॥"

अष्टमोऽध्यायः।

अथातः सिराव्यधविधिशारीरं व्याख्यास्यामः। बालस्थविररूक्षक्षतक्षीणभीरुपरिश्रान्तमद्याध्वकर्षितमत्तवान्तविरिक्तास्थापितानुवासितजागरितक्लीबकृशगर्भिणीनां कासश्वासशोषप्रवृद्धज्वराक्षेपकपक्षाघातोपवासपिपासामूर्च्छाप्रपीडितानाञ्च सिरां न विध्येत्। याश्चाव्यध्या व्यध्याश्चादृष्टा दृष्टाश्चायन्त्रिता यन्त्रिताश्चानुत्थिता इति। शोणितावसेकसाध्याश्च विकाराः प्रागभिहितास्तेषु पाकेष्वन्येषु चानुक्तेषु यथाभ्यासं यथान्यायञ्च सिरां विध्येत्। प्रतिषिद्धानामपि च विषोपसर्गे आत्ययिकेषु सिराव्यधनमप्रतिषिद्धम्। तत्र स्निग्धस्विन्नमातुरं यथादोषप्रत्यनीकं द्रवप्रायमन्नं भुक्तवन्तं यवागूं पीतवन्तं वा यथाकालमुपस्थाप्यासीनं स्थितं वा प्राणानबाधमानो वस्त्रपट्टचर्म्मान्तर्वल्कललतानामन्यतमेन यन्त्रयित्वा नातिगाढं नातिशिथिलं शरीरप्रदेशमासाद्य यथोक्तं शस्त्रं गृहीत्वा सिरां विध्येत्॥ ७॥

"नैवातिशीते नात्युष्णे न प्रवाते न चाभ्रिते।
सिराणां व्यधनं कार्य्यमरोगे वा कदाचन॥"

तत्र व्यध्यसिरं पुरुषं प्रत्यादित्यमुखमरत्निमात्रोच्छ्रिते उपवेश्यासने सक्थ्नोराकुञ्चितयोर्निवेश्य कूर्परसन्धिद्वयस्योपरि हस्तावन्तर्गूढाङ्गुष्ठकृतमुष्टी मन्ययोः स्थापयित्वा यन्त्रणशाटकं ग्रीवामुष्ट्योरुपरि परिक्षिप्यान्येन पुरुषेण पश्चात् स्थितेन वामहस्तेनोत्तानेन शाटकान्तद्वयं ग्राहयित्वा ततो वैद्यो ब्रूयाद्दक्षिणहस्तेन सिरोत्थापनार्थं नात्यायतशिथिलं यन्त्रमावेष्टयत्वसृक्स्रावणार्थं यन्त्रं पृष्ठमध्ये च पीडयेदिति कर्म्म पुरुषश्च वायुपूर्णमुखं स्थापयेदेष उत्तमाङ्गगतानामन्तर्मुखवर्ज्यानां सिराणां व्यधने यन्त्रणविधिः। तत्र पादव्यध्यसिरस्य पादं समे स्थाने सुस्थिरं स्थापयित्वान्यं पादमीषत्सङ्कुचितमुच्चैः कृत्वा व्यध्यपादं जानुसन्धेरधः शाटकेनावेष्ट्य हस्ताभ्यां प्रपीड्य गुल्फं व्यध्यप्रदेशस्योपरि चतुरङ्गुलं प्लोतादीनामन्यतमेन बद्ध्वा पादसिरां विध्येत्। अथोपरिष्टाद्धस्तौ गूढाङ्गुष्ठकृतमुष्टी सम्यगासने स्थापयित्वा सुखोपविष्टस्य पूर्ववद्यन्त्रं बद्ध्वा हस्तसिरां विध्येत्। गृध्रसीविश्वाच्योः सङ्कुचितजानुकूर्परः स्यात्। श्रोणीपृष्ठस्कन्धेषून्नामितपृष्ठस्यावाक्शिरस्कस्य उपविष्टस्य विस्फूर्जितपृष्ठस्य विध्येत्। उदरोरसोः प्रसारितोरस्कस्योन्नामितशिरस्कस्य

विस्फूर्जितदेहस्य बाहुभ्यामवलम्ब्यमानदेहस्य पार्श्वयोः। अवनामितमेढ्रस्य मेढ्रे। उन्नामितविदष्टजिह्वाग्रस्याधोजिह्वायाम्। अतिव्यात्ताननस्य तालुनि दन्तमूलेषु च। एवं दन्त्योपायानन्यांश्च सिरोत्थापनहेतून् बुद्ध्यावेक्ष्य शरीरवशेन व्याधिवशेन च विदध्यात्। मांसलेष्ववकाशेषु यवमात्रं शस्त्रं निदध्यादतोऽन्येष्वर्द्धयवमात्रं व्रीहिमात्रं वा व्रीहिमुखेन। अस्थ्नामुपरि कुठारिकया विध्येदर्द्धयवमात्रम्। भवन्ति चात्र।

"व्यभ्रे वर्षासु विध्येत ग्रीष्मकाले तु शीतले।
हेमन्तकाले मध्याह्ने शस्त्रकालास्त्रयः स्मृताः॥
सम्यक् शस्त्रनिपातेन धारया या स्रवेदसृक्।
मुहूर्त्तं रुद्धा तिष्ठेच्च सुविद्धां तां विनिर्द्दिशेत्॥
यथा कुसुम्भपुष्पेभ्यः पूर्वं स्रवति पीतिका।
तथा सिरासु विद्धासु दुष्टमग्रे प्रवर्त्तते॥
मूर्च्छितस्यातिभीतस्य श्रान्तस्य तृषितस्य च।
न वहन्ति सिरा विद्धास्तथानुत्थितयन्त्रिताः।
क्षीणस्य बहुदोषस्य मूर्च्छया पीडितस्य च।
भूयोऽपराह्णे विस्राव्या सापरेद्युस्त्र्यहेऽपि वा॥
रक्तं सशेषदोषन्तु कुर्य्यादपि विचक्षणः।
न चातिप्रसुतं कुर्य्याच्छेषं संशमनैर्जयेत्॥
बलिनो बहुदोषस्य वयःस्थस्य शरीरिणः।
परं प्रमाणमिच्छन्ति प्रस्थं शोणितमोक्षणे॥"

तत्र पाददाहपादहर्षावबाहुकचिप्पविसर्पवातशोणितवातकण्टकविचर्चिकापाददारीप्रभृतिषु क्षिप्रमर्म्मण उपरिष्टात् द्व्यङ्गुले व्रीहिमुखेन सिरां विध्येत्। श्लीपदे तच्चिकित्सिते यथा वक्ष्यते। क्रोष्टुकशिरःखञ्जपङ्गुलवातवेदनासु जङ्घायां गुल्फस्योपरि चतुरङ्गुले। अपच्यामिन्द्रवस्तेरधस्ताद्द्व्यङ्गुले। जानुसन्धेरुपर्य्यधो वा चतुरङ्गुले गृध्रस्याम्। ऊरुमूलसंश्रितान्तु गलगण्डे। एतेनेतरसक्थिबाहू च व्याख्यातौ॥ विशेषतस्तु वामबाहौ कूर्परसन्धेरभ्यन्तरतो बाहुमध्ये प्लीह्नि कनिष्ठिकानामिकयोर्मध्ये वा। एवं दक्षिणबाहौ यकृद्दाल्ये कफोदरे चैतामेव च कासश्वासयोरप्यादिशन्ति। गृध्रस्यामिव विश्वाच्याम्। श्रोणिप्रति समन्तात् द्व्यङ्गुले प्रवाहिकायां शूलिन्यां परिकर्त्तिकोपदंशशूकदोषशुक्रव्यापत्सु मेढ्रमध्ये। वृषणयोः पार्श्वे मूत्रवृद्ध्याम्। नाभेरधश्चतुरङ्गुले सेवन्या वामपार्श्वे दकोदरे वामपार्श्वे कक्षास्तनयोरन्तरेऽन्तर्विद्रधौ पार्श्वशूले च। बाहुशोषावबाहुकयोरप्येके वदन्त्यंसयोरन्तरे। त्रिकसन्धिमध्यगतां तृतीयके चतुर्थके अधःस्कन्धसन्धिगतामन्यतरपार्श्वसंस्थितामपस्मारे। हनुसन्धिमध्यगतामपस्मारे। शङ्खकेशान्तसन्धिगतामुरोऽपाङ्गललाटेषु चोन्मादेऽपस्मारे च। जिह्वारोगेष्वधोजिह्वायां दन्तव्याधिषु च तालुनि तालव्येषु। कर्णयोरुपरि समन्तात् कर्णशूले तद्रोगेषु च। गन्धाग्रहणे नासारोगेषु च नासाग्रे तिमिराभिष्यन्दप्रभृतिष्वक्षिरोगेषूपनासिके। ललाट्या

अपाङ्ग्या वा एव शिरोरोगाधिमन्थप्रभृतिषु रोगेष्विति॥ *॥ अत ऊर्द्ध्वं दुष्टव्यधनं व्याख्यास्यामः। तत्र दुर्विद्धातिविद्धा कुञ्चिता पिच्चिता कुट्टिता अप्रसुता अत्युदीर्णा अन्तेऽभिहता परिशुष्का कूणिता वेपिता अनुत्थितविद्धा शस्त्रहता तिर्य्यग्विद्धा अविद्धा अव्याध्या विद्रुता धेनुका पुनः पुनर्विद्धा सिरास्नाय्वस्थिसन्धिमर्म्मसु चेति विंशतिर्दुष्टव्यधाः। तत्र या सूक्ष्मशस्त्रविद्धा न व्यक्तमसृक् स्रवति रुजा शोफवती च सा दुर्विद्धा। प्रमाणातिरिक्तविद्धायामन्तः प्रविशति शोणितं शोणितातिप्रवृत्तिर्वा सातिविद्धा। कुञ्चितायामप्येवम्। कुण्ठशस्त्रप्रमथिता पृथुलीभावमापन्ना पिच्चिता। अनासादिता पुनःपुनरन्तयोश्च बहुशः शस्त्राभिहता कुट्टिता। शीतभयमूर्च्छाभिरप्रवृत्तशोणिता अप्रसुता। तीक्ष्णा महामुखशस्त्रविद्धा अत्युदीर्णा। अल्परक्तस्राविण्यन्ते विद्धा अन्तेऽभिहता। क्षीणशोणितस्यानिलपूर्णा परिशुष्का। चतुर्भागावसादिता किञ्चित्प्रवृत्तशोणिता कूणिता। दुःस्थानबन्धनाद्वेपमानायाः शोणितसम्मोहो भवति सा वेपिता। अनुत्थितविद्धायामप्येवम्। छिन्नातिप्रवृत्तशोणिता क्रियासङ्गकरी शस्त्रहता। तिर्य्यक् प्रणिहितशस्त्रा किञ्चिच्छेषा तिर्य्यग्विद्धा। बहुशः क्षता हीनशस्त्रप्रणिधानेनाविद्धा। अशस्त्रकृत्या अव्याध्या। अनवस्थितविद्धा विद्रुता। प्रदेशस्य बहुशोऽवघट्टनादारोप्यव्यधा मुहुर्मुहुःशोणितस्रवा धेनुका। सूक्ष्मशस्त्रव्यधनाद्बहुशो विच्छिद्य पुनःपुनर्विद्धा। स्नायुस्थिसिरासन्धिमर्म्मसु विद्धा वा रुजां शोषं वैकल्यं मरणं वापादयति॥ *॥ भवन्ति चात्र।

"सिरासु शिक्षितो नास्ति चला ह्येताः स्वभावतः।
मत्स्यवत् परिवर्त्तन्ते तस्माद्यत्नेन ताडयेत्॥
अज्ञानता गृहीते तु शस्त्रे कायनिपातिते।
भवन्ति व्यापदश्चैता बहवश्चाप्युपद्रवाः॥
स्नेहादिभिः क्रियायोगैर्न तथा लेपनैरपि।
यान्त्याशु व्याधयः शान्तिं यथा सम्यक् सिराव्यधात्॥
सिराव्यधश्चिकित्सार्द्धं शल्यतन्त्रे प्रकीर्त्तितः।
यथा प्रणिहितः सम्यक् वस्तिः कायचिकित्सिते॥"

तत्र स्निग्धस्विन्नवान्तविरिक्तास्थापितानुवासितसिराविद्धैः परिहर्त्तव्यानि। क्रोधायासमैथुनदिवास्वप्नवाग्व्यायामयानाध्ययनासनचङ्क्रमणशीतवातातपविरुद्धासात्म्याजीर्णान्याबललाभादामासमेके मन्यन्ते॥ *॥ एतेषां विस्तरमुपरिष्टाद्वक्ष्यामः। भवतश्चात्र।

"सिराविषाणतुम्बैस्तु जलौकाभिः पदैस्तथा।
अवगाढं यथापूर्वं निर्हरेद्दुष्टशोणितम्॥
अवगाढे जलौका स्यात् प्रच्छनं पिण्डिते हितम्।
सिराङ्गव्यापके रक्ते शृङ्गालाबुस्त्वचि स्थिते॥"

नवमोऽध्यायः।

अथातो धमनीव्याकरणं ... स्यामः। चतुर्विंशतिर्धमन्यो अभिहिताः। तत्र केचिदाहुः स्रोतसामविभागः सिराविकारा एव स्रोतांसि चेति। तत्तु न सम्यक्। अन्या धमन्यः स्रोतांसि च सिराभ्यः ... त्वाप्तमनियमात् ... ... तत्तु परस्परमविदिक्षयात् ...

... भवति। तासान्तु नाभिप्रभवाणां ... ऊर्द्ध्वगा दश दश ... ... गाः। ऊर्द्ध्वगाः ...

... पानभिवहन्त्यः शरीरं धारयन्ति। ... ... मभिप्रपन्नास्त्रिधा जायन्ते तास्त्रिंशत्। ... वातपित्तकफशोणितरसान् द्वे द्वे ... शब्दरूपरसगन्धानष्टाभिर्गृह्णीते। ... च द्वाभ्यां घोषं करोति ... प्रतिबुध्यते। द्वे चाश्रुवाहिन्यौ। ... वहतस्तेन मन्ये ते एव ... समभिवहतः। तास्त्वेतास्त्रिंशत् ... व्याख्याताः। एताभिरूर्द्ध्वं ... पृष्ठोरःस्कन्धग्रीवाबाहवो धार्य्यन्ते ... च॥ *॥ भवति चात्र।

"ऊर्द्ध्वं गतास्तु कुर्वन्ति कर्म्माण्य...
अधोगमास्तु वक्ष्यामि ... ...

वहन्ति। ... ... मेवान्नपानरसं ... ... वहन्त्यः शरीरं ... ... तिर्य्यग्गतानां रसस्थानमभिपूरयन्ति ... पुरीषस्वेदांश्च ... ... त्रिधा जायन्ते तास्त्रिंशत्। ... कफशोणितरसान् द्वे द्वे वहतः ता... वाहिन्यावन्त्राश्रिते तोयवहे द्वे ... प्रपन्ने मूत्रवहे द्वे शुक्रवहे द्वे ... द्वे विसर्गाय ते एव ... मार्त्तवसंज्ञम्। द्वे वर्चोनिरसन्यौ ... प्रतिबद्धे। अष्टावन्यास्तिर्य्यग्गानां स्वेदमर्पयन्ति। तास्त्वेतास्त्रिंशत् व्याख्याताः। एताभिरधोनाभिः ... मूत्रपुरीषगुदवस्तिमेढ्रसक्थीनि ... न्ते च॥ *॥ भवति चात्र।

"अधोगमास्तु कुर्व्वन्ति कर्म्माण्य...
तिर्य्यग्गाः सम्प्रवक्ष्यामि कर्म्म तासां ...

तिर्य्यग्गानान्तु चतसृणां धमनीनामेकैका शतधा सहस्रधा चोत्तरोत्तरं विभज्यन्ते यास्ताभिरिदं शरीरं गवाक्षितं ... तत्र। तासां मुखानि रोमकूपप्रतिबद्धानि स्वेदमभिवहन्ति रसञ्चापि सन्तर्पयन्ति

ह नाभ्यङ्गपरिषेकावगाहालेपनवीर्य्याण्यन्त
ीरमभिप्रपद्यन्ते त्वचि विपक्वानि। तैरेव
ंसुखमसुखं वा गृह्णाति। तास्त्वेताश्चतस्रो
न्य: सर्व्वाङ्गगता: सविभागा व्याख्याता:।
तथाच।
था स्वभावत: खानि मृणालेषु बिसेषु च।
मनीनां तथा खानि रसो यैरुपचीयते॥
पञ्चाभिभूतास्त्वथ पञ्चकृत्व:
पञ्चेन्द्रियं पञ्चसु भावयन्ति।
पञ्चेन्द्रियं पञ्चसु भावयित्वा
पञ्चत्वमायान्ति विनाशकाले॥"*॥

त ऊर्द्ध्वं स्रोतसां मूलविद्धलक्षणमुपदेक्ष्याम:। नि तु प्राणान्नोदकरसरक्तमांसमेदोमूत्र-ीषशुक्रार्त्तववहानि येष्वधिकार एकेषां हूनि। एतेषां विशेषा बहव:। तत्र प्राण-हे द्वे तयोर्मूलं हृदयं रसवाहिन्यश्च धमन्य:। र विद्धस्य क्रोशनविनमनमोहनभ्रमणवेपनानि रणं वा भवति। अन्नवहे द्वे तयोर्मूलमामा-योऽन्नवाहिन्यश्च धमन्यस्तत्र विद्धस्याध्मानं लानाहोऽन्नद्वेषो छर्द्दि: पिपासान्ध्यं मरणं वा। दकवहे द्वे तयोर्मूलं तालुक्लोम च। तत्र द्धस्य पिपासा सद्योमरणञ्च। रसवहे द्वे योर्मूलं हृदयं रसवाहिन्यश्च धमन्यस्तत्र द्धस्य शोष: प्राणवहविद्धवच्च मरणं तल्लि-ानि च। रक्तवहे द्वे तयोर्मूलं यकृत्-ीहानौ रक्तवाहिन्यश्च धमन्यस्तत्र विद्धस्य ावाङ्गता ज्वरो दाह: पाण्डुता शोणितागि-मनं रक्तनेत्रता चेति। मांसवहे द्वे तयो-ूलं स्नायुत्वचं रक्तवहाश्च धमन्यस्तत्र विद्धस्य ्वयथुर्मांसशोष: सिराग्रन्थयो मरणम्। मेदो-हे द्वे तयोर्मूलं कटीवृक्कौ च तत्र विद्धस्य ्वेदागमनं स्निग्धाङ्गता तालुशोष: स्थूलशोफता पिपासा च। मूत्रवहे द्वे तयोर्मूलं वस्ति-र्मेढ्रञ्च तत्र विद्धस्यानद्धवस्तिता मूत्रनिरोध: ्तब्धमेढ्रता च। पुरीषवहे द्वे तयोर्मूलं पक्वा-ायो गुदञ्च तत्र विद्धस्यानाहो दुर्गन्धता ग्रथि-ान्त्रता च। शुक्रवहे द्वे तयोर्मूलं स्तनौ ृषणौ च तत्र विद्धस्य क्लीवता चिरात् प्रसेको क्तयुक्तता च। आर्त्तववहे द्वे तयोर्मूलं ्भाशय: आर्त्तववाहिन्यश्च धमन्यस्तत्र विद्धाया ्ध्यात्वं मैथुनासहिष्णुत्वमार्त्तवनाशश्च। सेवनी च्छेदाद्रुजाप्रादुर्भाव:। वस्तिगुदविद्धलक्षणं ागुक्तमिति। स्रोतोविद्धन्तु प्रत्याख्यायोपचरे-द्धृतशल्यन्तु क्षतविधानेनोपचरेत्।

"मूलात् खादन्तरं देहे प्रसृतन्त्वभिवाहि यत्।
स्रोतस्तदिति विज्ञेयं सिराधमनिवर्ज्जितम्॥"

दशमोऽध्याय:।

अथातो गर्भिणीव्याकरणं शारीरं व्याख्यास्याम:। गर्भिणी प्रथमदिवसात् प्रभृति नित्यं प्रहृष्टा शुच्यलङ्कृता शुक्लवसना शान्तिमङ्गलदेवताब्राह्मणगुरुपरा च भवेन्मलिनविकृतहीनगात्राणि न स्पृशेद्दुर्गन्धदुर्दर्शनानि परिहरेदुद्वेजनीयाश्च कथा: शुष्कं पर्य्युषितं कुथितं क्लिन्नं चान्नं नोपभुञ्जीत। बहिर्निष्क्रमणं शून्यागारचैत्यश्मशानवृक्षाश्रयान् क्रोधभयसङ्कराश्च भारानुच्चैर्भाष्यादिकं परिहरेद्यानि च गर्भं व्यापादयन्ति। न चाभीक्ष्णं तैलाभ्यङ्गोत्सादनादीनि निषेवेत। न चायासयेच्छरीरं पूर्व्वोक्तानि च परिहरेत्। शयनासनं मृद्वास्तरणं नात्युच्चमपाश्रयोपेतमसम्बाधं विदध्यात्। हृद्यं द्रवं मधुरप्रायं स्निग्धं दीपनीयसंस्कृतञ्च भोजनं भोजयेत् सामान्यमेतदा प्रसवात्॥*॥ विशेषतस्तु गर्भिणी प्रथमद्वितीयतृतीयमासेषु मधुरशीतद्रवप्रायमाहारमुपसेवेत। विशेषतस्तु तृतीये षष्टिकौदनं पयसा भोजयेच्चतुर्थे दध्ना पञ्चमे पयसा षष्ठे सर्पिषा चेत्येके। चतुर्थे पयोनवनीतसंसृष्टमाहारयेज्जाङ्गलमांससहितं हृद्यमन्नं भोजयेत्। पञ्चमे क्षीरसर्पि:संसृष्टम्। षष्ठे श्वदंष्ट्रासिद्धस्य सर्पिषो मात्रां पाययेद्यवागूं वा। सप्तमे सर्पि: पृथक्पर्ण्यादिसिद्धमेवमाप्याय्यते गर्भ:। अष्टमे बदरोदकेन बलातिबलाशतपुष्पपललपयोदधिमस्तुतैललवणमदनफलमधुघृतमिश्रेणास्थापयेत्। पुराणपुरीषशुद्ध्यर्थमनुलोमनार्थञ्च वायो:। तत: पयोमधुरकषायसिद्धेन तैलेनानुवासयेदनुलोमे हि वायौ सुखं प्रसूयते निरुपद्रवा च भवति। अत ऊर्द्ध्वं स्निग्धाभिर्यवागूभिर्जाङ्गलरसैश्चोपक्रमेदाप्रसवकालादेवमुपक्रान्ता स्निग्धा बलवती सुखमनुपद्रवा प्रसूयते। नवमे मासि सूतिकागारमेनां प्रवेशयेत् प्रशस्ततिथ्यादौ। तत्रारिष्टं ब्राह्मणक्षत्रियवैश्यशूद्राणां श्वेतरक्तपीतकृष्णेषु भूमिप्रदेशेषु बिल्वन्यग्रोधतिन्दुकभल्लातकनिर्म्मितं सर्व्वागारं यथासंख्यं तन्मयपर्य्यङ्कमुपलिप्तभित्तिं सुविभक्तपरिच्छदं प्राग्द्वारमुदग्द्वारं दक्षिणद्वारं वाष्टहस्तायतञ्चतुर्हस्तविस्तृतं रक्षामङ्गलसम्पन्नं विधेयम्॥*॥

"जाते हि शिथिले कुक्षौ मुक्ते हृदयबन्धने।
सशूले जघने नारी ज्ञेया सा तु प्रजायिनी॥"

तत्रोपस्थितप्रसवाया: कटीपृष्ठं प्रति समन्ताद्वेदना भवत्यभीक्ष्णं पुरीषप्रवृत्तिर्मूत्रं प्रसिच्यते योनिमुखाच्छ्लेष्मा च। प्रजनयिष्यमाणां कृतमङ्गलस्वस्तिवाचनां कुमारपरिवृतां पुन्नामफलहस्तां स्वभ्यक्तामुष्णोदकपरिषिक्तामथैनां सघृतां यवागूमाकण्ठात् पाययेत्। तत: कृतोपधाने मृदुविस्तीर्णे शयने स्थितामाभुग्नसक्थीमुत्तानामसङ्गनीयाश्चतस्र: स्त्रिय: परिणतवयस: प्रजननकुशला: कर्त्तितनखा: परिचरेयुरिति॥*॥ अथास्या विशिखान्तरमनुलोममनुसुखमभ्यज्यात् ब्रूयाच्चैनामेका सुभगे प्रवाहस्वेति न चाप्राप्तावी प्रवाहस्व विशिखान्तरमपत्यमार्गम्। ततो विमुक्ते गर्भनाडीप्रबन्धे सशूलेषु श्रोणिवङ्क्षणवस्तिशिर:सु प्रवाहेथा: शनै: शनै:। ततो गर्भनिर्गमे प्रगाढं ततो गर्भे योनिमुखं प्रपन्ने गाढतरमाविशल्यभावात्॥*॥ अकालप्रवाहणात् बधिरं मूकं व्यस्तहनुं मूर्द्धाभिघातिनं कासश्वासशोषोपद्रुतं कुब्जं विकटं वा जनयति। तत्र प्रतिलोममनुलोमयेत् गर्भसङ्गे तु योनिं धूपयेत् कृष्णसर्पनिर्म्मोकेण पिण्डीतकेन वा। बध्नीयाद्धिरण्यपुष्पीमूलं हस्तपादयोर्धारयेत् सुवर्च्चलां विशल्यां वा॥*॥ अथ जातस्योल्वं मुखञ्च सैन्धवसर्पिषा विशोध्य घृताक्तं मूर्द्ध्नि पिचुं दद्यात् ततो नाभिनाडीमष्टाङ्गुलमायम्य सूत्रेण बद्ध्वा छेदयेत् तत्सूत्रैकदेशञ्च कुमारस्य ग्रीवायां सम्यग्बध्नीयात्॥*॥ अथ कुमारं शीताभिरद्भिराश्वास्य जातकर्म्मणि कृते मधुसर्पिरनन्ताब्राह्मीरसेन सुवर्णचूर्णमङ्गुल्यानामिकया लेहयेत्ततो बलातैलेनाभ्यज्य क्षीरवृक्षकषायेण सर्वगन्धोदकेन वा रूप्यहेमप्रतप्तेन वा वारिणा स्नापयेदेनं कपित्थपत्रकषायेण वा कोष्णेन यथाकालं यथादेशं यथाविभवं च।

"धमनीनां हृदिस्थानां विवृतत्वादनन्तरम्।
चतूरात्रात्त्रिरात्राद्वा स्त्रीणां स्तन्यं प्रवर्त्तते॥"

तस्मात् प्रथमेऽह्नि मधुसर्पिरनन्तामिश्रं मन्त्रपूतं त्रिकालं पाययेद्द्वितीये लक्ष्मणासिद्धं सर्पिस्तृतीये च। तत: प्राङ्निवारितस्तन्यं मधुसर्पि: स्वपाणितलसम्मितं द्विकालं पाययेत्॥*॥ अथ सूतिकां बलातैलाभ्यक्तां वातहरौषधनि:क्वाथेनोपचरेत् सशेषदोषास्तु तदह: पिप्पलीपिप्पलीमूलहस्तिपिप्पलीचित्रकशृङ्गवेरचव्यचूर्णं गुडोदकेनोष्णेन पाययेत्। एवं द्विरात्रं त्रिरात्रं वा कुर्य्यादादुष्टशोणितात्। विशुद्धे ततो विदारिगन्धादिसिद्धां स्नेहयवागूं क्षीरयवागूं वा पाययेत् त्रिरात्रम्। ततो यवकोलकुलत्थसिद्धेन जाङ्गलरसेन शाल्योदनं भोजयेद्बलमग्निबलञ्चावेक्ष्य। अनेन विधिना अध्यर्द्धमासमुपसंस्कृता विमुक्ताहाराचारा विगतसूतिकाभिधाना स्यात्। पुनरार्त्तवदर्शनादित्येके। धन्वभूमिजातां सूतिकां घृततैलयोरन्यतरस्य मात्रां पाययेत्। पिप्पल्यादिकषायानुपाना स्नेहनित्या च स्यात्त्रिरात्रं पञ्चरात्रं वा बलवती। अबलां यवागूं पाययेत्त्रिरात्रं पञ्चरात्रं वा अत ऊर्द्ध्वं स्निग्धेनान्नसंसर्गेणोपचरेत्। प्रायशश्चैनां प्रभूतेनोष्णोदकेन परिषिञ्चेत्। क्रोधायासमैथुनादीन् परिहरेत्॥*॥
भवतश्चात्र।

"मिथ्याचारात् सूतिकाया यो व्याधिरुपजायते।
स कृच्छ्रसाध्योऽसाध्यो वा भवेदत्यपतर्पणात्॥
तस्मात्तां देशकालौ च व्याधिसात्म्येन कर्म्मणा।
परीक्ष्योपचरेदेवं नैवमत्ययमाप्नुयात्॥*॥"

अथापरापतन्त्यानाहाध्मानौ कुरुते तस्मात् कण्ठमस्या: केशवेष्टितयाङ्गुल्या प्रमृजेत्। कटुकालाबुकृतवेधनसर्षपसर्पनिर्म्मोकैर्वा कटुतैलविमिश्रैर्योनिमुखं धूपयेत्। लाङ्गलीमूलकल्केन वास्या: पाणिपादतलमालिम्पेत्। मूर्द्ध्नि वास्या

मद्याहृम्नक्षीरमनुपैचयेत् । कुष्ठलाङ्गलीमुलकल्कं वा मद्यमूत्रयोरन्यतरेण पाययेत् । शालिमूलकल्कं वा पिप्पल्यादिं वा मद्येन सिद्धार्थककुष्ठलाङ्गलीमहावृक्षक्षीरमिश्रेण सुरामण्डेन वा स्थापयेत् । एतेरेव सिद्धेन सिद्धार्थकतैलेनोत्तरवस्तिं दद्यात् । स्निग्धेन वा कृत्तनखेन हस्तेनापहरेत् । प्रजातायाश्च नार्या रूक्षशरीरायास्तीक्ष्णैरविशोधितं रक्तं वायुना तद्देशगेनातिसंरुद्धं नाभेरधःपार्श्वयोर्वस्तौ वा वस्तिशिरसि वा ग्रन्थिं करोति । ततश्च नाभिवस्त्युदरशूलानि भवन्ति । सूचीभिरिव निस्तुद्यते भिद्यते दीर्यत इव च पक्वाशयः । समन्तादाध्मानमुदरे मूत्रसङ्गश्च भवतीति मक्कल्लक्षणम् । तत्र वीरतर्व्वादिसिद्धं जलमूषकादिप्रतिवापं पाययेत् । यवक्षारचूर्णं वा सर्पिषा सुखोदकेन वा लवणचूर्णं वा पिप्पल्यादिक्वाथेन पिप्पल्यादिचूर्णं वा सुरामण्डेन वरुणादिक्वाथं वा पञ्चकोलैलाप्रतीवापं पृथक् पर्णादिक्वाथं वा भद्रदारुमरिचसंसृष्टं पुराणगुडं वा त्रिकटुकचतुर्जातककुस्तुम्बुरुमिश्रं खादेदच्छं वा पिबेदरिष्टमिति ॥*॥ अथ बालं क्षौमपरिवृतं क्षौमवस्त्रास्तृतायां शय्यायां शाययेत् । पीलुबदरीनिम्बपरूषकशाखाभिश्चैनं वीजयेत् । मूर्ध्नि चास्याहरहस्तैलपिचुमवचारयेत् । धूपयेच्चैनं रक्षोघ्नैर्धूपैः । रक्षोघ्नानि चास्य पाणिपादशिरोग्रीवास्ववसृजेत् । तिलातसीसर्षपकणांश्चात्र प्रकिरेत् । अधिष्ठाने चाग्निं प्रज्वालयेत् । व्रणितोपासनीयञ्चावेक्षेत । ततो दशमेऽहनि मातापितरौ कृतमङ्गलकौतुकौ स्वस्तिवाचनं कृत्वा नाम कुर्य्यातां यदभिप्रेतं नक्षत्रनाम वा ॥*॥ ततो यथावर्णं धात्रीमुपेयान्मध्यमप्रमाणां मध्यमवयसामरोगां शीलवतीमचपलामलोलुपामकृशामस्थूलां प्रसन्नक्षीरां अलम्बौष्ठीमलम्बोर्द्ध्वस्तनीमव्यङ्गामव्यसनिनीं जीवद्वत्सां दोग्ध्रीं वत्सलामक्षुद्रकर्म्मिणीं कुले जातामतो भूयिष्ठैश्च गुणैरन्वितां श्यामामारोग्यबलवृद्धये बालस्य । तत्रोर्द्ध्वस्तनी करालं कुर्य्यात् । लम्बस्तनी नासिकामुखं छादयित्वा मरणमापादयेत् । ततः प्रशस्तायां तिथौ शिरःस्नातामहतवाससमुदङ्मुखं शिशुमुपवेश्य धात्रीं प्राङ्मुखीमुपवेश्य दक्षिणं स्तनं धौतमीषत्परिस्रुतमभिमन्त्र्य मन्त्रेणानेन पाययेत् ॥*॥

"चत्वारः सागरास्तुभ्यं स्तनयोः क्षीरवाहिणः ।
भवन्तु सुभगे नित्यं बालस्य बलवृद्धये ॥
पयोऽमृतरसं पीत्वा कुमारस्ते शुभानने ।
दीर्घमायुरवाप्नोतु देवाः प्राश्यामृतं यथा ॥"

अतोऽन्यथा नानास्तन्योपयोगादसात्म्याद्व्याधिजन्म भवति । अपरिस्रुतेऽप्यतिस्तब्धस्तन्यपूर्णस्तनपानादुत्सुहितस्रोतसः शिशोः कासश्वासवम्यादिप्रादुर्भावः । तस्मादेवं विधानं स्तन्यं न पाययेत् । क्रोधशोकावात्सल्यादिभिश्च स्त्रियाः स्तन्यनाशो भवति ॥*॥ अथास्याः क्षीरजननार्थं सौमनस्यमुत्पाद्य यवगोधूमशालिषष्टिकमांसरससुरासौवीरकपिण्याकलशुनमत्स्यकसेरुकशृङ्गाटक-बिसविदारिकन्दमधुक-शतावरी नालिकालाबूकालशाकप्रभृतीनि विदध्यात् ॥*॥ अथास्याः स्तन्यमप्सु परीक्षेत । तच्चेच्छीतलममलं तनु शङ्खावभासमप्सु न्यस्तमेकीभावं गच्छत्यफेनिलमतन्तुमन्नोत्प्लवते न सीदति वा तच्छुद्धमिति विद्यात्तेन कुमारस्यारोग्यं शरीरोपचयो बलवृद्धिश्च भवति । न च क्षुधितशोकार्त्त-श्रान्तप्रदुष्टधातुगर्भिणीज्वरितातिक्षीणातिस्थूल-विदग्ध-भक्तविरुद्धाहार तर्पितायाः स्तन्यं पाययेन्नाजीर्णौषधश्च बालं दोषौषधमलानां तीव्रवेगोत्पत्तिभयात् ॥*॥ भवन्ति चात्र ।

"धात्र्यास्तु गुरुभिर्भोज्यैर्विषमैर्दोषलैस्तथा ।
दोषा देहे प्रकुप्यन्ति ततः स्तन्यं प्रदुष्यति ॥
मिथ्याहारविहारिण्या दुष्टा वातादयः स्त्रियाः ।
दूषयन्ति पयस्तेन शारीरा व्याधयः शिशोः ॥
भवन्ति कुशलस्तांश्च भिषक् सम्यक् विभावयेत् ।
यद्यप्रत्यङ्गदेशे तु रुजा यत्रास्य जायते ॥
मुहुर्मुहुः स्पृशति तं स्पृश्यमाने च रोदिति ।
निमीलिताक्षो मूर्द्धस्थे शिरोरोगे न धारयेत् ॥
वस्तिस्थे मूत्रसङ्गार्त्तो रुजा तृष्यति मूर्च्छति ।
विण्मूत्रसङ्गवैवर्ण्यच्छर्द्याध्मानान्त्रकूजनैः ।
कोष्ठे दोषात् विजानीयात् सर्व्वत्रस्थांश्च रोदनैः ॥"

तेषु च यथाभिहितं मृदुच्छेदनीयमौषधं मात्रया क्षीरपस्य क्षीरसर्पिषा धात्र्याश्च केवलमेव विदध्यात् । क्षीरान्नादस्यात्मनि धात्र्याश्चान्नादस्य कषायादीनात्मन्येव न धात्र्याः । तत्र मासादूर्द्ध्वं क्षीरपायाङ्गुलिपर्वद्वयग्रहणसम्मितामौषधमात्रां विदध्यात् कोलास्थिसम्मितां कल्कमात्रां क्षीरान्नादाय कोलसम्मितामन्नादायेति ॥*॥

"येषां गदानां ये योगाः प्रवक्ष्यन्तेऽगदङ्कराः ।
तेषु तत्कल्कसंलिप्तौ पाययेत शिशुं स्तनौ ॥
एकं द्वे त्रीणि चाहानि वातपित्तकफज्वरे ।
स्तन्यपायाहितं सर्पिरितराभ्यां यथार्थतः ॥
न च तृष्णाभयादत्र पाययेत शिशुं स्तनौ ।
विरेकवस्तिवमनान्यृते कुर्य्याच्च नात्ययात् ॥
मस्तुलुङ्गक्षयादस्य वायुस्तालस्थि नामयेत् ।
तस्य तृड्दैन्ययुक्तस्य सर्पिर्मधुरकैः शृतम् ॥
पानाभ्यञ्जनयोर्योज्यं शीताम्बु चेजनं तथा ।
वातेनाध्मापितां नाभिं सरुजां तुण्डिसंज्ञिताम् ॥
मारुतघ्नैः प्रशमयेत् स्नेहस्वेदोपनाहनैः ।
गुदपाके तु बालानां पित्तघ्नीं कारयेत् क्रियाम् ॥
रसाञ्जनं विशेषेण पानालेपनयोर्हितम् ॥"

क्षीराहाराय सर्पिः पाययेत् सिद्धार्थकवचामांसी-पयस्यापामार्गशतावरीसारिवाब्राह्मीपिप्पलीहरिद्राकुष्ठसैन्धवसिद्धम् । क्षीरान्नादाय मधुकवचापिप्पलीचित्रकत्रिफलासिद्धम् । अन्ना-

दाय द्विपञ्चमूली [illegible] विडङ्गद्राक्षादिभिर्ब्राह्मीसिद्धम् । मेधायुर्वि शिशोर्भवन्ति ॥*॥ बालं सुप्तं न प्रबोधयेत् येन तर्जयेत् सहसा न बोधयेद्विकारभयात् । सहसा पीडा वातादिविघातभयात् । नोपवेशयेत् सदा नित्यं चैनमनुवर्त्तेत प्रियशतैरजिह्मः [illegible] सम्यग्रो नीरोगः सुप्रसन्नमनाश्च भवति । तथा विद्युत्प्रभापादपलता शून्यागारनिम्नस्थानगृहच्छायादिभ्यो दोषमर्गतश्च बालं रक्षेत् ॥*॥

"नाशुचौ विसृजेद्बालं नाकाशे विषमे न च ।
नोष्ममारुतवर्षेषु रजोधूमोदकेषु च ॥
क्षीरसात्म्यतया क्षीरमाजं गव्यमथापि वा ।
दद्या दास्तन्यपर्य्याप्ते [illegible]
षण्मासञ्चैनमन्नं प्राशयेल्लघु हितञ्च ।
नित्यमनवरोधरतश्च स्यात् कृतरक्ष उपचर्य्यमाणः [illegible]

अथ कुमार उद्विजते त्रस्यति रोदिति नष्टसंज्ञो भवति नखदशनैर्धात्रीमात्मानञ्च परिणुदति दन्तान् खादति कूजति जृम्भते भ्रुवौ विक्षिपत्यूर्द्ध्वं निरीक्षते फेनमुद्वमति सन्दष्टौष्ठः क्रूरो भिन्नामवर्चा दीनार्त्तस्वरो निशि जागर्त्ति दुर्बलो म्लानाङ्गो [illegible] यथा पुरा धात्र्याः स्तन्यमभिलषतीति सामान्येन [illegible] विस्तरेणोत्तरे वक्ष्यामः ॥*॥ ज्ञात्वा यथावर्णं विद्यां ग्राहयेत् । [illegible] पञ्चविंशतिवर्षाय द्वादशवर्षां पित्र्यधर्म्मार्थकामप्रजाः प्राप्स्यतीति ॥*॥

"ऊनषोडशवर्षायामप्राप्तः पञ्चविंशतिम् ।
यद्याधत्ते पुमान् गर्भं कुक्षिस्थः स विपद्यते ॥
जातो वा न चिरं जीवेत् जीवेद्वा [illegible]
तस्मादत्यन्तबालायां गर्भाधानं न कारयेत् ॥
अतिवृद्धायां दीर्घरोगिण्यामन्येन वा
वोपसृष्टायां गर्भाधानं नैव कुर्वीत ।
स्याप्येवंविधस्य त एव दोषाः संभवन्ति ।
पूर्व्वोक्तैः कारणैः पतिष्यति गर्भे
वङ्क्षणवस्तिशूलानि रक्तदर्शनञ्च । तत्र
परिषेकावगाह- [illegible]
शृतशीतक्षीरपानैश्च । गर्भस्फुरणे
स्तम्भधारणार्थं क्षीरमुत्पलादिसिद्धं
प्रशंसन्ति [illegible]
मूत्रसङ्गाः । स्थानात् स्थानमुपक्रामति
कोष्ठे संरम्भस्तत्र स्निग्धाः शीताः क्रियाः
नार्या [illegible]
कारिकासिद्धं पयः शर्करामधुमिश्रं पाययेत्
मूत्रसङ्गे दर्भादिसिद्धम् । आनाहे हिङ्गु
लशुनवचासिद्धम् । अत्यर्थं स्रवति [illegible]
[illegible]
मालिकागैरिकसर्ज्जरसरसाञ्जनचूर्णं मधु[illegible]

ह्यात् । यथालाभं न्यग्रोधादित्वक् प्रवाल-
ं वा पयसा पाययेदुत्पलादिकल्कं वा
शृङ्गाटकशालूककल्कं वा शृतेन पयसो-
फलोदककन्दक्वाथेन वा शर्करामधुमधुरेण
ग्रपिष्टं न्यग्रोधादिस्वरसपरिपीतं वा वस्त्रा-
योन्यां धारयेत् ॥*॥ अथाद्दष्टशोणित-
ायां मधुकदेवदारुपयस्यासिद्धं पयः पाय-
तदेवाश्मन्तकशतावरीपयस्यासिद्धं विदारि-
ादिसिद्धं वा बृहतीद्वयोत्पलशतावरीसारि-
ग्श्यामधुकसिद्धं पयस्यार्कपुष्पीसिद्धं वा
पाययेदिति । एवं क्षिप्रमुपक्रान्ताया
वर्त्तन्ते रुजो गर्भश्चाप्यायते । व्यवस्थिते
र्भे गव्येनोड़ुम्बरशलाटुसिद्धेन पयसा भोज-
। अतीते लवणस्नेहवर्ज्जाभिर्यवागूभिरु-
ाकादीनां पाचनीयोपसंस्कृताभिरुपक्रमेत
न्तो मासा गर्भस्य तावन्त्यहानि । वस्त्यु-
पूलेषु पुराणगुड़ं दीपनीयसंयुक्तं पाययेद-
वा वातोपद्रवग्रहीतत्वात् । स्रोतसां लीयते
: सोऽतिकालमवतिष्ठमानो व्यापद्यते तं
ना स्नेहादिक्रमेणोपचरेत् । उत्क्रोशरस-
ाद्वामनल्पस्नेहां यवागूं पाययेत् । माष-
तविल्वशलाटुसिद्धान् वा कुल्मापान्
येन्मधुमाध्वीकं चानुपिवेत् सप्तरात्रम् ।
ालातीतस्थायिनि गर्भे विशेषतः सधान्य-
उखलं मुपलेनाभिहन्यात् विपमे वा याना-
सेवेत । वाताभिपन्न एव शुष्यति गर्भः ।
मातुः कुक्षिं न पूरयति मन्दं स्पन्दते च तं
हणीयैः पयाभिर्मांसरसैश्चोपचरेत् । शुक्र-
णितं वायुनाभिप्रपन्नमवक्रान्तजीवमाध्मा-
त्युदरम् । तत् कदाचित् यद्दच्छयोपशान्तं
ामियापहृतमिति भापन्ते । तमेव कदाचित्
ीयमानं नागोदरमित्याहुस्तत्रापि लीनवत्
ीकारः ॥*॥ अत ऊर्द्धं मासानुमासिकं
क्रमः ।
मधुक शाकबीजञ्च पयस्या सुरदारु च ।
अश्मन्तकस्तिलाः कृष्णास्ताम्रवल्ली शतावरी ॥
वादनी पयस्या च लता चोत्पलसारि वा ।
नन्ता सारिवा रास्ना पद्मा मधुकमेव च ॥
हत्यौ काश्मरी चापि क्षीरिशुङ्गास्त्वचो
घृतम् ।
श्निपर्णी बला शिग्रु श्वदंष्ट्रा मधुपर्णिका ॥
शृङ्गाटकं विसं द्राक्षा कशेरु मधुकं सिताः ।
स्तेते सप्त योगाः स्युरर्द्धश्लोकसमापनाः ॥
यथासंख्यं प्रयोक्तव्या गर्भस्रावे पयोयुताः ।
कपित्थबृहतीविल्वपटोलेक्षुनिदिग्धिकाः ॥
मूलानि क्षीरसिद्धानि पाययेद्भिषगष्टमे ।
नवमे मधुकानन्तापयस्यासारिवाः पिवेत् ॥
क्षीरं शुण्ठीपयस्याभ्यां सिद्धं स्याद्दशमे हितम् ।
सक्षीरा वा हिता शुण्ठी मधुकं सुरदारु च ।
एवमाप्याय्यते गर्भस्तीव्रा रुक् चोपशाम्यति ॥”
निहत्तप्रसवायास्तु पुनः पड्भ्यो वर्षेभ्य ऊर्द्धं
प्रसवमानाया नार्य्याः कुमारोऽल्पायुर्भवति ॥*॥
अथ गर्भिणीं व्याध्युत्पत्तावत्यये छर्द्दयेन्मधुरा-
म्लेनान्नोपहितेनानुलोमयेच्च संशमनीयञ्च मृदु
विदध्यादन्नपानयोरश्नीयाच्च मृदुवीर्य्यं मधुर-
प्रायं गर्भाविरुद्धञ्च गर्भाविरुद्धाश्च क्रिया यथा-
योगं विदधीत मृदुप्रायाः ॥*॥ भवन्ति चात्र ।
“सौवर्णं सुकृतं चूर्णं कुष्ठं मधु घृतञ्च वा ।
मत्स्याक्षकः शङ्खपुष्पी मधु सर्पिः सकाञ्चनम् ॥
अर्कपुष्पी मधु घृतं चूर्णितं कनकं वचा ।
हेमचूर्णानि कैटर्य्यः श्वेता दूर्वा घृतं मधु ॥
चत्वारोऽभिहिताः प्राशाः श्लोकार्द्धेषु चतु-
र्ष्वपि ।
कुमाराणां वपुर्मेधाबलबुद्धिविवर्द्धनाः ॥”
इति सुश्रुत आयुर्वेदशास्त्रे तृतीयं शारीरस्थान
समाप्तम् ॥ इङ्गरेजीभापायां एनाटोमीत्युक्त-
मेतत् ॥*॥ शारीर तपो यथा,—
“देवद्विजगुरुप्राज्ञपूजनं शौचमार्ज्जवम् ।
ब्रह्मचर्य्यमहिंसा च शारीरं तप उच्यते ॥”
इति भगवद्गीतायाम् १७ अध्यायः ॥
शारीरकं, क्ली, (शरीरमेव शारीरं कुत्सितत्वात्
तन्निवासी शारीरको जीवस्तमधिकृत्य कृतो
ग्रन्थः । शारीरक+अण् ।)वेदव्यासकृतवेदान्त-
मीमांसासूत्रम् । यथा । तथा च वयमस्यां
शारीरकमीमांसायां प्रदर्शयिष्यामः । वेदान्त-
मीमांसाशास्त्रस्य व्याचिख्यासितस्येदमादिमं
सूत्रम् । अथातो ब्रह्मजिज्ञासेति । इति शङ्कर-
भाष्यम् ॥ (शरीरमेव शरीरकं तत्र भवम् ।
शरीरक+अण् । शरीरभवे, त्रि । यथा,
भागवते । ३ । २१ । १८ ।
“पशव्ययं धिपणया ननु सप्तवध्रिः
शारीरके दमशरीर्य्यपरः स्वदेहे ॥”)
शारीरिकः, त्रि, (शरीर+ठक् ।) शरीर-
सम्बन्धि । तत्पर्य्यायः । कालेवरिकः २ गात्रिकः
३ वापुपिकः ४ मांहननिकः ५ वार्ष्मिकः ६
वैग्रहिकः ७ कायिकः ८ दैहिकः ९ मौर्त्तिकः
१० तानविकः ११ । इति अमरोक्तशरीर-
पर्य्यायशब्दात् ष्णिकप्रत्ययेन निष्पन्नमिदम् ॥
शारुकः, त्रि, (शृणातीति । शॄ+“लपपतपद-
स्थेति ।” ३ । २ । १५४ । इति उकञ् ।)
हिंसकः । शॄस्थाभूकम गमित्यादिना उकप्रत्य-
येन निष्पन्नमिदम् । इति मुग्धबोधव्याक-
रणम् ॥ (यथा, मुग्धबोधे कारकप्रकरणे ।
“दृष्ट्वा दधि शारुकमेतदर्द्दकान्
उन्नीतवन्तं यतिभिः सुदर्शनम् ॥”)
शार्कः, पुं, शर्करा । इति शब्दरत्नावली ॥
शार्ककः, पुं, दुग्धफेनः । शर्करापिण्डम् । इति
मेदिनी ॥
शार्करः, पुं, दुग्धफेनः । शर्करास्त्यत्रेति । शर्करा
+“देशे लुविलचौ च ।” ४ । २ । १०५ । इति
अण् ।) शर्करान्वितदेशः । इति मेदिनी ॥
शर्करासम्बन्धिनि, त्रि ॥ (शर्करेव । “शर्करा-
दिभ्योऽण् ।” ५ । ३ । १०७ । इत्यण् । शर्करा-
सदृशम् ॥ इति काशिका ॥*॥ “सिकताशर्क-
राभ्यां च ।” ५।२।१०४ । इति अणि शर्करा-
विशिष्टश्च ॥ यथा, शार्करं मधु । इति च
काशिका ॥)
शार्करकः } त्रि, शर्कराबहुलदेशः । शर्करा-
शार्करिकः } शब्दात् कण्प्रत्ययेन ष्णिकप्रत्ययेन
च निष्पन्नः ॥
शार्करीयः, त्रि, शर्करायुक्तदेशः । शर्कराशब्दात्
णीयप्रत्ययेन निष्पन्नमिदम् ॥
शार्ङ्गं, क्ली, आर्द्रकम् । इति राजनिर्घण्टः ॥
(शृङ्गस्य विकारः । शृङ्ग+अण् ।) विष्णुधनुः ।
धनुर्मात्रम् । इति मेदिनी । गे, २६ ॥ (यथा,
रघुः । ४ । ६२ ।
“शार्ङ्गकूजितविज्ञेयप्रतियोधे रजस्यभूत् ॥”)
शृङ्गसम्बन्धिनि, त्रि ॥
शार्ङ्गष्टा, स्त्री, महाकरञ्जः । इति राजनिर्घण्टः ॥
पुस्तकान्तरे शार्ङ्गेष्ठा इति च पाठः ॥
शार्ङ्गी, [न्] पुं, (शार्ङ्गमस्यास्तीति । शार्ङ्ग +
इनिः ।) विष्णुः । इत्यमरः ॥ (यथा, रघुः ।
१२ । ७० ।
“स सेतुं बन्धयामास प्लवगैर्लवणाम्भसि ।
रसातलादिवोन्मग्नं शेषं स्वप्नाय शार्ङ्गिणः ॥”)
धन्विमात्रम् । इति शार्ङ्गशब्दार्थदर्शनात् ॥
शार्दूलः, पुं, (शॄहिंसायाम्+“सर्त्तिपिञ्जादिभ्य
ऊरोलचौ ।” उणा० ४ । ९० । इति ऊलच्
प्रत्ययेन साधुः ।) व्याघ्रः । उत्तरपदे श्रेष्ठार्थ-
वाचकः । इत्यमरः ॥ राक्षसः । पशुभेदः । स
तु सरभः । इति मेदिनी ॥ पक्षिविशेषः । इति
धरणिः ॥ चित्रकः । इति राजनिर्घण्टः ॥
शार्दूलललितं, क्ली, धृतिवृत्तौ अष्टादशाक्षर-
पादच्छन्दोविशेषः । यथा,—
“मः सो जः स-त-सा दिनेश ऋतुभिः शार्दूल-
ललितम् ।
ज्ञात्वा कंसमृगे पराक्रमविधिं शार्दूलललितं
यश्चक्रे क्षितिभारकारिषु सुरारातिष्वतिद्रवम् ।
सन्तोषं परमन्तु देवनिवहे यो लोकशरणं
श्रेयो वः स तनोत्वपारमहिमा लक्ष्मीप्रिय-
तमः ॥”
इति छन्दोमञ्जरी २ स्तवकः ॥
शार्दूलवाहनः, पुं, पञ्चविंशतिपूर्व्वजिनान्तर्गत-
जिनविशेषः । इति त्रिकाण्डशेषः ॥
शार्दूलविक्रीड़ितं, क्ली, अतिधृतिवृत्तौ ऊन-
विंशतिपादच्छन्दोविशेषः । यथा,—
“सूर्य्याश्वैर्म-स-ज-स्त-ताः सगुरवः शार्दूल-
विक्रीड़ितम् ।
गोविन्दं प्रणमोत्तमाङ्ग रमने त्वं घोपयाहर्निशं
पाणी पूजयतं मनः स्मर पदे तस्यामय श्रवणं-
तम् ।
एवञ्चेत् कुरुताखिलं मम हितं शार्दूलवि-
स्त
न प्रेक्ष्ये भवतां कृते भवमहाशाह
इति छन्दोमञ्जरी

शार्ङ्गी, स्त्री, [illegible] । शार्ङ्गे, त्रि । इति मेदिनी ॥ (शार्ङ्गस्य इदम् । शार्ङ्गी + अण् ।) शार्ङ्गिसम्बन्धि, त्रि ।

[illegible], स्त्री, राजि । इत्यमरटीकायां भरत-[illegible] ॥

[illegible] ([illegible]) [illegible] । इति दुर्गादासः ।

शाल, पुं, (शालते श्लाघते इति । शाल + अच् ।) मत्स्यभेदः । शलाइ इति ख्यातः । [illegible] । [illegible] । [illegible] । [illegible] २ [illegible] इति राजनिर्घण्टः । [illegible]

शालग्राम, पुं, विष्णुमूर्त्तिविशेषः । [illegible]

"[illegible]"

[illegible]

सगदाकान्तिरूपाय नमः श्रीकण्ठमूर्त्तये ॥
शालग्रामशिलाद्वारगतलग्नद्विचक्रधृक् ।
शुक्लाभास्यश्च सोऽव्याद्वः सदैव श्रीगदाधरः ॥
लग्नद्विचक्रो रक्ताभः पूर्वभागस्तु पुष्कलः ।
सङ्कर्षणोऽथ प्रद्युम्नः सूक्ष्मचक्रस्तु पीतकः ॥
स दीर्घः स शिरश्छिद्रो योऽनिरुद्धस्तु वर्त्तुलः ।
नीलो द्वारे त्रिरेखश्च अथ नारायणोऽसितः ॥
मध्ये गदाकृता रेखा नाभिपद्ममहोन्नतः ।
पृथुवक्षो नृसिंहो वः कपिलोऽव्यात्त्रिबिन्दुकः ॥
अथवा पञ्चबिन्दुस्तत्पूजनं ब्रह्मचारिणः ।
वराहशक्तिलिङ्गोऽव्याद्विषमद्वयचक्रकः ॥
नीलस्त्रिरेखः स्थूलोऽथ कूर्म्ममूर्त्तिः सबिन्दुमान् ।
कृष्णः सवर्त्तुलावर्त्तः पातु वोऽनतपृष्ठकः ॥
श्रीधरः पञ्चरेखोऽव्याद्वनमाली गदाङ्कितः ।
वामनो वर्त्तुलो नाम वामचक्रः सुरेश्वरः ॥
नानावर्णोऽनेकमूर्त्तिर्नागभोगी त्वनन्तकः ।
स्थूलो दामोदरो नीलो मध्ये चक्रः सुनीलकः ॥
सङ्कीर्णद्वारको योऽव्यादथ ब्रह्मा सुलोहितः ।
सुदीर्घरेखा सुषिर एकचक्राम्बुजः पृथुः ॥
स्पष्टच्छिद्रः स्थूलचक्रः कृष्णोऽबिन्दुश्च बिन्दुमान् ।
हयग्रीवोऽङ्कुशाकारः पञ्चरेखः समन्ततः ॥
वैकुण्ठोऽमलवद्भाति एकचक्राम्बुजोऽसितः ।
मत्स्यो दीर्घाम्बुजाकारो हाररेखस्तु पाण्डुरः ॥
रामचक्रो दक्षरेखः श्यामो वोऽव्यात्त्रिविक्रमः ।
शालग्रामे द्वारकायां स्थिताय गदिने नमः ॥
एकेन लक्षितो योऽव्याद्गदाधारी सुदर्शनः ।
लक्ष्मीनारायणो द्वाभ्यां त्रिभिस्तु त्रिविक्रमः ॥
चतुर्भिश्च चतुर्व्यूहो वासुदेवश्च पञ्चभिः ।
प्रद्युम्नः षड्भिरेवाव्यात् सङ्कर्षण इतः स्मृतः ॥
पुरुषोत्तमोऽष्टभिः स्यात् नवव्यूहो नवाङ्कितः ।
दशावतारो दशभिरनिरुद्धोऽवतादथ ।
द्वादशात्मा द्वादशभिरत ऊर्द्ध्वं त्वनन्तकः ॥"

इति पाद्मे पातालखण्डे १० अध्यायः ॥

अपि च ।

ईश्वर उवाच ।

"शालग्रामे मणौ यन्त्रे मण्डले प्रतिमासु च ।
नित्यन्तु श्रीहरेः पूजा केवलेन क्षितौ न तु ॥
[illegible] शालग्रामस्वरूपं महत् ।
पापापास्पर्शकं शमन् शालग्रामशिलेति स्मितम् ।
[illegible] कोटिब्रह्मवधापनम् ।
किं पुनर्भजनं तत्र हरेः सान्निध्यकारणम् ॥
[illegible] सर्व्वविश्वजय भवेत् ।
[illegible] पूजा यदि [illegible] भवेत् ॥
[illegible] च [illegible] वै [illegible] नरः ।
[illegible] शिला [illegible] शिला [illegible]-
[illegible] ॥
[illegible] शिला [illegible] ।
[illegible] ॥
[illegible]
[illegible] ॥
[illegible] ॥
[illegible] ।

यथा तथा हरिर्व्याप्तो शालग्रामे प्रकाशते ।
प्रत्यहं द्वादश शिलाः शालग्रामस्य योऽर्च्चयेत् ।
द्वारवत्याः शिलायुक्ताः स वैकुण्ठे महीयते ।
शालग्रामशिलायास्तु गह्वरं लभते नरः ।
पितरस्तस्य तिष्ठन्ति तृप्ताः कल्पान्तरं दिवि ।
शालग्रामशिला यत्र यत्र द्वारवती शिला ।
मृते विष्णुपुरं याति तत्रार्थं योजनत्रयम् ॥
जपपूजा च होमश्च सर्व्वं कोटिगुणं भवेत् ।
सनत्कामः सदाभीष्टं क्रोशमात्रं समन्ततः ।
कीकटेऽपि मृतो याति वैकुण्ठभवनं नरः ।
शालग्रामशिलायां यो मूल्यमुत्पादयेन्नरः ।
विक्रेता चानुमन्ता च यः परीक्षानुमोदकः ।
सर्व्वे ते नरकं यान्ति यावदाहूतसंप्लवम् ।
अतस्तं वर्ज्जयेद्देवि । हरिविक्रयणं क्रमम् ।
शालग्रामोद्भवो देवो यो देवो द्वारकोद्भवः ।
उभयोः सङ्गमो यत्र मुक्तिस्तत्र न संशयः ॥
द्वारकोद्भवः शुक्लश्च बहुचक्रेण चिह्नितः ।
चक्रमासाद्य शिलाकारचित्स्वरूपनिरञ्जनम् ।
नमोऽस्त्वोङ्काररूपाय सदानन्दस्वरूपिणे ।
शालग्रामे महाभाग भक्त्यानुग्रहं कुरु ।
त्वया युतस्य धर्म्मस्य फलप्राप्त्यर्थं मे प्रभो ॥"

इति तत्रैव ११ अध्यायः ॥

अपरञ्च ।

ब्राह्मण उवाच ।

"गण्डकीयं नदी राजन् ! सुरासुरनिषेविता ।
पुण्योदकपरीवाहैर्हतपातकसञ्चया ॥
दर्शनात्मानसं पापं स्पर्शनात् कर्म्मजं हरेत् ।
वाचिकं स्तोयतोयस्य पानतः पापसञ्चयम् ।
पुरा दृष्टाः प्रजा नाथः प्रजाः सर्व्वा विचायन् ।
स्वगण्डादिसुतोऽनेकपापघ्नीं सृष्टवानिमाम् ।
एतां नदीं ये पुण्योदां स्पृशन्ति सुदृशि [illegible]
ते गर्भभाजो नैव स्युरपि पापकृतो नराः ।
तस्यां भवा ये चास्मत् चक्रचिह्नैरलङ्कृताः ।
ते साक्षाद्भगवन्तो हि स्वस्वरूपधराः [illegible]
शिलाः संपूजयेद्यस्तु नित्यं चक्रयुताः सदा ।
न जातु चिज्जनन्या वै जठरं समुपाविशेत् ।
पूजयेद् यो नरो धीमान् शालग्रामशिलावराम् ।
तेनाचारवता भाव्यं दम्भलोभविवर्जिना ।
परदारपरद्रव्यविमुखेन नरेण च ।
पूजनीयः प्रयत्नेन शालग्रामः सचक्रकः ।
द्वारवत्यां भवं चक्रं शिला वै गण्डकीभवा ।
एतां समाहरन्नेव पापं जन्मान्तरार्जितम् ।
यदि पापसहस्राणां कर्त्ता तावत्तरो भवेत् ।
शालग्रामशिला पायः [illegible]
ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वेदवते स्थितः ।
शालग्रामं पूजयित्वा सद्यो मोक्षमवाप्नुयात् ।
न कदाचित् स्त्रिया कार्य्यं शालग्रामस्य पूजनम् ।
सर्व्वदीनोऽपि यो भक्त्या सम्पूजयति सर्व्वदा ।
साक्षात् [illegible] महिमा [illegible]
[illegible]
[illegible] शालग्रामशिला[illegible] ।

:धिकपापानि वदन्ति ब्राह्मणोत्तमाः ॥
:नं विषपङ्काभं कुङ्कुमं वज्रसन्निभम् ।
द्यं कालकूटाभं भवेद्भगवतः सखम् ॥
ात् सर्व्वात्मना त्याज्यः स्त्रियाः स्पर्शः
शिलोपरि ।
ति यति नरकं यावदिन्द्राश्चतुर्दश ॥*॥
पे पापसमाचारो ब्रह्महत्यायुतोऽपि वा ।
लग्रामशिलातोयं पीत्वा याति परां गतिम् ।
सी चन्दनं चक्रं शङ्खो घण्टाच चक्रकम् ।
सा तास्त्रय पावन्तु विष्णोर्नाम पदामृतम् ॥
ामृतन्तु नवभिः पापराशिप्रदाहकम् ।
न्ति मुनयः शान्ताः सर्व्वशास्त्रार्थकोविदाः ॥
तीर्थपरिस्नानात् सर्व्वक्रतुसमर्च्चनात् ।
य भवति यद्राजन् बिन्दौ बिन्दौ तदद्भुतम् ।
लग्रामशिला यत्र पूज्यते पुरुषोत्तमैः ।
त्र योजनमात्रन्तु तीर्थकोटीसमन्वितम् ॥*॥
लग्रामाः समाः पूज्याः समेषु द्वितयं न हि ।
षमा एव पूज्या वै विषमेषु वयं न हि ॥
रवतीभवं चक्रं तथा वै गण्डकीभवम् ।
भयोः सङ्गमो यत्र तत्र गङ्गा समुद्रगा ॥
ा कुर्व्वन्ति पुरुषान् आयुः श्रीभिर्विवर्ज्जि-
तान् ।
त्रात् स्निग्धा मनोहारिरूपेण ददाति श्रियम् ।
ायुष्कामो नरो यस्तु धनकामोऽपि यः पुमान् ।
जयन् सर्व्वमाप्नोति पापं लौकिकमैहिकम् ॥
ाणान्तकाले तु यस्य भवेन्नाम्यजलादृप ।
ाचि नाम हरेः पुण्यं शिलाकृतिस्तदन्तिके ॥
्छत्सु प्राणमार्गेषु यस्य विस्मृतोऽपि चेत् ।
ालग्रामशिलामूर्त्तिस्तदा मुक्तिर्न संशयः ॥
ुरा भगवता प्रोक्तमम्बरीषाय धीमते ।
ाह्मणी न्यासिनी भक्ताः शालग्रामशिला
मम ॥
सरूपमितयं मह्यमेतद्धि चितिमण्डले ।
पापिनां पापनिवारं कर्त्तुं हतमुद्धताम् ॥
निन्दन्ति पापिनो ये वा शालग्रामशिलां सकृत् ।
कुम्भीपाके पचन्त्याशु यावदाहूतसंप्लवम् ॥
पूजां समुद्यतं कर्त्तुं यो वारयति मूढधीः ।
तस्य माता पिता बन्धुः सर्व्वे नरकगामिनः ॥
यो हि कथयति नैवं शालग्रामार्च्चनं कुरु ।
स कृतार्थो नयत्याशु वैकुण्ठं स्वन्तु पूर्व्वजैः ॥"
इति च तत्रैव २० अध्यायः ॥*॥
अन्यच्च ।
श्रीईश्वर उवाच ।
"शालग्रामशिलायान्तु त्रैलोक्यं सचराचरम् ।
सदा वसति दैनाथ विष्णुस्तिष्ठति सर्व्वदा ॥
शालग्रामशिलापूजां मकुरुष्व षडानन ।
गङ्गामिव महापुण्यां चतुर्व्वर्गफलप्रदाम् ॥
दृष्टेन मनसा येन स्नापिता पूजिता तथा ।
यज्ञकोटिसमं पुण्यं प्राप्य तस्मै प्रयच्छति ॥
छिद्यस्तेन महावेन गर्भवासः सुदारुणः ।
पीतं येन सदा विष्णोः शालग्रामशिलाजलम् ।
कामासक्तोऽपि यो नित्यं भक्तिभावविवर्ज्जितः ।

शालग्रामशिलां पश्येत् तस्य पापक्षयो भवेत् ॥
शालग्रामशिला विप्र हत्याकोटिविनाशिनी ।
स्मृता संकीर्त्तिता ध्याता पूजिता च नमस्कृता ॥
शालग्रामशिलां दृष्ट्वा यान्ति पापानि देहि-
नाम् ।
सिंहं दृष्ट्वा यथा यान्ति वने मृगगणा भयात् ॥
नमस्कृत्वा तु यः कुर्य्यात् शालग्रामशिलार्च्चनम् ।
भक्त्या वा यदि वाभक्त्या स मुक्तिं समवाप्नुयात् ॥
यः सेवां कुरुते नित्यं शालग्रामशिलाग्रतः ।
वैवस्वताद्भयं तस्य न स्यान्मरणजन्मनी ॥
शालग्रामशिलाचक्रं पयोदधिघृतादिकैः ।
यः स्नापयति नूनं स कल्पकोटिं वसेद्दिवि ॥
शालग्रामे नमस्कारो भावेनापि च यैः कृतः ।
मानवाः किं करिष्यन्ति मद्भक्त्या ते महीतले ॥
मद्भक्तिरणदर्पिष्ठा मत्प्रभुं न नमन्ति ये ।
वैष्णवास्ते न विज्ञेया मद्भक्ताः पापमोहिताः ।
शालग्रामशिला यत्र तत्र पुत्र वसाम्यहम् ॥
पूजितोऽहं न तैर्मर्त्त्यैः स्नापितश्च न तैर्नरैः ।
न कृतं मर्त्त्यलोके यैः शालग्रामशिलार्च्चनम् ॥
किमर्च्चितैर्लिङ्गशतैर्विष्णुभक्तिवहिष्कृतैः ।
शालग्रामशिलाचक्रं नार्च्चितं यदि पुत्रक ॥
जन्मकोटिसहस्रेण पूजिते मयि यत् फलम् ।
तत् फलं समवाप्नोति शालग्रामशिलार्च्चनात् ॥
अनर्घ्यं मम नैवेद्यं पत्रं पुष्पं फलं जलम् ।
शालग्रामशिलास्पृष्टं सर्व्वं याति पवित्रताम् ॥
नैवेद्यं मे न भोक्तव्यं भुक्त्वा चान्द्रायणं चरेत् ।
भुक्त्वा केशवनैवेद्यं कोटिभक्तिफलं लभेत् ॥
सकृदभ्यर्च्चितो विष्णुः शालग्रामशिलास्थितः ।
ददाति विपुलां मुक्तिं सर्व्वसङ्गविवर्ज्जिताम् ॥
सल्लिङ्गकोटिभिर्दृष्टैर्यत् फलं पूजितैः स्तुतैः ।
तत्फलं समवाप्नोति शालग्रामैकपूजनात् ॥
शालग्रामशिलाचक्रं यो विद्वान् पश्यति ध्रुवम् ।
सर्व्वदेवैः प्रार्थो नित्यं तस्य पुण्यं निबोध मे ॥
कोटिलिङ्गसहस्रैर्यत् पूजितैर्जाह्नवीतटे ।
काशीवासाद्युगान्यष्टौ दिनेनैकेन तद्भवेत् ॥
तस्माद्भक्त्यैव मद्भक्तैः प्रीत्यर्थं मम पुत्रक ।
कर्त्तव्यं सर्व्वदा मर्त्त्यैः शालग्रामशिलार्च्चनम् ॥
शालग्रामशिलारूपी यत्र तिष्ठति केशवः ।
तत्र देवाः सुरा यक्षा भुवनानि चतुर्दश ॥
शालग्रामशिलाग्रे यैः सकृच्छ्राद्धं कृतं भवेत् ।
वसन्ति पितरस्तेषां विष्णुलोके न संशयः ॥
ये पिबन्ति नरा नित्यं शालग्रामशिलाजलम् ।
पञ्चगव्यसहस्रैस्तु प्राशितैः किं प्रयोजनम् ॥
प्रायश्चित्ते समुत्पन्ने किं दानैः किमुपोषणैः ।
चान्द्रायणैः किं हि तादृक् पीत्वा पादोदकं
शुचिः ॥"
इति पाद्मे उत्तरखण्डे १२० अध्यायः ॥ ८ ॥
फलेदंशमहत्त्वर्य्यानन्तरं स च भारतं त्यक्त्वा
यास्यति । यथा,—
"शालग्रामो हरेर्मूर्त्तिर्लिङ्गमात्रञ्च भारतम् ।
फलेदंशमहत्त्वान्ते यौ त्यक्त्वा हरेः पदम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६ अध्यायः ॥ ७ ॥

तस्योत्पत्तिलक्षणादि यथा,—
"शालग्रामसमुत्पत्तिं शृणुष्व परमाद्भुताम् ।
गण्डक्या प्राक् तपस्तप्तं भवन्तु मम देवताः ॥
सर्व्वाः पुत्राः सुखं दातुं जनानामिति ते सुराः ।
तस्यास्तु तपसा तुष्टा ब्रह्मविष्णुमहेश्वराः ॥
वरं दातुं समुद्युक्ता वव्रे सा स्वस्य पुत्रताम् ।
अशक्तास्ते वरं दातुं तदा शप्तास्तया क्रुधा ॥
प्रतारणं मम सुराः कृतं यस्मात् पुनः पुनः ।
कीटयोनिं प्रपद्येयाः क्रुद्धास्ते त्वशपंश्च ताम् ॥
अविचार्य्य वयं शप्तास्त्वया यत्तपमोहिता ।
तेन कर्म्मविपाकेन जड़ा कृष्णा नदी भव ॥
अन्योन्यशापं श्रुत्वेत्थं महान् कोलाहलोऽभवत् ।
प्रकम्पिताः सुराः सा च ब्रह्माणन्ते व्यजिज्ञपत् ।
ब्रह्मन् वाहि महाशापादन्योन्यपतितात् क्रुधा
इति देववचः श्रुत्वा ब्रह्मा शङ्करमब्रवीत् ॥
शिवः प्रोवाच धातारमहं संहारकारकः ।
त्वं सृष्टिकर्त्ता विष्णुस्तु पालको बुद्धिमत्तरः ॥
स प्रष्टव्यो यथाशक्त्युभयोः सम्भवेदिति ।
इति माहेश्वरं श्रुत्वा वचनं विष्णुरब्रवीत् ॥
शृणु ब्रह्मन् महादेव शृणु देव गजानन ।
मद्वर्णौ ब्राह्मणौ शाहमातङ्गौ शापतोऽत्र तु ॥
भविष्यतस्तयोर्म्मोचं भविष्यामि कलेवरम् ।
शीर्णं भविष्यति यदा तन्मे रोमजसम्भवाः ॥
पाषाणान्तर्गता कीटा वज्राख्या प्रभविष्यथ ।
अत्रैव गण्डकी पुण्या गङ्गातुल्या महानदी ॥
गण्डक्यां गिरिराजस्य दक्षिणे दशयोजनम् ।
विस्तीर्णं तन्मनुं चैवं पुण्यञ्चैव महीतले ।
चक्रतीर्थमिति ख्यातं त्रिषु लोकेषु विश्रुतम् ॥
शालग्रामगता देवा देवो द्वारावतीगतः ।
उभयोः सङ्गमो यत्र मुक्तिस्तत्र न संशयः ॥
सर्व्वदेवप्रीतिकरा भुक्तिमुक्तिप्रदायिनी ।
भवन्त्यस्यान्तु पाषाणा ये तदन्तर्गता सुराः ।
प्रार्थितं स्वं विना सर्व्वे वज्रकीटा भवन्त्विति ।
अनेनैव तु गण्डक्याः पुत्रत्वं भवतामपि ॥
भविष्यति तदन्तश्च चिह्नं तद्दैवतोद्भवम् ।
विज्ञाय ये र्च्चयिष्यन्ति मा प्रीता तस्य देवता ॥
न यन्त्रस्य न मूर्त्तेश्च न इत्यस्यापि पूजनात् ।
सन्तोषो जायते तेषां गण्डक्या मार्ज्जनाद्यथा ॥
इति विष्णुवचः श्रुत्वा ब्रह्मा वचनमब्रवीत् ॥ ८ ॥
कीदृक् पूज्या शिला विष्णोः किञ्चिह्ना कथ्य
वल्लभा ।
किं फलं चाधिकारी च केन मार्गेण तद्वद ॥
इति ब्रह्मवचः श्रुत्वा विष्णुर्वचनमब्रवीत् ।
स्वादवर्णा शिला पूज्या ब्राह्मणाद्यैः सुखासये ॥
स्निग्धा शिला मन्त्रसिद्धिं दद्या सिद्धिं करोति
च ।
सेवका कीर्त्तिता धीनाङ्गरवत् सा यशोहरा ।
पाण्डुरूपार्द्धसमा मलिना पापधारका ।
पीता पुत्रफलं दद्यादारक्ता सुतान् हरेत् ॥
नीला सन्दिशति लक्ष्मी धूम्राभा हरते मतिम् ।
शोकदा रूक्षवर्णा सिन्दूराभा महार्त्तिदम् ॥
दारिद्र्यदायिनी वक्रा समा सर्व्वार्थसाधिका ।

कृष्णा निहन्ति चैवायुः सूक्ष्मा स्वल्पमतिं हरेत्
पूजावलं शालिनया निष्फलं साम्प्रतं विना।
कपिला विसर्जयन्ते नैवरोगश्च कर्बुरा ॥
भग्ना मार्जारी चैषा बहुचक्रापमाननताम्।
अधनाम्बरहीना च देवचक्रा वियोगताम् ॥
दूरचक्षुषो कमलाक्षी हरचक्रा सुतान् हरेत्।
संलग्नचक्रा त्वशुभं बहुचक्रा महागदम् ॥
भग्नचक्रा तु दारिद्र्यं सर्वनाशं त्वधोमुखी।
कर्मादिकं स्नानमुखी विषमा विविधापदम् ॥
विज्ञमानार्जनामिव विकारान् कुरुते बहून्।
वंशच्छेदो महास्थानी नारसिंही प्रजायते ॥
रेखायां तु चक्राभी च यथा सूक्ष्मा तथा
शुभम्।
यथा शिलास्थाया लक्ष्मीवासादिभेदादतः शृणु ॥
लक्ष्मीहरि: स विज्ञेयो यत्र पद्मं सचक्रकम्।
[illegible] वा सदस्यानामभीष्टदः ॥१॥
वासुदेवः स विज्ञेयो द्वारे चक्रयुग्मकम्।
[illegible] चापि स शेत: पापनाशनः ॥२॥
सङ्कर्षणः स विज्ञेयः प्राक् पार्श्वचक्रयुग्मकम्।
[illegible] प्रद्युम्नः सुशोभनः ॥३॥
[illegible] दीर्घं विचित्रितम्
[illegible] ॥४॥
[illegible] शोभनः।
[illegible] लाञ्छितम् ॥५॥
[illegible]
[illegible]
तम् ॥६॥
[illegible] नयोज्ज्वलम्।
[illegible] ॥७॥
[illegible]
भवेत्।
[illegible] ॥८॥
[illegible] च।
[illegible] ॥९॥
[illegible]
[illegible] ॥१०॥
[illegible]
[illegible]
यत् ॥११॥
[illegible]
[illegible] ॥१२॥
[illegible]
[illegible] ॥१३॥
[illegible]
[illegible] ॥१४॥
[illegible]
[illegible]
[illegible] ॥१५॥
[illegible]
[illegible]
॥१६॥

कूर्माख्या तु शिला चिह्ने वर्तुला चोन्नता भवेत्
हरितं वर्णमायस्तु कौस्तुभेन च चिह्निता ॥
शिलाकूर्मः स विज्ञेयः कूर्माकारस्तु यो भवेत्
चक्राङ्किता तथा हस्ता पूजिता सा पदप्रदा॥१८
हयग्रीवोङ्कुशाकारा रेखा चक्रा समीपगा।
बहुबिन्दुसमायुक्तं पृष्ठं नीरदनीलकम् ॥१९॥
ज्ञेयः सौम्यहयग्रीवो हयग्रीवासमा शिला।
दीर्घया लेखया युक्ता रेखा वा तादृशी
भवेत् ॥२०॥
हयग्रीवः स विज्ञेयो मुखं यस्य हयाकृति।
पद्माकृति भवेद्वापि सासमालं शिरस्तथा॥२१॥
वैकुण्ठस्तिसवर्णाभश्चक्रमेकं तथा ध्वजम्।
हारोपरि तथा रेखा पुष्पाकारा सुशोभना॥२२
श्रीधरस्तु तथा देवश्चिह्नितो वनमालया।
कदम्बकुसुमाकाररेखापञ्चकभूषितः ॥२३॥
वामनः स तु विज्ञेयो योऽतिह्रस्वश्च वर्तुलः।
अतसीकुसुमप्रख्यो बिन्दुना परिशोभितः ॥२४॥
दधिवामननामा तु ऊर्द्ध्वचक्रसंयुतः।
महाद्युतिरतिस्निग्धः शुभदः क्षेमदायकः ॥२५॥
सुदर्शनस्तथा देवः श्यामवर्णो महाद्युतिः।
वामपार्श्वे तथा चक्रं रेखैकैव तु दक्षिणे ॥२६॥
सहस्रार्जुननामाभो नानारेखामयो भवेत्।
चक्राकारा यस्य पङ्क्तिः स सर्वद्रव्यदायकः॥२७
स्थूलो दामोदरो यस्य मध्ये चक्रं प्रतिष्ठितम्।
दूर्वाभं द्वारसङ्कीर्णं पीतरेखा धनप्रदः ॥२८॥
साधादामोदरो ज्ञेय ऊर्द्ध्वचक्रद्वयान्वितम्।
नातिदीर्घमुखं मध्ये सत्यरेखा स भोगदः॥२९
दामोदरः स विज्ञेयो यश्चक्रद्वयलाञ्छितः।
शुक्लं भवेच्च शिखरं पूजितः सुखदः सदा ॥३०॥
अनन्तो बहुवर्णः स्यान्नागभोगेन चिह्नितः।
अनेकचक्रसंमिश्रः सर्वकामफलप्रदः ॥३१॥
पुरुषोत्तमनामासौ यस्य दिक्षु विदिक्षु च।
ऊर्द्ध्वस्थानि दृश्यन्ते पुरुषार्थफलप्रदः॥३२॥
योगेश्वरः स विज्ञेयो लिङ्गं यस्य शिरोगतम्।
ब्रह्महत्यादिपापानां नाशको योगसिद्धिदः॥३३॥
पद्मनाभस्तथा रक्तः पद्मचक्रसमायुतः।
सुस्थाः पूजितो नित्यं दरिद्रोऽपीश्वरो भवेत्॥३४
हिरण्यगर्भो हिरण्याभचक्राभः स्फटिको-
पमः।
[illegible] ॥३५॥
[illegible] स तु विज्ञेयो मध्ये [illegible]।
[illegible] रेखा स सर्वविघ्ननाशकः ॥३६॥
[illegible] स विज्ञेयः [illegible]।
[illegible] ॥३७॥
[illegible]
[illegible] ॥३८॥
[illegible] स विज्ञेयो [illegible]।
[illegible]
३९ ॥
[illegible]
[illegible] ॥४०॥
[illegible]

वामपार्श्वे चक्रयुग्ममेकरेखा तु दक्षिणे।
कृष्णो ज्ञेयः शिला कृष्णा सचक्रा वा वि
क्रि
प्रदक्षिणावर्त्तलसद्वनमालाविभूषिता ॥ ४
चतुर्मुखः स विज्ञेयो द्वे चक्रे मध्यदेशतः
चतस्रः पार्श्वगा रेखा वेदशास्त्रागमप्रद
विष्णोर्भेदा इमे प्रोक्ताः सर्वेषामाश्रयेष्वपि
त्रिसन्ध्ययेष्व पूजान्ते प्रतिष्ठां नात्र कारये
शालग्रामाः समाः पूज्या समेषु द्वितयं न
चसमा नैव पूज्यन्ते एकः पूज्यतमो मतः
शिला द्वादश यो नित्यं भक्त्या संपूजयेद्वा
दिने दिने धर्मवृद्धिः पापनाशश्च जायते।
शालग्रामशिलां यस्तु भक्त्या संपूजयेन्नरः।
शतं दिनानि यस्तेन कृतः कामः स सिद्ध्य
शालग्रामा मत्स्वरूपाः शृणु तेषां तु लक्ष
यत्सेवनाद्भवेदिष्टमिह लोके परत्र च।
शिवनाभः स विज्ञेयः सलिङ्गाकारतां
स्वयम्भुलिङ्गाकृतिमान् [illegible]
शम्भुकः स तु विज्ञेयो यो बिन्दुत्रयभूषित
शूलाकारा तथा रेखा शतपुंस्त्वप्रदायक
धूर्जटिः स तु विज्ञेयो यत्र रेखा जटासमा
तिस्रो यत्र प्रदृश्यन्ते सोऽर्चितो [illegible]
शम्भुस्तु पाण्डरो ज्ञेयो बिन्दुकस्यास्तु मस्त
बिल्वप्रमाणस्तेजस्वी पूजितः स्त्रीप्रदः
ईश्वरः स तु विज्ञेयो रक्तो बिन्दुस्तु मस्त
एकचक्रो द्विचक्रो वाप्यत्र रेखा च गोपद
मृत्युञ्जयः स विज्ञेयः स्वल्पमृत्युविनाश
मध्यचक्रं तदूर्द्ध्वस्थ श्वेता रेखा त्रिशूलव
चन्द्रशेखरनामासावर्द्धचन्द्राकृतिस्तु
मध्ये चक्रद्वयं तस्य सेवनाद्रोगनाशनम्।
रुद्रः स एव विज्ञेयः कपिलो मूर्द्धि रक्ति
चक्रमध्ये भवेद्रेखा मारयेद्रिपुसन्ततिम्
शालग्राममयी सन्ध्ये शक्तिकोटिसमा
येषां पूजनतो देवी भवानी सुप्रसीदति।
योनिचा सा तस्मिं चक्रमूर्द्धं द्वयं प्रदृश्य
वाद्ये घण्टाद्रितो मूर्द्धि स्निग्धा श्यामाधि
ष्ठा ॥
महाकाली तु सा ज्ञेया योनिचिह्नसमन्वि
छिद्रद्वाभ्या सर्वशिला [illegible]
गदायुधाकृतियोर्द्धं सा देवी तत्र [illegible]
देवीशिला सचक्रा या दक्षभागेन तां [illegible]
साचिता वामभागेन मोक्षदा [illegible]
या चक्ररहिता देवी शिला तां वामतो
[illegible]
[illegible] विज्ञाया समभा [illegible]
गौरीशिला तु सैव प्रायः कनिष्ठा [illegible]
स्फटिकाभा भवेत् सा तु धर्मयुक्ता [illegible]
तुलस्याः रे शिले वह्निः सात्त्विका [illegible]
कुरुते गन्धे मिथ्या लभे स्यात् [illegible]
गणेशः स तु विज्ञेयः [illegible]
[illegible]
[illegible]

शला तस्य दिक्चस्य सेव्या तद्दिशि
राज्यदा ॥*॥
चन्द्राकृतिर्यत्र दृश्यते शकलद्वयम् ।
तु चन्द्रशिला वामयुक्ता भौमशिला
मता ॥ * ॥
ाकारेण चिह्नेन ज्ञेया बुधशिला सुरा: ।
ेण चतुरस्रेण युक्ता गुरुशिला मता ॥*॥
कोणा तु शुक्रस्य चापाकारा शनेर्म्मता ।
कारा तु राहोः स्यात् केतोस्तु ध्वज-
रूपिणी ॥ * ॥
कलियुगे घोरे वामाचारविमिश्रिते ।
ाभक्ष्यविचारादिरहिते स्वेच्छसङ्कुले ॥
रक्रोधादिभिर्व्याप्ते जने स्त्रीभिर्विनिर्ज्जिते ।
शिष्यः क्व गुरुर्मन्त्रः क्व जपः क्व च सिद्धयः ॥
ताब्दे कलेर्याते त्यजेद्विष्णुशिला महीम् ।
र्वाङ्गाङ्गवीतोयं तदर्द्धाद्देवताशिला ॥
एव कलौ श्रेयान् शालग्रामार्च्चनं यथा ॥"
इति मेरुतन्त्रे ५ पटलः ॥
प च ।
तुलस्युवाच ।
नाथ ते दया नास्ति पाषाणसदृशस्य च ।
ेन धर्म्मभङ्गेन मम स्वामी त्वया हतः ॥
षाणहृदयस्त्वञ्च दयाहीनो यतः प्रभो ।
ात् पाषाणरूपस्त्वं भवेह त्वऽधुना ॥
श्रीभगवानुवाच ।
ञ्च शैलरूपी च गण्डकीतीरसन्निधौ ।
धिष्ठानं करिष्यामि भारते तव शापतः ॥
त्रकीटाश्च क्रमयो वज्रदंष्ट्राश्च तत्र वै ।
च्छिलाकुहरे चक्रं करिष्यन्ति मदीयकम् ॥
कद्वारे चतुश्चक्रं वनमालाविभूषितम् ।
ीननीरदाकारं लक्ष्मीनारायणाभिधम् ॥
कद्वारे चतुश्चक्रं नवीननीरदोपमम् ।
क्ष्मीजनार्द्दनं ज्ञेयं रहितं वनमालया ॥
रद्वये चतुश्चक्रं गोष्पदेन समन्वितम् ।
घुनाथाभिधं ज्ञेयं वेष्टितं वनमालया ॥
तिक्षुद्रं द्विचक्रन्तु नवीननीरदप्रभम् ।
धिवामनं विज्ञेयं गृहिणाञ्च सुखप्रदम् ॥
तिक्षुद्रं द्विचक्रञ्च वनमालाविभूषितम् ।
ीधरं देवि विज्ञेयं श्रीपदं गृहिणां सदा ॥
ूलञ्च वर्त्तुलाकारं रहितं वनमालया ।
द्विचक्रं स्फुटमत्यन्तं ज्ञेयं दामोदराभिधम् ॥
ध्यमं वर्त्तुलाकारं द्विचक्रं वाणविक्षतम् ।
णरामाभिधं ज्ञेयं शरतूणसमन्वितम् ॥
तुरङ्गचक्रं स्थूलञ्च नवीनजलदप्रभम् ।
नन्ताख्यञ्च विज्ञेयं चतुर्वर्गफलप्रदम् ॥
ध्यमं समचक्रञ्च छत्रतूणसमन्वितम् ।
ाजराजेश्वरं ज्ञेयं राजसम्पत्करं नृणाम् ॥
क्राकारं द्विचक्रञ्च सश्रीकं जलदप्रभम् ।
गोष्पदं मध्यमञ्च विज्ञेयं मधुसूदनम् ॥
ुदर्शनञ्चैकचक्रं गुप्तचक्रं गदाधरम् ।
द्वि चक्रं हयवक्त्राभं हयग्रीवं प्रकीर्त्तितम् ॥
पतीवविस्तृतास्यञ्च द्विचक्रं विकटं सति ।

नरसिंहाभिधं ज्ञेयं सद्यो वैराग्यदं नृणाम् ॥
द्विचक्रं विस्तृतास्यञ्च वनमालासमन्वितम् ।
लक्ष्मीनृसिंहं विज्ञेयं गृहिणां सुखदं सदा ॥
द्वारदेशे द्विचक्रञ्च सश्रीकञ्च समं स्फुटम् ।
वासुदेवञ्च विज्ञेयं सर्व्वकामफलप्रदम् ॥
प्रद्युम्नं सूक्ष्मचक्रञ्च नवीननीरदप्रभम् ।
शुषिरे छिद्रबहुलं गृहिणाञ्च सुखप्रदम् ॥
द्वे चक्रे चैकलग्ने तु पृष्ठे यत्र तु पुष्कलम् ।
सङ्कर्षणन्तु विज्ञेयं सुखदं गृहिणां सदा ॥
अनिरुद्धञ्च पीताभं वर्त्तुलञ्चातिशोभनम् ।
सुखप्रदं गृहस्थानां प्रवदन्ति मनीषिणः ॥*॥
शालग्रामशिला यत्र तत्र सन्निहितो हरिः ।
तत्रैव लक्ष्मीर्वसति सर्व्वतीर्थसमन्विता ॥
यानि कानि च पापानि ब्रह्महत्यादिकानि च ।
तानि सर्व्वाणि नश्यन्ति शालग्रामशिलार्च्चनात् ॥
छत्राकारे भवेद्राज्यं वर्त्तुले च भवेत् श्रियः ।
दुःखञ्च शकटाकारे शूलाग्रे मरणं ध्रुवम् ॥
विकृतास्ये च दारिद्र्यं पिङ्गले हानिरेव च ।
लग्नचक्रे भवेद्व्याधिर्विदीर्णे मरणं ध्रुवम् ॥
व्रतं दानं प्रतिष्ठा च श्राद्धञ्च देवपूजनम् ।
शालग्रामशिलायाश्चैवाधिष्ठानात् प्रशस्तकम् ॥
स स्नातः सर्व्वतीर्थेषु सर्व्वयज्ञेषु दीक्षितः ।
सर्व्वदाने च यत् पुण्यं प्रादक्षिण्ये भुवस्तथा ॥
सर्व्वयज्ञेषु तीर्थेषु व्रतेष्वनशनेषु च ।
पाठे चतुर्णां वेदानां तपसां करणे सति ।
तत् पुण्यं लभते नूनं शालग्रामशिलार्च्चनात् ॥
शालग्रामशिलातोयं नित्यं भुङ्क्ते च यो नरः ।
सुरेप्सितं प्रसादञ्च जन्ममृत्युजराहरम् ॥
तस्य स्पर्शञ्च वाञ्छन्ति तीर्थानि निखिलानि च ।
जीवन्मुक्तो महापूतोऽप्यन्ते याति हरेः पदम् ॥
तत्रैव हरिणा सार्द्धमसंख्यं प्राकृतं लयम् ।
पश्यन्ते च हि दास्येव नियुक्तो दास्यकर्म्मणि ॥
यानि कानि च पापानि ब्रह्महत्यादिकानि च ।
तं दृष्ट्वा च भिया यान्ति वैनतेयमिवोरगाः ॥
तत्पादपद्मरजसा सद्यः पूता वसुन्धरा ।
पुंसां लक्षं तत्पितॄणां निस्तरेत्तस्य जन्मनि ॥
शालग्रामशिलातोयं मृत्युकाले च यो लभेत् ।
सर्व्वपापविनिर्म्मुक्तो विष्णुलोकं स गच्छति ॥
निर्व्वाणमुक्तिं लभते कर्म्मभोगाद्विमुच्यते ।
विष्णुपादप्रलीनश्च भविष्यति न संशयः ॥
शालग्रामशिलां धृत्वा मिथ्यावाक्यं वदेत्तु यः ।
स याति कूर्म्मदंष्ट्रञ्च यावद्वै ब्रह्मणो वयः ॥
शालग्रामशिलां धृत्वा स्वीकारं यो न पालयेत्
स प्रयात्यसिपत्रञ्च लक्षमन्वन्तरावधि ॥
तुलसीपत्रविच्छेदं शालग्रामे करोति यः ।
तस्य जन्मान्तरे काले स्त्रीविश्लेषो भविष्यति ॥
तुलसीपत्रविच्छेदं शङ्खे यो हि करोति च ।
भार्य्याहीनो भवेत् सोऽपि रोगी च सप्तजन्मसु ।
शालग्रामञ्च तुलसीं शङ्खञ्चैकत्र एव च ।
यो रक्षति महाज्ञानी स भवेत् श्रीहरिप्रियः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १८ अध्यायः ॥*॥
शूद्राणां तत्पूजनेऽनधिकारो यथा,—

"विप्रक्षत्त्रियवैश्यानां शालग्रामशिलार्च्चने ।
अधिकारो न शूद्राणां हरेरर्च्चने तथा ॥"
इति तत्रैव जन्मखण्डे २१ अध्यायः ॥*॥
शालग्रामे सदा विष्णोः स्थितिस्तत्पूजने विशेषश्च
यथा,—
भूमिरुवाच ।
"उक्ता याः प्रतिमाः सर्व्वाः सुवर्णादिविनि-
र्म्मिताः ।
तासु तिष्ठसि सर्व्वासु शालग्रामे च सर्व्वदा ॥
कति पूज्या गृहादौ च अविशेषस्तु पूजने ।
विशेषो वा भवेत्तस्मै रहस्यं वद माधव ॥
वराह उवाच ।
गृहे लिङ्गद्वयं नार्च्चेत् शालग्रामद्वयं तथा ।
द्वे चक्रे द्वारकायास्तु नार्च्चेत् सूर्य्यद्वयं तथा ॥
शालग्रामशिला भग्ना पूजनीया सचक्रका ।
खण्डिता स्फुटिता वापि शालग्रामशिला शुभा
शिला द्वादश वै देवि शालग्रामसमुद्भवाः ।
विधिवत् पूजिता येन तस्य पुण्यं वदामि ते ॥
कोटिद्वादशलिङ्गैस्तु पूजितैः स्वर्णपङ्कजैः ।
यत् स्यात् द्वादशकल्पैस्तु दिनेनैकेन तद्भवेत् ॥
यः पुनः पूजयेद्भक्त्या शालग्रामशिलाशतम् ।
तत्फलं नैव शक्तोऽहं वक्तुं वर्षशतैरपि ॥
शालग्रामो न स्प्रष्टव्यो हीनवर्णैर्वसुन्धरे ।
स्त्रीशूद्रकरसंस्पर्शो वज्रस्पर्शाधिको मतः ॥
मोहाद्यः संस्पृशेत् शूद्रो योषिद्वापि कदाचन ।
स पतेन्नरके घोरे यावदाहूतसंप्लवम् ॥
यदि भक्तिर्भवेत्तस्य स्त्रीणां वापि वसुन्धरे ।
दूरादेवास्पृशन् पूजां कारयेत् सुसमाहितः ॥
चरणामृतपानेन सर्व्वपापक्षयो भवेत् ॥
अभक्ष्यं शिवनिर्म्माल्यं पत्रं पुष्पं फलं जलम् ।
शालग्रामशिलायोगात् पावनं तद्भवेत् सदा ॥
दद्याद्भक्ताय यो देवि शालग्रामशिलां नरः ।
सुवर्णसहितां तेन सपर्व्वतवनाकरा ।
ससमुद्रा भवेद्दत्ता सप्तद्वीपा वसुन्धरा ॥
शालग्रामशिलायास्तु मौल्यमुद्घाटयेत् क्वचित् ।
विक्रेता क्रयकर्त्ता वा नरके वै पतेत् ध्रुवम् ॥
पूजाफलं न शक्येत वक्तुं वर्षशतैरपि ।
एतत्ते कथितं गुह्यं प्रतिमास्थापनं प्रति ॥
शालग्रामे विशेषश्च लिङ्गादीनाञ्च यो भवेत् ।
पूजनादौ विधिश्चापि किमन्यच्छ्रोतुमिच्छसि ॥"
इत्यादि वाराहे रौप्यसौवर्णादिस्थापननामा-
ध्यायः ॥ * ॥ अथ शालग्रामशिलामूर्त्तिनिरू-
पणम् ।
"चतुर्विंशतिमूर्त्तिः स शालग्रामशिलास्थितिः ।
द्वारकादिशिलासंस्थो ध्येयः पूज्योऽपि वा हरिः ॥
मनसोऽभिमतं प्राप्य देवो वैमानिको भवेत् ।
निष्कामो मुक्तिमाप्नोति मूर्त्तीर्ध्यायन् स्तुवन्
जपन् ॥"
इत्यादि [illegible] ...णे ४९ अध्यायः ॥
अपि च ।
"[illegible] ...स्त्री ...
[illegible]

सचक्रशङ्खाब्जगदो माधवः श्रीगदाधरः ।
गदाब्जशङ्खचक्री वा गोविन्दोऽर्च्यो गदाधरः ॥
पद्मशङ्खासिगदिने विष्णुरूपाय वै नमः ।
शङ्खाब्जचक्रगदिने नमः सङ्कर्षणाय च ॥
सुशङ्खसुगदाब्जादिधृते प्रद्युम्नमूर्त्तये ।
नमोऽनिरुद्धाय गदाशङ्खाब्जादिविधारिणे ॥
नमो गदासिशङ्खाब्जयुक्तायैव त्रिविक्रमाय च ।
शासिकौमोदकीपद्मगदिने वामनमूर्त्तये ॥
चक्राब्जशङ्खगदिने नमः श्रीधरमूर्त्तये ।
हृषीकेश सासिगदाशङ्खपद्मिन्नमो नमः ॥
साब्जशङ्खगदाचक्रपद्मनाभस्वरूपिणे ।
दामोदर शङ्खगदाचक्रपद्मिन्नमो नमः ॥
सासिशङ्खगदाब्जाय वासुदेवाय वै नमः ।
शङ्खाब्जचक्रगदिने नमः सङ्कर्षणाय च ॥
साब्जशङ्खगदाचक्रपुरुषोत्तममूर्त्तये ।
नमोऽधोक्षजरूपाय गदाशङ्खासिपद्मिने ॥
नृसिंहमूर्त्तये पद्मगदाशङ्खाब्जधारिणे ।
पद्माब्जशङ्खगदिने नमोऽस्त्वच्युतमूर्त्तये ॥
सशङ्खचक्राब्जगदं जनार्द्दनमिहानमे ।
उपेन्द्रं सगदं सासिं पद्मशङ्खिन्नमो नमः ।
सुचक्राब्जगदाशङ्खयुक्ताय हरिमूर्त्तये ।
सगदाब्जासिशङ्खाय नमः श्रीकृष्णमूर्त्तये ॥
शालग्रामशिलाद्वारगतलग्नद्विचक्रधृक् ।
शुक्लाभो वासुदेवाख्यः सोऽव्याद्वः श्रीगदाधरः ॥
लग्नद्विचक्रो रक्ताभः पूर्व्वभागे तु पुष्कलः ।
सङ्कर्षणोऽथ प्रद्युम्नः सूक्ष्मचक्रस्तु पीतकः ॥
सदीर्घशुषिरच्छिद्रो योऽनिरुद्धस्तु वर्त्तुलः ।
नीलो द्वारि त्रिरेखश्च अथ नारायणोऽसितः ॥
मध्ये गदाकृती रेखा नाभिचक्रमहोन्नतः ।
पृथुचक्रो नृसिंहोऽथ कपिलोऽव्यात् त्रिबि-
न्दुकः ॥
अथवा पञ्चबिन्दुस्तत्पूजनं ब्रह्मचारिणः ।
वराहः शक्तिलिङ्गोऽव्याद्विषमद्वयचक्रकः ॥
नीलस्त्रिरेखः स्थूलोऽथ कूर्म्ममूर्त्तिः स बिन्दु-
मान् ।
कृष्णः स वर्त्तुलावर्त्तः पातु वोन्नतपृष्ठकः ॥
श्रीधरः पञ्चरेखोऽव्याद्वनमाली गदान्वितः ।
वामनो वर्त्तुलो ह्रस्वो वामचक्रः सुरेश्वरः ॥
नानावर्णोऽनेकमूर्त्तिर्नागभोगी त्वनन्तकः ।
स्थूलो दामोदरो नीलो मध्ये चक्रः सनीलकः ॥
सङ्कीर्णद्वारको योऽव्यादथ ब्रह्मा सुलोहितः ।
सदीर्घरेखः शुषिर एकचक्राम्बुजः पृथुः ॥
पृथुच्छिद्रस्थूलचक्रः कृष्णो विष्णुश्च बिन्दुवत् ।
हयग्रीवोऽङ्कुशाकारः पञ्चरेखः सकौस्तुभः ॥
वैकुण्ठो मणिरत्नाभ एकचक्राम्बुजोऽसितः ।
मत्स्यो दीर्घोऽम्बुजाकारो द्वाररेखश्च पातु वः ॥
रामचक्रो दक्षरेखः श्यामो वोऽव्यात्त्रिविक्रमः ।
शालग्रामे द्वारकायां स्थिताय गदिने नमः ॥
एकेन लक्षितो योऽव्याद्गदाधारी सुदर्शनः ।
वनमालाविभूषितम् ॥
गोष्पदेन विराजितम् ।
लक्ष्मीनारायणं विदुः ॥

लक्ष्मीनारायणो द्वाभ्यां त्रिभिर्मूर्त्तिस्त्रिविक्रमः ।
चतुर्भिश्च चतुर्व्यूहो वासुदेवश्च पञ्चभिः ॥
प्रद्युम्नः षड्भिरेव स्यात् सङ्कर्षण इतः परः ।
पुरुषोत्तमोऽष्टभिः स्यान्नवव्यूहो नवाङ्कितः ॥
दशावतारो दशभिरनिरुद्धोऽवताद्वश ।
द्वादशात्मा द्वादशभिरत ऊर्द्ध्वमनन्तकः ।
विष्णोर्मूर्त्तिमयं स्तोत्रं यः पठेत् स दिवं
व्रजेत् ॥”
इति गारुडे ४५ अध्यायः ॥ * ॥
अपरञ्च ।
हरिरुवाच ।
“निर्लक्षणा शुभा स्याच्च चक्राङ्कितशिला-
श्मनात् ।
आदौ सुदर्शनो मूर्त्तिर्लक्ष्मीनारायणोऽपरः ॥
त्रिचक्रोऽस्मादच्युतः स्यात् चतुश्चक्रश्चतुर्भुजः ।
वासुदेवश्च प्रद्युम्नस्ततः सङ्कर्षणः स्मृतः ॥
पुरुषोत्तमो ह्यष्टमः स्यान्नवव्यूहो दशात्मकः ।
एकादशोऽनिरुद्धः स्याद्द्वादशो द्वादशात्मकः ॥
अत ऊर्द्ध्वमनन्तः स्यात्चक्रैरेकादिकैः क्रमः ।
सुदर्शनाद्या लक्षिताश्च पूजिताः सर्व्वकामदाः ॥
शालग्रामशिला यत्र देवो द्वारवतीभवः ।
उभयोः सङ्गमो यत्र तत्र मुक्तिर्न संशयः ॥”
इति गारुडे ६५ अध्यायः ॥०॥
क्षेत्रविशेषः - यथा,—
धरण्युवाच ।
“भगवन् देवदेवेश शालङ्कायनको मुनिः ।
किं चकार तपः कुर्व्वन् तव क्षेत्रे विमुक्तिदे ॥
वाराह उवाच ।
अथ दीर्घेण कालेन स ऋषिः संशितव्रतः ।
तप्यमानो यथान्यायं पश्यते शालमुत्तमम् ॥
विश्रामं कुरुते तत्र द्रष्टुकामोऽथ मां मुनिः ।
मायया मम मूढात्मा शक्तो द्रष्टुं न मामभूत् ॥
ततः पूर्व्वेण पार्श्वेन तस्य शालस्य सुन्दरि ।
वैशाखमासद्वादश्यां मद्दर्शनमुपागतः ॥
दृष्ट्वा मां तत्र स मुनिस्तपस्वी शंसितव्रतः ।
तुष्टाव वैदिकैः सूक्तैः प्रणम्य च पुनः पुनः ॥
ततोऽहं स्तूयमानो वै ऋषिमुख्येन सुन्दरि ।
प्राप्तोऽस्मि परमां प्रीतिं तमवोचं ततः ऋषिम् ॥
तत्राश्रमे महाभाग स्थित्वा त्वं तपसां निधे ।
पुत्त्रेण परमप्रीतो मत्क्षेत्रे मत्समो भव ॥
अन्यच्च गुह्यं वक्ष्यामि शालङ्कायन तच्छृणु ।
तव प्रीत्या प्रवक्ष्यामि येनैतत् क्षेत्रमुत्तमम् ॥
शालग्राममिति ख्यातं तन्निबोध मुने शुभम् ।
योऽयं वृक्षस्त्वया दृष्टः सोऽहमेव न संशयः ॥
एतत् कोऽपि न जानाति विना देवं महेश्वरम् ।
एवं तस्मै वरं दत्त्वा शालङ्कायनकाय वै ॥
पश्यतस्तस्य वसुधे तत्रैवान्तर्हितोऽभवत् ।
वृक्षं दक्षिणतः कृत्वा जगाम स्वाश्रमं मुनिः ॥
मम तद्रोचते स्थानं गिरिकूटशिलोच्चये ।
शालग्राम इति ख्यातं भक्तसंसारमोक्षणम् ॥”
इति वाराहे शालग्रामक्षेत्रमाहात्म्यवर्णन-
नामाध्यायः ॥

शालग्रामगिरिः, पुं, (शालग्रामस्य गिरिः ॥)
शालग्रामोत्पादकपर्व्वतः । यथा,—
वाराह उवाच ।
“कथयिष्यामि ते गुह्यं शालग्राममिति
यस्मिन् क्षेत्रे हरो देवो मत्स्यरूपेण संयुतः
शालग्रामे गिरौ तस्मिन्
अहं तिष्ठामि तत्रैव गिरिरूपेण निश्चला ।
तस्मिन् शिलाः समस्तास्तु मत्स्वरूपा न
पूजनीयाः प्रयत्नेन किं पुनश्चक्रलाञ्छिताः ।
लिङ्गरूपेण तु हरस्तत्र देवालये शिवे ।
शिवनामा
सोमेश्वराधिष्ठितस्तु शिवरूपो गिरिः स्मृतः ।
शालग्रामगिरिर्विष्णुरूपः सोमेश्वराधिपः ।
तयोः पर्व्वतयोर्या वै शिला
रेवया च कृतं पूर्व्वं तपः शिवमनुष्टितम् ।
मम त्वत्सदृशः पुत्त्रो भूयादभिहितस्तया ।
अहं कस्यापि न सुतः किं करिष्यामि चिन्त-
यन् ।
रेवायान्तु वरो देयस्त्वश्यं मृगलाञ्छन ।
निश्चित्यैवं तदा सोऽहं प्रभवे नातिदूरतः ।
लिङ्गरूपेण ते देवि गजाननपुरःसर ।
गर्भे तव वसिष्यामि पुत्त्रो भूत्वा शिलात्मकः ।
मम त्वमपरा मूर्त्तिः ख्याता
शिवशक्तित्रिभेदेन स्थावरात्मक संस्थितो ।
एवं दत्तवरा रेवा मत्सान्निध्यमिहागता ।
रेवाखण्डमिति ख्यातं ततः प्रभृति गौतमे ।
गण्डक्यापि पुरा तप्तं वर्षाणामयुतं प्रिये ।
शीर्णपर्णाशनं कृत्वा वायुभक्षाप्यनन्तरम् ।
दिव्यं वर्षशतं तेपे विष्णुं चिन्तयती तदा ।
ततः साक्षाज्जगन्नाथो हरिर्भक्तजनप्रियः ।
उवाच मधुरं वाक्यं प्रीतः प्रणतवत्सलः ।
गण्डकि ! त्वां प्रसन्नोऽस्मि तपसा
अनन्यच्छिन्नया शक्त्या वरं वरय सुव्रते ।
किं देयं तद्वदस्वाद्य प्रीतोऽस्मि वरवर्णिनि ।
गण्डक्यपि पुरो दृष्ट्वा शङ्खचक्रगदाधरम् ।
दण्डवत् प्रणता भूत्वा ततः स्तोत्रं प्रचक्रमे ।
अहो देव मया दृष्टो दुर्दर्शो योगिनामपि ।
त्वया सर्व्वमिदं
ततो हिमाद्रेः सा देवी गण्डकी
प्राञ्जलिः प्रणता भूत्वा
यदि देव प्रसन्नोऽसि देयो मे वाञ्छितो
मम गर्भगतो भूत्वा विष्णो मत्पुत्त्रतां व्रज ।
ततः प्रसन्नो भगवान् चिन्तयामास गौतमे ।
किं याचितं निम्नगया नित्यं
दास्यामि याचितं येन लोकानां भयमोचकम् ।
इत्येवं कृपया देवो निश्चित्य मनसा स्वयम् ।
गण्डकीं कथयामास शृणु देवि वचो मम ।
शालग्रामशिलारूपी तव गर्भगतः सदा ।
तिष्ठामि तव पुत्त्रत्वे भक्तानुग्रहकारणात् ।
मत्सान्निध्यान्नदीनां त्वमतिश्रेष्ठा
दर्शनात् स्पर्शनात् स्नानात् पानाद्यवगा-

...ष्यामि महाराज यादृशं कायमध्यगम्।"
इति वामने शालग्रामादितीर्थमहिमानुकीर्त्ति-
नविंश्यादिसप्तषष्टितमाध्यायः ॥
शालङ्कटङ्कटः, पुं, सुकेशीनामकः। स विद्युत्-
केशिभार्य्यायां सालकटङ्कटायां पुत्रः। इति
वामनपुराणम् ॥
शालङ्कायनः, पुं, (शलङ्कस्यापत्यम्। "नडादिभ्यः फक्।" ४।१।९९। इति फक्।) मुनिविशेषः। नन्दी। इति मेदिनी ॥
शालङ्कायनजीवसूः, स्त्री, व्याससाता। यथा,—
"व्यासस्यात्मा सत्यवती वासवी गन्धकालिका।
योजनगन्धा दाशेयी शालङ्कायनजीवसूः ॥"
इति हेमचन्द्रः ॥
शालङ्किः, पुं, मुनिभेदः। यथा,—
"वशिष्ठोऽरुन्धतीनाथो मैत्रावरुणिरित्यपि।
शालातुरीयः शालङ्किर्दाक्षीपुत्रस्तु पाणिनिः ॥"
इति जटाधरः ॥
शालजः पुं, (शालाज्जायते इति। जन् + डः।) शालमत्स्यः। यथा। शालः शालजगर्जकौ। इति शब्दरत्नावली ॥
शालनिर्य्यासः, पुं, (शालस्य निर्य्यासः।) सर्जरसः। धुना इति भाषा। तत्पर्य्यायः। शालनः २ सर्जः ३ सर्जरसः ४। इति रत्नमाला ॥ धूनकः ५ वह्निवल्लभः ६ सर्जमणिः ७। इति त्रिकाण्डशेषः ॥
शालपर्णी, स्त्री, (शालस्य पर्णवत् पर्णमस्याः। ङीप्) क्षुपविशेषः। शालपानी इति भाषा। तत्पर्य्यायः। सुदला २ सुपर्वी ३ स्थिरा ४ सौम्या ५ कुमुदा ६ गुहा ७ ध्रुवा ८ विदारिगन्धा ९ अंशुमती १० सुपर्णिका ११ दीर्घमूला १२ दीर्घपत्रिका १३ वातघ्नी १४ पीतिनी १५ तन्वी १६ सुधा १७ सर्व्वानुकारिणी १८ शोफघ्नी १९ सुभगा २० देवी २१ निश्चला २२ ब्रीहिपर्णिका २३ सुमूला २४ सुरूपा २५ शुभपत्रिका २६ सुपर्णी २७ शालिपर्णी २८ शालिदला २९। इति राजनिर्घण्टः। विदारी ३० सालपर्णी ३१। इत्यमरटीकायां भरतः ॥ अस्या गुणाः। ग्राहित्वम्। कफपित्तनाशित्वञ्च। इति राजवल्लभः ॥ तिक्तत्वम्। गुरुत्वम्। उष्णत्वम्। वातदोषविषमज्वरमेहार्शःशोकसन्तापनाशित्वञ्च। इति राजनिर्घण्टः ॥
अपिच।
"शालपर्णी स्थिरा सौम्या त्रिपर्णी पीवरा गुहा।
विदारिगन्धा दीर्घाङ्घ्रिर्दीर्घपत्रांशुमत्यपि ॥
शालपर्णी गुरुश्छर्द्दिज्वरश्वासातिसारजित्।
शोषदोषत्रयहरी बृंहण्युक्ता रसायनी।
तिक्ता विषहरी स्वादुः क्षतकासकृमिप्रणुत् ॥"
इति भावप्रकाशः ॥
शालभञ्जिका, स्त्री,(शालेन भज्यते निर्म्मीयते इति। भन्ज + "क्वुन् शिल्पिसंज्ञयोरपूर्वस्यापि।" उणा० २।३२। इति क्वुन्। टापि अत इत्वम्।) काष्ठादिनिर्म्मितपुत्रिका। (यथा, राजतरङ्गिण्याम्। ७। ६६।
"स्तम्भोत्कीर्णितकर्णेन्दुकुन्तलमनोज्ञनाम्।
बभार यत्र जम्भारी जयश्रीशालभञ्जिकाम् ॥")
वेश्या। इति जटाधरः ॥
शालभञ्जी, स्त्री, काष्ठादिनिर्म्मितपुत्रिका। इति हेमचन्द्रः ॥
शालयः, पुं, लोध्रः। इति शब्दरत्नावली ॥
शालवेष्टः, पुं, (शालस्य वेष्टो निर्य्यासः।) शालनिर्य्यासः। इति त्रिकाण्डशेषः ॥
शालसारः, पुं, (शालस्य सारः।) द्रुमः। हिङ्गुः। इति विश्वः ॥
शाला, स्त्री, (शो + "बाहुलकात् अन्येरपि कालन्।" इत्युज्ज्वलदत्तोक्त्या कालन्।१।११०। गृहम्। इत्यमरः ॥ (यथा, भागवते।८।८।११।
"धूपामोदितशालायां जुष्टायां माल्यदीपकैः।")
वृक्षस्य स्कन्धशाखा। गृहैकदेशः। इति मेदिनी ॥
शालायी, [न्] पुं, अस्त्रवैद्यः। नापितः। शैलधारी। इति केचित् ॥
शालाङ्की, स्त्री, पुत्तलिका। इति शब्दरत्नावली ॥
शालाजिरः, पुं, क्ली, शरावः। इति हेमचन्द्रः शब्दरत्नावली च ॥
शालाञ्चिः, स्त्री, शाकभेदः। इति शब्दरत्नावली
शालानी, स्त्री, विदारी। इति शब्दरत्नावली ॥
शालामृगः, पुं, (शालाया मृगः।) शृगालः। इति हारावली ॥
शालारं, क्ली, (शालां आऋच्छतीति। ऋ + अण्।) हस्तिनखः। सोपानम्। पक्षिपञ्जरः। इति मेदिनी ॥
शालावृकः, पुं,(शालायां गृहे शाखायां वा वृक इव।) वानरः। कुक्कुरः। शृगालः। इत्यमरः ॥ मृगः। इति शब्दरत्नावली। विडालः। इति राजनिर्घण्टः ॥
शालिः, पुं,(शृणातीति। शॄ + बाहुलकात् इञ्। रस्य लत्वम्।) गन्धमार्ज्जारः। इति मेदिनी ॥ कलमादिधान्यम्। षष्टिकादिधान्यम्। इत्यमरः ॥ तत्पर्य्यायः। मधुरः २। रुच्यः ३ ब्रीहिश्रेष्ठः ४ नृपप्रियः ५ धान्योत्तमः ६ कैदारः ७ सुकुमारकः ८। पुस्तकान्तरे मधुरस्थाने कलम इति पाठः। स तु दशविधः। यथा,—
"राजान्नषष्टिकसितेतररक्तमण्ड-
स्थूलाणुगन्धतिरियादिकशालिसंज्ञाः।
ब्रीहिस्तथेति दशधा भुवि शालयः स्यु-
स्तेषां क्रमेण गुणनामगणं ब्रवीमि ॥"
इति राजनिर्घण्टः ॥
अस्य गुणाः।
"शालयो मधुराः शीता लघुपाका बलावहाः।
पित्तप्रायानिलकफाः स्निग्धा बद्धाल्पवर्च्चसः ॥"
इति राजवल्लभः ॥
अथ शालिधान्यलक्षणम्।
'कण्डनेन विना शुक्ला हैमन्ताः शालयः स्मृताः ॥'
शालीनां नामानि यथा,—
"रक्तशालिः सकलमः पाण्डुकः शकुनाहृतः।
सुगन्धकः कर्द्दमको महाशालिश्च दूषकः ॥
पुष्पाण्डकः पुण्डरीकस्तथा महिषमस्तकः।
दीर्घशूकः काञ्चनको हायनो लोध्रपुष्पकः।
इत्याद्याः शालयः सन्ति बहवो बहुदेशजाः ॥"
अथ तेषां गुणाः।
"शालयो मधुराः स्निग्धा बल्या बद्धाल्पवर्च्चसः।
कषाया लघवो रुच्याः स्वर्य्या वृष्याश्च बृंहणाः ॥
अल्पानिलकफाः शीताः पित्तघ्ना मूत्रलास्तथा।
शालयो दग्धमृज्जाताः कषाया लघुपाकिनः ॥
सृष्टमूत्रपुरीषाश्च रूक्षाः श्लेष्मापकर्षणाः।
कैदारा वातपित्तघ्ना गुरवः कफशुक्रलाः ॥
कषाया अल्पवर्च्चस्का मधुराश्च बलावहाः ॥"
कैदाराः क्षेत्रजा उमाः।
"स्थलजाः स्वादवः पित्तकफघ्ना वातवह्निदाः।
किञ्चित्तिक्ताः कषायाश्च विपाके कटुका अपि ॥"
स्थलजा अकृष्टभूमिजाः स्वयंजाताः।
"वापिता मधुरा वृष्या बल्याः पित्तप्रणाशनाः ॥
श्लेष्मलाश्चाल्पवर्च्चस्काः कषाया गुरवो हिमाः ॥"
वापिताः कृष्टक्षेत्रे अकृष्टक्षेत्रे च।
"वापितेभ्यो गुणैः किञ्चिद्धीनाः प्रोक्ता अवापिताः ॥"
कृष्टक्षेत्रे अकृष्टक्षेत्रे च।
"रोपितास्तु नवा वृष्याः पुराणा लघवः स्मृताः।
रोपितारोपिता भूयः शीघ्रपाका गुणाधिकाः ॥
छिन्नरूढा हिमा रूक्षा बल्याः पित्तकफापहाः।
बद्धविट्काः कषायाश्च लघवश्चाल्पतिक्तकाः ॥"
अथ रक्तशालेर्गुणाः ॥
"रक्तशालिर्वरस्तेषु बल्यो वर्ण्यस्त्रिदोषजित्।
चक्षुष्यो मूत्रलः स्वर्य्यः शुक्रलस्तृड्ज्वरापहः।
विषव्रणश्वासकासदाहनुद्वह्निपुष्टिदः।
तस्मादल्पान्तरगुणाः शालयो महदादयः ॥"
रक्तशालिः दाउदखानी इति मगधदेशे प्रसिद्धः इति भावप्रकाशः ॥ (पंसि। इत्युणादिवृत्तौ उज्ज्वलः। ४। १२७ ॥)
शालिका, स्त्री,(शालिरिव। स्वार्थे कन्।) विदारिका। इति शब्दरत्नावली ॥
शालिञ्चः, पुं, शाकविशेषः। शाञ्चा इति भाषा। तत्पर्य्यायः। शालञ्चः २ शितसारः ३ पत्रकेटः ४ लोहसारकः ५। अस्य गुणाः। दीपनत्वम्। तिक्तत्वम्। प्लीहार्शःकफवातनाशित्वञ्च। इति राजनिर्घण्टः ॥
शालिञ्ची, स्त्री, (शालिञ्च + स्त्रियां ङीप्।) शाकभेदः। शाञ्चे इति भाषा। अस्य प्रमाणं शीलफशब्दे द्रष्टव्यम् ॥
शालीनीकरणं, क्ली, न्यग्भावनम्। इति त्रिकाण्डशेषः ॥ तिरस्कार इति यावत् ॥
शालिपर्णी, स्त्री, (शालेरिव पर्णानि यस्याः। ङीप्।) माषपर्णी। इति राजनिर्घण्टः ॥

शालिपिष्ट', क्ली, (शालेः पिष्टमिव शुभ्रत्वात्।) स्फटिकम्। इति त्रिकाण्डशेषः॥

शालिवाहनः, पुं, राजविशेषः। स तु शककर्त्ता विक्रमादित्यशत्रुश्च॥

शालिहोत्र', पुं, घोटकः। इति त्रिकाण्डशेषः॥

शाली, [न्] त्रि, (शालास्यास्तीति। इनिः।) शालाविशिष्टः। पदान्ते युक्तवाचकः। यथा,—
"चन्दनचर्च्चितनीलकलेवरपीतवसनवनमाली।
केलिचलन्मणिकुण्डलमण्डितगण्डयुगस्मित-
शाली॥"
इति जयदेवः॥

(श्लाघ्यः। यथा, भागवते। ३। २४। १।
"दायांलुः शालिनीमाह शुक्लाभिव्याहृतं
स्मरन्॥")

शाली, स्त्री, कृष्णजीरकः। इति राजनिर्घण्टः॥

शालीन', त्रि, (शालाप्रवेशनमर्हतीति। शाला+ "शालीनकौपीने अधृष्टाकार्य्ययोः।" ५।२।२० इति खञ्प्रत्ययेन निपातनात् सिद्धम्।) अधृष्टः। इत्यमरः॥ (यथा, मार्कण्डेये। ४१।८।
"अथ नित्यं गृहस्थेषु शालीनेषु चरेद्यतिः॥")
शालासम्बन्धी च।

शालीना, स्त्री, (शालीन+टाप्।) मिश्रया। इति राजनिर्घण्टः॥

शालु, क्ली, (शृणाति शीतागमे। शॄ+बाहुलकात् ञुण् रेफस्य लत्वञ्च। इत्युज्ज्वलः। १। ५।) शालूकम्। इति शब्दरत्नावली॥

शालुः, पुं, (शॄ+ञुण् रेफस्य लत्वञ्च।) कषायद्रव्यम्। चौरकाख्यौषधिः। इति मेदिनी॥ भेकः। इति हेमचन्द्रः॥

शालुकं, क्ली, कुमुदादिमूलम्। तत्पर्य्यायः। पद्मगूरणम् २ शालूक. ३ शालु ४। इति शब्दरत्नावली॥

शालूकं, क्ली, (शल+"शलिमण्डिभ्यामूकण्।" उणा० ४। ४२। इति ऊकण्।) कुमुदादिमूलम्। इत्यमरः॥ जातीफलम्। इति राजनिर्घण्टः॥

शालूक', पुं, (शल+"शलिमण्डिभ्यामूकण्।" उणा० ४। ४२। इत्यूकण्।) कुमुदादिमूलम्। इति त्रिकाण्डशेषः॥ (यथा, हठयोगप्रदीपिका- याम्। ४१। ९।
"मिथुनेपि धान्यशारदपक्षीशालूककार्पासाः॥")
मण्डूकः। इति राजनिर्घण्टः॥

शाल्मूर., पुं, शलति प्लवेन गच्छतीति। शल+ "खर्जिपिञ्जादिभ्यः ऊरोलचौ।" उणा० ४।९०। इति ऊरः।(भेकः। इत्यमरः॥

शालेयं, त्रि, (शालीनां क्षेत्रम्। शालि+"व्रीहि- शाल्योर्ढक्।" ५।२।२। इति ढक्।) शाल्युद्भव- क्षेत्रम्। इत्यमरः॥ शालासम्बन्धि शालसम्बन्धि च॥

शालेय', पुं, मधुरिका इत्यमरः॥

शालेया, स्त्री, (शालेय+टाप्।) मिश्रेया। इति राजनिर्घण्टः॥

शालोत्तरीयः, पुं, (शालोत्तरे ग्रामे भवः। शालो त्तर+छः।) पाणिनिमुनिः। इति त्रिकाण्ड- शेषः॥

शाल्मलः, पुं, शाल्मलीवृक्षः। इति शब्दरत्ना- वली॥ (यथा, महाभारते। १। ६४। ३।
"अर्ज्जुनारिष्टभव्याश्च स्यन्दनैश्च सशाल्मलैः॥")
द्वीपविशेषः। इति शब्दमाला॥ तद्विवरणं यथा,—
"अत ऊर्द्ध्वं प्रवक्ष्यामि शाल्मलस्य निबोधत।
शाल्मली द्विगुणो द्वीपः क्रौञ्चद्वीपस्य विस्तरात्॥
परिवार्य्य समुद्रन्तु दधिमण्डोदकं स्थितः।
तत्र पुण्या जनपदाश्चिरान्न म्रियते जनः॥
कुत एव सुदुर्भिक्षं क्षमातेजोयुता हि ते।
प्रथमः सूर्य्यसङ्काशः सुमना नाम पर्व्वतः॥
पीतस्तु मध्यमस्तत्र शातकौम्भमयो गिरिः।
नाम्ना सर्व्वसुखो नाम दिव्यौषधिसमन्वितः॥
तृतीयश्चैव सौवर्णो भृङ्गपत्रनिभो गिरिः।
स नाम्ना रोहितो नाम दिव्यो गिरिवरो
महान्॥
सुमनाः कुशलो देशः सुखोदर्कः सुखोदयः।
रोहितस्तु तृतीयस्तु रोहिणो नाम विश्रुतः॥
तत्र रत्नान्यनेकानि स्वयं रक्षति वासवः।
प्रजापतिमुपादाय प्रसन्नो विधिवत् स्वयम्॥
न तत्र नद्यो वर्षं वा शीतोष्णञ्चैव तद्विधम्।
वर्णाश्रमाणां वार्त्ता वा त्रिषु द्वीपेषु विद्यते॥
न ग्रहः न च दण्डोऽस्ति ईर्ष्यासूया भयं तथा।
उद्भिदान्युदकान्यत्र गिरिप्रस्रवणानि च॥
भोजनं षड्रसं तत्र तेषां स्वयमुपस्थितम्।
अधमोत्तमौ न तेष्वस्ति न लोभो न परिग्रहः॥
अरोगा बलवन्तश्च एकान्तसुखिताः प्रजाः।
त्रिंशद्वर्षसहस्राणि मानसीं सिद्धिमास्थिताः॥
सुखमायुःस्वरूपञ्च धर्म्मैश्वर्य्यं तथैव च।
शाल्मलाद्येषु विज्ञेयं द्वीपेषु त्रिषु सर्व्वशः॥
व्याख्यातः शाल्मलाद्यानां द्वीपानान्तु विधिः
शुभः।
परिमण्डलस्तु स द्वीपश्चक्रवत् परिवेष्टितः।
सुरोदेन समुद्रेण द्विगुणेन समन्वितः॥"
इति मत्स्यपुराणे भुवनकोषे सप्तद्वीपनिवेशनं नाम १०० अध्यायः॥ * ॥ अपि च।
"प्लक्षद्वीपप्रमाणात्तु द्विगुणेन समन्ततः।
संवेष्ट्य सुरसाम्भोधिं शाल्मलिः संव्यवस्थितः॥
सप्त वर्षाणि तत्रैव सप्तैव कुलपर्व्वताः।
ऋज्वायताः सुपर्व्वाणः सप्त नद्यश्च सुव्रताः॥
कुमुदश्चोन्नतश्चैव तृतीयश्च बलाहकः।
द्रोणः कर्णस्तु महिषः ककुद्मान् सप्त पर्व्वताः॥
योनिस्तोया वितृष्णा च चन्द्रा शुक्ला विमोचनी
निवृत्तिश्चेति ता नद्यः स्मृताः पापहराः
शिवाः॥
न तेषु विद्यते लोभः क्रोधो वा द्विजसत्तमाः।
न चैवास्ति युगावस्था जना जीवन्त्यनामयाः॥
यजन्ति सततं तत्र वर्णा वायुं सनातनम्।
तेषां तस्माच्च सायुज्यं सारूप्यञ्च सलोकताम्॥

कपिला ब्राह्मणाः प्रोक्ता . . .
पीता वैश्यास्तथा कृष्णा द्वीपेऽस्मिन्
हि
इति कौर्म्मे भुवनविन्यासे ४६ अध्या
शीतरसः। इति रत्नमाला॥

शाल्मलि', पुं स्त्री, वृक्षविशेषः। शि
भाषा॥ (यथा मनौ। ८। ४६।
"शाल्मलीन् शालतालांश्च क्षीरिणश्चै

तत्पर्य्यायः। पिच्छिला २ पूरणी ३
स्थिरायुः ५। इत्यमरः॥ दुरारोहा
लिनी ७ शाल्मलः ८। इति शब्दर
तूलिनी ९ कुक्कुटी १० रक्तपुष्पा ११
कारी १२ मोचनी १३। इति ज
चिरजीवी १४ पिच्छिलः १५ रक्त
तूलवृक्षः १७ मोचाख्यः १८ कण्ट
रक्तोत्पलः २० रम्यपुष्पः २१ बहु
यमद्रुमः २३ दीर्घद्रुमः २४ सूत्र
दीर्घायुः २६। इति राजनिर्घण्टः।
काष्ठः २७। इति भावप्रकाशः। अस्य
पिच्छिलत्वम्। दृष्यत्वम्। बलत्व
रत्वम्। शीतलत्वम्। कषायत्वम्। क
स्निग्धत्वम्। शुक्रश्लेष्मवर्द्धनत्वञ्च। तत्
ग्राहित्वम्। कषायत्वम्। कफना
तत्पुष्पं फलञ्च तद्विधम्। इति राज
"शाल्मली शीतला स्वाद्वी रसे पाके
श्लेष्मला स्निग्धबीजा च इन्ती रक्त
शाल्मलीपुष्पशाकन्तु घृतसैन्धवसाधि
प्रदरं नाशयत्येव दुःसाध्यञ्च न संशय
रसे पाके च मधुरं कषायं शीतलं गु
कफपित्तास्रजिद्ग्राहि वातलञ्च प्रको
इति भावप्रक
नरकविशेषः। तत्र शाल्मलिकण्टके

शाल्मलिकः, पुं, (शाल्मली+"वुञ्छण्
४। २। ८०। इति कुमुदादित्वात्
रोहितकवृक्षः। इति राजनिर्घण्टः।

शाल्मलिनी, स्त्री, शाल्मलिवृक्षः। इ
रत्नावली॥

शाल्मलिपत्रकः, पुं, (शाल्मलिपत्र
यस्य।) सप्तच्छदवृक्षः। इति राजनि

शाल्मलिस्थः, पुं, (शाल्मलौ वृक्षे तिष्ठ
+क।) गरुडः। इति राजनिर्घण्ट

शाल्मली, स्त्री, (शाल्मलि+कृदिकारा
ङीष्।) शाल्मलिवृक्षः। इत्यमरः।
दैर्घ्यात् दूरं गच्छति शाल्मलिः। शम
नाश्नोति मलिन् वृद्धिः। इयोरित्
पाञ्चौषादीति ईपि शाल्मली च शाल
केचित् तन्मते विभाषया वृद्धिः। शक
पुष्पा च कुक्कुटी चिरजीविका इति
मिति मुकुटः। इत्यमरटीकायां भरत

शाल्मली, [न्] पुं, (शाल्मलः अस्त्यस्य
स्येति इनिः।) गरुडः। इति त्रिकाण्ड

लीकन्दः,पुं,(शाल्मल्याः कन्दः।) शाल्मलि-
मूलम्। तत्पर्य्यायः। विलुलः २ वन-
कः ३ वनवासी ४ मलघ्नः ५ मलहन्ता६।
गुणाः। मधुरत्वम्। मलसंग्रहरोधजय-
त्वम्। शिशिरत्वम्। पित्तदाहार्त्तिशोफ-
शापनाशित्वञ्च। इति राजनिर्घण्टः॥
लीफलः,पुं,(शाल्मल्याः फलमिव फलं यस्य)
फलद्रुमः। इति राजनिर्घण्टः॥
लीवेष्टः, पुं, (शाल्मल्या वेष्टः।) शाल्मलि-
र्यासः। शिमुल आठा इति भाषा॥ तत्-
र्यायः। पिच्छा २। इत्यमरः॥ मोचरसः ३
मलः ४ शाल्मलीवेष्टकः ५। इति रत्न-
ला॥ मोचस्रावः ६ मोचनिर्यासः ७।
य गुणाः।
मोचस्रावो हिमो ग्राही स्निग्धो हृद्यः
कषायकः।
ग्रहिकातिसारामकफपित्तास्रदाहनुत्॥"
इति भावप्रकाशः॥
मलीवेष्टकः, पुं, (शाल्मलीवेष्ट+स्वार्थे कन्।)
ल्मलीवेष्टः। इति रत्नमाला॥
वः, पुं, देशविशेषः। यथा,—
शाल्वास्तु कारकुक्षीया मरवस्तु दशेरकाः॥"
इति हेमचन्द्रः॥
लविशेषः। इति महाभारतम्॥ (सौभेण
हास्य युद्धवृत्तान्तो महाभारते आदिपर्व्वणि
०२ अध्याये तथा कृष्णेन सहास्य युद्-
त्तान्तस्तत्रैव वनपर्व्वणि १५ अध्यायमारभ्य
ष्टव्यः॥)
ल्वणः, पुं, वातघ्नौषधगणविशेषः। यथा,—
काकोल्यादिः स वातघ्नः सर्व्वाम्लद्रव्यसंयुतः।
आनूपौदकमांसैस्तु सर्व्वस्नेहसमन्वितः॥
उष्णाः स्पष्टलवणः शाल्वणः परिकीर्त्तितः।
नोपनाहं कुर्व्वीत सततं वातरोगिणाम्॥"
इति सुश्रुते चिकित्सितस्थाने ५ अध्यायः॥
वः, पुं, (शव्यते प्राप्यते इति। शव गतौ+
ञ्।) शिशुः। इति शब्दरत्नावली॥ (यथा,
घुवंशे। ६। ३।
"शिलाविभङ्गैर्मृगराजशावः
तुङ्गं नगोत्सङ्गमिवारुरोह॥"
शवस्यायम्। शव+अण्।) शवसम्बन्धिनि,
त्रि॥ यथा,—
"पञ्चपे शावमार्गोयं विमुक्तो मौतिकं स्मृतम्।
तयोः सम्यगभिमात्रेण उपस्पर्श क्रियाक्रमः॥
इति तिथ्यादितत्त्वे ब्रह्माण्डपुराणम्॥
शावकः, पुं, (शाव एव। स्वार्थे कन्।) शिशुः।
इत्यमरः॥ (यथा, कुमारसम्भवे द्वितीयायाम्। ४८।
१३।
"दत्ताभयवगसुगशावकेषु तेवाम्मेरदया॥")
शावरः, पुं, (शवराणामयम्। शवर+अण्।)
पापम्। अपराधः। लोध्रद्रुमः। इति मेदिनी॥
शवरस्वामिकृतभाष्यविशेषः। शिवकृततन्त्र-
विशेषश्च। शवरसम्बन्धिनि, त्रि। यथा,—

"संपूज्य प्रेषणं कुर्य्यात् दशम्यां शावरोत्सवैः॥"
इति तिथ्यादितत्त्वम्॥
शावरभेदाख्यं, क्ली, ताम्रम्। इति हेमचन्द्रः॥
शावरी, स्त्री, शूकशिम्बी। इति मेदिनी॥
शावरोत्सवः, पुं, (शावराणामुत्सवः।) म्लेच्छ-
कृतोत्सवः। यथा,—
"पूजयित्वा महाष्टम्यां नवम्यां बलिभिस्तथा।
विसर्ज्जयेत् दशम्यां तु श्रवणे शावरोत्सवैः॥
अन्तःपादी दिवाभागे श्रवणस्य यदा भवेत्।
तदा संप्रेषणं देव्या दशम्यां शावरोत्सवैः॥
रागिणीभिः कुमारीभिर्वेश्याभिर्नर्त्तकैस्तथा।
शङ्खतूर्य्यनिनादैश्च मृदङ्गैः पटहैस्तथा॥
ध्वजैर्वस्त्रैर्बहुविधैर्लाजपुष्पप्रकीर्णकैः।
धूलीकर्द्दमविक्षेपैः क्रीडाकौतुकमङ्गलैः॥
भगलिङ्गविधानैश्च भगलिङ्गप्रगीतकैः।
भगलिङ्गादिशब्दैश्च क्रीडयेयुरलं जनाः॥
परैर्नाक्षिप्यते यस्तु यः परं नाक्षिपत्यपि।
क्रुद्धा भगवती तस्य शापं दद्यात् सुदारुणम्॥"
इति कालिकापुराणे उत्तरतन्त्रे ६० अध्यायः॥
शाश्वतं, त्रि, (शश्वद्भवम्। शश्वत्+अण्।)
नित्यम्। इत्यमरः॥ (यथा, रामायणे।
१।२।१५।
"मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥")
पारिभाषिकशाश्वतं यथा,—
"शाश्वतं देवपूजादि विप्रदानञ्च शाश्वतम्।
शाश्वतं सगुणा विद्या सुहृन्मित्रञ्च शाश्वतम्॥"
इति गारुडे नीतिसारे १०८ अध्यायः॥
शाश्वतः, पुं, वेदव्यासः। इति शब्दरत्नावली॥
(शिवः। यथा महाभारते। १३। १७। ३२।
"प्रवृत्तिश्च निवृत्तिश्च नियतः शाश्वतो ध्रुवः॥")
शास्कुलः, त्रि, मांसाशी। इति हेमचन्द्रः॥
शास्कुलिकं, क्ली, (शस्कुल+समूहार्थे ठक्।)
शस्कुलिसमूहः इत्यमरः॥
शास, उ घ लु शासने। इति कविकल्पद्रुमः॥
(अदा०-पर०-सक०-सेट्। क्त्वावेट्।) उ,
शासित्वा शिष्ट्वा। घ, शासति। लु, शास्ति।
शास्ति यथाज्ञया राज्ञः स सम्राडित्यमरः।
इति दुर्गादासः॥
शास ङ ष } आशिषि। इति कविकल्पद्रुमः॥
शास ल ङ } (भ्वा०-अदा०-च-आत्म०-सक०-
सेट्।) आङ्पूर्व्वा इति केवलानामन्यपूर्व्वा-
णाञ्च प्रयोगनिरासार्थम्। किन्तु "इष्टं गुरुभ्यः
पूर्व्वेभ्यो नमो वाकं प्रशास्महे।" इत्युत्तरचरिते
प्रपूर्व्वोऽपि दृश्यते। ङ, आशासते। ष, आशा-
सिता आशास्त्वा। पञ्चमस्वरानुबन्धसामर्थ्यात्
क्षमात्वयस्य न दत् समासाभावादिति गोविन्द
भट्टः। किन्तु अस्य उदनुबन्धत्वं छन्दस्येति
धातुप्रदीपः। ल ङ, अस्ते शास् डिदय हि
इत्यत्र अदादीयशास्तेरेव ग्रहणादस्योपधाया
इकारो न स्यात्। आशीरिष्टार्थशंसनम्।
इच्छायामित्यन्ये। इति दुर्गादासः॥

शासनं, क्ली, (शास+ल्युट्।) आज्ञा। (यथा,
मनौ। ८। २६२।
"कुर्व्वीत शासनं राजा सम्यक् सारापरा-
धतः॥")
तत्पर्य्यायः। अववादः २ निर्द्देशः ३ निदेशः ४
शिष्टिः ५। इत्यमरः॥ शास्तिः ६। इति
भरतः॥ आदेशः ७ आदेशनम् ८। इति
शब्दरत्नावली॥ शास्त्रम् ८। इति जटाधरः॥
राजदत्तभूमिः। लेखा। शास्त्रम्। शास्तिः।
इति मेदिनी। (दानलिखितताम्रफलकादिः।
यथा, कथासरित्सागरे। १२४। ६२-६३।
"शासनं लेखयित्वा च तमेवं स समादिशत्।
ॐकारपीठमार्गेण भद्र गच्छोत्तरां दिशम्॥
तत्रासुना शासनेन ग्रामं भुङ्क्ष्व मदर्पितम्।
नाम्ना तं खण्डवटकं पृच्छन् गच्छन्नवाप्स्यसि॥"
यथाच मार्कण्डेये। ३६। ८।
"वाच्यं ते शासनं पट्टे क्षुद्राक्षरनिवेशितम्॥"
स्त्रियां धर्म्मोपदेशकर्त्री। यथा, ऋग्वेदे। १।
३१। ११।
"इलामकृण्वन्मनुषस्य शासनीम्॥")
शासनहरः, पुं, (हरतीति। हृ+अच्। शास-
नस्य हरः।) राजदूतः। आज्ञावाहकः। इति
केचित्॥
शासितः, त्रि, (शास+क्तः।) कृतशासनः। यथा,
"सुजीर्णमन्नं सुविचक्षणः सुतः
सुशासिता स्त्री नृपतिः सुसेवितः।
सुचिन्त्य चोक्तं सुविचार्य्य यत् कृतं
सुदीर्घकालेऽपि न याति विक्रियाम्॥"
इति पञ्चतन्त्रम्॥
शासिता, [ऋ] त्रि, (शास्+तृच्।) शास्ता।
इति त्रिकाण्डशेषः॥ (यथा, मनौ। ७। १७।
"स राजा पुरुषो दण्डः स नेता शासिता च सः॥"
व्याख्याता। यथा, तत्रैव। २। १५०।
"ब्राह्मस्य जन्मनः कर्त्ता स्वधर्म्मस्य च
शासिता॥")
शास्ता, [ऋ] त्रि, (शास्+"तृन्तृचौ शंसीति"
उणा० २। ९४। इति धर्म्मसंज्ञायामपि तृन्।
स च अनिट्।)शासनकर्त्ता। तत्पर्य्यायः। देशकः
२ शासिता ३। इति त्रिकाण्डशेषः॥ यथा,—
"द्वौ धाता च विधाता च योराणां जगतः
पती।
द्वौ शास्तारौ विलोकेऽस्मिन् धर्म्माधर्म्मौ प्रकी-
र्त्तितौ॥"
इति वह्निपुराणे गणभेदनामाध्यायः॥
(यथा च भागवते। १। १२। २६।
"राजर्षीणां जनयिता शास्ता चोत्पथगामि-
नाम्॥")
शास्ता, [ऋ] पुं, (शास्+"तृन्तृचौ शंसिक्ष-
दादिभ्यः संज्ञायां चानिटौ।" उणा० २।९४।
इति तृन्। स च अनिट्।) बुद्धः। इत्यमरः॥
उपाध्यायः। राजा। पिता। इति शब्दच-
न्द्रिकादिवृत्तिः॥

शास्तिः, स्त्री, (शास + बाहुलकात् तिः । इत्यु-ज्ज्वलदत्तः । ४ । १७८ ।) शासनम् । इति शब्दरत्नावली ॥ (यथा, मार्कण्डेये । १३३।२० ।
"प्रागेवैतत्त्वमेतस्मै दुष्टशास्तिसमुद्यतम् ॥")

शास्त्रं, क्ली, (शिष्यते अनेन । शास + "सर्व्व-धातुभ्यष्ट्रन् ।" उणा० ४।१५८ । इति ष्ट्रन् ।) निदेशः । ग्रन्थः । इत्यमरः ॥ स च ग्रन्थः अष्टादशविधः । तस्य विवरणं विद्याशब्दे द्रष्टव्यम् ॥ * ॥ शास्त्रोत्पत्तिर्यथा,—

मत्स्य उवाच ।

"तपश्चचार प्रथममराणां पितामहः ।
आविर्भूतास्ततो वेदाः साङ्गोपाङ्गपदक्रमाः ॥
पुराणं सर्व्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम् ।
नित्यशब्दमयं पुण्यं शतकोटिप्रविस्तरम् ॥
अनन्तरञ्च वक्त्रेभ्यो वेदास्तस्य विनिःसृताः ।
मीमांसान्यायविद्याश्च प्रमाणं तर्कसंयुताः ॥
वेदाभ्यासरतस्यास्य प्रजाकामस्य मानसाः ।
मनसः पूर्व्वसृष्टा वै जाता ये तेन मानसाः ॥"

इति मात्स्ये ३ अध्यायः ॥ * ॥

शास्त्रोक्तकर्म्म कर्त्तव्यं न तु शास्त्रविरुद्धम् । यथा,—

"श्रुतिस्मृतिसदाचारविहितं कर्म्म केवलम् ।
सेवितव्यं चतुर्व्वर्णैर्भजद्भिः केशवं सदा ॥
अन्यथा निरयं यान्ति कुमार्गागमसेवनात् ।
अतो वेदविरुद्धार्थं शास्त्रोक्तं कर्म्म संत्यजेत् ॥
स्वबुद्धिरचितैः शास्त्रैः प्रतार्य्येह च बालिशान् ।
निघ्नन्ति श्रेयसो मार्गं लोकनाशाय केवलम् ॥
निन्दन्ति देवता वेदांस्तपो निन्दन्ति सद्द्विजान् ।
तेन ते निरयं यान्ति असच्छास्त्रनिषेवणात् ॥
श्रुतिस्मृतिसदाचारविहितं कर्म्म शाश्वतम् ।
स्वं स्वं धर्म्मं प्रयत्नेन श्रेयोऽर्थीह समाचरेत् ॥
स्वबुद्धिरचितैः शास्त्रैर्मोहयित्वा जनं नराः ।
तेन ते निरयं यान्ति युगानां सप्तविंशतिः ॥"

इति पाद्मे उत्तरखण्डे १७ अध्यायः ॥ * ॥

अध्यात्मशास्त्रातिरिक्तशास्त्रनिन्दा यथा,—

"पुराणं भारतं वेदधर्म्मशास्त्राणि यानि च ।
आयुषः क्षपणायैव धर्म्मतत्त्वं च चाचरेत् ॥
पुत्त्रदारादिसंसारः पुंसां संमूढचेतसाम् ।
विदुषां शास्त्रसंसारः सद्योगाभ्यासविघ्नकृत् ॥
इदं ज्ञेयमिदं ज्ञेयं यः सर्व्वं ज्ञातुमिच्छति ।
अपि वर्षसहस्रेणापि शास्त्रान्तं नाधिगच्छति ॥
विज्ञायाक्षरतन्मात्रं जीवितञ्चापि चञ्चलम् ।
विहाय शास्त्रजालानि पारलौकिकमाचरेत् ॥
दग्धितोऽपि हि मूर्खोऽसौ शक्तियुक्तोऽप्य-
शक्तिकः ।
यः संसाराय चात्मानं समुत्तारयितुं क्षमः ॥"

इति वह्निपुराणे शुभासद्दर्शनानामाध्यायः ॥ * ॥

वेदविरुद्धशास्त्राणि यथा,—

"यानि चैव शास्त्राणि लोकेऽस्मिन्मोहनानि च ।
वेदवादविरुद्धानि मयैव कथितानि तु ॥
वामं पाशुपतं सौमं लाकुलं चैव भैरवम् ।
असेव्यमेतत् कथितं वेदवाह्यं तथेतरत् ॥
वेदमूर्त्तिरहं विप्रा नान्यशास्त्रार्थवादिभिः ।
ज्ञायते मत्स्वरूपन्तु त्यक्त्वा वेदं सनातनम् ॥"

इति कौर्म्मे उपविभागे १६ अध्यायः ॥ * ॥

अपि च । कूर्म्मपुराणे हिमालयं प्रति देवी-वाक्यम् ।

"यानि शास्त्राणि दृश्यन्ते लोकेऽस्मिन् विवि-
धानि च ।
श्रुतिस्मृतिविरुद्धानि निष्ठा तेषां हि तामसी ॥
करालभैरवञ्चापि यामलं वामनार्च्चितम् ।
एवंविधानि चान्यानि मोहनार्थानि तानि तु ।
मया सृष्टानि चान्यानि मोहायैषां भवार्णवे ॥"

तस्मात् सद्भिः श्रुतिस्मृतिविरुद्धे वर्त्मनि न कदाचित् पदं न्यस्तव्यम् । इति मलमासतत्त्वम् ॥ * ॥

पृथिव्यां तन्त्रशास्त्रावतरणं यथा,—

शिव उवाच ।

"लम्बोदर महाभाग शृणु मे परमं वचः ।
इदं महासुमन्दर्भं मम वक्त्राद्विनिर्गतम् ॥
निर्गतं पार्व्वतीवक्त्रात्तन्त्रं परमदुर्लभम् ।
विलिख्य बहुयत्नेन गच्छ सिद्धाश्रमं सुत ॥
यत्र तिष्ठन्ति मुनयो वेदवेदाङ्गपारगाः ।
अणिमादिगुणैर्युक्ताः शीघ्रं त्वं भव मे सुत ॥
इत्युक्तः शङ्करेणासौ चाष्टबाहुरभूत्ततः ।
चतुर्भिर्हस्तैः संलिख्य शिवाय विनिवेदयेत् ॥

शिव उवाच ।

गच्छ पुत्त्र महाबाहो तन्त्रमादाय सत्वरम् ।
सिद्धाश्रमं वनं रम्यं यथेन्द्रस्य च नन्दनम् ।
प्रणम्य प्रययौ शीघ्रं तन्त्रमादाय तद्वनम् ॥"

इत्युपक्रम्य ।

"मुनेर्व्वाक्यं ततः श्रुत्वा तत्तन्त्रं मुनये ददौ ।
एवं तन्त्राणि सर्व्वाणि विलिख्य विनिवेदयेत् ॥"

इति गायत्रीतन्त्रे दशमब्राह्मणपटलः ॥ * ॥

शैवपाशुपतादिशास्त्रोत्पत्तिर्यथा,—

"प्रथमं हि मया प्रोक्तं शैवं पाशुपतादिकम् ।
मच्छक्त्यावेशितैर्व्विप्रैः सम्प्रोक्तानि ततः परम् ॥
कणादेन च संप्रोक्तं शास्त्रं वैशेषिकं महत् ।
गौतमेन तथा न्यायं सांख्यन्तु कपिलेन तु ॥
धिषणेन तथा प्रोक्तं चार्व्वाकमतिगर्हितम् ।
दैत्यानां नाशनार्थाय विष्णुना बुद्धरूपिणा ।
बौद्धशास्त्रं तथा प्रोक्तं नग्ननीलपटादिकम् ॥
मायावादं असच्छास्त्रं ... (?)
आपत्य श्रुतिवाक्यानां दर्शयन् लोकगर्हितम् ।
कर्म्मस्वरूपत्याज्यत्वमत्र वै प्रतिपाद्यते ।
सर्व्वकर्म्मपरिभ्रष्टं कल्मषन्तु तदुच्यते ॥
गौतमप्रोक्तशास्त्रार्थनिरताः सर्व्व एव हि ।
शार्गालीं योनिमापन्नाः सन्दिग्धाः सर्व्व-
कर्म्मसु ॥"

इति गन्धर्व्वतन्त्रे प्रथमपटलः ।

शास्त्रकृत्, पुं, (शास्त्रं करोतीति । कृ + क्विप् ।) ऋषिः । इति त्रिकाण्डशेषः ॥ शास्त्रकर्त्तरि, त्रि ॥ (यथा, भागवते । १ । १० । २२ ।
"निधिक्समानोऽनुममार शास्त्रकृत् ॥")

शास्त्रगण्ड, त्रि, प्रघटावित् । इति त्रिकाण्डशेषः ॥ वाराणस्यां छात्रगण्ड इति पाठः ॥

शास्त्रचक्षु, [स्] क्ली, (शास्त्रं तु चक्षुरिव) व्याकरणम् । इति केचित् ॥

शास्त्रचारणः, त्रि, (शास्त्रं चारयति नीति । चर + णिच् + ल्युः ।) इति शब्दरत्नावली ॥

शास्त्रज्ञः, त्रि, (शास्त्रं जानातीति । ज्ञा + क ।) शास्त्रवेत्ता । यथा,—
"अनियुक्तो नियुक्तो वा शास्त्रज्ञो
दैवीं वाचं स वदति यः शास्त्रमुपजीवति ।"
इति ...

शास्त्रतत्त्वज्ञः, पुं, (शास्त्रस्य तत्त्वं ... ज्ञा + कः ।) गणकः । यथा,
"देवज्ञो गणको ज्ञानी मौहूर्त्तो दैवलेख-
वार्त्तान्तिको ज्योतिषिको ...
संवत्सरो वर्षकोषो रेखाजीवी गणाङ्गुः
तान्त्रिको ज्ञातसिद्धान्तः ..."

शास्त्रदर्शी, [न्] त्रि, (शास्त्रं ... णिनिः ।) शास्त्रज्ञः । तत्पर्य्यायः । २ शास्त्रवित् ३ शास्त्रचारणः ४ । इति शब्द-रत्नावली ॥

शास्त्रवित्, [द्] त्रि, (शास्त्रं वेत्तीति । ... सुद्विषेति क्विप् ।) शास्त्रदर्शी । इत्य...

शास्त्रविप्रतिषिद्धः, त्रि, (शास्त्रेण विप्रतिषिद्धः) शास्त्रनिषिद्धः । शास्त्रशब्दपूर्व्वकविपूर्व्वक... धातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नः ॥

शास्त्रशिल्पी, [न्] पुं, (शास्त्रं ... इनिः ।) काश्मीरदेशः । तद्देशस्थे पुंसि ... इति त्रिकाण्डशेषः ॥

शास्त्री, [न्] त्रि, शास्त्रज्ञः । शास्त्र ... इन्प्रत्ययेन निष्पन्नः ॥

शास्य, त्रि, (शास् + ण्यत् ।) शासनीयः शासितव्यः (यथा, मनौ । ८ । १९२ ।
"यो निक्षेपं नार्पयति ...
तावुभौ चौरवच्छास्यौ दाप्यौ वा तत्समं ..."
शिक्षणीयः यथा, ऋग्वेदे । १ । १९८ । ...
"अभिपित्वे मनवे शास्यो भूः ।"
"शास्यो भूः शिक्षणीयो भव इदं कुरु इदं
इति विधेया भव ।" इति तद्भाष्ये सायणः ।)

शि, ञ श निशाने । इति कविकल्पद्रुमः । (उभ०-सक०-अनिट् ।) निशानमिति रूपम् । शान ञ तेजे इत्यस्य नित्यसन्नन्त-अनेकार्थत्वात् निशानमिह तीक्ष्णीकरणं ... न अ, शिनोति शिनुते खड्गं कर्म्मकारः । इति दुर्गादासः ॥

शिंशपा, स्त्री, वृक्षविशेषः । शिश इति ... तत्पर्य्यायः । पिच्छिला २ अगुरु ३ ... भस्मगर्भा ५ । इत्यमरः ॥ अगुरुशिंशपा ... इति भरतः ॥ कृष्णसारा ७ । इति जटा... पिङ्गला ८ पिच्छला ९ वीरा १० । ... माला ॥ * ॥ यथा,—
"शिंशपा गुरुसारा च पिच्छिला गुरुदि...
सा चेत् कपिलवर्णा स्याद्भस्मगर्भा निगद्यते ।"

कपिला भस्मगर्भा चागुरुः शिंशपा।
सा शिंशपा शुक्लपत्रिकाशफ चेत्यपि ॥"
इति शब्दरत्नावली ॥
गुणाः। "शिंशपा वातनाशिनी।" इति
...मः ६ अपि च।
...ा कटुका तिक्ता कषाया शोथहारिणी।
...र्व्वा हरिक्कोदः कुष्ठश्वित्रवमिक्रिमीन्।
...दुष्टदाहास्त्रगर्भपातिनी ॥"
इति भावप्रकाशः ॥
...शिंशपास्थ तु दृष्टौ भवति। यथा, ऋग्-
...। ५३। १९।
अभिव्ययस्व खदिरस्य सार-
...जो धेहि स्यन्दने शिंशपायाम्।"
...न्दने रथस्य सम्बन्धे सति शिंशपायां शिंश-
...पानिर्म्मिते रथस्य फलके ओजो धेहि
...कुरु।" इति तद्भाष्ये सायणः ॥)
...च] क्ली, शिक्यम्। इति शब्दरत्ना-
॥
...ति, अध्ययनार्थी। इति त्रिकाण्डशेषः ॥
..., क्ली, मधुजातद्रव्यविशेषः। मोम् इति
। तत्पर्य्यायः। शिक्थकम् २ मधुजम् ३
...म् ४ मधुसम्भवम् ५ मोदनम् ६ काचम् ७
...ष्टमोदनम् ८ मक्षिकामलम् ९ क्षौद्रेयम्
...तिरागम् ११ स्निग्धम् १२ माक्षिकजम्
...क्षौद्रजम् १४ मधुशेषम् १५ द्रावकम् १६
...मकाश्रयम् १७ मधूत्थितम् १८ मधूत्थम्
अस्य गुणाः। पिच्छिलत्वम्। स्वादुत्वम्।
...वातास्रनाशित्वम्। मृदुत्वम्। कटुत्वम्।
...त्वम्। लेपेन स्फुटिताङ्गविलोपनत्वञ्च।
राजनिर्घण्टः ॥
...कं, क्ली, (शिक्थ + स्वार्थे कन्।) शिक्-
। इति राजनिर्घण्टः ॥
..., क्ली, (शंस + "शंसेः शि कुट् किच्च।"
...० ५। १६। इति यत्। स च कित्।
...गमः शिरादेशश्च।) द्रव्यरक्षार्थरज्जुमया-
विशेषः। शिका इति भाषा। तत्पर्य्यायः।
...: २ शिक्या ३ शिक् ४। इति शब्दरत्ना-
...॥ (यथा, भागवते। १०। ८। ३०।
...ताग्राद्यं रचयति विधिं पीठकोलूखलाद्यै-
...द्रं ह्यन्तर्निहितवयुनः शिक्यभाण्डेषु तद्वित्")
...ा, स्त्री, (शिक्य + स्त्रियां टाप्।) शिक्यम्।
... शब्दरत्नावली ॥
...यतं, त्रि, (शिक्ये स्थापितमित्यर्थे प्राति-
...कात् धात्वर्थे इति णिच् ततः क्तः।)
...क्यस्थापितवस्तु। तत्पर्य्यायः। काचितः २।
...मरः ॥
..., ङ शिक्षणे। इति कविकल्पद्रुमः ॥ (भ्वा०-
...त्म०-सक०-सेट्।) ह्रस्वी। ङ, शिक्षते।
...क्षणं विद्याग्रहणम्। अशिक्षतास्त्रं पितुरेव
...त्रविदिति रघुः। इति दुर्गादासः ॥
...णं, क्ली, (शिक्ष + ल्युट्।) विद्योपादानम्।
...ति शिक्षाशब्दटीकायां भरतः ॥

शिक्षा, स्त्री, (शिक्ष + "गुरोश्च हलः।" ३।३।१०३। इत्यः। ततष्टाप्।) शिक्षणम्। [illegible]। इति शब्दमाला ॥ वेदाङ्गशास्त्रविशेषः। इत्यमरः ॥ यथा,—

"शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गणः।
छन्दोविचितिरित्येतैः षडङ्गो वेद उच्यते ॥" इति।

तत्र अकारादिवर्णानां स्थानकरणप्रयत्नबोधिका अ-कु-ह-विसर्जनीयाः कण्ठ्या इत्यादिका शिक्षा। इति तट्टीकायां भरतः ॥ * ॥

अथ शिक्षाशास्त्रं लिख्यते।

"अथ शिक्षां प्रवक्ष्यामि पाणिनीयमतं यथा।
शास्त्रानुपूर्व्यं तद्विद्याद्यथोक्तं लोकवेदयोः ॥
प्रसिद्धमपि शब्दार्थमविज्ञातमबुद्धिभिः।
पुनर्व्यक्तीकरिष्यामि वाच उच्चारणे विधिम् ॥
त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते मताः।
प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयम्भुवा ॥
स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः।
यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः ॥
अनुस्वारो विसर्गश्च ×क ×पौ चापि पराश्रितौ।
दुःस्पृष्टश्चेति विज्ञेयो लृकारः प्लुत एव च ॥
आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥
मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम्।
प्रातःसवनयोगन्तं छन्दो गायत्रमाश्रितम् ॥
कण्ठे माध्यन्दिनयुतं मध्यमं त्रैष्टुभानुगम्।
तारं तार्त्तीयसवनं शीर्षण्यं जागतानुगम् ॥
सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः।
वर्णाञ्जनयते तेषां विभागः पञ्चधा स्मृतः ॥
स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानतः।
इति वर्णविदः प्राहुर्निपुणं तं निबोधत ॥
उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः।
ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचि ॥
उदात्ते निषादगान्धारावनुदात्ते ऋषभधैवतौ।
स्वरितप्रभवा ह्येते षड्जमध्यमपञ्चमाः ॥
अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा।
जिह्वामूलञ्च दन्ताश्च नासिकौष्ठौ च तालु च ॥
ओभावश्च विवृत्तिश्च श-ष-सा रेफ एव च।
जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः ॥
यद्योभावप्रसन्धानमुकारादिपरं पदम्।
स्वरान्तं तादृशं विद्याद्यदन्यद्व्यक्तमूष्मणः ॥
हकारं पञ्चमैर्युक्तमन्तःस्थाभिश्च संयुतम्।
औरस्यं तं विजानीयात् कण्ठ्यमाहुरसंयुतम् ॥
कण्ठ्यावहावि-चु-य-शास्तालव्या ओष्ठजावुपू।
स्युर्मूर्द्धन्या ऋ-टु-र-षा दन्त्या लृ-तु-ल-साः स्मृताः ॥
जिह्वामूले तु कुः प्रोक्तो दन्त्योष्ठ्यो वः स्मृतो बुधैः।
ए ऐ तु कण्ठतालव्या ओ औ कण्ठोष्ठजौ स्मृतौ ॥
अर्द्धमात्रा तु कण्ठ्या स्यादेकारैकारयोर्भवेत्।
ओकारौकारयोर्मात्रा तयोर्विवृतसंवृतम्।
संवृतं मात्रिकं ज्ञेयं विवृतन्तु द्विमात्रिकम्।
घोषा वा संवृताः सर्व्वे अघोषा विवृताः स्मृताः ॥
स्वराणामूष्मणाञ्चैव विवृतं करणं स्मृतम्।
तेभ्योऽपि विवृतावेङौ ताभ्यामैचौ तथैव च ॥
अनुस्वारयमानाञ्च नासिकास्थानमुच्यते।
अयोगवाहा विज्ञेया आश्रयस्थानभागिनः ॥
अलाबुवीणानिर्घोषो दन्त्यमूल्यस्वराननु।
अनुस्वारस्तु कर्त्तव्यो नित्यं ह्रोः श-ष-सेषु च ॥
अनुस्वारे विवृत्त्यान्तु विरामे चाक्षरद्वये।
द्विरोष्ठ्यौ तु विगृह्णीयाद्यत्रौकारवकारयोः ॥
व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न च पीडयेत्।
भीता पतनभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत् ॥
यथा सौराष्ट्रिका नारी तक्रं इत्यभिभाषते।
एवं रङ्गाः प्रयोक्तव्याः खे अराँ इव खेदया ॥
रङ्गवर्णं प्रयुञ्जीरन् नो ग्रसेत् पूर्व्वमक्षरम्।
दीर्घस्वरं प्रयुञ्जीयात् पश्चान्नासिक्यमाचरेत् ॥
हृदये चैकमात्रः स्यादर्द्धमात्रस्तु मूर्द्धनि।
नासिकायां तथार्द्धञ्च रङ्गस्यैवं द्विमात्रता ॥
हृदयादुत्करे तिष्ठन् कांस्येन समनुस्वरम्।
मार्दवञ्च द्विमात्रञ्च जघन्वाँ इति निदर्शनम् ॥
मध्ये तु कम्पयेत् कम्पमुभौ पार्श्वौ समौ तथा
स रङ्गं कम्पयेत् कम्पं रथीवेति निदर्शनम् ॥
एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च पीडयेत्।
सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते ॥
गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः।
अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः ॥
माधुर्य्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।
धैर्य्यं लयसमर्थञ्च षडेते पाठका गुणाः ॥
शङ्कितं भीतमुद्घुष्टमव्यक्तमनुनासिकम्।
काकस्वरं शिरसि गतं तथा स्थानविवर्ज्जितम् ॥

उपांशुदष्टं त्वरितं निरस्तं
विलम्बितं गद्गदितं प्रगीतम्।
निष्पीडितं ग्रस्तपदाक्षरञ्च
वदेन्न दीनं न तु सानुनास्यम् ॥
प्रातः पठेन्नित्यमुरःस्थितेन
स्वरेण शार्दूलरुतोपमेन।
मध्यं दिने कण्ठगतेन चैव
चक्राह्वसंकूजितसन्निभेन ॥
तारन्तु विद्यात् सवनं तृतीयं
शिरोगतं तच्च सदा प्रयोज्यम्।
मयूरहंसान्यभृतस्वराणां
तुल्येन नादेन शिरःस्थितेन ॥

अचोऽस्पृष्टा यणस्त्वीषन्नेमस्पृष्टाः श-लस्तथा।
शेषाः स्पृष्टा हलः प्रोक्ता निबोधानुप्रदानतः ॥
यमोऽनुनासिका न ह्रौ नादिनो ह-झषः स्मृताः।
ईषन्नादा यणो जश्च श्वासिनश्च खफादयः ॥
ईषच्छ्वासांश्चरो विद्यात् गोर्धामैतत् प्रचक्षते।
दाक्षीपुत्रः पाणिनिना येनेदं व्यापितं भुवि ॥
छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।

शिखालता, स्त्री, (शिखा+बलच्। टाप्।) मयूरशिखा। इति राजनिर्घण्टः॥
शिखावान्, [त्] पुं, (शिखा विद्यतेऽस्य। शिखा+मतुप्। मस्य वः।) वह्निः। चित्रकवृक्षः। इत्यमरः॥ केतुग्रहः। इति शब्दरत्नावली॥ शिखावति, त्रि॥ (यथा, मनौ १।३८ श्लोके। "केतवः शिखावन्ति ज्योतींषि॥" इति मेधातिथिकृतटीका॥)
शिखावृक्ष, पुं, (शिखाया वृक्ष इव।) दीपवृक्षः। इति शिखावलशब्ददर्शनात्॥
शिखावृद्धि, स्त्री, (शिखेव वृद्धिर्यस्याः।) कालिकावृद्धिः। प्रात्यहिकवृद्धिग्रामः। इति स्मृतिः॥
शिखिकण्ठं, क्ली, (शिखिनो मयूरस्य कण्ठ इव वर्णोऽस्य।) तुत्थम्। इति रत्नमाला॥
शिखिग्रीवं, क्ली, (शिखिनः ग्रीवेव आकृतिरस्य) तुत्थम्। इत्यमरः॥
शिखिध्वज, पुं, (शिखिनो वह्नेर्ध्वज इव।) धूमः। इति त्रिकाण्डशेषः॥ (शिखी मयूरो ध्वजो यस्य।) कार्त्तिकेयः। इति शब्दरत्नावली॥
शिखिनी, स्त्री, (शिखा विद्यतेऽस्याः। इनिः। स्त्रियां ङीप्।) मयूरशिखा। इति राजनिर्घण्टः॥
शिखिपुच्छ, क्ली, (शिखिनः पुच्छम्।) मयूरपिच्छम्। यथा—
"[illegible] शिखिपुच्छशिखण्डके।"
इति शब्दरत्नावली॥
शिखिप्रिय, पुं, (शिखिनां प्रियः।) लघुबदरः। इति राजनिर्घण्टः॥
शिखिमण्डल, पुं, वरुणवृक्षः। इति शब्दरत्नावली॥
शिखिमोदा, स्त्री, (शिखिनं मोदयतीति। मुद+णिच्+अच्। टाप्।) अजमोदा। इति राजनिर्घण्टः॥
शिखिवृक्ष, पुं, [illegible]। इति राजनिर्घण्टः॥
शिखिवर्द्धक, पुं, (शिखिनं [illegible] वर्द्धयतीति। वृध+ण्वुल्।) कुष्माण्डः। इति शब्दरत्नावली॥
शिखिवाहन, पुं, (शिखी वाहनं यस्य।) कार्त्तिकेयः। इत्यमरः॥
शिखिशिख, क्ली, (शिखिनो [illegible]।) [illegible] यथा—
[illegible]।
"[illegible]
[illegible]।
[illegible]॥"
इति [illegible] अध्यायः॥
शिखी, [न्] पुं, (शिखा अस्त्यस्येति। शिखा+"व्रीह्यादिभ्यश्च।" ५।२।११६। इति इनिः।) [illegible]। यथा, [illegible] ३।३८।
"[illegible]
[illegible]
अग्निः। (यथा, महाभारते। ४।५१।८।
"ध्वजो च धन्वो च विभाति पार्थः
शिखी हुतः स्रुग्भिरिवाज्यसिक्तः॥")
चित्रकवृक्षः। इत्यमरः। बलीवर्द्दः। शरः। केतुग्रहः। द्रुमः। कुक्कुटः। इति मेदिनी॥ घोटकः। इति हेमचन्द्रः। अजलोमा। इति रत्नमाला॥ मितावरः। मेथिका। इति राजनिर्घण्टः॥ पर्व्वतः। ब्राह्मणः। दीपः। इति केचित्॥ शिखायुक्ते, त्रि। इति मेदिनी॥

शिग्रुः, पुं, (शेते स्वल्पेऽपि वायौ। शी+"जत्रादयश्च।" उणा० ४।१०२। इति। रः। ह्रस्वो गुणाभावश्च।) शाकम्। इत्यमरः॥ वृक्षविशेषः। सजिना इति भाषा। तत्पर्य्यायः। हरितशाकः २ शाकपत्रः ३ सुपत्रकः ४ उपदंशः ५ बहुमूलः ६ कोमलपत्रकः ७ बहुमूलः ८ दंशमूलः ९ तीक्ष्णमूलः १०। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। तीक्ष्णत्वम्। वातकफमुखजाड्यव्रणदोषहरत्वम्। दीपनत्वम्। रुच्यत्वञ्च। तस्य पत्रशाकगुणाः। रुच्यत्वम्। वातकफक्रिमिनाशित्वम्। कटुत्वम्। उष्णत्वम्। दीपनत्वम्। पथ्यत्वम्। पाचनत्वञ्च॥ अपि च।
"शोभाञ्जनो भीमशिग्रुस्तीक्ष्णगन्धो जनप्रियः।
मुखमोदः क्षणशिग्रुर्वल्लुथो रुचिराञ्जनः॥
शोभाञ्जनस्तीक्ष्णकटुः स्वादूष्णः पिच्छिलस्तथा
कफवाताग्निशूलघ्नस्तथो रोचनः परः॥
सितशिग्रुः सुतीक्ष्णः स्याच्छ्वेतभङ्गः सिताह्वयः।
सम्मूलः स्वेतमरिचो रोचनो मधुशिग्रुकः॥
श्वेतशिग्रुः कटुस्तीक्ष्णः शोफानिलनिकृन्तनः।
वक्त्रशाड्यहरो रुच्यो दीपनो मुखजाड्यनुत्॥
रक्तको रक्तशिग्रुः स्यात्मधुरो बहुलच्छदः।
सुगन्धिः क्रिमिरो मिश्रा स्मारिव प्रकीर्त्तितः॥
रक्तशिग्रुः मेहनीयो मधुरस्य रसायनः।
शोफाध्मानसमीरार्त्तिपित्तघ्नं पाचनारकः॥"
इति राजनिर्घण्टः॥
(शाकपत्नादिमिता तद्भक्षणनिषेधो यथा मनौ ६।१४।
"वर्ज्जयेन्मधुमांसञ्च भौमानि कवकानि च।
भूस्तृणं शिग्रुकञ्चैव श्लेष्मातककलानि च॥",
"शिग्रुक वाह्लीकेषु प्रसिद्धं शाकम्।" इति मेधातिथिकृतटीका॥)
शिग्रुज, क्ली, (शिग्रोर्जायते। इति। जन+ड।) शोभाञ्जनबीजम्। तत्पर्य्यायः। श्वेतमरिचम् २ इत्यमरः॥ शिग्रुभवे त्रि॥
शिग्रुबीज, क्ली, (शिग्रोर्बीजम्।) शोभाञ्जनबीजम्। इति शब्दचन्द्रिका॥
शिङ्ख, इ वाक्ये। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) इ, शिङ्खति। इति दुर्गादासः॥
शिङ्घाणं, क्ली, (शिङ्घ+बाहुलकात् आनच्। पृषोदरादित्वात् [illegible]। इत्युणादिवृत्तौ उज्ज्वलदत्तः ३।८३।)
काचपात्रम्। लोहमलम्। नासिकामलम्। इति मेदिनी॥ शिकनि इति भाषा॥
शिङ्घाणक:, पुं, शिङ्घ्यते इति। शिघ+"लूधूशिङ्घिधाञ्भ्यः।" उणा० ३।८३। आणकः।) श्लेष्मा। इत्युणादिकोषः॥
शिङ्घाणक:, पुं, क्ली, (शिङ्घ+आणकः।) मलम्। इत्युणादिकोषः॥
शिङ्घित, त्रि, (शिङ्घ+क्तः।) घ्रातम्। इति शब्दरत्नावली॥
शिञ्ज, इ ल कि ङ अस्फुटध्वनौ। इति द्रुमः॥ (चुरा०-पक्षे भ्वा०-पदा०-च अक०-सेट्।) अस्फुटध्वनिरिह भूषणानामेव। भूषणानान्तु शिञ्जितमित्यमरात्। शिञ्जयते। ल ङ, शिङ्क्ते। कि ङ, शिञ्जते मञ्जीरम्। तालीः शिञ्जनयुक्तं नर्त्तितः कान्तयाने इत्यत्र शिञ्जदिति नित्यत्वादिति रमानाथः। वस्तुतस्तु शिञ्जः पचादित्वादच् ततः [illegible] क्वौ शत्रन्तम्। इति दुर्गादासः॥
शिञ्जा, स्त्री, (शिजि अव्यक्तशब्दे +"गुरोश्च हलः।" ३।३।१०२। इत्यः। टाप्।) भूषणशब्दः। इति शब्दरत्नावली॥ धनुर्गुणः। इति हेमचन्द्रः॥
शिञ्जितं, क्ली, (शिञ्ज+क्तः।) भूषणध्वनिः। इत्यमरः॥ (यथा,—
"नखानि विधुशङ्कया विरहिणी करोत्यन्तरे
ततः किशलयभ्रमात् स्वयमथाविश[illegible]
ततो वलयशिञ्जितं भ्रमरगुञ्जितागङ्कया
उड्डरिति कुहूरवध्वनिधिया ततो मूर्च्छितं
[illegible]"
शिञ्जिनी, स्त्री, (शिञ्जति आस्फालनसमये इति। शिञ्ज+णिनिः। स्त्रियां ङीप्।) धनुर्गुणः। इत्यमरः॥ नूपुरः। इति [illegible]॥
शिञ्जी, [न्] त्रि, भूषणशब्दविशिष्टः। विद्यतेऽस्य इत्यर्थे इन्प्रत्ययेन निष्पन्नम्।
शिट, अनादरे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) शेटति खलं लोकः। इति दुर्गादासः॥
शिण्टाकी, स्त्री, खाद्यद्रव्यविशेषः। [illegible]
"शिण्टाकी राजिकायुक्ता स्यान्मूलकतर्कसा
सपत्रप्लववेर्व्यापि शालिपिष्टकसंयुता।
शिण्टाकी रोचनी गुर्वी पित्तघ्नी वा[illegible]"
इति राजनिर्घण्टः॥
शित, त्रि, (शो तनूकरणे+क्तः। "शाच्छोरन्यतरस्याम्।" ७।४।४१। इति [illegible]) दुर्बलः। निशितः इति मेदिनी॥ (रघौ ६।४२।
"धारां शितां रामपरश्वधस्य
सम्भावयत्युत्पलपत्रसाराम्॥")
कृशः। इति विश्वः॥ (पुं, विशालितं [illegible] कर्षि। यथा, महाभारते। [illegible])

कलिकाता राजधान्याम् ।

नं० ६२ गूजापट्टी बि, एल् यन्त्रे मुद्रितः ।

V. 3—4.

शब्दकल्पद्रुमः ।

अर्थात्

एतद्देशप्रचलितसमस्तकोषाशेषशास्त्रसङ्कलिताकारादिवर्णक्रमविन्यस्तशब्द-तल्लिङ्ग-नानार्थ-पर्य्याय-प्रमाण-प्रयोग-धातु-तद्रूपस्वाभिधेय-
-घटित-तत्तच्छब्दप्रसङ्गोत्थित-वेद-वेदाङ्ग-वेदान्त-न्याय-पुराणेतिहास-सङ्गीत-शिल्प-सूपकारशास्त्र-ज्योतिष-
तन्त्राख्यान-काव्यालङ्कार-च्छन्दःप्रभृति-नाम-लक्षणोदाहरण-द्रव्यगुण-रोगनिदानौषध-
स्मृत्युक्तव्यवस्थादिसंयुक्त-सर्व्वदर्शनमतानुसारि-संस्कृताभिधानग्रन्थः ।

स्यार-राजा-राधाकान्तदेव-बाहादुरेण

विरचितः ।

पाणिनिमतानुसारि-प्रत्येकशब्दव्युत्पत्ति-मूलग्रन्थातिरिक्तप्रकृतशब्दार्थ-प्रमाण-प्रयोग-पर्य्याय-धातुप्रत्ययोदाहरणादिभिः
नूतनसङ्कलितबहुलशब्द-तदर्थ-तत्प्रमाण-प्रयोगादिघटित-
सम्पूर्णपरिशिष्टेन च सार्द्धम्

श्रीवरदाप्रसादवसुना तदनुजेन श्रीहरिचरणवसुना च

धर्म्मशास्त्रविशारदकोविदवृन्दसाहाय्येन संपरिवर्द्धितः । नागराक्षरैः प्रकाशितश्च ।

पञ्चमः काण्डः ।

तृतीय-चतुर्थ-खण्डौ ।

कलिकाता-राजधान्यां

यन्त्रे मुद्रितः । ७१ नं पाथुरियाघाट-ष्ट्रीट-स्थितभवनात् प्रकाशितश्च । शकाब्दाः

PRINTED BY PRESS; AND CONSIDERABLY IMPROVED, CAREFULLY REVISED AND PUBLISHED BY BARADA PRASAD BASU, AND HARI CHARAN BASU. 71, PATHURIAGHATA STREET CALCUTTA:

To be had at the Sabdakalpadruma Office, No. 71. Pathurieghata Street, Calcutta: and at the Baptist Mission Press. No 34 Lower Circular Road Calcutta: Price for Subscribers in India, Re. 1 and Countries out of India 2s for each number.

"वाहिको मैकलक् चैव शितायुधः शितः
शरः ॥")

शितद्रुः, स्त्री, शतद्रुनदी । इत्यमरः ॥ शतलज् इति ख्याता ॥ क्षीरमोरटः । इति रत्नमाला ॥

शितशूकः, पुं, (शितं निशितं शूकं यस्य ।) यवः । इत्यमरः ॥ दन्तादिरित्यन्ये इति भरतः ॥ गोधूमः । इति त्रिकाण्डशेषः ॥

शितिः, त्रि, (शतिः सौत्रो धातुः + "क्तमि-तनिमिसिश्यामम इच् ।" उणा० ४ । १२२ । इति इच् । स च कित् । अत इकारस्य ।) शुक्लः । कृष्णः । (यथा, माघे । १५ । ४८ ।

"शितितारकानुमितताम्र-
नयनमरुणोष्ठितं क्रुधा ॥")

भूर्जवृक्षे, पुं । इति मेदिनी ॥ यथा च ।
"शितिस्त्रिषु सिते कृष्णे भूर्जे मारेऽपि च द्वयोः ।"
इति शब्दरत्नावली ॥

शितिकण्ठः, पुं, (शितिः कण्ठे यस्य ।) शिवः । इत्यमरः ॥ (यथा, भागवते । ४ । ३ । १२ ।

यासां व्रजद्भिः शितिकण्ठ ! मण्डितं
नभो विमानैः कलहंसपाण्डुभिः ॥")

दात्यूहपक्षी । इति त्रिकाण्डशेषः ॥) यथा, महाभारते । १ । ८० । ६ ।

"यदा तु तान् वितुदन्ते वयांसि
तथा गृध्राः शितिकण्ठाः पतङ्गाः ॥")

शितिचारः, पुं, शाकविशेषः । यथा,—
'शितिचारः सूतपुष्पो वितन्नं सुनिषण्णकम् ॥"
इति जटाधरः ॥

शितिच्छदः, पुं, (शिती छदौ यस्य ।) हंसः । इति शब्दरत्नावली ॥

शितिपक्षः, पुं, (शिती शुक्लौ पक्षौ यस्य ।) हंसः । इति शब्दरत्नावली ॥

शितिसारकः, पुं, (शितिः सारो यस्य ।) तिन्दुकवृक्षः । इत्यमरः ॥

शिथिलं, त्रि, (श्रथ + "अजिरशिशिरशिथिलेति ।" उणा० १ । ५४ । इति किरच्प्रत्ययेन साधुः ।) श्लथः । इति हेमचन्द्रः ॥ यथा, भागवते । ४ । २८ । १५ ।

शिथिलावयवो यर्हि गन्धर्वैर्हृतपौरुषः ॥")

शिथिलं, क्ली, (श्रथ + किरच् ।) मन्दबन्धनम् । श्लथत्वम् । इति संक्षिप्तसारोणादिवृत्तिः ॥ संयोगविशेषः । यथा,—

'प्रचयः शिथिलाख्यो यः संयोगस्तेन जन्यते ।"
इति भाषापरिच्छेदः ॥

प्रचय इति मूले शिथिलाख्य इति किञ्चिदवयवावच्छेदेनावयवान्तरसंयोगिनि महत्त्ववति अवयवे वर्त्तमानः संयोगः प्रचय इत्येके । अत्र महत्त्वपदं न देयं परमाणुसंयोगस्य प्रचयत्वेऽपि न क्षतिरित्यन्ये । भूयोऽवयवावच्छेदेनावयवान्तरसंयोगिन्यवयवे वर्त्तमानः संयोगः प्रचयः तेन परमाणुसंयोगो द्व्यणुकसंयोगो वा न प्रचय इत्यपरे ।" इति सिद्धान्तमुक्तावलीटीकादिनकरी ॥

शिनिः, पुं, क्षत्रियभेदः । युयुधानपितामहः ॥ (यथा महाभारते । २ । ४ । ३० ।

"अक्रूरः कृतवर्मा च सत्यकश्च शिनेः सुतः ॥")

शिनेर्नप्ता, [ऋ] पुं, सात्यकिः । इति त्रिकाण्डशेषः ॥

शिपविष्टः, पुं, शिपिविष्टः । इत्यमरटीकायां रमानाथः ॥

शिपिः, पुं, रश्मिः । यथा,—

"शैत्यात् शयनयोगाच्च शिपिर्वारि प्रचक्षते ।
तत्पानाद्रक्षणाच्चैव शिपयो रश्मयो मताः ।
तेषु प्रवेशात् विप्रेशः शिपिविष्ट इहोच्यते ॥"
इति व्यासवचनम् ॥

शिपिविष्टः, पुं, खलतिः । दुश्चर्म्मा । महेश्वरः । इत्यमरः ॥ कुष्ठी । इत्यमरटीकायां रायमुकुटः ॥ अस्य रूपान्तरम् । शिपविष्टः । शिपिविष्टः । इत्यमरटीका ॥ विष्णुः यथा,—

"अनेकरूपो हृष्टात्मा शिपिविष्टः प्रकाशनः ॥"
इति तस्य सहस्रनामस्तोत्रं रमानाथश्च ॥

(पशुप्रविष्टे, त्रि । यथा, भागवते ।४।१३।३५ ।
"पुरोडाशं निरवपन् शिपिविष्टाय विष्णवे ॥"
"शिपिषु पशुषु यज्ञरूपेण प्रविष्टाय । तथाच श्रुतिः यज्ञो वै विष्णुः पशवः शिपिः यज्ञ एव पशुषु प्रतितिष्ठतीति ।" इति श्रीधरस्वामी ॥)

शिप्रः, पुं, सरोवरविशेषः । यथा,—

"एवं विवाह्य विधिवत् सौवर्णे मानसाचले ।
अरुन्धतीं वशिष्ठस्तु मोदमाप तया सह ॥
तत्र यत् पतितं तोयं मानसाचलकन्दरे ।
विवाहावभृतार्थाय शान्त्यर्थं वसुधातलम् ॥
ब्रह्मविष्णुमहेशादेयपाणिभिः समुदीरितम् ।
तत्तोयं सप्तधा भूत्वा पतितं मानसाचलात् ॥
हिमाद्रेः कन्दरे सानौ सरस्यात्र पृथक् पृथक् ।
तत्तोयं पतितं शिप्रे देवभोग्ये सरोवरे ।
तेन शिप्रा नदी जाता विष्णुना प्रेरिता
क्षितिम् ॥"
इति कालिकापुराणे २३ अध्यायः ॥

शिप्रा, स्त्री, नदीविशेषः । यथा'—

"ततो हिमवतः प्रस्थे प्रतीच्यां तत्पुरस्य च ।
शिप्रं नाम सरः पूर्णं दृष्टवन्तो हिमादयः ॥
तद्रहस्थानमासाद्य ब्रह्मशक्रादयः सुराः ।
उपविष्टा यथान्यायं पुरस्कृत्य महेश्वरम् ॥
तं शिप्रसंज्ञकासारं मनोज्ञं सर्व्वदेहिनाम् ।
शीतामलजलं सर्व्वैर्गुणैर्मानससम्मितम् ॥
दृष्ट्वा क्षणं हरस्तस्मिन् सौत्सुक्योऽभूदवेक्षणे ।
शिप्रां नाम नदीं तस्मान्निःसृतां दक्षिणोदधिम् ।
गच्छन्तीञ्च ददर्शासौ पावयन्तीं जगज्जनान् ॥"
इति कालिकापुराणे १८ अध्यायः ॥

(हनुः । यथा, ऋग्वेदे । ८ । ६५ । १० ।
"उत्तिष्ठन्नोजसा सह पीत्वी शिप्रे अवेपयः ।"
"शिप्रे हनू ।" इति तद्भाष्ये सायणः ॥)

शिफः,पुं, शिफा । इत्यमरटीकायां विद्याविनोदः ॥

शिफा, स्त्री, वृक्षाणां जटाकारमूलम् । शिकड़ इति ख्यातम् । तत्पर्य्यायः । जटा । २ । इत्यमरः ॥ मूलम् ३ । इति जटाधरः ॥ नदी । (यथा ऋग्वेदे । १ । १०४ । ३ ।

"हते ते स्यातां प्रवणे शिफायाः ।"
"शिफायाः शिफा नाम नदी तस्याः ।" इति तद्भाष्ये सायणः ॥) मांसिका । माता । इति मेदिनी ॥ शतपुष्पा । हरिद्रा । इति राजनिर्घण्टः ॥ पद्मकन्दः । इति मुकुटधृतस्वामी ॥ (लता । इति मेधातिथिः ॥ यथा, मनौ । ८ । २३० ।

"शिफाविदलरज्ज्वाद्यैर्विदध्यान्नृपतिर्दमम् ॥)

शिफाकः, पुं, (शिफा इव । कन् ।) पद्ममूलम् । इति शब्दरत्नावली ॥

शिफाकन्दः, पुं, (शिफायुक्तः कन्दो यस्य ।) पद्ममूलम् । तत्पर्य्यायः । करहाटः २ । इत्यमरः ॥ शिफाकः ३ । इति शब्दरत्नावली ॥ पद्मकन्दः ४ कर्कटः ५ । इति जटाधरः ॥ शिफा ६ कन्दः ७ । इति मुकुटधृतस्वामी ॥

शिफाधरः, पुं, (शिफाया धरः ।) शाखा । इति शब्दचन्द्रिका ॥

शिफारुहः, पुं, (शिफाया रोहतीति । रुह + कः ।) वटवृक्षः । इति राजनिर्घण्टः ॥

शिमड़ी, स्त्री, क्षुपविशेषः । शाङ्गोनि इति हिन्दीभाषा । तत्पर्य्यायः । मतिदा २ वन्या ३ पशुलक्ष्यारिपो ४ द्रवत्पदी ५ वातघ्नी ६ गुच्छपुष्पी ७ । अस्या गुणाः । कटुत्वम् । उष्णत्वम् । वातपृष्ठशूलनाशित्वम् । रसायने युक्ता चेत् देहदार्ढ्यकारित्वञ्च । इति राजनिर्घण्टः ॥

शिम्बः, पुं, चक्रमर्द्दकः । इति शब्दचन्द्रिका ॥

शिम्बा, स्त्री, (शिम्ब + टाप् ।) कलायादित्वक् । सुँटी इति छिमड़ा इति च भाषा । तत्पर्य्यायः । समी २ । इत्यमरः ॥ शिम्बा ३ शिम्बी ४ शिम्बी ५ शिम्बिका ६ शमी ७ शिम्बिका ८ शिम्बिः ९ । इति शब्दरत्नावली ॥ शमिः १० । इति हेमचन्द्रः ॥

शिम्बिः,स्त्री,शिम्बा । इति हेमचन्द्रः ॥ वरका । इति भावप्रकाशः ॥

शिम्बिकः, पुं, कृष्णमुद्गः । यथा,—
"कृष्णे प्रवरवासन्तहरिमन्थजशिम्बिकाः ॥"
इति हेमचन्द्रः ॥

शिम्बिका,स्त्री, (शिम्बि + कन् । टाप् ।) शिम्बा इति शब्दरत्नावली ॥

शिम्बिपर्णिका,स्त्री,(शिम्बिपर्णी + स्वार्थे कन् ।) मुद्गपर्णी । इति रत्नमाला ॥

शिम्बिपर्णी,स्त्री, (शिम्बेः पर्णमिव पर्णमस्याः । ङीप् ।) मुद्गपर्णी । इति शब्दचन्द्रिका ॥

शिम्बी, स्त्री, (शिम्बि + पक्षे ङीप् ।) शिम्बा । इति शब्दरत्नावली ॥ (यथा, राजतरङ्गिण्याम् । १ । १११ ।
"भुक्तानि कच्छगुच्छानां शिम्बीरम्बुजलोचने ॥"
मुद्गपर्णी । कपिकच्छुः । इति राजनिर्घण्टः ॥

शिरः,पुं, पिप्पलीमूलम् । इति मेदिनी । मस्तकम् । इति जटाधरः ॥ (यथा,—

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

शिरोरोगः, पुं, (शिरसो रोगः ।) मस्तकपीड़ा ।
यथा,—
"अथ शिरोरोगाधिकारः । अत्र शिरोरोगस्य
निदानं संख्याञ्चाह ।
शिरोरोगास्तु जायन्ते वातपित्तकफैस्त्रिभिः ।
सन्निपातेन रक्तेन क्षयेण क्रिमिभिस्तथा ॥
सूर्य्यावर्त्तानन्तवातशङ्खकार्द्धावभेदकाः ।
एकादशविधस्यास्य लक्षणानि प्रचक्षते ॥"
शिरोरोगा अत्र शिरोरोगः शूलरूपा रुगभि-
धीयते । *वातपित्तकफैस्त्रिभिः* । ननु *वातपित्त*-
कफैरित्युक्ते तत्त्रित्वबोधात् । किमर्थं त्रिभि-
रिति पदम् । वातपित्तकफानां पृथक्कार-
णत्वबोधनार्थम् । तर्हि सर्व्व एव शिरोरोगाः
सन्निपातसमुद्भवा इति कथम् । तदा वाताद्य-
ल्वणतया पृथक्कारणानि बोद्धव्यानि । क्षयेण
धातुक्षयेण ॥*॥ वातिकस्य लक्षणमाह ।

"यस्यानिमित्तं शिरसो रुजश्च
भवन्ति तीव्रा निशि चातिमात्रम् ।
बन्धोपतापैः प्रशमश्च यत्र
शिरोऽभितापः स समीरणेन ॥"

बन्धेति विशेषः । अनिमित्तं अतर्कितविप्र-
कृष्टनिमित्तम् । निशि चातिमात्रं रात्रौ शैत्येन
रोगाधिक्यात् । प्रतापः स्वेदनम् । शिरोऽभि-
तापः शिरःपीड़ा ॥*॥ पैत्तिकमाह ।

"यस्योष्णमङ्गारचितं यथैव
भवेच्छिरो दह्यति नाक्षिनासम् ।
शीतेन रात्रौ च भवेच्छमश्च
शिरोऽभितापः स तु पित्तकोपात् ॥

दह्यतीत्यार्षत्वात् ॥*॥ श्लैष्मिकमाह ।

"शिरो भवेद्यस्य कफोपदिग्धं
गुरु प्रतिष्टब्धमथो हिमञ्च ।
शूनाक्षिनासावदनश्च यस्य
शिरोऽभितापः स कफप्रकोपात् ॥"

कफोपदिग्धं अन्तःकफलिप्तम् । प्रतिष्टब्धं स्तब्ध-
शिरस्कम् ॥*॥ सान्निपातिकमाह ।

"शिरोऽभितापे त्रितयप्रवृत्ते
सर्व्वाणि लिङ्गानि समुद्भवन्ति ॥"*॥

रक्तजमाह ।

"रक्तात्मकः पित्तसमानलिङ्गः
स्पर्शासहत्वं शिरसो भवेच्च ॥"

पैत्तिकाद्भेदकलिङ्गमाह । शिरःस्पर्शासहत्व-
मिति ॥*॥ क्षयजमाह ।

"वसाबलासक्षतसम्भवानां
शिरोगतानामतिसंक्षयेण ।
क्षयप्रवृत्तः शिरसोऽभितापः
कष्टो भवेदुग्ररुजोऽतिमात्रम् ॥"

क्षतसम्भवं रुधिरम् । कष्टः कृच्छ्रसाध्यः ।
"यस्मो भ्रमति तुद्येत शिरो दिम्रान्तर्नवता ।
मूर्च्छा गात्रावसादश्च शिरोरोगे क्षयात्मके ॥"
क्रिमिजमाह ।

"निस्तुद्यते यस्य शिरोऽतिमात्रं
संभक्ष्यमाणं स्फुरतीव चान्तः ।
घ्राणाच्च गच्छेद्रुधिरं सपूयं
शिरोऽभितापः क्रिमिभिः सघोरः ॥"

संभक्ष्यमाणं क्रिमिभिरिति शेषः । घ्राणाच्चेति
चकारेण क्रिमिनिर्गमोऽपि बोध्यते ॥*॥ सूर्य्या-
वर्त्तमाह ।

"सूर्य्योदयं या प्रतिमन्दमन्द-
मक्षिभ्रुवं रुक् समुपैति गाढ़म् ।
विवर्द्धते चांशुमता सहैव
सूर्य्यापवृत्तौ विनिवर्त्तते च ॥
शीतेन शान्तिं लभते च किञ्चि-
दुष्णेन जन्तुः सुखमाप्नुयाद्वा ।
सर्व्वात्मकं कष्टतमं विकारं
सूर्य्यावर्त्तं तमुदाहरन्ति ॥"

सूर्य्योदयमिति लक्षीकृत्य आरभ्येति यावत् ।
सूर्य्यस्यापवृत्तौ सूर्य्यस्याधोगतौ ॥*॥ अनन्त-
वातमाह ।

"दोषास्तु दुष्टाः स्वयमेव मन्यां
संपीड्य घाटां स्वरुजां सुतीव्राम् ।
कुर्व्वन्ति सोऽक्षि भ्रुवि शङ्खदेशे
स्थितिं करोत्याशु विशेषतस्तु ॥
गण्डस्य पार्श्वे तु करोति कम्पं
हनुग्रहं लोचनजान् विकारान् ।
अनन्तवातं तमुदाहरन्ति
दोषत्रयोत्थं शिरसो विकारम् ॥"

एवशब्दोऽवाप्यर्थः । अव्ययानामनेकार्थत्वात् ।
स्वरुजां स्वस्य रुजां व्यथादाहगौरवादिरूपां
दोषाः कुर्व्वन्ति । अयमनन्तवातः । स अनन्त-
वातः अक्ष्यादिषु स्थितिं करोति । विशेषतः
गण्डपार्श्वे स्थितिं करोति । पीड़या स्थितिं
कृत्वा कम्पादींश्च करोति ॥*॥ शङ्खकमाह ।
"पित्तरक्तानिला दुष्टाः शङ्खदेशे विमूर्च्छिताः ।
तीव्ररुग्दाहरागं हि शोथं कुर्व्वन्ति दारुणम् ॥
स शिरोविषवद्वेगान् निरुध्याशु गलं तथा ।
त्रिरात्राज्जीवितं हन्ति शङ्खको नाम नामतः ।
त्र्यहाज्जीवति भैषज्यं प्रत्याख्येयस्य कारयेत् ॥"
पित्तरक्तानिलाः अत्र कफोऽपि योज्यः । कृतानु-
तापः कफपित्तरक्तैरिति सुश्रुतवचनात् । विमू-
र्च्छिताः प्रवृद्धाः । स शोथः । त्रिरात्रात्
त्रिरात्रमध्ये मारयति ॥*॥ अर्द्धावभेदकमाह ।
"रूक्षाशनाध्यशनावश्यायप्राग्वातमैथुनैः ।
वेगसंधारणायासव्यायामैः कुपितोऽनिलः ॥
केवलः सकफो वार्द्धं गृहीत्वा शिरसो बली ।
मन्याभ्रूशङ्खकर्णाक्षिललाटार्द्धेषु वेदनाम् ॥
शस्त्रारणिनिभां कुर्य्यात्तीव्रां सोऽर्द्धावभेदकः ।
नयनं वाथवा श्रोत्रमभिवृद्धो विनाशयेत् ॥"
अवश्या अवश्यायः । आयासः अतिबलेन
भारोद्वहनादिभिः । व्यायामः अभ्यासः ।
शस्त्रारणिनिभां शस्त्रपातेनेव वज्रपातेनेव वेद-
नाम् ॥*॥ अथ शिरोरोगाणां चिकित्सा ।
"वातजाते शिरोरोगे स्नेहस्वेदौ विमर्द्दनम् ।
पानाहारोपनाहांश्च कुर्य्याद्वातामयापहान् ।
कुष्ठमेरण्डमूलञ्च नागरं तक्रपेषितम् ।
कटूष्णं शिरसः पीड़ां भाले लेपनतो हरेत् ॥
रसः श्वासकुठारोऽयस्तस्य नस्यं विशेषतः ।
शिरःशूलं हरत्येव विधेयो नात्र संशयः ॥"*॥
अथ शिरोवस्तिविधिः ।
"आशिरोव्यापि तच्चर्म्म षोड़शाङ्गुलमुच्छ्रितम् ।
तेनावेष्ट्य शिरोऽधस्तान्माषकल्केन लेपयेत् ॥
निश्चलस्योपविष्टस्य तैलैः कोष्णैः प्रपूरयेत् ।
धारयेदारुजः शान्तेर्यामं यामार्द्धमेव च ॥
शिरोवस्तिर्हरत्येष शिरोरोगं मरुद्भवम् ।
हनुमन्याक्षिकर्णार्त्ति*मर्द्दितं मूर्द्धकम्पनम्* ।
विना भोजनमेवैष शिरोवस्तिः प्रयुज्यते ॥
दिनानि पञ्च वा सप्त रुजि तत्परतोऽपि वा ।
ततोऽपनीतस्नेहस्तु मोचयेद्वस्तिबन्धनम् ॥
शिरोललाटवदनग्रीवादीनि विमर्द्दयेत् ।
सुखोष्णेनाम्भसा गात्रं प्रक्षाल्याश्नाति यद्धितम् ॥
आमिषं जाङ्गलं पथ्यं तत्र शाल्यादयोऽपि च ।
मुद्गान् माषान् कुलत्थांश्च खादेद्वा निशि
केवलान् ॥
कटुकोष्णान् ससर्पिष्कानुष्णं क्षीरं पिबेत्तथा ।
पित्तात्मके शिरोरोगे शीतानां चन्दनाश्मसाम् ॥
कुमुदोत्पलपद्मानां स्पर्शाः सेव्याश्च मारुताः ।
सर्पिषः शतधौतस्य शिरसा धारणं हितम् ॥
रसः श्वासकुठारोऽत्र कर्पूरं कुङ्कुमं नवम् ।
शीतं छागीपयः सर्व्वं वदनेनानुवर्त्तयेत् ॥
तस्य नस्यं भिषग्दद्यात् पित्तलायां शिरोरुजि ।
किन्तु मस्तकशूलेषु सर्व्वेष्वेवं हितं मतम् ॥
गुड़नागरकल्कस्य नस्यं मस्तकशूलनुत् ॥*॥
रक्तजे पित्तवत् सर्व्वं भोजनालेपसेवनम् ॥
शीतोष्णयोश्च विन्यासो विशेषो रक्तमोक्षणम् ।
कफजे लङ्घनं स्वेदो रूक्षोष्णैः पाचनात्मकैः ॥*॥
सन्निपातभवे कार्य्या सन्निपातहरी क्रिया ।
पुराणसर्पिषः पानं विशेषेण दिशन्ति हि ॥

एरण्डमूलं तगरं शताह्वा
जीवन्तिका सैन्धवरास्निके च ।
भृङ्गं विड़ङ्गं मधुयष्टिका च
विश्वौषधं कृष्णतिलस्य तैलम् ॥
अजापयस्तैलविमिश्रितञ्च
चतुर्गुणं भृङ्गरसे विपक्वम् ।
षड़्बिन्दवो नासिकयोः प्रदेयाः
सर्व्वाणि हन्युः शिरसो विकारान् ॥
च्युतांश्च केशान् पलितांश्च दन्तान्
निर्बध्य मूलान् प्रकटीकरोति ।
सुपर्णगृध्रप्रतिमञ्च चक्षुः
कुर्व्वन्ति बाह्वोरधिकं बलञ्च ॥"

जीवन्तिका अत्र हरीतकी शाकविशेषश्च ।
इति षड्बिन्दुतैलम् ॥*॥
"क्षयजे क्षयनाशाय कर्त्तव्यो बृंहणो विधिः ।
पाने नस्ये च सर्पिः स्याद्वातघ्नैर्मधुरैः शृतम् ॥*॥
क्रिमिजे व्योषनक्ताह्वः शिग्रुबीजैश्च नावनम् ।
अजामूत्रयुतं नस्यं क्रिमिघ्नं क्रिमिनुत् परम् ॥
सूर्य्यावर्त्ते विधातव्यं नस्यकर्म्मादिभेषजम् ।
योजयेत् मधुरं सर्पिः [illegible] ।

[illegible]

तत्पर्य्यायः । उष्णीषः २ वेष्टनम् ३ वेष्टकम् ४ । इति शब्दरत्नावली ॥ शिरोवेष्टः ५ चेलोष्टुकः ६ । इति त्रिकाण्डशेषः ॥

शिरोऽस्थि, क्ली, (शिरसोऽस्थि ।) मस्तकास्थि । माथार खुलि इति भाषा । तत्पर्य्यायः । करोटिः २ शिरस्त्राणम् ३ शीर्षकम् ४ । इति राजनिर्घण्टः ॥

शिल, श उञ्छे । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-सेट् ।) उञ्छ उद्धृतशस्यशेषादुरणम् । श, शिलति धान्यं दीनः । शेलिता । इति दुर्गादासः ॥

शिल, पुं, क्ली, (शिल+कः ।) उञ्छः । इति मेदिनी ॥ (यथा, भागवते । ११ । १७ । ४१ ।
"कुशाभ्यामेव जीवेत शिलैर्वा दोषदृक् तयोः ॥")
जीवनोपायविशेषः । यथा,—
"ऋतामृताभ्यां जीवेत्तु मृतेन प्रमृतेन वा ।
सत्यानृताभ्यामपि वा न श्ववृत्त्या कदाचन ॥
ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम् ।
मृतन्तु याचितं भैक्ष्यं प्रमृतं कर्षणं स्मृतम् ॥"
इति मानवे ४ अध्यायः ॥
"अस्वामिकक्षेत्रेषु पथि वा क्षेत्रेषु वा अप्रतिषिद्धस्थानेषु यत्र यत्रौषधयो विद्यन्ते तत्र तत्राङ्गुलीभ्यां एकैकं कणं समुच्चयित्वा इति बौधायनदर्शनात् । एकैककणादिग्रहणोञ्छमुच्यते । मञ्जर्य्याकारेण कणानां ग्रहणं शिलः । उञ्छश्च शिलश्च ऋतशब्दवाच्यः । तत् [illegible] ।" इति तट्टीकायां कुल्लूकभट्टः ॥ (स्तम्बगोपुरादिस्तम्भाधःपृष्ठम् । यथा, रघुवंशे । १८ । १७ ।
"तस्यामरन् नृपवदारशील
शिरः शिलावद्विगलत्तया ॥")

शिलगर्भज, पु, पाषाणभेदः । इति राजनिर्घण्टः ॥

शिला, स्त्री, पाषाणः । (यथा, मनौ । २ । ... ।
"[illegible] कटेषु च ।
... शिलाश्मकर्मसु च ॥")
[illegible] । इति मेदिनी ॥ [illegible] । इति राजनिर्घण्टः ॥

शिलावर्त्री, स्त्री, [illegible] । इति शब्दचन्द्रिका ॥

शिलाकुट्टक, पु, (शिलां कुट्टयति [illegible] ।) [illegible] । इति शब्दरत्नावली ॥

शिलाज, क्ली, (शिलायां जायते इति । जन + ड ।) [illegible] । इति शब्दचन्द्रिका ॥ [illegible] । इति राजनिर्घण्टः ॥

शिलाजतु, क्ली, (शिलाया जतु ।) [illegible] । इति शब्दरत्नावली ॥ [illegible] ॥

७ शैलम् ८ अद्रिजम् ९ । इति रत्नमाला ॥ शैलेयम् १० शीतपुष्पकम् ११ । इति शब्दचन्द्रिका ॥ शिलाव्याधिः १२ । इति त्रिकाण्डशेषः ॥ अश्मोत्थम् १३ अश्मलाक्षा १४ जतुकम् १५ जत्वश्मकम् १६ । अस्य गुणाः । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् । रसायनत्वम् । मेहोन्मादाश्मरीशोफकुष्ठापस्मारनाशित्वम् । इति राजनिर्घण्टः ॥ अपि च । सर्वरोगहरत्वम् । योगवाहित्वम् । अत्युग्रत्वञ्च । इति राजवल्लभः ॥ अस्योत्पत्तिलक्षणगुणाः ।
"निदाघे घर्म्मसन्तप्ता धातुसारं धराधराः ।
निर्यासवत् प्रमुञ्चन्ति तच्छिलाजतु
सौवर्णं राजतं ताम्रं आयसं तच्चतुर्विधम् ।
शिलाजत्वद्रिजतु च शैलनिर्यास इत्यपि ।
गैरेयमश्मजञ्चापि गिरिजं शैलधातुजम् ।
शिलाह्वं कटुतिक्तोष्णं कटुपाकं रसायनम् ।
छेदि योगवहं हन्ति कफमेदोऽश्मशर्करा
मूत्रकृच्छ्रं क्षयं श्वासं वाताशांसि
पाण्डुताम् ।
अपस्मारं तथोन्मादं शोथकुष्ठोदरक्रिमीन् ।
सौवर्णन्तु जवापुष्पवर्णं भवति तद्रसात् ।
मधुरं कटुतिक्तञ्च शीतलं कटुपाकि च ।
राजतं पाण्डुरं शीतं कटुकं स्वादुपाकि च ।
ताम्रं मयूरकण्ठाभं तीक्ष्णं लवणं भवेत् ।
विपाके कटुकं शीतं सर्वश्रेष्ठमुदाहृतम् ।
इति भावप्रकाशः ॥

शिलात्मजी स्त्री, (शिलामत्ति अयतीति । ... ण् । स्त्रियां ङीप् ।) कालाञ्जनीवृक्षः । इति राजनिर्घण्टः ॥

शिलाटकः, पुं, (शिलामटतीति । अट + ण्वुल् ।) विवरम् । इति मेदिनी ॥

शिलात्मज, क्ली, (शिलाया आत्मज इव ।) लौहम् । इति राजनिर्घण्टः ॥

शिलात्मिका, स्त्री, मूषा । इति शब्दचन्द्रिका ॥

शिलादद्रु, पुं, (शिलाया दद्रुरिव ।) शैलेयम् । इति राजनिर्घण्टः ॥

शिलाधातु, पुं, (शिलानां धातुः ।) [illegible] । इति त्रिकाण्डशेषः ॥ खड़ी इति भाषा । गैरिकभेदः । स तु शीतलः । इति राजनिर्घण्टः ॥
"सितोपला शिलाधातुर्द्विधा च ...
शिलाधातुरितीरितम् [illegible] ॥"
इति शब्दरत्नावली ॥

शिलापट्ट, पुं, (शिलायाः पट्टः ।) पेषणशिला । शिल इति भाषा । इति भेदिनी ॥

शिलापुत्र, पु, (शिलायाः पुत्र इव ।) पेषणशिला । [illegible] । तत्पर्य्यायः । [illegible] शिलापुत्रक ३ । इति शब्दरत्नावली ॥

शिलापुष्प, क्ली, (शिलायाः पुष्पमिव ।) शैलेयम् । इति राजनिर्घण्टः ॥

नानन्नं, क्ली, (शिलाया भव: उत्पत्तिर्यस्य।) लेयम्। इति जटाधरः॥

ाभेदः, पुं, (शिला भिनत्तीति। भिद्+अच्) पाषाणभेदो वृक्षः। इति रत्नमाला॥ प्रस्तर-दकास्ते, क्ली॥

ारम्भा, स्त्री, (शिलेव दृढा रम्भा।) काष्ठ-टनी। इति राजनिर्घण्टः॥

लावल्का, स्त्री, (शिलेव कठिना वल्का ल्या:।) औषधद्रव्यविशेषः। शिलावाक् इति हन्दी भाषा। तत्पर्यायः। शिलजा २ शैल-रुहा ३ वल्कला ४ शैलगर्भाह्वा ५ शिला-क् ६ रत्ता ७। अस्या गुणाः। हिमत्वम्। ादुत्वम्। कफकृमिहमूत्ररोधाश्मरीशूलज्वर-क्तनाशित्वञ्च। इति राजनिर्घण्टः॥

ाव्याधिः, पुं, (शिलाया व्याधिरिव।) शिला-तु। इति त्रिकाण्डशेषः॥

ासनं, क्ली, (शिला आसनं यस्य।) शैलेयम्। ति शब्दरत्नावली॥ प्रस्तरनिर्म्मितासनञ्च॥

ाासारं, क्ली, (शिलावत् सारो यस्य।) ोहम्। इति हेमचन्द्रः॥

ाह्वं, क्ली, (शिला इत्याह्वा यस्य।) शिला-तु। इति भावप्रकाशः॥

ालि:, पुं, भूर्जपत्रवृक्षः। इति शब्दमाला॥

ालि:, स्त्री, द्वाराधःस्थितकाष्ठम्। इति शब्द-त्नावली॥ गोवराट् इति भाषा॥

ालिन्दः, पुं, मत्स्यविशेषः। यथा,—
"शिलिन्दः श्लेष्मलो बल्यो विपाके मधुरो गुरुः।
आमवातकरो हृद्यो वातपित्तहरो मतः॥"
इति राजवल्लभः॥

शिली, स्त्री, (शिलि+कृदिकारादिति ङीष्।) द्वाराधःस्थितकाष्ठम्।) इति शब्दरत्नावली॥ गण्डूपदी। स्तम्भशीर्षम्। इति मेदिनी॥

शिलीन्ध्रं, क्ली, कदलीपुष्पम्। यथा, माघे। ६। ३२।
"नवकदम्बरजोरुणिताम्बरै-
रधिपुरन्ध्रिशिलीन्ध्रसुगन्धिभिः॥")
करका। इति मेदिनी॥ त्रिपुटा। इति विश्वः॥

शिलीन्ध्रः, पुं, वृक्षविशेषः। इति मेदिनी॥ मत्स्य-विशेषः। स तु चित्रफलकमत्स्यः। इति जटा-धरः॥

शिलीन्ध्रकं, क्ली, गोमयच्छत्रिका। यथा,—
"गोमयच्छत्रिकामाहुर्दिलीरञ्च शिलीन्ध्रकम्।"
इति हारावली॥

शिलीन्ध्री, स्त्री, विहगीभेदः। गण्डूपदी। मृत्तिका इति मेदिनी॥

शिलीपदः, पुं, (शिलीव स्थूलं पदमस्मात्।) पादरोगविशेषः। गोद इति भाषा। तत्पर्यायः पदगण्डीरः २ श्लीपदः ३। इति शब्दरत्नावली॥ पादवल्मीकः ४। इति हेमचन्द्रः॥ श्लीपदस्य विप्रकृष्टं निदानमाह।
"पुराणोदकभूयिष्ठाः सर्व्वर्त्तुषु च शीतलाः।
ये देशास्तेषु जायन्ते श्लीपदानि विशेषतः॥"
विशेषत इति वचनेनान्यत्रापि श्लीपदानि भवन्ति इति बोध्यते॥१॥ सामान्यं लक्षणमाह।
"यः सज्वरो वंक्षणजो भृशार्त्तिः
शोथो नृणां पादगतः क्रमेण।
तत् श्लीपदं स्यात् करकर्णनेत्र-
शिश्नौष्ठनासास्वपि केचिदाहुः॥"
तत्त्रिविधम्। वातिकं पैत्तिकं श्लैष्मिकञ्चेति। तेषां लक्षणमाह।
"वातजं कृष्णरूक्षञ्च स्फुटितं तीव्रवेदनम्।
अनिमित्तरुजञ्चास्य बहुशो ज्वर एव च॥२॥
पित्तजं पीतसङ्काशं दाहज्वरयुतं भृशम्॥३॥
श्लैष्मिकन्तु भवेत् स्निग्धं तथा पाण्डु गुरु स्थिरम्॥
त्रीण्यप्येतानि जानीयात् श्लीपदानि कफो-च्छ्रयात्।
गुरुत्वञ्च महत्त्वञ्च यस्मान्नास्ति विना कफात्॥"
असाध्यमाह।
"वल्मीकमिव सञ्जातं कण्टकैरुपचीयते।
अब्दात्मकं महत्तच्च वर्जनीयं विशेषतः॥
यत् श्लेष्मलाहारविहारजातं
जातं तथा भूरिकफस्य पुंसः।
सास्रावमत्युन्नतिसर्व्वलिङ्गं
सकण्टकं वापि विवर्जनीयम्॥"
अस्य चिकित्सा।
"स्नुहीनालेपनस्वेदैर्वने रक्तमोक्षणैः।
प्रायः श्लेष्महरैरुष्णैः श्लीपदं समुपाचरेत्॥
सिद्धार्थशोभाञ्जनदेवदारु-
विश्वौषधैर्मूत्रयुतैः प्रलिम्पेत्।
पुनर्नवा नागरसर्षपाणां
कल्केन वा काञ्जिकमिश्रितेन॥"
श्लीपदमिति शेषः।
"धत्तूरैरण्डनिर्गुण्डीवर्षाभूशिग्रुसर्षपैः।
प्रलेपः श्लीपदं हन्ति चिरोत्थमपि दारुणम्॥
असाध्यमपि यात्यन्तं श्लीपदं चिरकालजम्।
मूलेन सहचरायाः तालमिश्रेण लेपनात्॥"
तालस्य फलरसो ग्राह्यः।
"धमलासूलपत्राणां कल्कं तत्तेन वारिणा।
संसृष्टं लवणोपेतं सेवितं श्लीपदं हरेत्॥
शाखोटवल्कलक्वाथं गोमूत्रेण युतं पिबेत्।
श्लीपदानां विनाशाय मेदोदोषनिवृत्तये॥
रजनीं गुडसंयुक्तां गोमूत्रेण पिबेन्नरः।
वर्षोत्थं श्लीपदं हन्ति दद्रुकुष्ठं विशेषतः॥
वर्षाभूत्रिफलाचूर्णं पिप्पल्या सह योजितम्।
सक्षौद्रं श्लीपदं लिह्याच्चिरोत्थं श्लीपदं जयेत्॥
गन्धर्वतैलसिद्धां हरीतकीं गोऽम्बुना पिबति।
श्लीपदविबन्धमुक्तो भवत्यसौ सप्तरात्रेण॥"
गन्धर्वतैलं एरण्डतैलम्। गोऽम्बुना गोमूत्रेण।
इति भावप्रकाशः॥

शिलीमुखः, पुं, (शिलीव मुखं यस्य।) भ्रमरः। (यथा, रघुः। ४। ५७।
"कटेषु करिणां पेतुः पुन्नागेभ्यः शिली-मुखाः॥")
बाणः। इत्यमरः॥ (यथा, महाभारते। ४। ४०। ११।
"कस्यायं सायको दीर्घः शिलीपृष्ठः शिली-मुखः॥")
युद्धम्। जडीभूतः। इति शब्दरत्नावली॥

शिलेयं, क्ली, (शिलायां भवम्। शिला+ढः।) शैलजम्। इति शब्दरत्नावली॥ शिलासम्ब-न्धिनि, त्रि, ॥ (शिलेव+"शिलाया ढः।"५। ३। १०२। इति ढः। शिलासदृशे च त्रि॥ यथा, शिलेयं दधि। इति काशिका॥)

शिलोच्चयः, पुं, (शिलाया उच्चयो यत्र।) पर्व्वतः॥ इत्यमरः॥ (यथा, रघुवंशे। २। २७।
"न पादपोन्मूलनशक्तिरंहः
शिलोच्चये मूर्च्छति मारुतस्य॥")

शिलोञ्छः, पुं, उञ्छशिलम्। उपासङ्गस्यात् चैवात् शेषावचयनम्। उञ्छेन परिचस्खादान-वदृयरूपेण शिष्यते सञ्चीयते उञ्छशिलम्। उछि शब्दे शिल शब्दे कहोरित्युक्ते क ग क इति इजुडलात् कः उञ्छशिलं संघातविगृहीतं विपर्यस्तम्।
"शय्यं न चेदुञ्छशिलेन वृत्तिः
फलेन मूलेन च वारिणा च।"
इति समाहारद्वन्द्वे। उञ्छं शिलञ्च।
"उञ्छमैचञ्च यथान्यत् तत् परिग्रहणं स्मृतम्।"
इति निगमाभिधाने क्लीवं पुमानुञ्छ ऋतं शिल इति बोपालिते पुंस्युञ्छः।
"रघुकाराद्धृतसारे
परिणतवाक् कलमकेदारे।
भवभूतिकृतशिलोञ्छे
तत्तलपतितं वयं चिनुमः॥"
इति गोवर्द्धनः। केचिदुञ्छशिलयोर्भेदमाहुः। प्रतिग्रहात् शिलं श्रेयस्ततोऽप्युञ्छः प्रशस्यते इति। तत्र शाल्यादेर्निपातितपरित्यक्तमञ्ज-रीणां आदानं शिलम्। शिलं धान्यमञ्जरी-संग्रह इति स्वामी च। एकैकशः कपोत-वद्धान्यकणोद्ग्रहणमुञ्छः। तदुक्तं उञ्छो धान्य-कणोच्चय इति। शिलं तालव्यादि दन्त्यादि च। इत्यमरटीकायां भरतः॥ यथा, मनौ ७। ३३।
"एवं वृत्तस्य नृपतेः शिलोञ्छेनापि जीवतः।
विस्तीर्य्यते यशो लोके तैलबिन्दुरिवाम्भसि॥")

शिलोत्थं, क्ली, शिलाया उत्तिष्ठतीति। उत्+स्था+कः। (शैलेयम्। इति राजनिर्घण्टः॥

शिलोद्भवं, क्ली, (शिलाया उद्भवो यस्य।) शैले-यम्। इति राजनिर्घण्टः॥ चन्दनविशेषः। यथा,—
"सुशीतलं चन्दनं यत् तैलपर्णिकमुच्यते।
उभौ च तस्य पर्य्यायौ सोमयोनि शिलोद्भवम्॥"
इति शब्दचन्द्रिका॥

शिलौकाः, [स्]पुं, (शिला पर्व्वतः ओको वास-स्थानं यस्य।) गरुडः। इति त्रिकाण्डशेषः॥

शिल्पं, क्ली, (शील समाधौ+"खष्पशिल्पशष्प-बाष्परूपपर्पतल्पाः।"उणा॰। २। २८। इति

पः इत्यस्य ।) कलादिकं कर्म । इत्यमरः ॥ हुनर इति पारसीकभाषा । कारीगरी इति हिन्दीभाषा ॥ वात्स्यायनोक्तनृत्यगीतवाद्यादि-चतुःषष्टिः बाह्यक्रियाः तथा आलिङ्गनचुम्ब-नादिचतुःषष्टिः अभ्यन्तरक्रियाः कलाः । आदिना स्वर्णकारादिकारुकर्मग्रहः । एतत् सर्वं शिल्पं कथ्यते । इति तट्टीकायां भरतः ॥ (यथा कथासरित्सागरे । २५ । १७५ ।
"न तन्निरूप्य जगद्दुर्लङ्घ्यो देव शक्यते ।
अपरः कर्तुमेतद्धि दिव्यं शिल्पं न मानुषम् ॥")
स्रुवः । इति मेदिनी ॥

शिल्पकारः, पुं, (शिल्पं करोतीति । कृ + अण् ।) शिल्पी । शिल्पविद्याव्यवसायी । कारिकर इति भाषा । शिल्पं करोति इत्यर्थे अण्प्रत्ययेन सिद्धम् ॥

शिल्पकारी, [न्] त्रि, (शिल्पं कर्तुं शीलमस्य । णिनिः ।) शिल्पकर्मकर्त्ता । तस्योत्पत्त्यादि यथा,—
"विश्वकर्मा च शूद्रायां वीर्य्याधानं चकार सः ।
ततो बभूवुः पुत्राश्च नवैते शिल्पकारिणः ॥
मालाकारः कर्म्मकारः शङ्खकारः कुविन्दकः ।
कुम्भकारः कांस्यकारः षडेते शिल्पिनां वराः ॥
सूत्रधारश्चित्रकरः स्वर्णकारस्तथैव च ।
पतितास्ते ब्रह्मशापादयाज्या वर्णसङ्कराः ॥
स्वर्णकारः स्वर्णचौर्य्यात् ब्राह्मणानां द्विजोत्तम ।
बभूव सद्यः पतितो ब्रह्मशापेन कर्म्मणा ॥
सूत्रधारो द्विजातीनां शापेन पतितो भुवि ।
शीघ्रञ्च यज्ञकाष्ठञ्च न ददौ तेन हेतुना ॥
व्यतिक्रमेण चित्राणां सद्यश्चित्रकरस्तथा ।
पतितो ब्रह्मशापेन ब्राह्मणानाञ्च कोपतः ॥
कश्चिद्वणिग्विशेषश्च संसर्गात् स्वर्णकारिणः ।
स्वर्णचौर्य्यादिदोषेण पतितो ब्रह्मशापतः ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥

शिल्पशाला, स्त्री, क्ली, (शिल्पानां शाला ।) स्वर्णकारादीनां कर्म्मस्थानम् । कारखाना इति पारसीकभाषा । तत्पर्य्यायः । आवेशनम् २ । इत्यमरः ॥ शिल्पशाला ३ शिल्पशालम् ४ शिल्पिशालम् ५ । इति तट्टीका ॥

शिल्पशास्त्रं, क्ली, (शिल्पस्य शास्त्रम् ।) शिल्प-कर्म्मशास्त्रम् । तच्छास्त्राणि बहूनि सन्ति तन्मध्ये वास्तुशास्त्रं लिख्यते । यथा,—
"श्रीशुक्लादिकभोगभोग्यजनकं धर्म्मार्थकाम-
प्रदं
जन्तूनां शरणं सुखास्पदमिदं शीताम्बुवर्षा-
पहम् ।
वापीदेवगृहादिपुण्यमखिलं गेहात् समुत्पद्यते
गेहं पूर्व्वमुशन्ति तेन विबुधा श्रीविश्वकर्म्मा-
दयः ॥
चैत्रे शोककरं गृहादि रचितं स्याद्धनं वैशाखे
शुभं
ज्यैष्ठे मृत्युकरं शुचौ पशुहरं तद्वृद्धिदं
श्रावणे ।
शून्यं भाद्रपदेऽश्विने कलिकरं भृत्यक्षयं कार्त्तिके
धान्यं मार्गसहस्ययोर्दहनभीर्माघे श्रियः
फाल्गुने ॥
आदित्ये हरिकर्कनक्रघटगे पूर्व्वापरास्यं गृहं
कर्त्तव्यं तुलमेषवृश्चिकवृषे याम्योत्तरास्यं तथा ।
द्वारं भिन्नतया करोति कुमती रोगार्थनाश-
स्तदा
कन्यामीनधनुर्गते मिथुनगे नाश्विन कार्य्यं
गृहम् ॥
कन्यादित्रिषु पूर्व्वतो यमदिशि त्वाद्यस्य चापा-
दितो
द्वारं पश्चिमतस्त्रिके जलधरात् सौम्ये रवौ
युग्मतः ।
यस्मात्तत्सम्मुखं दिशासु भवनं द्वारादिकं
हानिकृत्
सिंहं वापि वृषञ्च वृश्चिकघटं वाते स्थितं
सर्व्वतः ॥
प्राची मेषतुलारवावुदयति स्यादैन्द्रे वह्निभे
चित्रास्वातिसमध्यगा निगदिता प्राची बुधैः
पञ्चधा ।
प्रासादो भवनं करोति नगरं दिङ्मूढमर्थक्षयं
हर्म्यं देवगृहे पुरे च नितरामायुर्धनं दिङ्मुखे ॥
तारे मार्कटिके ध्रुवस्य समतां नीते बले चैनते
दीपाग्रेण तदैक्यतश्च कथिता सूत्रेण सौम्या
दिशा ।
शङ्कोर्न्नवगुणेन १६ मण्डलवरे छाया तयो-
र्मत्स्ययो-
र्जाता पत्रयुतिस्तु शङ्कुतलतो याम्योत्तरेस्तत्-
स्फुटेः ॥
राशौ सामनिमीनसिंहभवनं पूर्व्वामुखं शोभनं
कन्याकर्कटनक्रराशिगृहिणां याम्याननं
मन्दिरम् ।
राशिर्धन्वितुलायुगस्य सदनं शस्तं प्रतीचीमुखं
पुंसां कुम्भवृषालिराशिभजतां सौम्याननं
स्याद्गृहम् ॥"*॥
अथ भूपरीक्षा ।
"श्वेता ब्राह्मणभूमिका च घृतगन्धा शुभ-
स्वादिनी
रक्ता शोणितगन्धिनी नृपतिभूः स्वादे कषाया
च सा ।
स्वादेऽम्ला तिलतैलगन्धिरुदिता पीता च वैश्या
मही
कृष्णा मद्यसगन्धिनी च कटुका शूद्रेति
भूलक्षणम् ॥
स्वादे सर्व्वदया मधुरा सिताभा
वन्तुं वर्णेषु मही प्रशस्ता ।
घ्रेकार्थिता ब्रह्म भुजङ्गदोषी
दोषादरक्षार्ग्ग्विशालमयीर्या ॥ ० ॥
परीक्षितायां भुवि विघ्नराजं
समर्चयेत् चण्डिकया समेतम् ।
चैत्राधिपं चाष्टदिशाधिनाथान्
सुपुष्पधूपैर्बलिभिः सुखाय ॥
खात भूमिपरीक्षणे करमितं तत् पुरयेत्
मृदा
हीने हीनफलं समे समफलं ...
तत् कृत्वा जलपूर्णमाशतपदं गत्वा परी-
...
भूमिः प्राक् प्रवणञ्च शङ्करककुप्सौम्याश्रित
...
वह्नौ वह्निभयं यमे च मरणं चौराद्भयं
वायव्ये ...
विप्रादेरनुवर्णतश्च सुखदं ...
अग्नौ राक्षसवायुशङ्करदिशि स्याम्याः
...
अश्वत्थात् खदिरात् शिरीषककुभात् ...
क्रमेण द्विजा
वर्णानां कुशमुञ्जकाशयवजं सूत्रं क्रमात् ...
निम्ना भूः स्फुटितोपरा विलवती ...
...
ककुभादित्यत्र वकुलादिति च पाठः ॥"
"अश्वत्थं वापि गृहाधिपेन
देवस्य वृक्षस्य फलस्य वापि ।
वाच्यं हि कोष्ठाक्षरसंयुतेन
सत्यं विलोक्यं भवनेषु सद्या ॥
चा का चा टा ता ए ह मा पापवर्णाः
प्राच्यादिस्थे कोष्ठके शल्यमुक्तम् ।
केशाङ्गाराः काष्ठलोहास्थिकाद्यं
तस्मात् कार्य्यं शोधनं भूमिकायाः ॥
शल्यं नृणां भूपभयं हयानां
रुजं शुनोऽस्थ्नोः कलहप्रयोगौ ।
खरोष्ट्रयोर्हानिमपत्यनाशं
स्त्रीणामजस्याग्निभयं तनोति ॥"॥
कन्यादौ रविसत्रये फणिमुखं पूर्व्वादिदृष्टि
स्याद्वास्तुवपुर्दिशावयगतं लाङ्गूलदृष्टि
द्वारं तस्य मुखे गृहादि भयदं कुक्षिदये
सौख्य
दुःखं प्राक्खनने शिरोऽङ्घ्रिवपुषः कुक्षौ
दक्षिणे ।
प्राच्यां नागमुखं बुधैर्निगदितं भाद्राश्विने
कार्त्तिके
मार्गात् फाल्गुनशक्रतः क्रमतया याम्ये
शीर्ष
चैत्रे चाष्टविभाजिते दिनकराद्वाराश्रितेन
कोष्ठक
शल्यद्वारकयोश्च तत्र फणिनः शारो ...
खनेत्
शीर्षे मातृपितृक्षयः प्रथमतः खाते कृते
पुष्ठे
पृष्ठे हानिभयं च कुक्षिखनने स्यात् पुत्र
द्विज

ोस्येऽनिलखातनं यममुखे खातं शिवे कारयेत्
र्यं पश्चिमगे च वह्निखननं सौम्ये खनेन्नैर्ऋते
ेणकोणे पूर्वविभागे पूजनपूर्वं शिला समर्प्या ।
ाप्या शेषशिला दक्षिणतः स्तम्भाः समर्प्या विधानेन ॥"*॥
ह्मशम्भुर्यथा ।
पूर्वं भित्तिशिलान्यासं स्तम्भस्यारोपणं तथा ।
ादक्षिणेर्मध्ये कुर्य्यादित्याह काश्यपः ॥"
ारदः ।
ाभस्यादिषु मासेषु त्रिषु त्रिषु यथाक्रमम् ।
ोदिदिक्शिरोवामपार्श्वशायां प्रद-क्षिणम् ॥"
ास्तुशास्त्रेऽप्युक्तम् ।
ास्तोः शिरसि पुच्छे च वामकुक्षौ च पृष्ठतः।
ायुष्कामः खनेन्नैव दक्षकुक्षौ खनिः शुभा ॥

भित्तेर्मूलं स्थापनीयं जलान्ते
पाषाणे वा हेमरत्नैः सगर्भम् ।
शीर्षं गुर्वी लेपहीनाधिका वा
मन्थिश्रेणिः पादहीनार्थहान्यैः ॥

ावनपुरसुराणां सूत्रणे पूर्वमुक्तः
ाथित इह पृथिव्याः शोधनेऽपि द्वितीयः ।
ादनु सुखनिवेशे स्तम्भसंरोपणे स्या-
ावनवसनकाले पञ्चधा वास्तुयज्ञः ॥*॥
ाचा दुग्धसकण्टाश्च फलिनस्त्याज्या गृहाद् दूरतः
ास्ते चम्पकपाटले च कदली जाती तथा केतकी ।
ामादूर्द्धमशेषहस्तसुरशा च्छाया न शस्ता गृहे
ार्श्वं कस्य हरेर्वाशपुरतो जैनानुचण्डाः क्वचित् ॥

स दुग्धवृक्षा द्रविणस्य नाशं
कुर्वन्ति ते कण्टकिनोऽरिभीतिम् ।
प्रजाविनाशं फलिनः समीपे
गृहस्य वर्ज्याः कलधौतपुष्पाः ॥

दुष्टो भूतसमाश्रितोऽपि विटपी नोच्छिद्यते शङ्कितः
तद्विल्वोऽश्च शमीमशोकवकुलौ पुन्नाग-सचम्पकौ ।
द्राक्षापुष्पकमण्डपश्च तिलकान् कृत्वा वप-द्दाडिमीं
सौम्यादेः शुभदौ कपोतनवटावौदुम्बराश्व-त्थकौ ॥

उत्सङ्गनामाभिमुखः प्रवेशः
स्यात् पृष्ठभङ्गो भवनस्य पृष्ठात् ।
विनाशहेतुः कथितोऽपसव्यः
स्तम्भ्या प्रशस्तो भवनेऽखिलेऽसौ ॥

प्रवेशः प्रतिकायको यदपदिग्वक्त्रो भवेत् सद्रितो
व.मावर्त्ते उदाहृतो यममुखेऽसौ हीनबाहु-र्दुधः ।

उत्सङ्गो नरवाहनाभिवदनः स्रष्टा यथा निर्मितः
प्राग्वक्त्रोऽपि च पूर्णबाहुरुदितो गेहे चतुर्द्वा पुरे ॥*॥
हस्तः पर्वाष्टयुक्तो मुनिवररचितः पर्व चैकं त्रिमात्रं
मात्रा पर्णा यवानामुदरमिलिता निस्त्वचा-मुत्तमानाम् ।
पुष्यैश्चत्वारि पूर्वं तदनु च विभजेदङ्गुलैः पर्व-पुष्यै-
र्निग्रन्थी रक्तकाष्ठो मधुमय उदितः खादिरो वंशधात्वोः ॥
ज्येष्ठोऽष्टाभिर्यवोदरैस्तु मुनिभिर्मध्यस्तु षट् कन्यसो
माप्यं चोत्तमकेन ग्रामनगरं कोशादिकं योज-नम् ।
प्रासादप्रतिमे नृपस्य भवनं मध्येन हर्म्यादिकं
यानं षड्यवसम्भवेन शयनं छत्रासनास्त्रा-दिकम् ॥*॥

रुद्रो वायुर्विश्वकर्मा हुताशो
ब्रह्मा कालस्तोयपः सोमविष्णुः ।
पुष्पे देवा मूलतोऽस्मिंश्च मध्यात्
पञ्चाष्टान्त्यं द्वारनिवेदैर्विभज्यम् ॥

ईशो मारुतविश्ववह्निविधयः सूर्यश्च रुद्रो यमो
वैरूपो वसवोऽष्ट दन्तिवरुणौ षड् वक्त्र इच्छा क्रिया ।
स्नानं वित्तपतिर्निशाकरजयौ श्रीवासुदेवौ हली
कामो विष्णुरितिक्रमेण मरुतो हस्ते त्रयो-विंशतिः ॥*॥

उच्चाटनं रोगभयञ्च दुःखं
वह्नेर्भयं पीड़नकं प्रजायाः ।
मृत्युर्विनाशोऽपि धनक्षयः स्यान्-
मोहः क्रमाद्दैवतपीड़नेन ॥*॥
हस्तो यत्नात् पुष्पयोरन्तराले
त्वष्टा धार्य्यो मन्दिरादौ निवेशे ।
हस्तादृभूमौ यात्यकस्मात्तदासौ
कार्य्ये विघ्नं दुःखमाविष्करोति ॥

ताली द्वादशमात्रिकापरिमितस्तालद्वयं स्यात् करः
पादोनद्विकरोऽपि किष्कुरुदितश्चापश्चतुर्भिः करैः ।
क्रोशो दण्डसहस्रयुग्ममुदितो द्वाभ्याञ्च गव्यूतिका
ताभ्यां योजनमेव भूमिरखिला कोटीशतै योजनैः ॥

सूत्राष्टकं दृष्टिहस्तमौञ्जं
कार्पासकं स्यादवलम्बमंशम् ।
काष्ठञ्च सृष्टाग्रमतोऽपि लेख्य-
मित्यष्ट सूत्राणि वदन्ति सन्तः ॥

इति वास्तुशास्त्रे राजवल्लभमण्डने मिश्रका लक्षणवर्णनं नाम १ अध्यायः ॥ * ॥
"संधानेऽन्यकरद्वयोस्तु पतितः स्वे दो नद्दैशात् स्थितौ

तस्माद्भूतमभूच्च भीतिजननं द्यावापृथिव्यां-महत् ।
तद्देवै रभसा विगृह्य निहितं भूमावधोवक्त्रकं
देवानां रसनाच्च वास्तुपुरुषस्तेनैव पूज्यो बुधैः ॥
प्रासादे भवने तड़ागखनने कूपे च वापीवने
जीर्णोद्धारपुरे च यागभवने प्रारम्भनिर्वर्त्तने ।
वास्तोः पूजनकं सुखाय कथितं पूजां विना हानये
पादौ रक्षसि कं शिवेऽङ्घ्रिकरयोः सन्धौ च कोणद्वये ॥

चेत्राकृतिर्वास्तुरिहार्च्चनीय-
स्त्वेकांशतोभागसहस्रयुक्तः ।
साधारणोऽष्टाष्टपदोऽपि तेषु
चैकाधिकाशीतिपदस्तथैव ॥*॥

ग्रामे भूपतिमन्दिरे च नगरे पूज्यश्चतुःषष्टिके-
रेकाशीतिपदैः समस्तभवने जीर्णे नवाब्धंशकैः ।
प्रासादेऽथ शतांशकेस्तु सकले पूज्यस्तथा मण्डपे
कूपे षण्णवचन्द्रभागसहिते १९६ वापीतड़ागे वने ॥
ईशो मूर्द्धि समाश्रितः श्रवणयोः पर्जन्यनामा दिति-
रापस्तस्य गले तदंशयुगले प्रोक्तो जयश्चा-दितिः ।
उक्तावर्य्यमभूधरौ स्तनयुगे स्यादापवत्सो हृदि
पञ्चेन्द्रादिसुराश्च दक्षिणभुजे वामे च नागा-दयः ॥
सावित्रः सविता च दक्षिणकरे वामे द्वयं रुद्रतो
मृत्युर्मैत्रगणस्तथोरुविषये स्यान्नाभिपृष्ठे विधिः
मेढ्रे शक्रजयौ च जानुयुगले तौ वह्निरोगौ स्मृतौ
पूषा नन्दिगणाश्च सप्त विबुधाः कल्याः पदोः पैत्रकः ॥*॥

ईशस्तु पर्ज्जन्यजयेन्द्रसूर्य्याः
सत्यो भृशाकाशक एव पूर्व्वे ।
वह्निश्च पूषा वितथाभिधानो
गृहक्षतः प्रेतपतिः क्रमेण ॥
गन्धर्वभृङ्गौ मृगपित्र्यसंज्ञौ
द्वारस्थसुग्रीवकपुष्पदन्ताः ।
जलाधिनाथोऽप्यसुरश्च शेषः
स पापयक्ष्मापि च रोगनागौ ॥
मुख्यश्च भल्लाटकुबेरशैला-
स्तथैव बाह्ये दितितोऽदितिश्च ।
द्वात्रिंशदेवं क्रमतोऽर्च्चनीया-
स्त्वर्य्यादयोऽपि विदशाश्च मध्ये ॥
प्रागर्य्यमा दक्षिणतो विवस्वान्
मैत्रोऽपरे सौम्यदिशाविभागे ।
पृथ्वीधरोऽमात्य मध्यतोऽपि
ब्रह्माऽर्चनीयः सकलेषु मध्ये ॥
आपापवत्सौ शिवकोणमध्ये
सावित्रकोऽग्नौ सविता तथैव ।
कोणे महेन्द्रजयौ तथाऽपि
रक्षोऽनिलेऽन्योऽपि च रुद्रदासः ॥

ईशानवाह्ये चरकी द्वितीये
विदारिका पूतनिका तृतीये।
पापाभिधा मारुतकोणके तु
पूज्याः सुरा उक्तविधानतस्तु ॥
ब्रह्मा वेदपदस्तु तेन ममका देवार्य्यमाद्यास्त्वमी
कोणेऽष्टौ द्विपदास्तथाष्टमरुतः कोणेऽर्द्धभागाद्वहिः।
शेषा एकपदाः सुरास्तु कथिता वेदत्र्यंके-६४ऽथो मत्र
ब्रह्मा षट्पदिनोऽर्य्यमादिविबुधा ईशादयश्चैककाः ॥
ब्रह्मा कलांशो वसुतोऽर्य्यमाद्याः
कोणेऽष्ट बाह्योऽपि च सार्द्धभागाः।
विधातृकोणे द्विपदास्तथाष्टौ
शेषाः सुरा एकपदाः शतांशे ॥
ब्रह्माजिनांश २४ उदितः शिवतोऽर्य्यमाद्याः
कोणेषु सार्द्धपदतोऽपि तथैव चाष्टौ।
शेषा द्विभागसमका रविभागकोऽयं
पूज्यो रथाश्वगजवाहनकेऽश्वयन्त्रे ॥
यन्त्रे त्रयोदशपदैरपि पूजनीय-
स्तत् पञ्चविंशतिरजो दशतोऽर्य्यमाद्याः।
कोणेऽब्धयोऽमरगणा बहिके कलांशा
भद्रेऽब्धिकं रविविभागपरे द्विभागाः ॥
द्वात्रिंशत् कमलासनोऽर्य्यमसुखाः स्युः सूर्य्यभागा क्रमात्
कोणेऽन्त्येऽष्टसुरा द्विभागसहिता बाह्येषु सार्द्धांशकाः।
अष्टौ रामपदाः पुनर्द्विपदकाः षड्भागिनोऽष्टौ सुराः
चैत्रे पञ्चचन्द्रभागसहिते १८६ स्याद्देवतानां क्रमः ॥
वेदांशो विधिरर्य्यमप्रभृतयस्त्वंशा नवस्त्वष्टके
कोणेऽन्त्येऽष्टपदार्द्धगाः परसुराः षड्भागश्चोने पदे।
वास्तोर्नन्दयुगांश ४८ एवमधुनाष्टांशेषतुःषष्टिके
मध्ये: सूत्रमितान् सुधीः परिहरेद्भित्तीस्तुलाः स्तम्भकात् ॥
रेखाद्वयं कोणगतं विधेय-
मंशान्तरेणैव तु कर्णसूत्रात्।
यदष्टसूत्रैः कथितं तु पद्मं
तत्पीड़नात् स्वामिधनप्रणाशः ॥
प्रोक्तं चतुर्विंशतिलाङ्गुलं यत्
पादार्द्धेन हानिकरं प्रजायाः।
षड्भिस्तु सूत्रैर्मरणाय वज्रं
कोणे त्रिशूलञ्च रिपोर्भयाय ॥
परीक्ष्य भूमीमवसेचयित्वा
सुपञ्चगव्येन ततो विलेख्या।
रेखा सुवर्णेन सचित्रशालैः
पिष्टाक्षतैर्वापि पुनस्तदूर्द्धं ॥
द्वात्रिंशदंशाः पृथुले च दैर्घ्यं
कोणेषु मध्ये जिनसंख्य२४भागाः।
एतत्पदानां कथितं सहस्रं
चैवञ्च सर्वोत्तममित्र वास्तोः ॥
मध्ये ब्रह्मा पूजनीयः शतांश-
चत्वारिंशद्भिः पदैश्चाद्यवीथी।
प्रोक्ता देवा अर्य्यमाद्या चतोऽन्या
मध्ये कोणेऽष्टौ शतं चाष्टमश्चा ॥
कोणेऽब्धयो मन्दपदैः सुराश्च
शेषाश्च बाह्ये वसुभागिनश्च।
वीथी च बाह्ये रविभागयुक्तं
शतं पदानां कथितं मुनीन्द्रैः ॥
दुर्गप्रतिष्ठाविषये निवेशे
तथा महार्चासु च कोटिहोमे।
मेरौ च राष्ट्रेष्वपि ज्येष्ठलिङ्गे
वास्तुः सहस्रैश्च पदैः सपूज्यः ॥
त्रिमेखलं शङ्करदिग्विभागे
कुण्डं प्रकुर्य्यात् करतो युगास्रम्।
होमं सुराणां शतमष्टयुक्तं
प्रत्येकमष्टाधिकविंशतिं वा ॥
मध्वाज्यदुग्धैर्दधिशर्कराभ्यां
लाजैस्तिलैर्व्रीहियवैर्यवाद्यैः।
पलाशदूर्वाङ्कुरदुग्धवृक्षै-
र्होमं तदन्ते सुरपूजनञ्च ॥
ईशे घृताक्षमपरे सघृतौदनञ्च
दद्याज्जयाय हरिताम्बरमिव कूर्म्मम्।
रत्नानि पिष्टकमयं कुलिशं सुरेन्द्रे
धूम्रं वितानमुदितञ्च दिवाकरस्य ॥
गोधूमयुक्तं घृतमेव सत्ये
मत्स्यान् भृशे शष्कुलिमन्तरीक्षे।
वह्नौ स्रुचं पूषिण तथैव लाजा
दद्याद्धर्म्मे चणकौदनञ्च ॥
मध्वन्नञ्च गृहक्षताय यमतो मांसौदनं दापयेत्
गन्धर्वे शतपत्रमोदनयुतं भृङ्गेऽजजिह्वां तथा।
प्रोक्ता नीलजवा मृगाय पितृतो देयाश्च सक्रोदकाः
पेष्टं कृशरबलिं तथैव शिधिवद्दद्याच्च दौवारिके ॥
सुग्रीवाय च पूपका गणपरे श्वेतप्रसूनं पयः
पद्मं वारुणके सुराप्यसुरके तैलं तिला शोषके।
पापाख्येऽपि च पक्वमांसमुदितं रोगाय सर्वौषधीः
गोक्षीरं फणिने च मुख्यविबुधे श्रीखण्डभक्ते तथा ॥
भल्लाटाय सुवर्णक धनपतौ मण्डाज्यदुग्धं तथा
शक्तून् पर्वतकेऽदितेस्तु लपिका दद्याद्दितौ पूरिकाम्।
सक्षीरं दधिकं क्रमेण विहितं त्वापापवत्से तथा-
प्यर्य्यम्णेऽरुणचन्दनञ्च पयसा युक्ता तथा शर्करा ॥
सावित्रेऽपि च लड्डुकाश्च सवितुः धूपा गुडा सद्घृता
देयं वाथ विवस्वते घृतयुतं दुग्धं तथा मोदका
इन्द्राख्ये कुसुमस्रगिन्द्रजयके देयं तथा चम्पकं
मैत्रे दुग्धघृतञ्च गुग्गुलयुतो गन्धस्तथा रुद्रके ॥
तत्[...]
[...]
पयसा[...]
दद्याद्दिधी[...]
सुराश्रिमांसं[...]
तथैव पीतौदनको विदार्य्यै।
रक्तौदनं पूतनिकार्थमोया
मत्स्यामयेनापि तथैव पापा ॥
मांसं पक्वं पिलिपिञ्छाय तत्[...] स्कन्दाय तत्[...]
यः पूजयेद्वास्तुमनन्ययुक्ता
न तस्य दुःखं भवतीह किञ्चित्।
जीवत्यसौ वर्षशतं सुखेन
स्वर्गे नरस्तिष्ठति कल्पमेकम् ॥"
इति श्रीसूत्रधारमण्डनविरचिते वास्तु[...]
राजवल्लभे वास्तुलक्षणम् २ अध्याय ॥
"चायत्वं व्ययतारकांशकविधुं राशि [...]
धान्यं सौख्यमतोऽभिवृद्धिरधिका [...]
चायात्तु ध्वजधूमसिंहश्वनका गोरा[...]
ध्वाङ्क्षस्त्वष्टम आयमेषु विषमाः श्रेष्ठाः [...]
मानं देवगृहादिभूपसदने शालोष्मस्तेन[...]
गेहे कर्मकरस्य नायकवतः शाला च देयं[...]
चयो दण्डकराङ्गुलादिमपि ते हस्ताङ्गुलैः[...]
चैवस्याप्यनुमानतोऽपि नगरे दण्डेन मानं[...]
चायः कल्प्यो हस्तमेयैः करैश्च
चैवं मात्रानिर्मितं मात्रकाभिः।
मध्ये पर्य्यङ्कासने मन्दिरे च
देवागारे मण्डपे भित्तिबाह्ये
ध्वजे देवगृहे द्विजस्य भवने स्याद्वेदिकायां[...]
विस्तारोच्छ्रयवस्त्रभूषणमठागारेषु शस्तो[...]
धूमो वह्न्युपजीविनामपि गृहे कुण्डे च [...]
सिंहद्वारनृपालयेऽस्त्रनिचये सिंहश्च सिंहा[...]
चण्डाले शुनको विशान्तु वृषभो हर्म्ये [...]
वाणिज्ये धनभोजनस्य भवनेऽथो ब्राह्मणे[...]
वादित्रे स्वरजीविनामपि गृहे शौद्रे शर्वो[...]
याने स्त्रीगृहवाहने च शयने शस्तो गृहे[...]
ध्वाङ्क्षः शिल्पितपस्विनां हितकरस्तेषां सुख[...]
ध्वाङ्क्षः काकमुखो विड़ालवदनो धूमो ध्वज[...]

र्वे प्रतिपदा हरेरपि गती हस्तो नरस्येव तु
ाद्या: सुदिगता: क्रमेण पतयो हार्टौ च ते
मम्पुखा: ॥*॥
या: सिंहगजखलादिरृषभे सिंहध्वजो कुञ्जरे
मिंहो यें ध्वज इष्यते न हृषभोऽन्यत्रापि देयो
बुधै: ।
मिंहो हस्तिहपालये स्तिकरस्त्वायस्य वह्नौ
गृहे
तमिन्द्रे च वामदक्षिणदिशाद्वारे स आय:
शुभ:॥
यामे दैर्घ्यगुणोऽष्टभिर्विभजिते शेषो ध्वजाद्याय-
यको-
ष्टघ्ने तद्गुणिते च धिष्टाभजिते स्यादृष्टमस्था-
दिकम् ।
नचत्रे वसुभिर्व्ययोऽपि भजिते हीनस्तु लक्ष्मी-
प्रद-
त्स्यायय पिशाचको ध्वजसृते संवर्द्धितो
राचस: ॥
तस्मू‌ले व्ययधर्मनामसहिते भक्ते त्रिभिस्त्वं
ग्रक:
स्यादिन्द्रोपमभूपतिक्रमवशाद्देये सुरेन्द्रो स्थित: ।
वेश्यामिव यमस्तु पुण्यभवने नागी तथा भैरवे
राजांशो गजवाजियाननगरे राजालये
मन्दिरे ॥*॥
यावद्गृहर्चं गणयेत् स्वधिष्टा-
त्ताराविभक्ते नवभिश्च शेषा: ।
बुधैस्तृतीया सकले विवर्ज्या
या पञ्चमी सप्तमिका न शस्ता ॥
धिष्टानीह च सप्तश: क्रमतया वह्नेस्तु पूर्वा-
दित:
स्टा तानि भवन्ति यत्र गृहभं तत्रैव चन्द्रो
भवेत् ।
हानिं पृष्ठगत: करोति पुरतस्त्वायु:क्षयं
चन्द्रमा:
पार्श्वे दक्षिणवामके शुभकरोऽग्रे देवभूपालये ॥
प्रीति: स्यात् समसप्तमो च दशमो चैकादशो
शोभना
दारिद्र्यं युगला करोति मरणं षष्ठो कलि:
पञ्चमी ।
मेषोऽग्निवितयं हरिस्तु विष्टभाचापत्रयं
मूलत:
शेषै: स्युर्नव राशय: परमते नन्दांशकैस्ते
पृथक् ॥
भौमो हश्चिकमेषयोर्द्व षतुले शुक्रस्य राशिद्वयं
कन्या युग्मबुधस्य कर्कसदनं चन्द्रस्य सिंहो रवे:।
जीवो मीनधनु:पतिर्मृगघटौ मन्दस्य गेहं स्मृतं
मित्राण्यर्ककुजेन्दुदेवगुरवोऽन्ये चारयस्ते मिथ:
देवर्चं स्तुतिपुष्यभेऽश्विभस्त्रु मैत्रानिलं चान्द्रभं
हस्तादित्यमघोऽनुरन्त्यकविधौ पूर्वोत्तरा
रुद्रभम् ।
रक्षोमूलविशाखिकाग्निपितृभं चित्रा धनिष्ठा-
द्वयं

ज्येष्ठाश्चे यमभौष देव्यमनुजे मृत्युम् दैवे कलि:
वैरं चोत्तरफल्गुनीयुगलयो: स्वातीभरण्यो-
र्द्वयो-
रोहिण्युत्तरपादयो: श्रुतिपुनर्वस्वोर्विरोधं
तथा ।
चित्राहस्तभयोश्च पुष्यफणिनोर्ज्येष्ठाविशाखा-
श्चयो:
प्रासादे भवनासने च शयने नचत्रवैरं त्यजेत् ॥
विप्रा: कर्कझषालिनो निगदिता: सिंहाजचापा
नृपा
विट्कन्या मकरो हषोऽथ हषला युग्मश्च
कुम्भस्तुला ।
वर्णेनोत्तमकामिनी च भवनं वर्ज्यं बुधैर्यत्नत:
ज्येष्ठा द्वादश नन्दराशगुणतो विप्र क्रमाद्राशय:॥
अश्वोऽश्विनीशतभयोर्यमपृपि हस्ती
छागोऽग्निपुष्य उरगोऽपि विधातृसौम्ये ।
मूलार्द्रयो: शुनक श्रोतुरहावदित्ये
पूर्व्वा मघास्तु सत उन्दुररेव योनि: ॥
गौर्भद्रोत्तरफल्गुनीत उदिता स्वातौ करे
माहिषी
व्याघ्रास्त्वाद्रविशाखयोश्च हरिणो ज्येष्ठानु-
राधाभयो: ।
पूषाद्व्यवशी कपिर्निगदितो वैश्वाभिजित्राकुलं
पूभाद्यां वसुभे मृगेन्द्र उदितो वैरं त्यजेल्लोकत:
आयर्चतारा व्ययसंशकाश्च
क्षेकत्र कृत्वा विभजेत् क्रमेण ।
तिथ्या च वारेण तथैव लग्नै:
शेषैस्तु भान्येव भवेयुरङ्कै: ॥
दैर्घ्यं पृथुत्वेन च ताड़नीयं
तयोर्यदैक्यं पुनरष्टकेण ।
शेषेऽधिनाथो वसुभाजितेऽस्मिन्
सम: प्रशस्तो विषमस्तु नैव ॥ ७ ॥
वर्गाष्टकस्य पतयो गरुड़ो विड़ाल:
सिंहस्तथैव शुनकोरगमूषकेषा: ।
मेढ़ाककारच-ट-ता: प-य-शाश्च वर्गा
य: पञ्चम: स रिपुरेव बुधैर्विवर्ज्य: ॥
अश्विन्यादिकभत्रयं फणिनिभं चक्रं विनाद्यु-
द्भवं
छेकस्यां वरकन्ययोश्च यदि भं तस्मुत्थं चांशत:
नाड़ीसेवकमित्रशेषपुरतस्त्वेका शुभा मव्यधा
आयादिविकपञ्चसप्तनवभिस्त्वङ्कैर्गृहं सौख्यदम्
गुणगणं लघुदोषसमन्वितं
भवनदेवगृहादिकमिष्यते ।
जललवैन शिखी वहुतापवा-
न्न शममेति गुणैरधिको यत: ॥"
इति श्रीसूत्रधारमण्डनविरचिते वास्तुशास्त्रे
राजवल्लभे आयादिलचणं ३ अध्याय: ॥
"वापीकूपतड़ागदेवभवनान्यारामयागादिकं
तीर्थानामवगाहनञ्च विधिवत् कन्याप्रदाना-
दिकम् ।
सर्वं पुण्यमिदं नृप: स लभते य: कारयेत्
पर्वते

दुर्गं सर्वजनाय शर्मजननं विश्राममेकं परम् ॥
सिंहो वैरिपराभवं प्रकुरुते तिष्ठन् गिरौ
गह्वरे
दुर्गस्थो नृपति: प्रभूतकटकं शत्रुं जयेत् सङ्गरे।
कैलासे नगरं शिवेन रचितं गौर्य्यादिसंरचणे
दुर्गं पश्चिमसागरे च हरिणाप्येषां किमन्यो-
च्यते ॥
भूदुर्गं जलदुर्गमद्रिविषये दुर्गं भवेद्गह्वरे
तेषामुत्तममद्रिमूर्द्धि रचितं तद्वैरिणां दुर्गमम्
अन्नाद्यैर्घृततैलयैर्लवणै: काष्ठैस्तृणाद्यैस्तथा
यन्त्रोपस्करवाणशस्त्रसुभटै: संपूरयेद्भूमिप: ॥
माहेन्द्रं चतुरस्रमायतपुरं तत् सर्वतोभद्रकं
वृत्तं सिंहविलोकनं सुघृतनायत्तं तथा वारुणम्
नन्दाख्यञ्च विमुक्तकोणमथ नन्दावर्त्तिसंस्त्या-
कृति
प्रोक्तं तद्यववत्त्वयन्त्रमपि तद्दिव्यं गिरेर्मस्तके
पुण्यं चाष्टदलोपमञ्च पुरुषाकारं पुरं पौरुषं
संहं कुचिषु भूधरस्य कथितं दण्डाभिधं दैर्घ्य-
कम् ।
शाखं प्राक् सरिता परत्र कमलं याम्ये नदौ
धार्म्मिकं
द्वाभ्यां चैव महाजयञ्च धनदाशायां नदो
सौम्यकम् ॥
दुर्गेणैव युतं श्रियाख्यनगरं द्वाभ्यां रिपुघ्नं पुरं
त्वष्टाश्रं कथयन्ति स्वस्तिकमिति प्रोक्ता गुणा
विंशति: ।
भूपानां सुखदा यशोऽर्थफलदा: कीर्त्तिप्रतापो-
द्भवा
लोकानाञ्च निवासतो विरचिता: प्राक्शम्भुनैते
गुणा: ॥"
इति पुराणां विंशतिगुणा: ॥*॥
"वह्नेर्भीतिकरं त्रिकोणनगरं षट्कोणकं क्लेशदं
वक्रे वज्रभयञ्च शाकटपुरे रोगस्त्रिशूले कलि:
प्रोक्तं तस्करभीतये द्विशकटं कर्णाधिकेऽर्थक्षयो
दोषा: सप्त भयावहा: प्रकटिता ये विश्वकर्मो-
दिता: ॥"
इति पुराणां सप्तदोषा: ॥*॥
"वच्येऽथो विविधं पुरं मुनिमतं मध्योत्तमं
कन्यसं
तेषां हस्तसहस्रमन्तिमपुरं मध्यं तत: साह्र-
कम् ।
ज्येष्ठं युग्मसहस्रमेषु चरमं भागाष्टकेनाचितं
मध्यं द्वादशभागत: शशिकलं ज्येष्ठं विदध्यात्
सुधी: ॥
मार्गा: सप्तदशैव चादिमपुरे हीनं चतुर्भि: पुरं
प्रोक्तं कन्यसमेव मार्गनवभिर्दैर्घ्यं तथा विस्तरे
ग्रामश्चैव पुरार्द्धतो हि तदनु ग्रामार्द्धतो खेटकं
खेटार्द्धेन तु कूटमेव विबुधै: प्रोक्तं तत: खर्व-
टम् ॥
हस्तानाञ्च युगाष्टषोड़शसहस्रं भूपतीनां पुरं
तन्मध्ये दशधा वदन्ति मुनयो हृद्या सहस्रेण
ततू ।

[illegible]

[illegible] राघमे।
[illegible] सुखदान्
[illegible] तोयं तथा वारुणे
[illegible] तथा
[illegible] कपाटकैः
सुदृढैः।
[illegible] सुधानिर्मिते
[illegible] कार्य पुरं शोभनम्॥"

इति नगरप्रमाणम्॥

[illegible]
[illegible]
[illegible]
[illegible]॥

[illegible] दशाद्यो
[illegible] शिवो।
[illegible] भैरवो
[illegible] भैरवे॥
[illegible]
[illegible] क्रमात्।
[illegible]
[illegible]॥

[illegible]

जया विजया नवकूटयुता
[illegible] कूटैर्विजया मता॥
[illegible] महाभाव
[illegible] भद्रम्।
भद्रैः सुभद्रे परिघैश्चतुर्भि
[illegible] यस्मिन्।
ज्येष्ठं मितं दण्डसहस्रकेन
मध्यं तदर्धेन ततः कनिष्ठम्।
ज्येष्ठं करैः पञ्चशतानि [illegible]
[illegible] ततः कनिष्ठम्॥
भद्राख्यकुण्डे चतुरस्रकश्च
सुभद्रकं भद्रयुतं द्वितीयम्।
[illegible] स्यात् प्रतिभद्र[illegible]
मध्ये सुभद्रं परिघं चतुर्थम्।
[illegible] प्रमाणं
द्वारैश्चतुर्भिः [illegible]
मध्ये [illegible]
कोणे चतुष्कास्वपि [illegible]
[illegible] दशमं [illegible]
[illegible]
[illegible]

[illegible]

[illegible]
[illegible] पूर्वफलञ्च [illegible]।
[illegible]
[illegible]॥
[illegible]
[illegible] पृथिव्याम्।
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]

अशीतिहस्तं द्विकरेण हीनं
कुर्य्याद्गृहं शोभनमेव तस्य ॥
पञ्चायुतेशो नृपमण्डलीको
भवेद्गृहं तस्य कराष्टषष्टिः ।
मामन्त्यमुख्यो ह्ययुताधिपोऽसौ
तद्गृहमष्टेषु करप्रमाणम् ॥
तद्वेश्म पञ्चाशदपि द्विहीनं
सामन्तसंज्ञोऽयुतनाथ एव ।
तथा तृतीयोऽपि ततो द्विहीनं
त्रिंशत्कराष्टाधिकमेव गेहम् ॥
प्रोक्तः प्रवीणैश्चतुराश्रिकोऽसौ
ग्रामा हि यस्यैव सहस्रमेकम् ।
अष्टाधिकं विंशतिहस्तहर्म्यं
सिद्धेः समस्तानि यथोदितानि ॥
ग्रामाधिपा ये तु शताधिपाश्च
ते स्वल्पराष्ट्रा अपि सैनिकाश्च ।
तेषां गृहा अष्टदशाधिकैश्च
करैः समाना मुनिभिर्मताश्च ॥
भूपालकार्द्धेन च मन्त्रिगेहं
यथाधिकारेण भवन्ति हीनम् ।
व्यासादृशांशाधिकमेव दैर्घं
कुर्य्याद्यथो पञ्चमभागमिष्टम् ॥
गृहं चतुर्हस्तमितं करादि-
वृद्ध्या द्विरामान्तमिति प्रमाणम् ।
ततः परं भूपतिमन्दिराणि
यावच्छतं चाष्टकरादियुक्तम् ॥
स्याद्भूमिरेका वसुहस्तगेहे
दशाभिवृद्ध्या द्वितया पुनश्च ।
प्रासाद एवामरभूपयोश्च
हर्म्याणि लोके मुनिनोदितानि
शालाया नवधा च पञ्चकरतो मानञ्च विस्तात्मक
भित्तेरेव चतुर्दशाङ्गुलमितिर्यावत् सपादं करम् ।
आगारस्य तु षाड्शांशरहितोऽप्यर्द्धेन हीनोऽथवा
भित्तेर्मानमिदं त्रिधा विरचितं कार्य्यं यथायोगतः ॥
दैर्घ्यं चन्द्रकलाङ्गुलोत्तमशिला मध्याङ्गुलो नान्तिमा
व्यासे दिङ्नवभूभृदुच्छ्रितिरपि त्रिंशेन विस्तारतः ।
हस्तादेकिकरोदयं नवविधं पीठं गृहे सर्वतो
विपादं रसभूतवेदगुणकाः स्युः पीठके मेखलाः ।
यद्वा वाच शतांशसमतियुतं व्यासस्य हस्ताङ्गुलैः
द्वारस्योदयको भवेच्च भवने मध्यः कनिष्ठोत्तमः
दैर्घ्यार्द्धेन तु विस्तरः शशिकलाभागोऽधिकः सप्तके
दैर्घ्यं तांशविहीनमर्द्धरहितं मध्यं कनिष्ठं क्रमात् ॥
ज्येष्ठा प्रतोली तिथिहस्तसंख्या
मोक्षोदये त्रिंशकरा च मध्या ।

कनिष्ठिका रुद्रकरा क्रमेण
व्यासेऽष्ट सप्तैव च रामसंख्या ॥
वेश्मव्यासकलांशकैर्युगगुणैर्हस्तैस्त्रिसार्द्धैर्युते-
र्हर्म्यास्य त्रिविधोदयः क्षितितलाद्यावच्च पट्टोर्ध्वकम् ।
एकैकोऽपि पुनस्त्रिधा निगदितः सर्वे त एकादश
चैपाः पञ्चवतो नखाः शशिकला अष्टादशाश्च त्रिधा ॥
विस्ताने युगपर्वता८४स्तिथियुता धिष्ण्यैक-विंशान्विता
मध्योऽयं विकरैस्तदंशसहितैः प्रोक्तः कनिष्ठस्त्रिधा ॥
वृक्षं दुग्धविशल्यकण्टकयुतं नीडैस्तु चैत्यद्रुमं
चौरं मारुतपातितश्च भवने चित्याविभीतं त्यजेत् ॥
शाकः शालमधूकसर्ज्जखदिरा रक्तासनाः शोभना
एकोऽसौ सरलोऽर्ज्जुनश्च पनसः श्रीपर्णिनी शिंशपा ।
हारिद्रः पिचुमर्दचन्दनतरुः पद्माख्यकास्तिन्दुकी
नैतेऽन्ये न युता भवन्ति फलदाः शाकादयः शोभनाः ॥
गेहोदयन्तु नवधा विभजेत् षडंशं
स्तम्भोर्द्धभागसमकं भरणं शिरश्च ।
कुम्भी च छुदस्वरसमैकविभागतुल्या
पट्टश्च तीसकयुतोऽशसमान एव ॥
शालालीन्द उदाहृतो हि विबुधैर्वाणेषु युग्मांशकः
सप्तांशेषु गुणैश्च नन्दपदतो वेदांशतुल्यस्तथा ।
कापाटं गृहदक्षिणे निगदितं वामे भवेदर्गला
सृष्टा निष्क्रमणं कृतं मुनिवरैर्द्वारेषु सर्वेषु यत् ॥
शालाजिनांशमनुरेव मध्ये
अथा द्वयान्ति द्वयमस्य पार्श्वे ।
द्वाराणमाङ्गेन समानकर्णाः
शस्ता न शस्ता भवनाभिवक्राः ॥
दीपालया दक्षिणदिग्विभागे
सदा विधेयोऽर्गलया समानः ।
वामे च मध्ये न शुभाय गेहे
सुरालये वामदिशोऽष्टसिद्ध्यै ॥
द्वारार्धे घटकोसुडे च तदधो द्वाः षोडशांशाधिकं
सर्व्वं वा शुभमिच्छता च सततं कार्य्यन्तु पद्मादधः ।
तस्मूलं न शुभन्तुलातलगतं कुम्भो तथा वृद्धगं
काष्ठ पदक एव नासरादितं यन्त्र पूर्वोत्तरम् ।
द्वारोर्द्ध यद्दारुमस्य प्रमाणं
नवोणं वा शोभनं नाधिकं तत् ।
छन्दद्वाराण्येव यानि दृष्टानि
तेषां शोपाङ्गवत्सूत्राणि कुर्य्यात् ॥
सर्वं द्वारं शोदमान रक्षार्थं
यदा कुम्भं तत् चतोलदंनामम् ।

गेहादयं यत पूर्ववास्तुरूपं
तेषां भङ्गान्नैव सौख्यं कदाचित् ॥
द्वारव्यासदशांशतोऽधिकमिदं कार्य्यं गृहं दक्षिणे
तुल्यं हस्तिगृहञ्च वाजिभवनं तेनाधिकं वामतः ।
अष्टांशेऽथ नवांशके च वितथे तोये जयेन्द्रे हितं
द्वारं सौम्यगृहक्षते च कुसुमे भल्लाटके मस्तते ॥
प्राग्द्वाराष्टकमध्यतोऽपि न शुभं सूर्य्येश-पर्जन्यतो
याम्यायाञ्च यमाग्निपौष्णमपरे शेषासुरं पापकम् ।
सौम्यायामथ रोगनागगिरिजं त्वाद्यं तथान्य-च्छुभं
कैश्चिद्वारुणसौम्यकं न हि हितं प्रोक्तञ्च वातायने ॥
द्वारं विद्धमशोभनञ्च तरुणाकोणभ्रमस्तम्भकैः
कूपेनापि च मार्गदेवभवनैर्विद्धं तथा कीलकैः ।
उच्छ्रायाद्विगुणां विहाय पृथिवीं वेधो न भित्यन्तरे
प्राकारान्तरराजमार्गपरतो वेधो न कोणद्वये ॥
दैर्घ्यं सार्द्धशताङ्गुलञ्च दशभिर्हीनम् १४०।१३०।
१२०।११० चतुर्द्वा विधिः
प्रोक्तं वाथ शतं त्वशीतिसहितं १८० युग्मं २००
नवत्या शतम् १८० ।
तद्वत् षोडशभिः शतञ्च ११६ नवभिर्युक्तं तथाशीतिकम् ८८
द्वारं सप्तमतानुसारि दशकं योग्यं विधेयं बुधैः ॥
स्वयमपि च कपाटोद्घाटनं वा पिधानं
भयदमधिकहीनं शाखयोर्वा विचालि ।
पुरुषयुवतिनाशस्तम्भशाखाविहीनं
भयदमखिलकाष्ठं यदाधःस्थितं स्यात् ॥
देवालयं वा भवनं मठश्च
भागैः करैर्वायुभिरेव भिन्नम् ।
तस्य त्वभूमौ परिवर्जनीया
छाया गता यस्य गृहस्य कस्य ॥
नैको लघुर्वामदिशाविभागे
मध्ये द्विपद् दारुणवर्णगेहे ।
स्तम्भासनं हीनमपि द्वयाद
यदाधिकं रोगकरं तदा स्यात् ॥
स्तम्भोऽष्टास्रवृहत्तभद्रसहितो दर्पेण चान्द्रको
युक्तः पञ्चकस्तथाभरणकं यत् पद्धेनाहतम् ।
कुम्भो भद्रयुता कुमारसहितं शौर्यं तथा विस्तृतः
पञ्चेति गृहे न शोभनमिदं प्रासादके सम्मतः ॥
स्तम्भो द्वयोमध्यगतो न शस्तो
शुभंकरा वायुगोचरौ द्वौ ।
गृहे [illegible]
स्तम्भा न [illegible] ॥
[illegible]
[illegible] ।

शंननरसत्कार्जेदि वाणी च
स्पष्टाननं मूर्च्छितम गीतम् ॥
कर्म्मतार्येति निवेशं मारकृतांगितावित्रं मध्ये
कान्तं तालमत्तमं मुखकं मामाय निवेशनम्
तत् वन्धनं च पत्राय कुन्दाम सूर्यकान्ता-
यकं
नामकञ्च वाग्नकञ्च त्रिभिः मेकञ्च तत्
षड् विधम् ॥
कुम्भांतरमुरंगकुटि मार्दविधं मध्ये
रणं दुर्दमञ्च दुर्मिताना कुम्भार्धभागैः
क्रमात् ।
[illegible]
सदै
[illegible]
कुम्भो नया ॥ ० ॥

[illegible]

शिल्पगा

एवं ग्रामरतापमाः मगुरवमसाम्भूनद्वगदविधि
गेहाधीगयहस्यया च शयनं सर्व्वासु भूमीषु
च ॥

त्रिदशदाख्ये शयनं प्रशस्तं
वादित्रगेहे शक्तिर्विधेयम् ।
पूर्वाग्नितं भोजनमन्दिरञ्च
महानसं वह्निदिशाविभागे ॥
माहेन्द्राख्ये गोपुरं द्विविभूमि
भानोः संख्या तस्य मध्ये विधेया ।
चक्रान्तं मन्दिराद्ये निवेशे
स्याद्वा कार्य्यं चामया भूपतीनाम् ॥
दिक्रमामाला च्छेकमालादिगेहं
ज्येष्ठा मध्या कन्यसा दक्षिणाङ्गात् ।
शाला कार्य्या गोकर्णेऽहे सुशालात्
विशेषाः स्युर्भूमयस्तेषु मतम् ॥"
इति श्रीभुवभारमण्डनमित्रविरचिते वास्तुशास्त्रे
राजगृहे राजगृहनिवेशादिलक्षणं ५ अः ॥०॥
"पर्य्येकमाल्ये द्विगुणाभिशाले
प्रमाणतो लक्षणमेव तेषाम् ।
यशोदिनं वासुशयं तथैव
ब्रवीमि शालामय मानवानाम् ॥
चत्वारो गुणवत् पुर्व्वगुरुतोऽधो क्रमतोऽन्त्ये
ममाः
[illegible]
[illegible]
[illegible]
ध्याने लघो मध्यमास्त्रादनिर्न्दे
मर्द्दशर्म न क्रमतो विद्यात् ।
[illegible]
प्रोक्तं भवाख्यो कथयामि तेषाम् ॥०॥
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
इति ध्रुवादिषोडशगृहाणि ॥०॥
[illegible]
[illegible]
[illegible]
[illegible]
इति ... ॥०॥
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
इति ... ॥ ० ॥
[illegible]
[illegible]
[illegible]

शिल्पगा

चोद्दसं हयमुषितञ्च ध्वयमानन्दं सुनन्दं
क्रमात् ।"
इति हंसादिषोडशगृहाणि ॥ १ ॥
"मध्येऽपवर्गे भुजरूपकाणा-
मलङ्कार्त्तं प्रथमञ्च तत्र ।
तथाप्यलङ्कारमिति क्रमेण
स्यात्तं तदन्यं रमणञ्च पूर्ण्णम् ॥
तलेश्वरं तदनु पुष्पमतः सुगभे
प्रोक्तं गृह कलमदर्गतमेव रिक्तम् ।
स्यादीप्सितं तदनु भद्रकरञ्चितं च
दीनं स्वह विभवकामदमेव मध्या ।"
इत्यलङ्कृतादिषोडशगृहाणि ॥ २ ॥
"षड्दारु सर्व्वापवर्गेषु
प्रभावमत्रं स्वय भावितञ्च ।
कनक तथान्यत्तिलकञ्च तत्र
सत् क्रीडनं सौम्यमतो यशोदम् ॥
कुमुदमपि च कान्तं भासुरं भूषणञ्च
वसुधरमथ गेहं धान्यमार्गं तदन्यत् ।
कुपितमपि च वित्तं हृदिदं प्रोक्तमेत-
त्तदनु कुलसमूहं षोडशं प्रोक्तमाद्यैः ।"
इति प्रभवादिषोडशगृहाणि ॥३॥
"मध्ये मृगालिन्दमनन्वितश्च
दारुद्विपट्कं ह्यपवर्गमध्ये ।
तत्र चूडामणिकं प्रभद्रं
क्षेमं तथा शेषममुष्टितञ्च ॥
त्रिगात्मकं स्वय भुलिदञ्च
दृष्टं विरोधं कथितं क्रमेण ।
तत्कालपाशं हि निरामयञ्च
सुगात्रमौद्रं सुनिशम्यनाय ॥
विद्धं गृहं चैव मनोरमञ्च
सुभद्रसंज्ञं कथिता च धन्या ।
इत्येकशालानि गृहाणि विद्या-
च्चतत्त्व चन्द्रार्थविभतं भु्वादि ॥
चपवर्ग यत् कथितं तदाभि धीमता गृहे
कार्य्यं
यत् षड्दारुकमदितं द्वारं वा वहुना यत्
इति चूडामण्यादिषोडशगृहाणि । इति
द्विशालगृहाणि ॥ ४ ॥
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

...नं ... दक्षिणे ... च ...
णम् ॥

सामान्यतः सम्पत्तरानिवहं
स्यादैश्यर्ं तत्र कृतान्तम् ।
इत्यादितो नाम चतुष्टयञ्च
ख्यातं त्रिशालं प्रवरं तथैव ॥
तत् कथितं तद्वदपरमग्रे-
ऽलिन्दयुग्मे कथितं त्रिशालम् ।
...कं स्यादथ गृहमानं
... भवनं चतुर्थम् ॥
अलिन्दयुग्मं पुरतो विदध्यात्
षड्दारु मध्येऽपि च नामसंज्ञम् ।
तस्मादगृहे ...
तथा चतुर्थं कथितं वरासन ॥
तस्मिन् गृहे दक्षिणतो ह्यलिन्दं
विमत्तं चित्रं धनकालदण्डं ।
वामे पुनर्यद्युदयपदं स्यात्
मध्येन्तु तस्मिन्नपि कामचक्रम् ॥
लघुश्च पश्चात् पुरतोऽपि युग्मं
स्याद्दक्षिणेको रसदारुमध्ये ।
तत्पूर्वं सुन्दरमेव नाम्ना
स्यात् कोटिमद्ध्येव यथा क्रमेण ॥
प्रदक्षिणेनः पुरतोऽपि युग्मं
पदं रसदारुः किल शाखदारूम् ।
ततो द्वितीयं खलु शाखदं स्या-
च्छालं तथा कोटरमेव संज्ञम् ॥
सौम्यं गृहं मण्डपसंयुतञ्च
तत्सुन्दरं विबुधैर्विधेयम् ।
सुभद्रमस्मादपि वर्द्धमानं
क्रूरञ्च मध्येष्वशुभं चतुर्थम् ॥
मुखे त्रयं दक्षिणपश्चिमैकः
षट् दारुकं श्रीधरनामधेयम् ।
प्रोक्तं गृहे कामदपुष्टिदे च
चतुर्थकं कीर्त्तिविनाशमेव ॥
वामे तथा दक्षिणपश्चिमैको
युग्मं मुखे मण्डपसयुतञ्च ।
श्रीभूषणं श्रीवसनं ततञ्च
श्रीशोभकीर्त्तिक्षयमेव तद्वत् ॥
एकोऽपरे दक्षिणवामतञ्च
यन्मध्यगं श्रीधरयुग्मपूर्व्वम् ।
मव्यां यदं स्यान्मुखतस्त्रयञ्चेत्
लक्ष्मीनिवासं द्युतिकञ्च नाम्ना ॥
युग्मं मुखे मण्डपमेव चाग्रे
युग्मं तथा दक्षिणतोऽन्तभित्तिः ।
पृष्ठे तु उद्योतकवाह्यतेजः
सुतेज एवं कलहावहं स्यात् ॥
उद्योतके पश्चिमभागतो द्वौ
कुर्य्यात् विशालञ्च वहिर्निवासम् ।
तत् पुष्टिदं कोपममानमन्य-
मतुक्रमटकं क्रमतो विधेयम् ॥
लघुविकं पूर्व्वदिशाविभागे
एको भवेद्दक्षिणवामपश्चात् ।

महाकान्तिमत्विदतः गृहं
कृतान्त सान्तवंशन स्यात ॥
भवतदं दिव विदिर्ध विभागे
मुखे विर्च सण्डवाटञ्च ।
प्रतापवर्द्धनमिदञ्च दिव्यं
सुखाधिकं सौन्दरं चतुर्थम् ॥
तदैव रूपं स्वस्तिकरुद्रं
पुनश्चलिन्दोऽन्यतस्त्व च ।
स्यात् सिंहनादं तत्र हस्तियानं
तुर्य्यं तथा वक्त्रकमिदन्तम् ॥
नाम्नादितोदारानि च षोडशैव
त्रिशालकानीह यथाक्रमेण ।
नामानि चत्वार्य्यपि कल्पितं
इत्यादिभेदैः क्रमशो विधेयम् ॥"
इति सूत्रधारमण्डनविरचिते वास्तुशास्त्रे राज-
वल्लभे गृहत्रिशालालक्षणं ६ अध्याय ॥३॥
"त्रिशालभेदानि तु षोड़शैव
वास्तुद्ध्यैः कारणं पुनश्च ।
षष्ठाद्यलिन्दोऽपि पुरो मनुश्च ।
द्वौ सिन्दुकाय्यौ वधिकायलिन्दौ ॥
श्रेष्ठं त्रिशालं मधुरञ्च वामे
मुखे विवर्णं दक्षिणतस्तथैव ।
मुखे तथा वामवमेव गेहं
वामेऽपसव्ये मधुरक एव ॥
प्रामाटमेतं सुखकज्ञयश्च तु
प्रदक्षिणं सिन्दुकवेष्टितं स्यात् ।
अलिन्दयुग्मं विमलं त्रिशालं
तद्दीर्य्यमत्तं सह मण्डपेन ॥
अथ त्रिशालेषु समस्तकेषु
मध्ये विदध्यादमदारु चैकम् ।
तदा भवेद्वासुरमप्रयुग्म-
मेको लघुर्दक्षिणदिग्विभागे ॥
एको लघुर्दक्षिणपूर्व्वगः स्यात्
तदन्तुभाद्रं सुखमण्डपेन ।
द्वौ पूर्व्वतो दक्षिणतस्तथैको
युग्मं भवेन्मण्डपगं सुनेजः ॥
मुखे गुणा दक्षिणतस्तथैको
द्वौ मण्डपेऽस्मिन् हयजाभिधानम् ।
मत्तान्तगेहं मुखजे त्रिके तु
युग्मान्वितं मण्डपमेतदेव ॥
मुखे तथा मण्डपके च युग्मं
वामेऽपसव्ये युगलं लघोश्च ।
लोकवयाड़म्बरमस्य नाम
पड़ुत्तरं शम्भुगणेशयोश्च ॥
युग्मं मुखे मण्डपगं द्वयं स्या-
त्तथा द्वयं दक्षिणवामतञ्च ।
एको हि पश्चाद्धरदाभिधानं
श्रीविश्वकर्म्मोक्तमताद्विशालम् ॥
मालीनसंज्ञं मुखगैश्चतुर्भि-
र्युग्मं भवेद्दक्षिणवामभागे ।
युग्मं तथा पश्चिमदिग् विभागे
तस्माग्रतो मण्डप एक एव ॥

श्चाग्रमा ... त्रिशालमवसे वाले ...
... क्रमनं स्याद् ... सौख्य-
दम् ।
वैदाम्बुदके मुखे च मतं वामेतरे दक्षिणे
तस्मात्रे सुखमण्डपं ... गृहात्
पोदस ॥"
इति सर्व्वादिषोड़शगृहाणि ॥८॥
"अथ त्रिशालं त्रिदशैकमेकं
स्यादृण्डशालामकरन्दसंज्ञम् ।
तथा चतुर्थं कुमुदाभिधानं
इत्यादिभेदैः क्रमतो विधेयम् ॥
हर्वं ह्यलिन्दञ्च तथैव पुनः
इन्द्रश्च कामस्य सुभद्रम् ।
पट्टकञ्च मध्ये स्वधनं कुवेरं
पञ्चं तथा कामदमेतदेव ॥
अलिन्दयुग्मं तत्र भद्रयुक्तं
मध्ये कपाटं जनजाभिधानम् ।
स्यात्सैन्यमं चैव गतं कृपञ्च
षड्दारु मध्ये मकले यथातः ॥
स्याद्द्वैकयं सण्डपकमभद्रं
ज्ञयं निनादं तत्र कीर्त्तिजञ्च ।
भद्रेनधन्याधिकमाकलान्तं
निर्म्मीकं वामदकोणले च ॥
तैरकं क्रमादीगरवारदाख्यं
भौमञ्च कौशल्यमतः क्रमेण ।
तद्वदेव वृहत्सगतं द्वरीयं
स्यात् कौशलं नीलमिदं चतुर्थम् ॥
सुखगुणलघुवामे दक्षिणे चैक एत-
द्वरदगरदमुक्तं दण्डकं काकपक्षम् ।
इदमिह हि निनादं मण्डपेनाधिकं स्या-
त्तदनु च गजनादं वाहुलं कीर्त्तिजाद्यम् ॥
षष्टादिरूपमुखमण्डपमेव सिंहं
श्रेये गृहे हयगजे अपि कोशसंज्ञम् ।
वामेऽधिकञ्च लघुना कथितं सुभद्रं
स्यान्माणिभद्रमपि रत्नजकाञ्चनाख्ये ॥
युगमुखमपरेको भैरवं दक्षिणे च
भरत नरजमेतत् स्याच्चतुर्थं कुवेरम् ।
पुनरपि लघु वामे हस्तियानं वियानं
हयजकपजगेहं तच्चतुर्थं क्रमेण ॥
वर्णानां शुभदञ्च सागरगृहं पश्चैव कुक्षामुखे
प्रोक्तं चौरदरञ्च दाद्यमिदं कोलाहलञ्चापरम् ।
षड् दारुद्वयभद्रसन्नलघवस्तिर्य्यक् युतं शालया
गान्धर्व्वं क्षितिभूषणञ्च कथितं सर्व्वाङ्गकं दर्प-
कम् ॥
धान्यं हविकरं विशालमुदितं शालां विना
पावनी
प्राक्शाला रहितं शुभं निगदितं सुक्षेत्रमर्थ-
प्रदम् ।
चुल्लीसंज्ञमिदं करोति मरणं हीनं तथा
याम्यया
पक्षघ्नं महिषीमृते च भवनं तत्पुत्त्रवन्धुक्षयम् ॥"
इति त्रिदशादिषोड़शगृहाणि ॥८॥

"वेशान्तानि च षोडश प्रथमत: सोमश्च षड्दारुकं
नन्देन पुरोऽपि मद्दरमिदं मध्ये क्रमात् पूर्ववत्।
षष्ठे द्वौ मुखतोऽपि दक्षिणगवृत्तेकाधिकं भागरं
चत्वारो मुखतोऽभितश्च पुरत: प्राग्दक्षिणेको मधु: ॥
[illegible] भवनं भमश्च मधुना मर्व्यं तत् सौम्यदं
[illegible] भवनं तत् [illegible] भवेत्।
[illegible] क्रमतया [illegible]
[illegible] तथा
[illegible] तत् [illegible] क्रमात्
[illegible] भवनं राज्ञां सदा निर्मितम्।
[illegible]
[illegible] क्रमात्
[illegible] सुन्दरम्।
[illegible]
[illegible] भुवने ॥"
इति [illegible] ॥०॥
[illegible]

"मन्त्रादयो मुनिमतेऽष्टविधा च शाला-
स्तासां षडेव कथिता भवनप्रसङ्गे।
शालानिमध्यरचितोऽपि मधु: सुखाय
यद्वा तदग्ररचिता: पृथगेव शाला: ॥"
इति सूत्रधारमण्डनविरचिते वास्तुशास्त्रे राजवल्लभे द्वियानविमानचतुःशालगृहलक्षणवर्णनं सप्तमोऽध्याय: ॥ ० ॥
"शयनमथ नृपाणां स्वङ्गुलानां शतैकं
नवतिरपि सुतानां मन्त्रिण: षड्विहीनम्।
बलपतिगुरुहस्तं स्याद्गुलोनं पुरोध
तदनु युगलहीनं ब्राह्मणादे: प्रशस्तम् ॥
व्यासोऽष्टभागो मतदैर्घ्यतश्च
कलांशमात्रोऽधिक एव शस्त: ।
सांशेन पादेन समुच्छ्रय: स्यात्
द्विषाङ्गुलानामधिको न कार्य: ॥
शोपर्णी धनदामनोऽपि मदहाविसपदा तिन्दुकी
द्विः शिंशपयाथ शाकशयने शर्मापि शालै: कृते।
पायु: पद्मकजे च चन्दनमयी शत्रुक्षय: स्यात् सुखं
श्रेष्ठं चैकमन्नं शिरीषजनितं पर्यङ्कयानासनम् ॥"
इति शयनम् ॥ ० ॥
"सिंहासनं षोडशमङ्गुलानां
पश्चाद्दशोनश्च परं तथैव।
दशांशवृद्ध्याप्रमतो त्रिकोणं
व्यासं च दैर्घ्यार्धसमुच्छ्रयं स्यात् ॥
मुनिभिश्च शिरस्त्रां भद्रभागत्रयं स्या-
दुदय इति विभागैर्भाजितं पीठमष्टौ।
जनकमपि रमांशं सप्तधा पादपट्टी
शिखरमुनिरमं दंष्ट्रिकाख्यो निवेशो ॥
[illegible] स्याद्भभागैश्च तिथिसो भागैन कलासन
युत स्तम्भयुगेन तोरणयुतं रत्नै: शुभे राजितम्।
[illegible] प्रतिमना [illegible] सिंहासन
[illegible] सिंहै: कलासनम् ॥
[illegible] वेदी पुनरेव [illegible]
सुखासनं तोरणयुक्तं स्यात्।
पीठञ्च कुम्भ [illegible]
[illegible] ॥
[illegible] सिंहासन
[illegible] भवेत्
[illegible]
[illegible] शुभम् ॥"
इति सिंहासनलक्षणानि ॥ ० ॥
[illegible]
[illegible]
[illegible]
[illegible] ॥
[illegible]
[illegible]

छाद्यैकेन युत: सुवक्त्र उदितो द्वाभ्यां प्रियो भवेत्।
एकोन: [illegible]
वैचित्र: शरषड्क्तिभिस्तु विविधाकारैर्युत: पञ्च च।
सिंहो दैर्घ्यविवर्धितो हि पृथुले हंसो गजाख्यो भवेत्
कुम्भोऽसौ मतिदोऽपि भद्रसहितो श्रेयस्तु सुदर्शन
द्वारेणैव युगाख्यकेण गरुड: पक्षद्वये शालकं
प्रोक्ता: पञ्चदशैव रूपमदला वैदादिकाश्च सन्ते: ।"
इति पञ्चदश शाला: ॥ ० ॥
"सभा च नन्दा परतोऽथ भद्रा
जया च पूर्णा क्रमतोऽपि दिव्या।
पद्मी सुरद्रोहविकोत्पलाष्टौ
सुधैर्विधेयात्रिपालगेहे ॥
क्षेत्रं चतुष्टयपदैरपि षोडशांशं
मध्ये तुरीयपदमेकपदो लघुश्च।
नन्देति भद्रसहिता च पदेन भद्रा
तद्वेदलश्च जयदा मधुना च पूर्णा।
दिव्या सभा केवलमन्दभागा
भद्रैश्चतुर्भि: सहिता च पद्मी।
रत्नोद्भवा स्याद्युगतोऽपि तुर्यं
स्तम्भोत्पलाख्या प्रतिभद्रतश्च ॥
स्तम्भैस्तोरणराजितैश्च सदना निर्यूहकैर्भातं
[illegible] शालिनम्।
रत्नस्फाटिकरङ्गभूमिनृपते क्रीडास्पदं [illegible]
कुर्याद्दक्षिणभद्रकं च रुचिरा यन्मध्यतो [illegible] कान्।"
इति सभाष्टकम् ॥ ० ॥
"वेदी कोणचतुष्टयेन [illegible]
कल्याण रविकोणकेश नृपते: सा भद्रिका सर्वदा
कोणै: श्रीधरिका च [illegible]
कोणैरष्टभिरन्विता च शुभदा [illegible]
[illegible] भूपसदने [illegible]
कुर्यात्स्तम्भचतुष्टयाश्च [illegible]
[illegible]
[illegible]
इति वेदिकाचतुष्टयम् ॥ ० ॥
"दीपस्तम्भं त्रिचतुरुदयं [illegible]
[illegible]
[illegible]
[illegible]
इति श्रीसूत्रधारमण्डनविरचिते [illegible]
राजवल्लभे [illegible]
[illegible] वेदिकाचतुष्टयदीप [illegible] ८ [illegible]

:क्त वास्तुशास्त्रोदधौ राजयोग्या
नका हि मन्यत तथ: कियन्त: ।
शोभाय योग्या नृपाणां समहा
तोभान्विताम्तो च कल्याणदाय ॥
शालं गृहं टिक्ष्वपि स्तम्भयुग्मं
ले वीथिकाये च षड्दारमध्यम् ।
न्दालिन्दचातुर्दिशं चैवयुक्तं
वाराश्च कोणे च भद्रे विधेयम् ॥
न्ते भद्रके श्रीधरं माणयुक्तं
था भूमिका पञ्चमीकाभ्याम् ।
विनाश्यादनं मण्डपं वेदयुक्तं
रिपुघ्नं गृहं राज्यवर्द्धन्यमितम् ॥
मध्ये निकस्यद्रूपाप्रं तयोर्न:
शस्तं देवं पुत्रनाशाय गेहम् ।
स्तम्भश्रेणी मध्यमानेन कार्य्या
न्यूनाधिक्ये नैव पूज्या न च श्री: ॥
हीनस्तम्भे शालयोर्वाशपदे
नो वेध: स्यादन्यतो वेध एव ।
भूमिर्न्यं य: दृष्टसंख्याप्रमाणं
तुल्या नेष्टा वर्द्धमाना: शुभा: स्यु: ॥
ार्द्दत्रयेन विभजेत् करतस्त्वरूप-
ध्ये नवांशमुदितश्च करार्द्धभित्ति: ।
तुभाय षोड़शगृहेऽपि च भद्रकेषु
न्तैर्मिताय सकलासु चतुर्मुखं स्यात् ॥
भद्रे च भूमिद्वयमूर्द्धमाण्डं
सार्द्धत्रिभूमं कथितश्च गेहम् ।
प्रतापवर्द्धन्यमिदं नृपाणां
लक्ष्मीविलासश्च वदामि तस्मात् ॥
स्तम्भा दश दश भद्रस्यैकं
षोड़शमध्ये तत्समरूपम् ।
मदनशराष्टनिभाण्डसमेतं
लक्ष्मी: कर्म्मकरोति च नित्यम् ॥
ागा: पञ्चगुणाश्च पञ्च भवनं षड़्विंशता
स्तम्भकै:
ध्ये चार्द्धपदे च नन्दपदकैर्भद्रं चतुर्द्दारकै: ।
द्रे वैगुणभद्रकाणि सकलेऽष्टाशीतिका स्तम्भका,
ाण्डं भूत्रितये च सार्द्धशरभू: स्याच्छ्रीनिवास
गृहम् ॥
ध्ये स्तम्भगतश्च भागसमके भित्तिश्चतुर्द्वारकं
मतांशाद्रिशरांशरामसहितं भद्रं चतुस्त्रिंशता।
ष्ट्विंशत् द्विशती च ते तु सकला: स्तम्भा:
चितौ पूर्व्वतो
नाम्ना तत् कमलोद्भवश्च कथितं भूम्यर्द्ध समा-
न्वितम् ॥
हर्म्म्यस्योदयकं विभज्य नवधा कुम्भो भवेद्भागत:
ादोनं भरणं शिरश्च कथितं पट्ट: सपादो
भवेत् ।
स्तम्भ: पञ्चपदोनभाग उदित: कोणाष्टवृत्तस्तथा
भागार्द्धेन जयन्तिका निगदिता सा तन्तकस्यो-
परि ॥
गृहस्योदयं दिग्विभागैर्विभाज्य
द्विभागेन कक्षासनं वेदिका स्यात् ।
त्रिभागेन तत्कक्षतो भित्तिरेवं
गृहस्योदयार्द्धेन पीठं नृपाणाम् ॥
उत्तानपट्टो नृपमन्दिरेऽस्मी
हस्तं च हस्ते द्वियवोन्नत: स्यात् ।
पाषाणज: सौख्यकरो नृपाणां
धनक्षयं सोऽपि करोति गेहे ॥
सुधेष्टके शर्करया वियुक्ते
मकर्करैस्तै: सुदृढा गृहे भू: ।
शस्ता न शस्तं भवनेषु चित्रं
कपोतगृध्रा: कपिकाकरौद्रम् ॥
शुद्धोऽलिन्दविशेषतश्च सकला भूम्यौघरक्षा-
न्विता
छायेनाप्यथ मत्तवारणयुतं माण्डं तथार्द्धो-
दयम् ।
सौढ़ो भद्रचतुष्किकाभिरुदितो मण्डेन युक्त-
स्तथा
सकैस्तम्भसपादकैस्तु मुकुलो वा शीर्षकै:
शेखर: ॥
राज्ञो गृहं छन्दचतुर्यं स्यात्
तथैव घण्टाकलसेन युक्तम् ।
तुङ्गारसंज्ञस्तथ सिंहकर्ण:
प्रासादके तेऽपि षडेव शस्ता: ॥
षड्जातिभेदं तृणपर्णपट्टै-
र्वंशै: काष्ठैर्वापि मृदा शिलाभि: ।
एवं प्रकारै: कथितश्च षड्भि-
र्लोकप्रसिद्धा च परीक्षणीयम् ॥"
इति राजगृहादि ॥५॥
"वामे भागे दक्षिणे वा नृपाणां
वेधा कार्य्या वाटिका क्रीड़नार्थम् ।
एकद्वित्रिर्द्दिगङ्कसंख्या शतं स्यात्-
मध्ये धारामण्डपं तोययन्त्रै: ॥
सेवं सप्तविभागभाजितमतो भद्रस्य भागत्रयं
तन्मध्ये जलवापिकाजिनपदैरेकांशतो वेदिका
स्तम्भैर्द्वादशभिश्च मध्यरचित: कोणेषु कूपान्वित:
कर्त्तव्यो जलयन्त्र एष विधिवत् भोगाय भूमी-
भुजाम् ॥
तस्यां चम्पककुन्दजातिसुमनोवक्षर: सुनि-
र्व्वालुका
जातीहेमसमानकेतकिरपि श्वेता तथा
पाटला ।
नारङ्ग: करुणा वसन्तलतिका चारक्तपुष्पादिकं
जम्बीरो बदरी च पूगमधुका जम्बूश्च चूतद्रुमा: ॥
मालूर: कदली च चन्दनवटावश्वत्थपथ्याशिवा-
चिञ्चाशोककदम्बनिम्बतरव: खर्ज्जूरिका
दाड़िमी ।
कर्पूरागुरुकिंशुका हयरिपु: पुन्नागको निम्बुकी
प्रोक्ता नागलता च बीजनिभृता स्यात् तिन्दुकी
लाङ्गली ॥
द्राक्षैला शतपत्रिका च वकुला धत्तूरकङ्को-
लकी
शालस्तालत [illegible]की मन्दारपारि-
द्रुमी ।
अन्ये भोग्यविचित्रशाखसुफलास्ते रोपणीया
बुधै:
यत्प्राप्नोति न भूतले शुभतरुं स्तम्भकान्
वापयेत् ॥
स्नानं प्रतिषेचनाय च घटीयन्त्रमुपारोहवे
दोला स्त्रीजनखेलनाय रुचिरे वर्षावसन्तोत्-
सवे ।
वात्याप्रोढ़वधूसुमध्यवनितागानैर्मनोहारिभि-
र्ग्रीष्मे शारदकेऽथ शीतलजलक्रीड़ा शुभे
मण्डपे ॥
इति वाटिका ॥७॥
"तुरङ्गमाणां गृहवामभागे
शाला चतुष्पट्टिकरा विधेया ।
शतार्द्धतो मध्यमिका च दैर्घ्ये
कनीयसी तद्दशभिर्विहीना ॥
व्यासे च त्र्यंशा तिथिहस्तमाना
वयोदशैकादशकै: क्रमेण ।
तद्वाह्यभित्तिश्च करप्रमाणा
पश्चार्द्धपञ्चाधिकरोदया स्यात् ॥
तेजोहानिमपीड्या विदधते पूर्व्वापरास्या
नृणां
ते याम्योत्तरतो सुखादि सततं कीर्त्तिर्यशो
धान्यकम् ।
कर्त्तव्यो धिषणं प्रतीक्ष कलसस्थानं द्विहस्तोदयं
तस्यास्तोरणमुच्छ्रितश्च मुनिभिर्हस्तै: सुशोभा-
न्वितम् ॥
पट्टा साधुद्वयाङ्गुलैर्निगदितो वेदाङ्गुलेनाधिक:
श्रीवत्सस्त्वथ हिलाव एव च मनोहारी दिसप्ता-
ङ्गुल: ।
रागाद्यङ्गुलकैस्तु वाजिविजयोऽशीत्या तथा
भैरव:
शान्ताख्यस्तु युगाष्टमात्र उदये मानं हरे:
सप्तधा ॥"
इत्यश्वशाला ॥ * ॥
"सिंहद्वारं पूर्व्वमानेन कार्य्यं
त्रिद्वेरका वा मालिका स्तम्भशीर्षे ॥
स्यातां मध्ये ताड़को रक्षणार्थं
तुल्यौ भागेनाधिकौ वापि सार्द्धौ ॥
भागे दक्षिणवामके च करिणां शाला हरे-
र्द्वारत:
कर्त्तव्या सुदृढोन्नता च कलसैर्घण्टादिभि-
र्भूषिता ।
संकीर्णा रसनो नगैर्निगदितो मन्दा मृगा-
ष्टम:
सर्वेपूत्तमभद्रजातिरुदितो नन्दै: [illegible]
इति गजशाला ।८।
"अष्टोत्तरहस्तशतं प्र[illegible]
नृपालयं चोत्तमभेव
अष्टाभिरष्टाभि[illegible]
पञ्चैव भा[illegible]
भयो[illegible] वा
[illegible]वा

विभागदैर्घ्येऽधिकतो विधेया
गुहाः क्रमेणैव यथोदिताय ॥
दीर्घं चतुष्टयिकं पृथुत्वे
क्रमेण षड्भिश्च करैर्विहीनम् ।
षड्भागतो दैर्घ्यमतोऽधिकं स्या-
[illegible]धिपञ्चैव च पञ्चहस्तैः ॥
यथा हस्तैर्मन्दिरमिदं पृथुत्वे
[illegible] पञ्चकं वेदवेदैः ।
कुर्य्यात्ततो [illegible]
[illegible] दैर्घ्यं यत्र ॥
[illegible]भुजेष भवनं [illegible]हस्तैः समं
[illegible]वेदविहीनकैः क्रमतया भागाधिकं दैर्घ्यतः ।
[illegible] गृहत [illegible] भेदं
[illegible] दैर्घ्यं [illegible] तद्भवेत् ॥
[illegible] वेदाधिका [illegible]
[illegible] दैर्घ्येऽधिका मानतः ।
[illegible] मदं [illegible]
[illegible] [illegible] नाम् ॥
[illegible]
[illegible] विधेयम् ।
[illegible]
[illegible] ।
[illegible]
[illegible] ।
[illegible]
[illegible] ।
[illegible]
[illegible] ।
[illegible]
[illegible] ॥
[illegible]
[illegible] ।
[illegible]
[illegible] ॥"
इति [illegible]
[illegible] ॥ ० ॥
[illegible]
[illegible]
[illegible]
[illegible] इति
[illegible] ॥
[illegible] इति [illegible]
[illegible]
[illegible]
[illegible]
[illegible] । ७ । ३१ ।

"ब्राह्मणैः शिल्पिभिर्यन्त्रैर्यथमेनोदकेन च ॥")
तत्पर्य्यायः । कारुः २ । इत्यमरः ॥ अस्य विवरणं शिल्पकारशब्दे द्रष्टव्यम् । शिल्पसम्बन्धी च ॥

शिव, क्ली, (शो + "सर्व्वनिघृष्वरिष्वलष्वशिवपद्वप्रह्वेष्वा अतन्त्रे ।" उणा० १ । १५३ । वन्प्रत्ययेन साधु ।) मङ्गलम् । इत्यमरः ॥ (यथा, रघुः । १६ । ०
"उपपन्नं ननु शिवं सप्तस्वङ्गेषु यस्य मे ।
दैवीनां मानुषीनाञ्च प्रतिहर्त्ता त्वमापदाम् ॥")
सुखम् । जलम् । इत्युणादिकोषः ॥ सैन्धवम् । समुद्रलवणम् । श्वेतटङ्कणम् । इति राजनिर्घण्टः ॥ (मङ्गलवति, त्रि ॥ यथा, महाभारते । १ । २०८ । ३६ ।
"तत्र रम्ये शिवे देशे कौरवस्य निवेशनम् ॥")

शिवः, पुं, (शी + "सर्व्वनिघृष्वेति ।" उणा० १ । १५३ इति वन्प्रत्ययेन साधुः ।) ब्रह्मणः संज्ञाविशेषः । तस्य व्युत्पत्तिर्यथा । शिवं कल्याणं विद्यतेऽस्य शिवः । श्यति अशुभमिति वा । शेरतेऽवतिष्ठन्ते अणिमादयोऽष्टौ गुणा अस्मिन् इति वा शिवः । इत्यमरटीकायां भरतः ॥ तत्पर्य्यायः । शम्भुः २ ईशः ३ पशुपतिः ४ शूली ५ महेश्वरः ६ ईश्वरः ७ सर्व्वः ८ ईशानः ९ शङ्करः १० चन्द्रशेखरः ११ भूतेशः १२ खण्डपरशुः १३ गिरीशः १४ गिरिशः १५ मृडः १६ मृत्युञ्जयः १७ कृत्तिवासाः १८ पिनाकी १९ प्रमथाधिपः २० उग्रः २१ कपर्द्दी २२ श्रीकण्ठः २३ शितिकण्ठः २४ कपालभृत् २५ वामदेवः २६ महादेवः २७ विरूपाक्षः २८ त्रिलोचनः २९ कृशानुरेताः ३० सर्व्वज्ञः ३१ धूर्जटिः ३२ नीललोहितः ३३ हरः ३४ स्मरहरः ३५ भर्गः ३६ त्र्यम्बकः ३७ त्रिपुरान्तकः ३८ गङ्गाधरः ३९ अन्धकरिपुः ४० क्रतुध्वंसी ४१ वृषध्वजः ४२ व्योमकेशः ४३ भवः ४४ भीमः ४५ स्थाणुः ४६ रुद्रः ४७ उमापतिः ४८ । इत्यमरः ॥ वृषपर्व्वा ४९ रेरिहाणः ५० भगाली ५१ पांशुचन्दनः ५२ दिगम्बरः ५३ अट्टहासः ५४ कालञ्जरः ५५ पुरहिट् ५६ वृषाकपिः ५७ महाकालः ५८ वराकः ५९ नन्दिवर्द्धनः ६० हीरः ६१ वीरः ६२ खरः ६३ भूरिः ६४ कटप्रूः ६५ भैरवः ६६ ध्रुवः ६७ शिविविष्टः ६८ गुडाकेशः ६९ देवदेवः ७० महानटः ७१ । इति जटाधरः ॥ तीव्रः ७२ खण्डपर्शुः ७३ पञ्चाननः ७४ कण्ठेकालः ७५ भवः ७६ भीमः ७७ भीषणः ७८ कङ्कालमाली ७९ जटाधरः ८० व्योमदेवः ८१ सिद्धदेवः ८२ धरणीश्वरः ८३ विश्वेशः ८४ जयन्तः ८५ हरहरः ८६ भस्मशायी ८७ [illegible] ८८ [illegible] ८९ भूतपतिः ९० [illegible] ९१ वृषभध्वजः ९२ भूतनाथः ९३ शिपिविष्टः ९४ वरेश्वरः ९५ त्रिनेत्रः ९६ त्रिपुरान्तकः ९७ कालभैरवः ९८ कुबेरसखः ९९ कपालमाली १०० विरूपाक्षः १०१ त्रिलोकेशः १०२ प्रियतमः १०३ विषमाक्षः १०४ भद्रः १०५ ऊर्द्ध्वरेताः १०६ यमान्तकः १०७ अष्टमूर्त्तिः १०८ सर्व्वेशः ११० खेचरः भङ्गीशः ११२ अर्द्धनारीशः ११३ गणनायकः इति शब्दरत्नावली ॥ [illegible] ११५ पाणिः ११६ फणधरधरः ११७ तनः ११८ हिमाद्रितनयापतिः ११९ । कविकल्पलता ॥ तस्य सहस्रनामानि महाभारते अनुशासनपर्व्वणि १७ अध्याये द्रष्टव्यानि ॥ * ॥ अस्य कपालिनामकारणं यथा,

ईश्वर उवाच ।
"आसीत्तत्र वरारोहे ब्रह्मणस्तु शिरोऽपरम् ।
पञ्चमं शृणु सुश्रोणि जातं काञ्चनसुप्रभम् ।
ज्वलत्तं परमं शीर्षं जातं तस्य महात्मनः ।
स एवमब्रवीद्देवि ! जन्म जानामि ते
अतः क्रोधपरीतेन संरक्तनयनेन च ।
वामाङ्गुष्ठनखाग्रेण छिन्नं तस्य [illegible]

ब्रह्मोवाच ।
यस्मादनपराधेन शिरश्छिन्नं त्वया मम ।
तस्माच्छापसमायुक्तः कपाली त्वं भविष्यसि ॥"
इति मात्स्ये १८३ अध्यायः ॥

अथ शिवमन्त्राः । तत्र एकाक्षरमन्त्रो यथा,
"सान्तमौकारसंयुक्तं बिन्दुभूषितमस्तकम् ।
प्रासादाख्यो मनुः प्रोक्तो भजतां कामदो मनिः ॥" हौं ॥
अस्य पूजा । प्रातःकृत्यादिमातृकान्यासं [illegible] यामञ्च विधाय श्रीकण्ठादिन्यासं [illegible] स्थानेषु कुर्य्यात् । ततः सामान्यपूजापद्धत्या पीठन्यासं कृत्वा पीठशक्तीर्न्यसेत् । [illegible] ऋष्यादिन्यासः । ततः कराङ्गन्यासौ । [illegible] ईशानाद्याः पञ्चमूर्त्तीर्न्यसेत् । [illegible] न्यासं कृत्वा ध्यायेत् । [illegible] तत ऊर्द्ध्वप्राग्दक्षिणोत्तरपश्चिमेषु मूर्द्धसु अस्य पञ्चकला पञ्च ब्रह्म [illegible] प्रणवाद्या नमोऽन्ता न्यसेत् । ततः [illegible] दक्षिणोत्तरेषु तत्पुरुषस्य [illegible] न्यसेत् । ततो हृदये ग्रीवायां [illegible] कुक्षौ पृष्ठे वक्षसि अघोरस्याष्टौ कला न्यसेत् । ततो गुह्ये अण्डकोषे ऊरुद्वये जानुद्वये जङ्घाद्वये स्फिचोः कट्योः पार्श्वयो [illegible] सद्योजातस्य कला विन्यसेत् । तत [illegible] नासिकायां मूर्द्धि बाहुद्वये [illegible] [illegible] कला न्यसेत् । तत [illegible] ईशानाद्या पञ्च कला न्यसेत् । [illegible] हृदयगुह्यपादेषु ता कला न्यसेत् । [illegible] न्यासान्तरं कुर्य्यात् । [illegible]
"मुक्तापीतपयोदमौक्तिकजवावर्णैर्मुखैः पञ्चभि-
स्त्र्यक्षैरञ्चितमीशमिन्दुमुकुटं पूर्णेन्दु[illegible]
[illegible]
शूलं टङ्ककृपाणवज्रदहनान्नागेन्द्रघण्टाङ्कुशान्
पाशं भीतिहरं दधानममिताकल्पोज्ज्वलं [illegible]

ध्यात्वा मानसैः संपूज्य अर्घ्यस्थापनं कृत्वा
ोक्तपीठपूजां विधाय पुनर्ध्यात्वा आवाह-
दिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं कृत्वा आवरण-
ां विधाय धूपादिविसर्ज्जनान्तं कर्म्म समा-
त्। अस्य पुरश्चरणं पञ्चलक्षजपः ॥१॥*॥
ष्टाक्षरमन्त्रो यथा,—
ह्वरः शक्तिरुद्धः कथितोऽष्टाक्षरो मनुः ॥"
ॐ नमः शिवाय ह्रौँ। अस्य पूजा। प्रातः-
त्यादिशैवोक्तं पीठमन्त्रान्तं न्यासं विधाय
ष्यादिन्यासकराङ्गन्यासान् प्राणायामञ्च कृत्वा
येत्।
भुकामं त्रिनेत्रं शशिशकलधरं स्मेरवक्त्रं वहन्तं
तैः शूलं कपालं वरदमभयदं चारुहासं
भजामि।
मोरुस्थभागायाः करतलविलसच्चारुरक्तोत्-
पलायाः
स्तेनाश्लिष्टदेहं मणिमयविलसद्भूषणायाः
प्रियायाः ॥"
ं ध्यात्वा मानसैः संपूज्यार्घ्यस्थापनं कृत्वा
ोक्तपीठपूजां विधाय पुनर्ध्यात्वावाह्य पञ्च-
पाञ्जलिदानपर्य्यन्तं विधायावरणपूजां कृत्वा
पदानादिविसर्ज्जनान्तं कर्म्म समापयेत्। अस्य
श्चरणं चतुर्द्दशलक्षजपः ॥ २ ॥ * ॥ तस्या-
क्षरमन्त्रान्तरं यथा,—
तारो माया वियद्बिन्दुमनुस्वारविभूषितम्।
क्षाक्षरसमायुक्तो वसुवर्णो मनुर्म्मतः ॥"
ह्रौँ ह्रौँ नमःशिवाय। अस्य पूजा। प्रातः-
त्यादिशैवोक्तपीठन्यासान्तं विधाय पूर्ववदृष्या-
दिन्यासं कराङ्गन्यासौ च कृत्वा ध्यायेत्।
वन्दे सिन्दूरवर्णं मणिमुकुटलसच्चारुचन्द्रावतंसं
[illegible] स्मितमुखकमलं दिव्यभूषाङ्ग-
रागम्।
वामोरुन्यस्तपाणेररुणकुवलयं संदधत्याः
प्रियाया-
श्चक्रोत्सुप्रसन्नाग्रे निहितकरतटं वेदटङ्केऽष्ट-
हस्तम् ॥"
एवं ध्यात्वा मानसैः संपूज्यार्घ्यस्थापनं कृत्वा
पीठपूजां विधाय पुनर्ध्यात्वावाहनादिपञ्चपुष्पा-
ञ्जलिदानपर्य्यन्तं विधाय आवरणपूजां कृत्वा
धूपादिविसर्ज्जनान्तं कर्म्म समापयेत्। अस्य
पुरश्चरणमष्टलक्षजपः ॥३॥ * ॥ अथास्य मृत्यु-
ञ्जयाख्यमन्त्रः।
"तारं स्थिरं सकर्णेन्दुभृगुः सर्गसमन्वितः।
त्र्यक्षरात्मा निगदितो मन्त्रो मृत्युञ्जयात्मकः ॥"
ॐ जुँ सः। अस्य पूजा। प्रातःकृत्यादिशैवोक्त-
पीठन्यासान्तं विधाय ऋष्यादिन्यासं कराङ्ग-
न्यासौ च कृत्वा ध्यायेत्।
"चन्द्रार्काग्निविलोचनं स्मितमुखं पद्मद्वयान्तः-
स्थितं
मुद्रापाशमृगाक्षसूत्रविलसत्पाणिं हिमांशु-
प्रभम्।
कोटीरेन्दुगलत्सुधाप्लुततनुं हारादिभूषोज्ज्वलं

कान्त्या विश्वविमोहनं पशुपतिं मृत्युञ्जयं
भावये ॥"
एवं ध्यात्वा मानसैः सम्पूज्यार्घ्यस्थापनं कृत्वा
पीठमन्त्रान्तां पीठपूजां विधाय पुनर्ध्यात्वावाह-
नादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं कृत्वा आवरण-
पूजां विधाय धूपादिविसर्ज्जनान्तं कर्म्म समा-
पयेत्। अस्य पुरश्चरणं लक्षद्वयजपः ॥४॥ * ॥
अथान्यापरद्वादशाक्षरमृत्युञ्जयमन्त्रः।
"मृत्युञ्जयं समुच्चार्य्य पालय द्वितयं वदेत्।
मृत्युञ्जयं समुच्चार्य्य पुनरेव विलोमतः ॥
द्वादशाक्षरोऽयं मन्त्रः स्यात् मृत्युञ्जयाभिधो-
ऽपरः।"
ॐ जुँ सः पालय पालय ॐ जुँ सः। अस्य
ध्यानपूजादिकं सर्वं पूर्ववत् ॥ ५ ॥ * ॥ अस्य
द्वाविंशत्यक्षरमन्त्रः।
"प्रणवो हृदयं पश्चात् ततो भगवते पदम्।
ङेऽन्तञ्च दक्षिणामूर्त्तिं मह्यं मेधामुदीरयेत्।
प्रयच्छ ठद्वयान्तोऽयं द्वाविंशत्यक्षरो मनुः ॥"
ॐ नमो भगवते दक्षिणामूर्त्तये मह्यं मेधां
प्रयच्छ स्वाहा। अस्य पूजा। प्रातःकृत्यादि-
शैवोक्तपीठमन्त्रान्तं विन्यस्य ऋष्यादिन्यासं
कराङ्गन्यासौ च कृत्वा ध्यायेत्।
"वटवृक्षं महोच्छ्रायं पद्मरागफलोज्ज्वलम्।
गारुत्मतमयैः पत्रैर्विचित्रैरुपशोभितम् ॥
नवरत्नमहाकल्पैर्लम्बमानैरलङ्कृतम्।
विचिन्त्य वटमूलस्थं चिन्तयेल्लोकनायकम् ॥
स्फटिकरजतवर्णं मौक्तिकीमक्षमाला-
ममृतकलशविद्याज्ञानमुद्राः कराब्जैः।
दधतमुरगकक्षं चन्द्रचूडं त्रिनेत्रं
विधृतविविधभूषं दक्षिणामूर्त्तिमीडे ॥"
एवं ध्यात्वा मानसैः सम्पूज्य अर्घ्यस्थापनादि-
शैवोक्तपीठपूजां विधाय पुनर्ध्यात्वावाहनादि-
पञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधायावरणपूजां
कृत्वा धूपादिविसर्ज्जनान्तं कर्म्म समापयेत्।
अस्य पुरश्चरणं लक्षजपः ॥ ६ ॥ * ॥ अथास्य
मन्त्रान्तरम्।
"वह्निसम्वर्त्तकादित्यरानिलो षष्ठबिन्दुमत्।
चिन्तामणिरिति ख्यातं वीजं सर्व्वसमृद्धिदम् ॥"
र-क्ष म-र य-औ ऊँ ॥ प्रपञ्चसारे।
"घनलक-य-सरेफ-प्राणसत्यान्तवाम-
श्रुतिहिमरुचिखण्डैर्म्मण्डितो मन्त्रराजः।"
अस्य पूजा। प्रातःकृत्यादिशैवोक्तपीठमन्त्रान्तं
विन्यस्य ऋष्यादिन्यासं कराङ्गन्यासौ च कृत्वा
ध्यायेत्।
"नीलप्रवालरुचिरं विलसत्त्रिनेत्रं
पाशारुणोत्पलकपालकशूलहस्तम्।
अर्द्धाम्बिकेशमनिशं प्रविभक्तभूषं
बालेन्दुबद्धमुकुटं प्रणमामि रूपम् ॥"
एवं ध्यात्वा मानसैः संपूज्यार्घ्यं संस्थाप्य
शैवोक्तपीठपूजां विधाय पुनर्ध्यात्वावाहनादि-
पञ्चपुष्पाञ्जलिदानपर्य्यन्तं कृत्वा आवरणपूजां
विधाय धूपादिविसर्ज्जनान्तं कर्म्म समापयेत्।

अस्य पुरश्चरणं लक्षजपः। अयं अर्द्धनारी-
श्वरः ॥ ७ ॥ * ॥
"पार्श्वो वह्निसमारूढ़स्तारवानाद्यमीरितम्।
धान्तो वह्निसमारूढ़स्तुर्य्यस्वरसमन्वितः ॥
बिन्दुमांस्तु द्वितीयः स्यात् टान्तः सर्गी तृती-
यकः।
नीलकण्ठात्मको मन्त्रो विषद्वयहरः परः ॥"
प्रमाणान्तरम्।
"लोहितोऽग्न्यासनः सत्यो बिन्दुमान् प्रथ
पुनः।
द्वितीया वह्निवीजस्था दीर्घा शान्तीन्दुभूषिता ॥
तृतीया लाङ्गली सर्गी मन्त्रो वीजत्रयात्मकः।
नीलकण्ठात्मको मन्त्रो विषद्वयहरः परः ॥"
प्रों न्रीं ठः इति मन्त्रः। अस्य पूजा। प्रातः
कृत्यादिशैवोक्तपीठन्यासान्तं कृत्वा ऋष्यादि-
न्यासं कराङ्गन्यासौ च विधाय ध्यानं कुर्य्यात्।
"बालार्कायुततेजसं धृतजटाजूटेन्दुखण्डोज्ज्वलं
नागेन्द्रैः कृतशेखरं कपवटीं शूलं कपालं
करैः।
खट्वाङ्गं विधृतं त्रिनेत्रविलसत्पञ्चाननं सुन्दरं
व्याघ्रत्वक्परिधानमब्जनिलयं श्रीनीलकण्ठं
भजे ॥"
एवं ध्यात्वा मानसैः संपूज्य अर्घ्यस्थापनादि-
शैवोक्तपीठपूजां विधाय पुनर्ध्यात्वा आवाह-
नादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं कृत्वा आवरण-
पूजां विधाय धूपादिविसर्ज्जनान्तं कर्म्म समा-
पयेत्। अस्य पुरश्चरणं त्रिलक्षजपः। अयं
नीलकण्ठः ॥८॥*॥ अस्याष्टाक्षरमन्त्रो यथा—
"तारो हृन्नीलकण्ठाय मन्त्रश्चाष्टाक्षरः परम्।
ॐ नमो नीलकण्ठाय। अस्य पूजादिकं सर्व्वं
पूर्व्ववत् ॥ ९ ॥ * ॥ अस्य पञ्चाक्षरमन्त्रः षड़-
क्षरमन्त्रश्च यथा,—
"हृदयं चपरं शाक्षिन् शान्तोऽनन्तान्वितो
मरुत्।
पञ्चाक्षरो मनुः प्रोक्तस्ताराद्योऽयं षड़क्षरः ॥"
नमः शिवाय। ॐ नमः शिवाय। अस्य पूजा।
प्रातःकृत्यादिशैवोक्तपीठमन्त्रान्तं न्यासं विधाय
ऋष्यादिन्यासं कुर्य्यात्। ततो मूर्त्तिन्यासः।
ततः कराङ्गन्यासौ। ततो गोलकन्यासः। ततो
व्यापकन्यासं प्राणायामञ्च कृत्वा ध्यायेत्।
"ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रा-
वतंसं
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं
प्रसन्नम्।
पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं
वसानं
विश्वाद्यं विश्ववीजं निखिलभयहरं पञ्चवक्त्रं
त्रिनेत्रम् ॥"
एवं ध्यात्वा मानसैः सम्पूज्यार्घ्यस्थापनं कृत्वा
शैवोक्तपीठपूजां विधाय पुनर्ध्यात्वावाहनादि-
पञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधायावरणपूजां
कृत्वा धूपादिविसर्ज्जनान्तं कर्म्म समापयेत्।

अस्य पुरश्चरणं षट्त्रिंशल्लक्षजपः ॥ १० ॥ * ॥
अथास्य तारकमन्त्रः ।
"सर्गेशो वह्निशिखरो लान्तस्थो दान्त ईरितः
फडन्तश्चण्डमन्त्रोऽयं त्रिवर्णात्मा समीरितः ॥"
ऊहुँ फट् इति मन्त्रः । अस्य पूजा । प्रातः-
कृत्यादिशैवोक्तपीठन्यासान्तं विधाय ऋष्यादि-
न्यासं कराङ्गन्यासौ च कृत्वा ध्यायेत् ।

"चण्डेश्वरं रक्ततनुं त्रिनेत्रं
रक्तांशुकाढ्यं हृदि भावयामि ।
टङ्कं त्रिशूलं स्फटिकाक्षमालां
कमण्डलुं बिभ्रतमिन्दुचूडम् ॥"

एवं ध्यात्वा मानसैः संपूज्यार्घ्यस्थापनादिशैवो-
क्तपीठपूजान्तं विधाय ऊमिति बीजेन मूर्त्तिं
संकल्प्य पुनर्ध्यात्वावाहनादिपञ्चपुष्पाञ्जलिदान-
पर्य्यन्तं विधायावरणपूजां कृत्वा धूपादिविसर्ज-
नान्तं कर्म्म समापयेत् । अस्य पुरश्चरणं
त्रिलक्षजपः । अयं चण्डेश्वरः ॥ ११ ॥ इति
तन्त्रसारे शिवमन्त्राः ॥*॥ विष्णुशिवयोर-
भेदो यथा,—

वराह उवाच ।

"शिवो मे दक्षिणे स्थाने तिष्ठते विगतज्वरः ।
लोकानां प्रवरः श्रेष्ठः सर्व्वलोकवरो हरः ॥
ये हि निन्दन्ति तं देवि ! नूनं मामेव निन्दति ।
ये मां निन्दति देवेशि ! ते निन्दन्ति शिवं परम् ॥
यत्र यत्र शिवस्तत्र शिवो यत्र वसुन्धरे ।
अहं तत्रापि तिष्ठामि चावयोर्नान्तरं क्वचित् ॥
शिवं यो वन्दते भूमे ! स हि मामेव वन्दते ।
लभते पुष्कलां सिद्धिमेवं यो वेत्ति तत्त्वतः ॥"

इति वाराहे मासधामन्दिरमाहात्म्यवर्णननामा-
ध्यायः ॥*॥ देवीविष्णुशिवानामभेदो यथा,—

"अयं नारायणो गौरी जगन्माता सनातनः ।
विभज्य संस्थितो देवः स्वात्मानं बहुधेश्वरः ॥
न मे विदुः परं तत्त्वं देवाद्या न महर्षयः ।
एकोऽयं वेद विश्वात्मा भवानी विष्णुरेव च ॥
अहं हि निष्क्रियः शान्तः केवलो निष्परिग्रहः ।
मामेव केशवं देवमाहुर्देवीमथाम्बिकाम् ॥"

इति कौर्म्मे १४ अध्यायः ॥*॥

शिवनिन्दानिषेधो यथा,—

"वरात् परतरं यान्ति नारादपरा जनाः ।
न ते तत्र गमिष्यन्ति ये द्विषन्ति महेश्वरम् ॥
ध्यानं होमस्तपस्तप्तं ज्ञानं यज्ञादिको विधिः
तेषां विनश्यति क्षिप्रं ये निन्दन्ति पिनाकिनम् ॥
यो मां समाश्रयेन्नित्यमेकान्तं भावमाश्रितः ।
विनिन्द्य देवमीशानं स याति नरकायुतम् ॥
तस्मात् सा परिहर्त्तव्या निन्दा पशुपतौ द्विजाः ।
कर्म्मणा मनसा वाचा तद्भक्तेष्वपि यत्नतः ॥"

इति कौर्म्मे २५ अध्यायः ॥*॥

तस्य प्रलयकारकत्वं यथा,—

"गते परार्द्धद्वितये काले लोकप्रकालनः ।
कालाग्निर्भस्मसात् कर्त्तुं करोति निखिलं मतिम् ॥
स्वात्मन्यात्मानमावेश्य भूत्वा देवो महेश्वरः ।
दहेदशेषं ब्रह्माण्डं सदेवासुरमानुषम् ॥
तमाविश्य महादेवो भगवान्नीललोहितः ।
करोति लोकसंहारं भीषणं लोकमाश्रितः ॥
प्रविश्य मण्डलं घोरं कृत्वासौ बहुधा पुनः ।
निर्दहत्यखिलं लोकं सप्तमूर्त्तिस्वरूपधृक् ॥
स दग्ध्वा सकलं सत्त्वमस्त्रं ब्रह्मशिरो महत् ।
देवतानां शरीरेषु क्षिपत्यखिलदाहकः ॥
दग्धेष्वशेषदेहेषु देवी गिरिवरात्मजा ।
एषा सा साक्षिणः शम्भोस्तिष्ठते वैदिकी श्रुतिः ॥
शिवः कपालैर्देवानां कृतस्रग्वरभूषणः ।
आदित्यचन्द्रादिगणैः पूरयन् व्योममण्डलम् ॥
सहस्रनयनो देवः सहस्राकृतिरीश्वरः ।
सहस्रहस्तचरणः सहस्रार्चिर्महाभुजः ॥
दंष्ट्राकरालवदनः प्रदीप्तानललोचनः ।
त्रिशूलं कृत्तिवसनो योगमैश्वरमास्थितः ॥
पीत्वा तत् परमानन्दं प्रभूतममृतं स्वकम् ।
करोति ताण्डवं देवमालोक्य परमेश्वरः ॥
पीत्वा नृत्यामृतं देवी भर्त्तुः परममङ्गला ।
योगमास्थाय देवस्य देहमायाति शूलिनः ॥
स भुक्त्वा ताण्डवरसं स्वेच्छयैव पिनाकधृक् ।
याति स्वभावं भगवान् दग्ध्वा ब्रह्माण्डमण्डलम् ॥
संस्थितेष्वथ देवेषु ब्रह्मविष्णुपिनाकिषु ।
गुणैरशेषैः पृथिवी विलयं याति वारिषु ॥
सवारितत्त्वं सगुणं ग्रसते हव्यवाहनः ।
तेजः स्वगुणसंयुक्तं वायौ संयाति संक्षयम् ॥
आकाशे सगुणो वायुः प्रलयं याति संक्षयम् ।
भूतादौ च तथाकाशं लीयते गुणसंयुतम् ॥
इन्द्रियाणि च सर्व्वाणि तैजसे यान्ति संक्षयम् ।
वैकारिके देवगणाः प्रलयं यान्ति सत्तमाः ॥
वैकारिकास्तैजसश्च भूतादिश्चेति सत्तमाः ।
त्रिविधोऽयमहङ्कारो महति प्रलयं व्रजेत् ॥
महान्तमेभिः सहितं ब्रह्माणममितौजसम् ।
अव्यक्तं जगतो योनिः संहरेदेकमव्ययः ॥
एवं संहृत्य भूतानि तत्त्वानि च महेश्वरः ।
वियोजयत्यथान्योन्यं प्रधानं पुरुषं परम् ॥
प्रधानपुंसोरजयोरेष संहार ईरितः ।
महेश्वरेच्छाजनितो न स्वयं विद्यते लयः ।
गुणसाम्यं तदव्यक्तं प्रकृतिः परिगीयते ।
प्रधानं जगतो योनिर्मायातत्त्वमचेतनम् ॥
कूटस्थश्चिन्मयो ह्यात्मा केवलः पञ्चविंशकः ।
गीयते मुनिभिः साक्षी महानेकः पितामहः ॥
एवं संहारकरणी शक्तिर्माहेश्वरी ध्रुवा ।
प्रधानाद्यं विशेषान्तं दहेद्रुद्र इति श्रुतिः ॥
योगिनामथ सर्व्वेषां ज्ञानविन्यस्तचेतसाम् ।
आत्यन्तिकञ्चैव लयं विदधातीह शङ्करः ॥"

इति कौर्म्मे उपरिविभागे ४२ अध्यायः ॥*॥

ब्रह्मविष्णुशिवानामभेदो यथा,—

श्रीभगवानुवाच ।

"न ब्रह्मा भवतो भिन्नो न शम्भुर्न मया तथा ।
न चाहं युवयोर्भिन्नो ह्यभिन्नत्वं सनातनम् ॥
प्रधानस्याप्रधानस्य भागाभागस्य रूपिणः ।
ज्योतिर्मयस्य भागो मे [illegible]
कस्त्वं कोऽहञ्च को ब्रह्मा [illegible]
भागत्रयमिदं भिन्नं सृष्टिस्थित्यन्तकारणम् ।
चिन्तयन् [illegible]
एकत्वे ब्रह्मवैकुण्ठशम्भूनां हृष्टं कुरु ।
शिरोग्रीवादिभेदेन यथैकस्य शरीरिणः ।
अङ्गानि मे तथैकस्य भागत्रयमिदं हर ।

यज्ज्योतिरमलं स्वपरप्रकाशं
कूटस्थमव्यक्तमनन्तरूपम् ।
नित्यञ्च दीर्घादिविशेषणाद्यै-
र्हीनं परं तत्र वयं न भिन्नाः ॥"

इति कालिकापुराणे ११ अध्यायः ।

अपि च ।

"ततो ब्रह्मा च शारीरं त्रिधा चक्रे
प्रधानेच्छावशाच्छम्भो त्रिगुणं [illegible]
तदूर्द्ध्वभागः संजातश्चतुर्वक्त्रश्चतुर्भुजः ।
पद्मकेशरगौराङ्गकायो ब्रह्मा महेश्वर ।
तन्मध्यभागो नीलाङ्ग एकवक्त्रश्चतुर्भुजः ।
शङ्खचक्रगदापद्मपाणिः कायः स वैष्णवः ।
अभवत्तदधोभागः पञ्चवक्त्रश्चतुर्भुजः ।
स्फटिकाभ्रसमः कायः शुक्लः स चन्द्रशे-
ईशस्ततो ब्रह्मकाये सृष्टिशक्तिं न्ययोजयत् ।
स्वयमेवाभवत् स्रष्टा ब्रह्मरूपेण लोकधृक् ।
स्थितिशक्तिं निजां मायां [illegible]
महेशो वैष्णवे काये ज्ञानशक्तिं निजां [illegible]
स्थितिकर्त्ता भवेद्विष्णुस्तदैव महेश्वर ।
सर्व्वशक्तिनियोगेन सदा तद्रूपता मम ।
अन्तशक्तिं तथा काये शाम्भवे सं[illegible]
अन्तकर्त्ता भवेच्छम्भुः स एव परमेश्वर ।
तत्तत्स्थेषु शरीरेषु स्वयमेव प्रकाशते ।
ज्ञानरूपं परं ज्योतिरनादिर्भगवान् प्रभुः ।
सृष्टिस्थित्यन्तकरणादेक एव महेश्वरः ।
ब्रह्मा विष्णुः शिवश्चेति [illegible]
अतस्त्वञ्च विधाता च तथाहमपि [illegible]
एवं शरीरं रूपञ्च ज्ञानमव्याकमन्तरम् ।

इति तत्रैव १२

मार्कण्डेय उवाच ।

"ततो ब्रह्माण्डसंस्थानं दर्शयामास शङ्करः
तदधो लोकराशिस्थ ब्रह्माण्डञ्च यथा पुरा ।
तन्मध्ये पद्मगर्भाभं ब्रह्माणं जगतः पतिम्
ज्योतीरूपं प्रकाशार्थं सृष्टार्थञ्च पृथग्गतम्
शरीरिणं स ददृशे ब्रह्माण्डान्तर्गतं मुहुः ।
चतुर्भुजं प्रकाशन्तं ज्योतिभि[illegible]
तत्रैव च त्रिधाभूतं वपुर्ब्राह्मं ददर्श च ।
ऊर्द्धमध्यान्तभागैस्तु ब्रह्मविष्णुशिवात्मकम् ।
अधोऽर्द्धभागो वपुषो ब्रह्मत्वमगमत्तदा ।
मध्यस्तदा विष्णुभूतो ददर्शास्य [illegible]
एकमेव शरीरन्तु त्रिधाभूतं मुहुर्मुहुः ।
हरो ददर्श स्वे गर्भे तथा सर्व्वमिदं जगत् ।
कदाचित् वैष्णवं कायं ब्राह्मे काये ददर्श [illegible]
ब्राह्मं तथा वैष्णवे च शाम्भवं वैष्णवे तथा ।

[illegible]

"... सार्द्धमयविग्रह ॥"

इति कालिकापुराणे ४८ अध्यायः ॥

अस्य विवाहो यथा,—

ईश्वर उवाच ।

"हिताय सर्व्वजगतां मयोमायामनस्तथा ।

दारान् यष्टुमिच्छामि तथा मम महर्षयः ॥

साहाय्यं तत्र कुर्व्वन्तु भवन्तो मम सांप्रतम् ।

मदर्थं तनयां कालीं याचन्तान्तु हिमाचलम् ॥

मार्कण्डेय उवाच ।

एवं सम्बोध्य मुनयो जगच्छन् गिरिराड्गृहम् ।

तेन संपूजितास्ते तु प्रोचुस्ते मुनयो गिरिम् ॥

यश्चन्द्रशेखरो देवो देवदेवश्च यो मतः ।

शापानुग्रहणे शक्तो य एको जगतां पतिः ॥

यः संहरति सर्व्वाणि जगन्ति प्रलयोद्भवे ।

यो विभूतिप्रदो भक्ते नानारूपो मनोहरः ॥

स ते दुहितरं कालीं भार्य्यामादातुमिच्छति ।

यदि पश्यसि त्वद्योग्य वरं त्वं दुहितुः समम् ।

तदा प्रयच्छ तनयां कालीं शशिभृते गिरे ॥

मार्कण्डेय उवाच ।

इत्युक्तस्तैर्गिरिपतिर्वरं यद्दयप्सितम् ।

दुहितुश्च प्रियं ज्ञात्वा प्राप्य मुदमगात्तदा ॥

दास्यामि शम्भवे पुत्रीं युष्माभिः प्रार्थितस्त्वहम् ।

पूर्व्वमेव तपस्याद्या तयेशः पतिरीहितः ॥

धातुर्नियोजनमिदं कोऽन्यथा कर्त्तुमर्हति ।

[illegible]

ततो देवाः सगन्धर्व्वाः सिद्धा विद्याधरोरगाः ।

विस्मयं परमं प्रापुर्हरं दृष्ट्वा तथाविधम् ।

हिमवान् मुदितश्चाभूत् सहपुत्रैश्च मेनया ।

ज्ञातयश्चास्य सुसुहृद्वर्ग दृष्ट्वा तथाविधम् ॥

दृष्ट्वा तथा तव जगौ हरं दृष्ट्वा मनोहरम् ॥

सर्व्वं शिवकरं यस्माद्रूपमाद्यस्याभवत् सुराः ।

तस्मात् शिवोऽयं लोकेषु नाश्मादन्योऽधिकः शिवः ॥

महेश्वरसमायुक्तमीदृशं यः पठेद्द्विजः ।

सततं तस्य कल्याणं वाञ्छितश्च भविष्यति ॥

एवं काली महामाया योगनिद्रा जगत्प्रसूः ।

पूर्व्वं दाक्षायणी भूत्वा पश्चात् गिरिसुताभवत् ।

स्वयं समर्थापि सती काली सम्मोहितुं हरम् ।

तथाप्युग्रं तपस्तेपे हिताय जगतां शिवा ।

एवं सम्मोहयामास कालिका चन्द्रशेखरम् ॥

इत्येतत् कथितं सर्वं त्वमर्द्दना सती यथा ।

[illegible]

निरामया नाम गणाः समायाता जगद्गुरौ ॥

सार्द्धहिंसाः पद्माक्षाः श्रीवत्साङ्कितवक्षसः ।

समायाताः खगारूढा वृषभध्वजिनोऽव्ययाः ॥

महापाशुपता नाम चक्रशूलधरास्तथा ।

भैरवो विष्णुना सार्द्धमभेदेनार्च्चितो हि यैः ॥

मृगेन्द्रवदनाः शूलबाणधनुर्धराः ।

गणास्त्वद्रोमसम्भूता वीरभद्रपुरोगमाः ॥

एते चान्ये च बहवः शतशोऽथ सहस्रशः ।

साहाय्यार्थं तवायाता यथाप्रीत्यादिशस्व तान् ।

ततोऽभ्येत्य गणाः सर्व्वे प्रणेमुर्वृषकेतनम् ॥"

इति वामनपुराणे ६४ अध्यायः ॥

अस्य लिङ्गपूजादि शिवलिङ्गशब्दे द्रष्टव्यम् ॥

अस्मात् कोचविहारदेशीयराजवंशोत्पत्तिर्यथा,

श्रीदेव्युवाच ।

"देवेश परमेशान सर्व्वज्ञ सर्वपूजित ।

क्व गच्छसि सुदुर्नाथ कृपया वद शङ्कर ॥

ज्येष्ठाषाढ़योर्दिवादण्डा यथा।

रविवारे	शू ४	च ६	व ६	च ६	व ४	मा २	शू २।		
सोमवारे	व ८	च ४	शू ६	व ८	शू ४।				
मङ्गलवारे	च ६	शू ४	च ६	व ६	मा २	च २	मा २	शू २।	
बुधवारे	शू २	व ४	च ८	व ६	च ८	शू २।			
गुरुवारे	मा २	शू २	व ६	मा ४	शू ४	व ६	च ६।		
शुक्रवारे	शू २	मा २	व ६	मा २	शू ४	च ६	व ४	शू ४।	
शनिवारे	मा २	शू २	व ६	मा ६	शू ४	व ४	च ६।		

तत्र रात्रिदण्डा यथा।

रविवारे	च ४	शू ४	व ४	च ६	व ८	शू ४।			
सोमवारे	व ८	च ८	शू ४	च ४	शू २	मा २	शू २।		
मङ्गलवारे	च २	व ४	मा ४	शू ४	व २	च ६	शू २	व ६।	
बुधवारे	च १०	शू २	व ४	च ४	शू १०।				
गुरुवारे	शू २	च ६	शू २	व ४	शू २	च ६	शू ४	च ४।	
शुक्रवारे	च ६	शू २	व ४	शू ६	च ६	शू २	च ४।		
शनिवारे	शू २	च २	व ८	शू २	च ६	शू ४	च ६।		

मतान्तरे अस्य प्रमाणं यथा,—
"माहेन्द्रे विजयो नित्यं अमृते कार्य्यशोभनम्।
चक्रे कार्य्यविलम्बः स्याच्छून्ये च मरणं ध्रुवम्॥
वैशाखादिश्रावणान्तं एकभावेन संवहेत्।
अमृतादि दिवारात्रौ चतुर्मासं यथाक्रमम्॥
याममानं दिवामाने ज्ञेयं सर्व्वत्र मासके।
तत्प्रमाणेन ग्राह्यं दण्डमानं विचक्षणैः।
रात्रिमानप्रमाणेन ज्ञेयो दण्डप्रमाणकः॥
न वारतिथिनक्षत्रं न योगकरणं तथा।
शिवज्ञानं समासाद्य सर्व्वं मुनिर्विचारयेत्॥"
तथा।
"भाद्रादिमार्गपर्य्यन्तं अमकारं समादिशेत्।
शून्यचक्रादियोगं हि पौषादिचैत्रमस्तथा॥"
इति ज्योतिषे शिवज्ञानम्॥०॥
अनेकप्रकारं शिवज्ञानं शिवांशा शिवालिखितं
अस्मत्पटौ च दृष्टं किन्तु परस्परमैक्यं जातम्॥
शिवतातिः, स्त्री, कल्याणकारिणी। इति हेम-
चन्द्रः॥ अस्य पर्य्यायः शिवङ्करशब्दे द्रष्टव्यः॥
शिवदत्तं, क्ली, (शिवेन दत्तम्।) विष्णुचक्रम्।
इति केचित्॥ शिवेन शिवाय वा दत्तं द्रव्य-
मात्रञ्च॥
शिवदारु, क्ली, (शिवस्य दारु।) देवदारुवृक्षः।
इति राजनिर्घण्टः॥
शिवदूतिका, स्त्री, (शिवदूती + स्वार्थे कन्।)
मातृकाविशेषः। इति शब्दरत्नावली॥
शिवदूती, स्त्री, (शिवेन दूतयति सन्देशं प्रापयती-
त्यर्थे दूत + णिच् + पचाद्यच्। यद्वा, शिवो दूतो
यस्याः। गौरादित्वाद्वा ङीष्।) दुर्गा॥
इति त्रिकाण्डशेषः॥ योगिनीविशेषः। यथा,
"ब्रह्माणी प्रथमा प्रोक्ता ततो माहेश्वरी परा।
कौमारी वैष्णवी चैव वाराही पञ्चमी तथा॥
नारसिंही तथैन्द्री शिवदूती तथाष्टमी।
एताः पूज्या महामाया योगिन्यः काम-
दायिनीः॥"

तस्या उत्पत्तिमन्त्रध्यानादि यथा,—
"कौषिक्या हृदयाद्देवी निःसृता ध्यानतो
हरेः।
शिवदूतीति विख्याता शिवायतसुसंहता॥
मन्त्रमस्याः प्रवक्ष्यामि धर्म्मकामार्थदायकम्।
यत् श्रुत्वा साधको याति दुर्लभं शिवमन्दिरम्॥
येनाराध्य महादेवीं शिवदूतीं शिवात्मिकाम्।
न चिराल्लभते कामान्नरः सर्व्वजयो भवेत्॥
अन्तःससामिसङ्घितो बिन्दिन्दुभ्यां दशावरा।
स्वरेण पान्त्यदन्त्येन संसृष्टोऽन्ते न पूर्वगः॥
स एव बिन्दुयुगलपूर्वस्योपान्त्यपावकः।
षष्ठस्वरकलाशून्यैः संहितः प्रथमस्थितः॥
मन्त्रोऽयं शिवदूत्यास्तु शिवदूतीजयप्रदः।
रूपमस्याः प्रवक्ष्यामि शृणु वत्सक सम्मतम्॥
चतुर्भुजं महाकाय सिन्दूरसदृशद्युतिम्।
रक्तदन्तं मुण्डमालाजटाजूटार्द्धचन्द्रधृक्॥
नागकुण्डलहाराभ्यां शोभितं नखरोज्ज्वलम्।
व्याघ्रचर्म्मपरीधानं दक्षिणे शूलचक्रधृक्॥
वामे पाशं तथा चर्म्म बिभ्रद्दूर्द्धं परिक्रमात्।
स्थूलवक्त्रञ्च पीनोष्ठं तुङ्गमूर्त्तिं भयङ्करम्॥
निक्षिप्य दक्षिणं पादं सन्तिष्ठेत् कुणपोपरि।
वामपादं शृगालस्य पृष्ठे फेरुशतैर्वृतम्॥
ईदृशं शिवदूत्यास्तु मूर्त्तिं ध्यायेद्विभूतये।
ध्यानमात्रादस्येतस्या नरः कल्याणमाप्नुयात्॥
पूजनादचिराद्देवी सर्व्वान् कामान् ददाति च।
यः शिवाशिवत श्रुत्वा शिवदूतीं शिवप्रदाम्।
प्रणमेत् साधको भक्त्या तस्य कामाः करे
स्थिताः॥
यदा जघान जगतां रक्तबीजं हिताय वै।
महादेवी महामाया तदास्याः कायतः सृता॥
दूतं प्रस्थापयामास शिवं यस्मात् साम्बिका।
तेन सा शिवदूतीति देवैः सर्व्वैः प्रगीयते॥
क्षेमङ्करी च शान्ता च वेदमाता महोदरी।
कराला कामदा देवी भगास्या भगमालिनी॥

भगोदरी भगाहारा भगजिह्वा भगा तथा।
एता द्वादश योगिन्यः पूजने परिकीर्त्तिताः।
एता द्वादश योगिन्यः शिवदूत्याः सदैव हि।
विचरन्ति स्वयं देवी यत्र यत्रैव गच्छति॥"
इति [illegible]
प्रमाणान्तरं वामने ५२ अध्याये मार्कण्डेय-
पुराणे देवीमाहात्म्ये रक्तबीजवधाध्याये च
द्रष्टव्यम्॥
शिवद्रुमः, पुं, (शिवप्रियो द्रुमः।) बिल्ववृक्षः।
इति राजनिर्घण्टः॥
शिवद्विष्टा, स्त्री, (शिवेन द्विष्टा [illegible]
त्वात्।) केतकी। इति राजनिर्घण्टः॥
शिवधातुः, पुं, (शिवस्य धातुः।) पारदः।
पारदं शिववीर्य्यं स्यादिति दर्शनात्। गोद-
मणिः। इति केचित्॥
शिवनाभिः, पुं, (शिवस्य नाभिरिव।) [illegible]
विशेषः। यथा,—
"उत्तमं मध्यमधमं त्रिविधं लिङ्गमीरितम्।
चतुरङ्गुलमुत्सेधे रम्यवेदिकमुत्तमम्॥
उत्तमं लिङ्गमाख्यातं मुनिभिः शास्त्रकोविदैः।
तदर्द्धं मध्यमं प्रोक्तं तदर्द्धमधमं स्मृतम्॥
शिवनाभिमयं लिङ्गं प्रतिपूज्य महर्षिभिः।
श्रेष्ठञ्च सर्व्वलिङ्गेभ्यस्तस्मात् पूज्यं विधानतः॥"
इति [illegible]
शिवपुरी, स्त्री, (शिवस्य पुरी।) काशी। इति
हेमचन्द्रः॥
शिवप्रियं, क्ली, (शिवस्य प्रियम्।) रुद्रा-
क्षम्। इति राजनिर्घण्टः॥ शिवस्य प्रियद्रव्ये
त्रि॥
शिवप्रियः, पुं, (शिवस्य प्रियः।) बकवृक्षः। इति
जटाधरः॥ स्फटिकः। धुस्तूरः। इति राज-
निर्घण्टः॥
शिवप्रिया, स्त्री, (शिवस्य प्रिया।) दुर्गा। इति
शब्दमाला॥

[शि]वमल्लक:, पुं, अर्ज्जुनवृक्ष:। इति राज-निर्घण्ट: ॥
[शि]वमल्लिका, स्त्री, (शिवप्रिया मल्लिका।) वकवृक्ष:। इति राजनिर्घण्ट: ॥
[शि]वमल्ली, स्त्री, (शिवप्रिया मल्ली।) वकवृक्ष:। इत्यमर: ॥
[शि]वरस:, पुं, वाहात् पर्य्युषितरस:। तत्पर्य्याय:। धान्याम्लम्। धन्योदकम्: २। अस्य गुणा:। दीपनत्वम्। मधुरत्वम्। अम्लत्वम्। अस्थगूढाहृत्वम्। लघुत्वपथ्यत्वञ्च। इति राजनिर्घण्ट: ॥
[शि]वरात्रि:, स्त्री, (शिवप्रिया रात्रि:।) शिव-चतुर्द्दशी। यथा, कालमाधवीये स्कान्दे नागर-खण्डम्।
"माघमासस्य शेषे या प्रथमे फाल्गुणस्य च। कृष्णा चतुर्द्दशी सा तु शिवरात्रि: प्रकीर्त्तिता ॥"
अत्रैकस्यामेव तिथेर्म्माघीयत्वफाल्गुनीयत्वे मुख्य-गौणवृत्तिभ्यां अविरुद्धे। तत्रस्तु माघ्यनन्तरा चतुर्द्दशी शिवरात्रि: तस्यामुपवास: प्रधानम्।
"न स्नानेन न वस्त्रेन न धूपेन न चार्च्चया। तुष्यामि न तथा पुष्पैर्यथा तत्रोपवासत: ॥"
इति शङ्करोक्ते: ॥१॥
स्कान्दे।
"ततो रात्रौ प्रकर्त्तव्यं शिवप्रीणनतत्पर:। प्रहरे प्रहरे स्नानं पूजाञ्चैव विशेषत: ॥"
अत्र वीप्सया प्रहरचतुष्टयसाध्यं व्रतं प्रतीयते नरसिंहाचार्य्यधृतेश्वरसंहितायाम्।
"शैवो वा वैष्णवो वापि यो वा स्यादन्यपूजक:। सर्व्वं पूजाफलं हन्ति शिवरात्रिबहिर्म्मुख: ॥२॥
संवत्सरप्रदीपे।
"दुग्धेन प्रथमं स्नानं दध्ना चैव द्वितीयके। तृतीये च तथाज्येन चतुर्थे मधुना तथा ॥"
ईशानसंहितायाम्।
"माघे कृष्णचतुर्द्दश्यां रविवारो यदा भवेत्। भौमो वापि भवेद्देवि कर्त्तव्यं व्रतमुत्तमम् ॥ शिवयोगस्य योगेन तद्भवेदुत्तमोत्तमम्। शिवरात्रिव्रतं नाम सर्व्वपापप्रणाशनम्। आचाण्डालमनुष्याणां भुक्तिमुक्तिप्रदायकम् ॥"
नागरखण्डे।
"उपवासप्रभावेण बलादपि च जागरात्। शिवरात्रेस्तथा तस्य लिङ्गस्यापि प्रपूजया। अक्षयान् लभते लोकान् शिवसायुज्यमाप्नुयात् ॥"
पाद्मे।
"वर्षे वर्षे महादेवि नरो नारी पतिव्रता। शिवरात्रौ महादेवं कामं भक्त्या प्रपूजयेत् ॥"
ईशानसंहितायाम्
"एवमेव व्रतं कुर्य्यात् प्रति संवत्सरं व्रती। द्वादशाब्दिकमेतद्धि चतुर्व्विंशाब्दिकं तथा। सर्व्वान् कामानवाप्नोति प्रेत्य चेह च मानव: ॥"
हेमाद्रिधृता स्मृति:।
"प्रदोषव्यापिनी ग्राह्या शिवरात्रिचतुर्द्दशी ॥"
प्रदोषमाह वत्स:।
"प्रदोषोऽस्तमयादूर्द्धं घटिकाद्वयमिष्यते ॥"

अर्द्धमनन्तरम्। वायुपुराणे।
"त्रयोदश्यस्तगे सूर्य्ये चतसृष्वपि नाडिषु। भूतविद्धा तु या तत्र शिवरात्रिव्रतञ्चरेत् ॥"
ईशानसंहितायाम्।
"माघे कृष्णचतुर्द्दश्यामादिदेवो महानिशि। शिवलिङ्गतयोद्भूत: कोटिसूर्य्यसमप्रभ: ॥ तत्कालव्यापिनी ग्राह्या शिवरात्रिव्रते तिथि:। अर्द्धरात्रादधश्चोर्द्धं युक्ता यत्र चतुर्द्दशी ॥ व्याप्ता सा दृश्यते यस्यां तस्यां कुर्य्यात् व्रतं नर: ॥"
अत्र।
"महानिशा द्वे घटिके रात्रमध्यमयामयो: ॥"
इति देवलोक्ता महानिशा ग्राह्या ॥ घटिका एकदण्ड:। एवञ्च यद्दिने प्रदोषनिशीथो-भयव्यापिनी चतुर्द्दशी तद्दिने व्रतं उभय-व्याप्त्यनुरोधात्। कालमाधवीयेऽप्येवम्। एतेन परदिने उभयव्यापित्वेऽपि पूर्व्वदिवसीयरात्रि-द्वितीययामप्रभृतिचतुर्द्दशीसत्त्वे बहुप्रहरव्या-पित्वेन पूर्व्वदिन एव व्रतमिति निरस्तम्। यदा तु पूर्व्वद्युर्निशीथमात्रव्याप्ति: परेद्यु: प्रदोष-मात्रव्याप्तिस्तदा पूर्व्वद्युर्व्रतम्। प्रधानकाल-व्याप्त्यनुरोधात्।
"पूर्व्वद्युरपरेद्युर्व्वा महानिशि चतुर्द्दशी। व्याप्ता सा दृश्यते यस्यां तस्यां कुर्य्याद्व्रतं नर: ॥"
इतीशानसंहितावचनाच्च ॥
एतद्विषय एव भविष्यपुराणम्।
"अर्द्धरात्रात् पुरस्तात्तु जयायोगो भवेद्यदि। पूर्व्वविद्धैव कर्त्तव्या शिवरात्रि: शिवप्रियै: ॥"
विष्णुधर्म्मोत्तरे।
"जयन्ती शिवरात्रिश्च कार्य्ये भद्रजयान्विते। कृत्वोपवासं तिथ्यन्ते तदा कुर्य्याच्च पारणम् ॥"
तिथ्यन्ते पारणं जयन्तीमात्रपरं अत्र चतुर्द्दश्या-मेव तत्।
"ब्रह्माण्डोदरमध्ये तु यानि तीर्थानि सन्ति वै पूजितानि भवन्तीह भूतायां पारणे कृते ॥"
इति स्कान्दात्।
"दिनमानप्रमाणेन या तु रात्रौ चतुर्द्दशी। शिवरात्रिस्तु सा ज्ञेया चतुर्द्दश्यान्तु पारणम् ॥"
इति गौतमीयाच्च।
यदा तु पूर्व्वदिने न निशीथव्याप्ति: परदिने प्रदोषमात्रव्यापिनी तदा परा ग्राह्या। प्रदोष-व्यापिनीति प्रागुक्तत्वात् तिथेस्त्रिसन्ध्यव्यापि-त्वाच्च। एतद्विषय एव लिङ्गपुराणम्
"शिवरात्रिव्रते भूतां कामविद्धां विवर्ज्जयेत्। एकेनैवोपवासेन ब्रह्महत्यां व्यपोहति ॥"
अत्रामावास्यायामेव पारणम्।
"शिवा घोरा तथा प्रेता सावित्री च चतुर्द्दशी। कुहूयुक्तैव कर्त्तव्या कुह्वामेव हि पारणम् ॥"
इति वचनात् ॥३॥
तदयं संक्षेप:। यद्दिने प्रदोषनिशीथोभय-

व्यापिनी चतुर्द्दशी तद्दिने व्रतम्। यदा तु पूर्व्व-द्युर्निशीथव्यापिनी परेद्यु: प्रदोषमात्रव्यापिनी तदा पूर्व्वद्युर्व्रतम्। यदा तु न पूर्व्वद्युर्निशीथ-व्याप्ति: परेद्यु: प्रदोषव्यापिनी तदा परदिने। पारणन्तु परदिने चतुर्द्दशीलाभे चतुर्द्दश्यां तद-लाभे अमावस्यायाम्। तत्र प्रयोग: ॥४॥
प्रातरुदङ्मुख: तत् सदित्युच्चार्य्य सूर्य्य: सोम इति पठित्वा जलादीन्यादाय सङ्कल्पयेत्।
"सङ्कल्पानेन गृह्णीयाच्छिवधर्मं भक्तिमान्नर:। शिवरात्रिव्रतं ह्येतत् करिष्येऽहं महाफलम्। निर्व्विघ्नमस्तु मे चात्र त्वत्प्रसादाज्जगत्पते ॥"
इति शिवरहस्यात् शिवरात्रि इत्यादिना नियम्य।
"चतुर्द्दश्यां निराहारो भूत्वा शम्भो परेऽहनि भोक्ष्येऽहं भुक्तिमुक्त्यर्थं शरणं मे भवेश्वर ॥"
इति गरुड़पुराणीयं पठेत्।
रात्रौ प्रथमप्रहरे प्रतिष्ठिते लिङ्गे अप्रतिष्ठिते वा प्रतिष्ठां विधाय पूजां कुर्य्यात्। ह्रौं अस्त्राय फड़िति पादघातत्रयेण विघ्नान्नि:सार्य्य तेनैव तालत्रयेण करच्छोटिकया च दशदिग्बन्धनं कृत्वा भूतशुद्धिं विधाय ह्रां हृदयाय नम इत्या-दिना षड़ङ्गानि न्यस्य ह्रौं इति मन्त्रेण प्राणा-यामं विधाय पूजयेत्। पार्थिवलिङ्गे चेत्तदा वक्ष्यमाणपूजाविधिना पूजयेत्। तत्रायं विशेष: ह्रौं ईशानाय नम इति प्रथमप्रहरे दुग्धेन स्नापयित्वा पुनर्ज्जलेन स्नापयित्वा।
"शिवरात्रिव्रतं देव पूजाजपपरायण:। करोमि विधिवद्दत्तं गृहाणार्घ्यं महेश्वर ॥"
इत्यनेनार्घ्यं दत्त्वा गन्धादिभि: संपूज्य मूलमन्त्रं जपित्वा प्रणम्य गीतनृत्यादिभिस्तं प्रहरं नयेत् ॥
"तद्ध्यानं तज्जप: स्नानं तत्कथाश्रवणादिकम्। उपवासकृतो ह्येते गुणा: प्रोक्ता मनीषिभि: ॥"
इति देवीपुराणे सामान्यत: श्रवणात् अत्रापि तथा ॥५॥ द्वितीयप्रहरे तु विशेष:। ह्रौं अघोराय नम इति दध्ना स्नानम्। अर्घ्यमन्त्रस्तु ॥
"नम: शिवाय शान्ताय सर्व्वपापहराय च। शिवरात्रौ ददाम्यर्घ्यं प्रसीद उमया सह ॥"६॥
तृतीयप्रहरे तु। ह्रौं वामदेवाय नम इति घृतेन स्नानम्। अर्घ्यमन्त्रस्तु।
"दु:खदारिद्र्यशोकेन दग्धोऽहं पार्व्वतीश्वर। शिवरात्रौ ददाम्यर्घ्यमुमाकान्त गृहाण मे ॥७॥
चतुर्थप्रहरे तु। ह्रौं सद्योजाताय नम इति मधुना स्नानम्। अर्घ्यमन्त्रस्तु।
"मया कृतान्यनेकानि पापानि हर शङ्कर। शिवरात्रौ ददाम्यर्घ्यं उमाकान्त गृहाण मे ॥"
ततो नम: शिवाय इति मूलमन्त्रं जपित्वा प्रभातेऽविघ्नेन इत्यादिवक्ष्यमाणमन्त्रान् पठेत् ॥
तथा च गरुड़पुराणम्।
"मूलमन्त्रं ततो जप्त्वा प्रभाते तत् समापयेत्। अविघ्नेन व्रतं देव त्वत्प्रसादात् समर्पितं क्षमस्व जगतां नाथ त्रैलोक्याधिपते यन्मयाद्य कृतं पुण्यं त

त्वत्प्रसादान्मया देव व्रतमद्य समर्पितम् ।
प्रसन्नो भव मे श्रीमन् सद्गतिं प्रतिपद्यताम् ।
त्वदालोकनमात्रेण पवित्रोऽस्मि न संशयः ॥"
परदिने ब्राह्मणान् भोजयित्वा चतुर्दशीलाभे तत्र तदलाभे अमावस्यायां पारणं कुर्यात् । तत्र मन्त्रः ।
"संसारक्लेशदग्धस्य व्रतेनानेन शङ्कर ।
प्रसीद सुमुखो नाथ ज्ञानदृष्टिप्रदो भव ॥"*॥
तत्र पार्थिवशिवलिङ्गपूजाविधिः । तत्र शिववाक्यं स्कान्दे ।
"विप्रस्य तु सदैवाहं शुचेरप्यशुचेरपि ।
गृह्णन् बलिं प्रहृष्यामि विप्राणामिव दर्शनात् ॥"
बलिं पूजाम् । तथा,
"शूद्रः कर्माणि यो नित्यं स्वीयानि कुरुते प्रिये ।
तस्याहमर्च्चां गृह्णामि चन्द्रखण्डविभूषिते ॥"
तथा,
"प्रणवोक्तेन शिवेनैव स्त्रीणां पूजा विधीयते ॥"
एवकारेण प्रणवनिवृत्तिः । एवं शूद्रस्यापि । तथा नृसिंहतापनीये । "सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्रीशूद्रयोर्नेच्छन्ति । सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्री शूद्रो यदि जानीयात् स मृतोऽधो गच्छति इति ।" नेच्छन्ति पर्य्यन्तं पराशरभाष्येऽपि लिखितम् । गोविन्दभट्टधृतम् ।
"स्वाहाप्रणवसंयुक्तं शूद्रे मन्त्रं ददद्द्विजः ।
शूद्रो निरयमाप्नोति ब्राह्मणः शूद्रतामियात् ॥"
गौतमः ।
"रात्रावुदङ्मुखः कुर्य्यात् दैवकार्य्यं सदैव हि ।
शिवार्च्चनं सदाप्येवं शुचिः कुर्य्यादुदङ्मुखः ॥"
सदा दिवारात्रौ । अत्र हेतुमाह रुद्रयामले ।
"न प्राचीमग्रतः शम्भोर्नोदीचीं शक्तिसंस्थिताम् ।
न प्रतीचीं यतः पृष्ठमतो दक्षं समाश्रयेत् ॥"
यजमानः शम्भोः प्राचीमवस्थितये न समाश्रयेत् शम्भोर्जगत्संहारकत्वादतः साम्मुख्यात् पञ्चवक्त्रपक्षे प्रधानं वक्त्रं प्राच्यवस्थितम् ॥ एकवक्त्रपक्षे सुतरां तथा । तद्रूपमाह भविष्यपुराणम् ।
"सौम्यं सौमीन्दुधवलं वरदं एकवक्त्रं चतुर्भुजम्
शिवरूपं स्वहं कुर्य्यात् प्रासादे वाप्यनिन्दितम् ॥"
प्रासादे पूजानिषेधात् देवार्थे तस्य वाप्यर्थे प्राचीं मोक्षा गुरुकर्मः । इत्यस्य न विषयः । [illegible] प्राची प्राच्या । एतदनुसारात्त्वमात्रपूर्व्वासाम्मैव्यतपूजा । यतः ... तन्त्रान्तरम् ।
"यत्रैव भागस्तु शिवस्य देति
प्राचीति तां वेदविदो वदन्ति ।
तथा पुरः पूजकतुल्यदेश
उदाहरन्तः परदर्शिनस्ताम् ॥"
एतत् देवतान्तरपूजा पूर्व्वाह्णे प्राङ्मुखेन सायं पश्चिमाभिमुखेन रात्रावुदङ्मुखेन कार्य्या ।
"प्राक्पश्चिमोदगास्यस्तु प्रातः सायं निशासु च ॥"
इति वचनात् ॥
इति वाचस्पतिमिश्राः । नैवं पूजा रत्नाकरोक्तभविष्यपुराणीयसप्ताचरसूर्य्यमन्त्रप्रस्ताव एव प्रागादिदिङ्नियमाभिधानात् । व्यवहारोऽपि अत्र न तथेति ॥ * ॥ लिङ्गपुराणे ।
"विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया ।
पूजितोऽपि महादेवो न स्यात्तस्य फलप्रदः ।
तस्मान्मृदापि कर्त्तव्यं ललाटेऽपि त्रिपुण्ड्रकम् ॥"
नन्दिपुराणे ।
"आयुष्मान् बलवान् श्रीमान् पुत्रवान् धनवान् सुखी ।
वरमिष्टं लभेल्लिङ्गं पार्थिवं यः समार्च्चयेत् ।
तस्मात्तु पार्थिवं लिङ्गं ज्ञेयं सर्व्वार्थसाधकम् ॥"
भविष्ये ।
"स्वक्षगोशकृत्पिण्डं ताम्रकांस्यमयं तथा ।
कृत्वा लिङ्गं सकृत् पूज्य वसेत् कल्पायुतं दिवि ॥
वार्क्षं वित्तप्रदं लिङ्गं स्फाटिकं सर्व्वकामदम् ।
नर्म्मदागिरिजं श्रेष्ठमन्यदपि हि लिङ्गवत् ॥"
लिङ्गवत् लिङ्गाकारम् । कालकौमुद्याम् ।
"अङ्गुष्ठादल्पपरीमाणं न लिङ्गं कुत्रचिन्नरः ।
कुर्व्वीताङ्गुष्ठतो ह्रस्वं न कदाचित् समाचरेत् ॥"
अत्रोऽशीतिरक्तिका । अङ्गुष्ठः ह्रस्वपर्व्वग्रन्थितः ।
"अङ्गुष्ठाङ्गुलिमानन्तु यत्र यत्रोपदिश्यते ।
तत्र तत्र बृहत्पर्व्वग्रन्थिभिर्मिनुयात् सदा ॥"
इति छन्दोगपरिशिष्टात् ॥
शिवधर्म्मे ।
"सहस्रमर्च्चयेल्लिङ्गं निरयं स न गच्छति ।
रुद्रलोकमवाप्नोति भुक्त्वा भोगाननुत्तमान् ॥"
तथा ।
"वालुकानि च लिङ्गानि सहस्राणि च कारयेत्
सहस्रमर्च्चनात् सोऽपि लभते वाञ्छितं फलम् ॥"
ततश्चामुकतिथावारभ्यामुकफलाभकामः सहस्रमितपार्थिवशिवलिङ्गपूजनमिति यथास्थाने वाक्ये देयम् ॥ * ॥ ब्रह्मपुराणे ।
"यावन्न दीयते चार्घ्यं भास्कराय निवेदितम् ।
तावन्न पूजयेद्विष्णुं शङ्करं वा महेश्वरीम् ॥"
राघवभट्टधृतम् ।
"सर्व्वेषां प्रशस्तोऽर्कः शिवसूर्य्यार्च्चनं विना ॥"
अर्कः शङ्खः । अग्निपुराणे ।
"तल्लिङ्गैः पूजयेन्मन्त्रैः सर्व्वदेवान् पृथक्पृथक् ।
ध्यात्वा प्रणवपूर्व्वन्तु तन्नाम्ना सुसमाहितः ।
नमस्कारेण मन्त्रेण पुष्पाणि विन्यसेत् पृथक् ॥"
देवीपुराणे ।
"मृदाहरणसंघट्टप्रतिष्ठाह्वानमेव च ।
स्नपनं पूजनञ्चैव विसर्जनमतः परम् ॥
हरो महेश्वरश्चैव शूलपाणिः पिनाकधृक् ।
पशुपतिः शिवश्चैव महादेव इति क्रमात् ॥"
अथ पूर्व्वोक्तमृत्कर्म्माणि पशुपतेर्नामभिः क्रियानुरूपविभक्तिमद्भिर्यथायथं कार्य्याणि ।
क्रमादेव आवाहनात् प्राक् प्रतिष्ठा कुशासनदानवत् ॥*॥ तत्रानुष्ठानम् ।
नम इति मृदाहरणम् । महेश्वराय नम संघट्टनम् । शूलपाणे इह सुप्रतिष्ठितो भव प्रतिष्ठा । ध्यायेन्नित्यमित्यादिना ... इहागच्छ इत्याद्यावाहनम् ।
इति स्नपनम् । एतत् पाद्यं नम.
एवमर्घ्यादिना पूजयेत् । विसर्जनात्
भविष्यपुराणोक्त
दिक्षु वामावर्त्तेन पूजनम् । यथा ।
क्षितिमूर्त्तये नमः । भवाय ...
रुद्राय अग्निमूर्त्तये नमः । उग्राय ...
नमः । भीमाय आकाशमूर्त्तये नमः ।
यजमानमूर्त्तये नमः ।
नमः । ईशानाय सूर्य्यमूर्त्तये नमः ।
"मूर्त्तयोऽष्टौ शिवस्यैताः पूर्व्वादिक्रमयोगतः ।
आग्नेय्यन्ताः प्रपूज्यास्ता येषां लिङ्गे शिव... यजेत् ।
ततो महादेव क्षमस्व इति संहारमुद्रया विसर्जयेत् ॥ * ॥ नन्दिपुराणे ।
"गोभूतिलहिरण्यादिबलिपुष्पनिवेदनैः ।
ओं यो नमः शिवायेति मन्त्रः
सर्व्वमन्त्राधिकस्तथायमोङ्काराद्यः षडक्षरः ।
तन्मन्त्रजापी तत्कर्म्मरतस्तद्गतमानसः ।
निष्कामः पुरुषो राजन् स रुद्रपदमश्नुते ॥"
भविष्ये पञ्चाक्षरमुपक्रम्य ।
"अपवित्रः पवित्रो वा सर्व्वावस्थो
महापातकयुक्तो वा मन्त्रस्यास्य जपे यदा ।
अधिकारी भवेत् सर्व्व ...
इति तथेत्यर्थः ॥ पूर्व्वोक्तयथापदानुरोधात् तेन यथाधिकारी भवेत्तथाब्रवीदित्यर्थः ।
"सर्व्वेषामेव पात्राणां परं पात्रं महेश्वरः ।
पतन्तं त्रायते यस्मादतीव नरकार्णवात् ।
शिवमुद्दिश्य यद्दत्तं सर्व्वकारणकारणम् ।
तदनन्तफलं दातुर्भवतीह किमद्भुतम् ।
दत्त्वा नैवेद्यवस्त्रादि नाददीत कदाचन ।
त्यक्तस्य शिवमुद्दिश्य तदादाने न तत्फलम् ।
आदाने अघ्नवे । शिवधर्म्मे ।
"तस्मात् पुष्पैः फलैः पत्रैस्तोयैरपि ...
तदनन्तफलं ज्ञेयं भक्तिरेवात्र कारणम् ॥"
भविष्ये ।
"लिङ्गानुलेपनं कार्य्यं दिव्यगन्धैः सुगन्धिभिः
वर्षकोटिशतं दिव्यं शिवलोके महीयते ॥"
शिवधर्म्मे ।
"तस्मात् पुष्पप्रदानेन लिङ्गेषु प्रतिमासु च ।
अशीतिवर्षकोटीनां दुर्गतिं न नरो व्रजेत् ।
स्कान्दे ।
"शुष्काण्यपि च पत्राणि श्रीवृक्षस्य सदैव हि
दातव्यानीति शेषः । भविष्ये ।
"धुस्तूरकैश्च यो लिङ्गं सकृत् पूजयते नरः ।
स गोसहस्रफलं प्राप्य शिवलोके महीयते ॥"

यत्रैरखण्डेश यो लिङ्गं पूजयेत् सकृत्।
पापैर्विनिर्मुक्तः शिवलोके महीयते ॥"
।
र्वकामप्रदं विल्वं दारिद्र्यस्य प्रणाशनम्।
त्रपत्रात् परं नास्ति येन तुष्यति शङ्करः ॥"
।
कीटापविद्धानि निशि पर्य्युषितानि च।
पतितपुष्पाणि त्यजेदुपहतानि च ॥"
।
दारुमसितञ्च सर्ज्जश्रीवासकुन्दुरम्।
फलं चाज्यमिश्रन्तु दत्त्वाप्नोति परां गतिम्"
: शालरसः। श्रीवासः सरलद्रवः। कुन्दुरः
यम्।
य: सौगन्धिकं धूपं षट्सहस्रगुणोत्तरम्।
रं शतसाहस्रं द्विगुणञ्चासितागुरुम्।
गुलुं घृतसंयुक्तं साक्षात् गृह्णाति शङ्करः ॥"
।
लेनापि हि यो दद्यात् घृताभावेन मानवः।
दीपप्रदानेन शिववद्भ्राजते भुवि ॥"
न्देकेश्वरे।
य भक्त्या शिवं पूज्य नैवेद्यमुपकल्पयेत्।
यदेवात्मनः श्रेयस्तत्तदीशाय कल्पयेत् ॥"
लितण्डुलप्रस्थस्य कुर्य्यादन्नं सुसंस्कृतम्।
वाय तं चरुं दद्यात् चतुर्दश्यां विशेषतः ॥"
प्रमाणं प्रागुक्तम्। शिवसर्व्वस्वे स्कान्दम्।
माम्रफलं पक्वं यः शम्भोर्विनिवेदयेत्।
ाग्नामयुतं भोगैः क्रीडते स शिवे पुरे ॥
मोचाफलं पक्वं यः शिवाय निवेदयेत्।
लक्षं तथाभोगैः शिवलोके महीयते ॥"
द्मपुराणे।
वेद्यं घृतसंयुक्तं मधुपर्कं निवेदयेत्।
ग्निष्टोमस्य यज्ञस्य फलमाप्नोति मानवः ॥"
वसर्व्वस्वे स्कान्दम्।
परिपक्वं सुसंस्पृष्टमाज्यमिश्रं सुसंस्कृतम्।
शाय मांसं दत्त्वा तु शृणु यत् फलमाप्नुयात्॥
शेषफलदानेन यत् फलं परिकीर्त्तितम्।
त् फलं प्राप्नुयान्नित्यं सर्व्वं मांसनिवेदनात् ॥"
वधर्म्मे।
लिङ्गवेदी भवेद्देवी लिङ्गं साक्षात् महेश्वरः।
योः संपूजनात् स्यातां देवी देवश्च पूजितौ ॥"
र्वापुराणे।
मस्य दक्षिणतोऽसव्यं प्रणामं नैव लङ्घयेत्।
कोभूतमना दक्षे यः कुर्य्यात् किः प्रदक्षिणम्।
दक्ष्णेन मदधस्थेन तस्य पुनरुद्भवः ॥"
रविष्ये।
जानुभ्यां चैव पाणिभ्यां शिरसा च विचक्षणः।
त्वा प्रणामं देवेशि सर्व्वान् कामानवाप्नुयात्॥"
लिङ्गपुराणे।
गन्धपुष्पनमस्कारैर्मुखवाद्यैश्च सर्व्वशः।
ो मासमर्च्चयेत् तत्र तदा तुष्टाम्यहं सदा ॥"
महाभारते।
'सर्व्वलक्षणहीनोऽपि युक्तो वा सर्व्वपातकैः।

सर्व्वं तरति तत् पापं भावयन् शिवमात्मना।
राघवभट्टधृतम्।
"अधोमुखे वामहस्ते ऊर्द्धास्यं दक्षहस्तकम्।
क्षिप्राङ्गुलीरङ्गुलीभिः संगृह्य परिवर्त्तयेत्।
प्रोक्ता संहारमुद्रेयमर्पणे तु प्रशस्यते ॥"
अर्पणे आत्मनीति शेषः। स्कान्दे।
"निर्म्माल्यं यो हि मद्भक्त्या शिरसा धारयिष्यति।
अशुचिर्भिन्नमर्य्यादो नरः पापसमन्वितः ॥
नरके पच्यते घोरे तिर्य्यग्योनौ च जायते।
ब्रह्महापि शुचिर्भूत्वा निर्म्माल्यं यस्तु धारयेत्
तस्य पापं महच्छीघ्रं नाशयिष्ये महाव्रते ॥"
शुचिः स्नानादिनेति शेषः। एवञ्च।
"स्पृष्ट्वा रुद्रस्य निर्म्माल्यं सवासा आप्लुतः शुचिः ॥"

इति कालिकापुराणीयमशुचिविषयम्।
अनुपनीतविषयमिति श्रीदत्तः। बह्वृचगृह्यपरिशिष्टम्।
"अग्राह्यं शिवनैवेद्यं पत्रं पुष्पं फलं जलम्।
शालग्रामशिलास्पर्शात् सर्व्वं याति पवित्रताम्॥"
कालिकापुराणे।
"यो यद्देवार्च्चनरतः स तन्नैवेद्यभक्षकः।
केवलं सौरशैवे तु वैष्णवो नैव भक्षयेत् ॥"

इति तिथ्यादितत्त्वम् ॥७॥

अन्यच्च।

ब्रह्मोवाच।

"शिवरात्रिव्रतं वक्ष्ये कथाञ्च सर्व्वकामदाम्।
यथा च गौरी भूतेशं पृच्छति स्म परं व्रतम् ॥

श्रीमहादेव उवाच।

माघफाल्गुनयोर्म्मध्ये या च कृष्णा चतुर्दशी।
तस्यां जागरणाद्रुद्रः पूजितो भुक्तिमुक्तिदः ॥
कामयुक्तो हरः पूज्यो द्वादश्यामिव केशवः।
उपोषितैः पूजितः सन्नरकात्तारयेत्तथा ॥
निषादस्यार्व्वुदे राजा पापी सुन्दरसेनकः।
स कुक्कुरैः संयुक्तो मृगान् हन्तुं वनं गतः ॥
मृगादिकमसंप्राप्य क्षुत्पिपासार्द्दितो गिरौ।
रात्रौ तडागतीरे स निकुञ्जे जाग्रदास्थितः ॥
तत्रास्ति लिङ्गं स्वं रक्षञ्छरीरं चालिपत्रतः।
पर्णानि पातयन्मूर्द्ध्नि लिङ्गस्यैवं न जानतः ॥
तेन धूलिनिरोधाय क्षिप्तं नीरञ्च लिङ्गके।
शरः प्रमादेनैकस्तु प्रच्युतः करपल्लवात् ॥
जानुभ्यामवनौ गत्वा लिङ्गं स्पृष्ट्वा गृहीतवान्
एवं स्नानं स्पर्शनञ्च पूजनं जागरोऽभवत् ॥
प्रातर्गृहागतो भार्य्यादत्तान्नं भुक्तवान् स च।
काले मृतो यमभटैः पाशैर्बद्धा तु नीयते ॥
तदा मम गणैर्युद्धे जित्वा मुक्तीकृतः स च।
कुक्कुरेण सहैवाभूद्गणो मम गतशोकमनाः ॥
एवमज्ञानतः पुण्यं ज्ञानात् पुण्यमथाक्षयम्।
त्रयोदश्यां शिवं पूज्य कुर्व्वीत नियमं व्रती ॥
प्रातर्देव चतुर्द्दश्यां जागरिष्याम्यहं निशि।
पूजां दानं जपं होमं करिष्याम्यात्मशक्तितः।
चतुर्द्दश्यां निराहारो भूत्वा शम्भो परेऽहनि।

भोक्ष्येऽहं भुक्तिमुक्त्यर्थं शरणं मे भवेश्वर ॥
पञ्चगव्यामृतैः स्नात्वा अन्तकाले गुरुं स्थितः।
ॐ नमो नमः शिवाय गन्धाद्यैः पूजयेद्धरम् ॥
तिलतण्डुलव्रीहींश्च जुहुयात् सघृतं चरुम्।
हुत्वा पूर्णाहुतिं दद्यात् शृणुयाद्गीतसत्कथाम् ॥
अर्द्धरात्रे त्रियामे च चतुर्थे च पुनर्यजेत्।
मूलमन्त्रं तथा जप्त्वा प्रभाते च क्षमापयेत् ॥
अविघ्नेन व्रतं देव त्वत्प्रसादात् समर्पितम्।
क्षमस्व जगतां नाथ त्रैलोक्याधिपते शिव ॥
यन्मयाद्य कृतं पुण्यं तच्छिवस्य निवेदितम्।
त्वत्प्रसादान्मया देव व्रतमद्य समर्पितम् ॥
प्रसन्नो भव मे श्रीमन् मद्गृहं प्रतिगम्यताम्।
तदालोकनमात्रेण पवित्रोऽस्मि न संशयः।
भोजयेद्ध्यानमिष्टांश्च वस्त्रच्छत्रादिकं ददेत् ॥
देवादिदेव भूतेश लोकानुग्रहकारक।
यन्मया श्रद्धया दत्तं प्रीयतां तेन मे प्रभुः ॥
इति क्षमाप्य च यतीन् कुर्य्यात् द्वादशवार्षिकम्
कीर्त्तिश्रीपुत्त्रराज्यादि प्राप्य शैवं पुरं व्रजेत् ॥
द्वादशस्वपि मासेषु प्रकुर्य्यादिह जागरम्।
यतीन् द्वादश संपूज्य दीपदः स्वर्गमाप्नुयात् ॥"
इति गारुड़े शिवरात्रिव्रतकथा १२४ अध्यायः॥

शिवलिङ्गं, क्ली, (शिवस्य लिङ्गम्।) महादेवस्य शेफः। तस्योत्पत्तिर्यथा,—
"तत्रापि गत्वा मदनो ददर्श हृषकेतनम्।
दृष्ट्वा प्रहर्त्तुकामोऽस्य ततः स प्राद्रवद्धरः ॥
ततो दारुवनं घोरं मदनाभिद्रुतो हरः।
विवेश ऋषयो यत्र सपत्नीका व्यवस्थिताः ॥
ते चापि ऋषयः सर्व्वे दृष्ट्वा मूर्द्ध्ना नताभवन्।
ततस्तान् प्राह भगवान् भिक्षां मे प्रतिदीयताम्
ततस्ते मौनिनस्तस्थुः सर्व्व एव महर्षयः।
तदाश्रमाणि पुण्यानि परिचक्राम नारद ! ॥
तं प्रविष्टं तदा दृष्ट्वा भार्गवात्रेययोषितः।
प्रक्षोभमगमन् सर्व्वा हीनसत्त्वाः समन्ततः ॥
ऋते त्वरुन्धतीमेकामनसूयाञ्च भाविनीम्।
एताभ्यां भर्तृपूजासु कृतं वै सुस्थिरं मनः ॥
ततः संक्षुभिताः सर्व्वा यत्र याति महेश्वरः।
तत्र प्रयान्ति कामार्त्ता मदविह्वलितेन्द्रियाः ॥
त्यक्त्वाश्रमाणि शून्यानि स्थानि ता मुनियोषितः।
अनुजग्मुर्यथा मत्तं करिण्य इव कुञ्जरम् ॥
ततस्तु ऋषयो दृष्ट्वा भार्गवाङ्गिरसो मुने।
क्रोधान्विताब्रुवन् सर्व्वे लिङ्गोऽस्य पततां भुवि।
ततः पपात देवस्य लिङ्गं पृथ्वीं विदारयत्।
अन्तर्द्धानं जगामाथ त्रिशूली नीललोहितः ॥
ततस्तत्पतितं लिङ्गं विभिद्य वसुधातलम्।
रसातलं विवेशाशु ब्रह्माण्डं चोर्द्धतोऽभिनत् ॥
ततश्चचाल पृथिवी गिरयः सरितो नगाः।
पातालभुवनाः सर्व्वे जङ्गमाजङ्गमाः स्थिताः ॥
संक्षुब्धान् भुवनान् दृष्ट्वा भूर्लोकादीन् पितामहः।
जगाम माधवं द्रष्टुं क्षीरोदं नाम सागरम् ॥
तत्र दृष्ट्वा हृषीकेशं [illegible] च भक्तितः।
उवाच देव भुवना[illegible] क्षुभिता विभो ॥

अथोवाच हरिर्ब्रह्मन् शर्व्वं लिङ्गं महर्षिभिः ।
पातितस्तस्य भारार्त्ता सञ्चचाल वसुन्धरा ॥
ततस्तदद्भुतमयं श्रुत्वा देवः पितामहः ।
तत्र गच्छामि देवेश एवमाह पुनः पुनः ॥
ततः पितामहो देवः केशवश्च जगत्पतिः ।
आजगाम तमुद्देशं यत्र लिङ्गं भवस्य तत् ॥
ततोऽनन्तं हरिर्लिङ्गं दृष्ट्वारुह्य खगेश्वरम् ।
पातालं प्रविवेशाथ विस्मयात्त्वरितो विभुः ॥
ब्रह्मा पद्मविमानेन ऊर्द्ध्वमाक्रम्य सर्व्वगः ।
नैवान्तमलभद्ब्रह्मा विस्मितः पुनरागतः ॥
विष्णुर्गत्वाथ पातालं सप्तलोकपरायणः ।
चक्रपाणिर्विनिष्क्रान्तो लेभेऽन्तं न महामुने ॥
विष्णुं पितामहश्चाह हरिर्ब्रह्माणमाह च ।
नमोऽस्तु ते शूलपाणे नमोऽस्तु वृषभध्वज ।
जीमूतवाहन कवे सर्व्व त्र्यम्बक शङ्कर ॥
महेश्वर हरेशान सुवर्णाक्ष वृषाकपे ।
दक्षयज्ञक्षयकर काल रुद्र नमोऽस्तु ते ॥
त्वमादिरस्य जगतस्त्वं मध्यं परमेश्वरः ।
भवानन्तश्च भगवान् सर्व्वगस्त्वं नमोऽस्तु ते ॥

पुलस्त्य उवाच ।

एवं संस्तूयमानस्तु तस्मिन् दारुवने हरः ।
स्वरूपी तावदिदं वाक्यमुवाच वदतां वरः ॥

हर उवाच ।

किमर्थं देवतानाथौ परिभूतक्रममन्त्विह ।
मां स्तुवाते भृशासुस्थं कामतापितविग्रहम् ॥

देवावूचतुः ।

तवाङ्गपातितं लिङ्गं यदेतद्भुवि शङ्कर ।
एतत् प्रगृह्यतां भूयस्ततो देव वदावहे ॥

हर उवाच ।

यद्यर्च्चयन्ति त्रिदशा मम लिङ्गं सुरोत्तमौ ।
तदेतत् प्रतिगृह्णीयात् नान्यथेति कथञ्चन ॥
ततः प्रोवाच भगवानेवमस्त्विति केशवः ॥
ब्रह्मा स्वयञ्च जग्राह लिङ्गं कनकपिङ्गलम् ।
ततश्चकार भगवांश्चातुर्वर्ण्यं हरार्च्चने ॥
शास्त्राणि चैषां मुख्यानि नानोक्तिविदितानि च ।
आद्यं शैवं परिख्यातमन्यत् पाशुपतं मुने ॥
तृतीयं कालवदनं चतुर्थञ्च कपालिनम् ।
शैव आसीत् स्वयं शक्तिर्वशिष्ठस्य प्रियः सुतः ॥
तस्य शिष्यो बभूवाथ गोपायन इति श्रुतः ।
महापाशुपतश्चासीद्भारद्वाजस्तपोधनः ॥
तस्य शिष्योऽप्यभूद्राजा ऋषभः सोमकेश्वरः ।
कालास्यो भगवानासीदापस्तम्बस्तपोधनः ॥
तस्य शिष्यो वभो वैश्यो नाम्ना क्राथेश्वरो मुने ।
महाव्रती च धनदस्तस्य शिष्यश्च वीर्य्यवान् ॥
कर्णोदर इति ख्यातो जात्या शूद्रो महातपाः ।
एवं स भगवान् ब्रह्मा पूजनाय शिवस्य च ॥
कृत्वा तु चातुराश्रम्यं स्वमेव भवनं गतः ।
गते ब्रह्मणि शर्व्वोऽपि तत् संहृत्य तं तदा ॥
लिङ्गं चित्रवने सूक्ष्मं प्रतिष्ठाप्य चचार ह ॥"
इति वामनपुराणे ६ अध्यायः ॥

अपि च ।
"ततः सृष्टिं चिन्तयतो ब्रह्मणो मोहितस्य च ।
वालिखिल्याः समुत्पन्नास्तपस्तप्तं समारभन् ॥
दिव्यं वर्षसहस्रं वै तेपुस्ते दुश्चरं तपः ।
ततः कालेन महता पार्व्वती च पतिव्रता ॥
तेषां तपः समालोक्य चाति देवी सुदुःखिता ।
प्रसाद्य देवदेवेशं शङ्करं प्राह सुव्रता ॥
क्लिश्यन्ति वालिखिल्याश्च प्रसादार्थं तव प्रभो ।
एतेभ्योऽपि प्रियं देव विधिवत् कुरु सेवया ॥
तच्छ्रुत्वा वचनं देव्याः पिनाकी परचित्तकः ।
प्रोवाच कान्ते कालश्च वचनं प्रियया सह ॥
न वेत्सि देवि तत्त्वेन धर्म्मस्य गहना गतिः ।
नैते धर्म्मं विजानन्ति यथार्थं धर्म्मचारिणः ॥
न दास्यामि वरं तेभ्यो यस्मात्ते मूढहृदयाः ।
एतत् श्रुत्वाब्रवीत् देवी मा मैवं शंसितव्रताः ॥
ततो रुद्र उवाचेदं देवीं देवः स्मिताननः ।
तिष्ठ त्वमत्र यास्यामि यत्रैते मुनिसत्तमाः ॥
इत्युक्ता तु ततो देवी शङ्करेण महात्मना ।
गच्छस्वेत्याह मुदिता भर्त्तारं भुवनेश्वरी ॥
यत्र ते मुनयः सर्व्वे काष्ठलोष्टसमन्विताः ।
तान् विलोक्य ततो देवो नग्नः सर्व्वाङ्गसुन्दरः ॥
वनमालाकृतापीड़ो युवा भिक्षाकपालभृत् ।
आश्रमे पर्य्यटन् भिक्षां मुनीनां नियतात्मनाम् ॥
देहि भिक्षां ततश्चोक्त्वा स ह्याश्रमाश्रमं ययौ ।
तं विलोक्याश्रमगतं योषितो ब्रह्मवादिनाम् ॥
सकौतुकस्वभावेन तस्य रूपेण मोहिताः ।
प्रोचुः परस्परं कार्य्यमस्ति पश्याम भिक्षुकम् ॥
परस्परमितीयोक्त्वा गृह्य मूलफलं बहु ।
गृहाण भिक्षामूचुस्तास्तं देवं मुनियोषितः ॥
तस्मै दत्त्वैव तां भिक्षां पप्रच्छुस्ताः स्मरातुराः ।

नार्य्य ऊचुः ।

कोऽसौ नाम व्रतविधिस्त्वया तापस सेव्यते ।
यत्र नग्नेन लिङ्गेन वनमालाविभूषितः ॥
भवान् वै तापसो हृद्यो हृद्याः स्मो यदि मन्यसे ।
इत्युक्तस्तापसस्ताभिः प्रोवाच हसिताननः ॥
इदं मम व्रतं किञ्चिन्न रहस्यं प्रकाश्यते ।
शृण्वन्ति बहवो यत्र तत्र तन्न विद्यते ॥
तस्य व्रतस्य सुभगा इति मत्वा भविष्यथ ।
एवमुक्तास्तदा तेन ताः प्रत्यूचुस्तदा मुनिम् ॥
ततोऽभ्येत्य गमिष्यामो मुने नः कौतुकं महत् ।
इत्युक्त्वा तास्तदा तत्र जगृहुः पाणिपल्लवैः ॥
काचित्कण्ठे बाहुभ्यां काचित् कामपरा तथा
जानुभ्यामपरा नाभ्यां कचेषु ललनापरा ॥
अपरा तु कटीबन्धे चापरा पादयोरपि ।
क्षोभं विलोक्य मुनय आश्रमेषु स्वयोषिताम् ॥
हन्यतामिति सम्भाष्य काष्ठपाषाणपाणयः ।
पातयन्ति च देवस्य लिङ्गमुद्बुध्य भीषणम् ॥
पातिते तु ततो लिङ्गे गतोऽन्तर्द्धानमीश्वरः ।
देव्या स भगवान् रुद्रः कैलासं नगमाश्रितः ॥
पतिते देवदेवस्य लिङ्गे नष्टे चराचरे ।
क्षोभो बभूव सुमहानृषीणां भावितात्मनाम् ॥

उवाचैको मुनिवरस्तत्र बुद्धिमतां व
विरिञ्चिं शरणं यामः स हि ज्ञास्य

एवमुक्त्वा सर्व्व एव ऋषयो लज्जित
ब्रह्मणः सदनं जग्मुर्देवैः सह त्रिदशै

ऋषय ऊचुः ।

अस्माभिश्च कृतं ब्रह्मन्नस्माभिर्ज्ञानदु
तस्योपशमने यत्नं कुरु सर्व्वोपका

ब्रह्मोवाच ।

गच्छामः शरणं देवं ...
प्रसादाद्देवदेवस्य भविष्यथ यथा पु
इत्युक्त्वा ब्रह्मणा सार्द्धं कैलासं गिरि
ददृशुस्ते समासीनमुमया सहितं
ततः स्तोतुं समारब्धो ब्रह्मा लोक
अनन्ताय नमस्तुभ्यं वरदाय पिना
एवं स्तुतो महादेवो ब्रह्मणा ऋषि
उवाच मां मा व्रजतु लिङ्गं भोः पु
क्रियतां मद्वचः शीघ्रं येन मे प्रीति
भविष्यति प्रकटा या लिङ्गस्यात्र न
ये लिङ्गं पूजयिष्यन्ति मम भक्तिस
न तेषां दुर्लभं किञ्चित् भविष्यति

इति वामने ४२

कुरुक्षेत्रस्थितानि लिङ्गानि यथा,

सनत्कुमार उवाच ।

"वटस्य दक्षिणे भागे चक्रतीर्थं प्र
स्थाणोर्वटस्य पूर्व्वेण मम तीर्थं प्र
स्थाणोर्वटस्योत्तरतस्तीर्थं गाणेश्वरं
स्थाणोर्वटस्य पश्चिमतः स्कन्दतीर्थं प्र
इमानि पुण्यतीर्थानि मध्ये रुद्रवट
महादेवं समभ्यर्च्य प्राप्नोति परम प
वटस्य चोत्तरे पार्श्वे तक्षकेण महात्म
प्रतिष्ठितं महालिङ्गं सर्व्वकामप्रद
वटस्य पूर्व्वदिग्भागे विश्वकर्म्मकृतं
लिङ्गं प्रत्यङ्मुखं दृष्ट्वा सिद्धिमाप्नो
तत्रैव लिङ्गरूपेण संस्थिता या सर
तां प्रणम्य प्रयत्नेन बुद्धिं मेधाञ्च वि
वटपार्श्वस्थितं लिङ्गं ब्रह्मणा तत् प्र
दृष्ट्वा वटेश्वरं देवं प्रयाति परमं पद
ततः स्थाणुवटं दृष्ट्वा कृत्वा चापि प्र
प्रदक्षिणीकृता तेन सप्त द्वीपा वसु
स्थाणोः पश्चिमदिग्भागे नकुलीशो

तमभ्यर्च्य प्रयत्नेन सर्व्वपापैः प्रमु
तस्य दक्षिणदिग्भागे तीर्थं रुद्राक
तस्मिन् स्नातः सर्व्वतीर्थस्नातो भवे
तस्य चोत्तरदिग्भागे रावणेन महा
प्रतिष्ठितं महालिङ्गं गोकर्णं नाम
आषाढ़मासे या कृष्णा भविष्यति
तस्यां पश्यति गोकर्णं तस्य पुण्यफल
कामतोऽकामतो वापि यत् पाप

ादिन्कर्न पापात् पूजयित्वा हरं शुचिः ।
ादसहस्रवर्षेण यत् पुन्यं प्राप्यते नरैः ।
पुन्यं सकलं तेषामष्टम्यां योऽर्च्चयेच्छिवम्
ध्वेत् परमं रूपं सौभाग्यं धनसम्पदम् ।
ाशिखरमाहात्म्यात् सिध्यते नात्र संशयः ॥
। चोत्तरदिग्भागे लिङ्गपूजां विभीषणः ।
ास्यामरत्वं च वाञ्छयित्वा बभूव ह ॥
पादस्य तु मासस्य शुक्ला या चाष्टमी
भवेत् ।
शम्पूज्य सोपवासस्तु अमरत्वमवाप्नुयात् ॥
ंच पूजितं लिङ्गं तस्मिन् स्थाने द्विजोत्तम ।
ायित्वा प्रयत्नेन सर्वकाममवाप्नुयात् ॥
ान्दिशिराश्चैव तत्र पूज्य महेश्वरम् ।
ाभिलषितान् कामानवापतुर्मुदान्वितौ ॥
े मासि सिते पक्षे यो नरस्तत्र पूजयेत् ।
यतौ वरदौ देवौ प्रयच्छेतां हि वाञ्छितम् ॥
ानीवटस्य पूर्व्वेण हस्तिपादेश्वरः स्थितः ।
दृष्ट्वा मुच्यते पापैरन्यजन्मसमुद्भवैः ॥
य दक्षिणतो लिङ्गं हारीतस्य ऋषेः
स्थितम् ।
प्रणम्य प्रयत्नेन सिद्धिमाप्नोति मानवः ॥
य दक्षिणपार्श्वे तु हारितस्य महात्मनः ।
ङ्गं त्रैलोक्यविख्यातं सर्व्वपापहरं शिवम् ॥
हान्तरूपिणा चापि रुद्रेणाशु महात्मना ।
तिष्ठितं महालिङ्गं सर्व्वपापविनाशनम् ॥
क्तिमुक्तिप्रदं प्रोक्तं सर्वकिल्बिषनाशनम् ।
ल्लिङ्गस्पर्शनादेव अग्निष्टोमफलं लभेत् ॥
स्य पश्चिमदिग्भागे लिङ्गं सिद्धप्रतिष्ठितम् ।
द्धेश्वरं भुवि ख्यातं सर्व्वसिद्धिप्रदायकम् ॥
दर्शनात् पूजनाच्च सर्व्वसिद्धिं हि विन्दति ।
स्य दक्षिणदिग्भागे मृकण्डेन महात्मना ॥
तिष्ठितं यत्तु लिङ्गं दर्शनात् सिद्धिदायकम् ।
स्य पूर्व्वे च दिग्भागे आदित्येन महात्मना ॥
तिष्ठितं लिङ्गवरं सर्व्वकिल्बिषनाशनम् ।
चित्राङ्गदस्तु गन्धर्व्वो रम्भा चाप्सरसां वरा ॥
परस्परं सानुरागौ स्थाणुदर्शनकाङ्क्षिणौ ।
दृष्ट्वा स्थाणुं पूजयित्वा सानुरागौ परस्परम् ॥
प्रागम्य वरदं देवं प्रतिष्ठाप्य महेश्वरम् ।
चित्राङ्गदेश्वरं दृष्ट्वा तथा रम्भेश्वरं द्विज ॥
सुभगो दर्शनीयश्च कुले जन्म समाप्नुयात् ।
तस्य दक्षिणतो लिङ्गं शक्रेण स्थापितं पुरा ॥
तस्य प्रसादात् सम्प्राप्तं मनसा चिन्तितं फलम् ।
पराशरेण मुनिना तथैवाराध्य शङ्करम् ॥
प्राप्तं कवित्वं परमं दर्शनाच्छङ्करस्य च ।
वेदव्यासेन मुनिना चाराध्य परमेश्वरम् ॥
सर्व्वज्ञत्वं ब्रह्मज्ञानं प्राप्तं देवप्रसादतः ।
स्थाणोः पश्चिमदिग्भागे वायुना जगदायुना ॥
प्रतिष्ठितं महालिङ्गं दर्शनात् पापनाशनम् ।
तस्यापि दक्षिणे भागे लिङ्गं हैमवतेश्वरम् ॥
प्रतिष्ठितं पुण्यकृता दर्शनात् सिद्धिदायकम् ।
तस्यापि पश्चिमे भागे कार्त्तवीर्य्येण स्थापितम् ॥
लिङ्गं पापहरं सद्यो दर्शनात् पुण्यमाप्नुयात् ।

तस्याप्युत्तरदिग्भागे तस्याग्रे स्थापितं पुनः ॥
आराध्य हनुमांश्चाप सिद्धिं देवप्रसादतः ।
तस्यैव पूर्व्वदिग्भागे विष्णुना प्रभविष्णुना ॥
आराध्य वरदं देवं चक्रं लब्धं सुदर्शनम् ।
तस्यापि पूर्व्वदिग्भागे इन्द्रेण वरुणेन च ॥
प्रतिष्ठितौ लिङ्गवरौ सर्व्वकामप्रदायकौ ।
एतानि मुनिभिः सांख्यैरादित्यैर्वसुभिस्तथा ॥
सेवितानि प्रयत्नेन सर्व्वपापहराणि वै ।
स्थाणुलिङ्गस्य परितः ऋषिभिस्तत्त्वदर्शिभिः ॥
प्रतिष्ठितानि लिङ्गानि येषां संख्या न विद्यते ।
तथाष्टुत्तरतश्च यावदोघवती नदी ॥
सहस्रमेकं लिङ्गानां देवपश्चिमतः स्थितम् ।
तस्यापि पूर्व्वदिग्भागे बालिखिल्यैर्महर्षिभिः ॥
प्रतिष्ठिता रुद्रकोटिर्यावत् सन्निहितं सरः ।
दक्षिणेन तु देवस्य गन्धर्व्वैर्यक्षकिन्नरैः ॥
प्रतिष्ठितानि लिङ्गानि तेषां संख्या न विद्यते ।
तिस्रः कोट्योऽर्द्धकोटी च लिङ्गानां वायुरब्रवीत् ॥
असंख्याताः सहस्राणि ये रुद्राः स्थाणु-
माश्रिताः ।
एतज्ज्ञात्वा श्रद्धधानः स्थाणुलिङ्गं समाश्रयेत् ॥
यस्य प्रसादात् प्राप्नोति मनसा चिन्तितं फलम्
अकामो वा सकामो वा प्रविष्ट स्थाणु-
मन्दिरम् ॥
विमुक्तः पातकैर्घोरैः प्राप्नोति परमं पदम् ।
चैत्रमासे त्रयोदश्यां दिने पुष्यतमे शुभे ॥
प्रतिष्ठितं स्थाणुलिङ्गं ब्रह्मणा लोकधारिणा ।
ऋषिभिर्देवसंघैश्च पूजितं शाश्वतीः समाः ॥
तस्मिन् काले निराहारा मानवाः श्रद्धया-
न्विताः ।
पूजयन्ति शिवं ये वै ते यान्ति परमं पदम् ॥
स्थाणुतीर्थमिदं ज्ञात्वा ये कुर्व्वन्ति प्रदक्षिणम् ।
प्रदक्षिणीकृता तैस्तु सप्तद्वीपा वसुन्धरा ॥"
इति वामनपुराणे ४३ अध्यायः ॥७॥
एकगृहे लिङ्गद्वयार्च्चननिषेधो यथा,—
"गेहे लिङ्गद्वयं नार्च्यं शालग्रामद्वयं तथा ।
द्वे चक्रे द्वारकायास्तु नार्च्ये सूर्य्यद्वयं तथा ॥"
तन्निर्म्माल्यभक्षणविधिनिषेधौ यथा,—
"अभक्ष्यं शिवनिर्म्माल्यं पत्रं पुष्पं फलं जलम् ।
शालग्रामशिलायोगात् पावनं तद्भवेत् सदा ॥"
इति वाराहे रौप्यसौवर्णाद्यास्थापननामा-
ध्यायः ॥७॥ लिङ्गपूजां विनान्यपूजाकरणनिषेधो
यथा,—
"लिङ्गपूजां विना देवि! अन्यपूजां करोति यः
विफला तस्य पूजा स्यादन्ते नरकमाप्नुयात् ।
तस्माल्लिङ्गं महेशानि प्रथमं परिपूजयेत् ॥"८॥
तत्पूजनप्रशंसा यथा,—
"यद्राष्ट्रं लिङ्गपूजायां रहितं सततं प्रिये ।
तद्राष्ट्रं पतितं मन्ये विष्ठाभूमिसमं स्मृतम् ॥
ब्रह्मक्षत्रियविट् देवि यदि लिङ्गं न पूजयेत् ।
तत्क्षणात् परमेशानि व्रजेच्चाण्डालतां व्रजेत् ॥
शूद्रश्च परमेशानि सदा शूकरवत् प्रिये ।
पूजयेत् परमेशानि चत्वारो ब्राह्मणादयः ॥

शिवार्च्चनन्तु पूजासु यद्गृहे वर्ज्जितं सदा ।
विष्ठागर्त्तसमं देवि तद्गृहं विद्धि पार्व्वति ॥
शाक्तो वा वैष्णवो वापि शैवो वा परमेश्वरि ।
आदौ लिङ्ग समभ्यर्च्य विल्वपत्रैर्वरानने ॥
पश्चादन्यं महेशानि शिवं प्राप्य प्रपूजयेत् ।
शिवपूजां विना देवि ! अन्यपूजां करोति यः ॥
स एव रसनाहीनः कुम्भीरो जायते प्रिये ।
निर्म्माय पार्थिवं लिङ्गं रुद्रं संहाररूपिणम् ॥
आशुतोषं महादेवं शङ्करं वृषभध्वजम् ।
निर्म्माय पार्थिवं लिङ्गं विधिवत् पूजयेत्
शिवम् ॥
शिवपूजा महेशानि यद्गृहे सततं प्रिये ।
काशीपुरं महेशानि तद्गृहं वरवर्णिनि ।
शिवलिङ्गं प्रपूज्याथ सर्व्वपूजाफलं लभेत् ॥"७॥
चतुर्विधलिङ्गं यथा,—
"चतुर्द्धा पार्थिवं लिङ्गं मृत्स्नाभेदेन पार्व्वति ।
शुक्लं रक्तं तथा पीतं कृष्णञ्च परमेश्वरि ॥
शुक्लन्तु ब्राह्मणे शस्तं क्षत्रिये रक्तमिष्यते ।
हरितं वैश्यजातौ तु कृष्णं शूद्रे प्रकीर्त्तितम् ।
चन्दनञ्च महेशानि सर्व्वजातिषु शस्यते ॥"
इति लिङ्गार्च्चनतन्त्रे १।२।३ पटलाः ॥८॥
अस्य पञ्चवक्त्राणि यथा,—
"तत् सर्व्वं शृणु चार्व्वङ्गि पार्थिवस्य मुखं प्रिये ।
विभाव्य मुखपद्मं हि शिवस्य वरवर्णिनि ॥
सद्योजातं वामदेवमघोरञ्च ततः परम् ।
तत्पुरुषं तथेशानं पञ्चवक्त्रं प्रकीर्त्तितम् ॥
सद्योजातञ्च वै शुक्लं शुद्धस्फटिकसन्निभम् ।
पीतवर्णं तथा सौम्यं वामदेवं मनोहरम् ॥
कृष्णवर्णमघोरञ्च समं भीमविवर्द्धनम् ।
रक्तं तत्पुरुषं देवं दिव्यमूर्त्तिमनोहरम् ॥
श्यामलञ्च तथेशानं सर्व्वदेवशिवात्मकम् ।
चिन्तयेत् पश्चिमे चाद्यं द्वितीयन्तु तथोत्तरे ॥
अघोरं दक्षिणे देवं पूर्व्वे तत्पुरुषं तथा ।
ईशानं मध्यतो ध्येयं चिन्तयेत् भक्तितत्परः ॥"
इति तत्रैव ६ पटलः ॥८॥
अस्य पूजायां मुखवाद्यकरणावश्यकत्वं यथा,
"संपूज्य पार्थिवं लिङ्गं परं ब्रह्म स्वयं प्रिये ।
ततस्तु लिङ्गकवचं पठित्वा कमलानने ॥
मुखवाद्यं सनृत्यं हि कृत्वा तु परमेश्वरि ।
मातृकामन्त्रसहितं मुखवाद्यं सुदुर्लभम् ॥
अकारादिक्षकारान्तं अनुलोमविलोमतः ।
उच्चार्य्य परमेशानि मुखवाद्यं शुचिस्मिते ॥
सबिन्दुवर्णमुच्चार्य्य पञ्चाशन्मातृकां प्रिये ।
अनुलोमविलोमेन सर्व्वं च वरानने ॥
अनेनैव विधानेन मुखवाद्यं करोति यः ।
स सिद्धः सगणः सोऽपि स शिवो नात्र संशयः ॥
मृत्युञ्जयोऽहं देवेशि मुखवाद्यप्रसादतः ।
यस्मिन् काले महेशानि असुरो बलवद्भवेत् ॥
तस्मिन् काले महेशानि मुखवाद्यं करोम्यहम्
तत् श्रुत्वा परमेशानि असुरा राक्षसाश्च ये ॥
पलायन्ते महेशानि तत् श्रुत्वा परमेश्वरि ।
ये नरा भुवि तिष्ठन्ति मुखवाद्यं विना प्रिये ॥

स सर्व्वयातनाभोगी अन्ते कुम्भिरतां व्रजेत् ॥"
इति च तत्रैव ८ पटलः ॥*॥
अस्य निर्म्माल्यभोजनदोषकारणं यथा,—
देव्युवाच ।
"दुर्लभं तव निर्म्माल्यं ब्रह्मादीनां कृपानिधे ।
तत्कथं परमेशान निर्म्माल्यं तव दूषितम् ॥
ईश्वर उवाच ।
मध्यस्थानस्थितं यत्तु तन्मुखं परमेश्वरि ।
श्यामलं तत्तु ईशानं सदा ऊर्द्धं शुचिस्मिते ॥
कालाग्निरूपिणं तत्तु सर्व्वशक्तिमयं सदा ।
तेजोमयं महेशानि मुखमूर्द्धं वरानने ॥
क्षीरोदमथने देवि उत्थितं गरलं महत् ।
ततः करतलीकृत्य तद्विषं परमेश्वरि ॥
निपीतं तद्विषं सूक्ष्मं तीक्ष्णं ब्रह्माण्डनाशनम् ।
तद्विषं कण्ठदेशे तु स्थितं हि सर्व्वदा मम ॥
ततःप्रभृति देवेशि मुखं ज्वालायते सदा ।
पत्रं वा यदि वा पुष्पं फलं वा वरवर्णिनि ॥
अन्यं हि परमेशानि उपचारं मनोहरम् ।
यो दद्यात् परमेशानि मन्मुखोपरि पार्व्वति ॥
अग्राह्यं तत्तु निर्म्माल्यं साक्षाद्ब्रह्ममयं यतः ।
एतत्तु परमेशानि निर्म्माल्यं यस्तु धारयेत् ॥
स भ्रष्टो जायते देवि निष्कृतिर्नास्ति तत्र वै ।
अग्राह्यं मम निर्म्माल्यं अतएव वरानने ॥
यद्दत्तं सम्मुखे देवि पुष्पं वा पत्रमुत्तमम् ।
तन्निर्म्माल्यं महेशानि गृह्णीयात् शिरसा सदा ॥
प्रथमं विष्णवे दत्त्वा विष्णुमन्त्रेण पार्व्वति ।
निर्म्माल्यं मम देवेशि विशेषेणाग्राह्यं वरानने ॥
देवासुरमनुष्याश्च गन्धर्व्वाः किन्नरादयः ।
ते सर्व्वे परमेशानि वराकाः क्षुद्रबुद्धयः ।
निर्म्माल्येषु च देवेशि अधिकारो कथं भवेत् ॥"
इति च तत्रैव १३।१४ पटलौ ॥*॥
"चतुर्द्दश्यां महेशानि शुक्लायां वरवर्णिनि ।
कृष्णायां वा महेशानि अमावास्यां विशेषतः ॥
निर्म्माय च चतुर्द्दश्यां लिङ्गं भक्त्या च पूजयेत् ।
एकहस्ते महेशानि निर्म्माय पार्थिवं शिवम् ॥
दक्षिणे वामहस्ते वा निर्म्माय ये च पार्थिवम् ।
तत्फलं परमेशानि लक्षलिङ्गसमं भवेत् ॥"
इति लिङ्गार्च्चनतन्त्रम् ॥*॥
बाणलिङ्गलक्षणादिकं बाणलिङ्गशब्दे द्रष्टव्यम् ॥
अथ रौद्रलिङ्गलक्षणम् । वीरमित्रोदयधृतम् ।
"नदी समुद्रयं रौद्रमन्योन्यस्य विघर्षणात् ।
नदीवेगात् सम स्निग्धं संजातं रौद्रमुच्यते ॥"
समुच्चयेऽपि ।
"सरित्प्रवाहसंस्थानं बाणलिङ्गसमाकृति ।
तदन्यदपि बोद्धव्यं रौद्रलिङ्गं सुखावहम् ॥
नदीसागरनर्म्मदायां बाणलिङ्गसमाकृति ।
तदन्यदपि बोद्धव्यं लिङ्गं रौद्रं भविष्यति ॥
रौद्रलिङ्गं समाख्यातं बाणलिङ्गसमाकृति ।
श्वेतरक्तं तथा पिङ्गं कृष्णं विप्रादिपूजितम् ॥
समाधानं कर्षणं वा सर्व्वजातिषु सिद्धिदम् ।
नर्म्मदासम्भवं रौद्रं बाणलिङ्गमुदीरितम् ॥"
इति रौद्रलिङ्गलक्षणम् ॥

शिवनाभिलक्षणं तच्छब्दे द्रष्टव्यम् ॥*॥ अथ दैवलिङ्गलक्षणम् । दैवलिङ्गमधिकृत्य सिद्धान्तशेखरे ।
"करसंपुटसंस्पर्शं शूलटङ्केन्दुभूषितम् ।
रेखाकोटरसंयुक्तं निम्नोन्नतसमन्वितम् ।
दीर्घाकारञ्च यल्लिङ्गं ब्रह्मभागादिवर्ज्जितम् ॥"
अथ गोललिङ्गलक्षणम् ।
"लिङ्गं गोलमिति प्रोक्तं गोलकं प्रोच्यतेऽधुना ।
कुष्माण्डस्य फलाकारं नागरङ्गफलोपमम् ।
काकडिम्बफलाकारं गोललिङ्गमितीरितम् ॥"
इति गोललिङ्गलक्षणम् ॥*॥
अथार्षलिङ्गलक्षणम् । तत्रैव ।
"नानाकोलफलाकारं ब्रह्मसूत्रविवर्त्तितम् ।
मूले स्थूलञ्च यल्लिङ्गं कपित्थफलसन्निभम् ॥
नालस्य वा फलाकारं मध्ये स्थूलञ्च यद्भवेत् ।
मध्ये स्थूलं वरं लिङ्गमृषिबाणमुदीरितम् ॥"
इत्यार्षलिङ्गलक्षणम् ॥*॥
लिङ्गं हि द्विविधमकृत्रिमं कृत्रिमञ्च । अकृत्रिमं स्वयम्भूतं स्वयम्भु बाणलिङ्गादि । कृत्रिमं निर्म्मितं धातुलिङ्गादि । सिद्धान्तशेखरे ।
"तल्लिङ्गं द्विविधं ज्ञेयमचलञ्च चलं तथा ।
प्रत्येकं त्रिविधं ज्ञेयं लिङ्गं तदुभयात्मकम् ॥
प्रासादे स्थापितं लिङ्गमचलं तच्छिलादिजम् ।
स्थापितं अचलं गेहे स्थिरं लिङ्गमयोजिते ॥
पञ्चधा तत् स्थितं लिङ्गं स्वयम्भु दैवपालकम् ।
आर्षञ्च मानसं लिङ्गं तेषां लक्षणमुच्यते ॥
सिद्धान्तशेखरे ।
"नानाच्छिद्रसुसंयुक्तं नानावर्णसमन्वितम् ।
अदृष्टमूलं यल्लिङ्गं कर्कशं भुवि दृश्यते ॥
तत् लिङ्गन्तु स्वयम्भूतमपरं लक्षणाच्युतम् ।
स्वयम्भु लिङ्गमित्युक्तं तच्च नानाविधं मतम् ॥
शङ्खाभमस्तकं लिङ्गं वैष्णवं तदुदाहृतम् ।
पद्माभमस्तकं ब्राह्मं छत्राभं शाक्रमुच्यते ॥
शिरोयुग्मं तथाग्नेयं त्रिपदं याम्यमीरितम् ।
खड्गाभं नैरृतं लिङ्गं वारुणं कलसाकृति ॥
वायव्यं ध्वजवल्लिङ्गं कौवेरन्तु गदान्वितम् ।
ईशानस्य त्रिशूलाभं लोकपालादिभिः स्मृतम् ।
स्वयम्भु लिङ्गमाख्यातं सर्व्वशास्त्रविशारदैः ॥"
इति स्वयम्भुलिङ्गलक्षणम् ॥*॥
मत्स्यसूक्ते ।
"दृष्ट्वा लिङ्गं महेशस्य स्वयम्भूतस्य पार्व्वति ।
सर्व्वपापविनिर्म्मुक्तः परे ब्रह्मणि लीयते ॥"*॥
एतेषां पूजाफलन्तु तत्रैव ।
"विशेषाच्छैलजं मुक्त्यै भुक्त्यै चानुषङ्गतः ।
पार्थिवं भुक्तये शस्तं मुक्तये चानुषङ्गतः ॥
एवं वै दारुजं ज्ञेयं चित्रलिङ्गं तथा पुनः ।
स्थिरलक्ष्मीप्रदं ज्ञेयं हैमं राज्यप्रदञ्च तत् ।
पुत्रवृद्धिकरं ताम्रं राङ्गमायुःप्रवर्द्धनम् ॥"
पद्मपुराणम् ।
"पारदञ्च महाभूत्यै सौभाग्याय च मौक्तिकम् ।
चन्द्रकान्तं मृत्युजित् स्याद्धाटकं सर्व्वकामदम् ॥"

वीरमित्रोदयधृतस्कन्दोत्तरेऽपि ।
"सर्व्वा कामप्रदा भूमिर्मणयस्तद्देव हि ।
यत्नसाध्याः स्मृता ह्यष्टौ मणयो [illegible]
राज्ये प्रकाशकाः सर्व [illegible]
नानावर्णास्तु विज्ञेया रसैर्गन्धैश्च रूपतः ।
वस्त्राद्याः स्फाटिकाद्याश्च गुडाद्यादिभिः [illegible]
सर्व्वकामप्रदं पुंसां लिङ्गं तात्कालिकं
लक्षणसमुच्चये ।
"गान्धं सौभाग्यदं लिङ्गं पौष्पं मुक्तिप्रदायकम् ।
तथा ।
"नानागुणोद्भवं लिङ्गं नानाकामप्रदायकम् ।
सैकतं गुणदं लिङ्गं सौभाग्याय च कारकम् ।
उच्चाटने तु पाषाणं मौर्व्वं शत्रुक्षयावहम् ।
तात्कालिकं दरिद्रस्य कृत्वा भक्त्या [illegible]
तथा ।
"कस्तुरिकाया द्वौ भागौ चत्वारश्चन्दनस्य च ।
कुङ्कुमस्य त्रयश्चैव शशिना च चतुःसमम् ।
एतद्गन्धलिङ्गन्तु कृत्वा सम्पूज्य भक्तितः ।
शिवसायुज्यमाप्नोति बन्धुभिः सहितो नरः ।
कार्य्यं पुष्पमयं लिङ्गं स्वयगन्धसमन्वितम् ।
नवखण्डां धरां भुक्त्वा गणेशोऽधिपतिर्भवेत् ।
रजोभिर्निर्म्मितं लिङ्गं यः पूजयति भक्तितः ।
विद्याधरपदं प्राप्य पश्चात् शिवसमो भवेत् ।
यो कामो गोशकृल्लिङ्गं कृत्वा
स्वच्छेन कापिलेनैव गोमयेन प्रकल्पयेत् ।
कार्य्यं यष्टिकृतं लिङ्गं यवगोधूमशालिजम् ।
श्रीकामः पुष्टिकामश्च पुत्रकामस्तदर्च्चयेत् ।
सिताखण्डमयं लिङ्गं कार्य्यमारोग्यवर्द्धनम् ।
वश्ये लवणजं लिङ्गं तालत्रिकटुकान्वितम् ।
गव्यघृतमयं लिङ्गं संपूज्य बुद्धिवर्द्धनम् ।
लवणेन च सौभाग्यं पार्थिवं सर्व्वकामदम् ।
कामदं तिलपिष्टोत्थं तुषोत्थं मारणे कृतम् ।
भस्मोत्थं सर्व्वफलदं गुडोत्थं प्रीतिवर्द्धनम् ।
गन्धोत्थं गुणदं भूरि शर्करोत्थं सुखप्रदम् ।
वंशाङ्कुरोत्थं वंशकरं गोमयं सर्व्वरोगदम् ।
केशास्थिसम्भवं लिङ्गं सर्व्वशत्रुविनाशनम् ।
क्षोभणे मारणे पिष्टसम्भवं लिङ्गमुत्तमम् ।
दारिद्र्यदं द्रुमोद्भूतं पिष्टं सारस्वतप्रदम् ।
दधिदुग्धोद्भवं लिङ्गं कीर्त्तिलक्ष्मीसुखप्रदम् ।
धान्यदं धान्यजं लिङ्गं फलोत्थं फलदं भवेत् ।
पुष्पोत्थं दिव्यभोगायुर्मुक्त्यै धात्रीफलोद्भवम् ।
नवनीतोद्भवं लिङ्गं कीर्त्तिसौभाग्यवर्द्धनम् ।
दूर्व्वाकाण्डसमुद्भूतमपमृत्युविनाशनम् ।
कर्पूरसम्भवं लिङ्गं चला वै भुक्तिमुक्तिदा ।
अयस्कान्तं चतुर्द्धा तु ज्ञेयं सामान्यसिद्धिदम् ।
इति गरुडपुराणम् ।
"सर्व्वं मणिमयं श्रेष्ठं तत्र वज्रमरिष्टिदम् ।
यमलिङ्गं महाभूत्यै सौभाग्याय च मौक्तिकम् ।
पुष्टिमूलं महानीलं ज्योतिस्तोरसमुद्भवम् ।
स्फाटिकं कुलसत्त्वसत्यै तैजसं सूर्य्यकान्तजम् ।

ङ्ग स्फुलिङ्गं स्फाटिकं सर्व्वकामदम्।
मणिजं शत्रुक्षयार्थं मौक्तिकं तथा॥
हीरकं श्रेयं रोगहृन्मौक्तिकोद्भवम्।
पुष्करं तीर्थं वैदूर्य्यं शत्रुदर्पहृत्।
लक्ष्मीप्रदं श्रेयं स्फाटिकं सर्व्वकामदम्॥"
इति सारसंग्रहः॥
[illegible] हैमं राजतं भूतिवर्द्धनम्।
तथा कांस्यं शृणु सामान्यमुक्तिदम्॥
[illegible] लिङ्गं शत्रूणां नाशने हितम्।
कांस्यजं लिङ्गं राजतं पुष्टिवर्द्धनम्॥
भुक्तिमुक्त्यर्थं सिन्दूरं सर्व्वसिद्धिदम्॥"
इति कालोत्तरतन्त्रम्॥
शिवनारदसंवादे।
[illegible] मुक्तये लिङ्गं पुण्यं रजतसम्भवम्।
सत्यलोकस्य प्राप्तये पूजयेत् पुमान्।
ताम्रजं लिङ्गं पुष्टिकामो हि मानवः॥"
[illegible]।
लिङ्गं कान्तो नार्च्चयेत् रैत्यस्य सीसकस्य च
[illegible]नलिङ्गञ्च शङ्खकांस्यायसं तथा॥"॥
[illegible]भेदतन्त्रे १२ पटले।
[illegible] शिवपूजायां सर्व्वसिद्धियुतो भवेत्।
[illegible] शिवपूजायां द्विगुणं फलमीरितम्॥
[illegible] च पूजायां शत्रूणां नाशनं मतम्।
[illegible] रोप्ये फलं तस्माच्चतुर्गुणम्॥
पुष्टिं विजानीयात् कांस्ये च धनसञ्चयः
[illegible] रोगवान् भवेत्॥
[illegible] सर्व्वसिद्धिः स्यात्तथा मरकते प्रिये।
[illegible] रिपोर्नाशं कामदं भस्मलिङ्गकम्॥
[illegible] रिपुहिंसनम्।
[illegible] धर्म्मकामार्थमोक्षदम्
[illegible] विना देवि पाषाणादौ न पूजयेत्॥"
[illegible] यथा,—
[illegible] निधाय च।
[illegible] दिनत्रयम्॥
[illegible] प्रपूजयेत्।
[illegible]॥
[illegible] दिनत्रयम्।
[illegible]॥"
[illegible] यथा,—
[illegible]

एतदन्यत्र कुर्व्वीत कदाचिदपि पार्व्वति॥"
इति मातृकाभेदतन्त्रे ७ पटलः।
अपि च।
"मृत्तिकातोलकं ग्राह्यमथवा तोलकद्वयम्।
विसृष्टस्य प्रमाणेन घटनं कारयेद्बुधः।
अङ्गुष्ठपर्व्वमानन्तु कृत्वा लिङ्गं प्रपूजयेत्॥"
इति षट्कर्म्मदीपिकाधृतविश्वसारतन्त्रम्॥
विसृष्टीकरणमुक्तं कालोत्तरे।
"लिङ्गे वेद्यां तथा पीठे समसूत्रनिपातनात्।
समस्तेव विजानीयात् विसृष्टीकरणन्त्विदम्॥"
मृत्तिकाभेदेन ब्राह्मणादीनां पूजाफलस्य प्रश-
स्तत्वमुक्तं तत्रैव।
"शुक्लं हि पार्थिवं लिङ्गं निर्म्माय यस्तु पूजयेत्।
स एव परमेशानि त्रिवर्गफलभाग्भवेत्॥
क्षत्रियस्तु वरारोहे रक्तं निर्म्माय पार्थिवम्।
पूजयेत् सततं यस्तु त्रिवर्गफलभाग्भवेत्॥
हरितं पार्थिवं देवि निर्म्माय यस्तु पूजयेत्।
स च वैश्यो महेशानि त्रिवर्गफलभाग्भवेत्॥
कृष्णं हि पार्थिवं लिङ्गं निर्म्माय यस्तु पूजयेत्
स शूद्रः परमेशानि त्रिवर्गफलभाग्भवेत्॥
शिलादौ च महेशानि स्थूलञ्च फलदायकम्।
अङ्गुष्ठमानं देवेशि यदा हैमादिमानकम्॥
क्रमेण देवदेवेशि फलं बहुविधं लभेत्।
स्थूलात् स्थूलतरं लिङ्गं रत्नाद्यं परमेश्वरि।
पूजनाद्धारणाद्देवि फलं बहुविधं स्मृतम्॥"
स्थूलात् स्थूलतरमिति पार्थिवलिङ्गपरतरम्।
मृत्तिकातोलकं ग्राह्यमित्यादिवचनात्॥*॥
शिलास्फाटिकमरकतादीनां पट्टवृत्तीकरण-
मुक्तम्। यथा,—
"शिवलिङ्गस्य यन्मानं तन्मानं दक्षसम्पदोः।
योन्यग्रमपि यन्मानं तदधोऽपि तथा भवेत्॥"
इति लैङ्गम्॥
"लिङ्गस्य याहग्विस्तारः परिणाहोऽपि ताहशः
लिङ्गस्य द्विगुणा वेदी योनिस्तदर्द्धसम्मिता॥
कुर्व्वीताङ्गष्ठतो ह्रस्वं न कदाचिदपि क्वचित्
रत्नादिशिवलिङ्गादि मानमिच्छावशाद्भवेत्॥"
इति तन्त्रान्तरम्।
लिङ्गशब्दस्यार्थनिर्णयः,—
"आकाशं लिङ्गमित्याहुः पृथिवी तस्य
पीठिका।
आलयः सर्व्वदेवानां लयनाल्लिङ्गमुच्यते॥"
इति स्कन्दपुराणम्॥
लिङ्गमहिमा यथा,—
शिव उवाच।
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
इति [illegible]

[illegible]
[illegible]
[illegible]लाधानां फलमाप्नोति सत्तमः॥
सुगन्धिचन्दनमैर्लिङ्गमालिप्य भक्तितः।
आलिप्यते सुरस्त्रीभिः सुगन्धैर्यक्षकर्द्दमैः॥"
लिङ्गपूजनाकरणे दोषस्तत्पूजाफलञ्च तत्रैव
शिवनारदसंवादे।
"विना लिङ्गार्च्चनं यस्य कालो गच्छति नित्यशः।
महाहानिर्भवेत्तस्य दुर्गतस्य दुरात्मनः॥
एकतः सर्व्वदानानि व्रतानि विविधानि च।
तीर्थानि नियमा यज्ञा लिङ्गाराधनमेकतः॥
न लिङ्गाराधनादन्यत् पुरा वेदे चतुर्ष्वपि।
विद्यते सर्व्वशास्त्राणामेष एव सुनिश्चितः॥
भुक्तिमुक्तिप्रदं लिङ्गं विविधापन्निवारणम्।
पूजयित्वा नरो नित्यं शिवसायुज्यमाप्नुयात्॥
सर्व्वमन्यत् परित्यज्य क्रियाजालमशेषतः।
भक्त्या परमया विद्वान् लिङ्गमेकं प्रपूजयेत्॥"
इति स्कन्दपुराणम्॥
"अश्वमेधसहस्राणि वाजपेयशतानि च।
महेशार्च्चनपुण्यस्य कलां नार्हन्ति षोडशीम्॥"
इति मत्स्यसूक्ते १६ पटलः॥
"स्वयं नारायणः प्रोक्तो यदि शम्भुं प्रपूजयेत्।
स्वर्गे मर्त्ये च पाताले ये देवाः संस्थिताः सदा।
तेषां पूजा भवेद्देवि शम्भुनाथस्य पूजनात्॥"
इति मातृकाभेदतन्त्रम्॥
षट्कर्म्मदीपिकायाम्।
"अमारे चन्तु संसारे सारमेतमतुत्तमम्।
काश्यां वासः सतां सङ्गो गङ्गाम्भः शम्भु-
सेवनम्॥"
अथ पारदशिवलिङ्गमाहात्म्यम्।
"ज्योतिर्मयं महालिङ्गं कैलासशिखरे प्रिये।
तस्यैव षोडशांशेन कृत्वा [illegible]॥
पूर्णलिङ्गं महेशानि शिवशक्तिं न चान्यथा।
शिवामध्ये यथा चक्रं [illegible]॥
पारदस्य समा [illegible]।
अकारं विष्णुरूपञ्च [illegible]॥
रेफं शिवं दकारञ्च [illegible] न चान्यथा।
पारदं परमेशानि [illegible]।
यो यजेत् पारदं लिङ्गं स एव [illegible]॥"
इति मातृकाभेदतन्त्रे ८ पटलः॥
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

शुकनाशन, पुं, (शुकं नाशयतीति। नश+णिच् +ल्युः।) दद्रुघ्नः। इति राजनिर्घण्टः॥ शुकनाशके, त्रि॥

शुकनास, पुं, (शुकस्य नासेव फलं यस्य।) श्योणाकवृक्षः। इत्यमरः॥ शुकवन्नासायुक्ते, त्रि॥

शुकपिण्डिः, स्त्री, शूकशिम्बी। इति शब्दरत्नावली॥

शुकपुच्छः, पुं, (शुकस्य पुच्छ इव।) गन्धकः। इति हेमचन्द्रः॥ शुकस्य लाङ्गुलञ्च॥

शुकपुच्छकं, क्ली, (शुकस्य पुच्छ इव। कन्।) स्थौणेयम्। इति राजनिर्घण्टः॥ शुकवत्पुच्छयुक्ते, त्रि॥

शुकपुष्पं, क्ली, (शुकप्रियं पुष्पमस्य।) स्थौणेयम् इति भावप्रकाशः॥

शुकपुष्पः, पुं, (शुकप्रियं पुष्पमस्य।) शिरीषवृक्षः। इति राजनिर्घण्टः॥

शुकप्रियः, पुं, (शुकस्य प्रियः।) शिरीषवृक्षः। इति भावप्रकाशः॥ शुकवल्लभे, त्रि॥

शुकप्रिया, स्त्री, (शुकस्य प्रिया।) जम्बूः। इति राजनिर्घण्टः॥

शुकफलः, पुं (शुक इव फलमस्य। तद्वर्णफलवत्त्वात् तथात्वम्।) अर्कवृक्षः। इति राजनिर्घण्टः॥

शुकबर्हं, क्ली, (शुकस्य बर्हमिव।) गन्धद्रव्यविशेषः। इति शब्दरत्नावली॥ गाँठियाला इति भाषा॥

शुकम्, अव्य, शीघ्रम्। इति केचित्॥

शुकवल्लभः, पुं (शुकस्य वल्लभः प्रियः।) दाड़िमः। इति राजनिर्घण्टः। शुकप्रिये, त्रि॥

शुकवाहः, पुं, (शुको वाहो वाहनं यस्य।) कामदेवः। इति केचित्॥ शुकपक्षिवाहके, त्रि॥

शुकशिम्बा, स्त्री, कपिकच्छुः। इति शब्दरत्नावली॥

शुकशिम्बिः, स्त्री, कपिकच्छुः। इति शब्दरत्नावली॥

शुकाख्या, स्त्री, (शुकस्य आख्या आख्या यस्याः।) क्षुपविशेषः। चयाठोँटी इति भाषा। तत्पर्य्यायः। शुकनामा २ शुकजिह्वा ३ शुकानना ४। इति रत्नमाला॥

शुकादन, पुं, (शुकैन अद्यतेऽसौ इति। अद्+कर्म्मणि ल्युट्।) दाड़िमः। इति शब्दचन्द्रिका॥ शुकस्यादनीयद्रव्यमात्रे, त्रि॥

शुकानना, स्त्री, (शुकस्याननमिव फलं यस्याः। शुकाख्यावृक्षः। इति रत्नमाला॥ शुकतुल्यमुखे, त्रि॥

शुकी, स्त्री, (शुक+ङीप्।) कश्यपपत्नी। यथा,

"शुकी श्येनी च भासी च सुग्रीवा शुचिगृध्रिका॥"

अत्र शुचिभासिका इत्यपि पाठः।

"शुकी शुकानजनयदुलूकी प्रत्युलूककान्॥"

इति गारुड़े ६ अध्यायः॥

शुकवर्ण्णस्त्री च॥

शुकोदरं, क्ली, (शुकस्योदरमिव।) तालीशपत्रम्। इति राजनिर्घण्टः॥ कीरजठरञ्च॥

शुक्तं, क्ली, (शुच क्लेदे+क्तः।) मांसम्। इति शब्दचन्द्रिका॥ काञ्जिकम्। इति हारावली॥ द्रवद्रव्यविशेषः। यथा,—

"कन्दमूलफलादीनि सस्नेहलवणानि च।
यत्तद्द्रव्येऽभिषूयन्ते तच्छुक्तमभिधीयते॥"

अस्य गुणाः।

"शुक्तं तीक्ष्णोष्णलवणं पित्तकृत् कटुकं लघु।
रूक्षं कृम्युदरानाहशोथार्शोविषकुष्ठनुत्॥"

इति राजनिर्घण्टः॥ *॥

शुक्तं यन्मधुरं कालवशादम्लतां गतम्। इति प्रायश्चित्तविवेकः॥ तस्य भक्षणनिषेधो यथा। यमः।

"अपूपाश्च करम्भाश्च धाना वटकशष्कुलः।
शाकं मांसमपूपञ्च सूपं कृशरमेव च॥
यवागुं पायसञ्चैव यच्चान्यत् स्नेहसम्भवम्।
सर्व्वं पर्य्युषितं भक्ष्यं शुक्तञ्च परिवर्ज्जयेत्॥"

तत्प्रतिप्रसवो यथा। मनुः।

"दधिभक्ष्यञ्च शुक्तेषु सर्व्वञ्च दधिसम्भवम्॥"

इति तिथ्यादितत्त्वम्॥

(यथा च मनुः। २। १७७।

"वर्ज्जयेन्मधुमांसञ्च गन्धं माल्यं रसान् स्त्रियः।
शुक्तानि यानि सर्व्वाणि प्राणिनाञ्चैव हिंसनम्॥"

"यानि स्वभावतो मधुरादिरसानि कालवशेन उदकवासादिना चाम्लवन्ति तानि शुक्तानि।"
इति तट्टीकायां कुल्लूकभट्टः॥)

शुक्तं, त्रि, (शुच्+क्तः।) निष्ठुरम्। इति मेदिनी॥ पूतम्। अम्लम्। इति विश्वः॥ श्लिष्टम्। निर्ज्जनम्। इति शब्दरत्नावली॥

शुक्ता, स्त्री, (शुक्त+स्त्रियां टाप्।) चुक्रिका। इति शब्दरत्नावली॥

शुक्तिः, स्त्री, (शुच्+क्तिन्।) जलजन्तुविशेषः। झिनुक् इति भाषा। तत्पर्य्यायः। मुक्तास्फोटः २। इत्यमरः॥ शुक्तिका ३। इति जटाधरः॥ मुक्तिप्रसूः ४ महाशुक्तिः ५ तौतिकः ६ मौक्तिकप्रसवा ७ मौक्तिकशुक्तिः ८ मुक्तामाता ९। अस्या गुणाः। कटुत्वम्। स्निग्धत्वम्। श्वासहृद्रोगनाशित्वम्। शूलप्रशमनत्वम्। रुच्यत्वम्। मधुरत्वम्। दीपनत्वञ्च। इति राजनिर्घण्टः॥ कपालखण्डम्। शङ्खः। शङ्खनखः। नखी। अश्वावर्त्तः। चर्म्मरोगः। इति मेदिनी॥ चक्षूरोगविशेषः। इति हेमचन्द्रः॥ तद्विवरणं यथा,—

"प्रस्तारिशुक्लार्म्मलजोऽधिमांस-
स्नाय्वर्म्मसंज्ञाः खलु पञ्च रोगाः।
स्याच्छुक्तिका चार्ज्जुनपिष्टकाख्या
जालं सिराणां पिड़िकाश्च तासाम्॥
रोगा बलासग्रथितेन सार्द्ध-
मेकादशोक्ताः खलु शुक्लभागे॥"

शुक्तिमाह।

"श्यावाः स्युः पिशितनिभाश्च बिन्दवोऽयं
शुक्लाभाः सितनिचिताः स शुक्तिसंज्ञः।"

श्यावा इत्यादि वर्णयशुक्त्यां ... अथास्याश्चिकित्सा।

"सेकः आश्चोतनं ...
पुटपाकोऽञ्जनं चैभिः कल्पैः ..."

इति ...

तत्र सेकविधिर्यथा,—

"सेकस्तु दिवसे कार्य्यो ...
सेकस्तु सूक्ष्मधाराभिः सर्व्वस्मिन्नयने ...
मीलिताक्षस्य मर्त्यस्य प्रदेयश्चतुरङ्गुलम्।
एरण्डदलमूलत्वक्शृतमाजं पयो हितम्।
सुखोष्णं नेत्रयोः सिक्तं ...
यष्टीगैरिकसिन्धूत्थदार्व्वीतार्क्ष्यैः समांशकैः।
जलपिष्टैर्बहिर्लेपः सर्व्वनेत्रामयापहः॥"

इति ...

कर्षद्वयपरिमाणम्। इति शब्दमाला। स्तोलकपरिमाणम्। तत्पर्य्यायः। ... २। इति वैद्यकपरिभाषा॥

शुक्तिका, स्त्री, (शुक्तिरिव। स्वार्थे कन्।) ... स्फोटः। इति जटाधरः॥ चुक्रिका। इति शब्दरत्नावली॥

शुक्तिजं, क्ली, (शुक्तेर्जायते यदिति। ... जन्+डः।) मुक्ता। इति हेमचन्द्रः। बृहत्संहितायाम्। १२। ४।

"प्रचलत्तिमिशुक्तिजशङ्खचित
सलिलेऽप्यहसेऽपि पतिः सरिताम्।"

शुक्तिबीजं, क्ली, (शुक्तेर्बीजमिव।) ... त्रिकाण्डशेषः॥

शुक्तिमान्, [त्] पुं, पर्व्वतविशेषः।

"महेन्द्रो मलयः सह्यः ...
विन्ध्यश्च पारिपात्रश्च सप्तैते च कुलाचलाः।"

इति ...

शुक्रं क्ली, (शुच क्लेदे+"ऋज्रेन्द्राग्र..." उणा० २। २८। इति रन्प्रत्ययेन ...) मज्जजातधातुः। तत्पर्य्यायः। पुंस्त्वम् ... बीजम् ४ वीर्य्यम् ५ पौरुषम् ६ तेजः ... यम् ८ अक्षविकारः ९ मज्जारसः १० ... णम् ११ बलम् १२। इति ...

तस्योत्पत्तिर्यथा,—

"रसाद्रक्तं ततो मांसं मांसान्मेदः प्र...
मेदसोऽस्थि ..."

तस्य स्वरूपं यथा,—

"शुक्रं सौम्यं सितं स्निग्धं बलपुष्टिकरं ...
गर्भबीजं वपुःसारो जीवस्याश्रय उत्तम...
जीवस्याश्रय उत्तम इति। यत ...
"जीवो वसति सर्व्वस्मिन् देहे तत्र ...
वीर्य्ये रक्ते मले यस्मिन् क्षीणे याति क्षयम्॥"

गर्भसंजननशुक्रस्य लक्षणं यथा,—

"स्फटिकाभं द्रवं स्निग्धं मधुरं मधु...
शुक्रमिच्छन्ति केचित्तु तैलक्षौद्रनिभं ..."

तस्य स्थानमाह।

पयसि सर्पिस्तु गूढश्चेक्षौ रसो यथा ।
हि सकले काये शुक्रं तिष्ठति देहिनाम् ॥"
सर्पिर्दृष्टान्तो बहुशुक्रेऽल्पमथनेन सर्पिः-
योर्लाभात् । इक्षुरसदृष्टान्तस्तु स्वल्पशुक्रे
। अतिपीडनेनेक्षुरसशुक्रयोर्लाभात् ॥*॥
क्षरणमार्गो यथा,—
मूले दक्षिणे पार्श्वे वस्तिद्वारस्य चाप्यधः ।
स्रोतःपथे शुक्रं पुरुषस्य प्रवर्त्तते ॥" * ॥
शुक्रस्य क्षरणकारणमाह ।
त्स्नदेहस्थितं शुक्रं प्रसन्नमनसस्तथा ।
पु व्यायुतश्चापि हर्षात्तत् संप्रवर्त्तते ॥"
पु व्यायुतः सुरतरूपं व्यायामं कुर्व्वतः ।
पच ।
त् कामेन कामिन्या दर्शनात् स्पर्शनादपि ।
दसंश्रवणात् ध्यानात् संभोगाच्च प्रवर्त्तते ॥"
इति भावप्रकाशः ॥ * ॥
च्चयकारद्रव्याणि यथा । सार्षपतैलम् १ राज-
पः २ तिलः ३ पटोलवास्तूकाकमाचीपुन-
शाकभिन्नसर्व्वशाकम् ४ तावदम्लद्रव्यम् ५ -
रविल्वकफलम् ६ कर्कोटकफलम् ७ यादा-
। ८ निकुचम् ९ शुष्कमरिचम् १० गुड़-
क् ११ पिप्पलीशुण्ठीभिन्नकटुरसः १२ । इति
जवल्लभात् संगृहीतम् ॥ * ॥ अपि च ।
लक्षयकरं नित्यं भक्ष्यं भोज्यञ्च पानकम् ।
र्जयेत् क्षारशाकाद्यानम्लञ्च बहुतिक्तकम् ॥
स्थिरालतरङ्गस्थं तोयं पानेऽप्यवर्द्धनम् ।
वान्ते मूत्रवद्वीलक्षयकारि विवर्ज्जयेत् ॥"
क्रवृद्धिकरजल यथा,—
ताम्रायःस्वर्णसीसानां पात्रस्थं फलचर्म्मणोः ।
क्रवृद्धिकरं तोयं तत्तु पेयं प्रयत्नतः ॥"
इति कालिकापुराणे ८९ अध्यायः ॥ * ॥
क्रवर्द्धकद्रव्याणि यथा । पानीयम् १ विशेषतः
मस्तिकजलम् २ तालाम्बु ३ चन्दनादिद्रव्यानु-
लेपनम् ४ रक्तशालिधान्यम् ५ हैमन्तिकषष्टि-
धान्यम् ६ गोधूमः ७ माषः ८ सामान्यशुष्का-
मरीचपत्रशाकम् ९ सामान्यक्लिन्नशुष्कमारीच
पत्रशाकजलम् १० कलम्बीशाकम् ११ काक-
मार्चीशाकम् १२ गोक्षुरशाकम् १३ मुष्का-
ष्कः १४ वार्त्ताकुः १५ विदारी १६ हस्त्या-
लुकम् १७ मध्वालुकम् १८ पक्काम्रम् १९
दुग्धाम्रम् २० नागरङ्गम् २१ बहुवारफलम् २२
पक्कवाग्मारफलम् २३ कष्टाफलास्थि २४ पक्क-
तालम् २५ पक्ककदलम् २६ चम्पककदलम् २७
द्राक्षा २८ खर्ज्जूरम् २९ धात्री ३० कुष्माण्ड-
मत्स्या ३१ तापसमत्स्याः ३२ हरमत्स्यः ३३
समुद्रमत्स्यः ३४ रोहितमत्स्यः ३५ भाकूट-
मत्स्यः ३६ पाठीनमत्स्यः ३७ भेगलिमत्स्यः ३८
चित्रफलमत्स्यः ३९ वाड्गमत्स्यः ४० मद्गुर-
मत्स्यः ४१ वर्म्मिमत्स्यः ४२ फलीमत्स्यः ४३
पिच्छटमत्स्यः ४४ पर्व्वतमत्स्यः ४५ एलङ्गमत्स्यः
४६ शकलीमत्स्यः ४७ चम्पकुन्दमत्स्यः ४८ प्रोष्ठी-
मत्स्यः ४९ दग्धमत्स्यः ५० सामान्यमांसम् ५१
प्रसहमांसम् ५२ मृगयामांसम् ५३ अनूप-
मांसम् ५४ जलजमांसम् ५५ जलेचरमांसम् ५६
छागमांसम् ५७ वाराहमांसम् ५८ कूर्म्म-
मांसम् ५९ तित्तिरि- ६० कुलिङ्ग- ६१ चट-
कानां मांसम् ६२ हंसमांसम् ६३ हंसबीजम् ६४
शुक्रपक्षिमांसम् ६५ मयूर- ६६ शरारि- ६७
मद्गु- ६८ कादम्ब- ६९ बलाका- ७० बक-
मांसम् ७१ जीर्णमद्यम् ७२ समस्तक्षीरम् ७३
गोदुग्धम् ७४ हस्तिनीदुग्धम् ७५ तावत्क्षीर-
सन्तालिका ७६ माहिषदधि ७७ दधिसरः ७८
दधिमस्तु ७९ नवनीतम् ८० तावद्घृतम् ८१
तावदिक्षुः ८२ विशेषतः पौण्ड्रकेक्षुः ८३ दन्त-
निष्पीड़ितेक्षुरसः ८४ यन्त्रनिष्पीड़ितेक्षुरसः ८५
अग्निपक्केक्षुरसः ८६ इक्षुफाणितम् ८७ इक्षु-
गुड़ः ८८ इक्षुखण्डम् ८९ मधुरी ९० शुष्क-
पिप्पली ९१ शुण्ठी ९२ आर्द्रकम् ९३ लशु-
नम् ९४ पलाण्डुः ९५ सैन्धवम् ९६ अन्नम् ९७
सतैललवणान्वितदग्धमत्स्यः ९८ तैललवणयुक्त-
पलालवेष्टितकर्द्दमलेपिताङ्गारदग्धलवणवेशवा-
रपुरस्कृतसार्द्रककटुतैलसन्तालितमत्स्यः ९९
शाकमत्स्याख्यव्यञ्जनम् १०० मांसरसः १०१
परिशुष्काख्यमांसम् १०२ घृतपूरः १०३ मधु-
मस्तकम् १०४ दुग्धफेनकः १०५ भूगर्या १०६
एरण्डमूलम् १०७ गोक्षुरः १०८ सामान्य-
बला १०९ विशेषतः पीतबला ११० अश्वगन्धा
१११ प्रसारणी ११२ माषपर्णी ११३ रुदन्ती
वृक्षः ११४ राजवृक्षफलम् ११५ शिलाजतुः
११६ । इति राजवल्लभात् संगृहीतम् ॥*॥
नेत्ररोगविशेषः । इति मेदिनी ॥ अस्य विवरणं
शुक्लशब्दे द्रष्टव्यम् ॥

शुक्रः, पुं, (शुच + रन् ।) ग्रहविशेषः । तत्पर्य्यायः
दैत्यगुरुः २ काव्यः ३ उशनाः ४ भार्गवः ५
कविः ६ । इत्यमरः ॥ सितः ७ आस्फुजित् ८
शतपर्व्वेशः ९ भृगुसुतः १० भृगुः ११ षोड़-
शार्च्चिः १२ मघाभूः १३ श्वेतः १४ श्वेतरथः १५
इति शब्दरत्नावली ॥ षोड़शांशुः १६ । इति
जटाधरः ॥ * ॥ तस्य शुक्रेति नामकारणं
यथा,—
"निकुम्भादिषु दैत्येषु भूय एवोत्थितेष्वथ ।
युद्धायाभ्यागतेष्वेव नन्दी शङ्करमब्रवीत् ॥
महादेव वचोऽस्मद्यं शृणु त्वं परमाद्भुतम् ।
अविचिन्त्यमसह्यञ्च मृतानां जीवनं पुनः ॥
ये हताः प्रमथैर्दैत्या यथाशक्त्या रणाजिरे ।
ते सर्व्वे जीविता भूयो भार्गवेणाथ विद्यया ॥
तदिदं वै महादेव महत् कर्म्म कृतं रणे ।
संजीवनफलं देव शुक्रविद्याबलाश्रयात् ॥
इत्येवमुक्ते वचने नन्दिना कुलनन्दिना ।
प्रत्युवाच प्रभुः प्रीत्या स्वाधणाधममुत्तमम् ।
गच्छ शुक्रं गणपते ममान्तिकमुपानय ॥
अहं तं संयतिष्यामि यथायोगं गणेश्वर ॥
इत्येवमुक्ते रुद्रेण नन्दी गणपतिस्ततः ॥
तमनन्तमुपागम्य नन्दी संपृच्छ दैत्यान् ॥
रथाद्भार्गवमानिन्ये सिंहः क्षुद्रमृगं यथा ।
तमादाय हराभ्यासमाजगाम विनायकः ॥
निपात्य रक्षिणः सर्व्वानथ शुक्रं न्यवेदयत् ।
तमानीतं कविं शर्व्वः प्राक्षिपद्वदने प्रभुः ॥
स शम्भुना कविश्रेष्ठो ग्रस्तो जठरमास्थितः ।
तुष्टाव भगवन्तं तं वाग्मी वाग्भिरथादरात् ॥

शुक्र उवाच ।

नमोऽस्तु ते शङ्कर शर्व्व शम्भो
सहस्रनेत्राङ्घ्रिशिरो नमस्ते ।
दृष्टैव सर्व्वं भुवनं तवोदरे
श्रान्तो भवन्तं शरणं प्रपन्नः ॥
इत्येवमुक्ते वचने महात्मा
शम्भुर्व्वचः प्राह ततो विहस्य ।
निर्गच्छ पुत्रोऽसि ममाधुना त्वं
शिश्नेन भो भार्गववंशचन्द्र ॥
नाम्ना तु शुक्रेति चराचरास्त्वां
स्तोष्यन्ति नैवात्र विचारणास्ति ।
इत्येवमुक्त्वा भगवान् मुमोच
शिश्नेन शुक्रः स च निर्जगाम ॥
विनिर्गतो भार्गववंशचन्द्रः
शुक्रत्वमापद्य महानुभावः ॥"

इति वामने ६६ अध्यायः ॥*॥

अयं श्यामवर्णाग्निकोणस्थोब्राह्मणजातियजु-
र्व्वेदरजोगुणाम्लरसप्रियाशिशिरकरतभोजकट-
देशानामधिपतिः । भृगुमुनिसन्तानः । नया-
ङ्गलशरीरः । पद्मस्थः । सूर्य्यमुखः । श्वेतवर्णः ।
चतुर्भुजः । सदाजपमालावरकमण्डलुदण्ड-
धारी । शुक्लवस्त्रः । इन्द्रादिदेवताकः । शची-
प्रत्यधिदेवताकः । शुभग्रहः । अपराह्णकाले
प्रबलः । जलचारी । कफप्रकृतिः । रूप्यद्रव्य-
धान्यादिस्वामी । मध्यवयः । स्त्रीश्वरः । जल-
भूमिचारी । स्निग्धरुचिः । द्विपदमनुष्याणां
स्वामी च । इति बृहज्जातकग्रहयागतत्त्वा-
दयः ॥ * ॥ तस्य भोग्यं दिनं शुक्रवारः । तत्र
जातफलम् ।

"प्रसन्नचित्तो मतिमान् गुणज्ञः
सुकेशवेशः सितवस्त्रमाल्यः ।
बन्धुप्रियो भार्गववारजातः
शीघ्रप्रसादः कुशलो नरः स्यात् ॥"

तस्य दिवजातफलम् ।

"शुक्रालये काव्यकलाविदग्धो
दातातिथेयः सुतशास्त्रदक्षः ।
कलिप्रियो वातकफान्वितः स्या-
न्मेधान्वितो लास्यपटुर्मदाढ्यः ॥"

तस्य द्रेक्काणजातफलम् ।

"द्रेक्काणे भृगुनन्दनस्य मनुजः पापं धरित्री-
पतेः
सर्व्वज्ञः स्वजनानुरागनुष्टो दाता मतां वल्लभः
सद्रूपव यशस्वान्वितजनैः ख्यातः कृपालुः
शान्तः सत्यवाक्योऽभियुक्तहृदयो धर्म्मानुरक्तो
नरः ॥"

[illegible]जातफलम् ।
"भार्गवांशे ललितनयनो मञ्जुकेशः कृशाङ्गः
कम्बुग्रीवो भवति कनकश्यामवर्णः सुकेशः ।
क्रूरः स्वैणः कविरतिधनो दानशीलो गुणज्ञो
मानप्राप्तो विमलयशसा मानवो भार्गवांशे ॥"
तस्य द्वादशांशजातफलम् ।
"शूरो बहुधनो भोगी नृत्यगीतप्रियः सदा ।
शुचिर्दाता क्षमी भोक्ता द्वादशांशे भृगोर्नरः ॥"
तस्य त्रिंशांशजातफलम् ।
"बहुगुणपरिपूर्णः सुन्दरश्चारुदृष्टि-
र्युवतिजनविनोदी लब्धसौख्यार्थभोगः ।
द्विजसुरगुरुभक्तो दानशीलः कृपालु-
र्भृगुरपतिगृहे: स्यान्मानवस्त्रिंशकांशे ॥"
इति कोष्ठीप्रदीपः ॥
त्रिंशद्भादि-सप्तविंशति-योगान्तर्गत-चतुर्विंश-
योगः । तत्र जातफलम् ।
"प्राप्तो विवादे विजयी सभायां
महाप्रमाण्याम्बरसंयुक्तः ।
जितेन्द्रियः स्यान्मनुजो महौजाः
शुक्राभिधाने जनन हि यस्य ॥"
इति कोष्ठीप्रदीपः ॥ * ॥
[illegible]पवित्र । चित्रकहृक्ष । श्वेतग्रामः । इत्यमरः ।
शुक्रकरः, पुं, (करोतीति । कृ + पचाद्यच् । शुक्रस्य
करः ।) मज्जा । इति हेमचन्द्रः ॥ वीर्य्य-
कारके, त्रि ॥
शुक्रभुक् [ज्] पुं, (शुक्रं भुङ्क्ते इति । भुज +
क्विप् ।) मयूरः । इति शब्दचन्द्रिका ॥ रेतो-
भोजके, त्रि ॥
शुक्रभूः, पुं, (शुक्रात् भवत्यस्मिंस्य ।) मज्जा ।
इति शब्दचन्द्रिका ॥ वीर्य्यजातमात्रे, त्रि ॥
शुक्रला, स्त्री, (शुक्रं लाति ददातीति । ला + कः ।)
[illegible] । इति चक्रपाणिदत्तटीकायां भरतः ॥
वीर्य्यदातरि, त्रि ॥
शुक्रवारः, पुं, (शुक्रस्य वारः ।) शुक्रग्रहभोग्य-
दिनम् । यथा । तीर्थतत्त्वे मतिप्रमत्तमाह ।
[illegible]
"[illegible] चैव संक्रान्त्यां ग्रहणेषु च ।
[illegible] पौर्णमास्यां युगादौ मन्वन्तरे ।
[illegible] न दोषस्तिलतर्पणे ॥"
इति प्रायश्चित्ततत्त्वम् ॥
शुक्रशिष्यः, पुं, (शुक्रस्य शिष्यः ।) असुरः ।
इत्यमरः ॥
[illegible], पुं, मयूरः । इति जटाधरः ॥
[illegible], त्रि, शुक्रसम्बन्धी । शुक्रयज्ञात् प्रतन्वत
[illegible] (शुक्रो देवता अस्येति । शुक्र +
[illegible] । इति [illegible] ४ । २ । २६ । इति वत् ।
[illegible] । इति सिद्धान्तकौमुदी
[illegible] ४ । १०८ ।
"[illegible] [illegible] विदितस ॥"
[illegible] पुं, ([illegible] — "[illegible]" [illegible]
[illegible] । [illegible]) [illegible] ।
[illegible] । इति [illegible] ।
[illegible]
"[illegible]
[illegible] ॥
[illegible] च ॥

अक्षिरोगविशेषः । इति जटाधरः ॥ स तु
चक्षुःशुक्लभागजरोगः । तद्विवरणं यथा,—
"प्रस्तारिशुक्लक्षतजाधिमांस-
स्नाय्वर्म्मसंज्ञाः खलु पञ्च रोगाः ॥"
तत्र शुक्रमाह ।
"शुक्रेत सदृग्शुक्राम्मं शुक्रं सहते चिरात् ॥"
अस्य चिकित्सा ।
"भुक्त्वा पाणितलं घृष्ट्वा चक्षुषोर्यदि दीयते ।
अचिरेणैव तद्वारि तिमिराणि व्यपोहति ॥
स्नानं कृष्णतिलैश्चापि चक्षुष्यमनिलापहम् ।
आमलैः सततं स्नानं परदृष्टिबलापहम् ॥
शुण्ठीनिम्बदलैः पिण्डीसुखोष्णास्वल्पसैन्धवा ।
धार्य्या नेत्रेऽनिलश्लेष्मशोथकण्डूव्यथापहा ।
त्रिफला पिण्डिका नेत्रे वातपित्तकफापहा ॥"
अन्यदौषधं शुक्लिशुक्रशब्दयोर्द्रष्टव्यम् । काञ्जि-
कादि । यथा,—
"कार्त्तिके वर्जयेत्तैलं कार्त्तिके वर्जयेन्मधु ।
कार्त्तिके वर्जयेत्कांस्यं कार्त्तिके शुक्रसन्धि-
तम् ॥"
इति श्रीगोपालभट्टविलिखिते भगवद्भक्ति-
विलासे १६ विलासः ॥ शुक्रं काञ्जिकादि-
पर्य्युषितान्नद्रव्यं सन्धितञ्च वर्जयेत् । इति
श्रीजीवगोस्वामिकृततट्टीका दिग्दर्शनी ॥
शुक्लः, पुं, (शुच + रन् । रस्य लः ।) वर्णविशेषः
सादा इति भाषा । तत्पर्य्यायः । शुभ्रः २ शुचिः
३ श्वेतः ४ विशदः ५ श्येतः ६ पाण्डरः ७ अव-
दातः ८ सितः ९ गौरः १० वलक्षः ११
धवलः १२ अर्जुनः १३ । इत्यमरः ॥ श्वेता १४
श्येता १५ श्वैतौ १६ विपदः १७ सिता १८
धवलक्षः १९ । इति तट्टीका ॥ शितिः २०
पाण्डुः २१ । इति शब्दरत्नावली ॥ रामः २२
अवकः २३ । इति जटाधरः ॥ शुक्लयोगः । इति
मेदिनी ॥ श्वेतैरण्डः । इति राजनिर्घण्टः ॥
शुक्लपक्षः । यथा षट्त्रिंशन्मतम् ।
"तत्र पक्षावुभौ मासे शुक्लकृष्णौ क्रमेण
चन्द्रविकारः शुक्लः [illegible]
इति तिथ्यादि
शुक्लगुणयुक्ते, त्रि ॥*॥ शुक्लवस्तूनि
"सुधांशुभे-श्वाः शङ्ख [illegible]
[illegible]
मासादमोधतगारमन्दारकुन्दहिमादयः ॥
मूर्यन्दुकान्तकर्पूरस्फटिका रजतं शशी ।
निर्मोकभस्मक्षिप्तौरचन्दनं करका हिमम्
कार्पासनासनव्यक्ति [illegible]
[illegible] । दुग्धं दधि गङ्गा सुधा
[illegible]
[illegible] पुण्डरीकं [illegible]
[illegible] ॥
[illegible]
[illegible]
[illegible]
"[illegible]

"सितक्ष[illegible]
[illegible]
विधुचन्द्रो [illegible]
गिरी धवले [illegible]
कनीनिका च [illegible]
नागराजः [illegible]
मेघश्चैव । [illegible]
पयोवारिद [illegible]
पार्थश्च । [illegible]
बलभद्रः कृपश्च [illegible]
खड्गश्च ।
"[illegible]
शङ्करः [illegible]
उज्ज्वलमालय । [illegible]
गगनश्च । व्योमकेशः [illegible]
तालाङ्को [illegible]
बलभद्रः क्षणकालित [illegible]
शिवो अधिकवालय [illegible]
सदाशिवयः शिवयो [illegible]
समूहश्च । [illegible]
"कलकण्ठः पिके [illegible]
[illegible]
षट्पदो [illegible]
शुक्लश्यामाभिधायकाः
हरिगज ऐरावतः । एवं
गजः । वनगजः । एवं
एव सर्व्वे च । गजा इति
गजपर्य्यायो भवति ।
ममद्रौ [illegible]
[illegible]

वपुर्मकोटधिरूढायं बिभ्रत् मेचकवकान्तिमान्।
स्फटिकौ च लसल्लभ्रो: पट्टांशुककटिं वहन्॥
धौताम्बरश्रियं धत्ते स्फटिकान्तश्रियान्वित:।
अर्जुनद्युतिविद्योतिन्यै वमादि समुन्नयेत्॥७"॥
रक्तश्वेतवाचकानि वस्तूनि यथा,—
"रक्तश्वेतौ हरिशुचिपुष्करशतपत्रसूर्य-
कान्तालाः।
नवहंसमहापद्मार्कस्फटिका: कमलकीलालै॥"
हरिचन्द्रसूर्ययो:। शुचि: श्वेतवैश्वानरयो:।
पुष्करं जलपद्मयो:। शतपत्रं हंसपद्मयो:।
सूर्यकान्त: स्फटिके सूर्यकान्ते च। अब्ज:
शङ्खाम्बुजयो:। नवहंस: नवहंसे प्रत्यग्रसूर्ये च।
महापद्म: श्वेतनागे पद्मे च। अर्क: स्फटिक-
सूर्ययो:। कमलं जलाम्बुजयो:। कीलालं
जलरक्तयो:।
"सुहृदब्जादिभिर्भानो रक्ते नाग्ने रथांगयो:।
जलेभ्यो जगशोभाभि: सरोजकुमुदारिभि॥"
भानो: परस्मात् सुहृदब्जादिभि: मितरक्तौ
यथा। रविमित्रं चन्द्र: रवितुल्यश्च। भानुरत्नं
सूर्यकान्तो रविपद्मरागौ च। अग्निरत्नं सूर्य-
कान्तो अग्निपद्मरागौ च। रथांगकं दन्तयन्त्रो
श्चधरश्च जलशोभा जलजा चासौ शोभा
चेति पक्षे पद्मकान्ति:। एवं सरोजारिशोभा
सरोजस्पर्द्धिशोभा पक्षे सरोजारिचन्द्र:। कुमु-
दारिशोभा कुमुदस्पर्द्धिशोभा। पक्षे कुमुदारि-
रादित्य: ॥८॥ पीतश्वेतवाचकानि वस्तूनि
यथा,—
"पीतश्वेतौ गौरद्विजराजकपर्दशम्भुहरि-
ताक्ष्यी:।
हैमस्तोमाष्टापदमहारजतचन्द्रकलधौता:॥"
गौर: श्वेतपीतयो:। द्विजराजो गुरुचन्द्रयो:।
कपर्द: शम्भुजटाजूटवराटयो:। शम्भुर्ब्रह्म-
त्रिलोचनयो:। हरि: पिङ्गलसिंहयो:। ताक्ष्यो
गरुड: पक्षे उच्चै:श्रवा:। हैमस्तोम: हिम्नोऽयं
हैम:। पक्षे हिमस्यायम्। अष्टापदं सुवर्ण-
शरभयो:। महारजतं सुवर्णरूप्ययो:। चन्द्र:
स्वर्णशशाङ्कयो:। कलधौतं हैमरूप्ययो:।
"सुशोभितारकूटश्री: स्वर्णस्तोमसमद्युति:।
हरनोपलसत्कान्तिर्गाङ्गेयच्छविपिशल:॥"
तारकूटो रूप्यसमूह:। पक्षे आरकूटो रीति:।
सुशोभनमर्ण: कनकस्य ॥९॥ अथ श्लोकोक्तो-
दाहरणानि। गोपतिताक्ष्यकान्ति: रविगरुडच्छवि:।
पक्षे गोपतिरिन्द्रस्तस्य ताक्ष्यस्तुरङ्ग:। वाम-
देवगिरिर्मनोज्ञमेरु: कैलासश्च। इति कवि-
कल्पलतायाम्.२ शेषे उद्दिष्टवर्णनं १ कुसुमम्॥
शुक्लक:, पुं, (शुक्ल + स्वार्थे कन्।) शुक्लपक्ष:।
यथा,—
"पक्षत्याद्यास्तु तिथय: क्रमात् पञ्चदश
स्मृता:।
दर्शान्ता: कृष्णपक्षे ता: पूर्णिमान्ताश्च शुक्लके॥"
इति तिथ्यादितत्त्वम्॥
श्वेतवर्णश्च॥

शुक्लकण्टक:, पुं, (शुक्ल: कण्ठो यस्य। कप्।) दात्यूहपक्षी। इति शब्दमाला॥ श्वेतगलयुक्ते, त्रि॥

शुक्लकन्द:, पुं, (शुक्ल: कन्दो यस्य।) महिषकन्द:। इति राजनिर्घण्ट:॥ श्वेतमूलश्च॥

शुक्लकन्दा, स्त्री, (शुक्ल: कन्दो यस्या:।) अति-विषा॥ इति राजनिर्घण्ट:॥

शुक्लकर्म्मा, [न्] त्रि, (शुक्लं पूतं कर्म्म यस्य।) अक्लिष्टकर्म्मा। सुकर्म्मशील:। इति जटाधर:॥

शुक्लकुष्ठं, क्ली, (शुक्लं कुष्ठम्।) श्वेतवर्णकुष्ठ-रोग:॥ तस्यौषधं यथा,—
"सोमराजस्य बीजानि नवनीतयुतानि च।
मधुना खादितानि स्यु: शुक्लकुष्ठहराणि वै॥"
इति गारुडे १८५ अध्याय:॥

शुक्लक्षीरा, स्त्री, (शुक्लं क्षीरं यस्या:।) काकोली। इति राजनिर्घण्ट:॥ श्वेतदुग्धयुक्ते, त्रि॥

शुक्लत्वं, क्ली, (शुक्लस्य भाव:। शुक्ल + त्व।) शुक्लस्य भाव इत्यर्थे त्वप्रत्ययेन निष्पन्नम्॥

शुक्लदुग्ध:, पुं, (शुक्लं दुग्धं निर्य्यासो यस्य।) शृङ्गाटक:। इति शब्दचन्द्रिका॥ श्वेतदुग्ध-युक्ते, त्रि॥

शुक्लधातु:, पुं, (शुक्ल: शुभ्रवर्णो धातु:।) कठिनी। इति हेमचन्द्र:॥ श्वेतवर्णधातुद्रव्यञ्च॥

शुक्लपक्ष:, पुं, (शुक्ल: पक्ष:।) सितपक्ष:। चन्द्र-मण्डल-हृद्यानुकूल-पञ्चदशकलाक्रिया-प्रचय:। तत्पर्य्याय:।
"सितस्त्वापूर्य्यमाण: स्यात् शुक्लश्च विशद: शुचि:
शुक्लपक्ष: कृष्णपक्षो बहुलो वदि च स्मृत:॥"
इति राजनिर्घण्ट:॥
स तु शुक्लप्रतिपदादिपौर्णमास्यन्तपञ्चदश-तिथ्यात्मक:। यथा,—
"तत्र पक्षावुभौ मासे शुक्लकृष्णौ क्रमेण हि।
चन्द्रवृद्धिकर: शुक्ल: कृष्णश्चन्द्रक्षयात्मक:॥"
इति तिथ्यादितत्त्वम्॥८॥
कर्म्मविशेषे तत्तोदयगामितिथिर्ग्राह्यत्वं यथा,—
"शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रवि:।
कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रवि:॥"
इति विष्णुधर्म्मोत्तरम्॥
संस्कारकर्म्मणि शुक्लपक्षकर्त्तव्यता यथा।
आश्वलायन:। उदगयने आपूर्य्यमाणपक्षे कल्याणे नक्षत्रे चौडकर्म्मोपनयनगोदान-विवाहा:। विवाह: सार्व्वकालिक इत्येके॥९॥
विद्यारम्भस्य शुक्लपक्षकर्त्तव्यता यथा। मदन-पारिजाते।
"रवेर्गुरोर्श्च शौलेश्च तत्स्वेऽर्केऽपीन्दुहक्षित:।
गुर्व्वर्केन्द्वङ्गशुद्धौ च विद्यारम्भ: प्रशस्यते॥"१०॥
पुष्करिण्यारम्भस्य शुक्लपक्षकर्त्तव्यता यथा। मत्स्यपुराणे।
"प्राप्य पक्षं शुभं शुक्लमतीते चोत्तरायणे॥"
इत्यादि॥
देवप्रतिष्ठाया: शुक्लपक्षकर्त्तव्यता यथा। व्यव-हारसमुच्चये।
"प्रतिष्ठा सर्व्वदेवानां केशवस्य विशेषत:।
उत्तरायण आपन्ने शुक्लपक्षे शुभे दिने॥"
गृहारम्भगृहप्रवेशयो: शुक्लपक्षकर्त्तव्यता यथा। मत्स्यपुराणे।
"शुक्लपक्षे भवेत् सौख्यं कृष्णे तस्करतो भयम्॥"
इति ज्योतिस्तत्त्वम्॥
नवान्नग्राहस्य शुक्लपक्षकर्त्तव्यता यथा। आश्विनाधिकारे।
"शुक्लपक्षे नवं धान्यं पक्वं ज्ञात्वा सुशोभनम्।
गच्छेत् क्षेत्रे विधानेन गीतवाद्यपुर:सरम्।
तेन देवान् पितॄंश्चैव तर्पयेदग्निवेत्तया॥"
अपि च।
"वृश्चिके शुक्लपक्षे तु नवान्नं शस्यते बुधै:॥"
इति तिथ्यादितत्त्वम्॥

शुक्लपुष्प:, पुं, (शुक्लं पुष्पमस्य।) छत्रकवृक्ष:। कुन्दपुष्पवृक्ष:। मरुवक:। इति रत्नमाला॥ श्वेतकुसुमयुक्ते, त्रि॥

शुक्लपुष्पा, स्त्री, (शुक्लं पुष्पमस्या:।) नागदन्ती। शीतकुम्भी। इति रत्नमाला॥

शुक्लपुष्पी, स्त्री, (शुक्लं पुष्पमस्या:। ङीप्।) नागदन्ती। इति राजनिर्घण्ट:॥

शुक्लपृष्ठक: पुं, (शुक्लं पृष्ठं यस्य। कप्।) भिक्षुक-वृक्ष:। इति शब्दचन्द्रिका॥ श्वेतवर्णपृष्ठयुक्ते, त्रि॥

शुक्लबल:, पुं, जिनविशेष:। यथा,—
"वासुदेवा अमी कृष्णा नव शुक्ला बलास्त्वमी।
अचलो विजयो भद्र: सुप्रभश्च सुदर्शन:।
आनन्दो नन्दन: पद्मो रामो विष्णुद्विषस्त्वमी॥"
इति हेमचन्द्र:॥

शुक्लमण्डलं, क्ली, (शुक्लं मण्डलम्।) चक्षु:श्वेत-चैत्रम्। इति केचित्॥ श्वेतवर्णगोलवस्तु च॥

शुक्लरोहित:, पुं, (शुक्ल: श्वेतवर्णो रोहित:।) श्वेतरोहितवृक्ष:। इति राजनिर्घण्ट:॥ शुभ्र-रोहितमत्स्यश्च॥

शुक्लला, स्त्री, (शुक्लं लातीति। ला + क:।) उच्चटा। इति रत्नमाला॥ श्वेतदातरि, त्रि॥

शुक्लवर्ग:, पुं, (शुक्लानां वर्ग: समूह:।) श्वेतवर्ण-सजातीयद्रव्यम्। तद्यथा। शङ्खशुक्तिकपर्दकादि। इति राजनिर्घण्ट:॥

शुक्लवायस:, पुं, (शुक्लो वायस इव।) बक:। इति त्रिकाण्डशेष:॥ श्वेतकाकश्च॥

शुक्लशाल:, पुं, (शुक्ल: शाल इव।) गिरिनिम्ब:। इति राजनिर्घण्ट:॥ श्वेतशालवृक्षश्च॥

शुक्ला, स्त्री, (शुक्लो वर्णोऽस्त्यस्या इति। अच्। टाप्।) सरस्वती। इति त्रिकाण्डशेष:॥ शर्करा। इति शब्दचन्द्रिका॥ काकोली। विदारी। स्नुही। इति राजनिर्घण्ट:॥ श्वेत-वर्णा च॥

शुक्लाङ्गी, स्त्री, (शुक्लं अङ्गं यस्या:। ङीप्।) शेफालिका। इति राजनिर्घण्ट:॥ श्वेतावयव-युक्ते, त्रि॥

शुक्लापाङ्गः, पुं, (शुक्लौ अपाङ्गौ यस्य ।) मयूरः । इति हेमचन्द्रः ॥ श्वेतवर्णनेत्रान्ते, त्रि ॥ (यथा, मेघदूते ।२१ ।
"शुक्लापाङ्गैः सजलनयनैः स्वागतीकृत्य केकाः प्रत्युद्यातः कथमपि भवान् गन्तुमाशु व्यवस्येत्")
शुक्लाम्ला, स्त्री, (शुक्लं अम्लम् ।) चक्रशाकः । इति राजनिर्घण्टः ॥
शुक्लार्म्म, [न्] क्ली, नेत्ररोगभेदः । यथा, । अथ शुक्लभागजा रोगाः । तेषां नामानि संख्याचाह ।

"प्रस्तारिशुक्लक्षतजाधिमांस-
स्नाय्वर्म्मसंज्ञाः खलु पञ्च रोगाः ।
स्याच्छुक्तिका सार्ज्जुनपिष्टकाख्या
जालं शिराणां पिड़िकाश्च तासाम् ॥
रोगा बलासग्रथितेन सार्द्ध-
मेकादशोक्ताः खलु शुक्लभागे ॥"

तेषु प्रस्तार्य्यर्म्मणो लक्षणमाह ।
"प्रस्तार्य्यर्म्म तनुस्तीर्णं श्यावरक्तनिभं सितम् ।"
तनुः पुस्तली । स्तीर्णं विस्तीर्णम् । श्यावरक्तमित्यत्र विकल्पो बोद्धव्यः ॥*॥ शुक्लार्म्माह ।
"शुक्लेत्तं मृदु शुक्लार्म्म शुक्ले तद्वर्द्धते चिरात् ॥"
रक्तार्म्माह ।
"पद्माभं मृदु रक्तार्म्म यन्मांसं चीयते सिते ।"
पद्माभं वर्णेन रक्तमित्यर्थः । चीयते उपचीयते ॥
अधिमांसार्म्माह ।
"पृथु मृद्वधिमांसार्म्म बहुलञ्च यकृन्निभम् ।"
पृथु विस्तीर्णम् । बहुलं पुष्टम् । यकृन्निभं ईषत् कृष्णलोहितम् ॥ * ॥ स्नाय्वर्म्माह ।
"स्थिरं प्रसारि मांसाढ्यं शुष्कं स्नाय्वर्म्म पञ्चमम् ।"
स्थिरं कठिनम् । शुष्कं स्रावरहितम् ॥ * ॥
शुक्तिमाह ।
"श्यावाः स्युः पिशितनिभाश्च बिन्दवो ये शुक्त्याभाः सितनिचिताः स शुक्तिसंज्ञः ।"
श्यावा इत्यादिवर्णत्रये विकल्पो बोद्धव्यः ॥*॥
अर्ज्जुनमाह ।
"एको यः शशरुधिरप्रभस्तु बिन्दुः
शुक्लस्थो भवति तमर्ज्जुनं वदन्ति ॥"
पिष्टकमाह ।
"श्लेष्ममारुतकोपेन शुक्ले मांसं समुन्नतम् ।
पिष्टवत् पिष्टकं विद्धि मलाक्तादर्शसन्निभम् ॥"
पिष्टवत् श्वेतम् ॥ * ॥ शिराजालमाह ।
"जालाभः कठिनः शिरोऽरुणः शिराणां सन्तानो भवति शिरादिजालसंज्ञः ॥"
शिरादिजालकः शिराजालसंज्ञः ॥ * ॥
शिरापिड़िकामाह ।
"शुक्लस्थाः सितपिड़काः शिरावृता याः ता विद्यादसितसमीपजाः शिराजाः ।"
बलासग्रथितमाह ।
"कांस्याभोऽमृदुरथ वारिबिन्दुकल्पो
विज्ञेयः नयनसिते बलासग्रथितः ।"
कांस्याभः श्वेत इत्यर्थः । अमृदुः कठिनः । वारिबिन्दुकल्पः वर्णेन मनागुज्ज्वलं बोध्यते । बलासग्रथितः बलासग्रथितसंज्ञः । क्वचिदेकदेशेनापि समुदायावगमात् । यथा भीमो भीमसेन इति । अतएव सुश्रुते । नामसंग्रहे बलासग्रथितपदे निर्द्दिष्टम् । इति भावप्रकाशः ॥
शुक्लिमा, [न्] पुं, (शुक्लस्य भावः । शुक्ल + "वर्णदृढादिभ्यः ष्यञ् च ।" ५।१।१२३। इमनिच् ।) शुक्लता । शुक्लशब्दादिमनृप्रत्ययेन निष्पन्नः ॥
शुक्लोपला, स्त्री, (शुक्ल उपल इव आकृतिर्यस्याः ।) शर्करा । इति रत्नमाला ॥ श्वेतप्रस्तरे, पुं ॥
शुचिः, पुं, (शुच्यत्यनेनेति । शुच + "ष्ठुपिकुपिशुपिभ्यः किः ।" उणा० ३।१५५। इति किः ।) वायुः । तेजः । चित्तम् । इति संक्षिप्तसारोणादिवृत्तिः ॥
शुङ्गः, पुं, वटवृक्षः । आम्रातकवृक्षः । इति मेदिनी ॥ शूकः । शुँया इति भाषा । इति शूकशब्दार्थे मेदिन्युणादिकोषौ ॥
शुङ्गा, स्त्री, (शुङ्गोऽस्त्यस्या इति । अच् । टाप् ।) पर्कटीवृक्षः । इति मेदिनी ॥ नवपल्लवकोषी । इति हेमचन्द्रः ॥ धान्यादिशूकाः शुँया यस्य प्रसिद्धिः ॥ (यथा, सुश्रुते ।४।२६।
"वटाश्वत्थफलमूलत्वक्शुङ्गासिद्धं पयो नरः ।
पीत्वा सशर्करा क्षौद्रं कुलिङ्ग इव हृष्यति ॥")
शुङ्गाकर्म्म, [न्] क्ली, पुंसवनसंस्कारविशेषः । यथा
"अग्निस्तु मारुतो नाम गर्भाधाने विधीयते ।
पुंसवने चन्द्रनामा शुङ्गाकर्म्मणि शोभनः ॥"
इति तिथ्यादितत्त्वम् ॥
तत्कर्म्मानुष्ठानं यथा । शोभननामानमग्निं संस्थाप्य विरूपाक्षजपान्तां कुशण्डिकां समाप्य वटवृक्षस्य पूर्व्वोत्तरशाखायां फलयुगलशालिनीं क्रिमिभिरनुपहतां वटशुङ्गां यवानां माषाणां वा त्रिभिस्त्रिभिर्गुडकैः सप्तवारान् सप्तभिर्मन्त्रैः क्रीणीयात् । मन्त्राणां मन्त्राणामृष्यादयः साधारणाः । प्रजापतिरृषिः सोमवरुणवसुरुद्रादित्यमरुद्विश्वे देवा देवता न्यग्रोधशुङ्गापरिक्रयणे विनियोगः । ॐ यद्यसि सौमी सोमाय त्वा राज्ञे परिक्रीणामि । इति गुड़कत्रयेण प्रथमं परिक्रयणम् ॥ यद्यसि वारुणी वरुणाय त्वा राज्ञे परिक्रीणामि । इति गुड़कत्रयेण द्वितीयं परिक्रयणम् ॥ यद्यसि वसुभ्यो वसुभ्यस्त्वा राज्ञे परिक्रीणामि । इति गुड़कत्रयेण तृतीयं परिक्रयणम् ॥ यद्यसि रुद्रेभ्यो रुद्रेभ्यस्त्वा राज्ञे परिक्रीणामि । इति गुड़कत्रयेण चतुर्थं परिक्रयणम् ॥ यद्यसि आदित्येभ्यः आदित्येभ्यस्त्वा राज्ञे परिक्रीणामि । इति गुड़कत्रयेण पञ्चमं परिक्रयणम् ॥ यद्यसि मरुद्भ्यो मरुद्भ्यस्त्वा राज्ञे परिक्रीणामि । इति गुड़कत्रयेण षष्ठं परिक्रयणम् ॥ यद्यसि विश्वेभ्यो देवेभ्यो विश्वेभ्यो देवेभ्यस्त्वा राज्ञे परिक्रीणामि । इति गुड़कत्रयेण सप्तमं परिक्रयणम् ॥ ततः क्रीतां वटशुङ्गां अनेन मन्त्रेण वृक्षादानयेत् । प्रजापतिरृषिर्विश्वेभ्यो देवता न्यग्रोधशुङ्गाच्छेदने विनियोगः । ओषधयः सुमनसो [illegible] समाधत्त इयं कर्म्म करिष्यति । ततः शुङ्गां ग्रणेन वेष्टितामन्तरीक्षेणानीय स्थापयेत् । ततः क्षतशोभननाम्नो अग्नेः प्रक्षालितशिलायां ब्रह्मचारी [illegible] वा श्रुताध्ययनशीलो वा ब्राह्मण [illegible] नीहारजलेनाहतमपिष्ट्वा पुनः पुन ततोऽग्नेः पश्चिमतः उत्तराग्रेषु [illegible] माभिमुखीं वधूं पूर्व्वदिगागतमस्तको पृष्ठदेशे स्थितः [illegible]
[illegible]
अस्या दक्षिणनासाविवरे शुङ्गारसं [illegible] अनेन मन्त्रेण । प्रजापतिरृषि [illegible] ऽग्नीन्द्रबृहस्पतयो देवता [illegible] दाने विनियोगः ।
पुमानग्निः पुमानिन्द्रः पुमान् दे[illegible]
पुमांसं पुत्रं विन्दस्व तं [illegible]
ततो महाव्याहृतिहोमं कृत्वा [illegible]
घृताक्तां समिधं तूष्णीमग्नौ हुत्वा शा[illegible]
समाप्य उदीच्य शाट्यायनहोमा[illegible]
नान्तं कर्म्म समाप्य [illegible]
दक्षिणां दद्यात् । इति भवदेवः ॥
शुङ्गी, [न्] पुं, (शुङ्गा अस्त्यस्येति । श इनिः ।) प्लक्षवृक्षः । वटवृक्षः । [illegible] धरः ॥ शुङ्गाविशिष्टे, त्रि ॥
शुच, शोके । इति कविकल्पद्रुमः ॥ (भ्वा०-पर० सक०-सेट् ।) तालव्यादिः । शोचति । पुत्रादेरदर्शनाद्दुःखानुभवः । [illegible] शाभ्युद्यं पतासामिति भट्टिः । [illegible] शोचते शोचते । इति महानाटकम् । [illegible] कृतानित्यत्वादात्मनेपदम् । इति [illegible]
शुच, इर्, य ञ ई शौचे । विशरणे । इति कविकल्पद्रुमः ॥ (दिवा०-उभ० अक०-सेट् । [illegible] अक०-अन्यत्र सक०-सेट् ।) [illegible] शौचं शुद्धिः । विशरणं विभेदः । [illegible] भावः । इर् अशुचत् अशोचीत् । [illegible] लोकः स्नानात् । शुच्यति गात्रं [illegible] वस्तमश्मना । ई, शुक्तः । शुचि र [illegible] इति माधवः । रमानाथस्तु [illegible] मर्थान् व्याचष्टे । इति दुर्गादासः ॥
शुचा, स्त्री, (शुच शोके + क्विप् । [illegible]) शोकः । इति शब्दरत्नावली ॥
शुचिः, पुं, (शोचति धर्म्मेनेति । शुच + [illegible] धात् कित् ।" उणा० ४।११८। इति इ[illegible] कित् ।) अग्निः । (यथा, भागवते । [illegible]
"पावकः पवमानश्च शुचिरित्यग्नय [illegible] वसिष्ठशापादुत्पन्नाः पुनर्योगगतिं गताः ।") [illegible] चित्रकवृक्षः । आषाढ़मासः । शुक्र[illegible] शृङ्गाररसः । इत्यमरः ॥ चोपः । [illegible] ज्येष्ठमासः । इति मेदिनी ॥ सौरमि[illegible]
"पावकः पवमानश्च शुचिरग्निश्च ते [illegible] निर्म्मथ्यः पवमानः स्यात् वैद्युत पाव[illegible]

...तपते सूर्य्यः शुचिरग्निस्त्वसौ स्मृतः ।
तेषान्तु सन्ततावन्ये चत्वारिंशत्तु पञ्च च ॥
पावकः पवमानश्च शुचिस्तेषां पिता च यः ।
एते चैकोनपञ्चाशद्वह्नयः परिकीर्त्तिताः ॥"
इति कौर्म्मे १२ अध्यायः ॥
...सूर्य्यः । यथा,—
"तपनस्तापनश्चैव शुचिः सप्ताश्ववाहनः ॥"
इति शाम्बपुराणम् ॥
... । शुक्रः । ब्राह्मणः । इति केचित् ॥
अन्धकस्य पुत्रविशेषः । यथा, भागवते । ९ ।
२४ । १९ ।
"कुकुरो भजमानश्च शुचिः कम्बलबर्हिषः ॥"
...कैयः । इति महाभारतम् । ३।२२१।४॥)
शुचिः, स्त्री, (शुच + इन् ।) कश्यपपत्न्या-
स्ताम्रायाः सुता । यथा,—
"षट् सुताश्च महासत्त्वास्ताम्रायाः परि-
कीर्त्तिताः ।
शुकी श्येनी च भासी च सुग्रीवी शुचि-
गृध्रिका ॥"
इति गारुडे ६ अध्यायः ॥
शुचिः, त्रि, (शुच + इन् ।) शुक्लगुणविशिष्टः ।
इत्यमरः ॥ शुद्धः । (यथा, महाभारते । १ ।
१२८ । ४८ ।
"क्रीड़माने ते सर्व्वे शुचिवस्त्राः स्वल-
ङ्कृताः ॥")
अनुपहतः । इति मेदिनी ॥ * ॥ परस्पर्शस्पर्शे
...हस्तक्षालनात् शुचिर्यथा,—
"देवान् परिक्षिप्तं दृष्ट्वा विरमेद् यो हरिं स्मरन्
...दृष्ट्वा परमुखे ... हस्तप्रक्षालनात् शुचिः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८५ अध्यायः ॥
(निरपराधी । यथा, महाभारते ।१।१४८।१४।
"अहो धिक् धृतराष्ट्रस्य बुद्धिर्नास्ति समञ्जसी
...ः शुचीन् पाण्डुदायादान् दाहयामास
शत्रुवत् ॥"
...न्तःकरणः । यथा, मनुः । ७ । ६८ ।
...नित्यं सेवेत विप्रान् देवविदो शुचीन्
...हि सततं रक्षोभिरपि पूज्यते ॥")
...ता, स्त्री, (शुचेर्भावः । शुचि + तल् ।)
...त्वम् । यथा,—

"आचामः स्यादाचमनमुपस्पर्शः शुचिप्रणीः ।"
इति शब्दरत्नावली ॥
शुचिमल्लिका, स्त्री, (शुचिर्मल्लिका ।) नव-
मालिका । इति राजनिर्घण्टः ॥
शुचिरोचिः, [स्] पुं, (शुचिः शुक्लं रोचिः
किरणो यस्य ।) चन्द्रः । इति केचित् ॥ शुक्ल-
किरणे, त्रि ॥
शुच्य, ई अभिषवे । इति कविकल्पद्रुमः ॥ (भ्वा०-
पर०-अक०-सक० च-सेट् । निष्ठायामनिट् ।)
तालव्यादिः । पञ्चमस्वरी । तालव्यवर्गाद्योपधः ।
ई, शुक्तः । यद्वा, यात्तोऽयमित्यके । अभिषवः
स्नानं मन्थनं पीड़नं सन्धानञ्च । इति दुर्गा-
दासः ॥
शुटीरता, स्त्री, वीर्य्यम् । इति त्रिकाण्डशेषः ॥
शुटीर्य्यं, क्ली, वीर्य्यम् । इति शब्दरत्नावली ॥
शुट, खोटने । इति कविकल्पद्रुमः ॥(भ्वा०-पर०-
अक०-सेट् ।)खोटनमिह गत्याघातः । शोटति
पयः सेतुना । इति दुर्गादासः ॥
शुठ, इ खोटने । इति कविकल्पद्रुमः ॥ (भ्वा०-
पर०-अक०-सेट् ।) खोटनमिह गत्याघातः ।
इ, शुण्ठ्यते । इति दुर्गादासः ॥
शुठ, इ कि शोषणे । इति कविकल्पद्रुमः ।
(चुरा०पक्षे भ्वा०-अक०-सेट् ।) इ, शुण्ठ्यते ।
कि, शुण्ठयति शुण्ठति पवमातपात् । रमा-
नाथस्तु भ्वादिपक्षे शुष्कीभावे । चुरादिपक्षे
शुष्कीकरणेऽयमिति मत्वा भ्वादौ शुण्ठति पवं
चुरादौ शुण्ठयति काष्टमातप इत्युदाहृतवान् ।
वस्तुतस्तु उभयत्र शुष्कीभावः अन्यथा भ्वा-
दिकस्यैव प्रेरणवाचित्वाच्चुरादिपाठोऽनर्थकः
स्यात् । इति दुर्गादासः ॥
शुठ, क आलस्ये । इति कविकल्पद्रुमः ॥ (चुरा-
पर०-अक०-सेट् ।) क, शोठयति हृष्टः क्रियासु
मन्दः स्यादित्यर्थः । इति दुर्गादासः ॥
शुण्ठिः, स्त्री, (शुठि शोषणे + इन् ।) शुण्ठी ।
इत्यमरटीका ॥(यथा, आर्य्यासप्तशत्याम् ।२०१
"तस्मिन् गताद्रभावे वीतरसे शुण्ठिशकल इव
पुरुषे ।
अपि भूतिभाजि मलिने नागरवध्वो विड़-
म्बाय ॥")
शुण्ठी,स्त्री, (शुण्ठि + वा ङीष् ।) शुष्कार्द्रकम् ।
शुंठ इति भाषा ॥ तत्पर्य्यायः । महौषधम् २
विश्वम् ३ नागरम् ४ विश्वभेषजम् ५ । इत्य-
मरः ॥ शुण्ठिः ६ विश्वा ७ महौषधी ८ । इति
शब्दरत्नावली ॥ ...

...स्निग्धोष्णा मधुरा पाके कफवातविब...
हृद्या रुच्या च निःश्वासशूलकासहृदामय...
हन्ति श्लीपदशोथार्श-आनाहोदरमारुत...
आग्नेयगुणभूयिष्ठं तोयांशं परिशोषयेत् ।
संगृह्णन्ति मलं तत्तु ग्राहि शुण्ठ्यादयो ...
विबन्धभेदिनी या तु सा कथं ग्राहिणी भ...
शक्तिर्व्विबन्धभेदे स्याद्यतो न मलपातने ...
इति भावप्रका...
अन्यच्च ।
"शुण्ठी तु कफवातघ्नी सस्नेहा लघुदीपनी
विपाके मधुरा हृद्या च्छघोष्णा कटुरोचनी ...
इति राजवल्लभः
शुण्ठं, क्ली, शुण्ठी । इति शब्दचन्द्रिका ॥
शुण्डः, पुं, (शुन गतौ + बाहुलकात् डः ।) मद-
निर्झरः । इति हेमचन्द्रः ॥ करिकरश्च ॥(यथा,
महाभारते । ७ । ३५ । ३५ ।
"घण्टाशुण्डान् विषाणाग्रान् क्षुरमाल्यपदा-
नुगान् ।
शरैर्निशितधाराग्रैः शात्रवाणामशातयत् ॥")
शुण्डकः, पुं, शौण्डिकः । इति शब्दरत्नावली ।
युद्धवेणुः । इति शब्दमाला ॥
शुण्डरोहः, पुं, (शुण्डेव रोहतीति । रुह +
अच ।) भूतृणम् । इति राजनिर्घण्टः ॥ पुस्त-
कान्तरे शृङ्गरोह इति पाठः ॥
शुण्डा,स्त्री, (शुन् + ड । टाप् ।) मद्यपानगृहम् ।
पद्मकर्णिका । वेश्या । सुरा । हस्तिहस्तः ।
इति मेदिनी ॥ शुँड़ इति भाषा ॥ नलिनी ॥
इति विश्वः ॥ कुट्टनी । इति शब्दमाला ॥
शुण्डापानं, क्ली, (शुण्डाया आपानम् ।) मद्य-
पानगृहम् । तत्पर्य्यायः । मदस्थानम् । इत्य-
मरः ॥ मदस्थलम् । इति शब्दरत्नावली ॥
शुण्डारः, पुं, (शुण्डां राति । रा + कः ।)
शौण्डिकः । इति शब्दरत्नावली ॥ (हस्ति-
शुण्डा । "कुटीशमीशुण्डाभ्यो रः ।" ५ । ३ ।
८८ । इति ... ।
कौमुदी ॥)
...

शुद्धः, त्रि, (शुध+क्तः ।) केवलम् । (यथा, मनुः । ९ । २७९ ।
"तडागभेदकं हन्यादप्सु शुद्धवधेन वा ।
तद्वापि प्रतिसंकुर्य्यात् दाप्यस्तूत्तमसाहसम् ॥")
निर्दोषः । (यथा, बृहत्संहितायाम् ।४८ । ४ ।
"सर्व्वे च शुद्धकाञ्चनविनिर्म्मिताः श्रेयसो
हृदे ॥")
पवित्रः । इति मेदिनी ॥ (उज्ज्वलः । यथा, रघुः । १ । ४६ ।
"काप्यभिख्या तयोरासीत् व्रजतोः शुद्ध-
वेशयोः ॥")
शुक्लः । इति धरणिः ॥ रागान्तरामिश्रित-रागः । इति संगीतशास्त्रम् ॥ * ॥ शरीरा-शुद्धताकारणं यथा,—
नारद उवाच ।
"मानवानां द्विजादीनां शरीरस्यापवित्रता ।
भवेत् केन प्रकारेण कथ्यतां तत् सदाशिव ॥
सर्व्ववेदपुराणादिशास्त्रज्ञानां द्विजन्मनाम् ।
जितेन्द्रियस्मृतिविदां तनोः कथय पूतताम् ॥
सदाशिव उवाच ।
यथा देहापवित्रत्वं विप्रादीनां यतो भवेत् ।
देवर्षे शृणु तत् सर्व्वं नराणामानुपूर्व्विकम् ॥
जातके मृतकेऽस्नाते जलौकोभिः क्षते तथा ।
अपवित्रो द्विजादीनां देहः सन्ध्यादिकर्म्मसु ॥
अपूततनुरस्पर्शे नरो मूत्रपुरीषयोः ।
अस्पृश्यस्पर्शने नैव ब्रह्मयज्ञजपादिषु ॥
रक्तपाते नखशृङ्गदन्तखड्गादिभिः क्षते ।
विप्रादेरशुचिः कायः शस्त्रास्त्रैः कण्टकादिभिः ॥
भुक्त्वा हस्तासनोच्छिष्टेऽपवित्रः कृतमैथुने ।
शयने ब्राह्मणादीनां शरीरं क्षुरकर्म्मणि ॥
ज्वरादिभिश्चतुःषष्टिरोगैर्युक्तद्विजन्मनाम् ।
वपुरप्रयतं पूजादानहोमजपादिषु ॥
धूमोद्गारे वमौ श्राद्धपतितान्नादिभोजने ।
तथा च रेतःस्खलने सर्व्वदेहापवित्रता ॥
अपवित्रं द्विजादीनां वपुः स्याद्राहुदर्शने ।
गर्हितदानग्रहणे पतिते पातकादिभिः ॥
अशौचान्तेन शुद्धिः स्यात् जातके मृतकेऽपि च ।
सर्व्ववर्णाश्रमादीनां तनोः सन्ध्यादिकर्म्मसु ॥"
इति पाद्मे उत्तरखण्डे १९ अध्यायः ॥
शुद्धजङ्घः, पुं, (शुद्धा जङ्घा यस्य ।) गर्दभः । इति त्रिकाण्डशेषः ॥ पवित्रजङ्घायुक्ते, त्रि ॥
शुद्धदत्, त्रि, शुद्धा दन्ता यस्य सः । ("अग्रान्त-शुद्धशुभ्रवृषवराहेभ्यश्च ।" ५ । ४ । १४५ । इति दन्तस्य दत्रादेशः ।) शुद्धदन्तयुक्तः । यथा,—
"गते तस्मिन् जलनिधिः शुद्धदन्तः शिखी ।
लब्धभूकोऽसमासानान् धारयो सदन्तानुनः ॥"
इति भट्टौ । ५ । ६१ ॥
शुद्धमतिः, पुं, (शुद्धा मतिर्यस्य ।) चतुर्विंशति-भुतार्हद्गतागतजिनविशेषः । इति हेमचन्द्रः ॥ (शुद्धा मतिः ।) पवित्रबुद्धौ, स्त्री । तद्वति, त्रि ॥ हितोपदेशे । १ । ८० ।
"उपकारिणि विश्रब्धे शुद्धमतौ यः समाचरति
पापम् ।
तं जनमसत्यसन्धं भगवति वसुधे कथं वहसि ॥")
शुद्धमांसं, क्ली, (शुद्धं मांसं यस्य ।) मांसव्यञ्जन-विशेषः । यथा,—
"पाकपात्रे घृतं दद्यात्तैलं वा तदभावतः ।
तत्र हिङ्गुहरिद्राञ्च भर्ज्जयेत्तदनन्तरम् ॥
छागादेरस्थिरहितं मांसं तत् खण्डखण्डितम् ।
धौतनिर्गालितं तस्मिन् घृते तद्भर्ज्जयेच्छनैः ॥
सिद्धयोग्यं जलं दत्त्वा लवणञ्च पचेत् ततः ।
सिद्धे जलेन संपिष्य वेसवारं परिक्षिपेत् ॥
द्रव्याणि वेसवारस्य नागवल्ली दलानि हि ।
तण्डुलाश्च लवङ्गानि मरिचानि समासतः ।
अनेन विधिना सिद्धं शुद्धमांसमिति स्मृतम् ॥
शुद्धमांसं परं हृद्यं बल्यं रुच्यञ्च बृंहणम् ।
त्रिदोषशमनं श्रेष्ठं दीपनं धातुवर्द्धनम् ॥"
इति भावप्रकाशः ॥
शुद्धवल्लिका, स्त्री, (शुद्धा वल्लिका लता ।) गुडूची इति शब्दचन्द्रिका ॥ पवित्रलता च ॥
शुद्धान्तः, पुं, (शुद्धः अन्तो यस्य । शुद्धा रक्षकाः अन्ते यस्य इति वा ।) अन्तःपुरम् । (यथा, कुमारे । ६ । ५२ ।
"विधिप्रयुक्तसत्कारैः स्वयं मार्गस्य दर्शकः ।
स तैराक्रमयामास शुद्धान्तं शुद्धकर्म्मभिः ॥")
नृपस्यासर्व्वगोचरकक्षान्तरम् । इत्यमरमेदिन्यौ राजयोषित् । इत्यजय ॥ (यथा, नैषधे । ३ । ८२ ।
"शुद्धान्तसंभोगनितान्ततुष्टे
न नैषधे कार्य्यमिदं निगाद्यम् ।
अपां हि तृप्ताय न वारिधारा
स्वादुः सुगन्धिः स्वदते तुषारा ॥")
अशौचान्तः । इति धरणिः ।
शुद्धान्तपालकः, पुं, (शुद्धान्तं पालयतीति । पालि+ण्वुल् ।) अन्तःपुररक्षकः । तत्पर्य्यायः । गृहद्वारिकः २ कञ्चुकी ३ सौविदल्लः ४ । इति शब्दमाला ॥ तस्य लक्षणं यथा,—
"वृद्धः कुलोद्गतः सूक्तः पितृपैतामहः शुचिः ।
राज्ञामन्तःपुराध्यक्षो विनीतश्च तथेष्यते ॥"
इति मात्स्ये १९८ अध्यायः ॥
शुद्धान्ता, स्त्री, (शुद्धान्तः आश्रयत्वेनास्त्यस्या इति अच् । टाप् ।) राज्ञी । यथा,—
"शुद्धान्तश्च विशुद्धान्ते शुद्धान्ता राजयोषितः ॥"
इति धरणिः ॥
शुद्धापह्नुतिः, स्त्री, (शुद्धा अपह्नुतिः ।) अलङ्कारविशेषः । यथा,—
"शुद्धापह्नुतिरन्यस्यारोपार्थो धर्म्मनिह्नवः ।
नायं सुधांशुः किं तर्हि व्योमगङ्गासरोरुहम् ॥"
इति चन्द्रालोकः ॥
शुद्धिः, स्त्री, (शुध+क्तिन् ।) दुर्गा । यथा,—
"सर्व्वपापविमुक्तापि शोध्यते न हि पातकात् ।
तेन शुद्धिः समाख्याता देवी रुद्रतनौ स्थिता ॥"
इति देवीपुराणे देवीनिरुक्ताध्यायः ४५ ॥
मार्ज्जना । इति जटाधरः ॥
प्रयोजककर्म्मसंस्कारविशेषः । यथा ।
संस्कारकूपत्वेन
अशुद्धेर्भावरूपत्वे शुद्धे स्तदभावरूपत्वे
विरोधात् । अतएव मनुः ।
"ततः श्राद्धमशुद्धौ तु कुर्य्यादेकादशे
कर्त्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव
अशुद्धौ चतुर्थ्यादौ । कथमशुद्धौ
कालाशौचस्याधिकारिविशेषणत्वादत
कर्त्तुस्तात्कालिकीति ।
आत्रनिष्ठा शुद्धिः कल्प्यते । म
कर्म्मान्तर एव । इति श्राद्धविवेकः ॥
भावरूपत्वे अशौचस्य तदभावरूपत्वे
तयान्वे अशौचसङ्करोऽपि न स्यात् ।
शुद्धाभावरूपे अशौचे सत्यपरस्य
तदानीं तत्पुरुषीयशु
भावादनुत्पत्तेः । तस्मात्
त्वम् । इति शुद्धितत्त्वम् ॥ * ॥
"अथ दशमदाशौचमूर्द्ध्वं चेत्तेन शुध्यति ।
अथ चेत् पञ्चमीं रात्रिमतीत्य परतो
अथ दशमदाशौचं तदा पूर्व्वेण शुद्ध
अथ दशमस्तत्तु ।
स्वपुत्रजननाशौचस्य
पितृमातृमृतमरणाशौचस्य ॥ * ॥
"जाते पुत्रे पितुः स्नानं सचेलन्तु विधी
माता शुध्येद्दशाहेन स्नानात्तु स्पर्शनं
शुध्येत्
जननाशौचमध्ये तु यद्यपरं जननं
पूर्व्वाशौचव्यपगमे शुद्धिः
प्रभाते दिनत्रयेण मरणाशौचमध्ये
ऽप्येवमिति ॥ * ॥
"यस्य यस्य तु वर्णस्य यद्यत् स्यात् पश्चि

स तत्र वस्त्रशुद्धिञ्च गृहशुद्धिं करोत्वपि ।
समाप्य दशमं पिण्डं यथाशास्त्रमुदाहृत
ग्रामाद्बहिस्ततो गत्वा प्रेतस्पृष्टे च वाससी ।
अन्त्यानामाश्रितानाञ्च त्यक्त्वा स्नानं
श्मश्रुलोमनखानाञ्च यत्त्याज्यं तज्जहात्व
गौरसर्षपकल्केन तिलतैलेन संयुतः ।
शिरः स्नानं ततः कृत्वा
वासोयुगं नव शुभ्रमव्रणं शुद्धमेव च ।
दृष्ट्वा गां सुवर्णञ्च मङ्गलानि शुभानि
स्पृष्ट्वा संकीर्त्तयित्वा तु पश्चात् शुद्धो
गृहशुद्धिः
दिना । त्याज्यं त्यागार्हम् ।
"अथाहःसु निवृत्तेषु सुस्नाताः कृतमङ्गला
माशुत्थाद्विमुच्ये
स्वल्पाशौचस्य मध्ये तु दीर्घाशौचं भवेद्यदि ।
न तु पूर्व्वेण शुद्धिः स्यात् स्वकालेनैव शुद्ध
समानं लघु चाशौचं पूर्व्वेणैव विशुध्यति ।
यदि स्यात् सूतके सूतिर्मृतके च मृतिस्त
शेषेणैव भवेच्छुद्धिरहःशेषे द्विरात्रकम् ।

रत्नोत्पत्तियोगे तु मरणाच्छुद्धिरिष्यते ॥*॥
मर्व्वाक् पञ्चाशतः स्त्रीणां यदि स्यात् गर्भ-
संस्रवः ।
दा मासमनेस्तासां दिवसैः शुद्धिरिष्यते ॥
संस्तुत्यां यथामासमचिरे तूत्तमे त्र्यहः ।
ाजन्ये तु चतूरात्रं वैश्ये पञ्चाहमेव च ॥
ाहेन तु शूद्रस्य शुद्धिरेषा प्रकीर्त्तिता ।
ाद्भिर्मासतुल्याभिर्गर्भस्रावे विशुध्यति ॥
म्यपरते साध्वी स्नानेन स्त्री रजस्वला ।
ा भर्त्तुरनुर्वेऽह्नि चशुद्धा दैवपैत्रयोः ।
वे कर्म्मणि पैत्रे च पञ्चमेऽहनि शुध्यति ॥*॥
ा नारी पितुर्गेहे सूयते म्रियतेऽथवा ।
ाशौचं चरेत् सम्यक् पृथक्स्थानव्यवस्थिता ॥
न्धुवर्गस्त्वेकेन शुध्येत्तु जनकस्त्रिभिः ।
ोः मज्ञासनं कुर्य्यात् शयनादीनि चैव हि ।
ाश्रवो वा परो वापि स दशाहेन शुध्यति ॥
ीणामसंस्कृतानान्तु त्र्यहात् शुध्यन्ति
बान्धवाः ।
चोक्तेनैव कल्पेन शुध्यन्ति हि सनाभयः ॥*॥
मासाभ्यन्तरे शूद्रे मृते बाले त्र्यहं विदुः ।
नतीते द्विवर्षे वै मृते शुध्येत्तु पञ्चभिः ॥
ास्वन्तर्दशाहे तु प्रेतत्वं यदि गच्छति ।
द्य एव विशुद्धिः स्यात्राशौचं नैव सूतकम् ॥
णामकृतचूडानामशुद्धिर्नैशिकी स्मृता ।
ृतचूडकानान्तु त्रिरात्राच्छुद्धिरिष्यते ॥*॥
ाहेन सपिण्डास्तु शुध्यन्ति प्रेतसूतके ।
त्रात्रेण सकुल्यास्तु स्नात्वा शुध्यन्ति
गोत्रजाः ॥
ध्ये द्विजो दशाहेन द्वादशाहेन भूमिपः ।
ैश्यः पञ्चदशाहेन शूद्रो मासेन शुध्यति ॥
शमेऽहनि शूद्रस्य कार्य्यं संस्पर्शनं बुधैः ।
ासेनैव विशुद्धिः स्यात् सूतके मृतकेऽपि वा ॥
स्थिते पक्षिणीं रात्रिं दौहित्रे भगिनीसुते ।
स्कृते तु त्रिरात्रं स्यादिति धर्म्मो व्यवस्थितः ॥
ाकृपरमे स्त्रीणामूढानान्तु कथं भवेत् ।
ात्रेणैव शुद्धिः स्यादित्याह भगवान् शिवः ॥
दा भोजनकाले तु अशुचिर्भवति द्विजः ।
ौ निःक्षिप्य तद्ग्रासं स्नात्वा चैव विशु-
ध्यति ॥*॥
िकित्सको यत् कुरुते तदन्येन न शक्यते ।
स्मात् चिकित्सकस्पर्शे शुद्धो भवति नित्यशः ॥
र्भिणी सूतिका नक्तं कुमारी च रजस्वला ।
दाशुद्धा तदान्येन कारयेत् क्रियते सदा ॥*॥
तीभूतं द्विजं विप्रो योऽनुगच्छति कामतः ।
ात्वा सचेलं स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यति ।
काहात् क्षत्रिये शुद्धिर्वैश्ये च स्याद्द्व्यहेन तु ।
ूद्रे दिनत्रयं प्रोक्तं प्राणायामशतं पुनः ॥*॥
ारं स्पृष्ट्वास्थि सस्नेहं स्नात्वा विप्रो विशुध्यति ।
ाचम्यैव तु निःस्नेहं गामालभ्यार्कमीक्ष्य वा ॥
ासपिण्डं द्विजं प्रेतं विप्रो निर्हृत्य बन्धुवत् ।
शुध्यति त्रिरात्रेण मातुराप्तांश्च बान्धवान् ॥
ाद्यन्नमत्ति तेषान्तु स दशाहेन शुध्यति ।

अनदन्नन्नमह्नैव न चेत्तस्मिन् गृहे वसेत् ॥*॥
अस्थिसञ्चयनादर्व्वाक् यदि विप्रोऽश्रु पातयेत् ।
मृते शूद्रे गृहं गत्वा त्रिरात्रेण विशुध्यति ॥
अस्थिसञ्चयनादूर्द्ध्वं मासमासं द्विजातयः ।
दिवसेनैव शुद्धिः स्याद्वाससां क्षालनेन च ॥*॥
स्नात्वाद्दिवसेनैव त्र्यहात् क्षत्रियवैश्ययोः ।
स्वर्गं विनानुगमने शूद्रो नक्तेन शुध्यति ॥*॥
अजा गावो महिष्यश्च ब्राह्मणी च प्रसूतिका ।
दशरात्रेण शुध्यन्ति भूमिष्ठञ्च नवोदकम् ॥*॥
उदक्या सूतिका वापि अन्त्यजं संस्पृशेद्यदि ।
त्रिरात्रेणैव शुद्धिः स्यादिति शातातपोऽब्र-
वीत् ॥*॥
नवप्रसूतजन्तं गावो महिष्यश्छागयोनयः ।
शुध्यन्ति दिवसैरेव दशभिर्नात्र संशयः ॥
काले नवोदकं शुद्धं न पातव्यन्तु तत्त्र्यहम् ॥"*॥
अथ द्रव्यशुद्धिः । ब्राह्मे ।
"सुवर्णरूप्यशङ्खाश्मशुक्तिरत्नमयानि च ।
कांस्यायस्ताम्ररैत्यानि त्रपुसीसमयानि च ॥
निर्लेपानि विशुध्यन्ति केवलेन जलेन तु ।
शूद्रोच्छिष्टानि शुध्यन्ति त्रिधाक्षाराम्ल-
वारिभिः ॥
सूतिकाशवविण्मूत्ररजस्वलाहतानि च ।
प्रक्षेप्यानि तान्यग्नौ यच्च यावत् सहेदपि ॥"
रैत्यं पित्तलम् । त्रपु रङ्गम् । यत्पात्रं यावत् ।
कालमग्निं सहेत तत् पात्रं प्रक्षालनान्तरं ।
तावत्तापनीयमित्यर्थः ॥*॥ बृहस्पतिः ।
"अम्भसा हैमरौप्याय: कांस्यं शुध्येत भस्मना ।
अम्लैस्ताम्रञ्च रैत्यञ्च पुनःपाकेन मृण्मयम् ॥"
राजधर्म्मे ।
"पञ्चलोच्छिष्टकांस्यं यत् शवाघ्रातमथापि वा ।
गण्डूषोच्छिष्टमपि च विशुध्येद्दशभिस्तु तत् ॥"
दशभिर्द्भिरिति शेषः । तथा च ।
"कांस्ये न धावयेत् पादौ यत्र स्यादपि भोजन-
मिति ।"
यत्र पात्रान्तरे भोजनं तत्र शुतस्यैव तस्य
साहचर्य्यात् कांस्यवच्छुद्धिः ॥ * ॥ बौधायनः ।
"भिन्नकांस्ये तु योऽश्नीयात् नद्यां स्नात्वा
जपेद्द्विजः ।
गायत्र्यष्टसहस्रन्तु एकभक्तस्ततः शुचिः ॥"
देवलः । ताम्ररजतसुवर्णाश्मस्फटिकानां भिन्न-
मभिन्नम् । इति भिन्नत्वेऽपि न दोष इत्यर्थः ॥*॥
विष्णुः । शारीरैर्मलैः सुराभिर्मद्यैर्वा यदुपहतं
तदत्यन्तोपहतं सर्व्वं लौहभाण्डमग्नौ प्रतप्तं
शुध्येत । मणिमयमश्ममयमब्जमयञ्च सप्तरात्रं
महीखननेन शृङ्गदन्तास्थिमयञ्च तक्षणेन दारु-
मयं मृण्मयं जह्यादिति । लौहपदं सुवर्णाद्य-
ष्टकपरम् ॥ * ॥ मनुः ।
"त्रीणि देवाः पवित्राणि ब्राह्मणानामकल्पयन्
अदृष्टमद्भिर्निर्णिक्तं यच्च वाचा प्रशस्यते ॥"
अदृष्टमुपघातशङ्कादिभिरज्ञातम् । अज्ञातञ्च
सदा शुचि इति याज्ञवल्क्यैकवाक्यत्वात् ।
वाचेति उपघातशङ्कायां पवित्रं भवत्विति

ब्राह्मणैर्वाचा प्रशस्यते इति शूलपाणिमहा-
महोपाध्यायकृष्णभट्टौ ॥ * ॥ शातातपः ।
"गोकुले कन्दुशालायां तैलयन्त्रेक्षुयन्त्रयोः ।
अमीमांस्यानि शौचानि स्त्रीषु बालातुरेषु च ॥"
मनुः ।
"मक्षिका विप्रुषश्छाया गौरश्वः सूर्यरश्मयः ।
रजो भूर्व्वायुरग्निश्च स्पर्शे मेध्यानि निर्द्दिशेत् ॥"
बौधायनः ।
"अदुष्टाः सन्तताधारा वातोद्धूताश्च रेणवः ।
आकराः शुचयः सर्व्वे वर्जयित्वा सुराकरम् ॥"
शङ्खलिखितौ । आकरद्रव्याणि प्रोक्षितानि
शुचीनि ॥*॥ यमः ।
"आममांसं घृतं क्षौद्रं स्नेहाश्च फलसम्भवाः ।
म्लेच्छभाण्डस्थिता दुष्टा निष्क्रान्ताः शुचयः
स्मृताः ॥"
विष्णुधर्म्मोत्तरे ।
"मुखवर्जञ्च गौः शुद्धा मार्जारश्चक्रमे शुचिः ।
पुष्पाणाञ्च फलानाञ्च प्रोक्षणात् शुद्धिरिष्यते ॥"
अत्रिः ।
"मक्षिका सन्तताधारा भूमिस्तोयं हुताशनः ।
मार्जारश्चापि दर्व्वी च मारुतश्च सदा
शुचिः ॥"
बौधायनः । अनेकोदाह्ये दारुशिले भूमिसमे
इष्टकाश्च सङ्कीर्णीभूताः इति । सङ्कीर्णीभूताः
परस्परसम्बद्धाः ॥*॥ विष्णुः । प्रोक्षणेन पुस्तकं
इति ॥*॥ शातातपः ।
"तापनं घृततैलानां प्लावनं गोरसस्य च ।
तन्मात्रमुद्धृतं शुध्येत् कठिनन्तु पयो दधि ।
अविलीनं तथा सर्पिर्व्विलीनं श्रपणेन तु ॥"
अविलीनं कठिनम् ॥*॥ मनुः ।
"द्रव्याणाञ्चैव सर्व्वेषां शुद्धिरुत्प्लवनं स्मृतम् ।
प्रोक्षणं संहतानाञ्च दारवाणाञ्च तक्षणम् ॥"
इदन्तूच्छिष्टाद्यल्पदोषे । उत्प्लवनं वस्त्रान्तर-
निर्व्वापणेन कीटाद्यपनयनम् ॥*॥ शातातपः ।
"क्लीबाभिशस्तपतितैः सूतिकोदक्यनास्तिकैः ।
दृष्टं वा स्यात् यदन्नन्तु तस्य निष्कृतिरुच्यते ॥
अभ्युक्ष्य किञ्चिदुद्धृत्य भुञ्जीताप्यविशङ्कितः ॥*॥
देवलः ।
"चाण्डालेन शुना वापि दृष्टं हविरयज्ञियम् ।
विडालादिभिरुच्छिष्टं दुष्टमन्नं विवर्जयेत् ॥"
अन्यत्र हिरण्योदकस्पर्शादिति ॥ * ॥ मनुः ।
"अद्भिस्तु प्रोक्षणं शौचं बहूनां धान्यवाससाम् ।
प्रक्षालनेन त्वल्पानामद्भिः शौचं विधीयते ॥"
शुद्धिरित्यनुवृत्तौ विष्णुः । गुड़ानामिक्षुविका-
राणां प्रभूतानां वाय्वग्निदानेन सर्व्वलवणाना-
ञ्चेति ॥*॥ अङ्गिराः ।
"यथा यतस्ततो ह्यापः शुद्धिं यान्ति नदीं गताः
शूद्राद्विप्रगृहेष्वन्नं प्रविष्टन्तु सदा शुचि ॥"
प्रविष्टं स्वत्वापादकप्रतिग्रहादिनेति शेषः ॥
"सकुणपं सकर्द्दमं तेभ्यस्तोयमपास्य तत् ।
प्रक्षिपेत् पञ्चगव्यञ्च समन्त्रं सर्व्वशुद्धिकृत् ॥
अपास्य कुणपं तेभ्यो बहुतोयेभ्य एव वा ।

एवं यद्यावता विप्रान् तोयकुम्भान् समुद्धरेत् ॥
[illegible] प्रविवेशमत्यपूर्वकम् ॥"
[illegible]
[illegible] ॥ वृहस्पतिः ।
"[illegible] मृताथे द्विजमन्दिरे ।
[illegible] भावितं यथा ॥
[illegible]
[illegible] मासमनुष्ठायात् ।
[illegible] मनुरब्रवीत् ॥"
[illegible]

[illegible]

पाषाणस्तः पुनराघामेत् वासो ह्युत्परिधायच ।
सुते निष्ठोविते स्वापे परिधानेऽश्रुपातने ॥
पञ्चस्वेतेषु चाचामेत् दक्षिणं श्रवणं स्पृशेत् ।
तिष्ठन्त्यग्न्यादयो देवा विप्रकर्णे तु दक्षिणे ॥"
इति गारुडे ८७ अध्यायः ॥

अन्यच ।
"मणिवज्रप्रवालानां तद्वन्मुक्ताफलस्य च ।
शैलदारुमयानाञ्च तृणगुल्मौषधस्य च ॥
प्राजधान्याजिनानाञ्च संहतानाञ्च वाससाम् ।
वल्कलानामशेषाणामम्बुना शुद्धिरिष्यते ॥
सस्नेहानामशेषाणां तिलकल्केन शोधनम् ।
कार्पासिकानां वस्त्राणां शुद्धिः स्यात् सह भस्मना ॥
नागदन्तास्थिशृङ्गाणां तक्षणाच्छुद्धिरिष्यते ।
पुनःपाकेन भाण्डानां मृण्मयानाञ्च शुद्धता ॥
शुचि भैक्ष्यं कारुहस्तः पण्यं योषिन्मुखं तथा ।
रथ्यागतमविज्ञातं दासवर्गेण यत् कृतम् ॥
वाक्प्रशस्तं चिरातीतमनेकान्तरितं लघु ।
चेष्टितं बालवृद्धानां बालस्य तु मुखं शुचि ॥
कर्म्मान्तानामपि तोयानामाकरमध्यसुताः स्त्रियः
वाग्विप्रुषो द्विजेन्द्राणां पाठे वागम्बुबिन्दवः ॥
भूमिर्विशुध्यते खातदाहगोक्रमसेचनैः ।
लेपादुल्लेखनात् सेकात् वेश्मसम्मार्ज्जनाज्जनात् ।
केशकीटावपन्नेऽन्ने गोघ्राते मक्षिकान्विते ।
मृदम्भोभस्मक्षाराणि प्रक्षेप्तव्यानि शुद्धये ॥
औदुम्बराणां चाम्लेन क्षारेण त्रपुसीसयोः ।
कांस्यानां भस्मना शुद्धिस्तोयाच्छुद्धिर्द्रवस्य च ॥
अमेध्याक्तस्य मृत्तोयैर्गन्धापहरणेन च ।
अन्येषामपि तद्द्रव्यैः शुद्धिर्गन्धापहारतः ॥"
मातुः प्रस्रवणे वत्सः शकुनिः फलपातने ।
गर्दभो भारवाहित्वे श्वा मृगग्रहणे शुचिः ॥
रथ्याकर्द्दमतोयानि नावः पथि तृणानि च ।
मारुतेनैव शुध्यन्ति पक्वेष्टकचितानि च ॥
[illegible] भवेत् ।
[illegible] शौचनं स्मृतम् ॥
[illegible] भोजने ।
[illegible] धीयते ॥
[illegible] मूत्रयायिनः ।
[illegible] तथैव [illegible] ॥
[illegible] स्वानमाचरेत् ।
[illegible]"
इति वामनपुराणे १४ अध्यायः ॥
अन्यत् मार्कण्डेयपुराणे सदाचाराध्याये द्रष्टव्यम् ॥ [illegible],—
"[illegible] ।
[illegible]"
[illegible]

त्वञ्च धारय मां नित्यं पवित्रं कुरु मण्डपशुद्धिर्यथा,—
"पञ्चगव्येन सूक्तेन मण्डपं परिप्रोक्षयेत्
गौतमीये ।
"पञ्चगव्येन तद्गेहं मण्डपञ्च [illegible]
पञ्चगव्यप्रमाणन्तु तत्रैव ।
"पलमात्रं दुग्धभागं गोमूत्रं [illegible]
घृतञ्च पलमात्रं स्यात् [illegible]
दधि प्रसृतिमात्रं स्यात् [illegible]
अथवा पञ्चगव्यानां समानो भाग
मूलमन्त्रेण संमन्त्र्य तेनैव परिप्रोक्षये[त्]
तेन सर्व्वविशुद्धिः स्यात् सम्य[क्]
इति ।
अन्यच्छुद्धिर्शौचशब्दे द्रष्टव्या ॥
शुद्धोदनसुतः, पुं, (शुद्धोदनस्य सुतः ।), [illegible] इति हेमचन्द्रः ॥
शुध, ल्य यं शौचे । इति कविकल्पद्रुमः । (दिवा०-पर०-अक०-अनिट् ।) ल्य, शुध्यत् । [illegible] लोकः स्नानात् । शौ, शोधा । [illegible] नारीत्यत्र शुध्यतीति क्रिपि [illegible] औ कर्म्मणि शक्ति रूपम् । इति दुर्गा[दासः ॥]
शुन, श गत्याम् । इति कविकल्पद्रुमः । (तुदा०-पर०-सक०-सेट् ।) श, शुनति । इति दुर्गादासः ॥
शुनः, पुं, (शुनति सदा इतस्ततो [गच्छतीति] । शुन + कः ।) कुक्कुरः । यथा,—
"कुक्कुरस्तु शुनि श्वानः [illegible]
[illegible] इत्यमरटीकायां [illegible] (शुनति क्षिप्रं गच्छतीति । कः । [illegible] निघण्टुटीकायां देवराजयज्वा ॥ १ ॥ [illegible] क्ली, सुखम् । इति ऋग्वेदभाष्ये [illegible] ५० । ८ ॥)
शुनःशेफः, पुं, मुनिविशेषः । स [illegible] पुत्रः । अम्बरीषेण यज्ञार्थं क्रीत[ः] [illegible] रक्षितश्च । इति रामायणे बाल[काण्डे] ६१ सर्गः ॥ (अयमजीगर्त्त[स्य] [illegible] पीड़ितो हरिश्चन्द्रः पुत्रोत्पत्त्यर्थ [illegible] विधाय वरुणतुष्ट्यर्थं यज्ञमा[रभत] [illegible] द्रक्षितो मिश्रामित्र[स्तं] मोक्ष मोचयामास । तत [illegible] विश्वामित्रस्य पुत्र इति प्रसिद्धः [illegible] वामनपुराणे [illegible] देवीभागवते ७ स्कन्धे ॥ [illegible] द्रष्टव्यः ॥ [illegible]
शुनकः, पुं, (शुनति इतस्ततो गच्छति [illegible] शुन गतौ + "कृञ् दिविमनिभ्यः" [illegible] उणा० ३ । ३३ । इति कन् ।) कुक्कुरः [illegible] राजनिर्घण्टः ॥ (यथा, महाभारते [illegible] १२३ । ११ ।
"[illegible] यथाकालमर्ज्जि [illegible] ।
[illegible]"

स्मै [illegible] शुनासीरौ सवानिराः । [illegible] शुनासीरौ इति ।")
[illegible] स्त्री । ([illegible] ।) [illegible] । इति राजनिर्घण्टः ॥
शिखी, स्त्री, (शुनः प्रिया शिखी ।) [illegible] । [illegible] । श्वेता शुना: । शुक्लम । [illegible] । [illegible] । इति राजनिर्घण्टः ।
शुनासीरः, पुं, (शुनासीरौ वायुसूर्यौ स्तः अस्य । अर्श-आदित्वादच् ।) इन्द्रः । इति [illegible] ॥
शुनासीरः, पुं, (शुनासीरौ वायुसूर्यौ स्तः अस्य । शुनासीर + अर्श आद्यच् ।) इन्द्रः । यथा,—
"शुनासीरौ हिताम्भसः शुनासीरौ हितस्वधः [illegible] शुनासीरश्च इन्द्रः ।"
इत्यमरटीकायां भरतः ॥
यथा, तैत्तिरीयसंहितायाम् । १।८।७।१ ।
"इन्द्राय शुनासीराय पुरोडाशमिति ।" ॥
पृथ्वी । इति निघण्टुः । ४।१ ॥ "शु-शब्दाभिधानात् शुन गतौ इत्यस्मात् इगुपधलक्षणः । क्षिप्रं गन्तव्यमाक्षिप्तमिति शुनो वायुः । शु-शब्दोपपदात् [illegible] आदित्य इति दः । भाष्ये तु शु एतदर्थको [illegible] प्रायेण । अतः 'हिरण्यादिरथासीरगभीरकुम्भीर-शौरवाष्पीरकम्बीरदीरकोराः' इति ईरन्-प्रत्ययहिमीपद निपात्यते । [illegible] यस्मात् सीर आदित्यः । शुनश्च सीरश्च [illegible] ।" इति सर्वकायां देवराजयज्वा ॥ ॰॥ इन्द्रवायू । यथा, ऋग्वेदे । ४ । ५७ । ८ ।
"शुनासीरा शुनमस्मासु धत्तम् ॥")
"हे शुनासीरा इन्द्रवायूदित्यौ वा ।" इति । तद्भाष्ये सायणः)
शुनिः, पुं, (शुनति क्षिप्रं गच्छतीति । शुन गतौ + "इगुपधात् कित् ।" उणा० ४।११८। इति इन् । स च कित् ।) कुक्कुरः । इति हेमचन्द्रः ॥
शुनी, स्त्री, (श्वन् + गौरादित्वात् ङीष् ।) कुक्कुरी । इत्यमरः ॥ (यथा, भागवते । ८ । १८ । ११ ।
"यदा निरीक्ष्यतामस्या दास्याः कर्णौ ह्रासाम्यतम् ।
पञ्चदायं हृतवती शुनीव हविरध्वरे ॥")
कुष्माण्डी । इति राजनिर्घण्टः ॥
शुनीरः, पुं, कुक्कुरीसमूहः । इति त्रिकाण्डशेषः ॥
शुन्ध, क शुद्धौ । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क, शुन्धयति । अयमात्मनेपदीत्येके । इति दुर्गादासः ॥
शुन्ध, ञ शुद्धौ । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-अक०-सक०च-सेट् ।) शुद्धिरिह शुद्धीभावः शुद्धीकरणञ्च । ञ, शुन्धति शुन्धते जलेन लोकः । यो गां शुन्धति सत्येनेति हलायुधः । गां वाचम् । इति दुर्गादासः ॥

शुनकः, पुं, (शुन गतौ + "[illegible]" उणा० २ । ३० । इति [illegible] ।) [illegible] । इत्युणादिकोषः ॥ (ऋषिविशेषः । यथा, ऋग्वेदे । १ । १२४ । ४ ।
"[illegible] ।"
"[illegible] [illegible] ।"
इति तद्भाष्ये सायणः ॥)
शुन्भ, श दीप्तिहिंसयोः । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-हिंसने अक०-सेट् ।) श, शुम्भति शुम्भति । शुशोभ शुशुम्भ । इति दुर्गादासः ॥
शुभ्रं, क्ली, [illegible] । इति त्रिकाण्डशेषः ॥ [illegible], त्रि । इति जटाधरः ॥ (यथा, शाकुन्तले ॥ परिच्छेदे ।
"शुभ्रं वासरं [illegible] [illegible] नये-
[illegible] कुर्वि [illegible] मुन्दम् ॥"
इति [illegible] । [illegible] + "[illegible] यत् ।" ४।१।८। इति यत् । "[illegible] च दीर्घं त्वम् ।" इत्युणादिसूत्रम् ॥)
शुभ, ष श दीप्तिहिंसयोः । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-हिंसने अक०-सेट् । ष, श, शुभति शुशोभ । पाठस्तु द्वावेव शुभ शुम्भ भासनहिंसनयोरिति पठन्ति । इति दुर्गादासः ॥
शुभ, ऌ ङ दीप्तौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) ऌ, अशुभत् । ङ, शोभते । न शोभते सभामध्ये इति गणकृतानित्यत्वादिति रमानाथः । वस्तुतस्तु शोभते शोभः पचादित्वादच् । ततः शोभ इवाचरतीति क्वौ साधुम् । इति दुर्गादासः ॥
शुभं, क्ली, (शोभते इति । शुभ दीप्तौ + कः ।) मङ्गलम् । इत्यमरः ॥ (यथा, कथासरित्सागरे । १२४ । ११२ ।
"अहो मूर्खोऽयमशुभं शुभमित्यभिनन्दति ॥")
पद्मकाष्ठम् । इति राजनिर्घण्टः ॥ (उदकम् । इति निघण्टुः । १ । १२ ॥ शुभपर्य्याये शुभमित्यव्ययमप्यस्ति । इति कामिका । ४।२ । १४० ॥)
शुभः, पुं, (शोभते इति । शुभ + कः ।) विष्कुम्भादिसप्तविंशतियोगान्तर्गतत्रयोविंशयोगः । तत्र जातफलम् । यथा, कोष्ठीप्रदीपे ।
"शुभप्रसूतः शुभलक्षणायां
शुभोदयेष्टो विदुषां समाजे ।
करोति नित्यं शुभकर्म धीमान्
शोभाधिकः शोभनवेशधारी ॥"
शुभः, त्रि, (शुभमस्यास्तीति । अर्श आद्यच् ।) क्षेमशाली । (यथा, मनुः । ८ । २८७ ।
"प्रधानस्तु भवेदण्डः शुभेषु मृगपक्षिषु ॥")
खसद्वारिपुरम् । इति मेदिनी । भे, ८ ॥

शुभंयुः, त्रि, (शुभमस्यास्तीति । शुभम् + "शंशुभ्यां युस् ।" ५ । २ । १४० । इति युस् ।) मङ्गलान्वितः । इत्यमरः ॥ (यथा, रघुः । ८ । ६ ।
"अधिकं शुशुभे शुभंयुना
द्वितयेन द्वयमेव सङ्गतम् ॥")
शुभगन्धकं, क्ली, (शुभो गन्धो यस्य ।) बोलम् । इति राजनिर्घण्टः ॥ मङ्गलस्वरूपे, त्रि ॥
शुभग्रहः, पुं, (शुभः ग्रहः ।) सौम्यग्रहः । स तु गुरुः शुक्रः पापादृष्टबुधः पूर्णचन्द्रश्च । यथा,—
"पूर्णो नेन्दुः शुक्रो वाक्: शशिसौम्यस्तु चन्द्रजः ।
रविः पापा भवन्त्येते शुभाश्चान्ये प्रकीर्त्तिताः ॥"
इति मार्त्तण्डः ॥
तद्वारे शुभकर्म्मकरणं यथा,—
"शुभग्रहाङ्कवारे च सद्ग्रहनिरीक्षितेषु च ।
शुभराशिविलग्ने च शुभं शान्तिकपौष्टिकम् ॥"
इति संस्कारतत्त्वम् ॥
शुभङ्करः, त्रि, (शुभं करोतीति । शुभ + कृ + अच् ।) मङ्गलकारकः । यथा, भूतिप्रयोगे ।
"क्षेमङ्करः क्षेमकारी मङ्गलकृच्छुभङ्करी ॥"
[illegible]कारके, पुं ॥
शुभङ्करी, स्त्री, (शुभं करोति या । कृ + अच् । ङीप् ।) पार्वती । इति शब्दरत्नावली ॥
शुभदः, पुं, (शुभं ददातीति । दा + कः ।) अश्वत्थवृक्षः । इति राजनिर्घण्टः ॥ शुभदातरि, त्रि ॥ (यथा, बृहत्संहितायाम् । ८ । २२ ।
"[illegible] प्राच्यां
स्थैर्य्यं चापि मण्डलं शुभदम् ॥")
शुभदन्ती, स्त्री, (शुभौ दन्तौ यस्याः । ङीप् ।) पुष्पदन्तभार्य्या । सुदती । इति मेदिनी ॥
शुभपत्रिका, स्त्री, (शुभानि पत्राणि यस्याः । स्वार्थे कन् । टापि अत इत्वम् ।) शालपर्णी । इति राजनिर्घण्टः ॥ मङ्गलपत्रिका च ॥
शुभवासनः, पुं, (शुभं शोभनं यथा तथा वासयति मुखमिति । शुभ + वस + णिच् + ल्युः ।) मुखवासकरगन्धः । यथा,—
"मुखवासकरो गन्ध आमोदो मुखवासनः ।
मुखवासन इत्येके शुभवासन इत्यपि ॥"
इति शब्दरत्नावली ॥
शुभसूचनी, स्त्री, (शुभं सूचयतीति । सूच + णिच् + ल्युः । स्त्रियां ङीप् ।) देवीविशेषः । सुवचनीति ख्याता । सा च स्त्रिया पूज्या । तस्याः ध्यानं यथा,—
"रक्ता पद्मचतुर्मुखी त्रिनयनी चामीकरालङ्कृता
पीनोत्तुङ्गकुचाद्दुकूलवसना हंसाधिरूढा परा
ब्रह्मानन्दमयी कमण्डलुकराद्याभीतिहस्ता शिवा
ध्येया सा शुभसूचनी त्रिजगतामव्यापदुद्धारिणी ॥"
इत्याचारमार्त्तण्डः ॥
शुभस्थली, स्त्री, (शुभा स्थली ।) यज्ञभूमिः । इति केचित् ॥ मङ्गलभूमिश्च ॥

शुभा, स्त्री, शोभा । कान्तिः । इच्छा । इति मेदिनी ॥ गोरोचना । गोरोचना । शमी । [illegible] । श्वेतदूर्व्वा । इति राजनिर्घण्टः ॥ देवसभा । इति शब्दरत्नावली ॥ उमासखी-विशेषः । इति शब्दमाला ॥ मङ्गलजनिका च ॥

शुभाङ्गी, स्त्री (शुभानि अङ्गानि यस्याः । ङीष् ।) कुबेरपत्नी । कामदेवपत्नी । इति केचित् ॥ (कुबेरपत्नी । यथा, महाभारते । १ । ८४ । १८ "कुरु वत्स [illegible] शुभाङ्गीं नाम [illegible] ॥") मङ्गलावयव-युक्ते, त्रि ॥

शुभाचारा, स्त्री, (शुभः आचारो यस्याः ।) [illegible] । इति शब्दमाला ॥ शोभनाचार-युक्ते, त्रि ॥

शुभाञ्जन, पुं, शोभाञ्जनवृक्षः । इति शब्दरत्नावली ॥

शुभान्वित, त्रि, (शुभेन अन्वितः ।) मङ्गलयुक्तः । [illegible] ॥

[illegible]

ज्येष्ठः शुम्भ इति ख्यातो निशुम्भश्चापरोऽसुरः ॥"
इति वामनपुराणे ५२ अध्यायः ॥
अपरञ्च ।

ऋषिरुवाच ।

"निशुम्भं निहतं दृष्ट्वा भ्रातरं प्राणसम्मितम् ।
हन्यमानं बलञ्चैव शुम्भः क्रुद्धोऽब्रवीद्वचः ॥
बलावलेपदुष्टे त्वं मा दुर्गे गर्व्वमावह ।"
इत्यादि ॥

"स क्षितौ धरणीं प्राप्य मुष्टिमुद्यम्य वेगितः ।
अभ्याधावत दुष्टात्मा चण्डिकानिधनेच्छया ॥
तमायान्तं ततो देवी सर्व्वदैत्यजनेश्वरम् ।
जगत्यां पातयामास भित्त्वा शूलेन वक्षसि ।
स गतासुः पपातोर्व्व्यां देवीशूलाग्रविक्षतः ॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्ये शुम्भवधः १० अध्यायः ॥

शुम्भघातिनी, स्त्री, (शुम्भं हन्तीति । हन + णिनिः । ङीप् ।) दुर्गा । इति शब्दरत्नावली ॥

शुम्भपुरं, क्ली, (शुम्भस्य पुरम् ।) शुम्भदैत्य-पुरी तत्पर्य्यायः । एकचक्रम् ॥ हरिगृहम् ॥ इति भूरिप्रयोगः ॥ अधुना शुम्भलपुर [illegible] ख्यातम् ॥ [illegible] ॥

शुम्भपुरी, स्त्री, (शुम्भस्य पुरी ।) [illegible] । इति त्रिकाण्डशेषः ॥ [illegible]

शुम्भमर्द्दिनी, स्त्री, (शुम्भं मृद्नाति । [illegible] णिनिः ।) दुर्गा । इति [illegible] ॥

शुल्क, क भावे । [illegible] ॥ (चुरा०-पर०-सक०-सेट् ।) [illegible] शुल्कयति । [illegible] ।
[illegible] ॥" [illegible] ॥ [illegible] ।

शुल्क, पुं, क्ली, [illegible] शुचिः ॥
[illegible] तोयानि [illegible] तृणानि च ।
[illegible] ॥
[illegible] भवेत् ।
[illegible] शुल्कतम् ॥
[illegible] भोजने ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] । (यथा, मनुः । ८ [illegible]
"[illegible] पार्थिवः ।
[illegible] ॥") [illegible] इति मेदिनी ॥ (यथा, मनुः । ३ । ५१ ।
"न कन्यायाः पिता विद्वान् गृह्णीयात् शुल्क-मण्वपि ।
गृह्णन् शुल्कं हि लोभेन स्यान्नरोऽपत्यविक्रयी ॥"
[illegible] । महाभारते । १ । १८१ । ३ ।
"[illegible] ।
[illegible] ॥")
[illegible] । इत्यमरटीका ॥

शुल्ब, क माने । सर्गे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) दन्त्यतालव्यादिरन्तःस्थवतीयोपधः । क, शुल्बयति वेधाः पृथिवीं सृजतीत्यर्थः । इति दुर्गादासः ॥

शुल्बं, क्ली, (शुल्बयत्यनेनेति । शुल्ब + घञ् । यद्वा, शुच शोके + "उल्बादयश्च ।" ४ । ९५ । इति वन्प्रत्ययेन साधुः ।) ताम्रम् । रज्जुः । इत्यमरः ॥ (यथा, २ । ७ । ३० ।
"गृह्णीत यद्यदुपबन्धममुष्य माता शुल्बं सुतस्य न तु तत्तदमुष्य माति ।")
ताम्रपात्रपक्वान्नभोजनदोषो यथा,—
"ताम्रे पक्वा चतुर्द्दशी [illegible]
इति मत्स्यसूक्ते ॥
यज्ञकर्म्म । इति हेमचन्द्रः ॥

शुष, श शोषे । (दिवा०-पर०-अक०-अनिट् ।) श, शुष्यति लोकः शुष्यते । घो, शोषः । [illegible] शुष्यतीति किपि शुट् [illegible] कर्म्मणि यकि रूपम् ।

शुन, श गत्याम् । (तुदा०-पर०-सक०-सेट् ।) श, शुनति । इति दुर्गादासः ॥

शुनः, पुं, (शुनति सदा इतस्ततो गच्छतीति । शुन + कः ।) कुक्कुरः । यथा,—
"कुक्कुरस्तु शुनिः श्वानः [illegible]"

इत्यमरटीकायां
(शुनति क्षिप्रं गच्छतीति । कः । निघण्टुटीकायां देवराजयज्वा । १ क्ली, सुखम् । इति ऋग्वेदभाष्ये ५७ । ८ ॥)

शुनःशेफः, पुं, मुनिविशेषः । स तु [illegible] पुत्रः । अम्बरीषेण यज्ञार्थं [illegible] रक्षितश्च । इति रामायणे [illegible] काण्डे ६१ सर्गः ॥ (वरुणपाशात् [illegible] हरिश्चन्द्रः पशोरनुरूप-[illegible] अयं तुल्यं [illegible]
"[illegible] मित्रामित्रम्
[illegible] सामास । तत
[illegible] पुत्र इति [illegible]

शुष, य घो [illegible] शोषणे ० [illegible]
(दिवा०-पर०-अक०-[illegible]
[illegible] । य, शुष्यति [illegible]
[illegible] । घ, अशुषत् । [illegible]
[illegible] पुं,) शुष + कः ।) शोषणम् । [illegible]
[illegible] ॥

शुषि, स्त्री, (शुष + इन् । [illegible]) [illegible] छिद्रम् । इति मेदिनी ॥

शुषिरं, क्ली, (शुष शोषणे + "इषिमदि-[illegible]" उणा० १ । ५१ । इति किरच् । [illegible]

[illegible]च्छद्रमस्यास्तीति। शुषि+"ऊपशुषिमुष्क-[illegible]धो रः।" ५।२।१०७। इति रः।) विवरम्। [illegible]ग्रादिवाद्यम्। सरन्ध्रे, त्रि। इत्यमरः॥ [illegible]आकाशः। इत्युज्ज्वलदत्तः। १। ५२॥)

[illegible]षिरः, पुं, (शुषिविलमस्यास्तीति। शुषि+रः।॥ [illegible]मूषिकः। इति मेदिनी॥ अग्निः। इति विश्वः

[illegible]षिरा, स्त्री, (शुषिर+टाप्।) नदी। इति [illegible]रणिः॥ नलीनामगन्धद्रव्यम्। इत्यमरः॥

[illegible]षिलः, पुं, (शुष+"गुपादिभ्यः कित्।" उणा० [illegible]। ५७। इति इलच्। स च कित्।) वायुः। [illegible]त्युणादिकोषः॥

[illegible]ष्कः, त्रि, (शुष शोषे+क्तः। यद्वा, "स्तृहभृशु-[illegible]षिमुषिभ्यः कक्।" उणा० ३।४१। इति कक्। [illegible]निःस्नेहः। सुक्ना इति भाषा। यथा,—

"शुष्कं पर्य्युषितं वापि नीतं वा दूरदेशतः।
[illegible] पावनं महत्॥"

[illegible]नखखण्डम्॥
इत्यमरटीकायां भरतः। [illegible]

यथा, तैत्तिरीयसंहितायाम्। १।८।७।१। [illegible]
इन्द्राय शुनासीराय पुरोडाशमिति।" [illegible]
[illegible]वृष्टर्य्यौ। इति निघण्टुः। ४।१। "शु शब्दार्थ-[illegible]शिष्टात् शुन गतौ इत्यस्मात् इगुपधलक्षणः [illegible]। क्षिप्रं गच्छत्यन्तरिक्षमिति शुनो वायुः [illegible]दा, शु-शब्दोपपदादश्नोतेर्गतिकर्मणः [illegible]अपि दृश्यते इति डः। भाष्ये तु शु-पतदर्थो [illegible]निर्वचनं प्रायेण। सर्व्वैः 'डिण्डीरयानीरगभीर [illegible]भीर-कुम्भीर-शीरकाश्मीरजम्बीरकीरतोरा-[illegible]य' इति ईरन्-प्रत्ययटिलोपश्च निपात्यते। [illegible]दा सरणात् सीर आदित्यः। शुनश्च सीरश्च [illegible]वताद्वन्द्वे च इत्यङ्।" इति तट्टीकायां देव-[illegible]राजयज्वा॥ इन्द्रवायू। यथा, ऋग्वेदे। ४। [illegible]७।८।

"शुनासीरा शुनमस्मासु धत्तम्॥")
"हे शुनासीरा इन्द्रवायू आदित्यौ वा।" इति [illegible]तद्भाष्ये सायणः)

[illegible]नः, पुं, (शुनति क्षिप्रं गच्छतीति। शुन गतौ [illegible]+"इगुपधात् कित्।" उणा० ४।११८। इति [illegible]न्। स च कित्।) कुक्कुरः। इति हेमचन्द्रः [illegible]नी, स्त्री, (श्वन्+गौरादित्वात् ङीप्।) कुक्कु[illegible] इत्यमरः॥ (यथा, भागवते। ८। १८[illegible]
"अहो निरीक्षतामस्या दास्याः [illegible]
[illegible]
अग्रहार्यं वृतवती शुनीव [illegible] रेवती॥"
[illegible]कुष्माण्डी। इति राजनि[illegible]पुराणे १५४ अध्यायः॥

[illegible]रोरः, पुं, कुक्कु[illegible]सपम्। इत्युणादिकोषः॥ [illegible]आभिरण्डी। इति [illegible]त्यमरटीकायां भरतः॥

[illegible]शुष्कलो, [illegible]ष्कमांसम्। मांसमात्रम्। यथा,
"शुष्कलो शुष्कमांसे स्यान्मांसमत्रेऽपि दृश्यते।"
इति शौष्कलशब्दटीकायां भरतः॥

[illegible]ष्कवृक्षः, पुं, (शुष्को वृक्षः इव।) धववृक्षः। इति राजनिर्घण्टः॥

शुष्कव्रणः, पुं, (शुष्को व्रणः।) किणः। इति त्रिकाण्डशेषः॥

शुष्काङ्गः, पुं, (शुष्कं अङ्गं यस्य।) धववृक्षः। इति वैद्यकम्॥ क्षीणशून्यावयवे, त्रि॥

शुष्काङ्गी, स्त्री, (शुष्काणीव अङ्गानि यस्याः।) गोधिका। इति शब्दचन्द्रिका॥

शुष्कार्द्रं, क्ली, (शुष्कं आर्द्रम्।) शुण्ठी। इति शब्दचन्द्रिका॥

शुष्णः, पुं, (शुष्यत्यनेनेति। शुष+"तृषिशुषिर-सिभ्यः कित्।" उणा० ३।१२। इति नः। स च कित्।) सूर्य्यः। इत्युणादिकोषः॥ अग्निः। इति संक्षिप्तसारोणादिवृत्तिः॥ (बले, क्ली। इति निघण्टुः। २। ८॥)

शुष्म, क्ली, शुष्यत्यनेनेति। शुष शोषे+"अवि-सिविसिशुषिभ्यः कित्।" उणा० १। १४३। इति मन्। स च कित्।) तेजः। इति मेदिनी॥ पराक्रमः। इति हेमचन्द्रः॥

शुष्मः, पुं, (शुष्यत्यनेनेति। शुष+मन्।) सूर्य्यः। इति मेदिनी॥ अग्निः। इति त्रिकाण्डशेषः॥ वायुः। पक्षी। इति संक्षिप्तसारोणादिवृत्तिः॥ अर्च्चिः। यथा। शुष्मोऽर्च्चिषि हुताशने। इति शुभाङ्गः। इत्यमरटीकायां भरतः॥

[illegible]ष्म, [न्] क्ली, (शुष+मनिन्। संज्ञापूर्व्वकत्वात् [illegible] गुणः।) तेजः। इति जटाधरः॥ सौर्य्यम्। [illegible] हेमचन्द्रः॥

[illegible] पुं, (शुष्यत्यनेनेति। शुष शोषे+ [illegible]ग्निः। चित्रकवृक्षः। इत्यमरः॥ [illegible]ष्मेति सर्व्वत्वम्। इति भरतः॥ [illegible]
[illegible] गो तनूकरणे+"उलूकादयश्च।" [illegible] साधुः।) शूकधान्यम्। [illegible]) तत्पर्य्यायः। किंशारुः २। [illegible] कोशी ४। इति हेमचन्द्रः॥ [illegible] सविषात्पडुण्डुभादिजल-[illegible]धानलिङ्गवृद्धिकरयोगः। [illegible] शूकदोषाधिकारः। तत्र [illegible]
[illegible]ऽभिवाञ्छति मूढधीः
[illegible] चाटी च शूकजाः॥"
[illegible]क्रमात्। अनुचिता च [illegible]नकस्य शूकस्य योगेन। [illegible]तशूकः सविषो जलजन्तु-[illegible] जलमलोद्भवः। अल्पडुण्डुभ [illegible] तया शूकप्रधानो लिङ्गवृद्धिकरो [illegible]नाद्युक्तो योगः शूक उच्यते। यथा,

"भल्लातकास्थिजलशूकसमयासपत्र-
मन्तर्विदह्य मतिमान् सह सैन्धवेन।
एतद्द्विरदवृहतीफलतोयपिष्ट-
मालिपितं महिषविड्विमलीकृतेऽङ्गे॥
स्थूलं महद्वरतुरङ्गमलिङ्गतुल्यं
शेफः करोत्यभिमतं न हि संशयोऽस्ति।"

इत्यादि। यत्तु जलशूकरहितमश्वगन्धादितैलं तदुचितमेव लिङ्ग[illegible]

"अश्वगन्धा वरी कुष्ठं मांसी सिंहीफलान्वितम्
चतुर्गुणेन दुग्धेन तिलतैलं विपाचयेत्।
तत्तैलं मेढ्रवक्षोजकर्णपाणिविवर्द्धनम्॥"

ते च शूकदोषा दश चाष्टौ च भवन्ति॥ * ॥ तेष्वादौ सर्षपिकामाह।

"गौरसर्षपसंस्थाना शूकदुर्भग्नहेतुका।
पिडिका श्लेष्मवाताभ्यां ज्ञेया सर्षपिका तु सा॥"

शूकदुर्भग्नहेतुका शूकनिमित्ता दुष्टयोनि-निमित्ता च॥ * ॥ अष्ठीलिकामाह।

"कठिना विषमैर्भुग्नैर्वायुनाष्ठीलिका भवेत्।"

अष्ठीला लोहकारस्य भाण्डविशेषः। निहाइ इति लोके। तद्वत् कठिना इत्यष्ठीलिका। विषमैर्भुग्नैरिति वक्ष्यमाणशूकविशेषणम्। विषमैः स्तब्धैः। भुग्नैः वक्रैः॥ * ॥ ग्रथितमाह।

"शूकैर्यत् पूरितं शश्वत् ग्रथितं नाम तत् कफात्
यल्लिङ्गं सदा शूकैः पूरितं तद्ग्रथितत्वाद्ग्रथितम्॥ * ॥ कुम्भिकामाह॥

"कुम्भिका रक्तपित्तोत्था जम्बुकास्थिनिभा सिता॥"

कुम्भिका कुम्भतुल्यफलत्वात्॥ * ॥ अलजीमाह।

"अलजी स्यात्तथा यादृक् प्रमेहपिडिकालजी।
सा च रक्ता सिता स्फोटदारुणा कथिता च सा॥"

एषा रक्तपित्तनिमित्ता ज्ञेया॥ * ॥ मृदितामाह।

"मृदितं पीडितं यत्तु संरब्धं वातकोपतः।
पाणिभ्यां भृशसंमूढे संमूढपिडिका भवेत्॥"

शूकदोषे जाते पाणिभ्यां भृशसंमूढे पिच्चिते लिङ्गे अत्रापि वातकोपत इत्यनुवर्त्तते॥ * ॥ अवमन्थमाह।

"दीर्घा वाह्यश्च पिडिका दीर्य्यते मध्यमस्तु याम्
सोऽवमन्थः कफासृग्भ्यां वेदना लोमहर्षकृत्॥"

दीर्घा दीर्घाङ्कुरा॥ * ॥ पुष्करिकामाह।

"पिडिका पिडिकाव्याप्ता पित्तशोणितसम्भवा।
पद्मकर्णिकसंस्थाना ज्ञेया पुष्करिकेति सा॥"

पिडिकाव्याप्ता क्षुद्रपिडिकाव्याप्ता। अतएव पद्मकर्णिकसंस्थाना॥ * ॥ स्पर्शहानिमाह।

"स्पर्शहानिञ्च जनयेच्छोणितं शूकदूषितम्।"

अत्र स्पर्शासहत्वमेव लक्षणम्॥ * ॥ उत्तमामाह।

"मुद्गमाषोपमा रक्ता रक्तपित्तोद्भवा च सा।
एषोत्तमाख्या पिडिका शूके जीर्णसमुद्भवा"॥ * ॥ शतपोनकमाह।

"छिद्रैरनुमुखैर्लिङ्गं चितं यस्य समन्ततः।
वातशोणितजो व्याधिर्विज्ञेयः शतपोनकः॥"

शतपोनकं चालनी तत्तुल्यत्वाच्छतपोनकः॥ * ॥ त्वक्पाकमाह।

"वातपित्तकृते [illegible] यस्त्वक्पाकी
एतस्य लिङ्गं त्वक्पाकलक्षणम्
[illegible]र्बुदमाह।

"[illegible]: स्फोटैः सरक्त[illegible]

लिङ्गं वामकजयोपा ज्ञेयं तत् शोणितार्बुदम्॥" वामकज: स्फोटकाधिस्थाने वेदना ॥*॥ मांसार्बुदमाह।
"मांसदुष्टा विजानीयादर्बुदं मांससम्भवम्।"
मांसपाकमाह।
"शीर्य्यन्ते यस्य मांसानि यस्य सर्व्वाश्च वेदनाः
विद्यात्तं मांसपाकन्तु सर्व्वदोषकृतं भिषक्॥"
शीर्य्यन्ते गलन्ति। सर्व्ववेदनाः वातपित्तकफजाः
विद्रधिमाह।
"विद्रधिं सन्निपातेन यथोक्तमभिनिर्द्दिशेत्।
शूकं सान्निपातिकविद्रधितुल्यं कथयेत् ॥ * ॥
तिलकालकमाह।
"कृष्णानि चित्राण्यथवा शूकानि सविषाणि तु
पतितानि पचन्त्याशु मेढ्रं निरवशेषतः॥
कालानि भूत्वा मांसानि शीर्य्यन्ते यस्य देहिनः।
सन्निपातसमुत्थांश्च विद्यात्तां तिलकालकान्॥"
चित्राणि नानावर्णानि। शूकानि शूकव्रणानि।
सर्वाः क्रोशन्तीतिवत्। सविषाणि सविषशूकाद्यजन्तुविशेषकृतानि। शीर्य्यन्ते गलन्ति तेषां तिलतुल्यत्वात् तिलकालकाः॥*॥ असाध्यमाह।
"तत्र मांसार्बुदं यच्च मांसपाकश्च यः स्मृतः।
विद्रधिश्च न सिध्यन्ति ये च स्युस्तिलकालकाः॥"
अथ शूकदोषस्य चिकित्सा।
"शूकदोषेषु सर्व्वेषु विपर्श्नी कारयेत् क्रियाम्।
जलौकाभिर्हरेद्रक्तं रेचयेच्च भोजयेत्॥
गुग्गुलुं पाचयेच्चापि त्रिफलाक्वाथसंयुताम्।
वीर्य्यं लेपसेकाश्च शीतानेव हि कारयेत्॥
दार्व्वीसुरसयष्ट्याह्वैर्गृहधूमनिशायुतैः।
सम्यक् तैलमभ्यङ्गान्मेढ्ररोगं विनाशयेत्॥"
सुरसं तुलसी। दार्व्वीतैलम्।
"रसाञ्जनं साहयमेकमेव
प्रलेपमात्रेण नयेत् प्रशान्तिम्।
सपूतिपयव्रणशोथकण्डू-
शूलान्वितं सर्व्वमनङ्गरोगम्॥"
साहयमित्यनङ्गरोगस्य विशेषणम्। अनङ्गरोगस्य नामापि दूरीकरोति। इति शूकदोषाधिकारः। इति भावप्रकाशः॥
शूकक:, पुं, (शूकेन कायतीति। कै+कः।) मार्टः। रसः। इति मेदिनी॥
शूककीट: पुं, (शूकविशिष्टः कीटः।) शूकयुक्तकीटविशेषः। शूयापोका इति भाषा। तत्पर्य्यायः। इचिक: २। इत्यमरः॥ शूककीटकः ३ इति शब्दरत्नावली॥
शूककीटक: पुं, (शूककीट+स्वार्थे कन्।) शूककीटः। इति शब्दरत्नावली॥
शूकतृणं, क्ली, (शूकप्रधानं तृणम्।) तृणविशेषः। शूकड़ी इति हिन्दी भाषा। तत्पर्य्यायः। शूकम् २ शूकाख्यम् ३ कनिष्ठकम् ४। अस्य गुणाः।
"दुर्दरश्च दर्पनाश शूकागारे हितश्च तत्॥"
इति राजनिर्घण्टः॥
दुर्दरमुत्थाने दर्भरन्ध्रम् इति पाठः॥

शूकधान्यं, क्ली, (शूकविशिष्टं धान्यम्।) शूकयुक्तशस्यमात्रम्। स तु धान्ययवादिः। यथा,—
"व्रीह्यादिकं यदिह शूकसमन्वितं स्यात्
तत् शूकधान्यमथ सूक्ष्मकुष्ठकादि।
शिम्बीनिगूढमिति तत् प्रवदन्ति शिम्बी-
धान्यं तृणोद्भवमयो तृणधान्यमन्यत्॥"
अस्य गुणाः।
"तत्र त्रिदोषशमनं लघु शूकधान्यं
तेजोबलातिशयवीर्य्यविवृद्धिदायि।
देशे देशे शूकधान्येषु संख्या
ज्ञातुं शक्या नैव सैर्देवतेर्व्वा॥"
इति राजनिर्घण्टः॥
अपि च।
"शूकधान्यं शमीधान्यं समातीतं प्रशस्यते।
परतो वातकृद्रूक्षं प्रायेणाभिनवं गुरु॥"
इति राजवल्लभः॥
अन्यच्च।
"यवस्तु मितशूकः स्यात् निःशूकोऽतियवः स्मृतः।
तोक्मस्तद्वत् स हरितस्ततः स्वल्पश्च कीर्त्तितः॥
यवः कषायो मधुरः शीतलो लेखनो मृदुः।
व्रणेषु तिलवत् पथ्यो रूक्षो मेधाग्निवर्द्धनः॥
कटुपाकोऽनभिष्यन्दी स्वर्य्यो बलकरो गुरुः।
बहुवातमलो वर्णस्थैर्य्यकारी च पिच्छिलः।
कण्ठत्वगामयश्लेष्मपित्तमेदप्रणाशनः॥
पीनसश्वासकासोरुस्तम्भलोहितहृट्प्रणुत्।
अस्मादतियवो न्यूनस्तोक्मो न्यूनतरस्ततः॥"
इति भावप्रकाशः॥
शूकपिण्डिः, स्त्री, (शूकैः पिण्डते इति। पिण्ड सङ्घाते+इन्।) शूकशिम्बिः। इति शब्दमाला शब्दरत्नावल्यौ॥
शूकपिण्डी, स्त्री, (शूकपिण्डि+वा ङीप्।) शूकशिम्बिः। इति शब्दमालाशब्दरत्नावल्यौ॥
शूकरः, पुं, (शूकं तद्वल्लोम रातीति। रा+कः।) पशुविशेषः। शुओर इति भाषा। तत्पर्य्यायः। वराहः २ स्तब्धरोमा ३ रोमशः ४ किरिः ५ चक्रदंष्ट्रः ६ किटिः ७ दंष्ट्री ८ क्रोडः ९ दन्तायुधः १० बली ११ पृथुस्कन्धः १२ पोत्री १३ घोणी १४ मेदनः १५ कोलः १६ पोत्रायुधः १७ शूरः १८ बहुपत्यः १९ रदायुधः २०। वन्यस्य तस्य मांसगुणाः। गुरुत्वम्। वातहारित्वम्। वृष्यत्वम्। बलस्वेदकरत्वञ्च॥ ग्राम्यस्य तस्य मांसगुणाः। वन्यवराहमांसादगुरुत्वम्। मेदोबलवीर्य्यवृद्धिकारित्वञ्च। इति राजनिर्घण्टः॥
अपि च।
"लुलायगण्डवाराहचमरीवारणादयः।
एते कूलेचराः प्रोक्ता यतः कूले चरन्त्यमी॥
कूलेचरा मरुत्पित्तहरा वृष्यबलापहाः।
मधुराः शीतलाः स्निग्धा मूत्रलाः श्लेष्मवर्द्धनाः॥"
इति भावप्रकाशः॥
शूकरकन्दः, पुं, (शूकरप्रियः कन्दः।) वाराहीकन्दः। इति राजनिर्घण्टः॥

शूकरदंष्ट्रः, पुं, गुदरोगविशेषः।
"सदाहो रक्तपर्य्यन्तस्त्वक्पाकी तीव्रवेदन कण्डूमान् ज्वरकारी च स
स गुदभ्रंशः ॥*॥ तच्चिकित्सा यथा,—
"भृङ्गराजकमूलस्य रजन्या सहितश्च यः
चूर्णन्तु मद्यमा सेपाहाराद्दतिज्वरनाशनम्।
राजीवमूलकस्कन्तु पीतो
शमयति शूकरदंष्ट्रं दंष्ट्रोद्भूतज्वरं घोरम्।
रजनीमार्कवमूलं पिष्टं शीतेन वारिणा।
तल्लेपाद्धन्ति वीसर्पं वाराहदशनाह्वयम्।
इति
शूकरपादिका, स्त्री, (शूकरस्य
न्यस्याः। कन्। टाप्। अत इत्वम्।)
शिम्बी। इति राजनिर्घण्टः॥
शूकराक्रान्ता, स्त्री, (शूकरेणाक्रम्यते कर्म्मणि +क्रम+क्तः।) वराहक्रान्ता।
चन्द्रिका॥
शूकरी, स्त्री, (शूकर+ङीप्।) वराहक्रान्ता। इति शब्दरत्नावली॥ शूकरपदी च।
शूकरेष्टः, पुं, (शूकराणामिष्टः।) कसेरुः। इति राजनिर्घण्टः॥ शूकरप्रियदर्शि
शूकलः, पुं, (शूकवत् क्लेशं लाति ददाति +कः।) दुर्विनीताश्वः। इति हेमचन्द्रः।
शूकवती, स्त्री, (शूकाः सन्त्यस्याः। शूक कपिकच्छुः। इति शब्दचन्द्रिका। शूकशिम्बि॥
शूकशिम्बा, स्त्री, (शूकविशिष्टा शिम्बा यस्याः) कपिकच्छुः। इति शब्दचन्द्रिका॥
शूकशिम्बि:, स्त्री, (
कपिकच्छुः। इत्यमरः॥
शूकशिम्बिका, स्त्री, (
कपिकच्छुः। इत्यमरटीका॥
शूकशिम्बी, स्त्री, (शूकयुक्ता शिम्बी यस्याः) कपिकच्छुः। इत्यमरटीका॥
शूका, स्त्री, (शूकाः सन्त्यस्याः
त्वादच्।) कपिकच्छुः। इति
शूकापुटः, पुं, तृणमणिः। इति हारावली
काफुरदाना इति काहरोवा
भाषा॥
शूक्ष्मं, त्रि, अल्पम्। इत्युणादिकोषः॥
सरु इति मिही इति च भाषा। यथा,—
"बहुतन्तुसमायुक्तं पट्टसूत्रादिनिर्म्मितम्।
वासो देवि सुशूक्ष्मञ्च गृहाण परमेश्वरि॥"
इति कालिकापुराणम्
शूक्ष्मः, पुं, कतकः। अध्यात्मा। इत्युणादि
शूतिपर्णः, पुं, आरग्वधः। इति शब्दरत्नावली
शूद्रः, पुं, (शोचतीति। शुच शोके+
उणा० २।१९। इति रक् दकारादेशो धातो
दीर्घश्च।) चतुर्व्वर्णान्तर्गतचतुर्थवर्णः।
पर्य्यायः। अवरवर्णः २ वृषलः ३ जघन्यजः
इत्यमरः॥ दासः ५ पादजः ६ अन्त्यजन्मा
जघन्यः ८ द्विजसेवकः ९। इति शब्दरत्नावली

ः १० । इति जटाधरः ॥ अन्त्यवर्णः ११
ः १२ । इति हेमचन्द्रः ॥ चतुर्थः १३ द्विज-
ः १४ उपासकः १५ । इति राजनिर्घण्टः ॥
द्वीपे तस्य संज्ञा मत्याङ्गः । शाल्मलद्वीपे
न्धरः । कुशद्वीपे कुलकः । क्रौञ्चद्वीपे
कः । शाकद्वीपे अनुव्रतः । पुष्करद्वीपे सर्व्वे
वर्णाः । अस्योत्पत्तिर्ब्रह्मणः पादात् । अस्य
त्वनिरूपितो धर्म्मः जीविका च ब्राह्मण-
त्रियवैश्यशुश्रूषा । अस्यैकाश्रमो गार्हस्थ्यः ।
श्रीभागवतम् ॥ * ॥ अथ शूद्रधर्म्मादि ।
प्राणामर्च्चनं नित्यं शूद्रधर्म्मो विधीयते ।
तदन्नग्राही शूद्रश्चाण्डालतां व्रजेत् ॥
ः कोटिसहस्राणि शतजन्मानि शूकरः ।
पदः शतजन्मानि शूद्रो विप्रधनापहा ॥
शूद्रो ब्राह्मणीगामी मातृगामी स पातकी ।
कुम्भीपाके पच्यते स यावद्वै ब्रह्मणः शतम् ॥
कुम्भीपाके तप्ततैले भुक्तः सर्पैरहर्निशम् ।
न्दश्च विकृताकारं कुरुते यमताड़नात् ॥
ततश्चाण्डालयोनिः स्यात् सप्तजन्मसु पातकी
..जन्मसु सर्पश्च जलौका सप्तजन्मसु ॥
..कोटिसहस्रञ्च विष्ठायां जायते कृमिः ।
..निक्रिमिः पुंश्चलीनां स भवेत् सप्तजन्मसु ॥
..र्णं व्रणकृमिः स्याच्च पातकी सप्तजन्मसु ।
..नौ योनौ भ्रमत्येवं न पुनर्जायते नरः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८५ अध्यायः ॥
अपि च ।
द्विजानां पादशुश्रूषा शूद्रैः कार्य्या सदा विभ
पादप्रक्षालनं गन्धैर्भोज्यमुच्छिष्टमात्रकम् ॥
तु चक्रुस्तदा चैव तेभ्यो भूयः पितामहः ।
शूद्रपार्थे मया पृथं तुरीये तु पदे कृताः ॥
द्विजानां चत्रवर्णानां वैश्यानाञ्च भवद्विधाः ।
..भ्यः शुश्रूषणा कार्य्या इत्यचाटीद्वयस्तदा ॥"
इति पाद्मे सृष्टिखण्डे १६ अध्यायः ॥
..कञ्च ।
शुश्रूषैव द्विजातीनां शूद्राणां धर्म्मसाधनम् ।
कारुकर्म्म तथाजीवः पाकयज्ञोऽपि धर्म्मतः ॥
इति गारुड़े ४८ अध्यायः ॥
शूद्राणां वासनिषेधो यथा,—
"धार्म्मिकैर्नाहृते ग्रामे न व्याधिबहुले भृशम् ।
[illegible] निवसेन्न [illegible] ॥"
शूद्राय मतिदाननिषेधो यथा,—
"न शूद्राय मतिं दद्यात् कृशरं पायसं दधि ।
नोच्छिष्टं वा मधु घृतं न च कृष्णाजिनं हविः ।
न चैवास्मै व्रतं दद्यात् न च धर्म्मान् वदेद्बुधः ॥"
इति कौर्म्मे उपविभागे १५ अध्यायः ॥ * ॥
शूद्राणां वेदाधिकारनिषेधो यथा —
"अतो वर्णा मया [illegible] ।
शूद्रा वेदविहीनाश्च [illegible] ॥"
इति वाराहे [illegible] अध्यायः ॥ * ॥
कर्म्मो [illegible] यथा,
"[illegible]
[illegible] ।

यदाह भगवान् साधुर्व्वासेति पुनः पुनः ॥"
इति विष्णुपुराणे ६ । २ । १२ ॥
तस्य मद्यपानादौ दोषो यथा,—
"तथा मद्यस्य पानेन ब्राह्मणीगमनेन च ।
वेदाक्षरविचारेण शूद्रश्चाण्डालतां व्रजेत् ॥"
इति शूद्रकमलाकरधृतपराशरवचनम् ॥
ब्राह्मणस्य तदन्नभोजननिषेधो यथा,—
"शूद्रान्नं ब्राह्मणोऽश्नन् वै मासं मासार्द्धमेव वा ।
तद्योनावभिजायेत सत्यमेतद्विदुर्बुधाः ॥
अथोदरस्थशूद्रान्नो मृतः श्वानोऽपि जायते ।
द्वादश दश चाष्टौ च गृध्रशूकरपुष्कराः ॥
उदरस्थितशूद्रान्नो ह्यधीयानोऽपि नित्यशः ।
जुह्वन् वापि जपन् वापि गतिमूर्द्ध्वं न विन्दति ॥
अमृतं ब्राह्मणस्यान्नं क्षत्त्रियान्नं पयः स्मृतम् ।
वैश्यस्य चान्नमेवान्नं शूद्रान्नं रुधिरं स्मृतम् ॥
तस्मात् शूद्रं न भिक्षेत यज्ञार्थं सद्द्विजातयः ।
श्मशानमिव सच्छूद्रस्तस्मात्तं परिवर्ज्जयेत् ॥
कणानामथवा भिक्षां कुर्य्याद्वातिविकर्षितः ।
सच्छूद्राणां गृहे कुर्व्वन् तत्पापेन न लिप्यते ॥
विशुद्धान्वयसञ्जातो निवृत्तो मद्यमांसतः ।
द्विजभक्तो वणिग्वृत्तिः शूद्रः स परिकीर्त्तितः ॥"
इति वृहत्पराशरसंहितायाम् ४ अध्यायः ॥ * ॥
अपि च । हारीतः ।
"शूद्रान्नेन तु भुक्तेन उदरस्थेन यो मृतः ।
स वै खरत्वमुष्ट्रत्वं शूद्रत्वञ्चाधिगच्छति ॥"
शूद्रान्नं शूद्रस्वामिकान्नं तद्दत्तमपि भोजन-
कालेतद्गृहावस्थितं यत्तदपि शूद्रान्नम् ।
तदाहाङ्गिराः ।
"शूद्रवेश्मनि विप्रेण क्षीरं वा यदि वा दधि ।
निवृत्तेन न भोक्तव्यं शूद्रान्नं तदपि स्मृतम् ॥"
अपरिग्रहात् साधात्तद्दत्ततण्डुलादि । न तु
तद्दत्तकपर्द्दकादिना क्रीतमपि । स्वगृहागते
पुनरङ्गिराः ।
"यथा यतस्ततो ह्यापः शुद्धिं यान्ति नदीं गताः ।
शूद्राद्विप्रगृहेष्वन्नं प्रविष्टन्तु सदा शुचि ॥
प्रविष्टं स्वत्वापादकप्रतिग्रहादिनेति शेषः ।
अतएव पराशरः ।
"तावद्भवति शूद्रान्नं यावन्न स्पृशति द्विजः ।
द्विजातिकरसंस्पृष्टं सर्व्वं तद्धविरुच्यते ॥"
स्पृशति प्रतिगृह्णातीति कल्पतरुः ॥ तच्च
संप्रोक्ष्य ग्राह्यमाह विष्णुपुराणम् ।
"संप्रोक्षयित्वा गृह्णीयाच्छूद्रान्नं गृहमागतम् ॥"
तच्च पाकान्तरे ग्राह्यमाहाङ्गिराः ।
"स्वपात्रे यत्तु विन्यस्तं शूद्रो यच्छति नित्यशः ।
पात्रान्तरगतं ग्राह्यं दुग्धं स्वगृहमागतम् ॥"
[illegible] स्वगृहमागतमपि शूद्रस्य [illegible]
[illegible] मामिषं गृह्यते । [illegible]
[illegible] सर्व्वथा शूद्रान्नं न भोक्तव्यम् । इति
[illegible] ॥ * ॥ शूद्रो [illegible]
[illegible] यथा,—

"शूद्रेषु दासगोपालकुलमित्रार्द्धसीरिणाम् ।
भोज्यान्नता गृहस्थस्य तीर्थसेवातिदूरतः ॥
एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः ।
निवर्त्तितानि कर्म्माणि व्यवस्थापूर्व्वकं बुधैः ॥"
इति तिथ्यादितत्त्वम् ॥
अपरञ्च ।
व्यास उवाच ।
"नाद्यात् शूद्रस्य विप्रोऽन्नं मोहाद्वा यदि वान्यतः ।
स शूद्रयोनिं व्रजति यस्तु भुङ्क्ते ह्यनापदि ॥
षण्मासान् यो द्विजो भुङ्क्ते शूद्रस्यान्नं विगर्हितम् ।
जीवन्नेव भवेत् शूद्रो मृतः श्वा चाभिजायते ॥
ब्राह्मणक्षत्त्रियविशां शूद्रस्य च मुनीश्वराः ।
यस्यान्नेनोदरस्थेन मृतस्तद्योनिमाप्नुयात् ॥"
कलौतरत्र शूद्रविशेषान्नभोजनविधिर्यथा,—
"आर्द्धिकः कुलमित्रञ्च गोपालो दासनापितौ ।
एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत् ॥
कुशीलवः कुम्भकारः क्षेत्रकर्म्मक एव च ।
एते शूद्रेषु भोज्यान्ना दत्त्वा स्वल्पं पणं बुधैः ॥
पायसं स्नेहपक्वञ्च यावकञ्चैव शक्तवः ।
पिण्याकञ्चैव तैलञ्च शूद्राद्ग्राह्यं द्विजातिभिः ॥
इति कौर्म्मे उपविभागे १६ अध्यायः ॥
अपि च ।
"कन्दुपक्वानि तैलेन पायसं दधिशक्तवः ।
द्विजैरेतानि भोज्यानि शूद्रगेहकृतान्यपि ॥" * ॥
अन्यच्च ।
"शूद्रास्तु ये दानपरा भवन्ति
व्रतान्विता विप्रपरायणास्तु ।
अन्नं हि तेषां सततं सुभोज्यं
भवेद्द्विजैर्दृष्टमिदं पुरातनैः ॥
तस्माद्दानं प्रकर्त्तव्यं प्रयत्नेन प्रयत्नतः ।
सर्व्वपापविनाशाय सर्व्वसम्पद्विवृद्धये ॥"
इति वह्निपुराणे हयदानाध्यायः ॥ * ॥
वैदिकेतरमन्त्रपाठे शूद्रादेरप्यधिकारः । वेद-
मन्त्रवर्ज्जं शूद्रस्येति छन्दोगाह्निकाचारचिन्ता-
मणिधृतस्मृतौ वेदेति विशेषणात् । एतच्च
पुराणमधिकृत्य ।
"अध्येतव्यं न चान्येन ब्राह्मणं क्षत्त्रियं विना ।
श्रोतव्यमिह शूद्रेण नाध्येतव्यं कदाचन ॥"
इति भविष्यपुराणवचनं पुराणस्मृतिपरम् ॥
पञ्चयज्ञादिष्वपि पौराणिकमन्त्रोऽपि
निषिद्धः शूद्रमधिकृत्य ।
"नमस्कारेण मन्त्रेण पञ्चयज्ञान् न हापयेत् ॥"
इति याज्ञवल्क्येन ॥
"[illegible] ।
[illegible] हि शूद्रस्य [illegible] ॥"
इति [illegible] ॥
[illegible] ।
"एवमेव विधिः प्रोक्तः शूद्राणां [illegible] ।
[illegible] ॥"
इति [illegible] ॥

नमस्कारेणेति तूष्णीमिति मन्त्रवर्जितमिति चाभिधानादेतत्परं वैदिकपरञ्च शूद्राधिकारे गोतमवचनम्। अनुमतोऽस्य नमस्कारो मन्त्र इति। सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्रीशूद्रयोर्नेच्छन्ति। सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्री शूद्रो यदि जानीयात् स मृतोऽधो गच्छतीति। इति तिथ्यादितत्त्वम्॥*॥*॥ प्रसङ्गादत्र कायस्थोत्पत्तिर्लिख्यते। पाद्मे सृष्टिखण्डे।

"सृष्ट्यादौ सदसत्कर्म्मज्ञप्तये प्राणिनां विधिः।
क्षणं ध्याने स्थितस्तस्य सर्व्वकायाद्विनिर्गतः॥
दिव्यरूपः पुमान् हस्ते मसीपात्रञ्च लेखनीम्।
चित्रगुप्त इति ख्यातो धर्म्मराजसमीपतः॥
प्राणिनां सदसत्कर्म्मलेखाय स निरूपितः।
ब्रह्मणातीन्द्रियज्ञानी देवाग्न्योर्यज्ञभुक् स वै।
भोजनाच्च सदा तस्मादाहुतिर्दीयते द्विजैः॥
ब्रह्मकायोद्भवो यस्मात् कायस्थो जातिरुच्यते।
नानागोत्राश्च तद्वंश्याः कायस्था भुवि सन्ति ये॥"*॥

प्रकारान्तरम् यथा, स्कान्दे रेणुकामाहात्म्ये।
"एवं इत्वार्ज्जुनं रामः सन्धाय निशितान् शरान्।
एक एव ययौ हन्तुं सर्व्वानेवातुरान् नृपान्॥
केचिद्वनमाश्रित्य केचित् पातालमाविशन्।
सगर्भा चन्द्रसेनस्य भार्य्या दाल्भ्याश्रमं ययौ॥
ततो रामः समायातो दाल्भ्याश्रममनुत्तमम्।
पूजितो मुनिना सद्योऽर्घ्यपाद्यासनादिभिः॥
ददौ मध्याह्नसमये तस्मै भोजनमादरात्।
रामस्तु भावयामास हृदिस्थं स्वमनोरथम्।
याचयामास रामाच्च कामं दाल्भ्यो महामुनिः॥
ततो द्वौ परमप्रीतौ भोजनं चक्रतुर्मुदा।
भोजनानन्तरं दाल्भ्यः पप्रच्छ भार्गवं प्रति।
त्वया प्रार्थितं देव तत्त्वं शंसितुमर्हसि॥
राम उवाच।
तवाश्रमे महाभाग सगर्भा स्त्री समागता।
चन्द्रसेनस्य राजर्षेः क्षत्रियस्य महात्मनः॥
तन्मे त्वं प्रार्थितं देहि हिंस्यं तां महामुने।
ततो दाल्भ्यः प्रत्युवाच ददामि तव वाञ्छितम्।
दाल्भ्य उवाच।
स्त्रियं गर्भसमं बाल तन्मे त्वं दातुमर्हसि।
ततो रामोऽब्रवीदाल्भ्यं यदर्थमहमागतः॥
तदिदानीमहं तस्य याचितवानसि।
प्रार्थितस्त्वया विप्र कायस्थो गर्भ उत्तमः॥
तस्मात् कायस्थ इत्याख्या भविष्यति शिशोः शुभाः॥
एवं रामो महाबाहुर्हित्वा तं गर्भमुत्तमम्॥
निःक्षत्रियां महीं कर्त्तुं प्रययावात्मनः प्रभुः।
कायस्थ एष उत्पन्नः क्षत्रिण्यां क्षत्रियात्ततः॥
रामाज्ञया स दाल्भ्येन क्षत्रधर्म्माद्बहिष्कृतः।
दत्तस्तस्मै क्षत्रधर्म्मश्चित्रगुप्तस्य यः स्मृतः॥
तद्गोत्राश्च कायस्था दाल्भ्यगोत्रास्ततोऽभवन्।
दाल्भ्योपदेशतस्ते वै धर्म्मिष्ठाः सत्यवादिनः॥
सदाचारपरा नित्यं रता हरिहरार्च्चने।
देवविप्रपितॄणाञ्च अतिथीनाञ्च पूजकाः॥"*॥

प्रकारान्तरम्।
"माहिष्यवनितासूतुर्वैदेहात् यः प्रसूयते।
स कायस्थ इति प्रोक्तस्तस्य धर्म्मो विधीयते॥
यत्नाद्विश्चायां माहिष्या वैश्याद्विप्राज्ञो वेदेहः।
लिपीनां देशजातानां लेखनं स समाचरेत्॥
गणकत्वं विचित्रञ्च बीजपाटी प्रभेदतः।
अधमः शूद्रजातिभ्यः पञ्चसंस्कारवानसौ॥
चातुर्व्वर्ण्यस्य सेवा हि लिपिलेखनसाधनम्।
व्यवसायः शिल्पकर्म्म तज्जीवनमुदाहृतम्॥
शिखां यज्ञोपवीतञ्च वस्त्रमारक्तमम्बरम्।
स्पर्शनं देवतानाञ्च कायस्थादौ विवर्ज्जयेत्॥"

इति कमलाकरभट्टकृतशूद्रधर्म्मतत्त्वम्॥

शूद्रकृत्य, क्ली, (शूद्रस्य कृत्यम्।) शूद्रकर्त्तव्यकर्म्म यथा,—
"प्रणम्य सच्चिदानन्दं शूद्राणां न्यायवर्त्तिनाम्।
श्राद्धाह्निकृत्ययोस्तत्त्वं वक्ति श्रीरघुनन्दनः॥"
तत्र मत्स्यपुराणम्।
"एवं शूद्रोऽपि सामान्यं वृद्धिश्राद्धञ्च सर्व्वदा।
नमस्कारेण मन्त्रेण कुर्य्यादामान्नवद्बुधः॥
दानं प्रधानं शूद्रः स्यादित्याह भगवान् प्रभुः।
दानेन सर्व्वकामाप्तिरस्य सञ्जायते यतः॥"
ततो दानमेवापेक्षितं न तु भोजनमपि। सामान्यसर्व्वजनकर्त्तव्यत्वेन प्रतिमासकृष्णपक्षादिविहितश्राद्धं आभ्युदयिकश्राद्धञ्च एवं द्विजातिवत् शूद्रोऽपि कुर्य्यादित्यन्वयः। नमस्कारेण मन्त्रेण नतुस्वयं पठितमन्त्रेण आमान्नवदित्यनेनजलसेकसिद्धान्नव्यावृत्तिः। खिन्नसमुदाहृतम्। इति वशिष्ठेन खिन्नस्यैवान्नत्वाभिधानात्। कन्दुपक्वस्य भृष्टत्वं नतु सिन्नत्वम्। हारीतेन खेदनभर्ज्जनयोः पृथक्कल्पमुक्तम्। यथा। आदीपनतापनखेदनभर्ज्जनपचनादिभिः अन्नमेति अस्यार्थः। आदीपनं काष्ठानाम् तापनं लोहादेः। खेदनं धान्यादेः। भर्ज्जनं यवादेः। पचनं तण्डुलादेः। इति पञ्चमी। सूना इति कल्पतरुः। अतएव खिन्नधान्येन व्यवच्छिद्यते।
"कन्दुपक्वानि तैलेन पायसं दधि सक्तवः।
द्विजैरेतानि भोज्यानि शूद्रगेहकृतान्यपि॥"
इति कूर्म्मपुराणवचनेन शूद्रकर्त्तृककन्दुपक्वादेर्भोज्यस्य भक्ष्यत्वेन श्राद्धे देयत्वं युक्तम्। कन्दुपक्वं जलोपसेकं विना केवलपात्रेण यदवह्निना पक्वम्। पायसं पाकेन काठिन्यविकारापन्नं दुग्धम्। परमान्नपरत्वे पुंलिङ्गनिर्द्देशापत्तेः॥ तथा चामरः। परमान्नन्तु पायस इति।
"दिने श्वोदर्शे प्राप्ते पाकेन भोजयेद्द्विजान्।
अयं विधिः प्रयोक्तव्यः शूद्राणां मन्त्रवर्ज्जितः॥"
इति श्राद्धचिन्तामणिधृतवराहपुराणवचनमपि कन्दुपक्वपरम्। एवन्तु एतद्वचनं सच्छूद्रपरं मैथिलोक्तं हेयम्। एवं आममांसस्यापि श्राद्धे देयत्व सामग्र्यादतत्त्वे ऽनुसन्धेयम्। तत्र द्रव्यदेवतात्यागार्थं ब्राह्मणेन मन्त्राः। पाठ्याः।

"अयमेव विधिः प्रोक्तः शूद्राणां अमन्त्रकस्तु शूद्रस्य विप्रो मन्त्रेण ..."
इति ...
अयं श्राद्धेतिकर्त्तव्यताको विधिः पाठरहितः। ...
यदमन्त्रस्येति पुनर्वचनं तत् परिभाषार्थञ्च। ततश्च
विप्रस्तदीयकर्म्मकारयितृब्राह्मणो ब्राह्मणेन तत्र मन्त्रः पठनीय ...
तत्र यजुर्व्वैदिको मन्त्रः। तथा च ...
"आर्षक्रमेण सर्व्वत्र शूद्रा ...
तस्माच्छूद्रः स्वयं कर्म्म यजुर्व्वेदोक्त ...
... दिना।
"चतुर्णामपि वर्णानां यानि धर्म्मशास्त्राणि राजेन्द्र शृणु ...
विशेषतस्तु शूद्राणां पावनानि अष्टादश पुराणानि चरितं राघवस्य।
रामस्य कुरुशार्दूल धर्म्मकामार्थसिद्धये।
तथोक्तं भारतं वीर पाराशर्य्येण ...
वेदार्थं सकलं ...
इति भविष्यपुराणवचनात्तेषां ...
विधिर्विशेषो योजयित्वा। अत्र ...
मन्त्रवर्ज्जं शूद्रस्येतिवचने ...
पुराणमन्त्रः शूद्रेण पठनीय इति,
तत्र वराहपुराणे शूद्राणां ...
मन्त्रेण इत्युपादानाच्च।
निषेधः प्रतीयते। एवं स्नानेऽपि।
"ब्रह्मक्षत्त्रविशामेव ...
तूष्णीमेव हि शूद्रस्य सनमस्कारकं ...
इत्यनेन नमस्कारविधानात् ...
"शूद्रस्य द्विजशुश्रूषा तथा ...
शिल्पैर्वा विविधैर्जीवेत् द्विजातिहित ...
भार्य्यारतिः शुचिर्भृत्यभर्त्ता श्राद्धक्रिया नमस्कारेण मन्त्रेण पञ्चयज्ञान् ...
इति नमस्कारमात्रविधानात् ...
णिकमन्त्रनिषेधः। ...
शूद्रस्य पौराणिकमन्त्रपाठः प्रतीयते।
"षष्ठेऽन्नप्राशनं मासि यद्वेष्टं मङ्गलं ...
इति मनुवचनात्। चूडा कार्य्या
याज्ञवल्क्यवचनाच्च संस्कारमात्रे ...
रोधेन कालान्तरस्य नाम ...
धानाच्च शूद्रादीनां नामकरणे ...
पद्धतियुक्तनामकरणस्य च प्रतीतेश्च
शूद्राणां पद्धतियुक्तनामाभिधानं ...
शूद्रस्यावसने दैवतीर्थेन ...
लिपेत् न लिखेत्। तथा च याज्ञ ...
"हृत्कण्ठतालुगाभिस्तु यथासंख्यं द्विजा ...
शूद्रः स्त्री च शूद्रश्च सकृत् ...
अन्ततो हृदयादिस्पर्शेन श्रोत्र ...

त्। अतएव सूद्राभिरित्युक्तं न तु
भिरिति।
द्रः शुध्यति नित्यं चालनाच करोष्ठयोः॥"
ह्मपुराणवचनञ्च। याज्ञवल्क्यः।
ब्राह्मेण तीर्थेन द्विजो नित्यमुप-
स्पृशेत्।"
तस्यैव आचमने ब्राह्मतीर्थोपादानात्
र्थोणं तेनाचमनम्। एवमेव मिता-
व्यक्तमुक्तं मरीचिना।
ह्मे दैविकं तीर्थं शूद्रजातिस्तथैव च।
चमनाच्छुद्धिरेतयोरेव चोभयोः॥" इति।
तरं इन्द्रियादिस्पर्शनन्तु ब्राह्मणवदेव।
न्तरन्तु आचमनेयिसामगन्धाह्निक-
रनुसन्धेयम्। इतिवन्द्यघटीयश्रीहरिहर
र्यात्मज-श्रीरघुनन्दनभट्टाचार्य्यविरचितं
ह्निकाचारतत्त्वं समाप्तम्॥
, पुं, (शूद्रस्य धर्मः।) शूद्रस्य शास्त्र-
ाचारः। तस्य विवरणं शूद्रशब्दमध्ये
म्॥
ः, पुं, (शूद्राणां प्रियः।) पलाण्डुः। इति
र्वण्टः॥ शूद्रस्य प्रियद्रव्ये, त्रि॥
, पुं, (शूद्रस्य प्रेष्यः।) शूद्रस्य परिचारक-
गादिः। इति केचित्॥
नं, क्ली, (शूद्रस्य शासनम्।) शूद्रस्याधि-
लेख्यपत्रादिकं। यथा,—
भिश्चन्द्रिरसपं शासनगर्भमित्यपि।
धर्मकीलः स्वाम्यकृतिः शूद्रशास-
नम्॥"
इति पुरुषोत्तमविकाण्डशेषः॥
स्त्री, (शूद्रस्य जातिः। शूद्र+"शूद्रा
महत्पूर्व्वा जातिः।" इति टाप्।) शूद्र-
स्त्री। इत्यमरः॥ (यथा, मनुः। ३। १३।
भार्य्या शूद्रस्य सा च स्वा च विशः
स्मृते॥")
, स्त्री, (शूद्रस्य अन्नम्।) शूद्रस्वामिकान्नम्।
—
ेण तु भुक्तेन उदरस्थेन यो मृतः।
पत्यमुक्त्वं शूद्रत्वमधिगच्छति॥"
शूद्रस्वामिकान्नम्। इति प्रायश्चित्ततत्त्वम्॥
न् शूद्रशब्दे द्रष्टव्यम्॥
र्य्यः, पुं, शूद्रा भार्य्या यस्य सः। शूद्रापत्नी
व्याकरणम्॥
ी, स्त्री, (शूद्रेण भार्य्या।) [illegible]।
शब्दचन्द्रिका॥
दी, [न्]पुं, (शूद्रां विन्दतीति। विद्+
णिनिः।) शूद्रविवाहकर्त्ता। यथा,—
ावेदी पतत्यत्रेरुतथ्यतनयस्य च।
[illegible] शुनकस्य [illegible] भृगोः॥"
इति [illegible]॥
स्त्री, (शूद्रस्य स्त्री। "पुंयोगादाख्यायाम्।"
१।४८। इति ङीष्।) शूद्रस्य भार्य्या।
मरः॥ (यथा, याज्ञवल्क्ये। १। ८१।

"विप्रात् मूर्द्धाभिषिक्तो हि क्षत्रियायां विशः
स्त्रियाम्।
अम्बष्ठः शूद्रां निषादो जातः पारशवोऽपि
वा॥")

शूनः, त्रि, (टु ओ श्वि गतिवृद्ध्योः + क्तः। "ओदि-
तश्च।" ८। २। ४५। इति निष्ठातस्य नः।
"वचिस्वपियजादीनां किति। ६। १। १५।
इति संप्रसारणम्।) हलः। ६। ४। २। इति
दीर्घः। "श्व्युकः किति।" ७। २। ११।
इति इडागमस्य न।) वर्द्धितः। इति व्याकर-
णम्॥ (यथा, सुश्रुते। ५। २।
"दुर्व्वर्णे ह्वरिते शूने जायते चास्य लोचने॥"
शून्ये, त्रि। यथा ऋग्वेदे। ७। १। ११।
मा शूने अग्ने निषदाम नृणाम्॥"
"हे अग्ने! शूने शून्ये पुत्रादिरहिते गृहे मा
निषदाम न निवसाम।" इति तद्भाष्ये सायणः)

शूनवान्, [त्] त्रि, (टु ओ श्वि गतिवृद्ध्योः +
क्तवतु।) वर्द्धितः। इति व्याकरणम्॥

शूना, स्त्री, (श्वयन्ति मृत्युं गच्छन्ति कीटादयो
यत्र। श्वि + क्तः। टाप्।) प्राणिवधस्थानम्।
इति हलायुधः॥ पञ्चविधा शूना यथा,—
"पञ्च शूना गृहस्थस्य चुल्ली पेषण्युपस्करः।
कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन्॥"
पञ्चशूनापापनाशो यथा, मनुः।
"अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्॥
पञ्चैतान् यो महायज्ञान् न हापयति शक्तितः।
स गृहेऽपि वसन्नित्यं शूनादोषैर्न लिप्यते॥"
इति प्रायश्चित्ततत्त्वम्॥
अधोजिह्विका। इति हारावली॥

शूनावान्, [त्] पुं, (शूना + मतुप्। मस्य वः।)
शूना विद्यते यस्य सः। कसाइ इति भाषा।
इति केचित्॥

शून्यं, क्ली, आकाशम्। इति शब्दचन्द्रिका॥
(यथा, भागवते। ६। १३। २०।
"स वै त्वाष्ट्रवधो भूयानपि पापचयो नृप।
नीतस्तेनैव शून्याय नीहार इव भानुना॥")
विन्दुः इति हेमचन्द्रः॥

शून्यः, त्रि, अतिशयेन ऊनः। अभावविशिष्टः।
असम्पूर्णः। खालि इति पारस्यभाषा। तत्-
पर्य्यायः। वशिकः २ तुच्छः ३ रिक्तकः ४।
इत्यमरः॥ शून्यम् ५। इति तट्टीकायां भरतः॥
"अपुत्रस्य गृहं शून्यं दिक् शून्या ह्यबान्धवा।
मूर्खस्य हृदयं शून्यं सर्व्वशून्या दरिद्रता॥"
इति चाणक्यम्॥
(शून्यायै प्राणिहिंसायै हितः इत्यस्मात्
शूना + यत्। यद्वा, शूने हितम्। शून + [illegible]
सम्प्रसारणं वा च दीर्घत्वम्। ५। १। २। [illegible]
[illegible] सम्प्रसारणं दीर्घत्वञ्च।)
निर्जनः। इति मेदिनी॥ (यथा, महा० [illegible]
"[illegible]
[illegible] शून्यं [illegible]॥")

शून्यमध्यः, पुं, (शून्यं मध्यं यस्य।) नलः।) इति
राजनिर्घण्टः॥ शून्यगर्भवस्तुनि, त्रि॥

शून्यवादी, [न्] पुं, (शून्यं वदतीति। वद् +
णिनिः।) सौगतः। इति जटाधरः॥ नास्ति-
कश्च॥

शून्या, स्त्री, नली। इति विश्वमेदिन्यौ॥ महा-
कण्टकिनी। इति शब्दचन्द्रिका॥ फणीमनसा
इति ख्याता। वन्ध्या। इति राजनिर्घण्टः॥

शून्यालयः, पुं, (शून्य आलयः।) निर्जनगृहम्।
अत्र शयननिषेधो यथा। "मार्कण्डेयः।
'शून्यालये श्मशाने च एकवृक्षे चतुष्पथे।
महादेवगृहे चापि शर्कराकोटपांशुषु॥
धान्यगोविप्रदेवानां गुरूणाञ्च तथोपरि।
न चापि भग्नशयने नाशुचौ नाशुचिः स्वयम्॥
नार्द्रवासा न नग्नश्च नोत्तरापरमस्तकः।
नाकाशे सर्व्वशून्ये च न च चैत्यद्रुमे तथा॥'
न स्वपेदित्यर्थः।" इत्याह्निकतत्त्वम्॥

शूपकारः, पुं, (शूपं करोतीति। कृ + अण्।)
शूद्राणां पाचकः। यथा,—
"शूद्रपाकोपजीवी यः शूपकार इति स्मृतः।"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः॥
अन्यत् दन्त्यसकारादौ द्रष्टव्यम्॥

शूर, ङ य ई स्तम्भे। हिंसे। इति कविकल्पद्रुमः॥
(दिवा०-आत्म०-स्तम्भे अक०-हिंसे सक०-सेट्।
निष्ठायामनिट्।) ङ य, शूर्य्यते। ई, शूर्णः।
स्तम्भो जडीभावः। इति दुर्गादासः॥

शूर, त् क ङ विक्रमे। इति कविकल्पद्रुमः॥
(अदन्तचुरा०-आत्म०-अक०-सेट्।) ङ, अशु-
शूरत्। विक्रमः उद्यमः। इति दुर्गादासः॥

शूरः, पुं, (शूरयति विक्रामतीति। शूर + अच्।
यद्वा, शवति शौर्य्यं प्राप्नोतीति। शु + "शुसिचि-
मिञां दीर्घश्च।" उणा० २। २५। इति क्रन्
दीर्घश्च।) वीरः। इत्यमरः॥ (यथा, महा-
भारते। १। १०८। ४।
"शूराय कृतविद्याय भक्ताय सुचिनोऽभवन्॥")
यादवः। स तु श्रीकृष्णस्य पितामहः। इति
मेदिनी॥ (यथा, भागवते। ८। २४। २६।
"शूरो विदूरथादासीत् भजमानस्तु तत्सुतः॥")
सूर्य्यः। इति त्रिकाण्डशेषः॥ सिंहः। शूकरः।
चित्रकः। आम्रः। लकुचः। मसूरः। इति
राजनिर्घण्टः॥

शूरणः, पुं, (शूर्य्यते इति। शूर हिंसे + ल्युः।)
कन्दविशेषः। ओल इति भाषा। तत्पर्य्यायः।
अर्शोघ्नः २ कन्दः ३। इत्यमरः॥ शूरणः ४।
इति तट्टीका॥ ओलः ५। इति जटाधरः॥
सोरः ६। इति मेदिनी॥ [illegible] ७ [illegible] ८
[illegible] ९ [illegible] १० दुर्नामारिः ११
[illegible] १२ [illegible] १३ [illegible] १४
[illegible] १५ [illegible] १६ [illegible] १७
[illegible] १८ [illegible] १९ [illegible] २०।
अस्य गुणाः। कटुत्वम्। रुक्षत्वम्। रोचकत्वम्।
दीपनत्वम्। [illegible]

शूलगुल्मनाशित्वम्। अल्पदोषकारित्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"शूरणो दीपनो रूक्षः कषायः कण्डुकृत् कटुः
विष्टम्भी विशदो रुच्यः कफार्शःकृन्तनो लघुः॥
विशेषादर्शसे पथ्यः प्लीहगुल्मविनाशनः।
सर्व्वेषां कन्दशाकानां शूरणः श्रेष्ठ उच्यते॥
दद्रूणां रक्तपित्तानां कुष्ठानां न हितो हि सः।
सन्धानयोगसंप्राप्तः शूरणो गुणकृत्तमः॥"

इति भावप्रकाशः॥

अन्यच्च।

"शूरणो दीपनो रुच्यः कफघ्नो विशदो लघुः।
विशेषादर्शसां पथ्यो वान्यकन्दस्तु दोषलः॥"

इति राजवल्लभः॥

श्रोभाकहत्त्वः। इति शब्दमाला॥

शूरणोद्भुजः, पुं, हरिद्राङ्गपक्षी। इति शब्दचन्द्रिका॥

शूरदेव, पुं, चतुस्त्रिंशतिभाव्यर्हदन्तर्गतार्हद्विशेषः। इति हेमचन्द्रः॥

शूरसेनः, पुं, (शूराः सेना यस्य।) राजविशेषः। देशविशेषः। यथा,—

"शूरसेनो यदुपतिर्मथुरामावसन् पुरीम्।
माथुरान् शूरसेनांश्च विषयान् बुभुजे पुरा॥"

इति श्रीभागवते १० स्कन्धे १ अध्यायः॥

शूर्प, क माने। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) पञ्चस्वरी। क, शूर्पयति धान्यं गृही। इति दुर्गादासः॥

शूर्पः, पुं क्ली,(शूर्पयति धान्यादीनिति। शूर्प+अच्। यद्वा शॄ हिंसायाम्+"पुष्पभ्यां निच।" उणा० ३। २६। इति पः। चकारात् सः, च कित्।) तण्डुलादिस्फोटनार्थं वंशादिनिर्म्मितपात्रविशेषः। कुला इति भाषा। तत्पर्य्यायः। प्रस्फोटनम् २। इत्यमरः॥ सूपः ३ कुम्यः ४ प्रस्फोटनी ५। इति शब्दरत्नावली॥ (यथा,

"विहाय शूर्पवत् दोषान् गुणान् गृह्णन्ति

माधवः॥")

दोषद्वयपरिमाषम्। इति शब्दमाला॥

शूर्पकः, पुं,(शूर्प इव प्रतिकृतिरस्य। "इवे प्रतिकृतौ।" इति कन्।) असुरविशेषः। स च कामदेवस्य शत्रुः। इति हेमचन्द्रः॥

शूर्पकर्णः, पुं, (सूर्पाविव कर्णौ यस्य।) हस्ती। इति त्रिकाण्डशेषः॥ कुम्भतुल्यश्रुतियुक्ते, त्रि (यथा, कथासरित्सागरे। ५५। १६५।

"घटोदरः शूर्पकर्णो गणाध्यक्षो महोत्-

कटः॥")

शूर्पकारातिः, पुं, (शूर्पकस्तन्नामासुरः अरातिर्यस्य।) कामदेवः। इति हलायुधः॥

शूर्पकारिः, पुं, (शूर्पकः अरिर्यस्य।) कामदेवः। इति हलायुधः॥

शूर्पणखा, स्त्री, (शूर्पौ इव नखा यस्याः। "पूर्व्वपदात् संज्ञायामगः।" ८। ४। ३। इति णत्वम्। "नखमुखात् संज्ञायाम्।" ४।१।५८। इति न ङीप्।) रावणभगिनी। इति शब्दमालाशब्दरत्नावल्यौ॥ (यथा, रघुः। १२। ३८।

"रूपं शूर्पणखानाम्नः सदृशं प्रत्यपद्यत॥")

शूर्पणखी, स्त्री, (शूर्पाकाराणि नखानि यस्याः। केवलयौगिकत्वे ङीप्।) रावणभगिनी। इति शब्दमालाशब्दरत्नावल्यौ॥

शूर्पपर्णी, स्त्री, (शूर्पाणि इव पर्णानि यस्याः। ङीप्।) शिम्बीविशेषः। इति शब्दचन्द्रिका॥

शूर्पवातः, पुं, (शूर्पस्य वातः।) शूर्पस्य वायुः। कुलार वाताम इति भाषा। तत्पर्य्यायः। फुत्फालः २। इति त्रिकाण्डशेषः॥

शूर्पश्रुतिः, पुं, (शूर्पौ इव श्रुती यस्य।) हस्ती। इति हारावली॥

शूर्पी, स्त्री, (शूर्प+गौरादित्वात् ङीप्) क्षुद्रसूर्पः। इत्युणादिकोषः॥ शूर्पणखा। इति शब्दमाला॥

शूर्म्मः, पुं, लौहप्रतिमा। इत्यमरटीकायां रायमुकुटः॥

शूर्म्मिः, स्त्री, लौहप्रतिमा। इति भरतद्विरूपकोषः॥

शर्म्मिका, } स्त्री, लौहप्रतिमा। इति शब्द-
शूर्म्मी, } रत्नावली॥

शूल, रुजायाम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) दीर्घी। शूलति लोकं रोगः। इति दुर्गादासः॥

शूलं, पुं,क्ली,(शूलति लोकानिति। शूल रोगे+अच्।) रोगविशेषः। अस्त्रविशेषः। वर्शा इति भाला इति च भाषा। इत्यमरः॥ मृत्युः। केतनः। विष्कम्भादिसप्तविंशतियोगान्तर्गतनवमयोगः। इति मेदिनी॥ तद्योगजातफलम्। यथा,—

"भीतो दरिद्रो दयितापियश्च
शूलोद्भवः शूल इव स्वबन्धोः।
विद्यामथाभ्यां रहितोऽथ शूली
करोति लोके न हितं कदाचित्॥"

इति कोष्ठीप्रदीपः॥

सुतीक्ष्णः। अयःकीलः। इति धरणिः॥ (यथा, महाभारते। १। १०७। १२।

"ततस्ते शूलमारोप्य तं मुनिं रक्षिणस्तदा।
प्रतिजग्मुर्महीपालं धनान्यादाय तान्यथ॥")

व्यथा। इति केचित्॥ विक्रेतव्यम्। यथा,—

"अट्टशूला जनपदाः शिवशूलाश्चतुष्पथाः।
प्रमदाः केशशूलिन्यो भविष्यन्ति कलौ युगे॥"

इति महाभारते आदिपर्व्व॥०॥

अथ शूलाधिकारः। तत्र शूलस्य सविकृष्टं निदानमाह।

"दोषैः पृथक् समस्तामद्वन्द्वैः शूलोऽष्टधा भवेत्
सर्व्वेष्वेतेषु शूलेषु प्रायेण पवनः प्रभुः॥"

प्रभुः कर्त्ता॥०॥ वातिकस्य विप्रकृष्टनिदानसंप्राप्तिलक्षणमाह।

"व्यायामयानादतिमैथुनाच्च
प्रजागराच्छीतजलातिपानात्।
कलायमुद्गाढकिकोरदूषात्
अत्यर्थरूक्षाध्यशनाभिघातात्
कषायतिक्तातिविरूढजात-
विरुद्धवल्लूरकशुष्कशाकैः।
विट्शुक्रमूत्रानिलवेगरोधात्
शोकोपवासादतिहास्यभाषात्
वायुः प्रवृद्धो जनयेद्धि शूलं
हृत्पृष्ठपार्श्वत्रिकवस्तिदेशे।
जीर्णे प्रदोषे च घनागमे च
शीते च कोपं समुपैति गाढम्
मुहुर्मुहुश्चोपशमप्रकोपे-
र्विण्मूत्रसंस्तम्भनतोदभेदैः।
संस्वेदनाभ्यञ्जनमर्द्दनाद्यैः
स्निग्धोष्णभोज्यैश्च शमं प्रयाति

व्यायामो मल्लयुद्धादिः। यानं मैथुनं स्त्रीसेवा। प्रजागर रात्रौ। योगात्। कलायस्त्रिपुटः। कोरदूषकः कोद्रवः। अध्यशनं भुक्तस्योपरि भोजनम्। लोष्टादिभिः ... विरूढमङ्कुरितमकलायशाकादि भक्ष्यम्। वल्लूरं शुष्कमांसम्। देशमाह। हृदयादिषु॥०॥ तत्र पृथगपि लक्षणं पठति।

"कफपित्तावरुद्धस्तु मारुतो रसमूर्च्छितः
हृदिस्थः कुरुते शूलमुच्छ्वासावरोधकः
स हृच्छूल इति ख्यातो रसमारुतकैः
पार्श्वशूलस्यापि लक्षणमाह।"
कफं निगृह्य पवनः शूचीभिरिव निस्तुदन्
पार्श्वस्थः पार्श्वयोः शूलं कुर्य्यादाध्मानं
तेनोच्छ्वसिति ...
निद्रां च नाप्नुयादेव पार्श्वशूलः ...
वस्तिशूलस्यापि लक्षणमाह।

"संरोधात् कुपितो वायुरस्थि संश्रितः
वस्तिवङ्क्षणनाडीषु तत्र शूलस्तु जायते।
विण्मूत्रवातसंरोधी वस्तिशूलः स उच्यते
प्रकृतमनुसरति। जीर्णे भुक्ते। प्रदोषे।
गमे रात्रिभवशीतेन वातप्रकोपात्।
वर्षासु मेघोदये च॥०॥ तथैव

क्षारातितीक्ष्णोष्णविदाहितैल-
निष्पावपिण्याककुलत्थयूषैः।
कट्वम्लसौवीरसुराविकारैः
क्रोधानलायासरविप्रतापैः॥
ग्राम्यातियोगादशनैर्विदग्धैः
पित्तं प्रकुप्याशु करोति शूलम्।
तृष्णामोहदाहार्त्तिकरं हि नाभ्यां
संस्वेदमूर्च्छाभ्रमशोषयुक्तम्॥
मध्यं दिने कुप्यति चार्द्धरात्रे
निदाघकाले जलदात्यये च।
शीतेऽतिशीतैः समुपैति शान्तिं
सुस्वादुशीतैरपि भोजनैश्च।"

शूल:

वी राजमाष:। सौवीरं सन्धानभेद:।
विकारैः। परिपक्वान्नसन्धानसमुत्पन्ना सुरा
। तस्या विकारैः। रविप्रताप: आतप:।
ातियोगो मैथुनाधिक्यम्। विदाहील्यु-
ि अगनैर्विदग्धै रिति बोधयति। अवि-
इयमुनोऽपि पित्तवशाद्विदाहित्वं भवति।
ाल्यये शरदि। शीते शीतकाले। शीतै
ादिभि: ॥ * ॥ श्लैष्मिकमाह।
"आनूपवारिजकिलाटपयोविकारै-
र्मांसेक्षुपिष्टकशरातिलशष्कुलीभि:।
अन्यैर्बलासजनकैरपि हेतुभिश्च
श्लेष्मा प्रकोपमुपगम्य करोति शूलम् ॥
हृल्लासकासमदनारुचिसंप्रसेकै-
रामाशये स्तिमितकोष्ठशिरोगुरुत्वै:।
भुक्ते: सदैव हि रुजं कुरुतेऽतिमात्रं
सूर्योदयेऽथ शिशिरे कुसुमागमे च ॥"
नूपं बहुजलदेशजं भक्ष्यम्। वारिजं शालू-
दि। किलाट:।
क्रं दध्ना समं क्षीरं विज्ञेया दधिकूर्चिका।
ेण तक्रकूर्चो स्यात्तयो: पिण्ड: किला-
टक: ॥"
ोविकार: पायसादि:। पिष्टं माषादि।
वै: गुर्वादिभि: स्तिमितमार्द्रचर्मावगुण्ठित-
य यत् कोष्ठं शिरश्च तयोर्गुरुत्वै: सह।
र्योदय इति त्रिधाविभक्तदिवसप्रथमभाग-
ोपलक्षणम्। शिशिरे तत्र कफस्यातिसञ्च-
त्। कुसुमागमे वसन्ते ॥ * ॥ द्वन्द्वजमाह।
द्दोषलक्षणैरेतैर्विद्याच्छूलं द्विदोषजम् ॥"
दोषजमाह।
"सर्व्वेषु देशेषु समस्तलिङ्गं
विद्याद्भिषक् सर्व्वभवं हि शूलम्।
सुकष्टमेनं विषवज्रतुल्यं
विवर्ज्जनीयञ्च वदन्ति तज्ज्ञा: ॥"
र्व्वेषु देशेषु हृत्पृष्ठपार्श्वबस्तिनाभ्यामाश-
षु। सर्व्वभवं त्रिदोषजं शूलं विन्द्यात्। सुकष्ट-
ाध्यं विषवज्रतुल्यं मारणात्मकत्वात् ॥*॥
ामजमाह।
"आटोपहृल्लासवमीगुरुत्व-
स्तैमित्यमानाहकफप्रसेकै:।
कफस्य लिङ्गेन समानलिङ्ग-
मामोद्भवं शूलमुदाहरन्ति ॥
ाफस्य कफशूलस्य। आमोद्भवं आमादुद्भवो
स्य तं शूलम्। अवामाच्छूले जाते पश्चा-
ोषसम्बन्ध:। अतएव शूलस्याष्टत्वमुक्तम्। म
र प्रथममामाशये भवति पश्चात् सम्बन्धिदोषै-
स्थिनाभिहृत्पार्श्वकुक्षिषु भवति यथा दोष-
सम्बन्ध: ॥ * ॥ आमशूलस्य दोषविशेषेण देश-
विशेषमाह।
"वातात्मकं बस्तिगतं वदन्ति
पित्तात्मकं चापि वदन्ति नाभ्याम्।
हृत्पार्श्वकुक्षौ कफसन्निविष्टं
सर्वेषु देशेषु च सन्निपातात् ॥"

शूल:

हृत्पार्श्वकुक्षौ हृत्पार्श्वाभ्यां सहिते कुक्षौ।
कफसन्निविष्टं कफेनाविष्टम् ॥*॥ तस्यान्तरोक्त-
मामशूलमाह।
"अतिमात्रं यदा भुक्तं पाचके मृदुतां गते।
स्थिरीकृतन्तु तत् कोष्ठे वायुनाहत्य तिष्ठति ॥
यदान्नं न गतं पाकं तच्छूलं कुरुते भृशम्।
मूर्च्छाध्मानविदाहांश्च हृत्क्लेशं सविलम्बिकम्
कम्पशातमतीसारं प्रमोहं जनयेदपि।
अविपाकोद्भवं शूलमेतमाहुर्मनीषिण: ॥"
अविपाकोद्भवं आमोद्भवमित्यर्थ: ॥ * ॥ शूल-
स्योपद्रवानाह।
"वेदनातितृषा मूर्च्छा आनाहो गौरवं ज्वर:।
भ्रमोऽरुचि: कृशत्वञ्च बलहानिस्तथैव च।
उपद्रवा दशैवैते यस्य शूलस्य नास्ति स: ॥"
शूलस्यैव भेदं परिणाममाह।
"स्वैर्निदानै: प्रकुपितो वायु: सन्निहितो यदा
कफपित्ते समाहत्य शूलकारी भवेद्बली ॥
भुक्ते जीर्य्यति यच्छूलं तदेव परिणामजम् ॥"
स्वै र्निदानैरित्यादिना निदानपूर्व्विका संप्राप्ति-
रुक्ता। भुक्ते जीर्य्यतीत्यादिना लक्षणमुक्तम्।
समाहत्य व्याप्य ॥*॥ अथास्योपद्रवनामानं शूल-
विशेषमाह।
"जीर्णे जीर्य्यत्यजीर्णे वा यच्छूलमुपजायते।
पथ्यापथ्यप्रयोगेण भोजनाभोजनेन वा।
न शमं याति नियमात् सोऽन्नद्रव उदाहृत: ॥"
नेदं शूलमसाध्यं चिकित्साभिधानात् ॥*॥ अथ
शूलस्य चिकित्सा।
"वमनं लङ्घनं स्वेदं पाचनं फलवर्त्तय:।
क्षारचूर्णानि गुटिका: शस्यन्ते शूलशान्तये ॥
विज्ञाय वातशूलन्तु स्वेदस्नेहैरुपाचरेत्।
शूलशय्याकुलस्य स्यात् स्वेद एव सुखावह: ॥
मृत्तिकां सजलां पाकाद्घनीभूतां पटे क्षिपेत्।
कृत्वा तत्पोटलीं शूली तया स्वेदं विधापयेत् ॥
इति मृत्तिकास्वेद: ॥
"कार्पासास्थिकुलत्थिकातिलयवैरेरण्डमूला-
तसी-
वर्षाभूशणबीजकाञ्जिकयुतैरेकीकृतैर्वा पृथक्
स्वेद: स्याद्य कूर्परोदरशिर:स्फिग्जानुपादा-
ङ्गुली-
गुल्फस्कन्धकटीरुजो विजयते नि:शेषवाता-
त्तिहा ॥"
इति कार्पासास्थ्यादिस्वेद: ॥
"तिलैश्च गुटिकां कृत्वा भ्रामयेज्जठरोपरि।
शूलं सुदुस्तरं तेन शान्तिं गच्छति सत्वरम् ॥
नाभिलेपाज्जयेच्छूलं मदनं काञ्जिकान्वितम् ॥
मदनं मयनफलम् ॥ * ॥
"बिल्वमेरण्डमूलन्तु क्वाथं कृत्वा मृतं पिबेत्।
हिङ्गुसौवर्च्चलोपेतं सद्य: शूलनिवारणम् ॥*॥
गुडशालियवा: क्षीरं सर्पि:पानं विरेचनम्।
जाङ्गलानि च मांसानि भेषजं पित्तशूलिनाम् ॥"
मणोरजततास्त्राणां भाजनानि गुरूणि च।
तोयेनपरिपूर्णानि शूलस्योपरि धारयेत् ॥*॥

शूल:

विरेचनं पित्तहरं प्रशस्तं
रसाश्च शस्ता: शशलावकानाम् ॥*॥
सगुडां घृतसंयुक्तां भक्षयेद्वा हरीतकीम्।
पक्तिशूलप्रशान्त्यर्थं धात्रीचूर्णं समाचिकम् ॥
शाल्यन्नं जाङ्गलं मांसमरिष्टं कटुकं रसम् ॥
मधूनि जीर्णगोधूमं कफशूले प्रयोजयेत् ॥"
अरिष्टं भेषजक्वाथमिह मद्यम् ॥ * ॥
"लवणत्रयसंयुक्तं पञ्चकोलं सरामठम्।
सुखोष्णेनाम्बुना पीतं कफशूलं प्रणाशयेत् ॥*
आमशूले क्रिया कार्य्या कफशूलप्रणाशिनी।
सेव्यमामहरं सर्व्वं मद्यमग्निविवर्द्धनम् ॥*॥
तीक्ष्णायश्चूर्णसंयुक्तं त्रिफलाचूर्णमुत्तमम्।
प्रयोज्यं मधुसर्पिर्भ्यां सर्व्वशूलनिवारणम् ॥"
तीक्ष्णा राजिका ॥*॥
"दारुहैमवतीकुष्ठशताह्वाहिङ्गुसैन्धवै:।
अम्लपिष्टै: सुखोष्णैश्च लिम्पेच्छूलयुतोदरम् ॥
मूलं वैल्वं तथैरण्डं चित्रकं विश्वभेषजम्।
हिङ्गुसैन्धवसंयुक्तं सद्य: शूलनिवारणम् ॥"
वातरोगान्तर्गताध्मानचिकित्सायां लिखितो
नाराचनामा रसोऽन्यश्च विरेचनं शूले हितम् ॥
"कुष्माण्डं तनु कृत्वा तु छित्त्वा घर्म्मे विशोषयेत्
स्थाल्यां निक्षिप्य तत् सर्व्वं पिधानेन विधाय
च ॥
चुल्ल्यां निवेश्य वह्निञ्च ज्वालयेत् कुशलो जन:।
यथा तत्र भवेद्भस्म किन्त्वङ्गारो दृढो भवेत् ॥
तदा निर्व्वापयेच्छीतं चूर्णितं चूर्णयेत्तु तम्।
माषद्वयमितं तावच्छुण्ठीचूर्णञ्च मिश्रितम् ॥
जलेन भक्षयेन्नित्यं महाशूलाकुलो नर:।
असाध्यमपि यच्छूलं तदप्येतेन शाम्यति ॥"
इति कुष्माण्डक्षार: ॥ * ॥
अथ परिणामशूलस्य चिकित्सा।
"लङ्घनं प्रथमं कुर्य्याद्वमनं सविरेचनम्।
पक्तिशूलोपशान्त्यर्थं तत्र वान्तिर्विधिर्यथा ॥
पीत्वा तु क्षीरमाकण्ठमदनक्वाथसंयुतम्।
कान्तारकस्य पौण्ड्रस्य कोशकारस्य वा रसम्
कषायं वाथ निम्बस्य कटुतुम्बीरसं वचाम्।
यथाविधि वमेद्धीमान् पक्तिशूलार्द्दितो जन: ॥
विवृता च तथा दन्त्यास्तैलेनैरण्डजेन वा।
दत्तं विरेचनं सद्य: पक्तिशूलं निवारयेत् ॥
विडङ्गं तण्डुलं व्योषं त्रिवृद्दन्तिसचित्रकम्।
सर्व्वाण्येतानि संगृह्य सूक्ष्मचूर्णानि कारयेत् ॥
गुडेन मोदकान् कृत्वा खादेदुष्णेन वारिणा।
जयेत्त्रिदोषजं शूलं परिणामसमुद्भवम् ॥"
इति विडङ्गादि मोदक: ॥ * ॥
"नागरतिलगुडकल्कं पयसा संपिष्य य: पुमान्
लिह्यात्।
उग्रं परिणतिशूलं नश्यति तस्य त्रिरात्रेण।
पीत शम्बूकजं भस्म जलेनोष्णेन तत्क्षणात्।
पक्तिजं नाशयत्येव शूलं विष्णुरिवासुरान् ॥
लोहपथ्याकणाशुण्ठीचूर्णं समधुसर्पिषा।
विलिहन् विनिहन्त्येव शूलं हि परिणामजम् ॥"
इति पथ्यादिलोहम् ॥ * ॥

शूलगुल्मनाशित्वम्। अर्शोदोषकारित्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"शूरणो दीपनो रूक्षः कषायः कण्डुकृत् कटुः
विष्टम्भी विशदो रुच्यः कफार्शःकृन्तनो लघुः॥
विशेषादर्शसे पथ्यः प्लीहगुल्मविनाशनः।
सर्व्वेषां कन्दशाकानां शूरणः श्रेष्ठ उच्यते॥
दद्रूणां रक्तपित्तानां कुष्ठानां न हितो हि सः।
सन्धानयोगसंप्राप्तः शूरणो गुणकृत्तमः॥"
इति भावप्रकाशः॥
अन्यच्च।
"शूरणो दीपनो रुच्यः कफघ्नो विशदो लघुः।
विशेषादर्शसां पथ्यो भाव्यकन्दस्तु दीपनः॥"
इति राजवल्लभः॥
श्योनाकवृक्षः। इति शब्दमाला॥

शूरलोहुशः, पुं, हरिद्राङ्गपक्षी। इति शब्दचन्द्रिका॥

शूरदेवः, पुं, चतुर्व्विंशतिभाव्यर्हदन्तर्गतार्हद्विशेषः। इति हेमचन्द्रः॥

शूरसेनः, पुं, (शूराः सेना यस्य।) राजविशेषः। देशविशेषः। यथा,—
"शूरसेनो यदुपतिर्म्मथुरामावसन् पुरीम्।
माथुरान् शूरसेनांश्च विषयान् बुभुजे पुरा॥"
इति श्रीभागवते १० स्कन्धे १ अध्यायः॥

शूर्प, क माने। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) पञ्चस्वरी। क, शूर्पयति धान्यं शूद्रः। इति दुर्गादासः॥

शूर्पः, पुं क्ली, (शूर्पयति धान्यादीनिति। शूर्प+अच्। यद्वा शॄ हिंसायाम्+"पुषशॄभ्यां निश्च।" उणा० ३। २६। इति पः। चकारात् स च कित्।) तण्डुलादिस्फोटनार्थं वंशादिनिर्म्मितपात्रविशेषः। कुला इति भाषा। तत्पर्य्यायः। प्रस्फोटनम् २। इत्यमरः॥ सूपः ३ कुम्भः ४ प्रस्फोटनी ५। इति शब्दरत्नावली॥ (यथा,
"विहाय सूर्पवत् दोषान् गुणान् गृह्णन्ति साधवः॥")
द्रोणद्वयपरिमाणम्। इति शब्दमाला॥

शूर्पकः, पुं, (शूर्पं इव प्रतिकृतिरस्य। "इवे प्रतिकृतौ। इति कन्।) असुरविशेषः। स च कामदेवस्य शत्रुः। इति हेमचन्द्रः॥

शूर्पकर्णः, पुं, (शूर्पाविव कर्णौ यस्य।) हस्ती। इति त्रिकाण्डशेषः॥ कुम्भतुल्यश्रुतियुक्ते, त्रि (यथा, कथासरित्सागरे। ५५। १६५।
"घटोदरः शूर्पकर्णो गणाध्यक्षो महोत्कटः॥")

शूर्पकारातिः, पुं, (शूर्पकस्यासुरस्य अरातिर्वैरी।) कामदेवः। इति जटाधरः॥

शूर्पकारिः, पुं, (शूर्पकः अरिर्यस्य।) कामदेवः। इति जटाधरः॥

शूर्पणखा, स्त्री, (शूर्पा इव नखा यस्याः। "पूर्व्वपदात् संज्ञायामगः।" ८। ४। ३। इति णत्वम्। "नखमुखात् संज्ञायाम्।" ४। १। ५८। इति न ङीप्।) रावणभगिनी। इति शब्दमालाशब्दरत्नावल्यौ॥ (यथा, रघुः। १२। ३८।
"रूपं शूर्पणखानाम्नः सदृशं प्रत्यपद्यत॥")

शूर्पणखी, स्त्री, (शूर्पाकाराणि नखानि यस्याः। केवलयौगिकत्वे ङीप्।) रावणभगिनी। इति शब्दमालाशब्दरत्नावल्यौ॥

शूर्पपर्णी, स्त्री, (शूर्पाणि इव पर्णानि यस्याः। ङीप्।) शिम्बीविशेषः। इति शब्दचन्द्रिका॥

शूर्पवातः, पुं, (शूर्पस्य वातः।) शूर्पस्य वायुः। कुलार वातास इति भाषा। तत्पर्य्यायः। फुत्फालः २। इति त्रिकाण्डशेषः॥

शूर्पश्रुतिः, पुं, (शूर्पौ इव श्रुती यस्य।) हस्ती। इति हारावली॥

शूर्पी, स्त्री, (शूर्प+गौरादित्वात् ङीप्) क्षुद्रसूर्पः। इत्युणादिकोषः॥ शूर्पणखा। इति शब्दमाला॥

शूर्म्मः, पुं, लौहप्रतिमा। इत्यमरटीकायां रायमुकुटः॥

शूर्म्मिः, स्त्री, लौहप्रतिमा। इति भरतद्विरूपकोषः॥

शूर्म्मिका, } स्त्री, लौहप्रतिमा। इति शब्दरत्नावली॥
शूर्म्मी, }

शूल, रुजायाम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) दीर्घी। शूलति लोकं रोगः। इति दुर्गादासः॥

शूलः, पुं, क्ली, (शूलति लोकानिति। शूल रोगे+अच्।) रोगविशेषः। अस्त्रविशेषः। बर्शा इति भाषा इति च भाषा। इत्यमरः॥ मृत्युः। केतनः। विष्कम्भादिसप्तविंशतियोगान्तर्गतनवमयोगः। इति मेदिनी॥ तद्योगजातफलम्। यथा,—
"भीतो दरिद्रो दयिताप्रियश्च
शूलोद्भवः शूल इव स्वबन्धोः।
विद्याभयाभ्यां रहितोऽथ शूली
करोति लोके न हितं कदाचित्॥"
इति कोष्ठीप्रदीपः॥
सतीक्ष्णः। अयःकीलः। इति धरणिः॥ (यथा, महाभारते। १। १०७। १२।
"ततस्ते शूलमारोप्य तं मुनिं रक्षिणस्तदा।
प्रतिजग्मुर्म्महीपालं धनान्यादाय तान्यथ॥")
व्यथा। इति केचित्॥ विक्रेतव्यम्। यथा,—
"अट्टशूला जनपदाः शिवशूलाश्चतुष्पथाः।
प्रमदाः केशशूलिन्यो भविष्यन्ति कलौ युगे॥"
इति महाभारते आदिपर्व्व॥*॥
अथ शूलाधिकारः। तत्र शूलस्य सन्निकृष्टं निदानमाह।
"दोषैः पृथक् समस्तामद्वन्द्वैः शूलोऽष्टधा भवेत्
सर्व्वेष्वेतेषु शूलेषु प्रायेण पवनः प्रभुः॥"
प्रभुः कर्त्ता॥*॥ वातिकस्य विप्रकृष्टनिदानसंप्राप्तिलक्षणमाह।
"व्यायामयानादतिमैथुनाच्च
प्रजागराच्छीतजलातिपानात्।
कलायमुद्गाढकिकोरदूषात्
अत्यर्थरूक्षाध्यशनाभिघातात्॥
कषायतिक्तातिविरूढजान्नविरुद्धवल्लूरकशुष्कशाकैः।
विट्शुक्रमूत्रानिलवेगरोधात्
शोकोपवासादतिहास्यभाषात्॥
वायुः प्रवृद्धो जनयेद्धि शूलं
हृत्पृष्ठपार्श्वत्रिकबस्तिदेशे।
जीर्णे प्रदोषे च घनागमे च
शीते च कोपं समुपैति गाढम्॥
मुहुर्म्मुहुश्चोपशमप्रकोपौ
विड्वातसंस्तम्भनतोदभेदैः।
संस्वेदनाभ्यञ्जनमर्द्दनाद्यैः
स्निग्धोष्णभोज्यैश्च शमं प्रयाति॥"
व्यायामो मल्लयुद्धादिः। यानं मैथुनं स्त्रीसेवा। प्रजागरं रात्रौ। योगात्। कलायस्त्रिपुटः। कोरदूषकः कोद्रवः। अध्यशनं भुक्तस्योपरि भोजनम्। लोष्टादिभिः। विरूढमङ्कुरितम् कलायशाकादि भक्ष्यम्। वल्लूरं शुष्कमांसम्। देशमाह। हृदयादिषु॥*॥ तत्र हृच्छूलस्य लक्षणं पठति।
"कफपित्तावरुद्धस्तु मारुतो रसमूर्च्छितः।
हृदिस्थः कुरुते शूलमुच्छ्वासावरोधकम्।
स हृच्छूल इति ख्यातो ..."
पार्श्वशूलस्यापि लक्षणमाह।
"कफं निगृह्य पवनः ...
पार्श्वस्थः पार्श्वयोः शूलं ...
तेनोच्छ्वसिति वक्त्रेण नरोऽभक्त...
निद्रां च नाप्नुयादेष पार्श्वशूलः"
बस्तिशूलस्यापि लक्षणमाह।
"संरोधात् कुपितो ...
बस्तिवङ्क्षणनाडीषु ततः शूलस्तु जायते।
विण्मूत्रवातसंरोधी बस्तिशूलः स ..."
प्रकृतमनुसरति। जीर्णे भुक्ते। प्रदोषे रात्रिभवशीतेन वातप्रकोपात्। वर्षासु मेघोदये च॥*॥
"क्षारातितीक्ष्णोष्णविदाहितैल-
निष्पावपिण्याककुलत्थयूषैः।
कट्वम्लसौवीरसुराविकारैः
क्रोधानलायासरविप्रतापैः।
ग्राम्यातियोगादशनैर्व्विदग्धैः
पित्तं प्रकुप्याशु करोति शूलम्।
तृष्णाविदाहार्त्तिकरं हि नाभ्यां
सस्वेदमूर्च्छाभ्रमशोषयुक्तम्॥
मध्यं दिने कुप्यति चार्द्धरात्रे
निदाघकाले जलदात्यये च।
शीतेऽतिशीतैः समुपैति शान्तिं
सुस्वादुशीतैरपि भोजनैश्च॥"

मूल:

ो राजमाष:। सौवीरं सन्धानभेद:।
कारे:। परिपक्वान्नसन्धानसमुत्पन्ना सुरा
तस्या विकारे:। रविप्रताप: आतप:।
तियोगो मैथुनाभियम्। विदाहोत्यु-
भ्रम्नेर्व्विदग्धै रिति बोधयति। अवि-
ात्सुनोऽपि पित्तवशाद्विदाहित्वं भवति।
ात्यये शरदि। शीते शीतकाले। शीते
दिभि: ॥ * ॥ श्लैष्मिकमाह।
आनूपवारिजकिलाटपयोविकारै-
ांसेक्षुपिष्टकशरातिलशष्कुलीभि:।
ान्यै र्व्वलासजनकैरपि हेतुभिश्च
ोपा प्रकोपमुपगम्य करोति शूलम् ॥
्हासकासमदनारुचिसंप्रसेकै-
ामाशये स्तिमितकोष्ठशिरोगुरुत्वै:।
ुक्तैः सदैव हि रुजं कुरुतेऽतिमात्रं
ूर्य्योदयेऽथ शिशिरे कुसुमागमे च ॥"
ं चपुजलदेशगतं भक्ष्यम्। वारिजं शालु-
ं। किलाट:।
' दध्ना समं क्षीरं विन्नं या दधिकूर्च्चिका।
च तक्रकूर्च्चो स्यात्तयो: पिण्ड: किला-
टक: ॥"
विकार: पायसादि:। पिष्टं माषादि।
: गुर्व्वादिभि: स्तिमितमार्द्रचर्म्मावगुण्ठित-
यत् कोष्ठं शिरश्च तयोर्गुरुत्वै: सह।
ोदय इति विधाविभक्तदिवसप्रथमभाग-
ालक्षणम्। शिशिरे तत्र कफस्यातिसञ्च-
। कुसुमागमे वसन्ते ॥ * ॥ द्वन्द्वजमाह।
दोषलक्षणैरेतैर्व्विद्याच्छूलं द्विदोषजम् ॥"
ोषजमाह।
"सर्व्वेषु देशेषु समस्तलिङ्गं
विद्याद्भिषक् सर्व्वभवं हि शूलम्।
सुकष्टमेनं विषवज्रतुल्यं
विवर्ज्जनीयञ्च वदन्ति तज्ज्ञा: ॥"
ेषु देशेषु हृत्पृष्ठपार्श्वत्रिकवस्तिनाभ्यामाश-
। सर्व्वभवं त्रिदोषजं शूलं विन्द्यात्। सुकष्ट-
ं विषवज्रतुल्यं मारणात्मकत्वात् ॥*॥
ाजमाह।
"आटोपहृल्लासवमीगुरुत्व-
स्तैमित्यमानाहकफप्रसेकै:।
कफस्य लिङ्गेन समानलिङ्ग-
मामोद्भवं शूलमुदाहरन्ति ॥
फस्य कफशूलस्य। आमोद्भवं आमादुद्भवो
स्य तं शूलम्। अथवामाच्छूले जाते पश्चा-
ाधमन्यत:। अतएव शूलस्याटत्वमुक्तम्। स
प्रथममामाशये भवति पश्चात् सन्निदोषै-
स्मिनाभिहृत्पार्श्वकुक्षिषु भवति यथा दोष-
न्यत्र:॥ * ॥ आमशूलस्य दोषविशेषेण देश-
ेषमाह।
"वातात्मकं वस्तिगतं वदन्ति
पित्तात्मकं चापि वदन्ति नाभ्याम्।
हृत्पार्श्वकुक्षौ कफसन्निविष्टं
सर्व्वेषु देशेषु च सन्निपातात् ॥"

मूल:

हृत्पार्श्वकुक्षौ हृत्पार्श्वाभ्यां सहिते कुक्षौ।
कफसन्निविष्टं कफेनाविष्टम् ॥*॥ तस्मात्तरोक्त-
मामशूलमाह।
"अतिमात्रं यदा भुक्तं पावके मृदुतां गते।
स्थिरीकृतन्तु तत् कोष्ठे वायुनाहृत्य तिष्ठति ॥
यदान्नं न गतं पाकं तच्छूलं कुरुते भृशम्।
मूर्च्छाध्मानविदाहांश्च हृत्क्लेशं सविलम्बिकम्।
कम्पवातमतीसारं प्रमोहं जनयेदपि।
अविपाकोद्भवं शूलमेतमाहुर्मनीषिण: ॥"
अविपाकोद्भवं आमोद्भवमित्यर्थ: ॥ * ॥ शूल-
स्योपद्रवानाह।
"वेदनातिव्यथा मूर्च्छा आनाहो गौरवं ज्वर:।
भ्रमोऽरुचि: कृशत्वञ्च बलहानिस्तथैव च।
उपद्रवा दशैवैते यस्य शूलस्य नास्ति स: ॥"
शूलस्यैव भेदं परिणाममाह।
"स्वैर्निदानै: प्रकुपितो वायु: सन्निहितो यदा
कफपित्ते समाहृत्य शूलकारी भवेद्बली ॥
भुक्ते जीर्य्यति यच्छूलं तदेव परिणामजम् ॥"
स्वैर्निदानैरित्यादिना निदानपूर्व्विका संप्राप्ति-
रुक्ता। भुक्ते जीर्य्यतीत्यादिना लक्षणमुक्तम्।
समाहृत्य व्याप्य ॥*॥ अथान्नद्रवनामानं शूल-
विशेषमाह।
"जीर्णे जीर्य्यत्यजीर्णे वा यच्छूलमुपजायते।
पथ्यापथ्यप्रयोगेण भोजनाभोजनेन वा।
न शमं याति नियमात् सोऽन्नद्रव उदाहृत: ॥"
नेदं शूलमसाध्यं चिकित्साभिधानात् ॥*॥ अथ
शूलस्य चिकित्सा।
"[illegible] लङ्घनं स्वेदं पाचनं फलवर्त्तय:।
[illegible] गुटिका: शस्यन्ते शूलशान्तये ॥
विज्ञाय वातशूलन्तु स्वेदस्नेहैरुपाचरेत्।
शूलशल्याकुलस्य स्यात् स्वेद एव सुखावह: ॥
मृत्तिकां सजलां पाकाद्घनीभूतां पटे क्षिपेत्।
कृत्वा तत्पोटलीं शूली तया स्वेदं विधापयेत् ॥
इति मृत्तिकास्वेद: ॥
"कार्पासास्थिकुलत्थिकातिलयवैरेरण्डमूला-
तसी-
वर्षाभूशणबीजकाञ्जिकयुतैरेकीकृतैर्व्वा पृथक्
स्वेद: स्यादथ कूर्परोदरशिर:स्फिग्जानुपादा-
ङ्गुली-
गुल्फस्तम्भकटीरुजो विजयते नि:शेषवाता-
त्तिहा ॥"
इति कार्पासास्थ्यादिस्वेद: ॥
"तिलैश्च गुटिकां कृत्वा भ्रामयेज्जठरोपरि।
शूलं सुदुस्तरं तेन शान्तिं गच्छति सत्वरम् ॥
नाभिलेपाज्जयेच्छूलं मदनं काञ्जिकान्वितम् ॥
मदनं मयनफलम् ॥ * ॥
"बिल्वमेरण्डमूलन्तु क्वाथं कृत्वा शृतं पिबेत्।
हिङ्गुसौवर्च्चलोपेतं सद्य: शूलनिवारणम् ॥*॥
गुड़शालियवा: क्षीरं सर्पि:पानं विरेचनम्।
जाङ्गलानि च मांसानि भेषजं पित्तशूलिनाम् ॥"
मयूरजततात्राणां भाजनानि गुरूणि च।
तोयेनपरिपूर्णानि शूलस्योपरि धारयेत् ॥*॥

मूल:

विरेचनं पित्तहरं प्रशस्तं
रसाश्च शस्ता: शशलावकानाम् ॥*॥
समुड़ां घृतसंयुक्तां भक्षयेद्वा हरीतकीम्।
पक्तिश्चाच्छूलशान्त्यर्थं धात्रीचूर्णं समाक्षिकम् ॥
शाल्यन्नं जाङ्गलं मांसमरिष्टं कटुकं रसम् ॥
मधूनि जीर्णगोधूमं कफशूले प्रयोजयेत् ॥"
अरिष्टं भेषजक्वाथमिद्धं मद्यम् ॥ * ॥
"लवणत्रयसंयुक्तं पञ्चकोलं सरामठम्।
सुखोष्णेनाम्बुना पीतं कफशूलं प्रणाशयेत् ।*
आमशूले क्रिया कार्य्या कफशूलप्रणाशिनी।
सेव्यमामहरं सर्व्वं सदाग्निविवर्द्धनम् ॥*॥
तीक्ष्णायश्चूर्णसंयुक्तं त्रिफलाचूर्णमुत्तमम्।
प्रयोज्यं मधुसर्पिर्भ्यां सर्व्वशूलनिवारणम् ॥"
तीक्ष्णा राजिका ॥*॥
"दारुहैमवतीकुष्ठशताह्वाहिङ्गुसैन्धवै:।
अम्लपिष्टै: सुखोष्णैश्च लिम्पेच्छूलयुतोदरम् ॥
मूलं वैल्वं तथैरण्डं चित्रकं विश्वभेषजम्।
हिङ्गुसैन्धवसंयुक्तं सद्य: शूलनिवारणम् ॥"
वातरोगान्तर्गताध्मानचिकित्सायां लिखितो
नाराचनामा रसोऽन्यच्च विरेचनं शूले हितम् ॥
"कुष्माण्ड तनु कृत्वा तु छित्त्वा घर्म्मे विशोषयेत्
स्थाल्यां निचिप्य तत् सर्व्वं पिधानेन विधाप्य
च ॥
चुल्ल्यां निवेश्य वह्निञ्च ज्वालयेत् कुशलो जन:।
यथा तत्र भवेद्भस्म किन्त्वङ्गारो दृढ़ो भवेत् ॥
तदा निर्व्वापयेच्छीतं चूर्णितं चूर्णयेत्तु तम्।
माषद्वयमितं तावच्छुण्ठीचूर्णञ्च मिश्रितम् ॥
जलेन भक्षयेन्नित्यं महाशूलाकुलो नर:।
असाध्यमपि यच्छूलं तदप्येतेन शाम्यति ॥"
इति कुष्माण्डक्षार: ॥ * ॥
अथ परिणामशूलस्य चिकित्सा।
"लङ्घनं प्रथमं कुर्य्याद्वमनं सविरेचनम्।
पक्तिशूलोपशान्त्यर्थं तत्र वान्तिर्विधिर्यथा ॥
पीत्वा तु क्षीरमाकण्ठमदनक्वाथसंयुतम्।
कान्तारकस्य पौण्ड्रस्य कोशकारस्य वा रसम्
कषायं वाथ निम्बस्य कटुतुम्बीरसं वचाम्।
यथाविधि वमेद्धीमान् पक्तिशूलार्द्दितो जन: ॥
त्रिवृता च तथा दन्त्यास्तैलेनैरण्डजेन वा।
दत्तं विरेचनं सद्य: पक्तिशूलं निवारयेत् ॥
विड़ङ्गं तण्डुलं व्योषं त्रिवृद्दन्तिसचित्रकम्।
सर्व्वाण्येतानि संगृह्य सूक्ष्मचूर्णानि कारयेत् ॥
गुड़ेन मोदकान् कृत्वा खादेदुष्णेन वारिणा।
जयेत्त्रिदोषजं शूलं परिणामसमुद्भवम् ॥"
इति विड़ङ्गादि मोदक: ॥ * ॥
"नागरतिलगुड़कल्कं पयसा सिद्धं च य: पुमान्
[illegible] लिह्यात्।
उग्रं परिणतिशूलं नश्येत्तस्य [illegible] विरात्रेण।
पीतं शम्बूकजं भस्म जलेनोष्णेन तत्क्षणात्।
पक्तिजं नाशयत्येव शूलं विष्णुरिवासुरान् ॥
लौहपथ्याक[illegible] समधुसर्पिषा।
[illegible] शूलं हि परिणामसम्भवं"
[illegible] पथ्यादिलौहम् ॥ * ॥

"नारिकेलं सतोयञ्च लवणेन सुपूरितम् ।
मृदावर्वेष्टितं शुष्कं पक्वं गोमयवह्निना ॥
पिप्पल्या भक्षितं हन्ति शूलं हि परिणा-
मजम् ।
वातिकं पैत्तिकञ्चापि श्लैष्मिकं सान्निपातिकम् ॥"
इति नारिकेलक्षार: ॥ * ॥
अथान्नद्रवस्य चिकित्सा ।
"अन्नद्रवाख्ये शूले तु न तावत् स्वास्थ्यमश्नुते
यावत् कटुकपीताम्लमन्नं न च्छर्दयेद्द्रवम् ॥
जातमात्रे जरत्पित्ते शूलमाशु विनाशयेत् ।
पित्तार्त्ते वमनं कृत्वा कफार्त्तञ्च विरेचनम् ॥
अन्नद्रवे च तत् कार्य्यं जरत्पित्ते यदीरितम् ।
जरत्पित्तेऽपि तत् पथ्यं प्रोक्तमन्नद्रवे तु यत् ॥
आमपक्वाशये शुद्धे गच्छेदन्नद्रव: शमम् ।
सत्येण्डरीं सलवणां सुस्विन्नां तैलपाचिताम् ॥
तादृशीं सर्पिषा खादेदन्नद्रवनिपीडित: ।
धात्रीफलभवं चूर्णमयश्चूर्णसमन्वितम् ।
यष्टीचूर्णेन वा युक्तं लिह्यात् क्षौद्रेण तद्भदे ।
श्यामकतण्डुलै: सिद्धं सिद्धं कोद्रवतण्डुलै: ॥
प्रियङ्गुतण्डुलै: सिद्धं पायसं ससितं हितम् ॥"
प्रियङ्गु: कङ्गुविशेष: ।
"गौडिकं गौरवं कन्दं कुष्माण्डमपि भक्षयेत् ।
कलाययवशक्तून् वा शक्तून् वा लाजसंयुतान् ॥"
गौडिकं गुडेन संस्कृतं पक्वान्नम् ॥ * ॥
"कुलत्थशक्तूनथवा दध्याद्याद्दधिकं तथा ॥
चणकानामथो शक्तून् कोद्रवस्यौदनं तथा ॥"
दधिकं दध्ना संस्कृतं भक्ष्यम् । महेरि इति
लोके ॥ * ॥
"गोधूममण्डकं तत्र सर्पिषा गुडसंयुतम् ॥
भक्षितं शीतदुग्धेन मर्दितं क्वथितं हितम् ॥
अन्नद्रवो दुश्चिकित्स्यो दुर्भिक्षो यो महागद: ।
तस्मात्तस्य प्रशमने परं यत्नं समाचरेत् ॥
अन्नद्रवे जरत्पित्ते वह्निर्मन्दो भवेद्यत: ।
तस्मादन्नानपानानि मात्राहीनानि कारयेत् ॥
कलाययवगोधूमा: श्यामाका: कोरदूषका: ।
राजमाषाश्च माषाश्च कुलत्था: कङ्गुशालय: ॥
दधिमुस्तरसं क्षीरं सर्पिर्गव्यं समाहिषम् ।
वास्तुकं कारवेल्ली च कर्कोटकफलानि च ॥
वर्हिणो हरिणा मत्स्या रोहिताद्या: कपि-
ञ्जला: ।
एतन्निवासये प्रोक्ता मता मुनिचिकित्सकै: ॥"
दधिमुस्तरसं दध्ना शुभ: कृतो रसो यस्य तत् ।
क्षीरं दधियुक्तं क्षीरमित्यर्थ: ॥ * ॥
"गुडामलक [illegible] नां चूर्णं प्रत्येकश: पलम् ।
त्रिफलं कोद [illegible] च तत् सर्वं मधुसर्पिषा ॥
समालोड्य सर्वं [illegible] यादचमात्रं प्रमाणत: ।
आदिमध्यावसाने [illegible] भोजनस्य निहन्ति तत् ॥
अन्नद्रवं जरत्पित्तमम्लपित्तं सुदारुणम् ।
परिणामसमुत्थं शूलं संवत्सरोत्थितम् ॥"
[illegible] गुडमण्डूरम् ॥ * ॥
"आयासं मैथुनं मद्यं [illegible] कटुकं रसम् ।
वैरोधं दूर क्रोधं विदग्धं [illegible] न्नजान् त्यजेत् ॥"

इति शूलामपरिणामशूलान्नद्रवजरत्पित्ताधि-
कार: । इति भावप्रकाश: ॥ * ॥ अपि च ।
"अर्कपत्रं गृहीत्वा तु मन्दाग्नौ तापयेच्छनै: ।
निष्पीड्य पूरयेत् कर्णौ कर्णशूलं विनश्यति ॥ * ॥
माक्षिकञ्च घृतं क्षौद्रं लवणं ताम्रभाजने ।
घृष्टं पय:समायुक्तं चक्षु:शूलहरं परम् ॥"
माक्षिकञ्च इत्यत्र ताम्बूलञ्च इति वा पाठ: ॥
"चूर्णमामलकस्यैव पीतं शूलहरं परम् ॥"
इति गारुडे १८३।१८५।१८४ अध्याया: ॥
किञ्च ।
"सामुद्रं सैन्धवं क्षारो राजिका लवणं विडम् ।
कटु लौहरज: किट्टं त्रिवृत् शूरणकं समम् ॥
दधिगोमूत्रपयसा मन्दपावकपाचितम् ।
एतस्माग्निबलं चूर्णं पिबेदुष्णेन वारिणा ॥
जीर्णे जीर्णे च भुञ्जीत माषादिघृतभोजनम् ।
नाभिशूलं मूत्रशूलं गुल्मप्लीहभवञ्च यत् ॥
सर्वे शूलहरं चूर्णं जठरानलदीपनम् ।
परिणामसमुत्थस्य शूलस्य च हितं परम् ॥"
इति गारुडे १९८ अध्याय: ॥
तस्य उपपापजत्वं यथा,—
"जलोदरयकृत्प्लीहशूलरोगव्रणानि च ।
श्वासाजीर्णज्वरच्छर्दिभ्रममोहगलग्रहा: ।
रक्तार्बुदविसर्पाद्या उपपापोद्भवा गदा: ॥"
इति शातातपीयकर्म्मविपाक: ॥

शूलक:, पुं, (शूल इव दुर्व्विनीतत्वात् । कन् ।)
दुर्वृत्तघोटक: । इति हलायुध: ॥ अत्र शूकल
इत्यपि पाठो दृश्यते । यथा,—
"विनीतस्तु साधुवाही दुर्व्विनीतस्तु शूलक: ।"
इति हेमचन्द्र: ॥

शूलग्रन्थि:, स्त्री, मालादूर्व्वा । इति राजनिर्घण्ट: ॥

शूलघातनं, क्ली, (शूलं तद्रोगं घातयतीति ।
हन+णिच्+ल्यु: ।) मण्डूरम् । इति शब्द-
चन्द्रिका ॥

शूलघ्न:, पुं, (शूलं हन्तीति । हन+टक् ।) तुम्बुरु-
द्रुम: । इति रत्नमाला ॥ शूलघातके, त्रि, ॥
(यथा, सुश्रुते । १ । ४५ ।
"सर्पिर्मण्डस्तु मधुर: सरो योनिश्रोत्राक्षि-
शिरसां शूलघ्न: इति ॥")

शूलद्विट्, [ष्] पुं, (शूलस्य द्विट् शत्रु: ।) हिङ्गु: ।
इति रत्नमाला ॥

शूलधन्वा, [न्] पुं, (शूलो धनुर्यस्य ।) शिव: ।
इति शब्दरत्नावली ॥

शूलधर:, पुं, (शूलस्य धर: ।) शिव: । इति शब्द-
रत्नावली ॥

शूलधरा, स्त्री, (शूलस्य धरा ।) दुर्गा । इति
शब्दरत्नावली ॥

शूलधारिणी, स्त्री, (शूलं धरति या । धृ+णिनि: ।)
दुर्गा । यथा,—
"सती साध्वी भवप्रीता भवानी भवमोचनी ।
आर्य्या दुर्गा जया आद्या त्रिनेत्रा शूल-
धारिणी ॥"
इति तन्त्रसारधृततदष्टुतनामस्तोत्रम् ॥

शूलधृक्, [ज्] स्त्री, (शूलं धरतीति,
क्विप् ।) दुर्गा । इति [illegible]
पुं ॥ (शूलधृत्-इत्येव क्वचित् पाठ: ।)

शूलनाशनं, क्ली, (शूलं नाशयतीति । [illegible]
+ल्यु: ।) सौवर्च्चललवणम् । इति [illegible]

शूलपर्वी, स्त्री, (शूलवत् पर्व्वमस्या: [illegible]
शुल्लीक्षुपम् । इति राजनिर्घण्ट: ॥

शूलशत्रु:, पुं, (शूलस्य शत्रु: ।) एरण्ड: [illegible]
शब्दचन्द्रिका ॥

शूलहन्त्री, स्त्री, ([illegible]
ङीप् ।) यवानी । इति राजनिर्घण्ट: ।

शूलहृत्, पुं, (शूलं हरतीति । हृ [illegible]
हिङ्गु । इति त्रिकाण्डशेष: ॥

शूला, स्त्री, दुष्टवधार्थकीलक: । वेश्या [illegible]
विग्रह: ॥

शूलाकृतं, त्रि, (शूलेन कृतम् । [illegible]
५ । ४ ।६५। इति डाच् ।) [illegible]
विद्धं पक्वमांसम् । काबाव् इति [illegible]
तत्पर्य्याय: । भटित्रम् २ शूल्यम् ३ [illegible]
वाचितारम् ४ । इति जटाधर: [illegible]
इति शब्दचन्द्रिका ॥ [illegible]
द्रष्टव्या: ॥

शूलिकं, क्ली, (शूल: निमित्तत्वे नास्त्यस्य [illegible]
+ठन् ।) शूलाकृतम् । इति [illegible]

शूलिक:, पुं, शशक: । इति हेमचन्द्र: । [illegible]
अस्यास्तीति । ठन् ।) शूलयुक्ते, त्रि ।

शूलिन:, पुं, माण्डीरवृक्ष: । इति [illegible]

शूलिनी, स्त्री, (शूलं अस्या अस्तीति [illegible]
इनि । ङीप् ।) दुर्गा । यथा,—
"खड्गिनी शूलिनी घोरा [illegible]
शङ्खिनी चापिनी [illegible]
इति

शूली, [न्] पुं, [illegible]
शिव: इत्यमर: ॥ (यथा, महाभारते [illegible]
८४ । ८४ ।
"ततो यक्षवटं गच्छेत् स्थानं [illegible]
शम्भ: । इति भावप्रकाश: । [illegible]
शूलरोगयुक्ते च त्रि । यथा,—
"वर्जयेद्विदलं शूली कुष्ठी [illegible]
इति [illegible]
तस्य कारणं प्रायश्चित्तञ्च यथा,—
"शूली परोपतापेन जायते तत्प्रमार्जने [illegible]
सोऽन्नदानं प्रकुर्व्वीत तथा रुद्र [illegible]
इति शातातपीयकर्म्मविपाक: [illegible]

शूली, स्त्री, तृणभेद: । तत्पर्य्याय: । [illegible]
अश्वाख्या ३ धुम्रमूलिका ४ [illegible]
लता ६ पिच्छिला ७ महिषीप्रिया ८ ।
गुणा: । पिच्छिलत्वम् । कोष्णत्वम् । [illegible]
गौल्यत्वम् । बलप्रदत्वम् । [illegible]
रुच्यत्वम् । दुग्धवृद्धिकारित्वञ्च ।
निघण्ट: ॥

।, स्त्री, सोमराजी । इति शब्दचन्द्रिका॥
(शूलेन संस्कृतम्। शूल+"शूलोतृखात्
४ । २ ।१७ । इति यत्) शूलाकृतम् ।
: ॥ 'कावाव् इति पारस्यभाषा । तत्-
कारो यथा,—
व्रगडादिमांसानि ग्रथितानि शलाकया।
तवणं दत्त्वा निर्धूमे दहने पचेत् ।
श्यमिति प्रोक्तं पाककर्म्मविचक्षणैः ॥"
णा: ।
बल्यं सुधातुल्यं रुच्यं वह्निकरं लघु ।
तहरं हृद्यं किञ्चित् पित्तहरं हि तत् ॥"
इति भावप्रकाशः ॥
र्य्यायः शूलाकृतशब्दे द्रष्टव्यः ॥
कः,पुं, (शूल्येन पाको यस्य ।)शूलविद्ध-
हमांसादि। इति पाकराजेश्वरः॥कावाव
ारस्यभाषा ॥
वि । इति कविकल्पद्रुमः॥(भ्वा०-पर०-
सेट् ।) शूयति । इति दुर्गादासः ॥
, पुं, शृगालः । इति शब्दचन्द्रिका ॥
,पुं.(सृजति मायामिति । सृज+ कालन्
तादित्वात् साधुः ।) पशुविशेषः । शेयाल्
ाषा । तत्पर्य्यायः । शिवा २ भूरिमायः ३
युः ४ मृगधूर्त्तकः ५ वञ्चकः ६ क्रोष्टुः ७
८ फेरवः ९ जम्बुकः १० । इत्यमरः ॥
: ११ जम्बूकः १२ मूत्रमत्तः १३ कुरवः१४
ासनः १५ वनश्वा १६ फेरः १७ श्वधूर्त्तः
इति शब्दरत्नावली ॥ शालावृक: १९
२० कटखादकः २१ । इति जटाधरः ॥
लुः २२ फेरण्डः २३ व्याघ्रनायकः २४ ।
राजनिर्घण्टः ॥ दैत्यभेदः । इति मेदिनी॥
:वः । निष्ठुरः । खलः । इति सारस्वता-
नम् ॥ भीरुः । इत्यनेकार्थकोषः ॥*॥
तशब्दादीनां शुभाशुभसूचकत्वं यथा,—
'धनार्थहेतुर्गतिशब्दहीनः
यदा शृगालः खलु दृष्टमात्रः ।
पश्चा हि वामा गतिरस्य शस्तो
शस्तो निनादो निशि यो बहूनाम् ॥
हुवा हुवेति प्रथमं ततस्तु
टटेति दीर्घः सुतरां रवो यः ।
श्यालजम्बुकानां स नतः प्रशस्त-
स्तदन्यरूपः कथितः प्रदीप्तः ॥
शृगालशब्दो भवने निशाया-
मुमाटनार्थं दिशि पश्चिमायाम् ।
प्राच्यां भयायोत्तरतः शिवाय
भवत्यवाच्यां मरणागमाय ॥"
इति वसन्तराजशाकुनम् ॥
लकण्टकः, पुं, (शृगालरोधकः कण्टको
।) क्षुपविशेषः । इति शब्दचन्द्रिका ॥
लकाटा इति भाषा ॥
लकोलिः, पुं, (शृगालप्रियः कोलिरस्य ।)
कोलिवृक्षः । शेयाकुल् इति भाषा । तत्-
यः । कर्कन्धुः २ । इति रत्नमाला ॥ बदरि-

"अथ घोण्टा ३ गोपघोण्टा ४ वदरं ५ वादि-
रश्च ६ तत् ।
वदरीसदृशे सूक्ष्मफले वृक्षे चतुष्टयम् ॥"
इति शब्दरत्नावली ॥
शृगालघण्टी, स्त्री, कोकिलाक्षः । इति राज-
निर्घण्टः ॥
शृगालजम्बुः, स्त्री, (शृगालस्य जम्बुरिव ।)
गोडुम्बः । घोण्टाफलम् । इति मेदिनी ॥
शृगालविन्ना, स्त्री, (शृगालैर्विन्ना ।)पृश्निपर्णी ।
इति राजनिर्घण्टः ॥
शृगालिका, स्त्री, शृगालपत्नी । त्रासात् पला-
यनम् । इति मेदिनी ॥ भूमिकुष्माण्डः इति ।
जटाधरः ॥ क्षुद्रशृगालः । खेँकशेयाली । इति
भाषा । तत्पर्य्यायः । लोमालिका २ दीप्त-
जिह्वा ३ किखिः ४ उल्कामुखी ५ । इति
त्रिकाण्डशेषः ॥
शृगाली, स्त्री, विद्रवः । पलायनमिति यावत् ।
इति त्रिकाण्डशेषः । कोकिलाक्षः । विदारी ।
इति राजनिर्घण्टः ॥ शृगालिका च ॥
शृङ्खलः, त्रि, पुंसां कट्याभरणम् । गोट् इति
भाषा॥ हस्त्यादीनां लौहमयपादबन्धोपकरणम्
धाँदु इति दाँडुका इति च भाषा । तत्पर्य्यायः।
अन्दुकः २ निगडः ३ । इत्यमरः ॥ शृङ्खला ४।
इति तट्टीकायां भरतः ॥(यथा, रघुः ।५।७२ ।
"शय्यां जहात्युभयपक्षविनीतनिद्राः
स्तम्बेरमा मुखरशृङ्खलकर्षिणस्ते ॥")
लौहरज्जुः । शिकल वेड़ि इत्यादि भाषा ॥
बन्धनम् । इति हेमचन्द्रः ॥
शृङ्खलकः, पुं, (शृङ्खलं बन्धनमस्य । "शृङ्खलमस्य
बन्धनं करभे ।" ५ । २ । ७९ । इति कन् ।)
उष्ट्रः । इति राजनिर्घण्टः ॥ (यथा, माघे ।
१२ । ७ ।
तीव्रोत्थिताम्तावदसह्यरंहसो
विशृङ्खलं शृङ्खलकाः प्रतस्थिरे ॥")
पलायननिषेधाय पादेषु दारुमयपाशलम्बित-
करभः । इत्यमरभरतौ ॥(स्वार्थे कन् ।) शृङ्-
खल ॥
शृङ्खला,स्त्री, निगड़ः । पुंस्कटीवस्त्रबन्धः । इति
मेदिनी ॥ अन्यत् शृङ्खलशब्दे द्रष्टव्यम् ॥
शृङ्खलितः, त्रि, (शृङ्खलो जातोऽस्येति । इतच् ।)
शृङ्खलायुक्तः । निगड़ितः । इति धनञ्जयः ॥
शृङ्खली, स्त्री, कोकिलाक्षः । इति राजनिर्घण्टः॥
शृङ्गं, क्ली, (शृ हिंसे+"शृणातेर्ह्रस्वश्च ।" उणा०
१ । १२५ । इति गन् । धातोर्ह्रस्वत्वं किच्च
नुट् च प्रत्ययस्य ।) पर्व्वतोपरिभागः । तत्-
पर्य्यायः । कूटम् २ कूटः ३ शिखरम् ४ । इत्य-
मरः ॥ दन्तः ५ प्राग्भारः ६ । इति जटाधरः ॥
शैलाग्रम् ७ । इति त्रिकाण्डशेषः ॥ (यथा,
रघुः । १३ । २६ ।
पतद्भिरेभोम्बुदतः पुरस्ता-
दाविर्भवत्यम्बरलेखि शृङ्गम् ॥")
सानुः । इति नानार्थे अमरः ॥ प्रभुत्वम् ।
चिह्नम् । क्रीडाजलयन्त्रम् । (यथा रघुः १६ ।७० ।
"वर्णोदकैः काञ्चनशृङ्गमुक्तै-
स्तमायताक्ष्यः प्रणयादसिञ्चन् ॥")
विषाणम् । (यथा, रघुः । १६ । १२ ।
"वन्यैरिदानीं महिषैस्तदम्भः
शृङ्गाहतं क्रोशति दीर्घिकाणाम् ॥")
उत्कर्षः । इति मेदिनी ॥ (यथा, रघुः ।८।६२ ।
"शृङ्गं स दृप्तविनयाधिकृतः परेषा-
मत्युच्छ्रितं न ममृषे न तु दीर्घमायुः ॥"
कङ्कम् । (यथा, कुमारे । ७ । ४० ।
"विमानशृङ्गाण्यवगाहमानः
शशंस सेवावसरं सुरेभ्यः ॥")
तीक्ष्णम् । पद्मजम् । इति शब्दरत्नावली ॥
(कोटिः । यथा, कुमारे । २ । ६४ ।
"अथ सललितयोषिद् भ्रूलताचारुशृङ्गं
रतिवलयपदाङ्के चापमासज्य कण्ठे ॥"
स्तनम् । यथा, भागवते । ५ । २ । ११ ।
"किं सम्भृतं रुचिरयोर्द्विज शृङ्गयोस्ते
मध्ये कृशो वहसि यत्र दृशिः श्रिता मे ॥"
"स्तनावाशङ्क्याह । शृङ्गयोः स्तनयोः किं
सम्भृतं किं पूर्णमस्ति मनोहरं किञ्चिदस्ति इत्ये-
तावत् जानामि ।"इति तट्टीकायां स्वामी ॥*॥)
महिषादिशृङ्गनिर्म्मितवाद्यविशेषः । शिङ्गा
इति भाषा । यथा,—
"क्वचिद्वनाशाय मनो दधद्व्रजात्
प्रातः समुत्थाय वयस्यवत्सपान् ।
प्रबोधयन् शृङ्गरवेण चारुणा
विनिर्गतो वत्सपुरःसरो हरिः ॥"
इति श्रीभागवते १० स्कन्धे १२ अध्यायः ॥
कामोद्रेकः । यथा, साहित्यदर्पणे । ३ ।२१०।
"शृङ्गं हि मन्मथोद्भेदस्तदागमनहेतुकः ।
उत्तमप्रकृतिप्रायो रसः शृङ्गार इष्यते ॥"*॥
गोशृङ्गभङ्गप्रायश्चित्तं यथा । भवदेवभट्टधृत-
यमवचनम् ।
"अस्थिभङ्गं गवां कृत्वा लाङ्गूलच्छेदनं तथा ।
पाटने कर्णशृङ्गाणां मासार्द्धन्तु यवान् पिबेत् ॥"
अङ्गिराः ।
"शृङ्गभङ्गेऽस्थिभङ्गे च चर्म्मनिर्म्मोचनेऽपि वा ।
दशरात्रं चरेद्धर्म्मं सुस्था सा यदि गौर्भवेत् ॥"
भवदेवभट्टहरिनाथोपाध्यायधृतं संवर्त्तवचनम्।
"शृङ्गभङ्गेऽस्थिभङ्गे च कटिभङ्गे तथैव च ।
यदि जीवति षण्मासान् प्रायश्चित्तं न विद्यते ॥"
अत्र षण्मासोत्तरमरणे तद्दोषगमनाय प्राय-
श्चित्तं नास्ति तदभ्यन्तरमरणे वधप्रायश्चित्तं
भवति । एवञ्च शृङ्गभङ्गादिनिमित्तकपापे पृथक्
प्रायश्चित्तं न कर्त्तव्यम् । वधप्रायश्चित्तेनैव
गुरुणा प्रसङ्गात्तदपगमसिद्धेः । षण्मासोत्तरन्तु
शृङ्गभङ्गादिनिमित्तकपृथक्मासार्द्धादिकं पादं
प्राजापत्यं वा कर्त्तव्यम् । इति प्रायश्चित्ततत्त्वम्॥
शृङ्गः, पुं, (शृ+गन् । उणा० १ । १२५ ।) कूर्च-
शीर्षवृक्षः । इति मेदिनी ॥ मुनिभेदः । इति
शब्दरत्नावली ॥

शेफालिः, स्त्री, (शेरते इति शेफाः शयनशालिन-स्तादृशा अलयो भृङ्गा यत्र ।) शेफालिका । इति शब्दरत्नावली ॥

शेफालिका, स्त्री, (शेफालि + स्वार्थे कन् ।) पुष्पवृक्षविशेषः । शिउली इति भाषा ॥ (यथा,—

"शेफालिकां विदलितामवलोक्य तन्वी
प्राणान् कथञ्चिदपि धारयितुं प्रभुः सा ।
आकर्ण्य सम्प्रति रुतं चरणायुधानां
किंवा भविष्यति न वेद्मि तपस्विनी सा ॥"
इत्युद्भटः ॥)

तत्पर्य्यायः । सुवहा २ निर्गुण्डी ३ नीलिका ४ । इत्यमरः ॥ चत्वारि शेफालिकामात्रे । शिय-नीति ख्यातनीलपुष्पायां शेफालिकामिति केचित् । शेफालिकादिद्वयं शेफालिकामात्रे निर्गुण्ड्यादिद्वयं नीलपुष्पशेफालिकायामिति केचित् । इति तट्टीकायां भरतः ॥ शेफाली ५ मल्लिका ६ रजनीहासा ७ निशिपुष्पिका ८ । सा शुक्ला चेत् श्वेतसुरसा ९ भूतवेशी १० । इति शब्दरत्नावली ॥ शुक्लाङ्गी ११ शीत-मञ्जरी १२ विजया १३ वातारिः १४ भूत-केशी १५ । अस्या गुणाः । कटुत्वम् । तिक्त-त्वम् । उष्णत्वम् । रूक्षत्वम् । वातकफाङ्ग-सन्धिवातगुदवातादिदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

शेफाली, स्त्री, (शेफालि + कृदिकारादिति वा ङीष् ।) शेफालिका । इति शब्दरत्नावली ॥ नीलसिन्धुवारः । इति भावप्रकाशः ॥

शेमुषी, स्त्री, (शेते इति शेः मोहः । शी + विच् । तं मुष्णातीति । मुष स्तेये + मूलविभुजादित्वात् कः । गौरादित्वात् ङीष् । इत्यमरटीका ।) बुद्धिः । इत्यमरः । १ । ५ । १ ॥ (यथा, राज-तरङ्गिण्याम् । ३ । २०६ ।

"विपक्ष हि विपर्य्येति तत्त्वज्ञस्यापि शेमुषी ॥"

शेल, ऋ चालगत्योः । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) ऋ, अशिशेलत् । इति दुर्गादासः ॥

शेलुः, पुं, (शेलतीति । शेल गतौ + उः ।) बहु-वारवृक्षः । इत्यमरः ॥ (यथा, सुश्रुते ।४।३८।

"शिलार्य्यैरावतीशेलुशाल्मलीधन्वनाङ्कुराः ॥"

तत्फलमपि । यथा, मनुः । ५ । ६ ।

"शेलुं गव्यञ्च पेयूषं प्रयत्नेन विवर्ज्जयेत् ॥")

शेवः, पुं, (शेते रेतःपातानन्तरमिति । शी + "इण्शीङ्भ्यां वन् ।" उणा० १ । १५२ । इति वन् ।) मेढ्रः । वह्निः । उच्चे, त्रि । इत्युणादिकोषः ॥ (क्ली, सुखम् । इति निघण्टुः । ३ । ६ ॥ त्रि, सुखकरम् । यथा, ऋग्वेदे । १ । १८ । ६ ।

"मित्रं न शेवं दिव्याय जन्मने ॥"

"मित्रं न शेवं यथा सखा सुखकरो भवति तद्वत् सुखकरमित्यर्थः ।" इति तद्भाष्ये सायणः ॥)

शेवधिः, पुं, (शेवं सुखं धीयतेऽस्मिन्निति । धा + कः ।) निधिः । इत्यमरः ॥ (यथा, मनुः । २ । ११४ ।

'विद्या ब्राह्मणमेत्याह शेवधिस्तेऽस्मि रक्ष माम् ।
असूयकाय मां मादास्तथा स्यां वीर्य्यवत्तमा ॥"

शेवलं, क्ली, शैवालम् । इति शब्दरत्नावली ॥ (मनुष्यनाम । इति पाणिनिः । ५ । ३ । ८४ ॥)

शेवलिनी, स्त्री, (शेवलं शैवालमस्या अस्तीति । इनिः ।) नदी । इति राजनिर्घण्टः ॥

शेवालं, क्ली, (शेते जले इति । शी + "शीङो धुक्लग्वलञ्वालनः ।" उणा० ४ । ३८ । इति वालन् ।) शैवालम् । इति शब्दरत्नावली ॥ (यथा, राजेन्द्रकर्णपूरे । २५ ।

"शङ्के पङ्के पतति यतते बालशेवालमूले
कूले लोलं किमपि कुरुते कर्म्म वैकुण्ठकूर्म्मः ॥"

शेवाली, स्त्री, आकाशमांसी । इति राजनिर्घं ॥

शेषं, क्ली, (शिष्यते यदिति । शिष + घञ् ।) प्रसादः । इति मेदिनी । षे, २८ ॥

शेषः, पुं, (शेषति सङ्कर्षतीति । शिष हिंसायाम् + अच् ।) सङ्कर्षणः । स तु बलदेवः । (यथा, माघे । २ । ६८ ।

"निशम्य ताः शेषगवीरभिधातुमधोक्षजः ।
शिष्याय बृहतां पत्युः प्रस्तावमादिशद् दृशा ॥"

शिष वधे + भावे घञ् ।) वधः । अनन्तः । स च सर्पराजः । इति मेदिनी ॥ (यथा, कुमारे । ३ । १ ।

व्यादिश्यते भूधरतामवेक्ष्य
कृष्णेन देहोद्वहनाय शेषः ॥")

तस्य ध्यानं यथा,—

"फणासहस्रसंयुक्तं चतुर्ब्बाहुं किरीटिनम् ।
नवाम्रपल्लवाकारं पिङ्गलश्मश्रुलोचनम् ॥
पीताम्बरधरं देवं शङ्खचक्रगदाधरम् ।
कराग्रे दक्षिणे पद्मं गदां तस्याप्यधःकरे ।
दधानं सर्व्वलोकेशं सर्व्वाभरणभूषितम् ।
क्षीराब्धिमध्ये श्रीमन्तमनन्तं पूजयेत्ततः ॥"
इति भविष्यपुराणम् ॥

गजः । नागः । स्वीकृतेतरवस्तु । इत्यजयपालः ॥ भगवतो द्वितीया मूर्त्तिः । यथा,—

"एका भगवतो मूर्त्तिर्ज्ञानरूपा शिवामला ।
वासुदेवाभिधाना सा गुणातीता सुनिष्कला ॥
द्वितीया कालसंज्ञान्या तामसी शेषसंज्ञिता ।
निहन्ति सकलांश्चान्ते वैष्णवी परमा तनुः ॥"
इति कौर्म्मे ४८ अध्यायः ॥

शेषशयनप्रकारो यथा,—

"अनन्तस्तत्र गत्वा तु यत्र क्षीरोदसागरः ।
तत्र स्वयं श्रिया युक्तं सुप्रसन्नं जनार्द्दनम् ॥
तस्योपधानमकरोदनन्तो दक्षिणां फणाम् ।
उत्तरां पादयोश्चक्रे उपधानं महाबलः ।
तालवृन्तं तदा चक्रे स शेषः पश्चिमां फणाम् ॥
स्वयन्तु वीजयामास शेषरूपी जनार्द्दनम् ॥
शङ्खं चक्रं नन्दकासिमिषुधी द्वे महाबलः ।
ऐशानयाथ फणया स दधे गरुडं तदा ॥
गदां पद्मञ्च शार्ङ्गञ्च तथैव विविधायुधम् ।
यानि चान्यानि तस्याथ आग्नेय्या फणया दधौ ॥
एवं कृत्वा स्वकं कार्य्यं शयनीयं तदा हरेः ।
भूतभव्यजगन्नाथं पराणपतिं हरिम् ।
दधार शिरसानन्तः
एवं ब्रह्मदिनस्यैव प्रमाणेन निशां हरिः ।
सन्ध्याञ्च समधिप्राप्य
इति कालिकापुराणे २० ।

शेषः, पुं, क्ली, (शिष्यते इति । शिष उपयुक्तेतरवस्तु । इति मेदिनी ॥
सर्वशिष्टता च शेषं शेषश्चेत्यादि ।
शेषः पुंलिङ्ग एव शिष्टप्रयोगात् ।
शेषः यथा । शङ्खपद्मौ निधिश्रावद्धौ
जलजे तूभयलिङ्गौ इति सर्व्वानन्द-
टीकायां भरतः ।

यथा,—

"कणशेषश्चाग्निशेषं ऋणशेषं तथैव च ।
पुनः पुनः प्रवर्द्धन्ते तस्मात्
इति गारुडे ।

(अवशिष्टे, त्रि । यथा, रघुः । ३ । ११ ।

"अपनीतशिरस्त्राणाः शेषास्त्व-

तथा च रामायणे । २ । २६ । ३१ ।

"वन्दितव्यास्त्वया नित्यं याः

शेषत्वं, क्ली, (शेषस्य भावः । शेष + त्व ।) परोप-कारित्वम् पारार्थ्यम् ।

यथा,—

"शेषत्वमुपकारित्वं
पारार्थ्यं शेषता तच्च सर्व्ववस्तौति
इत्यधिकरणमालायां

शेषस्य भावः । इति व्याकरणम् ।

शेषरात्रिः, स्त्री, (शेषा रात्रिः ।) रात्रिशेषः । तत्पर्य्यायः । उषः १ ... २ । इति शब्दरत्नावली ॥

शेषा, स्त्री, (शिष्यतेऽसौ । शिष् + घञ् ।) स्वनिर्माल्यार्पणम् । इति मेदिनी । (यथा, कुमारे । ३ । २२ ।

"तथेति शेषामिव भर्त्तुराज्ञा-
मादाय मूर्ध्ना मदनः प्रतस्थे ।")

शैक्षः, पुं, (शिक्षामधीते इति । ...) प्राथमकल्पिकः । इत्यमरः ॥ ... वेदाध्ययने । शिक्षणं शिक्षा । ...रिति अः । शिक्षा प्रथमोपदेशः ... चर्य्यात् यस्योऽपि शिक्षा ... दृष्टे कादिति ष्यः प्रथमं ... अधीयते प्राथमकल्पिकः । इति (शिक्षा शीलमस्येति । "छत्रादिभ्यो ..." ४ । ६२ । इति णः ।) शिक्षाशीले, त्रि ।

शैक्षिकः, त्रि, शिक्षाशास्त्रवेत्ता । अधीते वा इत्यर्थे ठक्प्रत्ययेन सिद्ध ।

शैखरिकः, पुं, (शिखरे प्रायेण भवतीति । + ठञ् ।) अपामार्गः इत्यमरः ॥

शैखरेयः, पुं, (शिखरे भवः । शिखर + ...) अपामार्गः । इति भरतधृतरत्नकोषः ।

शैत्यं, क्ली, (शीतस्य भावः । शीत + दिभ्यः ष्यञ् च ।" ५ । १ । १२३ । ...

V. 5—6.

शब्दकल्पद्रुमः।

अर्थात्

एतद्देशप्रचलितकोषाद्येकत्र संकलय्य अकारादिवर्णक्रमविन्यस्त-शब्द-तल्लिङ्ग-नानार्थ-पर्य्याय-प्रमाण-प्रयोग-धातु-तदनुबन्धाभिधेय-
सहित-तत्तच्छास्त्रप्रमाणोत्थित-वेद-वेदाङ्ग-वेदान्त-न्याय-पुराणेतिहास-सङ्गीत-शिल्प-सूपकारशास्त्र-ज्योतिष-
तन्त्राख्यान-काव्यालङ्कार-छन्दःप्रभृति-नाम-तदुपोदाहरण-द्रव्यगुण-रोगनिदानौषध-
तात्पर्य्यकथाख्यायिकादिसंयुक्त-सर्व्वदर्शनमतानुसारि-संस्कृताभिधानग्रन्थः।

स्यार-राजा-राधाकान्तदेव-वाहादुरेण

विरचितः।

पाणिनिमतानुसारि-प्रत्येकशब्दव्युत्पत्ति-सूत्रपत्रातिरिक्तबहुशब्दार्थ-प्रमाण-प्रयोग-पर्य्याय-धातुपदोदाहरणादिभिः
नूतनसङ्कलितबहुशब्द-तदर्थ-तत्प्रमाण-प्रयोगादिघटित-
सुप्रयुक्तपरिशिष्टेन च सार्द्धम्

श्रीवरदाप्रसादवसुना तदनुजेन श्रीहरिचरणवसुना च

अशेषशास्त्रविशारदकोविदवृन्दसाहाय्येन संपरिवर्द्धितः। नागराक्षरैः प्रकाशितश्च।

पञ्चमः काण्डः।

पञ्चम-षष्ठ-खण्डौ।

कलिकाता-राजधान्यां

यन्त्रे मुद्रितः। ७१ नं० पाथुरियाघाट-ष्ट्रीट-स्थितभवनात् प्रकाशितश्च। शकाब्दाः

PRINTED BY PRESS; AND CONSIDERABLY IMPROVED, CAREFULLY REVISED AND PUBLISHED BY BARADA PRASAD BASU, AND HARI CHARAN BASU. 71, PATHURIAGHATA STREET. CALCUTTA:

To be had at the Sabdakalpadruma Office, No. 71 Pathuriaghata Street, Calcutta: and at the Baptist Mission Press. No 24 Lower Circular Road Calcutta: Price for Subscribers in India, Re. 1. and Countries out of India 3s. for each number.

। यथा,—
"शैत्यं नाम गुणस्तवैव सहजः स्वाभाविकी
स्वच्छता
किं ब्रूमः शुचितां भवन्ति शुचयः स्पर्शेन यस्यापरे ।
किं वान्यत् कथयामि ते स्तुतिपदं त्वं जीविनां जीवनं
त्वञ्चेन्नीचपथेन गच्छसि पयः कस्त्वां निषेद्धुं
क्षमः ॥"
इति लक्ष्मणसेनः ॥

शैथिल्यं, क्ली, (शिथिल+भावे ष्यञ् ।) शिथिलत्वम् । शिथिलस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नम् ॥ (यथा, मार्कण्डेये । १०८ । २२ ।
"भवन्तु केशाः पलिताः वलयः सन्तु मे शुभे ।
शैथिल्यमेतु मे कायः कृतकृत्योऽस्मि मानिनि ॥"

शैनेयः, पुं, (शिनेर्गोत्रापत्यमिति । शिनि+"इतश्चानिञः ।" ४।१।१२२। इति ढक् ।) सात्यकिः । स तु श्रीकृष्णसारथिः । इति त्रिकाण्डशेषः ॥ (यथा, भागवते । १ । ८ । ७ ।
"आमन्त्र्य पाण्डुपुत्रांश्च शैनेयोद्धवसंयुतः ।
द्वैपायनादिभिर्व्विप्रैः पूजितैः प्रतिपूजितः ॥")

शैरीयकः, पुं, नीलझिण्टी ॥ इति रत्नमाला ॥ शैरेयकोऽपि पाठः । दन्त्यसादिश्च ॥

शैलं, क्ली, (शिलाया भवम् । शिला+अण् ।) शैलेयम् । तार्क्ष्यशैलम् । इति मेदिनी ॥ शिलाजतु । इति राजनिर्घण्टः ॥

शैलः, पुं, (शिलाः सन्त्यत्रेति । शिला+ज्योत्स्नादित्वादण् ।) पर्व्वतः । इत्यमरः ॥ (यथा, रघुः । ४ । ७१ ।
"ततो गौरीगुरुं शैलमारुरोहाश्वसाधनः ।
वर्द्धयन्निव तत्कूटानुद्धूतैर्धातुरेणुभिः ॥"
शिलासम्बन्धिनि, त्रि । यथा, भागवते । ११ । २७ । १२ ।
"शैली दारुमयी लौही लेप्या लेख्या च सैकती
मनोमयी दारुमयी प्रतिमाष्टविधा स्मृता ॥")

शैलकं, क्ली, (शैलमिव । स्वार्थे कन् ।) शैलजम् । इति शब्दरत्नावली ॥ (यथा, बृहत्संहितायाम् । ७७ । १० ।
"हरीतकीशङ्खघनद्रवाम्बुभि-
र्गुड़ोत्पलैः शैलकमुस्तकान्वितैः ।
नखान्तपादादिविवर्द्धितैः क्रमात्
भवन्ति धूपा बहवो मनोहराः ॥")

शैलगन्धं, क्ली, (शैलस्य गन्धो यत्र ।) शावरचन्दनम् । इति राजनिर्घण्टः ॥

शैलगर्भाह्वा, स्त्री, शिलावल्का । इति राजनिर्घण्टः ॥

शैलजं, क्ली, (शैले पर्व्वते जायते इति । जन+डः ।) सुगन्धिद्रव्यविशेषः । तत्पर्य्यायः । शीतशिवम् २ शैलेयम् ३ शिलासनम् ४ शिलेयम् ५ शीतलम् ६ शैलम् ७ कालानुसार्य्यम् ८ शैलकम् ९ हद्यम् १० कालानुसारि ११ अश्मपुष्पम् १२ शैलपत्रम् १३ शिलापुष्पम् १४ वृद्धम् १५ इति रत्नमाला ॥ अस्य गुणाः शैलेयशब्दे द्रष्टव्याः ॥ पर्व्वतजाते, त्रि, ॥

शैलजा, स्त्री, (शैले जायतेऽसौ इति । जन+डः । टाप् ।) सैंहली । गजपिप्पली । इति राजनिर्घण्टः ॥ दुर्गा । हिमशैलजत्वात् । यथा,
"तत् श्रुत्वा भगवद्वाक्यं विस्मिता हिमशैलजा ।"
इति शिवरात्रिव्रतकथा ॥

शैलधन्वा [न्] (पुं, (शैलवत् दृढं धनुरस्य । धनुषो धन्वन्नादेशः ।) महादेवः । इति त्रिकाण्डशेषः ॥

शैलधरः, पुं, (शैलस्य गोवर्द्धनस्य धरः ।) श्रीकृष्णः इति धनञ्जयः ॥

शैलनिर्य्यासं, क्ली, (शैलस्य निर्य्यास इव रसो यत्र ।) शैलेयम् । इति केचित् ॥

शैलपत्रः, पुं, (शैलवत् सुगन्धि पत्रमस्य ।) विल्ववृक्षः । इति राजनिर्घण्टः ॥

शैलबीजः, पुं, (शैलवत् कठिनं बीजमस्य ।) भल्लातकवृक्षः । इति राजनिर्घण्टः ॥

शैलभित्तिः, स्त्री, (शैलानां भित्तिर्भेदो यस्याः ।) टङ्कः । इति जटाधरः ॥

शैलराजः, पुं, (शैलानां राजा । "राजाहःसखिभ्यष्टच् ।" ५।४।९१। इति टच् ।) हिमालयपर्व्वतः । (यथा, कुमारे । ७ । ६८ ।
"मूर्द्धानमालि क्षितिधारणोच्च-
मुच्चैस्तरं वक्ष्यति शैलराजः ॥")

शैलराजसुता, स्त्री, (शैलराजस्य सुता ।) दुर्गा यथा,—
"स्वरूपा परभावत्वाद्बहुरूपा क्रियात्मिका ।
जाता शैलेन्द्रगेहे सा शैलराजसुता ततः ॥"
इति देवीपुराणे ४५ अध्यायः ॥
(गङ्गा । यथा, महाभारते । ३ । १०८ । ४
"प्रयाचस्व महाबाहो शैलराजसुतां नदीम् ।
पतमानां सरित्श्रेष्ठां धारयिष्ये त्रिपिष्टपात् ॥"

शैलवल्कला, पुं, (शैलं शिला वल्कलं यस्याः ॥) शिलावल्कला । इति राजनिर्घण्टः ॥

शैलशिविरं, क्ली, (शैलानां शिविरमिव समुद्रगर्भे बहुपर्व्वतावस्थानत्वात्तथात्वम् ।) समुद्रः । इति त्रिकाण्डशेषः ॥

शैलसुता, स्त्री, (शैलस्य सुता ।) पार्व्वती । यथा,—
"मातः शैलसुतासपत्नि वसुधाशृङ्गारहारावलि
स्वर्गारोहणवैजयन्ति भवतीं भागीरथीं
प्रार्थये ॥"
इति वाल्मिकीयगङ्गाष्टकम् ॥
ज्योतिष्मती । इति राजनिर्घण्टः ॥

शैलाख्यं, क्ली, (शैलमिति आख्या यस्य ।) इति रत्नमाला ॥

शैलाग्रं, क्ली, (शैलस्य अग्रम् ।) शिखरम् । इति त्रिकाण्डशेषः ॥

शैलाजं, क्ली, (शैलाद्‌जायते इति । आ+जन+डः ।) शैलेयम् । इति राजनिर्घण्टः ॥

शैलाटः, पुं, (शैले अटतीति । अट+अच् ।) देवलः । सिंहः । शुक्लकाचः । किरातः । इति मेदिनी ॥

शैलादिः, पुं, नन्दी । यथा,—
"निमित्तानीदृशान् दृष्ट्वा भूतभव्यभवो विभुः ।
शैलादिं प्राह वचनं सस्मितं शशिशेखरः ॥
हर उवाच ।
नन्दिन् जयोऽद्य भावी नो न कथञ्चित् पराजयः ।
निमित्तानीह दृश्यन्ते शुभदानि गणेश्वर ॥
तच्छम्भुवचनं श्रुत्वा शैलादिः प्राह शङ्करम् ।
कः सन्देहो महादेव यत् त्वं जयसि शात्रवान् ॥")
इति वामने ६५ अध्यायः ॥

शैलाली, [न्] पुं, (शिलालिना प्रोक्तं नटसूत्रमधीते इति । शिलालि+"पाराशर्य्यशिलालिभ्यां भिक्षुनटसूत्रयोः ।" ४ । ३ । ११० इति णिनिः ।) नटः । इत्यमरः ॥

शैलिक्यः, पुं, सर्व्वलिङ्गी । इति जटाधरः ॥

शैली, स्त्री, (शीलस्येयमिति । शील+अण् । ङीप् ।) सङ्केतः । यथा,—
"प्रशस्तिः परिभाषा शैली सङ्केतसमयकाराश्च ।"
इति त्रिकाण्डशेषः ॥
आचार्य्याणामियं शैली यत् सामान्येनाभिधाय विशेषेण विवृणोति । इति मुग्धबोधटीकायां दुर्गादासः ॥ (शिलाप्रतिमा । यथा, रामायणे । १ । ६४ । १२ ।
"यस्मां लोभयसे रम्भे कामक्रोधजयैषिणम् ।
दशवर्षसहस्राणि शैली स्थास्यसि दुर्भगे ॥")

शैलूषः, पुं, शिलूषस्यापत्यमिति । शिलूष+अण् नटः । (यथा, माघे । १ । ६८ ।
"अथोपपत्तिं छलनापरोऽपरा-
मवाप्य शैलूष इवैष भूमिकाम् ॥")
विल्ववृक्षः । इत्यमरः ॥ धूर्त्तः । तालधारकः । इति शब्दरत्नावली ॥

शैलूषिकः, पुं, नटवृत्त्यन्वेषी । यथा,—
"वृत्त्यन्वेषी नटानान्तु स तु शैलूषिकः स्मृतः ॥"
इति ब्रह्मपुराणोक्तम् ॥
इति प्रायश्चित्तविवेकः ॥

शैलूषिकी, स्त्री, शैलूषिकजातिस्त्री । तद्गमनप्रायश्चित्तं यथा । संवर्त्तः ।
नटीं शैलूषिकीं चैव रजकीं वेणुजीविनीम् ।
कामतस्तु यदा गच्छेच्चरेच्चान्द्रायणद्वयम् ॥"
ततश्चाज्ञानतश्चान्द्रायणम् । चान्द्रायणे धेनुष्टकम् । इति प्रायश्चित्ततत्त्वम् ॥

शैलेन्द्रः, पुं, (शैलानामिन्द्रः ।) हिमालयः । यथा,—
"ददृशुस्ते ततो देवीमोषधीनां व्यवस्थिताम् ।
सिंहस्योपरि शैलेन्द्रे महति काञ्चने ॥"
इति देवीमाहात्म्यम् ॥

शैलेन्द्रस्थः, पुं, (शैलेन्द्रे तिष्ठतीति । स्था+कः ।) भूर्जवृक्षः । इति राजनिर्घण्टः ॥

शैलेयं, क्ली, (शिलायां भवम् । शिला+ढक् ।) शैलजाख्यगन्धद्रव्यम् । शैलेयक इति रन्दूच इति छरिला इति च ख्यातम् । तत्पर्य्यायो यथा,—
"शैलेयं शैलजं वृद्धं शिलापुष्पं शिलोद्भवम् ।
स्थविरं पलितं जीर्णं तथा कालानुसार्य्यकम् ॥
शिलोत्थञ्च शिलाददुः शैलाजं गिरिपुष्पकम् ।
शिलाप्रसूनं सुभग शैलक षोडशाह्वयम् ॥"
अस्य गुणाः ।
"शैलेयं शिशिरं तिक्तं सुगन्धि कफपित्तजित् ।
दाहृद्वयात्तिश्वासव्रणदोषविनाशनम् ॥"
इति राजनिर्घण्टः ॥
अपि च ।
"शैलेयन्तु शिलापुष्पं वृद्धं कालानुसार्य्यकम् ।
शैलेयं शीतलं हृद्यं कफपित्तहरं लघु ।
कण्डूकुष्ठाश्मरीदाहविषहृद्गुदरक्तहृत् ॥"
इति भावप्रकाशः ॥*॥
तालपर्णी । सैन्धवम् । इति मेदिनी ॥
शैलेयं, त्रि, (शैले भवम् । शैल+ढक् ।) शैलसम्भवम् । इति हेमचन्द्रः ॥ शिलातुल्यम् । इति शब्दरत्नावली ॥ (शिलेव । शिला+ "शिलाया ढः ।" ५ । ३ । १०२ । इति योगविभागेन ढञ् ॥)
शैलेयः, पुं, (शैले भवः । शैल+ढक् ।) सिंहः । भ्रमरः । इति शब्दरत्नावली ॥
शैलेयी, स्त्री, (शैले भवा । शैल+ढक् । ङीप् ।) पार्व्वती । इति त्रिकाण्डशेषः ॥
शैलोद्भवा, स्त्री, (शैलात् उद्भवो यस्याः ।) क्षुद्रपाषाणभेदी । इति राजनिर्घण्टः ॥
शैल्यं, त्रि, (शिला+ष्यञ् ।) शिलासम्बन्धि । शिलाया इदं इत्यर्थे ष्यप्रत्ययेन निष्पन्नम् ॥
शैव, क्ली, शैवालः । इति शब्दचन्द्रिका ॥ (शिवमधिकृत्य कृतो ग्रन्थः । शिव+अण् ।) शिवपुराणम् । यथा—
"अष्टादश पुराणानि पुराणज्ञाः प्रचक्षते ।
ब्राह्मं पाद्मं वैष्णवञ्च शैवं भागवतं तथा ॥"
इति मलमासतत्त्वे विष्णुपुराणम् ॥
(शिवस्येदमिति । शिव+अण् ।) शिवसम्बन्धिनि, त्रि (यथा । कथासरित्सागरे ।४०।८८।
"प्रापदायतनं शैव नद्यास्तस्यास्तटस्थितम् ॥")
शैवः, पुं, (शिव+अण् ।) वस्तुकः । धुस्तूरः । इति राजनिर्घण्टः ॥ आचारविशेषः । यथा—
"षडाङ्गयोगसंयुक्तो यजेद्देवीं विधानतः ।
यावद्ध्यानं समाधिश्च तावत् शैवः प्रचक्षते ॥"
इत्याचारभेदतन्त्रम् ॥*॥
शिवोपासकः । तत्पर्य्यायः । पौट्टयोलिकः २ इति त्रिकाण्डशेषः । तद्भेदा यथा—
"ततश्चचार भगवान् चातुर्म्य क्षे दशावने ।
शाक्याः शैवाः मुख्यानि मानोश्चिशिदितानिच
चाद शैवं दशिष्यामनन्यान् चायतनं मुने! ।
दर्शोद कालवदनं चतुर्दश क्षमानिनम् ॥
चार्षोन् चयं दर्शवं शिद्दान्द निय. स्तनः ।
शिष्यो वभूतश्च शैवाचम इति स्मृतः ॥

महापाशुपतस्त्वासीद्भारद्वाजस्तपोधनः ।
तस्य शिष्योऽप्यभूद्राजा ऋषभः सोमकेश्वरः ॥
कालास्यो भगवानासीदापस्तम्बस्तपोधनः ।
तस्य शिष्यो वक्री वेश्यो नाम्ना क्राथेश्वरो मुनिः ॥
महाव्रती च धनदस्तस्य शिष्यश्च वीर्य्यवान् ।
कुलोदर इति ख्यातो जात्या शूद्रो महातपाः ॥
एवं स भगवान् ब्रह्मा पूजनाय शिवस्य च ।
कृत्वा तु चातुराश्रम्यं स्वमेव भवनं गतः ॥"
इति वामने ६ अध्यायः ॥*॥
तस्य स्वरूपं यथा । आर्य्यायां शैवमालोक्याह ।
"शैवोमानसावेति जटालमौलि-
र्व्याघ्रत्वगालम्बितमध्यभागः ।
विभूतिसंभूषितभास्वदङ्गो
रुद्राक्षमालाकलितोहृदेहः ॥"
इति विद्वन्मोदतरङ्गिण्यां २ तरङ्गः ॥
शैवलं, क्ली, (शेते इति । शी+"शीङो धुक्लक्वलञ् वालनः ।" उणा० ४ । ३८ । इति वलच् ।) पद्मकाष्ठम् । शैवाले, पुं, । इति मेदिनी ॥ (यथा कुमारे । ५ । ९ ।
"न षट्पदश्रेणिभिरेव पङ्कजं
सशैवलासङ्गमपि प्रकाशते ॥"
विन्ध्यसमीपदक्षिणभागवर्त्तिगिरिविशेषः । यथा, रामायणे । ७ । ८८ । १३ ।
"शैवलस्योत्तरे पार्श्वे ददर्श सुमहत् सरः ॥")
शैवलिनी, स्त्री, (शैवलमस्या अस्तीति । इनिः ।) नदी । इत्यमरः ॥
शैवाल, क्ली, (शी+बाहुलकात् वालञ् ।) जलजद्रव्यविशेषः । शेयाला इति भाषा । (यथा, महाभारते । ४ । ६० । १७ ।
"प्रावर्त्तयन्नदीं घोरां शोणितोदां तरङ्गिणीम् ।
केशशैवालसंबाधां युगान्ते कालनिर्म्मिताम् ॥")
तत्पर्य्यायः । जलनीली २ शैवलः ३ । इत्यमरः ॥ शेपालम् ४ शेवलम् ५ शीवलम् ६ शैपाल: ७ जलनीलिका ८ । इति वाचस्पतिः ॥ जलनीलः ९ । इति मुकुटादयः । इति भरतः ॥ सेवालम् १० शैवालम् ११ वारिचामरः १२ शैवलम् १३ सलिलकुन्तलम् १४ कटपर्णी १५ अम्बुतालम् १६ । इति शब्दरत्नावली ॥ चरकः १७ सलकेशः १८ कावारम् १९ । इति हारावली ॥ जलजम् २० । अस्य गुणाः । शीतलत्वम् । स्निग्धत्वम् । सन्तापव्रणनाशित्वञ्च । इति राजनिर्घण्टः ॥
शैव्य, पुं, श्रीकृष्णस्य घोटकविशेषः । यथा,—
"तुरगाः शैव्यसुग्रीवमेघपुष्पबलाहकाः ।"
इति त्रिकाण्डशेषः ॥
(यथा च महाभारते । १ । २२१ । ३ ।
"रथेन काञ्चनाङ्गेन कल्पितेन यथाविधि ।
शैव्यसुग्रीवयुक्तेन किङ्किणीजालमालिना ॥")
पाण्डवसेनापतिविशेषः । यथा—
"धृष्टकेतुश्चेकितानः काशीराजश्च वीर्य्यवान् ।
पुरुजित् कुन्तिभोजश्च शैव्यश्च नरपुङ्गवः ॥"
इति श्रीभगवद्गीतायाम् । १ । ५ ।

(स्त्री, प्रतीपस्य राज्ञः पत्नी । इति महाभारतम् । १ । ९५ । ४४ ॥ सगरस्य राज्ञः पत्नी । सा तु असमञ्जसो जननी । यथा, महाभारते ३ । १०७ । ३८ ।
"असमञ्जा इति ख्यातः ... ।
यं शैव्या जनयामास पौराणां स हि ...
गलेषु क्रोशतो गृह्य नद्यां चिक्षेप दुर्ब्बलान् ।
शिवसम्बन्धिनि, त्रि ॥
शैशवं, क्ली, शिशोर्भावः । (शिशु+ ... लघुपूर्व्वात् ।" ५ । १ । १३१ । इति अण् ।) बाल्यम् । इत्यमरः ॥ यथा,
"शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।
वार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ॥"
इति रघुवंशे १ सर्गः ॥
शैशिरः, पुं, (शिशिरे ऋतौ भवः । शिशिर+अण् ।) श्यामचटकः । इति ... ।
शिशिरसम्बन्धि, त्रि, । यथा । ... ।
स्तपस्वी शैशिरायतः । इति ...
शैष्योपाध्यायिका, स्त्री, ... कर्म्म वा । शिष्योपाध्याय+"द्वन्द्वमनोज्ञादिभ्यश्च ।" ५ । १ । १३३ । इति वुञ् ।) शिष्याध्यापना । इति सिद्धान्तकौमुदी ॥
शो, श नियाने । इति कविकल्पद्रुमः ॥ (दिवा-पर०-सक०-अनिट् ।) नियानमिह ... । य, श्यति शत्रुं शूरः । इति दुर्गादासः ॥
शोकः, पुं, शुच+घञ् ।) चित्तविकारः । इष्टवियोगानुचिन्तनम् । इति ... बन्ध्वादिवियोगजनिता मनःपीडा । इति ... प्रकाशः ॥ तत्पर्य्यायः । मन्युः २ शुक् ३ ... मरः ॥ शुचा ४ निशमः ५ । इति शब्दरत्नावली ॥ शोचनम् ६ खेदः ७ । इति हेमचन्द्रः तन्निवारणहेतुर्यथा,—
"भरत पतितं दीनं शोचन्तं सुस्थं तदा ।
शोचमानं वशिष्ठस्तु ... ।
शोचमानस्तु सबेहा बान्धवाः सुहृदस्तथा ।
पातयन्ति गतं स्वर्गादश्रुपातेन राघव ॥
भूरिद्युम्नो गतः स्वर्गं पुण्येन पतितः पुनः ।
शोचितो बन्धुवर्गेण मृतश्चेह परित्यज ।"
...
अपि च । अथ शोकापनोदनम् । याज्ञवल्क्य
"कृतोदकान् समुत्तीर्णान् मृदुशाद्वलसं...
...
स्नातानपनुदेयुस्तानितिहासैः पुरातनैः ।
मानुष्ये कदलीस्तम्भे ... ।
यः करोति स सम्मूढो जलबुद्बुदसन्निभे ।
पञ्चधा संभृतः कायो यदि पञ्चत्वमागतः ।
कर्म्मभिः स्वशरीरोत्थैस्तत्र का परिदेवना ।
गन्त्री वसुमती नाशमुदधिर्दैवतानि च ।
फेनप्रख्यः कथं नाशं मर्त्यलोको न यास्यति ।
श्लेष्माश्रु बान्धवैर्मुक्तं प्रेतो भुङ्क्ते यतोऽवशः ।
अतो न रोदितव्यं हि क्रियाः कार्य्याः विधानतः ।
इति प्रायश्चित्ततत्त्वम् ...

मन्यस्व ।

श्रीभगवानुवाच ।

"अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥
अव्यक्तोऽयमचिन्त्योऽयमविकार्य्योऽयमुच्यते ।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥
अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम् ।
तथापि त्वं महाबाहो नैनं शोचितुमर्हसि ॥
जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्य्येऽर्थे न त्वं शोचितुमर्हसि ॥
देही नित्यमवध्योऽयं देहे सर्व्वस्य भारत ।
तस्मात् सर्व्वाणि भूतानि न त्वं शोचितुमर्हसि॥"

इति श्रीभगवद्गीतायाम् २ अध्यायः ॥

शोकनाशः, पुं, (शोकस्य नाशो यस्मात् ।) अशोकवृक्षः । इति राजनिर्घण्टः ॥

शोकहारी, स्त्री, (शोकं हरतीति । हृ + अण् । ङीप् ।) वनवर्व्वरिका । इति राजनिर्घण्टः ॥

शोकारिः, पुं, (शोकस्य अरिः ।) कदम्बवृक्षः । इति शब्दचन्द्रिका ॥

शोचनं, क्ली, (शुच + ल्युट् ।) शोकः । इति हेमचन्द्रः ॥ (शोचतीति । शुच शोके + "जुचङ्क्रम्यदन्द्रम्यसृगृधीति ।" ३ ।२।१५० । इति युच् । शोकशीले, त्रि ॥)

शोचना, स्त्री, शोकोत्पादना । शोचि णिजन्तात् ङनप्रत्ययान्तात्दाप्प्रत्ययनिष्पन्ना । इति संक्षिप्तसारव्याकरणम् ॥

शोचिः, [स्] क्ली,(शुच्यत्यनेनेति । शुच + "अर्चिशुचिहुसृपीति ।"उणा० २।१०८। इति इसिः ।) प्रभा । इत्यमरः ॥ (यथा, भागवते ।३।१५।२६।

"तद्विश्वगुर्व्वधिकृतं भुवनैकवन्द्यं
दिव्यं विचित्रविबुधाग्र्यविमानशोचिः ॥")

शोचिष्केशः,पुं,(शोचींषि केशा इव यस्य । नियतं समासेऽनुत्तरपदस्थस्येति षत्वम् ।) अग्निः । चित्रकवृक्षः । इत्यमरः ॥ (क्वचित् वाच्यलिङ्गोऽपि । तथा, ऋग्वेदे । १ । ४५ । ६ ।

"शोचिष्केशं पुरुप्रियाग्ने हव्याय वोढवे ।"
"शोचिष्केशं दीप्तिरूपकेशोपेतम् ।" इति तद्भाष्ये सायणः ॥)

शोण्ठकः,त्रि, प्रवरः । क्षुद्रः । इति शब्दमाला ॥

शोटीर्य्यं, क्ली, वीर्य्यम् । इति शब्दरत्नावली ॥

शोठः, त्रि, मूर्खः । अलसः । इति मेदिनी ॥ धूर्त्तः । नीचः । पापरतः । इति शब्दरत्नावली ॥

शोण, ऋ गतौ । वर्णे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-वर्णे अक०-सेट् ।)वर्णश्चेह रक्तीभावः । शोणति सूर्य्यः सन्ध्यायाम् । इति दुर्गादासः ॥

शोणं, क्ली,(शोणतीति । शोण वर्णे + पचाद्यच् ।) सिन्दूरम् । रुधिरम् । इति राजनिर्घण्टः ॥

शोणः, पुं, (शोण वर्णे + अच् ।) रक्तोत्पलतुल्यवर्णः । तत्पर्य्यायः । कोकनदच्छविः २ । इत्यमरः ॥ रक्तोत्पलनिभः ३ । इति शब्दरत्नावली ॥ रक्तोत्पलाभः ४ । इति जटाधरः ॥ (यथा, भागवते । १ । ११ । २ ।

"स उच्चकाशे धवलोदरोदरोऽप्युरुक्रमस्याधरशोणशोणिमा ॥")

नदविशेषः । तत्पर्य्यायः । हिरण्यबाहुः । इत्यमरः ॥ हिरण्यवाहः २ । इति भरतः ॥ स तु अमरकण्टकदेशात् पाटलिपुत्त्रे गङ्गायां मिलितः । तज्जलगुणाः । रुचिदत्वम् । सन्तापशोषापहत्वम् । पथ्यत्वम् । वह्निकरत्वम् । बलचीणाङ्गपुष्टिप्रदत्वञ्च । इति राजनिर्घण्टः॥ अग्निः । श्योनाकः । लोहिताश्वः । कोकनदच्छाये, त्रि । इति मेदिनी ॥ समुद्रविशेषः । इति धरणिः ॥ रक्तेक्षुः । श्योनाकप्रभेदः । इति राजनिर्घण्टः ॥ (रक्तवर्णे, त्रि । यथा, कुमारे । १ । ७ ।

"न्यस्ताक्षरा धातुरसेन यत्र
भूर्ज्जत्वचः कुञ्जरविन्दुशोणाः ॥")

शोणकः, पुं,(शोण एव । स्वार्थे कन् ।)श्योनाकवृक्षः । इत्यमरः ॥

शोणझिण्टिका, स्त्री, (शोणा रक्तवर्णा झिण्टिका ।) रक्तसैरेयः । इति राजनिर्घण्टः॥

शोणझिण्टी, स्त्री, (शोणा रक्तवर्णा, झिण्टी ।) कुरुवकः । कण्टकिनी । इति राजनिर्घण्टः ॥

शोणपत्रः, पुं, (शोणवत् रक्तानि पत्राणि यस्य ।) रक्तपुनर्नवा । इति राजनिर्घण्टः ॥

शोणपद्मकं, क्ली, (शोणं रक्तवर्णं पद्मकम् ।)रक्तकमलम् । इति राजनिर्घण्टः ॥

शोणपुष्पकः, पुं, (शोणं पुष्पं यस्य । कन् ।) कोविदारः । इति राजनिर्घण्टः ॥

शोणपुष्पी,स्त्री, (शोणवत् पुष्पमस्याः । ङीप् ।) सिन्दूरपुष्पी । इति राजनिर्घण्टः ॥

शोणरत्नं, क्ली, (शोणं रक्तवर्णं रत्नम् ।) पद्मरागमणिः । इत्यमरः ॥

शोणा, स्त्री, (शोणो रक्तवर्णोऽस्त्यस्या इति । अच् । टाप् ।) शोणवर्णयुक्ता । इति जटाधरः ॥

शोणाकः, पुं, वृक्षविशेषः । शोणा इति ख्यातः । तत्पर्य्यायः । श्योनाकः२ शुकनासः ३ ऋक्ष्यः४ दीर्घवृन्तः ५ कुटन्नटः ६ अरलुः ७ स्वर्णवल्कलः ८ ध्वान्तशात्रवः९ । इति शब्दमाला ॥ मण्डूकपर्णः १०पत्रोर्णः ११नटः १२कट्वङ्गः१३ टुण्टुकः १४ शोणकः १५ अरलः १६ । इत्यमरः ॥ स्योनाकः १७ अरटुः १८ । इति तट्टीका ॥

शोणितं, क्ली, (शोण वर्णे + क्तः ।) शोण + जातार्थे इतच् वा ।) रक्तम् । इत्यमरः ॥ (यथा, मनुः । ११ । २०८ ।

"शोणितं यावतः पांशून् संगृह्णाति महीतले ।
तावन्त्यब्दसहस्राणि तत्कर्त्ता नरके वसेत् ॥")

तस्योत्पत्तिर्गर्भस्थस्य पञ्चमे मासि भवति । इति सुखबोधः ॥ कुङ्कुमम् । इति राजनिर्घण्टः ॥

शोणितचन्दनं, क्ली, (शोणितवत् चन्दनम् ।) रक्तचन्दनम् । इति राजनिर्घण्टः ॥

शोणितपुरं, क्ली, (शोणिताख्यं पुरम् ।) वाणपुरम् । इति त्रिकाण्डशेषः ॥

शोणिताह्वयं, क्ली, (शोणितं आह्वयो यस्य ।) कुङ्कुमम् । इति रत्नमाला ॥

शोणितोत्पलं, क्ली,(शोणितवत् रक्तमुत्पलम् ।) रक्तोत्पलम् । इति केचित् ॥

शोणी, स्त्री, (शोण + "शोणात् प्राचाम् ।" ४ । १ । ४३ । इति ङीप् ।) रक्तोत्पलतुल्यवर्णा स्त्री । इति व्याकरणं जटाधरश्च ॥ (वड़वा । इति काशिका ॥)

शोणोपलः, पुं, (शोणो रक्तवर्ण उपलः ।) माणिक्यम् । इति राजनिर्घण्टः ॥

शोथः, पुं, (श्वयतीति । श्वि गतौ + वाहुलकात् थन् । इत्युणादिवृत्तौ उज्ज्वलः । २ । ४ ।) रोगविशेषः । तत्पर्य्यायः । शोफः २ श्वयथुः३ । इत्यमरः ॥ शोथकः ४ । इति शब्दरत्नावली ॥

अथ शोथाधिकारः । तत्र शोथस्य विप्रकृष्टनिदानमाह ।

"शुद्ध्यामयाभक्तकृशाबलानां
चाराम्लतीक्ष्णोष्णगुरूपसेवा ।
दध्याममृच्छाकविरोधिपिष्ट-
गरोपसृष्टान्ननिषेवणञ्च ॥
अर्शांस्यचेष्टा वपुषो ह्यशुद्धि-
र्म्मर्म्मोपघातो विषमा प्रसूतिः ।
मिथ्योपचारः प्रतिकर्म्मणाञ्च
निजस्य हेतुः श्वययोः प्रदिष्टा ॥"

शुद्धिर्वमनविरेकादि । आमयाः पाण्डुरोगादयः । अभक्तं अभोजनम् । आमः अपक्वो भुक्तस्य रसः । पिष्टगरोपसृष्टान्नं पिष्टो यो गरः संयोगजं विषं तेन उपसृष्टमन्नम् । वपुषो ह्यशुद्धिः शोधनार्हस्य वपुषोऽशोधनम् । मर्म्मोपघातः दोषकृत एव ज्ञेयः । वाह्यहेतुकृतस्तु मर्म्मोपघातः आगन्तुजशोथहेतुरेव । विषमा प्रसूतिः आमगर्भपतनादिना । प्रतिकर्म्मणां वमनादीनां पञ्चकर्म्मणाम् । मिथ्योपचारः असम्यक्कारणम् । श्वययोः शोथस्य । निजस्य चात्मीयस्य । सन्निकृष्टस्य हेतोर्वातादेः । हेतुः रूक्षोष्णमधुरादि ॥*॥ सन्निकृष्टनिदानमाह ।

"दोषैः पृथक् द्वयैः सर्व्वैरभिघातादिषादपि ।
सर्व्वो हेतुविशेषैस्तु रूपभेदो नवात्मकः ॥"*॥

संप्राप्तिपूर्व्वकं सामान्यं लक्षणमाह ।

"रक्तपित्तकफान् वायुर्दुष्टो दुष्टान् वहिःशिराः
नीत्वा रुद्धगतिस्तैर्हि कुर्य्यात् त्वङ्मांससंश्रयम्
उत्सेधं संहतं शोथं तमाहुर्निचयादतः ॥
शरीरगौरवं स्यादनवस्थितत्वं
सोत्सेधमुष्माथ शिराततत्वम् ।
सलोमहर्षञ्च विवर्णता च
सामान्यलिङ्गं श्वयथोः प्रदिष्टम् ॥"

उत्सेधः उन्नतत्वं [illegible] पूर्व्वोक्तान्निचयात् [illegible] दायात् । संहत [illegible] । तमुत्सेधं शोथमाहुरित्यन्वयः ॥ ० ॥ तत्र शोथस्य [illegible]

कारणमाह। अनवस्थितत्वं स्यादनियता स्थितिः स्यादित्यर्थः। चिकित्साव्यतिरेकेणापि निवृत्तेः। तथानवस्थितत्वं सगौरवं स्यात्। गौरवमप्यनवस्थितं स्यात्। अथ च सोत्सेधं स्यात्। उन्नतत्वमप्यनवस्थितं स्यादित्यर्थः ॥*॥ वातिकं शोथमाह।

"चरस्तनुत्वक्परुषोऽरुणोऽसितः
प्रसुप्तिहर्षार्त्तियुतो निमित्ततः।
प्रशाम्यति प्रोन्नमति प्रपीडितो
दिवा बली स्यात् श्वयथुः समीरणात् ॥"

चरः सञ्चारी। प्रसुप्तिः स्पर्शाज्ञता। हर्षोऽत्र भिन्निभिन्नौ रोमाञ्चो वा। अर्त्तिः पीड़ा। एतद्युतः। दिवाबलीविकृतिविषमसमवायारम्भात्। अतएवोक्तं चरकेण।

"स्नेहोपमर्दनाद्यैर्यः प्रशाम्येत् स च वातिकः। यश्चाप्यरुणवर्णः स्यात् शोथो नक्तं प्रशाम्यति ॥" * ॥

पैत्तिकमाह।

"मृदुः सगन्धोऽसितपीतरागवान्
भ्रमज्वरस्वेदतृषामदान्वितः।
य उष्यते स्पर्शरुगक्षिरागकृत्
स पित्तशोथो भृशदाहपाकवान् ॥"

उष्यते सन्तप्यते। भृशदाहपाकवान् भृशदाहो यः पाकस्तद्युक्तः ॥ * ॥ श्लैष्मिकमाह।

"गुरुः स्थिरः पाण्डुररोचकान्वितः
प्रसेकनिद्रा वमिवह्निमान्द्यकृत्।
स कृच्छ्रजन्मप्रशमो निपीडितो
न चोन्नमेद्रात्रिबलीकफात्मकः ॥"*॥

द्वन्द्वजमाह।

"निदानाकृतिसंसर्गात् श्रेयः शोथो द्विदोषजः॥

सान्निपातिकमाह।

"सर्वाकृतिः सन्निपाताच्छोथो व्यामिश्रलक्षणः व्यामिश्रलक्षण इत्युक्ते सर्व्वाकृतिरिति उक्त-वातजादिशोथसकललक्षणनियमार्थम् ॥ * ॥ अभिघातजमाह।

"अभिघातेन शस्त्रादिच्छेदभेदक्षतादिभिः।
हिमानिलोदध्यनिलैर्भल्लातकपिकच्छुजैः॥
रसैः शूकैश्च संस्पर्शात् श्वयथुः स्याद्विसर्पवान्।
भृशोष्मा लोहिताभासः प्रायशः पित्तलक्षणः ॥"

छेदः खड्गादिना भेदः पाषाणादिना क्षतं शरादिना नाड़ीव्रणादि च। आदिशब्देन लगुड़प्रहारादि गृह्यते। भल्लातजैः रसैः। कपिकच्छुजैः शूकैः। विसर्पवान् प्रसरणशीलः। पित्तलक्षणः पैत्तिकशोथलक्षणः ॥*॥ विषजमाह।

"विषजः सविषप्राणिपरिसर्पणमूत्रणात्।
दंष्ट्रादन्तनखाघातादविषप्राणिनामपि ॥
विण्मूत्रशुक्रोपहतमलवद्वस्त्रसंकटात्।
विषवृक्षानिलस्पर्शात् गरयोगावचूर्णनात् ॥
मृदुश्चलोऽवलम्बी च शीघ्रो दाहरुजाकरः।"

परिसर्पणं शरीरोपरि सञ्चरणम्। दंष्ट्राहिशुण्डी कता दन्तावली। चों ह इति लोके। दन्ता अपि भवाः। अविषप्राणिनामपीत्यनेन दंष्ट्रा दन्तनखानां स्वभावादेव सविषत्वमुक्तम्। किन्तु सर्पादिविषं मारकं भवति। अविषप्राणिनां दंष्ट्रादिविषं शोथव्याधिकरं भवतीति विशेषः विण्मूत्रे त्यादिविड़ाद्युपहतं मलिनञ्च यद्वस्त्र तथा संकटः संमार्जनीति.तिसो धूल्यादिःतेषां सम्पर्कात्। गरयोगावचूर्णनात् गरः संयोगजं विषं तस्य योगो यस्य तेन वस्तुनावचूर्णनात्। अवलम्बी लम्बमानः। अयमप्यागन्तुजस्तथापि सामान्यागन्तुजशोथचिकित्सातोऽस्य विशिष्ट-चिकित्साभिधानात् पृथक् पठितः ॥ * ॥ यत्र स्थिता दोषा यञ्च शोथं कुर्व्वन्ति तदाह।

"दोषाः श्वयथुमूर्द्धं हि कुर्व्वन्त्यामाशये स्थिताः। पित्ताशयस्था मध्ये तु वर्च्चःस्थानगतास्त्वधः ॥ कृत्स्नं देहमनुप्राप्ताः कुर्य्युः सर्व्वसरं तथा।"

ऊर्द्धं उरःप्रभृत्यूर्द्धम्। मध्ये पक्वाशयमध्ये। अधः पक्वाशयादधः ॥*॥ उपद्रवानाह।

"श्वासं पिपासा छर्द्दिश्च दौर्ब्बल्यं ज्वर एव च। यस्य चान्ने रुचिर्नास्ति शोथिनं तं विवर्ज्जयेत्॥"

कष्टसाध्यत्वादिकमाह।

"यो मध्यदेशे श्वयथुः स कष्टः सर्व्वगश्च यः। अर्द्धाङ्गेऽरिष्टभूतश्च यश्चोर्द्धं परिसर्पति ॥"

मध्यदेशे उरःपक्वाशयमध्ये। सर्व्वगः सकलशरीरभवः। सर्व्वज इति पाठे सान्निपातिकः। अर्द्धाङ्गे अर्द्धनारीश्वराकारे। यश्चोर्द्धं परिसर्पतीति पुरुषविषयम्। तथा च।

"ऊर्द्धगामी नरं पन्नगमधोगामी मुखात् स्त्रियम्। उभयं वस्तिसंजातः शोथो हन्ति न संशयः॥"

ऊर्द्धगामी मुखगामी। तथा च तन्त्रान्तरे।

"पादप्रवृत्तः श्वयथुर्नृणां यः प्राप्नुयान्मुखम् ॥" इति ॥ स न सिध्यतीति शेषः। अधोगामी पादगामी। तथा च तन्त्रान्तरे।

"स्त्रीणां वक्त्रात् पदं याति वस्तिजश्च न सिध्यति।" इति ॥

उभयं नरं नारीञ्च। अपरञ्च।

"अनन्योपद्रवकृत शोथः पादसमुत्थितः। पुरुषं हन्ति वा नारीं मुखजो वस्तिजो द्वयम्॥"

अयमर्थः। पादसमुत्थितः पादाभ्यामुत्थितो मुखगामीति यावत् शोथः पुरुषं हन्ति स किं विशिष्टः अनन्योपद्रवकृतः। शोफादन्ये व्याधयोऽतीसारप्रहण्यर्शःप्रभृतयः तैरासुपद्रवैः कृतः। तदुपद्रवेण जात इत्यर्थः। न अन्योपद्रवकृतः। अनन्योपद्रवकृतः। अर्थात् स्वहेतुभिरेव जातः। शोथव्याधिरेव तु पुनर्मुखजः मुखाज्जातः पदगामीति यावत् नारीं हन्ति। सोऽप्यनन्योपद्रवकृत एव। वस्तिजः द्वयं पुरुषं नारीञ्च हन्ति सोऽप्यनन्योपद्रवकृत एव॥*॥ अथ शोथस्य चिकित्सा।

"शुण्ठीपुनर्नवैरण्डपञ्चमूलीशृतं जलम्। वातिके श्वयथौ शस्तं पानाहारपरिग्रहे॥*॥ पटोलत्रिफलारिष्टदार्व्वीक्वाथः सगुग्गुलुः।

इति पित्तकृतं शो...
स्नुक्पयोभाविताः कृष्णा पथ्या...
योजिता शमयन्त्याशु शोथं
निरुद्धे निर्यक्रिया कर्य्यात् भवेत्
विरेचनवमनं पूर्वं शोधनं विभवे दिदेत् ।
शोथे स्यागसूजे ...
भल्लातका हरीतक्योर्यं सतिला क्षणमृत्तिक
सहिष्यो नवनीतञ्च सेपाद्दधतिनाशिन,
अथ दुग्धं सहिष्यां च। यत आह।

"महिषीक्षीरसंपिष्टैर्वल्मीकमृत्तिकैः। तिलैर्लिप्तः शमं याति शोथो भल्लातकोत्थितः यष्टिदुग्धतिलैर्लेपो नवनीतेन संयुतः। शोथमारुष्करं हन्ति चूर्णं शालदलस्य च।

विषजशोथचिकित्सा तु ...

अथ सामान्यचिकित्सा।

"पथ्या निशा भार्गिगुडूचिदार्वी
पुनर्नवा दारु महौषधञ्च।
क्वाथं पयोयोदरपाणिपाद-
मुखाश्रितं हन्त्यचिरेण शोथम्।"

इति ...

फलत्रिकोद्भवं क्वाथं गोमूत्रेणैव साधयेत्। वातघ्नमभवं शोथं हन्यादुपचयमपि॥

हरीतकीदेवद्रुमनागरैश्च
दन्ती त्रिवृत्पत्रपुनर्नवाभ्याम्।
दुग्धं सुसिद्धं विधिना निपीतं
गीतं परं शोथहरं भिषग्भिः॥"

हरीतः वर्षाभूः ॥*॥

"केशरस्तथार्कवर्षाभूर्निम्बक्वाथेन शोथहा। गोमूत्रेणापि कुर्व्वीत सुखोष्णं पुनर्नवा दारु शुण्ठी शिग्रुः। अम्लपिष्टः सुखोष्णोऽयं प्रलेपः

गुड़ार्द्रकं वा गुड़नागरं वा
गुड़ाभयां वा गुड़पिप्पलीं वा
कर्षाभिवृद्धा त्रिपलप्रमाणं
खादेन्नरः पक्षमथापि मासम्॥
शोथप्रतिश्यायगलास्यरोगान्
सश्वासकासारुचिपीनसादीन्।
जीर्णज्वरार्शोग्रहणीविकारान्
हन्यात् तथान्यान् कफवातरोगान्॥"

विश्वं गुड़ेन तुल्य ...
विनिहन्ति ...

कणानागरजं चूर्णं सगुड़ं शोथनाशनम्। आमाजीर्णप्रशमनं शूलघ्न ...
गुड़ात् पलचयं ग्राह्यं शृङ्गवेरं पलत्रयम्। शृङ्गवेरसमा कणा लोहविट्तिलयोः पलम् चूर्णमेतत् समुद्दिष्टं सर्व्वश्वयथुनाशनम्॥"

इति गुडा...

"मानककायकल्काभ्यां घृतप्रस्थं पक्वं हन्ति द्वन्द्वजं शोथं त्रिदोषञ्च व्यपोहति।"

इति मानकघृतम्।

"शुष्कमूलकवर्षाभूदारुरास्नामहौषधैः। पक्वमभ्यञ्जनात्तैलं समूलं श्वयथुं हरेत्॥"

यत्कृत्स्नशोधनम् । इति शोधाधिकारः । इति भावप्रकाशः ॥

गोधकः, पुं, (शोध एव । स्वार्थे कन् ।) शोथः । इति शब्दरत्नावली ॥

गोधघ्नी, स्त्री,(शोथं हन्तीति । हन् + "अमनुष्य-कर्त्तृके च ।" ३।२।५३ । इति टक् ।) पुनर्नवा । इत्यमरः । शालपर्णी । इति राजनिर्घण्टः ॥ शोथनाशके, त्रि ॥

गोधजित्, पुं,(शोथं जयतीति । जि + क्विप् ।) भल्लातकः । इति त्रिकाण्डशेषः ॥

गोधजिह्वः, पुं, (शोथे जिह्वः कुटिल इव । तन्नाशकत्वात् ।) पुनर्नवा । इति त्रिकाण्डशेषः ॥

गोधहृत्, पुं, (शोथं हरति नाशयतीति । हृ + क्विप् ।) भल्लातकः । इति रत्नमाला ॥ शोथहारके, त्रि ॥

गोधनं, क्ली,(शोधयतीति । शुध + णिच् + ल्युः) वङ्कलम् । इति राजनिर्घण्टः । (शुध + भावे ल्युट् ।) शोधम् । इति शुधधात्वर्थदर्शनात् । (प्रायश्चित्तम् । यथा, मनुः । ११ । १६१ ।
"चर्म्मोच्चमन्नं नात्त्वमात्मनः शुद्धिमिच्छता । अज्ञानभुक्तन्त्वात्त्वं शोध्यं वाप्याशु शोधनैः ॥")
विष्ठा । इति शब्दचन्द्रिका ॥ कासीसम् । इति राजनिर्घण्टः ॥ विहिताविहितमासादिविचारणम् । यथा,—
"सर्व्वपक्षकालेन सदानो नास्ति कथन ।
तत्र यद्यत् कृतं सर्व्वमनन्तफलदं भवेत् ।
न मासतिथिवारादिशोधनं सूर्य्यपर्व्वणि ॥"
इति मलमासतत्त्वम् ॥ * ॥

धातुनिर्दोषीकरणम् । यथा,—
"पत्रलोहानपत्राणि वैद्यो वह्नौ प्रतापयेत् ।
निषिञ्चेत्तानि तैलचक्रे च काञ्जिके ॥
गोमूत्रे च कुलत्थानां कषाये तु त्रिधा त्रिधा ।
एवं हेम्नः परेषाञ्च धातूनां शोधनं भवेत् ॥" * ॥

व्रणादिपरिष्करणम् । यथा,—
"व्रणस्य त्वविशुद्धस्य क्वाथः शुद्धिकरः परः ।
पटोलनिम्बपत्रस्य सर्व्वत्रैव प्रयुज्यते ॥
वातिके दशमूलानां क्षीरिणां पैत्तिके व्रणे ।
आरग्वधादेः कफजे कषायः शोधनं हितम् ॥"
अपि च ।
"षट्बिन्दनाग्निवेषेण चतुर्विंशाहकेन वा ।
अथवा क्वाथनेनैव सिद्धमुष्णोदकं पठेत् ।
श्लेष्मामवातमेदोघ्नं वह्निशोधनदीपनम् ॥"
इति च भावप्रकाशः ॥ * ॥

लिखितपत्रादेः प्रमाणीकरणम् । यथा । लेख्यशोधनमाह कात्यायनः ।
"स्वहस्तलिख्यमन्देहे जीवतो वा मृतस्य च ।
तत् स्वहस्तकृतैरन्यैः पत्रैस्तस्य विनिर्णयः ॥" *

विचारलिखितस्य सदोषकरणम् । यथा । तच्छोधनमाह बृहस्पतिः ।
"न्यूनाधिकं पूर्व्वपक्षं तावच्छादो विशोधयेत् ।
न दद्यादुत्तरं यावत् प्रत्यर्थी सभ्यसन्निधौ ॥"
कात्यायनः ।
"शोधयेत् पूर्व्वपक्षन्तु यावन्नोत्तरदर्शनम् ।
उत्तरेणावरुद्धस्य निवृत्तं शोधनं भवेत् ॥"
इति व्यवहारतत्त्वम् ॥ * ॥

पदस्य हरणम् । यथा,—
"भाज्याद्धरः शुध्यति यद्गुणः स्या-
दन्त्यात् फलं तत् खलु भागहारे ।
समेन केनाप्यपवर्त्त्य हार-
भाज्यौ भजेद्वा सति सम्भवे तु ॥"
इति लीलावती ॥

अन्यत् शुद्धिशब्दे द्रष्टव्यम् ॥

गोधनः, पुं, (शोधयतीति । शुध + णिच् + ल्युः ।) निर्म्मलः । इति राजनिर्घण्टः ॥

गोधनः, त्रि, (शोधयतीति । शुध + णिच् + ल्युः ।) शुद्धिकारकः । यथा,—
"सद्यःसन्तापनः शुद्धो नतकृच्छ्रम् पावनः ।
कृच्छ्रोपवासकृच्छ्रम् आपकृच्छ्रम् शोधनः ॥"
इति प्रायश्चित्ततत्त्वधृतदिव्यामिवचनम् ॥

यथा च ।
"लेपनैर्व्रणपाकघ्नो निम्बपत्रनिशायुगैः ।
विशुद्धवनदुतेः पिष्टैः प्रलेपो व्रणशोधनः ॥"
इति भावप्रकाशः ॥

गोधनी, स्त्री, (शोध्यतेऽनयेति । शुध शौचे + णिच् + करणे ल्युट् । ङीप् ।) सम्मार्जनी । इत्यमरः ॥ ताम्रवल्ली । नीली । इति राजनिर्घण्टः ॥

गोधनीवीजं,क्ली,(शोधन्या वीजमिव वीजं यस्य ।) जयपालः । इति राजनिर्घण्टः ॥

गोधनीय, त्रि, शोधितव्यः । शोध्यः । शुधधातोरनीयप्रत्ययेन निष्पन्नः ॥ (यथा, कथासरित्सागरे । ५३ । १४१ ।
"भुक्तं मया तदन्नं यत्शोधनीयं मयापि तत् ॥")

गोधितं,त्रि,(शोध्यते स्मेति । शुध + णिच् + क्तः ।) मणिकाद्यपनयनेन कृतशोधनव्यञ्जनादि । तत्पर्य्यायः । संस्कृतम् २ । इत्यमरभरतौ ॥ अपि च ।
"व्यञ्जने कीटकीटादिरहिते संस्कृतशोधिते ॥"
इति शब्दरत्नावली ॥

अपनीतमलम् । तत्पर्य्यायः । निर्णिक्तम् २ मृष्टम् ३ निःशोध्यम् ४ अनवस्करम् ५ । इत्यमरभरतौ ॥

गोफः,पुं,(शु गतौ । बाहुलकात् फः ।) शोथः । इत्यमरः ॥ (यथा, सुश्रुते । १ । १४ ।
"तद्दुष्टं शोणितमनिर्ह्रियमाणः कण्डूशोफरागदाहपाकवेदना जनयेत् ॥")

गोफघ्नी, स्त्री, (शोफं हन्तीति । हन + टक् । ङीप् ।) शालपर्णी । रक्तपुनर्नवा । इति राजनिर्घण्टः ॥

गोफनाशनः, पुं, (शोफं नाशयतीति । नश + णिच् + ल्युः ।) नीलवृक्षः । इति राजनिर्घण्टः ॥ शोथनाशके, त्रि ॥

गोफहृत्,पुं,(शोफं हरतीति । हृ + क्विप् ।)भल्लातकः । इति भावप्रकाशः ॥ शोथहारके, त्रि ॥

गोभनं, क्ली, (शोभते इति । शुभ + ल्युः ।) पद्मम् । इति शब्दचन्द्रिका ॥ (शुभ + भावे ल्युट् । शुभम् । यथा, भागवते । ५ । १८ । २१ ।
"अहो अमीषां किमकारि शोभनं
प्रसन्न एषां स्विदुत स्वयं हरिः ॥")

गोभनः, पुं, (शुभ + ल्युः ।) ग्रहः । इति धरणिः ॥ विष्कम्भादिसप्तविंशतियोगान्तर्गतपञ्चमयोगः । इति मेदिनी ॥ तत्र जातफलम् ।
"स्याच्छोभनः शोभनयोगजन्मा
दक्षो विपक्षप्रतिपक्षचित्तः ।
सद्गन्धयाकवपुः सुधीरः
सन्तानयुक्तो मनुजः प्रवीणः ॥"
इति कोष्ठीप्रदीपः ॥

गोभनः, त्रि, (शोभते इति । शुभ + ल्युः ।) सुन्दरः । इति मेदिनी ॥ अस्य पर्य्यायो मनोज्ञशब्दे द्रष्टव्यः ॥

गोभनकः, पुं, (शोभते इति । शुभ + ल्युः । ततः कन् ।) शोभाञ्जनवृक्षः । इति शब्दचन्द्रिका ॥ शोभनशब्दकारके, त्रि ॥

गोभना, स्त्री, (शोभन + टाप् ।) हरिद्रा । गोरोचना । इति राजनिर्घण्टः ॥

गोभा, स्त्री, शोभतेऽनया । (शुभ + करणे घञ् । टाप् ।) दीप्तिः । तत्पर्य्यायः । कान्तिः २ द्युतिः ३ छविः ४ । इत्यमरः ॥ धृती ५ त्विट् ६ इति तट्टीका ॥ अभिख्या ७ । इति जटाधरः ॥ शुभा ८ भाः ९ श्रीः १० भासा ११ भा १२ इति शब्दरत्नावली ॥ सुषमा १३ छाया १४ विभा १५ दृक्प्रिया १६ भानम् १७ भातिः १८ कमा १९ रमा २० । इति राजनिर्घण्टः ॥ तस्या लक्षणम् ।
"सा शोभा रूपभोगाद्यैर्यत् स्यादङ्गविभूषणम् ।
शोभैव कान्तिराख्याता मन्मथाप्यायनोज्ज्वला ॥"
इत्युज्ज्वलनीलमणिः ॥ * ॥

गोपीविशेषः । यथा,—
"दृष्टस्त्वं शोभया गोप्या युक्तश्चन्दनकानने ।
सद्यो सन्दृष्टमात्रेण तिरोधानं कृतं त्वया ॥
शोभा देहं परित्यज्य जगाम चन्द्रमण्डलम् ।
ततस्तस्याः शरीरञ्च स्निग्धं तेजो बभूव ह ॥
संविभज्य त्वया दत्तं हृदयेन विदूयता ।
रत्नाय किञ्चित् स्वर्णाय किञ्चिन्माणिक्याय च ॥
किञ्चित् स्त्रीणां मुखाब्जेभ्यः किञ्चिद्राजाय किञ्चन ।
किञ्चित् किसलयेभ्यश्च पुष्पेभ्यश्चापि किञ्चन ॥
किञ्चिच्चन्दनपङ्केभ्यस्तोयेभ्यश्चापि किञ्चन ।
किञ्चित् फलेभ्यः शस्येभ्यः सुपक्वेभ्यश्च किञ्चन ।
किञ्चिन्नूतनवस्त्रेभ्यो दुग्धे भ्यश्चापि किञ्चन ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ८ अध्यायः ॥ * ॥

हरिद्रा । गोरोचना । इति राजनिर्घण्टः ॥

गोभाञ्जनः, पुं, (शोभं रुचिरं अञ्जनं यस्मात् ।) वृक्षविशेषः । सजिना इति भाषा । तत्पर्य्यायः । शिग्रुः २ तीक्ष्णगन्धकः ३ अक्षीवः ४ मोचकः ५ । इत्यमरः ॥ तीक्ष्णगन्धः ६ सुतीक्ष्णः ७ बन-

पहवः ८ श्वेतमरिचः ९। इति जटाधरः ॥
तीक्ष्णः १० गन्धः ११ गन्धकः १२ कामोवकः १३
भावीरः १४ शुभाञ्जनः १५ स्तोचित्तहारी १६
दृष्टिवनाशनः १७। इति शब्दरत्नावली ॥
स्थगन्धा १८ मूलकपर्णी १९। इति रत्नमाला ॥
शोभप्रियः २० अक्षप्रियः २१ सुखमोदः २२
अक्षयप्रियः २३ चक्षुष्यः २४ हविराञ्जनः २५।
अस्य गुणाः। तीक्ष्णत्वम्। कटुत्वम्। स्वादुत्वम्। उष्णत्वम्। पिच्छिलत्वम्। अस्तुवातार्तिगुल्मनाशित्वम्। चक्षुर्हितत्वम्। रोचनत्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"शोभाञ्जनः कटुस्तिक्तः शोथविद्रधिगुल्मनुत्"
इति राजवल्लभः॥
अन्यच्च। अथ शोभाञ्जनः श्यामः श्वेतः रक्तश्च।
"शोभाञ्जनशिग्रुतीक्ष्णगन्धकाक्षीवमोचकाः।
तद्बीजं श्वेतमरिचं मधुशिग्रुः सलोहितः॥
शिग्रुः कटुः कटुः पाके तीक्ष्णोष्णो मधुरो लघुः।
दीपनो रोचनो रूक्षः क्षारस्तिक्तो विदाहकृत्॥
संग्राही शुक्रलो हृद्यः पित्तरक्तप्रकोपणः।
चक्षुष्यः कफवातघ्नो विद्रधिश्वयथुक्रमीन्॥
मेदोऽपचीविषप्लीहगुल्मगण्डव्रणान् हरेत्।
श्वेतः प्रोक्तगुणो ज्ञेयो विशेषाद्दाहकृद्भवेत्॥
प्लीहानं विद्रधिं हन्ति व्रणघ्नः पित्तरक्तकृत्।
मधुशिग्रुः प्रोक्तगुणो विशेषाद्दीपनः सरः॥
शिग्रुवल्कलपत्राणां स्वरसः परमार्त्तिहृत्॥
चक्षुष्यं शिग्रुजं बीजं तीक्ष्णोष्णं विषनाशनम्।
अवृष्यं कफवातघ्नं तन्नस्येन शिरोऽर्त्तिनुत्॥
शिग्रुशाकं हिमं स्वादु चक्षुष्यं वातपित्तकृत्।
क्रिमिघ्नं दाहकृत् स्निग्धं रुच्यं मदहरमिष्यते॥"
अथ पुष्पगुणाः।
"शिग्रोः पुष्पन्तु कटुकं तीक्ष्णोष्णं स्नायुशोथनुत्
क्रिमिहृत् कफवातघ्नं विद्रधिप्लीहगुल्मजित्॥"
अथ फलगुणाः।
"शोभाञ्जनफलं स्वादु कषायं कफपित्तनुत्।
शूलकुष्ठक्षयश्वासगुल्महृद्दीपनं परम्॥"
इति भावप्रकाशः॥
अथ रक्तशोभाञ्जनपर्यायः।
"रक्तो मधुरसश्च मधुशस्तः शोभाञ्जनः॥"
इति रत्नमाला॥
अन्यच्च।
"रक्तशोभाञ्जने मुख्यो मधुशिग्रुर्मधूद्भवः।"
इति शब्दरत्नावली॥
अस्य गुणाः।
"मधुशिग्रुस्तु दीपनः कफनिलघ्नस्तु पाचनः॥"
इति भावप्रकाशः॥
अन्यत् शोथगुणे द्रष्टव्यम्।
शोक्लं क्ली, हस्तिपिप्पली। इति राजनिर्घण्टः।
शोष, पु, (शुष + भावे घञ्।) शोषणम्। इति
[illegible] (शुष्यतेऽनेनेति। शुष + करणे घञ्।)
[illegible] राजयक्ष्मा। यथा—
"[illegible] विषदुष्टेन वायुना देहनाय च।
[illegible] [illegible] [illegible] [illegible] रक्तगोदकम्।"

प्रियङ्गुनिम्बत्रिकटुगोमूत्रेणावघर्षितम्।
नस्यमालेपनञ्चैव स्नानमुद्वर्त्तनं तथा॥
अपस्मारविषोन्मादशोषालक्ष्मीज्वरापहम्।
भूतेभ्यश्च भयं हन्ति राजद्वारे च शासनम्॥"
इति गारुडे १९८ अध्यायः॥
शोषणं, क्ली, (शुष + ल्युट्।) रसाकर्षणम्। चोषण
इति भाषा। तत्पर्य्यायः। रसादनम् २। इति
हेमचन्द्रः॥ स्रो इरहितीकरणम्। यथा,—
"शोषणेन शरीरस्य तपसाध्ययनेन च।
पापकृन्मुच्यते पापाद्दानेन च दमेन च॥"
इति प्रायश्चित्ततत्त्वम्॥
शुण्ठी। इति राजनिर्घण्टः॥
शोषणः, पुं, (शोषयतीति। शुष + णिच् + ल्युः।)
कामदेवस्य बाणविशेषः। यथा,—
"उन्मादनः शोषणश्च तापनः स्तम्भनस्तथा।"
इति जटाधरः॥
श्योनाकवृक्षः। इति भावप्रकाशः॥ (शोषण-
कारके, त्रि॥)
शोषसम्भवं, क्ली, (शोषाय रसाकर्षणाय सम्भवो
यस्य।) पिप्पलीमूलम्। इति राजनिर्घण्टः॥
शोषापहा, स्त्री, (शोषं अपहन्तीति। हन + ड।
टाप्।) क्षीतनकम्। इति राजनिर्घण्टः॥
शोषनायके, त्रि॥
शोषित, त्रि, (शुष + णिच् + क्तः।) कृतशोषणः।
यथा,—
"वातापिर्भक्षितो येन वातापिश्च महासुरः।
समुद्रः शोषितो येन स मेऽगस्त्यः प्रसीदतु॥"
इति मलमासतत्त्वम्॥
शौकं, क्ली, (शुकानां समूहः। शुक + "खण्डिकादिभ्यश्च।" ४। २। ४५। इत्यञ्।) शुकगणः। इत्यमरः॥ स्त्रीणां कारणम्। इति
मेदिनी॥
शौकरं, शौकरवं, क्ली, (शूकरस्येदमिति। शूकर + अण्।) तीर्थविशेषः। यथा,—
वराह उवाच।
"शृणु मे परमं गुह्यं यत्त्वया परिपृच्छितम्।
मम क्षेत्रं परञ्चैव गुह्यं भागवतप्रियम्॥
वरं कोकामुखं स्थानं तथा कुब्जाम्रकं परम्।
वरं शौकरवं स्थानं सर्व्वसंसारमोचनम्॥
यत्र मंस्था च मे देवि उद्धृतासि रसातलात्।
यत्र भागीरथी गङ्गा मम शौकरवे स्थिता॥
धरण्युवाच।
केषु लोकेषु यान्तीह शौकरे ये मृताः प्रभो!।
किं वा पुण्यं भवेत्तत्र स्नानस्य विभवस्तथा॥
कति तीर्थानि तिष्ठन्ति शौकरवे तव।
धर्म्ममाख्यातमनयोः नन्दिनी! धर्ममुद्भवमि॥
वराह उवाच।
शृणु तत्त्वेन मे देवि! तत्त्वं मां परिपृच्छसि।
या गतिर्ये प्रयान्ति नराः शौकरवे मृताः॥
तेषां गमनस्य वै पुण्यं गमनस्य गमनस्य वा।
तत्र यानि च तीर्थानि मम सम्यानमाश्रिताः॥
शृणु पुण्यं महाभागे मम क्षेत्रेषु सुन्दरि।

प्राप्नुवन्ति महाभागे गत्वा शौकरवं प्रति।
दश पूर्व्वापरांश्चापि अपरान् सप्त पञ्च च।
स्वर्गं गच्छन्ति ते तत्र ये मृतास्तेषु जन्तवः।
गमनादेव सुश्रोणि! सुखस्य मम दर्शनात्।
सप्तजन्मान्तरे भद्रे जायते विपुले कुले।
धनधान्यसमृद्धेषु रूपवान् गुणवान् शुचिः।
मद्भक्तश्चैव जायेत मम कर्म्मपरायणः।
एवं वै मानुषो भूत्वा अपराधविवर्ज्जितः।
गमनं तस्य क्षेत्रस्य मरणं तत्र कारणम्।
ये मृतास्तत्र सुश्रोणि क्षेत्रे शौकरवे मम।
शङ्खचक्रगदापद्मचतुर्हस्तायतभुजाः।
त्यक्त्वा कलेवरं तूर्णं मम लोकाय गच्छति।"
इति वाराहे शौकरतीर्थमाहात्म्ये
मदालसाखज्जनकोपाख्याननामाध्यायः॥
शौक्तिकेयं, क्ली, (शुक्तिकायां भवमिति। शुक्तिका
+ ढक्।) मुक्ता। इति राजनिर्घण्टः॥
शौक्त्यं, क्ली, (शुक्तौ भवमिति। शुक्ति + ष्यञ्।)
मुक्ता। इति राजनिर्घण्टः॥ शुक्तिसम्बन्धिनि
त्रि॥
शौक्लं, क्ली, (शुक्लस्य भावः। शुक्ल + "वर्णदृढादिभ्यः ष्यञ् च।" ५। १। १२३। इति अण्।)
शुक्लता यथा—
"पलितं जरसा शौक्लं केशादौ।"
इत्यमरः।
(यथा, बृहत्संहितायाम्। ४। २।
"त्यजतोऽर्कतलं शशिनः
पश्चादवलम्बते यथा शौक्लम्॥")
शौचं, क्ली, (शुचेर्भावः। शुचि + "इगन्ताच्च लघु-
पूर्व्वात्।" ५। १। १३१। इत्यण्।) पवि-
त्रितत्वम्। शुद्धिः। तस्य लक्षणादि यथा,—
"अभक्ष्यपरिहारस्तु संसर्गश्चाप्यनिन्दितैः।
स्वधर्म्मे च व्यवस्थानं शौचमेतत् प्रकीर्त्तितम्।"
इत्येकादशीतत्त्वे बृहस्पतिवचनम्।
अन्यच्च।
"सर्व्वेषामेव शौचानामर्थशौचं विशिष्यते।
योऽर्थैः शुचिः स शुचिर्न मृद्वारिशुचिः शुचिः॥"
सत्यशौचं मनःशौचं शौचमिन्द्रियनिग्रहः।
सर्व्वभूतदयाशौचं जलशौचन्तु पञ्चमम्।
यस्य सत्यञ्च शौचञ्च तस्य स्वर्गो न दुर्लभः।"
इति गारुडे ११० अध्यायः।
अपिच।
"यावता शुद्धिं मन्येत तावच्छौचं समाचरेत्
प्रमाणं शौचसंख्याया न शिष्टैरुपदिश्यते।
शौचन्तु द्विविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा
मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिस्तथान्तरम्।"
इति गारुडे २१३ अध्यायः।
पादादिशौचगुणा यथा—
"मेध्यं पवित्रमायुष्यमलक्ष्मीकलिनाशनम्।
पादयोर्मलमार्गाणां शौचाधानमभीक्ष्णशः।"
इति राजवल्लभः।

...ऽपि च ।
...हृताशौमृत्तिकाभ्यामित्थं नारद यत्नतः ।
...त्सर्गं ततः कुर्य्यात् शौचं मूत्रपुरीषयोः ॥"
इति पाद्मोत्तरखण्डे १०८ अध्यायः ॥
...जननादशौचस्थाव लिख्यते ।
व्यास उवाच ।
...दशाहं प्राहुरशौचं सपिण्डेषु विपश्चितः ।
...तेषु चाथ जातेषु ब्राह्मणानां द्विजोत्तमाः ॥
...त्यानि चैव कर्म्माणि काम्यानि च विशेषतः ।
...कुर्य्याद्विहितं किञ्चित् स्वाध्यायं मनसापि च ।
...चीननिधनांस्तस्मान् शालाग्नौ हावयेद्द्विजान् ।
...ष्काद्येन फलैर्वापि वैतानाञ्जुहुयात्ततः ॥
...स्पृशेयुरिमानन्ये न च तेभ्यः समाहरेत् ।
...तुर्थे पञ्चमे वाह्नि संस्पर्शः कथितो बुधैः ॥
...तके तु सपिण्डानां संस्पर्शो न प्रदुष्यति ।
...तकं सूतिकाञ्चैव वर्ज्जयित्वा नृणां पुनः ॥
...शाहं निर्गुणे प्रोक्तमशौचं चातिनिर्गुणे ।
...कद्वित्रिगुणैर्युक्तं चतुस्त्र्येकदिनैः शुचिः ॥
...शाहात्तु परं सम्यगधीयीत जुहोति च ।
...तुर्थे तस्य संस्पर्शं मनुः प्राह प्रजापतिः ॥
...क्रियाहीनस्य मूर्खस्य महारोगिण एव च ।
...थेष्टाचरणस्याहुर्म्मरणान्तमशौचकम् ॥
...त्रिरात्रं दशरात्रं वा ब्राह्मणानान्तु शावकम् ।
...ाक् संस्कारात् त्रिरात्रं स्यात्तस्मादूर्द्ध्वं दशा-
हकम् ॥
...ऊनद्विवार्षिके प्रेते मातापित्रोस्तदिष्यते ।
त्रिरात्रेण शुचिस्त्वन्यो यदि ह्यत्यन्तनिर्गुणः ॥
...दन्तजातमरणे पित्रोरेकाहमिष्यते ।
...जातदन्ते त्रिरात्रं स्याद्यदि स्यातान्तु
निर्गुणौ ॥
आदन्तजननात् सद्य आचूडादेकरात्रकम् ।
त्रिरात्रमौपनयनात् सपिण्डानामुदाहृतम् ॥
जातमात्रस्य बालस्य यदि स्यान्मरणं पितुः ।
सद्यःशौचं सपिण्डानां कर्त्तव्यं सोदरस्य च ॥
ऊर्द्ध्वं दशाहादेकाहं सोदरो यदि निर्गुणः ।
अथोर्द्ध्वं दन्तजननात् सपिण्डानामशौचकम् ॥
एकाहं निर्गुणानान्तु चूडादूर्द्ध्वं त्रिरात्रकम् ।
अदन्तजातमरणं सम्भवेद्यदि सत्तमाः ॥
एकरात्रं सपिण्डानां यदि तेऽत्यन्तनिर्गुणाः ।
व्रतादेशात् सपिण्डानामर्व्वाक् स्नानं विधीयते ।
सर्व्वेषामेव गुणिनामूर्द्ध्वन्तु विषमं पुनः ॥
अर्व्वाक् षण्मासतः स्त्रीणां यदि स्याद्गर्भसंस्रवः ।
तदा माससमैस्तासामशौचं दिवसैः स्मृतम् ॥
तत ऊर्द्ध्वन्तु पतने स्त्रीणां स्याद्दशरात्रकम् ।
सद्यःशौचं सपिण्डानां गर्भस्रावाद्वा ततः ॥
गर्भच्युतादहोरात्रं सपिण्डेऽत्यन्तनिर्गुणे ।
यथेष्टाचरणे ज्ञातौ त्रिरात्रमिति निश्चयः ॥
यदि स्यात् सूतके सूतिर्म्मरणे वा मृतिर्भवेत् ।
शेषेणैव भवेच्छुद्धिरहःशेषे त्रिरात्रकम् ।
मरणोत्पत्तियोगे तु मरणाच्छुद्धिरिष्यते ।
अघवृद्धिमदाशौचमूर्द्ध्वं चेन्न शुध्यति ।
अथ चेत् पञ्चमीं रात्रिमतीत्य परतो भवेत् ।
अघवृद्धिमदाशौचं तदा पूर्व्वेण शुध्यति ॥
देशान्तरगतं श्रुत्वा सूतकं शावमेव तु ।
तावदप्रयतो मर्त्त्यो यावच्छेषः समाप्यते ॥
अतीते सूतके प्रोक्तं सपिण्डानां त्रिरात्रकम् ।
तथैव मरणे स्नानमूर्द्ध्वं संवत्सराद्यदि ॥
वेदार्थविदधीयानो योऽग्निमान् वृत्तिकर्षितः ।
सद्यःशौचं भवेत्तस्य सर्व्वावस्थासु सर्व्वदा ॥
स्त्रीणामसंस्कृतानान्तु प्रदानात् परतः सदा ।
सपिण्डानां त्रिरात्रं स्यात् संस्काराद्भर्त्तुरेव च ॥
अहस्त्वदत्तकन्यानामशौचं मरणे स्मृतम् ।
ऊनद्विवर्षान्मरणे सद्यःशौचमुदाहृतम् ॥
आदन्तात् सोदरे सद्य आचौडादेकरात्रकम् ।
आप्रदानात् त्रिरात्रं स्याद्दशरात्रमतः परम् ॥
मातामहानां मरणे त्रिरात्रं स्यादशौचकम् ।
एकोदकानां मरणे सूतके चैतदेव हि ।
पक्षिणी योनिसम्बन्धे बान्धवेषु तथैव च ॥
एकरात्रं समुद्दिष्टं गुरौ सब्रह्मचारिणाम् ।
प्रेते राजनि सज्योतिर्यस्य स्याद्विषये स्थितिः ॥
गृहे मृतासु दत्तासु कन्यकासु त्र्यहं पितुः ।
परपूर्व्वासु भार्य्यासु पुत्त्रेषु कृतकेषु च ॥
त्रिरात्रं स्यात्तथाचार्य्ये स्वभार्य्यास्वन्यगासु च ॥
आचार्य्यपुत्त्रे पत्न्याञ्च अहोरात्रमुदाहृतम् ॥
एकाहं स्यादुपाध्याये स्वग्रामे श्रोत्रियेऽपि च ।
त्रिरात्रमसपिण्डेषु स्वगृहे संस्थितेषु च ॥
एकाहं वा स्वशुर्य्ये स्यादेकरात्रश्च शिष्यके ।
त्रिरात्रं श्वश्रूमरणे श्वशुरे चैतदेव हि ॥
सद्यःशौचः समुद्दिष्टं सगोत्रे संस्थिते सति ॥
शुध्येद्विप्रो दशाहेन द्वादशाहेन भूमिपः ।
वैश्यः पञ्चदशाहेन शूद्रो मासेन शुध्यति ॥
क्षत्त्रविट्शूद्रदायादा ये स्युर्विप्रस्य बान्धवाः ।
तेषामशौचे विप्रस्य दशाहाच्छुद्धिरिष्यते ॥
राजन्यवैश्यावप्येवं हीनवर्णासु योनिषु ।
स्वमेव शौचं कुर्य्यातां विशुद्ध्यर्थं न संशयः ॥
सर्व्वेतूत्तमवर्णानां शौचं कुर्य्युरतन्द्रिताः ।
तद्वर्णविधिदृष्टेन स्वन्तु शौचं स्वयोनिषु ॥
षड्रात्रं वा त्रिरात्रं स्यादेकरात्रं क्रमेण तु ।
वैश्यक्षत्त्रियविप्राणां शूद्रेष्वाशौचमेव तु ॥
अर्द्धमासोऽथ षड्रात्रं त्रिरात्रं द्विजपुङ्गवाः ।
शूद्रक्षत्त्रियविप्राणां वैश्येष्वाशौचमिष्यते ॥
षड्रात्रं द्वादशाहश्च विप्राणां वैश्यशूद्रयोः ।
अशौचं क्षत्त्रिये प्रोक्तं क्रमेण द्विजपुङ्गव ॥
शूद्रविट्क्षत्त्रियाणान्तु ब्राह्मणे संस्थिते सति ।
दशरात्रेण शुद्धिः स्यादित्याह कमलोद्भवः ॥
असपिण्डं द्विजं प्रेतं विप्रो निर्हृत्य बन्धुवत् ।
अशित्वा च सहोषित्वा दशरात्रेण शुध्यति ॥
यद्यन्नमत्ति तेषान्तु त्रिरात्रेण ततः शुचिः ।
[illegible]
[illegible]
दशाहेन [illegible] सपिण्डश्चैव शुध्यति ।
[illegible]
[illegible]
[illegible]
अवरश्चेद्वरं वर्णमवरं वा वरो यदि ॥
अशौचे संस्पृशेत् स्नेहात्तदाशौचेन शुध्यति ॥
प्रेतीभूतं द्विजं विप्रो योऽनुगच्छति कामतः ।
स्नात्वा सचैलं स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यति ॥
एकाहात् क्षत्त्रिये शुद्धिर्वैश्ये स्यात् द्व्यहेन
तु ।
शूद्रे दिनत्रयं प्रोक्तं प्राणायामशतं पुनः ॥
अनस्थिसञ्चिते शूद्रे रौति चेद्ब्राह्मणः स्वकः ।
त्रिरात्रं स्यादथाशौचमेकाहं त्वन्यथा स्मृतम् ॥
अस्थिसञ्चयनादर्व्वागेकाहं वैश्यशूद्रयोः ।
अन्यथा चैव सज्योतिर्ब्राह्मणे स्नानमेव तु ॥
अनस्थिसञ्चिते विप्रे ब्राह्मणो रौति चेत्तदा ।
स्नानेनैतद्भवेच्छुद्धिः सचैलेन न संशयः ॥
यस्तैः सहाशनं कुर्य्याच्छयनादीनि चैव हि ।
बान्धवो वा परो वापि स दशाहेन शुध्यति ॥
यस्तेषामन्नमश्नाति सकृदेवापि कामतः ।
तदाशौचे निवृत्तेऽसौ स्नानं कृत्वा विशुध्यति ॥
यावत्तदन्नमश्नाति दुर्भिक्षोपहतो नरः ।
तावन्त्यहान्यशौचं स्यात् प्रायश्चित्तं ततश्चरेत् ॥
दाहाद्यशौचं कर्त्तव्यं द्विजानामग्निहोत्रिणाम् ।
सपिण्डानान्तु मरणे मरणादितरेषु च ॥
सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते ।
समानोदकभावस्तु जन्मनाम्नोरवेदने ॥
पिता पितामहश्चैव तथैव प्रपितामहः ।
लेपभाजश्चतुर्थाद्याः साविण्ड्यं साप्तपौरुषम् ॥
अप्रदत्तानां तथा स्त्रीणां साविण्ड्यं साप्तपौरुषम् ।
ऊढानां भर्त्तृसापिण्ड्यं प्राह देवः पितामहः ॥
ये चैकजाता बहवो भिन्नयोनय एव च ।
भिन्नवर्णास्तु साविण्ड्यं भवेत्तेषां त्रिपौरुषम् ॥
कारवः शिल्पिनो वैद्या दासी दासस्तथैव च ।
दातारो नियमी चैव ब्रह्मविद्ब्रह्मचारिणौ ॥
सत्त्रिणो व्रतिनस्तावत् सद्यःशौचा उदाहृताः ।
राजा चैवाभिषिक्तश्च धिप्राः सत्त्रिण एव च ॥
यज्ञे विवाहकाले च दैवयागे तथैव च ।
सद्यःशौचं समाख्यातं दुर्भिक्षे वाप्युपद्रवे ॥
डिम्बाहवहतानाञ्च विद्युता पार्थिवैर्द्विजैः ।
सद्यःशौचं समाख्यातमसज्ञातिमरणे तथा ॥
अग्नौ मरुप्रपतने वीराध्वन्यप्यनाशके ।
ब्राह्मणार्थे च संन्यस्ते सद्यःशौचं विधीयते ॥
नैष्ठिकानां वनस्थानां यतीनां ब्रह्मचारिणाम् ।
नाशौचं कीर्त्तितं सद्भिः पतिते च तथा मृते ॥
पतितानां न दाहः स्यान्नान्त्येष्टिर्नास्थिसञ्चयः ।
न चाश्रुपातः पिण्डौ वा कार्य्यं श्राद्धादिकं
क्वचित् ॥
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

अशौचिनां गृहाद्ग्राह्यं शुष्कान्नमेवनित्यशः ॥"
इति कौर्म्मे उपविभागे २२ अध्यायः ॥
अन्यत् पाद्मोत्तरखण्डे १०८ अध्याये द्रष्टव्यम् ॥

शौचाचारः, पुं, (शौचः आचारः ।) शुद्धिकर्म्म । यथा,—
"शौचाचारविहीनस्य समस्ता निष्फलाः
-क्रियाः ॥"
इत्याह्निकाचारतत्त्वे ब्रह्मपुराणम् ॥
अन्यच्च ।
"उपनीय गुरुः शिष्यं महाव्याहृतिपूर्व्वकम् ।
वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेत् ॥"
इति याज्ञवल्क्यः ॥

शौचिकः, पुं, (शौचं गृहादेः शुचिता कार्य्यत्वेनास्त्यस्येति । शौच + ठन् ।) वर्णसङ्करविशेषः । यथा,—
"कैवर्त्तस्य च कन्यायां शौण्डिकादेव शौचिकः ॥"
इति पराशरपद्धतिः ॥

शौचेयः, पुं, (शौचेन वस्त्रादिशुचित्वेन व्यवहरतीति । शौच + ढक् ।) रजकः । इति शब्दरत्नावली ॥

शौट, ऋ गर्व्वे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) चतुर्दशस्वरी । ऋ, अशुशौटत् । शौटति वीरः । इति दुर्गादासः ॥

शौटीरः, पुं, (शौटतीति । शौट गर्व्वे + "कृशॄपृकटिपटिशौटिभ्य ईरन् ।" उणा० ४ । ३० । इति ईरन् ।) त्यागी । वीरः । इत्युणादिकोषः ॥ गर्व्वान्विते, त्रि । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (यथा, महाभारते । १२ । ८३ । ४३ ।
"सन्तुष्टः सम्मतः सत्यः शौटीरो द्वेष्यपापकः ।
मन्त्रवित् कालवित् शूरः समन्त्रं श्रोतुमर्हति ॥"

शौटीर्य्यं, क्ली, (शौटीरस्य भावः कर्म्म वा । शौटीर + "गुणवचनब्राह्मणादिभ्यः कर्म्मणि च ।" ५ । १ । १२४ । इति ष्यञ् ।) वीर्य्यम् । इति शब्दरत्नावली ॥ गर्व्वः । शौटीरशब्दात् भावे ष्यप्रत्ययेन निष्पन्नम् ॥

शौड ऋ गर्व्वे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) चतुर्दशस्वरी । ऋ, अशुशौडत् । इति दुर्गादासः ॥

शौण्डः, त्रि, (शुण्डायां मद्ये रतः । शुण्डा + अण् ।) मत्तः । इत्यमरः ॥ (यथा, महाभारते । ३ । २३२ । ११ ।
"चण्डाय शौण्डाय महाशनाय
घोराय दुष्टाय च नाय वत्साः ॥")

शौण्डिकः, पुं, (शुण्डापण्यमस्य । शुण्डा + "तदस्य पण्यम् ।" ४ । ४ । ५१ । इति ठक् ।) जातिविशेषः । शुँड़ी इति भाषा । तत्पर्य्यायः । मण्डहारकः २ इत्यमरः ॥ शुण्डारः ३ शौण्डी ४ शुण्डकः ५ । इति शब्दरत्नावली ॥ ध्वजः ६ पानः ७ पणः ८ । इति जटाधरः ॥ कल्यपालः ९ सुराजीवी १० । वारिवासः ११ पानवणिक् १२ ध्वजी १३ । आसुतीवलः १४ । इति हेमचन्द्रः ॥ तस्योत्पत्तिर्यथा,—
ततो गान्धिककन्यायां कैवर्त्तादेव शौण्डिकः ।
कैवर्त्तस्य च कन्यायां शौण्डिकादेव शौचिकः ॥"
इति पराशरपद्धतिः ॥
(अस्य गृहे भोजननिषेधो यथा, मनुः । ४ । २१६ ।
"श्ववतां शौण्डिकानाञ्च चैलनिर्णेजकस्य च ।
रञ्जकस्य नृशंसस्य यस्य चोपपतिर्गृहे ॥"
एषां गेहे नाद्यात् इत्यर्थः ॥*॥ शुण्डिकागारगते, त्रि, । अत्र "शुण्डिकादिभ्योऽण् ।" ४ । ३ । ७६ । इत्यण् ॥)

शौण्डी, [न्] पुं, (शुण्डा सुरा एव शौण्डं मद्यम् । स्वार्थे अण् । तत् पण्यत्वेनास्त्यस्येति । शौण्ड + इन् ।) शौण्डिकः । इति शब्दरत्नावली ॥

शौण्डी, स्त्री, (शुण्डायां मद्यपानगेहे भवा । मत्तानां रुचिप्रदत्वात् । शुण्डा + अण् । ङीप् ।) पिप्पली । चव्यम् । इति विश्वः ॥

शौण्डीरः, त्रि, (शौटतीति । शौट + ईरन् । पृषोदरादित्वात् साधुः ।) अहङ्कारी । यथा,—
"शौण्डीरो गर्व्वितस्तब्धो मानी चाहङ्कृतोद्धतः ।
उद्दर्पोच्छृङ्खलोऽकल्मषो नीचश्च पिशुनोऽधमः ॥"
इति धनञ्जयकोषः ॥

शौद्धोदनिः, पुं, (शुद्धोदनस्यापत्यं पुमानिति । शुद्धोदन + "अत इञ् ।" ४ । १ । ९५ । इति इञ् ।) शाक्यवंशावतीर्णबुद्धमुनिविशेषः । इत्यमरः ॥ "शुद्धमोदनस्य इति मनीषादिः । शुद्धोदनो नाम राजा । तथाहि ।
"शुद्धोदनो यतो भुङ्क्ते न्यायवत् शुद्धमोदनम् ।"
इत्यार्य्याभिधानम् ॥
शुद्धोदनस्यापत्यं शौद्धोदनिः । बाह्वादित्वात् इञ् ।" इति भरतः ॥

शौद्रः, पुं, (शूद्रायां भवः । शूद्रा + अण् ।) द्वादशविधपुत्रान्तर्गतपुत्रविशेषः । स तु ब्राह्मणक्षत्त्रियवैश्यान्यतमात् शूद्रायां जातः । यथा,—
"औरसः क्षेत्रजो दत्तो गूढोत्पन्नश्च कृत्रिमः ।
क्रीतापविद्धकानीनशौद्रपौनर्भवा अपि ॥
स्वयं दत्तः सहोढोऽपि द्वावुक्तावौरसौ समौ ॥"
इति जटाधरः ॥
(यथा, मनुः । ९ । १६० ।
"कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा ।
स्वयं दत्तश्च शौद्रश्च षड़दायादबान्धवाः ॥"*॥
शूद्रस्येदमिति । अण् ।) शूद्रसम्बन्धिनि, त्रि, ॥ (यथा, महाभारते । १२ । ६२ । ४ ।
"धान्याणि वैश्यानि च सेवमानः
शौद्राणि कर्म्माणि च ब्राह्मणः सन् ।
अस्मिंल्लोके निन्दितो मन्दचेताः
परे च लोके निरयं प्रयाति ॥")

शौधिका, स्त्री, रक्तकङ्कुः । इति हेमचन्द्रः ॥

शौनकः, पुं, (शुनकस्यापत्यमिति । शुनक + "अनृष्यानन्तर्य्ये बिदादिभ्योऽञ् ।" ४ । १ । १०४ । इति अञ् । मुनिविशेषः । यथा,—
"असपिण्डीकरणादूर्द्ध्वं न दद्यात् प्रतिमासिकम् ।
एकोद्दिष्टविधानेन दद्यादित्याह [illegible]"
[illegible]

शौनिकः, (शूना प्राणिवधस्थानं [illegible] शूना + ठक् ।) मांसविक्रयकर्त्ता ।
"वैतंसिकः कौटिकश्च मांसिकः ॥"
इति जटाधरः ॥
मृगया । इति शब्दमाला ॥

शौभं, क्ली, (शोभायै हितम् । [illegible]) हरिश्चन्द्रपुरम् । इति त्रिकाण्डशेषः ॥ पर्य्यायः । व्योमचारिपुरम् २ । [illegible] (पुरमेतत् शाल्वस्य नृपतेरासीत् । [illegible] विनाशितम् । एतद्वृत्तान्तस्तु [illegible] स्कन्धे ७७ अध्याये द्रष्टव्यः ॥)

शौभः, पुं, (शुभाय हितः । शुभ + अण् ।) [illegible] इति त्रिकाण्डशेषः ॥ गुवाकः । [illegible] माला ॥

शौभनेयः, त्रि, शोभनसम्बन्धी । ढ प्रत्ययेन निष्पन्नः ॥

शौभाञ्जनः, पुं, (शोभाञ्जन एव । [illegible]) शोभाञ्जनवृक्षः । इति [illegible]

शौभिकः, पुं, ([illegible] तद्दाश्चर्य्यकरं वस्तु साधनत्वेनास्त्यस्येति [illegible] + ठन् ।) इन्द्रजालिकः । इति [illegible]

शौभ्रेयः, त्रि, (शुभ्रा + "शुभ्रादिभ्यश्च ।" ४ । १ । १२३ । इति ढक् ।) शुभ्राया अपत्यम् । मुग्धबोधव्याकरणम् ॥ शुभ्रसम्बन्धि [illegible]

शौरिः, पुं, (शूरस्यापत्यमिति । शूर + इञ् [illegible]) विष्णुः । (यथा, आनन्दलहर्य्याम् २ ।
"तनीयांसं पांशुं तव चरणपङ्केरुहभवं
विरिञ्चिः सञ्चिन्वन् [illegible]
वहत्येनं शौरिः कथमपि सहस्रेण शिरसां
हरः संक्षुभ्यैनं भजति भसितोद्धूलनविधिम् ॥")
शनैश्चरग्रहः । इत्यमरभरतौ ॥ ([illegible] माने । वसुदेवः । यथा, भागवते । ३ । १ । ३ [illegible]
"कच्चित् कुरूणां परमः सुहृन्नो
भामः स आस्ते सुखमङ्ग शौरिः ।"
बलदेवः । यथा, महाभारते । ५ । ७ । [illegible]
"ततोऽभ्ययाद्भीमबलो रौहिणेयं महाद्युतिः
सर्व्वमागमने हेतुं स तस्मै संन्यवेदयत् ।
प्रत्युवाच ततः शौरिर्धार्त्तराष्ट्रमिदं वचः ।"
कृष्णः । यथा, भागवते । १ । १० । ३३ ।
"अथ दूरगतान् शौरिः कौरवान् विरह [illegible]
संनिवर्त्त्य दृढं स्निग्धान् प्रायात् स्वनगरीं प्रियैः ।"

शौर्पः, शौर्पिकः, } त्रि, (शूर्प + "शूर्पादञन्यतरस्याम् ।" ५ । १ । २६ । इति अञ् पक्षे ठ [illegible]) शूर्पपरिमितम् । शूर्पशब्दात् [illegible] प्रत्ययेन च निष्पन्नौ ॥

शौर्य्यं, क्ली, (शूरस्य भावः कर्म्म वा । शूर + ष्यञ् ।) शक्तिः । (यथा, रामायणे । [illegible] १५ । ३ ।

"सत्त्वेन वीर्य्येण पराक्रमेण
धैर्य्येण शौर्य्येण च तेजसा च ॥")
ारभटी । इति मेदिनी ॥
ल्कं, त्रि, शुल्कसम्बन्धि । शुल्कशब्दात् ष्णप्रत्य-
न निष्पन्नम् ॥
ल्किकः, पुं, (शुल्के अधिकृतः । शुल्क + ठञ् ।)
... ध्यच । इति हेमचन्द्रः ॥ (यथा, याज्ञ-
ल्क्ये । २ । १७६ ।
शौल्किकैः स्थानपालैर्व्वा नष्टापहृतमाहृतम् ।
र्व्वाक् संवत्सरात् स्वामी हरेत परतो नृपः ॥")
ल्कि ... पुं, विषमेदः । इत्यमरः ॥ शुल्किको
शमेदस्तत्र भवः शौल्किकेयः । ष्णे यः । ताल-
ादिः । इति भरतः ॥
ल्फं, क्ली, शाकविशेषः । शुल्फा इति भाषा ।
तचतुर्द्दश्यां चतुर्दशशाकमध्ये तद्भक्षणीयम् ।
या, निर्णयामृते ।
"ओलं केमुकवास्तूकं सर्षपं कालश्च निम्बं
जयां
ालीश्वीं हिलमोचिकाञ्च पटुकं शौल्फं
गुडूचीन्तथा ।
ण्टाकीं सुनिसन्नकं शिवदिने खादन्ति ये
मानवाः
तत्वं न च यान्ति कार्त्तिकदिने कृष्णे च भूते
तिथौ ॥"
इति तिथ्यादितत्त्वम् ॥
अस्य पर्य्यायगुणाः शतपुष्पाशब्दे द्रष्टव्याः ॥
ौल्बिकः, पुं, कंसकारः । काँसारि इति भाषा ।
त्पर्य्यायः । ताम्रकुट्टकः २ । इत्यमरः ॥ काम-
दमी ३ कांस्यकारः ४ । इति जटाधरः ॥
ाम्रिकः ५ ताम्रकारकः ६ । इति शब्दरत्ना-
ली ॥
वं, क्ली, (श्वन् + "शुनः सङ्कोच उपसंस्यानम् ।"
६ । ४ । १४४ । इत्यस्य वार्त्तिकोक्त्या अपि
ाधु ।)शुनः सङ्कोचः । शुनो द्वन्दम् । श्वो-
भवम् इति संक्षिप्तसारव्याकरणम् ॥
ौवनं, क्ली, (श्वन् + अण् ।) शुनो भावः । शुनो-
पत्यम् । इति संक्षिप्तसारव्याकरणम् ॥ (शुनः
समूहः । श्वन् + "खण्डिकादिभ्यश्च ।" ४।२।४५।
इत्यञ् । कुक्कुरसमूहः । इति व्याकरणम् ॥
शुनो मांसम् । इति काशिका ।६।४।१३३ ॥)
ौवस्तिकं, त्रि, (श्वो भवम् । श्वस् + "श्वसस्तुट्
च ।" ४ । ३ । १५ । इति ठञ् तुडागमश्च ।)
भाविदिनस्थायिवस्तु । यथा,—
"आत्मम्भरिस्त्वं पिशितैर्नराणां
फलेग्रहीन् हंसि वनस्पतीनाम् ।
शौवस्तिकत्वं विभवा न येषां
व्रजन्ति तेषां दयसे न कस्मात् ॥"
इति भट्टौ २ सर्गः ॥
"येषां विभवाः सम्पदः शौवस्तिकत्वं भाविदिन-
स्थितत्वं न व्रजन्ति तेषां कस्मात् दयसे । श्वो-
भवः शौवस्तिकः श्वसो भवार्थे कण्विधानात्
कणि सर्भौपादित्वात् त्यागमः टारस्थरेतिडम्

णिच्चे त्रिरिति त्रिः त्वतौ भावे इति त्वम् ।"
इति तट्टीका ॥
शौवापदं, त्रि, (श्वापदस्येदमिति । श्वापद +
अण् । "पादान्तस्यान्यतरस्याम् ।" ७।३।९। इति
पक्षे ऐच् ।) श्वापदसम्बन्धि । श्वापदशब्दात्
ष्णप्रत्ययेन निष्पन्नम् । इति मुग्धबोधव्याकर-
णम् ॥ (यथा, अनर्घराघवे । १ । २५ ।
"कच्चित् कान्तारभाजां भवति परिभवः
कोऽपि शौवापदो वा
प्रत्यूहेन क्रतूनां न खलु मखभुजो भुञ्जते
वा हवींषि ॥")
शौष्कलः, पुं, (शुष्कलं पण्यमस्येति । अण् ।)
शुष्कमांसस्य पणकः । इति मेदिनी ॥
शौष्कलः, त्रि, (शुष्कलीमत्तीति । शुष्कली +
अण् ।) आमिषाशी । इत्यमरः ॥ मत्स्यमांस-
भोजनशीलः । आमिषं अश्नाति आमिषाशी
ग्रहादित्वाणिन् । शुष्कली शुष्कमांसे स्या-
न्मांसमात्रे ऽपि दृश्यते । तामत्ति शौष्कलः ण्यः ।
तालव्यादिमूर्द्धन्यमध्यः । शुष्कं मांसं लाति इति
शुष्कलः प्रज्ञादित्वात् अणि शौष्कलः । इति
विद्याविनोदः । शाष्कलः इति पाठः । इति
स्वामी । इति भरतः ॥
श्चुत)इर् चरणे । इति कविकल्पद्रुमः ॥
श्चुत }(भ्वा०-पर०-अक०-सेट् ।) द्वौ तालव्य-
वर्गाद्ययुक्ततालव्यादी । शेषोऽन्तःस्थादियुक्तश्च ।
नकारजावनुस्वारपञ्चमाविल्यादिनियमेऽप्यनयो-
स्तालव्यादित्वं तद्वचनस्य व्यभिचारसूचनार्थं
तेन चुलुम्प लोपे इत्यादीनामोष्ठ्यवर्गशेषोप-
धत्वं सङ्गच्छते । तेन क्विपि संयोगान्तलोपे
चुलुम् इत्यादि सिद्धम् । किन्तु द्वौ दन्त्यादी
इति धातुप्रदीपक्रमदीश्वरौ । तेन श्च्युतं श्चोतति
इति श्च्युतयत् तमाचष्टे इति णौ णौमर्येति
डित्वाट्टिलोपे श्च्युतयति पुनः क्विपि णेर्लोपे
श्च्युतस्क इति स्थिते संयोगादेः सस्य लोपे श्च्युतक्
इति केचित् ॥ इर्, अश्चुतत् अश्चोतीत् ।
अश्चुतत् अश्चोतीत् । चर इति आसेचनं
क्षरणञ्च । रक्तमाश्चोतति क्षुर इति । इदं
कवचमश्चोतीदिति । निश्चोतन्ते सुतनुकवरी
बिन्दवो यावदेते । इति मालत्यां गणकृतानि-
त्यत्वम् । इति दुर्गादासः ॥
श्चोतः, पुं, (श्चोतनमिति । श्चुत् + घञ् ।)
प्राधारः । इत्यमरः ॥
श्म, [न्]क्ली, मुखम् । इति श्मश्रुशब्दटीकायां
भरतः ॥ (शरीरम् । इति निरुक्तिः । ३ । ५ ॥
शवः । इति पुराणम् । अस्य प्रमाणं श्मशान-
शब्दे द्रष्टव्यम् ॥)
श्मशानं, क्ली, (श्मनां शवानां शानं शयनं यत्र ।
यद्वा, शवानां शयनमिति । "पृषोदरादीनि
यथोपदिष्टानि ।" ६ । ३ । १०९ । इति शव-
शब्दस्य श्मादेशः शयनशब्दस्यापि शानशब्द
आदेशः ।) शवदाहस्थानम् । तत्पर्य्यायः ।
पितृवनम् २ । इत्यमरः ॥ शतानकम् ३ रुद्रा-

क्रीडः ४ दाहसरः ५ इति त्रिकाण्डशेषः ॥
अन्तशय्या ६ पितृकाननम् ७ । इति जटा-
धरः ॥७॥ तस्य व्युत्पत्तिर्यथा,—
"श्मशब्देन शवः प्रोक्तः शानं शयनमुच्यते ।
निर्व्वचन्ति श्मशानार्थं सुने शब्दार्थकोविदाः ॥
महान्त्यपि च भूतानि प्रलये समुपस्थिते ।
शेरतेऽत्र शवा भूत्वा श्मशानन्तु ततो भवेत् ॥"
महाश्मशानं यथा,—
"वाराणसीति विख्याता रुद्रावास इति द्विजाः ।
महाश्मशानमित्येवं प्रोक्तमानन्दकाननम् ॥"
इति श्रीस्कान्दे काशीखण्डे ३०अध्यायः ॥*॥
"उत्सवे व्यसने चैव दुर्भिक्षे शत्रुविग्रहे ।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ॥"
इति चाणक्यम् । १७ ॥*॥
श्मशाने गत्वा विष्णुस्पर्शे दोषो यथा,—
वराह उवाच ।
"श्मशानं यो नरो गत्वा अस्नात्वैव तु मां-
स्पृशेत् ।
मम दोषापराधस्य शृणु तत्त्वेन यत् फलम् ॥
जम्बुको जायते भूमौ वर्षाणां नव पञ्च च ।
गृध्रस्तु सप्तवर्षाणि जायते खचरेश्वरः ॥
चरन्तौ मानुषं मांसं उभौ तौ गृध्रजम्बुकौ ।
पिशाचो जायते तत्र वर्षाणि नव पञ्च च ॥
ततस्तु कुणपोच्छिष्टं विंशद्वर्षाणि खादति ।
ततो नारायणात्क्रुत्वा धरणी वाक्यमब्रवीत् ॥
एतन्मे परमं गुह्यं लोकनाथ जनार्द्दन ।
परं कौतूहलं देव निखिलं वक्तुमर्हसि ॥
श्मशानं पुण्डरीकाक्ष ईश्वरेण प्रशंसितम् ।
तत्र किं विगुणं देव पावित्रे शिवभाषिते ॥
स तत्र रमते नित्यं भगवांस्तु महाद्युतिः ।
कपालं गृह्य देवोऽत्र दीप्तिमन्तं महौजसम् ॥'
प्रशंसितञ्च रुद्रेण भवता किं विनिन्दितम् ।
श्मशाणं पद्मपत्राक्ष रुद्रस्य च निशि प्रियम् ॥
वराह उवाच ।
शृणु तत्त्वेन मे देवि इदमाख्यानमुत्तमम् ।
अद्यापि ते न जानन्ति अनघे शंसितव्रताः ॥
कृत्वा सुदुष्करं कर्म्म सर्व्वभूतपतिर्हरः ।
हत्वा च बालहृद्यानि त्रिपुरे रूपिणीः स्त्रियः ॥
तेन पापेन सम्बद्धो न शक्नोति विचेष्टितुम् ।
तत ईशो मया चोक्तो वाक्यमेव सुखावहम् ॥
किमिदं तिष्ठसे रुद्र कश्मलेन समाहतः ।
तव चैव प्रियार्थाय येनाहमिदमागतः ॥
ततो मम वचः श्रुत्वा लब्धसंज्ञो महेश्वरः ।
उवाच मधुरं वाक्यं पापसन्तप्तलोचनः ॥
तव विष्णो प्रसादेन मया तत्त्रिपुरं हतम् ।
निहता दानवास्तत्र गर्भिण्यश्च निपातिताः ॥
बालहृद्या हतास्तत्र विष्फुरन्तो दिशो दश ।
तस्य पापस्य दोषेण न शक्नोमि विचेष्टितुम् ॥
प्रनष्टयोगमायश्च नष्टैश्वर्य्यश्च माधव ।
किं मया विप्रकर्त्तव्यमेनोऽयम्येन माधव ॥
विष्णो तत्त्वेन मे ब्रूहि शोधनं पापनाशनम् ।
येन वै कृतमात्रेण शोघ्रं मुच्येत किल्बिषात् ।

एवं चिन्तामनस्तत्र मया रुद्रस्य भाषितम्।
कपालमालां संगृह्य समलं गच्छ शङ्कर ॥
ममैवं वचनं श्रुत्वा भगवान् परमेश्वरः।
उवाच मां पुनर्व्यक्तं मां बोधय जगत्पते ॥
कीदृशः समलो विप्रो यत्र गच्छामहे वयम् ॥
ततस्तस्य वचः श्रुत्वा शङ्करस्य यशस्विनि।
तत्पापशोधनार्थाय मयावासं प्रभाषितम् ॥
श्मशानं समलो रुद्र पूतिको व्रणगन्धिकः।
स्वयं तिष्ठति ये तत्र मनुजा विगतस्पृहाः ॥
तत्र गृह्य कपालानि रम तत्रैव शङ्कर।
तत्र वर्षसहस्राणि दिव्यान्येव दृढव्रतः ॥
ततो भक्षय मांसानि पापक्षयचिकीर्षुकः।
हिंस्यमानानि भोज्यानि ये च भोज्यास्तव प्रियाः ॥
एवं सर्व्वगणैः सार्द्धं रम तत्र सुनिश्चितः।
पूर्णे वर्षसहस्रे तु स्थित्वा त्वं समले पुनः ॥
एष्यसि स्वाश्रमं पुण्यं गौतमस्य महामुनेः।
तत्र स्थास्यसि चात्मानं आश्रमे विधिसंस्थिते ॥
प्रसादात् गौतमस्याथ भविता गतकिल्बिषः।
एवं तस्य वरं दत्त्वा तत्रैवान्तरधीयत ॥
रुद्रोऽपि भ्रमते तत्र श्मशाने पापसंहृते।
एवं न रोचते भूमे श्मशानं मे कदाचन ॥
यत्र रुद्रकृतं पापं स्थितं किल भयावहम्।
एतत्ते कथितं भद्रे श्मशानं मे जुगुप्सितम् ॥
विप्रोऽपि कृतसंस्कारो मम कर्म्मपरायणः।
प्रायश्चित्तं प्रवक्ष्यामि येन शुध्यति किल्बिषात्
कृत्वा चतुर्थभक्तन्तु दिनानि दश पञ्च च।
चाकाशशयनं कुर्य्यात् एकभक्तः कुशास्तरे ॥
प्रभाते पञ्चगव्यन्तु पातव्यं कर्म्मशोधनम्।
प्रमुक्तः सर्व्वपापेभ्यो मम लोकाय गच्छति ॥"
इति वाराहे श्मशानप्रवेशापराधप्रायश्चित्त-नामाध्यायः ॥

श्मशानकाली, स्त्री, (श्मशानस्य काली।) कालिकाविशेषः। अथ श्मशानकाली। तदुक्तं कालीतन्त्रे।
"वाग्बीं मायां ततो लक्ष्मीं कामबीजमतः परम्
कालिके संपुटत्वेन चतुष्कं बीजमालिखेत् ॥
एकादशार्णा देवेशि चतुर्व्वर्गप्रदायिनी ॥"*॥
यन्त्रा यन्त्रम्।
"पद्ममष्टदलं वृत्तं तद्बाह्ये धरणीतलम्।
चतुर्द्वारसमायुक्तं मध्ये मूलं समालिखेत् ॥
दलेष्वष्टसु विलिखेत् कवर्गाद्यष्टवर्गकम्।
धरण्यां विलिखेद्दाद्यं चतुष्कञ्च चतुष्कके।
पूर्व्वादि उत्तरान्तञ्च मध्ये देवीं प्रपूजयेत् ॥"*॥
अस्याः पूजाक्रमः। प्रातःकृत्यादिप्राणायामान्तं कर्म्म कृत्वा ऋष्यादिन्यासं कुर्य्यात् यथा। शिरसि भृगुऋषये नमः। इदि श्मशानकालिकायै देवतायै नमः। गुह्ये वाग्बीजाय नमः। पादयोर्मायाशक्तये नमः। सर्व्वाङ्गे कामबीज-कीलकाय नमः। ततः कराङ्गन्यासौ। ऐं अङ्गुष्ठाभ्यां नमः। ह्रीं तर्ज्जनीभ्यां स्वाहा। श्रीं मध्यमाभ्यां वषट्। क्लीं अनामिकाभ्यां हुं। कालिके कनिष्ठाभ्यां वौषट्। क्लीमादिवाग्-भवान्तं करतलपृष्ठाभ्यां फट्। एवं हृदया-दिषु ॥*॥ ततो ध्यानम्।
"अञ्जनाद्रिनिभां देवीं श्मशानालयवासिनीम्
रक्तनेत्रां मुक्तकेशीं शुष्कमांसातिभैरवाम् ॥
पिङ्गाक्षीं वामहस्तेन मद्यपूर्णं समांसकम्।
सद्यःकृत्तशिरो दक्षहस्तेन दधतीं शिवाम्।
स्मितवक्त्रां सदा चाममांसचर्व्वणतत्पराम्।
नानालङ्कारभूषाङ्गीं नग्नां मत्तां मदासवैः ॥
एवं ध्यात्वा जपेद्देवीं श्मशाने तु विशेषतः।
गृहे वापि गृहस्थोऽपि मत्स्यमांसैः सुभोजनैः।
नग्नो भूत्वा महापूजां कुर्य्याद्रात्रौ विशेषतः ॥"*॥
पूजनन्तु ध्यात्वा मानसैः संपूज्यार्घ्यस्थापनं कुर्य्यात्। पुनर्ध्यात्वा यथोपचारैः संपूज्य पत्रेषु ब्राह्म्यादिकं पूजयेत्। तद्बहिरसिताङ्गादिकं पूजयेत्। अस्याः पुरश्चरणं एकादशलक्षजपः। तथा च।
"वर्णलक्षं जपेन्मन्त्रं तद्दशांशेन होमयेत्।"
मन्त्रान्तरम्। तत्रैव।
"कामबीजं समालिख्य कालिकायै समालिखेत्
नमोऽन्तेन च देवेशि सप्तार्णो मनुरुत्तमः।
सर्व्वाङ्गे कालिका देवी अन्यत् सर्व्वन्तु पूर्व्ववत् ॥"
इति तन्त्रसारः ॥

श्मशानवासी, [न्] पुं, (श्मशाने वसतीति। वस + णिनिः।) शिवः। यथा,—
"चेतनः चेतपालश्च चेतश्चः क्षत्रियो विराट्।
श्मशानवासी मांसाशी खर्परासी मखान्तकृत् ॥"
इति वटुकभैरवस्तोत्रम् ॥*॥
श्मशाने वासकर्त्तरि, त्रि,। यथा। शवसम्बन्धि वस्त्रादिकं श्मशानवासिचण्डालादिभ्यो दद्यात् इति शुद्धितत्त्वम् ॥

श्मशानवेश्मा, [न्] पुं, (श्मशानं वेश्म यस्य।) महादेवः। इति हेमचन्द्रः ॥

श्मशानवासिनी, स्त्री, (श्मशाने वसति या। वस + णिनिः। ङीप्।) काली। यथा,—
"श्मशानवासिनी सौम्या शिवानी शिववल्लभा।"
इति कालिकाशतनामस्तोत्रम् ॥

श्मशानालयवासिनी, स्त्री, (श्मशानालये श्मशान-गृहे वसतीति। वस + णिनिः। ङीप्।) काली। यथा,—
"घोररावां महारौद्रीं श्मशानालयवासिनीम्।"
इति तन्त्रसारे दक्षिणकालिका ध्यानम् ॥

श्मश्रु, क्ली, (श्म मुखं श्रयति आश्रयतीति। श्म + श्रि + "श्मनि श्रयतेर्डुन्।" उणा० ५। २८। डुन्।) पुंमुखे वर्द्धितलोम। इत्यमरः ॥ दाड़ी इति भाषा ॥ पुंमुखे पुरुषास्ये तेषां हर्द्धी सत्यां तल्लोम श्मश्रु उच्यते। श्मेति मुख-नामेति स्मृतिः श्मनि मुखे श्रूयते उपलभ्यते श्मश्रु मान्यतीति डुः श्मश्रु क्लीवमुदन्तम्। श्म मुखं श्रयति श्मनः श्रयतेर्डुन्निति डुनि श्मश्रु नान्तमित्यन्ये। इति भरतः ॥*॥ तस्य शुभा-शुभलक्षणं यथा,—
"निम्नं ... ...
संपूर्णं भोगिनी ...
संहतं चास्फुटिताग्रं रक्तश्मश्रु चौरः
रक्ताल्पपरुषश्मश्रु कर्णाः स्युः पापकर्म्म,
इति गारुडे ६६ ...
क्रोधार्त्तस्यावर्त्तनं यथा,—
... मार्कण्डेय उवाच।
"इति प्रतिज्ञाय तदा नरिष्यन्तमुनेः ...
कोपामर्षविवृत्ताक्ष. ...
हा हतोऽस्मीति पितरं ध्यात्वा ...
... ...
इति मार्कण्डेयपुराणे ...
अस्य धारणफलं यथा। दानधर्म्मे।
"केशश्मश्रु धारयतामग्रा भवति ...
तस्य क्षौरक्रमो यथा। वराहपुराणे।
"श्मश्रुकर्म्म कारयित्वा ...
गोभिलः।
...
इति ...

श्मश्रुमुखी, स्त्री, (श्मश्रु मुखे यस्याः। ...) श्मश्रुयुक्ता नारी। तत्पर्य्यायः। ... २। इति शब्दरत्नावली ॥ ...
जटाधरः ॥

श्मील, निमिषणे। इति कविकल्पद्रुमः ॥ (... भ्वा०-पर०-सक०-सेट्।) ओष्ठ्यवर्गशेषयुक्तः। ... चक्षुः पक्ष्मभिराहतं स्यादित्यर्थः। इति ...
दासः ॥

श्यानः, त्रि, गतः। श्यैधातो...
श्यामं, क्ली, (श्यैङ गतौ + "इषियुधीन्धि..." उणा० १। १४४। इति मक्।) ...
सिन्धुलवणम्। इति मेदिनी ॥

श्यामः, त्रि, (श्यायते मनो यस्मात्। ...) कृष्णगुणविशिष्टः। (यथा, मनुः। ७। ...
"यत्र ... ६४ ...
प्रजास्तत्र न मुह्यन्ति ...)
हरिद्गुणविशिष्टः। इत्यमरः ॥

श्यामः, पुं, (श्यै + मक्।) प्रयागस्य वटः। (... रघुः। १३। ५३।
"त्वया पुरस्तादुपयाचितो यः
सोऽयं वटः श्याम इति प्रतीतः।
राशिर्मणीनामिव गारुडानां
सपद्मरागः फलितो विभाति ॥")
मेघः। वृद्धदारकः। कोकिलः। ...
हरिद्वर्णः। इति मेदिनी ॥ धुस्तूरः। ...
वृक्षः। श्यामाकः। इति राजनिर्घण्टः ॥ ...
नकवृक्षः। गन्धतृणम्। इति शब्द...
श्यामवस्तूनि यथा,—
कृष्णानि केशवः सौरिश्चीरं चन्द्राङ्करा...
विन्ध्याञ्जनाद्रिहस्तिभवनभैरवाश्चैव।
शिवकण्ठघनद्वैपायनरामधनञ्जयाः।
शनिर्दुपदजा काली कलिकोलयमाहर...
केशकज्जलकस्तूरीरामपट्टविदूरणम्।

कोपकुहूशब्दागुरुपापतमोनिशाः ॥
ोपद्ममदाम्भोधियमुनाधूमकोकिलाः ।
ाङ्गुलाग्र्यगुञ्जास्ये कण्ठः खञ्जनकेकिनोः ॥
लं तालतापिञ्छतिलेन्दीवरयशयः ।
विड़ुत्स्मृङ्गारौ कटाक्षोऽलिः कणीनिका ॥
ली जम्बूफलं मुस्ता काकहत्याकुकीर्त्तयः ।
सन्ध्याया गजाङ्गारपल्लान्तःकरणादयः ॥"
ति कविकल्पलतायां२य्ने पस्तवके ४कुसुमम् ॥
मकं, क्ली, (श्याम+संज्ञायां कन् ।) रोहिष-
म् । इति राजनिर्घण्टः ॥ (कृष्णवर्णे, त्रि ।
ा, सुश्रुते हितायाम् । ६१ । ८ ।
"श्यामकपुष्पचिताङ्गो
भस्मारुणसन्निभो विड़ालाक्षः ॥")
मकः,पुं,(श्यामं तद्वर्णं अकतीति । अक गतौ
अण् । शकन्ध्वादित्वात् साधुः ।)श्यामाकः ।
ति हेमचन्द्रः ॥(शूरस्य पुत्रविशेषः । स तु वसु-
स्य भ्राता । इति भागवतम् ।८।२४।२८॥)
मकण्ठ, पुं, (श्यामः कण्ठो यस्य ।) मयूरः ।
ति हलायुधः ॥ शिवः । पक्षिविशेषः । इति
ीलकण्ठशब्ददर्शनात् ॥
मकान्दा, स्त्री, (श्यामः कन्दो यस्याः ।)
तिविषा । इति राजनिर्घण्टः ॥
मकाण्डा, स्त्री, (श्यामः काण्डो यस्याः ।)
ण्डदूर्व्वा । इति राजनिर्घण्टः ॥
मग्रन्थिः, स्त्री, (श्यामो ग्रन्थिर्यस्य ।) गण्ड-
र्व्वा । इति राजनिर्घण्टः ॥
मपत्रः, पुं,(श्यामानि,पत्राणि यस्य।)तमाल-
क्षः । इति शब्दचन्द्रिका ॥
ामलः, पुं,(श्यामवर्णः अस्त्यस्येति । श्याम+
सिध्मादिभ्यश्च ।"५।२।९७। इति लच् ।)कृष्ण-
र्णः । पिप्पलः । इतिमेदिनी ॥ कृष्णगुणवति,
त्रि । इत्यमरः ॥ (यथा मुकुन्दमालायाम् ।२।
"जयतु जयतु मेघश्यामलः कोमलाङ्गो
जयतु जयतु पृथ्वीभारनाशो मुकुन्दः ॥")
ामलचूड़ा, स्त्री, (श्यामला चूड़ा यस्याः ।)
गुञ्जा । इति राजनिर्घण्टः ॥
ामलता, स्त्री, (श्यामा लता ।) स्वनामख्यात-
लता । तत्पर्य्यायः । यथा, शब्दरत्नावल्याम् ।
"गोपी गोपा गोपवल्ली सारिवोत्पलसारिवा ।
अनन्ता शारिवा श्यामा स्फोटी श्यामलताह्वये ॥"
अपि च ।
"कालपेषी महाश्यामा सुभद्रोत्पलसारिवा ।
दीर्घमूला च पालिन्दी मसूरविदला च सा ॥"
इति रत्नमाला ॥
राजनिर्घण्टोक्तपर्य्यायगुणौ सारिवाशब्दे द्रष्टव्यौ
श्यामला,स्त्री, पार्व्वती । श्यामं श्रीकृष्णं लाति
ददातीति व्युत्पत्तिसिद्धा । इति केचित् ॥ अश्व-
गन्धा । कटभी । जम्बूः । कस्तूरी । इति राज-
निर्घण्टः ॥
श्यामलिका, स्त्री, नीली । इति राजनिर्घण्टः ॥
श्यामलेक्षुः, पुं, (श्यामलः कृष्णवर्णः इक्षुः ।)
कृष्णेक्षुः । इति राजनिर्घण्टः ॥

श्यामसुन्दरः,पुं, (श्यामः सुन्दरश्च ।)श्रीकृष्णः ।
यथा,—
"यावन्ति च शरीराणि भोगार्हाणि महामुने ।
प्राकृतानि च सर्व्वाणि श्रीकृष्णविग्रहं विना ॥
ध्यायन्ते योगिनस्तच्च शुद्धं ज्योतिःस्वरूपिणम्
हस्तपादादिरहितं निर्गुणं प्रकृतेः परम् ॥
वैष्णवास्तं न मन्यन्ते तद्भक्ताः सूक्ष्मदर्शिनः ।
कुतो बभूव तज्ज्योतिरहो तेजस्विनं विना ।
ज्योतिरभ्यन्तरे नित्यं शरीरं श्यामसुन्दरम् ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ४१ अध्यायः ॥*॥
अन्यच्च ।
"श्यामसुन्दर ते दास्यः करवाम तवोदितम् ।
देहि वासांसि धर्म्मज्ञ नो चेद्राज्ञे ब्रुवामहे ॥"
इति श्रीभागवते दशमस्कन्धे २२ अध्यायः ॥*॥
अपि च ।
"ददर्श श्रीहरिं ब्रह्मा शङ्करश्च सुरैः सह ।
वसन्तं तन्मध्यदेशे यथेन्दुं तारकावृतम् ॥
अमूल्यरत्ननिर्म्माणसर्व्वभूषणभूषितम् ।
किरीटिनं कुण्डलिनं वनमालाविभूषितम् ॥
शङ्खचक्रगदापद्मधारिणञ्च चतुर्भुजम् ।
नवीननीरदश्यामसुन्दरं सुमनोहरम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १४ अध्यायः ॥
श्यामा,स्त्री, (श्यामो वर्णोऽस्त्यस्या इति ।अच् ।
टाप् ।) शारिवौषधी । अप्रसूताङ्गना ।
प्रियङ्गुः । वागुजिः । यमुना । रात्रिः । कृष्ण-
त्रिवृतिका । नीलिका । इति मेदिनी ॥ गुग्-
गुलुः । सोमलता । गुन्द्रा । कृष्णा । अम्बिका ।
इति विश्वः ॥ गुड़ूची । कस्तूरी । वटपत्री ।
वन्दा । नीलपुनर्नवा । पिप्पली । हरिद्रा ।
नीलदूर्व्वा । तुलसी । पद्मवीजम् । गौः ।
स्त्री । छाया । कृष्णसारिवा । शिंशपा । इति
राजनिर्घण्टः ॥ (नारीविशेषः । यथा, भट्टिः ।
५ । १८ ।
"योषिद्वृन्दारिका तस्य दयिता हंसगामिनी ।
दूर्व्वाकाण्डमिव श्यामा न्यग्रोधपरिमण्डला ॥"
तल्लक्षणं यथा, तट्टीकायाम् ।
"शीते सुखोष्णसर्व्वाङ्गी ग्रीष्मे च सुख-
शीतला ।
तप्तकाञ्चनवर्णाभा सा स्त्री श्यामेति कथ्यते ॥")
पक्षिविशेषः । शामा इति भाषा । तत्पर्य्यायः ।
वराही २ शकुनी ३ कुमारी ४ दुर्गा५ देवी६
चटका ७ कृष्णा ८ पीतकी ९ पाण्डविका१०
वामा ११ कालिका १२ शितिमिम्बिनी १३ ।
इति राजनिर्घण्टः ॥*॥ श्यामाया उत्पत्तिर्यथा,
"ततः सा कालिका देवी योगनिद्रा जगन्मयी ।
पूर्व्वत्यक्तमतीरूपा जन्मार्थं मेनकां ययौ ॥
समयस्यानुरूपेण मेनका जठरे शिवा ।
सम्भूय च समुत्पन्ना सा लक्ष्मीरिव सागरात् ॥
वसन्तसमये देवी नवम्यां मृगयोगतः ।
अर्द्धरात्रौ समुत्पन्ना गङ्गेव शशिमण्डलात् ॥
ततस्तस्यान्तु जातायां प्रसन्नाश्चाभवन् दिशः ।
सानुकूलो ववौ वायुर्गम्भीरो गन्धिलः शुभः ॥

बभूव पुष्पवृष्टिश्च तोयवृष्टिः परा तदा ।
जज्वलुश्चाग्नयः शान्ता जगर्ज्जुश्च घना घनम् ॥
तस्यान्तु जायमानायां सर्व्वं स्वास्थ्यमपद्यत ।
तान्तु दृष्ट्वा यथाजातां नीलोत्पलदलानुगाम् ॥
श्यामां सा मेनका देवी मुदमापाति हर्षिता ।
देवाश्च हर्षमतुलं प्रापुस्तत्र मुहुर्मुहुः ॥
तुष्टुयुस्तामन्तरीक्षे गन्धर्व्वाश्चाप्सरोगणाः ।
तान्तु नीलोत्पलदलश्यामां हिमवतः सुताम् ॥
कालीति नाम्ना हिमवानाजुहाव कृते दिने ।
बान्धवास्तु स्वसन्तानां नाम्ना तां पार्व्वतीति
च ।
कालीति च तथा नाम्ना कीर्त्तिता गिरि-
नन्दिनी ॥"
इति कालिकापुराणे ४० अध्यायः ॥*॥
अथ श्यामामन्त्राः । क्रीँ क्रीँ क्रीँ हूँ हूँ ह्रीँ
ह्रीँ दक्षिणे कालिके क्रीँ क्रीँ क्रीँ हूँ हूँ ह्रीँ
ह्रीँ स्वाहा । यथा, कालीतन्त्रे ।
"कामत्रयं वह्निसंस्थं रतिबिन्दुसमन्वितम् ।
कूर्च्चयुग्मं तथा लज्जायुगलं तदन्तरम् ॥
दक्षिणे कालिके चेति पूर्व्ववीजानि चोच्चरेत् ।
अन्ते वह्निवधूं दद्यात् विद्या राज्ञी प्रकी-
र्त्तिता ॥"
मन्त्रर्थमाह यामले ।
"ककाराज्जलरूपत्वात् केवलं मोक्षदायिनी ।
ज्वलनार्णसमायोगात् सर्व्वतेजोमयी शुभा ।
मायात्रयेण देवेशि सृष्टिस्थित्यन्तकारिणी ॥
विन्दूनां निष्फलत्वाच्च कैवल्यफलदायिनी ।
वीजत्रया शाम्भवी सा केवलं ज्ञानचित्कला ॥
शब्दवीजद्वयेनैव शब्दराशिप्रबोधिनी ।
लज्जावीजद्वयेनैव सृष्टिस्थित्यन्तकारिणी ॥
सम्बोधनपदेनैव सदा सन्निधिकारिणी ।
स्वाहया जगतां माता सर्व्वपापप्रणाशिनी ॥"
अस्याः पूजाप्रयोगः । प्रातःकृत्यादिकं कृत्वा
मन्त्राचमनं कुर्य्यात् । यथा,—
"कालिकाभिः त्रिभिः पीत्वा काल्यादिभि-
रुपस्पृशेत् ।
द्वाभ्यामोष्ठौ द्विरुन्मृज्य चक्रेन चालयेत् करम् ॥
मुखघ्राणेक्षणश्रोत्रनाभ्युरस्कं भुजौ क्रमात् ।
आचम्यैवं भवेत् काली वत्सरात्तां प्रपश्यति ॥"
कं शिरः । तद्यथा । क्रीमिति त्रिराचामेत् ।
ॐ काल्यै नमः कपालिन्यै नमः इति ओष्ठौ
द्विरुन्मृजेत् । ॐ कुल्लायै नमः इति करं चाल-
येत् । ॐ कुरुकुल्लायै नमः इति मुखे । ॐ
विरोधिन्यै नमः इति दक्षिणनासायाम् । ॐ
विप्रचित्तायै नमः इति वामनासायाम् । ॐ
उग्रायै नमः ॐ उग्रप्रभायै नमः इति नेत्रयोः ।
ॐ दीप्तायै नमः ॐ नीलायै नमः इति
श्रोत्रयोः । ॐ घनायै नमः इति नाभौ । ॐ
बलाकायै नमः इति वक्षसि । ॐ मात्रायै नमः
इति शिरसि । ॐ मुद्रायै नमः ॐ मितायै
नमः इत्यंसयोः । इति मन्त्राचमनम् ।*। ततो
भूतशुद्ध्यन्तं विधाय मायाद्यञ्जन यथाविधि

प्राणायामत्रयं कुर्य्यात् ॥०॥ अथ ऋष्यादिन्यासः। यथा। अस्य मन्त्रस्य भैरव ऋषिरुष्णिक् छन्दो दक्षिणकालिका देवता क्रीं बीजं हूं शक्तिः क्रीं कीलकं पुरुषार्थचतुष्टयसिद्ध्यर्थे विनियोगः। तथा च कालीकल्पे।

"कीलकं चाद्यबीजं स्यात् चतुर्वर्गफलप्रदम्।"

शिरसि भैरवाय ऋषये नमः। मुखे उष्णिक्छन्दसे नमः। हृदि दक्षिणकालिकायै देवतायै नमः। गुह्ये क्रीं बीजाय नमः। पादयोः हूं शक्तये नमः। सर्व्वाङ्गे क्रीं कीलकाय नमः॥ ततः कराङ्गन्यासौ। तदुक्तं कालीतन्त्रे।

"षडङ्गन्यासकरन्यासौ यथावदभिधीयते।
भैरवोऽस्य ऋषिः प्रोक्त उष्णिक् छन्द उदाहृतम्।
देवता कालिका प्रोक्ता लज्जाबीजन्तु बीजकम्॥
कीलकं चाद्यबीजं स्याच्चतुर्व्वर्गफलप्रदम्॥
शक्तिश्च कूर्च्चबीजं स्यादनिरुद्धा सरस्वती।
कवित्वार्थे नियोगः स्यादित्यादि तेन मायया॥"

षडङ्गन्यासः।

"षड्दीर्घभाजा बीजेन प्रणवाद्येन कल्पयेत्।"

वीरतन्त्रेऽपि।

"दीर्घषट्कयुताद्येन प्रणवाद्येन कल्पयेत्।"

इति वा। तद्यथा। ॐ क्रां अङ्गुष्ठाभ्यां नमः। ॐ क्रीं तर्ज्जनीभ्यां स्वाहा। ॐ क्रूं मध्यमाभ्यां वषट्। ॐ क्रैं अनामिकाभ्यां हुं। ॐ क्रौं कनिष्ठाभ्यां वौषट्। ॐ क्रः करतलपृष्ठाभ्यां फट्। एवं हृदयादिषु। ॐ क्रां हृदयाय नमः इत्यादि। एवं ॐ क्रां अङ्गुष्ठाभ्यां नमः इत्यादि वा॥०॥ ततो वर्णन्यासः। अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं नमः इति हृदि। एं ऐं ओं औं अं अः कं खं गं घं नमः इति दक्षिणबाहौ। ङं चं छं जं झं ञं टं ठं डं ढं नमः। इति वामबाहौ। णं तं थं दं धं नं पं फं बं भं नमः इति दक्षिणपादे। मं यं रं लं वं शं षं सं हं क्षं नमः इति वामपादे। विरूपाक्षमते सबिन्दुरयं न्यासः। यथा वीरतन्त्रे। अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं वै हृदि न्यसेदित्यादि। पुनर्निर्बिन्दुर्यथा। अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ वै हृदयं न्यसेदित्यादि। किन्तु सबिन्दून् वा न्यसेत्तान् निर्बिन्दून् वाथ वर्णकान् इत्याद्यपरिच्छिन्नभैरवीयवाक्यात् उभयमेव युक्तम्॥०॥ अथ षोढान्यासः। तदुक्तं वीरतन्त्रे।

"कवचं मातृका लज्जा मातृका तारसंपुटाम्।
मातृकापुटितं तारं न्यसेत् साधकसत्तमः॥
श्रीबीजपुटितां तान्तु मातृकापुटितन्तु तत्।
कामेन पुटितां देवीं तत्पुटं कामिनं च॥
शक्त्या च पुटितां देवीं शक्तिञ्च तत्पुटां न्यसेत्।
क्रीं इत्यत्र पुनर्न्यस्य अ क ह ल-क्ष च पूर्व्ववत्।
मूलेन पुटितां देवीं तत्पुटं मन्त्रमेव च॥
अनुलोमविलोमेन न्यस्त्वा मन्त्री यथाविधि।
मूलेनाष्टशतं कुर्य्यादावर्त्तं तदनन्तरम्॥"

यथा ॐ अं ॐ इत्यं मातृकापुटितताराम्। एवं श्रीबीजपुटितां ताम्। तत्पुटितं श्रीबीजम्। एवं कामेन पुटितां मातृकाम्। मातृकापुटितं कामम्। एवं शक्त्या पुटितां मातृकां मातृकापुटितां शक्तिं न्यसेत्। तथा क्रीं इत्यत्र अ क ह ल-क्ष पूर्व्ववत्। तत्पुटितां मातृकां न्यसेत् मातृकापुटितञ्च तत्। मन्त्रपुटितां मातृकां तत्पुटितं मन्त्रम्। पुनरनुलोमविलोमेन केवलं मातृकान्यासं न्यस्य मूलेनाष्टशतेन व्यापकं कुर्य्यात् एवं न्यासस्तारायाश्चापि कार्य्यः।

"इति गुप्तेन दुर्गाया षड्षोढाः प्रकीर्त्तिताः।
तारायाः कालिकायाश्च छिन्नायाश्च तथापरे॥
एतच्चेन् न्यासवर्य्यं च सर्व्वं पापं प्रणश्यति॥"

ततस्तत्त्वन्यासः। यथामूलं त्रिखण्डं विधाय प्रथमखण्डान्ते ॐ आत्मतत्त्वाय स्वाहेति पादादिनाभिपर्य्यन्तम्। द्वितीयखण्डान्ते ॐ विद्यातत्त्वाय स्वाहा इति नाभ्यादिहृदयान्तम्। तृतीयखण्डान्ते ॐ शिवतत्त्वाय स्वाहा इति हृदयादिशिरःपर्य्यन्तं न्यसेत्। तदुक्तं तन्त्रे।

"मूलविद्यां त्रिखण्डान्तैः प्रणवाद्यैर्यथाविधि।
आत्मविद्याशिवैस्तत्त्वैस्तत्त्वन्यासं समाचरेत्॥"

अथ बीजन्यासः। तदुक्तं कुमारीकल्पे।

"ब्रह्मरन्ध्रे भ्रुवोर्मध्ये ललाटे नाभिदेशके।
गुह्ये वक्त्रे च सर्व्वाङ्गे सप्तबीजं प्रविन्यसेत्॥"

यथा आद्यबीजं ब्रह्मरन्ध्रे द्वितीयबीजं भ्रूमध्ये तृतीयबीजं ललाटे चतुर्थबीजं नाभौ पञ्चमबीजं गुह्ये षष्ठबीजं वक्त्रे सप्तमबीजं सर्व्वाङ्गे। एतच्चयं काम्यम्॥०॥ ततो मूलेन सप्तधा व्यापकन्यासं कृत्वा यथाविधि मुद्रां प्रदर्श्य ध्यायेत्। यथा कालीतन्त्रे।

"करालवदनां घोरां मुक्तकेशीं चतुर्भुजाम्।
कालिकां दक्षिणां दिव्यां मुण्डमालाविभूषिताम्॥
सद्यश्छिन्नशिरःखड्गवामाधोर्द्धकराम्बुजाम्।
अभयं वरदञ्चैव दक्षिणोर्द्धाधःपाणिकाम्॥
महामेघप्रभां श्यामां तथा चैव दिगम्बरीम्।
कण्ठावसक्तमुण्डालीगलद्रुधिरचर्च्चिताम्॥
कर्णावतंसतानीतशवयुग्मभयानकाम्।
घोरदंष्ट्रां करालास्यां पीनोन्नतपयोधराम्॥
शवानां करसंघातैः कृतकाञ्चीं हसन्मुखीम्।
सृक्कद्वयगलद्रक्तधाराविस्फुरिताननाम्॥
घोररावां महारौद्रीं श्मशानालयवासिनीम्।
बालार्कमण्डलाकारलोचनत्रितयान्विताम्॥
दन्तुरां दक्षिणव्यापिमुक्तालम्बिकचोच्चयाम्।
शवरूपमहादेवहृदयोपरिसंस्थिताम्॥
शिवाभिर्घोररावाभिश्चतुर्द्दिक्षु समन्विताम्।
महाकालेन च समं विपरीतरतातुराम्॥
सुखप्रसन्नवदनां स्मेराननसरोरुहाम्।
एवं सञ्चिन्तयेत् कालीं सर्व्वकामार्थसिद्धिदाम्॥" ०॥

शवयुग्मेति घोरबालकाभ्यां शवाभ्यामिति प्रेतकर्णावतंसामिति च। मङ्गलाचरणयुक्तबालकर्णविभूषितामिति शिशुराज्ञिशोराभ्यां कृतकर्णावतंसामित्यर्थः

दर्शनादुभयमिति पाठः॥०॥ ध्यानान्तरं
"सद्यश्छिन्नशिरो देवीं
मुण्डमालाविभूषितां मुक्तकेशीं
महाकालहृदम्भोजस्थितां
विपरीतरतासक्तां घोरदंष्ट्रां शिवैः सह।
नागयज्ञोपवीताढ्यां
सर्व्वालङ्कारयुक्ताञ्च मुण्डमालाविभूषिताम्
शवहस्तकृतकाञ्चीं
...

रक्तपूर्णमुण्डाम्भोजां मद्यपानप्रमत्तिकाम्
वह्न्यर्कशशिनेत्राञ्च रक्तविस्फुरिताननां
विगतासुकिशोराभ्यां
कण्ठावसक्तमुण्डालीगलद्रुधिरचर्च्चिताम्
श्मशानवह्निमध्यस्थां
सद्यःकृत्तशिरःखड्गवराभीतिकराम्बुजाम्
ध्यानान्तरं रहस्ये। यथा,—
"शवारूढां महाभीमां
चतुर्भुजां खड्गमुण्डवराभयकरां
मुण्डमालाधरां देवीं ललज्जिह्वां
एवं सञ्चिन्तयेत् कालीं
एवं ध्यात्वा मानसैः
यथा। स्थापयेत् भूमौ
लिख्य चतुर्थपात्रं संस्थाप्य
गन्धादिपात्रमापूर्य्य गन्धादिकं दत्त्वा
चेत्यादिना तीर्थमावाह्य
कलात्मने नमः इत्याधारम्।
द्वादशकलात्मने नमः इति शङ्खम्।
मण्डलाय षोडशकलात्मने नमः
सम्पूज्य। ॐ क्रां हृदयाय नमः।
स्वाहा। ॐ क्रूं शिखायै वषट्। ॐ क्रैं
चाय हुं इत्यङ्गैर्यामुरवायुपु। अपे
नेत्रत्रयाय वौषट्। चतुर्दिक्षु ॐ क्रः
फट्। इत्यभ्यर्च्य तदुपरि
मूलं दशधा जप्त्वा धेनुमुद्रया
संरक्ष्य मत्स्ययोनिमुद्रे प्रदर्श्य तज्जलं
प्रोक्षणीपात्रे निःक्षिप्य मूलेन
पूजोपकरणान्यभ्युक्ष्य
अस्याः पूजायन्त्रम्। आदौ बिन्दु
भुवनेशीञ्च विलिख्य ततस्त्रिकोणं
त्रिकोणचतुष्टयं वृत्तमष्टदलं पद्मं
द्वारात्मकं भूपुरं लिखेत्। तदुक्तं च
"आदौ त्रिकोणमालिख्य त्रिकोणं तद्बहिर्
ततो वै विलिखेन्मन्त्री त्रिकोणत्रयमुत्तमम्
ततो वृत्तं समालिख्य लिखेदष्टदलं ततः
वृत्तं विलिख्य विधिवल्लिखेद्भूपुरमेकतः
कुमारीकल्पे।

"मध्ये तु बैन्दवं चक्रं बीजमायाविभूषितम्॥"

अथ विशेषाधारो मुण्डमालायाम्।

"साकारपात्रे कपाले वा श्मशानकाष्ठनिर्म्मिते
शनिभौमदिने वापि शरीरे सुलक्षणे।
स्वर्णे रौप्येऽथ लौहे वा पात्रं कार्य्यं विशारद

न्तरमाह तन्त्रे।
ग्निभाग षट्कोणं शक्तिभिः नवात्मकम्।
पमुद्रले भक्तिपगर्गुर्दा संयुतेति ॥१॥
पूजां ततः कुर्य्यादाधारशक्तिपूर्व्वकम्।
तं कमठञ्चैव शेष पृथ्वीं तथैव च ॥
स्धिं मणिद्वीपं चिन्तामणिगृहं तथा।
नं पारिजातञ्च तन्मूले रत्नवेदिकाम् ॥
परि मणेः पीठं न्यसेत् साधकसत्तमः।
दिक्षु मुनीन् देवान् शिवाय शवमुण्ड-
कान् ॥"
दाधर्म्मादीनित्यादि ह्रीँ ज्ञानात्मने नमः
न्तं संपूज्य केशरेषु पूर्व्वादिक्रमेण पूजयेत्।
या ज्ञाना क्रिया चैव कामिनी काम-
दायिनी ॥
रतिप्रिया नन्दा मध्ये चैव मनोन्मनी ॥"
व प्रणवादिनमोऽन्तेन पूजयेत्। तदुपरि
ः सदाशिवमहाप्रेतपद्मासनाय नमः ॥*॥
पुनर्ध्यात्वा पुष्पाञ्जलावानीय मूलमन्त्र-
प्रतमूर्त्तावावाहयेत्।
देवेशि भक्तिसुलभे परिवारसमन्विते।
त्त्वां पूजयिष्यामि तावत् त्वं सुस्थिरा भव ॥"
मूलमुच्चार्य्य अमुकीदेवि इहावह इह
इह सन्निधेहि इह सन्निरुध्यस्व इह सन्नि-
ना भव। ततः ह्रमित्यवगुण्ठ्य अङ्गमन्त्रैः
लीकृत्य धेनुमुद्रया अमृतीकृत्य परमी-
णमुद्रया परमीकृत्य भूतिन्याकर्षिणीयोनि-
ः प्रदर्श्य प्राणप्रतिष्ठां विधाय मूलेन पाद्या-
भिः पूजयेत्। ततो मूलमुच्चार्य्य एतत् पाद्य
कदेवतायै नमः। एवमर्घ्यं स्वाहा। आच-
नीयं स्वधा। स्नानीयं निवेदयामि। पुनरा-
मनीयं स्वधा। एष गन्धो नमः। एतानि
पाणि वौषट्। ततो मूलेन पञ्च पुष्पाञ्जलीन्
त्वा धूपदीपौ दद्यात्। वनस्पतीत्यादि पठन्
लमुच्चार्य्य एष धूपो नमः। दीपमन्त्रस्तु।
प्रकाशो महादीपः सर्व्वतस्तिमिरापहः।
बाह्याभ्यन्तरं ज्योतिर्दीपोऽयं प्रतिगृह्यताम् ॥"
लमुच्चार्य्य एष दीपो नमः। ततः ॐ जय-
र्दनमन्त्रमातः स्वाहा इति घण्टां संपूज्य वाम
स्तेन तां वादयन् नीचैर्धूपं दत्त्वा दृष्टिपर्य्यन्तं
पं दद्यात्। ततो मूलेन पुष्पाञ्जलित्रयं दत्त्वा
योपपन्नं नैवेद्यं दत्त्वा आवरणपूजां कुर्य्यात् ॥
श्रीअमुकीदेवि आवरणं ते पूजयामि इत्याज्ञां
गृहीत्वा केशरेष्वग्न्यादिकोणेषु ॐ ह्रां हृद-
यायनमः। ॐह्रीं शिरसे स्वाहा। ॐ ह्रूं
शिखायै वषट्। ॐह्रैं कवचाय हुं। ॐह्रौं
नेत्रत्रयाय वौषट्। चतुर्दिक्षु ॐ ह्रः अस्त्राय
फट्। बहिःषट्कोणे ॐ काल्यै नमः। सर्व्वत्र
प्रणवादिनमोऽन्तेन कपालिन्यै कुल्लायै कुरु-
कुल्लायै विरोधिन्यै विप्रचित्तायै उग्रायै उग्र-
प्रभायै दीप्तायै इत्यन्तस्त्रास्रे। ॐनीलायै नमः
एवं घनायै बलाकायै इति द्वितीयत्र्यस्रे। एवं
मात्रायै मुद्रायै मितायै इति तृतीयत्र्यस्रे।

"सर्व्वाः श्यामा असिकरा मुण्डमालाविभूषिताः
तर्ज्जनीं वामहस्तेन धारयन्त्यः शुचिस्मिताः ॥
दिगम्बर्य्यो हसन्मुख्यः स्वस्ववाहनभूषिताः ॥"
एवं ध्यात्वार्च्चयेत् ॥*॥ ततोऽष्टपत्रेषु पूर्व्वादि-
क्रमेण ॐ ब्राह्म्यै नमः। एवं नारायण्यै माहे-
श्वर्य्यै चामुण्डायै कौमार्य्यै अपराजितायै वाराह्यै
नारसिंह्यै एता गन्धादिभिः पूजयेत्। पत्राग्रे
असिताङ्गादिभैरवान् पूजयेत्। ततो मूलेन
पुष्पाञ्जलित्रयं दत्त्वा पाद्यादिना महाकालं
पूजयेत् ॥*॥ तस्य ध्यानम्।
"महाकालं यजेद्देव्या दक्षिणे धूम्रवर्णकम्।
बिभ्रतं दण्डखट्वाङ्गौ दंष्ट्राभीममुखं शिशुम् ॥
व्याघ्रचर्म्मावृतकटिं तुन्दिलं रक्तवाससम्।
त्रिनेत्रं मुक्तकेशञ्च मुण्डमालाविभूषितम् ॥
जटाभारलसच्चन्द्रखण्डमुग्रं ज्वलन्निभम् ॥"
तथा च कुमारीकल्पे।
"देव्यास्तु दक्षिणे भागे महाकालं प्रपूजयेत्।"
हूँ ह्रौँ यां रां लां वां क्रौं महाकाल-
भैरव सर्व्वविघ्नान्नाशय नाशय ह्रीँ श्रीँ फट्
स्वाहा इत्यनेन पाद्यादिभिराराध्य विसर्ज्जयित्वा
मूलेन देवीं पञ्चोपचारैः पूजयेत्। तथा च
कालीतन्त्रे।
"महाकालं यजेद्यत्नात् पश्चाद्देवीं प्रपूजयेत्।"
कालीकल्पे।
"कवचं ह्रौँ समुद्धृत्य यां रां लां वां षां च
क्रौन्ततः।
महाकालभैरवेति सर्व्वविघ्नान्नाशयेति च ॥
नाशयेति पुनः प्रोच्य मायां लक्ष्मीं समुद्धरेत्।
फट् स्वाहया समायुक्तो मन्त्रः सर्व्वार्थसाधकः ॥"
ततो देवीं ध्यात्वा यथाशक्ति जप्त्वा गुह्येत्यादिना
वामहस्ते जपं समर्प्य आत्मसमर्पणं कुर्य्यात्।
ततः स्तुत्वा प्रदक्षिणीकृत्य अष्टाङ्गप्रणामं कृत्वा
श्रीजगन्मङ्गलं नाम कवचं पठेत् ॥*॥ तत
आवरणदेवता देव्यङ्गे विलोप्य संहारमुद्रया
अमुकीदेवी क्षमस्वेति विसृज्य तत्तेजःपुष्पेण
समं स्वहृद्यारोपयेत्।
"उत्तरे शिखरे देवि भूम्यां पर्व्वतवासिनि।
ब्रह्मयोनिसमुत्पन्ने गच्छ देवि ममान्तरम् ॥"
इति मन्त्रेण ॥*॥
ततस्तन्नैवेद्यं किञ्चिदुच्छिष्टचाण्डालिन्यै नमः
इत्यैशान्यां दिशि दत्त्वा शेषमिष्टेभ्यो दत्त्वा
किञ्चित् स्वीकृत्य पादोदकं पीत्वा निर्म्माल्यं
शिरसि विधृत्य यथेच्छं विहरेत् ॥*॥ ततो
यन्त्रलेपं वामहस्ते कृत्वा सव्यहस्तकनिष्ठया
मायाबीजं विलिख्य तया तिलकं कुर्य्यात्।
तथा च।
"वामे कृत्वा यन्त्रलेपं मायां सव्यकनिष्ठया।
विलिख्य तिलकं कुर्य्यात् मन्त्रेणानेन साधकः ॥
ॐ यं यं स्पृशामि पादेन यो मां पश्यति
चक्षुषा।
स एव दासतां यातु राजानो दुष्टदस्यवः ॥"
जपकाले तु कर्पूरयुक्ता जिह्वा कार्य्या।

"कर्पूराढ्या सदा जिह्वा कर्त्तव्या जपकर्म्मणि।"
इति शिवसारवाक्यात् इयं काम्यजप इति
तत्त्वम्। ततो मूलेनाष्टोत्तरशताभिमन्त्रितं पुष्पं
चन्दनञ्च धृत्वा त्रैलोक्यं वशमानयेत्।
"सर्व्वसिद्धियुतो भूत्वा भैरवो वत्सराद्भवेत्।"
अस्य पुरश्चरणं लक्षद्वयजपः। तथा च काली-
तन्त्रे।
"लक्षमेकं जपेन्मन्त्रं हविष्याशी दिवा शुचिः।
रात्रौ ताम्बूलपूरास्यः शय्यायां लक्षमानतः ॥"
व्यवस्थामाह स्वतन्त्रे।
"दिवा लक्षं शुचिर्भूत्वा हविष्याशी जपेन्नरः ॥"
ततस्तु तद्दशांशेन होमयेत् हविषा प्रिये ॥",
अत्राङ्गस्य कालान्तरमाह नीलसारस्वते।
"लक्षमेकं जपेन्मन्त्रं हविष्याशी दिवा शुचिः।
अशुचिश्च तथा रात्रौ लक्षमेकं तथैव च ॥"
"दशांशं होमयेन्मन्त्री तर्पयेदभिषेचयेत्।"इति
साम्प्रदायिकाः। वस्तुतस्तु। कुमारीकल्पे।
"लक्षमेकं जपेद्विद्यां हविष्याशी दिवा शुचिः।
रात्रौ ताम्बूलपूरास्यः शय्यायां लक्षमानतः ॥
रात्रिजपे तु काली मुण्डमालायाम्।
"गते तु प्रथमे यामे तृतीयप्रहरावधि।
निशायास्तु प्रजप्तव्यं रात्रिशेषे जपेन्न तु ॥
एवं लक्षद्वयं जप्त्वा तद्दशांशेन मन्त्रवित्।
अयुतं होमयेद्देवि दिवारात्रिविभेदतः ॥"
तेन दिवा लक्षं जप्त्वा तद्दशांशं होमं कुर्य्यात्।
रात्रौ लक्षं जप्त्वा तद्दशांशं होमं कुर्य्यादिति
रहस्यार्थः।
"द्विजातीनाञ्च सर्व्वेषां दिवा विधिरिहोच्यते।
शूद्राणाञ्च तथा प्रोक्तं रात्राविष्टं महाफलम् ॥",
अन्यत्र च।
"दिवैव प्रजपेन्मन्त्रं न तु रात्रौ कदाचन ॥"*॥
अथ मन्त्रभेदाः।
क्रीँ। १। क्रीँ क्रीँ क्रीँ। २। अनयोः पूजा-
प्रयोगः सर्व्वं पूर्व्ववत्। ध्यानं सिद्धेश्वरतन्त्रे।
"शवारूढां महाभीमां घोरदंष्ट्रां वरप्रदाम् ॥
हास्ययुक्तां त्रिनेत्राञ्च कपालकर्त्तृकाकराम् ॥
मुक्तकेशीं ललज्जिह्वां पिबन्तीं रुधिरं मुहुः।
चतुर्ब्बाहुयुतां देवीं वराभयकरां स्मरेत् ॥"
अनयोः पुरश्चरणं लक्षजपः ॥*॥ ॐ ह्रीँ ह्रीँ
हूँ हूँ क्रीँ क्रीँ क्रीँ दक्षिणे कालिके क्रीँ क्रीँ
क्रीँ हूँ हूँ ह्रीँ ह्रीँ। २१। अस्याः पूजादिकं
दक्षिणावत् कार्य्यम्। पुरश्चरणं लक्षजपः ॥*॥
ॐ ह्रीँ ह्रीँ हूँ हूँ क्रीँ क्रीँ क्रीँ दक्षिणे
कालिके क्रीँ क्रीँ क्रीँ हूँ हूँ ह्रीँ ह्रीँ
स्वाहा। २३ ॥*॥ ह्रीँ ह्रीँ हूँ हूँ क्रीँ क्रीँ
क्रीँ दक्षिणे कालिके क्रीँ क्रीँ क्रीँ हूँ हूँ ह्रीँ
ह्रीँ स्वाहा। २२ ॥*॥ ह्रीँ ह्रीँ हूँ हूँ क्रीँ
क्रीँ क्रीँ दक्षिणे कालिके क्रीँ क्रीँ क्रीँ हूँ हूँ
ह्रीँ ह्रीँ २०। ध्यानपूजादिकं दक्षिणावत् ॥*॥
क्रीँ क्रीँ क्रूँ। ३ ॥*॥ ॐह्रीँ क्रीँ मे स्वाहा। ६
अस्याः पूजाप्रयोगः। अस्य भैरव ऋषिर्व्विराट्
छन्दः सिद्धकाली ब्रह्मरूपा भुवनेश्वरी देवता

निजबीजं बीजं लज्जाबीजं शक्तिः। वर्ण-न्यासादि दक्षिणावत्। ध्यानन्तु।

"खड्गाङ्किन्दुखण्डस्वदस्ततरसाभाविताङ्गी त्रिनेत्रा।

सव्ये पाणौ कपालोज्ज्वलदसृजमथो मुक्तकेशी पिबन्ती।

दिग्वस्त्रा बद्धकाञ्चीमणिमयमुकुटाद्यैर्युता दीप्तजिह्वा

पायान्नीलोत्पलाभा रविशशिविलसत्कुण्डला-लीढ़पादा॥"

एवं ध्यात्वा दक्षिणावत् सर्व्वं कार्य्यम्। पुरश्चरणन्तु एकविंशतिसहस्रजपः॥*॥ क्रीं क्रीं क्रीं ३॥*॥ क्रीं क्रीं क्रीं स्वाहा।५॥*॥ क्रीं क्रीं क्रीं फट् स्वाहा।६॥*॥ क्रीं क्रीं क्रीं क्रीं क्रीं क्रीं स्वाहा।८॥*॥ ऐं नमः। क्रीं ऐं नमः। क्रीं कालिकायै स्वाहा।१४॥*॥ एतस्याः पूजाप्रयोगः। अस्य दक्षिणा मूर्त्ति-ऋषिः पंक्तिश्छन्दः कालिका देवता। ध्यानन्तु

"चतुर्भुजा कृष्णवर्णा मुण्डमालाविभूषिता।

खड्गञ्च दक्षिणे पाणौ बिभ्रतीन्दीवरद्वयम्॥

कर्त्तृञ्च खर्परञ्चैव क्रमाद्वामेन बिभ्रती।

द्यां लिखन्तीं जटामेकां बिभ्रती शिरसा स्वयम्॥

मुण्डमालाधरा शीर्षे ग्रीवायामथ चापराम्।

वक्षसा नागहारञ्च बिभ्रती रक्तलोचना॥

कृष्णवस्त्रधरा कट्यां व्याघ्राजिनसमन्विता।

वामपादं शवहृदि संस्थाप्य दक्षिणं पदम्॥

विलाप्य सिंहपृष्ठे तु लेलिहाना शवं स्वयम्।

साट्टहासा महाघोररावयुक्ता सुभीषणा॥"

ध्यानमेव अन्यत् सर्व्वं दक्षिणावत्। पुरश्चरणं लक्षद्वयजपः। अन्यासां मन्त्रवर्णसंख्यलक्षजपः॥*॥ क्रीं क्रीं क्रीं दक्षिणे कालिके स्वाहा॥११॥ क्रीं हूं ह्रीं दक्षिणे कालिके फट्।१०॥*॥ क्रीं क्रीं हूं हूं ह्रीं ह्रीं दक्षिणे कालिके क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा।२०

एतासां दक्षिणा मूर्त्तिऋषिः पंक्तिश्छन्दो दक्षिणकालिका देवता। अन्यत् सर्व्वं दक्षिणावत्॥*॥ क्रीं स्वाहा ३। भैरवोऽस्य ऋषिः॥*॥ क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा।८॥*॥ क्रीं हूं ह्रीं स्वाहा।५। अस्य पञ्चवक्त्र ऋषिः॥*॥ क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा।८॥*॥ क्रीं दक्षिणे कालिके स्वाहा।८॥*॥ क्रीं हूं ह्रीं क्रीं हूं ह्रीं स्वाहा।८॥*॥ क्रीं क्रीं क्रीं ह्रीं ह्रीं हूं हूं क्रीं क्रीं क्रीं ह्रीं ह्रीं हूं हूं स्वाहा।१६॥*॥ नमः ऐं क्रीं क्रीं कालिकायै स्वाहा।११॥*॥ नमः आं आं क्रीं क्रीं फट् स्वाहा कालि कालि हूं।१८॥*॥ एतासां ऋष्यादिकं पूजादिकञ्च दक्षिणावत्। पुरश्चरणं लक्षजपः॥*॥ अथ गुह्यकालिकामन्त्राः। क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं गुह्ये कालिके क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा।२१॥*॥ क्रीं हूं ह्रीं गुह्ये कालिके क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा।१६॥*॥ क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं गुह्ये कालिके स्वाहा।१४॥*॥ क्रीं हूं ह्रीं गुह्ये कालिके हूं हूं ह्रीं ह्रीं स्वाहा।१४॥*॥ क्रीं हूं ह्रीं दक्षिणे कालिके हूं हूं ह्रीं ह्रीं स्वाहा।१५॥*॥ हूं ह्रीं गुह्ये कालिके क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा १५॥*॥ क्रीं गुह्ये कालिके क्रीं स्वाहा।८॥*॥ क्रीं दक्षिणे कालिके क्रीं स्वाहा।१०॥*॥ एतासां सर्वं पूर्ववत्। बलिमन्त्रस्तु। एह्येहि जगन्मातर्जगतां जननि गृह्ण गृह्ण मम बलिं सिद्धिं देहि देहि शत्रुक्षयं कुरु कुरु क्रूं क्रूं ह्रीं ह्रीं फट् फट् ॐ कालिकायै नमः फट् स्वाहा॥*॥ यद्वा गुह्यकाल्या अयं मन्त्रः। एह्येहि गुह्यकालि मम बलिं गृह्ण गृह्ण मम शत्रून् नाशय नाशय खादय खादय स्फुर स्फुर छिन्धि छिन्धि सिद्धिं देहि देहि क्रूं फट् स्वाहा॥*॥ अथ भद्रकाल्यादिमन्त्राः क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं भद्रकाल्यै क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा।२०॥*॥ क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं श्मशानकालि क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा।२१॥*॥ क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं महाकालि क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा।२०॥*॥ एतासां पूजादिकं दक्षिणावत्। ध्यानन्तु।

"महामेघप्रभां देवीं कृष्णवस्त्रपिधायिनीम्।

ललज्जिह्वां घोरदंष्ट्रां कोटराक्षीं हसन्मुखीम्॥

नागहारलतोपेतां चन्द्रार्द्धकृतशेखराम्।

द्यां लिखन्तीं जटामेकां लेलिहानां शवं स्वयम्॥

नागयज्ञोपवीताङ्गीं नागशय्यानिषेदुषीम्।

पञ्चाशन्मुण्डसंयुक्तवनमालां महोदरीम्॥

सहस्रफणसंयुक्तमनन्तं शिरसोपरि।

चतुर्दिक्षु नागफणावेष्टितां गुह्यकालिकाम्॥

तक्षकसर्पराजेन वामकङ्कणभूषिताम्।

अनन्तनागराजेन कृतदक्षिणकङ्कणाम्॥

नागेन रसनाहारकल्पितां रत्ननूपुराम्।

वामे शिवस्वरूपन्तं कल्पितं वत्सरूपकम्॥

द्विभुजां चिन्तयेद्देवीं नागयज्ञोपवीतिनीम्।

नरदेहसमाबद्धकुण्डलश्रुतिमण्डिताम्॥

प्रसन्नवदनां सौम्यां नवरत्नविभूषिताम्।

नारदाद्यैर्मुनिगणैः सेवितां शिवमोहिनीम्।

साट्टहासां महाभीमां साधकाभीष्टदायिनीम्॥"

गुह्यकाली इत्युपलक्षणम्॥*॥ भद्रकालीमन्त्रान्तरम्।

"प्रमादबीजमुद्धृत्य कालीति पदमुद्धरेत्।

महाकालीपदं प्रोक्ता किलियुग्मं ततः परम्॥

अस्त्रमग्निप्रियान्तोऽयं भद्रकाल्या महामनुः॥"

ॐ कालि महाकालि किलि किलि फट् स्वाहा॥*॥ ध्यानं यथा,—

"क्षुत्क्षामा कोटराक्षी मसिमलिनमुखी मुक्तकेशी रुदन्ती नाहं तृप्ता वदन्ती जगदखिलमिदं ग्रासमेकं करोमि।

हस्ताभ्यां धारयन्ती [illegible]

दन्तैर्जम्बूफलाभैः [illegible]

अस्याः पुरश्चरणादिकं [illegible]

इति केचित्॥ वस्तुतस्तु [illegible]

सहस्रजपः। इति [illegible]

श्मशानकालीमन्त्रादिकं तन्त्रे [illegible]

अथ दीपान्विताश्यामापूजा। कार्त्ति[illegible]

"कार्त्तिके मासि [illegible]

पूजयेत् योऽतियत्नेन काली [illegible]

मृन्मयीं प्रतिमां [illegible]

व्योमकेशमहितायाम्।

"तुलार्के यस्त्वमावास्यां निशायां [illegible]

पूजयेद्विधिवद्भक्त्या [illegible]

एतञ्च अर्द्धरात्रे पूजाया मुख्यकाल[illegible]

काली यद्युभयदिने [illegible]

तत्रैव।

"तत्रोभयदिने प्रदोषकाले भूतचतुर्द[illegible]

उमा माहेश्वरी सा च तिथिः [illegible]

बलिदानं बलितिथावात्मनाशकरं [illegible]

ततस्तत्र न कर्त्तव्यं बलिदानविशेष[illegible]

मन्त्रसिद्धिकरं तत्र परेऽह्नि अपरा[illegible]

रात्रौ पूजा प्रकर्त्तव्या रात्रावेव [illegible]

प्रकाशे सिद्धिहानिः [illegible]

तथा कालीकल्पे।

"तुलार्के बहुले पक्षे पञ्चदश्यां महेश्वरि

यथोपचारैः संपूज्य महानिशि [illegible]

शनिभौमदिने चेत् स्यात्तत [illegible]

तत्रोभयदिने [illegible]

इमां यात्रां कारयित्वा चक्रवर्त्ती [illegible]

महेश्वरी दक्षिणकाली [illegible]

कार्त्तिकामावास्यायां कालीपूजाहेतु[illegible]

सारे।

"कार्त्तिके [illegible]

आविर्भूता महाकाली [illegible]

अतोऽत्र पूजनीया सा तस्मिन्नहनि सादर[illegible]

बलिपूजादिकं सर्व्वं निशायां क्रियते [illegible]

तत्तदक्षयतां याति काली शिवा प्रसीद[illegible]

महानिशि अर्द्धरात्रे। तथा च [illegible]

तन्त्रे।

"शरत्काले च देवेशि [illegible]

अमावास्यां समासाद्य मध्यरात्रौ [illegible]

मृण्मयीं पुत्तलीं कृत्वा दीपादि[illegible]

बलिं नानाविधं दद्यात् वाद्यभाण्डमङ्गल[illegible]

नृत्यगीतं कौतुकञ्च यावत् सूर्य्योदयं भवे[illegible]

प्रातःकाले शुद्धतोये स्थापयेदरिनाशिनीं [illegible]

एतेनास्या दीपयामाम्यर्द्धरात्रे शोभा। [illegible]

चनेनार्द्धरात्रे जन्मश्रवणात् तत्रैव पूजा
येति । तथा बृहद्धर्म्मपुराणे ।
वौ निशीथव्यापायाममावास्यामिहैव तु ।
ीतलं समायाता काली दिग्वसनाम्बिका ॥
स्तामत्र वै भक्त्या देवदेवीं द्विजातयः ।
येदात्मनो भक्त्या पशुपुष्पाद्यैसम्पदा ॥" इति
। गुप्तसाधनतन्त्रे ।
नशा तु परमेशानि सूर्य्ये चास्तमुपागते ।
रे च गते रात्रौ घटिके द्वे परे च ये ॥
ानिशा समाख्याता ततश्चातिमहानिशा ।
रात्रे गते देवि पशुभावो न पूजयेत् ॥"
। गते अर्द्धरात्रात् परम् । तथा ।
गदण्डे तु या पूजा तत् सर्व्वमक्षयं भवेत् ।
कोणे महेशानि तत् सर्व्वममृतोपमम् ॥
मकोशके देवि सर्व्वं चौरोपमं भवेत् ।
मकोशके देवि ! द्रव्यतुल्यं न संशयः ॥
: परं महेशानि विषतुल्यं न संशयः ।
त् सर्वं महेशानि पशुभावे मयोदितम् ॥"
ात्रस्य गौणत्वश्रवणात् पशूनां यत्र पूर्व्व-
ने अर्द्धरात्रव्यापिन्यमावास्या न तु तत्पूर्व्वं
सि: परदिने च रात्रेः पञ्चममुहूर्त्तव्यापिनी
। परेद्युः पूजेति चेन्न गुप्तसाधनतन्त्रोक्तस्य च
त्र नित्यपूजादिपरम् । कार्त्तिकामावास्याया-
द्धरात्रे लक्ष्मनिमित्तकपूजाया विशेषेणाभि-
नात् । पशुभिरपि एवंभूतस्थले पूर्व्वदिने-
द्धरात्र एव पूजा कार्य्या । यथा न्यौक्तस्य-
ाया: सामान्यतो निशायामकर्त्तव्यत्वेऽपि
श्राटम्यामर्द्धरात्रकर्त्तव्यता मुख्यतमेति परन्तु
त्र पूर्व्वदिने अर्द्धरात्रात् परममावास्या पर-
दिने अर्द्धरात्रात् पूर्वमेव तत्र पशुभाविनः पर
दिने वीरदिव्ययोस्तु पूर्व्वदिने पूजा कार्य्या इति
माणं गोप्यगोपनतीन्नागमीयषष्ठपटले । एवं
च पूर्व्वदिने अर्द्धरात्रव्यापिन्यमावास्या पर-
दिने तथा भूतापि कुजवारादियुक्ता तत्रापि
र्व्वदिने पूजा गुणफलकुजवारादिकमपेक्ष्य चतु-
शीयोगस्य मुख्यत्वात् । तथोक्तं श्यामकेश-
न्त्रे
कुजवारे लक्षगुणं पूर्व्व विद्या ततोऽधिकेति ।"
कुजवार इति शनिवारोपलक्षणम् ।
शनिभौमदिने चेत् स्यात्ततः शतगुणं फलम् ।
इति वचनात् ॥
कार्त्तिकामावास्यायां कालीपूजाया नित्यता-
माह मायातन्त्रे ।
"वर्षे वर्षे च कर्त्तव्यं कालिकाया महोत्सवम् ।
कार्त्तिके तु विशेषेण अमावास्यां निशार्द्धके ॥"
इति ॥
देव्यागमे च ।
"प्रतिसंवत्सरं कुर्य्यात् कालिकाया महोत्सवम्
कार्त्तिके तु विशेषेण अमावास्यां निशार्द्धके ।
तत्र संपूजयेद्देवीं भोगमोक्षप्रदायिनीम् ॥"
इति ।
एवञ्च कार्त्तिकपदं गौणचान्द्रकार्त्तिकपरं

तन्मतिविरुद्धत्वात् । न तु नानावचने तुलार्क-
श्रवणात् सौरकार्त्तिकपरम् । तथा सति यस्मिन्
वर्षे तुलार्के रात्रौ नामावास्याप्राप्तिस्तद्वर्षे
कृत्यलोपः स्यात् । एवं यत्र वर्षे तुलार्के दर्शद्वयं
तत्रानध्यवसायापत्तेः । स्पष्टमुक्तं विद्योत्पत्तितन्त्रे
"कार्त्तिकस्याप्यमावास्या गौणचान्द्रप्रमाणतः ।
निशीथव्यापिनी या तु तस्यां पूजां समाचरेत् ॥"
निशीथमर्द्धरात्रम् । एवं यत्र पूर्वदिने निशीथ-
व्यापिन्यमावास्या कन्यार्के परदिने च तुलार्के-
ऽर्द्धरात्रात् परं मुहूर्त्तादिव्यापिनी तत्रापि
पूर्वदिने निशीथस्य मुख्यकालत्वानुरोधात् भूत-
तिथियोगानुरोधाच्च तुलार्कस्य दिनभेदनिया-
मकत्वेन स्तुतत्वात् । परन्तु तुलार्कपदं नाना-
वचने यदस्ति तत्प्रायिकाभिप्रायेण गुणफलाभि-
प्रायेण वा बोध्यम् । अतएव तिथितत्त्वधृत-
मादिपुराणम् ।
"ऋक्षराशिविशेषेण यत् कर्म्म विहितं नरैः ।
दैवं वाप्यथवा पैत्रं तदन्यत्रापि दृश्यते ॥"
इति ।
अगस्त्यसंहितायाम् ।
"मेषं पूषणि संप्राप्ते लग्ने कर्क्कटकाह्वये ।
आविरासीत् सकलया कौशल्यायां परःपुमान् ॥"
इति ॥
अत्र मेषार्के जन्मश्रवणं मीनार्केऽपि कदाचित्
उपवासः । यत्तु तन्त्रीयमिति कृत्वा पठन्ति ।
"तुलार्के त्वर्द्धरात्रे या दीपयात्रा तिथिर्भवेत् ।
तत्र संपूजयेत् कालीं सर्वकामार्थसिद्धये ॥
निशार्द्धे सा तिथिर्नास्ति तदधःकालसंयुता ।
तत्रापि पूजयेत् कालीं तुलार्कं नैव लङ्घयेत् ॥"
इति तदमूलम् । समूलकत्वेऽपि तुलार्के इत्यत्र
तुशब्दः कन्यार्कद्योतकः । तेन तुलार्के कन्यार्के
वा इत्यर्थः । तुलार्कमात्रपरत्वे प्रतिसंवत्सर
इत्यस्य बाधापत्तेरुक्तत्वात् । तुलार्कं नैव लङ्घ-
येदित्यस्य तुलार्कविहितपूजां न त्यजेत् इत्यर्थः
तुलार्कविहितपूजायाश्चौणकार्त्तिकत्वेनकर्त्तव्य-
तायां विधेस्तात्पर्य्यस्योक्तत्वात् । यद्वा सर्वत्र
तुलार्कघटितवचनेषु तुलार्कस्यामावास्यायामुप-
लक्षणतयान्वयः । न तु विशेषणतया । न वा
पूजायामपि तदन्वयः । तेन तुलार्कोपलक्षिता-
मावास्यायां निशीथे कालीं पूजयेत् इतिविधि-
लौनगौणचान्द्रकार्त्तिकामावास्यालाभः । तस्या-
मेव तुलार्कसम्बन्धनियमात् । अन्यथा तुलाव्य-
स्थाव्यत्वाभावेन कदाचित् तत्प्रसतिपदादि-
दर्शान्तस्य मुख्यकार्त्तिकत्वानुपपत्तिः । मुख्य-
कार्त्तिकामावास्यायाः कदाचित्तुलायां सत्वात्
न तु तुलार्के नियमः । तथा च तुलार्कोपलक्षिता-
मावास्यायां निशीथे कालीं पूजयेदिति पर्य्यव-
सितम् । तुलार्कं नैव लङ्घयेदित्यत्र तुलार्कं
तुलार्कोपलक्षितामावास्यापूजनम् । संवत्स-
रारे तु कार्त्तिके मासोपक्रमं न तु राशेः
कोऽपि गौणचान्द्रेण विधानात् । केचित्तु
[illegible] अमावास्यायां [illegible]

तुलाराशिस्थे भास्करे इत्युक्ते स्थं इति भास्कर-
पदोत्तरसप्तम्या उपलक्षणतया तत्कालसम्बन्ध-
बोधनसामर्थ्यात् इति वदन्ति ॥ ४ ॥ तन्त्रान्तरे ।
"तुलाराशिं गते भानौ दीपयात्रानिशासु च ।
पूजयेत् कालिकां देवीं धर्म्मकामार्थसिद्धये ॥"
तन्त्रे ।
"अर्द्धरात्रात् पुरस्तात्तु यावद्वे घटिकाद्वयम् ।
सा महारात्रिरुद्दिष्टा यद्दत्तमक्षयं भवेत ॥
महानिशाथ विज्ञेया अर्द्धरात्रात् परं शिवे ।
नाड़ीचतुष्टयं शस्तं तत्र पूजा महाफला ॥"
विद्योत्पत्तितन्त्रे ।
"दीपोत्सवचतुर्द्दश्याममाया योग एव च ।
कालरात्रिर्महेशानि काली तारा प्रियङ्करी ॥"
ज्ञानार्णवे ।
"महारात्रावमावास्यां दक्षिणायाः प्रपूजनम् ।
कार्त्तिके मासि सुश्रोणि कालीप्रीतिकरं परम् ॥
तत्रापि च निशीथे तन्महाशासिद्धिप्रदं नृणाम् ।
निशीथात् परतो देवि यत्तु नाड़ीचतुष्टयम् ॥
सा महारात्रिरुत्कृष्टा तत्र पूजा महाफला ।
तारतम्येन देवेशि पूजायाः फलकल्पनम् ॥"
कुलार्णवेऽपि ।
"भूतयुक्ता महेशानि महारात्रौ तु या कुहूः ।
सा कालरात्रिरुद्दिष्टा कालीतारा प्रियङ्करी ॥
तत्र पूजा तयोः कार्य्या नानापशुविहिंसनम् ।
बलिदानं बलितायायात्मनाशकरं शिवे ! ॥"
कुलचूड़ामणौ ।
"तिथिभ्यः शतगुणं पर्व्व दर्शः कोटिगुणोत्तरः ।
फलोपचारबहुलैरिष्टे सूर्य्येन्दुसङ्गमे ।
पूजयित्वा महाकालीं नरो निर्व्वाणमृच्छति ॥
चतुर्वर्गप्रदं दर्शे कार्त्तिके कालिकार्च्चनम् ।
अनन्तफलदं तत्र पर्व्वयुक्ते च पर्व्वणि ॥
निशार्द्धे पूजयेद्देवीं नृमुण्डां मुण्डमालिनीम् ।
पयाब्धिक्षीरदे घोरे सर्व्वप्राणिभयङ्करे ॥"
कालीकुलसद्भावे ।
"दीपोत्सवचतुर्द्दश्या संमिश्रा या भवेत् कुहूः ।
तस्यां या तामसी रात्रिः सोच्यते काल-
रात्रिका ॥
तस्यां पूजा प्रकर्त्तव्या काली तारा प्रियङ्करी ॥
तुलामकरमेषेषु कन्यायां मिथुने तथा ।
भूतविद्धाप्यमावास्या पूज्या भवति यत्नतः ॥"
इति जीमूतवाहनकृतधर्म्मरत्ने कालविवेकधृत-
हारीतवचनम् ॥ ५ ॥ निशाविभागे देव-
लोक्तमहानिशा यथा;—
"महानिशा द्वे घटिके रात्रेर्मध्यमयामयोः ।"
इति मलमासतत्त्वप्रकरणे रघुनन्दनधृ-
तवचनम् ।
"महानिशा तु विज्ञेया मध्यमं प्रहरद्वयम् ।
तत्र स्नानं न कुर्व्वीत नित्यनैमित्तिकादृते ॥"
[illegible]
"[illegible]"
[illegible]
"महानिशा तु विज्ञेया मध्यं [illegible]"

एतद्भविष्यपुराणे विवृतम्। यथा, भविष्ये।
"अहन्यहनि यच्छ्राद्धं तन्नित्यमभिधीयते।
वैश्वदेवविहीनं तदशक्तावुदकेन तु॥
एकोद्दिष्टन्तु यच्छ्राद्धं तन्नैमित्तिकमुच्यते।
तदप्यदैवं कर्त्तव्यमयुग्मानाशयेद्द्विजान्॥
काम्याय तु हितं काम्यमभिप्रेतार्थसिद्धये।
पार्व्वणेन विधानेन तदप्युक्तं खगाधिप॥
वृद्धौ यत् क्रियते श्राद्धं वृद्धिश्राद्धं तदुच्यते।
सर्व्वं प्रदक्षिणं कार्य्यं पूर्व्वाह्णे तूपवीतिना॥
गन्धोदकतिलैर्युक्तं कुर्य्यात् पात्रचतुष्टयम्।
अर्घ्यार्थं पितृपात्रेषु प्रेतपात्रं प्रसेचयेत्॥
ये समाना इति द्वाभ्यामेतज्ज्ञेयं सपिण्डनम्।
नित्येन तुल्यं शेषं स्यादेकोद्दिष्टं स्त्रिया अपि॥
अमावास्यां यत् क्रियते तत् पार्व्वणमुदाहृतम्
क्रियते वा पर्व्वणि यत् तत् पार्व्वणमिति स्थितिः
गोष्ठ्यां यत् क्रियते श्राद्धं गोष्ठीश्राद्धं तदुच्यते
बहूनां विदुषां सम्पत्सुखार्थं पितृतृप्तये॥
क्रियते शुद्धये यत्तु ब्राह्मणानान्तु भोजनम्।
शुद्ध्यर्थमिति तत् प्रोक्तं वैनतेय मनीषिभिः॥
निषेककाले सोमे च सीमन्तोन्नयने तथा।
ज्ञेयं पुंसवने चैव श्राद्धं कर्म्माङ्गमेव च॥
देवानुद्दिश्य यच्छ्राद्धं तद्दैविकमिहोच्यते।
हविष्येण विशिष्टेन सप्तम्यादिषु यत्नतः॥
गच्छन् देशान्तरं यत्तु श्राद्धं कुर्य्यात्तु सर्पिषा
यात्रार्थमिति तत् प्रोक्तं प्रवेशे च न संशयः॥
शरीरोपचये श्राद्धमर्थोपचय एव च।
पुष्ट्यर्थमेतद्विज्ञेयमौपचयिकमुच्यते॥"*॥
तस्य पञ्चविधत्वं यथा। बृहस्पतिः।
"नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धं तथैव च
पार्व्वणञ्चेति मनुना श्राद्धं पञ्चविधं स्मृतम्॥"
कूर्म्मपुराणे।
"अहन्यहनि नित्यं स्यात् काम्यं नैमित्तिकं पुनः
एकोद्दिष्टन्तु विज्ञेयं वृद्धिश्राद्धञ्च पार्व्वणम्॥
एतत् पञ्चविधं श्राद्धं मनुना परिकीर्त्तितम्॥"
मत्स्यपुराणे त्रैविध्यमुक्तं यथा,—
"नित्यं नैमित्तिकं काम्यं त्रिविधं श्राद्धमुच्यते॥"
तस्य द्वैविध्यम्। विष्णुना नित्यकाम्यरूपतया द्वैविध्यं वक्ष्यते। तत्र नित्यपदमावश्यकरूपतया पार्व्वणैकोद्दिष्टयोरपि परिग्रहार्थम्। काम्यपदमनावश्यकत्वार्थम्। इति श्राद्धविवेकः॥*॥
वाराहपुराणे निमिना तत्पुत्रस्य श्राद्धं कृतम्। यथा,—

धरण्युवाच।

"को गुणः पितृयज्ञस्य कथमेव प्रपूज्यते।
केन चोत्पादितं श्राद्धं कस्मिन् कालं क्रियात्मकम्
एतदिच्छाम्यहं श्रोतुं विस्तरेण वदस्व मे॥

वाराह उवाच।

मनोस्तु वंशसम्भूत आत्रेय इति विश्रुतः।
आत्रेयस्याभवत् पुत्रो निमिर्नामा तपोधनः॥
निमेस्तु पुत्रो धर्म्मात्मा पितृभक्तश्च विश्रुतः।
वर्षाणाञ्च सहस्राणि तपस्तप्त्वा वसुन्धरे॥
कालधर्म्ममनुप्राप्तः पञ्चत्वमागतः।
नष्टश्च तं सुतं दृष्ट्वा निमिः शोक उपाविशत्।
पुत्रशोकाभिसंयुक्तो दिवा रात्रौ च चिन्तयन्॥
निमिः कृत्वा ततः शोकं विधिना तत्र माधवि
तमेव गतमङ्गल्यस्त्रिरात्रे प्रत्यपद्यत॥
तस्य प्रतिविशुद्धस्य माघमासे तु द्वादशीम्।
मनः संहृत्य विषयं बुद्धिर्विस्तारगामिनी॥
स निमिश्चिन्तयामास श्राद्धकल्पं समाहितः।
यानि तस्यैव भोज्यानि मूलानि च फलानि च॥
यानि कानि च भक्ष्याणि नवश्च रससम्भवम्।
यानि तस्यैव चेष्टानि सर्व्वमेतदुदाहरत्॥
आमन्त्र्य ब्राह्मणं पूर्व्वं शुचिर्भूत्वा समाहितः
दक्षिणावर्त्ततः सर्व्वं ऋषिः स्वयमकुर्व्वत।
सप्त कृत्वा ततस्तत्र युगपत् समुपाविशत्॥
दत्त्वा तु मांसशाकानि मूलानि च फलानि च
पूजयित्वा तु विप्रान् स सप्तकृत्वस्तु सुन्दरि॥
कृत्वा तु दक्षिणाग्रांश्च कुशांश्च प्रयतः शुचिः।
प्रददौ श्रीमते पिण्डं नामगोत्रमुदाहरन्॥
एतस्मिन्नन्तरे देवि नारदो द्विजसत्तमः।
जगाम तापसारण्यं ऋष्याश्रमविभूषितम्॥
तं दृष्ट्वा पूजयामास स्वागतेनाथ माधवि।
भीतो गद्गदया वाचा निश्वस्य मुहुर्मुहुः॥
सव्रीडो भाषते विप्रः कारुण्येन समन्वितः।
कृतः स्नेहेन पुत्रार्थे मया संकल्प्य यत् कृतम्॥
तर्पयित्वा द्विजान् सप्त अन्नाद्येन फलेन च।
पश्चाद्विसर्ज्जितं पिण्डं दर्भानास्तीर्य्य भूतले॥
उदकानयनञ्चैव त्वपसव्येन पायितम्।
शोकस्नेहप्रभावेण एतत् कर्म्म मया कृतम्॥
न च श्रुतं मया पूर्व्वं न देवैः ऋषिभिः कृतम्।
भयं तीव्रं प्रपश्यामि मुनिशापात् सुदारुणात्

नारद उवाच।

न भेतव्यं द्विजश्रेष्ठ पितरं शरणं व्रज।
अधर्म्मं न च पश्यामि धर्म्मेणैवात्र संशयः॥
नारदेनैवमुक्तस्तु निमिर्ध्यानमुपाविशत्।
कर्म्मणा मनसा वाचा पितरं शरणं गतः॥
ततोऽतिचिन्तयामास वंशकर्त्तारमात्मनः।
ध्यायमानस्ततोऽप्याशु आजगाम तपोधनः॥
पुत्रशोकेन सन्तप्तं पुत्रं दृष्ट्वा तपोधनः।
पुत्रमाश्वासयामास वाग्भिरिष्टाभिरव्ययैः॥
निमे सङ्कल्पितश्चायं पितृयज्ञस्तपोधन।
पितृयज्ञ इति निर्द्दिष्टो धर्म्मोऽयं ब्रह्मणा स्वयम्॥
ततो ह्यतितरो धर्म्मः क्रतुरेकः प्रतिष्ठितः।
कृतः स्वयम्भुवा पूर्व्वं श्राद्धे यो विधिरुत्तमः॥"

इति वाराहे श्राद्धोत्पत्तिनामाध्यायः॥*॥

अपि च।
"अपसव्येन दातव्यं मासि मासि तिलोदकम्।
प्रणम्य शिरसा देवीर्निर्व्वापस्य च धारिणीः।
वैष्णवी काश्यपी चेति अजया चेति नामतः॥
एवं दत्तेन प्रीयन्ते पितरश्च न संशयः।
परमात्मा शरीरस्थो देवतानां मया कृतः॥
वयस्तत्र वराहेऽ देहगात्राद्विनिःसृताः।
पितृदेवा भविष्यन्ति भोक्तारः पितृपिण्डकान्।
देवतासुरगन्धर्व्वा यक्षराक्षसपन्नगाः।
पिण्डं श्राद्धस्य पश्यन्ति वायुभूता
पितृयज्ञं विशालाक्षि ये ...
आयुः कीर्त्तिं बलं तेजो धनं पुत्रपशून्
ददन्ति पितरस्तस्य आरोग्यं नात्र संशयः।
आत्मकर्म्मवशाल्लोकान् प्राप्नुवन्ति ...
तिर्य्यक्त्वञ्च विमुच्यन्ते प्रेतभावाच्च मानवाः।
नरके पच्यमानानां त्राता भवति मानवः।
पूजकः पितृदेवानां सर्व्वकामं यथार्थ...
द्विजातींस्तर्पयित्वा तु पूर्व्वेण विधिना ...
अक्षयं तस्य मन्यन्ते पितरः श्राद्धतर्पिताः।
नरा ये पितृभक्तास्ते ...
पक्वान्नं तत्र वै कार्य्यं सुविशुद्धं शुचि...
दत्ते तु तत्र मध्याह्ने श्राद्धारम्भस्तु
स्वागतञ्च तथा कृत्वा पाद्यार्थं ...
पाद्यं दत्त्वा तु विप्राय ...
आसनं कल्पयित्वा तु आवाह्य तदनन्तरम्
अर्घ्यं दद्याद्विधानेन ...
धूपं दीपं तथा वस्त्रं तिलोदकमथापि च
पात्रञ्च भोजनस्यार्थे विप्राग्रे धारयेत्तथा।
भस्मना मण्डलं कार्य्यं पङ्क्तिदोषनिवारणम्
अग्निकार्य्यं ततः कृत्वा ...
तत्र कार्य्यस्तु सङ्कल्पः पितॄनुद्दिश्य सर्व्वदा।
यथासुखेन भोक्तव्यमिति ब्रूयाद्द्विजं ततः।
रक्षोघ्नमन्त्रपाठाय आचमेत विचक्षणः।
तृप्तांस्तु ब्राह्मणान् ज्ञात्वा दद्याद्विकिरं ततः।
उत्तरापोशनं दत्त्वा पिण्डप्रश्नन्तु कारयेत्
दक्षिणाभिमुखो भूत्वा दर्भानास्तीर्य्य भूतले
पिण्डदानं प्रकुर्व्वीत पित्रादित्रितये तथा
पिण्डानां पूजनं कार्य्यं तन्तुदानं ...
ब्राह्मणस्य च हस्ते तु ...
पिण्डास्त्रयस्तु वसुधे यावत्तिष्ठन्ति भूतले
आप्यायमानाः पितरस्तावत्तिष्ठन्ति वै ...
उपस्पृश्य शुचिर्भूत्वा दद्यात् शान्त्युदकानि
प्रणम्य शिरसा भूमौ निर्व्वापस्य च धारिणीं
वैष्णवी काश्यपी चेति अजया चेति ...
भक्षयेत् प्रथमं पिण्डं पत्नी देयश्च मध्यमः
तृतीयमुदके दद्यात् श्राद्धे एवं विधिः ...
पितृदेवं विसृज्याथ भक्त्या तु प्रणमेत्तु ...
एवं दत्तेन तुष्यन्ति पितृदेवा न संशयः।
दीर्घायुष्यं प्रयच्छन्ति पुत्रपौत्रधनानि च।
तेनोत्तमेषु विप्रेषु दद्यात् श्राद्धं विधानतः।
अन्यथा तत्तु वै श्राद्धं निष्फलं नास्ति संशयः
मन्त्रहीनं क्रियाहीनं यत् श्राद्धं कुरुते द्विजः
सक्रक्ष्यासुरेन्द्रस्य फलं भवति भामिनि॥"
इति वाराहे ...
तस्याधिकारिक्रमो यथा,—
"पुत्रः पौत्रः प्रपौत्रो वा भ्राता वा भ्रातृ...
...सन्ततिः।
सपिण्डसन्ततिर्व्वापि क्रियार्हा नृप जायते।
तेषामभावे सर्व्वेषां समानोदकसन्ततिः।
मातृपक्षस्य पिण्डेन सम्बद्धा ये जलेन वा।

ह्येऽपि चोत्सवे स्त्रीभिः कार्य्या क्रिया नृप।
तान्तर्गतैर्व्यापि कार्य्याः प्रेतस्य याः
क्रियाः॥
श्वश्रुरिकृवाद्दा कारयेदवनीपतिः।
ः क्रिया मध्यमाख्य तथा चैवोत्तराः
क्रियाः॥
कारा: क्रियास्त्वेतास्तासां भेदं शृणुष्व मे।
ाहश्चार्य्यायुधादिस्पर्शाद्यन्तास्तु याः क्रियाः॥
पूर्वा मध्यमा मासि मास्येकोद्दिष्टसंज्ञिताः
पितृत्वमापन्ने सपिण्डीकरणादनु॥
न्ते याः क्रियाः पितराः प्रोच्यन्ते ता नृपो-
त्तराः।
मातृसपिण्डैस्तु समानसलिलैस्तथा॥
तान्तर्गतैश्चैव राज्ञा वा धनहारिणा।
ः क्रियास्तु कर्त्तव्याः पुत्राद्यैरेव चोत्तराः।
हैर्वा नरश्रेष्ठ कार्य्यास्तत्तनयैस्तथा।
ाहनि च कर्त्तव्याः स्त्रीणामप्युत्तराः क्रियाः॥
संवत्सरं राजन्नेकोद्दिष्टं विधानतः॥"
ति विष्णुपुराणे ३ अंशे १३ अध्यायः॥*॥
याज्ञवल्क्य उवाच।
श्राद्धविधिं वक्ष्ये सर्व्वपापप्रणाशनम्।
ावास्याष्टकावृद्धिः कृष्णपक्षोऽयनद्वयम्॥
ं ब्राह्मणसम्पत्तिर्विषुवत् सूर्य्यसंक्रमः।
ोपातो गजच्छाया ग्रहणं चन्द्रसूर्य्ययोः॥
ं प्रतिरुचिश्चैव श्राद्धकालाः प्रकीर्त्तिताः॥*॥
ो यः सर्व्ववेदेषु श्रोत्रियो वेदविद्युवा।
ायंविज्ज्येष्ठसामा त्रिमधुस्त्रिसुपर्णिकः॥
ीयर्त्विग् जामातृयाज्यश्वशुरमातुलाः।
ाचिकेतदौहित्रशिष्यसम्बन्धिबान्धवाः॥
र्मनिष्ठास्तपोनिष्ठाः पञ्चाग्निर्ब्रह्मचारिणः।
ृमातृपराश्चैव ब्राह्मणाः श्राद्धदेवताः॥*॥
गो हीनातिरिक्ताङ्गः काणः पौनर्भवस्तथा॥
कीर्ण्यादयो ये च ये चाचारविवर्ज्जिताः।
वेणाश्च ये सर्व्वे न श्राद्धार्हाः कदाचन॥*॥
मन्त्रयेत पूर्व्वेद्युर्द्विजान् भोक्त्रंश्च संयतैः।
ाचान्तांश्चैव पूर्व्वाह्णे आसने सूपवेशयेत्॥
ान्दैवे तथा पित्र्ये सुप्रदेशे स्वशक्तितः।
दैवे प्रागुदक् पित्र्ये वीक्ष्यैकं चोभयोः पृथक्॥
ातामहानामप्येवं तन्त्रं वा वैश्वदेविकम्।
स्तप्रक्षालनं दत्त्वा विष्टरार्थं कुशानपि॥
ावाह्य तदनुज्ञातो विश्वेदेवास इत्यृचा।
ैरन्ववकीर्य्याथ भाजने सपवित्रके॥
न्नो देव्या पयः क्षिप्त्वा यवोऽसीति यवांस्तथा।
ा इति मन्त्रेण हस्तेष्वेव विनिःक्षिपेत्॥
न्धोदके तथा धूपमाल्यदानप्रदीपकम्।
ापसव्यं ततः कृत्वा पितृणामप्रदक्षिणम्॥
द्विगुणांस्तु कुशान् दत्त्वा उपन्तस्त्वेत्यृचा
पितॄन्।
ावाह्य तदनुज्ञातो जपेदायान्तु नस्ततः॥
ावार्थस्तु तिलैः कार्य्यः कुर्य्यादर्घ्यादि पूर्व्ववत्।
त्त्वा तु संश्रवांस्तेषां पात्रे कृत्वा विधानतः॥
पितृभ्यः स्थानमसीति न्युब्जं पात्रं करोत्यधः।

अग्नौ करिष्येत्यादाय पृच्छत्यन्नं घृतप्लुतम्॥
कुरुष्वेति तथोक्तोऽग्नौ हुत्वाग्नौ पितृयज्ञवत्।
हुतशेषं प्रदद्याच्च भाजनेषु समाहितः॥
यथालाभोपपन्नेषु रौप्येषु च विशेषतः।
दत्त्वान्नं पृथिवी ते पात्रमिति पात्राभि-
मन्त्रणम्॥
कृत्वेदं विष्णुरित्यन्ने द्विजाङ्गुष्ठं निवेशयेत्।
सव्याहृतिकां गायत्रीं मधुवातेत्यृचं तथा॥
जप्त्वा यथासुखं वाच्यं भुञ्जीरंस्तेऽपि वाग्यताः।
अन्नमिष्टं हविष्यञ्च दद्यादक्रोधनोऽत्वरः॥
आतृप्तेश्च पवित्राणि जप्त्वा पूर्व्वं जपस्तथा।
अन्नमादाय तृप्ताः स्थ शेषञ्चैवानुमन्य च॥
तदन्नं प्रविकिरेद्भूमौ दद्याच्चापः सकृत् सकृत्।
सर्व्वमन्नमुपादाय सतिलं दक्षिणामुखः॥
उच्छिष्टसन्निधौ पिण्डान् प्रदद्यात् पितृयज्ञवत्।
मातामहानामप्येवं दद्याच्चाचमनं ततः॥
स्वस्ति प्रोच्यतामिति चाहैवं विश्वेदेवान् जलं
ददत्।
स्वस्तिवाच्य ततो दद्यादक्षय्योदकमेव च॥
दत्त्वा तु दक्षिणां शक्त्या स्वधाकारमुदीरयेत्।
वाच्यतामित्यनुज्ञातः पितृभ्यश्च स्वधोच्यताम्॥
ब्रूयुरस्तु स्वधेत्युक्ते भूमौ सिञ्चेत्ततो जलम्।
दातारो नोऽभिवर्द्धन्तां वेदाः सन्ततिरेव च॥
श्रद्धा च नो मा व्यगमत् बहु देयञ्च नोऽस्त्विति।
इत्युक्त्वापि प्रियं वाचं प्रणिपत्य विसर्ज्जयेत्॥
वाजे वाजे इति प्रीत्या पितृपूर्व्वं विसर्ज्जनम्।
यस्मिंस्ते संश्रवाः पूर्व्वमर्घ्यपात्रे निपातिताः॥
पितृपात्रं तदुत्तानं कृत्वा विप्रान् विसर्ज्जयेत्।
प्रदक्षिणमनुव्रज्य भुञ्जीत पितृसेवितम्॥
ब्रह्मचारी भवेत्तान्तु रजनीं भार्य्यया सह।
एवं प्रदक्षिणं कृत्वा वृद्धौ नान्दिमुखानपि॥
यजेत यवकर्कन्धुमिश्राः पिण्डा यवैः श्रिताः।
एकोद्दिष्टं दैवहीनमेकार्घ्यैकपवित्रकम्।
आवाहनाग्नौकरणरहितं ह्यपसव्यवत्।
उपतिष्ठतामित्यक्षय्यस्थाने विप्रान् विसर्ज्जयेत्॥
अभिरम्यतां प्रब्रूयात् ब्रूयुस्तेऽभिरताः स्म ह।
गन्धोदकतिलैर्मिश्रं कुर्य्यात् पात्रचतुष्टयम्॥
अर्घ्यार्थं पितृपात्रेषु प्रेतपात्रं प्रसेचयेत्।
ये समाना इति द्वाभ्यां शेषं पूर्व्ववदाचरेत्॥
एतत् सपिण्डीकरणमेकोद्दिष्टं स्त्रिया अपि।
अर्व्वाक् सपिण्डीकरणं यस्य संवत्सराद्भवेत्॥
तस्याप्यन्नं सोदकुम्भं दद्यात् संवत्सरं द्विज।
पिण्डांस्तु गोऽजविप्रेभ्यो दद्यादग्नौ जलेऽपि वा॥
हविष्यान्नेन वै मासं पायसेन तु वत्सरम्।
मात्स्यहारिणकौरभ्रशाकुनच्छागपार्षतैः॥
ऐणरौरववाराहशाशैर्मांसैर्यथाक्रमम्।
मासवृद्ध्याभि तुष्यन्ति दत्तैरिह पितामहाः॥
दद्याद्वर्षात्रयोदश्यां मघासु च न संशयः।
प्रतिपत्प्रभृतिष्वेवं कन्यादीन् श्राद्धदो भवेत्॥
शस्त्रेण निहतानान्तु चतुर्द्दश्यां प्रदीयते॥*॥
स्वर्गं ह्यपत्यमोजश्च शौर्य्यं क्षेत्रं बलं तथा॥
पुत्रश्रैष्ठ्यं ससौभाग्यमपत्यं मुख्यतां शुभम्।

प्रवृत्तचक्रतां पुत्रान् वाणिज्यप्रभृतींस्तथा॥
अरोगित्वं यशो वीतशोकतां परमां गतिम्।
धनं विद्यां भिषक्सिद्धिं कुप्यं गोऽजाविकं तथा॥
अश्वानायुश्च विधिवद्यः श्राद्धं संप्रयच्छति।
कृत्तिकादिभरण्यन्तं सकामानाप्नुयादिमान्॥
वस्वादयः प्रीणयन्त्येव नरं श्राद्धं कृतं द्विजाः।
आयुष्प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च॥
प्रयच्छति तथा राज्यं प्रीतो नित्यं पितामहः॥"
इति गारुडे ८८ अध्यायः॥*॥

अपि च।

"व्यासश्राद्धमहं वक्ष्ये भुक्तिमुक्तिप्रदं नृणाम्।
पूर्व्वं निमन्त्रयेद्विप्रान् निशि स्युर्ब्रह्मचारिणः॥
प्रदक्षिणोपवीतेन देवान् वामोपवीतिना।
पितॄन्निमन्त्रयेत् पादौ क्षालयेद्वाक्यमन्त्रतः॥
ॐ स्वागतं भवद्भिरिति प्रश्नः। ॐ सुस्वागतमिति
तैरुक्ते ॐ विश्वेभ्यो देवेभ्य एतत् पादोकमर्घ्यं
स्वाहा पितृभ्यः स्वधा इति देवब्राह्मणपादयो-
र्देवतीर्थेनाभुग्नकुशजलकुसुमदानम्। ततो
दक्षिणामुखस्य वामोपवीतिन अमुकगोत्रेभ्य
अस्मत्पितृपितामहप्रपितामहेभ्यो यथानाम-
शर्म्मभ्यः सपत्नीकेभ्य एतत् पादोदकमर्घ्यं स्वधा
इति पित्रादिब्राह्मणपादयोः पितृतीर्थेन भुग्न-
कुशतिलकुसुमजलदानम्। एवं मातामहा-
दिषु। एतद्व आचमनीयं स्वाहा स्वधेति
ब्राह्मणहस्ते। एष वो अर्घ्यः इति ब्राह्मणहस्ते-
ऽर्घ्यदानम्। एतद्वः पुष्पं इति ब्राह्मणहस्ते
पुष्पदानम्। ॐ सिद्धमिदमासनं इहास्य-
मित्यभिधाय ॐ भूः ॐ भुवः ॐ स्वः ॐ महः
ॐ जनः ॐ तपः ॐ सत्यं सप्तव्याहृतिभिः
पूर्व्वमुखदेवब्राह्मणोपवेशनम्। उत्तराभिमुखाः
पितरः ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य
एव च। नमः स्वधायै स्वाहायै नित्यमेव नमो
नमः इति त्रिर्जपेत्। ॐ अद्यास्मिन्देशे
अमुकमासे अमुकराशिगते सवितरि अमुकस्यां
तिथौ अमुकगोत्राणामस्मत्पितृपितामह-
प्रपितामहानां यथानामशर्म्मणां विश्वेदेवपूर्व्वकं
श्राद्धमहं करिष्ये ॐ विश्वेभ्यो देवेभ्य इदमासनं
स्वाहा। ॐ विश्वान् देवानावाहयिष्ये ॐ
आवाहय इत्युक्ते ॐ विश्वेदेवास आगत शृणु-
ताम इमं हवं एदं बर्हिर्निषीदत। ॐ विश्वे
देवाः शृणुतेमं हवं ये मे अन्तरीक्षे य उप-
द्यविष्ट येऽग्निजिह्वा उत वा यजत्रा आस-
द्यास्मिन् बर्हिषि मादयध्वम्। ॐ ओषधयः
समवदन्त सोमेन सह राज्ञा यस्मै कृणोति
ब्राह्मणस्तं राजन् पारयामसि।
ॐ आगच्छन्तु महाभागा विश्वेदेवा महाबलाः।
ये यत्र विहिताः श्राद्धे सावधाना भवन्तु ते॥
ॐ अपहतासुरा रक्षांसि वेदिषद इति
त्रिभिर्यवविकिरणम्। ॐ [illegible]
ॐ कुरुष्वेति तैनोक्ते [illegible]
प्रमार्ज्जं कृत्वा ॐ [illegible] अनेन
कुशान्तरेण द्विज [illegible]

इत्यर्घ्यार्थं कुशान्तरेण विहतं कृत्वा पात्रे पवित्रनिवेशनम्। शन्नो देवीरभीष्टये आपो भवन्तु पीतये शंयोरभिस्रवन्तु नः। इति पात्रे जलदानम्। ॐ यवोऽसि यवयास्मद्द्वेषो यवयारातीः इति यवदानम्।

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।
ईश्वरीं सर्वभूतानां त्वामिहोपह्वये श्रियम्॥
इति गन्धदानम्॥

ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यौ इति पुष्पदानम्। ॐ या दिव्या आपः पयसा सम्बभूवुर्या अन्तरीक्षा उत पार्थिवीर्याः हिरण्यवर्णा यज्ञियास्ता न आपः शिवाः संस्योनाः सुहवा भवन्तु ॐ धुरिलोचनसंज्ञकेभ्यो विश्वेभ्यो देवेभ्य एषोऽर्घ्यो नमः। इति हस्तेऽर्घ्यं दत्त्वा अनेनैव पात्रेण संस्रवपवित्रसहितं प्रथमपात्रेण संस्रवं पवित्रञ्च गृहीत्वा ब्राह्मणदक्षिणपार्श्वे कुशोपरि उर्द्ध्वमुखपात्रे स्थापनं तदुपरि कुशदानम्। ततः ॐ धुरिलोचनसंज्ञकेभ्यो विश्वेभ्यो देवेभ्य एतानि गन्धपुष्पधूपदीपवासोयुगलोत्तरीययज्ञोपवीतानि नमः। गन्धादिदानमच्छिद्रमस्तु संकल्पसिद्धिरस्तु। ब्राह्मणवाचनम्। ततः पितृपितामहप्रपितामहमातामहप्रमातामहवृद्धप्रमातामहानां सपत्नीकानां श्राद्धमहं करिष्ये। अनुज्ञापनम्। ॐ कुरुष्वेति ब्राह्मणेनोक्ते। ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च। इति त्रिर्जपेत्। तत ॐ अमुकसगोत्राणां अस्मत्पितृपितामहप्रपितामहानां यथानामशर्म्मणां सपत्नीकानां श्राद्धं युष्मास्वहं करिष्ये। ॐ कुरुष्व श्राद्धकरणानुज्ञानम्। ॐ अमुकसगोत्रेभ्यः अस्मत्पितृपितामहप्रपितामहेभ्यो यथानामशर्म्मभ्यः सपत्नीकेभ्य इदमासनं स्वधा। ब्राह्मणवामपार्श्वे आसनम्। ॐ पितॄनावाहयिष्ये ॐ आवाहयेत्युक्ते ॐ उशन्तस्त्वा निधीमह्युशन्तः समिधीमहि। उशन्नुशत आवह पितॄन् हविषे अत्तवे। ॐ आयान्तु नः पितरः सोम्यासो अग्निष्वात्ताः पथिभिर्देवयानैः। अस्मिन् यज्ञे स्वधया मदन्तोऽधिब्रुवन्तु तेऽवन्त्वस्मान्। इत्यावाहनम्। ॐ अपहता असुरा रक्षांसि वेदिषदः। तिलविकिरणम्। ॐ तिलोऽसि सोमदेवत्यो गोसवो देवनिर्म्मितः। प्रत्नमद्भिः पृक्तः स्वधया पितॄन् लोकान् प्रीणाहि नः स्वाहा। तिलदानम्। गन्धपुष्पं हस्ताभ्यां दत्त्वा पितृपात्रमुत्थाप्य या दिव्येति पठित्वा अमुकगोत्र अस्मत्पितः अमुकशर्म्मन् सपत्नीक एष ते अर्घ्यः स्वधा। एवं पितामहादौ। अर्घ्यशेषं पात्रं गृहीत्वा ब्राह्मणवामपार्श्वे दक्षिणाग्रकुशोपरि ॐ पितृभ्य स्थानमसीति न्युब्जपात्रस्थापनम्। ॐ अत्र पितरो मादयध्वं यथाभागमावृषायध्वम्। अधोमुखपात्रस्थापनम्। ततः अमुकसगोत्रेभ्यः अस्मत्पितृपितामहप्रपितामहेभ्यः सपत्नीकेभ्य एतानि [illegible]

स्वधा। पितृतीर्थेन गन्धादिदानम्। गन्धादिदानमच्छिद्रमस्तु सङ्कल्पसिद्धिरस्तु। ब्राह्मणवाचनम्। एवं मातामहादीनामनुज्ञापनादि कर्म्म। ॐ या दिव्येति भूमिसम्मार्ज्जनम्। ततो घृताक्तमन्नं गृहीत्वा दक्षिणोपवीती पितृब्राह्मणम्। ॐ अग्नौ करणमहं करिष्ये ॐ कुरुष्वेति तेनोक्ते ॐ अग्नये कव्यवाहनाय स्वाहा ॐ सोमाय पितृमते स्वाहा। आहुतिद्वयं देवब्राह्मणहस्ते दत्त्वा अवशिष्टान्नं पिण्डार्थं स्थापयित्वा अपरमन्नं पित्रादिपात्रे मातामहादिपात्रे च निःक्षिपेत्। पात्रे अन्नादि निधाय कुशं दत्त्वा अधोमुखाभ्यां पाणिभ्यां पात्रं गृहीत्वा। ॐ पृथिवी ते पात्रं द्यौः पिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा। पात्राभिमन्त्रणम्। इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पांशुले विष्णो हव्यं रक्षस्व। इत्यन्नोपर्य्यधोमुखद्विजाङ्गुष्ठनिवेशनम्। ॐ अपहतेति तिलयवविकिरणम्।

ॐ निहन्मि सर्वं यदमेध्यवद्भवेत्
हताश्च सर्वेऽसुरदानवा मया।
रक्षांसि यक्षाः सपिशाचसंघा
हता मया यातुधानाश्च सर्वे॥
इति सिद्धार्थविकिरणम्॥

ततः ॐ धुरिलोचनसंज्ञकेभ्यो विश्वेभ्यो देवेभ्य एतदन्नं सघृतं सपानीयं सव्यञ्जनं स्वाहा इति वारिकुशाद्यैरन्नसङ्कल्पनम्। ॐ श्राद्धमिदमच्छिद्रमस्तु सङ्कल्पसिद्धिरस्तु। ततो वामोपवीतेन सव्यञ्जनं सघृतमन्नं पित्रादिपात्रे निधाय तदुपरि भूमिसंलग्नकुशं दत्त्वा ॐ पृथिवी ते पात्रं अभिमन्त्रणम्। उत्तानाभ्यां पाणिभ्यां पात्रं गृहीत्वा ॐ इदं विष्णुरित्यन्नोपरि उत्तानाङ्गुष्ठं निवेशयेत् ॐ अपहता इति तिलविकिरणम्। भूमिपातितवामजानुः। [illegible] वेभ्यः अस्मत्पितृपितामहप्रपितामहेभ्यः॥ अमुकगोत्रेभ्यः अमुकशर्म्मभ्यः सपत्नीकेभ्य एतदन्नं सघृतं सपानीयं सव्यञ्जनं [illegible] एतदन्नं सघृतं अक्षय्यम्। ॐ ये चात्र [illegible] स्वधा। पयः कीलालं परिस्रुतम् [illegible] पितॄन्। दक्षिणोपवीती [illegible] श्राद्धमिदमच्छिद्रमस्तु [illegible] सङ्कल्पसिद्धिरस्तु। ततः [illegible] अन्नावृत्तिकया गायत्रीं [illegible] वाता ऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः। मधु नक्तमुतोषसो मधुमत् पार्थिवं रजः मधु द्यौरस्तु नः पिता। मधुमान्नो वनस्पतिर्मधुमानस्तु सूर्य्यो माध्वीर्गावो भवन्तु नः॥ मधु मधु मधु इति जपः। यथा सुखं वाग्यता जुषध्वमिति ब्रूयात्। भुञ्जत्सु सप्तव्याधादिकं पितृस्तोत्रं जपेत्।

ॐ सप्तव्याधा दशार्णेषु मृगाः कालञ्जरे गिरौ।
चक्रवाकाः सरद्वीपे हंसाः सरसि मानसे॥
तेऽपि जाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः।
प्रस्थिता दूरमध्वानं यूयं तेभ्योऽवसीदत॥

ततस्तृप्तेषु। दक्षिणामुखो [illegible]
उच्छिष्टाग्रतः।
ॐ अग्निदग्धाश्च ये जीवा ये [illegible]

भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु
इति भूमौ कुशोपरि [illegible]
रेत्। ततो [illegible]
पूर्ववत् पुनः [illegible]
त्यर्चं मधु मध्विति च जपः ॐ [illegible]
ह्रिरिति देवब्राह्मणप्रश्नः। [illegible]
तेनोक्ते ॐ शेषमन्नमस्तीति प्रश्न
भुङ्क्ष्वेति तेनोक्ते पित्रादिब्राह्मं
वीतेन ॐ तृप्ताः स्थ इति प्रश्नः। ॐ
इत्युक्ते शेषमन्नेन प्रश्नः। [illegible]
भुङ्क्ष्वेति तेनोक्ते मातामह[illegible]
प्रश्नः। तत [illegible]
यित्वे पातयेत्युक्ते। [illegible]
मण्डलञ्च चतुष्कोणं तिर्यग्विशिखं [illegible]
गोत्र अस्मत्पितः अमुकशर्म्मन् [illegible]
एतत्ते पिण्डासनं स्वधा इत्य[illegible]
महाय प्रपितामहाय च।
गायत्रीं मधुवातेति त्रिर्जपेत् [illegible]
कृत्वा कुशोपरि अमुकगोत्र
शर्म्मन् सपत्नीक एष ते पिण्डः [illegible]
यांश्च त्वमनु तस्मै ते स्वधा। एवं [illegible]

[illegible] इभ्यः। पिण्डशेषविकिरणं पिण्डादि
लेपभुजः प्रीयन्तां इति [illegible]
मार्ज्जनम्। प्रत्यग्विलेखनं [illegible]
गोत्र [illegible] अस्मत्पितः अमुकशर्म्मन्
[illegible] एतत्ते जलमवनेनिक्ष्व ॐ ये चात्र त्वा[illegible]
त्वमनु तस्मै ते स्वधेति [illegible]
पिण्डपात्रमधोमुखं कृत्वा [illegible]
पितरो मादयध्वं [illegible]
जपः। अथ [illegible]
प्राणांश्च संयम्य।
ॐ वसन्ताय नमस्तुभ्यं ग्रीष्माय च [illegible]
वर्षाभ्यश्च शरत्संज्ञ ऋतवे च नमः [illegible]
हेमन्ताय नमस्तुभ्यं नमस्ते [illegible]
माससंवत्सरेभ्यश्च दिवसेभ्यो नमो नमः [illegible]
ॐ षड्भ्य ऋतुभ्यो नमः पितृभ्यो नमः [illegible]
[illegible] वामेनैव परावृत्य [illegible]
[illegible] मदन्त पितरो यथाभागमावृषायिषत।
जपः। वासः शिथिलीकृत्याञ्जलिं कृ[illegible]
नमो वः पितरः पितरो नमो वः। [illegible]
गृहान्नः पितरो दत्त। इति गृहावेक्षणं [illegible]
ॐ सदो वः पितरो देष्म। [illegible]
णम्। ॐ एतद्वः पितरो वास [illegible]
अमुकगोत्र इत्यादिना एतत्ते वास
यांश्च त्वमनु यांश्च त्वमनु तस्मै ते [illegible]
दशाभवस्त्रदानम्। वामेन पाणिना [illegible]
पात्रं गृहीत्वा। ॐ ऊर्जं वहन्तीरमृतं [illegible]

जानं इत्यादिना पिण्डोपरि वारिधारा-
ग:। पूर्वस्थापितपात्रशेषोदकैः प्रत्येकं पिण्ड-
नम्। पिण्डपात्रेन गन्धादिदानम्। पिण्डो-
: कुशं हस्तञ्च दत्त्वा ॐ अत्रमो मदन्त
प्रिया अधूषत अस्तोषत स्वभानवो विप्रा न
ष्ठया मती योजान्विन्द्र ते हरी इति जपः।
मातामहादिब्राह्मणानामाचमनं सुप्रो-
तमस्त्विति भूम्यभ्युक्षणं कृत्वा।
ां मध्ये स्थिता देवाः सर्व्वमस्मिन् प्रतिष्ठितम्।
ह्मणस्य करे न्यस्ताः शिवा आपो भवन्तु
नः॥
ा आपः सन्त्विति हस्ते ब्राह्मणस्य जल-
नम्।
श्रीर्वसति पुष्पेषु लक्ष्मीर्वसति पुष्करे।
श्रीर्वसते सदा गोष्ठे सौमनस्यं सदास्तु मे॥
मनस्यमस्तु पुष्पदानम्।
अक्षतञ्चास्तु मे पुण्यं शान्तिः पुष्टिर्धृतिश्च
मे।
यत् श्रेयस्करं लोके तत्तदस्तु सदा मम॥
अक्षतञ्चारिष्टञ्चास्तु यवतण्डुलदानम्। अमुक-
गोत्राणामस्मत्-पितृ-पितामह-प्रपितामहानां
सपत्नीकानां दत्तमिदमन्नपानादिकमक्षय्यमस्तु
र पित्रादिब्राह्मणहस्ते सतिलजलदानम्।
मानस्य प्रश्ने अस्त्विति ब्राह्मणो वदेत्।
मातामहादीनामक्षय्यम्। आशिषः।
अघोराः पितरः सन्तु गोत्रं नो वर्द्धताम्।
तारो नोऽभिवर्द्धन्तां वेदाः सन्ततिरेव च।
द्धा च नो मा व्यगमद्बहु देयञ्च नोऽस्त्विति॥
अन्नञ्च नो बहु भवेदतिथींश्च लभेमहि।
चितारश्च नः सन्तु मा च याचिष्म कञ्चन॥
ता एवाशिषः सन्तु सौमनस्यमस्तु सुमुखं
स्तु इत्युक्ते पिण्डपात्रे अर्घ्यसम्बन्धान् कुशान्
पित्राणि चास्तीर्य पित्रादिब्राह्मणं स्पृष्ट्वा
धां वाचयिष्ये ॐ वाच्यतां ॐ पितृपितामह-
पितामह-मातामह-प्रमातामह-वृद्धप्रमाता-
ादिभ्यो यथानामशर्म्मभ्यः सपत्नीकेभ्यः स्वधो-
च्यतां अस्तु स्वधा इत्युक्ते ऊर्ज्जं वहन्तीरमृतं
तं इति पिण्डानामुपरि वारिधारां दद्यात्।
त ॐ विश्वेदेवा अस्मिन् यज्ञे प्रीयन्तां देव-
ब्राह्मणहस्ते यवोदकदानं ॐ प्रीयन्तामिति
तेनोक्ते ॐ देवताभ्य इति त्रिर्जपेत्। अधो-
मुखपिण्डपात्राणि चालयित्वा आचम्य दक्षिणो
पवीती पूर्व्वाभिमुखः ॐ अमुकसगोत्राय
अमुकशर्म्मणे ब्राह्मणाय सपत्नीकाय श्राद्ध-
प्रतिष्ठार्थं दक्षिणामिदं रजतं तुभ्यमहं ददे
इति दक्षिणां दद्यात् एवं मातामहादौ ततो
देवब्राह्मणाय दक्षिणादानम्। ततः पितृ-
ब्राह्मणे। पिण्डपात्रमुत्तानं कृत्वा ॐ पिण्डाः
सम्पन्नाः ॐ सुसम्पन्ना इति पिण्डे क्षीरधारां
दत्त्वा पिण्डचालनम्।

ॐ वाजे वाजे वतवाजिनो नो
धनेषु विप्रा अमृता ऋतज्ञाः।
अस्य मध्वः पिबत मादयध्वं
तृप्ता यात पथिभिर्देवयानैः॥

इति पित्रादिविसर्ज्जनम्॥

ॐ आ मा वाजस्य प्रसवो जगम्या-
देमे द्यावापृथिवी विश्वरूपे।
आ मा गन्तां पितरा मातरा युव-
मा मा सोमोऽमृतत्वाय गम्यात्॥

इति देवविसर्ज्जनम्॥

ॐ अभिरम्यतामित्युक्ते अभिरताः स्म इति ब्राह्मणैरनुज्ञातस्य निवर्त्तनम्। गवादिषु पिण्डप्रतिपादनमिति।

एष श्राद्धविधिः प्रोक्तः पठतां पापनाशनः।
अनेन विधिना श्राद्धं कृतं वै यत्र कुत्रचित्॥
अक्षयं स्यात् पितॄणाञ्च स्वर्गप्राप्तिर्ध्रुवा तथा।
इत्युक्तं पार्व्वणश्राद्धं पितॄणां ब्रह्मलोकदम्॥"

इत्याद्ये गारुडे पार्व्वणश्राद्धम् २२२ अध्यायः॥

ब्रह्मोवाच।

"नित्यश्राद्धं प्रवक्ष्यामि पूर्व्ववत्तद्विशेषयेत्॥
ॐ अमुकसगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकशर्म्मणां सपत्नीकानां श्राद्धं सिद्धान्नेन युष्मभ्यमहं करिष्ये।
आसनादिकमत्र स्याद्विश्वेदेवविवर्ज्जितम्।
वृद्धिश्राद्धं प्रवक्ष्यामि पूर्व्ववत्तद्विशेषकम्॥

जातपुत्त्रमुखदर्शनादौ वृद्धिश्राद्धं पूर्व्वाभिमुखेषु दक्षिणापवीतिषु मधुयवबदरमिश्राः पिण्डा दैव तीर्थेन नमस्कारान्तेन दक्षिणोपचारेणकर्त्तव्यम् दक्षिणजानु स्पृष्ट्वा ॐ अद्यास्मदीयामुकवृद्धौ अमुक-गोत्राणामस्मत्पितृ-पितामह-प्रपितामह-मातामह-प्रमातामह-वृद्धप्रमातामहानां अमुकशर्म्मणां सपत्नीकानां नान्दीमुखानां श्राद्धकर्त्तव्ये वसुसत्यसंज्ञकानां विश्वेषां देवानां श्राद्धं सिद्धान्नेन युष्मासु मया कर्त्तव्यम्। इति देवब्राह्मणामन्त्रण ॐ करिष्यसीति तेनोक्ते इत्थमेव मातृपितामहीप्रपितामहीनां देवब्राह्मणामन्त्रणम्। तत ॐ अमुकगोत्राया मत्प्रपितामह्या अमुका देव्या नान्दीमुख्याः श्राद्धं सिद्धान्नेन युष्मासु मया कर्त्तव्यमिति प्रपितामहीब्राह्मणामन्त्रणम्। करिष्यसीति तेनोक्ते इत्थमेव पितामहीब्राह्मणामन्त्रण मातृब्राह्मणामन्त्रणञ्च। तत ॐ अद्यामुकवृद्धौ अमुकगोत्राणामस्मत्-प्रपितामह-पितामह-पितॄणां नान्दीमुखानां श्राद्धं सिद्धान्नेन युष्मासु मया कर्त्तव्यमिति ब्राह्मणामन्त्रणं ॐ करिष्यसीति तेनोक्ते इत्थमेव वृद्धप्रमातामहादिब्राह्मणामन्त्रणम्। देवपितृसर्व्वदेवब्राह्मणश्राद्धकरणानुज्ञापनम्। आसने ॐ विश्वे देवास आगत शृणुता म इमं हवं एदं बर्हिर्निषीदत ॐ विश्वेदेवाः शृणुतेमं हवं ये अन्तरिक्षे य उपद्यविष्ट ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन् बर्हिषि मादयध्वम्। ॐ आगच्छन्तु महाभागा विश्वेदेवा इति विश्वेदेवावाहनम्। गन्धादिदानञ्च। अच्छिद्रावधारणवाचनम्। ततः प्रपितामहीप्रभृतीनामनुज्ञापनं आसनं गन्धादिदानं अच्छिद्रावधारणम्। इत्थं प्रपितामहादीनां अनुज्ञापनम्। आसनं आवाहनं गन्धादिदानम्। एवं वृद्धप्रमातामहादीनां अनुज्ञापनादिकरणम्। ॐ वसुसत्यसंज्ञकेभ्यो विश्वेभ्यो देवेभ्य एतदन्नं सघृतं सपानीयं सव्यञ्जनं सबदरं सदधि प्रतिपितृवर्ज्जितं नमः। इति अन्नसङ्कल्पनम्। ॐ अमुकगोत्रे मत्प्रपितामहि अमुकीदेवि नान्दिमुखि एतदन्नं सबदरं सदधि नमः। इत्थं पितामहीमातृब्राह्मणे। ततः प्रपितामहादिब्राह्मणपात्रे ॐ अमुकगोत्रेभ्यो मत्प्रपितामहपितामहपितृभ्य एतदन्नं सबदरं सदधि सव्यञ्जनं सपानीयं नमः। एवं वृद्धप्रमातामहादिभ्यः॥*॥

एकोद्दिष्टं पुरावक्ष्यं तद्विशेषं वदे शृणु॥

प्रथमं निमन्त्रणं पादप्रक्षालनं आसनम्। अद्य अमुकगोत्रस्य मत्पितुरमुकदेवशर्म्मणः प्रतिसांवत्सरिकमेकोद्दिष्टं श्राद्धं सिद्धान्नेन युष्मासु अहं करिष्ये। श्राद्धकरणानुज्ञापनम्। आसनं अर्घ्यः। गन्धादिदानं पितृस्थापनम्। अन्नसङ्कल्पनं जप्यं निवीती उत्तराभिमुखीभूयातिथिश्राद्धं कुर्य्यात्। ततस्तृप्तिं ज्ञात्वा दक्षिणाभिमुखो वामोपवीती उच्छिष्टसमीपे ये अग्निदग्धा इति अन्नविकिरणम्। ॐ अमुकगोत्र पितुरमुकदेवशर्म्मन् एतत्ते जलमवनेनिक्ष्व ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा इति रेखोपरि दक्षिणामुखवारिधारादानम्।" इति गारुडे २२३ अध्यायः॥*॥

ब्रह्मोवाच।

"सपिण्डीकरणं वक्ष्ये पूर्णेऽब्दे तत्क्षयाहनि।
कृत्वा कुतपकाले तु प्रेतादेः पितृलोकदम्।
सपिण्डीकरणं कुर्य्यात् अपराह्णे तु पूर्व्ववत्॥

पितामहादिब्राह्मणनिमन्त्रणम्। ॐ पुरोरवोमाद्रवःसंज्ञकेभ्यो देवेभ्य एतदासनं नमः। वामपार्श्वे चासनदानम्। ततः पितामहप्रपितामहवृद्धप्रपितामहानां सपत्नीकानां श्राद्धमहं करिष्ये। इत्यनुज्ञाग्रहणम्। पात्रचयकरणं पात्रोपरि कुशं दत्त्वा पात्रान्तरेण पिधाय अच्छिद्रावधारणान्तं परिसमाप्य तद्वत् पितुरपि सपत्नीकस्य प्रेतान्तनाम्ना श्राद्धकरणानुज्ञापनम्। देयपात्राच्छिद्रावधारणम्। तं परिसमाप्य पितामहप्रपितामहवृद्धप्रपितामहपितृक्रमेण पात्राणां मनाक् चालनं उद्घाटनं कृत्वा ये समानाः संमनसः पितरो यमराज्ये।
तेषां लोकः स्वधा नमो यज्ञो देवेषु कल्पताम्॥
ये समानाः समनसो जीवा जीवेषु मामकाः।
तेषां श्रीर्मयि कल्पतां अस्मिन् लोके शतं
समाः॥

एतन्मन्त्रद्वयेन पितृपात्रोदकं पितामहप्रपितामहवृद्धप्रपितामहपात्रे दत्त्वा वृद्धप्रपितामहपात्रं परित्यज्य पितामहप्रपितामहयोरुदकं पवित्रञ्च पितृपात्रे निक्षिपेत्। ततः पितृ-

ब्राह्मणहस्ते पवित्रदानम् । पात्रपुष्पेण शिरःकरपादार्चनं हस्तेऽन्यजलदानं हस्ताभ्यां पात्रमुत्थाप्य ॐ या दिव्येति च पठित्वा अमुकगोत्र मत्पितरमुक प्रेत एष ते अर्घ्यो ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा इति पितृब्राह्मणहस्ते स्तोकमर्घ्योदकं पितृतीर्थेन दत्त्वा पितामहब्राह्मणहस्ते पवित्रदानं पात्रपुष्पेण शिरःकरपादार्चनं हस्तेऽन्यजलदानम् । हस्ताभ्यां पात्रमुत्थाप्य या दिव्येति पठित्वा अमुकगोत्र मत्पितामह अमुकदेवशर्म्मन् सपत्नीक एष तेऽर्घ्यः स्वधा । पितृपात्रेणैव पितामहब्राह्मणहस्ते स्तोकमर्घ्योदकं दत्त्वा-शेषमुदकं पिण्डसेचनार्थं पात्रान्तरे निधाय तेनैव पात्रेण पितामहब्राह्मणानां हस्तस्थं उदकं पवित्रञ्च गृहीत्वा पितृब्राह्मणवामपार्श्वे-दक्षिणाग्रकुशोपरि पितृभ्यः स्थानमसीति अधोमुखपात्रस्थापनम् । पितामहानां गन्धादिदानं अग्नौकरणम् । देवानां अर्थशिष्टान्नं पितामहादिपात्रे क्षिपेत् । पितामहादिपात्राभिमन्त्रणादिवाचनपर्य्यन्तं क्रमेण समाप्य पितृब्राह्मणपात्राभिमन्त्रणं अङ्गुष्ठनिवेशनं तिलविकिरणम् । सिद्धान्नविकिरणं कृत्वा अमुकगोत्र मत्पितरमुक प्रेत एतत्ते अन्नं उष्टृतं अपानीय मध्वन्नं प्रतिविष्टवर्जितं ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा । ततो देवप्रभृति आपोशानं दद्यात् । अतिथौ पात्रे अतिथिश्राद्धं कुर्य्यात् अस्मिन्नवसरे । ततो विकिरणम् । पितामहादौ प्रश्नं कृत्वा पितृब्राह्मणे ॐ स्वदितं भवद्भिरिति प्रश्नः अमुकगोत्र मत्पितामह अमुकशर्म्मन् सपत्नीक एष ते पिण्डो ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा । एवमन्ययोः । पिण्डदानमच्छिद्रमस्तु । अक्षय्यमिदमस्तु इति वाचनं कृत्वा ततः पितृप्रेतपिण्डपात्रं ॐ संकल्पसिद्धिरस्त्विति वाचनम् । तं समाप्य पिण्डं त्रिधा कृत्वा ये समानाः समनसः इति मन्त्रद्वयं पठित्वा पितामहप्रपितामहवृद्धप्रपितामहपिण्डेषु निवेशयेत् । पिण्डेषु गन्धादिकं पिण्डचालनम् । अतिथिब्राह्मणे स्वदितमित्यादि प्रश्नः । ब्राह्मणानामाचमनं भुक्तशेष ताम्बूलदानं शुश्रूषोऽभिरतमस्तु शिवा आपः सन्तु इष्टप्रपितामहादिक्रमेण ब्राह्मणानां हस्ते जलदानम् । स्वस्त्यस्तु पितृब्राह्मणहस्ते ॐ उपस्पृशन्तामिति मन्त्रजलदानं नामगोत्रेण उपस्पृशन्तामिति मन्त्रोऽयं अघोराः पितरः सन्तु गोत्रं नो वर्द्धतां स्वधा वाचयिष्ये इति पितामहादिब्राह्मणानुज्ञादानम् ॐ वाच्यतामित्युक्ते पितामहादिभ्यः स्वधोच्यताम् अस्तु स्वधा इत्युक्ते पितृब्राह्मणे पितृभ्यः स्वधोच्यता इति अस्तु स्वधा इत्युक्ते ॐ ऊर्जं वहन्तीरमृतं इति दर्भ-त्रिकुशधारासेचनम् । ॐ विश्वे देवाः प्रीयन्तामिति देवब्राह्मणहस्ते

यथोदकदानम् । ॐ देवताभ्य इति त्रिर्जपः ।
पिण्डान् पात्रे तोलयित्वा आचम्य पितामहादिभ्यो दक्षिणां दत्त्वा ततः पितृब्राह्मणाय ततो अतिथिब्राह्मणाय च । आशिषो मे दीयन्तामित्याशीःप्रार्थनं आशिषः प्रतिगृह्यन्तां इत्युक्ते दातारो नोऽभिवर्द्धन्तामिति पात्रमुत्तानं कृत्वा वाजे वाजे इति विसर्जनम् । अभिरम्यतामिति पितृब्राह्मणविसर्जनम् ।
सपिण्डीकरणश्राद्धं व्यासप्रोक्तं मया तव ।
श्राद्धं विष्णुः श्राद्धकर्त्ता फलं श्राद्धादिकं हरिः ॥”
इति गारुडे २२४ अध्यायः ॥ *॥
तिथ्यादिविशेषे श्राद्धकरणफलं यथा,—
व्यास उवाच ।
“अथ श्राद्धममावास्यां प्राप्य कार्य्यं द्विजोत्तमैः ।
पिण्डान्वाहार्य्यकं भक्तभुक्तिमुक्तिफलप्रदम् ॥
पिण्डान्वाहार्य्यकं श्राद्धं क्षीणे राजनि शस्यते ।
अपराह्णे द्विजातीनां प्रशस्तेनामिषेण तु ॥
प्रतिपत्प्रभृति ह्येतास्तिथयः कृष्णपक्षके ।
चतुर्द्दशीं वर्ज्जयित्वा प्रशस्ता ह्युत्तरोत्तराः ॥
अमावास्याष्टकास्तिस्रः पौषमाघादिषु त्रिषु ।
तिस्रश्चान्वष्टकाः पुण्या माघस्य दशमी तथा ॥
त्रयोदशी मघायुक्ता वर्षासु तु विशेषतः ।
शस्यपाकश्राद्धकाला नित्यं प्रोक्ता दिने दिने ॥
नैमित्तिकं हि कर्त्तव्यं ग्रहणे चन्द्रसूर्य्ययोः ।
बान्धवानाञ्च मरणे नारकी स्यादथान्यथा ॥
काम्यानि चैव श्राद्धानि शस्यन्ते ग्रहणादिषु ।
अयने विषुवे चैव व्यतीपातेऽप्यनन्तकम् ॥
संक्रान्त्यामक्षयं श्राद्धं तथा जन्मदिनेष्वपि ।
नक्षत्रेषु च सर्व्वेषु तथा कार्य्यं विशेषतः ॥
स्वर्गन्तु लभते कृत्वा कृत्तिकासु द्विजोत्तमः ।
अपत्यमथ रोहिण्यां सौम्ये तु ब्रह्मवर्च्चसम् ॥
रौद्राणां कर्म्मणां सिद्धिमार्द्रायां शौर्य्यमेव च ।
पुनर्व्वसौ तथा भूमिं श्रियं पुष्ये तथैव च ॥
सर्व्वान् कामान् तथा सार्पे पैत्रे सौभाग्यमेव च ।
अर्य्यम्णे तु धनं विन्द्यात् फाल्गुन्यां पाप-
नाशनम् ॥
ज्ञातिश्रैष्ठं तथा हस्ते चित्रायां सुबहून् सुतान् ।
वाणिज्यसिद्धिं स्वातौ च विशाखायां सुवर्णकाम् ।
मैत्रे बहूनि मित्राणि राज्यं शाक्रे तथैव च ।
मूले कृषिं लभेद्यानं सिद्धिमाप्ये तथैव च ॥
सर्व्वान् कामान् वैश्वदेवे श्रैष्ठ्यन्तु श्रवणे पुनः ।
श्रविष्ठायां तथा कामान् वारुणे च परं बलम् ।
अजैकपादके कुर्य्याद्विन्द्यात् गृहं शुभम् ।
रेवत्यां बहवो गावो ह्यश्विन्यां तुरगास्तथा ॥
याम्ये चाजीवनं तस्मात् यदि श्राद्धं प्रयच्छति ।
आदित्यवारे चारोग्यं चान्द्रे सौभाग्यमेव च ॥
कौजे सर्व्वत्र विजयं सर्व्वान् कामान् बुधस्य च ।
विद्यामभीष्टां जीवे तु धनं वै भार्गवे पुनः ।
शनैश्चरे लभेदायुः प्रतिपत्सु शुभान् सुतान् ।
कन्यका वै द्वितीयायां तृतीयायां तु वन्दिनः ॥
पशून् क्षुद्रांश्चतुर्थ्यान्तु पञ्चम्यां शोभनान्
सुतान् ।

षष्ठ्यां द्युतिं कृषिञ्चापि
सप्तम्यामपि वाणिज्यं लभते श्राद्ध
अष्टम्यां नवम्यामेकशफं दशम्यां
एकादश्यान्तथा रूप्यं ब्रह्मवर्च्चस्विनः
द्वादश्यां जातरूपन्तु रजतं रौप्यमेव ॥
ज्ञातिश्रैष्ठं त्रयोदश्यां
पञ्चदश्यां सर्व्वकाममाप्नोति श्राद्ध
तस्माच्छ्राद्धं न
शस्त्रेण तु हतानां वै तत्र श्राद्धं
द्रव्यब्राह्मणसम्पत्तौ
तस्माद्भोगापवर्गार्थं श्राद्धं
कर्म्मारम्भेषु सर्व्वेषु कुर्य्यादाभ्युदयं पु
पुत्रजन्मादिषु श्राद्धं पार्व्वणं
अहन्यहनि नित्यं स्यात्
एकोद्दिष्टन्तु विप्रेयं
एतत् पञ्चविधं श्राद्धं मनुना
यात्रायां षष्ठमाख्यातं तत्
शुद्धये सप्तमं श्राद्धं ब्रह्मणा
दैविकं चाष्टमं श्राद्धं यत्
सन्ध्यारात्र्योर्न
देशानाञ्च विशेषेण भवेत्
गयायामक्षयं श्राद्धं प्रयागेऽमरकण्टके
गायन्ति पितरो गाथां
एष्टव्या बहवः पुत्रा
यजेत् वाश्वमेधेन नीलं वा वृषमुत्सृजेत्
एष्टव्या बहवः पुत्राः शीलवन्तो
तेषान्तु समवेतानां यद्येकोऽपि गयां
गयां प्राप्यानुषङ्गेण यः श्राद्धं
तारिताः पितरस्तेन स याति
वराहपर्व्वते चैव गङ्गायाञ्च विशेषतः ।
वाराणस्यां विशेषेण यत्र देवः स्वयं
गङ्गाद्वारे प्रभासे च विल्वके नीलपर्व्वते ।
कुरुक्षेत्रे च कुब्जाम्रे भृगुतुङ्गे महालये ।
केदारे फल्गुतीर्थे च
सरस्वत्यां विशेषेण पुष्करे च विशेषतः ।
नर्म्मदायां कुशावर्त्ते श्रीशैले भद्रकर्णे ।
वेत्रवत्यां विपाशायां गोदावर्य्यां विशेष
एवमादिष्वथान्येषु तीर्थेषु पुलिनेषु च ।
नदीनाञ्चैव तीरेषु तुष्यन्ति पितरः स
व्रीहिभिश्च यवैर्म्माषैरद्भिर्म्मूलफलेन च ।
श्यामकैश्च तथा शाकैर्नीवारैश्च प्रिय
गोधूमैश्च तिलैर्म्मुद्गैर्म्मासं प्रीणयते पितॄन्
आम्रानाम्रातकानिक्षून् मृद्वी

विदारीश्च भरुण्डांश्च श्राद्धकाले प्रदापयेत्
लाजान् मधुयुतान् दद्यात् सक्तून् शर्कर
दद्याच्छ्राद्धे प्रयत्नेन शृङ्गाटककशेरुकान्
द्वौ मासौ मत्स्यमांसेन त्रीन्मासान् हारिणे
औरभ्रेणाथ चतुरः शाकुनेन तु पञ्च वै
षण्मासान् छागमांसेन पार्षतेनाथ सप्त
अष्टावेणस्य मांसेन रौरवेण नवैव तु ।
दशमासांस्तु तृप्यन्ति वराहमहिषामिषैः ।

क्रूर्मयोस्तु मांसेन मासानेकादशैव तु ॥
त्सरन्तु गव्येन पयसा पायसेन वा ।
र्ध्रीणसस्य मांसेन तृप्तिर्द्वादशवार्षिकी ॥
लशाकं महाशल्कं खड्गिनोऽप्यामिषं मधु ।
नन्त्यायैव कल्पान्ते मुन्यन्नानि च सर्व्वशः ॥
त्वा लब्ध्वा स्वयं वाथ मृतानाहृत्य वै द्विजः ।
शात् श्राद्धे प्रयत्नेन यदस्याक्षयमुच्यते ॥७॥
पलिं शिग्रुकञ्चैव तथा चैव मसूरकम् ॥
पाण्डानालिकावार्त्ताकान् भूस्तृणं सुरसं तथा ।
भं पिण्डमूलं वै तण्डुलीयकमेव च ॥
मापांस्तथा क्षीरं माहिषञ्च विवर्जयेत् ।
ष्माण्डान् कोविदारांश्च पालक्यं मरिचं तथा ।
र्जयेत् सर्व्वयत्नेन श्राद्धस्थाने द्विजोत्तमः ॥"
इति कौर्म्मे उपविभागे १८ अध्यायः ॥
व्यास उवाच ।
त्वा यथोक्तं संतर्प्य पितॄन् चन्द्रक्षये द्विजः
ण्डान्वाहार्य्यकं श्राद्धं कुर्य्यात् सौम्यमनाः शुचिः ॥
मेव परीक्षेत ब्राह्मणं वेदपारगम् ।
र्थं तद्धव्यकव्यानां प्रदाने चातिथिः स्मृतः ॥
सोमपा विरजसो धर्म्मज्ञाः शान्तचेतसः ।
त्निनो नियमस्थाश्च ऋतुकालाभिगामिनः ॥
ञ्चाग्निरप्यधीयानो यजुर्व्वेदविदेव च ।
बहृक् च त्रिसुपर्णस्त्रिमधुर्व्वाथ यो भवेत् ॥
त्रिणाचिकेतश्छन्दोगो ज्येष्ठसामग एव च ।
अथर्व्वशिरसोऽध्येता रुद्राध्यायी विशेषतः ॥
अग्निहोत्रपरो विद्वान् न्यायविच्च षडङ्गवित् ।
मन्त्रब्राह्मणविच्चैव यश्च स्याद्धर्म्मपाठकः ।
ऋषिव्रती ऋषिकश्च तथा द्वादशवार्षिकः ॥
ब्रह्मदेयार्थसन्तानो गर्भशुद्धः सहस्रदः ।
चान्द्रायणव्रतचरः सत्यवादी पुराणवित् ।
गुरुदेवाग्निपूजासु प्रसक्तो ज्ञानतत्परः ॥
विमुक्तः सर्व्वतो धीरो ब्रह्मभूतो द्विजोत्तमः ।
महादेवार्च्चनरतो वैष्णवः पंक्तिपावनः ॥
अहिंसानिरतो नित्यमप्रतिग्राहकस्तथा ।
सत्रिणो दाननिरता विज्ञेयाः पंक्तिपावनाः ॥
मातापित्रोर्हिते युक्तः प्रातःस्नायी च वा द्विजः
अध्यात्मविन्मुनिर्द्दान्तो विज्ञेयः पंक्तिपावनः ॥
ज्ञाननिष्ठो महायोगी वेदान्तार्थविचिन्तकः ।
श्रद्धालुः श्राद्धनिरतो ब्राह्मणः पंक्तिपावनः ॥
वेदविद्याव्रतस्नातो ब्रह्मचर्य्यापरः सदा ।
अथर्व्वणो मुमुक्षुश्च ब्राह्मणः पंक्तिपावनः ॥
असमानप्रवरको ह्यसगोत्रस्तथैव च ।
असम्बन्धी च विज्ञेयाः ब्राह्मणाः पंक्तिपावनाः ॥
भोजयेद्योगिनं पूर्व्वं तत्त्वज्ञानरतिं यतिम् ।
अलाभे नैष्ठिकं दान्तमुपकुर्व्वाणकं तथा ॥
तदलाभे गृहस्थं वा मुमुक्षुं सङ्गवर्जितम् ।
सर्व्वालाभे साधकं वा गृहस्थमपि भोजयेत् ॥
प्रकृतेर्गुणतत्त्वज्ञो यस्याश्नाति यतिर्हविः ।
फलं वेदविदां तस्य सहस्रादतिरिच्यते ॥
तस्मात् यत्नेन योगीन्द्रमीश्वरज्ञानतत्परम् ।
भोजयेद्धव्यकव्येषु त्वलाभे त्वितरान् द्विजान् ॥

एष वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः ।
अनुकल्पस्त्वयं ज्ञेयः सदा सद्भिरनुष्ठितः ॥७॥
मातामहं मातुलञ्च स्वस्रीयं श्वशुरं गुरुम ।
दौहित्रं विट्पतिं बन्धुमृत्विग्याज्यौ च भोजयेत् ॥ ० ॥
न श्राद्धे भोजयेन्मित्रं धनैः कार्य्योऽस्य संग्रहः ।
पैशाची दक्षिणा सा हि नैवामुत्र फलप्रदा ॥
कामं श्राद्धेऽर्च्चयेन्मित्रं नाभिरूपमपि त्वरिम् ।
द्विषता हि हविर्भुक्तं भवति प्रेत्य निष्फलम् ॥
ब्राह्मणस्त्वनधीयानस्तृणाग्निरिव शाम्यति ।
तस्मै हव्यं न दातव्यं न च भस्मनि हूयते ॥
यथोषरे बीजमुप्त्वा न वप्ता लभते फलम् ।
तथानृचे हविर्द्दत्त्वा न दाता लभते फलम् ॥
यावतो ग्रसते पिण्डान् हव्यकव्येष्वमन्त्रवित् ।
तावतो ग्रसते प्रेत्य दीप्तान् शूलर्ष्ट्ययोगुडान् ॥
अपि विद्याकुलैर्युक्ता हीनवृत्ता नराधमाः ।
यत्रैते भुञ्जते हव्यं तद्भवेदासुरं द्विजाः ॥
यस्य वेदश्च वेदी च विच्छिद्येते त्रिपूरुषम् ।
स वै दुर्ब्राह्मणो नार्हः श्राद्धादिषु कदाचन ॥
शूद्रप्रेष्यो भृतो राज्ञा वृषलग्रामयाजकः ।
वधबन्धोपजीवी च षड़ेते ब्रह्मबन्धवः ॥
दत्तानुयोगो वृत्त्यर्थं पतितान्मनुरब्रवीत् ।
वेदविक्रयिणो ह्येते श्राद्धादिषु विगर्हिताः ॥
श्रुतिविक्रयिणो ये तु परपूर्व्वासमुद्भवाः ।
असमान् ये याजयन्ति पतितास्ते प्रकीर्त्तिताः ॥
असंस्कृताध्यापका ये भृत्यर्थेऽध्यापयन्ति ये ।
अधीयते तथा वेदान् पतितास्ते प्रकीर्त्तिताः ॥
वृद्धश्रावकनिर्ग्रन्थाः पञ्चरात्रविदो जनाः ।
कापालिकाः पाशुपताः पाषण्डा ये च तद्विधाः ॥
यस्याश्नन्ति हवींष्येते दुरात्मानस्तु तामसाः ।
न तस्य तद्भवेच्छ्राद्धं प्रेत्य चेह फलप्रदम् ॥
अनाश्रमी यो द्विजः स्यादाश्रमी वा निरर्थकः ।
मिथ्याश्रमी च ये विप्रा विज्ञेयाः पंक्तिदूषकाः ॥
दुश्चर्म्मा कुनखी कुष्ठी श्वित्री च श्यावदन्तकः ।
विद्धप्रजननश्चैव स्तेनः क्लीवोऽथ नास्तिकः ॥
मद्यपो वृषलीसक्तो वीरहा दिधिषूपतिः ।
अगारदाही कुण्डाशी सोमविक्रयिणो द्विजाः ॥
परिवेत्ता तथा हिंस्रः परिवित्तिर्निराकृतिः ।
पौनर्भवः कुसीदी च तथा नक्षत्रदर्शकः ॥
गीतवादित्रनिरतो व्याधितः काण एव च ।
हीनाङ्गश्चातिरिक्ताङ्गो ह्यवकीर्णी तथैव च ॥
कन्यादूषी कुण्डगोलौ ह्यभिशस्तोऽथ देवलः ।
मित्रध्रुक् पिशुनश्चैव नित्यं भार्य्यानुवर्त्तकः ॥
मातापित्रोर्गुरोस्त्यागी दारत्यागी तथैव च ।
गोत्रभिद्भ्रष्टशौचश्च काण्डपृष्ठस्तथैव च ॥
अनपत्यः कूटसाक्षी याचको रङ्गजीवनः ।
समुद्रयायी कृतहा तथा समयभेदकः ॥
वेदनिन्दापरश्चैव परदाररतास्तथा ।
द्विजनिन्दारताश्चैव वर्ज्याः श्राद्धादिकर्म्मसु ॥
कृतघ्नः पिशुनः क्रूरो नास्तिको वेदनिन्दकः ।
मित्रध्रुक् कुहकश्चैव विशेषात् पंक्तिदूषकाः ॥
सर्वे पुनरभोज्यान्नास्तदानार्हा हि कर्म्मसु ।

ब्रह्मभावान्निरस्ताश्च वर्ज्जनीयाः प्रयत्नतः ॥
शूद्रान्नरसपुष्टाङ्गः सन्ध्योपासनवर्ज्जितः ।
महायज्ञविहीनश्च ब्राह्मणः पंक्तिदूषकः ॥
अधीतनाशनश्चैव स्नानहोमविवर्ज्जितः ।
तामसो राजसश्चैव ब्राह्मणः पंक्तिदूषकः ॥
बहुनात्र किमुक्तेन विहितान् ये न कुर्वते ।
निन्दितानाचरन्त्येव वर्ज्जनीयाः प्रयत्नतः ॥"
इति कौर्म्मे उपविभागे २० अध्यायः ॥ ० ॥
"गोमयेनोदकैर्भूमिं शोधयित्वा समाहितः ।
सन्निपात्य द्विजान् सर्व्वान् साधुभिः सन्निमन्त्रयेत् ॥
श्वो भविष्यति मे श्राद्धं पूर्व्वेद्युरभिपूज्य च ।
असम्भवे परेद्युर्व्वा यथोक्तैर्लक्षणैर्युतान् ॥
तस्य ते पितरः श्रुत्वा श्राद्धकालमुपस्थितम् ।
अन्योन्यमनसा ध्यात्वा सम्पतन्ति मनोजवाः ॥
ब्राह्मणैस्ते सहाश्नन्ति पितरो ह्यन्तरीक्षगाः ।
वायुभूताश्च तिष्ठन्ति भुक्त्वा यान्ति परां गतिम् ॥
आमन्त्रिताश्च ते विप्राः श्राद्धकाल उपस्थिते ।
वसेयुर्नियताः सर्वे ब्रह्मचर्य्यपरायणाः ॥
अक्रोधनोऽत्वरोऽमत्तः सत्यवादी समाहितः ।
भारं मैथुनमध्वानं श्राद्धकृद्वर्जयेज्जपम् ॥
आमन्त्रितो ब्राह्मणो यः अन्यं वै कुरुते क्षणम्
स याति रौरवं घोरं शूकरत्वं प्रयाति च ॥
आमन्त्रयित्वा यो मोहादपरं मन्त्रयेत् द्विजम् ।
स तस्मादधिकः पापी विष्ठाकीटोऽभिजायते ॥
श्राद्धे निमन्त्रितो विप्रो मैथुनं योऽधिगच्छति
ब्रह्महत्यामवाप्नोति तिर्य्यग्योनौ स गच्छति ॥
श्राद्धं कृत्वा तु भुक्त्वा च योऽध्वानं प्रतिपद्यते ।
भवन्ति पितरस्तस्य तन्मासं पांशुभोजनाः ॥
निमन्त्रितस्तु यः श्राद्धे प्रकुर्य्यात् कलहं द्विजः
भवन्ति तस्य तन्मासं पितरो मलभोजनाः ॥
तस्मान्निमन्त्रितः श्राद्धे नियतात्मा भवेत् द्विजः
अक्रोधनः शौचपरः कर्त्ता चैव जितेन्द्रियः ॥
श्वोभूते दक्षिणां गत्वा दिशं दर्भान् समाहितः
समूलानाहरेद्वापि दक्षिणाग्रान् सुनिर्म्मलान् ॥
दक्षिणाप्रवणं स्निग्धं विविक्तं शुभलक्षणम् ।
शुचिं देशं विविक्तञ्च गोमयेनोपलेपयेत् ॥
नदीतीरेषु तीर्थेषु स्वभूमौ चैव सानुषु ।
विविक्तेषु च तुष्यन्ति दत्तेन पितरः सदा ॥
पारक्ये भूमिभागे तु पितॄणां नैव निर्वपेत् ।
स्वामिभिस्तद्विहन्येत मोहात् यत् क्रियते नरैः ॥
अटव्यः पर्व्वताः पुण्यास्तीर्थान्यायतनानि च ।
सर्व्वाण्यस्वामिकान्याहुर्न हि तेषु परिग्रहः ॥
तिलानवकिरेत्तत्र सर्वतो बन्धयेदजान् ।
असुरोपहतं सर्व्वं तिलैः शुध्यत्यजेन वा ॥
ततोऽन्नं बहुसंस्कारं नैकव्यञ्जनमच्युतम् ।
चोष्यपेयसमृद्धञ्च यथाशक्त्या प्रकल्पयेत् ॥
ततो निवृत्ते मध्याह्ने लुप्तलोमनखान् द्विजान्
अभिगम्य यथामार्गं प्रयच्छेद्दन्तधावनम् ॥
तैलमभ्यञ्जनं स्नानं स्नानीयञ्च पृथग्विधम् ।
पात्रैरौदुम्बरैः कुर्य्यात् वैश्वदेवत्यपूर्वकम् ॥
ततः स्नात्वा निवृत्तेभ्यः प्रत्युत्थाय कृताञ्जलिः ।

नाघनाचमनोऽस्य मंत्रय कोऽदृषदामम् ॥"
पुष्करामगे त्रिस्रोध्य स्थाने निमित्तीय इति
निदृषेभ्य इति च पाठः ॥
"ततो वाच्य विप्रदेशान् द्विजा पूर्वं निमन्त्रिताः
[illegible] यान्यामनानि वा द्विदर्भोपविष्टानि च ॥
दक्षिणाग्रपदर्भाणि पितृणामासनानि च ।
दक्षिणादि कर्माणि सोपविष्टानि तिलोदकैः ॥
[illegible] मंत्रयन् द्विजः ।
[illegible] मंत्रस्वासीरांस्तु पृथक् पृथक् ॥
द्वौ दैवे प्राक् त्रयो पित्रे [illegible] पाम्लया ।
[illegible] देवमाताम[illegible]पि ॥
[illegible] गोत्रं ब्राह्मणमध्यदम् ।
[illegible] विद्यारम् ॥
[illegible] ब्राह्मणं वेदपारगम् ।
[illegible] तम् ॥
[illegible] प्राञ्जनात्
पुन ।
[illegible]

दक्षिणं पातयेज्जानुं देवान् परिचरन् सदा ॥
पितृणां परिचर्य्यासु पातयेदितरं तथा ।
सोमाय वै पितृमते स्वधा नम इति ब्रुवन् ॥
अग्नये कव्यवाहनाय स्वधेति जुहुयात्ततः ।
अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेत् ॥
महादेवान्तिके वाथ गोष्ठे वा सुसमाहितः ।
ततस्तैरभ्यनुज्ञातो गत्वा वै दक्षिणां दिशम् ॥
गोमयेनोपलिप्योर्व्वीं स्थानं कृत्वा तु सैकतम् ।
मण्डलं चतुरस्रं वा दक्षिणावनतं शुभम् ।
त्रिरुल्लिखेत्तस्य मध्यं दर्भेणैकेन चैव हि ॥
ततः संस्तीर्य्य तत्स्थाने दर्भान् वै दक्षिणाग्र-
कान् ।
त्रीन् पिण्डान् निर्व्वपेत्तत्र हविःशेषान् समा-
हितः ॥
न्युप्य पिण्डांस्तु तद्धस्तं निमृंज्याल्लेपभागिनाम् ।
तेषु दर्भेष्वथाचम्य त्रिराचम्य शनैरसून् ॥
षडृतूंश्च नमस्कुर्य्यात् पितृनेव च मन्त्रवत् ।
उदकं निनयेच्छेषं शनैः पिण्डान्तिके पुनः ॥
अवजिघ्रेच्च तान् पिण्डान् यथान्युप्तान् समा-
हितः ।
अथ पिण्डावशिष्टान्नं विधिना भोजयेद्द्विजान् ॥
मांसान् पूपांश्च विविधान् दद्यात् कृशरपाय-
सम् ।
सूपशाकफलानीक्षून् पयो दधि घृतं मधु ॥
अन्नञ्चैव यथाकामं विविधं भक्ष्यपेयकम् ।
यदिष्टं द्विजेन्द्राणां तत्सर्व्वं निवेदयेत् ॥
धान्यांस्तिलांश्च विविधान् शर्करा विविधास्तथा ।
उष्णमन्नं द्विजातिभ्यो दातव्यं श्रेय इच्छता ॥
अन्यत्र फलमूलेभ्यः पानकेभ्यस्तथैव च ।
नाभूमौ पातयेज्जानु न कुप्येन्नानृतं वदेत् ॥
न पादेन स्पृशेदन्नं न चैतदवधूनयेत् ।
क्रोधेन चैव यद्दत्तं यद्भुक्तं त्वरया पुनः ॥
यातुधाना विलुम्पन्ति जल्पता चोपपादितम् ।
स्विन्नगात्रो न तिष्ठेत सन्निधौ च द्विजन्मनाम् ॥
न चात्र श्येनकाकादीन् पक्षिणः प्रतिषेधयेत् ।
न दद्यादत्र हस्तेन प्रत्यक्षलवणं तथा ॥
न चायसेन पात्रेण न चैवाश्रद्धया पुनः ।
काञ्चनेन तु पात्रेण राजतोदुम्बरेण च ॥
दत्तमक्षयतां याति श्राद्धे न च विशेषतः ।
पात्रे तु मृन्मये यो वै श्राद्धे भोजयते पितॄन् ॥
स याति नरकं घोरं भोक्ता चैव पुरोधसा ।
न पङ्क्त्या विषमं दद्यान्न याचेन्न च दापयेत् ।
[illegible] दाता [illegible] यान्ति-
दारुणान् ।
भुञ्जीत वाग्यताः [illegible] न ब्रूयुः प्राकृतान्
गुणान् ॥
[illegible] द्विजः ॥
[illegible] द्विज-
वत् ।
[illegible]
[illegible]

यो नाश्नाति द्विजो मांसं नियुक्त[illegible]
स प्रेत्य पशुतां याति [illegible]
स्वाध्याय श्रावयेदेषां [illegible]
इतिहासपुराणानि श्राद्धकल्पां[illegible]
ततोऽन्नमुत्सृजेद्भुक्तेष्वग्रतो [illegible]
सृष्टा स्वदितमित्येवं तृप्तानाचामये[illegible]
आचान्ताननुजानीयादभि[illegible]
स्वधास्त्विति च तं [illegible]
ततो भुक्तवतां तेषामन्नशेषं निवेद[illegible]
यथा ब्रूयुस्तथा कुर्य्यादनुज्ञातो [illegible]
पित्र्ये स्वदितमित्येवं वाच्यं [illegible]
सम्पन्नमित्यभ्युदये दैवे रुचितमित्य[illegible]
विसृज्य ब्राह्मणांस्तान् वै [illegible]
दक्षिणां दिशमाकाङ्क्षन् याचेतेमान्[illegible]

दातारो नोऽभिवर्द्धन्तां वेदाः [illegible]
श्रद्धा च नो मा [illegible]
पिण्डांस्तु [illegible]
मध्यमन्तु ततः पिण्डमद्यात् पत्नी [illegible]
प्रक्षाल्य हस्तावाचम्य ज्ञातीन् [illegible]
ज्ञातिष्वपि च भुक्तेषु स्वान् [illegible]
पश्चात् स्वयञ्च पत्नीभिः शेषमन्नं [illegible]
नोद्वासयेत्तदुच्छिष्टं यावन्नास्तं [illegible]
ब्रह्मचारी भवेतान्तु [illegible]
दत्त्वा श्राद्धं तथा भुक्त्वा सेवते यस्तु [illegible]
महारौरवमासाद्य कीटयोनिं व्रजे[illegible]
शुचिरक्रोधनः शान्तः सत्यवादी [illegible]
स्वाध्यायञ्च तथाध्वानं कर्त्ता भोक्ता [illegible]
श्राद्धं कृत्वा परश्राद्धे भुञ्जते ये [illegible]
महापातकिभिस्तुल्या यान्ति ते नरका[illegible]
एष वोऽभिहितः सम्यक् श्राद्धक[illegible]
अनेन वर्त्तयेन्नित्यमुदासीनोऽपि [illegible]
अनग्निरध्वगो वापि तथैव व्यसना[illegible]
आमश्राद्धं द्विजः कुर्य्याद् वृषलस्तु [illegible]
आमश्राद्धं यदा कुर्य्याद्विधिज्ञः [illegible]
तेनाग्नौकरणं कुर्य्यात् पिण्डांस्तेन [illegible]
योऽनेन विधिना श्राद्धं [illegible]
व्यपेतकल्मषो नित्यं याति [illegible]
तस्मात् सर्व्वप्रयत्नेन श्राद्धं कुर्य्या[illegible]
आराधितो भवेदीशस्तेन सम्यक् [illegible]
अपि मूलफलैर्व्वापि प्रकुर्य्यान्नि[illegible]
तिलोदकैस्तर्पयित्वा पितॄन् [illegible]
न जीवत्पितृको दद्याद्धोमान्तं [illegible]
येषां वापि पिता दद्यात्तेषां [illegible]
पिता पितामहश्चैव तथैव [illegible]
यो यस्य म्रियते तस्मै देयं [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

ाङ्गौ निर्व्वपेत्ताभ्यां चेविणे वोजिने तथा॥
वेदय चैकस्मिन् वोजिनं चेविणं ततः।
इनि तु कर्त्तव्यमेकोद्दिष्टं विधानतः॥
वे स्वे परिचीर्णे काम्यं वै कामतस्ततः।
द्धे चैव कर्त्तव्यं श्राद्धमभ्युदयार्थिना॥
त् सर्व्वमेव स्यात् वै कार्य्या तिलक्रिया।
ध ऋजवः कार्य्या युग्मान् वै भोजयेत्
द्विजान्॥
ीमुखास्ते पितरः प्रीयन्तामिति वाचयेत्।
श्राद्धन्तु पूर्व्वं स्यात् पितॄणां स्यादनन्तरम्॥
मातामहानाञ्च वृद्धौ श्राद्धत्रयं स्मृतम्।
र्व्वन्तु दद्याद्दै न कुर्य्यात्प्रदक्षिणम्॥
ङ्गो निर्व्वपेत् पिण्डानुपवीती समाहितः।
वे मातरः पूज्या भक्त्या चैव गणेश्वरः॥
ण्डलेषु पवित्रेषु प्रतिमासु द्विजातिषु।
धूपैश्च नैवेद्यैर्गन्धाद्यैर्भूषणैरपि॥
यित्वा मातृगणान् कुर्य्यात् श्राद्धत्रयं बुधः।
त्वा मातृयागन्तु यः श्राद्धं परिवेशयेत्।
क्रोधसमाविष्टा हिंसामिच्छन्ति मातरः॥"
इति कौर्म्मे उपविभागे २१ अध्यायः॥
ारो १६। १७। १८। अध्यायेषु चान्यत् द्रष्ट-
॥*॥ श्राद्धे कदलीपत्रं निषिद्धं भोजन-
तथा। इति हेमाद्रिव्याख्या श्राद्धखण्डे॥
ातीकुसुमानि दद्यात् न कदलीपत्रम्।
क्रतुवचनम्॥*॥ श्राद्धोत्तरनिषिद्धानि
ा,—
ात्वा युद्धं नदीपारं मिथ्यालापो दिवाभोजनम्।
नक्रीड़ा दिवानिद्रा श्राद्धे सप्त विवर्ज्जयेत्॥"
इति कर्म्मलोचनम्॥
तिः।
तञ्च कलहञ्चैव सायंसन्ध्यां दिवाशयम्।
द्धकर्त्ता च भोक्ता च पुनर्भुक्तञ्च वर्जयेत्॥"
पे च। विष्णुपुराणम्।
ार्य्याणि कुर्व्वता श्राद्धं कोपोऽध्वगमनं त्वरा।
कुर्य्यन्ते राजेन्द्र वयमेतन्न शस्यते॥"
जमार्त्तण्डे।
पुनर्भोजनमध्वानं सुताध्ययनमैथुनम्।
ानं प्रतिग्रहं सन्ध्यां श्राद्धं कृत्वाष्ट वर्जयेत्॥"
व्यवर्द्धमानधृता स्मृतिः।
पुनर्भोजनमध्वानं भाराध्ययनमैथुनम्।
ानं सन्ध्यां पुनः स्नानं श्राद्धं कृत्वाष्ट वर्जयेत्॥"
इति श्राद्धतत्त्वम्॥
स्य वैष्णवश्राद्धविधिः।
'प्राप्ते श्राद्धदिनेऽपि प्रागन्नं भागवतेऽर्पयेत्।
च्छेषेणैव कुर्व्वीत श्राद्धं भागवतो नरः॥"
ञ्च स्मृतौ।
'गृहाग्निशिशुदेवानां यतीनां ब्रह्मचारिणाम्।
पत्पाकेन दातव्यो यावत् पिण्डान्न निर्व्वपेत्॥"
इति॥
'दृक् सामान्यवचनं विशेषवचनव्रजैः।
रुतिस्मृतिपुराणादिवर्त्तिभिर्व्वाध्यते भृशम्॥"
था च पाद्मे।

"विष्णोर्निवेदितान्नेन यष्टव्यं देवतान्तरम्।
पितृभ्यश्चापि तद्देयं तदानन्त्याय कल्पते॥"
मोक्षधर्म्मे नारदोक्तौ।
"सात्वतं विधिमास्थाय प्राक् सूर्य्यमुखनिः-
सृतम्।
पूजयामास देवेशं तच्छेषेण पितामहान्॥"
ब्रह्माण्डपुराणे।
"यः श्राद्धकाले हरिभुक्तशेषं
ददाति भक्त्या पितृदेवतानाम्।
तेनैव पिण्डांस्तुलसीविमिश्रा-
नाकल्पकोटिं पितरः सुतृप्ताः॥"
स्कान्दे श्रीशिवोक्तौ।
"देवान् पितॄन् समुद्दिश्य यद्विष्णोर्विनिवेदितम्।
तानुद्दिश्य ततः कुर्य्यात् प्रदानं तस्य चैव हि॥
प्रयान्ति तृप्तिमतुलां सोदकेन तु तेन वै।
मुकुन्दगात्रलग्नेन ब्राह्मणानां विलेपनम्॥
चन्दनेन तु पिण्डानां कर्त्तव्यं पितृतृप्तये।
देवानाञ्च पितॄणाञ्च जायते तृप्तिरक्षया॥
एवं कृते महीपाल मा भवेत् संशयः क्वचित्॥"
तत्रैव श्रीपुरुषोत्तमखण्डे।
"अन्नाद्यं श्राद्धकाले तु पतिताद्यैर्न वीक्षितम्।
तुलसीदलमिश्रेण सलिलेनाभिषिञ्चयेत्॥
तदन्नं गृह्यतामिति विष्णोर्न्नैवेद्यमिश्रितम्।
विष्णोर्न्नैवेद्यशेषन्तु तस्माद्देयं द्विजन्मना।
पिण्डे चैव विशेषेण पितॄणां तृप्तिमिच्छता॥"
तत्रैव श्रीब्रह्मनारदसंवादे।
"पितॄनुद्दिश्य यैः पूजा केशवस्य कृता नरैः।
त्यक्त्वा ते नारकीं पीड़ां मुक्तिं यान्ति महामुने॥
धन्यास्ते मानवा लोके कलिकाले विशेषतः।
ये कुर्व्वन्ति हरेर्नित्यं पित्रर्थं पूजनं मुने॥
किं दत्तैर्व्बहुभिः पिण्डैर्गयाश्राद्धादिभिर्मुने॥
यैरर्च्चितो हरिर्भक्त्या पित्रर्थञ्च दिने दिने॥
यमुद्दिश्य हरेः पूजा क्रियते मुनिपुङ्गव॥
उद्धृत्य नरकावासात्तं नयेत् परमं पदम्॥
यो ददाति हरेः स्थानं पितॄनुद्दिश्य नारद।
कर्त्तव्यं हि पितॄणां यत्तत् कृतं तेन भो द्विज॥"
श्रुतौ च। एक एव नारायण आसीत् न ब्रह्मा
नेमे द्यावापृथिव्यौ सर्व्वे देवाः सर्व्वे पितरः सर्व्वे
मनुष्याः विष्णुना अशितमश्नन्ति विष्णुना घ्रातं
जिघ्रन्ति विष्णुना पीतं पिबन्ति तस्माद्विद्वांसो
विष्णूपहृतं भक्षयेयुरिति। अतएवोक्तं श्रीभग-
वता विष्णुधर्म्मे।
"प्राणिभ्यो जुहुयादन्नं मन्निवेदितमुत्तमम्।
तृप्यन्ति सर्व्वदा प्राणा मन्निवेदितभक्षणात्॥
तस्मात् सर्व्वप्रयत्नेन प्रदेयं मन्निवेदितम्।
ममापि हृदयस्यन्द पितॄणाञ्च विशेषतः॥"
किञ्च तत्रैवान्यत्र।
"भक्ष्यं भोज्यञ्च यत्किञ्चिदनिवेद्याग्रभोक्तरि।
न देयं पितृदेवेभ्यः प्रायश्चित्ती यतो भवेत्॥
मर्य्यादा स्थापिता देवैरग्रभुक् भगवान् हरिः।
यज्ञभागभुजो देवा ततस्तेन प्रकल्पिताः॥"
इति श्रीहरिभक्तिविलासे ८ विलासः॥

अथोपवासदिने श्राद्धनिषेधः। पाद्मे पुष्कर-
खण्डम्।
"एकादश्यां यदा राम श्राद्धं नैमित्तिकं भवेत्।
तद्दिने तु परित्यज्य द्वादश्यां श्राद्धमाचरेत्॥"
तत्रैवोत्तरखण्डे।
"एकादश्यान्तु प्राप्तायां मातापित्रोर्मृतेऽहनि
द्वादश्यां तत् प्रदातव्यं नोपवासदिने क्वचित्॥
गर्हितान्नं न चाश्नन्ति पितरश्च दिवौकसः॥"
स्कान्दे।
"एकादशी यदा नित्या श्राद्धं नैमित्तिकं भवेत्।
उपवासं तदा कुर्य्यात् द्वादश्यां श्राद्धमाचरेत्॥"
ब्रह्मवैवर्त्ते।
"ये कुर्व्वन्ति महीपाल श्राद्धं चैकादशीदिने।
त्रयस्ते नरकं यान्ति दाता भोक्ता परेतकः॥"
इति श्रीहरिभक्तिविलासे १२ विलासः॥

श्राद्ध, त्रि, (श्रद्धा अस्त्यस्येति। श्रद्धा+"प्रज्ञा-
श्रद्धार्च्चावृत्तिभ्यो णः।" ५।२।१०१। इति णः।)
श्रद्धासमन्वितम्। इति हेमचन्द्रः॥

श्राद्धकर्त्ता, [ऋ] त्रि, (करोतीति। कृ+तृच्।
श्राद्धस्य कर्त्ता।) श्राद्धकारकः। यथा,—
"श्राद्धकर्त्ता च भोक्ता च पुनर्भुक्तञ्च वर्जयेत्॥"
इति श्राद्धतत्त्वम्॥

श्राद्धदेवः, पुं, (श्राद्धस्य देवः।) यमः। इत्यमरः॥
(यथा, मार्कण्डेये। ८। १५६।
"श्राद्धदेवेन कथितं विश्वामित्रस्य चेष्टितम्॥")
स तु विवस्वतः संज्ञायां पत्न्यां जातः॥ मनु-
भेदः। इति पुराणम्॥ (यथा, मार्कण्डेये।
१०६। ४।
"मनुर्वैवस्वतो ज्येष्ठः श्राद्धदेवः प्रजापतिः।
ततो यमो यमी चैव यमलौ सम्बभूवतुः॥")

श्राद्धशाकं, क्ली, (श्राद्धे देयं शाकम्।) काल-
शाकम्। इति भावप्रकाशः॥

श्राद्धिकः, त्रि, (श्राद्धमनेन भुक्तमिति। श्राद्ध+
"श्राद्धमनेन भुक्तमिनिठनौ।" ५। २। ८५।
इति ठन्।) श्राद्धभोक्ता। इति सिद्धान्त-
कौमुदी॥ श्राद्धसम्बन्धिद्रव्यादि। यथा, याज्ञ-
वल्क्यः।
"सन्ध्यागर्ज्जितनिर्घाते भूकम्पोल्कानिपातने।
समाप्य वेदं द्युनिशमारण्यकमधीत्य च॥
पञ्चदश्यां चतुर्द्दश्यामष्टम्यां राहुसूतके।
ऋतुसन्धिषु भुक्त्वा वा श्राद्धिकं प्रतिगृह्य च॥"
इति तिथ्यादितत्त्वम्॥

श्राद्धी, [न्] त्रि, श्राद्धभोक्ता। श्राद्ध+"श्राद्ध-
मनेन भुक्तमिनिठनौ।" ५। २। ८५। इति
सूत्रेण इनिः। इति सिद्धान्तकौमुदी॥

श्रान्तः, पुं, (श्रम+क्तः।) शान्तः। जितेन्द्रियः।
इति हेमचन्द्रः॥ श्रमयुक्ते, त्रि। श्रम
तपःखेदयोः इत्यस्मात् क्तप्रत्ययेन निष्पन्नः।
यथा,—
"मयि मन्दाक्षमायन्तु [illegible]
[illegible]

श्रान्तसंवाहनं, क्ली, (श्रान्तस्य संवाहनम् ।) श्रमान्वितस्य श्वासनादिप्रदानद्वारा श्रमोपशमनम् । इति केचित् ॥

श्राम, त् क मन्त्रे । इति कविकल्पद्रुमः ॥ (अदन्त-चुरा०-पर०-सक०-सेट् ।) अशश्रामत् । मन्त्रोऽभिमुखीकरणम् । गुप्तोक्तिरित्येके । इति दुर्गादासः ॥

श्रामः,पुं,(श्रामयतीति । श्राम+अच् ।) मासः । मण्डपः । कालः । इति मेदिनी ॥

श्रामणेरः, पुं, जिनभिक्षुशिष्यः । तत्पर्यायः । चेलुकः२ प्रव्रजितः३ सहापासकः४ गोमीपु । इति त्रिकाण्डशेषः ॥

श्रायः, पुं, (श्रि अवे+"श्रिणीभुवोऽनुपसर्गे ।" ३।३।२४ । इति घञ् ।) श्रयणम् । आश्रयः । इत्यमरः ॥ (यथा, भट्टिः । ७ । ३६ ।

"यात यूयं यमश्रायं दिशं नायेन दक्षिणाम् ॥")

श्रीमन्म्निनि, त्रि । यथा । श्रीर्देवता अस्य श्रायं हविः । इति श्रीशब्दादण्प्रत्ययेन निष्पन्नमिति सिद्धान्तकौमुदी ॥

श्रायसः, त्रि, (श्रेयस्+अण् । "देविकाशिंशपेति ।" ७।३।१ । इति आदेरात् ।) श्रेयसि भवः । इति सिद्धान्तकौमुदी ॥

श्रावः, पुं, श्रवणम् । श्रुधातोर्घञ्प्रत्ययेन निष्पन्नः । इक्ष्वाकुवंशीयनृपतिविशेषः । यथा, महाभारते । ३ । २०१ । ३ ।

"आर्द्रात्तु युवनाश्वस्तु श्रावस्तस्मादजायत ॥")

श्रावक, पुं, (शृणोतीति । श्रु+ण्वुल् ।) शाक्यमुनिशिष्यविशेषः । काकः । इति त्रिकाण्डशेषः ॥ (श्रावयतीति । श्रु+णिच्+ण्वुल् । दूरध्वनिः । यथा, माघे । ११ । १ ।

"श्रुतिसमधिकमुच्चैः पञ्चमं पीडयन्तः सततमृषभहीनं भिन्नकीकृत्य षड्जम् ।
प्रणिजगदुरकाकुश्रावकस्निग्धकण्ठाः परिणतिमिति रात्रेर्मागधा माधवाय ॥")

श्रौतरि, त्रि । (यथा, पुराणम् ।

"ऋग्वेदश्रावकं पैलं जग्राह विधिवद्द्विजम् ।
यजुर्वेदप्रवक्तारं वैशम्पायनमेव च ॥")

श्रावण, पुं, (श्रवणेनाचरति न तु कार्येणेति । श्रवण+अण् । पाषण्डः । इति मेदिनी ॥ (श्रवणेन ज्ञायते इति । श्रवण+"प्रेष्ये ।" ४ । २ । ८२ । इत्यण् । शब्दः । इति काशिका ।) वैशाखादि-द्वादशमासान्तर्गत-चतुर्थ-मासः । श्रवणानक्षत्रयुक्ता पौर्णमासी श्रावणी सा यत्र मासे सः । (श्रवणा+अण् ।) तत्पर्यायः । नभाः २ श्रावणिकः ३ इत्यमरः ॥ नभः ४ । इति शब्दरत्नावली । स च द्विविधः सौर-चान्द्रश्च । कर्कटस्थरविकः सौरश्रावणः । कर्कटस्थरविप्रारब्धशुक्लप्रतिपदादि-दर्शान्तो मासश्चान्द्रश्रावणः । चान्द्रोऽपि द्विविधो मुख्यो गौणश्च । तत्र मुख्यचान्द्रश्रावणः कृष्णप्रतिपदादिपौर्णमास्यन्तो मासो गौणचान्द्रः श्रावणः । मुख्यलक्षणं मासतत्त्वम् । मलमासतत्त्वम् ॥ * ॥ तत्र जातफलम् ।

"लोकप्रसिद्धो धनवान् वदान्यः सुहृत्कलत्रात्मजदासयुक्तः ।
आज्ञाकरा यस्य जनस्य सर्व्वे स श्रावणाख्ये सुतरां प्रसूतः ॥"

अथ श्रावणकृत्यम् । तत्र देवीपुराणम् ।

"सुप्ते जनार्द्दने कृष्णे पञ्चम्यां भवनाङ्गने ।
पूजयेन्मनसा देवीं स्नुहीविटपसंस्थिताम् ॥"

स्नुही सिजवृक्षः ।

"देवीं संपूज्य नत्वा च न सर्पभयमाप्नुयात् ।
पञ्चम्यां पूजयेन्नागानन्ताद्यान् महोरगान् ।
क्षीरं सर्पिश्च नैवेद्यं देयं सर्पविषापहम् ॥"

गारुडे ।

"अनन्तं वासुकिं शङ्खं पद्मं कम्बलमेव च ।
तथा कर्कोटकं नागं धृतराष्ट्रञ्च शङ्खकम् ॥
कालीयं तक्षकञ्चापि पिङ्गलं मणिभद्रकम् ।
यजेत्तानसितावगान् दष्टमुक्तो दिवं व्रजेत् ॥"

पुराणान्तरेऽपि ।

"अनन्तो वासुकिः पद्मो महापद्मोऽथ तक्षकः ।
कुलीरः कर्कटः शङ्खो ह्यष्टौ नागाः प्रकीर्त्तिताः ॥"

पाद्मे ।

"शेषः पद्मो महापद्मः कुलीरः शङ्खपालकः ।
वासुकिस्तक्षकश्चैव कालीयो मणिभद्रकः ।
ऐरावतो धृतराष्ट्रः कर्कोटकधनञ्जयौ ॥"

रत्नाकरे ।

"पिचुमर्द्दस्य पत्राणि स्थापयेद्भवनोदरे ।
स्वयञ्चापि तदश्नीयात् [illegible] पिचुमर्द्दस्य निम्बस्य ॥ * ॥ तत्र हरिशयनानन्तरं गौणचान्द्रेण [illegible] नवम्यां कृतस्नानादिकदङ्मुखः । अद्य [illegible] मासि कृष्णे पक्षे पञ्चम्यां तिथौ [illegible] श्रीअमुकदेवशर्मा सर्पभयाभावकामो देवीपूजामहं करिष्ये । इति सङ्कल्प्य वृक्षे पूजयेत् । तदभावे घटे जले दिक्षु कृत्वा [illegible] ध्यात्वा [illegible] इहागच्छ [illegible] पाद्यं ॐ [illegible] देव्यै [illegible] नागान् [illegible] अनन्तादिकं [illegible] पुष्पवद्धारयेत् [illegible] इत्यनेन त्रिः पूजयेत् । स्वस्वनाम्ना पूजयेत् । शङ्खाय नमः । ॐ [illegible] टकाय नमः । ॐ [illegible] यस नमः । ॐ तक्षकाय नमः । ॐ महापद्माय नमः । नमः । ॐ मणिभद्राय नमः । ॐ नमः । ॐ शेषाय नमः । ॐ [illegible] नमः । अमन्त्रो गन्धपुष्पाभ्यां पूजयेत् । [illegible] दयाथि गृहे स्थापयेत् आर्द्रायां [illegible]

स्वयं भक्षयेच्च । उभयदिने पूर्व्वाह्ने मुहूर्त्तालाभे पञ्चमीलाभे पूर्व्वदिने पूजा युग्मात् । श्रावणीं पौर्णमास्यां श्राद्धमावश्यकम् । इति कृत्यतत्त्वम् ॥ श्रवणानक्षत्रसम्बन्धिनि, त्रि ॥

श्रावणा, स्त्री, दग्धालोकवृक्षः । इति मेदिनी ।

श्रावणिक,पुं, (श्रवणा पौर्णमास्यस्मिन्नस्तीति । श्रवणा+"विभाषा फाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यः ।" ४।२।२३ । इति ठक् ।) श्रावणमासः । इत्यमरः ॥

श्रावणी,स्त्री,(श्रवणेन नक्षत्रेण युक्ता पौर्णमासी । श्रवण+"नक्षत्रेण युक्तः कालः ।" ४ । २।३ । इत्यण् । ङीप् ।) श्रावणमासीयपूर्णिमा । यथा,

"पौर्णमासी तथा माघी श्रावणी च नरोत्तम ।
एतांस्तु श्राद्धकालान् वै नित्यानाह प्रजापतिः ।"

इति श्राद्धतत्त्वम् ॥

क्षुपविशेषः । मुण्डी इति गोलकुडिया इति च हिन्दीभाषा । तत्पर्यायः । मुण्डितिका २ भिक्षुः ३ श्रवणशीर्षिका ४ श्रवणा५ प्रव्रजिता६ परिव्राजी ७ तपोधना ८ । अस्या गुणाः । कषायत्वम् । कटुत्वम् । उष्णत्वम् । कफवातान्[illegible] इति राज[illegible]

…मन्या, स्त्री, आत्मानं श्रियं मन्यते या। इति
बोपदेवः ॥ (यथा, भट्टिः। ५।७१।
…व श्रीः श्रियंमन्या श्रीमन्मन्यो मृषा-
हरिः ॥")
…उ दाहे। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-
-सेट्।) क्वावेट्।) उ, श्रेपित्वा श्रिष्ट्वा।
…ति दुर्गादासः ॥
…व्र ग पाके। इति कविकल्पद्रुमः ॥ (क्या०-
-सक०-सेट्।) व्र ग श्रीणाति श्रीणीते।
…ति दुर्गादासः ॥
…, स्त्री, (श्रयतीति। श्रि + "क्विप्वचिप्रच्छीति"
२।५७। इति क्विप् दीर्घश्च।) लक्ष्मीः
यथा, विष्णुपुराणे। १।८।१३।
…देवदेवस्य पत्नी नारायणस्य च या ॥"
…। इत्यमरः ॥ वेशरचना। शोभा।
(यथा, रामायणे। २।८४।१०।
…हिमिरावीर्णः श्रियं पुष्यवयं गिरिः ॥")
…। सरलद्रुमः। त्रिवर्गः। सम्पत्तिः।
(यथा,—
"न दातुं नोपभोक्तुं वा शक्नोति कृपणः
श्रियम् ॥")
विधा। उपकरणम्। विभूतिः। मतिः। इति
मेदिनी ॥ अधिकारः। प्रभा। कीर्त्तिः। इति
धरणिः ॥ वृद्धिः। सिद्धिः। इति शब्दरत्नावली ॥
…। इति हेमचन्द्रः ॥ कमलम्।
बिल्ववृक्षः। वृद्धिनामौषधम्। इति राज-
निर्घण्टः ॥ ० ॥ देवादिनामः पूर्व्वं श्रीशब्द-
प्रयोगः कार्य्यः। यथा,—
"देवं गुरुं गुरुस्थानं क्षेत्रं क्षेत्राधिदेवताम्।
सिद्धं सिद्धाधिकारांश्च श्रीपूर्व्वं समुदीरयेत् ॥"
इति राघवभट्टधृतप्रयोगसारदर्शनात् स्वर्ग-
गामित्वादिना सिद्धोऽधिकारी ज्ञेयः नराणां
…श्रीवत्तो श्रीशब्दादित्वं नाथः। न तु
…कालं तपेति शिष्टाचारः। इति संस्कार-
तत्त्वम् ॥ ० ॥ पत्रपृष्ठे श्रीशब्दलेखनप्रमाणं पत्र-
शब्दे द्रष्टव्यम् ॥ (वर्णवृत्तविशेषः।
यथा, छन्दोमञ्जर्याम्। "गु श्रीः।" उदा-
हरणम्। "…। …तम् ॥")
…, पुं, (श्रि + क्विप् दीर्घश्च।) रागविशेषः। स
… [illegible]

ममयः। रागमालायां तस्याः स्वरूपम्। रक्त-
वर्णा स्त्री। कोमलाङ्गी। पीतवस्त्रपरीधाना।
कौतुकाद्भ्रमन्ती सती नायकाद्भिन्ना सखी-
गणेन सह हास्ययुक्ताम्रतरुतलोपविष्टा ॥ १ ॥
द्वितीया मारवा अथवा मालवा। अस्याः
षाड़वजातिः। अस्याः स्वरावलिः। प प ग
म ध नि। अस्या ग्रहं षड्जस्वरः। हिमर्त्तौ
शेषवेलायां गानसमयः। रागमालायां तस्याः
स्वरूपं यथा। स्वर्णवस्त्रपरीधाना। पुष्पमाल्य-
धरा। नायकमेलनार्थमेकाकिनीमद्धे तरुस्थानोप-
विष्टा ॥ २ ॥ तृतीया धनाश्रीः। अस्याः षाड़व-
जातिः। अस्याः स्वरावलिः। प प ध नि ऋ
ग। ग्रहं षड्जस्वरः। हिमर्त्तौ द्वितीयप्रहर-
दिवसे शेषवेलायां वा गानसमयः। राग-
मालायां तस्याः स्वरूपम्। वियोगिनी नारी।
रक्तवस्त्रपरीधाना। वियोगजसन्तापेन दुःखि-
तातिकृशा। एकाकिनी रोदमाना बकुल-
तरुतलोपविष्टा ॥ ३ ॥ चतुर्थी वसन्तरागिणी।
अस्याः सम्पूर्णा जातिः। अस्याः स्वरावलिः।
प ऋ ग म प ध नि। अस्या ग्रहं षड्जस्वरः।
हिमर्त्तौ मध्याह्ने वसन्तर्त्तौ दिवा सायं च गान-
समयः। रागमालायां तस्याः स्वरूपम्।
सुन्दरपुरुषाकृतिः। कस्यचिन्मते श्यामवर्णा।
रक्तवसना। मयूरपुच्छशिखा। आम्रमुकुल-
हस्ता। यौवनमदनमदमत्ता। पुष्पमाल्यगल-
देशा। पुष्पोद्याने सह नर्त्तकीसुस्वरगायनीभिः
…रागरङ्गयुता। …
बोटिका। …
नृत्यगीतवाद्यासक्ता। रागमालान्तरे …
युक्ता श्रीकृष्णमूर्त्तिसदृशमूर्त्तिर्निरूपिता ॥ ४ ॥
पञ्चमी आसावरी। अस्या औड़वजातिः।
अस्याः स्वरावलिः। ध नि प म प। अस्या
ग्रहं धैवतस्वरः। हिमर्त्तौ द्वितीयप्रहरदिवसे
गानसमयः। रागमालायां तस्याः स्वरूपम्।
श्यामवर्णा स्त्री। कोमलाङ्गी। श्वेतशाटीपरि-
धाना। कर्पूरानुलेपना। …
… [illegible]

त्रिवेणी अथवा तिरवनी २ गौरी ३ केदारा ४
मधुमाधवी ५ पाहाड़िका अथवा पाहाड़ी ६।
अस्य पुत्राः पूर्व्वोक्तमतद्वयतुल्याः। तन्मते
अस्य रागस्य रागिणीसहितस्य शिशिरर्त्तौ
गानसमयः ॥ * ॥ भरतमते पञ्चमरागोऽयम्।
अस्य रागिण्यः पञ्च। यथा। सिन्धुवी १। काफी
२ ठुमरी ३ पूर्व्वदेशे विस्तार इति ख्याता।
विचित्रा ४ सिरहटी अथवा सोरहठी ५
तन्मते अस्याष्ट पुत्राः यथा। श्रीरमणः १
कोलाहलः २ सामन्तः ३ मद्धरणः ४ राके-
श्वरः ५ खटरागः ६ वड़हंसः ७ देशकारः ८।
तेषां भार्य्या यथा। विश्वा १ धाया २ कुम्भा ३
सुहनी ४ शरदा ५ क्षेमा ६ नगरेखा ७ सुर-
मती ८। इति नानासङ्गीतशास्त्रतः संग्रही-
तम् ॥
श्रीकण्ठः, पुं, (श्रीः शोभा कण्ठे यस्य।) शिवः।
इत्यमरः ॥ कुरुजाङ्गलदेशः। स तु हस्तिना-
पुरस्य उत्तरपश्चिमे वर्त्तते। इति हेमचन्द्रः ॥
(पक्षिविशेषः। यथा, सुश्रुतसंहितायाम्।
८६।३८।
"क्रौञ्चाः … … …।
… …॥")
श्रीकण्ठपदलाञ्छनः, पुं, (श्रीकण्ठ इतिपदं
लाञ्छनं यस्य।) भवभूतिः। स तु मालती-
माधवादिनाटककर्त्ता। इति शब्दमाला ॥
(यथा, उत्तररामचरिते प्रस्तावनायाम्।
"अस्ति खलु तत्रभवान् काश्यपः श्रीकण्ठ-
पदलाञ्छनो भवभूतिर्नाम ॥")
श्रीकण्ठसखः, पुं, (श्रीकण्ठस्य शिवस्य सखा।
… टच्।) कुबेरः। इति हलायुधः ॥
श्रीकन्दा, स्त्री, (श्रीः शोभा … कन्दः यस्याः।) …। इति राज-
निर्घण्टः ॥
श्रीकरं, क्ली, रक्तोत्पलम्। इति त्रिकाण्डशेषः ॥
श्रीकरः, पुं, विष्णुः। इति त्रिकाण्डशेषः ॥ …
… [illegible]

दक्षिणोर्द्ध्वे सहस्रारं पाञ्चजन्यमधःस्थितम् ।
सप्ततालप्रमाणेन वासनं कारयेत् सदा ॥८॥
ऊर्द्ध्वे दक्षिणतश्चक्रमधः पद्मं व्यवस्थितम् ।
वामोर्द्ध्वे कौमोदी यस्य पाञ्चजन्यमधःस्थितम् ॥
पद्मा पद्मकरा वामे पार्श्वे तस्य व्यवस्थिता ।
स्थितो वाप्युपविष्टो वा सानुरागविलासवान् ॥
प्रद्युम्नस्य हि भेदोऽयं श्रीधरेति प्रकीर्त्तितः ॥८॥
दक्षिणोर्द्ध्वे महाचक्रं कौमोदी तदधःस्थिता ॥
वामोर्द्ध्वे नलिनं यस्य अधः शङ्खं विराजते ।
हृषीकेशेति विज्ञेयः स्थापितः सर्व्वकामदः ॥१०
दक्षिणोर्द्ध्वे पुण्डरीकं पाञ्चजन्यमधस्तथा ।
वामोर्द्ध्वे संस्थितं चक्रं कौमोदी तदधःस्थिता ॥
पद्मनाभेति सा मूर्त्तिः स्थापिता मोक्षदायिनी ॥११
दक्षिणोर्द्ध्वे पाञ्चजन्यमधस्तात् कुशेशयम् ॥
सव्योर्द्ध्वे कौमोदी देवो हेतिराजमधः स्थितम् ।
अनिरुद्धस्य भेदोऽयं दामोदर इति स्थितः ॥१२॥
पत्नीपार्श्वे स्थितौ कार्य्यौ पद्मवीणाधरे शुभे ।
इति क्रमेण मार्गादिमासाधिपाः केशवादयो
द्वादश ॥ * ॥ अथ सिद्धार्थसंहितायां चतु-
र्व्विंशतिमूर्त्तयः ।
"वासुदेवो गदाशङ्खचक्रपद्मधरो मतः । १ ।
पद्मं शङ्खं तथा चक्रं गदां वहति केशवः ॥२॥
शङ्खं पद्मं गदां चक्रं धत्ते नारायणः सदा ।३।
गदां चक्रं तथा शङ्खं पद्मं वहति माधवः ॥४॥
चक्रं पद्मं तथा शङ्खं गदाञ्च पुरुषोत्तमः ।५।
पद्मं कौमदकीं शङ्खं चक्रं धत्ते ह्यधोक्षजः ॥६॥
सङ्कर्षणो गदाशङ्खपद्मचक्रधरः स्मृतः । ७ ।
चक्रं गदां पद्मशङ्खौ गोविन्दो धरते भुजे ॥८॥
गदां पद्मं तथा शङ्खं चक्रं विष्णुर्बिभर्त्ति यः ।९।
चक्रं शङ्खं तथा पद्मं गदाञ्च मधुसूदनः ॥१०॥
गदां सरोजं चक्रञ्च शङ्खं धत्तेऽच्युतः सदा ।११।
शङ्खं कौमोदकीं चक्रमुपेन्द्रः पद्ममुद्वहेत् ॥१२॥
शङ्खचक्रगदापद्मधरः प्रद्युम्न उच्यते । १३ ।
पद्मं कौमोदकीं चक्रं शङ्खं धत्ते त्रिविक्रमः ॥१४॥
शङ्खं चक्रं गदां पद्मं वामनो वहते सदा ।१५।
पद्मं चक्रं गदां शङ्खं श्रीधरो वहते भुजे ॥१६॥
चक्रं पद्मं गदां शङ्खं नरसिंहो बिभर्त्ति यः ।१७।
पद्मं सुदर्शनं शङ्खं गदां धत्ते जनार्द्दनः ॥१८॥
अनिरुद्धश्चक्रगदाशङ्खपद्मलसद्भुजः । १९ ।
हृषीकेशो गदां चक्रं पद्मं शङ्खञ्च धारयेत् ॥२०॥
पद्मनाभो वहेत् शङ्खं पद्मं चक्रं गदां तथा ।२१।
पद्मं चक्रं गदाशङ्खं धत्ते दामोदरः सदा ॥२२॥
शङ्खं चक्रं सरोजञ्च गदां वहति यो हरिः ।२३।
शङ्खं कौमोदकीं पद्मं चक्रं कृष्णो बिभर्त्ति
यः ॥२४॥
एताश्च मूर्त्तयो ज्ञेया दक्षिणाधःकरक्रमात् ॥"
मत्स्यपुराणे च ।
"एतदुद्देशतः प्रोक्तं प्रतिमालक्षणं तथा ।
विस्तरेण न शक्नोति बृहस्पतिरपि द्विजाः ॥"
इति ।
शेषानिष्ठा हरेः श्रीमद्वेष्णवाः पाञ्चरात्रिकाः ।
प्राकट्यादधिनाद्यानां श्रीमूर्त्तिं बहु मन्वते ॥
सेव्या निजनिजैरेव सर्व्वे सर्व्वेऽपि मूर्त्तयः ।
शालग्रामात्मके रूपे नियमो नैव विद्यते ॥
द्विभुजा जलदश्यामा त्रिभङ्गो मधुराकृतिः ॥
सेव्या ध्यानानुरूपैव श्रीमूर्त्तिः कृष्णदैवतैः ॥
अन्याश्च विविधाः श्रीमद्दयनारादिमूर्त्तयः ।
प्रादुर्भावविधावेव ज्ञेयास्तत्तद्विशेषतः ॥
नित्यकर्म्मप्रसङ्गेऽत्र मूर्त्तिजन्मप्रतिष्ठयोः ।
विधिश्च लेखितुं योग्यः स तु लेखिष्यतेऽग्रतः ॥"
इति श्रीहरिभक्तिविलासे १८१ विलासः ॥
श्रीयुक्तः, त्रि, (श्रिया युक्तः ।) लक्ष्मीविशिष्टः ।
श्रीमान् । जीवत्पुरुषनाम्नः पूर्व्वं दातव्योऽयम् ॥
श्रीयुतः, त्रि, (श्रिया युतः ।) लक्ष्मीविशिष्टः ।
श्रीमान् । जीवत्पुरुषनाम्नः पूर्व्वं दातव्योऽयम् ॥
श्रीरसः, पु, (श्रियः रसो निर्य्यासः ।) श्रीवेष्टः ।
इति राजनिर्घण्टः ॥
श्रीरङ्गपत्तनं, क्ली, देशविशेषः । सारंपटन् इति
भाषा । इति माद्राजाख्यदेशे प्रसिद्धम् ॥
श्रीरागः, पु, षड्रागाणां मध्ये तृतीयरागः । इति
हलायुधः । अस्य रागिण्यो यथा,—
"गान्धारी देवगान्धारी मालवश्रीश्च मारवी ।
रामकीर्य्यपि रागिण्यः श्रीरागस्य प्रिया
इमाः ॥"
इति सङ्गीतदामोदरः ॥
विस्तारस्तु श्रीशब्दे द्रष्टव्यः ॥
श्रीरामः, पुं (श्रीयुतो रामः ।) रामचन्द्रः । इति
शब्दरत्नावली ॥
श्रीरामनवमी, स्त्री, (श्रीरामस्य नवमी तज्जन्म-
दिनत्वात् ।) चैत्रशुक्लनवमी । सा च श्रीरामस्य
जन्मतिथिः । । तद्व्रतकथा यथा,—
"पुरैकदा सुखासीनं ब्रह्माणं जगतां पतिम् ।
उवाच सहसागत्य सनकः संजितेन्द्रियः ॥
सनक उवाच ।
राज्ञा दशरथेनैव राज्ञ्या कौशल्ययापि वा ।
कस्मात् कर्म्मवशाल्लब्धः पुत्रोऽसौ जगतीपतिः ।
दूर्व्वादलश्यामरामो विस्तार्य्य कथयस्व मे ॥
ब्रह्मोवाच ।
साधु पृष्टं त्वया वत्स जगतां हितकारकम् ।
पुरा राजा दशरथः कौशल्या च समाहितौ ॥
जजाप मन्त्रं दुर्गायाः शिवस्य च विशेषतः ।
तयोर्जपेन तुष्टः सन् शिवः प्रत्यक्षतां गतः ॥
दशरथ उवाच ।
अद्य मे सफलं जन्म अद्य मे सफलं तपः ।
अद्य मे सफले चक्षुर्यतस्त्वमवलोकितः ॥
श्रीशिव उवाच ।
किन्ते कार्य्यं महाराज कथयस्व ददामि तत् ॥
दशरथ उवाच ।
देवदेवाप्यपुत्त्रोऽहमिति दुःखेन दुःखितः ।
चिरं विचार्य्य मनसा शिवाराधनतत्परः ॥
इति श्रुत्वा महादेवस्तमुवाच दयापरः ।
कुरु राजन् व्रतमिदं ततस्ते जगतीपतिः ॥
श्रीरामनामा पुत्त्रोऽसौ कौशल्यायां भविष्यति ।
इत्युक्त्वा तं महादेवस्तत्रैवान्तर्हितोऽभवत् ॥०॥
इति तद्वचनात् श्रुत्वा राजा दशरथः शुचौ ।
तद्व्रतं व्रतयश्च स देव्या सह तत्परः ।
ततः काले महाराज्ञी गर्भं धत्ते मनोहरम् ।
चैत्रे मासि सिते पक्षे नवम्यां शोभने दिने ।
अतिपुण्यसुसंलग्ने जातो रामः स्वयं हरिः ।
पुनर्व्वसुऋक्षसंयुक्ता सा तिथिः सर्व्वकामदा ।
श्रीरामनवमी प्रोक्ता कोटिसूर्य्यग्रहाधिका ।
अस्मिन् दिने महापुण्ये राममुद्दिश्य भक्तितः ।
यत्किञ्चित् क्रियते कर्म्म तद्भवक्षयकरं स्मृतम् ।
उपोषणं जागरणं पितॄनुद्दिश्य तर्पणम् ।
तस्मिन् दिने तु कर्त्तव्यं ब्रह्मप्राप्तिमभीप्सुभिः ।
तस्मिन् दिने महापुण्ये राममुद्दिश्य भक्तितः
अपेदिकारा आमीनो यावत् स्याद्दशमीदिनम्
तेनैव स्यात् पुरश्चर्य्या दशम्यां भोजयेद्द्विजान्
भक्ष्यभोज्यैश्च विविधैर्व्विधैस्तथा दद्याच्च दक्षिणाम् ।
कृतकृत्यो भवेत्तेन सद्यो रामः प्रसीदति ।
यस्तु रामनवम्यान्तु भुङ्क्ते मर्त्यो विमूढधीः
कुम्भीपाकेषु घोरेषु पच्यते नात्र संशयः ॥
कुर्य्याद्रामनवम्या य उपोषणमतन्द्रितः ।
न शेते मातृजठरे स्वयं रामो भवेत् सः ॥
श्रीरामनवमी नाम पुण्यात् पुण्यतमा स्मृता ।
इति श्रुत्वा सुसंतुष्टः सनकः पुनरब्रवीत् ।
विधिना केन कर्त्तव्यं वद मे कमलोद्भव ॥०॥
ब्रह्मोवाच ।
व्रतपूर्व्वदिने स्नात्वा सकृद्भुक्त्वा निरामिषम् ।
त्यक्त्वा च योषिच्छयनं शयीत स्थण्डिले कुशे ।
ब्राह्मे मुहूर्त्ते चोत्थाय कृत्वा प्रातःक्रियां ततः ।
प्रातः स्नात्वा शुचिर्भूत्वा सङ्कल्पं विधिनाचरेत् ।
प्रतिमायां घटे वापि पटे वा यन्त्रतोऽपि वा ।
शालग्रामशिलायान्तु तुलसीदलकल्पिता ।
पूजा श्रीरामचन्द्रस्य कोटिकोटिगुणाधिका ।
कौशल्या पूजनीयादौ राजा चैव ततः परम् ।
षडङ्गं पूजयेत्तत्र लक्ष्मणादीन् विशेषतः ।
पूजयेत् परया भक्त्या परिवारं ततः परम् ।
ततो ग्रहांश्च दिक्पालांस्तदस्त्राणि च पूजयेत् ।
उच्चस्थे ग्रहपञ्चके सुरगुरौ सेन्दौ नवम्यां तिथौ
लग्ने कर्कटके पुनर्व्वसुदिने मेषं गते पूषणि ।
निर्द्दग्धुं निखिलाः पलाशसमिधो मध्यादयोध्यारणे
राविर्भूतमभूदपूर्व्वविभवं यत्किञ्चिदेकं महः ।
ततो वाद्यादिकं कृत्वा दद्यादर्घ्यं विशेषतः ।
मूलमन्त्रेण दद्याद्वै भक्त्या पुष्पाञ्जलित्रयम् ।
एवमष्टसु यामेषु षड्धा च जपेद्व्रती ।
इतिहासकथां श्रुत्वा गीतनृत्यैर्निशां नयेत् ।
ततः परदिने प्रातः स्नानं कृत्वा विधानतः ।
रामं दूर्व्वादलश्यामं भक्त्या भक्त्या प्रपूजयेत् ।
दक्षिणां विधिवद्दत्त्वा ततोऽच्छिद्रावधारयेत् ।
भोजयित्वा ततो विप्रान् स्वयं पारणमाचरेत् ।
य इदं शृणुयान्नित्यं पुण्याहे च विशेषतः ।
बहुपुत्रो धनाढ्यश्च अन्ते ब्रह्मत्वमाप्नुयात् ।
सङ्ग्रामे वैरिणो हत्वा सर्व्वत्र विजयी भवेत्
राजद्वारे महाघोरे संग्रामे शत्रुसङ्कटे ॥

श्रामरामस्तस्य रत्नाकरो भवेत् ॥
ा यः शृणुयाद्रोगी उल्लाघः स भवेत् सदा
पुत्रवती सा च पतिचित्तानुवर्त्तिनी ।
तिदर्पदलनी सा भवेन्नात्र संशयः ॥
द्रां लभते वित्तं भीतो भवति निर्भयः ।
ानतपांस्यस्य तीर्थस्नानादिकाः क्रियाः ॥
ामनवमी-नाम-व्रतस्यैककला-समाः ।
कस्मै न दातव्यं न प्रकाश्यं कदाचन ॥
ाय भक्तियुक्ताय शत्रवेऽपि प्रदापयेत् ।
परतन्त्राय विकत्थनरताय च ॥
न वक्तव्यं यदीच्छेदात्मनो हितम् ।
तत् कथितं वत्स तव स्नेहाद्व्रतोत्तमम् ॥
दं कुरुते भक्त्या श्रीरामनवमीव्रतम् ।
पापप्रमुक्तश्च अन्ते ब्रह्मत्वमाप्नुयात् ॥"
। श्रीरामभक्तितरङ्गिण्यां ब्रह्मसनकसंवादे
रामनवमीव्रतकथा समाप्ता ॥

..न्, (श्रीर्विद्यतेऽस्येति । श्री + त्रिपादि-
त् लत्व् ।) लक्ष्मीवान् । इत्यमरः ॥ शोभा-
ाय ॥

ता, स्त्री, (श्रीविशिष्टा लता ।) महा-
तिमती । इति राजनिर्घण्टः ॥

त्सः,पुं,(श्रीयुक्तं वक्षं वक्षो यस्य ।) विष्णुः ।
सुचिह्नविशेषः । स तु वक्षस्थशुक्लवर्ण-
क्षिणावर्त्तलोमावली । (यथा, रघुः ।१०।१०।
भानुनिभश्रीवत्सं लक्ष्मीविभ्रमदर्पणम् ।
स्तुभाख्यमपांसारं विभ्राणं बृहतोरसा ॥")
र्त्ता ध्वजः । इति हेमचन्द्रः ॥ सुरङ्गाभेदः ।
ति त्रिकाण्डशेषः ॥

त्सकी,[न्]पुं, श्रीवत्सकः श्रीवत्सवत् चिह्न-
स्त्यस्येति । श्रीवत्सक + इनिः ।) हृदावर्त्त-
यः । इति हेमचन्द्रः ॥

त्सभृत्, पुं, (श्रीवत्सं बिभर्त्तीति । भृ +
क्विप् ।) विष्णुः । इति हेमचन्द्रः ॥

वत्सलाञ्छनः, पुं, विष्णुः । इत्यमरः ।१।१।२२॥
श्रीवत्सो लाञ्छनं चिह्नं यस्य श्रीवत्सलाञ्छनः ।
स्वप्नन्दमहापुरुषलक्षणं श्वेतरोमावर्त्त-
विशेषः श्रीवत्स इति सर्वस्वे । श्रीवत्सो हृत्-
पद्मतमणिविशेषः कौस्तुभवदिति कृष्णदासः ।"
त्यमरटीकायां भरतः ॥

वत्साङ्कः, पुं, (श्रीवत्सः अङ्कश्चिह्नं यस्य ।)
विष्णुः । इति हलायुधः ॥ (यथा, बृहत्सं-
हितायाम् । ४३ । ३ ।
'लब्धवराः क्षीरोदं गत्वा ते तुष्टुवुः सुराः
इन्द्राः ।
श्रीवत्साङ्कं कौस्तुभमणिकिरणोद्भासितोर-
स्कम् ॥")

ीवराहः, पुं, (श्रिया युक्तो वराहः ।) विष्णुः ।
इति त्रिकाण्डशेषः ॥

ीवल्ली,स्त्री,(श्रीयुता वल्ली ।) कर्कटकवृक्षभेदः ।
तत्पर्य्यायः । शिववल्ली २ कर्कटश्रृङ्गी ३ शिवल्ली
४ चर्मा ५ कटुफला ६ दुरारोहा ७ । अस्याः
गुणाः । कटुत्वम् । उष्णत्वम् । वातश्लेष्मना-

पक्वत्वञ्च । तत्फलं तैललेपघ्नमत्यम्लं रुचिकृत्
परम् । इति राजनिर्घण्टः ॥

श्रीवाटी,स्त्री,नागवल्लीभेदः । इति राजनिर्घण्टः ॥

श्रीवारकः, पुं, (श्रियं वारयति कामयते इति ।
वृ + णिच् + ण्वुल् ।) शितावरशाकः । इति
राजनिर्घण्टः ॥

श्रीवासः, पुं, (श्रियं सरलवृक्षं वासयतीति ।
वस + णिच् + अच् ।) सरलवृक्षरसः । टार-
पिन् इति भाषा । तत्पर्य्यायः । पायसः २ वृक-
धूपः ३ श्रीवेष्टः ४ सरलद्रवः ५ । इत्यमरः ॥
तैलपर्णी ६ श्रीपिष्टः ७ । इति जटाधरः ॥
श्रीवेशः ८ । इति शब्दरत्नावली ॥ अस्य गुणाः ।
"श्रीवासः सरलं पूतिः कुन्दुरुर्ग्रन्थिपर्णकम् ।
सिह्लकः परमा मांसी देवदारु सुरा नखम् ।
सर्व्वेऽमी परमा लक्ष्मी रक्षोघ्ना ज्वर-
नाशनाः ॥"
इति राजवल्लभः ॥

अन्यत् श्रीवेष्टशब्दे द्रष्टव्यम् ॥ (श्रियो लक्ष्म्या
वासः आश्रयस्थानम् ।) पद्मम् । (यथा, राजेन्द्र
कर्णपूरे । ४२ ।
"श्रीवासो यशसां पदं सुमनसामध्यासदं सम्पदां
यत्रागच्छति गोचरं नयनयोः काश्मीरमीन-
ध्वजः ॥")
विष्णुः । इति मेदिनी ॥ शिवः । इति शब्द-
रत्नावली ॥

श्रीवासाः, [स्] पुं, श्रियं सरलवृक्षं वासयतीति ।
वस + णिच् + असुन् ।) सरलद्रवः । इत्यमर-
टीका ॥

श्रीविद्या, स्त्री, (श्रिया विद्या ।) महाविद्यावि-
शेषः । सा तु त्रिपुरसुन्दरी । तस्याः षट्त्रिंश-
द्भेदाः ग्रन्थबाहुल्यभिया न लिखिताः । अथ
श्रीविद्या । तत्र भेदः । ज्ञानार्णवे ।
"भुमिचन्द्रः शिवो माया शक्तिः कृष्णाध्व-
मादनौ ।
अर्द्धचन्द्रश्च विन्दुश्च नवार्णो मेरुरुच्यते ॥
महात्रिपुरसुन्दर्य्या मन्त्रा मेरुसमुद्भवाः ।
सकला भुवनेशानी कामेशो बीजमुद्धृतम् ।
अनेन सकला विद्याः कथयामि वरानने ॥
शक्त्यन्तस्तुर्य्यवर्णोऽयं कलमध्ये सुलोचने ।
वाग्भवं पञ्चवर्णाढ्यं कामराजमथोच्यते ॥
मादनं शिवचन्द्राढ्यं शिवाग्नं मीनलोचने ।
कामराजमिदं भद्रे षड्वर्णं सर्व्वमोहनम् ॥
शक्तिबीजं वरारोहे चन्द्राद्यं सर्व्वमोहनम् ।
एतामुपास्य देवेशि कामः सर्व्वाङ्गसुन्दरः ।
कामराजो भवेद्देवि विद्येयं सर्व्वदर्पिणी ॥"
अस्यार्थः । शक्तिरेकारः तुर्य्य ईकारः तेन
ककार एकार ईकारलकारमहामाया वाग्-
भवकूटम् । शिवो हकारः चन्द्रः सकारः तेन
हकारकल्ह्रकारमहामाया इति कामराज-
कूटम् । चन्द्रः सकारः तेन सकारककारलकार-
महामाया इति शक्तिकूटम् । तैः त्रिभिः कूटैः
श्वेतकोलः, पुं, (श्वेतः कोलः क्रोडदेशो यस्य ।) शफरमत्स्यः । इति त्रिकाण्डशेषः ॥

श्वेतखदिरः, पुं, (श्वेतः खदिरः ।) शुक्लखदिरः । तत्पर्य्यायः । कदरः २ सोमसारः ३ कार्म्मुकः ४ । सूक्ष्मपत्रः ५ सोमवारः ६ सोमवल्कः ७ कौन्तय ८ पत्रिद्रुमः ९ । अस्य गुणाः । तिक्तत्वम् । कषायत्वम् । कटुत्वम् । उष्णत्वम् । वक्त्ररोगकृमिकफवातास्रदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ पुस्तकान्तरे कार्म्मुकस्थाने [illegible] इति च [illegible] १० । अन्यच्च ।
"खदिरः श्वेतसारोऽन्यः कदरः सोमवल्कलः ।
कदरः [illegible] ॥"
इति भावप्रकाशः ॥

श्वेतगजः, पुं, (श्वेतः शुक्लो गजः ।) इन्द्रहस्ती । इति हेमचन्द्रः ॥ शुक्लवर्णहस्ती च ॥

श्वेतगरुत्, पुं, (श्वेतः गरुत् पक्षो यस्य ।) हंसः । इत्यमरः । २ । ५ । २३ ॥

श्वेतगुञ्जा, स्त्री, (श्वेता गुञ्जा ।) शुक्लगुञ्जा । सादा कुँच इति भाषा । तत्पर्य्यायः । श्वेतकाम्बोजी २ भिल्लिका ३ काकादनी ४ काकपीलुः ५ चक्रशल्या ६ चूडाला ७ । अस्या गुणाः । तीक्ष्णत्वम् । उष्णत्वम् । तस्या बीजं वान्तिकरम् । तस्याः शिफा शूलविषनाशिनी । तस्याः पत्रं वश्ये शस्तम् । इति राजनिर्घण्टः ॥
अपि च ।
"श्वेता रक्तोच्चटा प्रोक्ता कृष्णला चापि सा स्मृता ।
रक्ता सा काकचिञ्ची स्यात् काकनन्ती च रक्तिका ॥
काकादनी काकपीलुः सा स्मृताङ्गारवल्लरी ।
गुञ्जाद्वयन्तु केश्यं स्यात् वातपित्तज्वरापहम् ॥
मुखशोषभ्रमश्वासतृष्णामदविनाशनम् ।
नेत्रामयहरं वृष्यं बल्यं कण्डूं व्रणं हरेत् ।
कृमीन्द्रलुप्तकुष्ठानि रक्ता च धवलापि च ॥"
इति भावप्रकाशः ॥
अन्यच्च ।
"गुञ्जा शिखण्डिका ताम्रा रक्तिका काकशाम्बिका ।
श्वेतान्या चक्रिका चूडा दुमापा काकपीलुका ॥
गुञ्जा केश्या बलकरा वृष्या पित्तकफापहा ।
नेत्रामयहरा हृष्या हन्ति कण्डुग्रहव्रणान् ।
कृमीन्द्रलुप्तकुष्ठानि तद्वच्छ्वेतापि शस्यते ॥"
इति मदनपालनिर्घण्टः ॥

श्वेतचन्दनं, क्ली, (श्वेतं चन्दनम् ।) शुक्लचन्दनम् । इति राजनिर्घण्टः ॥ अस्य पर्य्यायगुणौ चन्दनशब्दे द्रष्टव्यौ ॥

श्वेतचिल्ली, स्त्री, (श्वेता चिल्ली ।) शाकभेदः । तत्पर्य्यायः । वास्तुकी २ सुपत्रा ३ श्वेतचिल्लिका ४ सितचिल्ली ५ उपचिल्ली ६ क्षारपत्री ७ वृहद्वास्तुकी ८ । अस्या गुणाः ।
"श्वेतचिल्ली सुमधुरा क्षारा च शिशिरा च सा ।
विदोषशमनी पथ्या ज्वरदोषविनाशिनी ॥"
इति राजनिर्घण्टः ॥

श्वेतच्छदः, पुं, (श्वेतः छदो यस्य ।) हंसः । इति हलायुधः ॥ गन्धपत्रः । इति शब्दचन्द्रिका ॥ बाबुइ तुलसी इति भाषा ॥

श्वेतजीरकः, पुं, (श्वेतो जीरकः ।) शीरजीरकः । इति राजनिर्घण्टः ॥

श्वेतटङ्कणं, क्ली, (श्वेतं टङ्कणम् ।) श्वेतटङ्कणम् । इति राजनिर्घण्टः ॥

श्वेतटङ्कणं, क्ली, (श्वेतं टङ्कणम् ।) क्षारविशेषः । सादा सोहागा इति भाषा । तत्पर्य्यायः । श्वेतटङ्कणम् २ लोहद्राविः ३ निग्धः [illegible] ५ सिन्धुः [illegible] । [illegible] ६ गिरम् ७ द्रावकम् ८ शीतचारम् ९ टङ्कणम् १० । अस्य [illegible] स्निग्धत्वम् । कटुत्वम् । उष्णत्वम् । वयश्वासविषकासमलनाशित्वञ्च । [illegible] निर्घण्टः ॥

श्वेतदूर्व्वा, स्त्री, (श्वेता दूर्व्वा ।) शुक्लदूर्व्वा । [illegible] पर्य्यायः । गोलमी २ सिताख्या ३ [illegible] भद्रा ५ भार्गवी ६ दुर्म्मरा ७ गौरी ८ शानकान्ता ९ अनन्ता १० श्वेता ११ [illegible] श्वेतकाण्डा १३ प्रचण्डा १४ सहस्रवीर्य्या [illegible] सहस्रकाण्डा १६ सहस्रपर्व्वा १७ [illegible] शुभा १९ सुपर्व्वा २० सितच्छदा २१ [illegible] कच्छान्तरुहा २३ । अस्या गुणाः । [illegible] त्वम् । मधुरत्वम् । [illegible] कासदाहतृष्णानाशित्वम् । रुच्यत्वञ्च । [illegible] राजनिर्घण्टः ॥

श्वेतद्विपः, पुं, (श्वेतः शुक्लो द्विपः ।) हस्ती । इति त्रिकाण्डशेषः ॥

श्वेतद्वीपः, पुं, क्ली, (श्वेतो द्वीपः ।) [illegible] स च वैकुण्ठाख्यविष्णुधाम । यथा,—
"श्वेतद्वीपं गतवति त्वयि द्रष्टुं तदीश्वरम् ।
तव ज्ञायमभूत् प्रश्नस्त्वं मां [illegible]
इति श्रीभागवते १० स्कन्धे ८७ [illegible]
अपि च ।
"एकदा भ्रमणो लो[illegible]
पर्य्यटन् रावणो लोकान् दृष्ट्वा नत्वाब्रवीत् [illegible]
भगवन् ! ब्रूहि मे युद्धं कुत्र सन्ति महाबल
योद्धमिच्छामि बलिभिस्त्वं [illegible]
मुनिर्ध्यात्वा तु सुचिरं श्वेतद्वीपनिवासिनः ।
महाबला महाकायास्तत्र याहि महामते ।
विष्णुपूजारता ये वै विष्णुना निहताश्च ये ।
त एव तत्र संजाता अजेयाश्च सुरासुरैः ।
श्रुत्वा तद्रावणो वेगान्मन्त्रिभिः पुष्पकेण [illegible]
योद्धुकामः समागत्य श्वेतद्वीपसमीपतः ।
तत्प्रभाहततेजस्कं पुष्पकं नाचलत्ततः ।
त्यक्त्वा विमानं प्रययौ मन्त्रिणश्च [illegible]
प्रविशन्नेव तद्द्वीपं धृतो हस्तेन योषिता ।
पृष्टश्च त्वं कुतः कोऽसि प्रेषितः केन [illegible]
इत्युक्तो मौनया स्त्रीभिर्हसन्तीभिः पुनः पुनः
लघुत्वहस्तादिनिर्मुक्तस्तासां स्त्रीणां [illegible]
आश्चर्य्यमतुलं मत्वा चिन्तयामास दुर्म्मतिः ।
विष्णुना निहतो यामि वैकुण्ठमिति [illegible]
मयि विष्णुर्यथा कुप्येत्तथा कार्य्यं [illegible]
इति निश्चित्य वैदेहीं जहार विधिनोदितः ।
ज्ञात्वैव परमात्मानं स जगाम [illegible]
इति श्रीब्रह्माण्डपुराणे श्रीमदध्यात्मरामायणे उत्तरकाण्डे ४ अध्यायः ॥ अन्यच्च ।
"श्वेता गङ्गा सरः श्वेतं य[illegible] पश्येत् [illegible]
[illegible]
मत्स्यार्त्तं माधवश्चैव श्वेतद्वीपं स [illegible] ।"
इति तीर्थचिन्तामणिः ॥

श्वेतधातुः, पुं, (श्वेतो धातुः ।) खटिका । इति राजनिर्घण्टः ॥ दुग्धपाषाणश्च ॥

श्वेतधामा, [न्] पुं, (श्वेतं धाम किरणं यस्य ।) चन्द्रः । कर्पूरः । समुद्रफेनः । इति मेदिनी ॥

श्वेतनीलः, पुं, (श्वेतो नीलश्च । वर्णो वर्णेनेति समासः ।) मेघः । इति शब्दरत्नावली ॥ शुक्ल-नीलवर्णश्च ॥

श्वेतपत्रः, पुं, (श्वेतं पत्रं पक्षो यस्य ।) हंसः । श्वेतपत्ररथशब्दार्थदर्शनात् । शुक्लपर्ण, त्रि ॥

श्वेतपत्ररथः, पुं, श्वेतपत्रो हंसो रथो वाहनं यस्य । ब्रह्मा । इति शब्दमाला ॥

श्वेतपद्मं, क्ली, (श्वेतं शुक्लं पद्मम् ।) सिताम्भोजम् । तत्पर्य्यायः । सिताब्जम् २ पुण्डरीकम् ३ श्वेत-सरोजम् ४ हरिनेत्रम् ५ शरत्पद्मम् ६ शार-दम् ७ शम्भुवल्लभम् ८ । अस्य गुणाः । हिम-त्वम् । तिक्तत्वम् । मधुरत्वम् । पित्तदाहास्रभ्रम-नाशित्वम् । तृषाप्रशमनत्वम् । पिपासामोहनाशित्वञ्च । इति राजनिर्घण्टः ॥

श्वेतपर्णा, स्त्री, (श्वेतानि पर्णानि यस्याः ।) वारिपर्णी । इति रत्नमाला ॥ पाना इति भाषा ॥ (भद्राश्ववर्षस्य पर्वतविशेषे, पुं । यथा, मार्कण्डेये । ५८ । ४ ।

"पूर्वेण यत् स्थितं वर्षं भद्राश्वं तन्निबोध मे । श्वेतपर्णश्च नीलश्च शैवालश्चाचलोत्तमः । कौरञ्जः पर्णशालाग्रः पञ्चैते तु कुलाचलाः ॥")

श्वेतपर्णासः, पुं, (श्वेतः पर्णासः ।) श्वेततुलसी । यथा,—

"अर्ज्जकः श्वेतपर्णासो गन्धपत्रः कुठेरकः ॥" इति रत्नमाला ॥

श्वेतपाटला, स्त्री, (श्वेता पाटला ।) शुक्लपाटला-वृक्षः । इति जटाधरः ॥

श्वेतपिङ्गः, पुं, (दहन श्वेतः जटया पिङ्गश्च । वर्णो वर्णेनेति समासः ।) सिंहः । इति हेम-चन्द्रः ॥

श्वेतपिङ्गलः, पुं, (श्वेतः पिङ्गलश्च ।) सिंहः । इति त्रिकाण्डशेषः ॥ शुक्लकपिलवर्णयुक्त, त्रि ॥ महादेवः । यथा, महाभारते । १३ । १७ । १३६ ।

"महाप्रसादो दमनः शत्रुहा श्वेतपिङ्गलः ॥")

श्वेतपिङ्गलकः, पुं, (श्वेतपिङ्गल + स्वार्थे कन् ।) सिंहः । इति शब्दमाला ॥

श्वेतपिण्डीतकः, पुं, (श्वेतः शुक्लः पिण्डीतकः ।) महापिण्डीतरुः । इति राजनिर्घण्टः ॥

श्वेतपुष्पः, पुं, (श्वेतानि पुष्पाणि यस्य ।) सिन्धुवारवृक्षः । इति जटाधरः राजनिर्घण्टश्च ॥ (श्वेतं पुष्पम् ।) शुक्लकुसुमे, क्ली । (यथा, सुश्रुते । १ । ११ ।

"श्वेतपुष्प-रक्तपुष्प-सहस्रं जुहुयात् ॥")

श्वेतपुष्पकः, पुं, (श्वेतानि पुष्पाणि यस्य । कप् ।) करवीरवृक्षः । इति राजनिर्घण्टः ॥ शुक्लपुष्प-युक्ते, त्रि ॥

श्वेतपुष्पा, स्त्री, (श्वेतं पुष्पं यस्याः ।) घोषातकी । श्वेतघोषा इति भाषा । इति रत्नमाला । नागदन्ती । मृगेर्व्वारुः । इति राजनिर्घण्टः ॥

श्वेतपुष्पिका, स्त्री, (श्वेतं पुष्पं यस्याः । ततः स्वार्थे कन् । टापि अत इत्वम् ।) पुत्रदात्री । महाशणपुष्पिका । इति राजनिर्घण्टः ॥

श्वेतप्रसूनकः, पुं, (श्वेतानि प्रसूनानि यस्य । कप् ।) वृक्षविशेषः । यथा,—

"तिलः शाकतरुः सेतुवृक्षः श्वेतप्रसूनकः ।" इति शब्दमाला ॥

शुक्लपुष्पयुक्ते, त्रि ॥

श्वेतबृहती, स्त्री, (श्वेता बृहती ।) शुक्लक्षुद्र-वार्त्ताकी । तत्पर्य्यायः । श्वेता २ श्वेतकण्टा-रिका ३ श्वेतसिंही ४ श्वेतफला ५ श्वेतवार्त्ता-किनी ६ । अस्या गुणाः ।

"विज्ञेया श्वेतबृहती वातश्लेष्मविनाशिनी । रुच्या व्यञ्जनयोगेन नानानेत्रामयापहा ॥" इति राजनिर्घण्टः ॥

श्वेतभण्डा, स्त्री, (श्वेता भण्डा ।) श्वेतापरा-जिता । इति रत्नमाला ॥

श्वेतमन्दारकः, पुं, (श्वेतो मन्दारकः ।) वृक्ष-विशेषः । श्वेत आक इति हिन्दी भाषा ॥ तत्पर्य्यायः । पृथ्वीकुरुवकः २ दीर्घायुष्यः ३ सितालर्कः ४ दीर्घालर्कः ५ सिताह्वयः ६ । इति राजनिर्घण्टः ॥

श्वेतमरिचं, क्ली, (श्वेतं मरिचमिव ।) शोभा-ञ्जनबीजम् । इत्यमरः ॥ शुक्लमरिचञ्च ॥

श्वेतमालः, पुं, (श्वेता शुक्लवर्णा माला यस्य ।) मेघः । धूमः । इति विश्वः ॥ मेदिनीशब्द-रत्नावल्योः खतमाल इति पाठः ॥

श्वेतरक्तः, पुं, (श्वेतो रक्तश्च ।) पाटलवर्णः । इत्यमरः ॥ गोलापी रङ् इति भाषा ॥

श्वेतरञ्जनं, क्ली, (श्वेतं सिताभ्रं रञ्जयतीति । रञ्ज + ल्युः ।) सीसकम् । इति केचित् ॥

श्वेतरथः, पुं, (श्वेता रथा यस्य ।) शुक्रग्रहः । इति शब्दरत्नावली ॥ शुक्लवर्णस्यन्दनश्च ॥

श्वेतराजी, स्त्री, (श्वेतेन वर्णेन राजते इति । राज + अच् । गौरादित्वात् ङीष् ।) चचेण्डा ॥ इति राजनिर्घण्टः ॥

श्वेतरोचिः, [स्] पुं, (श्वेतं रोचिर्यस्य ।) चन्द्रः । इति हलायुधः ।

श्वेतरोहितः, पुं, (पुष्पेण श्वेतः फलेन लोहितः यस्य सः ।) वृक्षविशेषः । श्वेत रोहिड़ इति हिन्दी भाषा । तत्पर्य्यायः । सितपुष्पः २ सिताह्वयः ३ सिताङ्गः ४ शुक्लरोहितः ५ लक्ष्मीवान् ६ जनवल्लभः ७ । अस्य गुणाः । कटुत्वम् । स्निग्धत्वम् । कषायत्वम् । सुशी-तलत्वम् । कृमिदोषव्रणप्लीहरक्तनेत्रामयनाशि-त्वञ्च । इति राजनिर्घण्टः ॥

श्वेतलोध्रः, पुं, (श्वेतो लोध्रः ।) पट्टिकालोध्रः । इति राजनिर्घण्टः ॥

श्वेतवचा, स्त्री, (श्वेता वचा ।) अतिविषा । शुक्लवचा । सादा वच् इति भाषा । तत्पर्य्यायः । मेध्या २ षड्ग्रन्था ३ दीर्घपत्रिका ४ तीक्ष्ण-गन्धा ५ हैमवती ६ मङ्गल्या ७ । अस्या गुणाः । अतिगुणाढ्यत्वम् । मतिमेधायुःसन्दीप्तित्वम् । कफनाशित्वञ्च । इति राजनिर्घण्टः ॥ अन्यच्च ।

"पारसीकवचा शुक्ला प्रोक्ता हैमवतीति सा । हैमवत्युदिता तद्वत् शूलं हन्ति विशेषतः ॥" तद्वत् वचावत् । इति भावप्रकाशः ॥

श्वेतवल्कलः, पुं, (श्वेतं वल्कलं यस्य ।) उडुम्बर-वृक्षः । इति जटाधरः ॥ शुक्लत्वक् च ॥

श्वेतवाजी, [न्] पुं, (श्वेतो वाजी घोटको यस्य ।) चन्द्रः । इति हेमचन्द्रः ॥ अर्ज्जुनः इति जटाधरः ॥ शुक्लघोटकश्च ॥

श्वेतवासाः, [स्] पुं, (श्वेतं वासो यस्य ।) शुक्ल-वस्त्रधारिसंन्यासी । इति हलायुधः ॥ परिहित शुक्लवसने, त्रि ॥

श्वेतवाः, [ह्] पुं, (श्वेतेन वाहनेन उह्यते इति वह + ण्विः ।) इन्द्रः । इति मुग्धबोधव्याक-रणम् ॥

श्वेतवाहः, पुं, (श्वेतः शुक्लो वाहो घोटको यस्य ।) अर्ज्जुनः । इन्द्रः । इति केचित् ॥

श्वेतवाहनः, पुं, (श्वेतं वाहनं यस्य ।) चन्द्रः । अर्ज्जुनः । इति मेदिनी ॥ (यथा, महाभारते । ४ । ४२ । १५ ।

"श्वेताः काञ्चनसन्नाहा रथे युज्यन्ति मे हयाः । संग्रामे युध्यमानस्य तेनाहं श्वेतवाहनः ॥") मकरः । इति शब्दरत्नावली ॥ (राजाधि-देवस्य पुत्रः । स तु विदूरथस्य पौत्रः । यथा, हरिवंशे । ३८ । २ ।

"राजाधिदेवः शूरश्च विदूरथसुतोऽभवत् । राजाधिदेवपुत्रास्तु जज्ञिरे वीर्य्यवत्तराः । दत्तातिदत्तौ बलिनौ शोनश्वः श्वेतवाहनः ॥")

श्वेतवाही, [न्] पुं, (श्वेतवाहः श्वेतघोटकोऽस्या-स्तीति । इनिः ।) अर्ज्जुनः । इति शब्दरत्नावली ॥

श्वेतवुह्ना, स्त्री, (श्वेता वुह्ना ।) वनतिक्ता । यथा,—

"श्वेतवुह्ना कपोतस्तु वनतिक्ता विसर्पिणी । शङ्खिनी चाकचित्रा च गिरिजा धूमरच्छदा ॥" इति रत्नमाला ॥

श्वेतवृक्षः, पुं, (श्वेतो वृक्षः ।) वरुणवृक्षः । इति राजनिर्घण्टः ॥ शुक्लतरुश्च ॥

श्वेतशरपुङ्खा, स्त्री, (श्वेता शरपुङ्खा ।) क्षुप-विशेषः । श्वेत सरफोंका इति हिन्दी भाषा । तत्पर्य्यायः । सितशायका २ सितपुङ्खा ३ श्वेत-पुङ्खा ४ शुभ्रपुङ्खा ५ । अस्या गुणाः । कटुत्वम् । उष्णत्वम् । कृमिवातरुजापहत्वम् । गुणाढ्य-त्वञ्च इति राजनिर्घण्टः ॥

श्वेतशिग्रुः, पुं, (श्वेतः शुक्लः शिग्रुः ।) शुक्ल-शोभाञ्जनः । सादा सजिना इति भाषा । तत्पर्य्यायः । सुतीक्ष्णः २ मुखभङ्गः ३ सिता-ह्वयः ४ सुमूलः ५ श्वेतमरिचः ६ रोचनः ७ मधुशिग्रुकः ८ । अस्य गुणाः । कटुत्वम् । तीक्ष्णत्वम् । शोफ... [illegible] ...नाशि-त्वम् । रुच्यत्वम् [illegible] इति राज-निर्घण्टः ॥

...कर्णं सुम, धर्माभिहृत् ।
...दीर्घं तोयेन विस्फारन् ।
...गदप्रेन गिरिर्निहृत ॥"

इति मात्स्यकारः ॥

श्वेतशिंशपा, स्त्री, (श्वेता शिंशपा ।) शुक्लशिंशपावृक्षः । तत्पर्य्यायः । श्वेतव्वा २ श्वेतशिंशिका ३ । अस्या गुणाः । तिक्तत्वम् । शिशिरत्वम् । पित्तदाहनाशित्वञ्च । इति राजनिर्घण्टः ॥

श्वेतशृङ्गः, पुं, (श्वेता शृङ्गा यस्य ।) यवः । इति जटाधरः ॥ शुक्लशृङ्गयुक्ते, त्रि ॥

श्वेतशूरणः, पुं, (श्वेतः शूरणः ।) वनशूरणः । इति राजनिर्घण्टः ॥

श्वेतसर्षपः, पुं, वदरवृक्षः । इति जटाधरः ॥ (श्वेत, सर्पः ।) शुक्लवर्णाहिश्च ॥

श्वेतसारः, पुं, (श्वेतः सारो यस्य ।) खदिरः । इति जटाधरः ॥

श्वेतसुरसा, स्त्री, (श्वेता सुरसा ।) शुक्लशेफालिका । इत्यमरः ॥

श्वेतस्यन्दा, स्त्री, अपराजिता । इति राजनिर्घण्टः ॥

श्वेतहयः, पुं, (श्वेतो हयः ।) इन्द्राश्वः । इति त्रिकाण्डशेषः ॥ (श्वेतो हयो यस्य ।) अर्ज्जुनः । इति हेमचन्द्रः ॥ (यथा, महाभारते ।७।२०।१।
"ततः श्वेतहयः कृष्णमब्रवीदजितञ्जयः ।
एष मां भ्रातृभिः सार्द्धं सुयम्यार्ह्यतेऽच्युत ॥")
इन्द्रः । शुक्लवर्णघोटकश्च ॥

श्वेतहस्ती, [न्] पुं, (श्वेतो हस्ती ।) ऐरावतः । इति शब्दरत्नावली ॥ शुक्लगजश्च ॥

श्वेता, स्त्री, वराटिका । काष्ठपाटला । शङ्खिनी । इति मेदिनी ॥ अतिविषा । इति रत्नमाला ॥ अपराजिता । श्वेतबृहती । श्वेतकण्टकारी । पाषाणभेदी । शिलावल्कला । श्वेतदूर्वा । वचोपमा । स्फटी । शर्करा । क्षीरिदः । कना इति कसे इति च हिन्दी भाषा । तत्पर्य्यायः । हरिकापर्णी २ पर्णशूना ३ अतिनिद्रा ४ । अस्या गुणाः । अतिमधुरत्वम् । शीतलत्वम् । दाहदाहत्वम् । अतिकारित्वञ्च । इति राजनिर्घण्टः ॥

श्वेताख्यिनः, स्त्री, शुक्लविष्णुा । भाषा मिश्री इति भाषा । तत्पर्य्यायः । विषघ्नी २ विडनाग्नि ३ विषघ्ना ४ अर्धांशुभुजो ५ भद्रा ६ निशाचरा ७ देवनी ८ । अस्या गुणाः । रेचनत्वम् । वाढत्वम् । गुरुत्वम् । अरोचिश्वासम्लेष्म-वित्तदोषोदरनाशित्वम् । रुचत्वञ्च । इति भाव-प्रकाशः ।

श्वेताम्ला स्त्री तृणविशेषः । तत्पर्य्यायः । श्वेताम्ला २ शिरोदी ३ शिशिका ४ । अस्या गुणाः । मधुरत्वम् । रुचत्वम् । हिमत्वम् । शिवादिनाशित्वम् । बलदाहत्वञ्च । इति राजनिर्घण्टः ॥

श्वेतार्कः, पुं, (श्वेत शुक्लवर्णः अर्कः ।) शुक्लार्कवृक्षः । भाषा भाकन्द इति भाषा । तत्-

पर्य्यायः । गणरूपः २ श्वेतः ३ प्रतापः ४ विश्वरकः ५ महागाथा ६ सूर्य्याह्वयिका ७ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । मलशोधनकारकत्वम् । मूत्रकृच्छ्रशोफव्रणदोषविनाशित्वञ्च । इति राजनिर्घण्टः ॥

श्वेतावरः, पुं, (श्वेतं शुक्लवर्णमाद्यमिति आ वृ + अच् ।) शिताबरशाकः । इति राजनिर्घण्टः ॥

श्वेताह्वा, स्त्री, (श्वेता आह्वा यस्याः ।) शितपाटला । इति राजनिर्घण्टः ॥

श्वेतेक्षुः, पुं, (श्वेत इक्षुः ।) शुक्लवर्णेक्षुः । सादा आक् इति भाषा । तत्पर्य्यायः । सितेक्षुः २ कोष्ठेक्षु ३ वंशपत्रकः ४ शतपोरः ५ अपाण्डुरेक्षुः ६ । अस्य गुणाः । कठिनत्वम् । स्निग्धत्वम् । गुरुत्वम् । कफमूत्रकारित्वम् । शीतलत्वम् । पित्तदाहनाशित्वम् । विपाके कोमलत्वञ्च । इति राजनिर्घण्टः ॥

श्वेतोदर, पुं, (श्वेतं उदरं यस्य ।) कुवेरः । इति त्रिकाण्डशेषः ॥ (दर्व्वीकरसर्पविशेषः । यथा, सुश्रुते कल्पस्थाने ४ अध्याये ।
"श्वेतोदरो महाशिरा अलगर्द्दो ह्याशीविष इति ॥") शुक्लवर्णजठरश्च ॥

श्वैत्रं, क्ली, श्वित्रम् । इत्यमरटीका ।

श्वैतौही, स्त्री, (श्वेतवाह + ङीप् ।) इन्द्राणी । इति मुग्धबोधव्याकरणम् ॥

श्वोवसीयसं, क्ली, (वसुशब्दः प्रशस्तवाची तत ईयसुनि वसीय । श्वः शब्द उत्तरपदार्थ-प्रशंसामाशीर्विषयतामाह । मयूरव्यंसकादित्वात् समासः ।"श्वसो वसीयःश्रेयसः ।" ५।४।८० इति अच् ।) कल्याणम् । यथा,—
"श्वःश्रेयसं शुभशिवे कल्याणं श्वोवसीयसं
क्षेमं भावुकभविककुशलमङ्गलभद्रमद्रशस्तानि ॥"
इति हेमचन्द्रः ॥
तद्वति, त्रि ॥

ष

ष, मूर्द्धन्यषकारः । स तु ऊष्मवर्णविशेषः । ... ... गतिविशिष्टस्थानः । ... मूर्द्धा । इति व्याकरणम् ॥ (यथा, शिक्षायाम् । १० ।
"ऋटुरषाणां मूर्द्धा" ...)
तत्पर्य्यायः ।
"षः श्वेतो ...
... ३ ... ४ ...
... ६ ...
... ८ ...

...द्योतो ...
... १३
... २१
... २४ ...
... २८
... च ।
"षकारः श्वेत ...
... मलिश माया च

अस्य स्वरूपं यथा,—
"षकारं शृणु चार्व्वङ्गि !
रक्तचन्द्रसमप्रभं
चतुर्वर्गमयं ...
पञ्चदेवमयं वर्णं पञ्चप्राणमयं
रजःसत्त्वतमोयुक्तं
त्रिबिन्दुसहितं वर्णं
सर्व्वदेवमयं वर्णं हृदि ...
इति

अस्य लेखनप्रकारो यथा,—
"चतुष्कोणात्मिका रेखा ...
कुञ्जमात्रा शक्तिरूपा ...
मात्रा मध्यगता या तु ...

अस्य ध्यानं यथा,—
"चतुर्भुजां चकोराक्षीं
शुक्लवर्णां त्रिनयना वरदाञ्च
रत्नालङ्कारभूषाढ्या श्वेतमाल्योपशोभिता
देवगन्धर्व्वैरभिगम्यां सेवितां
एवं ध्यात्वा षकारन्तु ...
इति ...

(धात्वनुबन्धविशेषः । यथा,
"षि: कुटादि: ष ... ...
... ...ददिति ।
... ॥
।" इति

...त्रिनेत्रां ... सुवर्णवर्णविभूषितम् ॥"
इति ... ॥

त, सम्बन्धे। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-
सक० सेट्।) सचति। इति दुर्गादासः ॥
व, ङ सेचने। इति कविकल्पद्रुमः ॥ (भ्वा०-
आत्म०-सक०-सेट्।) ङ, सचते जलं मेघः।
इति दुर्गादासः ॥
ट, अंशने। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-
अक०- सेट्।) अंशके अवयवे। सटति पटः
अवयवी स्यादित्यर्थः। इति दुर्गादासः ॥
–, [ष्] त्रि, संख्याविशेषः। छय इति भाषा।
तद्वाचकानि यथा,। वक्रकोणः १ त्रिशिरो-
नेत्रम् २ तर्कः ३ अङ्गम् ४ दर्शनम् ५ चक्र-
वर्त्ती ६ कार्त्तिकेयमुखम् ७ गुणः ८ रसः ९
ऋतुः १० स्वरवाहुः ११ रूपम् १२। इति
कविकल्पलता ॥
–कर्म्म, [न्] क्ली, (षट्प्रकारं कर्म्म।) षट्-
प्रकारशान्त्यादिकर्म्म। यथा, शारदायाम्।
"अथाभिधास्ये तन्त्रेऽस्मिन् सम्यक् षट्कर्म्म-
लक्षणम्।
सर्व्वं तन्त्रानुसारेण प्रयोगः फलसिद्धिदः ॥
शान्तिवश्यस्तम्भनानि विद्वेषोच्चाटने ततः।
मारणान्तानि शंसन्ति षट्कर्म्माणि मनीषिणः॥
रोगकृत्या ग्रहादीनां निरासः शान्तिरीरिता।
वश्यं जनानां सर्व्वेषां विधेयत्वमुदीरितम् ॥
प्रवृत्तिरोधः सर्व्वेषां स्तम्भनं तदुदाहृतम्।
स्निग्धानां क्लेशजननं मिथोविद्वेषणं मतम् ॥
उच्चाटनं स्वदेशादेर्भ्रंशनं परिकीर्त्तितम्।
प्राणिनां प्राणहरणं मारणं तदुदाहृतम् ॥
स्वदेवतादिकालादीन् ज्ञात्वा कर्म्माणि साधयेत्।
रतिर्वाणी रमा ज्येष्ठा दुर्गा काली यथाक्रमम्।
षट्कर्म्मदेवताः प्रोक्ताः कर्म्मादौ ताः प्रपूजयेत्॥
ईशचन्द्रेन्द्रनिर्ऋतिवायुग्नीनान्दिशो मताः।
सूर्य्योदयं समारभ्य घटिकादशकं क्रमात् ॥
ऋतवः स्युर्व्वसन्ताद्याः अहोरात्रं दिने दिने।
वसन्तग्रीष्मवर्षाख्यशरद्धेमन्तशैशिराः ॥"
यद्वा,—
"अहोरात्रं शरत्कालो हेमन्तश्च प्रभातकः।
पूर्व्वाह्णश्च वसन्तः स्यात् मध्याह्नो ग्रीष्म एव च।
प्रावृड्रूप्योऽपराह्णः स्यात् प्रदोषः शिशिरः
स्मृतः ॥"
अथवा,—
"अर्द्धरात्रे च हेमन्तः प्रभाते शिशिरागमः।
पूर्व्वाह्णे वसन्तः स्यात् ग्रीष्मो मध्यन्दिनागमे।
तृतीयांशे च वर्षाः स्युः शरत्सन्ध्यागमे स्मृता ॥"[illegible]
–च कालनियमः।
हेमन्तः शान्तिके प्रोक्तो वसन्तो वश्यकर्म्मणि।
शिशिरं स्तम्भने प्रोक्तं विद्वेषे ग्रीष्म एव च।
प्रावृडुच्चाटने ज्ञेया शरन्मारणकर्म्मणि ॥"[illegible]
अथ तिथिनियमः।
"पञ्चमी च द्वितीया च तृतीया सप्तमी तथा।
बुधेन्दुवारसंयुक्ता विज्ञेया वश्यकर्म्मणि ॥
[illegible] चतुर्थी त्रयोदशी [illegible]।
उच्चाटने तिथिः शस्ता प्रदोषे च [illegible]।

चतुर्द्दश्यष्टमी कृष्णा अमावास्या तथैव च।
मन्दभौमदिनोपेता शस्ता मारणकर्म्मणि ॥
बुधचन्द्रदिनोपेता पञ्चमी दशमी तथा।
पौर्णमासी तु विज्ञेया तिथिः स्तम्भनकर्म्मणि॥
शुभग्रहोदये कुर्य्यात् शुभानि च शुभोदये।
रौद्रकर्म्माणि रिक्तार्के मृत्युयोगे च मारणम् ॥"
जपेत् पूर्व्वमुखो वश्ये दक्षिणस्याभिचारके।
पश्चिमे स्तम्भनं विद्यात् उत्तरे शान्तिकं भवेत्॥
आकर्षणमथाग्नेये नैर्ऋते मारणं तथा।
उच्चाटनन्तु वायव्ये ऐशान्यां मोक्षदायकम् ॥"
अथाभिचारे कार्य्या च दक्षिणाप्लवना मही।
वसनं लोहितं प्रोक्तं उष्णीषं लोहितं स्मृतम् ॥
भूषणं लौहद्रव्येण वामेन पूजनादिकम्।
नरस्नायुविशेषेण मारणे रज्जुरीरिता
मृतस्य युद्धशूरस्य दन्तस्य गर्द्दभस्य वा।
कृत्वाक्षमालां जप्तव्यं शत्रूणां वधमिच्छता ॥
भन्नेभदन्तमणिभिर्जपेदाकर्षकर्म्मणि।
साध्यकेशसूत्रप्रोतस्तुरङ्गदशनोद्भवैः।
अक्षमालां समालोक्य विद्वेषोच्चाटने जपेत् ॥"
पद्मासनं स्वस्तिकं भूयो विकटं कुक्कुटं पुनः।
वज्रं भद्रकमित्याहुरासनानि मनीषिणः ॥
पद्मासनन्तु संयोज्य जानूर्व्वोरन्तरे करौ।
निवेश्य भूमौ संस्थाप्य व्योमस्थं कुक्कुटासनम्॥
अन्यानि यत्नकान्यानि ॥"॥
"पञ्चमुद्राः क्रमतो ज्ञेयाः पद्मपाशगदाह्वयाः।
मुषलाशनिखड्गाख्याः शान्तिकादिषु कर्म्मसु ॥
जलं शान्तिविधौ शस्तं वश्ये वह्निरुदीरितः।
स्तम्भने पृथिवी शस्ता विद्वेषे व्योम कीर्त्तितम्॥
उच्चाटने स्मृतो वायुर्भूयोऽग्निर्म्मारणे स्मृतः।
तत्तद्भूतोदये सम्यक् तत्तन्मण्डलसंयुतम्।
तत्तत् कर्म्म विधातव्यं मन्त्रिणा नियतात्मना॥"
शीतांशुसलिलक्षोणीव्योमवायुहविर्भुजाम्।
वर्णाः स्युर्मन्त्रबीजानि षट्कर्म्मसु यथाक्रमम् ॥
ग्रथनञ्च विदर्भश्च संपुटो रोधनं तथा।
योगः पल्लव इत्येते विन्यासाः षट्सु कर्म्मसु ॥
मन्त्रार्णान्तरितान् कुर्य्यात् साध्यवर्णान् यथा-
विधि।
ग्रथनं तद्विजानीयात् प्रशस्तं शान्तिकर्म्मणि ॥
मन्त्रार्णद्वयमध्यस्थं साध्यानामाक्षरं लिखेत् ॥
विदर्भ एव विज्ञेयो मन्त्रिभिर्व्वश्यकर्म्मणि ॥
आदावन्ते च मन्त्रः स्यादादावन्ते संपुटः स्मृतः।
एष स्यात् स्तम्भने शस्त इत्युक्तो मन्त्रवेदिभिः॥
नाम आद्यन्तमध्येषु मन्त्रः स्याद्रोधनं मतम्।
विद्वेषणविधानेषु प्रशस्तमिदमीरितम् ॥
मन्त्रस्यान्ते भवेन्नाम योगः उच्चाटने मतः।
अन्ते नाम्नो भवेन्मन्त्रः पल्लवो मारणे मतः ॥
[illegible] प्रकीर्त्तिताः।
[illegible] देवता षट्सु कर्म्मसु ॥"
[illegible] चन्दनं रोचनं [illegible]।
[illegible] विषाणि च ॥
[illegible]।
[illegible] विद्वेषकर्म्मणीरितम् ॥

देवताकालमुद्रादीन् सम्यक् ज्ञात्वा विचक्षणः।
षट्कर्म्माणि प्रयुञ्जीत यथोक्तफलसिद्धये ॥"॥
उच्चाटने वषट् प्रोक्तं हुँ फडन्तश्च मारणे।
स्तम्भने च नमः प्रोक्तं स्वाहा शान्तिकपौष्टिके ॥
होमतर्पणयोः स्वाहा न्यासपूजनयोर्नमः।
मन्त्रान्ते योजयेन्मन्त्री जपकाले यथास्थिति ॥"
अस्यार्थः एतानि तत्तत्कर्म्मणि जपकाले
मन्त्रान्ते योजयित्वा मन्त्रं जपेत्। होमादिषु
नायं नियमः। होम इति कश्चित् तत्र।
"अग्निकार्य्ये जपेत् स्वाहा नमः सर्व्वत्र चार्च्चने
शान्तिपुष्टिवशङ्के पाकर्षोच्चाटनमारणे ॥
स्वाहा-स्वधा-वषट्-हुञ्च वौषट् फट् योजयेत्
क्रमात्।
वश्याकर्षणसन्तापज्वरे स्वाहा प्रकीर्त्तिता ॥
क्रोधोपशमने शान्तौ प्रीतौ योज्यं नमो बुधैः।
वौषट् सम्मोहनोद्दीपपुष्टिमृत्युञ्जयेषु च ॥
हुङ्कारं प्रीतिनाशे च मारणे च्छेदने तथा।
उच्चाटने च विद्वेषे वषट् पद्मकृतौ वषट्।
मन्त्रोद्दीपनकार्य्येषु लाभालाभे वषट् स्मृतः ॥"
इति विशेषवचनाद्धोमे नायं विधिः ॥ * ॥
शान्तिकादौ मन्त्रलिखनपत्रादिनियमस्तत्र एव
"शान्तिके राजतं ताम्रं भूर्ज्जपत्रञ्च वश्यके।
सर्व्वकार्य्येषु सौवर्णं क्रूरे स्यात् प्रेतकर्पटम् ॥
त्रिगन्धं शान्तिके प्रोक्तं पञ्चगन्धन्तु वश्यके।
सर्व्वकार्य्येऽष्टगन्धः स्यात् क्रूरे चाष्टविषाणि च
शान्तिके लेखनी दूर्व्वा वश्यादौ शिखि-
पुच्छिका ॥
हेम्ना सर्व्वाणि कार्य्याणि क्रूरे स्यात् काक-
पुच्छिका ॥
गृहेषु शान्तिकर्म्म स्यात् वश्यञ्च चण्डिकागृहे
देवालये च सर्व्वाणि श्मशाने क्रूरकर्म्म च ॥"॥
अथ भूतानामुदयः।
"दण्डाकारा गतिर्भूमेः पुटयोरुभयोरपि।
तोयस्य पावकस्योर्द्ध्वं गतिस्तिर्य्यक् नभस्वतः ॥
गतिर्व्योम्नो भवेन्मध्ये भूतानामुदयः स्मृतः।
धरोदये कुर्य्यात् स्तम्भनं वश्यमाकर्षम् ॥
शान्तिकं पौष्टिकं कर्म्म तोयस्य समये वशी।
मारणादीनि मरुतो विपक्षोच्चाटनादिकं।
द्वेषादिनाशने शस्तमुदये च विहायसः ॥"॥
अथ भूतानां मण्डलानि।
"वृत्तं दिवस्तत् षड्बिन्दुलाञ्छितं मातरिश्वनः
त्रिकोणं स्वस्तिकोपेतं वह्नेरर्द्धेन्दुसंयुतम् ॥
[illegible]।
[illegible] विदुर्बुधाः ॥
[illegible]
[illegible] वर्णाः ॥"
[illegible]।
"[illegible]।
[illegible]।
[illegible] ॥"
[illegible]।
"[illegible] ॥"

तत् प्रायश्चित्तपरम्। इति तन्त्रसारः॥ *॥ योगाङ्गषट्प्रकारक्रिया। तद्यथा,—
"धौतिर्वस्तिस्तथा नेतिर्नौलिकी त्राटकस्तथा।
कपालभातिश्चैतानि षट्कर्म्माणि समाचरेत्॥
अन्तर्धौतिर्दन्तधौतिर्हृद्धौतिर्मूलशोधनम्।
धौत्यश्चतुर्विधा प्रोक्ता घटं कुर्व्वन्ति निर्म्मलम्॥
वातसारं वारिसारं वह्निसारं बहिष्कृतम्।
घटस्य निर्म्मलार्थाय अन्तर्धौतिश्चतुर्विधा॥"*॥
प्रयोगः।
"काकचञ्चुवदास्येन पिबेद्वायुं शनैः शनैः।
चालयेदुदरं पश्चाद्वर्त्मना रेचयेत् शनैः॥
वातसारं परं गोप्यं देहनिर्म्मलकारकम्।
सर्व्वरोगक्षयकरं देहानलविवर्द्धकम्॥१॥
आकण्ठं पूरयेद्वारि वक्त्रेण च पिबेत् शनैः।
चालयेदुदरेणैव चोदराद्रेचयेदधः॥
वारिसारं परं धौतं देहनिर्म्मलकारकम्।
साधयेद्यः प्रयत्नेन देवदेहं प्रपद्यते॥२॥
नाभिग्रन्थिं मेरुपृष्ठे शतवारञ्च कारयेत्।
उदरामयजां त्यक्त्वा जठराग्निं विवर्द्धयेत्।
वह्निसारमिदं धौतं योगिनां योगसिद्धिदम्॥३॥
काकीमुद्रां साधयित्वा पूरयेदुदरं मरुत्।
धारयेदर्द्धयामन्तु चालयेदधवर्त्मना॥
इदं धौतं परं गोप्यं न प्रकाश्यं कदाचन।
नाभिमग्नजले स्थित्वा शक्तिनाडीं विसर्ज्जयेत्॥
कराभ्यां चालयेन्नाडीं यावन्मलविसर्ज्जनम्।
तावत् प्रक्षाल्य नाडीञ्च उदरे वेशयेत् पुनः॥
इदं प्रक्षालनं गोप्यं देवानामपि दुर्लभम्।
केवलं धौतिमात्रेण देवदेहो भवेत् ध्रुवम्॥
यामार्द्धधारणात् शक्तिं यावन्न साधयेन्नरः।
बहिष्कृतमहद्धौतिस्तावदेव न जायते॥४॥
दन्तमूलं जिह्वामूलं रन्ध्रे च कर्णयुग्मयोः।
कपालरन्ध्रं पञ्चैते दन्तधौतिर्विधीयते॥*"॥
प्रयोगः।
"खादिरेण रसेनाथ मृत्तिकाभिश्च शुद्धिभिः।
मार्ज्जयेद्दन्तमूलञ्च यावत् किल्विषमाहरेत्॥
दन्तमूलं परं धौतिर्योगिनां योगसाधने।
नित्यं कुर्य्यात् प्रभाते च दन्तरक्षाय योगवित्॥
दन्तमूलं धारणादिकार्य्येषु योगिनां यतः॥१॥
अथातः सम्प्रवक्ष्यामि जिह्वाशोधनकारणम्॥
जरामरणरोगादि नाशयेत् दीर्घलम्बिका।
तर्ज्जनी मध्यमानामा अङ्गुलित्रययोगतः॥
वेशयेद्गलमध्ये तु मार्ज्जयेल्लम्बिकामलम्।
शनैः शनैर्मार्ज्जयित्वा कफदोषं निवारयेत्॥
मार्ज्जयेन्नवनीतेन दोहयेच्च पुनः पुनः।
तदग्रं लोहयन्त्रेण कर्षयित्वा पुनः पुनः॥
नित्यं कुर्य्यात् प्रयत्नेन रवेरुदयकेऽस्तके।
एवं कृते तु नित्ये च लम्बिका दीर्घतां गता॥२॥
तर्ज्जन्यग्राङ्गुल्यग्रेण मार्ज्जयेत् कर्णरन्ध्रयोः।
नित्यमभ्यासयोगेन नादान्तरप्रकाशनम्॥३॥४॥
वृद्धाङ्गुष्ठेन दक्षेण मार्ज्जयेद्भालरन्ध्रकम्।
एवमभ्यासयोगेन कफदोषं निवारयेत्॥
नाडी निर्म्मलतां याति दिव्यदृष्टिः प्रजायते।
निद्रान्ते भोजनान्ते च दिवान्ते च दिने दिने॥५
हृद्धौतिं त्रिविधां कुर्य्यात् दण्डवज्जलवाससा।
रम्भादण्डं हरिद्दण्डं वेत्रदण्डस्तथैव च॥
हृन्मध्ये चालयित्वा तु पुनः प्रत्याहरेत् शनैः।
कफपित्तं तथा क्लेदं रेचयेदूर्द्ध्ववर्त्मना।
दण्डधौतिविधानेन हृद्रोगं नाशयेत् ध्रुवम्॥"
हरिद्दण्डं वटक्षुरि॥१॥
"भोजनान्ते पिबेद्वारि आकण्ठं पूरितं सुधीः।
ऊर्द्ध्वदृष्टिं क्षणं कृत्वा तज्जलं वमयेत् पुनः।
नित्यमभ्यासयोगोऽयं कफपित्तं निवारयेत्॥२
चतुरङ्गुलविस्तारं सूक्ष्मवस्त्रं शनैर्ग्रसेत्।
पुनः प्रत्याहरेदेतत् प्रोच्यते धौतकर्म्मकम्॥
गुल्मज्वरप्लीहकुष्ठं कफपित्तं विनश्यति।
आरोग्यं बलपुष्टिश्च भवेत्तस्य दिने दिने॥३॥
अपानक्रूरतां तावन्मलं यावन्न शोधयेत्।
तस्मात् सर्व्वप्रयत्नेन मलशोधनमाचरेत्॥
पीतमूलस्य दण्डेन मध्यमाङ्गुलिनापि वा।
यत्नेन चालयेद्गुह्यं वारिणा च पुनः पुनः॥
वारयेत् कोष्ठकाठिन्यमामाजीर्णं निवारयेत्।
कारणं कान्तिपुष्ट्योश्च दीपनं वह्निमण्डलम्॥*॥
जलवस्तिः शुष्कवस्तिर्वस्ती च द्विविधौ स्मृतौ।
जलवस्तिं जले कुर्य्यात् शुष्कवस्तिं क्षितौ सदा॥
नाभिमग्नजले पायुं न्यस्तनालोत्कटासनम्।
आकुञ्चनं प्रकाशञ्च जलवस्तिं समाचरेत्॥
प्रमेहञ्च गुदावर्त्तं क्रूरवायुं निवारयेत्।
भवेत् स्वच्छन्ददेहश्च कामदेवसमो भवेत्॥"
न्यस्तनालोत्कटासनं जङ्घयोः हस्तं दत्त्वा शारङ्गवदुदरं कुर्य्यादित्यर्थः॥१॥
"वस्तिं पश्चिमतानेन चालयित्वा शनैः शनैः।
अश्विनीमुद्रया पायुं आकुञ्चयेत् प्रकाशयेत्॥
एवमभ्यासयोगेन कोष्ठदोषो न विद्यते।
विवर्द्धयेत् जाठराग्निं आमवातं विनाशयेत्॥२
वितस्तिमानं सूक्ष्मसूत्रं नासानाले प्रवेशयेत्।
मुखान्निर्गमयेत् पश्चात् प्रोच्यते नेतिकर्म्मकम्॥
साधनान्नेतिकर्म्मापि खेचरीसिद्धिमाप्नुयात्।
कफदोषा विनश्यन्ति दिव्यदृष्टिश्च जायते॥*॥
अमन्दवेगं तुन्दञ्च भ्रामयेदुभपार्श्वयोः।
सर्व्वरोगान्निहन्तीह देहानलविवर्द्धनम्॥"
इति नौलिकी॥*॥
"निमेषोन्मेषकं त्यक्त्वा सूक्ष्मलक्ष्यं निरीक्षयेत्।
यावदश्रु निपतति त्राटकं प्रोच्यते बुधैः॥
एवमभ्यासयोगेन शाम्भवी जायते ध्रुवम्।
न जायते नेत्ररोगो दिव्यदृष्टिप्रदायकम्॥*॥
मोत्क्रम्य पीत्वा वक्त्रेण नासानालैर्विरेचयेत्।
व्युत्क्रमेण व्युत्क्रमेण सीत्क्रमेण विशेषतः॥
भालभातिं त्रिधा कुर्य्यात् कफदोषं निवारयेत्॥
इडया पूरयेद्वायुं रेचयेत् पिङ्गलया पुनः।
पिङ्गलया पूरयित्वा पुनश्चन्द्रेण रेचयेत्॥
पूरकं रेचकं कृत्वा वेगेन न तु धारयेत्।
एवमभ्यासयोगेन कफदोषं निवारयेत्॥*॥
नासाभ्यां जलमाकृष्य वक्त्रेण रेचयेत् पुनः।
पायं पायं प्रकुर्व्वीत श्लेष्मदोषं निवारयेत्।
न जायते वार्द्धकञ्च ज्वरो नैव प्रजायते॥"
इति घेरण्डसंहितायां षट्कर्म्मशोधनं ऽध्यायः॥

षट्कर्म्मा,[न्] पुं, (षट् कर्म्माणि ... यस्य।) यागादिभिर्युतो ब्राह्मणः। इत्यमरः। तथा च।
"इज्याध्ययनदानानि याजनाध्यापने तथा।
प्रतिग्रहश्च तैर्युक्तः षट्कर्म्मा विप्र उच्यते॥"
षट् कर्म्माण्यस्य इति बहुव्रीहिः। इति भरतः॥

षट्कूटा, स्त्री, भैरवीविशेषः। यथा,—
अथ षट्कूटा भैरवी।
"डाकिनी राकिनी बीजे लाकिनी ... युग्मं।
साकिनी हाकिनी बीजे आहृत्य सुरसुन्दरि।
आद्यमैकारसंयुक्तमन्त्यदीकारमण्डितम्।
शक्रस्वरान्वितं देवि तार्त्तीयं बीजमानिषेत्।
बिन्दुनादकलाक्रान्तं त्रितयं शैलसम्भवे।
तृतीयबीजं सविसर्गं इत्यपि केचित्।
तन्त्रे।
"ऊरी क्षमामादनं जीवं ... ...
अर्केण मायाशक्राभ्यां क्रमात्तं मण्डितं ... ।
बिन्दुनादान्वितं चाद्यद्वयमन्त्यं विसर्गवत्।
ध्यानमस्याः प्रवक्ष्यामि ...।
बालसूर्य्यप्रभां देवीं जवाकुसुमसन्निभाम्।
मुण्डमालावलीरम्यां बालसूर्य्यसमाम्बराम्।
सुवर्णकलसाकारपीनोन्नतपयोधराम्।
पाशाङ्कुशौ पुस्तकञ्च तथा च जपमालिकाम्।
दधतीमिति शेषः।
"हिरास्त्रेण षडङ्गानि विधाय परमेश्वरि।
यन्त्रमस्या वरारोहे त्रिकोणं तत्पुटे ...।
बहिरष्टदलं पद्मं रविपत्रं ततो लिखेत्।
चतुरस्रं चतुर्द्वारमेवं मण्डलमालिखेत्॥
षडङ्गावरणं देवि! पूजयेत् पूर्व्ववच्छिवे।
रत्यादि त्रितयं देवि त्रिकोणे परिपूजयेत्।
डाकिन्याद्याश्च षट्कोणे वसुपत्रे ततः परम्।
ब्राह्म्यादि युगलं पश्चाद्रविपत्रे ततः परम्।
बालायाः पीठशक्तीस्तु वामाद्याः पूजयेत्
...
चतुरस्रे लोकपालान् सायुधान् परमेश्वरि।
अनेनैव विधानेन नित्याख्या ...।
इति तन्त्रसारः।

षट्कोणं, क्ली, लग्नात् षष्ठस्थानम्। तत् ... स्थानम्। यथा,—
"पातालं हिबुकं चैव सुहृद्बन्धुचतुर्थकम्।
त्रित्रिकोणञ्च नवमं दुश्चिक्यं स्यात् तृतीय...
धीस्थानं पञ्चमं ज्ञेयं यामित्रं सप्तम ...
द्युनं द्युनं तथास्तास्यं षट्कोणं रिपुमन्दि...
इति ज्योतिस्तत्त्व॥
(षट् कोणा यस्य।) वज्रम्। इति निर्घण्टः॥ षड्रसस्तस्तोत्री यन्त्रभेदः। इ... गर्भगलन्त्रम्।

ं पट्कोणमध्यं स्फुरदनलपुरे तारगं दिग्
लक्ष्मीः
या कन्दर्पभूमिस्तदनु रसपुटेष्वासिते वीज-
पट्कम् ।"
इति तन्त्रसारः ॥

क्रं, क्ली, (षण्णां चक्राणां समाहारः ।)
ोरस्थपद्माकारपट्प्रकारचक्रम् । यथा,—
ासपद्मानि तत्रैव सन्ति लोका इव प्रभो ।
: पृथ्वीमयं चक्रं हरिद्वर्णं चतुर्द्दलम् ॥
द्र्ध्वे तु पड्दलं चक्रं स्वाधिष्ठानमिति स्मृतम् ।
लोकवह्निनिलयं तप्तचामीकरप्रभम् ॥
भौ दशदलं चक्रं कुण्डलिन्या समन्वितम् ।
लाञ्जननिभं ब्रह्मस्थानं पूर्व्वकमन्दिरम् ॥
णिपूराभिधं स्वच्छं जलस्थानं प्रकीर्त्तितम् ।
शादित्यसंकाशं हृदि चक्रमनाहतम् ॥
भकाख्यं द्वादशारं वैष्णवं वायुमन्दिरम् ।
ण्ठे विशुद्धशरणं षोड़शारं पुरोदयम् ॥
भवोवरचक्राख्यं चन्द्रविन्दुविभूषितम् ।
ज्ञाालयं चक्रं द्विदलं श्वेतमुत्तमम् ॥
षाचक्रमिति ख्यातं मनःस्थानं प्रकीर्त्तितम् ।
हस्रदलमेकार्णं परमात्मप्रकाशकम् ॥
त्यज्ञानमयं सत्यं सहस्रादित्यसन्निभम् ।
ट्चक्राणीह भेद्यानि नैतद्वेद्यं कथञ्चन ॥"
इति पाद्मे स्वर्गखण्डे २७ अध्यायः ॥०॥
न्यच्च ।
तत्त्वस्वरूपमेकं तत् पट्चक्रं प्रतिलक्षयेत् ।
ट्चक्रेऽपि महामायां सर्व्वं ध्यात्वा प्रयत्नतः ॥
तस्थचिन्मूलमन्त्रेण आदिषोड़शचक्रकम् ।
ादिषोड़शचक्रस्थां साधकानन्दकारिणीम् ॥
चिन्तयन् साधको देवीं जपकर्म्म समारभेत् ।
भ्रुवोरुपरि नाड़ीनां त्रयाणां प्रान्त उच्यते ।
तत्प्रान्ते विषयस्थानं पट्कोणं चतुरङ्गुलम् ॥
रक्तवर्णन्तु योगज्ञैराज्ञाचक्रमितीरितम् ॥
कण्ठे त्रयाणां नाड़ीनां वेष्टनं विद्यते नृणाम् ।
सुषुम्णेड़ापिङ्गलानां पट्कोणं तत् पड़ङ्गुलम् ॥
तत् पट्चक्रमिति प्रोक्तं शुक्लं कण्ठस्य मध्य-
गम् ।
त्रयाणामथ नाड़ीनां हृदये चैकता भवेत् ॥
तत्स्थानं षोड़शास्रं स्यात् सप्ताङ्गुलप्रमाणतः ।
तत् पीतमुक्तं योगज्ञैरादिषोड़शचक्रकम् ॥
ध्यानानामथ मन्त्राणां चिन्तनस्य जपस्य च ।
यस्मादाद्यश्च हृदयं तस्मादादीति गद्यते ॥"
इति कालिकापुराणे ५४ अध्यायः ॥*॥
अपरञ्च ।
"मूलाधारे त्रिकोणाख्ये इच्छाज्ञानक्रियात्मके
मध्ये स्वयम्भुलिङ्गन्तु कोटिसूर्य्यसमप्रभम् ॥
तदूर्द्ध्वे कामबीजन्तु क-ल-शान्तीन्दुनादकम् ।
तदूर्द्ध्वे तु शिखाकारा कुण्डली ब्रह्मविग्रहा ॥
तद्वाह्ये हेमवर्णाभं व-स-वर्णचतुर्द्दलम् ।
द्रुतहेमसमप्रख्यं पद्मं तत्र विभावयेत् ॥
तदूर्द्ध्वेऽग्निसमप्रख्यं पड्दलं हीरकप्रभम् ।
वादिलान्तपड़र्णेन युक्ताधिष्ठानसञ्ज्ञकम् ॥
मूलमाधारपट्कानां मूलाधारं ततो विदुः ।
स्वशब्देन परं लिङ्गं स्वाधिष्ठानं ततो विदुः ॥
तदूर्द्ध्वे नाभिदेशे तु मणिपूरं महत्प्रभम् ।
मेघाभं विद्युदाभञ्च बहुतेजोमयं ततः ।
मणिवद्भिन्नं तत् पद्मं मणिपूरं तथोच्यते ॥
दशभिश्च दलैर्युक्तं डादिफान्ताक्षरान्वितम् ।
शिवेनाधिष्ठितं पद्मं विश्वलोकैककारणम् ॥
तदूर्द्ध्वेऽनाहतं पद्ममुद्यदादित्यसन्निभम् ।
कादिठान्ताक्षरैरर्कपत्रैश्च समधिष्ठितम् ॥
तन्मध्ये वाणलिङ्गन्तु सूर्य्यायुतसमप्रभम् ।
शब्दब्रह्ममयं शब्दोऽनाहतस्तत्र दृश्यते ॥
तेनाहताख्यं पद्मं तत् मुनिभिः परिकीर्त्त्यते ।
आनन्दसदनं तत्तु पुरुषाधिष्ठितं परम् ॥
तदूर्द्ध्वन्तु विशुद्धाख्यं दलषोड़शपङ्कजम् ।
स्वरैः षोड़शकैर्युक्तं धूम्रवर्णं महत्प्रभम् ॥
विशुद्धिं तनुते यस्मात् जीवस्य हंसलोकनात् ।
विशुद्धं पद्ममाख्यातं आकाशाख्यं महत् परम् ।
आज्ञाचक्रं तदूर्द्ध्वे तु आत्मनाधिष्ठितं परम् ।
आज्ञासंक्रमणं तत्र गुरोराज्ञेति कीर्त्तितम् ॥
कैलासाख्यं तदूर्द्ध्वे तु बोधनीन्तु तदूर्द्ध्वतः ।
एवञ्च शिवचक्राणि प्रोक्तानि तव सुव्रत ॥
सहस्राराम्बुजं विन्दुस्थानं तदूर्द्ध्वमीरितम् ।
इत्येतत् कथितं सर्व्वं योगमार्गमनुत्तमम् ॥"
इति तन्त्रसारः ॥

पट्चरणः, पुं, (पट् चरणा यस्य ।) भ्रमरः । इति हलायुधः ॥ (यथा, आर्य्यासप्तशत्याम् । ५८७ ।
"पट्चरणकीटलुष्टं परागघुणपूर्णमायुधं त्यक्त्वा ।
त्वां मुष्टिमेयमध्यामधुना शक्तिं स्मरो वहति ॥")
यूका । इति राजनिर्घण्टः ॥ पट्पादश्च ॥

पट्टः, क निकर्त्तने । हिंसे । दाने । बले । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-वाणे बले च अक०-हिंसे दाने च सक०-सेट् ।) मूर्द्धन्यादिटहयान्तः । क, पट्टयति लोकः । निवसति हन्ति बली स्यात् ददाति वा इत्यर्थः । इति दुर्गादासः ॥

पट्तिली,[न्]त्रि, (उद्वर्त्तनादिभेदेन पट्प्रकारास्तिलाः सन्त्यस्येति । पट्तिल + इनिः ।)जन्मतिथ्यादौ तिलकरणकपट्कर्म्मकारी । यथा,—
"तिलोद्वर्त्ती तिलस्नायी तिलहोमी तिलप्रदः ।
तिलभुक् तिलवापी च पट्तिली नावसीदति॥"
इति तिथ्यादितत्त्वम् ॥

पट्त्रिंशत्, स्त्री, (पड़धिका त्रिंशत् । मध्यपदलोपि समासः ।) संख्याविशेषः । छत्रिश इति भाषा । यथा, आह्निकचिन्तामणौ ।
"आसनाभ्यञ्जने तद्वदुद्वर्त्तनविरूक्षणे ।
सम्मार्जनं सर्पिरादिस्नपनावाहने तथा ॥
पाद्यार्घ्याचमनीयञ्च स्नानीयमधुपर्कको ।
पुनराचमनीयञ्च वस्त्रयज्ञोपवीतके ॥
अलङ्कारो गन्धपुष्पधूपदीपौ तथैव च ।
ताम्बूलादिकनैवेद्यं पुष्पमालां तथैव च ॥
अनुलेपश्च शय्या च चामरव्यजनं तथा ।
आदर्शदर्शनञ्चैव नमस्कारोऽथ नर्त्तनम् ॥
गीतवाद्ये च दानानि स्तुतिहोमप्रदक्षिणम् ।
दन्तकाष्ठप्रदानञ्च ततो देवविसर्ज्जनम् ॥
उपचारा इमे ज्ञेयाः पट्त्रिंशत् सुरपूजने ॥"
इत्येकादशीतत्त्वम् ॥

पट्त्रिंशन्मतं, क्ली, (पट्त्रिंशतस्तत्संख्यकधर्म्मशास्त्रकारिणां मुनीनां मतम् ।) पड़धिकत्रिंशत्संख्यकधर्म्मशास्त्रप्रयोजकमुनीनामभिप्रायः । यथा । तथा च पट्त्रिंशन्मतम् । इति तिथिस्वरूपकथने तिथ्यादितत्त्वम् । तेषां नामानि यथा,—
"मनुर्विष्णुर्यमो दक्षः अङ्गिरोऽत्रिबृहस्पती ।
आपस्तम्बश्चोशना च कात्यायनपराशरौ ॥
वशिष्ठव्याससंवर्त्तौ हारीतगोतमावपि ।
प्रचेताः शङ्खलिखितौ याज्ञवल्क्यश्च काश्यपः ॥
शातातपो लोमशश्च जमदग्निः प्रजापतिः ।
विश्वामित्रपैठीनसी बौधायनपितामहौ ॥
छागलेयश्च जावाली मरीचिश्च्यवनो भृगुः ।
ऋष्यशृङ्गो नारदश्च पट्त्रिंशत् स्मृतिकारकाः ॥
एतेषान्तु मतं यत्तु पट्त्रिंशन्मतमुच्यते ॥"
इति शङ्खलिखितौ ॥

पट्पदः पुं, (पट् पदानि यस्य ।) भ्रमरः । इत्यमरः ॥ (यथा, रघुः । ६ । ६८ ।
"न हि प्रफुल्लं सहकारमेत्य
वृक्षान्तरं काङ्क्षति पट्पदाली ॥")
तच्छकुनानि यथा,—
"ये पट्पदाद्याः शकुनानि तेषामाथर्व्वरूपाणि निरूपयामः ।
स्थैर्य्येन वामो यदि सञ्जुगुञ्जन्
पश्येत वा वामदिशं प्रसर्पन् ।
आस्वादयेद्वा कुसुमं प्रशस्तं
भृङ्गस्तदा स्यात् सुमहान् प्रमोदः ।
अत्रापरे सन्ति च पट्पदा ये
यावासु ते वामगताः प्रशस्ताः ॥"
इति वसन्तराजशाकुने पट्पदादयः १५ वर्गः ॥०
यूका । इति राजनिर्घण्टः ॥ पट्चरणे, त्रि ॥ (पट्पदविशिष्टे च त्रि । यथा, महाभारते । १४ । ५ । १६ ।
"पुरञ्च ते सुगुप्तं स्यात् दृढ़प्राकारतोरणम् ।
अट्टालकसंवाधं पट्पदं सर्व्वतोदिशम् ॥")

पट्पदप्रियः, पुं, (पट्पदानां भ्रमराणां प्रियः ।) नागकेशरवृक्षः । इति शब्दमाला ॥

पट्पदातिथिः, पुं, (पट्पदः अतिथिरिव यत्र ।) आम्रवृक्षः । इति त्रिकाण्डशेषः ॥

पट्पदानन्दवर्द्धनः, पुं,(पट्पदानामानन्दं वर्द्धयतीति । वृध + ल्युः ।) किङ्किरातवृक्षः । इति राजनिर्घण्टः ।

पट्पदी, स्त्री [illegible] ानि यस्याः । ङीप् ।)
यूका । [illegible] ः ॥ भ्रमरपदी च

षट्प्रज्ञः, पुं, (षट्सु रसेषु प्रज्ञा यस्य ।) कामुकः । यथा,—
"षिड़्गो व्यलीकः षट्प्रज्ञः कामकेलिर्व्विदूषकः पीठकेलिः पीठमर्द्दी भविलञ्छिद्रुरो विटः ॥"
इति त्रिकाण्डशेषः ॥
(षट्सु धर्म्मादिषु प्रज्ञा यस्य ।) धर्म्मादिशास्त्रविज्ञः । यथा,—
"धर्म्मार्थकाममोक्षेषु लोकतत्त्वार्थयोरपि ।
षट्सु प्रज्ञास्ति यस्योच्चैः स षट्प्रज्ञ इति स्मृतः ॥"
इति च त्रिकाण्डशेषः ॥

षड्क्षीणः, पुं (षट्सु रसेषु अक्षीणः ।) मत्स्यः । इति केचित् ॥

षडङ्गं, क्ली, (षण्णां अङ्गानां समाहारः ।) शरीरस्य षडवयवम् । यथा,—
"जङ्घे बाहू शिरो मध्यं षड़ङ्गमिदमुच्यते ॥"
इति शब्दचन्द्रिका ॥
वेदाङ्गषट्शास्त्राणि । यथा,—
"शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषं तथा ।
छन्दश्चेति षडङ्गानि वेदानां वैदिका विदुः ॥"
इति शब्दरत्नावली ॥*॥
अपि च । अङ्गान्याह शिक्षापद्यम् ।
"छन्दःपादौ तु वेदस्य हस्तौ कल्पोऽथ कथ्यते ।
ज्योतिषामयनं नेत्रं निरुक्तं श्रोत्रमुच्यते ॥
शिक्षाघ्राणन्तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥"
इति तिथ्यादितत्त्वम् ॥*॥
पाद्यार्घ्यादीयदानाङ्गपीठादिकम् । इति लोकप्रसिद्धम् ॥*॥ षट्प्रकारगव्यविशेषः । यथा,—
"गोमूत्रं गोमयं क्षीरं सर्पिर्दधि च रोचना ।
षड़ङ्गमेतन्माङ्गल्यं पवित्रं सर्व्वदा गवाम् ॥"
इति स्मृतिः ॥ * ॥
हृदयादिषड़वयवम् । तत्प्रमाणं न्यासशब्दे द्रष्टव्यम् ॥

षड़ङ्गः, पुं, (षट् अङ्गानि यस्य ।) क्षुद्रगोक्षुरकः । इति राजनिर्घण्टः ॥ (वेदः । यथा,—
"शिक्षाकल्पौ व्याकरणं निरुक्तं छन्दसाञ्चयः ।
ज्योतिषामयनञ्चैव षड़ङ्गो वेद उच्यते ॥")

षडङ्गजित्, पुं, (षड़ङ्गं जितवानिति । जि + क्विप् ।) विष्णुः । इति शब्दमाला ॥ षड़ङ्गजेतरि, त्रि ॥

षडभिज्ञः, पुं, (षट्सु धर्म्मार्थकाममोक्षलोकतत्त्वार्थेषु अभिज्ञा यस्य ।) बुद्धः ॥ इत्यमरः ॥

षड़शीतिः, स्त्री, रविसंक्रान्तिविशेषः । सा तु मिथुनकन्याधनुर्म्मीनराशिषु भवति । यथा, भविष्यमात्स्यज्योतिषेषु ।
"मृगकर्कटसंक्रान्ती द्वे तूदग्दक्षिणायने ।
विषुवती तुलामेष गोलमध्ये तथापरा ॥
धनुर्म्मिथुनकन्यासु मीने च षडशीतयः ।
वृषवृश्चिककुम्भेषु सिंहे विष्णुपदी स्मृता ॥"
इति तिथ्यादितत्त्वम् ॥
अस्याः पुण्यकालः संक्रान्तिशब्दे द्रष्टव्यः ॥*॥ षड़धिकाशीतिसंख्या । इत्युद्वाहतत्त्वम् ॥ छेयाशी इति भाषा ॥

षड़शीतिचक्रं, क्ली, (षडशीतेश्चक्रम् ।) मिथुनकन्याधनुर्म्मीनराशिस्थरवेः शुभाशुभफलज्ञानार्थं नरवराङ्गनराकारचक्रम् । यथा,—
"मुखे चैक करे वेदाः पादयुग्मे द्वयं द्वयम् ।
क्रोड़े बाणस्तथा वेदाः शिरे सव्येतरेऽपि च ॥
द्वयं द्वयं तथा नेत्रे मस्तके त्रितयं तथा ।
द्वयञ्चैव तथा गुह्ये षडशीत्यां रवेः स्थितिः ॥
मुखे दुःखं करे लाभः पादयोर्भ्रमणं हृदि ।
कान्ता स्याद्धनं वामे हस्ते स्यात् स्त्रीयभेनृपाम् ॥
सम्मानं नेत्रयोश्चैव अपमानश्च मस्तके ।
गुह्ये चैव भवेन्मृत्युः षडशीतिफलश्रुतिः ॥"
इति ज्योतिस्तत्त्वम् ॥

षडष्टकं, क्ली, योगविशेषः । स तु वरकन्ययोः स्वस्वराश्यपेक्षया परस्परषष्ठाष्टमराशिसम्बन्धः स च मित्रारिभेदेन द्विविधः । तत्र मित्रषड़ष्टकं यथा । श्रीपतिरत्नमालायाम् ।
"मकरसमेतं मिथुनं कन्याकलसौ मृगेन्द्रमीनौ च ।
वृषभतुले अलिमेषौ कर्क्कटधनुषी च मित्रविधौ ॥"
षडष्टकाविति शेषः ॥*॥ अरिषडष्टकमाह ।
"मकरः करिकुलरिपुणा
कन्या मेषेण सह झषस्तुलया ।
कर्किघटौ वृषधनुषी
वृश्चिकमिथुने चारिविधौ ॥
यदि कन्याष्टमे भर्त्ता भर्त्तुः षष्ठे च कन्यका ।
षडष्टकं विजानीयात् वर्ज्जितं विद्वरैरपि ॥"*
षडष्टकादौ तारानियममाह । भीमपराक्रमः ।
'सौहृद्ये ह्युभयोर्द्वयोरपि तयोरैकाधिपत्येऽपिवा तारापट् च सुमित्रमित्रजननक्षेमार्थसम्पद्यदि षट्काष्टे नव पञ्चके व्ययधने योगे च युयोषितोः प्रीत्यायुःसुखवृद्धिपुष्टिजनकः कार्य्यो विवाहस्तदा ॥"
गर्गः ।
"मरणं तारविरोधे ग्रहरिपुभावे चिरेण ।
रोगादि नरनार्य्योः षट्काष्टे वैरं भवेदाशु ॥"
व्यासः ।
"मैत्रादियोगेऽपि षडष्टकादौ
तारा विपत्प्रत्यरिनैधनाख्याः ।
वर्ज्या विवाहे पुरुषोडुतो हि
प्रीतिः परा जन्मसु तारकासु ॥"
इति ज्योतिस्तत्त्वम् ॥*॥
मतान्तरं यथा,—
"सिंहेन मकरः श्रेष्ठो कन्यया मेष उत्तमः ।
तुलया सह मीनस्तु कुम्भेन सह कर्कटः ॥
धनुषा वृषभः श्रेष्ठो मिथुनेन च वृश्चिकः ।
एतत् षड़ष्टकं प्रोक्तं भवत्येव न संशयः ॥"
इति गारुडे ६१ अध्यायः ॥

षडाननः, पुं, (कृत्तिकादीनां षण्णां स्तनपानार्थं षट् आननानि यस्य ।) कार्त्तिकेयः । इत्यमरः ॥ (यथा, महाभारते । ३ । २३१ । २० ।
"स्तोष्यामि देवैरर्च्चितमिष्टं जुष्टं भक्त्या गुह्यं नामभिरप्रमेयम् ।
षडाननं शक्तिधरं सुवीरं निबोध चैतानि कुरुप्रवीर ! ॥")
तस्य कार्त्तिकेयनामकारणं यथा,—
"अग्निपुत्रः कुमारस्तु शरस्तम्बे व्यजा[...]
तस्य शाखो विशाखश्च नैगमेयश्च पृष्ठज[...]
अपत्यं कृत्तिकानाञ्च कार्त्तिकेयस्ततः[...]"
इति मात्स्ये ५ अ[...]
(षट्सु वदनेषु, क्ली । यथा, रघुः । १४[...]
"सर्व्वासु मातृष्वपि वत्सलत्वात्
स निर्व्विशेषप्रतिपत्तिरासीत् ।
षड़ाननापीतपयोधरासु
नेता चमूनामिव कृत्तिकासु ॥")

षडाम्नायाः, पुं, (षट् आम्नायाः ।) षड्वक्त्रविनिर्गतषट्प्रकारतन्त्रशास्त्रम् ।
श्रीशिव उवाच ।
"अथेदानीं प्रवक्ष्यामि आम्नायकथनं [...]
पूर्व्वाम्नायो यदा मन्त्रस्तदा [...]
सदाशिवोऽहं भगवानाचारः परिकीर्त्ति[...]
एवं वै दक्षिणाम्नायो दक्षिणस्यां दिशि[...]
एवं हि पश्चिमाम्नायः [...] दिशि[...]
एवमेवोत्तराम्नाय उत्तरस्यां दिशि स्थि[...]
मुखमूर्द्धकृतं देवि ! यत् प्रोक्तं तव सन्नि[...]
ऊर्द्ध्वाम्नायश्च कथितो देवानामपि दुर्ल्ल[...]
यदा चाधोमुखं देवि यत् प्रोक्तं गिरि[...]
अध आम्नाय इत्युक्तः सत्यं सत्यं सुमध्य[...]
षडाम्नायाश्च कथिताश्चोत्पत्तिक्रमनाम[...]
यस्मिन् यस्मिंश्च ये देवाः कथिताश्च व[...]
तान्देवांश्च प्रवक्ष्यामि साधकानां हिता[...]
श्रीविद्याभेदसहिता तारा च त्रिपुरा[...]
भुवनेशी चान्नपूर्णा पूर्व्वाम्नाये प्रकीर्त्ति[...]
बगलामुखी च वशिनी त्वरिता धनदा[...]
वशिनी बालभैरव्यादयः ।
महिषघ्नी [...]
महासरस्वती विद्या तथा वाग्वादिनी[...]
प्रत्यङ्गिरा भवानी च [...]
कालिका भेदसहिता ताराभेदैश्च संयुत[...]
मातङ्गी भैरवी छिन्ना तथा धूमावती[...]
उत्तराम्नायकथिताः कलौ शीघ्रफलप्रदा[...]
समस्तभेदसहिताः कालिकायाः प्रकीर्त्ति[...]
द्वाविंशत्यक्षरी तारा दक्षिणाम्नायकीर्त्ति[...]
एकजटा षडाम्नाये महामोक्षप्रदायिनी[...]
तत्परा परमा विद्या न विद्यान्तरगोचर[...]
परप्रासादमन्त्रश्च ऊर्द्ध्वाम्नाये प्रकीर्त्तितः[...]
वागीश्वरादयो देवा अध आम्नायकीर्त्ति[...]
ऊर्द्ध्वाम्नायो ह्यधश्चैव केवलं मोक्षदो भवे[...]
धर्म्मार्थकाममोक्षार्थं आम्नायान्ये प्रकीर्त्ति[...]
यथोक्तविधिना भद्रे कृत्वा फलमवाप्नुयात्[...]
पूर्व्वाम्नायादिसर्व्वेषां विधानं शृणु सुन्द[...]
कृत्वा येनाशु लभते फलं यदुत्तमोत्तमम् ।
षट्कर्म्मफलदा नृणां षड़ाम्नायाः प्रकीर्त्ति[...]

तराम्नायो देवेशि तेषामाशु फलप्रदः ॥"

इति समयाचारतन्त्रे २ पटलः ॥०॥

त्र आम्नायभेदेनाचारभेद उक्तः । यथा,—

पूर्व्वाम्नायोदितं कर्म्म पाशवं कथितं प्रिये ।

दक्षिणाम्नाये तथैव पाशवं स्मृतम् ॥

पश्चिमाम्नायजं कर्म्म पशुवीरसमाश्रितम् ।

उत्तराम्नायजं कर्म्म दिव्यवीराश्रितं प्रिये ॥

व्योऽपि वीरभावेन साधयेत् पितृकानने ।

आसनं विना दिव्यः पूजयेत् पितृकानने ।

ऊर्द्ध्वाम्नायोदितं कर्म्म दिव्यभावाश्रितं प्रिये ॥"

इति निरुत्तरतन्त्रे १ पटलः ॥

षणं, क्ली, (षण्णामूषणानां समाहारः ।)

न्वितषट्कटुद्रव्यम् । यथा—

पिप्पली मरिचं शुण्ठी त्रयमेतद्विमिश्रितम् ।

कटु त्र्यूषणं व्योषं कटुत्रिकमथोच्यते ।

न्यिकानलचव्यैस्तु चतुः पञ्च षड़ूषणम् ॥"

इति शब्दचन्द्रिका ॥

पि च ।

चव्यकोलं समरिचं षड़ूषणमुदाहृतम् ।

कोलगुणं तत्तु रूक्षमुष्णं विषापहम् ॥"

इति भावप्रकाशः ॥

गया, स्त्री, षड्विधगया । यथा,—

गयागजो गयादित्यो गायत्री च गदाधरः ।

या गयासुरश्चैव षड़्गया मुक्तिदायिका ॥"

इति वायुपुराणे गयापद्धतिः ॥

गवं, त्रि, (षट् गावो यत्र । समासे अच् ।)

षट्कयुक्तहलादि । यथा,—

अष्टागवं धर्म्महलं षड्गवं जीविकार्थिनाम् ।

तुर्गवं नृशंसानां द्विगवं ब्रह्मघातिनाम् ॥"

इत्याह्निकाचारतत्त्वम् ॥०॥

व्ययविशेषः । (मनु । 'षट्त्वमस्य षट्त्वे

ड्गवच्' । ५ । २ । २८ । इत्यस्य वार्त्तिकोक्त्या

त्नि ॥) यथा,—

'पञ्चभ्यो गोयुगं युग्मे परं षट्त्वे तु षड़्गवम् ॥"

इति हेमचन्द्रः ॥

यथा च महाभारते । ८ । ३८ । ६ ।

"अन्यं तस्मै वरं दद्यां सौवर्णं हस्तिषड्गवम् ॥")

ण्णां गवां समाहारः । इति द्विगुसमासनिष्प-

नम् । तत्र, क्ली ॥

ड्ग्रन्था, (षट् ग्रन्था यस्याः सा ।) वचा ।

इति भावप्रकाशः ॥ शतपर्वा । शटी । महा-

करञ्जः । इति राजनिर्घण्टः ॥

ड्ग्रन्थि, क्ली, (षट् ग्रन्थयो यस्य) पिप्पली-

मूलम् । इति वैद्यकम् ॥ षट्पर्व्व त्रि, पु

ग्रन्थि ॥

ड्ग्रन्थिका, स्त्री, (षड् ग्रन्था यत्र । स्वार्थे कन् ।

टापि अत इत्वम् ।) शटी । इत्यमरः ॥

ड्ग्रन्थी, स्त्री, (षट् ग्रन्था यस्याः । ङीष् ।)

वचा । इति शब्दरत्नावली ॥

ड्जः, पुं, (षड्भ्यः स्थानेभ्यः जायते इति ।

जन + ड ।) सप्तस्वरान्तर्गतस्वरविशेषः ।

तन्त्रीकण्ठोत्थितस्वरविशेषः ।

पूर्व्वस्वरः । तस्य व्युत्पत्तिर्यथा,—

"नासां कण्ठमुरस्तालु जिह्वां दन्तांश्च संश्रितः ।

षड्भ्यः संजायते यस्मात् तस्मात् षड्ज इति

स्मृतः ॥"

स च मयूरस्वरतुल्यस्वरः । यथा,—

"षड्जं रौति मयूरी हि गावो नर्द्दन्ति

चर्षभम् ।

अजा विरौति गान्धारं क्रौञ्चो नदति मध्यमम् ॥"

इति भरतः ॥

(अस्मिन् चतस्रः श्रुतयो वसन्ति । यथा, सङ्गीत-

दर्पणे । ५३ ।

'तीव्रा कुमुद्वती मन्दा छन्दोवत्यस्तु षड्जगाः ॥')

तानसेनमते समस्वराणां मध्ये प्रथमस्वरोऽयम् ।

खरज् इति लोके ख्यातः । अस्योच्चारणस्थानं

कण्ठः । अयं विप्रवर्णः । अस्यार्चिकं नाम ।

अर्थात् एकस्वरमिलितः । सर्व्वस्वरापेक्षया

क्षुद्रस्वरोऽयम् । अस्य ताल एकः । अस्याष्टौ

भेदा भवन्ति । इति सङ्गीतशास्त्रम् ॥

षड्दुर्गं, क्ली, (षट् प्रकारं दुर्गम् ।) षट्प्रकार-

कोटम् । तद्यथा । धन्वदुर्गम् १ महीदुर्गम् २

गिरिदुर्गम् ३ मनुष्यदुर्गम् ४ मृद्दुर्गम् ५ वन-

दुर्गञ्च ६ । इति महाभारते राजधर्म्मः ।

षड्धा, व्य, (षष् + धाच् ।) षट्प्रकारम् । इति

व्याकरणम् ॥

षड्बिन्दुः, पुं, विष्णुः । इति त्रिकाण्डशेषः । कीट-

भेदः । इति मेदिनी । शिरोरोगस्य पक्वतैल-

विशेषः । यथा,—

"एरण्डमूलं तगरं शताह्वा

जीवन्तिका सैन्धवराखिके च ।

भृङ्गं विडङ्गं मधुयष्टिका च

विश्वौषधं कृष्णतिलस्य तैलम् ॥

अजापयस्तैलविमिश्रितञ्च

चतुर्गुणे भृङ्गरसे विपक्वम् ।

षड्बिन्दवो नासिकयोः प्रदेयाः

सर्व्वान्निहन्युः शिरसो विकारान् ॥

च्युतांश्च केशान् पलितांश्च दन्तान्

निबध्य मूलान् सुदृढीकरोति

सुपर्णगृध्रप्रतिमञ्च चक्षुः

कुर्व्वन्ति बाह्वोरधिकं बलञ्च ॥"

जीवन्तिकाच हरीतकीशाकविशेषः । इति

भावप्रकाशः ॥

षड्भुजः, त्रि, (षट् भुजा यस्य ।) षड्हस्तयुक्तः ।

यथा,—

"भास्मकिरीटशिरोः षड्भुजो नवलोचनः ।

अग्निप्रहरणो रौद्रः कालान्तकयमोपमः ।"

इति ब्रह्मवैवर्त्तपुराणे माहेश्वरस्वरूपम् ॥

(यथा च महानिर्व्वाणतन्त्रे । ४ । १७ ।

"चतुर्भुजा त्वं द्विभुजा षड्भुजाष्टभुजा

तथा ।

त्वमेव विश्वरक्षार्थं नानाशस्त्रास्त्रधारिणी ।")

कार्त्तिकेये, पुं । स तु पुरुषोत्तमक्षेत्रे षड्भुजो

भूत्वा दैत्यनाशार्थं...................। इति

शब्दकल्पद्रुमः ॥

षड्भुजा, स्त्री, (षट् भुजा इव रेखा यस्याम् ।)

फललताविशेषः । खरबुजा इति भाषा । (अस्मि-

न्नर्थे क्लीवलिङ्गेऽपि दृश्यते ॥) तत्पर्य्यायः । मधु-

फला २ षड्रेखा ३ हस्तकर्कटी ४ तिक्ता ५

तिक्तफला ६ मधुपाका ७ हस्तेर्व्वारुः ८

पत्रगुप्ता ९ । अस्याः फलगुणाः ।

"तिक्तं बाल्ये तदनु मधुरं किञ्चिदम्लञ्च पाके

निष्पक्वञ्चेत् तदमृतसमं तर्पणं पुष्टिदायि ।

हृद्यं दाहश्रमविशमनं मूत्रशुद्धं विधत्ते

पित्तोन्मादापहरकफदं षड्भुजं वीर्य्यकारि ॥"

इति राजनिर्घण्टः ॥०॥

चण्डिका । यथा । पूर्व्वदले चण्डिकां पीन-

वक्षःस्थलरुहां अग्निप्रभां षड्भुजां दक्षिणे

गदाभयवज्रधरां वामे शक्तिशूलपरशुधरां देवी-

मिति ॥०॥ रुद्रचण्डा । यथा । दक्षिणदले रुद्र-

चण्डां कृष्णवर्णां दिव्याभरणभूषितां प्रसन्नवदनां

षड्भुजां दक्षिणे वज्रशूलपरशुधरां वामे पाशा-

ङ्कुशकेशधरां देवीमिति ॥०॥ चण्डवती । यथा ।

वायुदले चण्डवतीं धूम्रवर्णां प्रसन्नवदनां सर्व्वा-

लङ्कारभूषितां षड्भुजां दक्षिणे अङ्कुशपाशाक्ष-

सूत्रधरां वामे दण्डशूलडमरुधरां देवीमिति ॥

इति बृहन्नन्दिकेश्वरपुराणोक्तदुर्गापूजापद्धतिः ॥

षड्रसः, पुं, (षट्प्रकारो रसः ।) मधुरादि-

षट्प्रकाररसः । यथा,—

"मधुरो लवणस्तिक्तः कषायोऽम्लः कटुस्तथा ।

सन्तीति रसनीयत्वादयापि षड़मी रसाः ॥"

एषां मामनषणि ।

"मधुरं गौल्यमित्याहुरिक्ष्वादौ स च लक्ष्यते ।

लवणस्तु पटुः प्रोक्तः सैन्धवादौ स दृश्यते ॥

तिक्तस्तु पिचुमर्दादौ व्यक्तमास्वाद्यते रसः ।

कषायस्तु वरस्तुल्यः स च पूगीफलादिषु ।

कटुस्तु क्षारसंज्ञः स्यान्मरीचादौ स वेद्यते ॥"

इति राजनिर्घण्टः ॥

एषां गुणास्तत्तच्छब्दे द्रष्टव्याः ॥

षड्रात्रं, क्ली, (षण्णां रात्रीणां समाहारः ।)

षडहः । यथा,—

मद्य शौचं भवेद्विप्रन् तथा चोक्तं चतुर्व्विधम् ।

गर्भस्रावे च वेदोक्तं पूर्व्वं शान्ते त्वचेतसः ॥

ब्राह्मणानामहोरात्रं क्षत्रियाणां दिनत्रयम् ।

षड्रात्रञ्चैव वैश्यानां शूद्राणां द्वादशा-

हिकम् ।"

इति वामने १४ अध्यायः ॥

षड्रेखा, स्त्री, (षट् रेखा यत्र ।) षड्भुजा ।

इति राजनिर्घण्टः । षड्गर्भा च ।

षड्लवणं, क्ली, (षट्प्रकारं लवणम् ।) सम्भी-

दिन षड्लवणम् । इति राजनिर्घण्टः ॥

षड्वक्त्रः, पुं, (षट् वक्त्राणि यस्य ।) कार्त्तिकेयः ।

यथा,—

"..।

.... षड्वक्त्रः कार्त्तिकेयश्च

..........।"

इति ....पुराणे ११४ अध्यायः ॥

षड्विधं, त्रि, (षट् विधाः प्रकारा यत्र ।) षट्प्रकारम् । यथा,—
"संज्ञा च परिभाषा च विधिर्नियम एव च ।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम् ॥"
इति मुग्धबोधटीकायां दुर्गादासः ॥
अपि च ।
"तत्र क्षितिर्गन्धहेतुर्नानारूपवती मता ।
षड्विधस्तु रसस्तत्र गन्धोऽपि द्विविधो मतः ॥"
इति भाषापरिच्छेदः ॥

षण्डः, पुं, (षणु दाने + "ञमन्तात् डः ।" उणा० १ । ११४ । इति डः । बहुलवचनात् सत्वाभावः ।) वृषभः । षाँड़ इति भाषा । तत्पर्य्यायः । गोपतिः २ इट्चरः ३ । इत्यमरः ॥ षण्ढः ४ शण्डः ५ शण्ढः ६ । इति शब्दरत्नावली ॥ क्लीवम् । इति जटाधरामरटीके ॥ समूहः । इति हलाः ॥ (यथा, हरिवंशे । २३ । ३२ ।
"नता निश्चलमूर्द्धानो बभूवुस्ते महोरगाः ।
छायाङ्के कदलीषण्डे कम्पितास्तस्य वायुना ॥")

षण्डः, पुं, क्ली, (षणु दाने + डः ।) पद्मादिकदम्बम् । पद्मकुमुदादिसमूहः । इत्यमरः । (यथा, माघे । ११ । १५ ।
"कलरवमुपगीते षट्पदौघेन धत्तः
कुमुदकमलषण्डे तुल्यरूपामवस्थाम् ॥"
चिह्नम् । यथा, भागवते । ४ । १९ । २३ ।
"यानि रूपाणि जगृहे इन्द्रो हयजिहीर्षया ।
तानि पापस्य षण्डानि लिङ्गं षण्डमिहोच्यते ॥")

षण्डाली, स्त्री, तैलमानम् । कटाक् इति भाषा । सरसी । (षण्डेन वृषभवत् कामुकपुरुषेण अलति पर्य्याप्नोतीति । अल + अच् । गौरादित्वात् ङीष् ।) कामुकस्त्री । इति मेदिनी ॥ मुद्राङ्कितमेदिन्यां दन्त्यसकारादौ लिखिता ॥

षण्ढः, पुं, (शाम्यति स्त्रियाभावात् । शम + "शमेर्ढः ।" उणा० १ । १०१ । इति ढप्रत्ययेन साधुः ।) नपुंसकः । इति राजनिर्घण्टः हेमचन्द्रश्च ॥ स च चतुर्द्दशविधः विंशतिविधश्च । यथा नारदः ।
"परीक्ष्य पुरुषः पुंस्त्वे निजैरेवाङ्गलक्षणैः ।
चतुर्द्दशविधः शास्त्रे षण्ढो दृष्टो मनीषिभिः ॥
चिकित्स्यश्चाचिकित्स्यश्च तेषामुक्तो विधिः क्रमात् ।
निसर्गषण्ढो वध्रश्च पक्षषण्डस्तथैव च ॥
अभिशापाद्गुरो रोगात् देवक्रोधात्तथैव च ।
ईर्ष्याषण्डश्च सेव्यश्च वातरेता मुखेभगः ॥
आक्षिप्तमोघबीजौ च शालिनोऽन्यापतिस्तथा ॥"
१४ ॥
आगमतत्त्वे तु ।
"निसर्गषण्ढो वध्रश्च पक्षषण्डश्च कीलकः ।
शापादिषण्डस्तथ्यश्च ईर्षकः सेव्यकस्तथा ॥
आक्षिप्तमोघबीजौ च शालीनोऽन्यापतिस्तथा ।
मुखेभगो वातरेताः कुम्भीकः षण्डनष्टकौ ॥
आसेव्यश्च सुगन्धी च षण्ढाः क्लीवानि विंशतिः ॥"
२० ॥
तेषां लक्षणानि यथा,—
"ध्वजादिरहितोत्पन्नो निसर्गषण्ढ उच्यते ।१।
गलिताण्डो भवेद्वध्रः २ पक्षान्तरितशक्तिमान् ॥
पक्षषण्ढः ३ कीलकस्तु यः क्लैब्यादात्मनः स्त्रियम् ।
परेण सह संयोज्य पश्चात्तामेव सेवते ॥ ४ ॥
शापादिषण्ढो गुर्व्वादिशापादेवापहर्षणः ।५।
सदा स्तम्भितरेतास्तु रतिस्तब्धः ६ स ईर्षकः ॥
दृष्ट्वा व्यवायमन्येषां व्यवाये यः प्रवर्त्तते ।७।
बहुस्त्रीसेवनाज्जातविरसः सेव्यकः स्मृतः ॥८॥
प्रत्यक्प्रवृत्तवीर्य्यो यो विसर्गसमये भवेत् ।
आक्षिप्तबीजः स ज्ञेयो ९ मोघबीजस्तु स स्मृतः ॥
दृष्टस्त्रीसन्निधानादेर्य्यो भवेत् पतितध्वजः ।१०।
अत्र शालीनलक्षणं पतितम् ॥ ११ ॥
परस्यामेव यस्यास्ति पुंस्त्वं सोऽन्यापतिर्म्मतः १२
वक्त्र एव तु यः कुर्य्यान्मैथुनं स मुखेभगः ॥१३॥
वातरेता विसर्गे यो वातं लिङ्गेन मुञ्चति ।१४
कुम्भीकः स तु यो नार्य्याः पायावेव प्रवर्त्तते ॥
१५ ॥
अविकारिध्वजः षण्ढो १६ नष्टो रोगादशक्तकः ।
१७ ।
शुक्रप्राश्यध्वजोच्छ्रायी आसेव्यः १८ स सुगन्धिकः ॥
यो योनिशिफयोर्गन्धमाघ्राय लभते बलम् ।१९
षण्ढः स्त्रीतुल्यवाक्चेष्टः स्त्रीधर्म्मा छिन्नलिङ्गकः ॥"२०॥
इति वाचस्पतिकृतस्मृतिरत्नावल्यामुद्वाहरहस्यविकाशः ॥ तद्दर्शनस्पर्शनयोः प्रायश्चित्तं यथा,—
"नालपेज्जनविद्विष्टान् वीरहीनां तथा स्त्रियम् ।
देवतापितृसच्छास्त्रयज्ञसत्यादिनिन्दकैः ॥
कृत्वा तु स्पर्शनालापं शुद्ध्येतार्कावलोकनात् ।
अवलोक्य तथोदक्यामन्त्यजं पतितं शवम् ॥
विधर्म्मिसूतिकाषण्ढविवस्त्रान्त्यावसायिनः ।
मृतनिर्य्यातकांश्चैव परदाररताश्च ये ॥
एतदेव हि कर्त्तव्यं प्राज्ञैः शोधनमात्मनः ।
अभोज्यसूतिकाषण्ढमार्ज्जाराखुश्वकुक्कुटान् ॥
पतितापविद्धचाण्डालमृतहारांश्च धर्म्मवित् ।
संस्पृश्य शुध्यते स्नानादुदक्याग्रामशूकरौ ॥"
इति मार्कण्डेये सदाचाराध्यायः ॥

षण्नाडीचक्रं, क्ली, (षड्विधं नाड़ीचक्रम् ।) नराणां जन्मादिषट्चक्रघटितचक्रविशेषः । यथा,—
"जन्माद्य कर्म्म ततोऽपि दशम सांघातिकं षोडशभम् ।
समुदायमष्टादशभं विनाशसंज्ञं त्रयोविंशम् ॥
आधानं पञ्चविंशं मानसमेव नरः षड्भः स्यात् ॥"*॥
तेषां फलम् ।
"दशादेहार्थहानिः स्याज्जन्मर्क्षे छपतापिते ।
कर्म्मर्क्षे कर्म्मणां हानिः पीड़ा मनसि मानसे ॥
मूर्त्तिद्रविणबन्धूनां हानिः सांघातिके तथा ॥
समस्ते सामुदायिके विनश्यत्याधिद्भवः ।
वैनाशिके विनाशः स्यादेहद्रविणसम्पदाम् ॥"
इति ज्योतिस्तत्त्वम् ॥

षण्मास्यः, त्रि, (षण्मासे भवः । षण्मास + "मासात् ण्यञ्च ।" ५ । १ । ८३ । इति यत् ।) इति सिद्धान्तकौमुदी ॥

षण्मुखः, पुं, (षट् मुखानि यस्य ।) कार्त्तिकेयः । इति हलायुधः ॥ (यथा, महाभारते । ३ । २३१ । १६ ।
"त्वं क्रीडसे षण्मुख कुक्कुटेन
यथेष्टनानाविधकामरूपी ॥")
षट्संख्यकवदने, क्ली । तद्वति, त्रि ॥

षण्मुखा, स्त्री, (षट् मुखानीव रेखा यस्याः ।) षड्भुजा । इति राजनिर्घण्टः ॥

षत्वं, क्ली, (षस्य भावः । ष + त्व ।) मूर्द्धन्यषकारस्य भावः । यथा । णत्वषत्वे । इति मुग्धबोधव्याकरणम् ॥

षद, ऌ ज औ श विषादे । शरणे । गतौ । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-विषादे अक०-अनिट् ।) ऌ, असदत् । ज, सादः सदः । औ अमात्सीत् । श, सीदति सीदन्ती । आकुलीभावः । सीदति राधा रासगृहे । हिंसा । इति दुर्गादासः ।

षद, क गतौ । आङ्पूर्व्वोऽयम् । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) मूर्द्धन्यादिः । क, आसादयति । इति दुर्गादासः ॥

षन, सम्भक्तौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) सम्भक्तिः सेवनम् । सनति गुरुं लोकः । इति दुर्गादासः ॥

षन, द अ उ दाने । इति कविकल्पद्रुमः ॥ (तना०-उभ०-सक०-सेट् । क्त्वावेट् ।) द अ, सनोति सनुते । उ सनित्वा सत्वा । इति दुर्गादासः ॥

षम्च, गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) सञ्चति । इति दुर्गादासः ॥

षञ्ज, औ ञि सङ्गे । इति (कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-अनिट् ।) औ, असाङ्क्षीत् । ञि, सक्तोऽस्ति । सजति वपुषि वासः । इति दुर्गादासः ॥

षप, सम्बन्धे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) सपति । असीसपत् । सम्बन्धः । इति दुर्गादासः ॥

षम, वैक्लव्ये । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) वैक्लव्यं विह्वलीभावः ।
"समन्ति यद्वियोगेन सीमन्तिन्यः स्मरातुराः ।"
इति दुर्गादासः ।

षम, त् क वैक्लव्ये । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) सिषमयिषति । इति दुर्गादासः ॥

षर्व, सर्पणे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) सर्व्वति । इति दुर्गादासः ।

षर्ज्ज, अर्ज्जने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) सिसर्ज्जयिषति । सर्ज्जति धनं लोकः । इति दुर्गादासः ॥

नर्पणे। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-
०-सेट्।) मर्ष्वति। इति दुर्गादासः ॥

ी, स्त्री, पक्षिविशेषः। यथा,—
पुच्छिका खञ्जनिका षर्षपो षञ्जनाशनी।"
इति शब्दरत्नावली ॥

गतौ। इति कविकल्पद्रुमः ॥(भ्वा०-पर०-
०-सेट्।) सस्नति। सिषास्नयिषति। इति
दासः ॥

,स्त्री,(षड् दशतः परिमाणमस्य। "पङ्क्ति-
शतिविंशदिति।"५।१।५८। इति निपा-
त् साधुः।) संख्याविशेषः। षाट् इति
षा। इति ज्योतिषम् ॥ (यथा, मनुः।३।
७।
ष्यान्धो नवतेः काणः षष्टेः श्वित्री शतस्य
तु।
रोगी सहस्रस्य दातुर्नाशयते फलम् ॥")
कः,पुं,(षष्टिरात्रेण पच्यन्ते इति। "षष्टिकाः
टरात्रेण पच्यन्ते।"५।१।९०। इति कन्-
ययेन निपातितः।) धान्यविशेषः। षष्टि-
त्रेण पच्यते साटिया इति स्वामिसुभूती।
अमरभरती ॥ तत्पर्य्यायः। षष्टिशालिः २
ष्टजः ३ स्निग्धतण्डुलः ४ षष्टिवासरजः ५।
स्य गुणाः।
"गौरो नीलः षष्टिकोऽयं द्विधा स्या-
दाद्यो रुच्यः शीतलो दोषहारी।
बल्यः पथ्यो दीपनो वीर्य्यवृद्धिं
दत्ते तस्मात् किञ्चिदूनो द्वितीयः ॥"
इति राजनिघण्टः ॥

ष्टिसंख्याक्रीते, त्रि ॥

ष्टिका,स्त्री, (षष्टिक + स्त्रियां टाप्।)षष्टिक-
धान्यम्। यथा,—
हैमन्तिकं सिताखिन्नं धान्यं मुद्गास्तिला यवाः
कलायकङ्गुनीवारा वास्तूकं हिलमोचिका।
षष्टिका कालशाकञ्च मूलकं केमुकेतरत् ॥"
इति तिथ्यादितत्त्वे हविष्यान्नप्रकरणीयस्मृति-
वचनम् ॥ किञ्च। शरदि षष्टिकाभिः पार्वणं
कर्त्तव्यमिति वाचस्पतिमिश्राः ॥

ष्टिक्यं,त्रि,(षष्टिकानां भवनं क्षेत्रम्। षष्टिक +
"यवयवकषष्टिकात् यत्" ५।२।३। इति
यत्।) षष्टिकधान्योपयुक्तक्षेत्रादि। इत्यमरः।
।९।७॥

ष्टितमः, त्रि,) षष्टि + "षष्ठ्यादेश्चासंख्यादेः।"
।२।५८। इति तमट्।) षष्टेः पूरणः।
इति मुग्धबोधव्याकरणम् ॥

ष्टिधा, व्य, षष्टिप्रकारम्। षष्टिशब्दात् धाच्-
प्रत्ययेन निष्पन्नम् ॥

ष्टिमत्तः,पुं, (षष्ट्या वर्षैर्मत्तः।) हस्ती। षष्टि-
वर्षपर्य्यन्तं वयःपूर्व्वार्द्धं स्थित्वा षष्टिमत्तः। इति
सारस्वताभिधानं शब्दमाला च ॥

ष्टिलता,स्त्री, भ्रमरमारी। इति राजनिर्घण्टः॥

ष्टिसंवत्सराः, पुं, (षष्टिगुणिताः संवत्सराः।)
प्रभवादिषष्टिसंख्यकवर्षम्। यथा,—

अथ षष्टिसंवत्सरगणना।
"शाकेन्द्रकालः पृथगाकृतिघ्नः २२
शशाङ्कनन्दाश्वियुगैः ४२९१ समेतः।
शराद्रिवस्विन्दु १८७५ हृतः सलब्धः
षष्ट्यावशिष्टाः प्रभवादयोऽब्दाः ॥
वर्षवर्जन्तु यच्छेषं सूर्य्यैः संपूर्य्य खोर्म्मिभिः६०।
हतव्युत्क्रमतः स्वाग्निहृतेऽशे मासकादयः॥"
अस्यार्थः। शाकेन्द्रकालः शकराजाब्दकालः
पृथक् स्थितः तत्रैव आकृतिघ्नः २२ द्वाविंशत्या
पूरितः शशाङ्कनन्दाश्वियुगैरेकनवत्यधिकशत-
द्वयाधिकचतुःसहस्रैः समेतोऽब्दः। शराद्रिव-
स्विन्दुहृतः पञ्चसप्तत्यधिकाष्टादशशतैर्यावत्सङ्ख्यं
हर्त्तुं शक्नोति तावता हृतः कर्त्तव्यः। सलब्धः
पूर्व्वं शकाब्दः शरेत्यादिना लब्धसंख्यया युतः
कार्य्यः षष्ट्यासशेषे पश्चादेषोऽब्दः पूर्ववत् षष्ट्या
हृते लब्धस्यावशिष्टे प्रभवादयः। एकावशेषे
प्रभवः द्वाव्यवशिष्टे विभवादिः। वर्षवर्जन्तु
यच्छेषं वर्षातिरिक्तं शराद्रिवस्विन्दुहृता-
वशिष्टं तत् सूर्य्यैर्द्वादशभिः संपूर्य्य खो-
र्म्मिभिः षष्ट्या हृते व्युत्क्रमत इत्यनेन षष्टि-
हृतावशिष्टाः अब्दा दण्डाः षष्टिहृतलब्धांशके
स्वाग्निहृते त्रिंशता हृते अवशिष्टा अंशका
लब्धा मासाः स्युरिति ॥*॥ प्रभवादिषष्टिवर्षा-
ण्युपक्रम्य।
"आद्या तु विंशतिर्ब्राह्मी द्वितीया वैष्णवी
स्मृता।
तृतीया रुद्रदैवत्या ज्येष्ठा मध्याधमा भवेत् ॥"
भविष्यपुराणे।

भैरव उवाच।
"षष्ट्यब्दं कथयाम्यत्र क्रूराः सौम्याश्च ये प्रिये।
संवत्सरफलं मुख्यं प्रभवादौ वरानने ॥
बहुतोयास्तथा मेघाः सर्वशस्या च मेदिनी।
बहुचौरास्तथा गावो व्याधिरोगविवर्जिताः।
प्रशान्ताः पार्थिवाश्चैव प्रभवे परिकीर्त्तिताः ॥१
सुभिक्षं क्षेममारोग्यं सर्वे व्याधिविवर्जिताः।
प्रशान्ता मानवाः सर्वे बहुशस्या वसुन्धरा।
हृष्टास्तुष्टा जनाः सर्वे विभवे च वरानने ॥२॥
रोगा बहुविधाश्चैव मनुष्या वाजिकुञ्जराः।
सर्वे एव प्रणश्यन्ति शुक्ले वर्षे वरानने ॥३॥
उन्मत्तञ्च जगत् सर्वं धनधान्यसमाकुलम्।
नित्योत्सवः प्रजावृद्धिः प्रमोदे जायते प्रिये ॥४
नीरोगाश्च निराबाधा मानवा विगतद्विषः।
बहुचौरास्तथा गावः प्राजापत्ये वरानने ॥५॥
निरातङ्कं जगत् सर्व्वं धनयौवनगर्व्वितम्।
अङ्गिरसि प्रजा सर्वा नित्योत्साहा वरानने।
॥ ६ ॥
सुभिक्षं क्षेममारोग्यं वर्षाकालं सुशोभनम्।
शस्यवृद्धिं विजानीयात् श्रीमुखे सुरवन्दिते ॥७
बहुचौरास्तथा गावो धान्यञ्च बलवत्तरम्।
जायन्ते सर्व्वशस्यानि भावे वर्षे वरानने ॥८॥
महार्घं जायते सर्वं घृततैलरसादिकम्।
प्रजानाञ्च भवेद्वृद्धिर्यूनि-संवत्सरे शुभे ॥ ९ ॥
निष्पत्तिः सर्वशस्यानां मध्या धातरि कीर्त्तिता
इक्षुचौरगुड़ादीनां प्रबलत्वं वरानने ॥१०॥
सुभिक्षं क्षेममारोग्यं कार्पासस्य महार्घता।
लवणं मधु गव्यञ्च ईश्वरे दुर्लभं प्रिये ॥११॥
सुभिक्षं क्षेममारोग्यं प्रशान्ताः पार्थिवाः
प्रिये।
तस्करोपहृतं वित्तं बहुधान्ये वरानने ॥१२॥
राष्ट्रभङ्गश्च दुर्भिक्षं तस्करैश्चोपपीड़नम्।
जानीयाद्विग्रहं घोरं प्रमाथिनि वरानने॥१३॥
जायन्ते सर्वशस्यानि मेदिनी निरुपद्रवा।
लवणं मधु गव्यञ्च महार्घं विक्रमे प्रिये ॥१४॥
कोद्रवाः शालिमुद्गाश्च शक्तुमाषास्तथैव च।
महार्घं जायते सर्वं वृषे च सुरवन्दिते ॥१५॥
चणका मुद्गमाषाश्च अन्यच्च विदलं प्रिये ॥
महार्घं जायते सर्व्वं चित्रभानौ वरानने ॥१६॥
सुभिक्षं क्षेममारोग्यं विश्वञ्च निरुपद्रवम्।
व्यवहारो भवेत् श्रेयान् स्वभानौ देवपूजिते॥१७
अतिवृष्टिश्च जायेत धान्यस्याथ प्रपीड़नम्।
शस्यं भवति सामान्यं दारुणे देववन्दिते ॥१८॥
बहुशस्यानि जायन्ते सर्व्वदेशे सुलोचने।
सौराष्ट्रे लाटदेशे च पार्थिवे नात्र संशयः ॥१९॥
दुर्भिक्षं जायते घोरं सर्व्वोपद्रवसंयुतम्।
अनावृष्टिः समाख्याता व्यये संवत्सरे प्रिये॥२०॥
उद्यतो वर्षणे मेघो जलं नैवोपयच्छति।
महार्घं सर्व्वं जिह्वर्षं सर्व्वमेव वरानने ॥२१॥
कोद्रवाः शालिमुद्गाश्च कङ्गुमाषास्तथैव च।
सुलभं जायते सुस्थं जगद्वै सर्व्वधारिणि ॥२२॥
अनग्निप्रबला लोका धान्यौषधिप्रपीड़नम्।
जायते मानुषे कष्टं विरोधिनि न संशयः॥२३॥
सर्व्वाः प्रजाः प्रपीड़्यन्ते व्याधिः शोकश्च जायते
शिरोवक्षोऽक्षिरोगाश्च पापाद्धि विकृते
जनाः ॥२४॥
उपद्रुतं जगत् सर्व्वं तस्करैर्मूषिकैः खगैः।
पीड़िताश्च प्रजाः सर्व्वाः देशभङ्गः खरे प्रिये॥२५
सुभिक्षं क्षेममारोग्यं शस्यं भवति शोभनम्।
बहुचौरास्तथा गावो नन्दनं नन्दने प्रिये ॥२६॥
अल्पतोयास्तथा मेघा वर्षन्ति खण्डमण्डले।
नश्यन्ति सर्व्वशस्यानि विजये नात्र संशयः॥२७॥
क्षत्त्रियाश्च तथा वैश्याः शूद्राश्च नटनर्त्तकाः।
पीड़ितास्ते वरारोहे जये सर्व्वे न संशयः॥२८॥
सरोगञ्च तथा देवि दाहज्वरसमन्वितम्।
अभिभूतं जगत् सर्वं मन्मथे सुरवन्दिते ॥२९॥
तुषधान्यचयो देवि सर्व्वशस्यमहार्घता।
व्यवहाराश्च नश्यन्ति दुर्मुखे दुर्मुखाः प्रजाः॥३०
पीड़्यन्ते सर्व्वशस्यानि देशे देशे शुचिस्मिते।
हेमलम्बे प्रजाः सर्व्वाः सीदन्ते नात्र संशयः॥३१
तस्करैः पार्थिवैश्चैव अभिभूतमिदं जगत्।
वर्षो भवति सामान्यो विलम्बे तु भयं महत्॥३२
विषमस्थं जगत् सर्व्वं विरोधे भयसंभ्रमम्।
विकारी सर्व्वतोऽपायो मम वाक्यन्तु नान्यथा॥३३
क्वचिद्वर्षति पर्ज्जन्यो देशे संछिन्नमण्डलः।
दुर्भिक्षं सर्व्वरौरवं व्यवहारो विपर्य्ययः ॥३४॥

दुर्भिक्षं जायते सर्व्वा मेदिनी दुष्यति प्रिये ।
प्लवे प्लवन्ति तोयानि मानवा दुःखिता भुवि॥३५
सुवर्णरूप्यधान्यानि जगत् सर्व्वं सुशोभनम् ।
ब्राह्मणा वणिजस्तुष्टाः सुभिक्षे शुभकृत् प्रिये॥३६
सुभिक्षं क्षेममारोग्य हृष्टा गोब्राह्मणाः प्रिये ।
सुखिताः शोभने वर्षे प्रजाः सर्व्वाः सुलोचने॥३७
विषमस्थं जगत् सर्व्वं व्याकुलं समुदाहृतम् ।
जनानां जायते भद्रे क्रोधे क्रोधः परस्परम्॥३८
सर्व्वत्र जायते क्षेमं सर्व्वशस्यमहार्घता ।
विश्वावसौ वरारोहे कार्पासस्य महार्घता॥३९॥
पार्थिवैर्न्नृपसैन्यैश्च समस्तैः खण्डमण्डले ।
प्रपीड्यन्ते जनाः सर्व्वे भयभीताः पराभवे॥४०॥
तृणधान्यानि पीड्यन्ते ग्रीष्मे वर्षति वासवः ।
प्लवङ्ग पीडिताः सर्व्वाः प्रजाश्च सुरवन्दिते॥४१॥
जायन्ते सर्व्वशस्यानि सुभिक्षं निरुपद्रवम् ।
सौम्यदृष्टिर्भवेद्राजा कालिके च शुभं वदेत्॥४२
सुभिक्षं क्षेममारोग्य सुखञ्च निरुपद्रवम् ।
सौम्यदृष्टिर्भवेद्राजा सौम्ये सौम्य प्रकीर्त्तितम्॥४३
तोयपूर्णो भवेन्मेघो वर्षति च दिने दिने ।
निरुपद्रवाश्च राजानः सर्व्वसाधारणे प्रिये॥४४
वासवो वर्षते देवि देशे चाखण्डमण्डले ।
अच्छिन्नत्वे कान्यकुब्जे विरोधि क्षयिनाशकृत्॥४५
अभिभूत जगत् सर्व्वं लोगैर्बहुविधैः प्रिये ।
मारुतैः फलदाहैश्च परिवारिणि शोभने॥४६॥
निष्पत्तिः सर्व्वशस्याना सुभिक्षं भवति प्रिये ।
प्रमाथिनि जलोद्गारो जलदो मोदते प्रजा॥४७॥
निष्पत्तिः सर्व्वशस्यानां सर्व्वशस्यामहार्घता ।
घृतं तैलसमं याति आनन्दे नन्दति प्रजा॥४८॥
कोद्रवाः शालिमुद्गाश्च पीड्यन्ते वरवर्णिनि ।
सर्व्वौषधानि धान्यानि राक्षसे निष्ठुराः
प्रजाः ॥४९॥
दुर्भिक्षं जायते घोरं धान्यौषधिप्रपीडनम् ।
अनले च समाख्यातं नात्र कार्य्या विचारणा॥५०
देशभङ्ग, सुदुर्भिक्षं समासात् कथयाम्यहम् ।
पिङ्गले चारुपद्माक्षि दुर्भिक्षं नर्म्मदातटे॥५१॥
गोमहिष्यो विनश्यन्ति ये चान्ये नटनर्त्तकाः ।
वासवो वर्षते देवि शस्यञ्च नहि जायते ॥
तिलसर्षपमाषादिकार्पासानां महार्घता ।
गोमहिष्यः सुवर्णानि कांस्यताम्राद्यशेषतः ॥
तत्सर्व्वं देवि विक्रीय कर्त्तव्यो धान्यसञ्चयः ।
तेन धान्येन लोकोऽयं निस्तरिष्यति दुर्द्दिनम् ।
पार्थिवा मोषकादीनाः कालयुक्ते प्रपीडिता॥५२
तोयपूर्णाः स्रुता मेघा बहुशस्या च मेदिनी ।
निठुराः पार्थिवा देवि सिद्धार्थे च वरानने ॥५३
अल्पतोया घनाश्चैव कीटकाः प्रबलाः स्मृताः ।
त्रिकलाः पार्थिवा देवि रौद्रे संवत्सरे प्रिये ॥५४
दुर्भिक्षं मध्यमं प्रोक्तं व्यवहारो न वर्त्तते ।
भवेद्वै मध्यमा दृष्टिर्दुर्म्मतौ समुपस्थिते ॥५५॥
दुर्भिक्षं जायते लोकाः सर्व्वे द्रविणवर्ज्जिताः ।
पार्थिवानां जायतेऽहर्षो दुन्दुभौ वरवर्णिनि ॥५६॥
महिषीगोहिरण्यादिताम्रकांस्याद्यशेषतः ।
तत् सर्व्वं देवि विक्रीय कर्त्तव्यो धान्यसञ्चयः ॥

रक्ते संवत्सरे देवि क्रूरबुद्धिर्नराधिपः ।
मानवाः क्रूरचेष्टाश्च संग्रामे रुधिरं भवेत् ॥५७॥
दुर्भिक्षं मरण घोरं धान्यौषधिप्रपीडनम् ।
पापरोगो भवेद्देवि रक्ताक्षेऽमरवन्दिनि ॥५८॥
रोगो मरणदुर्भिक्षं विरोधो बहुमङ्गलम् ।
क्रोधे तु विषमं सर्व्वं समाख्यातं हरप्रिये ॥५९
मेदिनी लभते देवि सर्व्वभूतं चराचरम् ।
देशभङ्गश्च दुर्भिक्षं क्षये संक्षीयते प्रजा ॥
सौराष्ट्रे मालवे देशे दक्षिणे कोङ्कणे तथा ।
दुर्भिक्षं जायते घोर क्षये संवत्सरे प्रिये ॥
कौमुदीनर्म्मदायाश्च यमुनानर्म्मदातटम् ।
विन्ध्यायां सैन्धवश्चापि विनश्यति न संशयः ॥
सिंहलं मध्यदेशञ्च कालञ्जरं तथैव च ।
क्षये क्षयन्ति सर्व्वाणि नान्यथा वरवर्णिनि ॥"६०
इति ज्योतिस्तत्त्वम् ॥

षष्टिहायन,पुं,(षष्टिर्हायना आयुःकालो यस्य ।) गजः । धान्यविशेषः । इति मेदिनी राजनिर्घण्टश्च ॥ षष्टिसङ्ख्यकवत्सरः । तत्सङ्ख्यवयोयुते, त्रि, ॥ (यथा, महाभारते ।१।१५४।४४।
"बभञ्जतुस्तदा वृक्षांल्लताश्चाकर्षतुस्तदा ।
मत्ताविव च संरब्धौ वारणौ षष्ठिहायनौ ॥")

षष्ठः, त्रि, (षष्+तस्य पूरणे डट् । ५ । २ । ४८ । डट् । षट्कतिकतिपयचतुरां थुक् । ५ । २ । ५१ । इति थुक् ।) षण्णां पूरणः । इति मेदिनी ॥ (यथा, रघुः । १७ । ७८ ।
"पञ्चमं लोकपालानामूचुः साधर्म्म्ययोगतः ।
भूतानां महतां षष्ठमष्टम कुलभूभृताम् ॥")

षष्ठकः,त्रि,षष्ठ । षष्ठशब्दात् स्वार्थे कन्प्रत्ययेन निष्पन्नः ॥ (षष्ठो भागः । "मानपश्वङ्गयोः कन्लुकौ च ।" ५ । ३ । ५१ । इति कन् । "षष्ठको भागो मानश्चेद्भवति ।" इति काशिका ॥)

षष्ठान्नकालकं, क्ली, द्विवासानन्तरभुक्तम् । यथा
"द्व्यन्तरे त्र्यन्तरे भुक्तमाहुः षष्ठान्नकालकम् ।"
इति त्रिकाण्डशेषः ॥

षष्ठिका, स्त्री, (षष्ठी+स्वार्थे कन् ।) यथा ।
चामुण्डेत्यत्र षष्ठिकेत्यूह्यम् । इति दुर्गोत्सवीयबलिदानप्रकरणे तिथ्यादितत्त्वम् ॥

षष्ठी, स्त्री, (षष्ठ+ङीप् ।) कात्यायनी । इति मेदिनी ॥ षोडशमातृकान्तर्गतमातृकाविशेषः । सा प्रकृतेः षष्ठीकला स्कन्दभार्य्या च । तस्याः स्वरूपादिर्यथा,—
"प्रधानांशस्वरूपा या देवसेना च नारद ! ।
मातृकासु पूज्यतमा सा च षष्ठी प्रकीर्त्तिता ॥
शिशूनां प्रतिविश्वेषु प्रतिपालनकारिणी ।
तपस्विनी विष्णुभक्ता कार्त्तिकेयस्य कामिनी॥
षष्ठांशरूपा प्रकृतेस्तेन षष्ठी प्रकीर्त्तिता ।
पुत्त्रपौत्त्रप्रदात्री च धात्री त्रिजगतां सती ॥
सुन्दरी युवती रम्या सन्तत भर्त्तुरन्तिके ।
स्थाने शिशूनां परमा वृद्धरूपा च योगिनी ॥
पूजा द्वादशमासेषु यस्याः विश्वेषु सन्ततम् ।
पूजा च सूतिकागारे परा षष्ठदिने शिशोः ॥
एकविंशतिमे चैव पूजा कल्याणहेतुकी ।
शश्वन्नियमिता चैषा नित्या काम्याकृति[illegible]
मातृरूपा दयारूपा शश्वद्रक्षणरूपिणी ।
जले स्थले चान्तरीक्षे शिशूनां स्वप्नगोचरे
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १ अध्याय
अपि च ।
श्रीनारायण उवाच ।
"षष्ठांशा प्रकृतेर्या च सा तु षष्ठी प्रकीर्त्ति[illegible]
तस्याः पूजाविधौ ब्रह्मन् इतिहासमिमं श[illegible]
राजा प्रियव्रतश्चासीत् स्वायम्भुवमनोः सु[illegible]
योगीन्द्रो न वहेद्भार्य्यां तपस्यासु रतः स[illegible]
ब्रह्माज्ञया च यत्नेन कृतदारो बभूव स ।
सुचिरं कृतदारश्च न लेभे तनयं ततः ।
पुत्त्रेष्टियज्ञं तञ्चापि कारयामास कश्यप[illegible]
मालिन्यै तस्य कान्तायै मुनिर्यज्ञचरुं द[illegible]
भुक्त्वा चरुञ्च तस्याश्च सद्यो गर्भो बभूव ह ।
दधार तञ्च सा देवी दैवं द्वादशवत्सरम् ।
ततः सुषाव सा ब्रह्मन् कुमारं कनकप्रभ[illegible]
सर्व्वावयवसम्पन्नं मृतमुत्तानलोचनम् ।
श्मशानञ्च ययौ राजा गृहीत्वा बालकं शु[illegible]
एतस्मिन्नन्तरे तत्र विमानञ्च ददर्श ह ।
ददर्श तत्र देवीञ्च कमनीयां मनोहराम् ।
दृष्ट्वा तां पुरतो राजा तुष्टाव परमादरम् ।
पप्रच्छ राजा तां दृष्ट्वा ग्रीष्मसूर्य्यसमप्रभा[illegible]
तेजसा ज्वलितां शान्तां शान्तां [illegible]
प्रियव्रत उवाच ।
का त्वं सुशोभने कस्य कान्ते कान्तासि [illegible]
कस्य कन्या वरारोहे धन्या मान्या च [illegible]
देवसेनोवाच ।
ब्रह्मणो मानसी कन्या देवसेनाहमीश्वरी ।
दृष्ट्वा मां मनसा धाता ददौ [illegible]
मातृकासु च विख्याता स्कन्दभार्य्या [illegible]
विश्वे षष्ठीति विख्याता षष्ठांशा प्रकृतेर्यत[illegible]
इत्येवमुक्त्वा सा देवी गृहीत्वा बालकं मुदा ।
महाज्ञानेन तपसा जीवयामास लीलया ।
गृहीत्वा बालकं देवी गगने गन्तुमुद्यता ।
पुनस्तुष्टाव तां राजा शुष्ककण्ठौष्ठतालुकः ।
नृपस्तोत्रेण सा देवी परितुष्टा बभूव ह ।
उवाच तं नृपं ब्रह्मन् ! वेदोक्तं कर्म्मनि[illegible]
देवसेनोवाच ।
त्रिषु लोकेषु राजा त्वं स्वायम्भुवमनोः सु[illegible]
मम पूजाञ्च सर्व्वत्र कारयित्वा स्वयं कुरु ।
तदा दास्यामि पुत्त्रन्ते कुलपद्ममनोहरम् ।
इत्येवमुक्त्वा सा देवी तस्मै तद्बालकं ददौ ।
राजा चकार स्वीकारं तस्याश्च [illegible]
जगाम देवी स्वर्गञ्च दत्त्वा तस्मै शुभ[illegible]
आजगाम महाराजः स्वगृहं हृष्टमानसः ।
देवीं तां पूजयामास ब्राह्मणेभ्यो धनं ददौ ।
राजा च प्रतिमासेषु शुक्लषष्ठ्यां महोत्सवम् ।
षष्ठ्या देव्याश्च यत्नेन कारयामास सर्व्वतः ।
बालानां सूतिकागारे षष्ठाहे यत्नपूर्व्वकम् ।
तत्पूजां कारयामास चैकविंशतिवासरे ।

नानां शुभकार्य्ये च शुभान्नप्राशने तथा ।
र्वत्र पूजयामास स्वयमेव चकार च ॥
ान पूजाविधानञ्च स्तोत्रं मत्तो निशामय ।
त स्तुतं धर्म्मवक्त्रेण कौथुमोक्तञ्च सुव्रत ॥
ालग्रामे घटे वाथ वटमूलेऽथवा मुने ।
त्तौ पुत्तलिकां कृत्वा पूजयेद्वा विचक्षणः ॥
ठांशां प्रकृतेः शुद्धां सुप्रतिष्ठाञ्च सुप्रभाम् ।
पुत्रदाञ्च शुभदां दयारूपां जगत्प्रसूम् ॥
ेतचम्पकवर्णाभां रत्नभूषणभूषिताम् ।
वित्ररूपां परमां देवसेनामहं भजे ॥
ति ध्यात्वा स्वशिरसि पुष्पं दत्त्वा विचक्षणः
नर्ध्यात्वा च मूलेन पूजयेत् सुव्रतां सतीम् ॥
ाद्यार्घ्याचमनीयैश्च गन्धधूपप्रदीपकैः ।
ैवेद्यैर्विविधैश्चापि फलेन शोभनेन च ॥
ूलेनों ह्रीं षष्ठीदेव्यै स्वाहेति विधिपूर्व्वकम्
ष्टाक्षरं महामन्त्रं यथाशक्ति जपेन्नरः ॥
तः स्तुत्वा च प्रणमेद्भक्तियुक्तः समाहितः ।
तोत्रञ्च सामवेदोक्तं वरपुत्त्रफलप्रदम् ॥
ष्टाक्षरं महामन्त्रं लक्षधा यो जपेन्मुने ।
 पुत्त्रं लभते नूनमित्याह कमलोद्भवः ॥०॥
तोत्रं शृणु मुनिश्रेष्ठ सर्व्वकामशुभावहम् ।
ाञ्छाप्रदञ्च सर्व्वेषां गूढं वेदेषु नारद ॥

प्रियव्रत उवाच ।

मो देव्यै महादेव्यै सिद्धै शान्त्यै नमो नमः
ुभायै देवसेनायै षष्ठीदेव्यै नमो नमः ॥
रदायै पुत्त्रदायै धनदायै नमो नमः ।
ुखदायै मोक्षदायै षष्ठीदेव्यै नमो नमः ॥
क्तिषष्ठांशरूपायै सिद्धायै च नमो नमः ।
मायायै सिद्धयोगिन्यै षष्ठीदेव्यै नमो नमः ॥
ारायै सारदायै च परायै सर्व्वकारिणे ।
ालाधिष्ठातृदेव्यै च षष्ठीदेव्यै नमो नमः ॥
कल्याणदायै कल्याण्यै फलदायै च कर्म्मणाम् ।
प्रत्यक्षायै च भक्तानां षष्ठीदेव्यै नमो नमः ॥
पूज्यायै स्कन्दकान्तायै सर्व्वेषां सर्व्वकर्म्मसु ।
देवरक्षणकारिण्यै षष्ठीदेव्यै नमो नमः ॥
शुद्धसत्त्वस्वरूपायै वन्दितायै नृणां सदा ।
हिंसाक्रोधवर्जितायै षष्ठीदेव्यै नमो नमः ॥
धनं देहि प्रियां देहि पुत्त्रं देहि सुरेश्वरि ।
धर्म्मं देहि यशो देहि षष्ठीदेव्यै नमो नमः ॥
देहि भूमिं प्रजां देहि विद्यां देहि सुपूजिते ।
कल्याणञ्च जयं देहि षष्ठीदेव्यै नमो नमः ॥
इति देवीञ्च संस्तूय लेभे पुत्त्रं प्रियव्रतः ।
यशस्विनञ्च राजेन्द्रं षष्ठीदेवीप्रसादतः ॥
षष्ठीस्तोत्रमिदं ब्रह्मन् यः शृणोति च वत्सरम् ।
अपुत्त्रो लभते पुत्त्रं वरं सुचिरजीविनम् ॥
वर्षमेकञ्च या भक्ता संस्तुत्येदं शृणोति च ।
सर्व्वपापविनिर्म्मुक्ता महावन्ध्या प्रसूयते ॥
वीरं पुत्त्रञ्च गुणिनं विद्यावन्तं यशस्विनम् ।
शुचिं चिरायुषमन्तमेव षष्ठीदेवीप्रसादतः ॥
काकवन्ध्या च या नारी मृतापत्या च या भवेत्
वर्षं श्रुत्वा लभेत् पुत्त्रं षष्ठीदेवीप्रसादतः ॥
रोगयुक्ते च बाले च पिता माता शृणोति चेत्
मासञ्च मुच्यते वालः षष्ठीदेवीप्रसादतः ॥

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४० अध्यायः ॥०॥

चान्द्रस्य षष्ठकलाक्रियारूपतिथिविशेषः । स तु शुक्लकृष्णपक्षभेदेन द्विविधः । तत्र चन्द्रस्य वृद्ध्यनुकूलषष्ठकलाक्रियारूपः शुक्लषष्ठी ॥ तस्य ह्रासानुकूलषष्ठकलाक्रियारूपः कृष्णषष्ठी ॥०॥ वैशाखादिषु तस्या विशेषनामानि यथा,—

"प्रसूत्या द्वादशे मासि सम्पूज्यापत्यहृदये ।
सुते जाते तथा षष्ठ्यां षष्ठी द्वादशरूपिणी ॥
वैशाखे चान्दनी षष्ठी ज्यैष्ठे चारण्यसंज्ञिता ।
आषाढ़े कार्द्दमी ज्ञेया श्रावणे लुण्ठनी तथा ॥
भाद्रे चपेटी विख्याता दुर्गाख्याश्वयुजि तथा ।
नाड़ाख्या कार्त्तिके मासि मार्गे मूलकरूपिणी
पौषे मान्यन्नरूपा च शीतला तपसि स्मृता ।
गोरूपिणी फाल्गुने च चैत्रेऽशोका प्रकीर्त्तिता"

इति स्कन्दपुराणम् ॥

तत्कृत्यादि यथा,—
अथ षष्ठी सा सप्तमीयुता ग्राह्या युग्मात् । राजमार्त्तण्डे ।

"ज्यैष्ठे मासि सिते पक्षे षष्ठी चारण्यसंज्ञिता
व्यजनैककरास्तस्यामटन्ति विपिने स्त्रियः ॥
तां विन्ध्यवासिनीं स्कन्दषष्ठीमाराधयन्ति च ।
कन्दमूलफलाहारा लभन्ते सन्ततिं शुभाम् ॥"

कन्दं सूरणादि । मूलं तदितरत् । भविष्ये ।

"शीर्षं मार्गशिरे मासि षष्ठी भरतसत्तम ।
पुण्या पापहरा धन्या शिवा शान्ता गुहप्रिया॥"

देवीपुराणे चैवमधिकृत्य ।

"षष्ठ्यां स्कन्दस्य कर्त्तव्या पूजा सर्व्वोपचारिका
इहैव सुखसौभाग्यमन्ते विष्णुपुरं व्रजेत् ॥"

इयमेव स्कन्दषष्ठी पञ्चमीयुतैवोपोष्या ।

"कृष्णाष्टमी स्कन्दषष्ठी शिवरात्रिचतुर्द्दशी ।
एताः पूर्व्वयुताः कार्य्यास्तिथ्यन्ते पारणं भवेत्॥"

इति ब्रह्मवैवर्त्तवचनात् ॥

विष्णुधर्म्मोत्तरे ।

"अष्टमीञ्च तथा षष्ठीं नवमीञ्च चतुर्द्दशीम् ।
शिरोऽभ्यङ्गं न कुर्व्वीत पर्व्वसन्धौ तथैव च ॥"

इति तिथ्यादितत्त्वम् ॥ * ॥

सा च कार्त्तिकेयाभिषेकतिथिः । यथा,—

"स्वयं स्कन्दो महादेवः सर्व्वपापप्रणाशनः ।
तस्य षष्ठीं तिथिं प्रादादभिषेके पितामहः ॥
अस्यां फलाशनो यस्तु यजेन्नियतमानसः ।
अपुत्त्रोऽपि लभेत् पुत्त्रान् अधनोऽपि लभेत् धनम्
यं यमिच्छेत मनसा तं तं लभति मानवः ॥
यश्चैतत् पठति स्तोत्रं कार्त्तिकेयस्य मानवः ।
तस्य गेहे कुमाराणां चैवारोग्यं भवेद्ध्रुवम्॥"

इति वाराहे स्कन्दोत्पत्तिनामाध्यायः ॥ ० ॥

तत्र जातफलम् ।

"विद्वान् वरिष्ठचतुरः सुकीर्त्तिः
प्रलम्बबाहुर्व्रणकीर्णगात्रः ।
सत्यप्रतिष्ठो धनपुत्त्रयुक्तः
षष्ठीप्रसूतो मनुजश्चिरायुः ॥"

इति कोष्ठीप्रदीपः ॥ * ॥

तत्र यात्राकरणदोषो यथा,—

"पञ्चम्यामीप्सितार्थः स्यात् षष्ठ्यां व्याधियुतो भवेत् ।
सप्तम्यामर्थलाभः स्यादष्टम्यामस्त्रपीड़नम् ।
षष्ठाष्टमीद्वादशीषु न गच्छेच्चिरदिनस्पृशि ॥"

इति ज्योतिस्तत्त्वम् ॥

षम, लु र स्वापे । इति कविकल्पद्रुमः ॥(भ्वा०-पर०-अक०-सेट् ।) मूर्द्धन्यादिः । लु, मस्ति । र,वैदिकः । स्वापः शयनम् । इति दुर्गादासः ॥

षम्ज,सर्पणे । इति कविकल्पद्रुमः ॥(भ्वा०-पर०-सक०-सेट् ।) दन्त्यसोपधः । क्विपि संयोगादिलोपे सक् । सज्जति । वचोऽपि परुषाचरं न च पदेषु संसज्जते । इति शाकुन्तले गणकृतानित्यत्वात् । इति दुर्गादासः ॥

षस्त,इ लु र स्वप्ने । इति कविकल्पद्रुमः ॥(अदा०-पर०-अक०-सेट् ।)मूर्द्धन्यादिः दन्त्यसोपधः ।इ, संस्तात । नमध्यपाठेऽपि नस्योपधत्वाभावादेव लोपाभावे इदनुबन्धो वेदेपूच्चारणभेदार्थः । लु, संस्ति । र, वैदिकः । इति दुर्गादासः ॥

षह, ज ङ शक्तौ । इति कविकल्पद्रुमः ॥(भ्वा०-आत्म०-सक०-सेट् ।) इहापि शक्तिः क्षमा । ज, साढः सहः । ङ, अन्यायं सहते नासौ । इति हलायुधः । इति दुर्गादासः ॥

षह,य कि शक्तौ । इति कविकल्पद्रुमः॥ (दिवा०-चुरा०-भ्वा०-च-पर०-सक०-सेट् ।) शक्तिरिह दैवादिकस्य शकधातो रूपं तेन क्षमा इत्यर्थः । य, सह्यति दुःखं लोकः सहत इत्यर्थः । कि, साहयति । स एवायं नागः सहति कलभेभ्यः परिभवम् । इति दुर्गादासः ॥

षहसानुः,पुं, क्षमावान् । यज्ञः । मयूरः । इति संक्षिप्तसारोणादिवृत्तिः ॥

षाट्, व्य, सम्बोधनम् । इति केचित् ॥

षाड़वः,पुं, गानम् । रसः । इति मेदिनी ॥ रागस्य जातिविशेषः । स च षट्स्वरमिलितरागरागिण्यौ । यथा,—

"औड़वः पञ्चभिः प्रोक्तः स्वरैः षड्भिस्तु षाड़वः ॥
सम्पूर्णः सप्तभिर्ज्ञेय एवं रागस्त्रिधा मतः ॥"

इति सङ्गीतदर्पणम् ॥

षाड्गुण्यं, क्ली, (षड्गुणा एव । "चातुर्वर्ण्यादीनां स्वार्थे ।" ५ । १ । १२४ । इत्यस्य वार्त्तिकोक्त्या ष्यञ् ।) राज्ञां राज्यरक्षणे उपायाः षट् । यथा । सन्धानासनं सन्धिं कृत्वावस्थानम् १ । यात्रासन्धानं युद्धार्थयानम् २ । विगृह्यासनं वैरं कृत्वावस्थानम् ३ । यात्रां संपरिगृह्यासनं शत्रोर्भयप्रदर्शनार्थं यानं प्रदर्श्य स्वस्थाने अवस्थानम् ४ । द्वैधीभावः उभयत्र सन्धीकरणम् ५ । अन्येषां संश्रयः दुर्गादेर्म्महाराजस्य वा आश्रयः ६ । इति महाभारते राजधर्म्मः ॥ (यथा, माघे । २ । ९३ ।

"षाड्गुण्यमुपयुञ्जीत शक्त्यपेक्षं रसायनम् ।
भवन्त्यस्यैवमङ्गानि स्थास्नूनि वलवन्ति च ॥")

षाण्मातुरः, पुं, (षण्णां मातॄणामपत्यमिति । "मातुरुत्संख्यासंभद्रपूर्व्वायाः ।" ४।१।११५ । इति अण् । उकारश्चान्तादेशः ।) कार्त्तिकेयः । इत्यमरः ॥

षात्वणत्विकः, त्रि, षत्वणत्वविधायकशास्त्रव्याख्यानम् । तत्र भवः । यथा । षत्वणत्वयोर्विधायकं शास्त्रं षात्वणत्वं तस्य व्याख्यानात्तत्र भवो वा षात्वणत्विकः । इति सिद्धान्तकौमुदी ॥

षाध, ओ न य सिद्धौ । इति कविकल्पद्रुमः ॥ (स्वा०-दिवा०च-पर०-अक०-अनिट् ।) ओ, शिषात्सति । न, साध्नोति । य, साध्यति । सिद्धिर्निष्पत्तिः । इति दुर्गादासः ॥

षान्त्व, क सामयोगे । इतिकविकल्पद्रुमः ॥(चुरा०-पर०-सक०-सेट् ।) क, सान्त्वयति शोकार्त्तं दयालुः । सिषान्त्वयिषति । इति दुर्गादासः ॥

षाष्ठः, त्रि, षष्ठः । षष्ठशब्दात् स्वार्थे ष्ण (अण्) प्रत्ययेन निष्पन्नः ॥ (पुं, षष्ठो भागः । "षष्ठाष्टमाभ्यां ञ च ।" ५ । ३ । ५० । इति ञः । इति सिद्धान्तकौमुदी ॥)

षि, ग ञ न बन्धे । इति कविकल्पद्रुमः ॥(क्र्या०-स्वा०च-उभ०-सक०-अनिट् ।) मूर्द्धन्यादिः । ग ञ, सिनाति सिनीते । न, सिनोति सिनुते । इति दुर्गादासः ॥

षिच, प ग ञ औ क्षरणे । इति कविकल्पद्रुमः ॥ (तुदा०-उभ०-सक०-अनिट् ।) प ग ञ, सिञ्चति सिञ्चते । औ, सेक्ता । सिषिचुरवनिमम्बुवाहाः । इति भारविः । इति दुर्गादासः ॥

षिट, अनादरे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) मूर्द्धन्यादिः । सेटति खलं लोकः । इति दुर्गादासः ॥

षिड्ग, पुं, (षिट् अनादरे + बाहुलकात् अतोऽपि गन् सत्वाभावश्च । इत्युणादिटीकायां उज्ज्वलः । १ । १२२ ।) कामुकः । लोचा इति भाषा । तत्पर्य्यायः । विदग्धः २ नागरः ३ भविकः ४ छिदुरः ५ विटः ६ व्यलीकः ७ षट्प्रज्ञः ८ कामकेलिः ९ विदूषकः १० । इति भूरिप्रयोगः ॥ पीठकेलिः ११ पीठमर्द्दः १२ । इति त्रिकाण्डशेषः ॥ पल्लविकः १३ । इति हेमचन्द्रः ॥ (यथा, माघे । ५ । २४ ।
"पश्यागमाग्र त्रिजहीहि पुरः स्तनौ ते
पश्यन् प्रतिद्विरदकुम्भविशङ्कितेताः ।
स्तम्बेरमः परिणिनंसुरसावुपैति
षिड्गैरगद्यत ससम्भ्रममेव काचित् ॥")

षिध, गत्याम् । इति कविकल्पद्रुमः ॥(भ्वा०-पर०-सक०-सेट् ।) सेधति । निष्ठायां सिधितः । इति दुर्गादासः ॥

षिधु, उ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् । क्वा वेट् ।) सेधति । उ, सिधित्वा सिद्धा । क्वावेट्त्वादेव दीर्घ्यति इमौ निषिद्धे सिद्धः । इति दुर्गादासः ॥

षिधु, उ य औ सिद्धौ । इति दुर्गादासः ॥ (दिवा०-पर०-अक०-अनिट् । क्वावेट् ।) उ, सेधित्वा सिद्धा । य, सिध्यति । औ, असैत्सीत् । अस्मात् पुषादित्वान्नित्यं ङ इत्यन्ये । सिद्धिर्निष्पत्तिः । सिध्यति घटो निष्पन्नः स्यात् इत्यर्थः । इति दुर्गादासः ॥

षिध, ऊ शिवे । शास्त्रे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-शिवे अक०-अनुशासने सक०-वेट् ।) मूर्द्धन्यादिः । ऊ, असेधीत् असैत्सीत् । शिवं मङ्गलम । तदाकर्म्मकः । सिद्धो वर्णसमाम्नाय इति कातन्त्रस्याद्यसूत्रम् । शास्त्रमनुशासनम् । सेधति शिष्यं गुरुः । इति दुर्गादासः ॥

षिन्भ, उ हिंसने । दीप्तौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-दीप्तौ अक०-सेट् । क्वावेट् उ, सिम्भित्वा सिब्ध्वा । इति दुर्गादासः ॥

षिल, श उञ्छे । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-सेट् ।) उञ्छ उद्‌गतशस्यशेषापहरणम् । श, सिलति धान्यं दीनः । सेलिता । इति दुर्गादासः ॥

षिव, य उ तन्तुततौ । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट् । क्वावेट् ।) तन्तुततिस्तन्तुभिर्ग्रन्थनम् । य, सीव्यति वस्त्रं सौचिकः । उ, सेवित्वा स्यूत्वा । इति दुर्गादासः ॥

षु, गतौ । ऐश्वर्य्यप्रसवयोश्च । इति कविकल्पद्रुमः (भ्वा०-पर०-सक०-अनिट् ।) सवति । इति दुर्गादासः ॥

षु, ञ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-अनिट् ।) ञ, सुषाव सुषुवे । इति दुर्गादासः ॥

षु, न ञ सन्धाक्लेदपीड़मन्थे । इति कविकल्पद्रुमः ॥ (स्वा०-उभ०-सक०-अक०च-अनिट् ।) मूर्द्धन्यादिः । न ञ, सुनोति सुनुते । सन्धा सन्धानम् । क्लेद इह स्नानं मङ्गलस्नानं वा । तथाच षु ञ अभिषवे । इति प्राञ्चः । अभिषवः पीडनं मन्थनं वेति त्रिलोचनादयः । स्नानञ्चेति दुर्गः । सन्धानं मङ्गलस्नानं वेति धातुप्रदीपः । इति दुर्गादासः ॥

षु, ल ऐश्वर्य्यप्रसवयोः । इति कविकल्पद्रुमः ॥ (अदा०-पर०-अक०-सक० च सेट् ।) ल, सौति । इति दुर्गादासः ॥

षुः, पुं, गर्भविमोचनम् । इत्येकाक्षरकोषः ॥

षुट्ट, क तौच्छ्ये । अनादरे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) पञ्चमस्वरी टद्वयान्तः । क, सुट्टयति । दस्यादिरयमिति भीमः । तौच्छ्यमल्पीभावः । इति दुर्गादासः ॥

षुम्भ, दीपनहिंसयोः । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-दीपने अक०-हिंसायां सक०-सेट्।) मूर्द्धन्यादिः । पञ्चमस्वरी । सुम्भति सुषुम्भ । इति दुर्गादासः ॥

षुर, श ऐश्वर्ये । दीप्तौ । इति कविकल्पद्रुमः ॥(तुदा०-पर०-अक०-सेट् ।) मूर्द्धन्यादिः । श, सुरति सोरिता सुषोर । भा दीप्तिः । ऐश्वर्य्यमैश्वर्य्ययुक्तत्वम् । इति दुर्गादासः ॥

षुह, लृ य शक्तौ । इति कविकल्पद्रुमः (दिवा०-पर०-सक०-सेट् ।) शक्तिः [illegible] लृ, असुहत् । य, सुह्यति दुःखं मुनिः [illegible] इत्यर्थः । सुषोह । इति दुर्गादासः ॥

षू, ङ ल सूतौ । इति कविकल्पद्रुमः ॥ ([illegible] आत्म०-सक०-अनिट् ।) मूर्द्धन्यादिः । [illegible] सूते । इति दुर्गादासः ॥

षू,य ङ औ सूतौ । इति कविकल्पद्रुमः ॥ ([illegible] आत्म०-सक० अनिट् ।) य ङ, सूयते । सून । सूतिर्गर्भविमोचनम् । सूते पुत्रं [illegible] अन्यत्रापि धर्म्मोऽयं प्रसूयते । इति दु[illegible]

षू, श प्रेरे । इति कविकल्पद्रुमः ॥ (तुदा०-[illegible] सक०-अनिट् ।) मूर्द्धन्यादिः । श, सु[illegible] इति दुर्गादासः ॥

षूः, स्त्री, गर्भविमोचनम् । इति कश्चिदेका[illegible] कोषः ॥

षूद, क्षरणे । इति प्राञ्चः । (भ्वा०-पर०-[illegible] सेट् ।) क्षरणमवदारणं हिंसोपलक्षण[illegible] रमानाथेन व्याख्यातम् । इति दुर्गादास[illegible]

षूद, क आस्रुतिहत्योः । निरासे । इति क[illegible] द्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) [illegible] स्वीकारः । क, सूदयति धनं [illegible] दाता । रमानाथस्तु आस्रवण इति पठित्वा सूदयति मदिरां भाण्डात् [illegible] इत्यर्थं इत्याह । इति दुर्गादासः ।

षूद, ङ निरासे । इति कविकल्पद्रुमः ॥ ([illegible] आत्म०-सक०-सेट् ।) षष्ठस्वरी । ङ, [illegible] निरासो निःक्षेपः । इति दुर्गादासः ॥

षूर, ङ य ई स्तम्भे । हिंसे इति [illegible] (दिवा०-आत्म०-स्तम्भे अक०-हिंसे [illegible] सेट् । निष्ठायां अनिट् ।) ङ य, सूर्य्य[illegible] सूर्णः । केचिदयं न मन्यते । स्तम्भो [illegible] भावः । इति दुर्गादासः ॥

षूर्क्ष, आदरे । इति कविकल्पद्रुमः ॥ (भ्वा०-[illegible] सक०-सेट् ।) रेफयुक्तः । षष्ठस्वरी । [illegible] दुष्टं लोकः । इति दुर्गादासः ॥

षूर्क्ष्य, ईर्ष्ये । इति कविकल्पद्रुमः ॥ (भ्वा०-[illegible] अक०-सेट् ।) सूर्क्ष्यति सुषूर्क्ष्य । [illegible] ऽयमित्येके । इति दुर्गादासः ॥

षूष, प्रसवे । इति कविकल्पद्रुमः ॥ (भ्वा०-[illegible] सक०-सेट् ।) षष्ठस्वरी मूर्द्धन्यादिः । [illegible] इति दुर्गादासः ॥

षेक, ऋ ङ सर्पणे । इति कविकल्पद्रुमः ॥ ([illegible] आत्म०-सक०-सेट् ।) मूर्द्धन्यादिः । [illegible] षोपदेशविधौ वर्ज्जनेऽपीह पाठ [illegible] रोधात् । ऋ, असिषेकत् । ङ, सेकते । [illegible] दुर्गादासः ॥

षेल, ऋ चालगत्योः । इति [illegible] पर०-सक०-सेट् ।) मूर्द्धन्यादिः । ऋ, [illegible] सेलत् । इति दुर्गादासः ॥

श, क्त उ ङ सेवने। इति कविकल्पद्रुमः॥(भ्वा॰ उभ॰-आत्म॰-च-सक॰-सेट्।) ऋ, असिषेवत्। ङ, सेवति सेवते। ङ, सेवते। सेवनमाराधनमुपभोग आश्रयणञ्च। विष्णुं सेवते कुसुमं सेवते तीर्थं सेवते साधुः। अन्ये त्वस्मात् परस्मैपदमसमन्यमानाः नीचं सकृदपि सेवति नीच एव। स्वाधीने विभवेऽप्यहो नरपतिं सेवन्ति किं मानिन इत्यादौ गणकृतानित्यत्वमाहुः। इति दुर्गादासः॥

, क्षये। इति कविकल्पद्रुमः॥ (भ्वा॰-पर॰-अक॰-अनिट्।) मूर्द्धन्यादिः। षायति। इति दुर्गादासः॥

ो, य नाशे। इति कविकल्पद्रुमः॥ (दिवा॰-पर॰-सक॰-अनिट्।) मूर्द्धन्यादिः। नाश इह नष्टीकरणम्। य, स्यति यमो जन्तून्। इति दुर्गादासः॥

ोडन्, [त्]पुं (षट् दन्ता अस्य। "पृषोदरादीनि यथोपदिष्टम्।" ६। ३। १०९। इति एव उत्वं दन्तदशधात्त्तरपदादिष्टुत्वञ्च।) षड्दन्तयुक्तहयः। इति हेमचन्द्रः॥

षोडश,[न्]त्रि, (षट् च दश च। "पृषोदरादीनि यथोपदिष्टम्।" ६। ३। १०९। इति साधुः।) संख्याविशेषः। षडधिका दश। षोल इति भाषा। तद्वाचकौ इन्दुकलामातृकाशब्दौ। इति कविकल्पलता॥ नित्यबहुवचनान्तोऽयम्॥ (यथा, मनुः। ११। २४९।
"सव्याहृतिप्रणवकाः प्राणायामास्तु षोडश।
अपि भ्रूणहनं मासात् पुनन्त्यहरहःकृताः॥")

षोडशः, त्रि, षोडशानां पूरणः। षोडशन्शब्दात् डट्प्रत्ययेन निष्पन्नः। इति सिद्धान्तकौमुदी। (यथा, भागवते। २। ७। ६।
"स्वर्गेषु यत् षोडशमेकविंशं
निष्कञ्चनानां नृप यद्धनं विदुः॥")

षोड़शकलाः, स्त्री, (षोड़शसंख्यान्विताः कलाः।) चन्द्रमण्डलस्य षड़धिकदशभागाः। तासां नामानि यथा। ततश्चन्द्रस्य अमृतादिषोड़शकलाः पूर्ववत् प्राणप्रतिष्ठां कृत्वा पूजयेत्। अं अमृतायै नमः १। आं मानदायै २। इं पूषायै ३। ईं तुष्ट्यै ४। उं पुष्ट्यै ५। ऊं रत्यै ६। ऋं धृत्यै ७। ॠं शशिन्यै ८। ऌं चन्द्रिकायै ९। ॡं कान्त्यै। १० एं ज्योत्स्नायै ११। ऐं श्रियै १२। ओं प्रीत्यै १३। औं अङ्गदायै १४। अं पूर्णायै २५। अः पूर्णामृतायै १६। नमः सर्व्वत्र। शक्तश्चेत् प्रत्येकमावाह्य गन्धादिभिः पूजयेत्। इति तन्त्रसारः॥

षोडशदानं, क्ली, (षोड़शप्रकारं दानम्।) श्राद्धादौ षोड़शप्रकारदेयद्रव्यम्। तत्क्रममाहुः साम्प्रदायिकाः।
"भूम्यासनं जलं वस्त्रं प्रदीपोऽन्नं ततः परम्।
ताम्बूलच्छत्रगन्धाश्च माल्यं फलमतःपरम्॥
शय्या च पादुका गावः काञ्चनं रजतं तथा।
दानमेतत् षोड़शकं प्रेतमुद्दिश्य दीयते॥"

तत् षोड़शषोड़शकैरेको दानसागरो भवति॥ तत्र भूमिः पूजायां दानवाक्ये च प्रियदत्तेति विशेषणम्। भूमेर्देवता विष्णुः षष्टिवर्षसहस्राावच्छिन्नस्वर्गवासः फलम्। प्रतिग्रहे तद्भूमेः प्रदक्षिणीकरणम्। तद्भूमेरसन्निधाने तामुद्दिश्य प्रदक्षिणम्॥ १॥ आसनस्य उत्तानाङ्गिरसो देवता राज्यस्थानानुत्तमस्वर्गप्राप्तिः फलम्। तत्र विशेषानुपदेशात् करमध्यस्थाग्नेयेन तीर्थेन प्रतिग्रहः। एवमन्यत्रापि आग्नेयं करतलम्॥ २॥ जलस्य वरुणो देवता तृप्तिप्राप्तिः फलम्॥ ३॥ वस्त्रस्य वृहस्पतिर्द्देवता चन्द्रसालोक्यप्राप्तिः फलम्। प्रतिग्रहे दशान्तग्रहणपरिधाने॥ ४॥ दीपस्य अग्निर्द्देवता उत्तमचक्षुप्राप्तिः फलम्॥ ५॥ अन्नस्य प्रजापतिर्देवता अक्षयसुखप्राप्तिः फलम्। प्रतिग्रहे मुष्टिग्रहणम्॥ ६॥ ताम्बूलस्य वनस्पतिर्देवता मेधावित्वसुभगत्वप्राज्ञत्वदर्शनीयत्वप्राप्तिः फलम्॥७॥ छत्रस्य उत्तानाङ्गिरसो देवता सर्व्वव्याधिविनिर्मुक्तत्वश्रीमत्त्वबहुपुत्त्रत्वप्राप्तिः फलम्। प्रतिग्रहे दण्डधारणम्॥ ८॥ गन्धस्य गन्धर्व्वो देवता ब्रह्मपदप्रयाणं फलम्॥ ९॥ माल्यस्य वनस्पतिर्देवता अत्यन्तसुखित्वभवनं फलम्॥१० फलस्य वनस्पतिर्देवता सदा युक्तत्वं फलम्॥ ११॥ शय्यायाः उत्तानाङ्गिरसो देवता अत्यन्तसुखित्वभवनं फलम्। प्रतिग्रहे आरोहणम्॥ १२॥ पादुकायुगलस्य उत्तानाङ्गिरसो देवता सर्व्वलोकसुखगमनं फलम्। प्रतिग्रहे आरोहणम्॥ १३॥ धेनो रुद्रो देवता सूर्य्यलोकप्राप्तिः फलम्। तत्र धेनुं प्राङ्मुखीमात्मसमीपमानीय।
"ॐ या लक्ष्मीः सर्व्वभूतानां या च देवेष्ववस्थिता।
धेनुरूपेण सा देवी मम शान्तिं प्रयच्छतु॥
ॐ देवस्य या च रुद्राणी शङ्करस्य च या प्रिया।
धेनुरूपेण सा देवी मम शान्तिं प्रयच्छतु॥
ॐ विष्णोर्वक्षसि या लक्ष्मीर्या लक्ष्मीर्धनदस्य च।
या लक्ष्मीः सर्व्वभूतानां सा धेनुर्वरदास्तु मे॥
ॐ चतुर्मुखस्य या लक्ष्मीः स्वाहा चैव विभावसोः।
चन्द्रार्कशक्रशक्तिर्या धेनुरूपास्तु सा श्रिये॥
ॐ स्वधा त्वं पितृसंघानां स्वाहा यज्ञभुजां यतः।
सर्व्वपापहरा धेनुस्तस्माच्छान्तिं प्रयच्छ मे॥
सर्व्वदेवमयीं देवीं सर्व्ववेदमयीन्तथा।
सर्व्वलोकनिमित्ताय सर्व्वलोकमपि स्थिराम्।
प्रयच्छामि महाभागामक्षयाय सुखाय च॥"
इत्युच्चार्य्य उत्सृजेत्। प्रतिग्रहे पुच्छधारणम्॥ १४॥ हिरण्यस्याग्निर्द्देवता दीर्घायुःप्राप्तिः फलम्॥ १५॥ रजतस्य चन्द्रमा देवता उत्तमरूपप्राप्तिः फलम्॥ १६॥ इति शुद्धितत्त्वम्॥ *॥ गयाप्रकृत्युक्तषोड़शदानं यथा,
"स्वर्णं रौप्यं तथा ताम्रं कांस्यं गावो गजाश्वयाः।
रत्नं भूमिस्तिलो वस्त्रं शय्या चैत्रमुपानहौ॥
दापयेत् पितृयज्ञेषु दानं षोड़शकं मतम्॥"
इति वायुपुराणे गयामाहात्म्यम्॥

षोडशभुजा, स्त्री, (षोडश भुजा यस्याः।) षोड़शहस्तयुक्ता दुर्गा। यथा,—
"यदा तु षोडशभुजां महामायां प्रपूजयेत्।
दुर्गातन्त्रेण मन्त्रेण विशेषं तत्र वै शृणु॥
कन्यायां कृष्णपक्षस्य एकादश्यामुपोषितः।
द्वादश्यामेकभक्तन्तु नक्तं कुर्य्यात् परेऽहनि॥
चतुर्द्दश्यां महामायां बोधयित्वा विधानतः।
गीतवादित्रनिर्घोषैर्नानानैवेद्यवेदनैः॥
अयाचितं बुधः कुर्य्यात् उपवासं परेऽहनि।
एवमेव व्रतं कुर्य्यात् यावद्वै नवमी भवेत्॥
ज्येष्ठायान्तु समभ्यर्च्य मूलेन प्रतिपूजयेत्।
उत्तरेणार्च्चनं कृत्वा श्रवणान्ते विसर्ज्जयेत्॥"
इति कालिकापुराणे ५९ अध्यायः॥

षोड़शमातृकाः, स्त्री, (षोड़शसंख्यकाः मातृकाः।) षोडशसंख्यकदेवीविशेषः। यथा। गौर्य्यादिषोड़शमातृकाभ्यो नमः। इति दुर्गोत्सवपद्धतिः॥ तासां नामानि यथा, श्राद्धतत्त्वे।
"गौरी पद्मा शची मेधा सावित्री विजया जया।
देवसेना स्वधा स्वाहा मातरो लोकमातरः॥
शान्तिः पुष्टिर्धृतिस्तुष्टिरात्मदेवतया सह।
आदौ विनायकः पूज्य अन्ते च कुलदेवता॥"

षोड़शर्त्विक्क्रतुः, पुं, (षोड़श ऋत्विजो यत्र। तादृशः क्रतुः।) षोड़शपुरोहितसाध्ययागविशेषः। स तु ज्योतिष्टोमयागः। द्वादशाहसाध्यसत्रयागश्च। यथा। ज्योतिष्टोमे द्वादशशतगोदक्षिणाविभागः षोड़शर्त्विजां तद्विकृतीभूते सत्रात्मके द्वादशाहसाध्ये शतेनार्द्धिनो दीक्षयन्तीत्यादिदर्शनेन निर्णीयते। तत्र विभागमनुरप्याह।
"सर्व्वेषामर्द्धिनो मुख्यास्तदर्द्धेनार्द्धिनोऽपरे।
तृतीयिनस्तृतीयांशाश्चतुर्थांशैकपादिनः॥"
दक्षिणा गोशतविभागाय श्रौतकात्यायनोऽपि। अथ द्वादश द्वादश आद्येभ्यः षट् षट् द्वितीयेभ्यश्चतस्रश्चतस्रस्तृतीयेभ्यस्तिस्रस्तिस्र इतरेभ्यः। इत्यत्र षोड़शर्त्विजां चतुरश्चतुरः कृत्वा चत्वारो वर्गाः। इति मलमासतत्त्वम्॥ *॥ एषां ऋत्विजां नामानि यथा ब्रह्मा १ ब्राह्मणाच्छंसी २ आग्नीध्रः ३ पोता ४। एते सार्व्ववेदीयाः। होता ५ मैत्रावरुणः ६ अच्छावाक् ७ ग्रावस्तोता ८। एते ऋग्वेदिनः। अध्वर्युः ९ प्रतिप्रस्थाता १० नेष्टा ११ उन्नेता १२। एते याजुषाः। उद्गाता १३ प्रस्तोता १४ प्रतिहर्त्ता १५ सुब्रह्मण्यः १६। एते सामगाः। इति महाभारते मोक्षधर्म्मे १०५ अध्याये नीलकण्ठटीका

षोड्शांशुः, पुं, (षोडश अंशवो यस्य।) शुक्रः। इति श षोड़शकिरणयुक्ते, त्रि

षोडशाङ्गः, पुं,(षोडश द्रव्याणि अङ्गानि यस्य ।) षोडशप्रकारसुगन्धिद्रव्यमिश्रितधूपः । यथा,—
"गुग्गुलुं सरलं दारु पत्रं मलयसम्भवम् ।
ह्रीवेरमगुरुं कुष्ठं गुडं सर्ज्जरसं घनम् ॥
हरीतकीं नखीं लाक्षां जटामांसीञ्च शैलजम् ।
षोड़शाङ्गं विदुर्धूपं दैवे पैत्रे च कर्म्मणि ॥"
इति तन्त्रसारः ॥
षोड़शावयवयुक्ते, त्रि ॥
षोड़शाङ्घ्रिः, पुं,(षोडश अङ्घ्रयो यस्य ।) कर्कटः । इति हेमचन्द्रः ॥ षोडशचरणयुक्ते, त्रि ॥
षोडशारं, क्ली, (षोड़श अराणि इव दलानि यस्य ।) षोडशदलपद्मम् । यथा, तन्त्रे ।
"आधारे लिङ्गनाभौ हृदयसरसिजे तालुमूले ललाटे
द्वे पत्रे षोड़शारे द्विदशदशदले द्वादशार्द्धे चतुष्के ।
वामान्ते वादिलान्ते ड-फ-क-ठ-सहिते कण्ठदेशे स्वराणां
हचौ कोदण्डमध्ये सकलदलगत वर्णरूपं नमामि ॥"
जलाशयोत्सर्गीयवेदिकोपरिकर्त्तव्यचक्रम् । यथा, मत्स्यपुराणे ।
"रजसा मण्डलं कुर्य्यात् पञ्चवर्णेन तत्त्ववित् ।
षोडशारं भवेच्चक्रं पद्मगर्भं चतुर्म्मुखम् ॥
चतुरस्रन्तु परितो वृत्तं मध्ये गुणोत्तरम् ।
वेद्याश्चोपरि तत् कृत्वा ग्रहाल्लोकपतींस्तथा ।
विन्यसेन्मन्त्रतः सर्व्वान् प्रतिदिक्षु विचक्षण ॥"
इति जलाशयोत्सर्गतत्त्वम् ॥
षोड़शार्चिः, [स्] पुं, (षोडश अर्च्चींषि यस्य ।) शुक्रग्रहः । इति भूरिप्रयोगः ॥ षोड़शशिखायुक्ते, त्रि ॥
षोड़शावर्त्तः, पुं, (षोड़श आवर्त्ता यस्य ।)शङ्खः । इति हेमचन्द्रः ॥ षोड़शावर्त्तयुक्ते, त्रि ।
षोडशिकाम्रं,क्ली, पलपरिमाणम् । इति वैद्यकपरिभाषा ॥
षोड़शी, [न्] पुं, यज्ञपात्रविशेषः । यथा अतिरात्रे षोड़शिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णातीति । षोड़शी ससोमकपात्रविशेषः । इति मलमासतत्त्वम् ॥
षोड़शी, स्त्री, दशमहाविद्यान्तर्गतविद्याविशेषः । यथा,—
"काली तारा महाविद्या षोडशी भुवनेश्वरी ।
भैरवी छिन्नमस्ता च विद्या धूमावती तथा ॥
वगला सिद्धविद्या च मातङ्गी कमलात्मिका ।
एता दश महाविद्याः सिद्धविद्याः प्रकीर्त्तिताः ॥"
तत्र पारिभाषिकीं षोड़शीमाह ज्ञानार्णवे ।
"चन्द्रान्तं वारुणान्तञ्च शक्रादिसहितं पृथक् ।
वामाक्षिबिन्दुनादाढ्यं विश्वमातृकलात्मकम् ॥
शिवाद्यां योजयेद्देवि साक्षात् स्वयमात्मरूपिणी ।
त्रिकूटाः सकला भेदाः पञ्चकूटा भवन्ति हि ।
वैष्णवी वसुकूटा स्यात् षट्कूटा शाङ्करी भवेत् ॥"
अस्यार्थः चन्द्रान्तं हकारः । वारुणान्तं शकारः । शक्रादौ ईकः । वामाक्षि ईकारः । शिवादौ पूर्व्वोक्तद्वादशविद्यादौ ।
"वेदादिमण्डिता देवि शिवशक्तिमयी सदा ।
सदा भेदास्तु सकलाः षट्कूटा परमेश्वरि ।
वैष्णवी नवकूटा स्यात् सप्तकूटा च शाङ्करी ॥"
अस्यार्थः शिवशक्तिमयी पूर्व्वोक्ता बीजद्वयवती । वेदादिः प्रणवः । मण्डिता आदौ भूषिता ॥*॥ अथ महाषोड़शी ।
"वाग्बीजद्वयं भद्रे विपरीतक्रमेण हि ।
विलिख्य परमेशानि ततोऽन्यानि समुद्धरेत् ॥
अन्तस्थं स्त्री वरारोहे कुमारी त्रिपुरेश्वरी ।
एभिस्तु पञ्चसंख्याकैर्बीजैः संपुटितां यजेत् ॥
षट्कूटां परमेशानि शिवेयं षोड़शाक्षरी ।
त्रिकूटाः सकला भद्रे षोडशाणां भवन्ति हि ।
वैष्णव्येकोनविंशार्णा शैवी सप्तदशाक्षरी ॥"
अस्यार्थः । वाग्बीजद्वयं मायारमात्मकम् ।
विपरीतक्रमः आदौ रमा पश्चान्माया ।
अन्तर्मध्य स्थितं कामबीजं स्त्री आदौ यस्याः कुमार्य्याः । एभिः पञ्चसंख्याकैर्बीजैः षट्कूटां सप्तकूटां नवकूटां वा संपुटितां संपुटवत् कृतां सैवानुलोमविलोमतः संपुटितामित्यर्थः । योगिनीतन्त्रे ।
"श्रीबीजमायास्मरयोनिशक्ति-
स्तारञ्च माया कमलाय विद्या ।
शक्त्यादिबीजैश्च विलोमतोऽस्याः
श्रीषोडशीयञ्च शिवप्रदिष्टा ॥"
तथा च रुद्रयामले ।
"श्रीर्म्माया मदनो वाणी परा तारं शिवप्रिया ।
हरिप्रिया त्रिकूटा सा परा वाणी मनोभवः ।
मातालक्ष्मीर्महाविद्या श्रीबीजं षोडशी परा ॥"
अथ बीजावली षोड़शी । रुद्रयामले ।
"श्रीबीजमादौ संलिख्य तथैव च कुमारिकाम् ।
श्रीबीजमादौ कामञ्च वाग्माया कमला तथा ॥
परां कामञ्च वाग्बीजं माया श्रीबीजमेव च ।
बीजावली षोड़शीयं सर्व्वतन्त्रेषु गोपिता ॥
राज्यं देयं शिरो देयं न देया षोड़शाक्षरी ॥"*॥
तन्त्रान्तरे ।
"आद्या कुण्डलिनी शक्तिः शक्तिराद्या ततः परा निवेशयित्तयोर्म्मध्ये देवि गोविन्दवल्लभाम् ॥
ततस्तु मन्मथं बीजं श्रीबीजं तदनन्तरम् ।
हृल्लेखा रमयोर्वक्त्रे वेदवक्त्रं विनिःक्षिपेत् ॥
ततो लोपां न्यसेद्देवि त्रिकूटामथवा पराम् ।
आद्यानि पञ्चबीजानि पश्चाद्विन्यस्य सुन्दरि ।
षोड़शीयं सुगोप्या हि स्नेहाद्देवि प्रकाशिता ॥
अस्या माहात्म्यमतुलं जिह्वाकोटिशतैरपि ।
वक्तुं न शक्यते देवि किं पुनः पञ्चभिर्म्मुखैः ॥
अपि प्रियतमं देयं सुतदारधनादिकम् ।
राज्यं देयं शिरो देयं न देया षोड़शाक्षरी ॥"
तन्त्रान्तरे ।
"सिन्दूररजसा वापि कुङ्कुमेन विलेपिते ।
लिखित्वा दर्शयेद्भूमौ न च कर्णे प्रकाशयेत् ॥
ततः ... शिवदाणें ...
बीजानीदमीमाह । शिवयामले ।
कामो माया रमा वाणी त्रिकुटा च
कालो कामकला कुर्चं ...
श्रीमहाषोडशीयञ्च या ख्याता भुवने
स्वामिन ...
महामहत्वविद्याख्यादौ ...
मायाकामरमा भूता या या विद्या
अङ्कुरा त्रिमितीज न ताभो
प्रकाशिता महादेवी या पुरा ते पु
शान्तकामराजन्तु श्रीक्रमे ।
"मायाबीजं तथा भिण्टो कामं ...
जातवेदो मृगाङ्केन लाञ्छितं परिकी
एतद्वाग्भवकूटञ्च पूर्व्ववत् कामराजम्
तथैव शक्तिबीजन्तु सुन्दर्य्या प्रकी
अत्रापि पूर्व्ववद्बीजप्रयोगः । ...
भिण्टो एकारः । पुनः शास्त्रमाह ।
"एतद्वर्गं ततो माया ब्रह्मा
वामनेत्रेण संयुक्तो नादबिन्दुविभूषि
एतद्वाग्भवमुद्दिष्टं पूर्व्ववत् कामराज
भग एकारः । अत्रापि
विशेषः ।
"ब्रह्मबीजं यदा दद्यात् त्रिकूटेषु सर्व्वे
प्रथमा सुन्दरी देवी द्वितीया ...
शक्तिकूटे महेशानि भवन्तसुन्दरी ...
एषा तु सुन्दरी विद्या मतभेदेन दर्शि
त्रिकूटान्ते श्रीबीजं बिन्दुसर्गविभूषित
एषा श्रीप्रासादसंयुक्ता दारिद्र्यदुःखनाशि
इति तन्त्रसारः ।
जनविंशतिपिण्डदानक्रिया । यथा,—
प्रेतशिलोद्धारोत्था द्वादशपिण्डान् ...
पिण्डाय दद्यात् । ...
तद्विधानं यथा,—
"अमावस्यान्तु कन्यार्के तीर्थप्राप्तौ
कृत्वा श्राद्धं विधानेन दद्यात् षोड़शपिण्ड
वायुपुराणीयस्तत्प्रयोगो यथा । ज...
दास्यमानपिण्डस्थानानि यथादक्षि
अङ्गुष्ठेन कृतानि तत्र दक्षिणाग्रान् ...
आस्तीर्य्य ।
"अस्मत्कुले मृता ये च गतिर्येषां न ...
आवाहयिष्ये तान् सर्व्वान् दर्भपृष्ठे तिल
मातामहकुले ये च गतिर्येषां न विद्यते ।
आवाहयिष्ये तान् सर्व्वान् दर्भपृष्ठे तिल
बन्धुवर्गकुले ये च गतिर्येषां न विद्यते ।
आवाहयिष्ये तान् सर्व्वान् दर्भपृष्ठे तिलोदकैः
इत्येतैस्तिलोदकैरावाह्य ।
"आब्रह्मस्तम्बपर्य्यन्तं देवर्षिपितृमानवाः ।
तृप्यन्तु पितरः सर्वे मातृमातामहादयः ।
अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम् ।
आब्रह्मभुवनाल्लोकादिदमस्तु तिलोदकम् ।

...नाभ्यां तिलोदकाञ्जलीन् दद्यात्। ततो मू-
...दत: पितृतीर्थेन पिण्डान् दद्यात्। तत्र क्रम
...तृकुले मृता ये च गतिर्येषां न विद्यते।
...मुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥१॥
...ामहकुले ये च गतिर्येषां न विद्यते।
...मुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥२॥
...वर्गकुले ये च गतिर्येषां न विद्यते।
...मुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥३॥
...ातदन्ता ये केचित् ये च गर्भे प्रपीड़िता:।
...मुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥४॥
...नदग्धाश्च ये केचिदग्निदग्धास्तथा परे।
...ुचौरहता ये च तेभ्य: पिण्डं ददाम्यहम्॥५
...दाहे मृता ये च सिंहव्याघ्रहताश्च ये।
...भि: शृङ्गिभिर्व्वापि तेभ्य: पिण्डं ददा-
म्यहम् ॥६॥
...न्धनमृता ये च विषशस्त्रहताश्च ये।
...मापघातिनो ये च तेभ्य: पिण्डं ददाम्यहम्॥७
...न्ये वर्त्मनि वने क्षुधया तृषया हता:।
...प्रेतपिशाचाश्च तेभ्य: पिण्डं ददाम्यहम् ॥
...जले ॥ ८ ॥
...वे चान्धतामिस्रे कालसूत्रे च ये स्थिता:।
...ामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥९॥
...रकयातनासंस्था: प्रेतलोके च ये गता:।
...ामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥१०॥
...नेकयातनासंस्था ये नीता यमकिङ्करै:।
...ामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥११॥
...केषु समस्तेषु यातनासु च ये स्थिता:।
...ामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥१२॥
...पुयोनिगता ये च पक्षिकीटसरीसृपा:।
...थवा वृक्षयोनिस्थास्तेभ्य: पिण्डं ददाम्य-
हम् ॥ १३ ॥
...न्यन्तरसहस्रेषु भ्रमन्त: स्वेन कर्म्मणा।
...नुष्यं दुर्लभं येषां तेभ्य: पिण्डं ददाम्यहम् ॥१४
...व्यन्तरीक्षभूमिष्ठा: पितरो बान्धवादय:।
...ता असंस्कृता ये च तेभ्य: पिण्डं ददाम्य-
हम् ॥ १५ ॥
...केचित् प्रेतरूपेण वर्त्तन्ते पितरो मम।
...सर्व्वे तृप्तिमायान्तु पिण्डदानेन सर्व्वदा ॥१६
...ऽबान्धवा बान्धवा वा येऽन्यजन्मनि बान्धवा:।
...षां पिण्डो मया दत्त: अक्षय्यमुपतिष्ठताम्॥१७
...पितृवंशे मृता ये च मातृवंशे च ये मृता:।
...गुरुश्वशुरबन्धूनां ये चान्ये बान्धवा मृता:॥
...मे कुले लुप्तपिण्डा: पुत्त्रदारविवर्ज्जिता:।
...क्रियालोपगता ये च जात्यन्धा: पङ्गवस्तथा॥
...विरूपा आमगर्भाश्च ज्ञाताज्ञाता: कुले मम।
...षां पिण्डो मया दत्त: अक्षय्यमुपतिष्ठताम्॥१८
आब्रह्मणो ये पितृवंशजाता
मातुस्तथा वंशभवा मदीया:।
कुलद्वये च मम दासभूता
भृत्यास्तथैवाश्रितसेवकाश्च॥
मित्राणि सख्य: पशवश्च वृक्षा
दृष्टा ह्यदृष्टाश्च कृतोपकारा:।

जन्मान्तरे ये मम दासभूता-
स्तेभ्य: स्वधा पिण्डमहं ददामि ॥१८॥
अत्रोनविंशतिपिण्डे षोडशपिण्डत्वं पारिभाषिकं
पलाशवत्। इति तिथ्यादितत्त्वम् ॥६॥ एतेषां
सन्त्राणां स्त्रीलिङ्गोहेन स्त्रीषोड़शीत्वं भवति॥०
अथ मातृषोड़शी।
"गर्भेदुःखमसि चैव विषमे भूमिवर्त्मनि।
तस्या निष्क्रमणार्थाय मातृपिण्डं ददाम्यहम्॥
मासि मासि कृतं कष्टं वेदना प्रसवेषु च।
तस्या निष्क्रमणार्थाय मातृपिण्डं ददाम्यहम्॥
गैर्यिन्ये प्रसवे चैव मातुरत्यन्तदुष्करम्।
तस्या निष्क्रमणार्थाय मातृपिण्डं ददाम्यहम्॥
पद्भ्यां जनयते मातुर्दुःखस्यैव सुदुस्तरम्।
तस्या निष्क्रमणार्थाय मातृपिण्डं ददाम्यहम्॥
पद्भ्यामित्यत्र दद्यामिति च पाठ: ॥ ४ ॥
अग्निना शोषते देहं त्रिरात्रानशनेषु च।
तस्या निष्क्रमणार्थाय मातृपिण्डं ददाम्यहम्॥
पिबेच्च कटुद्रव्याणि क्वाथानि विविधानि च।
तस्या निष्क्रमणार्थाय मातृपिण्डं ददाम्यहम्॥
दुर्लभं अभक्ष्यस्य त्यागे विन्दति यत् फलम्।
तस्या निष्क्रमणार्थाय मातृपिण्डं ददाम्यहम्॥
रात्रौ मूत्रपुरीषाभ्यां भिद्यते मातृकर्पटम्।
तस्या निष्क्रमणार्थाय मातृपिण्डं ददाम्यहम्॥
पुत्त्रं व्याधिसमायुक्तं मातृदुःखसहर्निशम्।
तस्या निष्क्रमणार्थाय मातृपिण्डं ददाम्यहम्॥
यदा पुत्त्रो न लभते तदा मातुश्च शोचनम्।
तस्या निष्क्रमणार्थाय मातृपिण्डं ददाम्यहम्॥
क्षुधया विह्वले पुत्त्रे ददाति निर्भरं स्तनम्।
तस्या निष्क्रमणार्थाय मातृपिण्डं ददाम्यहम्॥
दिवा रात्रौ यदा मातु: शोषणञ्च पुन: पुन:।
तस्या निष्क्रमणार्थाय मातृपिण्डं ददाम्यहम्॥
पूर्णे तु दशमे मासि मातुरत्यन्तदुष्करम्।
तस्या निष्क्रमणार्थाय मातृपिण्डं ददाम्यहम्॥
गात्रभङ्गो भवेन्मातुर्मृत्युं नैव प्रयच्छति।
तस्या निष्क्रमणार्थाय मातृपिण्डं ददाम्यहम्॥
अल्पाहारवती माता यावत् पुत्त्रोऽस्ति बालक:।
तस्या निष्क्रमणार्थाय मातृपिण्डं ददाम्यहम्॥
यमद्वारे महाघोरे पथि मातुश्च शोचनम्।
तस्या निष्क्रमणार्थाय मातृपिण्डं ददाम्यहम्॥
इति गयायां प्रसिद्धि: ॥

षोड़शोपचार:, पुं, (षोड़शप्रकार उपचार:।) षोडशप्रकारपूजाद्रव्यम्। यथा,—
"आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम्।
मधुपर्काचमनस्नानवसनाभरणानि च॥
सुगन्धिसुमनोधूपदीपनैवेद्यवन्दनम्।
प्रयोजयेदर्च्चनायां उपचारांस्तु षोड़श॥"
इति तन्त्रसार: ॥

षोढ़ा, व्य, (षष्+धाच्। पृषोदरादित्वात् साधु।) षट्प्रकारम्। यथा,—
"सप्रसङ्ग उपोद्घातो हेतुतावसरस्तथा।
निर्व्वाहकैककार्य्यत्वे षोढ़ा सङ्गतिरिष्यते॥"
इत्यनुमितौ जागदीशी टीका ॥ संख्याया धाच्प्रकारे। इति सूत्रेण षष्शब्दात् धाच्प्रत्ययेन निपातनात्सिद्धम्। इति मुग्धबोधव्याकरणम् ॥

षोढ़ान्यास:, पुं, (षोढ़ा षड़्धा न्यास:।) विधिना शरीरे मन्त्रविन्यास:। यथा। अथ षोढ़ान्यास:। तदुक्तं वीरतन्त्रे।
"केवलां मातृकां कृत्वा मातृकां तारसंपुटाम्।
मातृकापुटितं तारं न्यसेत् साधकसत्तम: ॥१॥
श्रीबीजपुटितां तान्तु मातृकापुटितन्तु तत् ॥२
कामेन पुटितां देवीं तत्पुटं काममेव च ॥३॥
शक्त्या च पुटितां देवीं शक्तिञ्च तत्पुटां न्यसेत्
क्रीं हन्द्वं पुनर्न्यस्ता ऋ-ॠ-लृ-ॡञ्च पूर्ववत् ॥५
मूलेन पुटितां देवीं तत्पुटं मन्त्रमेव च ॥६॥
अनुलोमविलोमेन न्यस्त्वा मन्त्रं यथाविधि।
मूलेनाष्टशतं कुर्य्यात् व्यापकं तदनन्तरम् ॥"
यथा, प्रणवपुटितां मातृकाम्। एवं मातृकापुटितं तारम्। एवं श्रीबीजपुटितां ताम्। तत्पुटितं श्रीबीजम्। एवं कामेन पुटितां मातृकाम्। मातृकापुटितं कामम्। एवं शक्त्या पुटितां मातृकाम्। मातृकापुटितां शक्तिं न्यसेत्। तथा क्रीं हन्द्वं ऋ-ॠ-लृ-ॡञ्च पूर्ववत्। तत्पुटितां मातृकां न्यसेत्। मातृकापुटितञ्च तत्। मन्त्रपुटितां मातृकाम्। तत्पुटितं मन्त्रम्। पुनरनुलोमविलोमेन केवलं मातृकास्थाने न्यस्य मूलेनाष्टशतेन व्यापकं कुर्य्यात्। अयं न्यासस्तारायाअपि कार्य्य:।
"इति गुप्तेन दुर्गाया अङ्गषोढ़ा प्रकीर्त्तिता।
तारायाः कालिकायाश्च छिन्नमुण्डायाश्च तथा-
परे।
एतस्मिन् न्यासवर्य्ये च सर्व्वं पापं प्रणश्यति॥"
इति तन्त्रसार: ॥

ष्टक,स प्रतीघाते। इति कविकल्पद्रुम: ॥ (भ्वा० पर०-सक०-सेट्।) स, तिष्टकयिषति। इति दुर्गादास: ॥

ष्टग,स ष संवृतौ। इति कविकल्पद्रुम: ॥ (भ्वा०-पर०-सक०-सेट्।) स, तिष्टगयिषति। दन्त्यवर्गद्वितीयोपध इति केचित्। इति दुर्गादास: ॥

ष्टन, मि शब्दे। इति कविकल्पद्रुम: ॥ (भ्वा०-पर०-अक०-सेट्।) मि, स्तनयति स्तानयति अतिष्टनत्। इति दुर्गादास: ॥

ष्टभ,इ ङ स्तम्भे। इति कविकल्पद्रुम: ॥ (भ्वा०-आत्म०-अक०-सक० च सेट्।) इ, स्तम्भते। ङ, स्तम्भते। तिष्टम्भयिषति। इकारस्य पुनरुक्ति: पूर्व्वत्र तत्सम्बन्धनिषेधायैव ङितस्तु सर्व्वे। एक एवेत् पाठबलात् बाध्य इति यत्। स्तम्भो जड़ीभाव: जड़ीकरणञ्च। स्तम्भो स्थूणाजड़ीभावौ इत्यमरोक्ते:। शीतेनावस्तब्ध: जड़ीकृत इत्यर्थ:। इति क्रमदीश्वरोक्तेश्च। स्तम्भ इह क्रियानिरोध:। इति भीम:। दीपहृदिरिति गोविन्दभट्ट:। स्तम्भो दृढीकरणञ्च। स्तम्भते कवाटेन द्वारं लोक:। इति दुर्गादास:

ष्टम, वैक्लव्ये। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट्।) वैक्लव्यं विह्वलीभावः। स्तमति। अतिष्टमत्। इति दुर्गादासः ॥

ष्टम, तँ क वैक्लव्ये। इति कविकल्पद्रुमः ॥ (अदन्त चुरा०-पर०-अक०-सेट्।) मूर्द्धन्यादिः। षोपदेशपाठो भ्वाद्यादाविति दन्त्यत्वे कृतसकारादित्वात् षत्वाभावः। तिष्टमयिषति। एवं सर्व्वत्र। इति दुर्गादासः ॥

ष्टिघ, न ङ आस्कन्दे। इति कविकल्पद्रुमः ॥ (स्वा०-आत्म०-सक०-सेट्।) आस्कन्दः आस्कन्दनम्। अभियोग इति भट्टमल्लः। न ङ, स्तिघ्नुते मही पान्थः। तिष्टिघे। इति दुर्गादासः ॥

ष्टिप, ऋ ङ च्युति। इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट्।) ऋ, अतिष्टिपत्। ङ, स्तेपते तिष्टिपे। च्युति चरणे। इति दुर्गादासः ॥

ष्टिम, य क्लेदे। इति कविकल्पद्रुमः ॥ (दिवा०-पर०-अक०-सेट्।) य, स्तिम्यति तिष्टेम। क्लेदः आर्द्रीभावः। इति दुर्गादासः ॥

ष्टीम, य क्लेदे। इति कविकल्पद्रुमः ॥ (दिवा०-पर०-अक०-सेट्।) य, ष्टीम्यति तिष्टीम। क्लेद आर्द्रीभावः। इति दुर्गादासः ॥

ष्टु, ञ ल स्तुतौ। इति कविकल्पद्रुमः ॥ (अदा०-उभ०-सक०-अनिट्।) मूर्द्धन्यादिः। ञ ल, स्तौति स्तवीति स्तुते। इति दुर्गादासः ॥

ष्टुच, ङ प्रसादे। इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट्।) मूर्द्धन्यादिस्तमध्यः। प्रसादः प्रसन्नीभावः। ङ, स्तोचते जनं तोष्टुच्यते। अस्याधो मूर्द्धन्यण इति केचित्। स्तोचते तोष्टुच्यते। इति दुर्गादासः ॥

ष्टुभ, उ ङ स्तम्भे। इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सक० च सेट्। क्त्वावेट्।) उ, स्तोभित्वा। स्तुब्ध्वा। ङ, स्तोभते तुष्टोभयिषति। स्तम्भो जड़ीभावः तत्करणञ्च। स्तम्भौ स्तब्धजड़ीभावाविस्मयरोगतः। गीतेनावस्तब्धो नहोनेन इत्यर्थः। इति क्रमदीश्वरोक्तेश्च।

"दाम्भ्रो च स्तोभते भूयो मधुप्रकृतिको नरः।"

इति हलायुधः।

स्तोभते हर्ष मौनो वायु। इति चतुर्भुजः। स्तम्भ इह क्रियानिरोधः। इति भीमः। दीप्ति इति गोविन्दभट्टः। इति दुर्गादासः।

ष्टूप, क उच्छ्राये। इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट्।) पतस्वरा। उच्छ्रायो राशीकरणम्। क, स्तूपयति धान्यं कृषकः। तुष्टूपयिषति। इति दुर्गादासः ॥

ष्टूप, य इर् उच्छ्राये। इति कविकल्पद्रुमः ॥ (दिवा०-पर०-अक०-सेट्।) पतस्वरौ। य, स्तूप्यति। इर्, अस्तूपत् अस्तूपीत्। पुषादित्वादिर इ इत्वाभावे। अस्तूपन्। इति दुर्गादासः ॥

ष्टृ, ञ [illegible]। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट्।) [illegible] इति दुर्गादासः ॥

ष्टृह, ऊ श वधे। इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-वेट्।) मूर्द्धन्यादिः तमध्यः। ऊ, अस्तर्हीत्। अस्तृक्षत्। श, स्तृहती स्तृहन्ती। तिष्टर्हयिषति। इति दुर्गादासः ॥

ष्टृंह, ऊ श वधे। इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-वेट्।) मूर्द्धन्यादिः तमध्यः। षष्ठस्वरी। ऊ, अस्तृंहीत् अस्तृंक्षत्। श स्तृंहती स्तृंहन्ती। तिष्टृंहयिषति। इति दुर्गादासः ॥

ष्टेप, ऋ ङ च्युति। इतिकविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट्।) ऋ, अतिष्टेपत्। ङ, स्तेपते तिष्टेपे। च्युति चरणे। इति दुर्गादासः ॥

ष्ट्युमः, पुं, चन्द्रः। दीप्तिः। इति केचित् ॥

ष्ट्यै, संहतौ। ध्वनौ। इतिकविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-अनिट्।) अन्तःस्थाद्ययुक्तदन्त्यवर्गाद्यमध्यः षयोगात् टः। तेन तष्ट्यौ। तष्ट्यासति। ताष्ट्यायते। संहतिः समूहः। ष्ट्यायति लोकः एकत्र समूहायते शब्दायते वा इत्यर्थः ॥ दन्त्यविधौ ष्ट्यै ष्वष्कद्विवां वर्ज्जनान्न दन्त्यः। इति दुर्गादासः ॥

ष्ठग, म ए संवृतौ। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट्।) मूर्द्धन्यादिस्थमध्यः षयोगात् ठः। म, तिष्ठगयिषति। ए, अस्थगीत्। दन्त्यवर्गप्रथममध्यः इति केचित्। तिष्ठगयिषति अतिष्ठगत्। इति दुर्गादास ॥

ष्ठल, ज स्थितौ। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट्।) ज, स्थालः स्थलः। स्थलति लोकस्तिष्ठतीत्यर्थः। इति दुर्गादासः ॥

ष्ठा, ञि स्थाने। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-अनिट्।) ञि, स्थितोऽस्ति। स्थानं गतिनिवृत्तिः। तिष्ठति साधुर्धर्मे। पृष्ठतस्तिष्ठमान इति वीरचरिते प्रकाशार्थे आत्मनेपदविधानात् शानः। अथवा ताच्छील्ये शतु शान। इति दुर्गादासः ॥

ष्ठिव, उ निरासे। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट्। क्त्वावेट्।) उ, ष्ठेवित्वा ष्ठ्यूत्वा। अस्य नेम् ड्योर्गो इत्यादिना इमो निषेधे निष्ठाया ष्ठ्यूत इति भेदः। निरास इह फुत्कार इति भट्टमल्लः। मुखेन श्लेष्मादेर्मनमिति केचित्। इति दुर्गादासः ॥

ष्ठिव, य निरासे। इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट्।) य, ष्ठीव्यति। इति दुर्गादासः ॥

ष्ठीव, निरासे। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट्।) ष्ठीवति। यं ष्ठिविं मत्वा ष्ठिवुक्रमाचमांष्ठीति दीर्घिणं विदधामः स पक्षं ष्ठीविष्यति इत्यादिसाधनाय दीर्घी पठति। तेन ष्ठिविनो दर्शनाश्चिन् गृहीते भ्वादादि चाः स इत्यादिना मूर्द्धन्यस्य दन्त्यत्वे न स्यात् एवं ष्ठिवत्वाद्याः सेरित्यादिना सेट्कारस्य तकारे तिष्ठीव टिष्ठीवत्यपि स्यात्। किन्तु [illegible] ष्ठीवनमिति निपातनं तदस्य सर्व्वसम्मतत्वाभावात्। निरास फुत्कार इति भट्टमल्लः। मुखेन [illegible] मिति केचित्। ष्ठीवत्यर्थं लोकः। शुष्कोऽचुलतास्थिकल्पम्। इति दुर्गादा[सः ॥]

ष्णस, य लृ उ ञि निवासे। [illegible] (दिवा०-पर०-अक०-सेट्। क्त्वावेट्।) दन्त्यादिर्नकारयुक्तः। य, स्नस्यति। लृ, अस्नसत्। उ, स्नसित्वा स्नस्त्वा। [illegible] स्नापयति। इति दुर्गादासः ॥

ष्णा, ल शोधने। इति कविकल्पद्रुमः। (अदा०-पर०-अक०-अनिट्।) [illegible] दन्त्यादिरयमिति कश्चित्। ल, [illegible] धीरः। अनुपसर्गस्य णौ [illegible] ह्रस्वो वा स्नपयति स्नापयति। [illegible] प्रस्नापयति। इति दुर्गादासः ॥

ष्णिह, ऊ य लृ ञि प्रीतौ। इति [illegible] (दिवा०-पर०-अक०-वेट्।) ऊ, स्नेहिष्यति। य, स्निह्यति वस्तु। [illegible] ञि, स्निग्धः स्नीढोऽस्ति। [illegible] दासः ॥

ष्णिह, क स्नेहने। इति कविकल्पद्रुमः (चुरा०-पर-अक०-सेट्।) स्नेहनं स्निग्धीकरणम्। स्नेहयति वर्त्तिकां तैलेन। [illegible]

ष्णु, ञ ल स्तुतौ। इति कविकल्पद्रुमः (अदा०-उभ०-सक०-अनिट्।) ञ ल, [illegible] स्नुते। इति दुर्गादासः ॥

ष्णुच, ङ सेचने। इति कविकल्पद्रुमः (भ्वा०-आत्म०-सक०-सेट्।) स्नोचते शुष्कं [illegible] दुर्गादासः ॥

ष्णुस, य भक्षे। इति कविकल्पद्रुमः (दिवा०-पर०-सक०-सेट्।) [illegible] ष्णुस्यति सुष्णोस। इति दुर्गादासः ॥

ष्णुह, य ऊ लृ उद्गारे। इति [illegible] (दिवा०-पर०-सक०-वेट्।) [illegible] उद्गारो वान्तिः। य, स्नुह्यति। [illegible] स्नोहिष्यति स्नोक्ष्यति। लृ, [illegible] दुर्गादासः ॥

ष्णै, वेष्टे। इति कविकल्पद्रुमः (भ्वा०-पर०-अक०-अनिट्।) प्रकृत्या दन्त्यवर्गीयो न। स्नायति लता। अनुपसर्गस्य णौ [illegible] ह्रस्वो वा। स्नपयति स्नापयति। तु प्रस्नापयति। इति दुर्गादास[ः ॥]

ष्मि, ङ स्मिते। इति कविकल्पद्रुमः (भ्वा०-आत्म०-अक०-अनिट्।) स्मितं [illegible] ङ, स्मयते वधूः। विस्मापयते। [illegible] दासः ॥

ष्वक्क, ङ सर्पणे। इति कविकल्पद्रुमः (भ्वा०-आत्म०-सक-सेट्।) वकारयुक्तः। ङ, ष्वक्कते पिष्वक्किषते धात्वादेः [illegible] विधायस्य वर्ज्जनान्न दन्त्य। [illegible] पञ्चमस्वरिणं मत्वा युक्ते [illegible] इत्याह ॥ इति दुर्गादासः ॥

स्वादे। हेटे। इति कविकल्पद्रुम:॥
०-पर०-सक०-सेट्।) स्वादो रमो-
म्। क, स्वादयति घोरं लोक:। इति
म:॥
प्रीतिलिप्सो:। इति कविकल्पद्रुम:॥
-आत्म०-अक०-सेट्।) प्रीति: प्रीतो-
। लिट् स्मोपादानम्। ङ, अपां हि
न वारिधारा स्वादु: सुगन्धि: स्वदते
।। इति श्रीहर्ष:। इति दुर्गादास:॥
प्री ञि ङ आलिङ्गे। इति कविकल्पद्रुम:॥
-आत्म०-सक०-अनिट्।)वकारयुक्तादि:।
ह्न आलिङ्गनम्। औ, स्वङ्क्ता। ञि,
स्मि। ङ, स्वजते युवतीं युवा। परि-
न पार्श्वाभ्यां मध्यमं पाण्डुनन्दनमिति
तानित्यत्वात्। इति दुर्गादास:॥
ो घ लु ञि गये। इति कविकल्पद्रुम:॥
०-पर-अक०-अनिट्।) वकारयुक्ता-
ादि:। औ, अस्वाप्सीत्। घ लु, स्वपिति।
सोऽस्मि। गय: शयनम्। इति दुर्गादास॥
गत्याम्। तङ्के। इति कविकल्पद्रुम:॥
०-पर०-सक०-तङ्के अक०-सेट्।) वकार-
दन्त्यादि:। तङ्को दु:खेन जीवनम्। क,
ति लनो गच्छति दु:खेन जीवति
:। अस्विवर्त्तत्। इति दुर्गादास:॥
नृ औ य आ ञि स्विदि। इति कविकल्प-
॥ (दिवा०-पर०-अक०-अनिट्।) लृ,
दत्। औ, स्वेत्ता। य, स्विद्यति। आ,
तं स्विन्नं तेन। ञि,स्विन्नोऽस्मि। स्विदीति
स्वेहमोचेष्विति वोपदेव:। गात्रप्रस्रवणे
प्राह्व:। न च स्विद्यति तस्याङ्गमिति
युध:॥ इति दुर्गादास:॥
ञि आ ङ लृ मोहस्वे हमोचेषु। इति कवि-
द्रुम:। (भ्वा०-आत्म०-अक०-सेट्।) ञि,
दोऽस्मि॥ आ, स्वेदितं स्विन्नं तेन। ङ,
दते तिल: तैलं सुवति इत्यर्थ:। लृ, अस्वि-
स्नेह: स्निग्धीभाव:। इति दुर्गादास:॥

स

न्त्यसकार:। स तु व्यञ्जनद्वात्रिंशवर्ण:।
चोच्चारणस्थानं दन्त:। इति व्याकरणम्॥
याच शिक्षायाम्। १७।
मूर्द्धन्या ऋटुरषा दन्त्या लृतुलसा: स्मृता:॥")
स्वरूपं यथा,—
कारं शृणु चार्व्वङ्गि शक्तिबीजं परात्परम्।
टिविद्युल्लताकारं कुण्डलीत्रयसंयुतम्॥
देवमयं देवि पञ्चप्राणात्मकं सदा।
:सत्त्वतमोयुक्तं त्रिबिन्दुसहितं सदा॥"
इति कामधेनुतन्त्रम्॥ *॥
स्य लेखनप्रकारो यथा,—
कुञ्चिता वामतो दक्षगता च गोक्रतिस्त्वध:।

पुनरूर्द्ध्वंगता तासु वह्निचन्द्रदिवाकरा:।
मात्रा भवानी विज्ञेया ध्यानमस्य प्रचक्ष्यते॥"
अस्य ध्यानादि।
"शुक्लाम्बरां शुक्लवर्णां द्विभुजां रक्तलोचनाम्।
श्वेतचन्दनलिप्ताङ्गीं मुक्ताहारोपशोभिताम्॥
गन्धर्व्वगीयमानाञ्च सटानन्दमयीं पराम्।
अष्टसिद्धिप्रदां नित्यां भक्तानन्दविवर्द्धिनीम्॥
एवं ध्यात्वा सकारन्तु तन्मन्त्रं दशधा जपेत्॥
विंशतिसहितं वर्णं प्राणादितत्त्वसंयुतम्।
प्रणम्य सततं देवि हृदि भावय सुन्दरि॥"
इति वर्णोद्धारतन्त्रम्॥ *॥
तत्पर्य्याय:
"सो हंस: सुयशा विष्णुर्भृग्वीशश्चन्द्रसंज्ञक:।
जगद्बीजं शक्तिनामा सोऽहं वेगवती भृगु:॥
प्रकृतिरीश्वर: शुद्ध: प्रभा श्वेता कुलोज्ज्वल:।
दक्षपादोऽमृतं ब्राह्मी परमात्मा परोऽक्षर:॥
सुरूपा च गुणिनी गौ: कनकशो वृकोदरी।
प्राणाश्रय पराटेवी लक्ष्मी: सोमी हिरण्यपू:।
दुर्गोत्तारिणि समीरश्चात्मा जीवो मूर्त्तिमनोहर:॥"
इति तन्त्रम्॥
सं, [म्] व्य, शोभनार्थ:। समार्थ:। सङ्गतार्थ:।
प्रकृष्टार्थ:। इति मेदिनी॥ उपसर्गविशेष:।
अस्यार्था: यथा। सम् प्रकर्षाश्रे पनैरन्तर्य्यौ-
चित्याभिमुख्येषु। इति मुग्धबोधटीकायां दुर्गा-
दास:॥
स:, पुं, ईश्वर:। सर्प:। इति शब्दरत्नावली॥
पक्षी। इत्येकाक्षरकोष:॥ विष्णु:। यथा। स:
स्याद्विष्णौ हरे सर्पे। इति भरतैकार्थसंग्रह:॥
पूर्व्वोक्तपरामर्शक:। से इति भाषा। तच्छब्दस्य
प्रथमैकवचननिष्पन्न:। यथा भट्टि:। १। २।
"सोऽध्यैष्ट वेदांस्त्रिदशानयष्ट
पितॄनपारीत् सममंस्त बन्धून्॥"
समासपूर्व्वपदत्वे सहार्थ:। यथा। समालक:।
क्वचित् समानार्थश्च। यथा। सरूप:। इति
व्याकरणम्॥
संग्राही, [न्] पुं, संगृह्णातीति। सं+ग्रह+
णिनि:।) कुटजवृक्ष:। इति राजनिर्घण्ट:॥
धारके, त्रि॥ (यथा, सुश्रुते। १। ४५।
"दीपनं लघु संग्राहि श्वासकासास्रपित्तनुत्॥"
संग्रहकारके च। यथा, कामन्दकीयनीति-
सारे। ४। १०।
"प्रख्यातवंशमक्रूरं लोकसंग्राहिणं शुचिम्।
कुर्व्वीतात्महिताकाङ्क्षी परिवारं महीपति:॥"
संज्ञं, क्ली, पीतकाष्ठम्। यथा,—
"जायकं भावुकं संज्ञं प्रचेलं प्राविर: पुमान्।
कालीयकञ्च कालानुसार्य्यञ्चाथ समर्थकम्॥"
जायकादिसप्तपीतकाष्ठे। इति शब्दचन्द्रिका॥
संज्ञ:,त्रि, (सम्यक्प्रकारेण जानाति य:। सं+
ज्ञा+क:।) लग्नजानुक:। यथा,—
"प्रज्ञु: प्रगतजानु: स्यात् प्रज्ञोऽत्रैव च दृश्यते।
संज्ञु: संहतजानुश्च भवेत् संज्ञोऽपि तत्र हि॥"
इति साहसाङ्क:। इत्यमरटीकायां भरत:॥

संज्ञपनं, क्ली, (सं+ज्ञा+णिच्+ल्युट्।) मार-
णम्। इत्यमर:॥ (यथा, भागवते। ४।५।२२।
"दृष्ट्वा संज्ञपनं योगं पशूनां स पतिर्मखे।
यजमानपशो: कस्य कायात्तेनाहरच्छिर:॥")
विज्ञापनञ्च॥
संज्ञप्ति:, स्त्री, (सं+ज्ञा+णिच्+क्तिन्।)मार-
णम्। इति हेमचन्द्र:॥ विज्ञापनञ्च॥
संज्ञा, स्त्री, (सं+ज्ञा+भावे अङ्।) चेतना।
(यथा, कुमारे। ६। ४४।
"रतिखेदसमुत्पन्ना निद्रा संज्ञाविपर्य्यय:॥")
बुद्धि:।(ज्ञानम्। यथा, भागवते। ६। ७। १७।
"गुरोर्नाधिगत: संज्ञां परीक्षन् भगवान् स्वराट्।
ध्यायन् धिया सुरैर्युक्त: शर्म्म नालभतात्मन:॥"
तथा च गीतायाम्। १।७।
"नायका मम सैन्यस्य संज्ञार्थं तान् ब्रवीमि ते॥"
नाम। आख्या। (यथा, मनु:। ८। १३१।
"लोकसंव्यवहारार्थं या: संज्ञा: प्रथिता भुवि।
ताम्ररूप्यसुवर्णानां ता: प्रवक्ष्याम्यशेषत:॥")
हस्तादिभिरर्थसूचना। हस्तभ्रूलोचनादिभि: प्रयो-
जनस्य ज्ञापना। इत्यमरभरतौ॥ (यथा
कुमारे। ३। ४१।
"मुखार्पितैकाङ्गुलिसंज्ञयैव
मा चापलायेति गणान् व्यनैषीत्॥")
गायत्री। सूर्य्यपत्नी। इति मेदिनी॥ (यथा,
मार्कण्डेये। ७७। १।
"मार्त्तण्डस्य रवेर्भार्य्या तनया विश्वकर्म्मण:।
संज्ञा नाम महाभाग तस्यां भानुरजीजनत्॥"
अस्या विशेषविवरणन्तु तत्रैवाध्याये द्रष्ट-
व्यम्॥)
संज्ञासुत:, पुं, (संज्ञाया: सुत:।) शनि:। इति
केचित्॥
संज्ञु:,त्रि, (संहते संलग्ने जानुनी यस्य। प्रसंभ्यां
जानुनोर्ज्ञु:। ५। ४। १२९। इति ज्ञु:।)
सहतजानुक:। इत्यमर:॥
संज्वर:, पुं, (संज्वरयतीति। सं+ज्वर+णिच्+
अच्।) अग्निजताप: इत्यमर:॥ (यथा,
कथासरित्सागरे। ५५। ६३।
"कदलीपत्रपवनैर्वीज्यमानां सखीजनै:।
पाण्डुक्षामामभिव्यक्तस्मरसंज्वरलक्षणाम्॥")
संय:, पुं, कङ्काल:। इति शब्दचन्द्रिका॥
संयत्, पुं, स्त्री, (संयच्छन्तीति। सं+यम्+
क्विप्। "गमादीनाम्।" ६।४।४०। इत्यस्य
वार्त्तिकोक्त्या मलोप:। तुक्।) युद्धम्। इत्य-
मरभरतौ॥ (यथा, रघु:। ७। ३८।
"उत्थापित: संयति रेणुरश्वै:
सान्द्रीकृत: स्यन्दनवंशचक्रै:॥")
संयत:, त्रि, (सं+यम्+क्त:।) बद्ध:। इत्यमर:॥
(यथा, रामायणे। १। १०। २५।
"मायामिव परिभ्रष्टां हरिणीमिव संयताम्॥"
कृतसंयम:। यथा ब्रह्मपुराणम्।
"यो य: कश्चित्तीर्थयात्रान्तु गच्छेत्
सुसंयत: स च पूर्व्वं गृहे स्वे।

कृतोपवासः शुचिरप्रमत्तः
संपूजयेद्भक्तिनम्रो गणेशम् ॥"
इति प्रायश्चित्ततत्त्वम् ॥

संयद्वरः, पुं, वाग्यतः। जन्तुसमूहः। इति संक्षिप्तसारोणादिवृत्तिः ॥

संयद्वरः, पुं, (संयच्छतीति। सं+यम+ क्विरच्छ्वरेति। उणा० ३। १। इति ष्वरच्प्रत्ययेन साधु।) नृपः। इत्युणादिकोषः ॥

संयन्ता, [ऋ] त्रि संयमनकर्त्ता। नियन्ता। संपूर्व्वयमधातोस्तृन्प्रत्ययेन निष्पन्नः ॥ (यथा, महाभारते। ४। ६२। ४८।
"तं विसंज्ञमपोवाह संयन्ता रथवाजिनाम्।
उपदेशमनुस्मृत्य रक्षमाणो महारथम् ॥")

संयमः,पुं, (सं+यम+"यमः समुपनिविषु च।" ३।३।६३। इति अप्।) व्रताद्यङ्गपूर्व्वदिनकर्त्तव्याचारः। तत्पर्य्यायः। नियामः २ वियमः ३ यामः ४ यमः ५ संयामः ६। इत्यमरः ॥ संयमनम् ७ नियमः ८ इति धरणिः ॥ तद्विधानं यथा। अथ दशमीनियमाः। स्मृतिरत्नावल्याम्।
"कांस्यं मांसं मसूरञ्च चणकं कोरदूषकम्।
शाकं मधु परान्नञ्च त्यजेदुपवसन् स्त्रियम् ॥"
अत्रोपवसन्निति तद्दिने भोजनासम्भवात् सामीप्यात् पूर्व्वापरदिनयोर्ग्रहणम्। स्मृतिः।
"शाकं माषं मसूरञ्च पुनर्भोजनमैथुने।
द्यूतमत्यम्बुपानञ्च दशम्यां वैष्णवस्त्यजेत् ॥
कांस्यं मांसं सुरां क्षौद्रं लोभं वितथभाषणम्।
व्यायामञ्च व्यवायञ्च दिवास्वप्नं तथाञ्जनम् ॥
तिलपिष्टं मसूरञ्च दशम्यां वर्ज्जयेत् पुमान्।
दशम्यामेकभक्तञ्च कुर्व्वीत नियतेन्द्रियः ॥
आचम्य दन्तकाष्ठञ्च खादेत तदनन्तरम्।
पृष्टं हरिदिनाश्नीत्या. सेवध्वं चैकभोजनम् ॥
अश्नोपृथ्वीशयनाः स्त्रियाः सङ्गविवर्जिताः।
सेवध्वं देवदेवेश पुराणं पुरुषोत्तमम्।
सकृद्भोजनसंयुक्ता द्वादश्याञ्च भविष्यथ ॥"
इत्येकादशीतत्त्वम् ॥*॥
श्राद्धपूर्व्वदिनकर्त्तव्यनियमो यथा। देवलः।
"ततः कर्त्तास्मीति निश्चित्य दाता विप्रान्निमन्त्रयेत्।
निरामिषं सकृत् भुक्त्वा सर्व्वमृत्यजने गृहे।
अमक्षे पराङ्मुखो ब्राह्मणांस्तान्निमन्त्रयेत् ॥"
वराहपुराणम्।
"वक्तव्यादि कर्त्तव्यं श्वः कर्त्तास्मीति जानता।
स्नातोऽनिन्दितश्चैव लब्ध्वा विप्रादिमन्त्रयेत्।
दन्तकाष्ठञ्च विसृजेत् ब्रह्मचारी शुचिर्भवेत् ॥"
विसृजेत् श्राद्धविप्रेभ्यो दद्यात्। मार्कण्डेयपुराणम्।
"निमन्त्रयेत पूर्व्वेद्युः पूर्व्वोक्तान् द्विजसत्तमान्
अप्राप्तौ तद्दिने वापि हित्वा योषित्प्रसङ्गिनम् ॥"
यम।
"मार्त्तण्ड प्रवेशके भुञ्जन्त यदि नग्न विमानाः
सर्व्वरात्रिनिमुक्तः श्राद्धकर्म्मणि स्थिते ॥

भवितव्यं भवद्भिश्च श्वोभूते श्राद्धकर्म्मणि।
दक्षिणं जानु चालभ्य त्वं मयात्र निमन्त्रितः।
एवं निमन्त्र्य नियमान् श्रावयेत् पैतृकान् बुधः ॥"
तन्नियममाह।
"अक्रोधनैः शौचपरैः सततं ब्रह्मचारिभिः।
भवितव्यं भवद्भिश्च मया च श्राद्धकर्म्मणि ॥"
इति श्राद्धतत्त्वम् ॥*॥
तीर्थयात्रापूर्व्वदिनकर्त्तव्यनियममाह। ब्रह्मपुराणम्।
"यो यः कश्चित्तीर्थयात्रान्तु गच्छेत्
सुसंयतः स च पूर्व्वं गृहे स्वे।
कृतोपवासः शुचिरप्रमत्तः
संपूजयेद्भक्तिनम्रो गणेशम् ॥
देवान् पितॄन् ब्राह्मणांश्चैव साधून्
धीमान् प्रीणयन् वित्तशक्त्या प्रयत्नात्।
प्रत्यागतश्चापि पुनस्तथैव
देवान् पितॄन् ब्राह्मणान् पूजयेच्च ॥"
एवं प्रकुर्व्वतस्तस्य तीर्थाद्यदुक्तं फलं तत् स्यान्नात्र सन्देह एव। सुसंयतः पूर्व्वदिने कृतैकभक्तादिनियमस्तदुत्तरदिने कृतोपवास इत्यादि। उपवासदिने मुण्डनमपि।
"प्रयागे तीर्थयात्रायां पितृमातृवियोगतः।
कचानां वपनं कार्य्यं वृथा न विकचो भवेत् ॥"
इति विष्णुपुराणात्। इति प्रायश्चित्ततत्त्वम् ॥
प्रायश्चित्तपूर्व्वाहकृत्य यथा। शङ्खलिखितौ।
"वाप्य केशनखान् पूर्व्वं स्नातं प्राश्य वह्निर्निशि प्रत्येक नियत कालमात्मनो व्रतमादिशेत् ॥"
इति प्रायश्चित्ततत्त्वम् ॥
(बन्धनम्। यथा, साहित्यदर्पणे। ३। १५५।
"कापि कुन्तलसंव्यानसंयमव्यपदेशतः।
बाहुमूलं स्तनौ नाभिपङ्कजं दर्शयेत् स्फुटम् ॥"
संकोचः। यथा, मार्कण्डेये। ७१। ४।
"मयि दृष्टे सदा यस्मात् कुरुषे नैवसंयमम्।
तस्माज्जनिष्यते मूढे प्रजासंयमनं यमम् ॥")

संयमकः,त्रि, (संयच्छतीति। सं+यम्+ण्वुल्।) नियन्ता। यथा,—
"स एव धाता सर्व्वस्य तन्नियोगकरा वयम्।
यमसंयमने त्वक्तः सोऽस्मत्संयमको हरिः ॥"
इति वह्निपुराणे नारसिंहप्रादुर्भावाध्यायः ॥
संयमी च ॥

संयमनं, क्ली, (सं+यम+ल्युट्।) बन्धनम्। (यथा, साहित्यदर्पणे। ६। ३१८।
"यद्यात्रा वेण्यां द्रौपदीकेशसंयमनहेतुर्भीमसेन क्रोधापचितौ युधिष्ठिरोऽप्याह: ॥") व्रतम्। इति मेदिनी ॥ चतुःशालम्। इति सञ्ज्ञवनशब्दटीकायां भरत ॥ (यमनम्। यथा, महाभारते। ३। १६२। ८।
"एतत् संयमनं पुण्यमतीवाद्भुतदर्शनम्।
महेन्द्रराजस्य सदनमद्भुता परमया युतम् ॥"
शासनम्। दमनम्। यथा,भागवते। १०। १६। ६।
"स दण्डवेगविसर्प्यमसंख्य तेन।
दृष्टां सदाप्य परसंयमनात्तगात् ॥"२॥

संयच्छतीति। सं+यम+ल्युः। नियन्ता त्रि। यथा, मार्कण्डेये। ७१। ४।
"तस्माज्जनिष्यते मूढे प्रजासंयमनं यमम् ॥")

संयमनी, स्त्री, (संयम्यतेऽस्यामिति। सं+अधिकरणे ल्युट्।) यमपुरी। इति मेदिनी। (यथा, भागवते। १०। ४५। ४२।
"ततः संयमनीं नाम यमस्य दयितां पुरीम्।
गत्वा जनार्द्दनः शङ्खं प्रदध्मौ सहलायुधः ॥")

संयमितः, त्रि, जातसंयमः। [illegible] ऽस्य जातं इत्यनेन इतप्रत्ययेन निष्पन्नः ॥

संयमी, [न्] पुं, (संयमोऽस्यास्तीति। संयम इनि।) मुनिः। इति धरणिः ॥ निगृहीतेन्द्रिये, त्रि। यथा,—
"या निशा सर्व्वभूतानां तस्यां जागर्त्ति संयमी।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥"
इति श्रीभगवद्गीतायाम् २ अध्याय

संयात्रा, स्त्री, द्वीपान्तरगमनम्। संपूर्व्वात् द्वीपान्तरगमनवृत्तिस्ततस्त्रासुमिति व[illegible] माप् सयात्रा। द्वीपान्तरगमनं संयात्रा वा। इति [illegible] भरतः ॥

संयानं,क्ली, सम्यग्गमनम्। [illegible] (ल्युट्) प्रत्ययेन निष्पन्नम् ॥ (यथा, भारते। ३। १८। ५।
"स त्वं सात्वतमुख्याद्य लब्धसंज्ञो यदृच्छया।
पश्य मे हयसयाने शिक्षां केशवनन्दन ॥"
प्रेतनिर्हारः। यथा, रामायणे। १। ७६।
"अलं शोकेन भद्रं ते राजपुत्र महायशः
प्राप्तकालं नरपतेः कुरु संयानमुत्तमम्

संयामः,पुं,(सं+यम+"यमः [illegible]" ३। ३। ६३। इति पक्षे घञ्।) संयमः। [illegible]मरः ॥

संयावः पु, (सं+यु+"समि युद्रुदुवः।" ३। ३। २३। इति घञ्।) [illegible] यथा,—
"संयावस्तु घृतक्षीरगुडगोधूमपाकजः।"
इति शब्दचन्द्रिका
पिष्टकविशेषः। पेराकी इति भाषा।
"पक्षिन्यः सान्द्रसमिता निर्म्मिता कुट्टिताश्चालिताः शुभाः शर्कराभिर्विमर्दिताः
तासु च प्रक्षिपेदेला लवङ्गमरिचानि च।
नालिकेरं सकर्पूरं चारवीजान्यनेकशः ॥
घृताक्तसमितापुष्टरोटिका रचिता ततः।
तस्यां तत्पूरणात्तस्य कुर्य्यान्मुद्रां दृढां सुधीः।
सर्पिषि प्रचुरे तान्तु सुपचेन्निपुणो जनः।
प्रकारभेदैः प्रकारोऽयं संयाव इति कीर्त्तितः।
सप्तकोऽपि समो ज्ञेयः संयावोऽपि गुणैस्तथा
इति भावप्रकाश।

संयुक् [ज्] त्रि, (सं+युज्+क्विप्।) गुणवान्। यथा,—
'सनन्थो गुणवान् संयुक् मिश्रयुङ्मिलवद्गदः।'
इति त्रिकाण्डशेष।

Printed by DAKSHINA CHARAN CHAKRAVARTTY
at B. L. Press. 62, Cotton Street CALCUTTA.

V. 7—8.

शब्दकल्पद्रुमः।

अर्थात्

एतद्देशस्थसमस्तकोषाशेषशास्त्रसङ्कलिताकारादिवर्णक्रमविन्यस्तशब्द-तद्भिन्न-नानार्थ-पर्य्याय-प्रमाण-प्रयोग-धातु-तदनुबन्धाभिधेय-सहित-तत्तच्छब्दप्रसङ्गोत्थित-वेद-वेदाङ्ग-वेदान्त-न्याय-पुराणेतिहास-सङ्गीत-शिल्प-सूपकारशास्त्र-ज्योतिष-तन्त्राख्यान-काव्यालङ्कार-छन्दःप्रभृति-नाना-लक्षणोदाहरण-द्रव्यगुण-रोगनिदानौषध-स्मृत्युक्तव्यवस्थादिसंयुक्त-सर्व्वदर्शनमतानुसारि-संस्कृताभिधानग्रन्थः।

स्यार-राजा-राधाकान्तदेव-बाहादुरेण

विरचितः।

पाणिनिमतानुसारि-प्रत्येकशब्दव्युत्पत्ति मूलग्रन्थातिरिक्तबहुलशब्दार्थ-प्रमाण-प्रयोग-पर्य्याय-धातुपरिशिष्टादिभिः नूतनसङ्कलितबहुलशब्द-तदर्थ-तत्प्रमाण-प्रयोगादिसहित-सम्पूर्णपरिशिष्टेन च सार्द्धम्

श्रीवरदाप्रसादवसुना तदनुजेन श्रीहरिचरणवसुना च

अशेषशास्त्रविशारदकोविदवृन्दसाहाय्येन संपरिवर्द्धितः। नागराक्षरैः प्रकाशितश्च।

पञ्चमः काण्डः।

सप्तम-अष्टम-खण्डौ।

कलिकाता राजधान्यां.

यन्त्रे मुद्रितः। ७१ नं पाथुरियाघाट-ष्ट्रीट-स्थितभवनात् प्रकाशितश्च। शकाब्दाः

PRINTED BY PRESS; AND CONSIDERABLY IMPROVED, CAREFULLY REVISED AND PUBLISHED BY BARADA PRASAD BASU, AND HARI CHARAN BASU. 71, PATHURIAGHATA STREET, CALCUTTA:

To be had at the Sabdakalpadruma Office, No. 71 Pathuriaghata Street, Calcutta; and at the Baptist Mission Press No. 25 Lower Circular Road Calcutta: Price for Subscribers in India, Re. 1. and Countries out of India 2s. for each number.

(यथा, महाभारते । २ । ३६ । २२ ।
"आचार्य्यमृत्विजञ्चैव संयुजञ्च युधिष्ठिर ।
स्नातकञ्च प्रियं प्राहुः षड़र्घार्हान् नृपं तथा ॥")
संयुक्तच ॥

संयुक्तः, त्रि, (सं+युज्+क्तः ।) संयोगाश्रयः । यथा, तिथ्यादितत्त्वे ।
"कुर्य्यादन्नाभिसंयुक्तां नान्नाभ्येऽपि प्रवेशिनीम्॥"

संयुगः, पुं, ("युजिर योगे+घञ् । उञ्छादिषु युगशब्दस्य पाठात् निपातनादगुणत्वम् । 'विशेषोऽसौ निपातनमिष्यते कालविशेषे रथाद्युपकरणे च ।' इति वृत्तिः । सङ्गता रथयुगा यस्मिन् वा ।" इति निरुक्तटीकायां देवराजयज्वा । २ । १७ । २८ ।) युद्धम् । इत्यमरः । २ । ८ । १०५ ॥ (यथा, महाभारते । २ । १० । ५ ।
"अनयस्यानुपायस्य संयुगे परमः क्षयः ।
संशयो जायते साम्यात् जयश्च न भवेत् द्वयोः॥"
संयोगश्च ॥)

संयुतः, त्रि, संयुक्तः । यथा,—
"चतुर्थीसंयुता कार्य्या पञ्चमी परया न तु ।
दैवे कर्म्मणि पैत्रे च शुक्लपक्षे तथासिते ॥"
इति तिथ्यादितत्त्वम् ॥

संयोगः, पुं, (सं+युज्+घञ् ।) मेलनम् । न्यायमते गुणपदार्थः । स च सम्बन्धविशेषः । अप्राप्तयोर्द्वयोः प्राप्तिः । स च त्रिविधो यथा । एककर्म्मजन्यः । यथा पक्षिणः पर्व्वतेन संयोगः ॥ १ ॥ उभयकर्म्मजन्यः । यथा मेषद्वयसंयोगः ॥ २ ॥ संयोगजन्यसंयोगः । यथा कपालतरुसंयोगात् कुम्भतरुसंयोगः ॥ ३ ॥ कर्म्मजन्यसंयोगोऽपि द्विविधः । अभिघातः । तस्मात् शब्दो जायते ॥ १ ॥ नोदनः । तस्मात् शब्दो न जायते ॥ २ ॥ अत्र प्रमाणम् ।
"अप्राप्तयोस्तु या प्राप्तिः सैव संयोग ईरितः ।
कीर्त्तितस्त्रिविधस्त्वेष आद्योऽन्यतरकर्म्मजः ।
तथोभयोः कर्म्मजन्यो भवेत् संयोगजोऽपरः ।
आदिमः श्येनशैलादिसंयोगः परिकीर्त्तितः ॥
मेषयोः सन्निपातो यः स द्वितीय उदाहृतः ।
कपालतरुसंयोगात् संयोगस्तरुकुम्भयोः ॥
तृतीयः स्यात् कर्म्मजोऽपि द्विधैव परिकीर्त्तितः
अभिघातो नोदनञ्च शब्दहेतुरिहादिमः ।
अशब्दहेतुर्द्वितीयः स्यादिमाविति द्विधा
भवेत् ॥"
इति भाषापरिच्छेदः ॥ ...
[illegible]

संयोगपृथक्त्वन्यायात् । स च न्यायस्तुर्य्याध्याये उक्तः । यथा । खादिरे पशुं बध्नाति खादिरं वीर्य्यकामस्य यूपं कुर्व्वीत इति श्रुयते । अत्र संशयः । किं काम्यस्यैव खादिरता नित्येऽपि स्यादुत नेति । तत्र फलार्थत्वेनानित्यतया नित्यप्रयोगाङ्गता न युक्ता । यत्तु नित्येऽपि खादिरत्वश्रवणं तत् काम्यस्यैव पशुबन्धनाय यूपाश्रयज्ञापनार्थं अतो न नित्ये खादिरता इति प्राप्ते राद्धान्ताय चतुर्थाध्यायसूत्रम् । एकस्य तूभयत्वे संयोगपृथक्त्वमिति । अत्र संयोगः सम्बन्धमात्रं पृथक्त्वं भेदः । एकस्य खादिरस्य क्रत्वर्थत्वपुरुषार्थत्वरूपोभयात्मकत्वे वाक्यद्वयेन च क्रतुशेषत्वफलशेषत्वलक्षणसंयोगभेदावगमात्र नित्यानित्यसंयोगविरोधः । न चान्यथानार्थं नित्यवाक्यं सन्निधानादेवाप्यनाभात् । अत उभयार्था खादिरतेति । एवं दध्ना जुहोति दध्नेन्द्रियकामस्य इत्यादावुभयार्थतैव । दधित्वस्य द्विधाश्रवणात् । इति प्रायश्चित्ततत्त्वम् ॥

संयोगविरुद्धं, क्ली, (संयोगेन विरुद्धम् ।) परस्परसंयोगेन रोगजनकखाद्यद्रव्यम् । यथा,—
"शाकाम्रपनसपिण्याकफुल्लमत्स्याम्लैः ।
करीरदधिमाषैश्च प्रायः क्षीरं विरुध्यते ॥
प्राणहारा तु वार्त्ताकी हरिद्रासर्षपैः कृता ।
करोत्यैलेऽनलेऽभृष्टं विषं माधूकमामिषम् ॥
वराहवसया भृष्टा बलाका तु हरत्यसून् ।
संयुक्ता सैव वारुण्या कुल्माषैश्च विरुध्यते ॥
दधि कुक्कुटमांसेन मत्स्यैर्मैः कांस्ये त्यजेत् ।
मांसं निर्व्विकारं च काञ्जिके तिलसक्तुभिः ।
कपोतः सार्षपे भृष्टो हन्ति प्राणि दशाहतम् ।
विषं घृतसमं क्षौद्रं मधुना मधुनाम्बु च ।
मूलकं माषसूपेन मधुना च न भक्षयेत् ।
एकत्र सर्व्वमांसानि विरुध्यन्ते परस्परम् ॥
वालाम्लभोज्यं दधिकोदराणां
विस्फोटिकोन्मादभगन्दराणाम् ।
मूर्च्छामदाध्मानगलग्रहाणां
पाण्ड्वामयस्यामविषस्य चैव ॥
किलासकुष्ठग्रहणीगदानां
शोथाम्लपित्तज्वरपीनसानाम् ।
सन्तानदोषस्य तथैव मृत्यो-
र्विरुद्धमन्नं प्रवदन्ति हेतुम् ॥
विरुद्धाहारजात् रोगात् विनिघ्नन्ति विरेचनम् ।
वमनं शमनं वापि पूर्व्वं वा हितसेवनम् ॥"
इति संयोगविरुद्धम् । इति वैद्यकम् ॥
संयोगिन्, त्रि, [illegible] संयोगविशिष्टः । इति [illegible] ॥
[illegible]

संयोजितः, त्रि, (सं+युज+णिच्+क्तः ।) पदार्थः पदार्थान्तरेण संयुक्तीकृतः । तत्पर्य्यायः । उपाहितः २ । इत्यमरः ॥ संयोगितः ३ । इति भरतः ॥ (यथा, भागवते । ५ । २३ । ३ ।
"यथामेधीस्तम्भ आक्रमणपशवः संयोजिताः ।
त्रिभिः सवनैर्यथास्थानं मण्डलानि चरन्ति ॥")

संरम्भः, पुं, (सं+रभ+घञ् । नुम् ।) क्रोधः । इति शब्दरत्नावली ॥ (यथा, मनुः । ४ । १६६ ।
"ताड़यित्वा तृणेनापि संरम्भात् मतिपूर्व्वकम् ।
एकविंशतिमाजातीः पापयोनिषु जायते ॥")
आटोपः । इति त्रिकाण्डशेषः ॥ (सम्भ्रमः ॥ यथा, भागवते । ८ । ६ । २४ ।
"न संरम्भेण सिध्यन्ति सर्व्वार्थाः सान्त्वया यथा ॥")
वेगः । यथा, तत्रैव । ८ । ११ । ४१ ।
"संयत्य मन्युसंरम्भं मानयन्तो मुनेर्व्वचः ।
उपगीयमानानुचरैर्ययुः सर्व्वे त्रिविष्टपम् ॥")
उत्साहः । यथा,—
"कार्य्यारम्भेषु संरम्भः स्थेय उत्साह इष्यते ।"
इति साहित्यदर्पणे ३ परिच्छेदः ॥

संरावः, पुं, (सं+रु शब्दे+"उपसर्गे रुवः ।" ३ । ३ । २२ । इति घञ् ।) शब्दः । इत्यमरः ॥ (यथा, राजतरङ्गिण्याम् । ३ । २४२ ।
"सततस्थ सरित्पाति स्फुरत्संरावमध्यतः ।
उद्वेगाद्धर्षं न पादराणाम् महोत्सम् ॥")

संरावी, [न्] त्रि, शब्दविशिष्टः । संराव-शब्दादस्त्यर्थे इनुप्रत्ययेन निष्पन्नः ॥

संरूढः, त्रि, (सं+रुह+क्तः ।) प्रौढः । अङ्कुरितः । इति मेदिनी ॥ (यथा, महाभारते । १२ । २२८ । २ ।
"नष्टो मन्तसि संरूढं वरिष्ठास्त्वच मताः")

संरोधः, पुं, (सं+रुध+घञ् ।) रोधनम् । (यथा, भागवते । १० । ८३ । ३ ।
"कुहूरागा. पुष्करदला संरोधविच्छिन्न-दृष्ट्या घृतशाला दशनाशितम् ॥")
क्षेपः । इति मेदिनी ॥

संलग्न, त्रि, संयुक्त । संपूर्ण [illegible]
[illegible]

संलापः, पुं, (सं+लप+घञ् ।) [illegible]
[illegible]

संवत्, अ, वत्सरः। इत्यमरः ॥ अधुना विक्रमादित्यराजवत्सरः संवत् इति ख्यातः ॥ (स्त्री भूमिविशेषः। यथा, वाजसनेयसंहितायाम्। ११ । १२।
"वरिष्ठामनु संवतम्।"
"यस्य सम्यक्त्वेन वन्यते सम्यग्भज्यते मङ्गलार्थं क्रियते इति संवत् सं पूर्वस्य वनतेः क्विपेतद्रूपम् कृत्यभजनयोग्या भूमिः संवत्। सा च पापापाद्यमार्गेणातिप्रशस्ता आहरिष्ठं लुच्यते।" इति तद्भाष्यम् ॥०॥ संग्रामः। इति निघण्टुः ।२।१७॥)
संवत्सरः, पुं, (संवसन्ति ऋतवो यत्र। सं + वस निवासे + "संपूर्वात् चित्।" उणा० ३ । ७२। इति सरन्।) वत्सरः। इत्यमरः ॥ "संवसन्ति ऋतवो यत्र संवत्सरः। वस भो निवासे सार्वोति सरः सश्च तः। संवदति भावान् इति वा दन्त्यवा।" इति भरतः ॥ पञ्चविधवत्सरान्तर्गतप्रथमवत्सरः। यथा—
"गताब्दात् पञ्चभिः शेषात् समाद्यादिषु वत्सराः।
संपरीदान्वपूर्वाश्च तथोदापूर्विका मताः ॥"
संवत्सरादिषु विष्णुधर्म्मोत्तरे।
"संवत्सरे तदा दानं तिलस्य च महाफलम्।
परिपूर्वे तदा दानं दशानाञ्च द्विजोत्तमः ॥
इदापूर्वेऽवत्सरे धान्यानाञ्चानुपूर्व्वशः।
उदासंवत्सरे दानं रजतस्य महाफलम् ॥
ज्योतिर्व्विदर्वत्सिन्धान्मग्धात् प्रभवादेय सम्भवम्।
जनुरादन् समादादिवर्षाणामपि सम्भवम् ॥"
इति मलमासतत्त्वम् ॥
संवदनं, क्ली (सं + वद + ल्युट्।) आलोचनम्। वशीकरणम्। इति मेदिनी ॥ (यथा, महाभारते। ३। २१२। ५७।
"उत्क्षणामाह क्षमं भर्तुं स वदनं महत्।
ज्ञानकौशलं समाचारं नाह कुर्य्यान्न कामये ॥")
संवादः। इति हेमचन्द्रः ॥
संवदना, स्त्री, संवदनम्। वशक्रिया। यथा। मणिमन्त्रौषधादिभिर्वशीकरणं संवदनम्। संपूर्व्वो वदिर्वशीकरणे आत्मनेपदे। संवदना चेति केचित्। कारणेऽपि वशक्रियासाधने मणिमन्त्रादावपि। कर्म्मणि संवदनं वशमस्तीति वसुः। वशकरणमिति दण्डाधरम् इत्यमरटीकायां भरतः ॥
संवननं, क्ली, (सं + वन + ल्युट्।) संवदनम्। वशीकरणौषधम् ॥ (यथा कथासरित्सागरे। ३९। ११८।
"ज्ञानसमुद्रवेदो हि नूनं संवननं महत् ॥")
संवरः, पुं, (सं + वृ + "ग्रहवृदृनिश्चिगमश्च।" ३। ३। ५८। इति अप्।) जलम्। बौद्धविशेषः। इति मेदिनी ॥ शम्बरमहासुरश्च। स च कन्दर्पेणालङ्कृतेन निहतः ॥
संवरः, पुं, दैत्यविशेषः। शम्बरासुरः। हरिणविशेषः। इति मेदिनी ॥ शम्बरश्च। (हरिणविशेषः शम्बर इति च ख्यातः ॥)

संवर्त्तः, पुं, (सं + वृत् + घञ्।) प्रलयः। इत्यमरः ॥ (यथा, भागवते। ८। १५। २६।
"दहन्निव दिशो दिग्भिः संवर्त्ताग्निरिवोत्थितः ॥")
मुनिविशेषः। (यथा, मार्कण्डेये। १३०। ११।
"ऋत्विक् तस्य तु संवर्त्तो बभूवाङ्गिरसः सुतः।
भ्राता बृहस्पतेर्विप्र महात्मा तपसां निधिः ॥"
अयं हि धर्म्मशास्त्रप्रयोजकानामन्यतमः ॥)
कर्षफलद्रुमः। इति मेदिनी ॥ मेघः। इति शब्दरत्नावली ॥ (यथा, हरिवंशे। १२०। ८०।
"प्रशुश्रुवे सुमहान् शब्दः संवर्त्तनिनदो यथा ॥")
मेघनायकविशेषः। तस्य विवरणं यथा,—
"वियुते शाकवर्षे तु चतुर्भिः शेषिते क्रमात्।
आवर्त्तं विद्धि संवर्त्तं पुष्करं द्रोणमम्बुदम् ॥
आवर्त्तो निर्जलो मेघः संवर्त्तश्च बहूदकः।
पुष्करो दुष्करजलो द्रोणः शस्यप्रपूरकः ॥"
इति ज्योतिस्तत्त्वम् ॥
संपूर्व्वकात्तःस्यवकारादिहतधातोः घञ्प्रत्ययेन निष्पन्नत्वादनुस्वारमध्यः। मकारमध्योऽप्ययम् ॥
संवर्त्तकः, पुं, (संवर्त्तयतीति। सं + वृत् + णिच् + ण्वुल्।) बलदेवः। इति शब्दरत्नावली ॥ बलदेवस्य लाङ्गलम्। बडवानलः। इति हेमचन्द्रः ॥ (यथा भागवते। १२। ४। ८।
"ततः संवर्त्तको वह्निः सङ्कर्षणमुखोत्थितः।
दहत्यनिलवेगोत्थः शून्यान् भूविवरानथ ॥")
संवर्त्तकी, [न्] पुं, (संवर्त्तकोऽस्यास्तीति। इनिः।) बलदेवः। इति त्रिकाण्डशेषः ॥
संवर्त्तिः, स्त्री, (सम्यक्प्रकारेण वर्त्तते इति। सं + वृत् + "इगुपधात् कित्।" उणा० ४। ११८। इति इन्।) संवर्त्तिका। इत्यमरटीकायां भरतः ॥
संवर्त्तिका, स्त्री, पद्मस्य केशरसमीपस्थदलम्। इत्यमरः ॥ पद्मादीनां जटिकाकारे नवदले इत्यर्थे। सम्यक् वर्त्तते वर्द्धते इति संवर्त्तिका। मङ्क्षः। संवर्त्तयति वेष्टयतीति वा नाम्नीति ड-प्रत्यये संवर्त्तिरपि। संवर्त्तिनवपत्रिकेति बोपालितः। पाण्डोषादीति ङीपि संवर्त्ती च सतः स्वार्थे के संवर्त्तिका। सामान्यनूतनपत्रेऽपि संवर्त्तिकेति हड्डचन्द्रः ॥ दलमात्रे च संवर्त्तिकेति मधुः। कृष्णाद्या सवर्णीयदलमात्मन्यौषधं वर्त्ति केति मुरारिः। इति भरतः ॥
संवर्द्धकः, त्रि, (संवर्द्धयतीति। सं + वृध् + णिच् + ण्वुल्।) संवर्द्धनकारी। इति हेमचन्द्रः ॥
संवर्द्धनं, क्ली, (सं + वृध् + ल्युट्।) समृद्धिः। अभ्युदयः। संपूर्व्ववृधधातोर्ल्युट्प्रत्ययेन निष्पन्नम्।) यथा, महाभारते। १। १०१।
"पुत्रः स विधुः कर्णा सर्व्वभूतहितामहः।
धर्म्मेण वर्द्धमानेन प्रजाः ष्वसंवर्द्धितवान् ॥"
वर्द्धनम्। यथा, रामायणे। १११। १०।
"निवासं निवसन्तिस्म सदा संवर्द्धनेन च ॥"
"संवर्द्धनं वर्द्धनम्।" इति तट्टीका ॥)

संवर्हितः, त्रि, (सं + वृह् + णिच् + क्त।) समागृह्वविनिमिष्टः। यथा,—
"अथ प्रभावोपनतैः कुमारं
कल्पद्रुमोत्थैरवकीर्य्य पुष्पैः।
उवाच वाग्मी दशनप्रभाभिः
संवर्द्धितोरःस्थलतारहारः ॥"
इति रघौ ॥
संवलितः, त्रि, (सं + वल + क्तः।) मिलितः। एकत्रीकृतः। यथा।
स्रैव पाठस्य [illegible]
युग्मम्। इति पञ्चतानगदीयो टीका।
अन्यच्च।
"प्रतीयमानः प्रत्येकं प्रथमं हेतुरुच्यते।
ततः संवलितः सर्व्वो विभावादि [illegible]
इति साहित्यदर्पणे ॥
संवसथः, पुं, (संवसन्त्यत्रेति। सं + वस + "उपसर्गे वसेः।" उणा० ३। ११४। इति अथ।) ग्रामः। इत्यमरः ॥
संवहः, पुं, (संवहतीति। सं + [illegible]) सप्तवायुन्तर्गतप्रशस्तवायुः। स [illegible] कपरिस्थः। इति सिद्धान्तशिरोमणिः। (महाभारते। १२। ३२८। ४२।
"चतुर्थः संवहो नाम वायुः स [illegible] येन वेगवता रुग्ना रुक्षेणारुजता [illegible] वायुना सहिता मेघास्ते भवन्ति [illegible] दारुणोत्पातसञ्चारो नभसः स्तनयि[illegible]
संवाटिका, स्त्री, शृङ्गाटकः। [illegible] धरः ॥
संवादः, पुं, (सं + वद + घञ्।) [illegible] समाचार इति याचत्। तत्पर्य्यायः। [illegible] सन्देशः २। इति जटाधरः ॥ [illegible] इत्यमरः ॥ वाचिकं सहवेदयन [illegible] शंसनम्। इति शब्दरत्नावली ॥ ([illegible] सम्भाषणम्। यथा, गीतायाम्। १८।
"अध्येष्यते च य इमं धर्म्यं संवादम[illegible] ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति [illegible]
संवासः, पुं, (सं वसन्त्यत्रेति। सं + वस + [illegible] गृहम्। इति शब्दरत्नावली ॥ ([illegible] संहितायाम्। ८५। १३।
"भयदो जनसंवासात्
यदि मार्ज्जारोऽपनयेत् [illegible]
पुरवासिना विहारार्थं पुरमध्ये [illegible] समाहतस्थानम्। तत्पर्य्यायः। [illegible] मविकर्षणम् २। इति जटाधरः ॥ [illegible] रामायणे। २। ४८। ४।
"सुखान् वाचो मनुष्याणां [illegible]
[illegible]
राज्ञानं धिक् दशरथं कामस्य [illegible] एकत्रावस्थानम्। यथा, मनुः। ८। ३५[illegible]
"मन्यदा सह संवासं [illegible]
संवाहः, पुं (संवाहनमिति। सं + वह + घञ्।) पदविमर्द्दः। इति [illegible]

कारमुद्यानम्। इति नीलकण्ठः॥ यथा,
भारते। ३। १६०। ३७।
तीरद्युमनिर्व्यूढभ्रमसंवादशोभिना॥"
वह+घञ्। विमर्द्दनम्। यथा, मार्क-
े। १६। १५।
था व्याधितं भार्य्या पतिं देवमिवार्च्चयत्।
भ्यङ्गाङ्गसंवाहस्नानाच्छादनभोजनैः॥")
कः, त्रि, (संवाहयतीति। सं+वह+
+ण्वुल्।) अङ्गमर्द्दकारकः। तत्पर्य्यायः।
र्द्दकः २। इति त्रिकाण्डशेषः॥ अङ्ग-
३। इति हेमचन्द्रः॥ (यथा, कामन्द-
नीतिसारे। १२। ४५।
ाधका भोजकाश्च गात्रसंवाहका अपि।
ाम्बूलकुसुमगन्धभूषणदायकाः।
व्याश्च मदा ह्येते ये चान्येऽभ्यासवर्त्तिनः॥"
नं, क्ली, (सं+वह+णिच्+ल्युट्।) अङ्ग-
म्। (यथा, मार्कण्डेये। १०। ७४।
ाभ्यङ्गो बान्धवानामङ्गसंवाहनञ्च यत्।
चाप्याप्यते जन्तुर्यश्चाश्नन्ति सदान्धवाः॥")
ादिवहनम्। इति मेदिनी॥
त्तिः, स्त्री, (सं+विद्+क्तिन्।) प्रतिपत्तिः
थ्याविवादः। इति मेदिनी॥ चेतना।
ः। इति शब्दरत्नावली हेमचन्द्रश्च॥
ा, किराते। १६। ३२।
"छायां विनिर्द्धूय तमोमयीन्तां
तत्त्वस्य संवित्तिरिवाप विद्याम॥"
भवः। यथा तत्रैव। ११। ३४॥
स्त्वया सुखसंवित्तिः स्मरणीयाधुनातनी।
ा स्वप्नोपमान् मत्वा कामान् मागास्तदङ्ग-
नाम्॥")
त्,) स्त्री, (सं+विद्+क्विप्।) अङ्गी-
द्,) कारः। ज्ञानम्। (यथा, श्रीधर-
मी।
ागीशा यस्य वदने लक्ष्मीर्यस्य च वक्षसि।
यास्ति हृदये संवित् तं नृसिंहमहं भजे॥"
भाषा। क्रियाकारः। युद्धम्। इत्यमरः॥
चारः। (यथा, माघे। १२। ३५।
"ओजस्विवर्णोज्ज्वलवृत्तशालिनः
प्रसादिनोऽनुज्झितगोत्रसंविदः।
श्लोकानुपेन्द्रस्य पुरः स्म भूयसो
गुणान् समुद्दिश्य पठन्ति वन्दिनः॥")
ङ्केतः। (यथा, रघुः। ७। ३१।
"स राजलोकः कृतपूर्व्वसंवित्
आरम्भसिद्धौ समयोपलभ्यम्।
आदास्यमानः प्रमदामिषं तत्
आवृत्य पन्थानमजस्य तस्थौ॥")
ाम। तोषणम्। इति मेदिनी॥ समाधिः।
ति शब्दरत्नावली॥
विदितः, त्रि, (सं+विद्+क्तः।) अङ्गीकृतः।
त्यमरः॥
विषा, स्त्री, (सं सम्यक् विषो यत्र।) प्रति-
षधा। इति शब्दचन्द्रिका॥

संवीक्षणं, क्ली, (सं+वि+ईक्ष+ल्युट्।) अन्वे-
षणम्। अपहृतवस्तुनस्तात्पर्य्येणान्वेषणम्।
इत्यमरः॥ सम्यक्तात्पर्य्येण विविधप्रकारे-
णेक्षणं संवीक्षणं भनट्। इति भरतः॥
संवीतं, त्रि, (सं+व्ये+क्तः।) रुद्धम्। आवृतम्।
इत्यमरः॥ (यथा, मनुः। ४। ४९।
"तिरस्कृत्योच्चरेत् काष्ठलोष्टपत्रतृणादिना।
नियम्य प्रयतो वाचं संवीताङ्गोऽवगुण्ठितः॥")
संवृतः, पुं, आवृतः। संपूर्व्ववृञ्धातोः क्तप्रत्य-
येन निष्पन्नः॥
संवृत्तः, पुं, (सं+वृत्+क्तः।) वरुणः। इति
शब्दमाला॥
संवृत्तिः, स्त्री, (सं+वृत्+क्तिन्।) सम्यक्-
प्रकारेण वर्त्तनम्। (यथा, कथासरित्सागरे।
५६। ४१४।
"इमता हृदि भीमभूभुजा
कृतसंवृत्त्युपचारसत्क्रियः।
ऋतुपर्णनृपोऽपि तं नलं
प्रतिपूज्याथ जगाम कोशलान्॥")
आवरणम्। इति संपूर्व्वकवृञ्धातोः क्ति-
प्रत्ययेन निष्पन्ना॥ (देवीविशेषः। यथा, महा-
भारते। २। ११। ३९।
"संवृत्तिराशा नियतिः सृष्टिर्देवी रतिस्तथा।
एताश्चान्याश्च वै देव्य उपतस्थुः प्रजा-
पतिम्॥")
संवेगः, पुं, (सं+विज+घञ्।) भयादिजनित-
त्वरा। इत्यमरः॥ (यथा, महाभारते। २।
७२। १४।
"अथ सभ्याः सभामध्ये समुच्छ्रितकरास्तदा।
ऊचुरुद्विग्नमनसः संवेगात् सर्व्व एव हि॥")
समाक्वेगश्च॥ (यथा, राजतरङ्गिण्याम्। ४।
३८०।
"अभग्नशमसंवेगलब्धसिद्धिर्नराधिपः।
श्रीपर्व्वतादावद्यापि भव्यानामेति दृक्पथम्॥")
संवेदः, पुं, (सं+विद्+घञ्।) अनुभवः।
तत्पर्य्यायः। वेदना २। इत्यमरः॥ द्वे अनुभवे।
विद ल मतौ घञ् संवेदः। चोपियन्त्यौति
अने वेदना। न नेत्युक्तः क्ली वेदनम्। तत्र
विशेषेणापि सामान्यं बाध्यते न कचित् क्-
तीति भनट्। इति भरतः॥ (यथा, हरिवंशे।
२०३। २३।
"संवेदजननी धात्री चेति माता प्रचोदिता।
अनुतां तनुताश्चैव जन्तूनां कर्म्मभोगिनाम्॥"
संवेशः, पुं, (सं+विश+घञ्।) निद्रा। इत्य-
मरः॥ (यथा, रघुः। ८३।
"अथ प्रदोषे दोषज्ञः संवेशाय विशांपतिम्।
सूनुः सूनृतवाक् स्रष्टुः विससर्ज्जोदितश्रियम्॥"
स्मरतबन्धः। इति मेदिनी॥ पीठः। इति
हेमचन्द्रः॥ (उपभोगस्थानम्। इति स्वामी॥
यथा, भागवते। ३। २३। २०।
"विहारस्थानविश्रामसंवेशप्राङ्गनाजिरैः।
यथोपजोषं रचितैर्विस्मापनमिवात्मनः॥")

संवेशनं, क्ली, (सं+विश+ल्युट्।) रतिक्रिया।
इति हेमचन्द्रः॥ (उपवेशनम्। यथा, भाग-
वते। ५। ८। १०।
"शीतोष्णवातवर्षेषु वृष इवानावृताङ्गः पीनः
संहननाङ्गः स्थण्डिलसंवेशनानुमर्द्दनामज्जन-
रजसा महामणिरिव ८*७ विचचार॥")
संव्यानं, क्ली, (संवीयतेऽनेनेति+सं+व्य+
ल्युट्।) उत्तरीयवस्त्रम्। इत्यमरः॥ (यथा,
किराते। ४। २८।
"विपाण्डु संव्यानमिवानिलोद्धतं
निरुन्धतीः सप्तपलाशजं रजः॥")
वस्त्रम्। इति मेदिनी॥
संशप्तकः, पुं, समयात् संग्रामादनिवर्त्ती। इत्य-
मरः॥ समयात् कुलाचारात् शपथाद्वा
संग्रामादनिवर्त्तिनोऽपराङ्मुखा अपलाय-
मानायाक्रोशन्ति ते संशप्तकाः। शपिर्भावे क्त
शप्तं सम्यक् सत्यं शप्तं येषां ते संशप्तकाः।
इति भरतः॥ नारायणीसेनाविशेषः। इति
महाभारतम्॥ (यथा, महाभारते। १।
१। १८७।
"तदाश्रौषं चास्मदीयान् महारथान्
व्यवस्थितानर्ज्जुनस्यान्तकाय।
संशप्तकान् निहतानर्ज्जुनेन
तदा नाशंसे विजयाय सञ्जय॥"
एतद्वधवृत्तान्तादिकं महाभारते द्रोणपर्व्वणि
१७ अध्यायमारभ्य द्रष्टव्यम्॥)
संशयः, पुं, (सं+शी+अच्।) सन्देहः। इत्य-
मरः॥ तस्य लक्षणं यथा,—
"स संशयो भवेद्या धीरेकत्राभावभावयोः।
साधारणादिधर्म्मस्य ज्ञानं संशयकारणम्॥"
इति भाषापरिच्छेदः॥
"संशयं लक्षयति स इति। एकधर्म्मिक-
विरुद्धभावाभावप्रकारकं ज्ञानं संशय इत्यर्थः।
साधारणेति उभयसाधारणो यो धर्म्मस्तज्-
ज्ञानं संशयसाधनम्। यथा उच्चैस्तरत्वं
स्थाणुत्वसाधारणं ज्ञात्वा अयं स्थाणुर्न वेति
सन्दिग्धे। एवमसाधारणज्ञानं संशयकारणम्।
यथा शब्दत्वं नित्यानित्यव्यावृत्तं शब्दे गृहीत्वा
शब्दो नित्यो न वेति सन्दिग्धे। विप्रतिपत्तिस्तु
शब्दोऽनित्यो न वेति शब्दात्मिका न संशय-
कारणं शब्दव्याप्तिज्ञानादीनां निश्चयमात्रजन-
कत्वस्वाभाव्यात्। किन्तत्र शब्देन कोटिद्वय-
ज्ञानम् जन्यते संशयस्तु मानस एवेति। एवं-
ज्ञानेऽप्रामाण्यसंशयादिषयसंशयः। एवं व्याप्य-
संशयादपि व्यापकसंशय इत्यादिकं बोध्यम्।
किन्तु संशये धर्म्मिज्ञानं धर्म्मीन्द्रियसन्निकर्षो
वा कारणमिति।" इति तट्टीका सिद्धान्त-
मुक्तावली॥
संशयानः, त्रि, संशययुक्तः। संपूर्व्वशीङ्धातोः
शानप्रत्ययेन निष्पन्नः॥
संशयापन्नमानसः, त्रि, (संशयमापन्नं मानसं
यस्य [illegible] सः।) संशयविषयः। संशययुक्तः।

न्यर्थाय । सांशयिक,३०। इत्यमर:॥ द्वे संशय विषयै स्थाण्वादौ। संशयमापन्न: सांशयिक इत्यर्थ: । संशयमापन्नं मानसं यत्र स्थाण्वादौ स तथा । संशयमापन्नं मानसं यस्य स इति पक्षान्तरार्थत्वे संशयितरि पुरुषादावपि तथा व्युत्पत्ति: स्यात् । इति भरत:॥

[illegible]यालु, त्रि, संशयिता । इति हेमचन्द्र:॥

संशयिता, [तृ] त्रि, [सं+शी+तृच् ।) संशयकर्त्ता । इति हेमचन्द्र:॥

संशरणं, क्ली, (सं+शॄ+ल्युट् ।) रणारम्भ: । इति शब्दमाला ॥ (संरक्षणम् । यथा, कामन्दकीये । ६ । ३ ।

"सं[illegible]नुयाद्धर्मनिष्ठ्यन् शरीरमनुपालयेत् ।
तद्धि संशरणं धाम शरीरं धर्मसाधनम् ॥")

संशित, त्रि, (सं+शो+क्त ।) सम्यक्सम्पादितम् । कृतनिश्चयकरणवान् । यथा संशितं व्रतम् । सम्यक् सम्पादितमित्यर्थ: । संशितो ब्राह्मण: । कृतनिश्चयवानित्यर्थ: । इति सिद्धान्तकौमुदी ॥

संशीत, स्त्री, (सं+शद+क्तिन् ।) सम्यक् [illegible]तनम् । [illegible] । यथा —

"[illegible] संशीत [illegible] ॥"

इति [illegible]माला ॥

संशुष्क, त्रि, [illegible] समाविनष्टम् । [illegible] निष्पन्नम् ॥

संशोधन, क्ली, (सं+शुध+ल्युट् ।) संशुद्धि । इति शब्दमाला ॥

संशोधित, त्रि, (सं+शुध+क्त ।) सुशोधित-वस्तु । यथा —

"[illegible] निर्मलाबद्धोदाबाहाम्
[illegible] निर्मित्यै ॥"

इति मधुमता ॥

संश्रय, क्ली, (सं+[illegible] । स + त्रि + "[illegible]।" उणा० ३ । ८५ । [illegible]

[illegible]

संश्रयण, त्रि (सं+श्रि+क्त ।) [illegible]

संश्रय, पुं (सं+श्रि+अच् ।) आश्रय । यथा,
[illegible]
[illegible]
[illegible]
[illegible] ॥"

[illegible]

[illegible] ॥")

संश्रव, पुं (सं+श्रु+अप् ।) [illegible] । [illegible]

[illegible]

[illegible]

संश्रित:, त्रि (सं+श्रि+क्त ।) आश्रित: । यथा,
"स प्राचीमयत: सम्भार्गौदीचीं सन्निमंश्रि-
ताम् ।
न प्रतीचीं यत: पृष्ठमतो दत्तं समाश्रयेत् ॥"
इति तिथ्यादितत्त्वम् ॥

संश्रुत:, त्रि. (सं+श्रु+क्त: ।) अङ्गीकृत: । इत्यमर: ॥ (यथा, रामायणे । ३ । १० । ३६ ।
"मया चैतद्वच: श्रुत्वा कार्त्स्न्येन परिपालनम् ।
ऋषीणां दण्डकारण्ये संश्रुतं जनकात्मजे ॥")

संश्लिष्ट, त्रि, आश्लिष्ट । मिलित । संपूर्व-श्लिषधातो: क्तप्रत्ययेन निष्पन्न ॥

संश्लेष, पुं, (सं+श्लिष+घञ् ।) आलिङ्गनम् । इत्यमर: ॥ (यथा, महाभारते ।१३।१३३।१७।
"संश्लेषञ्च परस्त्रीभिर्दस्युरैतानि वर्जयेत् ॥")
मिलनम् ॥ (यथा मार्कण्डेये । ३७ । १५ ।
"पलमात्रेण संश्लेषमभ्येत्य तदनन्तरम् ।
तेषामन्यतमैर्भूत्यै: समाक्रम्यानयद्गृहम् ॥")

संसत्, स्त्री, (सं+सि+अतिप्रत्ययेन निपातनात् सिद्धम् । "संपूर्वात् स्यतेः संसदिति सुभूतिचन्द्र: ।" इत्युणादिटीकायां उज्ज्वल-दत्त । २ । ८४ ।) सभा यथा,—
"स यत् कुरुते चेयं संसत् तथैव ते सर्व ।"
इत्युणादिकोष: ॥

संसक्त, त्रि (सं+सञ्ज+क्त ।) संलग्न । अव्यवहित । इत्यमर ॥

संसक्ति, स्त्री, संसक्तता । संपूर्वसञ्जधातो-र्भावे क्तिनप्रत्ययेन निष्पन्ना ॥

संसत्, } स्त्री, (समोदन्त्यस्यामिति । सं+
संसद् } सद्+क्विप् ।) सभा । इत्यमर: ॥
(यथा, रघु: । १६ । २४ ।
"तदङ्गनं संसदि राजिहनं
प्रातर्हितैभ्यो नृपतिं ममाम ॥")

संसरण, क्ली, (सं+सृ गतौ+ल्युट् ।) प्राणि[illegible] । असंबाधसैन्यगमनम् । घण्टापथ: । इत्यमर: । रणारम्भ: । मेदिनी ॥ गमनम् । इति शब्दरत्नावली ॥ (संसार: । यथा, भागवते । १० । ४० । २८ ।
"यं नौ भविद्यर्हि संसरणापवर्ग-
स्त्वत्संगमाम तदुपासनया मति स्यात् ॥")

संसर्ग:, पुं (सं+सृज+घञ् ।) सम्बन्ध: । [illegible] । इति व्याकरणम् ॥ [illegible] । यथा,—
"[illegible] ।
[illegible] ।
"[illegible] ।
[illegible] ॥"
इति [illegible] ।
[illegible]
[illegible] । [[illegible] ।"
"[illegible] ॥
[illegible] ॥
"[illegible]

ग्यकारवभोजिन. पादमित्याह भगवान्
[illegible]
यरूपमूलपाककर्त्तु द्वितीयसर्गे ।
आपस्तम्ब: । [illegible]
"अन्त्यजातिरविज्ञातो निवसेद्यस्य वेश्मनि
स वै ज्ञात्वा तु [illegible]
चान्द्रायणं पराको वा [illegible]
प्राजापत्यन्तु शूद्राणां तथा संसर्गदूषणे ।
येषान्तु भुक्तं पक्वान्नं कृच्छ्रं तेषां [illegible]
तेषामपि च यैर्भुक्तं तेषामर्द्धं विधीयते ।
तेषामपि च यैर्भुक्तं कृच्छ्रपादो विधीयते ।
अत्र तृतीयसंसर्गेण एव [illegible]
चतुर्थसंसर्गे दोषो नास्ति । प्रायश्चित्ते[illegible]
[illegible]ष्यैवम् ।" इति प्रायश्चित्ततत्त्वम् ॥
संसर्गनिरूपणम् । तत्र महापातकि[illegible]
पापहेतुत्वमाह मनु: ।
"ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागम: ।
महान्ति पातकान्याहु: संसर्गश्च [illegible]
प्रायश्चित्तमपि दर्शितम् ।
"एषां पापकृतामुक्ता चतुर्णामपि निष्कृति:
पतितै: संप्रयुक्तानामिमा: [illegible]
यो येन पतितेनैषां संसर्गं याति मानव: ।
स तस्यैव व्रतं कुर्यात् तत्संसर्गविशुद्धये ।
प्रायश्चित्तीयता प्राप्य दैवात् पापकृतो[illegible]
न संसर्गं व्रजेत् सद्भि: प्रायश्चित्ते[illegible]
पापिष्ठ संसर्गी पातकी भवति [illegible]
विष्णु: । यस्य येन पापात्मना सह
तस्यैव प्रायश्चित्तं कुर्यात् । गौतमोऽपि
[illegible]
स्तेनाभक्ष्यभक्ष्यनास्तिकनिन्दकनिन्दितो[illegible]
स्यागिपतितात्याग्यपतितत्यागिन [illegible]
पातकसंयोजकाश्च संवत्सरे [illegible]
निपिपतितम [illegible]
[illegible] संसर्गप्रकारा इत्याह बृहस्पति: ।
"एकशय्यासनं पङ्क्तिर्भाण्डपक्वान्नमिश्रणम् ।
याजनाध्यापनं योनिस्तथा च [illegible]
नवधा सङ्कर: प्रोक्तो न कर्त्तव्योऽधमै: [illegible]
ज्ञानमेव ।
"आलापात् गात्रसंस्पर्शात् निश्वासात्
[illegible]
सहशय्यासनाध्यायात् पापं संक्रमते
नृणाम् ।
"दूरस्थं हि मनुष्याणामसमाक्षिप्य [illegible]
यो यस्यार्थमिहायाति स तस्या[illegible]
[illegible]
देवल ।
"पतितेन सहोषित्वा जानन् संवत्सरं
[illegible]
दाक्षं [illegible]
[illegible] ।
"[illegible]

पातकिनस्त्वेते यश्च तैः सह संवसेत् ॥
रस्तु पतितैः संसर्गं कुरुते तु यः ।
ाय्यासनैर्नित्यं जानन् स पतितो भवेत् ॥"
द्वितीयतृतीयसंसर्गिणि प्रमाणं नास्ति
च वृद्धशातातपः ।
ादिं संसृशेद्यस्तु एक एव स दुष्यति ।
ृष्टस्त्वन्यो न दुष्येत सर्व्वद्रव्येष्वयं विधिः ॥"
।'
तानान्तु पात्राणां यथैकमुपहन्यते ।
तत् शोधनं प्रोक्तं न तु तत्स्पृष्टिनामपि ॥"
ति । यश्च येन पापात्मनेति यो येन संपिबे-
१ संसर्गी येन संसर्गमिति विष्णुव्यास-
त्नवचनैः सामान्येन पापिष्ठसंसर्गी पापी
ते इति प्रतिपादनात् संसर्गपापिष्ठस्यापि
र्गी पापयुक्तो भवतीति एभिरेव प्रति-
दतम् ॥०॥ पतितोत्पन्नानां शुद्धिमिच्छतां
तानां प्रायश्चित्तस्य तृतीयो भागस्तत्प्राय-
ं श्चेयम् । स्त्री च पतितोत्पन्ना तृतीय-
ाय तृतीयभागं कुर्य्यात् । इति प्रायश्चित्त-
कः ॥
भावः, पुं, (संसर्गेण सम्बन्धेन अवच्छिन्नो-
वः ।) सम्बन्धरहितत्वम् । न्यायमते अभाव-
र्थविशेषः । स तु भेदभिन्नाभावः । स च
वधः । प्रागभावः १ ध्वंसः २ अत्यन्ता-
ः ३ । यथा,—
भावस्तु द्विधा संसर्गान्योन्याभावभेदतः ।
ाभावस्तथा ध्वंसोऽप्यत्यन्ताभाव एव च ॥
त्रैविध्यमापन्नः संसर्गाभाव इष्यते ॥"
इति भाषापरिच्छेदः ॥०॥
त्वं तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिता-
भावत्वम् । विनाश्यभावत्वं प्रागभावत्वम् १
ग्राभावत्वं ध्वंसत्वम् २ नित्यसंसर्गाभावत्व-
यन्ताभावत्वम् ३ । इति सिद्धान्तमुक्तावली ॥
र्गी, [न्] (संसर्गोऽस्यास्तीति । इनिः ।
ा, स + सृज + "संपृचानुरुधेति ।" ३ । २ ।
२ । इति घिणुन् ।) संसर्गविशिष्टः । यथा ।
भागानन्तरं मैत्रात् पितृभ्रातृपितृव्यभ्रातृ-
त्राणां यथायथं एकत्रावस्थानं संसर्गः । तद्-
ः संसर्गी । एवम्भूतस्य समर्गिणो मृतस्य
ं तज्जातस्यापत्यस्य तदपत्याभावे संसर्गी
यं गृह्णीयात् । इति दायतत्त्वम् ॥
र्पः, पुं, सम्यक्प्रकारेण गमनम् । सर्पादि-
तनवद्गमनम् । संपूर्व्वसृपधातोर्घञ् प्रत्ययेन
ाप्पन्नः ॥
र्पी, [न्] त्रि, संसर्पशब्दादिन्प्रत्ययेन संपूर्व्वक-
ृपधातोर्णिन्प्रत्ययेन वा निष्पन्नः ॥ संसर्प-
ाविष्टः । सम्यग्गमनशीलः ॥ (यथा, रघुः ।
। २६ ।
"कपोलसंसर्पिशिखः स तस्याः
मुहूर्त्तकर्णोत्पलतां प्रपेदे ॥")
ारः, पुं, (संसरत्यस्मादिति । सं + सृ गतौ +
ञ् ।) मिथ्याज्ञानजन्यवासना । इति नैया-

यिकाः ॥ यथा । संसारश्च मिथ्याधीप्रभवा वासना । इति प्रामाण्यवादगादाधरी टीप्पनी ॥ स्वादृष्टोपनिबद्धशरीरपरिग्रहः । इति कलापटीकायां गोपीनाथः ॥ संसरणम् । इति शब्दरत्नावली ॥ तत्पर्य्यायः । दुःखलोकः २ भवः ३ कष्टकारकः ४ । इति त्रिकाण्डशेषः ॥ अपिच ।

"यस्माद्विजायते विश्वमत्रैव प्रविलीयते ।
समायी मायया बद्धः करोति विविधास्तनूः ॥
न चाप्ययं संसरति न च संसारयेत् प्रभुः ।
नायं पृथ्वी न सलिलं न तेजः पवनो न तत् ॥
न प्राणो न मनो व्यक्तं न शब्दः स्पर्श एव च ।
न रूपरसगन्धाश्च नाहं कर्त्ता न वागपि ॥
न पाणिपादौ नो पायुर्न चोपस्थो द्विजोत्तमाः ॥
न कर्त्ता न च भोक्ता वा न च प्रकृतिपूरुषौ ॥
न माया नैव च प्राणश्चैतन्यं परमार्थतः ।
अहं कर्त्ता सुखी दुःखी कृशः स्थूलेति या मतिः ।
सा चाहङ्कारकर्तृत्वादात्मन्यारोप्यते जनैः ।
वदन्ति वेदविद्वांसः साक्षिणं प्रकृतेः परम् ॥
भोक्तारमक्षरं शुद्धं सर्व्वत्र समवस्थितम् ।
तस्मादज्ञानमूलोऽयं संसारः सर्व्वदेहिनाम् ॥"
इति कौर्म्मे ईश्वरगीतासु २ अध्यायः ॥

किञ्च ।

"पितृमातृसुहृद्भ्रातृकलत्रादिकृतेन च ।
दृष्टोऽसकृत्तथा दैन्यमश्रुपूर्णाननो गतः ॥
एवं संसारचक्रेऽस्मिन् भ्रमता तात सङ्कटे ।
ज्ञानमेतन्मया प्राप्तं मोक्षसंप्राप्तिकारकम् ॥"
इति मार्कण्डेयपुराणे पितापुत्त्रसंवादनामाध्यायः ॥

संसारगुरुः, पुं, (संसारस्य गुरुः ।) कामदेवः । इति त्रिकाण्डशेषः ॥ जगद्गुरुश्च ॥

संसारमार्गः, पुं, (संसारस्य मार्गः ।) योनिः । इति त्रिकाण्डशेषः ॥

संसारमोक्षणं, त्रि, (संसारस्य मोक्षनं यस्मात् ।) भवतारकम् । यथा,—

"एवमेतन्महाशास्त्रं देवि ! संसारमोक्षणम् ।
मम भक्त्यवस्थायै प्रयुक्तं परमं मया ॥"
इति वाराहे सुतस्वामिमाहात्म्यनामाध्यायः ॥*॥

(संसारस्य मोक्षणम् ।) भवमोचने, क्ली । तदुपाया यथा,—

वसिष्ठ उवाच ।

"संसारार्णवमग्नानां नराणामल्पचेतसाम् ।
तरणे यो भवेत् पोतस्तन्मे व्याख्यातुमर्हसि ॥

प्रह्लाद उवाच ।

ये शङ्खचक्राब्जकरं तु शार्ङ्गिणं
खगेन्द्रकेतुं वरदं श्रियः पतिम् ।
समाश्रयन्ते भवभीतिनाशनं
संसारगर्त्ते न पतन्ति ते पुनः ॥
वैकुण्ठं खण्डपरशुं भवबन्धसमुच्छिदम् ।
प्रणिपत्य महात्मानं संसारे न पुनर्भवेत् ॥
ध्यायेत् दामोदरं यस्तु भक्तिनम्रोऽर्चयेत वा ।
न स संसारगर्त्तेऽस्मिन् मज्जते दानवेश्वर ॥
ये मानवा विगतरागपरावरज्ञा
नारायणं सुरगुरुं सततं स्मरन्ति ।
ते धौतपाण्डुरपटा इव राजहंसाः
संसारसागरजलस्य तरन्ति पारम् ॥"
इति वामने ८० अध्यायः ॥

संसारी, [न्] पुं, (संसारोऽस्त्यस्येति । इनिः ।) संसारविशिष्टप्राणी । इति हलायुधः ॥ शरीरी । यथा । संसारिणामिति संसारित्वं शरीरित्वम् । शरीरित्वञ्च भोगावच्छेदकत्वं न तु चेष्टावत्त्वम् । अत ईश्वरपरिगृहीतरामकृष्णादिशरीरव्युदासः मिथ्याज्ञानजन्यवासनाया अदृष्टस्य वा न संसारपदेन विवक्षासम्भवः । इति बौद्धाधिकारस्य गादाधरी टिप्पनी ॥

संसिद्धिः, स्त्री, (सं + सिध + क्तिन् ।) प्रकृतिः । स्वभावः । इत्यमरः ॥ सम्यक्सिद्धिः । सदोषा । इति मेदिनी ॥ परमा सिद्धिः । मोक्षः । यथा,

"मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः ॥"
इति श्रीभगवद्गीतायां ८ अध्याये १५ श्लोकः ॥

(फलम् । इति स्वामी ॥ यथा, भागवते । १ । २ । १३ ।

"अतः पुंभिर्द्विजश्रेष्ठा वर्णाश्रमविभागशः ।
स्वनुष्ठितस्य धर्मस्य संसिद्धिर्हरितोषणम् ॥")

संसृतिः, स्त्री, (सं + सृ + क्तिन् ।) संसारः ॥ इति शब्दरत्नावली ॥ (यथा, भागवते । १ । १ । १४ ।

"आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन् ।
ततः सद्यो विमुच्येत यद्बिभेति स्वयं भयम् ॥")

प्रवाहः । इति त्रिकाण्डशेषः ॥

संसृष्टः, त्रि, (सं + सृज + क्तः ।) संसर्गः । वमनादिना संशुद्धः । इति मेदिनीकरहेमचन्द्रौ ॥ विभागानन्तरं मैत्रात् पितृभ्रातृपितृव्यभ्रातृपुत्त्राणां यथायथं एकत्रावस्थानसंसर्गस्तद्युक्तः । अथ संसृष्टधनविभागः । एकपितृजातयोरपि सोदरविमातृजयोर्मृतदेयषट्पुरुषपिण्डदातृत्वेन सोदरस्यैव धनाधिकारो न तु पित्रादित्रयमात्रपिण्डदातुर्विमातृजस्य । कश्चित्तु संसृष्टत्वेन विमातृजस्याप्यसंसृष्टसोदरेण सह तुल्याधिकारिता सोदरस्य संसृष्टत्वे स एव गृह्णीयान्न संसृष्ट्यपि विमातृज इति । तथा च याज्ञवल्क्यः ।

"संसृष्टिनन्तु संसृष्टी सोदरस्य तु सोदरः ।
दद्याच्चापहरेदंशं जातस्य च मृतस्य च ॥
अन्योदर्य्यस्तु संसृष्टी नान्योदर्य्यो धनं हरेत् ।
असंसृष्ट्यपि चादद्यात् संसृष्टो नान्यमातृजः ॥"

संसृष्टिनमाह बृहस्पतिः ।

"विभक्तो यः पुनः पित्रा भ्रात्रा चैकत्र संस्थितः ।
पितृव्येणाथवा प्रीत्या स तु संसृष्ट उच्यते ॥"

तेन विभागानन्तरं मैत्रात् पितृभ्रातृपितृव्यभ्रातृपुत्त्राणां यथायथं एकत्रावस्थानं संसर्गः तद्युक्तः संसर्गी । एवम्भूतस्य संसर्गिणो मृतस्य

धनं तज्जातस्यापत्यस्य तदपत्याभावे संसर्गी स्वयं गृह्णीयात्। एवं सोदरस्य तु सोदरः ॥*॥ ततश्च संसृष्टिनस्तु संसृष्टीत्येतद्वचनं तुल्यरूपसम्बन्धिसंसर्गकृतविशेषप्रतिपाद्यर्थं तेन, सोदराणां सापत्नानां भ्रातृपुत्राणां पितृव्याणां तुल्यानां सद्भावे संसर्गी गृह्णीयात् वाक्यादविशेषश्रुतेः। पूर्ववचने सर्वेषामेव प्रकृतत्वात् सर्वेषु चापेक्षासम्भवात्। अतो न भ्रातृमात्रविषयमिदं वचनमिति जीमूतवाहनः॥ सोदरे त्वसंसृष्टिनि संसृष्टिन्यसोदरे च सति कतरस्तावत् गृह्णीयात्। एवमोदरासोदरयोः संसृष्टयोः सद्भावे कतर इत्यत्र प्रथमत आह अन्योदर्य्यस्त्विति। अन्योदर्य्यः पुनः संसृष्टी सन् गृह्णीयात् नान्योदर्य्यमात्रः किन्तु असंसृष्टापि पूर्ववचनस्थसोदरपदानुषङ्गात् प्राप्तः सोदरश्च गृह्णीयात्। तेन एकत्र विषये पूर्ववचनोक्तम् संसृष्टसोदरत्वयोरेकगतत्तुल्यता-द्युभयोर्विभज्य ग्रहणम्। तदुभयमत्ते च अन्योदर्य्यस्य संसृष्टित्वात्तुल्यरूपत्वात् नेति। द्वितीये आह संसृष्टो नान्यमातृज इति। सोदरे संसृष्टिनि सति अन्यमातृजः संसृष्ट्यपि न गृह्णीयात्। अर्थात्तत्र संसृष्टी सोदर एव गृह्णीयात्। संसृष्टत्वाविशेषेऽपि सोदरत्वेन तस्य बलवत्त्वात्। दायभागकारास्तु अन्योदर्य्यस्तु संसर्गी सन् सर्व्वापि सोदरेऽसंसृष्टिनि धनं हरेत् नान्योदर्य्यः असंसृष्टापि गृह्णीयादिति पूर्व्वार्द्धार्थः। तेन किं सोदरस्तदानीं न गृह्णीयादित्यपेक्षायामुत्तरार्द्धेनोक्तं असंसृष्टापि चाददीत सोदर इत्यनुषज्यते न संसृष्टोऽन्यमातृजः केवल। किन्तु उभाभ्यामेव विभज्य ग्रहीतव्यमित्याहुः। मिताक्षरादयोऽप्येवम्। दायतत्त्वादौ उद्भृतश्रीकरमतं मणिभिर्महेशोपाध्यायस्तु। अन्योदर्य्यस्तु संसृष्टी नान्योदर्य्यो धनं हरेत्। असंसृष्टापि सोदर एव गृह्णीयात् न तु संसृष्टः सापत्नो भ्राता। संसृष्ट इति संसृष्टः सोदर इति केचित्। नान्योदर्य्यो धनं हरेत् इति पाठे अन्योदर्य्यः सन् धनं न गृह्णीयात् इति व्याख्या असंसृष्टसोदरस्याधिकारार्थमिदं वचनमतो न पुनरुक्तिरित्याहुः। रत्नाकरधृतवचनन्तु कल्पतरौ नान्योदर्य्यधनं हरेदिति पाठो दृश्यते स मूलभूतग्रन्थस्वारसिकत्वाद्विरोधाच्च प्रकृतत्वाद्युक्तं न नान्योदर्य्यो धनं हरेदिति दायदर्शनात् तदनुसारव्याख्यानादर्शनाच्च निर्विवरणमादृतं इत्याहुः। इति दायतत्त्वम्॥

संसृष्टं, क्ली, (संसृष्ट+भावे क्त।) संसृष्टस्य भावः। यथा। तेन एकत्र विषये पूर्ववचनोक्तम् संसृष्टत्वान्यतरद्वयसोदरत्वयोर्द्वयोर्विभज्य ग्रहणम्। इति दायतत्त्वम्॥

संसृष्टिन् [न्] पुं, संसृष्ट संसृष्टमनयास्तीति। संसृष्टः। संसृष्टविशिष्टः। यथा, दायतत्त्वम्॥

'संसृष्टिनस्तु संसृष्टी सोदरस्य तु सोदरः।
दद्याच्चापहरेदंशं जातस्य च मृतस्य च॥
अन्योदर्य्यस्तु संसृष्टी नान्योदर्य्यो धनं हरेत्।
असंसृष्टापि चाददीत संसृष्टो नान्यमातृजः॥"
इति दायतत्त्वम्॥

संस्कारः, पुं, (सं+कृ+घञ्।) प्रतियत्नः। अनुभवः। मानसकर्म्म इति मेदिनी॥ न्यायमते गुणविशेषः। स च त्रिविधः। वेगाख्यसंस्कारः १ अयं मूर्त्तपदार्थस्थायी। क्वचिद्वेगजन्यः क्वचित्कर्म्मजन्यश्च। स्थितिस्थापकसंस्कारः २ अयं पृथिवीगुणः केषाञ्चिन्मते पृथिव्यादिचतुःपदार्थगुणः। अयं अतीन्द्रियः स्पन्दनकारणश्च। भावनाख्यसंस्कारः ३ अयं आत्मनः अतीन्द्रियगुणः। उपेक्षानात्मकनिश्चयजन्यः। अथ स्मरणप्रत्यभिज्ञयोः कारणञ्च॥*॥ अस्य प्रमाणम्।

"संस्कारभेदो वेगोऽथ स्थितिस्थापकभावने।
मूर्त्तमात्रे तु वेगः स्यात् कर्म्मजो वेगजः क्वचित्॥
स्थितिस्थापकसंस्कारः क्षितौ केचिच्चतुर्ष्वपि।
अतीन्द्रियः स विज्ञेयः क्वचित् स्पन्देऽपि कारणम्॥
भावनाख्यस्तु संस्कारो जीववृत्तिरतीन्द्रियः।
उपेक्षानात्मकस्तस्य निश्चयः कारणं भवेत्॥
स्मरणे प्रत्यभिज्ञायामप्यसौ हेतुरुच्यते॥"
इति भाषापरिच्छेदः॥*॥

शुद्धिः घटादिविशेषजनककर्म्म। यथा। यदग्निस्थापनान्तरं कर्म्मकाले हठादिग्निहृया स स्कृताग्निरन्यवानायते तदा पुनर्भूमिसंस्कारः कर्त्तव्यः। संमृज्य उपलिप्य उल्लिख्य उद्धृत्य अभ्युक्ष्येत् एष संस्कारोऽनुगतोऽग्नौ भूयः। इति गृह्यान्तरात्। इति संस्कारतत्त्वम्॥*॥ दशविधसंस्कारा यथा। विवाहः १ गर्भाधानम् २ पुंसवनम् ३ सीमन्तोन्नयनम् ४ जातकर्म्म ५ नामकरणम् ६ अन्नप्राशनम् ७ चूडाकरणम् ८ उपनयनम् ९ समावर्त्तनम् १०। यथा हारीतः। गर्भाधानवदुपेतो ब्रह्मगर्भं सन्दधाति पुंसवनात् पुमांसं करोति फलस्नापनात् मातापितृजं पाप्मानमपोहति रेतोरक्तगर्भोपघातः पञ्चगुणो जातकर्म्मणा प्रथममपोहति नामकरणेन द्वितीयं प्राशनेन तृतीयं चूडाकरणेन चतुर्थं स्नापनेन पञ्चमं एतदष्टाभिः संस्कारैर्गर्भोपघातात् पूतो भवतीति। अत्र मन्त्र समावर्त्तनकर्म्मणि कल्पतरुः। इति मलमासतत्त्वम्॥*॥ याज्ञवल्क्यः।

"गर्भाधानमृतौ पुंसः सवनं स्पन्दनात् पुरा।
षष्ठेऽष्टमे वा सीमन्तः प्रसवे जातकर्म्म च॥
अहन्येकादशे नाम चतुर्थे मासि निष्क्रमः।
षष्ठेऽन्नप्राशनं मासि चूडा कार्य्या यथाकुलम्॥
एवमेनः शमं याति बीजगर्भसमुद्भवम्॥"
इति मलमासतत्त्वम्॥*॥

मन्त्रनामामधिकारमाह याज्ञवल्क्यः।

"तूष्णीमेताः क्रियाः स्त्रीणां विवाहस्तु समन्त्रकः।" (?)

भगिन्यश्च निजादंशाद्दत्त्वांशन्तु ... असंस्कृता भ्रातरो भगिन्यश्च ... नीतेः। अन्यथा ... दायतत्त्वम्॥ एषां ... गरुडपुराणोक्तसंस्कारास्तत्रैव ८३। ८४ अध्यायेषु द्रष्टव्याः॥*॥

अथ जीर्णदेवगृहादिसंस्कारफलम्।

"अथ चेज्जीर्णसंस्कारविधिः पुण्यो देवतादिषु कर्त्तव्यो ... मूलादष्टगुणं पुण्यं जीर्णसंस्कारतो भवेत्। तस्मादनाथजीर्णेषु कार्य्यं संस्करणं मुने। स्वकीयं परकीयं वा यथाविभवविस्तरैः। स्वतो वा परतो वापि यस्तु संस्कुरुते पुनः। स यावच्चन्द्रसूर्य्यौ गोस्तावत्कालं द्युतौ ... लोकेषु तेषु देवानां चिरजस्केषु हृष्टधीः। यथा गोमेधयज्ञेषु पशुरोमसमाः समाः। वसते दिवि हृष्टात्मा जीर्णसंस्कारकारकः अनाथा वा सनाथा वा पूजनाया ..."

इति देवीपुराणे पूजाविधिनामाध्यायः॥

संस्कारजः, त्रि, संस्कारेण जातः। शब्दपूर्व्वकजनधातोर्डप्रत्ययेन निष्पन्नः।

संस्कारवर्ज्जितः, पुं, (संस्कारेण वर्ज्जितः।) नयनसंस्कारहीनः। तत्पर्य्यायः। व्रात्यः इति हेमचन्द्रः॥ दशसंस्कारहीने, त्रि।

संस्कारहीनः, पुं, (संस्कारहीनः।) व्रात्य इत्यमरः॥ संस्कारहीनत्वकालमाह यम "पतिता यस्य सावित्री दशवर्षाणि पञ्च च। ब्राह्मणस्य विशेषेण तथा राजन्यवैश्ययोः। प्रायश्चित्तं भवेदेषां प्रोवाच वदतां वरः। तथा मार्कण्डेयः।

"विप्रस्य षोडशाद्वर्षात् राज्ञो द्वाविंशे ... वैश्यस्याष्टाधिकाद्वर्षात् सावित्रीपतनं ... विष्णुधर्म्मोत्तरे। "षोडशाब्दा हि विप्रस्य राजन्यस्य द्वि ... विंशतिः सचतुर्थी च वैश्यस्य परिकीर्त्तिता। सावित्री नातिवर्त्तेत अत ऊर्द्ध्वं निवर्त्तते।" इति मलमासतत्त्वम्॥

संस्कृतं, क्ली, (सं+कृ+क्तः।) लक्षणा इति मेदिनी॥ प्राणिन्यादिकृतलक्षणशब्दः उपेतः उपसंतो लक्षणोपेतः माधुशब्दः। इति भरतटीकायां भरतः॥ स तु देवभाषा।

"गीर्व्वाणवाणीवदनं मुकुन्द-
संकीर्त्तनञ्चेत्युभयं हि सार।
सुदुर्लभं तच्च न युज्यवाचा-
च मन्यतेऽत पठनीयमेतत्॥"
इति मुग्धबोधव्याकरणटीका॥

संस्कृतः, त्रि, (सं+कृ+क्तः।) कृत्रिमः। ... करणेन निर्वृत्तः कृत्रिमः इति भरतः॥ पक्वः। यतो गुणान्तराधा...

रटीकायां स्वामी ॥ शस्तः । भूषितः । मेदिनी ॥ शोधितः । इति जटाधरः ॥ , देवीभागवते । १ । २ । ११ ।
"पुराणोत्तमं पुण्यं श्रीमद्भागवताभिधम् ।
दशसहस्राणि श्लोकास्तत्र तु संस्कृताः ॥")
, स्त्री, (सं+कृ+"कृञः शच ।" ३ । १०० । इति शः ।) शवदाहादिक्रिया । त्रिकाण्डशेषः ॥ संस्कारश्च ॥
, पुं, (संस्तीर्य्यते इति । सं+स्तॄ+ ।) शय्या । यज्ञः । इति हेमचन्द्रः ॥ :दिरचितशय्या । इति शब्दरत्नावली ॥ , रघुः । ८ । ५७ ।
"नवपल्लवसंस्तरेऽपि ते
मृदु दूयेत् यदङ्गमर्पितम् ।
तदिदं विषहिष्यते कथं
वद वामोरु चिताधिरोहणम् ॥")
, पुं, (सं+स्तु+अप् ।) परिचयः । मरः ॥ (यथा, किराते । ४ । २५ ।
"विहाय वाञ्छामुदिते मदात्यया-
दरक्तकण्ठस्य रुते शिखण्डिनः ।
श्रुतिः श्रयत्युन्मदहंसनिःस्वनं
गुणाः प्रियत्वेऽधिकृता न संस्तवः ॥")
कृस्तुतिश्च ॥ (यथा, भागवते । ११ । १३ । १४ ।
ते मे छिन्नसन्देहा मुनयः सनकादयः ।
जयित्वा परया भक्त्या गृणत संस्तवैः ॥")
शानः, त्रि, (संस्तवीतीति । सं+स्तु+ श्यानच् स्तुवः ।" उणा० २ । ८८ । इति नच् ।) सहस्रा । इत्युणादिकोषः ॥ वाग्मी । ता । हर्षः । इति संक्षिप्तसारोणादिवृत्तिः ॥ ाव:, पुं, (समेत्य स्तुवन्ति यस्मिन् देशे छन्दोगा । सम्+स्तु+"यज्ञे समि स्तुवः ।" ३ । । ३१ । इति घञ् ।) क्रतुषु द्विजन्मनां तिभूमिः । इत्यमरः ॥ यज्ञेषु स्तुतिकारिणां घ्नानां यत्स्थानभूमिः संस्ताव उच्यते । तुषु यज्ञविषयेषु द्विजानां या स्तुतिभूमिः नं स संस्ताव इत्यन्वयः । समेत्य स्तुवति न्दोगैरत्र इति संस्तावः घञ् । इति भरतः ॥ तः, त्रि, (सं+स्तु+क्तः ।) सम्यक्प्रकारेण तिप्राप्तः । सम्यक्स्तवविषयीभूतः । यथा,—
भूयश शतवार्षिकमनाहृतासनभसि ।
भिः संस्तुता भूमौ मत्स्यविषाम्ययोनिजा ॥"
इति देवीमाहात्म्यम् ॥
त्यायः, पुं, (सं+स्त्यै+घञ् । आतो युक् ।) घातः । सन्निवेशः । इत्यमरः ॥ संस्थानम् । वस्तृतिः । इति मेदिनी ॥ गृहम् । इति हेमचन्द्रः ॥
स्थः, पुं, (संतिष्ठते स्वपरराष्ट्रेषु इति । सं+स्था+कः ।) चरः । इति मेदिनी ॥ निजराष्ट्रकः इति हेमचन्द्रः ॥ (यथा, रामन्दकीये । १२ । ३६ ।
"संस्थाः स्युपारमन्दिते दत्तदाया सभा-
सदाः ॥")

संस्थः, त्रि, (संतिष्ठते इति । सं+स्था+कः ।) अवस्थितः । इति मेदिनी ॥ (यथा, हरिवंशे भविष्यपर्व्वणि । ८ । ६६ ।
"यदा मे मरणं भूयात् तदा मा भूत् स्मृतिभ्रमः ।
दिने दिने चणं चित्तं त्वयि संस्थं भवत्विति ॥")
मृतः । इति शब्दरत्नावली ॥
संस्था, स्त्री, (संतिष्ठतेऽनयेति । सं+स्था+अङ् ।) न्याय्यपथस्थितिः । इत्यमरः ॥ सन्तिष्ठतेऽनया सम्यगवस्थानं वा संस्था । इति भरतः ॥ अस्याः पर्य्यायो मर्य्यादाशब्दे द्रष्टव्यः ॥ (यथा, उपदेशशतके । ८० ।
"अपि येन परिहर्त्तुं ययातिशापं हरिर्हते
कंसे ।
राजासनं न भेजे पुरातनीं पालयेत् संस्थाम् ॥")
प्रतिज्ञा । यथा, रघुः । ११ । ३८ ।
"तस्य वीक्ष्य ललितं वपुः शिशोः
पार्थिवः प्रथितवंशजन्मनः ।
स्वं विचिन्त्य च धनुर्दुरानमं
पीडितो दुहितृशुल्कसंस्थया ॥")
स्थितिः सादृश्यम् । नाशः । इति मेदिनी ॥ व्यवस्था । (यथा, मनुः । १ । २१ ।
"सर्व्वेषान्तु स नामानि कर्म्माणि च पृथक्
पृथक् ।
वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्म्ममे ॥")
व्यक्तिः । क्रतुभेदः । (यथा, भागवते । १० । २३ । ८ ।
"दीक्षायाः पशुसंस्थायाः सौत्रामण्याश्च
सत्तमाः ।
अन्यत्र दीक्षितस्यापि नान्नमश्नन् हि दुष्यति ॥")
समाप्तिः । इति हेमचन्द्रः ॥ प्रलयचतुष्टयम् । यथा,—
"नैमित्तिकः प्राकृतिको नित्य आत्यन्तिको
लयः ।
संस्थेति कविभिः प्रोक्तश्चतुर्धास्य स्वभावतः ॥"
इति पुराणम् ॥
संस्थानं, क्ली, (सं+स्था+ल्युट् ।) सन्निवेशः । (यथा, मनुः । ८ । ३७१ ।
"भर्त्तारं लङ्घयेत् या तु स्त्रीज्ञातिगुणदर्पिता ।
तां श्वभिः खादयेद्राजा संस्थाने बहुसंस्थिते ॥")
चतुष्पथः । इत्यमरः ॥ आकृतिः । मृत्युः । इति मेदिनी ॥ चिह्नम् । इत्यजयपालः ॥ सम्यक्स्थितिश्च ॥ (व्यवस्था । यथा, भागवते । ३ । ८ । २० ।
"लोकसंस्थानविज्ञान आत्मनः परिखिद्यतः ।
तामाहागाधया वाचा कश्मलं शमयन्निव ॥")
संस्थापनं, क्ली, (सं+स्था+णिच्+ल्युट् ।) सम्यक्स्थितिप्रापणम् । स्थिरीकरणम् । यथा,
"परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्म्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥"
इति भगवद्गीतायाम् ४ अध्यायः ॥
"साधुरक्षणेन दुष्टवधेन च धर्म्मं स्थिरीकर्त्तुम् ।"
इति तट्टीकायां श्रीधरस्वामी ॥

संस्थितः, त्रि, (सं+स्था+क्तः ।) मृतः । इत्यमरः ॥ (यथा, मनुः । ८ । १८० ।
"संस्थितस्यानपत्यस्य सगोत्रात् पुत्त्रमाहरेत् ।
तत्र यद्रिक्थजातं स्यात् तत्तस्मिन् प्रतिपाद-
येत् ॥")
सम्यक्स्थितिविशिष्टः ॥ (यथा, कौर्म्मे । १ । २१ ।
"इदन्तु पञ्चदशमं पुराणं कौर्म्ममुत्तमम् ।
चतुर्द्धा संस्थितं पुण्यं संहितानां प्रभेदतः ॥"
संस्थितिः, स्त्री, (सं+स्था+क्तिन् ।) संस्थानम् । (यथा, मनुः । ६ । ९० ।
"यथा नदीनदाः सर्व्वे सागरे यान्ति संस्थि-
तिम् ।
तथैवाश्रमिणः सर्व्वे गृहस्थे यान्ति संस्थितिम् ॥"
मृत्युः । गृहम् । इति केचित् ॥
संस्पर्शः, पुं, (सं+स्पृश+घञ् ।) सम्यक्स्पर्शः । स तु त्वगिन्द्रियग्राह्यगुणविशेषः । यथा, छागलेयः ।
"आलापात् गात्रसंस्पर्शात् निश्वासात् सह-
भोजनात् ।
सहशय्यासनाध्यायात् पापं संक्रमते नृणाम् ॥"
इति प्रायश्चित्तविवेकः ॥
संस्पर्शा, स्त्री, (संस्पृशतीति इति । सं+स्पृश+कर्म्मणि घञ् । टाप् ।) जनीनामगन्धद्रव्यम् । इत्यमरः ॥
संस्फालः, पुं, (सम्यक् स्फालः स्फुरणं यस्य ।) मेषः । इति त्रिकाण्डशेषः ॥
संस्फुटः, त्रि, (संस्फुटतीति । सं+स्फुट+इगुपधेति कः ।) विकसितः । इति शब्दरत्नावली ॥
संस्फेटः, पुं, (सं+स्फिट घनादरे+अधिकरणे घञ् ।) युद्धम् । इत्यमरटीकायां भरतः ॥
संस्फोटः, पुं, (संस्फोटत्यत्रेति । सं+स्फुट् भेदने +घञ् ।) युद्धम् । इत्यमरः ॥
संस्मरणं, क्ली, (सं+स्मृ+ल्युट् ।) संस्मृतिः । संस्कारजन्यज्ञानम् । यथा, योगियाज्ञवल्क्यः ।
"ध्यायेन्नारायणं नित्यं स्नानादिषु च कर्म्मसु ।
तद्विष्णोरिति मन्त्रेण स्नायादप्सु पुनः पुनः ॥
गायत्त्री वैष्णवी ह्येषा विष्णोः संस्मरणाय वै ।"
इति तिथ्यादितत्त्वम् ॥
संस्मृतिः, स्त्री, संस्मरणम् । संपूर्व्वस्मृधातोः क्तिन्प्रत्ययेन निष्पन्ना ॥ (यथा, कथासरित्-सागरे । ४५ । २०६ ।
"तच्छ्रुत्वा संस्मृतिं लब्ध्वा स राजा प्रत्युवाच
तम् ॥")
संहतः, त्रि, (सं+हन+क्तः ।) दृढमांसः । इत्यमरः ॥ मिलितः । दृढः । इति मेदिनी । हेमचन्द्रौ ॥ सम्यक्प्रकारेण हतश्च ॥
संहतजानुः, त्रि, (संहते जानुनी यस्य ।) सङ्गजानुकः । यथा,—
"प्रज्ञुः प्रगतजानुः स्यात् [illegible]
[illegible]
[illegible]"
इति [illegible] ॥

धनं तज्जातस्यापत्यस्य तदपत्याभावे संसर्गी स्वयं गृह्णीयात्। एवं सोदरस्य तु सोदर: ॥*॥ ततश्च संसृष्टिनस्तु संसृष्टीत्येतद्वचनं तुल्यरूपसम्बन्धिसंसर्गकृतविशेषप्रतिपत्त्यर्थं तेन सोदराणां सापत्नानां भ्रातृपुत्राणां पितृव्याणां तुल्यानां सद्भावे संसर्गी गृह्णीयात् वाक्यादविशेषश्रुते:। पूर्ववचने सर्व्वेषामेव प्रकृतत्वात् सर्व्वेषु चाक्षेपासम्भवात्। अतो न भ्रातृमात्रविषयमिदं वचनमिति जीमूतवाहन: ॥ सोदरे त्वसंसृष्टिनि संसृष्टिन्यसोदरे च सति कतरस्तावत् गृह्णीयात्। एवंसोदरासोदरयो: संसृष्टयो: सद्भावे कतर इत्यत्र प्रथमत आह अन्योदर्य्यस्त्विति। अन्योदर्य्य: पुन: संसृष्टी सन् गृह्णीयात् नान्योदर्य्यमात्र: किन्तु असंसृष्टापि पूर्व्ववचनस्थसोदरपदानुषङ्गात् मात: सोदरश्च गृह्णीयात्। तेन एकत्र विषये पूर्व्ववचनोक्तसंसृष्टत्वसोदरत्वयोरेकधर्म्मतुल्यत्वादुभयोर्विभज्य ग्रहणम्। तदुभयसत्त्वे च असोदर्य्यस्य संसृष्टिनोऽतुल्यरूपत्वात् नेति। द्वितीये आह संसृष्टो नान्यमातृज इति। सोदरे संसृष्टिनि सति अन्यमातृज: संसृष्टोऽपि न गृह्णीयात्। अर्थात्तत्र संसृष्टी सोदर एव गृह्णीयात्। संसृष्टत्वाविशेषेऽपि सोदरत्वेन तस्य बलवत्त्वात्। दायभागकारास्तु अन्योदर्य्यस्तु संसृष्टी सन् सत्यपि सोदरेऽसंसृष्टिनि धन हरेत् नान्योदर्य्य: संसृष्टोऽपि गृह्णीयादिति पूर्व्वार्द्धस्यार्थ:। तत्र किं सोदरस्तदानीं न गृह्णीयादेवेत्यपेक्षायामुत्तरार्द्धेनोक्तं असंसृष्टोऽपि चादद्यात् सोदर इत्यनुषज्यते न संसृष्टोऽन्यमातृज: केवल:। किन्तु उभाभ्यामेव विभज्य ग्रहीतव्यमित्याहु:। *मिताक्षरादयोऽप्येवम्।* याज्ञवल्क्यदीपकलिकाया शूलपाणिमहामहोपाध्यायस्तु। अन्योदर्य्यस्तु संसृष्टी नान्योदर्य्यो धन हरेत्। असंसृष्ट्यपि सोदर एव गृह्णीयात् न तु संसृष्ट: सापत्नो भ्राता। संसृष्ट इति असंसृष्ट: सोदर इति केचित्। नान्योदर्य्यो धन हरेत् इति पाठे अन्योदर्य्य: सन् धनं न गृह्णीयात् इति व्याख्या असंसृष्टसोदरस्याधिकारार्थमिदं वचनमतो न पुनरुक्तिरित्याहु:। रत्नाकरप्रभृतयस्तु कल्पतरौ नान्योदर्य्यधनं हरेदिति पाठो दृश्यते स मूलभूतयाज्ञवल्क्यमिताक्षरापारिजातहलायुधग्रन्थेषु नान्योदर्य्यो धनं हरेदिति पाठदर्शनात् तदनुसारव्याख्यादर्शनाच्च लिपिकरप्रमाद इत्याहु:। इति दायतत्त्वम् ॥

संसृष्टत्वं, क्ली. (संसृष्ट+त्व।) संसृष्टस्य भाव:। यथा। तेन एकत्र विषये पूर्व्ववचनोक्तसंसृष्टत्वसोदरत्वयोरेकधर्म्मतुल्यत्वादुभयोर्विभज्य ग्रहणम्। इति दायतत्त्वम् ॥

संसृष्टी, [न्] पुं, संसृष्टं संसृष्टत्वमस्यास्तीति। इनि:।) संसृष्टत्वविशिष्ट:। यथा, याज्ञवल्क्य: ॥

"संसृष्टिनन्तु संसृष्टी सोदरस्य तु सोदर:।
दद्याच्चापहरेदंशं जातस्य च मृतस्य च ॥
अन्योदर्य्यस्तु संसृष्टी नान्योदर्य्यो धनं हरेत्।
असंसृष्टोऽपि चादद्यात् संसृष्टो नान्यमातृज: ॥"
इति दायतत्त्वम् ॥

संस्कार:, पुं, (सं+कृ+घञ्।) प्रतियत्न:। अनुभव:। मानसकर्म्म इति मेदिनी ॥ न्यायमते गुणविशेष:। स च त्रिविध:। वेगाख्यसंस्कार: १ अयं मूर्त्तपदार्थस्थायी। क्वचिद्वेगजन्य: क्वचित्कर्म्मजन्यश्च। स्थितिस्थापकसंस्कार: २ अयं पृथिवीगुण: केषाञ्चिन्मते पृथिव्यादिचतु:पदार्थगुण:। अयं अतीन्द्रिय: स्पन्दनकारणञ्च। भावनाख्यसंस्कार: ३ अयं आत्मन: अतीन्द्रियगुण:। उपेक्षानात्मकनिश्चयजन्य:। अथ स्मरणप्रत्यभिज्ञयो: कारणञ्च ॥*॥ अस्य प्रमाणम्।

"संस्कारभेदो वेगोऽथ स्थितिस्थापकभावने।
मूर्त्तमात्रे तु वेग: स्यात् कर्म्मजो वेगज: क्वचित् ॥
स्थितिस्थापकसंस्कार: क्षितौ केचिच्चतुर्ष्वपि।
अतीन्द्रियः स विज्ञेय: क्वचित् स्पन्देऽपि कारणम् ॥
भावनाख्यस्तु संस्कारो जीववृत्तिरतीन्द्रिय:।
उपेक्षानात्मकस्तस्य निश्चय: कारणं भवेत् ॥
स्मरणे प्रत्यभिज्ञायामप्यसौ हेतुरुच्यते ॥"
इति भाषापरिच्छेद: ॥*॥

शुद्धि: अदृष्टविशेषजनककर्म्म। यथा। यदाग्निस्थापनान्तरं कर्म्मकाले हट्टादिमद्भया संस्कृताग्निरन्यत्रानीयते तदा पुनर्भूसंस्कार: कर्त्तव्य:। संमृज्य उपलिप्य उल्लिख्य उद्धृत्य अभ्युक्षयेत् एष संस्कारोऽनुगतोऽग्नौ भूय:। इति गृह्यान्तरात्। इति संस्कारतत्त्वम् ॥*॥ दशविधसंस्कारा यथा। विवाह: १ गर्भाधानम् २ पुंसवनम् ३ सीमन्तोन्नयनम् ४ जातकर्म्म ५ नामकरणम् ६ अन्नप्राशनम् ७ चूडाकरणम् ८ उपनयनम् ९ समावर्त्तनम् १०। यथा हारीत:। गर्भाधानवदुपेतो ब्रह्मगर्भं सन्दधाति पुंसवनात् पुंसीकरोति फलस्थापनात् मातापितृजं पाप्मानमपोहति रेतोरक्तगर्भोपघात: पञ्चगुणो जातकर्म्मणा प्रथममपोहति नामकरणेन द्वितीयं प्राशनेन तृतीयं चूडाकरणेन चतुर्थं स्नापनेन पञ्चमं एतैरष्टाभि: संस्कारैर्गर्भोपघातात् पूतो भवतीति। स्नानमत्र समावर्त्तनरूपमिति कल्पतरु:। इति संस्कारतत्त्वम् ॥*॥ याज्ञवल्क्य:।

"गर्भाधानमृतौ पुंस: सवनं स्पन्दनात् पुरा।
षष्ठेऽष्टमे वा सीमन्त: प्रसवे जातकर्म्म च ॥
अहन्येकादशे नाम चतुर्थे मासि निष्क्रम:।
षष्ठेऽन्नप्राशनं मासि चूडा कार्य्या यथाकुलम् ॥
एवमेन: शमं याति बीजगर्भसमुद्भवम् ॥"
इति मलमासतत्त्वम् ॥*॥

संस्कृतानामधिकारमाह याज्ञवल्क्य:।
"असंस्कृतास्तु संस्कार्य्या भ्रातृभि: पूर्व्वसंस्कृतै:
भगिन्यश्च निजादंशाद्दत्त्वांशन्तु
असंस्कृता भ्रातरो ...
...नीतै:। ...
दायतत्त्वम् ॥ एषां विवरणं गरुडपुराणोक्तसंस्कारास्तवे ९३ अध्यायेषु द्रष्टव्या: ॥*॥

अथ जीर्णदेवगृहादिसंस्कारफलम्।
"अथ चेज्जीर्णसंस्कारविधि: पुण्यो ...
...
मूलाद्दशगुणं पुण्यं जीर्णसं...
तस्मादनाथजीर्णेषु कार्य्यं संस्करणं मुने।
स्वकीयं परकीयं वा यथाविभवविस्तरै:।
स्वतो वा परतो वापि यस्तु संस्कुरुते
स यावच्चन्द्रसूर्य्यौ गोस्तावत्कालं सुखी

लोकेषु तेषु देवानां विरजस्केषु हृष्टधी:।
यथा गोमेधयज्ञेषु पशुरोमसमा: समा:।
वसते ...
अनाथा वा सनाथा वा पूजनीया: सदा
इति देवीपुराणे ...

संस्कारज:, त्रि, संस्कारेण जात:। शब्दपूर्व्वकजनधातोर्डप्रत्ययेन निष्पन्न:।

संस्कारवर्ज्जित:, पुं, (संस्कारेण ज्ञान।) नयनसंस्कारहीन:। तत्पर्य्याय ... इति हेमचन्द्र: ॥ दशसंस्कारहीने, त्रि।

संस्कारहीन:, पुं, (संस्कारहीन।) इत्यमर: ॥ संस्कारहीनत्वकालमाह
"पतिता यस्य सावित्री ...
ब्राह्मणस्य विशेषेण तथा राजन्यवैश्ययो:।
प्रायश्चित्तं भवेदेषां प्रोवाच वदतां वर:"
तथा मार्कण्डेय:।
"विप्रस्य षोडशाद्वर्षात् राज्ञो द्वाविंशत:
...
विष्णुधर्म्मोत्तरे।
'षोडशाब्दा हि विप्रस्य राजन्यस्य द्वि...
...
विंशति: सचतुर्थी च वैश्यस्य परि...
सावित्री नातिरिच्येत अत ऊर्द्ध्वं ...
इति ...

संस्कृतं, क्ली, (सं+कृ+क्त:।) लक्षणं इति मेदिनी ॥ ...
उपेत उपगतो लक्षणोपेत: साधुशब्द:।
भरटीकायां भरत: ॥ स तु देववाणी।
"गीर्व्वाणवाणीवदनं मुकुन्द-
संकीर्त्तनञ्चेत्युभयं हि श्रेष्ठं।
सुदुर्लभं तच्च न मुग्धबोधा-
न्न लभ्यतेऽत: पठनीयमेतत् ॥"
इति ...

संस्कृत:, त्रि, (सं+कृ+क्त:।) कृत्रिम:। अमर: ॥ करणेन निर्वृत्त: कृत्रिमो घटादि: इति भरत: ॥ पक्व:। स्वतो गुणान्तराधान...

पुं, (कण्टकेन सह वर्त्तमानः।)
ति शब्दचन्द्रिका॥ करञ्जविशेषः।
ाला॥ नाटाकरञ्ज इति भाषा॥
, त्रि। यथा,—
समायुक्तसकण्टकदलान्वित।
ामार्गं भ्राम्यमाणः पुनः पुनः॥"
इति तिथ्यादितत्त्वम्॥
ते च त्रि। यथा, कथासरित्-
१। २२०।
स्निकसर्पभीतेरिव सकण्टकैः।
मालिङ्ग्य मुमुदे भूपतिश्चिरम्॥")
स्तयुक्तः। राजत्वविशिष्टः। शुण्ड-
करणविशिष्टः। करेण सह वर्त्तते
ति बहुव्रीहिसमासनिष्पन्नः॥
त्रि, (करुणया सह वर्त्तमानः।)
। सदयः। यथा,—
वं दासे मयि वितर दृष्टिं सकरुणा-
तुं वाञ्छन् कथयति भवानि त्वमिति
यः।
स्मै दिशसि निजसायुज्यपदवीं
न्द्रस्फुटमुकुटनीराजितपदाम्॥"
इत्यानन्दलहरी॥
, (कर्णाभ्यां सह वर्त्तमानः।)श्रवण-
तत्पर्य्यायः। श्रुतितत्परः २। इति
॥ कर्णयुक्तश्च॥
पुं, (कर्म्मणा सह वर्त्तमानः। कप्।)
ातुः। कर्म्मान्वयिक्रियार्थकः। यथा।
कर्म्मकाद्धातोर्भावेऽपि क्रियाव्यामि-
या। कां दिशं गन्तव्यम्। इति मुग्ध-
ायां दुर्गादासः॥ (कर्म्मयुक्ते, त्रि।
गवते। ५। २०। ३२।
एवा भगवन्तं ब्रह्मरूपिणं सकर्म्मकेण
ाधयन्ति॥" "सकर्म्मकेण ब्रह्मसालो-
धनेन।" इति तट्टीका॥)
, (कलया सह वर्त्तमानम्।) सम-
त्पर्य्यायः। समम् २ सर्व्वम् ३ विश्वम् ४
। कृत्स्नम् ६ समस्तम् ७ निखिलम् ८
९ निःशेषम् १० समग्रम् ११ पूर्णम् १२
१३ अनूनकम् १४।" इत्यमरः॥
१५। इति शब्दरत्नावली॥ (यथा,
। ४। २८। ४।
विश्य सभयं प्रार्दयन् सकलां पुरीम्॥"
तिस्तया सह वर्त्तते इति। सगुणम्।
भारते। १३। ११। ८।
सकलं ब्रह्म निर्गुणं गुणगोचरम्॥")
, (कामेन सह वर्त्तमान इति।)
मिष्टः। यथा,—
या सकामो या यत्र क्वापि दर्शिते
दुःखानि माघमासो न पश्यति॥"
इति तिथ्यादितत्त्वम्॥
काशः, प्रकाशस्तेन सह वर्त्तते इति।)
यथा,—

"देवि दैत्येश्वरः शुम्भस्त्रैलोक्ये परमेश्वरः।
दूतोऽहं प्रेषितस्तेन त्वत्सकाशमिहागतः॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम्॥
काम्ययुक्ते, त्रि॥
सकुरुण्डः, पुं, साकुरुण्डवृक्षः। इति राज-
निर्घण्टः॥
सकुलः, पुं, (कुलेन सह वर्त्तते इति।) शकुल-
मत्स्यः। इति शब्दरत्नावली॥
सकुल्यः, त्रि, (समाने कुले भवः। यत्।)
सगोत्रः। यथा,—
"ज्ञातिर्बन्धुः सगोत्रास्तु स्वजनज्ञातिबान्धवाः।
सकुल्यबन्धुदायादस्वसमानोदका अपि॥"
इति जटाधरः॥ *॥
स्वावध्यूर्द्ध्वतनाष्टमावधिदशमपुरुषपर्य्यन्तपुरुष-
त्रयम्। तेषां दशमपुरुषपर्य्यन्तसन्ततिः। स्वाव-
ध्यधस्तनाष्टमावधिदशमपुरुषपर्य्यन्तसन्ततिश्च।
तेषामशौचं यथा, बृहस्पतिः।
"दशाहेन सपिण्डास्तु शुध्यन्ति प्रेतसूतके।
त्रिरात्रेण सकुल्यास्तु स्नात्वा शुध्यन्ति
गोत्रजाः॥"
इति शुद्धितत्त्वम्॥ *॥
दायाधिकारिसकुल्यास्तु पञ्चमपुरुषावधयः।
यथा। बौधायनः। प्रपितामहः पितामहः
पिता स्वयं सोदर्य्यभ्रातरः सवर्णायाः पुत्त्रः
पौत्त्रः प्रपौत्त्रो वा एतानविभक्तदायादान्
सपिण्डान् आचक्षते। विभक्तदायादान् सकु-
ल्यान् आचक्षते सत्स्वङ्गजेषु तद्गामी ह्यर्थो भव-
तीति। इति दायतत्त्वं शुद्धितत्त्वञ्च॥*॥ तस्य
कन्यादानाधिकारित्वं यथा। विष्णुः। पिता
पितामहो भ्राता सकुल्यो मातामहो माता
चेति कन्याप्रदः पूर्व्वनाशे प्रकृतिस्थः परः
परः। नारदश्च।
"पिता दद्यात् स्वयं कन्यां भ्राता वानुमतः पितुः
मातामहो मातुलश्च सकुल्यो बान्धवस्तथा॥
माता त्वभावे सर्व्वेषां प्रकृतौ यदि वर्त्तते।
तस्यामप्रकृतिस्थायां कन्यां दद्युः स्वजातयः॥"
इत्युद्वाहतत्त्वम्॥
सकुली, स्त्री, मत्स्यविशेषः। अस्या गुणादि-
स्तालव्यशकारादिशकुलशब्दे द्रष्टव्यः॥
सकृत्, व्य, (एक + "एकस्य सकृच्च।" ५।४।१९।
इति सुच् सकृदादेशश्च। संयोगान्तेति सुचो
लोपः।) एकवारम्। (यथा,—
"सकृदंशो निपतति सकृत् कन्या प्रदीयते।
सकृदाह ददानीति त्रीण्येतानि सकृत् सकृत्॥"
इति महाभारतम्॥)
सह। इत्यमरः॥ विष्ठा। इति तट्टीका॥
(एतदर्थे तालव्यशकारस्य प्रयोगः प्रायशो
दृश्यते॥)
सकृत्प्रजः, पुं, (सकृत् प्रजा यस्य।) काकः।
इत्यमरः॥ ज्ञातैकमात्रापत्ये, त्रि॥
सकृत्फला, स्त्री, (सकृत् फलानि यस्याः।)
कदली। इति राजनिर्घण्टः॥

सकृद्गर्भः, पुं, (सकृत् गर्भो यस्य।) खेसरः।
इति राजनिर्घण्टः॥ एकमात्रगर्भिण्यां, स्त्री॥
सकृद्वीरः, पुं, (सकृत् वीर इव।) एकवीरवृक्षः।
इति राजनिर्घण्टः॥
सक्तः, त्रि, (सन्ज + क्तः।) अविरतः। इति
हेमचन्द्रः॥ आसक्तः॥ (यथा, रामायणे।
६। ४। ११८।
"अन्योन्यै राहताः सक्ता सस्वनुर्भीमनिःस्वनाः
ऊर्म्मयः सिन्धुराजस्य महाभेर्य्य इवाहवे॥")
सक्तिः, स्त्री, सङ्गः। सन्जधातोः क्तिप्रत्ययेन
निष्पन्ना॥ (यथा, किराते। ५। ४६।
"सक्तिं जवादपनयत्यनिले लतानां
वैरोचनैर्द्विगुणिताः सहसा मयूखैः।
रोधोभुवां मुहुरमुत्र हिरण्मयीनां
भासस्तडिद्विलसितानि विडम्बयन्ति॥")
सक्तुः, पुं, (सच्यते सिच्यते इति। सच सेचने +
"सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन्।" उणा० १।७०।
इति तुन्।) भृष्टयवादिचूर्णः। छातु इति
भाषा। यथा,—
"भृष्टा यवाः पुनर्धाना धानाचूर्णन्तु सक्तवः॥"
इति हेमचन्द्रः॥
अस्य गुणादिः तालव्यादिशक्तुशब्दे द्रष्टव्यः॥
(यथा, कथासरित्सागरे। ४। १७२।
"एकः शरावः सक्तुनामिकः प्रत्यहमम्भसः।
शकटालस्य तत्रान्तः सपुत्त्रस्य न्यधीयत॥"
अर्द्धर्चादित्वात् क्लीबलिङ्गेऽपि दृश्यते। प्रायशो
ऽयं शब्दः बहुवचने प्रयुज्यते॥)
सक्तुकः, पुं, (सक्तुरिव। कन्।) विषभेदः।
इति हेमचन्द्रः॥ स्वार्थे के सक्तुश्च॥
सक्तुफला, स्त्री, (सक्तव इव फलानि यस्याः।
अजादित्वात् टाप्।) शमीवृक्षः। इत्यमरः॥
सक्तुफली, स्त्री, (सक्तव इव फलानि यस्याः।
ङीप्।) शमीवृक्षः। इति शब्दरत्नावली॥
सक्थि, [न्] क्ली, (सज्यते इति। षन्ज सङ्गे +
"असिसञ्जिभ्यां क्थिन्।" उणा० ३। १५४।
क्थिन्।) ऊरुः। इत्यमरः॥ (यथा, मार्क-
ण्डेये। १८। ४८।
"नृणां पदे स्थिता लक्ष्मीर्निलयं संप्रयच्छति।
सक्थ्नोश्च संस्थिता वस्त्रं तथा नानाविधं वसु॥"
शकटावयवविशेषः। इत्युणादिकोषः॥
सक्षमः, त्रि, क्षमताविशिष्टः। क्षमाविशिष्टः।
क्षमेण क्षमया वा सह वर्त्तमानः। इति बहु-
व्रीहिनिष्पन्नः॥
सक्षारः, त्रि, लवणयुक्तः। क्षारेण सह वर्त्तमानः
इति बहुव्रीहिसमासनिष्पन्नः। (यथा, सुश्रुते।
१। ४५।
"वातश्लेष्मघ्नं वाप्यं सक्षारं कटुविपाकम्॥")
सखा, [इ] पुं, (समानं ख्यायते इति। समान +
ख्या + "समाने ख्यः स चोदात्तः।" उणा०
४। १३६। इति इण्। टिलोपश्चोदात्तः। समा-
नस्य सभावश्च।) मित्त्रम्। सुहृद्। समान-
ख्यानमस्त्यस्येति वा। अर्श आदित्वात्

सल्लिमः, पुं, मृदङ्गः। खाँड़ागि इति भाषा। यथा,—

"पायमं लवराक्कार्णं देशाषोगि च येगि वै।
भुक्तानि येरसंस्कृत्य तेषामन्यागि पापिनाम्॥
निपातितानां भूपृष्ठे उद्धृतानि निरीक्षताम्।
सल्लिभैरपत्रचन्मे शरैयान्त्यैव घातत:॥"

इति मार्कण्डेयपुराणे १४ अध्याय:॥

सण्डीनं, क्लो, खगगतिक्रिया। इत्यमरः॥ खगानां पक्षिणां गतौ स्थानान्तरसञ्चारे एताः क्रियाः स्यापारा:। काम्ता। इत्याद प्रथमडीनं उड्डयनाय क्रमवन्ध:। तदं डीनं उड्डीनं नियहमनम्। सन्तं डीनं सण्डीनं इत्यादौ पतनमिति। पृथक् पृथक् पक्षिगतिक्रियासु प्रडीनं मङ्गलगमनमित्यन्ये। धी डी ङ य गतौ डोङ च कमोदमो भावे क्तः मुन्यादीदिति सतम्। इति भरत:॥

सतत, क्लो, (सतन्दमिति। सं + तन + क्तः। सतो वा हितन्तयोरिति पक्षे मलोपः।) निरन्तरम्। नहति, त्रि। इत्यमरः॥ तत्पर्यायः अनारतमन्द्र निरक्तन्द्र च द्रष्टव्यः। यथा च। "सतने स्तनवलनानादरनामास्नमन्तनम्। [illegible]॥"

इति जटाधरः॥

(यथा, मनुः १। ११।
"[illegible]
[illegible]॥")

सततं, क्लो, सदार्य। इति हेमचन्द्रः।१।१।१३

सतकं, त्रि, [illegible]। सावधान। इति कोषान्तरम्॥

[illegible] सौनकर्मनिरत:। [illegible] पुरोहित। इति शब्दरत्नावली॥

सति:, स्त्री, (सन दाने + क्तिन्। "जन सिनि [illegible]" [illegible]।) दानम्। अवसानम्। इति मेदिनी। [illegible]

सती, स्त्री, (सत्+ङीप्। [illegible]) दुर्गा। साध्वी। इति मेदिनी। (यथा, कुमारे। १। २१।
"[illegible] सती [illegible]
सा जन्मने शैलवधूं प्रपेदे॥")
[illegible]। इति हेमचन्द्रः। दाक्षायणी। [illegible]

देव्युवाच।
"[illegible]
[illegible]॥
[illegible]
[illegible]॥
[illegible]
[illegible]
[illegible]"

गोमन्ते गोमती नाम मन्दरे कामचारिणी॥
मदोत्कटा चैत्ररथे जयन्ती हस्तिनापुरे।
कान्यकुब्जे तथा गौरी रम्भा मलयपर्व्वते॥
एकाम्रके कीर्त्तिमती विश्वा विश्वेश्वरे विदुः।
पुष्करे पुरुहूतेति केदारे मार्गदायिनी॥
नन्दा हिमवतः पृष्ठे गोकर्णे भद्रकर्णिका।
स्थानेश्वरे भवानी तु बिल्वके बिल्वपत्रिका॥
श्रीशैले माधवी नाम भद्रा भद्रेश्वरे तथा।
जया वराहशैले तु कमला कमलालये॥
रुद्रकोट्यान्तु रुद्राणी काली कालञ्जरे तथा।
महालिङ्गे तु कपिला माकोटे कामलेश्वरी॥"
अत्र कपिलाम्बरा इति च पाठः।
"शालग्रामे महादेवी शिवलिङ्गे जलप्रिया।
मायापूर्य्यां कुमारी तु सन्ताने ललिता तथा॥
उत्पलाक्षी सहस्राक्षे हिरण्याक्षे महोत्पला।
गयायां मङ्गला नाम विमला पुरुषोत्तमे॥
विपाशायाममोघाक्षी पाटला पुण्ड्रवर्द्धने।
नारायणी सुपार्श्वे तु त्रिकूटे रुद्रसुन्दरी॥
विपुले विपुला नाम कल्याणी मलयाचले।
कोटवी कोटितीर्थेषु सुगन्धा माधवे वने॥
गोदाश्रमे त्रिसन्ध्या तु गङ्गाद्वारे रतिप्रिया।
शिवकुण्डे शिवानन्दा नन्दिनी देविकातटे॥
रुक्मिणी द्वारवत्यान्तु राधा वृन्दावने वने।
देवकी मथुरायान्तु पाताले परमेश्वरी॥
चित्रकूटे तथा सीता विन्ध्ये विन्ध्याधिवासिनी।
सह्याद्रावेकवीरा तु हरिश्चन्द्रे तु चन्द्रिका॥
रमणा रामतीर्थे तु यमुनायां मृगावती।
करवीरे महालक्ष्मीरुमादेवी विनायके॥
अरोगा वैद्यनाथे तु महाकाले महेश्वरी।
अभयेत्युष्णतीर्थे तु अमृता विन्ध्यकन्दरे॥"
उष्णतीर्थेऽत्र अमृततीर्थेति च पाठः।
"माण्डव्ये माण्डवी नाम स्वाहा माहेश्वरे पुरे।
छगलाण्डे प्रचण्डा तु चण्डिकामरकण्टके॥
सोमेश्वरे वरारोहा प्रभासे पुष्करावती।
देवमाता सरस्वत्यां पारा पारातटे मता॥
महालये महाभागा पयोष्णी पिङ्गलेश्वरी।
सिंहिका कृतशौचे तु कार्त्तिके तु शङ्करी॥
उत्पलावर्त्तके लोला सुभद्रा शोणसङ्गमे।
माता सिद्धवने लक्ष्मीरनङ्गा भरताश्रमे॥
जालन्धरे विश्वमुखी तारा किष्किन्धपर्व्वते।
देवदारुवने पुष्टिर्मेधा काश्मीरमण्डले॥
भीमादेवी हिमाद्रौ च पुष्टिर्वस्त्रेश्वरे तथा।
कपालमोचने शुद्धिर्माता [illegible]
[illegible] ॥
[illegible]
[illegible]
[illegible]"

सूर्य्यबिम्बे प्रभा नाम मातॄणां [illegible]
अरुन्धती सतीनान्तु रामासु च [illegible]
चित्ते ब्रह्मकला नाम शक्तिः [illegible]
एतदुद्देशतः प्रोक्तं नामाष्टशतमुत्तमम्।
अष्टोत्तरञ्च तीर्थानां शतमेतदुदाहृतम्।
यः पठेच्छृणुयाद्वापि सर्व्वपापैः प्रमुच्यते।
एषु तीर्थेषु यः कृत्वा स्नानं पश्यति [illegible]
सर्व्वपापविनिर्म्मुक्तः कल्पं शिवपुरे वसेत्।
यस्तु मत्परमः कालं करोत्येतेषु मानवः
स भित्त्वा ब्रह्मसदनं पदमभ्येति [illegible]
नामाष्टशतकं यस्तु श्रावयेच्छिवसन्निधौ
तृतीयायामथाष्टम्यां बहुपुत्रो भवेत्तदा।
गोदाने श्राद्धकाले वा अहन्यहनि वा पुनः
देवार्च्चनविधौ विद्वान् [illegible]
एवं वदन्ती सा तत्र ददाह [illegible]
स्वायम्भुवेऽपि काले च [illegible]
पार्व्वती सा भवद्देवी शिवदेहार्द्धधारिणी।
मेनागर्भसमुत्पन्ना भुक्तिमुक्तिफलप्रदा।
अरुन्धती जपन्त्येतत्प्राप्ता योगमुत्तमम्।
पुरूरवाश्च राजर्षिर्लोकेष्वजयतामगात्।
ययातिः पुत्रलाभन्तु धनलाभन्तु भार्गवः
तथान्ये देवदैत्याश्च ब्राह्मणाः
वैश्याः शूद्राश्च बहवः सिद्धिमीयुर्यथेप्सिताम्
यत्रैतल्लिखितं तिष्ठेत् पूज्यते देवसन्निधौ
न तत्र शोकदौर्गत्यं कदाचिदपि जायते।

इति मत्स्यपुराणे १३ अध्यायः॥

सावित्री। यथा,—

यम उवाच।
"सावित्रीवरदानेन त्वं सावित्रीव्रता [illegible]
प्राप्ता पुरा भूभृता च तपसा तत्समा [illegible]
यथा श्रीः श्रीपतेः क्रोड़े भवानीव भवो[illegible]
सौभाग्या सुप्रिया त्वञ्च भव सत्यवति [illegible]
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २४ अध्यायः॥

विद्यमाना। (यथा,—
"तथा समक्षं दहता मनोभवं
पिनाकिना भग्नमनोरथा सती।
निनिन्द रूपं हृदयेन पार्व्वती
प्रियेषु सौभाग्यफला हि चारुता॥"
इति कुमारसम्भवे। ५। १॥)

सतीनः, पुं, वंशः। इति शब्दमाला॥ कलायः। इत्यमरटीकायां भरतः॥ (यथा, सुश्रुते। "हरेणु सतीनाश्च निष्पावाः [illegible]")
क्लो, जलम्। इति निघण्टुः। १। १२॥

सतीनकः, पुं, (सतीन एव। स्वार्थे कन्।) कलायः। इत्यमरटीका॥

सतीर्थः, पुं, (समानस्तीर्थो गुरुर्यस्य। [illegible]) एकगुरुशिष्यः। इति [illegible]

[illegible], पुं, (समाने तीर्थे वासी [illegible] यत्। [illegible]।) [illegible] इति [illegible]
[illegible]। इति अमरः॥ [illegible]

[illegible] निष्पीडितः कलोत्कटः । [illegible]
[illegible] सर्वस्मिन् सर्वत्रोक्तः । तदर्थादिति च ।
[illegible] इति भरतः ॥ अपि च ।
[illegible] सतीनः कलायोऽपि [illegible] ।"
इति शब्दरत्नावली ॥

सतीनः, पुं, वंशः । इति हारावली ॥ कलायः । इत्यमरटीकायां भरतधृतः ।("सतीन सतीनक इत्यर्थे लिङ्गेन सह वर्त्तते इति । निपातनादि-कारस्य दीर्घः ।" इति भरतः ॥ कलायः । यथा, "कलायस्त्रिपुटः प्रोक्तः सतीनो वर्त्तुलो मतः ।" इति भावप्रकाशः ॥

सतीनकः, पुं, (सतीन एव । स्वार्थे कन् ।) कलायः । यथा,—
"कलायस्तु सतीनकः हरेणुखण्डिकौ चास्मिन्" इत्यमरः ॥
"चत्वारि कलाये । सटर इति ख्याते । कलाय-शब्दो विशेषे सामान्ये च वर्त्तते सामान्यकलाय इत्यादिप्रयोगः । कलेन भुज्यते कलायः । कट भक्षणे सातीति स्वाय: सर्वोपाधिलात् कर्म्मः । [illegible] लिङ्गेन सह वर्त्तते सतीनः निपातनादिकारस्य दीर्घः स्वार्थे कः सतीनकः इत्यादिः । [illegible] एति सतो वा हरेणुः सातीति खण्डः । खण्डयति विदारयति खण्डिका: पूर्व्वेण इयः ।
"कलायस्त्रिपुटः प्रोक्तः सतीनो वर्त्तुलो मतः ।
हरेणुः खण्डिका च्छेया——————
इति तु ख्यादिः ।" इति भरतः ॥

सतीला, स्त्री, कलायविशेषः । तेपोड़ा इति भाषा । यथा । सतीला निष्टिका तिपुटीति शब्दचन्द्रिका ॥

सतुषं, क्ली, (तुषेण सह वर्त्तमानम् ।) तुषयुक्त-शस्यम् । धान्यम् । यथा,—
"शस्य छिवगतं प्राहुः सतुषं धान्यमुच्यते ।
आमं वितुषमित्युक्तं स्विन्नमन्नमुदाहृतम् ॥"
इति श्राद्धतत्त्वम् ॥

सतृष्, [ष्] त्रि, (तृषा सह वर्त्तमानः ।) तृष्णायुक्तः । तत्पर्य्यायः । तृषितः२ तृषितः३ । इति त्रिकाण्डशेषः ॥

सतेरः, पुं, तुषः । इति संक्षिप्तसारोणादिवृत्तिः ॥

सत्, क्ली, (अस्तीति । अस+शतृ) ब्रह्म । यथा । भगवद्गीतायाम् ।
"ओम् तत्सदिति निर्द्देशो ब्रह्मणस्त्रिविधः स्मृतः ।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥"
ओम् तत् सदिति त्रिविधो ब्रह्मणो जगदीश्वरस्य निर्द्देशोऽभिधानं ब्रह्मविद्भिश्चिन्तितम् । तत्र तावदोमितिब्रह्मेत्यादि श्रुतिप्रसिद्धेरोमिति ब्रह्मणो नाम । पातञ्जलिरप्याह तस्यैव वाचकः प्रणवः । तस्य ब्रह्मणः । ओमकारो भगवान् विष्णुरित्यादि तु वाच्यवाचकयोरभेदेन । तथा च । जगत्कारणत्वेन प्रसिद्धत्वाद्विदुषां परोक्षत्वाच्च तच्छब्दोऽपि ब्रह्मणो नाम । एवं पर-मार्थसत्त्वाप्रुत्पन्नलक्षणादिभिः सच्छब्दोऽपि शब्देन त्रिविधनिर्द्देशेन । यद्वा शब्दार्थं त्रिविधो निर्द्देशेन उपसर्गेण श्रब्राह्मणादयो निर्म्मिताः । ईदिदं कर्म्माणि तेषां प्रथमो निर्द्देशो यथा,—
"तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः ।
प्रवर्त्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम् ।"
यस्मादेवं ब्रह्मणो निर्द्देशस्तस्मादोमित्युदाहृत्य उच्चार्य्य कृता वेदवादिनां ब्रह्मवादिनां शास्त्रोक्ताः क्रियाः सततमङ्गवैकल्येऽपि प्रवर्त्तन्ते प्रकर्षेण वर्त्तन्ते सम्पूर्णा भवन्तीति भगवान् गड़राचार्य्य-चरणाः ॥
"तदित्यनभिसन्धाय फलं यज्ञतपःक्रियाः ।
दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः ॥"
तदिति ब्रह्मणोऽभिधानमुदाहृत्य इत्यनुषङ्गः । फलमनभिसन्धाय यज्ञाः क्रियन्ते मोक्षं तस्मात् फलाभिसन्धानं विना मुमुक्षुणा यज्ञं कर्त्तव्य-मित्यपि बोध्यम् ।
"सद्भावे साधुभावे च सदित्येतत् प्रयुज्यते ।
प्रशस्ते कर्म्मणि तथा सच्छब्दः पार्थ युज्यते ॥"
सतो विद्यमानत्वमपि उत्कृष्टचरिते च सदि-त्येतत् प्रयुज्यते । अतो यज्ञादौ कर्म्माणि प्रश-स्तः सच्छब्दः प्रयुज्यते । इत्येकादशीतत्त्वम् ॥

सत्, त्रि, (अस्तीति । अस+शतृ ।) सत्यम् । साधुः । (यथा, मुग्धबोधे ।
"रामं नमत मानन्दं धर्म्मनिमिनिविष्ट स सत् ।")
विद्यमानम् । (यथा, हितोपदेशे ।
"दुर्ज्जनः परिहर्त्तव्यो विद्ययालङ्कृतोऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयङ्करः ॥")
प्रशस्तम् । अभ्यर्हितम् । इत्यमरः ॥ धीरः । इति मेदिनी ॥

सत्कदम्बः, पुं, (सन् कदम्बः ।) केलिकदम्बः । यथा,—
"केलिकदम्बः सत्कदम्बो सर्जभूः शिशुपालकः ।"
इति शब्दचन्द्रिका ॥

सत्कर्त्ता, [र्त्तृ] पुं, (सतां कर्त्ता ।) विष्णुः । यथा । सत्कर्त्ता सत्कृतः साधुरिति तस्य सहस्रनामस्तोत्रम् ॥

सत्कर्म्म, [न्] क्ली, (सत् प्रशस्तं कर्म्म । वेद-विहितक्रिया । यथा । विष्णुपुराणे ।
"सत्कर्म्मयोग्यो न जनो नैवापः शौचकारणम्
यस्मिन्ननुदिते तस्मै नमो देवाय भास्वते ॥"
इति प्रायश्चित्ततत्त्वम् ॥

सत्काञ्चनारः, पुं, (सन् काञ्चनारः ।) रक्त-काञ्चनः । यथा,—
"कोविदारे चमरिकः कुद्दालो युगपत्रकः ।
सत्काञ्चनारः कामालुर्ह्रयवाहनगह्वरः ॥"
इति शब्दचन्द्रिका ॥

सत्काण्डः, पुं, चिल्लः । इति शब्दचन्द्रिका ॥

सत्कारः, पुं, (सत्करणमिति । सत्+कृ+घञ् ।) पूजा । यथा । एवम्भूताः सभासदः सभायां यथा मोदन्ति उपविशन्ति तथा दानमानसत्-कारै राज्ञा कर्त्तव्याः । इति व्यवहारतत्त्वम् ॥
(यथा, कुमारे । ६ । ५२ ।
"विविक्तवृत्तमल्पाहैः स्वयं सारोप्य दर्शितः ।
स तैराकलयामास गुरुत्वं गुरुपत्निभिः ॥"
उपचारविशेषः । यथा, मनुः । ३ । ५८ ।
"स्वधाभिर्नाः सदा पूज्या भूषणाच्छादनाशनैः ।
भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च ॥"
"सत्कारेषु कौमुद्यादिषु उत्सवेषु उपनयना-दिषु ।" इति तट्टीकायां कुल्लूकः ॥ ५९)
मदादौर्वादिक्रिया । इति लोकप्रसिद्धिः ॥)

सत्कुलीनः, पुं, (सत्कुले जातः । सत्कुल+खः । सत् प्रशस्तः कुलीन इति वा ।) सत्कुलोद्भवः । यथा,—
"सत्कुलीनाय शान्ताय वृत्तये दत्त्वा ज्ञित [illegible] ।
दद्यात् स्तोत्रमिदं पुण्यं सर्व्वकामफलप्रदम् ॥"
इति विनमात्रतन्त्रे चटुकभैरवस्तोत्रम् ॥

सत्कृतः, त्रि, (सत्+कृ+क्तः ।) पूजितः । कृत-सत्कारः । यथा,—
"तस्मौ कदिम्न सकान्त मुनिना तेन सत्-कृतः ।"
इति देवीमाहात्म्यम् ॥
(महादेवे, पुं । इति महाभारतम् । १३ । १७ । ११३ ॥)

सत्कृतिः, स्त्री, (सत्+कृ+क्तिन् ।) सत्कारः । सत्क्रियाशब्दार्थदर्शनात् ॥ (यथा, भागवते । २० । १५ । ४२ ।
"तामत्कृतिं समधिगम्य विवेश गोष्ठं
सव्रीड़हासविनयं यदपाङ्गमोक्षम् ॥"
पुं । विष्णुः । इति महाभारतम् । १३ । १४९ । ८८ ॥)

सत्क्रिया, स्त्री, (सती क्रिया ।) शवदाहादि-क्रिया । तत्पर्य्यायः । संस्क्रिया२ । इति त्रिका-ण्डशेषः ॥ संस्कारः ३ । इति शब्दरत्नावली ॥
यथा, महाभारते । १ । ४४ । ५ ।
"ततो नृपे तक्षकतेजसा हते
प्रयुज्य सर्व्वाः परलोकसत्क्रियाः ।
शुचिर्द्विजो राजपुरोहितस्तदा
तथैव ते तस्य नृपस्य मन्त्रिणः ॥"
परिष्कारः । यथा, रघुः । ११ । ३ ।
"यावदादिशति पार्थिवस्तयो-
र्निर्गमाय पुरमार्गसत्क्रियाम् ।
तावदाशु विदधे मरुत्सखैः
सा सपुष्पजलवर्षिभिर्घनैः ॥")
सम्मानम् । यथा, मनुः ।
"घटेऽपवर्ज्जिते ज्ञातिमध्यस्थो यवसं गवाम् ।
प्रदद्यात् प्रथमं गोभिः सत्कृतस्य हि सत्क्रिया ॥"
इति प्रायश्चित्ततत्त्वम् ॥

सत्तमः, त्रि, (अयमेषामतिशयेन सन् । सत्+तमप् ।) अतिशोभनः । इत्यमरः ॥ पूज्यतमः । साधीयान् । उत्तमः । इति मेदिनी ॥ (यथा, देवीभागवते । ११ । १६ । ३ ।
"तद्वदानपि वक्ष्यामि शृणु देवर्षिसत्तम ! ॥")

सत्ता, स्त्री, जातिविशेषः । इति भाषापरिच्छेदः ॥ (सतो भावः । सत्+तल् ।) विद्यमानता ।

यथा। यद्यपि पापस्य कार्य्यानन्वितत्वेन तत्-सत्तायामप्रामाण्यं प्रतिभाति। इति प्रायश्चित्ततत्त्वम् ॥ साधुता। सतो भाव इत्यर्थे सच्छब्दात् तप्रत्ययेन निष्पन्ना ॥

सत्त्रं, क्ली, (सतः साधून् त्रायते इति। त्रै+कः। यद्वा, सीदन्ति सज्जना यत्र। सद गतौ+ "गुधृवीपचिवचीति।" उणा० ४।१६६। इति त्रः।) यज्ञः। (यथा, मनुः। ८। ३०३।
"अभयस्य हि यो दाता संपूज्यः सततं नृपः। सत्त्रं हि वर्द्धते तस्य सदैवाभयदक्षिणम् ॥")
सदादानम्। आच्छादनम्। अरण्यम्। (यथा, किराते। १३। ८।
"अयमेव मृगव्यसत्त्रकामः
प्रहरिष्यन् मयि मायया समस्थे।
पृथुभिर्ध्वजिनीरवैरकार्षीत्
चकितोद्भ्रान्तमृगाणि काननानि ॥")
कैतवम् इति मेदिनी ॥ (यथा, महाभारते। ४। ३६। १८।
"सत्त्रेण नूनं छन्नं हि चरन्तं पार्थमर्जुनम्। उत्तरः सारथिं कृत्वा निर्य्यातो नगराद् बहिः ॥")
धनम्। गृहम्। दानम् सरोवरम्। इत्यनेकार्थकोषः ॥ यागविशेषः। यथा,—
"नैमिषेऽनिमिषक्षेत्रे ऋषयः शौनकादयः। सत्त्रं स्वर्गाय लोकाय सहस्रसममासत ॥
कलिमागतमाज्ञाय क्षेत्रेऽस्मिन् वैष्णवे वयम्। आसीना दीर्घसत्त्रेण कथायां सक्षणा हरेः ॥"
इति श्रीभागवते १ स्कन्धे १ अध्यायः ॥ * ॥
द्वादशाहसाध्यसत्त्रं यथा। ज्योतिष्टोमे द्वादशाहोदितदक्षिणाविभागः षोड़शर्त्त्विजां तद्विकृतौ-भूते सत्त्राख्ये द्वादशाहसाध्ये यजमानानां दीक्षदक्षोऽत्रादिदर्शनेन निर्णीयते। तत्र यावत्-साध्येन कर्त्तव्यम्। यथा,—
"सत्त्राख्यपाक्स्यान्तस्य पावनेन
मोक्षस्य यत् स्यादरपङ्गकं ।"
इति मलमासतत्त्वम् ॥ * ॥
सर्व्वदैव अन्नादिदानम्। तद्विवृतिः अन्नजलादि-विधिर्यथा,—
"आहर्त्तव्यसर्व्वविहिताद् वीरहीना तथा स्त्रियम्। देवतादिद्रव्यदानाद्यत्यभार्व्वादिनिन्दकं।
कृत्वा न कर्त्तव्यमाहाव्य यो हेतोर्नाशनेश्वलीकरणात् ॥"
इति मार्कण्डेयपुराणे सदाचाराध्यायः ॥
यत्र सर्व्वदैव अन्नादिदानम्। इति सन्तोषात् सत्त्र [न] सत्र, सत्त्व। इति शब्दरत्नावली जटाधरश्च ॥
सत्त्रशाला, स्त्री, (सत्त्रस्य शाला।) अन्नादिदान-गृहम्। सत्त्राशालः। प्रतिश्रयः २। इति हेमचन्द्रः ॥ (यथा, कथासरित्सागरे। २१। ५१।
"तत्र सा सत्त्रशालायां पटरिव तटिच्छुला। कथयाम् नास्मिन्कुञ्चिका ना कुलमर्दितमा।"
एषा व वर्ष। इत्यमरः॥

सत्राजित्, पुं, राजविशेषः। स तु यौवनाश्वस्य श्वशुरः। परे भल्लाटनगरे शशिध्वजराजो बभूव। इति कल्किपुराणे २७ अध्यायः ॥
सत्त्रिः, पुं, मेघः। हस्ती। जयशीले, त्रि। इत्युणादिकोषः ॥
सत्त्रिजातकं, क्ली, (सत् साधु त्रिजातकं तुम्बत्व-गेलापत्रादिकं यत्र।) व्यञ्जनविशेषः। यथा,—
"मांसं बहुघृते भृष्टं सिक्तं पौष्णाम्बुना मुहुः।
जीरकाद्यैः समायुक्तं परिमस्कं तदुच्यते।
तदेव घृततक्राढ्यं सदिच्छं सत्त्रिजातकम् ॥"
इति शब्दचन्द्रिका ॥
सत्त्री, [न्] पुं, (सत्त्रमस्यास्तीति। इनिः।) गृहपतिः। इत्यमरः॥ द्वे गृहस्थे। सत्त्रं सदा दानं विद्यतेऽस्य सत्त्री इन्। सदेस्त्रं सत्त्रं हितकारम्। सत्त्रमाच्छादने यज्ञे सदा दाने च कैतवे। इति विश्वः। गृहस्य पतिर्गृहपतिः। इति भरतः॥ नित्यप्रवृत्तान्नदानः। यथा विष्णुः। नाशौचं राज्ञां राजकर्म्मणि न व्रतिनां व्रते न सत्त्रिणां सत्त्रे न कारूणां स्वकर्म्मणि न राजाज्ञा-कारिणां तदिच्छया न देवप्रतिष्ठाविवाहयोः पूर्व्वसंहतयोः। इति। सत्त्रिणां नित्यप्रवृत्तान्न-दानानां सत्त्रेऽन्नदाने। इति शुद्धितत्त्वम् ॥ (यज्ञान्विते, त्रि। यथा,महाभारते।१४।७।३।
"सत्यमेतद्वरारोह स मां जानाति सत्त्रिणम्। कथयस्व तदेतन्मे क्व नु सम्प्रति नारदः ॥")
सत्त्वं, क्ली, (सतो भावः। सत्+त्व।) प्रकृति-गुणविशेषः। अत्र सत्त्वं प्रकाशकत्वात् सुख-हेतुः। सतो भावः सत्त्वम्। त्वतौ भावे इति त्वं निपातनादल्लोप इति केचित्। सत्त्वं हितकार मिति वक्ष्यः। इत्यमरभरतौ ॥ * ॥ (यथा, मनुः। १२। २४।
"सत्त्वं रजस्तमश्चैव त्रीन् विद्यादात्मनो गुणान्। यैर्व्याप्येमान् स्थितो भावान् महान् सर्व्वान-शेषतः ॥")
महाभारतमते सुखजनकगुणः। तस्य धर्म्माः। प्रमादः १ हर्षः २ प्रीतिः ३ असन्देहः ४ धृतिः ५ स्मृतिः ६। इति मोक्षधर्म्मः ॥ द्रव्यम्। असुः। (यथा, रामायणे। २। ६०। १।
"ततो भूतोपसृष्टेव वेपमाना पुनः पुनः। धरण्यां गतसत्त्वेव कौशल्या सूतमब्रवीत् ॥)"
व्यवसायः। इत्यमरः ॥ पिशाचादिः। (यथा, रामायणे। २। १२। १०।
"अथ नूनं दशरथः सत्त्वमाविश्य भाषते। न हि राजा प्रियं पुत्रं विवासयितुमर्हति ॥")
बलम्। (यथा, रघुः। ४। ७२।
"शमन तुल्यसत्त्वानां सैन्यघोषेऽप्यसम्भ्रमम्। गुहाशयानां सिंहानां परिवृत्यावलो-कितम् ॥")
आत्मा। (यथा, किराते। १२। १८।
"अथविदितमनुष्यमानवयो-
र्विनयस्य पश्यन् सत्त्वेऽभिभुज्यत: ॥")

आत्मा। चित्तम्। इति मेदिनी ॥ रत्नः इति धरणिः ॥ कुबेरः। इति धनम्। आत्मता। इति शब्दरत्नावली।
सत्त्वः, पुं, क्ली, (सत्त्वमस्त्यस्येति। अर्शआदित्वादच्।) जन्तुः। इत्यमरः ॥ (यथा, रघुः। २। ८।
"रक्षापदेशान्मुनिहोमधेनोः
वन्यान् विनेष्यन्निव दुष्टसत्त्वान् ॥")
सत्त्वता, स्त्री, सत्त्वस्य भावः। तप्रत्ययानन्तरं आप्प्रत्ययेन निष्पन्ना।
सत्त्वसम्पन्नः, त्रि, (सत्त्वं सम्पन्नः।) सत्त्वगुणः इति लोकप्रसिद्धिः ॥
सत्त्वस्थः, त्रि, (सत्त्वे तिष्ठतीति। स्था। कः।) सत्त्ववृत्तिशाली। सत्त्वप्रधानः। यथा,—
"ऊर्द्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः। जघन्यगुणवृत्तस्था अधो गच्छन्ति तामसाः ॥"
इति भगवद्गीतायाम्। १४। १८।
सत्पत्रं, क्ली, (सत् पत्रं यस्य।) पद्मस्य नवदलम्। इति शब्दचन्द्रिका ॥
सत्पथः, पुं, (सन् पन्थाः। टच्।) तत्पर्य्यायः। अतिपन्थाः २ सुपन्थाः ३ साध्वा ४। इत्यमरः ॥ सुपथः ५। इति रत्नावली ॥ (यथा, भागवते। ४। १२। ३८।
"ध्यानमगाततत्त्वाय।
कृपालोर्दीननाथस्य देवास्तस्यानु यान्ति ॥")
सत्पशुः, पुं, (सन् पशुः।) यज्ञीयपशुः। इति केचित् ॥ शोभनपशुश्च ॥
सत्पुत्त्रः, पुं, (सन् पुत्त्रः।) सत्पुत्र वेदादिविहितपित्रादिकार्य्यकर्त्ता। यथा—
"पुन्नाम्नो नरकाद्यस्मात् त्रायते पितरं सुतः। मुखसन्दर्शनेनापि तदुत्पत्तौ यतेत सः ॥"
इति पुत्रस्यापुत्रनरकनिस्ताराय ... समभ्ययति अस्ततत्त्वस्व विन्दति। इति ... पुत्रस्य जातस्य पश्येच्च जीवतो मुखम्। इति ... होमवापनयनाय च यत् पश्येदिति विधानं ...
मुखदर्शनं विनापि नरकनिस्तारकः। ...
विष्णुपुराणम्।
"सत्पुत्त्रेण तु जातेन वैनोऽपि त्रिदिवं ययौ। पुन्नाम्नो नरकात्त्रातः स तेन सुमहात्मना ॥"
ब्रह्मपुराणेऽपि।
"समुत्पन्नेन भो विप्राः सत्पुत्त्रेण महात्मना। त्रातः स पुरुषव्याघ्रः पुन्नाम्नो नरकात्तदा ॥"
इति शुद्धितत्त्वम्।
सत्पुरुषः, पुं, (सन् पुरुषः।) पुरुषमात्रपुरुष इति सत्त्विसाधारणमात्रपादः (यथा, रामायणे। २। ४८। ८।
"एकः सत्पुरुषो लोके लक्ष्मण सह सीतया। योऽनुगच्छति काकुत्स्थं राम परिचरन् वने ॥")
सत्प्रतिपक्षः, पुं, सतः साध्यस्य प्रतिपक्षः। इत्यनुमानम्। साधुसन्दूषकव्यभचारणम्। यथा,—
"समविलासमा अर्थता दायो लाभः ...

ोग: कर्म्मयोगश्च सत्प्रतिग्रह एव च ॥"
इति मानवे १० अध्यायः ॥
प्रतिपक्षः, पुं, (सन् प्रतिपक्षः ।) तुल्यव्यक्तिः ।
ेतियोगी । न्यायमते । साध्याभावव्याप्यवत्
ः । यथा । ह्रदो वह्निमान् धूमादित्यादौ
ाभाववाप्यवह्रदादिः । इति सत्प्रतिपक्ष-
यः । तल्लक्षणं यथा । साध्यविरोध्युपस्थापन-
र्यमानबलोपस्थित्या प्रतिरुद्धकार्य्यलिङ्गत्वं
त्वं वलञ्च व्याप्तिपक्षधर्म्मतौ विरोधिबोधका-
गमकतौपयिकरूपसम्पत्तिमत्तया न्याय-
ेनेन प्रतिरुद्धकार्य्यत्वं वा तत्त्वम् । इति
ेशोपाध्यायकृतचिन्तामणिः ॥
फलः, पुं, (सत् फलं यस्य ।) दाड़िमवृक्षः ।
ेति शब्दचन्द्रिका ॥ शोभनफलवद्वृक्ष ॥
ं, क्ली, (सते हितम् । सत् + यत् ।) कृतयुगम् ।
पथः । यथार्थम् । (यथा, रघुः । १२ । ७५ ।
ामं जीवति मे नाथ इति सा विजहौ
शुचम् ।
प्रत्वा सत्यमप्यान्तं जीवितास्मीति
लज्जिता ॥")
इति, त्रि । इति मेदिनी ॥ (यथा, याज्ञ-
ल्क्ये । ३ । १४८ ।
महाभूतानि सत्यानि यथात्मापि तथैव हि ॥")
रधान्तः । इति शब्दरत्नावली ॥*॥ यथार्थस्य
र्य्यायः । तथ्यम् २ ऋतम् ३ सम्यक् ४ । इत्य-
रः ॥ अवितथम् ५ भूतम् ६ । इति जटा-
रः ॥ तल्लक्षणम् । यथा,—
यथार्थकथनं यच्च सर्व्वलोकसुखप्रदम् ।
त् सत्यमिति विज्ञे यमसत्यं तद्विपर्य्ययम् ॥"
ति पाद्मे क्रियायोगसारे १६ अध्यायः ॥*॥
दाकारा यथा,—
सत्यञ्च समता चैव दमश्चैव न संशयः ।
अमात्सर्य्यं क्षमा चैव ह्रीस्तितिक्षानसूयता ॥
यागो ध्यानमथार्य्यत्वं धृतिश्च सततं दया ।
अहिंसा चैव राजेन्द्र सत्याकारास्त्रयोदश ॥"
इति महाभारते राजधर्म्मः ॥*॥
त्यापालने दोषो यथा,—
"कृत्वा शपथरूपञ्च सत्यं हन्ति न पालयेत् ।
स कृतघ्नः कालसूत्रे वसेद्देवचतुर्युगम् ॥
सप्तजन्मसु काकश्च सप्तजन्मसु पेचकः ।
ततः शूद्रो महाव्याधी जन्मसप्त ततः शुचिः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४८ अध्यायः ॥*॥
अपि च ।
"सत्येन लोकं जयति सत्यन्तु परमं तपः ।
यथाभूतप्रवादन्तु सत्यमाहुर्म्मनीषिणः ॥"
इति कौर्म्मे उपविभागे १४ अध्यायः ॥*॥
सत्य प्रशंसा यथा,—
"सत्यमायास्यति हरिः सत्यं निष्कपटं वद ।
वद तत् स्वभयं त्यक्त्वा सत्यं ब्रूहि सुसंसदि ॥
वरं कूपशताद्वापी वरं वापीशतात् क्रतुः ।
वरं क्रतुशतात् पुत्त्रः सत्यं पुत्त्रशतात् किल ॥
नहि सत्यात् परो धर्म्मो नानृतात् पातकं परम् ।
नहि मातुः परो बन्धुर्न गुरुर्म्मन्त्रदात् परः ॥"
इति ब्रह्मवैवर्त्ते जन्मखण्डे ८५ अध्यायः ॥*॥
अपि च ।
"तस्मात् सत्यं परं ब्रह्म सत्यमेव परं तपः ।
सत्यमेव परो यज्ञः सत्यमेव परं श्रुतम् ॥
सत्यं वेदेषु जागर्त्ति सत्यञ्च परमं पदम् ।
कीर्त्तिर्यशश्च पुण्यञ्च पितृदेवर्षिपूजनम् ॥
आद्यो विधिश्च विद्या च सर्व्वं सत्ये प्रतिष्ठितम् ।
सत्यं यज्ञस्तथा वेदा मन्त्रा देवाः सरस्वती ॥
व्रतचर्य्या तथा सत्यं ओङ्कारः सत्यमेव च ।
सत्येन वायुरभ्येति सत्येन तपते रविः ॥
सत्येनाग्निर्दहेन्नित्यं स्वर्गं सत्येन गच्छति ।
सत्येन चापः क्षिपति पर्ज्जन्यो धरणीतले ॥
परेण सर्व्वदेवानां सर्व्वतीर्थावगाहनम् ।
सत्यस्य वचनाल्लोके सर्व्वमाप्नोत्यसंशयम् ॥
अश्वमेधसहस्रञ्च सत्यञ्च तुलया धृतम् ।
अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते ॥
सत्येन देवाः प्रीयन्ते पितर ऋषयस्तथा ।
मनुष्याः सिद्धगन्धर्व्वाः सत्यात् सिद्धिमितो
गताः ॥
अगाधे विपुले शुद्धे सत्यतीर्थे शुचिह्रदे ।
स्नातव्यं मनसा युक्तैः स्नानं तत् परमं स्मृतम् ॥
आत्मार्थे वा परार्थे वा पुत्त्रार्थे वापि मानवाः ।
अनृतं ये न भाषन्ते ते बुधाः स्वर्गगामिनः ॥
तस्मात् सत्यकृतं यच्च तदनन्तफलं भवेत् ॥"
इति वह्निपुराणे दानावस्थानिर्णयनामाध्यायः ॥
अपि च ।
"तड़ागशतदानेन यत् पुण्यं लभते नरः ।
ततोऽधिकञ्च लभते वापीदानेन निश्चितम् ॥
दशवापीप्रदानेन यत् फलं लभते नरः ।
ततोऽधिकञ्च लभते पुण्यं कन्याप्रदानतः ॥
दशकन्याप्रदानेन यत् फलं लभते नरः ।
ततोऽधिकञ्च लभते यज्ञ केन नराधिप ॥
शतयज्ञेन लभते यत् पुण्यं पुण्यकृज्जनः ।
ततोऽधिकञ्च लभते पुत्त्रास्यदर्शनेन च ॥
दर्शने शतपुत्त्राणां यत् पुण्यं लभते नरः ।
तत् पुण्यं लभते नूनं पुण्यवान् सत्यपालनात् ॥
नहि सत्यात् परो धर्म्मो नानृतात् पातकं नरः ।
नहि गङ्गासमं तीर्थं न देवः केशवात् परः ॥"
इति ब्रह्मवैवर्त्तपुराणम् ॥*॥
अन्यच्च ।
"सत्यमूलं जगत् सर्व्वं सर्व्वं सत्ये प्रतिष्ठितम् ।
सिद्धं लभन्ते सत्येन ऋषयो वेदपारगाः ॥
सत्येन दीयते कन्या सत्यं जल्पन्ति ब्राह्मणाः ।
सत्यं वदन्ति राजानः सत्येन वसुधा धृता ॥
सत्येन गम्यते स्वर्गं मोक्षं सत्येन प्राप्यते ।
सूर्य्यस्तपति सत्येन सोमः सत्येन राजते ॥
यमः सत्येन हरति सत्येनेन्द्रो विराजते ।
वरुणश्च कुवेरश्च तौ च सत्ये प्रतिष्ठितौ ॥
तत् सत्यं मम नश्येत यद्यहं नागमे पुनः ॥"
इति वाराहे मथुरामाहात्म्ये अक्रूरतीर्थ-
प्रभाववर्णननामाध्यायः ॥*॥ अन्यच्च ।
"सत्यं सन्तोष आस्तिक्यं तथा चेन्द्रियनिग्रहः ।
देवताभ्यर्च्चनं पूजा ब्राह्मणानां विशेषतः ॥
सत्यं भूतहितं वाक्यमस्तेयं स्वागतम्परम् ।
नियमाः पञ्च सत्याद्या वाह्यमाभ्यन्तरं द्विधा ॥"
इति गारुड़े ४९ अध्यायः ॥*॥
अपि च ।
"येऽर्था धर्म्मेण ते सत्या येऽधर्म्मेण गतश्रियः ।
सत्यशौचं मनःशौचं शौचमिन्द्रियनिग्रहः ॥
सर्व्वभूतदया शौचं जलशौचञ्च पञ्चमम् ।
यस्य सत्यञ्च शौचञ्च तस्य स्वर्गो न दुर्लभः ॥
सत्यं हि वचनं यस्य सोऽश्वमेधाद्विशिष्यते ॥"
इति गारुड़े ११२ अध्यायः ॥*॥
अपि च ।

"न सा सभा यत्र न सन्ति वृद्धा
वृद्धा न ते ये न वदन्ति धर्म्मम् ।
नासौ धर्म्मो यत्र नो सत्यमस्ति
नो तत् सत्यं यच्छलेनानुविद्धम् ॥
ब्राह्मणोऽपि मनुष्याणामादित्यश्च तेजसाम् ।
शिरोऽपि सर्व्वगात्राणां व्रतानां सत्यमुत्तमम् ॥"
इति गारुड़े ११५ अध्यायः ॥

ब्रह्म । यथा । यः सर्व्वज्ञः सर्व्ववित् यस्य ज्ञान-
मयं तपः सर्व्वस्य वशी सर्व्वस्येशानः यः
पृथिव्यां तिष्ठन् पृथिव्या अन्तरः सोऽकामयत
बहुस्यां स ईक्षत तत्तेजोऽसृजत् सत्यं ज्ञान-
मनन्तं ब्रह्म इत्याद्याः । इति श्रीभागवतदशम-
स्कन्धीय ८७ अध्यायीयतृतीयश्लोकटीकायां
श्रीधरस्वामी ॥*॥ अपि च ।
"अहमात्मा परं ब्रह्म सत्यं ज्ञानमनन्तकम् ।
विज्ञानमानन्दो ब्रह्म सत्तत्त्वमसि केवलम् ॥
नित्यं शुद्धं बुद्धियुक्तं सत्यमानन्दमद्वयम् ।
योऽसावादित्यपुरुषः सोऽसावहमखण्डितः ।
इति ध्यायन् विमुच्येत ब्रह्मणो भवबन्धनात् ॥"
इति गारुड़े ४९ अध्यायः ॥
तद्वैदिकपर्य्यायः । वट १ श्रत् २ सत्रा ३
अद्धा ४ इत्था ५ ऋतम् ६ । इति षट् सत्य-
नामानि । इति वेदनिघण्टौ । ३ । १० ॥
सत्यं, [म्] व्य, शपथः । स्वीकारः । इति-
रत्नावली ॥
सत्यः, पुं, (सते हितः । सत् + यत् ।) श्रीरामः ।
यथा,—
"कौशल्यानन्दनः श्रीमः सत्यो दशमुखान्तकः ॥"
इति शब्दरत्नावली ॥
विष्णुः । यथा,—
"चोत्तमेऽप्यन्तरे विष्णुः सत्यैः सह सधोत्तमैः ।
सत्यायामभवत् सत्यः सत्यरूपो जनार्द्दनः ॥"
इति कौर्म्मे ४९ अध्यायः ॥*॥
अन्यच्च ।

"सत्यव्रतं सत्यपरं त्रिसत्यं
सत्यस्य योनिं निहितञ्च सत्ये ।
सत्यस्य सत्यमृतसत्यनेत्रं
सत्यात्मकं त्वां शरणं प्रपन्नाः ॥"

इति श्रीभागवते १० स्कन्धे १ अध्यायः ॥*॥

[illegible]

सत्यतपाः, [स्] पुं, (सत्यं तपो यस्य ।) मुनिविशेषः । स तु पुरा व्याध आसीत् ततस्तपः कृत्वा दुर्वाससो वरेण वेदादिसर्वशास्त्रज्ञो भूत्वा सत्यतपा बभूव । यथा,—
"तमभ्यधिदेवं व्याधस्तु दुर्वासा ऋषिर्गतम् ।
उवाच वेदाः साङ्गास्ते सरहस्यपदक्रमाः ।
ब्रह्मविद्यापुराणानि प्रत्यक्षाणि भवन्तु ते ॥
एवं प्रादात् वरं तस्य दुर्वासा नाम चाकरोत् ।
महान् सत्यतपा नाम ऋषिराद्यो भविष्यति ॥"
इति वाराहे सत्यतपउपाख्याननामाध्यायः ॥

सत्यधृतिः, पुं, (सत्या धृतिः ।) ऋषिविशेषः । यथा,—
"शरद्वतस्तु दायादमहल्या संप्रसूयते ।
शतानन्दं ऋषिश्रेष्ठं तस्यापि सुमहातपाः ।
तस्य सत्यधृतिर्नाम मुनिर्वेदस्य पारगः ॥"
इति मात्स्ये ४८ अध्यायः ॥
(सत्यशीले, त्रि । यथा, रामायणे । २।८२।६ ।
"रामस्तथा सत्यधृतिः सतां धर्ममनुस्मरन् ।
नाजहात् पितुरादेशं शशी ज्योत्स्नामिवोदितः ॥")

सत्यनारायणः, पुं, (सत्यो नारायणः ।) देवताविशेषः । सत्यपीर इति भाषा । तस्य व्रतकथा यथा,—
"एकदा मुनयः सर्वे सर्वलोकहिते रताः ।
सुरम्ये नैमिषारण्ये गोष्ठीं चक्रुर्मनोरमाम् ॥
तत्रान्तरे महातेजा व्यासशिष्यो महायशाः ।
सूतः शिष्यगणैर्युक्तः समायातो हरिं स्मरन् ॥
समागतं महात्मानं सूतं शास्त्रार्थपारगम् ।
[illegible] सर्वे समुत्थाय शौनकाद्यास्तपोधनाः ॥
[illegible] तान् अवदत् सर्वान् परमवैष्णवान्
[illegible] सर्वधर्मविदांवरः ॥
[illegible] मुनिपुङ्गवैः ।
उवाच स ततः सर्वान् [illegible] ॥
[illegible] सूतं शौनको मुनिसत्तमः ।
[illegible] विनयान्वितः ॥
शौनक उवाच ।
[illegible]

ज्ञाने संप्राप्य संसारे यः परेभ्यो न [illegible]
ज्ञानरूपो हरिस्तस्मै प्रणव इव वेदः ।
ज्ञानरत्नेव दद्येव परमश्लोकाधवः ।
स श्रेयः सुकृतिर्भूत नरकपथो हरिः ।
व्रतेन तपसा किंवा प्राप्यते वाञ्छितं फल[म्]
सर्वं तत् श्रोतुमिच्छामि
त्वमेव मुनिशार्दूल वेदवेदाङ्गपारग ।
त्वदृते नहि शक्तोऽयो यतस्त्वं व्यासशि[ष्य]
सूत उवाच ।
धन्योऽसि त्वं मुनिश्रेष्ठ त्वमेव वैष्णवो
यतः समस्तलोकानां हितं वाञ्छसि सर्वं
शृणु शौनक वक्ष्यामि यत् [illegible]
नारदेनैवमुक्तः सन् भगवान् कमल[ापतिः]
सुरर्षये यथैवाह तत् शृणुध्व समाहिताः
एकदा नारदो योगी परानुग्रहकाङ्क्षया
पर्यटन् विविधान् लोकान् [illegible]
तत्र दृष्ट्वा जनाः सर्वे नानादुःखसमन्वि[ताः]
नानायोनिसमुत्पन्नाः क्लिश्यन्ते पापकर्म[भिः]
केनोपायेन चैतेषां दुःखनाशो भवेद्ध्रुवम्
इति सञ्चिन्त्य मनसा विष्णुलोकं गतस्तदा
तत्र नारायणं देवं शुक्लवर्णं चतुर्भुजम् ।
शङ्खचक्रधरं देवं वनमालाविभूषितम् ।
दृष्ट्वा तं देवदेवेशं स्तोतुं समुपचक्रमे ।
नारद उवाच ।
नमस्ते वाङ्मनोऽतीतरूपायानन्तशक्तये ।
आदिमध्यान्तहीनाय निर्गुणाय गुणात्मने ।
सर्वेषामादिभूताय भक्तानामार्तिनाशिने ।
श्रुत्वा स्तोत्रं ततो विष्णुर्नारदं प्रत्यभाषत ।
श्रीभगवानुवाच ।
किमर्थमागतोऽसि त्वं किं ते मनसि वर्तते ।
कथयस्व महाभाग तत् सर्वं कथयामि ते ।
नारद उवाच ।
मर्त्यलोके जनाः सर्वे नानाक्लेशसमन्विताः ।
नानायोनिसमुत्पन्नाः पच्यन्ते पापकर्मभिः ।
तत् कथं शमयेन्नाथ लघूपायेन तद्वद ।
श्रोतुमिच्छामि तत् सर्वं कृपास्ति यदि ते
श्रीभगवानुवाच ।
[illegible]

बान्धवैर्ब्राह्मणैश्चैव सहितो धर्मतत्परः।
नैवेद्यं भक्तितो दद्यात् सपादं भक्ष्यमुत्तमम् ॥
रम्भाफलं घृतं क्षीरं गोधूमस्य च चूर्णकम्।
अभावे शालिचूर्णं वा शर्करां वा गुड़ं तथा ॥
सपादसर्व्वभक्ष्याणि एकीकृत्य निवेदयेत्।
विप्राय दक्षिणां दद्यात् कथां श्रुत्वा जनैः सह ॥
ततश्च बन्धुभिः सार्द्धं विप्रेभ्यः प्रतिपादयन्।
प्रसादं भक्षयेत् भक्त्या नृत्यगीतादिकं चरेत् ॥
ततः स्तुत्वा गृहं गच्छेत् सत्यनारायणं स्मरन्।
एवं कृते मनुष्याणां वाञ्छासिद्धिर्भवेद्ध्रुवम् ॥
विशेषतः कलियुगे नान्योपायोऽस्ति भूतले।
कथामस्य प्रवक्ष्यामि कृतकृत्यो भवेत् द्विजः॥०॥
कश्चित् काशीपुरे ग्रामे ह्यासीद्विप्रश्च निर्द्धनः।
क्षुधातृष्णाकुलो भूत्वा सततं भ्रमते महीम् ॥
दुःखितं ब्राह्मणं दृष्ट्वा भगवान् ब्राह्मणप्रियः।
वृद्धब्राह्मणरूपः सन् पप्रच्छ द्विजमादरात् ॥
किमर्थं भ्रमसे विप्र! महीं कुतश्चाच दुःखितः।
तत् सर्व्वं श्रोतुमिच्छामि कथ्यतां यदि रोचते ॥
विप्र उवाच।
ब्राह्मणोऽतिदरिद्रोऽहं भिक्षार्थं भ्रमते महीम्
उपायं यदि जानासि कृपया कथय प्रभो ॥
वृद्ध उवाच।
सत्यनारायणो देवो वाञ्छितार्थफलप्रदः।
तस्य त्वं द्विजशार्दूल कुरुष्व व्रतमुत्तमम् ॥
यत् कृत्वा सर्व्व दुःखेभ्यो मुक्तो भवति मानवः॥
विधानञ्च व्रतस्यास्य विप्रायाभाष्य यत्नतः।
सत्यनारायणो वृद्धस्तत्रैवान्तरधीयत ॥
ततः प्रातः करिष्यामि व्रतं मनसि चिन्तितम्
इति सञ्चिन्त्य विप्रोऽसौ रात्रौ निद्रां न चाल-
भत् ॥
ततः प्रातः समुत्थाय सत्यनारायणव्रतम्।
करिष्येऽहञ्च सङ्कल्प्य भिक्षार्थमगमद्द्विजः ॥
तस्मिन्नेव दिने विप्रः प्रचुरं प्राप्तवान् धनम्।
तेनैव बन्धुभिः सार्द्धं सत्यस्य व्रतमाचरत् ॥
सर्व्वदुःखविनिर्म्मुक्तः सर्वसम्पत्समन्वितः।
बभूव स द्विजश्रेष्ठो व्रतस्यास्य प्रभावतः।
ततः प्रभृतिकालञ्च मासि मासि व्रतं कृतम् ॥
सूत उवाच।
एवं नारायणस्येदं व्रतं कृत्वा द्विजोत्तमः।
सर्वपापविनिर्मुक्तो दुर्लभं मोक्षमाप्नुयात् ॥
व्रतञ्च तद्यदा विप्रः पृथिव्यां सञ्चरिष्यति।
तदैतत् सर्वदुःखं हि नराणाञ्च विनश्यति ॥
एवं नारायणेनोक्तं नारदाय महात्मने।
मयापि कथितं विप्र किमन्यत् कथयामि ते ॥"
इति श्रीस्कन्दपुराणे रेवाखण्डे सत्यनारायण-
विप्रसंवादो नाम १ अध्यायः ॥ * ॥
शौनक उवाच।
"तस्माद्विप्रं व्रतं केन पृथिव्यां चरितं मुने।
तत् सर्वं श्रोतुमिच्छामि श्रद्धास्माकं प्रजायते ॥
सूत उवाच।
शृणुध्वं मुनयः सर्वे तस्माद्येन कृतं भुवि।
एकदा स द्विजवरो यथाविभवविस्तरैः ॥
बन्धुभिः स्वजनैः सार्द्धं व्रतं कर्त्तुं समुद्यतः।
एतस्मिन्नेव काले तु काष्ठकेतुः समागतः।
बहिः काष्ठञ्च संस्थाप्य विप्रस्य मन्दिरं ययौ ॥
तृष्णया पीड़ितात्मा स विप्रं दृष्ट्वा तथाविधम्।
प्रणिपत्य द्विजश्रेष्ठं किमिदं क्रियते त्वया।
कृते किं फलमाप्नोति विस्तराद्वद मे प्रभो ॥
विप्र उवाच।
सत्यनारायणस्येदं व्रतं सर्व्वेप्सितप्रदम्।
दुःखशोकादिशमनं सर्वत्र विजयप्रदम् ॥
धनादिसन्ततिकरं सर्वेषामीप्सितप्रदम्।
यस्य प्रसादान्मे सर्वं धनधान्यादिकं महत् ॥
ततस्तु स व्रतं ज्ञात्वा काष्ठकर्त्तातिहर्षितः।
पपौ जलं प्रसादञ्च भुक्त्वा तन्नगरं ययौ ॥
सत्यनारायणं देवं चिन्तयन् स्थिरमानसः।
काष्ठं विक्रीय नगरे प्राप्स्यते चाद्य यद्धनम्।
तेनैव सत्यदेवस्य व्रतमद्य करोम्यहम् ॥
इति सञ्चिन्त्य मनसा काष्ठं कृत्वा तु मस्तके।
जगाम नगरे रम्ये धनिनां यत्र संस्थितिः।
तद्दिने काष्ठमूल्यञ्च द्विगुणं प्राप्तवानसौ ॥
ततः प्रसन्नहृदयः सुपक्वकदलीफलम्।
शर्कराञ्च घृतं दुग्धं गोधूमस्य च चूर्णकम् ॥
प्रत्येकन्तु सपादञ्च गृहीत्वा गृहमाययौ।
ततो बन्धून् समाहूय चकार विधिना व्रतम् ॥
तद्व्रतस्य प्रसादेन धनपुत्रान्वितोऽभवत्।
इह लोके सुखं भुक्त्वा चान्ते सत्यपुरं ययौ ॥"
इति श्रीस्कन्दपुराणे रेवाखण्डे सत्यनारायण-
कथायां विप्रकाष्ठकेतुसंवादो नाम २ अध्यायः॥
सूत उवाच।
"पुनरन्यत् प्रवक्ष्यामि शृणुध्वं मुनिसत्तमाः।
आसीदुल्कामुखो नाम नृपतिर्ब्बलिनां वरः ॥
जितेन्द्रियः सत्यवादी ययौ देवालयं प्रति।
दिने दिने धनं दत्त्वा द्विजान् सन्तोषयेत् सुधीः
भार्य्या तस्य प्रमुग्धा च सरोजवदना सती।
सस्मितास्या शरदिन्दुं सकटाक्षं च बिभ्रती ॥
काञ्चीञ्च बिभ्रती श्यामा मालतीमाल्यभूषिता
भद्रशीला व्रतं सत्यं सिन्धुतीरेऽकरोन्मुने ॥
एतस्मिन्नन्तरे तत्र साधुः कोऽपि समागतः।
वाणिज्यार्थं बहुधनै रत्नाद्यैः परिपूरितः ॥
नावं संस्थाप्य तत्तीरे जगाम तत्तटं प्रति।
दृष्ट्वा तत्र व्रतं सम्यक् पप्रच्छ विनयान्वितः ॥
साधुरुवाच।
किमिदं कुरुषे राजन् भक्तियुक्तेन चेतसा।
प्रकाशं कुरु तत् सर्वं श्रोतुमिच्छामि सम्प्रति ॥
राजोवाच।
पूजनं क्रियते साधो विष्णोरतुलतेजसः।
व्रतञ्च स्वजनैः सार्द्धं पुत्राद्याप्तये मया ॥
प्रत्युवाच ततो नत्वा राजानं मधुरं वचः।
सत्यं कथय मे राजन् व्रतमेतत् करोम्यहम् ॥
ममापि सन्ततिर्नास्ति सत्यमेतत् सुतव्रतम्।
ततो निवृत्य वाणिज्यात् सानन्दं गृहमागतः।
भार्य्यायै कथितं सर्व्वं व्रतञ्च सन्ततिप्रदम्।
तदा व्रतं करिष्यामि यदा मे सन्ततिर्भवेत् ॥
यत्किञ्चिद्दिवसे तस्य भार्य्या लीलावती सती।
गर्भयुक्तानन्दचित्ताभवद्धर्म्मपरायणा ॥
पूर्णे गर्भे ततो जाता बालिका चातिनिर्म्मला।
दिने दिने वर्द्धमाना शुक्लपक्षे यथा शशी ॥
ततो वणिक् सुतायाश्च जातकर्मादिकञ्चरन्।
नाम्ना कलावती चेति तन्नामकरणं कृतम् ॥
ततो लीलावती प्राह स्वामिनं मधुरं वचः।
न करोषि किमर्थं वा पुरा यच्च प्रतिश्रुतम् ॥
विवाहसमयेऽप्यस्याः करिष्यामि व्रतं प्रिये।
इति भार्य्यां समाश्वास्य जगाम नगरं प्रति ॥
ततः कलावती कन्या वर्द्धिता पितृवेश्मनि।
दृष्ट्वा कन्यां ततः साधुर्नगरे बन्धुभिः सह।
मन्त्रयित्वा द्रुतं दूतं प्रेरयित्वा स धर्म्मवित्।
विवाहार्थञ्च कन्याया वरं श्रेष्ठं विचारयन् ॥
तेनाज्ञप्तश्च दूतोऽसौ काञ्चनं नगरं ययौ।
तस्मादेकं वणिक्पुत्रं समादायागतो हि सः ॥
दृष्ट्वा तं सुन्दरं बालं वणिक्पुत्रं गुणान्वितम्।
ज्ञातिभिर्बन्धुभिः सार्द्धं परितुष्टेन चेतसा ॥
दत्तवान् साधुराहूय कन्यां विधिविधानतः।
ततो भाग्यवशात्तेन विस्मृतं व्रतमुत्तमम् ॥
विवाहसमयेऽप्यस्यास्तेन रुष्टोऽभवद्विभुः ॥
ततः कालेन कियता निजधर्म्मविशारदः।
वाणिज्यार्थं गतः शीघ्रं जामाता सहितो
वणिक् ॥
रत्नसारपुरे रम्ये गत्वा सिन्धुसमीपतः।
वाणिज्यं कुरुते साधुर्जामाता श्रीमता सह ॥
पुरीं निर्म्माय नगरे चन्द्रकेतोर्नृपस्य च।
एतस्मिन्नेव काले तु सत्यनारायणः प्रभुः ॥
भ्रष्टप्रतिज्ञमालोक्य शापं तस्मै प्रदत्तवान्।
अद्यप्रभृति कालञ्च महादुःखं भविष्यति ॥
तस्मिन्नेव दिने राज्ञो धनमादाय तस्करः।
तेनैव वर्त्मना यातः पृष्ठदेशं विलोकयन् ॥
तत्पश्चाद्धावकान् दूतान् दृष्ट्वा भीतेन चेतसा।
धनं संस्थाप्य तत्रैव गतः शीघ्रमलक्षितः ॥
ततो दूताः समायाता यत्रास्ते सज्जनो वणिक्॥
दृष्ट्वा नृपधनं तत्र बद्ध्वा दूता वणिक्सुतौ ॥
हर्षयुक्ता धावमाना ऊचुर्नृपसमीपतः।
तस्करौ द्वौ समानीतौ विलोक्याज्ञापय प्रभो ॥
ते नृपाज्ञां समदाय दृढं बद्ध्वा तु तावुभौ।
स्थापितौ द्वौ महादुर्गे कारागारेऽविचारयन् ॥
सूत उवाच।
मायया सत्यदेवस्य न श्रुतञ्च तयोर्वचः।
ततस्तयोर्धनं यच्च गृहीतं चन्द्रकेतुना ॥
तच्छापाच्च तयोर्गेहे भार्य्या च दुःखिताभवत्।
चौरेणापहृतं सर्व्वं गृहे यच्च स्थितं धनम् ॥
आधिव्याधिसमायुक्ता क्षुत्पिपासातिपीड़िता।
अन्नचिन्तापरा भूत्वा भ्रमते च गृहे गृहे।
ततः कलावती कन्या बभ्राम प्रतिवासरं ॥
एकस्मिन् दिवसे रात्रौ क्षुधार्त्ता द्विजमन्दिरम्।
गत्वापश्यद्व्रतं तत्र सत्यनारायणस्य सा ॥
उपविश्य कथां श्रुत्वा वरं प्रार्थयती मुदा।
प्रसादभक्षणं कृत्वा ययौ रात्रौ गृहं प्रति ॥

ततो लीलावती कन्या भर्त्सयामास तां भृशम्।
प्रति। रात्रौ स्थिता कुत्र किन्ते मनसि वर्त्तते॥
द्विजालये व्रतं मातर्दृष्टं वाञ्छितसिद्धिदम्॥
तत् श्रुत्वा कन्यकावाक्यं व्रतं कर्त्तुं समुद्यता।
मसुता सा वणिग्भार्य्या सत्यनारायणस्य च॥
व्रतं चक्रे च वै साध्वी बन्धुभिः स्वजनैः सह।
भर्त्तृजामातरौ क्षिप्रमागच्छेतां स्वमाश्रमम्॥
इति देवं वरं याचे सत्यदेवं पुनः पुनः।
अपराधञ्च भर्त्तुर्मे जामातुः क्षन्तुमर्हसि॥
व्रतेन तस्यास्तुष्टोऽसौ सत्यनारायणः प्रभुः।
दर्शयामास स्वप्नं हि चन्द्रकेतुं नृपोत्तमम॥
वन्दिनौ मोचय प्रातर्वणिजौ नृपसत्तम!।
देयं धनञ्च तत् सर्व्वं विधिना द्विगुणीकृतम्॥
नो चेत् त्वां नाशयिष्यामि सराज्यधनपुत्रकम्।
एवमाभाष्य राजानं ध्यानगम्योऽभवत् प्रभुः॥
ततः प्रभातसमये राजा च स्वजनैः सह।
उपविश्य सभामध्ये प्राह दूतजनं प्रति॥
बद्धौ महाजनौ शीघ्रं मोचयध्वं वणिक्सुतौ।
इति राज्ञो वचः श्रुत्वा मोचयित्वा महाजनौ॥
समानीय नृपस्याग्रे प्रोचुश्च विनयान्विताः।
आनितौ द्वौ वणिक्पुत्रौ मुक्तौ निगड़बन्धनात्॥
ततो महाजनौ नत्वा चन्द्रकेतुं नृपोत्तमम्।
स्मृत्वा च पूर्व्ववृत्तान्तं विस्मयाद्भयविह्वलौ॥
राजा वणिक्सुतौ वीक्ष्य प्रोवाच सादरं वचः।
दैवात् प्राप्तं महत् कष्टमिदानीं नास्ति ते भयम्॥
इदानीमिव सुखम्त्वं सुरकर्म्मादिकेश्वर॥
ततो नृपवरः श्रीमान् स्वर्णरत्नविभूषणैः।
अलङ्कृत्य वणिक्पुत्रौ वचसा प्रीणयन्मुदम्।
पुरानीतञ्च यद्द्रव्यं द्विगुणीकृत्य दत्तवान्॥
प्रोवाच तौ ततो राजा गच्छ साधो निजाश्रमम्।
राजानं प्रणिपत्याह गन्तव्यं त्वत्प्रसादतः॥
यात्रां कृत्वा ततः साधुर्मङ्गलाचारपूर्व्विकाम्।
ब्राह्मणेभ्यो धनं दत्त्वा स्वर्णां नगरं ययौ॥
कियद्दूरं गते साधौ सत्यनारायणः प्रभुः।
जिज्ञासां कृतवान् साधो किमस्ति तरणौ तव॥
ततो महाजनौ मत्तौ हेलया च प्रहस्य च।
कथं पृच्छसि भो दण्डिन्! मुद्रा किं लब्धुमिच्छसि॥
लतापत्रादिकञ्चैव वर्त्तते तरणौ मम।
निष्ठुरञ्च वचः श्रुत्वा सत्यं भवतु ते वचः॥
एवमुक्त्वा गतः शीघ्रं दण्डी तस्य समीपतः।
कियद्दूरं ततो गत्वा स्थितः सिन्धुसमीपतः॥
गते दण्डिनि साधुश्च कृतनित्यक्रियस्तदा।
उत्थितस्तरणीं दृष्ट्वा विस्मयं परमं ययौ॥
लतापत्रादिकं दृष्ट्वा मूर्च्छितो न्यपतद्भुवि।
लब्धसंज्ञो वणिक्पुत्रस्ततश्चिन्तापरोऽभवत्॥
श्वशुर दुहितुः कान्तो वचनञ्चेदमब्रवीत्॥

जामातोवाच।

किमर्थं कुरुते शोकं शापादेतस्य दण्डिनः।
शक्यते तेन सर्व्वं हि कर्त्तुं हर्त्तुं न संशयः॥
ततस्तच्छरणं यामो वाञ्छितार्थो भविष्यति।
जामातुश्च वचः श्रुत्वा तत्सकाशं गतस्तदा॥
दृष्ट्वा च दण्डिनं भक्त्या नत्वा प्रोवाच सादरम्।
क्षमस्व चापराधं मे यदुक्तं तव सन्निधौ॥
मया दुरात्मना देव मुग्धोऽहं तव मायया।
यदुक्तं तद्वचो नाथ दुष्टं मे क्षन्तुमर्हसि॥
यतः परकृताः सर्वे क्षमाधारा हि साधवः।
पुनः पुनस्ततो नत्वा रुरोद शोकविह्वलः॥
तमुवाच ततो दण्डी विलपन्तं विलोक्य च।
मा रोदीः शृणु मे वाक्यं मम पूजापराङ्मुखः।
ममाज्ञया दुर्बुद्धे! लब्धं दुःखं मुहुर्मुहुः।
तत् श्रुत्वा भगवद्वाक्यं स्तुतिं कर्त्तुं समुद्यतः॥

साधुरुवाच।

त्वन्मायामोहिताः सर्व्वे ब्रह्माद्यास्त्रिदिवौकसः।
न जानन्ति गुणं रूपं तवाश्चर्य्यमिदं प्रभो॥
मूढोऽहं त्वां कथं जाने मोहितस्तव मायया।
प्रसीद पूजयिष्यामि यथाविभवविस्तरैः॥
पुरा वित्तञ्च मद्वित्तं पाहि मां शरणागतम्।
श्रुत्वा भक्तियुतं वाक्यं परितुष्टो जनार्द्दनः।
वरञ्च वाञ्छितं दत्त्वा तत्रैवान्तरधीयत॥
ततोऽसौ नावमारुह्य दृष्ट्वा रत्नादिपूरिताम्।
कृपया सत्यदेवस्य यत् फलं वाञ्छितं मम॥
इत्युक्त्वा स्वजनैः सार्द्धं पूजां कृत्वा यथाविधि।
हर्षेण महता साधुः प्रयाणं चाकरोत् द्विजः॥
नावं संयोज्य वेगेन स्वदेशमगमत्तदा॥
ततो जामातरं प्राह पश्य वत्स पुरीं मम।
दूतञ्च प्रेरयामास निजवित्तस्य रक्षकम्॥
ततोऽसौ नगरं गत्वा साधुभार्य्यां विलोक्य च।
उवाच वाञ्छितं वाक्यं नत्वा बद्धाञ्जलिस्तदा॥
निकटे नगरस्यैव जामात्रा सहितो वणिक्।
आगतो बन्धुवर्गैश्च धनैर्बहुविधैस्तथा॥
श्रुत्वा दूतमुखाद्वाक्यं महाहर्षयुता सती।
सत्यपूजां ततः कृत्वा प्रोवाच तनुजां प्रति।
व्रजामि शीघ्रमागच्छ साधुसन्दर्शनाय च॥
इति मातृवचः श्रुत्वा व्रतं कृत्वा समाप्य च।
प्रसादं संपरित्यज्य गता सा च पतिं प्रति॥
तेन रुष्टः सत्यदेवो भर्त्तारं तरणीं तथा।
संहृत्य च धनैः सार्द्धं जले तस्मिन् समर्पयत्॥
ततः कलावतीकन्या नालोक्य वणिजं पतिम्।
शोकेन महता तत्र रुदन्ती चापतद्भुवि॥
दृष्ट्वा तथाविधां कन्यां न दृष्ट्वा तत्पतिं तरीम्।
भीतेन महता साधुः किमाश्चर्य्यमिदं महत्॥
विचिन्त्यमानास्ते सर्व्वे बभूवुस्तरिवाहकाः।
ततो लीलावती साध्वी दृष्ट्वा तद्विह्वला सती।
विललापातिदुःखेन भर्त्तारञ्चेदमब्रवीत्॥
इदानीं नौकया सार्द्धमदृश्योऽभूदसञ्चितम्।
न जाने केन दैवेन हेलया चापहारितम्॥
सत्यदेवस्य माहात्म्यं किं ज्ञातुं नहि शक्यते।
इत्युक्त्वा विललापाथ ततश्च स्वजनैः सह॥
ततो लीलावती कन्यां क्रोड़े कृत्वा रुरोद च।
ततः कलावती कन्या नष्टे स्वामिनि दुःखिता॥
गृहीत्वा पादुकां तस्य अनुगन्तुं मनो दधे।
कन्यायाश्चरितं दृष्ट्वा सभार्य्यः सुजनो वणिक्॥
पतिशोकेन . . .
हतो हि सत्यदेवेन जामाता
सत्यपूजां करिष्यामि यथाविभवविस्तरैः।
इति सर्व्वान् समाहूय
गत्वा च दण्डवद्भूमौ सत्यदेवं पुनः पुनः।
ततस्तुष्टः सत्यदेवो नगनाथशिरं प्रति।
जगाद वचनञ्चेदं नैवेद्यमन्नमन्न च।
आगता स्वामिनं
गृहं गत्वा प्रसादञ्च भुक्त्वा चायाति
लब्धभर्त्तृस्सुता साधो भविष्यति न
ततश्च मातरं वाक्यं श्रुत्वा
क्षिप्रं तदा गृहं गत्वा
अपश्यत् पुनरागत्य पतिं नावं जनैः सह।
ततः कलावती तुष्टा जगाद पितरं
एहि तात गृहं याहि विलम्बं कुरुषे
तत्
पूजनं सत्यदेवस्य कृत्वा विधिविधानतः।
धनैर्बन्धुगणैः सार्द्धं
पौर्णमास्याञ्च संक्रान्त्यां
इह लोके सुखं भुक्त्वा चान्ते सत्यपुरं
इति श्रीस्कन्दपुराणे रेवाखण्डे
सत्यनारायणव्रत कथायां वणिक्साधुमोचनं नाम
४ अध्यायः ॥४॥

सूत उवाच।

अथ चान्यत् प्रवक्ष्यामि शृणुध्वं
आसीदङ्गध्वजो राजा प्रजापालनतत्परः।
प्रसादं सत्यदेवस्य त्यक्त्वा दुःखमवाप सः।
एकदा स वनं गत्वा हत्वा च
आगत्य वटमूले च दृष्ट्वा सत्यस्य पूजनम्।
गोपाः कुर्व्वन्ति सन्तुष्टा भक्तियुक्ता
राजा दृष्ट्वा तु दर्पेण नागतो न ननाम सः।
ततो गोपगणाः सर्व्वे प्रसादं नृपसन्निधौ।
संस्थाप्य पुनरागत्य भुक्त्वा सर्व्वे यथेप्सितम्।
ततः प्रसादं संत्यज्य राजा दुःखमवाप सः।
तस्य पुत्रशतं नष्टं धनधान्यादिकञ्च यत्।
सत्यदेवेन तत् सर्व्वं नाशितं मम
अतस्तत्रैव गच्छामि यत्र देवस्य पूजनम्।
मनसेति विनिश्चित्य ययौ
ततोऽसौ सत्यदेवस्य पूजां गोपगणैः सह।
भक्तिश्रद्धान्वितो भूत्वा चकार
सत्यदेवप्रसादेन धनपुत्रान्वितोऽभवत्।
इह लोके सुखं भुक्त्वा चान्ते विष्णुपुरं
य इदं कुरुते सत्यव्रतं परमदुर्लभम्।
शृणोति च कथां पुण्यां
धनधान्यादिकं तस्य भवेत् सत्यप्रसादतः।
दरिद्रो लभते वित्तं बद्धो मुच्येत बन्धनात्।
भीतो भयात् प्रमुच्येत सत्यमेतन्न संशयः।
ईप्सितञ्च फलं भुक्त्वा चान्ते सत्यपुरं व्रजेत्।
इति वः कथितं विप्राः सत्यनारायणव्रतम्।
यत् कृत्वा सर्व्वदुःखेभ्यो मुक्तो भवति मानवः।
विशेषतः कलियुगे सत्यपूजाफलप्रदम्।
सत्यनारायणं केचित् सत्यदेवं तथापरे।

नानारूपधरो भूत्वा सर्व्वेषामीप्सितप्रदः।
भविष्यति कलौ सत्यव्रतरूपी सनातनः ॥
य इदं पठते नित्यं शृणोति मुनिसत्तमाः।
तस्य नश्यन्ति पापानि सत्यदेवप्रसादतः ॥"
इति श्रीस्कन्दपुराणे रेवाखण्डे सत्यनारायणकथानाम ४ अध्यायः ॥*॥ इति श्रीसत्यनारायणव्रतकथा समाप्ता ॥ क्वचित् पुस्तके अध्यायनाम नास्ति। क्वचित् भविष्यपुराणे इति कृत्वा एतत्कथा लिखिता ॥*॥ अथ सत्यनारायणपूजापद्धतिः। आदौ स्वस्तिवाचनपूर्व्वकं सङ्कल्पं कुर्य्यात्। अद्येत्यादि अमुकतिथौ रात्रौ अमुकगोत्रः श्रीअमुकदेवशर्म्मा अमुककामः गणेशादिदेवतापूजापूर्व्वकश्रीसत्यनारायणपूजनकथाश्रवणमहं करिष्ये। ततः घटं पठेत्। तत्र आसनशुद्ध्यादिकं कृत्वा गणेशादिदेवतानवग्रहदिक्पालान् पूजयेत्। लक्ष्मीसरस्वत्यादिपुरुषानादिपुरुषश्रीरामलक्ष्मणपूजां कृत्वा यवतिलैः सत्यनारायणमावाहयेत्। प्रणवव्याहृतीः समुच्चार्य्य भगवन् सत्यनारायण इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ मम पूजां गृहाण इत्यादिना आवाह्य पुष्पं गृहीत्वा ध्यायेत्।
"ध्यायेत् सत्यं गुणातीतं गुणत्रयसमन्वितम्।
लोकनाथं त्रिलोकेशं पीताम्बरधरं हरिम् ॥
इन्दीवरदलश्यामं शङ्खचक्रगदाधरम्।
नारायणं चतुर्बाहुं श्रीवत्सपदभूषितम्।
गोविन्दं गोकुलानन्दं जगतः पितरं गुरुम् ॥"
इति ध्यात्वा एतत् पाद्यं सत्यनारायणाय नमः।
अर्घ्यमन्त्रस्तु।
"व्यक्ताव्यक्तस्वरूपाय हृषीकपतये नमः।
मया निवेदितो भक्त्या अर्घ्योऽयं प्रतिगृह्यताम् ॥"
एषोऽर्घ्यः श्रीसत्यनारायणाय नमः। पुष्पाञ्जलिं गृहीत्वा।
"नमस्ते विश्वरूपाय शङ्खचक्रधराय च।
पद्मनाभाय देवाय हृषीकपतये नमः।
नमोऽनन्तस्वरूपाय त्रिगुणाद्यविभासिने ॥"
नैवेद्यं गृहीत्वा।
"त्वदीयं वस्तु गोविन्द तुभ्यमेव समर्पितम्।
गृहाण सुमुखो भूत्वा प्रसीद पुरुषोत्तम ॥"
ततः अञ्जलिं बद्धा पठेत्।
"अच्युतं पुण्डरीकाक्षं नृसिंहं दैत्यसूदनम्।
हृषीकेशं जगन्नाथं वागीशं वरदायकम् ॥
गुणत्रयं गुणातीतं गोविन्दं गरुड़ध्वजम्।
जनार्द्दनं जनानन्दं जानकीवल्लभं जयम् ॥
प्रणमामि सदा सत्यनारायणमतः परम्।
दुर्गमे विषमे घोरे शत्रुभिः परिपीड़िते ॥
विविधापत्सु दुष्टेषु तथान्येष्वपि सङ्कटम्।
नामान्येतानि सङ्कीर्त्त्य ईप्सितं फलमाप्नुयात् ॥
सत्यनारायणं देवं वन्देऽहं कामदं शुभम्।
लीलया च ततं विश्वं येन तस्मै नमो नमः ॥"
ततो दक्षिणान्दद्यात्। अच्छिद्रावधारणं कुर्य्यात्। इति सत्यनारायणपूजापद्धतिः ॥

सत्यपुरं, क्ली, (सत्यं पुरम्।) विष्णुलोकः। यथा,
"ईप्सितञ्च फलं भुक्त्वा चान्ते सत्यपुरं व्रजेत्।
इति वः कथितं विप्राः सत्यनारायणव्रतम् ॥"
इति स्कन्दपुराणोक्तसत्यनारायणव्रतकथा ॥

सत्यफलः, पुं, (सत्यं फलं यस्य।) बिल्ववृक्षः। इति राजनिर्घण्टः ॥

सत्यभामा, स्त्री, कृष्णपत्नीविशेषः। इति शब्दरत्नावली ॥ सा च श्रीकृष्णस्याष्टमहिष्यन्तर्गतमहिषीविशेषः। यथा,—
"अष्टौ महिष्यस्ताः सर्व्वा रुक्मिण्याद्या महात्मनः।
रुक्मिणी सत्यभामा च कालिन्दी च शुचिस्मिता ॥
मित्रविन्दा जाम्बवती नाग्नजिती सुलक्षणा।
सुशीला नाम तस्याष्टौ महिष्यष्टमाः स्मृताः ॥"
इति पाद्मे उत्तरखण्डे ८८ अध्यायः ॥

सत्यभारतः, पुं, (सत्यं भारतं यस्य।) वेदव्यासः। इति त्रिकाण्डशेषः ॥

सत्ययुगं, क्ली, (सत्यं युगम्।) चतुर्युगानां प्रथमयुगम्। यथा,—
"कृतं सत्ययुगं त्रेतास्नायी द्वापरयज्ञियौ।
कलिर्भर्म्मरकः कर्म्मयुगं पापन्तु पातकम् ॥"
इति त्रिकाण्डशेषः ॥*॥
तस्य कृतनामकारणं यथा,—
"तदुपाधिकृतः कालो ब्रह्मणो जगमत्सुतात्।
शतसंवत्सरे ब्रह्मा लयं प्राप्नोति हि त्वयि ॥
लयान्ते तत्राभिमध्यादुत्थितः सृजति प्रभुः।
ततः कृतयुगान्तेऽहं कालं सद्धर्म्मपालकम् ॥
कृतकृत्याः प्रजा यत्र तन्नाम्ना मां कृतं विदुः ॥"
इति कल्किपुराणे १८ अध्यायः ॥*॥
तद्धर्म्मा यथा,—
"धर्म्मायतुष्पादभवत् कृते पूर्णे जगत्त्रयम्।
देवा यथोक्तफलदास्तस्मिन् भुवि सर्व्वतः ॥
सर्व्वशस्या वसुमती हृष्टपुष्टजनावृता।
शाठ्यचौर्य्यानृतैर्हीना आधिव्याधिविवर्ज्जिता ॥
विप्रा वेदविदः सुमङ्गलयुता नार्य्यस्तु चर्य्याव्रतैः पूजाहोमपराः पतिव्रतधरा यागोद्यताश्चक्रियाः।
वैश्या वस्तुषु धर्म्मतो विनिमयैः श्रीविष्णुपूजापराः
शूद्रास्तु द्विजसेवनाद्धरिकथालापाः सपर्य्यापराः ॥"
इति कल्किपुराणे २८ अध्यायः ॥*॥
तद्युगमानं यथा,
"चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमम्।
संख्यातानि सहस्राणि द्विगुणानि शतानि च ॥"
इति श्रीभागवते १२स्कन्धे ४ अध्याये २श्लोकटीकायां श्रीधरस्वामी ॥ तस्योत्पत्त्यादिर्यथा।
वैशाखशुक्लपक्षे तृतीयायां रविवारे सत्ययुगोत्पत्तिः। तत्रावतारचतुष्टयं मत्स्यकूर्म्मवराहनृसिंहाः। पुण्यं पूर्णम्। पापं नास्ति।
कुरुक्षेत्रं तीर्थम्। सर्व्वज्ञो ब्राह्मणः। सहागताः प्राणाः। इच्छामृत्युः। एकविंशतिहस्तपरिमितो मानवदेहः। लक्षवर्षं परमायुः। सुवर्णनिर्म्मितभोजनपात्रम्। सत्ययुगाब्दाः १७२८०००। सत्ययुगस्य राजा बलिः वेणः मान्धाता पुरूरवा धुन्धुमारिकः कार्त्तवीर्य्यः एते षट् चक्रवर्त्तिनः ॥ सत्ययुगस्य लक्षणम्।
"सत्यधर्म्मरतो नित्यं तीर्थानाश्च सदाश्रयम्।
नन्दन्ति देवताः सर्व्वाः सत्ये सत्यपरा नराः ॥"
तत्र तारकब्रह्मनाम यथा,—
"नारायणपरा वेदा नारायणपराः क्षराः।
नारायणपरा मुक्तिर्नारायणपरा गतिः ॥"
इति मुद्राङ्कितपञ्जिकातः संगृहीतम् ॥

सत्ययुगाद्या, स्त्री, (सत्ययुगस्य आद्या तिथिरित्यर्थः।) कृतयुगारम्भकतिथिः। सा तु वैशाखशुक्लतृतीया। तद्विवरणं युगाद्याशब्दे द्रष्टव्यम् ॥

सत्ययौवनः, पुं, (सत्यमेव यौवनमिव यस्य।) विद्याधरः। इति जटाधरः ॥

सत्यरतः, पुं, (सत्ये रतः।) सत्यव्रतराजपुत्रः। यथा,—
"त्रिधन्वनः सुतो जातस्त्र्यारुण इति स्मृतः।
तस्य सत्यव्रतो नाम तस्मात् सत्यरतः स्मृतः ॥
तस्य पुत्त्रो हरिश्चन्द्रो हरिश्चन्द्राच्च रोहितः।"
इति मात्स्ये १२ अध्यायः ॥

सत्यलोकः, पुं, (सत्यो लोकः।) सप्तलोकान्तर्गतलोकविशेषः। यथा,—
"षड्गुणेन तपोलोकात् सत्यलोको विराजते।
अपुनर्म्मारका यत्र ब्रह्मलोको हि स स्मृतः ॥"
इति विष्णुपुराणे २ अंशे ७ अध्यायः ॥
जनलोकापेक्षयैव षड्गुणेन द्वादशकोट्युच्छ्रायेण तपोलोकानन्तरं सत्यलोकः। न तु तपोलोकात् षड्गुणेनेति मन्तव्यम्। तथा सत्यष्टचत्वारिंशत्कोट्युच्छ्रायत्वेन ब्रह्माण्डे तस्यावकाशाभावात्। सूर्य्याण्डगोलयोरन्तःकोट्यः स्युः पञ्चविंशतिरिति शुकोक्तेः। सत्यलोक एव कक्षाभेदेन ब्रह्माधिष्ठानात् परं वैकुण्ठलोकादि ज्ञेयम्। एवञ्च भूतलादूर्द्ध्वं पञ्चदशलक्षोत्तरास्त्रयोविंशतिः कोट्यो भवन्ति। सत्यलोकादूर्द्ध्वञ्च पञ्चदशलक्षोनकोटिद्वयादण्डकटाह इति ज्ञेयम्।
अपुनर्म्मारकाः पुनर्मृत्युशून्याः। इति तट्टीका ॥

सत्यवचाः, [स्] पुं, (सत्यं वचो यस्य।) ऋषिः। इत्यमरः ॥ सत्यवादिनि, त्रि ॥

सत्यवती, स्त्री, (सत्यमस्त्यस्येति। सत्य + मतुप्। मस्य वः। ङीप्।) व्यासमाता। तत्पर्य्यायः। कालो २ योजनगन्धा ३ गन्धकाली ४ मत्स्योदरी ५ व्यासमाता ६ सत्या ७ चित्राङ्गदप्रसूः ८ विचित्रवीर्य्यसूः ९ कन्या १० दासेयी ११ दासनन्दिनी १२। इति शब्दरत्नावली ॥ (यथा, भागवते। १। ३। २१।
"ततः सप्तदशे जातः सत्यवत्यां पराशरात्।

नारदपत्नी। (यथा, महाभारते।५।११७।१५।
"दमयन्त्या नलश्चैव सत्यवत्याश्च नारदः ॥")
ऋचीकमुनिपत्नी। इति मेदिनी ॥ (यथा, हरिवंशे। २७। १८।
"गाधेः कन्या महाभागा नाम्ना सत्यवती शुभा।
तां गाधिः काव्यपुत्राय ऋचीकाय ददौ प्रभुः॥"
सत्यविशिष्टे, त्रि ॥ यथा, भागवते।४।२१।४६।
"पुत्त्रेण जयते लोकानिति सत्यवती श्रुतिः।
ब्रह्मदण्डहतः पापी यद्वेणोऽत्यतरत्तमः ॥")
ऋचीकपत्न्याः प्रमाणान्तरं यथा,—
"ब्रह्मपुत्त्रो भृगुर्नाम ऋचीकस्तत्सुतोऽभवत्।
स भार्य्यार्थी चरन् भूमौ कान्यकुब्जं गतः पुरा ॥
ददर्श चारणगतं जह्नोर्वंशसमुद्भवम्।
कुशिकस्य सुतं गाधिं तपस्यं नृपसत्तमम् ॥
चरत्स्तस्य तस्याथ पुत्त्रकामस्य भूभृतः।
सभार्य्यस्य सुता जज्ञे देवकन्यासमा गुणैः ॥
ऋचीको भृगुपुत्त्रस्तां भार्य्यार्थं समयाचत।
गाधिं नृपतिशार्दूलं स चोवाच नृपो मुनिम् ॥
एकतः श्यामकर्णानामश्वानां चन्द्रवर्च्चसाम्।
सहस्रमेकं यो दद्यात्तस्मै पुत्त्री प्रतीयते ॥
ऋचीक उवाच।
दास्याम्यश्वसहस्रन्तु तव राजंस्तथाविधम्।
कञ्चित्कालं प्रतीक्षस्व यावत्तदहमानये ॥
गङ्गाजलादुत्थितन्तु दत्तं सम्यक् प्रचेतसा।
आदायाश्वसहस्रं स मुनिर्गाधिमथाभ्ययात् ॥
तानश्वान् गाधिरादाय पुत्त्रीं सत्यवतीं स्वकाम्
ऋचीकाय ददौ लक्ष्मीं केशवायेव सागरः ॥
ऋचीको गाधितनयां लब्ध्वा भार्य्यामनिन्दिताम्
मुदितः स तया रेमे यथाकामं स्वमाश्रमे ॥
कृतदारं सुतं श्रुत्वा द्रष्टुं पुत्त्रं स्वकं भृगुः।
अथाजगाम मतिमान् स्नुषां दृष्ट्वा ननन्द च ॥
दम्पती तं समासीनं भृगुं देवगणार्च्चितम्।
पूजयित्वा समासीनं तस्थतुस्तौ कृताञ्जली ॥
ततो भृगुः स्नुषां प्रीतां सुप्रीत इदमब्रवीत्।
वरं वृणीष्व दास्यामि वाञ्छितं वरवर्णिनि।
अदेयं दुष्करं वापि यत्र ते वर्त्तते स्पृहा ॥
ततः सत्यवती पुत्त्रं तप आम्नायपारगम्।
मातुश्च वीरमतुलं पुत्त्रं वरमयाचत ॥
स चैवमस्त्वित्युक्त्वैव भूत्वा ध्यानपरस्तदा।
विस्मयमापन्नः मनसा यत्नात् श्वासं ससर्ज्ज सः ॥
निःश्वासवातात्तु निःसृतं वै चरुद्वयम्।
भृगुस्तामिदमब्रवीत् ॥
सत्यवति

अथ ब्राह्मणेनेऽग्न्यमाशिष्यारात्मकं चरुम्।
अश्नात् सत्यवती तस्या माता क्षत्रं शितं
चरुम् ॥ ० ॥
परिवर्त्तन्तु तं ज्ञात्वा दिव्यज्ञानी भृगुर्म्मुनिः।
अथागत्य स्नुषां तान्तु वचनञ्चेदमब्रवीत् ॥
विपर्य्ययस्त्वया भद्रे ह्यचाशिष्टमकर्म्मणि।
तया चरुमाप्ते च तवेदन्ते भविष्यति ॥
ब्राह्मणः क्षत्रियाचारस्तव पुत्त्रो भविष्यति।
क्षत्रियो ब्राह्मणाचारो मातुस्ते भविता सुतः ॥
इत्युक्ता भृगुणा साध्वी तदा सत्यवती भृगुम्।
पुनः प्रसादयामास पौत्रो मेऽस्त्विति तादृगः।
एवमस्त्विति प्रोक्ता स तदैवान्तर्दधे भृगुः ॥
अथ काले सुतं दीप्तं जमदग्निञ्च गाधिजा।
सुषुवे जननी तस्या विश्वामित्रं तपोधनम् ॥
जमदग्निस्ततो वेदान् चतुरः प्राप सा चिरम्।
प्रादुरासद्धनुर्व्वेदः स्वयं तस्मिन् महात्मनि ॥
विश्वामित्रोऽपि सकलान् वेदानपि तथाचिरात्
धनुर्व्वेदं तथा कृत्स्नं विमयाभूत्तपोधनः ॥
जाज्वल्यमानस्तेजस्वी जमदग्निर्महातपाः।
वेदैस्तपोभिः स मुनीनत्यक्रामद्य सूर्य्यवत् ॥"
इति श्रीकालिकापुराणे जामदग्न्योपाख्याने ८४ अध्यायः ॥

सत्यवतीसुतः, पुं, (सत्यवत्याः सुतः।) व्यासः। इति शब्दरत्नावली ॥ (यथा, महाभारते। १। १५०। १२।
"एवं स तान् समाश्वास्य व्यासः सत्यवतीसुत.।
एकचक्रामभिगतः कुन्तीमाश्वासयत् प्रभुः ॥"
जमदग्निः। इति पुराणम् ॥)

सत्यवाक्, [च्] पुं, (सत्या वाक् यस्य।) ऋषिः। इति शब्दरत्नावली ॥ (कश्यपपत्न्याः मुनेः पुत्त्रविशेषः। यथा, महाभारते। १। ६५। ४३।
"सत्यवागर्कपर्णश्च प्रयुतश्चापि विश्रुतः ॥")
काकः। इति त्रिकाण्डशेषः ॥ (सावर्णमनुपुत्त्रविशेषः। यथा, मार्कण्डेये। ८०। ११।
"विरजाश्चार्व्ववीरश्च निर्म्मोहः सत्यवाक् कृतिः।
विष्ण्वाद्याश्चैव तनयाः सावर्णस्य मनोर्नृपाः ॥")
सत्यवादिनि, त्रि ॥ (यथा, रामायणे। २। २८। ११।
... भवतु द्विजः ॥"
नृ] ... । वद्+

अस्य विशेषवृत्तान्तस्तु सत्यव्रत शब्दे द्रष्टव्यः ॥ ० ॥ चाक्षुषमनुपुत्त्रविशेषः।
यथा, भागवते। ४। १३। १६।
"स चक्षुः सुतमाकूत्यां पत्न्यां
मनोरधत्त महिषी विरजा नड्वला सुतान्।
पुरुं कुत्सं ऋतं द्युम्नं सत्यवन्तं ऋतं
सत्यवति. त्रि ॥ (यथा, महाभारते। १३। ७५। ३४।
"सत्यवन्तः स्वर्गलोके मोदन्ते भरतर्षभ ॥")

सत्यवृत्तः, त्रि, (सत्यं वृत्तं यस्य।) इति केचित् ॥ (सच्चरित्रे क्ली। यथा, भारते। १३। ७३। ११।
"यावज्जीवं सत्यवृत्ते रतश्च
दाने रतो यः क्षमी चापराधे ॥")

सत्यव्रतः, पुं, (सत्यमेव व्रतं यस्य।) वेदाङ्ग सूर्य्यवंशीयपञ्चविंशराजः। यथा,—
"त्रिधन्वनः सुतो जातस्त्रय्यारुण इति श्रुतः।
तस्य सत्यव्रतो नाम तस्मात् सत्यरतः
इति मात्स्ये १२
स च त्रिशङ्कु राजः। यथा,—
"त्रिधन्वनस्त्रय्यारुणस्त्रय्यारुणात् सत्यव्रतः
योऽसौ त्रिशङ्कुसंज्ञामवाप
द्वादशवार्षिक्यामनावृष्ट्यां विश्वामित्रस्य क...
जाह्नवीतीरे न्यग्रोधे मृगमांसमनुदिनं बबन्ध।
परितुष्टेन च विश्वामित्रेण सशरीरः स्वर्ग
आरोपितः। त्रिशङ्कोर्हरिश्चन्द्रः।
पुराणे ४ अंशे २ अध्यायः ॥ (...
पुत्त्रविशेषः। यथा, महाभारते।१।९४।१३।
"जयः सत्यव्रतश्चैव पुरुमित्रश्च भारत ॥"
महादेव.। इति महाभारतम्।१३।१७।१२४
सत्यरूपव्रते, क्ली। यथा, रामायणे।२।२४।१९
"सा त्वं वसेह कल्याणि राज्ञः समनुवर्त्तिनी।
भरतस्य रता धर्म्मे सत्यव्रतपरायणा ॥"
सत्यव्रतविशिष्टे, त्रि। यथा, हरिवंशे।
"एतेऽपि वंशजाः सर्व्वे राजानः कीर्त्तिता
मया।
सत्यव्रता महात्मानः प्रजावन्तो महारथाः ॥")

सत्यसङ्काशः, त्रि, (सत्यस्य सङ्काशः सदृशः।) सत्यसन्निभः। इति केचित् ॥
..., पुं, (सत्यः सङ्गरः प्रतिज्ञा ...
...।) कुवेरः। इति त्रिकाण्डशेषः ॥ ...
... ॥ (ऋषिविशेषः। इति मा...
...।२।७।१५ ॥)
..., पुं, (सत्या सन्धा अभिसन्धिर्यस्य।)
... । जनमेजयः। इति शब्दरत्ना...
॥ (विष्णुः। इति महाभारतम्। १३।
। ६७ ॥ धृतराष्ट्रपुत्त्रः। इति च मा...
। १। ११७। ८ ॥) सत्यप्रतिज्ञे, त्रि।

सत्यसन्धं दशरथतनयं श्यामलं ...
मूर्त्तिं

लोकाभिरामं रघुकुलतिलकं राघवं राव-
णारिम् ॥"

इति महानाटके १ अङ्कः ।

सत्यभ्रा, स्त्री, (सत्ये सत्याभिसन्धिर्यस्याः ।)
पदी। इति शब्दरत्नावली ॥

सत्या, स्त्री, (सत्यमस्त्यस्या इति । सत्य + अच् ।
टाप् ।) सीता । सा च रामपत्नी । सत्यवती ।
तु व्यासमाता । इति शब्दरत्नावली ॥
र्गा । इति सत्यार्थ वर्त्तं प्रकृतिखण्डम् ॥(सत्य-
भामा । सा च कृष्णपत्नी । यथा, भागवते ।
। १४ । १०।

"यत्पादसंश्रयणसुमुख्यकर्मणा
सत्यादयो द्वाष्ट-सहस्रयोषितः ।
निर्जित्य संख्ये त्रिदशांस्तदाशिषो
हरन्ति वज्रायुधवल्लभोचिताः ॥"

तथा च महाभारते । १ । २३४ । २ ।
आरुह्य रथं सत्यामारोपयामास केशवः ॥"
कुपत्नी । यथा, महाभारते । १ ।२१८ । ४ ।
संयोरप्रतिमा भार्य्या सत्या सत्याय धर्मजा ।
जनिस्तस्य सुतो दीप्तस्त्रिषः कान्याय सुव्रताः॥")

सत्याकृतिः, स्त्री, (सत्यस्य आकृतिः करणम् ।
सत्यादशपथे ।"५ । ४ । ६६ । इति डाच् ।)
अवश्यं मयेतत् क्रेतव्यमिति सत्यकरणम् । तत्-
र्य्यायः । सत्यङ्कारः २ सत्यापनम् ३ । इत्य-
रः ॥

सत्याग्निः, पुं, (सत्यस्य अग्निः ।) अगस्त्यमुनिः ।
इति शब्दरत्नावली ॥

सत्यानृतं, क्ली, वाणिज्यम् । इत्यमरः किञ्चित्
सत्यं किञ्चदसत्यं सत्यमसहितमनृतं वा यत्र ।
इति भरतः ॥ (यथा, मनुः । ४ । ६ ।
"सत्यानृतञ्च वाणिज्यं तेन चैवापि जीव्यते ।
सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्ज्जयेत् ॥"
सत्यञ्चानृतञ्चेति द्वन्द्वे कृते द्विवचनप्रयोगः
स्यात् । यथा, वाजसनेयसंहितायाम्।१९।७७।
"दृष्ट्वा रूपे व्याकरोत् सत्यानृते प्रजापतिः ॥")

सत्यापनं, क्ली, (सत्यस्य करणम् । सत्य + सत्याप-
पाशेति । ३ । १ । २५ । इति णिच् आपुक् च
ततो ल्युट् ।) सत्याकृतिः । इत्यमरः ॥

सत्यापना, स्त्री, (सत्यस्य करणम् । सत्य +
सत्यापपाशेति । ३ । १ । २५ । इति णिच्
आपुक् च ततो युच् ।) सत्याकृतिः । इत्यमर-
टीकायां गोपालितः ॥

सत्याद्यः, त्रि, (सत्यस्य वदनम् । वद + क्यप् ।)
सत्यवादी इति शब्दमाला ॥

सत्र, स त ङ क सम्बन्धे । सन्ततौ । इति कविकल्प-
द्रुमः ॥ (अदन्त-चुरा-आत्म-सक-सेट् ।)
दन्त्यवर्गाद्यमध्यः । सन्ततिर्निर्व्वाहक्रियेति भट्ट-
मल्लः । ङ सत्रयते । सत्रापयते प्रतिज्ञां साधुः ।
सन्ततिर्विस्तारणमिति गोविन्दभट्टः । इति
दुर्गादासः ॥

सत्रं, क्ली, (सत्र्यते संतन्यते इति । सत्र + घञ् ।)
यज्ञविशेषः । यथा,—

"नैमिषेऽनिमिषक्षेत्रे ऋषयः शौनकादयः ।
सत्रं स्वर्गाय लोकाय सहस्रसममासत ॥
कलिमागतमाज्ञाय क्षेत्रेऽस्मिन् वैष्णवे वयम् ।
आसीना दीर्घसत्रेण कथायां सक्षणा हरेः ॥"

इति श्रीभागवते १ स्कन्धे १ अध्यायः ॥

सत्राजित्, पुं, (सत्रेण आजयति लोकानिति ।
सत्रा + जि + क्विप् ।) राजविशेषः । स च
श्रीकृष्णश्वशुरः । सत्यभामापिता । परे शशि-
ध्वजराजश्च बभूव । इति कल्किपुराणे २०
अध्यायः ॥ (त्रि, सन्ततजयशीलः । यथा,
ऋग्वेदे । २ । २१ । १ ।

"सत्राजिते नृजित उर्व्वराजिते ।"
"सत्राजिते सदा सन्ततं जयशीलाय ।" इति
तद्भाष्ये सायणः ॥)

सत्रिजातकं, क्ली,(त्रिजातकेन सह वर्त्तमानम् ।)
मांसव्यञ्जनविशेषः । यथा,—
"मांसं वहुघृते भृष्टं सिक्तं चोष्णाम्बुना मुहुः ।
जीरकाद्यैः समायुक्तं परिशुष्कं तदुच्यते ।
तदेव घृतसक्ताद्यं प्रदिग्धं सत्रिजातकम् ॥"

इति शब्दचन्द्रिका ॥

सत्वरं, क्ली, सह त्वरया वर्त्तते इति । शीघ्रम् ।
इत्यमरः ॥ (यथा, रामायणे । २ । १८ । १४ ।
"राजा सत्वरमाहूय व्यापृतं वित्तसञ्चये ।
उवाच देशकालज्ञो निश्चितं सर्व्वतः शुचिः ॥")
तद्वति, त्रि । इति भरतः ॥ (यथा, मनुः ।
९ । ९४ ।
"त्रिंशद्वर्षो वहेत् कन्यां हृद्यां द्वादशवार्षिकीम्
त्र्यष्टवर्षोऽष्टवर्षां वा धर्मे सीदति सत्वरः ॥")

सत्सारः, पुं, (सन् सारो यस्य ।) वृक्षविशेषः ।
चित्रकरः । कविः । इति केचित् ॥ उत्तमसार-
युक्ते त्रि ॥

सथुत्कारं, क्ली, अभ्युक्षतम् । इति हेमचन्द्रः ॥
थुत्कारेण सह वर्त्तमानञ्च ॥

सदंशकः,पुं,(दंशकेन सह वर्त्तमानः ।) कर्कटः ।
इति राजनिर्घण्टः ॥ दंशयुक्ते, त्रि ॥

सदंशवदनः, पुं, (सदंशं दंशाकारसहितं वदनं
यस्य ।) कङ्कपक्षी । इति राजनिर्घण्टः ॥

सदञ्जनं, क्ली, (सत् अञ्जनम् ।) कुसुमाञ्जनम् ।
यथा,—
"रीतिपुष्पं पुष्पकेतु पौष्पकं कुसुमाञ्जनम् ।
सदञ्जनञ्च चाक्षुष्यं माक्षिकं धातुमाक्षिकम् ॥"

इति शब्दचन्द्रिका ॥

सदनं, क्ली, (सीदन्त्यत्रेति । सद + अधिकरणे
ल्युट् । गृहम् । इत्यमरः ॥ (यथा, रामा-
यणे । २ । ६४ । ३६ ।
तिष्ठ मा मागमः पुत्त्र यमस्य सदनं प्रति ।
श्वो मया सह गन्तासि जनन्या च समे-
धितः ॥")
जलम् । इति मेदिनी ॥

सदः,[स्] स्त्री, क्ली,(सीदन्त्यस्यामिति । सद +
"सर्व्वधातुभ्योऽसुन् ।" उणा० ४ । १८८ । इति
असुन् ।)सभा । इत्यमरः ॥(यथा, हितोपदेशे ॥

विपदि धैर्य्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरुचिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनाम् ॥")

सदस्यः, पुं, (सदसि साधुः । सदस् + यत् ।)
विधिदर्शी । इत्यमरः ॥ न्यूनातिरिक्ततां विप-
र्य्यासञ्च परिहृत्य विधिं वेदोक्तयज्ञक्रियाकलापं
द्रष्टुं शीलं येषां ते सदस्याः । सदसि साधवः
कारका इतियिकारसंघेत्यादिना यः । इति
भरतः ॥ तस्य नामान्तरं प्रश्नवक्ता । यथा,—
"एकः कर्म्मनियुक्तः स्यात् द्वितीयस्तत्त्वधारकः ।
तृतीयः प्रश्नकं ब्रूयात्ततः कर्म्म समाचरेत् ॥"
कर्म्मनियुक्तः आचार्य्यः स च सप्ताङ्गके होम-
कर्म्मणि ब्रह्मा । स्वयं होमाकरणे होतापि ।
स्वयं प्रधानकर्म्माकरणे प्रतिनिधिरपि । तत्त्व-
धारकः पुस्तकधारकः । प्रश्नवक्ता सदस्यः ।
इति संस्कारतत्त्वम् ॥ * ॥ सभ्यः । यथा । सभ्याः
सदस्याः पार्षदाः सभास्तारा: सभासदः ।
सामाजिका इत्यादि हेमचन्द्रः ॥

सदा, व्य सर्व्वकालः । सर्व्वदा । इत्यमरः॥ यथा,
"परोपकारनियतः सदा भव महाजन ।"

इतिविष्णुपुराणम् ॥

सदागतिः,पुं,(सदा सर्व्वदा गतिर्यस्य ।)वायुः ।
इत्यमरः ॥ (यथा, महाभारते । १ । ७२ । १ ।
"एवमुक्तस्तया शक्रः सन्दिदेश सदागतिम् ।
प्रातिष्ठत तदा काले मेनका वायुना सह ॥)"
सूर्य्यः । निर्व्वाणम् । सदीश्वरः । इति मेदिनी ॥
(सर्व्वदा गमनशीले, त्रि । यथा, महाभारते ।
३ । १३३ । २५ ।
"चतुर्विंशतिपर्व्व त्वां पश्यामि द्वादशप्रधि ।
तत्त्रिषष्टिशतारं वै चक्रं पातु सदागति ॥")

सदाचारः, पुं, (सतां साधूनामाचारः ।) साधू-
नामाचरणम् । तल्लक्षणादि यथा,—
"सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम् ।
तद्देवनिर्म्मितं देशं ब्रह्मावर्त्तं प्रचक्षते ॥
तस्मिन् देशे य आचारः पारम्पर्य्यक्रमागतः ।
वर्णानां सान्तरालानां सदाचारः स उच्यते ॥"

इति मनुः ॥ * ॥

अन्यच्च ।

और्व्व उवाच ।

"सदाचारेषु राजेन्द्र विशेषान् शृणु संप्रति ।
यानवश्यं नृपः कुर्य्यात्तानतः सकलान् शृणु ॥
साधवः क्षीणदोषाश्च सच्छब्दः साधुवाचकः ।
तेषामाचरणं यत्तु सदाचारः स उच्यते ॥
आगमेषु पुराणेषु संहितासु यथोदितान् ।
समुद्दिष्टसदाचारांस्तान् गृह्णीयाद्गृहस्थवत् ॥
ऋषीन् यजेद्वेदपाठैर्देवान् होमैस्तु पूजयेत् ।
श्राद्धैः पितॄन् यजेदन्नैर्भूतानि बलिभिस्तथा ॥
मैत्रं प्रसाधनं स्नानं दन्तधावनमञ्जनम् ।
सर्व्वं गृहस्थवत् कुर्य्यात् निषेकाद्यं विधिं तथा ॥
षट्कर्म्मसु नियुञ्जीत राजा विप्रान् समन्ततः ।
तथैव क्षत्त्रियादीनि स्वे स्वे कर्म्माणि योजयेत्"

नारदपत्नी। (यथा, महाभारते।५।११७।१५।
"दमयन्त्यां नलश्चैव सत्यवत्याञ्च नारदः॥")
ऋचीकमुनिपत्नी। इति मेदिनी॥ (यथा, हरि-
वंशे। २७। १८।
"गाधेः कन्या महाभागा नाम्ना सत्यवती
शुभा।
तां गाधिः काव्यपुत्राय ऋचीकाय ददौ प्रभुः॥"
सत्यविशिष्टे, त्रि॥ यथा, भागवते।४।२१।४६।
"पुत्त्रेण जयते लोकानिति सत्यवती श्रुतिः।
ब्रह्मदण्डहतः पापो यद्वेनोऽत्यतरत्तमः॥")
ऋचीकपत्न्याः प्रमाणान्तरं यथा,—
"ब्रह्मपुत्त्रो भृगुर्नाम ऋचीकस्तत्सुतोऽभवत्।
स भार्य्यार्थी चरन् भूमौ कान्यकुब्जं गतः पुरा॥
ददर्श चारण्यगतं जह्नोर्वंशसमुद्भवम्।
कुशिकस्य सुतं गाधिं तपस्यं नृपसत्तमम्॥
चरण्यस्यस्य तस्याथ पुत्त्रकामस्य भूभृतः।
सभार्य्यस्य सुता जज्ञे देवकन्यासमा गुणैः॥
ऋचीको भृगुपुत्त्रस्तां भार्य्यार्थं समयाचत।
गाधिं नृपतिशार्दूलं स चोवाच नृपो मुनिम्॥
एकतः श्यामकर्णानामश्वानां चन्द्रवर्चसाम्।
सहस्रमेकं यो दद्यात्तस्मै पुत्त्री प्रतीयते॥
ऋचीक उवाच।
दास्याम्यश्वसहस्रन्तु तव राजंस्तथाविधम्।
कञ्चित्कालं प्रतीक्षस्व यावत्तदहमानये॥
गङ्गाजलादुत्थितन्तु दत्तं सम्यक् प्रचेतसा।
आदायाश्वसहस्रं स मुनिर्गाधिमथाभ्ययात्॥
तानश्वान् गाधिरादाय पुत्त्रीं सत्यवतीं स्वकाम्
ऋचीकाय ददौ लक्ष्मीं केशवायेव सागरः॥
ऋचीको गाधितनयां लब्ध्वा भार्य्यामनिन्दिताम्
मुदितः स तया रेमे यथाकामं स्वमाश्रमे॥
कृतदारं सुतं श्रुत्वा द्रष्टुं पुत्त्रं स्वकं भृगुः।
अथाजगाम मतिमान् स्नुषां दृष्ट्वा ननन्द च॥
दम्पती तं समासीनं भृगुं देवगणार्च्चितम्।
पूजयित्वा समासीनं तस्थतुस्तौ कृताञ्जली॥
ततो भृगुः स्नुषां प्रीतां सुप्रीत इदमब्रवीत्।
वरं वृणीष्व दास्यामि वाञ्छितं वरवर्णिनि।
अदेयं दुष्करं वापि यत्र ते वर्त्तते स्पृहा॥
ततः सत्यवती पुत्त्रं ...
मातुश्च ...
स ...
[illegible]
...नता...
...लब्धमंत्री
...श्वशुर
...र्। ...हरि-
...चयः॥
...नाय वै।
किमर्थे ...ादेतत्त्व दर्शितः॥
भवतं ...दं न संशयः॥
...भविष्यति।

अथ स्नानदिनेऽन्यस्मात्सिध्याराध्यकं चरुम्।
पश्चात् सत्यवती तस्या माता फलं मितं
चरुम्॥ * ॥
परिवर्त्तन्तु तं ज्ञात्वा दिव्यज्ञानो भृगुर्मुनिः।
अथागत्य स्नुषां तान्तु वचनञ्चेदमब्रवीत्॥
विपर्य्ययस्त्वया भद्रे ह्यभालिङ्गनकर्म्मणि।
तथा चरुमाश्रमे च तवेदन्ते भविष्यति॥
ब्राह्मणः क्षत्त्रियाचारस्तव पुत्त्रो भविष्यति।
क्षत्त्रियो ब्राह्मणाचारो मातुस्ते भविता सुतः॥
इत्युक्ता भृगुणा साध्वी तदा सत्यवती भृगुम्।
पुनः प्रसादयामास पौत्त्रो मेऽस्त्विति तादृशः।
एवमस्त्विति प्रोक्ता स तत्रैवान्तर्दधे भृगुः॥
अथ काले सुतं दीप्तं जमदग्निञ्च गाधिजा।
सुषुवे जननी तस्या विश्वामित्रं तपोधनम्॥
जमदग्निस्ततो वेदान् चतुरः प्राप सा चिरम्।
प्रादुरासच्चतुर्व्वेदः स्वयं तस्मिन् महात्मनि॥
विश्वामित्रोऽपि सकलान् वेदानपि तथाचिरात्
धनुर्व्वेदं तथा ज्ञात्वा विप्रश्चाभूत्तपोधनः॥
आज्यस्थमानस्तेजस्वी जमदग्निर्महातपाः।
वेदैस्तपोभिः स मुनीनत्यक्रामच्च सूर्य्यवत्॥"
इति श्रीकालिकापुराणे जामदग्न्योपाख्याने
८४ अध्यायः॥
सत्यवतीसुतः, पुं, (सत्यवत्याः सुतः।) व्यासः।
इति शब्दरत्नावली॥ (यथा, महाभारते।
१।१५७।१२।
"एवं स तान् समाश्वास्य व्यासः सत्यवतीसुतः।
एकचक्रामभिगतः कुन्तीमाश्वासयत् प्रभुः॥"
जमदग्निः। इति पुराणम्॥)
सत्यवाक्, [च्] पुं, (सत्या वाक् यस्य।) ऋषिः।
इति शब्दरत्नावली॥ (काश्यपपत्न्या मुनेः पुत्त्र-
विशेषः। यथा, महाभारते।१।६५।४३।
"सत्यवागर्कपर्णश्च प्रयुतश्चापि विश्रुतः॥")
काकः। इति त्रिकाण्डशेषः॥ (सावर्णमनु-
पुत्त्रविशेषः ... मार्कण्डेये।८०।११।
"विर... ...शः सत्यवाक् कृतिः।
...र्णस्य मनोर्नृपाः॥")
... (यथा, रामायणे।२।
...सुस्पष्टः सत्यवाग् भवतु द्विजः॥"
...[न्] त्रि, (सत्यं वदतीति। वद+
...।) यथार्थवक्ता। तत्पर्य्यायः। सत्योद्यः
...। इति शब्दमाला॥ (यथा, महानिर्व्वाण-
तन्त्रे।३।८८।
"अस्मिन् धर्म्मे महेशि! स्यात् सत्यवादी
जितेन्द्रियः।
परोपकारनिरतो निर्व्विकारः सदाशयः॥")
सत्यवान्, [त्] पुं, (सत्यमस्त्यस्येति। सत्य+
मतुप्। मस्य वः।) राजविशेषः। स तु सावित्री-
पतिः। इति मेदिनी॥ (अस्य नामनिरुक्ति-
कथायामरितापर्व्वे।३।२८३।१२।
... पिता सत्यं माता प्रभाषते।
...तु नामैतत् सत्यवानिति॥")

अस्य विशेषवृत्तान्तस्तु सावित्रीशब्दे २८१
मारभ्य द्रष्टव्यः॥ * ॥
यथा, भागवते।४।१३।१६।
"स चक्षुः सुतमाकूत्यां पत्नीं
मनोरघुत महिषी विरजावृता मुनान्।
पुरुं कुत्समृतं द्युम्नं सत्यवन्तं ...
सत्यवति, त्रि॥ (यथा, महाभारते।...
७५।३४।
"सत्यवन्तः स्वर्गलोके मोदन्ते
सत्यव्रतः, त्रि, (सत्यं व्रतं यस्य।)
इति केचित्॥ (सत्यरिति क्लौ। यथा,
भारते।१३।७२।११।
"यावज्जीवं सत्यव्रते रतश्च
दाने रतो यः क्षमी चापराधे।")
सत्यव्रतः, पुं, (सत्यमेव व्रतं यस्य।)
सूर्य्यवंशीयचक्रवर्त्तिराजः। यथा,—
"त्रिधन्वनः सुतो जातस्त्र्यारुण ...
तस्य सत्यव्रतो नाम तस्मात्
इति मात्स्ये १२
स च त्रिशङ्कुराजः। यथा,—
"त्रिधन्वनस्त्र्यारुणस्त्र्यारुणात्
योऽसौ त्रिशङ्कुसंग्रामवान्
द्वादशवार्षिक्यामनावृष्ट्यां ...
...
जाह्नवीतीरे न्यग्रोधे
परितुष्टेन च विश्वामित्रेण
आरोपितः। त्रिशङ्कोर्हरिश्चन्द्रः।"
पुराणे ४ अंशे २ अध्यायः॥ (
पुत्त्रविशेषः। यथा, महाभारते।१...
"जयः सत्यव्रतश्चैव पुरुमित्रश्च भारत।"
महादेवः। इति महाभारतम्।१३
सत्यव्रतपरायणा, स्त्री। यथा, रामायणे।२...
"सा त्वं वसेह कल्याणि राज्ञः समनुवर्त्तिनी।
भरतस्य रता धर्म्मे सत्यव्रतपरायणा॥"
सत्यव्रतविशिष्टे, त्रि। यथा,
"एतेऽपि वंशजाः सर्व्वे राजानः कीर्त्तिता
सत्यव्रता महात्मानः ...
सत्यसङ्काशः, त्रि, (सत्यस्य सङ्काशः।)
सत्यसन्निभः। इति केचित्॥
सत्यसङ्गरः, पुं, (सत्यः सङ्गरः
यस्य।) कुबेरः। इति त्रिकाण्डशेषः
रहितयुक्तश्च॥ (ऋषिविशेषः।
भारतम्।२।७।१५॥)
सत्यसन्धः, पुं, (सत्या सन्धा अभिसन्धिर्यस्य।)
रामानुजभरतः। जनमेजयः। इति
वली॥ (विष्णुः। इति महाभारतम्।१३।
१४९।६०॥ धृतराष्ट्रपुत्त्रः। इति च म...
भारतम्।१।११७।८॥) सत्यप्रतिज्ञे, त्रि।
यथा,—
"राजेन्द्रं सत्यसन्धं दशरथतनयं श्यामलं ...
...

ृकुमारः सनकः सनन्दनः
तनोऽप्यासुरिपिङ्गलौ च।
ृराः सप्त रसातलाय
न्तु सर्व्वं मम सुप्रभातम् ॥
ो सुगन्धा सरसास्तथापः
र्शवायुर्ज्ज्वलितञ्च तेजः।
सशब्दं महता सहैव
न्तु सर्व्वं मम सुप्रभातम् ॥
र्णवाः सप्त कुलाचलाश्च
र्पो द्वीपवराश्च सप्त।
दि कृत्वा भुवनानि सप्त
न्तु सर्व्वं मम सुप्रभातम् ॥
प्रभाते परमं पवित्रं
तंस्मरेद्वा शृणुयाच्च भक्त्या।
प्रनाशो ननु सुप्रभाते
च सत्यं भगवत्प्रसादात् ॥
: समुत्थाय विचिन्तयेच्च
तथार्थञ्च विहाय शय्याम्।
ाय पश्चाद्धरिरित्युदीर्य्य
ेत्तदोत्सर्गविधिं हि कर्त्तुम् ॥
देवगोब्राह्मणवह्निमार्गे
राजमार्गे न चतुष्पथे च।
योर्द्वयोरुत्सर्गमपीह गोष्ठे
छाय शौचं सुखनासिकञ्च ॥
य शौचार्थमुपाहरेन्मृदं
: त्रयं पायितले च सप्त।
तोभयोः पञ्च चतुस्तथैकां
ङ्गे तथैकां मृदमाहरेच्च ॥
न्तर्ज्जलाद्राचसमूषिकस्थला-
चावशिष्टा सदनादिभग्ना।
शौकसृष्टैव हि शौचनाय
द्या सदाचारविदा नरेण।
दङ्मुखः प्राच्य पदौ भुविस्थः
ाचमेदद्भिरफेनिलाभिः।
ाचम्य च त्रिः परिमृज्य च द्वि-
तः स्पृशेत्खानशिरः करेण ॥
ान्धां स निर्वर्त्य ततः क्रमेण
गांश्च संशोध्य च दन्तधावनम्।
त्वा तथा दर्पणदर्शनञ्च
त्वा शिरःस्नानमथाङ्गिकञ्च ॥
पूज्य तोयेन पितॄन् सदेवान्
ोमञ्च कृत्वालभनं शुभानाम्।
त्वा बहिर्निर्गमनं प्रशस्तं
र्व्वां दधि सर्पिरथोदकुम्भम् ॥
नुं सवत्सां वृषभं सुवर्णं
द्दोमयं स्वस्तिकमक्षतानि।
ाजा मधु ब्राह्मणकन्यकाश्च
ेतानि पुष्पाण्यथ शोभनानि ॥
ुताशनं चन्दनमर्कबिम्ब-
श्वत्थवृक्षञ्च समालभेत।
तस्तु कुर्य्यान्निजजातिधर्म्मं
ेवानुशिष्टं कुलधर्म्ममग्र्यम् ॥

स्वगोत्रधर्म्मं न हि सन्त्यजेत
तेनापि सिद्धिं समुपाचरेत।
नासत्प्रलापं न च सत्यहीनं
न निष्ठुरं नागमशास्त्रहीनम् ॥
वाक्यं वदेत् साधुजनेन येन
निन्द्यो भवेन्नैव च धर्म्मभेदी।
सङ्गं न चासत्सु जनेषु कुर्य्यात्
सन्ध्यासु भक्षं सुरतं दिवा च।
सर्व्वासु योनीषु पराबलासु
रजस्वलास्वेव जलेषु धीरः ॥
वृथाटनं वृथादानं वृथा च पशुमारणम्।
न कर्त्तव्यं गृहस्थेन वृथा दारपरिग्रहम् ॥
वृथाटनान्नित्यहानिर्वृथादानाद्धनक्षयः।
वृथापशुघ्नः प्राप्नोति पातनान्नरकं महत् ॥
सन्तत्या हानिरश्लाघ्या वर्णसङ्करतो भयम्।
भेतव्यञ्च भवेल्लोके वृथादारपरिग्रहात् ॥
परस्वे परदारे च न कार्य्या बुद्धिरुत्तमैः।
परस्वं नरकायैव परदाराश्च मृत्यवे ॥
नेक्षेत् परस्त्रियं नग्नां न सम्भाषेच्च तस्करान्।
उदक्यया दर्शनं स्पर्शं सम्भाषाञ्च विवर्जयेत् ॥
नैकासने तथा स्थेयं सुन्दर्य्या परजायया।
तथैव स्थान्न मातुश्च तथैव दुहितुस्तथापि ॥
न भार्य्यां वीक्ष्यते नग्ना पुरुषेण कदाचन।
न च स्नायीत वै नग्नो न शयीत कदाचन ॥
दिग्वाससोऽपि न तथा परिभ्रमणमिष्यते।
भिन्नासनं भाजनादीन् दूरतः परिवर्जयेत् ॥
नन्दासु नाभ्यङ्गमुपाचरेत
क्षौरञ्च रिक्तासु जयासु मांसम्।
पूर्णासु योषित् परिवर्जनीया
भद्रासु सर्व्वाणि समारभेत ॥
नाभ्यङ्गमर्के न च भूमिपुत्रे
क्षौरञ्च शुक्रे रविजे च मांसम्।
बुधेषु योषिन्न समाचरेत
शेषेषु सर्व्वाणि सदैव कुर्य्यात् ॥
चित्रासु हस्ते श्रवणेषु तैलं
क्षौरं विशाखास्वभिजित्सु वर्ज्ज्यम्।
मूले मृगे भाद्रपदासु मांसं
योषिन्मघाकृत्तिकयोत्तरासु ॥
सदैव वर्ज्ज्यं शयने ह्युदक्शिर-
स्तथा प्रतीच्यां रजनीचरेण।
भुञ्जीत नैवेह च दक्षिणामुखो
न च प्रतीच्यामभिभोजनीयम् ॥
देवालयं चैत्यतरुं चतुष्पथं
विद्याधिकञ्चापि गुरुं प्रदक्षिणम्।
कुर्य्यात्त्र वामं गमने च धीमान्
द्विजान् मृगान् गाश्च निशाचरेश ॥
माल्यानुलेपं वसनानि यत्नतो
नान्यैर्धृतान्येव हि धारयेत।
छायाच्छिरःस्नानतया च नित्यं
निष्कारणं चैव विना निशासु ॥
ग्रहोपरागे स्वजनाभिघाते
मृत्या च दुर्भगतो शशाङ्के।

नाभ्यङ्गितं कायमुपस्पृशेच्च
स्नातो न केशान् विधुनीत चापि ॥
गात्राणि चैवाम्बरपाणिना च
स्नातोऽवमृज्यद्रजनीचरेश।
वसेच्च देशेषु सुराजकेषु
सुसंहितस्वीयजनेषु नित्यम् ॥
अक्रोधना न्यायपरा अमत्सराः
कृषीवला ह्यौषधिजातयश्च।
न तेषु देशेषु वसेच्च बुद्धिमान्
यस्मिन्नृपो दण्डरुचिस्त्वशक्तः।
जनोऽपि नित्योत्सववद्धवैरः
सदा जिगीषुश्च तिष्ठाचरेन्द्र ॥
ऋचय ऊचुः।
यत्र भोज्यं महाबाहो सदा धर्म्मस्थितैर्न्नरैः।
यद्भोज्यञ्च समुद्दिष्टं कथयिष्यामहे वयम्।
तत्र्यसन्नं पर्य्युषितं स्नेहाक्तं चिरसम्भृतम्।
अस्नेहा व्रीहयः श्लक्ष्णा विकाराः पायसा-
स्तथा ॥
शशकः शल्लको गोधा तथा खड्गी च कच्छपः।
तद्वद्विदलकादीनि भोज्यानि मनुरब्रवीत् ॥
मणिवज्रप्रवालानां तद्वन्मुक्ताफलस्य च।
शैलदारुमयानाञ्च तृणगुल्मौषधस्य च ॥
शाकधान्याजिनानाञ्च संहतानाञ्च वाससाम्।
वल्कलानामशेषाणामम्बुना शुद्धिरिष्यते ॥ न-
खानां हानामयोर्षा न तिलकल्केन चार्विकम्।
[illegible] स्यात् सह
भस्मना ॥
नागदन्तास्थिशृङ्गाणां तक्षणाच्छुद्धिरिष्यते।
पुनःपाकेन भाण्डानां मृण्मयानाञ्च शुद्धता ॥
शुद्धं भैक्ष्यं कारुहस्तः पण्यं योषिन्मुखं तथा।
रथ्यागतमविज्ञातं दासवर्गेण यत् कृतम् ॥
वाक्यपूतं चिरानीतमनेकान्तरितं लघु।
चेष्टितं बालवृद्धानां बालस्य तु मुखं शुचि ॥
कर्म्मच्छानामपि शोयाला स्तनन्धयसुता स्त्रियः।
वाग्विप्रुषो द्विजेन्द्राणां पाठे वागम्बुबिन्दवः ॥
भूमिर्व्विशुध्यते खातदाहगोक्रमसेचनैः।
लेपादुल्लेखनात् सेकात् वेश्मसम्मार्ज्जनाज्जलात् ॥
केशकीटावपन्नेऽन्ने शोधाते सक्षिकान्विते।
मृद्वारिभस्मक्षाराणि प्रक्षेप्तव्यानि शुद्धये ॥
उडुम्बराणाञ्चाम्लेन क्षारेण त्रपुसीसयोः।
कांस्यानां भस्मना शुद्धिस्तोयाच्छुद्धिर्द्रवस्य च ॥
अमेध्याक्तस्य मृत्तोयैर्गन्धापहरणेन च।
अन्येषामपि तद्रव्ये शुद्धिर्गन्धापहारतः ॥
मातुः प्रस्रवणे वत्सः शकुनिः फलपातने।
गर्द्दभो भारवाहित्वे श्वा मृगग्रहणे शुचिः ॥
रथ्याकर्द्दमतोयानि नावः पथि तृणानि च।
मारुतेनैव शुध्यन्ति पक्वेष्टकचितानि च ॥
मृतं द्रोदाहकस्याश्वमेध्याभिप्लुतं भवेत्।
चममुद्धृत्य सन्दग्धं शेषस्य शोधनं कृतम् ॥
उपवासं त्रिरात्रं वा दूषितान्नस्य भोजने।
अज्ञाते ज्ञातपूर्व्वे च नैव शुद्धिर्विधीयते ॥
उदक्याश्च तु नग्नाश्च सूतिकान्त्यावसायिनः।

स्पृष्ट्वा स्नायीत शौचार्थं तथैव मृतहारिणः ॥
सस्नेहमस्थि संस्पृश्य सवासाः स्नानमाचरेत् ।
आलभ्यैव तु निःस्नेहं गामालभ्यार्कमीक्ष्य च ॥
न लङ्घयेत् नरं छायावर्ष्माणं दुर्बलं तथा ।
गृहादुच्छिष्टविण्मूत्रपादाम्भांसि क्षिपेद्बहिः ॥
पञ्चपिण्डाननुद्धृत्य न स्नायात् परवारिणि ।
स्नायीत देवखातेषु सरोह्रदसरित्सु च ॥
नोद्यानादौ विकालेषु प्राज्ञस्तिष्ठेत् कदाचन ।
नालपेज्जनविद्विष्टं वीरहीनां तथा स्त्रियम् ॥
देवतापितृसच्छास्त्रयज्ञवेदादिनिन्दकैः ।
कृत्वा तु स्पर्शमालापं शुध्यतेऽर्कावलोकनात् ॥
अभोज्याः सूतिकाषण्ढमार्ज्जाराखुश्वकुक्कुटाः
पतितापविद्धनग्नाश्च चाण्डालाद्यधमाश्च ये ॥

सुकेशी उवाच ।

भवद्भिः कीर्त्तिता भोज्या य एते सूतिकादयः ।
अमीषां श्रोतुमिच्छामि तत्त्वतो लक्षणानि च ॥

ऋषय ऊचुः ।

ब्राह्मणी ब्राह्मणश्चैव यावच्छेपत्वमागतौ ।
तादृशौ सूतिकेत्युक्तौ तयोरन्नं विगर्हितम् ॥
न जुहोत्युचिते काले न स्नाति न ददाति च ।
पितृदेवार्च्चनाहीनः स षण्ढः परिगीयते ॥
दम्भार्थं जपते यश्च तप्यते यजते तथा ।
न परत्रार्थमुद्युक्तो मार्ज्जारः परिकीर्त्तितः ॥
विभवे सति नैवात्ति न ददाति जुहोति च ।
तमाहुराखुं तस्यान्नं भुक्त्वा कृच्छ्रेण शुध्यति ॥
सभागतानां यः सभ्यः पक्षपातं समाश्रयेत् ।
तमाहुः कुक्कुटं देवास्तस्याप्यन्नं विगर्हितम् ॥
स्वधर्म्मं यः समुत्सृज्य परधर्म्मं समाचरेत् ।
अनापदि स विद्वद्भिः पतितः परिकीर्त्त्यते ॥
देवत्यागी पितृत्यागी गुरुभक्त्यरतस्तथा ।
गोब्राह्मणस्त्रीवधकृदपविद्धः स उच्यते ॥
येषां कुले न वेदोऽस्ति न शास्त्रं नैव च व्रतम् ।
ते नग्नाः कीर्त्तिताः सद्भिस्तेषामन्नं विगर्हितम् ॥
आशार्त्तानामदाता च दातुश्च प्रतिषेधकः ।
शरणागतं यस्त्यजति स चाण्डालाधमो नरः ॥
यो बान्धवैः परित्यक्तः साधुभिर्ब्राह्मणैरपि ।
कुण्डाशी यश्च तस्यान्नं भुक्त्वा चान्द्रायणं चरेत् ॥
यो नित्यकर्म्मणो हानिं कुर्य्यान्नैमित्तिकस्य च ।
भुक्त्वान्नं तस्य शुध्येत त्रिरात्रोपोषितो नरः ॥
नित्यस्य कर्म्मणो हानिः केवलं मृतजन्मसु ।
न तु नैमित्तिकोच्छेदः कर्त्तव्यो हि कथञ्चन ॥
जाते पुत्त्रे पितुः स्नानं सचैलस्य विधीयते ।
मृते च सर्व्वबन्धूनामित्याह भगवान् भृगुः ॥
प्रेताय सलिलं देयं बहिर्द्दग्ध्वा तु गोत्रजैः ।
प्रथमेऽह्नि चतुर्थे वा सप्तमे वास्थिसञ्चयम् ॥
ऊर्द्ध्वं सञ्चयनात्तेषामङ्गस्पर्शो विधीयते ।
सोदकैस्तु क्रिया कार्य्या संशुद्धैस्तु सपिण्डकैः ॥
विषोद्बन्धनशस्त्राम्बुवह्निपातमृतेषु च ।
तथा प्रवीतसन्न्यासे देशान्तरमृते तथा ॥
सद्यः शौचं भवेद्वीर तच्चाप्युक्तं चतुर्व्विधम् ।
गर्भस्रावे तदेवोक्तं पूर्णकाले न वै चरेत् ॥
ब्राह्मणानामहोरात्रं क्षत्रियाणां दिनत्रयम् ।
षड्रात्रं चैव वैश्यस्य शूद्राणां द्वादशाह्निकम् ॥
दशद्वादशमासार्द्धमाससंख्यादिनैश्च तैः ।
स्नाता कर्म्मक्रियाः कुर्य्युः सर्व्वे वर्णा यथाक्रमम् ॥
प्रेतमुद्दिश्य कर्त्तव्यमेकोद्दिष्टं विधानतः ।
सपिण्डीकरणं कार्य्यं प्रेतस्य वत्सरान्तरे ॥
ततः पितृत्वमापन्ने दर्शपौर्णादिभिः शुभैः ।
प्रीणनं तस्य कर्त्तव्यं यथाश्रुतिनिदर्शनम् ॥
पितुरर्थं समुद्दिश्य भूमिकोपादिकञ्च यत् ।
कुर्य्यात्तेनास्य सुप्रीताः पितरो यान्ति राक्षस ॥
यद्यदिष्टतमं किञ्चित् यच्चास्य दयितं गृहे ।
तत्तद्गुणवते देयं तदेवाक्षयमिच्छता ॥
अध्येतव्या त्रयी नित्यं भाव्यञ्च विदुषा सदा ।
धर्म्मतो धनमाहार्य्यं यष्टव्यञ्चापि शक्तितः ॥
आचारं कुर्व्वतो नाम्ना जुगुप्सामिति राक्षस ।
तत् कर्त्तव्यमशङ्केन यन्न गोप्यं महाजने ॥
एवमाचरतो लोके पुरुषस्य गृहे सतः ।
धर्म्मार्थकामसंप्राप्तिः परत्रेह च शोभना ॥
एष तूद्देशतः प्रोक्तो गृहस्थाश्रम उत्तमः ॥*॥
वानप्रस्थाश्रमं धर्म्मं ते वक्ष्यामोऽवधार्य्यताम् ।
अपत्यसन्ततिं दृष्ट्वा प्राज्ञो देहस्य चानतिम् ।
वानप्रस्थाश्रमं गच्छेदात्मनः शुद्धिकारणम् ॥
तत्रारण्योपभोगेन तपोभिश्चात्मकर्षणम् ।
भूमौ शय्या ब्रह्मचर्य्यं पितृदेवातिथिक्रिया ॥
होमस्त्रिसवनस्नानं जटावल्कलधारणम् ।
वन्यस्नेहनिषेवित्वं वानप्रस्थविधिस्त्वयम् ॥*॥
सर्व्वसङ्गपरित्यागो ब्रह्मचर्य्यममानिता ।
जितेन्द्रियत्वमावासे नैकस्मिन् वसते चिरम् ॥
अनारम्भस्तथाहारे भिक्षा विप्रे ह्यनिन्दिते ।
आत्मज्ञानं विवेकश्च तथाह्यात्मावबोधनम् ॥
चतुर्थे चाश्रमे धर्म्मा ह्यस्माभिस्ते प्रकीर्त्तिताः ॥
वर्णधर्म्माणि चान्यानि निशामय निशाचर ॥
गार्हस्थ्यं ब्रह्मचर्य्यञ्च वानप्रस्थं त्रयाश्रमाः ।
क्षत्रियस्यापि गदिता य आचारो द्विजस्य हि ॥
वैखानसत्वं गार्हस्थ्यमाश्रमद्वितयं विशः ।
गार्हस्थ्यमुत्तमं त्वेकं शूद्रस्य क्षणदाचर ॥
स्वानि वर्णाश्रमोक्तानि धर्म्माणीह न हापयेत् ।
यो हापयति तस्यासौ परिकुप्यति भास्करः ॥
कुपितः कुलनाशाय देहरोगविवृद्धये ।
वर्णाच्च पतते तस्य नरस्य क्षणदाचर ॥

तस्मात् स्वधर्म्मं न हि संत्यजेत
न हापयेच्चापि तथात्मवंशम् ।
यः संत्यजेच्चापि निजं हि धर्म्मं
तस्मै प्रकुप्येत दिवाकरश्च ॥

पुलस्त्य उवाच ।

इत्येवमुक्तो मुनिभिः सुकेशी
प्रणम्य तान् ब्रह्मतपोमहर्षीन् ।
जगाम चोत्पत्य पुरं स्वकीयं
मुहुर्मुहुर्धर्म्ममवेक्षमाणः ॥"

इति श्रीवामनपुराणे १४ अध्यायः ॥*॥

अन्यत् पाद्मे स्वर्गखण्डे २८ । ३० । ३१ अध्यायेषु विष्णुपुराणे ३ अंशे ११ अध्याये मार्कण्डेयपुराणे सदाचारनामाध्याये चालोकनीयम् ।

(सत् साधुराचारो यस्य ।) त्रि । यथा, कथासरित्सागरे । २ । ३९ ।
"कात्यायनो जगादैनमुपविष्टः सभान्तरे ।
सदाचारो भवानेव कथमेतां मतिं गतः ॥"

सदाचारवान्, [त्] त्रि, सदाचारविशिष्टः । सदाचारी । सदाचारशब्दादस्त्यर्थे मतुप्प्रत्ययः ॥ (यथा, मनुः । ४ । १५८ ।
"सर्व्वलक्षणहीनोऽपि यः
श्रद्दधानोऽनसूयश्च शतं वर्षाणि जीवति ॥")

सदातनः, पुं, (सदा भवः । सदा : ... मिति । ४ । ३ । २३ । इति चकारे च ।) विष्णुः । इति त्रिकाण्डशेषः ॥ ... इत्यमरः ॥ (यथा, भट्टिः । ५ । ६५ ।
"सायन्तनीं तिथिप्रण्यः पङ्कजानां दि...
कान्तिं कान्त्या सदातन्या ह्रे... स्त्रियाः ॥")

सदातोया, स्त्री, (सदा तोयं यत्र ।) इति शब्दचन्द्रिका ॥ करतोया । इति गौरीशब्ददर्शनात् ॥

सदादानः, पुं, (सदा दानं मदजलं यस्य ।) वतः । गणेशः । मत्तहस्ती । इति नित्यदाने, त्रि ॥

सदानन्दः, पुं, (सदा आनन्दो यस्य ।) यथा,—
"सदाशिवः सदाकर्त्ता
सदानन्दः सदावर्त्ता सदाधर्म्मविवर्जितः ।"
इति श्रीशिवरहस्ये पार्व्वतीश्वरसंवादे सहस्रनामस्तोत्रम् ॥ सततालादयुक्ते, त्रि ।
"समानन्दे सदानन्दः सदानन्दो भविष्यति
ममानन्दे निरानन्दो ..."

सदानर्त्तः, पुं, (सदा नृत्यतीति । ...) खञ्जनपक्षी । इति शब्दचन्द्रिका ॥ नृत्यकारके, त्रि ॥

सदानीरवहा, स्त्री, (वहतीति । वह + ... सर्व्वदा नीरस्य वहा ।) करतोया नदी । इति शब्दरत्नावली ॥

सदानीरा, स्त्री, (सदा नीरं यस्याः ।) नदी । इत्यमरः ॥ गौरीविवाहसमये करगलितसम्प्रदानतोयप्रभवत्वात् करतोया विद्यते अस्येति करतोया अयं व्यापत्ये एतद्भिन्नं सर्व्वा नदी रजस्वला । न रजस्वला । अतएव सदा सर्व्वदा इति सदानीरा । तथा च स्मृतिः ।
"कर्कटादौ देवी त्र्यहं गङ्गा रजस्वला ।
सर्व्वा रक्तवहा नद्यः करतोयाम्बुवाहिनी ।"
(यथा, महाभारते । २ । २० । २७ ।
"गण्डकीञ्च सदानीरां शर्करावर्त्तमेव च ।
एकपर्व्वतके नद्यः क्रमेणैत्याव्रजन्त ते ॥"
निरन्तरजलपूर्णे मधुजलपूर्णे च त्रि ।
पार्य्यातिसमस्थाम् । २२४ ।

"चिरपरिचितद्वारमिलदलवकलापि-
हमावभिरचिता ।
पनोतीव कृताल्पा हरिरिदानीं सदानीरा ॥")
सदापुष्पः, पुं, (सदा पुष्पं यस्य ।) नारिकेलवृक्षः ।
इति शब्दमाला ॥ सर्व्वदाशुभयुक्ते, त्रि ॥
यथा, महाभारते । १४ । ३५ । २०-२२ ।
"सत्त्वबीजमयो बुद्धिस्कन्धमयो महान् ।
महाहङ्कारविटप इन्द्रियाद्‌ङ्कुरकोटरः ॥
महाभूतविशेषश्च विशेषप्रतिशाखवान् ।
सदापर्णः सदापुष्पः सदाशुभफलोदयः ॥
आजीवः सर्व्वभूतानां ब्रह्मबीजः सनातनः ।
एतज्ज्ञात्वा च तत्त्वानि ज्ञानेन परमासिना ॥
छित्त्वा चामरतां प्राप्य जहाति मृत्युजन्मनी ॥"
सदापुष्पी, स्त्री, (सदा पुष्पं यस्याः । ङीप् ।)
रक्तार्कवृक्षः । इति रत्नमाला ॥
सदाप्रसूनः, पुं, (सदा प्रसूनं यस्य ।) रोहितकः ।
अर्कः । कुन्दः । इति राजनिर्घण्टः ॥
सदाफलः, पुं, (सदा फलमस्य ।) श्रीफलः ।
नारिकेलः । उडुम्बरः । इति मेदिनी ॥ बिल्वः ।
इति जटाधरः ॥
सदाफला, स्त्री, (सदा फलं यस्याः ।) विमन्थि-
गुल्मम् । इति राजनिर्घण्टः ॥ वार्त्ताकुविशेषः ।
सदा बेगुन इति कुल्ली बेगुन इति टंकी बेगुन
इति च भाषा । अस्या गुणाः ।
"सदाफला त्रिदोषघ्नी रक्तपित्तप्रसादनी ।
कटुकण्डूहरी चैव वार्त्ताकीगुणवत्तरा ॥"
इति राजवल्लभः ॥
सदाभद्रा, स्त्री, (सदा भद्रमस्याः ।) गम्भारी-
वृक्षः । इति रत्नमाला ॥
सदायोगी, [न्] पुं, (सदा सर्व्वस्मिन् काले योगी ।
विष्णुः । इति त्रिकाण्डशेषः ॥ हरिशयने मधु-
मांसवर्ज्जनफलभागी । यथा,—
"सदामुनिः सदायोगी मधुमांसस्य वर्ज्जनात् ।
निराधीर्निरुगोजस्वी विष्णुभक्तश्च जायते ॥"
इति तिथ्यादितत्त्वम् ॥
सदृक्, [श्] त्रि, (समान इव दृश्यतेऽसौ ।
समान + दृश् + "समानान्ययोश्चेति वक्तव्यम् ।"
३ । २ । ६० । इत्यस्य वार्त्तिकोक्त्या क्विन् । "दृक्-
दृशवतुषु ।" ६ । ३ । ८९ । इति समानस्य
सः ।) तुल्यम् । इत्यमरः ॥ (यथा, कथा-
सरित्सागरे । ३८ । ८८ ।
"न त्वया सदृगन्योऽस्ति वै लोकेऽपि धनुर्धरः ।"
सदृक्षः, त्रि, (समान इव दृश्यते इति । समान +
दृश + क्सः । समानस्य सादेशः ।) सदृशः ।
इत्यमरः ॥ (यथा, भागवते । ३ । १ । २८ ।
"कच्चिद्धरेः सौम्य सुतः सदृक्ष
आस्तेऽग्रणी रथिनां साधु साम्बः ॥")
सदृशः, त्रि, (समान इव दृश्यतेऽसौ । समान +
दृश + कञ् । "दृक्दृशवतुषु ।" ६ । ३ । ८९ ।
इति समानस्य सः ।) समः । इत्यमरः ॥
यथा, रघुः । १ । १५ ।
"आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः ।

आगमैः सदृशारम्भ आरम्भसदृशोदयः ॥")
उचितः । इति मेदिनी ॥
सदृशस्पन्दनं, क्ली, निस्पन्दः । इति त्रिकाण्डशेषः ।
सदेशः, त्रि, (देशेन सह वर्त्तमानः ।) निकटः ।
इत्यमरः ॥ देशान्वितः । यथा,—
"सदेशसवेशौ निकटे देशवेशान्वितौ क्रमात् ।"
इति धरणिः ॥
सद्भूतः, त्रि, (सन् भूतः ।) सत्यम् । इति
हेमचन्द्रः ॥ (यथा, हरिवंशे । १४८ । ४४ ।
"तदस्य द्विगुणा वाच्याः प्रद्युम्नस्य महात्मनः ।
सद्भूताः कुलरूपस्य शीलस्य वयसस्तथा ॥")
सद्म, [न्] क्ली, (सीदन्त्यत्रेति सद + मनिन् ।)
गृहम् । इत्यमरः ॥ (यथा, रघुः । ३ । १८ ।
"न केवलं सद्मनि मागधीपतेः
पथि व्यजृम्भन्त दिवौकसामपि ॥"
"विशीर्य्यते शिलादिषु पातात् विशीर्य्यतेऽनेन
कुट्यादय इति वा । गच्छति वागच्छति नित्यं
गम्यते वा प्राप्तिभिः । अवसादयति पिपासा-
युक्तं वा । सदॢ विशरणगत्यवसादनेषु +
मनिन् ।" इति निघण्टुटीका । १ । १२।६१)
जलम् । इति मेदिनी ॥ (सीदन्त्यत्र अवसादयन्ते
प्राणिनो यत्रेति । संग्रामः । इति निघण्टुः ।
२ । १७ ॥)
सद्यः, [स्] अव्य, (समानेऽहनि इति । "सद्यः
परुत्परार्य्यैषम इति ।" ५ । ३ । २२ । इति
द्यप्रत्ययः समानस्य सभावश्च निपात्यते ।)
तत्क्षणम् । तत्पर्य्यायः । सपदि २ इत्यमरः ॥
द्वे तत्क्षणे तत्काले । समानेऽह्नि सद्यः कुतः क
कुत इत्यादिना निपातः । सद्यः पतति मांसेन
इति सपदि मुकुलिताक्षीम् । इयं दन्त्यादि ।
इति भरतः ॥
सद्यःकृतं, क्ली,(सद्यस्तत्क्षणात् कृतम् ।)नाम ।
इति त्रिकाण्डशेषः ॥ तत्क्षणकृते, त्रि ॥
सद्यःप्राणकरः, त्रि, (सद्यस्तत्क्षणात् प्राणस्य
बलस्य करः ।) तत्क्षणात् बलकारकद्रव्यादिः ।
यथा, चाणक्ये ।
"सद्योमांसं नवान्नञ्च बाला स्त्री क्षीरभोजनम् ।
घृतमुष्णोदकञ्चैव सद्यःप्राणकराणि षट् ॥"
सद्यःप्राणहरः, त्रि, (सद्यः प्राणस्य बलस्य हरः ।
तत्क्षणात् बलायुषोर्नाशकद्रव्यादि । यथा,—
"शुष्कं मांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधि ।
प्रभाते मैथुनं निद्रा सद्यःप्राणहराणि षट् ॥
इति चाणक्यम् ॥
सद्यःशुद्धिः, स्त्री,(सद्यस्तत्क्षणात् शुद्धिः ।)सद्यः-
शौचम् । यथा,—
"देशान्तरमृते बाले सद्यःशुद्धिर्यतौ मृते ॥"
इति गारुडे १०७ अध्यायः ॥
सद्यःशौचा, स्त्री, (सद्यःशौचो यस्याः । कपि-
कच्छूः । इति शब्दचन्द्रिका ॥
सद्यःशौचं, क्ली, (सद्य एव शौचं शुद्धिः ।)तत्-
क्षणाच्छुद्धिः । यथा,—
"शिल्पिनः कारवो वैद्या दासीदासाश्च भृत्यकाः ।
अग्निमान् श्रोत्रियो राजा सद्यःशौचाः प्रकी-
र्त्तिताः ॥"
इति गारुडे १०७ अध्यायः ॥
अन्यच्च ।
"कारवः शिल्पिनो वैद्या दासीदासास्तथैव च ।
दातारो नियमी चैव ब्रह्मविद्‌ब्रह्मचारिणौ ॥
सत्रिणो व्रतिनस्तावत् सद्यःशौचा उदाहृताः ।
राजा चैवाभिषिक्तश्च प्राणः सत्रिण एव च ॥
यज्ञे विवाहकाले च देवयागे तथैव च ।
सद्यःशौचं समाख्यातं दुर्भिक्षे वाप्युपद्रवे ॥
डिम्बाहवहतानाञ्च विद्युता पार्थिवैर्द्विजैः ।
सद्यःशौचं समाख्यातं सजातिमरणे तथा ॥
अग्नौ मरुप्रपतने वीराध्वन्याप्यनाशके ।
ब्राह्मणार्थे च संन्यस्ते सद्यःशौचं विधीयते ॥"
इति कौर्म्मे उपविभागे २२ अध्यायः ॥ ०॥
अपरञ्च । अथ सद्यःशौचम् । तत्र विष्णुः ।
नाशौचं राज्ञां राजकर्म्मणि न व्रतिनां व्रते न
सत्रिणां सत्रे न कारूणां स्वकर्म्मणि न
राजाज्ञाकारिणां तदिच्छया न देवप्रतिष्ठा-
विवाहयोः पूर्व्वसंहृतयोः इति । सत्रिणां
नित्यप्रवृत्तान्नदानानां सत्रे अन्नदाने । कारवः
सूपकाराद्याः । आदिपुराणे ।
"सूपकारेण यत् कर्म्म करणीयं नरेष्विह ।
तदन्यो नैव शक्नोति तस्माच्छुद्धः स सूपकृत् ॥"
कूर्म्मपुराणे ।
"कारवः शिल्पिनो वैद्या दासा दास्यस्तथैव च ।
दातारो नियमी चैव ब्रह्मविद्‌ब्रह्मचारिणौ ।
सत्रिणो व्रतिनस्तावत् सद्यःशौचा उदाहृताः ॥"
आदिपुराणे ।
"शिल्पिनश्चित्रकाराद्याः कर्म्म यत् साधयन्त्युत ।
तत् कर्म्म नान्यो जानाति तस्मात् शुद्धः
स्वकर्म्मणि ॥
दासा दास्यश्च यत् कर्म्म कुर्व्वन्त्यपि च लीलया ।
तदन्यो न क्षमः कर्त्तुं तेन ते शुचयः स्मृताः ॥"
चित्रकारादिरूपाः शिल्पिनः । आद्यशब्दाद्वस्त्र-
निर्णेजकाद्याः । शातातपः ।
"मूल्यकर्म्मकराः शूद्रा दासा दास्यस्तथैव च ।
स्नाने शरीरसंस्कारे गृहकर्म्मण्यदूषिताः ॥"
स्मृतिः ।
"सद्यःक्रीतो गर्भदासो भक्तदासस्तथाहृत-
श्शुचिः ॥"
वैद्या अपि चिकित्सायामेव । तथा च स्मृतिः ।
"चिकित्सको यत् कुरुते तदन्येन न शक्यते ।
तस्मात् चिकित्सकः स्पर्शे शुद्धो भवति नित्यशः ॥"
दातार आवश्यकप्रत्यहं गोभूमिहिरण्यादि-
दाने प्रवृत्ताः । तेषां तद्दाने एव । प्रत्यहं
दानञ्च । दातव्यं प्रत्यहं पात्रे इति याज्ञ-
वल्क्यात् । कादाचित्कदानकारिणान्तु दाने
प्रक्रान्ते अशौचं नास्ति तावत् यावत्तत् कर्म्म
कुर्व्वन्ति इति । हारलताप्येवम् । [illegible]पत-
द्रव्यदानेऽपि नाशौचम् । य[illegible] ता-
वदारायाम् ।

"पूर्व्वं सङ्कल्पितं द्रव्यं दीयमानं न दुष्यति ॥"
इति ॥

आदिपुराणे ।
"निवृत्ते कृच्छ्रहोमादौ ब्राह्मणादिषु भोजने ।
गृहीतनियमस्यापि न स्यादन्यस्य कस्यचित् ॥
निमन्त्रितेषु विप्रेषु प्रारब्धे श्राद्धकर्म्मणि ।
निमन्त्रणाद्धि विप्रस्य स्वाध्यायादिरतस्य च ।
देहे पितृषु तिष्ठत्सु नाशौचं विद्यते क्वचित् ॥"
प्राजापत्यादिकृच्छ्रे समाप्ते होमयागजपेषु समाप्तेषु सम्पूर्णार्थमवश्यं मया ब्राह्मणा भोजयितव्या इति गृहीतनियमो यस्तस्याशौचेऽन्यकुलजातानामपि भुञ्जानानां दोषाभावः । कस्यचिद्दातृभोक्त्रोरित्यर्थः । एवं प्रारब्धश्राद्धेऽपि क्वचिदित्यनेन दातृभोक्त्रोरशौचाभावः ॥
तथा च विष्णुः ।
"व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्च्चने जपे ।
आरब्धे सूतकं न स्यादनारब्धे तु सूतकम् ॥"
इति ॥

पराशरः ।
"दीक्षितेष्वभिषिक्तेषु व्रततीर्थपरेषु च ।
तपोदानप्रसक्तेषु नाशौचं मृतसूतके ॥"
यजमानानां सोमयागाङ्गदीक्षणीयेष्टौ कृतायां दीक्षितत्वं भवति तेन दीक्षणीयेष्ट्युत्तरकालं यजमानस्य यत् कर्म्म तत्राशौचं नास्ति । अभिषिक्तेषु च क्षत्रियनृपतिषु । तीर्थं गङ्गादि । गुरुरिति कश्चित् ॥ कालमाधवीये कूर्म्मपुराणम् ।
"काम्योपवासे प्रक्रान्ते त्वन्तरा मृतसूतके ।
तत्र काम्यव्रतं कुर्य्यात् दानार्च्चनविवर्ज्जितम् ॥"
तत्र दानार्च्चनं स्वयं वर्ज्जयेत् अन्यद्वारा तु कारयेत् । तथा च मत्स्यपुराणम् ।
"गर्भिणी सूतिका नक्तं कुमारी च रजस्वला ।
यदाशुद्धा तदान्येन कारयेत् क्रियते सदा ॥"
उपवासाचरणे गर्भादिपीड़ासम्भावनायां नक्तं भोजनं कुर्य्यात् ।
"उपवासेष्वशक्तस्य तदेव फलमिच्छतः ।
अनभ्यासेन रोगाणां किमिष्टं व्रतमुच्यताम् ॥"
इति नारदप्रश्नानन्तरम् ।
"उपवासेष्वशक्तानां नक्तं भोजनमिष्यते ।"
इति मत्स्यपुराण-परमेश्वरप्रतिवचनात् ।
स्वयमशुद्धा सुतद्वारा पूजादिकं कारयेत् ।
कायिकमुपवासादि सदा शुद्धाशुद्धिकाले स्वयं क्रियते । स्मृतिपरिभाषापामर्थ्यं (?) विष्णुः ।
"बहुकालिकसङ्कल्पो गृहीतश्च पुरा यदि ।
सूतके मृतके चैव व्रतं तन्नैव दुष्यति ॥"
एतत्काम्यव्रतपरम् । नित्यानान्त्वारब्धानामनारब्धानामविशेषेण कर्त्तव्यता । नाशौचमित्यनुवृत्तौ ब्रह्मपुराणम् ।
"नैष्ठिकस्याप्यरण्यस्य भिक्षार्थं-प्रस्थितस्य च ॥"
नैष्ठिकस्य ब्रह्मचारिविशेषस्य । अन्यस्य चतुर्थाश्रमिणः । अशौचिभिक्षापक्षे दोषाभावः । इति वाचस्पतिप्रभृतयः ॥ कौर्म्मे ।
"सद्यःशौचं समाख्यातं दुर्भिक्षे चाप्युपप्लवे ।
डिम्बाहवहतानाञ्च विद्युता पार्थिवैर्द्विजैः ।
सद्यःशौचं समाख्यातं शापादिमरणे तथा ॥"
उपप्लवे राजविप्लवे । औपसर्गिकात्यन्तमरकपीड़ने च सद्यःशौचमुक्तम् । तथा च पराशरः ।
"उपसर्गमृते चैव सद्यःशौचं विधीयते ।"
अतएव ।
"आपद्यपि च कष्टायां सद्यःशौचं विधीयते ।"
इति याज्ञवल्क्यवचने चनिवृत्तमहागूलपाचि (?) प्रभृतिभिरौपसर्गिकात्यन्तमरकपीड़ायां सद्यःशौचं विधीयते इत्युक्तम् । उपसर्गश्च विविधोत्पातः । तथा च गर्गसंहितावार्हस्पत्ययोः ।
"अतिलोभादसत्याद्वा नास्तिक्याद्वाप्यधर्म्मतः ।
नरापचाराच्चियतमुपसर्गः प्रवर्त्तते ॥
अतोऽपचारान्नियतमपवर्ज्जन्ति देवताः ।
ताः सृजन्त्यद्भुतांस्तांस्तु दिव्यनाभसभूमिजान् ॥
त एव त्रिविधा लोके उत्पाता देवनिर्म्मिताः ।
विचरन्ति विनाशाय रूपैः सम्भावयन्ति च ॥"
यद्यप्युपसर्गः स्मृतौ रोगभेदोपप्लवयोरपीति विश्वकोषादुपसर्गस्योभयवाचकत्वं तथाप्यत्र मुनिप्रयुक्तत्वेनान्तरङ्गत्वात् त्रिविधोत्पातात्मकोपसर्गो गृह्यते न तु रोगविशेषात्मक इति । एतेनोपसृजन्तीति व्युत्पत्त्या देहाभ्यन्तर एव यावद्वर्त्तते तावत्कालमरण एव सद्यःशौचं बहिर्भावे व्रणपरम्परया मरणे सति स्वजात्युक्ताशौचमेवेति स्वाद्यमिति दर्शनस्मृतिसारप्रदीपा इति वाचस्पतिमिश्रोक्तं हेयम् । द्विजैर्ब्राह्मणैः शापादीत्यादिशब्देनाभिचारस्तस्य ग्रहणम् । ब्रह्मकूर्म्मपुराणाभ्यां यद्ब्राह्मणहतस्याशौचाभाव उक्तः स बुद्धिपूर्व्वकहनने बोद्धव्यः । प्रमादहते त्वशौचावश्यकत्वे अन्यथा मरीचिवचनं निर्व्विषयं स्यात् । यथा,—
"विषप्रसृतापदाहितिर्य्यग्ब्राह्मणघातिनाम् ।
चतुर्द्दश्यां क्रिया कार्य्या अन्येषान्तु विगर्हिता ।
विषादिप्रयुक्तचर्य्यात् ब्राह्मणहतघातोऽस्यास्तीति प्रतीयते । यस्मात् ये च वै ब्राह्मणैर्हता इति ब्रह्मपुराणीयं साधकत्वेनोपन्यस्तं श्राद्धविवेके तच्चिन्त्यम् ।
"महापातकिनो ये च पतितास्ते उदाहृताः ।"
इत्युत्तरार्द्धेन पातित्यमभिधाय तेषां श्राद्धनिषेधात् । जावालः ।
"दुर्भिक्षे राष्ट्रसम्पाते अकस्मादब्राह्मघातिते ।
पतितेऽनग्रमग्ने ते विदेशस्थे शिशौ न च ॥"
नाशौचमित्यर्थः । इति शुद्धितत्त्वम् ॥

सद्यस्कः, त्रि, (सद्यः कायतीति । कै + कः ।) नूतनम् । इति हेमचन्द्रः ॥ (यथा, सुश्रुते । १ । ४५ ।
"नवनीतं पुनः सद्यस्कं लघु सुकुमारं मधुरमिति ॥")

सद्योजातः, पुं, (सद्यस्तत्क्षणात् जातः ।) वत्सः । इति शब्दचन्द्रिका ॥ शिवः । यथा,—
"सद्येनानाविधैर्युक्तं ब्राह्मणाय निवेदयेत् ।
प्रीयतां देवदेवोऽत्र सद्योजातः ।" इति मात्स्ये शिवचतुर्द्दशीव्रते ९८ (?)
सद्योजाताय नमः । इति आगममन्त्रः । इति पञ्चे त्रि ॥

सद्योभावी, [न्] पुं, (सद्यो भवतीति । णिनिः ।) तर्णकः । सद्योजातवत्सः । इति शब्दचन्द्रिका ॥

सद्रुः, त्रि, (सीदति गच्छतीति । "दाभेट्‌सिशदसदो रुः ।" ३ । ३ । १५९ । रुः ।) गमनकर्त्ता । इति

सद्वसथः, पुं, ग्रामः । ... प्रत्ययेन निष्पन्नः । इति वसधातोरथप्रत्यये संवसथ इति मुग्धं निष्पादितम् ॥

सद्वृत्तं, क्ली, (सत् वृत्तम् ।) साधुसदाचारितम् । इति जटाधरः ॥ (सरित्सागरे । ५१ । २२० ।
...
प्राप्यालङ्कारवतीं भार्य्यामिव सुकविस्तद्वृत्तम् ।
तद्युक्ते त्रि । यथा,—
"मासमल्पसमोलैस्तु सद्वृत्तैर्वदान्यैः
सद्वृत्तसन्निकर्षो हि क्षणार्द्धमपि शस्यते ।"
इति ...

सद्वृत्तिभाक्, [ज्] त्रि, (सद्वृत्तिं भजते । भज + क्विप् ।) सद्वृत्तिविशिष्टः । यथा, सश्यास्म् ।
"पथ्याशिनां शीलवतां नराणां
सद्वृत्तिभाजां विजितेन्द्रियाणाम् ।
एवंविधानामिदमायुरग्र्य-
चिन्त्यं सदा ह्यत्रमुनिप्रसादः ॥"
इति भावप्रकाशः ॥

सधर्म्मचारिणी, स्त्री, (सहधर्म्मं चरतीति । णिनिः । "चोपसर्ज्जनस्य । ६ । ३ । ८२ ।" सहस्य सः ।) भार्य्या । यथा,—
"सधर्म्मचारिणी पत्नी जाया च गृहिणी"
इति ...
(यथा, महाभारते । १३ । १५० । ४८ ।
"एतन्मे संशयं सर्व्वं भगवन् वक्तुमर्हसि वै प्रभो ।
सधर्म्मचारिणी चाहं भक्ता चेति ...)

सधर्म्मा, [न्] त्रि, (समानो धर्म्मो यस्य । "धर्म्मादनिच् केवलात् ।" ५ । ४ । १२४ । अनिच् ।) सदृशः । यथा,—
"तुल्यः समानः सदृश सरूपः सदृशः ...
साधारणसधर्म्माणौ सवर्णः सन्निभः ..."
इति ...
समानधर्म्मयुक्तश्च ॥ (यथा, मनुः । १ । ...
"सजातिजानन्तरजाः षट्‌सुता द्विजधर्म्मिणः ।
शूद्राणान्तु सधर्म्माणः सर्व्वेऽपध्वंसजाः स्मृताः ॥"

...र्म्मिणी, स्त्री, (सह धर्म्मोऽस्या अस्तीति । ...र्म्मशीलवर्णान्ताच ।" ५ । २ । १३२ । इति ...: । "वोपसर्जनस्य ।" ६ । ३ । ८२ । इति ...स्य सः ।) भार्य्या । यथा,—
"...शालिनी वधूटी स्थाणिरस्याय सधर्म्मिणी ।
। सहचरी पाणिगृहीती गृहिणी गृहा ॥"
इति हेमचन्द्रः ॥

...र्म्मी, [न्] त्रि, (सह धर्म्मोऽस्त्यस्येति । ...र्म्मशीलवर्णान्ताच ।" ५ । २ । १३२ । इति ...: । "वोपसर्जनस्य ।" ६ । ३ । ८२ । इति ...स्य सः ।) समानधर्म्माधारे । यथा,—
"...णूनां सलोकोऽन्येषां समानोऽथ सधर्म्मि-
णाम् ॥"
इत्यमरः ॥

...ा, स्त्री, (धवेन भर्त्रा सह वर्त्तमाना ।) ...वत्पतिका । तत्पर्य्यायः । सभर्त्तृका २ पति-...ी ३ सनाथा ४ । इति जटाधरः ॥ अस्या ...ं यथा,—
"...र्त्तुः शुश्रूषणं स्त्रीणां परो धर्म्मो ह्यमायया ।
...बन्धूनाञ्च कल्याण्यः प्रजानाञ्चानुपोषणम् ॥
...शीलो दुर्भगो वृद्धो जड़ो रोग्यधनोऽपि वा ।
...: स्त्रीभिर्न हातव्यो लोकेप्सुभिरपातकी ॥"
इति श्रीभागवते १० स्कन्धे २९ अध्यायः ॥

...:, पुं, अग्निः । इति त्रिकाण्डशेषः ॥

...:, [स्] पुं, (सहते इति । सह + "सहेर्धच ।" ...उ० २ । ११४ । इति इसिन् धयान्तादेशः ।) ...भः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

...ची, स्त्री, (सह अञ्चति या सा । अञ्च + ...त्विगादिना क्विन् । सहस्य सध्रिः । अञ्चते-...रुपसंख्यानं इति ङीप् । अच इत्यकारलोपः । ...विति दीर्घः ।) सखी । इति हेमचन्द्रः ॥ यथा, भट्टिः । ६ । ७ ।
"...तैलां सौमित्रिणा त्यक्तां सध्रीचीं वसुमेकिकाम् ।
...रिष्यायामन्त काकुत्स्थः त्वयि चेमं सुदुर्लभम् ॥")

...ङ्, [च्] त्रि, (सह अञ्चतीति । अञ्च गतौ + ...ऋत्विगादिना क्विन् । सहस्य सध्रिः ।) सहचरः ...त्यमरः ॥ (यथा, भागवते । २ । ७ । ४० ।
"सध्र्यङ् नियम्य यतयो यमकर्त्तहेतिं ।
...जह्युः स्वराडिव निपानखनित्रमिन्द्रः ॥"
...म्यक् । यथा, तत्रैव । ४ । २७ । १ ।
"इत्थं पुरञ्जनं सध्र्यग्वशमानीय विभ्रमैः ।
...रञ्जनी महाराज रेमे रमयती पतिम् ॥")

...न्, पुं, व्याकरणीयप्रत्ययविशेषः । तत्सूत्रादि ...यथा । सन्विच्छायाम् । धोः परः सन् स्यादि-...च्छायाम् । अत्तुमिच्छति जिघत्सति । इति ...मुग्धबोधव्याकरणे सनन्तपादः ॥*॥ प्रथमैक-...वचनान्तपुंलिङ्गसच्छब्दरूपोऽप्येवम् । तदुदा-हरणम् । यथा,—
"रामं नमति सानन्दं धर्म्मानभिनिविश्य सन् ॥"
इति तत्रैव कारकपादः ॥

...नः, पुं, स्त्री, हस्तिकर्णास्फालः । यथा । कर्णा-...स्फाले सनः सनी । इति शब्दरत्नावली ॥

सनः, पुं, घपनापाटनिहृतः । इति शब्दचन्द्रिका ॥ (सनत्कुमारः । सनकः । सनन्दनः । सनातनः । दाने, क्ली. । सम्भक्ते, त्रि ॥ यथा, भागवते । २ । ७ । ५ ।
"तप्तं तपो विविधलोकसिसृक्षया मे
आदौ सनात् स्वतपसः स चतुःसनोऽभूत् ॥"
"स हरिः चतुःसनोऽभूत् । सनत्कुमारः सनकः सनन्दनः सनातन इति चत्वारः सनशब्दा नाम्नि यस्य सः । कथम्भूतात् स्वतपसः सनात् अखण्डितात् यद्वा स्वतपसः सनात् दानात् समर्पणादित्यर्थः षणु दाने ।" इति तट्टीकायां श्रीधरस्वामी ॥)

सनकः, पुं, विष्णुपारिषदभेदः । इति शब्दरत्नावली ॥ स तु ब्रह्मणश्चतुष्पुत्रान्तर्गतपुत्रविशेषः । यथा,—
"दृष्ट्वा पापीयसीं सृष्टिं नात्मानं बह्वमन्यत ।
भगवद्ध्यानपूतेन मनसान्यांस्ततोऽसृजत् ॥
सनकञ्च सनन्दञ्च सनातनमथात्मभूः ।
सनत्कुमारञ्च मुनीन् निष्क्रियानूर्द्ध्वरेतसः ॥
तान् बभाषे स्वभूः पुत्रान् प्रजाः सृजत पुत्रकाः ।
तन्नैच्छन्मोक्षधर्म्माणो वासुदेवपरायणाः ॥"
इति श्रीभागवते ३ स्कन्धे १२ अध्यायः ॥
तस्य वासस्थानं जनलोकः । इति काशीखण्डम् ॥

सनत्, पुं, ब्रह्मा । इति त्रिकाण्डशेषशब्दरत्नावल्यौ ॥

सनत् व्य सर्व्वदा । इत्यमरटीकायां रामाश्रमः ॥

सनत्कुमारः, पुं, (सनतो ब्रह्मणः कुमारः ।) ब्रह्मणः पुत्रः । तत्पर्य्यायः । वैधात्रः २ । इत्यमरः ॥ वैधात्रिः ३ । इति भरतः ॥ धातृपुत्रः ४ वेधायः ५ । इति शब्दरत्नावली ॥ तन्नामव्युत्पत्तिर्यथा । सनत् ब्रह्मा तस्य कुमारः सनत्कुमारः । सन्निव्यकुमारस्तेन सनत्कुमारो वापीति स्वामिमतम् । इति भरतः ॥ तन्नामकारणम् । यथा,—
"यथोत्पन्नस्तथैवाहं कुमार इति विद्धि माम् ।
तस्मात् सनत्कुमारेति नामैतन्मे प्रतिष्ठितम् ॥"
इति महाभारते हरिवंशः ॥*॥
स च धर्म्मस्यौरसेन अहिंसायां जातः पश्चात् ब्रह्मणो दत्तपुत्रः । अयं साध्यगणः । यथा,—
श्रीनारद उवाच ।
"कोऽयं सनत्कुमारेति यस्योक्तं ब्रह्मणा स्वयम् ।
तथापि तेन गदितं वद मामनुपूर्व्वशः ॥
पुलस्त्य उवाच ।
धर्म्मस्य भार्य्याहिंसाख्या तस्यां पुत्रचतुष्टयम् ।
समासं मुनिशार्द्दूल योगशास्त्रविचारकम् ॥
ज्येष्ठः सनत्कुमारोऽभूत् द्वितीयश्च सनातनः ।
तृतीयः सनको नाम चतुर्थश्च सनन्दनः ॥
सांख्यवेत्तारमपरं कपिलं वोढुमासुरिम् ।
दृष्ट्वा पञ्चशिखं श्रेष्ठं योगयुक्तं तपोनिधिम् ॥
ज्ञानयोगं न ते दद्युर्ज्यायांसोऽपि कनीयसाम् ।
ज्ञानमाद्यं महायोगं कपिलादिर्न चावदत् ॥
सनत्कुमारश्चाभ्येत्य ब्रह्माणं कमलोद्भवम् ।
अपृच्छद्योगविज्ञानं तमुवाच प्रजापतिः ॥
कथयिष्यामि ते सांख्यं यदि पुत्रेति मे वचः ।
शृणोषि कुरुषे तत्र ज्ञानं साध्य श्रुतो भव ॥
पितामहवचः श्रुत्वा साध्यः प्राह तपोधन ।
सत्यं हि तव पुत्रोऽहं देव योगं वदस्व माम् ॥
तमुवाच महायोगी त्वमाताधितरौ यदि ।
दाक्ष्येन च ततः सुतदायादो मेऽसि पुत्रकः ॥
सनत्कुमारः प्रोवाच दायादपरिकल्पना ।
येषां हि भवता प्रोक्ता तान् मे व्याख्यातुमर्हसि ॥
तदुक्तं साध्यमुख्येन वाक्यं श्रुत्वा पितामहः ॥
प्राह प्रहस्य भगवान् शृणु वत्सेति नारद ! ॥"
इति वामने ५७ । ५८ अध्यायौ ॥
स च पञ्चहायनवयस्कः चूड़ादिसंस्कारवेदसन्ध्याविहीनश्च । यथा,—
"तच्छ्रुत्वा हृष्टधीर्यो राजा रत्नभूषणभूषिताम् ।
गृहीत्वा कन्यकां रम्यां नारदाय ददौ मुदा ॥
गृहीत्वा च सभार्य्यं तं पुत्रं धाता मुदान्वितः ।
प्रययौ ब्रह्मलोकञ्च देवेन्द्रैर्मुनिभिः सह ॥
तत्राजगाम नग्नश्च प्रज्वलन् ब्रह्मतेजसा ।
सनत्कुमारो भगवान् साक्षाच्च बालको यथा ॥
सृष्टेः पूर्व्वञ्च वयसा यथैवं पञ्चहायनः ।
अचूड़ोऽनुपवीतश्च वेदसन्ध्याविहीनकः ॥
कृष्णेति मन्त्रं जपति यस्य नारायणो गुरुः ।
अनन्तकालकल्पश्च भ्रातृभिश्च त्रिभिः सह ॥
वैष्णवानामग्रणीर्गो ज्ञानिनाञ्च गुरोर्गुरुः ।
आराद्दृष्ट्वा नारदस्तं भ्रातरञ्च सतां वरम् ॥
सहसा शिरसा भूमौ दण्डवत् प्रणनाम तम् ।
उवाच नारदं बालः सहस्य परमार्थकम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २८ अध्यायः ॥
जिनमते द्वादशसार्व्वभौमान्तर्गतसार्व्वभौमभेदः इति हेमचन्द्रः ॥

सनन्दः, पुं, ब्रह्मणः पुत्रचतुष्टयान्तर्गतपुत्रविशेषः स तु जनलोकवासी । इति काशीखण्डम् ॥ ॥ स एव दिव्यमनुष्यः । अस्य तर्पणं निवीतिना प्रत्यङ्मुखेन प्राजापत्यतीर्थेन सागमेन कर्त्तव्यम् तदितरेण उदङ्मुखेन कर्त्तव्यम् । यथा दक्षः ।
"प्रादेशमात्रमुद्धृत्य सलिलं प्राङ्मुखः सुरान् ।
उदङ्मनुष्यांस्तृप्येत पितॄन् दक्षिणतस्तथा ॥
अग्रैस्तु तर्पयेद्देवान् मनुष्यान् कुशमध्यतः ।
पितॄंस्तु कुशमूलाग्रे विधिः कौशो यथाक्रमम् ॥
कृतोपवीती देवेभ्यो निवीती च भवेत्ततः ।
मनुष्यांस्तर्पयेद्भक्त्या ऋषिपुत्रानृषींस्तथा ॥
सनकश्च सनन्दश्च तृतीयश्च सनातनः ।
कपिलश्चासुरिश्चैव वोढुः पञ्चशिखस्तथा ।
सर्व्वे ते तृप्तिमायान्तु मद्दत्तेनाम्बुना सदा ॥"
अनेनाञ्जलिद्वयम् यथा,—
"एकैकमञ्जलिं देवा द्वौ द्वौ तु सनकादयः ।
अर्हन्ति पितरस्त्रीन् स्त्रियस्त्वेकैकमञ्ज-
लिम् ॥"
परिशिष्टप्रकाशधृतं सामवेदीयषड्विंशद्ब्राह्मणम् । मनुष्याणामेषा दिक् या प्रतीचीति । तत्र च ज्योतिष्टोमे श्रूयते । प्राचीं

देवा यमजन्न हविषा पिवन्ति सनोवीं मनुष्याः उद्दोषोनमहराः सनीवाम्बुदोषी मनुष्याः। विष्णुपुराणे ॥
"भाजायन्हेन सोर्येन मनुष्यान्तापयेत् सदम्।"
इत्याह्निकाचारतत्त्वम् ॥

सनपर्णी, स्त्री, (सनस्य पर्णमिव पर्णमस्याः। पाककर्णेति ङोष्।) शणपर्णी। इति शब्द-रत्नावली ॥

सनसूत्रं, क्ली, (सनस्य सूत्रम्।) पवित्रकम्। इति मस्तसूत्रवाले। सनस्य सूत्रं सनसूत्रं सनति ददाति सूत्रं सनः। सन षन दाने सन् सन-स्तालव्यादिर्मूर्द्धन्यषान्तः। इति भरतः। सनो दन्त्यादिर्दन्त्यसान्तः। इति केचित्। सनति षन दु ष दाने इत्यस्य रूपम्। सनो दन्त्यादिर्मूर्द्धन्यषान्त इत्यपरे। सम विष मनि काकच कोष काषा इति मूर्द्धन्यषान्ते विद्या-भरणः।
"कार्पासमुपवीतं स्यात् विप्रस्योर्द्धवृतं त्रिवृत्।
सनसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम् ॥"
इति मनुवचनात् पवित्रकमपि तदुच्यते। इत्य-मरटीकायां भरतः ॥

सना, व्य, नित्यम्। इत्यमरः ॥ (यथा, ऋग्वेदे। २।५४।८।
"सना पुराणमध्येम्यारात् ॥")

सनात्, व्य, नित्यम्। इत्यमरटीकायां रामाश्रमः॥ (चिरात्। यथा, ऋग्वेदे। ४।२०।६।
"सनादेव सहसे जात उग्रः ॥"
"सनादेव चिरादेव जात उत्पन्नः ॥" इति तद्-भाष्ये सायणः ॥) विष्णुः। इति तस्य सहस्र-नामस्तोत्रम् ॥

सनातनः, पुं, (सना भवः। "सायंचिरंप्राह्णे प्रगे इति।" ४।३।२३। इति ट्युट्युलौ तुट् च।) विष्णुः। शिवः। ब्रह्मा। पितॄणामतिथिः। इति हेमचन्द्रः ॥ दिव्यमनुष्यः। अस्य प्रमाणं सनत्कुमारशब्दे द्रष्टव्यम्। स च ब्रह्मणः पुत्रः। यथा,—
"सनत्कुमारो धर्मस्य सनकश्च सनातनः।
सनन्दश्चापि सूर्य्यश्च ये ऽन्ये वा ब्रह्मणः सुताः ॥
विषयेषा न ग्रहणं ते सान्ये जड़बुद्धयः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २१ अध्यायः ॥
स तु जनलोकवासी। इति काशीखण्डम् ॥
वह्निपुराणमते तु तपोलोकस्य इति भेदः। वैश्वानराः। इति मत्स्यपुराणम् ॥

सनातनः, त्रि, (सनाभवः। सायंचिरमिति ट्युट्युलौ तुट् च।) नित्यम्। इत्यमरः ॥ चिरन्तनः। इति विश्वः ॥ (यथा, मनुः। ७।९८।
"एषोऽनुपस्कृतः प्रोक्तो योधधर्मः सनातनः।
अस्माद्धर्मान्न च्यवेत क्षत्रियो घ्नन् रणे रिपून् ॥")

सनातनतमः, पुं, (अयमेषामतिशयेन सनातनः। तमप्।) विष्णुः। इति महाभारते तस्य सहस्रनामस्तोत्रे। १३।१४९।१०८ ॥

सनातनी, स्त्री, (सनातन + स्त्रियाम् ङीप्।) दुर्गा। लक्ष्मीः। सरस्वती। इति शब्दरत्ना-वली ॥ यथा च तन्त्रान्तरे,—
"सर्वकाले सदा प्रोक्ता विद्यमाने सनोति च।
सर्व्वत्र सर्व्वकालेषु विद्यमाना सनातनी ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४४ अध्यायः ॥
अपि च।
"निर्गुणस्य च नित्यस्य वाचकश्च सनातनः।
सदा नित्या निर्गुणा या कीर्त्तिता सा सना-तनी ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २७ अध्यायः ॥
अन्यच्च।
"स्थितिं करोति भूतानां सैव काले सनातनी।"
इति देवीमाहात्म्यम् ॥

सनाभा, स्त्री, (नाभेन सह वर्त्तमाना।) सोदर्य्या भगिनी। इति जटाधरः ॥ (सभुक्षिसीढे, त्रि। यथा, भागवते। १।११।८।
"भवो सनाभा भवता च यद्वर्द्ध
सैविदयानामपि दूरदर्शनम्।
प्रेमस्मितस्निग्धनिरीक्षणानन
पश्येम रूपं तव सर्व्वसौभगम् ॥")

सनाभिः, पुं, (समानो नाभिर्मूलमस्य। "ज्योति-र्जनपदेति।" ६।३।८५। इति समानस्य सः।) सपिण्डः। ज्ञातिः। इत्यमरमेदिनीकरौ॥ (यथा, मनुः। ५।७२।
"अपोह्य नैव कालेन शुध्यन्ति तु सनाभयः ॥")

सनाभिः, त्रि, (समानो नाभिर्यस्येति। समानस्य सः।) तुल्यः। इति मेदिनी ॥ स्नेहयुक्तः। इति शब्दरत्नावली ॥

सनामकः, पुं, शोभाञ्जनः। इति शब्दचन्द्रिका ॥ (समानं नाम यस्य।) समाननामयुक्ते, त्रि ॥ (यथा, हरिवंशे। ११।१४।
"स तासु जनयामास पुत्रिकासु सनामकान्।
दश पुत्रान् महाकायो वत्सदुर्व ऽतान् सदा ॥")

सनिः, पुं, (सन + "खनिकष्यज्यसीति।" उणा। ४।१३८। इति इः।) पूजा। दानम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (यथा, ऋग्वेदे। १।१००।११।
"तं सपन्ते सनयस्तं धनानि ॥"
"सनयो धनस्य दानानि सपन्ते सेवन्ते।" इति तद्भाष्ये सायणः ॥)

सनिः, पुं, स्त्री, (सन + "खनिकष्यज्यसीति।" उणा। ४।१३८। इति इः।) अध्येषणा। इत्यमरः॥ गुर्व्वादेः सत्कारपूर्व्वकं कश्चिदर्थे नियोजनम्। तच्च हे गुरो अस्माकं कर्म्म कुर्व्विं त्यादिरूपम्। सायते दीयते पुष्पादिकमत्र सनिः षन दु षन दाने नाम्नीति इः पाक्षीणादीति ईपि सनी च। अन्वेषणादिवदध्येषणा। इति भरतः ॥ दिक्। इति शब्दमाला ॥

सनितः, त्रि, प्रतिपन्नः। इति हेमचन्द्रः ॥

सनिष्ठीवं, क्ली, (निष्ठीवेन सह वर्त्तमानम्।) सनिष्ठेवम्। इत्यमरटीकायां भरतः ॥

सनीडं, क्ली, सन्निकृष्टम्। समीपम्। [illegible] [illegible] तेन सह तत्र [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] दोषाः [illegible] ॥

सनी, स्त्री, (सन + इः। वा ङीप्।) [illegible] इत्यमरः [illegible] [illegible] इति शब्दरत्नावली ॥

सनीडः, त्रि, (नीडेन [illegible]) निकटः। इत्यमरः ॥ (यथा, भट्टिः। [illegible]
"अभ्यास सनीडेःमो [illegible]
[illegible] ॥

सन्तः, पुं, संहननम्। इति शब्दचन्द्रिका। [illegible] [illegible] [illegible] ॥ [illegible] ।
रघुः। १।१०।
स सन्तः [illegible] [illegible]
[illegible] सन्तत्ये [illegible] [illegible]
[illegible]

सन्ततं, क्ली, (सम् + तन + क्त। समो वा हितततयोः इति पक्षे मलोपाभावः।) सततम्। त्रि। इत्यमरः ॥

सन्तताभ्यासः, पुं, (सन्ततं यथा तथा अभ्यासः।) निरन्तराभ्यासः। यथा। ध्यान। इति भूरिप्रयोगः ॥

सन्ततिः, स्त्री, (सम् + तन + क्तिन्।) इत्यमरः ॥ (यथा, रघुः। १।६९।
"सन्ततिः शुद्धवंश्या हि परत्रेह च शर्म्मणे।")
पंक्तिः। (यथा, कथासरित्सागरे। [illegible]
"तत् स्थूल [illegible]
हृदयाधीरतापि समं कन्या सुनीरद [illegible]
विस्तारः। (यथा, भागवते। १।[illegible]
"अदधात् यज्ञसन्तत्ये [illegible]
परम्पराभवः। पुत्रः। कन्या
(यथा, स्मृतिः।

सन्तप्तः, त्रि, (सम् + तप + क्तः।) दग्धदिग्धः। व्याप्तः। तत्पर्य्यायः। सन्तापितः २ धूपितः ३ धूपायितः ४ दूनः ५। [illegible] तप्तः ६। इति शब्दरत्नावली ॥ युक्तः। यथा,—
"आदिश्यदादीप्तजगत्तुकर्म्म
सिंहासनं तस्य सपादपीठम्।
सन्तप्तचामीकरवल्गुपक्ष्म
विभागविन्यस्तमहार्घरत्नम् ॥"
इति भट्टिकाव्ये ।

सन्तमसं, क्ली, (समन्तात् तमः। "अवसमन्धेभ्यस्तमसः।" ५।४।७९। इति अच्।) तमः। व्यापकान्धकारः। इत्यमरः। (यथा, माघे। ८।२२।
"अवधार्य्य कार्य्यगुरुतामभव-
न्न भयाय सान्द्रतमसन्तमसम् ॥")
मोहः। यथा,—

"सन्तापि किं नो दयसे दयाधन
स्त्वद्विमग्नं यदि वेत्थ मे मनः ।
निमज्जयन् सन्ततसि परायणं
विधिस्तु वाच्यः क्व तवागसः कथा ॥"
इति नैषधे ८ सर्गः ॥
र्ण, क्ली, (सन्तर्पयति इन्द्रियाणीति । सं +
+ णिच् + ल्युः ।) द्राक्षादाड़िमखर्ज्जूरो-
ोशर्करालाजाचूर्णमध्वाज्य-संमिलितम् ।
राजनिर्घण्टः ॥ तृप्तिकारके, त्रि । यथा,
"पुष्णो महाग्निप्रमभूतछ्वद्
सन्तर्पणो नाकसदां वरेण्यः ।
जस्वान लोकस्थितये स राजा
यथाध्वरे वह्निरभिप्रणीतः ॥"
इति भट्टिकाव्ये १ सर्गः ॥
नः, पुं, (सन्तनोति विस्तारयति पत्रपुष्पादी-
ि । सम् + तन विस्तारे + "तनोतेरुप-
ानम् ।" ३ । १ । १४० । इत्यस्य वार्त्ति-
ण्या णः ।) कल्पवृक्षः । (संतन्यते इति ।
+ घञ् ।) वंशः । इत्यमरः ॥ विस्तारः ।
ा, महाभारते । १ । १०३ । १० ।
ोरुत्पादयापत्यं सन्तानाय कुलस्य नः ।
योगात् महावाहो धर्मं कर्त्तुमिहार्हसि ॥")
त्यम् । इति मेदिनी ॥ (यथा, मनुः । ८। ५८ ।
वराद्वा सपिण्डाद्वा स्त्रिया सम्यक् नियुक्तया
ीप्सिताधिगन्तव्या सन्तानस्य परिक्षये ॥")
दिकपर्य्यायः । तुक् १ तोकम् २ तनयः ३
ल ४ तक्म ५ शेषः ६ अप्नः ७ गयः ८ जाः
अपत्यम् १० यहुः ११ सूनुः १२ नपात् १३
ा १४ वीजम् १५ । इति पञ्चदशापत्य-
मानि । इति वेदनिघण्टौ । २ । २ ॥ (सन्त-
शेषे, क्ली । यथा, महाभारते । ५ । ८६ । ४० ।
न्तानं नर्त्तकं घोरमास्यमोदकमष्टमम् ।
तैर्विद्धाः सर्व्व एव मरणं यान्ति मानवाः ॥")
ानिका, स्त्री, (सन्तानो विस्तारोऽस्त्यस्या
ति । सन्तान + ठन् ।) क्षीरसरः । मर्कट-
ालकः । क्षुरिकाफलम् । फेनः । इति हारा-
ली ॥ अस्याः गुणाः ।
न्तानिका गुरुः शीता वृष्या पित्तास्रवातजित्"
इति राजनिर्घण्टः ॥
मिष्टान्नविशेषः । सरभाजा इति भाषा । तत्-
रणप्रकारो यथा । दुग्धं शरावचतुष्टयं शर्क-
ार्द्धशरावपरिमितां घृतं शरावपादैकञ्च गृहीत्वा
ादुग्धे आवर्त्तनेन घनीभूते उष्णे स्थिते मन्थान-
दण्डेन मथनेन बहुतरफेनो भविष्यति । तत्फेन
र्द्धितदुग्धस्य तत्साङ्गारपरिरक्षणात् सरो
ायते । तं सरमर्द्धेन चतुष्कोणाकृतिं निर्म्माय
ृतेन भृष्ट्वा एकतारवद्धशर्करारसेमग्नं कुर्य्यात्
किन्तु तत्राधिकघर्षं न रचयेत् । इति पाक-
राजेश्वरः ॥ (जालकरज्जुः । यथा, सुश्रुते । १ । १ । ८ ।
"अत ऊर्द्ध्वं व्रणबन्धनद्रव्याण्युपदेक्ष्यामः । तद्-
यथा क्षौमकार्प्पास * * विदलरज्जुतूलफल-
सन्तानिकालौहानीति ॥")

सन्तापः, पुं, (सं + तप + घञ् ।) अग्निज-
तापः । तत्पर्य्यायः । संज्वरः २ । इत्यमरः ॥
तापः ३ शोषः ४ उष्मा ५ । इति राजनिर्घण्टः ॥
सम्यक् तापनञ्च ॥ (यथा, कथासरित्सागरे ।
१५ । ७५ ।
"जगमना ज्वरसन्तापपीड़ा गाढ़मवाप सः ॥"
दुःखम् । यथा, भागवते । ६ । १४ । ४१ ।
"दासीनां कोऽनु सन्तापः स्वामिनः परि-
चर्य्यया ।
अभीक्ष्णं लभ्यमानानां दास्या दासीव दुर्भगाः ॥")
सन्तापनः, पुं, (सन्तापयतीति । सं + तप +
णिच् + ल्युः ।) कामदेवस्य पञ्चवाणान्तर्गत-
वाणविशेषः । इति त्रिकाण्डशेषः ॥ सम्यक्-
तापकारके, त्रि ॥ (यथा, भागवते । ७ । १० । २६ ।
"दिष्ट्या ते निहतः पापो लोकसन्तापनो-
ऽसुरः ॥")
सन्तापितः, त्रि, (सं + तप + णिच् + क्तः ।
अध्वादिना श्रान्तः । इत्यमर-भरतौ ॥ अस्य
पर्य्यायः सन्तप्तशब्दे द्रष्टव्यः ॥
सन्तिः, स्त्री, (सनु दाने + क्तिच् । "सनः क्तिचि
लोपश्चास्यान्यतरस्याम् ।" ६ । ४ । ४५ । इति
नलोपाभावः ।) दानम् । अवसानम् । इत्य-
मरे सातिशब्दटीकायां नीलकण्ठः ॥ सतिश्च
सातिश्च सन्तिसातौ । सनोतेराशिषि तिशन्तस्य
पर्त्तौ निपात्यौ । पक्षे सनुतात् इति वाक्ये
तिकिकृते स्ववनेरिति इमुनिषेधे वनतेत्यत्र
तिकिवर्ज्जनात् नलोपाभावे सन्तिः । इति
मुग्धवोधटीकायां दुर्गादासः ॥ सन्तिशब्दो
निर्विसर्गश्चेत् अस त भावे इत्यस्मात् अन्ति-
प्रत्ययेन निष्पन्नः । यथा,—
"सन्ति रम्या जनपदा वह्वन्नाः परितः कुरून् ।"
इति महाभारते विराटपर्व्व ॥
सन्तुष्टः, त्रि, (सं + तुष + क्तः ।) सन्तोषयुक्तः ।
यथा,—
"गच्छध्वममराः सर्व्वे गृहीत्वार्घं स्वमालयम्
सन्तुष्टा वरमस्माकं दत्त्वेदानीं सुपूजिताः ॥"
इति छन्दोगवृषोत्सर्गतत्त्वम् ॥
सन्तोषः, पुं, (सं + तुष + घञ् ।) सन्तुष्टिः । तत्-
पर्य्यायः । तृप्तिः २ स्वास्थ्यम् ३ । इति हेम-
चन्द्रः ॥ (यथा, हितोपदेशे ।
"सन्तोषामृततृप्तानां यत् सुखं शान्तचेतसाम्
कुतस्तद्धनलुब्धानामितश्चेतश्च धावताम् ॥")
सन्दंशः, पुं, (सन्दशतीति । सं + दन्श + अच् ।)
कङ्कमुखः । इति हेमचन्द्रः ॥ सांड़ाशी इति
भाषा ॥ (यथा, मार्कण्डेये । २४ । ६३ ।
"निपातितानां भूपृष्ठे उद्धृत्याक्षि निरीक्षताम्
सन्दंशैः पश्य कृष्यन्ते नरैर्यास्यैर्मुखान्ततः ॥"
वैद्यशास्त्रोक्तयन्त्रविशेषः । यथा, सुश्रुते । १ । ७ ।
"तत्र मनःशरीरावाधकराणि शल्यानि तेषा-
माहरणोपायो यन्त्राणि । तानि षट्प्रकाराणि ।
तद्यथा । स्वस्तिकयन्त्राणि । सन्दंशयन्त्राणि ।
* * * द्वे सन्दंशयन्त्रे * * * सनिग्रहोऽनिग्रहश्च

सन्दंशौ षोड़शाङ्गुलौ भवतस्त्वङ्मांसशिरास्नायु-
गतशल्योद्धरणार्थमुपदिश्येते ॥")
सन्दंशिका, स्त्री, (सन्दंशतीयेति । सं + दंश +
ण्वुल् । टापि अत इत्वम् ।) क्षुद्रटी । सांड़ाशी
इति चिमटा इति च भाषा । लौहयन्त्रविशेषः ॥
कातारि इति भाषा । इति मेदिनी ॥
सन्दर्भः, पुं, (सं + दृभ ग्रन्थने + घञ् ।) रचना ।
इति हलायुधः ॥ (यथा, आर्य्यासप्तशत्याम् ।
७०० ।
"कविसमरसिंहनादः स्वरानुवादः सुधैक-
संवादः ।
विद्वद्विनोदकन्दः सन्दर्भोऽयं मया सृष्टः ॥")
प्रबन्धः । इति त्रिकाण्डशेषः ॥ ग्रन्थनम् ।
यथा,—
"सन्दर्भो रसना गुम्फः श्रन्थनं ग्रन्थनं समाः ।"
इति हेमचन्द्रः ॥
तस्य लक्षणं यथा,—
"गूढ़ार्थस्य प्रकाशश्च सारोक्तिः श्रेष्ठता तथा ।
नानार्थवत्त्वं वेद्यत्वं सन्दर्भः कथ्यते बुधैः ॥"
इति रूपसनातनगोस्वामिकृतश्रीभागवतीय-
षट्सन्दर्भस्य प्रथमसन्दर्भकारिका ॥
सन्दर्शनं, क्ली, (सं + दृश + ल्युट् ।) सम्यक्-
प्रकारेण दर्शनम् । यथा,—
"सन्दर्शनार्थमम्बाया नदीपुलिनसंस्थितः ।
स च वैश्यस्तपस्तेपे देवीसूक्तं परं जपन् ॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम् ॥
(सं + दृश + णिच् + ल्युट् । कारितदर्शनम् ।
यथा, महाभारते । १ । २ । १८० ।
"अस्त्रसन्दर्शनारम्भो धर्म्मराजस्य सन्निधौ ॥")
सन्दानं, क्ली, (सं + दा + ल्युट् ।) दाम । इत्य-
मरः ॥ सम्यग्दानञ्च ॥
सन्दानः, पुं, गजस्याष्ठीवतोरधोभागः । इति
त्रिकाण्डशेषः ॥
सन्दानिका, स्त्री, अरिखदिरः । इति राज-
निर्घण्टः ॥
सन्दानितः, त्रि, (सन्दानं जातमस्येति । सन्दान +
इतच् ।) वद्धः । इत्यमरः ॥
सन्दानिनी, स्त्री, गोष्ठम् । इति हेमचन्द्रः ॥
गोयालि इति भाषा ॥
सन्दावः, पुं, (सं + द्रु + "समि युद्रुदुवः ।" ३ ।
३ । २३ । इति घञ् ।) पलायनम् । इत्यमरः ॥
सन्दाहः, पुं, (सं + दह + घञ् ।) मुखतात्वोष्ठ-
दाहः । इति राजनिर्घण्टः ॥
सन्दिग्धः, त्रि, (सं + दिह + क्तः ।) सन्देहयुक्तः ।
यथा,—
"न तावत् सन्दिग्धसाध्यधर्म्मत्वं पक्षत्वमिति
पक्षतामूलम् ॥"
सन्दिग्धमतिः, त्रि, सन्देहविषयीभूतबुद्धियुक्तः ।
सन्दिग्धा मतिर्यस्य इति बहुव्रीहिसमास-
निष्पन्नः ॥
सन्दिग्धार्थः, पुं, (सन्दिग्धोऽर्थः ।) सन्देहविषयी-
भूतार्थः । (सन्दिग्धोऽर्थो यस्य ।) तद्विशिष्टे, त्रि ॥

सन्दितः, त्रि, (सं+दो अवखण्डने+क्तः।) बद्धः। इत्यमरः॥

सन्दिष्टं, क्ली, (सं+दिश+क्तः।) वार्त्ता। इति शब्दरत्नावली॥ कथिते, त्रि॥

सन्दिष्टार्थः, पुं, (सन्दिष्टोऽर्थो यस्य।) सन्देशहरः। इति केचित्॥

सन्दिहानः, त्रि, (सं+दिह+शानच्।) सन्दिग्धः। यथा, जटाधरः।

"सन्दिहानः सांशयिकः संशयापन्नमानसः॥"

सन्दी, स्त्री, खट्वा। यथा। निर्वया खट्टिका सन्दी। इति त्रिकाण्डशेषः॥

सन्दीप्यः, पुं, मयूरशिखावृक्षः। इति शब्दचन्द्रिका॥

सन्देशः, पुं, (सं+दिश+घञ्।) संवादः। इति शब्दरत्नावली॥ (यथा, मेघदूते। ७।

"सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य गन्तव्या ते वसतिरलका नाम यक्षेश्वराणाम्॥")

[illegible]मिष्टान्नविशेषश्च॥

सन्देशवाक्, [च्] स्त्री, (सन्देश एव वाक्।) संवादः। तत्पर्य्यायः। वाचिकम् २। इत्यमरः॥

सन्देशहरः, पुं, (हरतीति। हृ+अच्। सन्देशस्य हरः।) दूतः। इत्यमरः॥ (यथा, रघुः। १। ६६।

"तदेव सन्देशहराद् विशांपतिः।
शृणोति लोकेश! तथा विधीयताम्॥")

सन्देशहारकः, पुं, (सन्देशं संवादं हरतीति। हृ+ण्वुल्।) दूतः। इति हेमचन्द्रः॥

सन्देहः, पुं, (सं+दिह+घञ्।) एकधर्म्मिक-विरुद्धभावाभावप्रकारकं ज्ञानम्। इति सिद्धान्तमुक्तावली॥ तत्पर्य्यायः। विचिकित्सा २ संशयः ३ द्वापरः ४। इत्यमरः॥ (यथा, महाभारते। २। १०। ११।

"तान् धर्म्मान् तत् सर्व्वान् निर्विशेषात् [illegible]
[illegible]।
सन्देहाद्वा वैदर्भी माध्वकाणाञ्च नृपम्॥")

सन्दोहः, पुं, (सं+दुह+घञ्।) समूहः। इत्यमरः॥ (यथा, आर्य्यासप्तशत्याम्। ५८८।

"[illegible] तत्र चन्द्रबिन्दु सन्दोहः।
[illegible] कौशिक-
[illegible]॥")

सन्द्रावः, पुं, (सं+द्रु+"समि युद्रुदुवः।" ३।३। २३। इति घञ्।) पलायनम्। इत्यमरः॥

सन्धा, स्त्री, (सं+धा+अङ्।) स्थितिः। प्रतिज्ञा। इति मेदिनी॥ (यथा, रघुः। १४। ५२।

"[illegible]
[illegible]॥")

[illegible]। इति शब्दरत्नावली॥ [illegible]। [illegible]। इति [illegible]॥

सन्धानं, क्ली, (सन्धीयते इति। सं+धा+ल्युट्।) [illegible]। इति [illegible]॥ [illegible]

पर्य्यायः। अभिषवः २। इत्यमरः॥ सन्धानी ३ सन्धिका ४। इति शब्दरत्नावली॥ सन्धीयते सन्धानं संगाहरफलादीन् बहुकालं सन्धाय, यत् क्रियते। इति भरतः॥ सङ्घटनम्। इति मेदिनी॥ (यथा, कुमारे। ५। २७।

"मुखेन सा पद्मसुगन्धिना निशि
प्रवेपमानाधरपत्रशोभिना।
तुषारवृष्टिक्षतपद्मसम्पदां
सरोजसन्धानमिवाकरोदपाम्॥")

काञ्जिकम्। इति हलायुधः॥ मदिरा। भव-दंशः। सौराष्ट्रम्। इति राजनिर्घण्टः॥ धनुषि बाणयोजनम्। यथा,—

"सदाय क्षतसन्धानं प्रतिसंहर सायकम्।
आर्त्तत्राणाय वः शस्त्रं न प्रहर्त्तुमनागसि॥"

इत्यभिज्ञानशकुन्तलायाम् १ अङ्कः॥

अन्वेषणम्। इति लोकप्रसिद्धम्॥ (सन्धिः। यथा महाभारते। ५। १०। ३३।

"एवं कृते तु सन्धाने वृत्रः प्रमुदितोऽभवत्।
यतः समभवच्चापि शक्रो हर्षसमन्वितः॥")

सन्दधातीति। सं+धा+ल्युः। धारके, त्रि। यथा, सुश्रुते। १। ४५।

"मधु तु मधुरं कषायानुरसं ** हृद्यं सन्धानं शोधनं रोपणमिति॥")

सन्धानिका, स्त्री, (सन्धानमस्त्यस्या इति सन्धान+ठन्।) खाद्यद्रव्यविशेषः। आचार इति भाषा। तत्करणप्रकारो यथा। अपक्वाम्रफलानि विंशतिः राजिका शरावपोडशैकभागमिता मरिचं तोलकद्वयं लवणं षट्तोलकं मेथिकादितोलकं जीरकं तोलकद्वयं हरिद्रातोलकैकं नागरमुस्तकमेकतोलकं कृष्णजीरकं तोलकैकं एतोला च एभिः सकलद्रव्यं चूर्णयित्वा एकत्रीकुर्य्यात्। आम्रन्तु दीर्घं द्विखण्डं चतुष्खण्डं वा कृत्वा अष्ठीं दूरीकृत्य तदभ्यन्तरे पूर्व्वोक्तचूर्णं पूरयित्वा शणाश्रया [illegible]-स्थवत् कुर्य्यात्। ततस्तैले निमज्जयेत्। इति पाकराजेश्वरः॥

सन्धानितः, त्रि, सन्धानविशिष्टः। संहितः। सन्धानशब्दादितप्रत्ययेन निष्पन्नः॥

सन्धानिनी, स्त्री, गोष्ठम्। इति केचित्॥

सन्धानी, स्त्री, (सन्धीयते यस्यामिति। सं+धा+ल्युट्। ङीप्।) कुप्यशाला। इति हेमचन्द्रः॥ सन्धानम्। इति शब्दरत्नावली॥

सन्धिः, पुं, (सन्धानमिति। सं+धा+किः।) राज्ञां षड्गुणान्तर्गतगुणविशेषः। स तु स्वर्णादिदानेन शत्रुभिः प्रीत्युत्पादनात् मिलापनम्। मिल इति ऐक्य इति च भाषा। तद्विवरणं यथा,—

"बलवता सह सन्धिः स्वयं शीघ्रमाचरेत्।
[illegible] नास्ति यदि शक्नोति स्थितिः।
[illegible] यत्र सन्धौ संमर्दनं भवेत्।
न तं संमर्दनं कुर्य्यात् [illegible]॥
[illegible] तत्र तुल्योऽन्तरसन्धितिपदम्।

आपन्नः सन्धिभावेन विद्वान् [illegible]

ये च दैवेनोपहता राष्ट्रं देशाद्दूरम्
बहवो रिपवो येषां तेषां सन्धिर्विशेषतः।
दुर्भक्षो भिन्नमन्त्रश्च लोभधर्मरतश्च [illegible]।
एतैः सन्धिं न कुर्व्वीत विशेषात् [illegible]
सन्धिं हि तादृशैः [illegible]

इति भोजराजकृतयुक्तिकल्पतरुः॥

षोडशविधसन्धिर्यथा,—

"बलीयसाभियुक्तस्तु नृपो [illegible]
आपन्नः [illegible]
कपाल १ उपहारश्च २ सन्तानः ३ [illegible]
उपन्यासः ५ प्रतीकारः ६ संयोगः ७ [illegible]
अदृष्टनर ८ आदिष्ट १० आत्मादिष्ट [illegible]
परिक्रय-१३ स्तथोच्छिन्न-१४ स्तथा [illegible]
स्कन्धोपनेयः १६ सन्धिश्च [illegible]
इति षोडशकं प्राहुः सन्धिं सन्धिविशारदाः"
तेषां लक्षणानि। यथा,—

"कपालसन्धिर्विज्ञेयः केवलं समसन्धिकः
सम्प्रदानाद्भवति य उपहारः स उच्यते।
सन्तानसन्धिर्विज्ञेयो दारिकादानपूर्व्वकः
सद्भिस्तु सङ्गतः सन्धिर्मैत्रीपूर्व्वः [illegible]
यावदायुःप्रमाणस्तु समानार्थप्रयोजनः
सम्पत्तौ वा [illegible]
सङ्गत सन्धिरेवायं प्रकृष्टत्वात् [illegible]
तथान्यैः सन्धिकुशलैः काञ्चन [illegible]
दृष्ट्वात्मा कार्य्यमित्येतु समुद्दिश्य [illegible]
स उपन्यासकुशलैरुपन्यास उदाहृतः॥
मयास्योपकृतं पूर्व्वं ममाप्येष करिष्यति
इति यः क्रियते सन्धिः प्रतीकारः स
उच्यते।
"उपकारं करोम्यस्य ममाप्येष करिष्यति
अयञ्चापि प्रतीकारो रामसुग्रीवयोरिव।
एकार्थां सम्यगुद्दिश्य क्रियां यत्र [illegible]
समं हि तत्प्रमाणेन स च संयोग उच्यते।
आवयोर्य्योधमुख्यैस्तु मदर्थं [illegible]
यस्मिन् पणस्तु क्रियते स सन्धिः [illegible]
त्वयैकेन मदीयोऽर्थः सम्प्रसाध्यस्त्व[illegible]
यत्र शत्रुः पणं कुर्य्यात् [illegible]
यत्र भूम्येकदेशेन पणेन रिपुरूर्जितः।
सन्धीयते सन्धिविद्भिः स चादिष्ट [illegible]
स्वसैन्येन तु सन्धानमात्मादिष्ट [illegible]
क्रियते प्राणरक्षार्थं सर्व्वदानादुपग्रहः
कोषांशेनार्द्धकोषेण सर्व्वकोषेण वा [illegible]
शिष्टस्य प्रतिरक्षार्थं परिक्रय उदाहृतः।
[illegible] दानादुच्छिन्न [illegible]
भूम्युत्थफलदानेन सर्व्वेण परदूषणः।
[illegible] पणं यत्र [illegible]

धोपमेयं तं प्राहुः सन्धिं सन्धिविच-
क्षणाः ॥१६॥
परोपकारस्तु मैत्रीसम्बन्धकस्तथा ।
हारस्य विशे यावत्कारयं च सम्बयः ॥"
। विष्णुधर्म्मोत्तरदितीपशे सन्धिर्नाम चतुर्थ-
संग्रहः ॥ संयोगः । तत्पर्य्यायः । श्लेषः २ ।
(यथा, मनुः । ८ । २४८ ।
तडागान्युदपानानि वाप्यः प्रस्रवणानि च ।
सीमासन्धिषु कार्य्याणि देवतायतनानि च ॥")
। भगम् । सुरङ्गम् । रूपकाणां
। सावकाशः । इति मेदिनी ॥ भेदः ।
विरामः ॥ (साधनम् । यथा, रघुः । १८ । १६ ।
"तस्य मावरणादृष्टसन्धयः
काम्यवस्तुषु नरेषु सन्धिनः ।
वल्लभाभिरुपसृत्य चक्रिरे
सामिभुक्तविषयाः समागमाः ॥")
व्याकरणमते वर्णद्वयस्य मिलनम् । (यथा,
कथासरित्सागरे । ६ । ११२—११७ ।
सैका तस्य महिषी राज्ञः स्नानमरालमा ।
रीपसुकुमाराङ्गी क्रीडन्ती क्रमसभ्यगात् ॥
। जलैरभिषिञ्चन्तं राजानमसहा सती ।
मोदकैर्देव परिताडय मामिति ॥
त्वा मोदकान् राजा द्रुतमानाययन् बहून् ।
विहस्य सा राज्ञी पुनरेवमभाषत ॥
जलावसरः कोऽत्र मोदकानां जलान्तरे ।
उदकैः सिञ्च मा त्वं मामित्युक्तं हि मया तव ॥
सन्धिमात्रं न जानासि माशब्दोदकशब्दयोः ।
न च प्रकरणं वेत्सि मूर्खस्त्वं कथमीदृशः ॥")
तस्य लक्षणादिर्यथा । अर्द्धमात्रोच्चारणकालेना-
व्यवहितयोर्व्वर्णयोर्द्रुततरोच्चारणं सन्धिः । अत
एव औकारेकारयोर्मध्ये वर्णा न सन्धिः । तत्र
अर्द्धमात्रोच्चारणकालव्यवधानस्योचितत्वादिति
माधः । मते तु सन्ध्यध्यायसूत्रविहितकार्य्यं
सन्धिरिति सन्धिलक्षणम् । तेन पिपठादि-
शब्दानां संयोगान्तलुपि लुपि न सन्ध्यादिविधौ
इति निषेधेऽपि सन्धिग्रहणात् सन्धिलुप्येव न
सन्धिरिति नियमात् भपभसोरित्यनेन चप-
जपौ पिपक् पिपग् इति । भिन्नपदे तु सन्धि-
र्व्विभाषयेति बोध्यम् । तथा च ।
"सन्धिरेकपदे नित्यो नित्यो धातूपसर्गयोः ।
सूत्रेषु च भवेन्नित्यः सैवान्यत्र विभाषया ॥"
इति माधः ।
एकपदे इति स्वभावादेकपदे समासेऽपि ।
यथादानं भवेत् नद्यौ इत्यादि । समासे सुरारिः
हृषीकेशः त्र्यम्बकः गणेशः इत्यादि । धातू-
पसर्गयोस्तु अधीते उपेत्य इत्यादि । अन्यत्र
अत्र अश्वः चवाश्वः इह इन्दुः इहेन्दुः
इत्यादि । धातूपसर्गयोः समासस्य नित्यत्वादेक-
पदग्रहणेनैवेष्टसिद्धौ तयोः पुनरुपादानं चनित्य-
समासे कदाचिदेकपदेऽपि सन्धिर्विभाषयेति इति
ज्ञापनार्थम् । तेन उच्चारितरुचिरत्रचां धाम-
नानां चतुर्णां इत्यादि सिद्धिः । इति मुग्ध-

बोधव्याकरणटीकायां दुर्गादासः ॥*॥ सन्धौ-
त्तरमन्धिर्ग्रामवर्थेन भवति । नामसन्धिः सम-
सामीर्भवति । इति मुग्धबोधः ॥ सुगसन्धियुग-
शब्दे देहसन्धिर्ग्रामशब्दे च द्रष्टव्यः ॥

सन्धिका, स्त्री, (सन्धा एव । स्वार्थे कन् ।) मद्य-
सन्धानम् । इति शब्दरत्नावली ॥

सन्धिचौरः, पुं, (सन्धिकृत् सुरङ्गाकारी चौरः ।
सन्धिना चौर इति वा ।) चौरविशेषः ।
सिंधाल चोर इति भाषा । यथा । सन्धिचौरस्तु
हारकः । इति शब्दमाला ॥

सन्धिजं, क्ली, (सन्धेर्ज्जायते यदिति । जन + डः ।)
आसवादि । यथा, काशीखण्डे ।
"कार्त्तिके वर्ज्जयेत्तैलं कार्त्तिके वर्ज्जयेन्मधु ।
कार्त्तिके वर्ज्जयेत् कांस्यं कार्त्तिके मासि सन्धि-
जम् ॥"
सन्धिजमासवादि । इति तिथ्यादितत्त्वम् ॥
(सन्धिसमुत्पन्ने, त्रि । यथा, सुश्रुते । ६ । २ ।
"पक्वः शोफः सन्धिजः संस्रवेद्यः
सान्द्रं पूयं पूति पूयास्रसः सः ॥")

सन्धिजीवकः, त्रि, (सन्धिना अभिसन्धिना जीव-
तीति । जीव + ण्वुल् ।) कुवृत्त्या विभवान्वेषी ।
तत्पर्य्यायः । पारिकः २ । इति त्रिकाण्डशेषः ।

सन्धितः, त्रि, (सन्धा जातास्येति । सन्धा +
इतच् ।) सन्धियुक्तः । मिलितः । यथा,—
"भक्ताहराहिव्यवपुः सन्धितः सन्धिमानसौ ।
आर्य्यत्वादार्य्यराजाख्यः ख्यातो भुवि भवि-
ष्यति ॥"
इति राजतरङ्गिण्याम् २ तरङ्गः ॥
आसवादि । यथा,—
"कार्त्तिके वर्ज्जयेत् कांस्यं कार्त्तिके शुक्तसन्धि-
तम् ।"
इति श्रीहरिभक्तिविलासे १६ विलासः ॥
शुक्तं काञ्जिकादिपर्य्युषितद्रव्यं सन्धितञ्च वर्ज्ज-
येत् । इति तट्टीका ॥

सन्धिनी, स्त्री, (सन्धास्त्यस्या इति । इनिः ।
ङीप् ।) वृषभेणाक्रान्ता गौः । इत्यमरः ॥ या
ऋतुमती वृषभेण आक्रान्ता निष्पादितमैथुना
सा सन्धिनी । गर्भस्य सन्धानं सन्धा सा विद्यते
अस्याः सन्धिनी इन् । इति भरतः ॥ अकाल-
दुग्धा गौः । इति मेदिनी शब्दरत्नावली च ॥
(यथा, याज्ञवल्क्यः । १ । १७० ।
"सन्धिन्यनिर्दशावत्सागोपयः परिवर्ज्जयेत् ॥")

सन्धिपूजा, स्त्री, (सन्धौ अष्टमीनवमीसन्धिक्षणे
पूजा ।) शारदीयमहापूजान्तर्गततृतीया
पूजा । यथा कालिकापुराणवचनान्तरम् ।
"अष्टमीनवमीसन्धौ तृतीया खलु कथ्यते ।
तत्र पूज्या त्वहं पुत्र योगिनीगणसंयुता ॥"
ज्योतिषे ।
"अष्टम्यां सन्धियोगे सकलपरिजनैः पूजयेत्
सत्त्वभावे, ।"
सप्तमीपूजावत्तमहाष्टम्यादिकृत्यमपि षष्टिद-
ण्डात्मिकायामेव न तु परदिवसीयखण्डतिथौ
किन्तु पूर्व्वाह्णमध्यनुरोधात्त्रिगादावपि खण्ड-
तिथावपि सन्धिपूजा । एवञ्च पूर्णाष्टम्यां महा-
ष्टमीपूजा तत्परदिने अष्टमीनवम्योः सन्धिपूजा
तत्परदिने महानवमीपूजा प्रागुक्तनन्दिकेश्वर-
पुराणाद्युक्तोदयगामितिथ्यनुरोधात् । तत्पर-
दिने दशम्यां विसर्ज्जनं पूजानुरोधेनाधिकदिन-
लाभात् । अन्यत् दुर्गाशब्दे द्रष्टव्यम् ॥

सन्धिबन्धः, पुं, (सन्धिं बध्नातीति । बन्ध +
अच् ।) भूमिचम्पकः । इति शब्दचन्द्रिका ॥

सन्धिबन्धनं, क्ली, (सन्धेर्बन्धनं यस्मात् ।) शिरा ।
इति केचित् ॥

सन्धिमतिः, पुं, काश्मीरदेशीयजयेन्द्रराजमन्त्री ।
स च परे राजा बभूव । यथा,—
"सुतो मङ्कीसहेन्द्रस्य जयेन्द्रस्तस्य भूपतेः ।
आजानुभुजो राजा दुर्भोजाय प्रचण्डधीः ॥
तस्याभूदङ्गतोदत्तभयभक्तिविभूषितः ।
राज्ञः सन्धिमतिर्नाम मन्त्री मतिमतांवरः ॥
भक्ताहराहिव्यवपुः सन्धितः सन्धिमानसौ ।
आर्य्यत्वादार्य्यराजाख्यः ख्यातो भुवि भवि-
ष्यति ॥"
इति राजतरङ्गिण्याम् २ तरङ्गः ॥

सन्धिरन्ध्रका, स्त्री, (सन्धिरन्ध्रेण कायतीति ।
कै + कः । टाप् ।) सुरङ्गा । इति केचित् ॥

सन्धिला, स्त्री, (सन्धिं लातीति । ला + कः ।)
सुरङ्गा । नदी । मदिरा । इति मेदिनी ॥

सन्धिवेला, स्त्री, (सन्धिरूपा वेला ।) काल-
विशेषः । स तु अहोरात्रादिमिलनकालरूपः ।
यथा । व्यासः ।
"उपास्ते सन्धिवेलायां निशाया दिवसस्य च ।
तामेव सन्ध्यां तस्मात्तु प्रवदन्ति मनीषिणः ॥"
इत्याह्निकतत्त्वम् ॥

सन्धिहारकः, पुं, (सन्धिना हरतीति । हृ +
ण्वुल् ।) सन्धिचौरः । यथा,—
"वन्दिचौरो मापलः स्यात् कुम्भिलः सन्धि-
हारकः ।"
इति हारावली ॥

सन्ध्या, स्त्री, (सं सम्यक् ध्यायन्त्यस्यामिति सं +
ध्यै चिन्तने + "आतश्चोपसर्गे" । इत्यङ् । यद्वा,
सन्दधातीति । सं + धा + "अघ्न्यादयश्च"
उणा० ४ । ११२ । इति यक्प्रत्ययेन निपा-
तितः ।) कालविशेषः । स तु दिवारात्रि-
सम्बन्धिदण्डद्वयरूपः । तत्पर्य्यायः । पितृप्रसूः २ ।
इत्यमरः ॥ सन्धा ३ त्रिकमेवी ४ । इति भरत-
धृतवाचस्पतिः । सायम् ५ दिनान्तम् ६
निशादि ७ दिवसात्ययम् ८ । इति राज-
निर्घण्टः ॥ सायाह्नः ९ विकालः १० अप्र-
भृतिः ११ सायः १२ । इति शब्दरत्नावली ॥
सा च कालस्य भार्य्या । यथा,—
"कालस्य तिस्रो भार्य्याश्च सन्ध्यारात्रिदिनानि च
याभिर्विना विधाता च संख्यां कर्त्तुं न शक्यते ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १ अध्यायः ॥ * ॥
रात्रेराद्यन्तदण्डचतुष्टयात्मककालः । यथा,—

"त्रियामां रजनीं प्राहुस्त्यक्त्वाद्यन्तचतुष्टयम् ।
नाडीनां तदुभे सन्ध्ये दिवसाद्यन्तसञ्ज्ञिते ॥"
इति प्रायश्चित्ततत्त्वम् ॥

तस्याः कर्म्म यथा,—
"समुद्रे हिमवत्पार्श्वे गङ्गासन्ध्यासु दुर्म्मते ।
रात्रावहनि सन्ध्यायां कस्य गुप्तः परिच्छदः ॥"
इति तिथ्यादितत्त्वम् ॥ * ॥

त्रिसन्ध्याकालीनोपासना । तत्कालीनोपास्या देवता । यथा । अथ सन्ध्योपासनम् । तत्र छन्दोगपरिशिष्टम् ।
"अत ऊर्द्ध्वं प्रवक्ष्यामि सन्ध्योपासनिकं विधिम् ।
अनर्हः कर्म्मणां विप्रः सन्ध्याहीनो यतः स्मृतः ॥"

अतः प्राणायामानन्तरम् । तथा,—
"अन्यत् सन्ध्यावन्दनं प्रोक्तं ब्राह्मणस्य यदधिष्ठितम् [illegible] न स ब्राह्मण उच्यते ॥"
[illegible] ।
"[illegible] वद प्रोक्ता सविता तत्र-वादिना ।
[illegible] द्वितीयः [illegible] ॥
[illegible] ।
[illegible] च ॥
[illegible] पूर्व्वां सादित्याश्चैव पश्चिमाम् ।
[illegible] सन्ध्यां न [illegible] स्मृतः ॥"
[illegible] । [illegible] मार्कण्डेयपुराणम् ।
[illegible] ॥"
[illegible] ।
"[illegible] ।
[illegible] ॥"
[illegible]

[illegible]

मध्यस्थमप्रत्यक्षतेजोनक्षत्रवर्ज्जितः । तथा च वराहः ।
"अर्द्धास्तमयात् सन्ध्या व्यक्तीभूता न तारका यावत् ।
तेजःपरिहानिरुषा भानोरर्द्धोदयं यावत् ॥"
अत्र आद्यन्तता उक्ता । परिमाणमाह दक्षः ।
"रात्र्यन्तकाले नाड्यौ द्वे सन्ध्यादिः काल उच्यते ।
दर्शनादुरवेरिखायास्तदन्तो मुनिभिः स्मृतः ॥"
नाडीदण्डः । योगी याज्ञवल्क्यः ।
"ह्रासवृद्धी च सततं दिनरात्र्योर्यथाक्रमम् ।
सन्ध्या मुहूर्त्तमाख्याता ह्रासे वृद्धौ समा स्मृता ॥"
अस्योपासनाया अपि सन्ध्यात्वमाह व्यासः ।
"उपास्ते सन्धिवेलायां निशाया दिवसस्य च ।
तामेव सन्ध्यां तस्मात्तु प्रवदन्ति मनीषिणः ॥"
उपास्ते वक्ष्यमाणप्राणायामादिक्रिययेति यावत् ॥ * ॥ तत्काले उपास्या अपि देवता सन्ध्या । तथा च याज्ञवल्क्यः ।
"सन्ध्ये सन्ध्यामुपासीत नास्तगे नोद्गते रवौ ॥"
उपासनोपक्रममाह संवर्त्तः ।
"प्रातःसन्ध्यां सनक्षत्रामुपासीत यथाविधि ।
सादित्यां पश्चिमां सन्ध्यां अर्द्धास्तमितभास्कराम् ॥"
सनक्षत्रामित्यनेन तद्युक्तकाले उपक्रम्य प्रातः सन्ध्यामुपासीत । एवमेवार्द्धास्तमितभास्करां पश्चिमां सादित्यामित्यनेन तद्युक्तकाले उपक्रम्य उपासीतेत्यर्थः ॥ * ॥ मध्याह्नसन्ध्याया अष्टममुहूर्त्ते कालमाह स्मृतिः ॥
"पूर्व्वापरे तथा सन्ध्ये सनक्षत्रे प्रकीर्त्तिते ।
सप्तमूर्त्थेऽपि मध्याह्ने मुहूर्त्तमष्टमोपरि ॥"
[illegible] । [illegible] सन्ध्या-मुपास्ते नित्यं वाग्यत उत्तरापराभिमुखो-[illegible] । [illegible] प्रातः [illegible] सावित्रीं [illegible] एवं प्रातः [illegible] । [illegible] । [illegible] । [illegible] यावत् । व्यासः ।
"गायत्री नाम पूर्व्वाह्णे सावित्री मध्यमे दिने
सरस्वती च सायाह्ने सैव सन्ध्या त्रिधा स्मृता ॥
[illegible] ।
[illegible] ॥
[illegible] परिकीर्त्तिता ।
[illegible] ॥"
[illegible]

कुरुते स पूर्व्वमपि [illegible]
जीवित्वे प्राप्नो[illegible]
प्राप्नोति । इति पराशरभाष्ये [illegible]
अतएव व्यासः ।
"न भिन्नां प्रतिपद्येत गायत्रीं [illegible]
सोऽहमस्मीत्युपासीत विधिना येन केन [illegible]
गायत्र्याख्यभर्गपदप्रतिपाद्य ईश्वर[illegible]
रूपोऽस्मि भवामि इति ।
यथा [illegible]
रहितेन चिद्रूपेणैक्यम् । [illegible]
रूपाधिरित्यवगमात् । [illegible]
सीत । याज्ञवल्क्योऽपि ।
"या सन्ध्या सा तु [illegible]
[illegible]"
सन्ध्या उपासिता येन विष्णुस्तेन [illegible]
उपासनायाः फलमाह स एव ।
"गवां सर्पिः शरीरस्थं न करोत्यङ्ग[illegible]
निःसृतं कर्म्मसंयुक्तं पुनस्तासां [illegible]
एवं स हि शरीरस्थः सर्पिर्वत् परमेश्वर[illegible]
विना चोपासनादेव न करोति हितं [illegible]
प्रणवव्याहृतिभ्याञ्च गायत्र्या त्रितयेन [illegible]
उपास्यं परमं ब्रह्म आत्मा यत्र प्रतिष्ठित[illegible]
त्रितयेन प्रणवादित्रितयेन [illegible]
चारितेन तदर्थावगमेन उपास्य[illegible]
तदाह स एव ।
"वाच्यः स ईश्वरः प्रोक्तो वाचकः प्रणव[illegible]
वाचकेऽपि च विज्ञाते वाच्य एव प्रसीदति [illegible]
भूर्भुवःस्वस्तथा पूर्व्वं स्वयमेव स्वयम्भुवा [illegible]
व्याहृता ज्ञानदेहेन तस्मात् व्याहृत[illegible]
ज्ञानदेहेन तस्यप्राणस्य चिद्रूपस्य [illegible]
शरीररूपेण व्याहृता उक्ताः । [illegible]
इत्यीश्वरः । कूर्म्मपुराणम् ।
"प्रधानं पुरुषः कालो ब्रह्मविष्णुमहेश्वरा[illegible]
सत्त्वं रजस्तमस्तिस्रः क्रमाद्[illegible]
एतद्रूपेणापि भावनीयाः । [illegible]
मराम् ॥ * ॥ अपि च ।
"दिनान्तसन्ध्यां सूर्य्येण पूर्व्वा[illegible]
उपतिष्ठेत् यथान्यायं सन्ध्यानामथ [illegible]
सर्व्वासामनुपस्थाने सन्ध्यायाः [illegible]
[illegible]
सूर्य्यनाम्नि दिते [illegible]
[illegible]
तस्मादहनि सूर्य्ये समुत्थाय [illegible]
उपतिष्ठेत्ततः सन्ध्यां सन्ध्याञ्च [illegible]
[illegible] सन्ध्यां येन पूर्व्वां न [illegible]
[illegible]
इति विष्णुपुराणे [illegible]
[illegible] सन्ध्या[illegible] यथा,—
[illegible] ।
"[illegible] सन्ध्यां [illegible]
[illegible] ।

वराह उवाच ।
राधवि तत्त्वेन सन्ध्यामन्त्रमनुत्तमम् ।
वदन्ति वै सूर्य्यं सन्ध्यां पूर्व्वं चिरां तथा ॥
ञ्जलिं गृहीत्वा च मम भक्त्या व्यवस्थितः ।
ध्यानमास्थाय इमं मन्त्रमुदाहरेत् ॥
। भवोद्भवमादिं व्यक्तमद्वयमादित्यं सर्व्वं
ब्रह्मरुद्रेन्द्रास्ताश्च कृष्णो यथासीत् ध्यान-
स्थिता ते सन्ध्या संज्ञा वासुदेवं नमन्ति
वमादि व्यक्तरूपं कृत्वा चात्मनि देवसंस्था
र संसारार्थं कर्म्म तत्कारणमेव सन्ध्या
वासुदेव नमो नमः ।
व तु मन्त्रेण सन्ध्यां कुर्य्यात्तु दीक्षितः ॥"
ाराहे चतुर्व्वर्णदीक्षानामाध्यायः ॥*॥
प्रशंसा यथा,—
मुनयः ऊचुः ।
मुने दिवं याति ब्राह्मणो दग्धकिल्बिषः ।
नको हि मे ब्रूहि यदुक्तं वह्निना पुरा ॥
सूत उवाच ।
प्रातश्च यः सन्ध्यामुपास्तेऽस्खलन्मानसः ।
हि पावनीं देवीं गायत्रीं वेदमातरम् ॥
भावितो देव्या ब्राह्मणः पूतकिल्बिषः ।
दित् प्रतिगृह्णानो अपि पृथ्वीं ससागराम् ॥
न्ये दारुणाः केचित् ग्रहाः सूर्य्यादयो दिवि ।
स्य सौम्यतां यान्ति शिवाः शिवतरास्तथा ॥
तश्च गतं चैनं दारुणाः पिशिताशनाः ।
रूपा महाकायाः प्रभवन्ति न राक्षसाः ॥"
वह्निपुराणे आश्रमेधिकनामाध्यायः ॥*॥
च ।
त्यं नित्यं त्रिसन्ध्यास्तु करिष्यसि दिने दिने ।
ाह्ने चापि सायाह्ने प्रातरेव शुचिः सदा ॥
ाहीनोऽशुचिर्नित्यमनर्हः सर्व्वकर्म्मसु ।
न्ना कुरुते कर्म्म न तस्य फलभाग्भवेत् ॥
तिष्ठति यः पूर्व्वां नोपास्ते यस्तु पश्चिमाम् ।
शूद्रवद्बहिः कार्य्यः सर्व्वस्मात् द्विजकर्म्मणः ॥
जीवनपर्य्यन्तं यस्त्रिसन्ध्यं करोति च ।
च सूर्य्यसमो विप्रस्तेजसा तपसा सदा ॥
ादपद्मरजसा सद्यःपूता वसुन्धरा ।
... स तेजस्वी सन्ध्यापूतो हि यो द्विजः ॥
र्थानि च पवित्राणि तस्य संस्पर्शमात्रतः ।
ः पापानि यान्त्येव वैनतेयादिवोरगाः ॥
गृह्णन्ति सुरास्तेषां पितरः पिण्डतर्पणम् ।
च्छया च द्विजातेश्च त्रिसन्ध्यारहितस्य च ॥
ष्णुमन्त्रविहीनश्च त्रिसन्ध्यारहितो द्विजः ।
कादशीविहीनश्च विषहीनो यथोरगः ॥"
ति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २१ अध्यायः ॥
न्यत् कौर्म्मे १७ अध्याये गारुडे २१४।२२०
ध्याययोर्द्रष्टव्यम् ॥*॥ जननमरणाशौचे तद्वि-
धो यथा,—
सन्ध्यां पञ्चमहायज्ञं नैत्यिकं स्मृतिकर्म्म च ।
मध्ये हापयेत्तेषां दशाहान्ते पुनः क्रिया ॥"
इति शुद्धितत्त्वम् ॥*॥

सायंसन्ध्यानिषेधकाला यथा । कर्म्मोपदेशिन्यां
व्यासः ।
"संक्रान्त्यां पक्षयोरन्ते द्वादश्यां श्राद्धवासरे ।
सायंसन्ध्यां न कुर्व्वीत कृते च पितृहा भवेत् ॥"
इति तिथ्यादितत्त्वम् ॥*॥
तत्काले शयनादिनिषेधो यथा,—
"स्वप्नमध्ययनं स्नानमुद्वर्त्तं भोजनं गतिः ।
उभयोः सन्ध्ययोर्नित्यं मध्याह्ने चैव वर्ज्जयेत् ॥"
इति कौर्म्मे १५ अध्यायः ॥
नदीविशेषः । युगसन्धिः । इति मेदिनी ॥
चिन्ता । संश्रवः । सीमा । सन्धानम् । कुसुम-
विशेषः । इति हेमचन्द्रः ॥
सन्ध्यांशः, पुं, (सन्ध्याया अंशः ।) युगसन्धिः ।
यथा,—
"चत्वार्य्याहुः सहस्राणि वर्षाणान्तु कृतं युगम् ।
तस्य तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः ॥
इतरेषु ससन्ध्येषु ससन्ध्यांशेषु च त्रिषु ।
एकापायेन वर्त्तन्ते सहस्राणि शतानि च ॥"
इति मानवे । १ । ६९-७० ॥
चत्वार्य्याहुरिति । चत्वारि वर्षसहस्राणि कृत-
युगं कालं मन्वादयो वदन्ति तस्य तावद्वर्ष-
शतानि सन्ध्या सन्ध्यांशश्च भवति युगस्य पूर्व्वा
सन्ध्या उत्तरश्च सन्ध्यांशः । तदुक्तं विष्णुपुराणे ।
"तत्प्रमाणैः शतैः सन्ध्या पूर्व्वा तत्राभिधीयते ।
सन्ध्यांशकश्च तत्तुल्यो युगस्यानन्तरो हि यः ॥
सन्ध्यासन्ध्यांशयोरन्तर्यः कालो मुनिसत्तम ।
युगाख्यः स तु विज्ञेयः कृतत्रेतादिसंज्ञकः ॥"
वर्षसंख्या चेयं दिव्यमानेन तस्यैवानन्तरप्रकृत-
त्वात् ।
"दिव्यैर्व्वर्षसहस्रैस्तु कृतत्रेतादिसंज्ञितम् ।
चतुर्युगं द्वादशभिस्तद्विभागं निबोध मे ॥"
इति विष्णुपुराणवचनाच्च ।
इतरेष्विति अन्येषु त्रेताद्वापरकलियुगेषु सन्ध्या-
सन्ध्यांशसहितेषु एकहान्या सहस्राणि शतानि
च भवन्ति । तेनेदं सम्पद्यते । त्रीणि वर्षसह-
स्राणि त्रेतायुगं तस्य त्रीणि वर्षशतानि सन्ध्या
सन्ध्यांशश्च । एवं द्वे वर्षसहस्रे द्वापरः तस्य द्वे
वर्षशते सन्ध्या सन्ध्यांशश्च । एवं वर्षसहस्रं
कलिः । तस्यैकवर्षशतं सन्ध्या सन्ध्यांशश्च । इति
कुल्लूकभट्टः ॥
सन्ध्याचलः, पुं, (सन्ध्याया अचलः ।) पर्व्वत-
विशेषः यथा,—
"चाराधनोपदेशाय कापोतस्य वचः स्मरन् ।
जग्मतुर्दक्षिणां काष्ठां यत्र सन्ध्याचलः स्थितः ॥
कान्ता नाम नदी तत्र वशिष्ठेनावतारिता ।
तस्यास्तीरे महाशैले शिवच्छाया लता तदा ।
सन्ध्यां वशिष्ठः कृतवान् तत्र यस्माद्विधेः सुतः ।
अतः सन्ध्याचलं नाम तस्य गायन्ति देवताः ॥"
इति कालिकापुराणे ५० अध्यायः ॥*॥
अपि च ।
"श्रीभद्राख्यान्महाशैलादैशान्यां पर्व्वतोत्तमः ।
तुङ्गः सन्ध्याचलो नाम वशिष्ठो यत्र तप्तवान् ।

निमिर्नाम्ना तु राजर्षिः शापाद्ब्रह्मसुतः पुरा ।
वशिष्ठो ह्यशरीरोऽभूत्तच्छापाच्च निमिस्तथा ॥
ततो ब्रह्मोपदेशेन निर्जने कामरूपके ।
सन्ध्याचले तपस्तेपे तस्य विष्णुरभूत्तदा ॥
प्रत्यक्षस्तस्य देवस्य वरदानान्महामुनिः ।
अमृतान्यवतार्य्यैव कुण्डं कृत्वा गिरेस्तटे ॥
तत्र स्नात्वा च पीत्वा च शरीरं प्राप पूरितम् ।
तस्मादमृतकुण्डात्तु सन्ध्या नाम नदीवरा ।
निःसृता तत्र चाप्लुत्य चिरायुरगदी भवेत् ॥"
इति च कालिकापुराणे ८१ अध्यायः ॥
सन्ध्यानाटी, [न्] पुं, (सन्ध्यायां नटतीति ।
नट + इनिः ।) शिवः । इति शब्दरत्नावली-
त्रिकाण्डशेषौ ॥
सन्ध्यापुष्पी, स्त्री, (सन्ध्यायां पुष्पं यस्याः । ङीप् ।)
जाती । इति राजनिर्घण्टः ॥
सन्ध्याबलः, पुं, (सन्ध्यायां बलं यस्य ।) राक्षसः ।
इति त्रिकाण्डशेषः ॥
सन्ध्याबलिः, पुं, शिवालयस्थितमृत्काष्ठादि-
निर्मितवृषः । यथा,—
"ये शिवायतनोत्सृष्टास्ते सन्ध्याबलयो वृषाः ।"
इति हारावली ॥
सन्ध्याभ्रं, क्ली, (सन्ध्याया अभ्रमिव तद्वर्णत्वात् ।)
सुवर्णगैरिकम् । इति राजनिर्घण्टः ॥ (सन्ध्या-
कालीनमेघः । यथा, रघुः । १२ । २८ ।
"सन्ध्याभ्रकपिशस्तस्य विराधो नाम राक्षसः ।
अतिष्ठन्मार्गमावृत्य रामस्येन्दोरिव ग्रहः ॥")
सन्ध्यारागं, क्ली, (सन्ध्याया राग इव रागो यस्य ।)
सिन्दूरम् । इति राजनिर्घण्टः ॥ (यथा, आर्य्या-
सप्तशत्याम् । ३८२ ।
"प्राचीरान्तरितयं प्रियस्य वदनेऽधरं सम-
र्पयति ।
प्रागगिरिपिहिता रात्रिः सन्ध्यारागं दिन-
स्येव ॥")
सन्ध्यारामः, (सन्ध्यायां रामो रमणं यस्य ।)
ब्रह्मा । इति शब्दरत्नावली ॥
सन्नः, पुं, (सद + क्तः ।) पियालवृक्षः । इत्यमर-
टीकायां भरतः ॥ अवसन्ने, त्रि ॥ (यथा,
रामायणे । ६ । ११३ । ८७ ।
"कश्मलाभिहिता सन्ना बभौ सा रावणोरसि ॥")
सन्नकः, पुं, (सीदति क्षीणो भवतीति । सद + क्तः । ततः
स्वार्थे कन् ।) खर्व्वः । इति सन्नकद्रुशब्द-
टीकायां भरतः ॥
सन्नकद्रुः, पुं, पियालवृक्षः । इत्यमरः ॥ सन्नकः
खर्व्वो द्रुः स्कन्धोऽस्येति सन्नकद्रुरिति स्वामी ।
सन्नको द्रुरिति द्वे नामनी इति सोमनन्दी ।
इति भरतः ॥
सन्नतिः, स्त्री, (सं + नम + क्तिन् ।) प्रणतिः ।
(यथा, भागवते । १० । ७० । २४ ।
"ये च दिग्विजये तस्य सन्नतिं न ययुर्नृपाः ।
प्रसह्य रुद्धास्ते नाम्नयुतं द्वे गिरिव्रजे ॥")
ध्वनिः । इति मेदिनी ॥ नम्रता यथा, हरि-
वंशे ।

"यत्र श्रीः श्रीः स्थिता तत्र यत्र श्रीस्तत्र सन्नतिः ।
सन्नतिर्ह्रीस्तथा श्रीश्च नित्यं कृष्णे महात्मनि ॥"
इति तिथ्यादितत्त्वम् ॥
(तथा च रामायणे । ५ । ६४ । २० ।
"तव चेदं सुमहद्वा वाक्यं नान्यस्य कस्यचित् ।
सन्नतिर्हि तवाख्याति भविष्यच्छुभयोग्यताम् ॥"
सन्नद्धः, त्रि, (सं + नह + क्तः) वर्म्मितः ।
कृतसन्नाहः । (यथा, भागवते । ७ । १० । ६६ ।
"सन्नद्धो रथमास्थाय शरं धनुरुपाददे ॥")
व्यूढः । व्यूहविन्यासयुक्तः । इति मेदिनी ॥
आततायी । वधोद्यतः । इत्यमरटीकायां राय-
मुकुटः ॥ मन्त्रादिसंयुतः । इति शब्दरत्नावली ॥
(व्याप्तः । यथा, अभिज्ञानशकुन्तले १ अङ्के ।
"कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम् ॥"
सञ्जातः । इति मल्लिनाथः ॥ यथा, रघुः । ३ । ७ ।
"पुराणपत्रापगमादनन्तरं
लतेव सन्नद्धमनोज्ञपल्लवा ॥")
सन्नयः, पुं, (सं + नी + अच् ।) समूहः । यथा,
महाभारते । १ । १८० । ६ ।
"अस्मिन् राजसमावाये देवानामिव सन्नये ।
किमयं सदृशं कश्चित् नृपतिं नैव दृष्टवान् ॥"
पृष्ठस्थायिबलः । इत्यमरमेदिनीकरौ ॥
सन्नाहः, पुं, (सन्नह्यतेऽसौ इति । सं + नह +
घञ् ।) अङ्गत्राणम् । साँजोया इति भाषा ।
तत्पर्य्यायः । वर्म्म २ कङ्कटः ३ जगरः ४ कव-
चम् ५ दंशः ६ तनुत्रम् ७ मायो ८ उर-
श्छदः ८ । इति हेमचन्द्रः ॥ (यथा, महा-
भारते । ४ । ३० । १७ ।
"हयक्कायनमवाहान् रथेष्वश्वानयोजयन् ॥"
उद्योगः । इति रामानुजः ॥ यथा, रामा-
यणे । ६ । ७५ । ४० ।
"ततो रामशरान् दृष्ट्वा विमानेषु गतेषु च ।
सन्नाहो राक्षसेन्द्राणां तुमुलः समपद्यत ॥")
सन्नाह्यः, पुं, (सन्नह्यते इति । सं + नह + ण्यत् ।)
युद्धार्थगजः । यथा,—
"राजवाह्यस्तु पवाह्यः सन्नाह्यः समरोचितः ।"
इति हेमचन्द्रः ॥
सन्निकर्षः, पुं, (सं + नि + कृष + घञ् ।) सान्नि-
ध्यम् । तत्पर्य्यायः । पार्श्वम् २ समीपम् ३ सवि-
धम् ४ समीपाध्यासम् ५ सवेशः ६ अन्तिकः ७
सदेशम् ८ अभ्यर्णम् ९ सनीडम् १० सन्नि-
धानम् ११ उपान्तम् १२ निकटम् १३ उप-
कण्ठम् १४ सन्निकृष्टम् १५ समर्य्यादम् १६
अभ्याशम् १७ आसन्नः १८ सन्निधिः १९ । इति
हेमचन्द्रः । (यथा, कुमारे । ३ । ७४ ।
"लोभविकर्षं परिहर्त्तुमिच्छन्
अन्तर्दधे भूतपतिः सभूतः ॥")
न्यायमते त्वगिन्द्रियसम्बन्धः । स च ज्ञानस्य
कारणम् । स तु द्विविधः । लौकिकसन्निकर्षः
अलौकिकसन्निकर्षश्च । लौकिकसन्निकर्षश्च षड्-
विधः । इन्द्रियसंयोगः १ इन्द्रियसंयुक्तसमवायः
२ इन्द्रियसंयुक्तसमवेतसमवायः ३ श्रोत्रादि-
समवायः ४ श्रोत्रादिसमवेतसमवायः ५ तदादि-
विशेषणता ६ ॥ अलौकिकसन्निकर्षस्तु त्रिविधः ।
सामान्यलक्षणा १ ज्ञानलक्षणा २ योगजः ३ ।
यथा,—
"महत्त्वं षड्विधे हेतुरिन्द्रियं करणं मतम् ।
विषयेन्द्रियसम्बन्धो व्यापारः सोऽपि षड्विधः ।
द्रव्यग्रहस्तु संयोगात् संयुक्तसमवायतः ।
द्रव्येषु समवेतानां तथा तत्समवायतः ॥
तत्रापि समवेतानां शब्दस्य समवायतः ।
तद्वृत्तीनां समवेतसमवायेन तु ग्रहः ॥
विशेषणतया तद्वदभावानां ग्रहो भवेत् ।
यदि स्यादुपलभ्येतेत्येवं यत्र प्रसज्यते ॥
प्रत्यक्षं समवायस्य विशेषणतया भवेत् ।
अलौकिकः सन्निकर्षस्त्रिविधः परिकीर्त्तितः ॥
सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा ।
आसत्तिराश्रयाणान्तु सामान्यज्ञानमिष्यते ॥
तदिन्द्रियजतद्धर्म्मबोधसामग्र्यपेक्ष्यते ।
विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः ॥
योगजो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः ।
युक्तस्य सर्व्वदा भानं चिन्तासहकृतोऽपरः ॥"
इति भाषापरिच्छेदः ॥
सन्निकर्षणं, क्ली, (सं + नि + कृष + ल्युट् ।) सन्नि-
धानम् । तत्पर्य्यायः । सन्निधिः २ । इति शब्दौघ-
वर्गे अमरः ॥ सन्निधम् ३ । इति भरतः ॥
(सम्बन्धः । यथा, भागवते । ११ । २८ । १२ ।
"यावद्देहेन्द्रियप्राणैरात्मनः सन्निकर्षणम् ।
संसारः फलवांस्तावदपार्थोऽप्यविवेकिनः ॥")
सन्निकृष्टः, त्रि, (सं + नि + कृष + क्तः ।) सन्नि-
कर्षविशिष्टः । निकटः । इति विशेष्यनिघ्नवर्गे
अमरः ॥ अस्य पर्य्यायः समीपशब्दे द्रष्टव्यः ॥
सन्निधं, क्ली, (सं + नि + धा + कः ।) सन्निधानम् ।
इति भरतधृततत्त्वोपालितः ॥
सन्निधानं, क्ली, (सं + नि + धा + ल्युट् ।) निक-
टम् । इति हेमचन्द्रः ॥ (यथा, रामायणे ।
२ । २१ । ५३ ।
"श्रेयो मुहूर्त्तं तव सन्निधानं
ममैव कृत्स्नादपि जीवलोकात् ॥"*॥
सम्यङ्निधीयतेऽस्मिन्निति ।) आश्रयः । यथा,
"आरम्भः संशयानामविनयभवनं पत्तनं साह-
सानां
दोषाणां सन्निधानं कपटशतमयं क्षेत्रमप्रत्यया-
नाम् ।
दुर्ग्राह्यं यन्महद्भिः सुरनरवृषभैः सर्व्वमाया-
करण्डं
स्त्रीरूपं केन लोके विषममृतमयं धर्म्मनाशाय
सृष्टम् ॥"
इति शान्तिशतकम् ॥
(पदस्थानम् । यथा, मार्कण्डेये । ८७ । ३५ ।
"यस्मिन् गेहे च लिखितमेतत् तिष्ठति नित्यदा ।
सन्निधानं कृते त्वाद्ये तत्राप्याकं भविष्यति ॥")
सन्निधिः, पुं, (सं + नि + धा + किः ।) सन्नि-
कर्षः । इत्यमरः ॥ (यथा, मनुः । २ । १८४ ।

"हीनाश्चसत्त्वेन स्यात्
इन्द्रियगोचरः । इति मेदिनी ॥
यथा, जलशुद्धिप्रकरणे ।
"गङ्गे च यमुने चैव गोदावरि सरस्वति
नर्म्मदे सिन्धुकावेरि जलेऽस्मिन्
सन्निपतितः, त्रि, एकत्रीकृतः ।
पूर्व्वकफपतधातोः प्रकृत्यैव नियतः ।
सन्निपातः, पुं, (सम्यक् निपातो
तालभेदः । यथा,—
"एक एव गुरुर्यत्र सन्निपातः स
इति
(सम्यक् निपातो यस्मात् ।)
मिलितदोषत्रयम् ।
यानि यथा,—
कष्टसाध्यः कण्ठकुब्ज
कष्टात् कष्टतमौ ज्ञेयौ
भग्नकौ भग्ननेत्रश्च रक्तष्ठीवी निरात्मा
शीताङ्गश्च प्रलापश्च
ज्ञातव्याः सर्व्वदा वैद्यैः
माण्डवीये ।
"शीघ्रमस्ताल्लिकयितविभ्रमः
कर्णिको जिह्वकश्चैव
भग्ननेत्रो विलापश्च प्रलापः शीतगात्र
अभिन्यासश्चेति विद्यात्
सदास्यं श्लेष्मणा पूर्णं शूलं
शीतश्च लक्षणान्वितं
अतितन्द्रा ज्वरः
स्थूलकण्ठः सिता श्यामा जिह्वा
श्रुतिरल्पा चेति विद्यात् तान्निते
सदो मोहो
नित्यं वैकल्पिता पीडा
लक्षणैः सन्निपातोऽयं
कण्ठग्रहो ज्वरो मूर्च्छा दाहः
मोहस्तापः शिरोऽर्त्तिश्च वातातः
कण्ठकुब्जं सन्निपातं कष्टसाध्यं
ज्वरः कर्णमूलशोथश्च श्वासः
स्वेदः कण्ठग्रहस्तापस्तृष्णा
कर्णिके सन्निपाते च लक्षणानि
सदष्टा कठिना जिह्वा काम. प्रायशो
मूको बधिरता तापो बलहानिश्च
जिह्वगः सन्निपातोऽयं कष्टात् कष्टतरः
मोहस्तापः प्रलापश्च व्यथा कण्ठे
वेदना च तथा गात्रे
कष्टात् कष्टतरो
दाहो मोहः शिरःकम्पो हिक्का श्वासः
सन्तापपान्तको ज्ञेयः सन्निपातोऽतिक

नं लोचने भुग्ने स्मृति: स्वल्पा ज्वरोऽधिक:।
: प्रलापनं कम्पो भ्रमो निद्रा च लक्षणै:॥
ाध्यो भुग्ननेत्रोऽयं सन्निपात: क्षयंकर:॥८॥
निष्ठीवनं मूर्च्छा ज्वरो मोहस्तृषा भ्रम:।
केर्हिक्कातिसारश्च संज्ञानाशो हृदि व्यथा॥
इत्वं श्यावरक्ताश्च देहेषु लक्षणैरिमै:।
ाध्य: सन्निपातोऽयं रक्तष्ठीवी निपातक:॥१०
ापतापकर्णार्त्ति: संज्ञानाशोऽतितापवान्।
: प्रलापकश्चिह्नै: सन्निपातोऽतिमारक:॥११
ोरं हिमवत् शीतमतिसारश्च कम्पनम्।
ंनादो हस्ततापो हिक्का श्वास: क्रमो-
त्तरम्।
ोङ्गशीतलो हन्ति शीताङ्ग: सन्निपातक:॥
१२॥
दोषश्च सुखं शुष्कं निद्रावैकल्यकष्टवाक्।
ये तममतिश्वासो मन्दाग्निर्बलहीनता॥
युतुल्यमभिन्यासं सन्निपातञ्च लक्षयेत्॥१३॥
इति चक्रपाणिदत्त:॥*॥
दृष्टा यस्य सम्भव: स तस्य सन्निपात:। सन्नि-
तविधिरनिमित्तं तद्विघाताय। इति कलाप-
ाकरणे ४ हत्तौ २ प्रकरणम्॥ समूह:।
ा,—
ुमज्योति:सलिलमरुतां सन्निपात: क्व मेघ:
देशार्था: क्व पटुकरणै: प्राणिभि: प्रापणीया:।
ौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
ामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु॥"
इति मेघदूतम्॥
म्यक्प्रकारेण पतनं मरणञ्च॥
ापातज्वर:,पुं,(सम्यक् निपातो नाशो यस्मात्
ादृशो ज्वर:।) त्रिदोषजज्वर:। स तु अष्ट-
ारज्वरान्तर्गतज्वरविशेष:। अष्टत्वं विह-
ोति। वातिक: पैत्तिक: श्लैष्मिकश्चेति त्रय:।
न्द्वजाश्च त्रय:। वातपैत्तिक: वातश्लैष्मिक:
त्तश्लैष्मिकश्चेति। संघातज: सान्निपातिक एक:
ुल्वणैकोल्वणै: षट् स्युर्हीनमध्यादिकैश्च षट्
मेश्चैको विकारास्ते सन्निपातास्त्रयोदश॥"
इति चरकेण त्रयोदश सन्निपाता उक्ता:॥
यथा। वातोल्वण: १ पित्तोल्वण: २ कफो-
ल्वण: ३। वातपित्तोल्वण: ४ वातश्लेष्मोल्वण:५
पत्तश्लेष्मोल्वण: ६ एवं षट्। अधिकवातो
मध्यपित्तो हीनकफ:१ अधिकवातो मध्यकफो
हीनपित्त: २ अधिकपित्तो मध्यवातो हीन-
कफ: ३ अधिकपित्तो मध्यमकफो हीनवात:४
अधिककफो मध्यवातो हीनपित्त: ५ अधिक-
कफो मध्यपित्तो हीनवातश्चेति ६ षट्। तुल्यप
एक: १। एवं त्रयोदश। अत्र तु त्रिदोषज-
त्वेन साम्यात् सान्निपातिक एक एव गणित:।
आगन्तुजोऽपि एक एव। अत्र आगन्तुज-
शब्देन अभिघातादयो हेतव उच्यन्ते। कुत्र-
चिद्राश्रय: कार्य्यकारणयोरभेदोपचारात्। इति
ज्वराधिकारे भावप्रकाश:॥*॥ अथ सन्नि-
पातज्वराधिकारमाह। तत्र सन्निपातज्वरस्य
विप्रकृष्टसन्निकृष्टकारणकथनपूर्व्विकां सम्प्राप्ति-
माह।
"त्रिदोषजनकेर्व्वातपित्तश्लेष्मामशीहगा:।
वह्निर्निरस्य कोष्ठाग्निं रसगा ज्वरकारिण:॥"
पूर्व्वरूपमाह।
"प्राग्रूपाणि त्रिदोषाणां स्युस्त्रिदोषज्वरे
नृणाम्।"
सन्निपातज्वरस्य सामान्यानि लक्षणान्याह।
"क्षणे दाह: क्षणे शीतमस्थि सन्धिशिरोरुजा।
सास्रावे कलुषे रक्ते निर्भुग्ने चापि लोचने॥
सस्वनौ सरुजौ कर्णौ कण्ठ: शूकैरिवाहत:।
तन्द्रा मोह: प्रलापश्च कासश्वासोऽरुचिर्भ्रम:॥
परिदग्धा खरस्पर्शा जिह्वा स्रस्ताङ्गता परा।
ष्ठीवनं रक्तपित्तस्य कफेनोन्मिश्रितस्य च॥
शिरसो लोठनं तृष्णा निद्रानाशो हृदि व्यथा।
स्वेदमूत्रपुरीषाणां चिराद्दर्शनमल्पश:॥
कृशत्वं नातिगात्राणां प्रततं कण्ठकूजनम्।
कोठानां श्यावरक्तानां मण्डलानाञ्च दर्शनम्॥
मूकत्वं स्रोतसां पाको गुरुत्वमुदरस्य च।
चिरात् पाकश्च दोषाणां सन्निपातज्वराकृति:॥"
लोचने सास्रावे साश्रुणी। कलुषेऽस्वच्छे।
निर्भुग्ने निर्गते कुटिले च। कण्ठ: शूकैरिव
धान्याग्रैरिवाहत:। जिह्वा परिदग्धा परि-
दग्धेव भवति। अथवा परिदग्धेव कृष्णा
दृश्यते। स्रस्ताङ्गता शिथिलगात्रता। परा
अतिशयिता। ष्ठीवनमित्यादि कफसंयुक्तस्य
रक्तस्य पित्तस्य च ष्ठीवनम्। शिरसो लोठन-
मितस्तत: शिरश्चालनम्। कृशत्वं नातिगात्राणां
गात्राणामतिशयितं कार्श्यं न व्याधिप्रभवात्।
प्रततं निरन्तरम्। कोठ: वरटीदष्टसंस्थान:
कोठ इत्यभिधीयते। श्याव: कपिशो वर्ण:।
मूकत्वमवचनत्वमल्पवचनत्वं वा। स्रोतसां
कर्णनासादीनाम्॥*॥ ननु वातादय: पर-
स्परविरुद्धगुणास्तेषां सम्भूयैककार्य्यारम्भकत्वं
नोपपद्यते परस्परोपघातात् दहनसलिलयोरिव
तत् कथं वातपित्तकफा मिलित्वा विकारोत्-
पादका:। अत्र समाधानमुक्तं दृढ़बलेन।
"विरुद्धैरपि न त्वेते गुणैर्घ्नन्ति परस्परम्।
दोषा: सहजसात्म्यत्वाद्विषं घोरमहीनिव॥"
गदाधरस्तु हेत्वन्तरमुक्तवान्।
"दैवाद्दोषस्वभावाद्वा दोषाणां सान्निपातिके।
विरुद्धैश्च गुणै: कश्चिन्नोपघात: परस्परम्॥"इति
ननु भिन्नचयप्रकोपकालानां वातपित्तकफानां
युगपदुत्थानाभावात् कथं सम्भूय सन्निपात-
ज्वरारम्भकत्वमुपपद्यते। उच्यते। त्रिदोष-
जनकनिदानबलेन युगपदेषां प्रकोपादिति
सिद्धान्त:॥*॥ अथ सामान्यसन्निपातज्वरस्य
त्रयोदश विशेषानाह।
"एकोल्बणास्त्रयस्ते स्युर्द्व्युल्बणाश्च तथेति षट्।
त्र्युल्बणश्च भवेदेको विज्ञेय: स तु सप्तम:॥
प्रवृद्धमध्यहीनैस्तु वातपित्तकफैश्च षट्।
सन्निपातज्वरस्यैवं स्युर्विशेषास्त्रयोदश॥"
तत्र प्रवृद्धवातो मध्यपित्तो हीनकफ: १ मध्य-
वात: प्रवृद्धपित्तो हीनकफ: २ हीनवात:
प्रवृद्धपित्तो मध्यकफ:३ प्रवृद्धवातो हीनपित्तो
मध्यकफ: ४ मध्यवातो हीनपित्त: प्रवृद्धकफ:५
हीनवातो मध्यपित्त: प्रवृद्धकफश्चेति षट् ६।
तेषां नामानि क्रमादाह।
"विस्फारकश्चाशुकारी कम्पनो बभ्रुसंज्ञक:।
शीघ्रकारी तथा भल्गु: सप्तम: कूटपाकल:॥
सम्मोहक: पाकलश्च याम्य: क्रकच इत्यपि।
तद्वत् कर्कटक: प्रोक्तस्ततो वैदारिकाभिध:॥"
तन्त्रान्तरे विस्फारक इत्यत्र विस्फुरक इति
पाठ:। बभ्रुस्थाने विभुरिति पाठ:। कुत्रापि
विद्ध इत्यपि पाठ:। भल्गुरित्यत्र फल्गुरिति
पाठ:। याम्य इत्यत्र संग्राम इति पाठ:।
कर्कटक इत्यत्र कर्कोटक इति पाठ:॥*॥ तत्र
वातोल्वणस्य लक्षणमाह।
"श्वास: कासो भ्रमो मूर्च्छा प्रलापो मोह-
वेपथु:।
पार्श्वस्य वेदना जृम्भा कषायत्वं मुखस्य च॥
वातोल्वणस्य लिङ्गानि सन्निपातस्य लक्षयेत्।
एष विस्फारको नाम्ना सन्निपात: सुदारुण:॥"१
अथ पित्तोल्वणस्य लक्षणमाह।
"अतिसारो भ्रमो मूर्च्छा मुखपाकस्तथैव च।
गात्रे च विन्दवो रक्ता दाहोऽतीव प्रजायते।
पित्तोल्वणस्य लिङ्गानि सन्निपातस्य लक्षयेत्।
भिषग्भि: सन्निपातोऽयमाशुकारी प्रकी-
र्त्तित:॥"२॥*॥
अथ कफोल्वणस्य लक्षणमाह।
"जड़ता गद्गदा वाणी रात्रौ निद्रा भवत्यपि।
प्रस्तब्धे नयने चैव मुखमाधूर्य्यमेव च॥
कफोल्वणस्य लिङ्गानि सन्निपातस्य लक्षयेत्।
मुनिभि: सन्निपातोऽयमुक्त: कम्पनसंज्ञक:॥"३॥
अथ वातपित्तोल्वणस्य लक्षणमाह।
"वातपित्ताधिको यस्य सन्निपात: प्रकुप्यति।
तस्य ज्वरो मदस्तृष्णा मुखशोषप्रमीलका:।
आध्मानारुचितन्द्राश्च कासश्वासभ्रमश्रमा:।
मुनिभिर्बभ्रुनामायं सन्निपात उदाहृत:॥"४॥*
अथ वातश्लेष्मोल्वणस्य लक्षणमाह।
"वातश्लेष्माधिको यस्य सन्निपात: प्रकुप्यति।
तस्य शीतज्वरो मूर्च्छा क्षुत्तृष्णा पार्श्वनिग्रह:॥
शूलमस्थिश्मशानस्य हिक्का श्वासश्च जायते।
असाध्य: सन्निपातोऽयं शीघ्रकारीति कथ्यते।
न हि जीवत्यहोरात्रमनेनाविष्टविग्रह:॥"५॥
अथ पित्तश्लेष्मोल्वणस्य लक्षणमाह।
"पित्तश्लेष्माधिको यस्य सन्निपात: प्रकुप्यति।
अन्तर्दाहो बहि: शीतं तस्य तृष्णा प्रवर्द्धते॥
तुद्यते दक्षिणं पार्श्वमुर:शीर्षगलग्रहा:।
ष्ठीवति श्लेष्मपित्तञ्च कृच्छ्रात् क[illegible]यते॥
विड्भेद: श्वासहिक्काश्च वर्द्ध[illegible]ता:।
ऋषिभिर्भल्गुनामायं [illegible]त:॥"६॥
अथ वातपित्तश्ले[illegible]ह।
"सर्व्वदोषोल्वणो यस्य [illegible]कुप्यति।

सर्वासामपि दोषाणां तस्य रूपाणि लक्षयेत् ॥
व्याधिभ्यो दारुणश्चैव सत्यमग्निविषोपमः ।
[illegible]
त्रिरात्रोपरमे तस्य जन्तोर्हरति जीवितम् ।
तदवस्थन्तु तं दृष्ट्वा मूढो व्याहरते जनः ॥
धर्षितो राक्षसैर्भूतैर्मातृभिश्चापरे [illegible] ।
[illegible]
[illegible]
[illegible]
नक्षत्रपीडामपरे गरकर्मेति चापरे ।
सन्निपातमिमं प्राहुर्भिषजः कूटपाकलम् ॥"७॥
अथ प्रवृद्धमध्यहीनवातादिजनितसन्निपातज्व-
रस्य लक्षणमाह ।
"प्रवृद्धमध्यहीनैस्तु वातपित्तकफैश्च यः ।
तेन रोगास्तु ये प्रोक्ता यथादोषबलाश्रयाः ॥
प्रलापायाससंमोहकम्पमूर्च्छारतिभ्रमाः ।
[illegible]
एष मर्कटको नाम्ना सन्निपातः सुदारुणः ॥"
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] ॥ ८ ॥ [illegible]
[illegible]
[illegible] । तत्र चाह ।
"[illegible]
[illegible] ॥"
इति ।
[illegible]

गीर्षदस्तथ मृत्युश्च सर्वाप्येतद्विशेषतः ।
भिषग्भिः सन्निपातोऽयं याम्यनामा प्रकी-
र्त्तितः ॥ १० ॥*॥
अथ महद्वातमध्यपित्तहीनकस्य सन्निपातस्य
लक्षणमाह ।
"महद्वमध्यहीनैस्तु वातपित्तकफैश्च यः ।
तेन रोगास्तु ये प्रोक्ता यथादोषबलाश्रयाः ॥
प्रलापायाससंमोहकम्पमूर्च्छारतिभ्रमाः ।
मन्यास्तम्भेन मृत्युश्च सर्वाप्येतद्विशेषतः ।
उक्तः क्रकचनामायं सन्निपातो भिष-
ग्वरैः ॥ ११ ॥*॥
मध्यहीनमहद्भिस्तु वातपित्तकफैश्च यः ।
तेन रोगास्तु ये प्रोक्ता यथादोषबलाश्रयाः ॥
अन्तर्दाहो विशेषोऽत्र न च वक्तुं स शक्यते ।
रक्तमासक्तकेनेव लक्ष्यते मुखमण्डलम् ॥
यत्नेनाकर्षितः श्लेष्मा हृदयान्न प्रसिच्यते ।
इषुणेवाहतं पार्श्वं तुद्यन्ते खम्यते हृदि ॥
प्रमोहश्वासहिक्का वर्द्धते तु दिने दिनम् ।
जिह्वा दग्धा खरस्पर्शा गलः शूकैरिवावृतः ॥
विसर्गं नाभिजानाति कूजेश्चापि कपोतवत् ।
पतीवर्त्ते यथा पूर्णः शुष्कश्चोष्ठतालुकः ॥
तन्द्रानिद्रातियोगार्त्तो हतवाग्हतद्युतिः ।
न चातिमन्यते स्थानं विपरीतानि चेच्छति ॥
चायस्थने च मनुष्यो रक्तं ष्ठीवति चाम्बरः ।
एष कर्कटको नाम्ना सन्निपातः सुदा-
रुणः ॥ १२ ॥*॥
हीनमध्यप्रवृद्धैस्तु वातपित्तकफैश्च यः ।
तेन रोगास्तु ये प्रोक्ता यथादोषबलाश्रयाः ॥
अस्य शूलं कटोतोदौ मध्यौ दाहो रुजा भ्रमः
भृशं क्लमः शिरो वक्रमन्या हृदयवायुजः ॥
प्रमोहकः श्वासहिक्काकासजाड्यविसंज्ञताः ।
प्रवमात्स्वर्णितन्तु साधयन्ति कदाचन ॥
एतस्मिन् सन्निपाते तु कर्णमूले सुदारुणा ।
पिडका जायते जन्तोर्यया कृच्छ्रेण जीवति ॥
स वैदारिकसंज्ञोऽयं सन्निपातः सुदारुणः ।
त्रिरात्रोपरमे तस्य जन्तोर्भवति जीवनम् ॥"१३॥
अथ तन्त्रान्तरे । वातोल्वणादीनां सन्निपात-
ज्वरविशेषाणां चतुर्दशानां शीताङ्गादीनि
चतुर्दश नामान्तराणि लक्षणान्तराणि चाह ।
"शीताङ्गोऽभिन्यासरुग्णो तन्द्रो प्रलापी तथा
रक्तष्ठीवी च तत्र भणितः सन्धिकजिह्वस्तथा
[illegible] प्रोक्तोऽभिन्यासो-
[illegible]
[illegible] ॥"
[illegible]
[illegible]
[illegible]
[illegible] ॥
अथ तेषां [illegible] ।
"[illegible]
[illegible] ।

क्रमशो हुकफतान्तर्हाहवम्युपोडा
स्वरविकृतिभिरार्त्तः शीतगात्रः
तन्द्रातीव ततस्तृपातिसरणं श्वासोऽपि
[illegible]
तृष्णामा रसना क्रमः [illegible]
[illegible]
यत्र स्यात् स हि तन्द्रिको निगदितो [illegible]
[illegible]
यत्र ज्वरे निखिलदोषनितान्तदोषः
जाते प्रलापबहुला सहसोत्थितश्च ।
कम्पव्यथापतनदाहविसंज्ञताः स्युः
[illegible] प्रलापक इति [illegible]
निष्ठीवो रुधिरस्य [illegible]
लौहित्यं नयने [illegible]
आध्मानश्च विसंज्ञता च तपनं [illegible]
रक्तष्ठीविनि सन्निपातजनिते नि [illegible]
[illegible]
भृशं नयनरक्तताज्ञसनजानितन्द्राभ्रमः
प्रलापमदवेपथुश्रवणहानिमोहादयः ।
घटो निखिलदोषजो भवति यत्र [illegible]
पुरातनचिकित्सकैः स इह भुग्ननेत्रो [illegible]
[illegible]
दोषास्तीव्रतरा भवन्ति [illegible]
[illegible]
मोहोऽतीव विचेष्टता विकलता [illegible]
[illegible]
दाहविकृणमाननश्च दहनो मन्दो [illegible]
[illegible]
मोऽभिन्यास इति प्रकीर्त्तित इह [illegible]
भिषग्भि [illegible]
त्रिदोषजनिते ज्वरे भवति यत्र [illegible]
हता कठिनकण्टकैस्तदनु मूकता मूर्च्छा
[illegible]
पुरातनभिषग्वरास्तमिह जिह्वकं [illegible]
व्यथातिशयिता भवेच्छ्वयथुसंयुता [illegible]
[illegible]
[illegible]
त्रिदोषजनिते बुधैः स हि [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
दाहोऽधिको भवति [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

षिदोषजनितज्वरशेषजन्मा
। कर्णमूलविषये श्वयथुर्व्यथा च ।
ग्रहो बधिरताश्वसनप्रलाप-
दमोहदहनानि च कर्णकाख्ये ॥ १२ ॥
: शूकशतावरुद्धवदति श्वासःप्रलापोऽरुचि-
ो देहरुजा तथापि च हनुस्तम्भः शिरो-
ऽर्त्तिस्तथा ।
ो वेपथुना सहेति सकलं लिङ्गं त्रिदोषज्वरे
स्यात् स हि कण्ठकुब्ज उदितः प्राज्ञै-
श्चिकित्साबुधैः ॥ १३ ॥ * ॥
गस्तेषु साध्यः स्यात्तान्द्रिकश्चित्तविभ्रमः ।
को जिह्वकः कण्ठकुब्जः पश्चापि कष्टकाः ॥
दाहस्त्वतिकष्टेन संसाध्यस्तेषु भाषितः ।
ओवी भुग्ननेत्रः शीतगात्रः प्रलापकः ।
न्यासोऽन्तकश्चैते षड़साध्याः प्रकी-
र्त्तिताः ॥"*॥
तन्त्रान्तरे । वातोल्बणादीनां सन्निपात-
विशेषाणां त्रयोदशानां कुम्भीपाकादीनि
ोदश नामान्तराणि लक्षणान्तराणि चाह ।
"कुम्भीपाकः प्रोर्णुनावः प्रलापी
क्षन्तर्दाहो दण्डपातोऽन्तकश्च ।
एणीदाहश्चाथ हारिद्रसंज्ञो
भेदा एते सन्निपातज्वरस्य ॥
गोपभूतहार्मा यन्त्रापीड़श्च संन्यासः ।
षोषी च विशेषास्त्वेवोक्तास्त्रयोदश च ॥"
षां लक्षणानि ।
ोनाविवरक्षरद्बहुशोणासितनीललोहितं
सार्त्ति ।
लुठन् मस्तकमभितः कुम्भीपाकेन पीड़ितं
विद्यात् ॥
ुत्क्षिप्य यः स्वमङ्गं क्षिपत्यधस्तान्नितान्त-
मुच्छ्रसिति ।
प्रोर्णुनावजुष्टं विचित्रकष्टं विजानीयात् ॥
देहमाङ्गपीड़ा कम्पो दवथुर्वमी व्यथा कण्ठे
विश्च गुर्व्वीदं प्रलापिजुष्टस्य जायते
लिङ्गम् ॥
न्तर्दाहः शैत्यं वहिश्च यस्या विशेषतः श्वासः
ङ्गमिव दग्धकल्पं सोऽन्तर्दाहार्द्दितः कथितः ॥
क्तं दिवा न निद्रामुपैति ग्लायति मूढ़धो-
सम्भ्रमः ।
त्याय दण्डपाते भ्रमातुरः सर्व्वतो भ्रमति ॥"
भसौ ग्लायति आकाशात् किञ्चिद्ग्रहीतुं
करौ प्रसारयति इत्यर्थः ।
"संपूर्य्यते शरीरं ग्रन्थिभिरभितस्तथोदरं मरुता
ामातुरस्य सततं विचेतनस्यान्तकार्त्तस्य ॥
ारिधावतोव गात्रे एकपार्श्वे भुजगपतग-
हरिणगणः ।
ेपथुमतः सदाहस्तैणोदाहज्वरार्त्तस्य ॥"
एकपार्श्वे पीड़ाभाजने । गात्रस्य विशेषणमेतत्
"यस्यातिपीतमङ्गं नयने सुतरामलं ततोऽप्य-
धिकम् ।
दाहोऽतिशीतता वहिरस्य स हारिद्रको ज्ञेयः ॥

छगलकशरीरगन्धः स्तम्भरुजाबान्निरुद्धगल-
रन्ध्रः ।
अजघोषसन्निपातादाताम्राक्षः पुमान् भवति ॥
शब्दादीनधिगच्छति न स्वान्विषयान् यदी-
न्द्रियग्रामः ।
हसति प्रलपति परुषं स ज्ञेयो भूतहासार्त्तः ॥
येन मुहुर्ज्वरवेगादयन्त्रेणेवावपीड्यते गात्रम् ।
रक्तं पीतञ्च वमेत् यन्त्रापीड़ः स विज्ञेयः ॥
अतिसरति वमति कूजति गात्राण्यभितर्यिरं
नरः क्षिपति ।
स न्याससन्निपाते प्रलपति भुग्नाक्षिमण्डलो
भवति ॥
मेचकवपुरतिमेचकलोचनयुगलोऽवलो मलोत्-
सर्गात् ।
संशोषिणि मितपिड़कामण्डलयुक्तो ज्वरे भवति
नारायण एव भिषग्भेषजमेतेषु जाह्नवीनीरम् ।
नैरुज्यहेतुरेको नित्यं मृत्युञ्जयोऽध्येयः ॥"*॥
अथासाध्यसन्निपातज्वरस्य लक्षणमाह ।
"सन्निपातज्वरस्यान्ते कर्णमूले सुदारुणः ।
शोथः संजायते तेन कश्चिदेव प्रमुच्यते ॥"
सुदारुणः मारकत्वात् यतस्तेन शोथेन कश्चि-
देव प्रमुच्यते । कोऽपि जीवितं त्यजति इत्यर्थः ।
"सन्निपातज्वरान् कष्टानसाध्यानपरे जगुः ।
दोषे विवद्धे नष्टेऽग्नौ सर्व्वसम्पूर्णलक्षणः ।
सन्निपातज्वरोऽसाध्यः कष्टसाध्यस्ततोऽन्यथा ॥"
दोषे पित्तकफे । विवद्धे अपक्वे सर्व्वसम्पूर्ण-
लक्षणः सर्व्वाणि दाहशीतादीनि सम्पूर्णानि
अन्यूनानि प्रौढ़ानीति यावत् लक्षणानि यस्य
सः । ततोऽन्यथा दोषे पक्वे अग्नौ दीप्ते स्वल्प-
लक्षणकः कष्टसाध्य इत्यर्थः ॥ * ॥ * ॥
अथ सामान्यसन्निपातज्वरस्य चिकित्सा ।
"सन्निपातार्णवे मग्नं योऽभ्युद्धरति मानवम् ।
कस्तेन न कृतो धर्म्मः काश्च पूजां न सोऽर्हति ॥
मृत्युना सह योद्धव्यं सन्निपातं चिकित्सता ।
यश्च तत्र भवेज्जेता स जेतामयसङ्कुले ॥
श्लेष्मनिग्रहमेवादौ कुर्य्याद्दाघौ त्रिदोषजे ।
निरस्ते श्लेष्मणि ह्यस्य स्रोतःसूद्घाटितेषु च ।
लाघवं जायते सद्यस्तृष्णा चैवोपशाम्यति ॥"*॥
भेड़ोऽप्याह ।
"सन्निपातज्वरे पूर्व्वं कुर्य्यादामकफापहम् ।
पश्चात् श्लेष्मणि संक्षीणे शमयेत् पित्तमारुतौ ॥"
इति ॥ * ॥
ननु तन्त्रान्तरे प्रथमं पित्तस्य प्रतिक्रिया प्रोक्ता
यथा,—
"शमयेत् पित्तमेवादौ ज्वरेषु समवायिषु ।
दुर्निवारतरं तद्धि ज्वरार्त्तेषु विशेषतः ॥" इति
अन्यत्रापि ।
"समवाये त्रिदोषाणां पूर्व्वं पित्तमुपाचरेत् ।
ज्वरे दंशातिसारे च सर्व्वत्रान्यत्र मारुतः ॥"
इति ॥
तथान्यत्र प्रथमं वायोः प्रतिक्रिया प्रोक्ता ।
यथा,—

"वातस्यानुजयेत् पित्तं पित्तस्यानुजयेत् कफम् ।"
इति ॥ * ॥
तत्र व्यवस्थामाह तन्त्रान्तरे ।
"ज्वरे त्रिदोषजे सामे शमयेत् प्रथमं कफम् ।
जीर्य्यत्यामे जयेत् पित्तं निरामे त्वनिलं जयेत् ॥
इति । प्रथममिति स्थानत्रयेऽपि सम्बध्यते ।
अन्ये त्विति समादधते ।
"त्रयाणां वा जयेत् पूर्व्वं तं यः स्याद्बलवत्तरः ।"
इति ।
तथा च ।
"संसर्गे यो गरीयान् स्यादुपक्रम्यः स वै भवेत्
शेषदोषाविरोधेन सन्निपाते तथैव च ॥" इति ॥
संसर्गे दोषद्वयसंसर्गे । गरीयान् बलवत्तरः ।
"अंशांशं यत्र दोषाणां विवेक्तुं नैव शक्नुयात् ॥
क्रियां साधारणीं तत्र विदधीत चिकित्सकः ॥
लङ्घनं वालुकास्वेदो नस्यं निष्ठीवनं तथा ।
अवलेहोऽञ्जनञ्चैव प्राक् प्रयोज्यं त्रिदोषजे ॥"
ज्वरे इति शेषः ॥ * ॥ ननु ।
"क्रियायास्तु गुणालाभे क्रियामन्यां प्रयोजयेत्
पूर्व्वस्यां शान्तवेगायां न क्रियासङ्करो हितः ॥"
इति वचनेन क्रियासङ्करस्य निषिद्धत्वात् कथ-
मत्र नस्यनिष्ठीवनावलेहाञ्जनानि युगपद्विधी-
यन्ते इत्याशङ्कायामाह ।
"क्रियाभिस्तुल्यरूपाभिः क्रियासाङ्कर्य्यमिष्यते ।
भिन्नरूपतयैतास्तु नहि कुर्व्वन्ति दूषणम् ॥"*॥
तत्र लङ्घनस्य अवधिमाह ।
"त्रिरात्रं पञ्चरात्रं वा दशरात्रमथापि वा ।
लङ्घनं सन्निपातेषु कुर्य्याद्वारोग्यदर्शनात् ॥"
लङ्घने त्रिरात्रादिविकल्प उल्बणवाताद्यपेक्षया
दोषाणां शीघ्रमध्यमन्दशक्तिकत्वात् व्याधिस्व-
भावाच्च । आरोग्यदर्शनात् इति यावदरोगता-
दर्शनं स्यात्तावद्वा लङ्घनं कुर्य्यात् । एतेन
त्रिरात्राद्यवधेरनियतत्वं सूचितम् । अतएव
सुश्रुतः प्राह ।
"सप्तमे दिवसे प्राप्ते दशमे द्वादशेऽपि वा ।
पुनर्घोरतरो भूत्वा प्रशमं याति हन्ति वा ॥"
घोरतर इति घोरः स्वभावादेव तदा घोरतरो
भूत्वे ति ॥ * ॥ हननप्रशमनयोः कारणमाह ।
"पित्तकफानिलवृद्ध्या दशदिवसद्वादशाह-
सप्ताहात् ।
हन्ति विमुञ्चत्यथवा त्रिदोषजो धातुमलपा-
कात् ॥"
त्रिदोषजो ज्वर इति शेषः । धातुमलपाकात्
धातुपाकाद्धन्ति मलपाकाद्विमुञ्चतीत्यर्थः ।
धातुमलपाके प्राक्तनकर्म्मैव हेतुः । तत्र यदि
जीवनसंवर्द्धकं कर्म्मास्ति तदा मलपाकोऽन्यदा
धातुपाकः । स च रसादिशुक्रान्तधातूनां पाको
बोद्धव्यः ॥*॥ तत्र धातुपाकस्य लक्षणमाह ।
"निद्रानाशो हृदि स्तम्भो विष्टम्भो गौरवा-
रुची ।
अरतिर्बलहानिश्च धातूनां पाकलक्षणम् ॥"
विष्टम्भ उदरस्य । गौरवं गात्राणाम् । अन्यत्र ।

"संबाध्यमानो हृदि नाभिदेशे
गात्रेषु वा पाकरुजायुतेषु ।
पीड़ाज्वरार्त्तोऽङ्गुलिभिश्च गच्छेत्
स धातुपाको कथितो भिषग्भिः ॥"

अपरञ्च ।
"नाभेरूर्द्धं हृदोऽधस्तात् पीड्यते व्यथया यदि
धातोः पाकं विजानीयादन्यथा तु मलस्य च ॥"
मलपाकलक्षणमाह ।
"दोषप्रकृतिवैकल्यं लघुता ज्वरदेहयोः ।
इन्द्रियाणाञ्च वैमल्यं मलानां पाकलक्षणम् ॥"
दोषप्रकृतिवैकल्यं दोषा वातादयस्तेषां प्रकृतिर्वेपथुदाहगौरवादिकरणं तस्य वैकल्यं वैपरीत्यम् । वैमल्यं मलराहित्यम् । मलानां दोषाणाम् । अन्यच्च ।
"गात्रहीन्द्रियपञ्चकस्य पटुता यद्येव यत्र क्रमात् दृष्यादिप्रशमो ज्वरस्य मृदुता तं दोषपाकं वदेत् ।
क्षुत्प्राप्तोऽतिवेदनातिमरणं तीव्रो ज्वरस्तूक्तमद भ्रामाधिकमरोचको रतिरिति स्याद्धातुपाकाकृतिः ॥"*॥
आमस्याधिक्येन सप्तमदिवसाद्यवध्यतिक्रमे परमावधिमाह । हारीतः ।
"सप्तमी द्विगुणा यावन्नवम्येकादशी तथा ।
एषा त्रिदोषमर्य्यादा मोक्षाय च वधाय च ॥"
नवम्येकादशी चागमनदिवसं संविहाय बोद्धव्या तेनागमनदिवसं नीत्वा दशमी द्वादशी च पञ्च रात्रिरित्यध्याक्रियते ।
"सन्निपातज्वरी पूर्वं सम्यगञ्जनमाचरेत् ।
ततः शीतं विधेयश्च सम्यक् भेषजं भवेत् ॥
सन्निपातेन दग्धस्तु पायसं तालुशोषितम् ।
यः पाययेज्जलं शीतं स मृत्युर्नरविग्रहः ॥"
शीतं दग्धपितम् । शृतं तु शीतं विहितमेव इति लङ्घनम् ॥*॥ अथ वालुकास्वेदः ।
"वातघ्नं लघने स्वेदात् कारयेद्रुचिनिर्मितात् स्निग्धः स्वेदो निषिद्धोऽत्र विना केवलवातजात् एवं रुक्षपटस्थितकाञ्जिकसंसिक्तवालुकास्वेदः स्मृतोऽपि वातकफामयमस्तकशूलाङ्गभङ्गादीन् । शीतवातमाढ्यं कृत्वा नीत्वा पाचकमामयम् । हन्ता वातकफघ्नं स्वेदो ज्वरमपोहति ॥"
इति वालुकास्वेदः ॥*॥
अथ नस्यम् ।
"सैन्धवं श्वेतमरिचं सर्षपाः कुष्ठमेव च ।
वस्तमूत्रेण संपिष्टं नस्यं तन्द्रानिवारणम् ॥"
श्वेतमरिचं शिग्रुबीजम् । सैन्धवादिनस्यम् ॥
"मधूकसारसिन्धूत्थवचोषणकणाः समाः ।
श्लक्ष्णं पिष्ट्वाम्भसा नस्यं दद्यात् सज्ञाप्रबोधनम् ॥"
इति मधूकसारादिनस्यम् ॥
"कुङ्कुमाद्रकरसं बोधं विजयान्वितम् ।
ताम्रा त्रिरिविरित्तं नस्यं तीक्ष्णं प्रबोधयेत् ॥
हैन दन्तिनो त्वं वा दत्तिमथ दर्शयते ।
त्रिपिटत्रयत्रयावसाय इह चैन्द्रमार्गित ॥
मोहामयेन मुग्धं बोधयितुं यादृशः शक्तः ।
कल्पतरुनामधेयो रसो न तादृक् परं किञ्चित् ॥"
इति नस्यम् ॥*॥
अथ निष्ठीवनम् ।
"जिह्वातालुगलक्लोम मरुत्पित्तेन चोच्छ्रितः ।
तदा स धारयेच्छोषं जिह्वायाः खरतां तथा ॥
स्फुटनञ्च तदा जिह्वां लेपयेन्मधुपिष्टया ।
द्राक्षया साम्यपातेन जिह्वा स्यात् सरसा मृदुः ॥
आर्द्रकस्य रसोपेतं सैन्धवं कटुकत्रयम् ।
आकण्ठाद्धारयेदास्ये निष्ठीवेच्च पुनः पुनः ॥
तेनास्य हृदयक्लोममन्यापार्श्वशिरोगलात् ।
लीनोऽप्याकृष्यते श्लेष्मा लाघवं चास्य जायते ॥
पर्व्वभेदो ज्वरो मूर्च्छा निद्राश्वासगलामयाः ।
मुखाक्षिगौरवं जाड्यमुत्क्लेशश्चोपशाम्यति ॥
सकृत् द्वित्रिचतुः कुर्य्याद्दृष्ट्वा दोषबलाबलम् ।
एतद्धि परमं प्राहुर्भेषजं सन्निपातिनाम् ॥"
इति कवलग्रहः ॥*॥
अथावलेहः ।
"कट्फलं पौष्करं शृङ्गी व्योषं यासश्च कारवी
श्लक्ष्णचूर्णीकृतं चैतत् मधुना सह लेहयेत् ॥
एषावलेहिका हन्ति सन्निपातं सुदारुणम् ।
हिक्कां श्वासञ्च कासञ्च कण्ठरोगञ्च नाशयेत् ।
एतद्द्वयोर्ज्ज्यं कफोद्रेके चूर्णमार्द्रकजे रसैः ॥"
तन्त्रान्तरे च उक्तम् ।
"षटाङ्गं मधुना लिह्यादार्द्रकस्य रसेन वा ।
संमोहं दारुणं हन्यात्तन्द्राकाससमन्वितम् ॥"
इति ।
"सर्व्वेषु सन्निपातेषु न क्षौद्रमवचारयेत् ।
शीतोपचारि क्षौद्रं स्याच्छीतञ्चात्र विरुध्यते ॥
अयमभिप्रायः । सन्निपातज्वरेषु श्लेष्मनिग्रहार्थं सर्व्वदा स्वेदो हित उक्तः । अत्राग्निसम्बन्धाद्देहस्योष्णता तिष्ठेदेव । उष्णेन मधुना विरोधः । उक्तञ्च सुश्रुतेन ।
"उष्णैर्विरुध्यते सर्व्वं विषान्वयतया मधु ।
उष्णार्त्तमुष्णैरुष्णञ्च तन्निहन्ति यथा विषम् ॥"
इति ॥
शीतोपचारि क्षौद्रमिति । शीतेनोपचारोऽस्यास्तीति शीतोपचारि । शीतञ्चात्र सन्निपाते विरुध्यते । अयमवलेहः प्रायशोऽङ्गजत्रुगरोगहरत्वात् प्रायसुपयुज्यते । यत उक्तं चरकेण ।
"ऊर्द्ध्वजत्रुगदघ्नी या सा प्रायमवलेहिका ।
अधोरोगहरी या सा भोजनात् प्राक् प्रयुज्यते ॥"
पौष्करं पुष्करमूलं तदभावे कुष्ठं देयम् ।
शृङ्गी कर्कटशृङ्गी । व्योषं शुण्ठीपिप्पलीमरिचानि । यासो यवासः । केचिद्यवासस्थाने दुरालभां प्रक्षिपन्ति । कारवी मगरैला इति लोके । षटाङ्गावलेहिका ॥*॥
"त्रिवृतामलकं दिव्या द्राक्षया सह मिश्रयेत् ।
त्रिफलैश्च समायुक्तं मधुना सह लेहयेत् ।
तेनाशु शाम्यति श्वासः कासो
इत्यवलेहः ।
अथाञ्जनम् ।
"शिरीषबीजगोमूत्रकृष्णामरिचसैन्धवैः ।
अञ्जनं स्यात् प्रबोधाय सरसोनशिलावचैः ॥"
इति शिरीषबीजाद्यञ्जनम् ।
"भयोरजः
गोपित्तेन समायुक्तं
गोपित्तं गोरोचना ।
"अञ्जनं सम्यगारब्धं मधुसिन्धुशिलान्वितं
प्रमोहद्रोहि भवति भाषितं भिषजां वरैः ।
शिला मनःशिला । उषणं मरिचम् । इत्यञ्जनम् ॥*॥ अथ क्वाथः ।
"सूतं विषञ्च मरिचं तुल्यकं नवसादरं
चूर्णितं स्वरसेनाद्यं धूर्त्तपत्ररसेन वा ।
सन्निपातकृते मोहे मूर्द्धि
अस्थिच्छ्रयास्त्रनेनैव लेपं कुर्य्यात् पदोपरि
पदं पीड इति लोके ।

पाचनं वातकफहृत् ।
शालपर्णी पृश्निपर्णी बृहती
गोक्षुरो वातपित्तघ्नं कनीयः
उभयं दशमूलं तत् पिप्पलीचूर्णसंयुतं
सन्निपातज्वरं हन्ति हृत्कण्ठग्रहनाशनं
तन्द्रावातकफासृक्श्वासपार्श्वार्त्तिनाशनं
महान्ति यानि मूलानि

तेषान्तु वल्कलं ग्राह्यं
अत्र विल्वादीनां पञ्चानां मूलत्वग्ग्राह्यम् । दशमूलक्वाथः ॥*॥
"दशमूलीकषायस्तु सपौष्करकणान्वितः
सन्निपातज्वरे देयः श्वासकासप्रमर्द्दनः ॥"
इति द्वादशाङ्गक्वाथः ।
"चिरज्वरे वातकफोल्वणे वा
त्रिदोषजे वा दशमूलमिश्रः ।
किराततिक्तादिगणः प्रयोज्यः
शुद्ध्यर्थिने वा त्रिवृता विमिश्रः ॥"
किराततिक्तादिर्यथा,—
किराततिक्तको मुस्तं गुडूची विश्वभेषजं
किरातादिगणो ह्येष चातुर्भद्रकमित्यपि ।
इति चतुर्दशाङ्गक्वाथः ।
"दशमूली शठी शृङ्गी पौष्करं सदुरालभा
भार्गी कुटजबीजञ्च पटोलं कटुरोहिणी ॥
अष्टादशाङ्ग इत्येष सन्निपातज्वरापहः ।
कासहृद्ग्रहपार्श्वार्त्तिश्वासहिक्कावमीहरः ॥"
इत्यष्टादशाङ्गक्वाथः ।
"भूनिम्बदारुदशमूलमहौषधाब्द-
तिक्तेन्द्रबीजधनिकेभकणाकषायः ।
तन्द्राप्रलापकसनारुचिदाहमोह-
श्वासत्रिदोषजनितज्वरनाशनः स्यात् ॥"
इति द्वितीयोऽष्टादशाङ्गः

...स्थैव गुञ्ज वक्री यद्गतिनैव ।
...ष्टादशाहमिथ्येव मृत्युकल्पं ज्वरं जयेत् ॥"
इति ॥ ७ ॥

...थ सन्निपातज्वरे रसाः ।
...वयं त्रिकटुकं गन्धं टङ्कणं मृतमुल्वकम् ।
...तु रस्य च बीजानि हिङ्गु सं नवमं स्मृतम् ॥
... समभागानि दिनैकं विजयाद्रवैः ।
...द्येश्चणकाकारा कर्त्तव्या वटिकाश्च ता ॥
...र्थीया तु पानश्चो रविमूलकषायकः ।
...तसञ्जीवनी नाम्ना सन्निपातज्वरान्तकृत् ॥"
इति मृतसञ्जीवनी वटिका ॥ ७ ॥

...न्निपातज्वरे रसप्रदीपे ।
...शुद्धसूतसमं गन्धं सूताद्धं मृतताम्रकम् ।
...त्रभिस्तुल्यैर्गन्धैर्वा चौवैर्मर्द्दयेदातपे खरे ॥
...र्द्दयेद्दिनमेकन्तु निर्गुण्डीशिग्रुजद्रवैः ।
...न्धाय गोलं तं शीलमस्त्रमूषागतं पचेत् ॥
...त्रयामान् वालुकायन्त्रे ततः खल्वे विचूर्णयेत् ।
...ष्टमांशं विषं तत्र चिपेत्तेनापि मर्द्दयेत् ॥
...विनवाख्यो रसो ज्ञेय भीयो गुञ्जाद्वयोन्मितः ।
...खकोलकषायेण छागीदुग्धेन वा सह ॥
...सेनानेन भुक्तेन सन्निपातज्वरो महान् ।
...यं व्रजति चिप्रं कष्टव्यो नात्र संशयः ॥"
इति त्रिनेत्रो रसः ॥ ७ ॥

...न्निपातज्वरे रसप्रदीपे ।
"भस्म लौहस्य निष्कं स्यादारक्तोपलसम्भवम् ।
...मरिचं निष्कमात्रञ्च विषं निष्कं विचूर्णयेत् ॥
...रसो भस्मेश्वरो नाम्ना सन्निपातज्वरान्तकृत् ।
एकगुञ्जामितो भक्ष्य आर्द्रकस्य द्रवेण हि ॥"
इति भस्मेश्वरो रसः ॥ ७ ॥

सन्निपातज्वरे रसेन्द्रचिन्तामणौ ।
"द्वौ कर्षौ सूतकाद्याह्यौ गन्धकाद्द्वौ तथैव च ।
...तत्समं सर्वं दिनं हंसपदीरसैः ॥
...कस्य वटिकां कृत्वा निःचिपेत् काचभाजने ।
कर्पकममृतं तत्र चिप्त्वा यत्नं निरोधयेत् ॥
कूपिकायाः परोभागं वालुकाभिश्च पूरयेत् ।
...ह्वे यावदहोरात्रं तावत्तत्पचेद्रसम् ॥
दीपमात्रोऽनलो देयः स्वाङ्गशीतं समुद्धरेत् ।
तोलार्द्धममृतं तत्र चिपेत्तावत्तथोपणम् ॥
भक्षितो रक्तिकामात्रो रसस्त्वग्निकुमारकः ।
सन्निपातज्वरं हन्यादातं मन्दाग्नितामपि ॥
शूलं संग्रहणीं गुल्मं चयं पाण्डुगदं तथा ।
श्वासकासादिकान् सर्व्वान् गदानेव विना-
शयेत् ॥"
इति अग्निकुमारो रसः ॥ ७ ॥

सन्निपातज्वरादिषु रसेन्द्रचिन्तामणौ ।
"गन्धमटङ्गमरिचं विषं धत्तूरजैर्द्रवैः ।
दिनसंमर्दितं शुष्कं वल्लयक्तो रसो भवेत् ॥
आर्द्रकस्य द्रवेणैव दातव्यो रक्तिकामतः ।
सन्निपातज्वरं घोरं नाशयेन्नात्र संशयः ॥"
...मः पारदः । टङ्कटङ्काः । ...ष्टवक्रो रसः ॥ ७ ॥
सन्निपातज्वरे रसेन्द्रचिन्तामणौ । अथ शीत-
ज्वरे रसाः ।

"मृतकं गन्धकञ्चैव हरितालं मनःशिलाम् ।
एकनिष्कं द्विनिष्कञ्च चतुर्निष्कं तथैव च ॥
पञ्चनिष्करसैः कारवेल्लाः कल्कं प्रकल्पयेत् ।
ताम्रपत्राणि तुल्यानि तेन कल्केन लेपयेत् ॥
शरावसंपुटे तानि कृत्वा लेपामुपर्य्यपि ।
दद्यात्तां पिष्टिकां पश्चात् पुटपाकेन पाचयेत् ॥
ततः संचूर्णयेदेव रसः क्षौद्रेण भक्षितः ।
यद्येकमात्रया हन्ति घोरं शीतज्वरं ध्रुवम् ॥"
पारटङ्कः १ गन्धकटङ्कः २ हरितालटङ्कः ४
मनःशिलाटङ्कः ५ ताम्रपत्रटङ्कः १२ । इति
शीतज्वरारिरसः ॥ ७ ॥ रसप्रदीपे ।
"पारदं गन्धकं तुल्यं दरदञ्च विषं समम् ।
विषाद्द्विगुणं शौल्वं मरिचं त्रिगुणमेव च ॥
अश्वगन्धा तु विजया कासमर्दकठिल्लकः ।
चतुर्णाञ्च रसैरेतच्चूर्णं यत्नेन मर्द्दयेत् ॥
तुलस्यास्तु दलैः सार्द्धं भक्षितो रक्तिकामितः ।
हन्ति शीतज्वरं घोरं नाम्नायं शीतकेशरी ॥"
इति शीतकेशरीरसः ॥ ७ ॥

रसप्रदीपे ।
"तालकं शुक्तिकाचूर्णं तुल्यं तयोमयोपरि ।
नवमांशञ्च तुल्यं स्यात् मर्द्दयेत् कन्यकाद्रवैः ॥
तत्तु संशुष्कमुपलैर्वन्यैर्गजपुटे पचेत् ॥
शीतं तच्चूर्णयेद्दद्यं गुञ्जामात्रं सितायुतम् ॥
प्रभाते भक्षयेत्तेन याति शीतज्वरक्षयम् ।
शान्तिर्भवति कस्यापि कस्यापि न भवत्यपि ॥"
इति शीतभञ्जी ॥ ७ ॥

"रसकं पारदं तुल्यं तालकं गन्धटङ्कणम् ।
सर्व्वमेतत् समं चूर्णं कारवेल्लीरसैर्दिनम् ॥
मर्द्दयेत्तेन शुद्धस्य रसकादिसमस्य तु ।
ताम्रस्य भाजनस्यान्तर्लिम्पेद्दशाङ्गुलोन्मितम् ॥
तत् पचेद्वालुकायन्त्रे यथा यावत् स्फुटन्ति हि ।
शीतलं तद्गृहीयात्ताम्रपात्रोदराग्निपक् ॥
शीतभञ्जो रसो माषमात्रो मरिचसंयुतः ।
भक्षितः पर्णखण्डेन नाशयेद्विषमज्वरान् ॥"
इति शीतभञ्जीरसः ॥ ७ ॥

शीतज्वरादिविषमज्वरेषु रसेन्द्रचिन्तामणौ ।
"तालको दरदो द्रुतपारदो गन्धकः शिला ।
क्रमाद्भागाद्धेरक्तितं कारवेल्लरसमर्द्दितम् ॥
अनेनास्य प्रमाणेन ताम्रपात्रीं प्रलेपयेत् ।
पयीसुपर्णीं दृढे भाण्डे तामिन्धयाथ पूरयेत् ॥
शुष्कां वालुकया वस्त्रतिनीं प्रक्षालयेद्दृढम् ।
शीतं संचूर्ण्य सापीऽस्य मानवस्तीदशे स्थितः ॥
भक्षितो मरिचैः सार्द्धं समस्तान् विषमज्वरान्
शीतदाहादिकान् हन्ति पथ्यं माषौदनं
पयः ॥"
इति शीतभञ्जीरसः ॥ ७ ॥

रसरत्नप्रदीपे ।
"रसं गन्धं विषञ्चैव समं कृत्वा टङ्कणम् ।
मर्द्दयेत् खल्वमध्ये तु यावत् कज्जलसन्निभम् ॥
नकुलस्य मुखे क्षिप्त्वा तदा संमर्दयेद्दृढम् ।
स्थापयेत् मृन्मयी पात्रे अधोर्द्धंपरं मर्दयेत् ॥
मुखे भाण्डे संनिरुध्य चुल्ल्यां दद्यादग्निकम् ।
स्वाङ्गशीतं समुद्धृत्य कृत्वा कल्केन कज्जलीम् ।
गुञ्जाद्वयप्रमाणेन नस्यकर्म्मणि योजयेत् ।
नासभागे ज्वरं हन्ति तत्क्षणात् कौतुकं महत्
योजयेद्यदि भागे आरोग्यं निश्चितं भवेत् ॥"
इत्यर्द्धनारीनाटेश्वरो रसः ॥ ७ ॥

शीतज्वरादिविषमज्वरेषु रसरत्नप्रदीपे ।
"कट्फलं त्रिफलादारुचन्दनं पद्मकन्तथा ।
कटुकापद्मकोशीरं त्रिफलेत् कर्षकं क्वचे ॥
त्रिदोषदाहतृष्णार्त्तं पानमात्रेण पूजितम् ।
दीर्घकालज्वरार्त्तानामेतत् स्यादमृतोपमम् ॥"
...कट्फलाद्युशीरान्तानां प्रत्येकं ...
प्रस्थमिते त्रिपक्षेत् अर्द्धशेषम् । कट्फलादिचतुर्थ
तृष्णायां दाहे च ।
"सन्निपाते तु दाहार्त्तं यः सिञ्चेच्छीतवारिणा
आतुरः स कथं जीवेद्भिषजा स कथं भवेत् ॥"
एव सन्निपातिनो दाहे शीतामुखे निषिद्धे तत्
दाहात्यय तत्र व्याख्यानवशाद्दृष्टान्तमात् ॥ ७ ॥
अथात्रमाह ।
"दुःस्पर्शगोमुखस्तुद्रासिद्धमाहारमर्पयेत् ।
दोषशान्तिबलाम्व्यं त्रिदोषज्वरिणे भिषक् ॥"
दुःस्पर्शो यवासः । आहारसुचितमन्नम् ॥
"लाजशक्तून् समश्नीयात् सैन्धवेन समन्वितान्
ते चेच्छीथन्त्यपिनेन ज्वरी जीवेत्तदा ध्रुवम् ॥"
इति केचित् ॥

रक्तपित्ते हितत्वेन तृष्णादाहज्वरेषु च ।
लाजानां शक्तवः शीता न च तेऽत्र हिता
मताः ॥
पाचनो दीपनः शोथो लाजमण्डो यतः स्मृतः ।
दशमूलादिसंसिद्धः सन्निपातज्वरे हितः ॥
सन्निपातज्वरी यस्तु कम्पते प्रलपत्यपि ।
किञ्चिदेव न जानाति चिकित्सा तस्य कथ्यते ॥
अभ्यञ्जयेत् पुराणेन सर्पिषा पूर्व्वमेव तम् ।
बलारास्नागुडूच्याद्यैस्तैलैश्च परिषेचयेत् ॥
वर्त्तको वर्त्तका लावो वार्त्ताकिस्तित्तिरिः क्रमः ।
कुलिङ्गश्च रसैरेषां तर्पयेत यथाबलम् ॥"
वर्त्तकः बटेर इति लोके । वर्त्तका बटई इति
लोके । वार्त्ताकी वातञ्चटक इति भिषक्षु ॥
वगेरा इति लोके । कुलिङ्गो गागरैया इति
लोके ।
"सन्निपाते क्षुधार्त्तं यो भोजयेत् पिशितौदनम्
स कथं भिषगाख्याञ्च लभते मनुजाधमः ॥" ७ ॥
अथ वातोल्वणसन्निपातज्वरस्य चिकित्सा ।
"पञ्चमूलीकषायन्तु दद्यात् वातोत्कटे ज्वरे ।
मृत्तोष्णं वा सुखोष्णं वा दृष्ट्वा दोषबलाबलम् ॥"
पञ्चमूली अत्रतो प्रथमं मानमुक्तमानं सुश्रुत-
मानात् ॥ ७ ॥ अथ पित्तोल्वणसन्निपातज्वरस्य
चिकित्सा ।
"पटोलकादि त्रिफला देवदारु च कट्फलम् ।
चन्दनं पद्मकं चैव तथा मधुकरोहिणी ॥
हरीतकी कृतं विधिवत् पिबेदुष्णं ततः ।
पित्तोत्तरे सुखावहं सन्निपाते निपातहृत् ॥"
इति पटोलकादिक्वाथः ॥ ७ ॥

"किराततिक्तकं मुस्तं गुडूची विश्वभेषजम्।
पाठोदीच्यं मृणालञ्च शृतं पित्ताधिके पिबेत्॥"
इति किरातादिसप्तकम्॥०॥
अथ कफोल्वणसन्निपातज्वरस्य चिकित्सा।
"बृहत्यौ पौष्करं भार्गी शटी शृङ्गी दुरालभा।
वत्सकस्य तु बीजानि पटोलं कटुरोहिणी॥
बृहत्यादिर्गणः शस्तः सन्निपाते कफोत्तरे।
ग्रासादिषु च सर्व्वेषु हितः सोपद्रवेष्वपि॥"
इति बृहत्यादिकाथः॥०॥
अथ वातपित्तोल्वणसन्निपातज्वरस्य चिकित्सा।
"वातपित्तहरं सूर्य्यं कनीयः पञ्चमूलकम्।
तत्क्वाथो मधुना हन्ति वातपित्तोत्तरं ज्वरम्॥"
इति लघुपञ्चमूलम्॥०॥
अथ वातश्लेष्मोल्वणसन्निपातज्वरचिकित्सा।
"किराततिक्तकं मुस्तं गुडूची विश्वभेषजम्।
चातुर्भद्रकमित्याहुर्व्वातश्लेष्मोल्वणे ज्वरे॥"
इति चातुर्भद्रकक्वाथः॥०॥
अथ पित्तश्लेष्मोल्वणसन्निपातज्वरचिकित्सा।
"पर्पटः सूदनं कुष्ठमुशीरं चन्दनं जलम्।
नागरं मुस्तकं शृङ्गी पिप्पल्यश्च शृतं हितम्।
क्वाथादाहातिसारान्तेषु पित्तश्लेष्मोल्वणे ज्वरे॥"
इति पर्पटादिक्वाथः॥०॥
अथ वातपित्तश्लेष्मोल्वणसन्निपातज्वरचिकित्सा
"नागरं धान्यकं भार्गी पद्मकं रक्तचन्दनम्।
पटोलं पिचुमर्द्दञ्च त्रिफला मधुकं बला॥
शर्करा कटुका मुस्ता महाह्वा व्याधिघातकः।
किराततिक्तमधना दशमूली निदिग्धिका॥
कीदशाङ्गी निहन्त्येव सन्निपातं त्रिकोल्वणम्।
[illegible] मृत्युमप्यागतं जयेत्॥"
महाह्वा गजपिप्पली। व्याधिघातकः आरग्वधः।
निदिग्धिका कण्टकारी ... पठिता। इति
[illegible] ॥०॥ अथ [illegible]
[illegible] सन्निपातज्वराणां यथा तन्त्रेण
चिकित्सामाह।
"अथ [illegible] सर्व्वं धिष्ठितम्।
[illegible] दोषयोश्च [illegible]॥"
[illegible]। दोषं [illegible]
[illegible]
[illegible] दिग्। तद् [illegible]
[illegible] कुर्य्यादिश्वरं।
[illegible] दोषे [illegible] हि।
[illegible]॥"
[illegible]। [illegible]
[illegible]। [illegible]
[illegible]
[illegible]
[illegible]
[illegible]। [illegible] दोषे [illegible]
[illegible] दोषो हि [illegible]
[illegible]
[illegible]

दशानां विशिष्टां चिकित्सा। तत्र शीताङ्गस्य
चिकित्सामाह।
"भास्करमूलं जीरकं व्योषभार्गी-
व्याघ्रीशुण्ठीपुष्करं गोजलेन।
सिद्धं सद्यः शीतगात्रादिमोह-
श्वासमन्येोद्रेककासान्निहन्ति॥"
भास्करमूलं अर्कमूलम्।
"कर्कोटिकाकन्दरजः कुलत्थ-
चूर्णानवाकट्फलकणजीरैः।
किराततिक्तामलकट्फलाढ्य-
पथ्याभिरुद्धर्त्तनमत्र शस्तम्॥"
कर्कोटिकाकन्दरजः वन्ध्याकर्कोटीमूलरजः।
"रसविषमरिचमहौषधिपिप्पलभङ्गकभूषचतुर्वसुभिः।
भागैर्मितमुद्घर्षणमिदममितस्वेदशैत्यहरम्॥"*
अथ तन्द्रिकस्य चिकित्सा।
"रुद्राक्षतानागरपौष्कराणि
शृतानि पीतानि शिवायुतानि।
शुण्ठीकणासिन्धुरसौषधानि
नस्येन तन्द्राविजयोल्वणानि॥
मरिचकणपद्मवचा वचा कक्-
कृमिहरनागरशर्करोपवाच्यः।
छगलकजलकल्पिता नितान्तं
नसि निहिता ननु तन्द्रिकं जयन्ति॥"
वचः वासकः। पद्मवचा दारुहरिद्रा। कक्
कुष्ठम्। कृमिहरो विडङ्गः। शर्करी हरिद्रा।
शताह्वा इन्द्रवारुणी। नसि नासिकायाम्।
"तुरङ्गलालालवणोत्तमेन्दु-
मन शिलामागधिकामधूनि।
निशोन्मिलान्यञ्जनानि नियच्छ द्राक्
तन्द्रां सनिद्रां विनिवारयन्ति॥"
लवणोत्तमं सैन्धवम्। इन्दुः कर्पूरः। निद्रा
अतिनिद्रा॥०॥ अथ प्रलापकस्य चिकित्सा।
"मतगरवरतिक्ता रेवताक्षोदतिक्ता-
मलदतुरगगन्धाभारतीहारकाः।
सजयजदममूलीशङ्खपुष्पीसुपक्वाः
प्रलपनमपहन्युः पायतो नातिदूरात्॥"
वरतिक्तोऽत्र पर्पटो न तु महानिम्बस्तस्या-
म्लरानुरोधात्। मलदं नागरकम्। तदद्रामा-
दुरालं पाठम् भारती ब्राह्मी। वरम्भी
इति लोके। हारहूरा द्राक्षा।
"मांसैरथ्वनेर्व्वेस्तोल्यैर्मिलितैर्भवनैः।
सर्व्वतो त्रिकुलं [illegible] प्रकृतिमानयेत्॥"०॥
अथ रक्तष्ठीविनश्चिकित्सा।
"रौहिषचन्दनधामकधामा-
पर्पटनागरनाकटुकाभिः।
शर्करया सममेव कषायः
सततष्ठीविन इदिन उपायः॥"
रौहिषं भूतृणविशेषः। रौहित इति
लोके। धामकना त्रिवृत्।
पद्मकचन्दनवर्पटमुस्ता-
[illegible]

शीतकनिम्बयुतं परिपक्वं
वारि भवेदिह शोणितहारि॥"
शीतकं यष्टीमधुकम्। इह रक्तष्ठीविनि।
"मधुकमधूकपरूषककषाय-
चन्दनपद्मकदारुमनायः।
श्रीपर्णीफलशीतकषायः
सरित इह स्यादसजयाय॥"
परूषं परूषकम्। पायः वासः। सनाय
धानः। श्रीपर्णी गम्भारी॥०॥
नेत्रस्य चिकित्सा।
"तुरङ्गगन्धालवणोग्रगन्धा-
मधूकसारीषणमागधीभिः।
वस्ताम्बुशुण्ठीलशुनान्विताभि-
र्व्वर्त्यो त्वमभ्युनदृशं करोति॥"०॥
अथाभिन्यासस्य चिकित्सा।
"शृङ्गीभार्ग्यभयाजाजीकणाभूनिम्बपर्पटैः।
देवदारुवचाकुष्ठयासकट्फलनागरैः।
मुस्तधान्याकतिक्तेन्द्रयवपाठाहरेणुभिः।
हस्तिपिप्पल्यपामार्गपिप्पलीमूलचित्रकैः।
शिग्वारग्वधारिष्टशटीवासुकिकायकैः।
विडङ्गरजमोदार्व्वीयवानीद्वयसंयुतैः।
समांशैर्व्विहितः क्वाथो हिङ्ग्वार्द्रकरसान्वितः
अभिन्यासज्वरं घोरं हन्ति तन्द्राञ्च
प्रमोहं कर्णमूलञ्च सन्निपातान्त्रयोदश।
हिक्कां श्वासञ्च कासञ्च तथा सर्व्वाङ्गुलग्रहम्।"
इति शृङ्ग्यादिक्वाथः॥
अथ जिह्वकस्य चिकित्सा।
"किराततिक्ताकुलकालनिम्ब-
कर्पूरकृष्णाकटुरीमयुक्तः।
कल्कद्रवः संशमयेदसह्या
दोषास्तुतो दाशरथिर्य्यथाब्धिम्॥"
चाकुलकात् मकरकार इति लोके। बाल
कुलिञ्जन इति लोके। कल्कद्रव दौत्ता
रसः। इति किरातादिकल्क॥०॥
"शाम्बरपर्णी सामुरमूलासमधुका।
गन्धकपुष्पी सहिता सिध्या वाचा [illegible]।
शाम्बरपर्णी ब्राह्मी। सामुरमूल [illegible]
चामयः कुष्ठम्। गन्धकपुष्पी शङ्खपुष्पी।
पथ्यादिरवलेहः॥०॥
"मुद्गा नागरपुष्कराम्लमना ब्राह्मी [illegible]
[illegible]
भार्गी वाधकया सतीयसुरमा [illegible]
[illegible]
त्रिफलार्म्भ त्रिभाङ्गीयुगमरावन् [illegible]
व्याघ्रीनिम्बपटोलपुष्करजटा [illegible]
[illegible]
पुष्करं पुष्करमूलम्। तथा [illegible]
"मूले पुष्करकाश्मीरयवपथ्या [illegible]
सुरसा गन्धप्रसारी काश्मीरं [illegible]
तुलसी। त्रिफलादिर्गिलातम्। [illegible]
त्रिभागीयुग हरिद्रा दारुहरिद्रा [illegible]
त्रिफला। चतुर्भद्रो गुडूची। [illegible]

रिका । रुक् कुष्ठम् ॥*॥ अथ सन्धिगस्य
कित्सा ।
टीसुरतरूत्तमाः खदिरदारुरास्नाः समाः
ागरसुधान्विताः पिब शतावरीसंयुताः ।
दुज्ज्वलनपाचिताः सह पुरेण सन्धिग्रह-
ापहतये ह्यथा शिशिरसेवनं मा कृथाः ॥"
भा त्रिफला । खदिरदारु विधारा इति
के । सुधा गुडूची । पुरो गुग्गुलुः ।
वाकवचकच्छुरासहचराम्लनाभङ्गुरा-
ाद्रघननागरातरुणदारुरास्नापुराः ।
ातरुणभीरुभिः सह भवन्ति सन्धिग्रह-
धीरुजडिमक्रमभ्रमणपक्षघातद्रुहः ॥"
भवः पर्पटकः । कच्छुरा यवासः । भङ्गुरा
तिविषा । सुराह्वं देवदारु । अतरुणदारु
दारु । पुरो गुग्गुलुः । हपा हस्तिदन्ती
रुण्डवत् पत्रविटपा तदलाभे दन्ती च ग्राह्या
मानगुणत्वात् । तरुण एरण्डः । भीरुः शता-
ती ।

"सुरदारु शटी सुधालता
सुवहा शुण्ठियुता शृता जले ।
मधुराः शमयन्ति सेविताः
सततं सन्धिगतं सदागतिम् ॥"

वहा रास्ना ।

"मुस्तैरण्डप्राणदावाणदारु-
च्छिन्नारास्नाभीरुकर्च्चूरतिक्ता ।
वासा विश्वा पञ्चमूलीयुगाख्या
हन्याम्मन्यास्तम्भसन्धिग्रहार्त्तीः ॥"

णदा हरितकी । वाणः नीलपुष्पसहचरः ।
तिक्ता कटुका ॥*॥ अथान्तके विधिः ।

"इहापहाय शतमुग्रवारि
ज्वरारिपूयादिगदापहारि ।
ज्वरच्छिदं जीवितदञ्च नित्यं
मृत्युञ्जयं चेतसि चिन्तयस्व ॥"

इह अन्तके शतं लङ्घनादिनियमम् ।
'कर्पूरप्रकरावदातवपुषं सद्योगमुद्राञ्चितं
पञ्चास्यं कमलेषु भावुकभुजं भास्वत्तुरङ्गत्विषम् ।
संपूर्णामृतकुम्भभृतकरं शुभ्राक्षमालाधरं
पिङ्गोत्तुङ्गजटाकलापरुचिरं चन्द्रार्द्धमौलिं
स्तुहि ॥
भिषग्भिरिति निर्णीतं सन्निपातेऽन्तकाभिधे ।
भेषजं चाङ्गवीनीरं वैद्यो गोविन्द एव हि ॥"*
अथ रुग्दाहस्य चिकित्सा ।
"उशीरचन्दनोदीच्यद्राक्षामलकपर्पटैः ।
शृतं शीतं जलं दद्याद्दाहतृड्ज्वरशान्तये ॥"
इति षडङ्गपानम् ॥*॥
"उषितो निशि पर्युषितः प्रातर्धान्याक-
तण्डुल क्वाथः ।
पीतः शमयत्यचिरादन्तर्दाहं ज्वरं पत्तम् ॥"
धान्याकतण्डुलाः कण्डितधान्यकानि । इति
धान्याकक्वाथः ॥*॥
"पथ्यां तैलघृतक्षौद्रैर्लिहन् दाहज्वरापहाम् ।
कासासृक्पित्तवीसर्पश्वासान् हन्ति वमीमपि ॥"

तैलघृतक्षौद्रैरित्यत्र न समुच्चयः स्नेहेन केवलेन
मधुनापि लिह्यात् । इति पथ्यावलेहः ॥*॥
"प्रशमयति दाहमचिरात् दधियुक्काकम्बु-
पत्रैर्लेपः ।
लेपो हिमकरमलयजनिम्बदलैस्तक्रपिष्टैर्वा ॥"
हिमकरः कर्पूरः । तथा च घनसारश्चन्द्रसंज्ञ
इत्यमरः ॥

"उत्तानसुप्तस्य गभीरताम्र-
कांस्यादिपात्रे निहिते च नाभौ ।
शीताम्बुधारा बहुला पतन्ती
निहन्ति दाहं त्वरितं ज्वरञ्च ॥
शीताम्भसा तु शतशश्च विलोडितेन
शस्त्रेन चन्दनयुतेन घृतेन दिग्धा ।
दाहज्वरी सकमलोत्पलमाल्यधारी
क्षिप्रं विशेत् सलिलकोष्ठमनल्पकालम् ॥
काञ्जिकार्द्रपटेनावगुण्ठनं दाहनाशनम् ।
अथ शीतकसंस्विन्नशीतलीकृतवाससा ॥"*॥

अथाश्रमाह ।
"दाहावमर्द्दितं क्षामं निरन्नं तृष्णयान्वितम् ।
शर्करामधुसंयुक्तं पाययेल्लाजतर्पणम् ॥"
लाजतर्पणं लाजशक्तुभिरुपतर्पणम् ।
"वाप्यः कमलहासिन्यो जलयन्त्रगृहाः शुभाः ।
नार्य्यश्चन्दनदिग्धाङ्ग्यो दाहदैन्यहरा मताः ॥

मुक्तावली चन्दनशीतलानां
सुगन्धपुष्पाम्बरभूषितानाम् ।
नितम्बिनीनां सुपयोधराणा-
मालिङ्गनान्याशु हरन्ति दाहम् ॥

प्रह्लादं चास्य विज्ञाय ताः स्त्रीरपनयेत् पुनः ।
हितञ्च भोजयेदन्नं येनाप्नोति सुखं महत् ॥"
प्रह्लादकं कामकृतं हर्षम् ॥*॥ अथ चित्त-
भ्रमस्य चिकित्सा ।

"कणोपणोशालवणोत्तमानि
करञ्जबीजं चण्डासहितानि ।
पथ्याक्षमिद्धार्थकहिङ्गुशुण्ठी-
युतानि वस्ताम्बुविमिश्रितानि ॥
पिष्ट्वा गुटीयं नयने विधेया
प्रचेतनेति प्रथितान्विताथा ।
चित्तभ्रमापस्मृतिभूतदोष-
शिरोऽक्षिरोगभ्रमनाशहेतुः ॥"

वस्ताम्बु छागमूत्रम् ।
"कुम्भोद्भवतरोरम्भोगुडविश्वाकणान्वितम् ।
निहितं नसि नूनं स्यात् चित्तभ्रमविनाशनम् ॥"
कुम्भोद्भवतरोरम्भः अगस्तिहस्तवल्कलरसः ।
"मुरामूर्व्वजमेधाश्वामधुकमलयोद्भवैः ।
सहत्तरुमधूच्छिष्टैः पुरपाणिजपांशुभिः ॥
लोहलामज्जकैलाभिर्धूपश्चित्तभ्रमापहः ।
ग्रहदोषहरः श्रीदः सौभाग्यकर उत्तमः ॥"
मुरा एकाङ्गी । मूर्व्वजो वाला । महत्तरुः
देवदारुः । पुरः गुग्गुलुः । पाणिजः नखः ।
पांशुः पर्पटकः । लोहं अगुरुः । लामज्जकं
उशीरवत् पीतच्छविहृत्पविशेषः । तदभावे
उशीरं ग्राह्यम् ।

"मृद्वीकामरदारुमत्स्यशकलामुस्तामलक्योऽमृता
पथ्यारेवतरामसेनकरजोराजीफलैः संयुताः ।
हन्युश्चित्तरुजोऽथ दद्रुदला द्राक्षा पटोली
पयः
पथ्या पर्पटराजवृक्षकटुकाशम्बूकपुष्पः शृताः ॥"
मृद्वीका द्राक्षा । मत्स्यशकला कटुका । आरे-
वतः आरग्वधः । रामसेनकः किराततिक्तकः ।
रजः पर्पटकः । राजीफलः पटोलः । अथ
योगान्तरमाह । दद्रुलदला मण्डूकपर्णी ।
सा च ब्राह्मी ब्राह्मी मञ्जिष्ठा शोणकश्च ।
तथाप्यत्र ब्राह्मी ग्राह्या । यत उक्तं गुणग्रन्थे ।
ब्राह्मी मतिप्रदा मेध्या ज्वरहन्त्री रसायनीति
ब्राह्मी बरम्भी इति लोके । पयः बालकं राज-
वृक्ष आरग्वधः । शम्बूकपुष्पी शङ्खपुष्पी ॥*॥
अथ कर्णकस्य चिकित्सा ।

"प्रलेपः समस्तं नयत्यल्पमेकः
समुद्रिक्तशोथस्य रक्तावमेकः ।
विपक्वस्य शस्त्रक्रिया पूयजित् सा
व्रणत्वं गतस्य द्रुतं तच्चिकित्सा ॥"

अयमर्थः । अल्पं तं कर्णकं एकः प्रलेपः अस्तं
नाशं नयति । तच्चिकित्सा व्रणचिकित्सा ।

"निशाविशालानयमाशिमन्थ-
दार्वीङ्गुदीमूलकृतः प्रलेपः ।
प्रभाकरक्षीरयुतप्रभाथाट्-
व्यस्तः समस्तोऽप्यथ कर्णकघ्नः ॥"

कुलत्थः कटफलं शुण्ठी कारवी च समांशकैः ।
सुखोष्णं लेपनं कार्य्यं कर्णमूले मुहुर्मुहुः ॥
गैरिकं कठिनीशुण्ठीकट्फलैः सवचैः समैः ।
उष्णैः काञ्जिकसंपिष्टैः प्रलेपः कर्णमूलनुत् ॥
शिग्रुरालिक्ययोः पिष्ट्वा कर्णमूलं प्रलेपयेत् ।
कर्णमूलभवः शोथस्तेन लेपेन शाम्यति ॥
अशिशिरजलपरिमर्द्दितं मरिचकणाजीर-
सिन्धुजं त्वरितम् ।
नस्यविधिसेवितं ननु कर्णकरुक् नाशकृद्-
गदितम् ॥

भार्गीजयापौष्करकण्टकारी-
कटुत्रिकाघनकुण्डलीभिः ।
कुलीरशृङ्गीकटुकारसाभिः
कृतः कषायः किल कर्णकघ्नः ॥"

भार्गी वमनेटी इति लोके । तदभावे कण्ट-
कारीमूलं ग्राह्यम् । जया गणियार इति
लोके । पौष्करं पुष्करमूलम् । उग्रा वचा ।
कुण्डली गुडूची । कुलीरशृङ्गी कर्कटशृङ्गी ।
रसा रास्ना ।

"दशमूलमत्स्यशकलाचपला-
त्रिफलामहौषधिकिरातयुतम् ।
सलिलं परिक्वथितमाशु समा-
दपहन्ति कर्णरुजः सकला ॥"

चपला पिप्पली ॥ * ॥ अथ कण्ठकुब्जस्य
चिकित्सा ।

"कन्दिकशुपचकुमारि-
कलिङ्गसिंहाननमर्द्दराभिः ।

काय: क्षत: क्षमति कण्ठकुब्ज
कण्ठीरवः कुम्भमाशु यद्वत् ॥"
[illegible]वासक: । गम्भीरी हरिद्रा ।
"किरातकटुकाकणाकुटजकण्टकारीघटी-
फलिङ्गकृमिमिमामयाकटुककट्फलाम्भोधरैः ।
शिवामलकपुष्करानलकुमोरस्नोहिये-
[illegible]मयदारवी क्वथति कण्ठकुब्जं मत: ॥"
[illegible] कपूर: । कृमिघ्न: विभीतक: । किलिमं [illegible] । कटुकं मरिचम् । विषा अतिविषा । पुष्करं पुष्करमूलम् । हय: वासक: । [illegible] [illegible]: [illegible] [illegible] [illegible]: [illegible]। [illegible] एतै: सहितेन [illegible] [illegible] ॥ ॥ [illegible]दिगुणानां कुम्भोपाकादिमधि- [illegible]णां [illegible] [illegible]मभिधीयते [illegible] [illegible] [illegible] [illegible] इति सन्निपातज्वरा- [illegible] । इति भावप्रकाश: ॥

सन्निपातनुत्, पु, (सन्निपातं नुदतीति । नुद + क्विप् ।) [illegible] । इति राजनिर्घण्ट: ॥

[illegible], त्रि, [illegible] । सन्निपूर्वस्य [illegible] [illegible] निपात्य ॥

[illegible], क्ली, [illegible]नम् । सम्यग् [illegible] । सन्निपूर्व [illegible]धातोरनट्प्रत्ययेन [illegible] ॥

सन्निभ:, त्रि, (सम्यक् निभातीति । सं + नि + भा + क ।) सदृश: । इति जटाधर: ॥ (यथा, [illegible] । [illegible] । [illegible] ।
"[illegible] [illegible] [illegible] ॥")

[illegible], पु, ([illegible] [illegible] यस्मात् ।) [illegible] । इति भावप्रकाश: ॥ (यथा, रघु: । [illegible] । [illegible] ।
"[illegible] [illegible] [illegible] ।
[illegible] [illegible] ॥"
[illegible] [illegible] ॥

[illegible], त्रि, (सं + नि + विश् + क्त ।) [illegible] । यथा,—
"[illegible]
[illegible] ।
[illegible]
[illegible] ॥"
[illegible] ॥

[illegible] । इति [illegible] ॥
[illegible], पु, (सं + नि + [illegible] + क्तिन् ।) [illegible] । (यथा, रघु: । १० । [illegible] ।
"[illegible] ॥")
[illegible], पु, [illegible] [illegible] । सं + नि + [illegible] । [illegible] । [illegible] । [illegible] ॥ [illegible] । [illegible] [illegible] । [illegible] ।

"नगरादिबहि: स्वैरविहारचारुभूमिषु ।
तत्र हयं निगदितं सन्निवेशो निकर्षणम् ॥"
इति शब्दरत्नावली ॥
(यथा, रघु: । १४ । ७६ ।
"निगूढचारीं मुनिसन्निवेशी-
स्तमोऽपहन्त्रीं ममतां वनान्त ॥"
संस्थानम् । यथा, कुमारे । १ । ४५ ।
"उत्तानपाणिद्वयसन्निवेशात्
प्रफुल्लराजीवमिवाङ्कमध्ये ॥")

सन्निहितं, त्रि, (सं + नि + धा + क्त: ।) निकटस्थितम् । यथा । ब्रह्मपुराणे ।
"षष्ठ्यादी सम्प्रवेशे तु सूमौ सन्निहिता भवेत्
यावत् पुण्यममावास्यां दिनानि दश पञ्च च ॥"
इति प्रायश्चित्ततत्त्वम् ॥
(अग्निविशेषे, पुं । यथा, महाभारते । ३ । २२० । १८ ।
"प्राणानाश्रित्य यो देहं प्रवर्त्तयति देहिनाम् ।
तस्य सन्निहितो नाम शब्दरूपस्य साधन: ॥")

सन्न्यस्त:, त्रि, (सं + नि + अस् + क्त: ।) सम्यङ्न्यासीकृत: । समर्पित: । यथा,—
"योगसन्न्यस्तकर्माणं ज्ञानसंछिन्नसंशयम् ।
आत्मवन्तं न कर्म्माणि निबध्नन्ति धनञ्जय ॥"
इति भगवद्गीतायाम् ४ अध्याय: ॥

सन्न्यास:, पुं, (सं + नि + अस् + घञ् ।) जटामांसी । इति शब्दचन्द्रिका ॥ काम्यकर्म्मणां त्याग: । यथा,—
"काम्यानां कर्म्मणां न्यासं सन्न्यासं कवयो विदु: ।
सर्व्वकर्म्मफलत्यागं प्राहुस्त्यागं विचक्षणा: ॥"
इति श्रीभगवद्गीतायाम् १८ अध्याय: ॥
अपि च ।
"सन्न्यास: कर्म्मणां न्यास: कृतानामकृतै: सह ।
कुशलाकुशलाभ्याम् प्रहाणं न्यास उच्यते ॥"
इति मात्स्ये १२० अध्याय: ॥ * ॥
चतुर्थाश्रम: । तदाश्रमधर्म्मा यथा,—
"सर्व्वसङ्गपरित्यागी ब्रह्मचर्य्यसमन्वित: ।
जितेन्द्रियस्तमावासे नैकास्मिन् वसतिश्चिरम् ॥
अनारम्भस्तथाहारं भिक्षान्नं नैककेतने ।
आत्मज्ञानविबोधार्थं तथा ह्यात्मावबोधनम् ॥
चतुर्थं चाश्रमं ह्येतत् सन्न्यासिनां प्रकीर्त्तितम् ॥"
इति वामने १४ अध्याय: ॥ * ॥
तदाश्रमकालादि यथा,—
"एवं वनाश्रमे स्थित्वा तृतीयं भागमायुष: ।
चतुर्थमायुषो भागं सन्न्यासेन नयेत् क्रमात् ॥
अग्नीनात्मनि संस्थाप्य द्विज: प्रव्रजितो भवेत् ।
[illegible] [illegible] ॥
[illegible] [illegible] ।
[illegible] [illegible] ॥
[illegible] [illegible] ।
[illegible] [illegible] ॥"
इति कौर्म्मे उपविभागे २७ अध्याय: ॥ * ॥
[illegible] [illegible] यथा,—
"[illegible] [illegible] ।

देवरेण सुतोत्पत्तिं कलौ [illegible]
इति कलौ
[illegible] इति [illegible]
[illegible] कलौ [illegible] ।
[illegible] ।
[illegible] ।
"[illegible]
[illegible] [illegible]

[illegible] [illegible]
[illegible] यो [illegible]
[illegible] [illegible] ।
[illegible] [illegible]
[illegible] [illegible]
[illegible]
[illegible] ।
[illegible] ।
[illegible]
[illegible]
[illegible]
[illegible]
इति बृहन्नारदीयपुराणे उत्तरखण्डे [illegible]

सन्न्यासी, [इन्] पुं, (सन्न्यास + अस्त्यर्थे इनि ।) सन्न्यासाश्रमविशिष्ट: । चतुर्थाश्रमी । पाराशरी २ मस्करी ३ परिव्राट् ४ श्रमण: ५ भिक्षु: ६ । इति जटाधर: । [illegible] [illegible] ।
[illegible] [illegible]
[illegible] [illegible] ॥
[illegible] करोति [illegible]
स तु चतुर्व्विध: । कुटीचर: १ बहूदक: २ हंस: ३ परमहंस: ४ । तत्र [illegible]
"[illegible] [illegible]
[illegible] स सन्न्यासीति
दण्डं कमण्डलुं [illegible]
नित्यं प्रवासी नैकत्र स सन्न्यासीति
[illegible] [illegible]
[illegible] [illegible]
[illegible] [illegible]
[illegible]
[illegible] ब्रह्मचारी [illegible]
[illegible]
[illegible] [illegible]
[illegible] [illegible]
[illegible] [illegible]
[illegible] [illegible]
[illegible] [illegible]
[illegible] [illegible]
[illegible] [illegible]
इति [illegible]
अपि च ।

ाता दृष्टौ च विसर्गे भारमण्डलम् ॥
ह समदर्शी च कारिकामावर्त्त सदा ।
ति भवनं नित्यं नेति नेति न निन्दति ॥
ात्मरन्ध्र कस्मैचित् न ददाति च दैवतम् ।
ति मानसं भिक्षुः करोति नान्यथावनाम् ।
ति मानसकृत्य निर्णीदः सङ्कुवर्जितः ।
ाद् भुङ्क्ते दैवाच कोमलं न हि पश्यति ॥
ाम्बितं भन्दवत् याचते सर्वेषां यती ।
सत्यान्वितो धर्मनित्याह फलोदयः ॥"
ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८५ अध्यायः ।
ाच ।
ासा कथितोऽयं यस्तु ध्यानपरो भवेत् ।
ामीह न विशेषो वानप्रस्थाश्रमे स्थितः ॥
ाध्यानरतो नित्यमात्मवाञ्जितेन्द्रियः ।
नाय वर्त्तते भिक्षुः प्रोच्यते पारमेष्ठिकः ॥
ज्ञानरतिरेव त्यागित्यागी महामुनिः ।
यश्च दण्डवारकः स योगी भिक्षुरुच्यते ॥
यं ज्ञानञ्च योगित्वं तपो ध्यानं विशेषतः ।
नञ्च ज्ञानवैराग्यं धर्मोऽयं भिक्षुके मतः ॥
नसन्न्यासिनः केचित् वेदसन्न्यासिनोऽपरे ।
कर्मसन्न्यासिनः केचित् त्रिविधः पारमेष्ठिकः ॥
गी च त्रिविधो ज्ञेयो भौतिको मोक्ष एव च ।
ीयोऽन्त्याश्रमी प्रोक्तो योगमूर्त्तिसमाश्रितः ॥
मा भावना पूर्व्वे मोक्षे त्वक्षरभावना ।
ीये चान्तिमा प्रोक्ता भावना पारमेश्वरी ॥
ीनां यतचित्तानां न्यासिनामूर्द्ध्वरेतसाम् ।
नन्दं ब्रह्म तज्ज्ञानं यस्मान्नावर्त्तते मुनिः ॥
गिनाममृतं स्थानं व्योमाख्यं परमाक्षरम् ।
ानन्दमैश्वरं यस्मान्मुक्तो नावर्त्तते नरः ॥"
इति गारुडे ४८ अध्यायः ॥०॥
परञ्च ।
ज्ञानसन्न्यासिनः केचिद्वेदसन्न्यासिनोऽपरे ।
कर्मसन्न्यासिनस्त्वन्ये त्रिविधाः परिकीर्त्तिताः ॥
: सर्व्वसङ्गनिर्मुक्तो निर्द्वन्द्वश्चापि निर्भयः ।
ाच्यते ज्ञानसन्न्यासी स्वात्मन्येव व्यवस्थितः ॥
दमेवाभ्यसेन्नित्यं निराशीर्निष्परिग्रहः ।
ाच्यते वेदसन्न्यासी मुमुक्षुर्व्विजितेन्द्रियः ॥
स्वग्नीनात्मसात् कृत्वा ब्रह्मार्पणपरो द्विजः ।
ेयः स कर्म्मसन्न्यासी महायज्ञपरायणः ॥
याणामपि चैतेषां ज्ञानी त्वभ्यधिको मतः ।
तस्य विद्यते कार्य्यं न लिङ्गं वा विपश्चितः ॥
ममो निर्भयः शान्तो निर्द्वन्द्वः पर्णभोजनः ।
ीर्णकौपिनवासाः स्यान्नग्नो वा ध्यानतत्परः ॥
ब्रह्मचारी मिताहारो ग्रामादन्नं समाहरेत् ।
ध्यात्मरतिरासीत निरपेक्षो निरामिषः ।
आत्मनैव सहायेन सुखार्थी विचरेदिह ॥"
सुखार्थमित्यत्र सुखार्थमिति च पाठः ।
'नाभिनन्देत मरणं नाभिनन्देत जीवितम् ॥
कालमेव प्रतीक्षेत निर्देशं भृतको यथा ।
नाध्येतव्यं न वक्तव्यं न श्रोतव्यं कदाचन ॥
एवं ज्ञानपरो योगी ब्रह्मभूयाय कल्पते ।

एकवासाऽथवा विद्वान् कौपीनाच्छादनोऽथवा ।
मुण्डः शिखी वाथ भवेत् त्रिदण्डी निष्परिग्रहः ।
काषायवासाः सततं ध्यानयोगपरायणः ॥
ग्रामान्ते वृक्षमूले वा वसेद्देवालयेऽपि वा ।
समः शत्रौ च मित्रे च तथा मानापमानयोः ॥
भैक्षेण वर्त्तयेन्नित्यं नैकान्नादी भवेत् क्वचित् ।
यस्तु मोहेन चान्यस्मादेकान्नादी भवेद्यतिः ॥
न तस्य निष्कृतिः काचिद्धर्म्मशास्त्रेषु कथ्यते ।
रागद्वेषविमुक्तात्मा समलोष्टाश्मकाञ्चनः ॥
प्राणिहिंसानिवृत्तश्च मौनी स्यात् सर्व्वनिःस्पृहः ।
दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं जलं पिबेत् ।
सत्यपूतां वदेद्वाणीं मनःपूतं समाचरेत् ॥
नैकत्र निवसेद्देशे वर्षाभ्योऽन्यत्र भिक्षुकः ।
स्नानशौचरतो नित्यं कमण्डलुकरः शुचिः ॥
ब्रह्मचर्य्यरतो नित्यं वनवासरतो भवेत् ।
मोक्षशास्त्रेषु निरतो ब्रह्मचारी जितेन्द्रियः ॥
दम्भाहङ्कारनिर्मुक्तो निन्दापैशुन्यवर्जितः ।
आत्मज्ञानगुणोपेतो यतिर्मोक्षमवाप्नुयात् ॥०॥
अभ्यसेत् सततं वेदं प्रणवाख्यं सनातनम् ।
स्नानाचम्य विधानेन शुचिर्देवालयादिषु ॥
यज्ञोपवीती शान्तात्मा कुशपाणिः समाहितः ।
धौतकाषायवसनो भस्मच्छन्नतनूरुहः ॥
अधियज्ञं ब्रह्म जपेदाधिदैविकमेव च ।
आध्यात्मिकञ्च सततं वेदान्ताभिहितञ्च यत् ॥
पुत्रेषु चाथ निवसन् ब्रह्मचारी यतिर्मुनिः ।
वेदमेवाभ्यसेन्नित्यं स याति परमां गतिम् ॥
अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यं तपः परम् ।
क्षमा दया च सन्तोषो व्रतान्यस्य विशेषतः ॥
वेदान्तज्ञाननिष्ठो वा पञ्चयज्ञान् समाहितः ।
कुर्य्यादहरहः स्नात्वा भैक्षान्नेनैव तेन हि ॥
होममन्त्रान् जपेन्नित्यं काले काले समाहितः ॥
स्वाध्यायं चान्वहं कुर्य्यात् सावित्रीं सन्ध्ययोर्जपेत् ॥
ध्यायीत सततं देवमेकान्ते परमेश्वरम् ।
एकान्नं वर्ज्जयेन्नित्यं कामं क्रोधं परिग्रहम् ।
एकवासा द्विवासा वा शिखी यज्ञोपवीतवान् ।
कमण्डलुकरो विद्वांस्त्रिदण्डी याति तत्पदम् ॥"
इति कौर्म्मे उपविभागे २७ अध्यायः ॥०॥
व्यास उवाच ।
"एवं स्वाश्रमनिष्ठानां यतीनां नियतात्मनाम् ।
भैक्षेण वर्त्तनं प्रोक्तं फलमूलैरथापि वा ॥
एककालं चरेद्भैक्षं न प्रसज्येत विस्तरे ।
भैक्षे प्रसक्तो हि यतिर्विषयेष्वपि सज्जति ॥
सप्तागारं चरेद्भैक्षमलाभे तु पुनश्चरेत् ।
प्रक्षाल्य पात्रे भुञ्जीयादद्भिः प्रक्षालयेत्तु तत् ॥
अथवान्यदुपादाय पात्रं भुञ्जीत नित्यशः ।
भुक्त्वा च सन्त्यजेत् पात्रं यात्रामात्रमलोलुपः ॥
विधूमे सन्नमुषले व्यङ्गारे भुक्तवज्जने ।
वृत्ते शरावसम्पाते भिक्षां नित्यं यतिश्चरेत् ॥
गोदोहमात्रं तिष्ठेत कालं भिक्षुरधोमुखः ।
भिक्षेत्युक्त्वा सकृत्तूष्णीमश्नीयाद्वाग्यतः शुचिः ॥

प्रक्षाल्य पाणिपादौ च समाचम्य यथाविधि ।
आदित्ये दर्शयित्वान्नं भुञ्जीत प्राङ्मुखोऽन्तरः ॥
हुत्वा प्राणाहुतीः पञ्च ग्रासानष्टौ समाहितः ।
आचम्य देवं ब्रह्माणं ध्यायीत परमेश्वरम् ॥
अलाबुं दारुपात्रञ्च मृण्मयं वैणवं तथा ।
चत्वारि यतिपात्राणि मनुराह प्रजापतिः ॥
प्रदोषे पररात्रे च मध्यरात्रे तथैव च ।
सन्ध्यास्वह्नि विशेषेण चिन्तयेन्नित्यमीश्वरम् ॥
कृत्वा हृत्पद्मनिलये विश्वाख्यं विश्वसम्भवम् ।
आत्मानं सर्व्वभूतानां परस्तात्तमसः स्थितम् ॥
सर्व्वस्याधारभूतानामानन्दं ज्योतिरव्ययम् ।
प्रधानपुरुषातीतमाकाशं दहनं परम् ॥
तदन्तः सर्व्वभावानामीश्वरं ब्रह्मरूपिणम् ।
ध्यायेदनादिमद्वैतमानन्दादिगुणालयम् ॥
महान्तं परमं ब्रह्म पुरुषं सत्यमव्ययम् ।
सितेतरारुणाकारं महेशं विश्वरूपिणम् ॥
ओङ्कारान्तेऽथ चात्मानं संस्थाप्य परमात्मनि ।
आकाशे देवमीशानं ध्यायीताकाशमध्यगम् ॥
कारणं सर्व्वभूतानामानन्दैकसमाश्रयम् ।
पुराणं पुरुषं शुभ्रं ध्यायन्मुच्येत बन्धनात् ॥
यद्वा गुहायां प्रकृतौ जगत्सम्मोहनालये ।
विचिन्त्य परमं व्योम सर्व्वभूतैककारणम् ॥
जीवनं सर्व्वभूतानां यत्र लोकः प्रलीयते ।
आनन्दं ब्रह्मणः सूक्ष्मं यत् पश्यन्ति मुमुक्षवः ॥
तन्मध्ये निहितं ब्रह्म केवलं ज्ञानलक्षणम् ।
अनन्तं सत्यमीशानं विचिन्त्यासीत संयतः ॥
गुह्याद्गुह्यतमं ज्ञानं यतीनामेतदीश्वरम् ।
योऽनुतिष्ठेत सततं सोऽश्नुते योगमैश्वरम् ॥
तस्मात् ध्यानरतो नित्यमात्मविद्यापरायणः ।
ज्ञानं समभ्यसेद्ब्राह्मं मुच्येत भवबन्धनात् ॥
यद्वा पृथक्त्वमात्मानं सर्व्वस्मादेव केवलम् ।
आनन्दमक्षरं ज्ञानं ध्यायीत च पुनः परम् ॥
यस्माद्भवन्ति भूतानि यद्गत्वा नेह जायते ।
स तस्मादीश्वरो देवः परस्ताद्योऽधितिष्ठति ॥
यदन्तरे तद्गगनं शाश्वतं शिवमव्ययम् ।
यस्तद्भूतपरो यस्तु स देवः स्यान्महेश्वरः ॥
व्रतानि यानि भिक्षूणां तथैवोपव्रतानि च ।
एकैकातिक्रमे तेषां प्रायश्चित्तं विधीयते ॥
उपेत्य च स्त्रियं कामात् प्रायश्चित्तं समाहितः ।
प्राणायामसमायुक्तं कुर्य्यात् सान्तपनं शुचिः ॥
ततश्चरेत नियमान् कृत्स्नान् संयतमानसः ।
पुनराश्रममागत्य चरेद्भिक्षुरतन्द्रितः ॥
न नर्म्मयुक्तमनृतं हिनस्तीति मनीषिणः ।
तथापि न च कर्त्तव्यः प्रसङ्गो ह्येष दारुणः ॥
एकरात्रोपवासश्च प्राणायामशतं तथा ।
उक्त्वानृतं प्रकर्त्तव्यं यतिना धर्म्मलिप्सुना ॥
परमापद्गतेनापि न कार्य्यं स्तेयमन्यतः ।
स्तेयादभ्यधिकः कश्चित् नास्त्यधर्म्म इति स्मृतिः ॥
हिंसा चैषा परा दृष्टा या चात्मज्ञाननाशिका ।
यदेतद्द्रविणं नाम प्राणास्ते तु बहिश्चराः ॥
स तस्य हरते प्राणान् यो यस्य हरते धनम् ॥
एवं कृत्वा स [illegible] वृत्तो व्रतच्युतः ।

भूयो निर्व्वेदमापन्नश्चरेच्चान्द्रायणं व्रतम् ॥
विधिना शास्त्रदृष्टेन संवत्सरमिति श्रुतिः ।
भूयो निर्व्वेदमापन्नश्चरेद्भिक्षुरतन्द्रितः ॥
अकस्मादपि हिंसान्तु यदि भिक्षुः समाचरेत् ।
कुर्य्यात् कृच्छ्रातिकृच्छ्रन्तु चान्द्रायणमथापि वा
स्कन्देदिन्द्रियदौर्ब्बल्यात् स्त्रियं दृष्ट्वा यतिर्यदि ।
तेन धारयितव्या वै प्राणायामास्तु षोड़श ॥
दिवा स्कन्ने त्रिरात्रं स्यात् प्राणायामशतं तथा
एकान्ने मधुमांसे च नवश्राद्धे तथैव च ॥
प्रत्यक्षलवणे चोक्तं प्राजापत्यं विशोधनम् ।
ध्याननिष्ठस्य सततं नश्यते सर्व्वपातकम् ॥
तस्मान्महेश्वरं ध्यात्वा तस्य ध्यानरतो भवेत् ।
यद्ब्रह्म परमं ज्योतिः प्रतिष्ठाक्षयमक्षयम् ।
योऽन्तरात्मा परं ब्रह्म स विज्ञेयो महेश्वरः ॥
एष देवो महादेवः केवलं परमेश्वरः ।
तदेवाक्षयमद्वैतं तदादित्यान्तरं परम् ॥
यस्मात् महीयते देवः स्वधाम्नि ज्ञानसंज्ञिते ।
आत्मयोगाह्वये तत्त्वे महादेवस्ततः स्मृतः ॥
नान्यं देवं महादेवाद्व्यतिरिक्तं प्रपश्यति ।
तमेवात्मानमन्वेति यः स याति परं पदम् ॥
मन्यन्ते ये स्वमात्मानं विभिन्नं परमेश्वरात् ।
न ते पश्यन्ति तं देवं वृथा तेषां परिश्रमः ॥
एकमेव परं ब्रह्म विज्ञेयं तत्त्वमव्ययम् ।
स देवस्तु महादेवो नैतद्विज्ञाय बध्यते ॥
तस्माद्यत्नेन नियतं यतिः संयतमानसः ।
ज्ञानयोगरतः शान्तो महादेवपरायणः ॥
एष वः कथितो विप्रा यतीनामाश्रमः शुभः ।
पितामहेन प्रभुणा मुनीनां पूर्व्वमीरितः ॥
न पुत्रशिष्ययोगिभ्यो दद्यादिदमनुत्तमम् ।
ज्ञानं स्वयम्भुवा प्रोक्तं यतिधर्म्माश्रयं शिवम् ॥
इति यतिनियमानामेतदुक्तं विधानं
पशुपतिपरितोषे यद्भवेदेकहेतुः ।
न भवति पुनरेषामुद्भवो वा विनाशः
प्रणिहितमनसा ये नित्यमेवाचरन्ति ॥"
इति कौर्म्मे उपविभागे यतिधर्म्मो नाम २८ अध्यायः ॥ * ॥ युगभेदे सन्न्यासिनां नामानि उपाधयश्च यथा । आदौ वेदान्ताचार्य्यो ब्रह्मा । द्वितीयाचार्य्यो विष्णुः । तृतीयाचार्य्यो रुद्रः । चतुर्थाचार्य्यो वशिष्ठः । पञ्चमाचार्य्यः शक्तिः । षष्ठाचार्य्यः पराशरः । सप्तमाचार्य्यो व्यासः । अष्टमाचार्य्यः शुकः । नवमाचार्य्यो गौड़ः । दशमाचार्य्यो गोविन्दः । एकादशः श्रीशङ्कराचार्य्यः । सत्ययुगमध्ये आचार्य्यत्रयं ब्रह्मविष्णुरुद्राः । त्रेतायुगे आचार्य्यत्रयं वशिष्ठशक्तिपराशराः । द्वापरे आचार्य्यद्वयं व्यासशुकौ । कलियुगे आचार्य्यत्रयं गौड़गोविन्दशङ्कराचार्य्याः । शङ्कराचार्य्यस्य चत्वारः शिष्याः स्वरूपाचार्य्यः पद्माचार्य्यः त्रोटकाचार्य्यः पृथ्वीधराचार्य्यः इति ॥ * ॥ अथ दश नामानि । स्वरूपाचार्य्यस्य शिष्यः तीर्थ आश्रमश्च । पद्माचार्य्यस्य शिष्यद्वयं वनः अरण्यश्च । त्रोटकाचार्य्यस्य शिष्यत्रयं गिरिपर्व्वतसागरा इति । पृथ्वीधराचार्य्यस्य शिष्यत्रयम् । सरस्वती भारती पुरी चेति । इति श्रीशङ्कराचार्य्यविरचितं मठाम्नायसूत्रम् ॥ * ॥ अपि च ।

"तीर्थाश्रमवनारण्यगिरिपर्व्वतसागराः ।
सरस्वती भारती च पुरीति दश कीर्त्तिताः ॥"
तेषां लक्षणानि यथा,—
"त्रिवेणीसङ्गमे तीर्थे तत्त्वमस्यादिलक्षणे ।
स्नायात्तत्त्वार्थभावेन तीर्थनामा स उच्यते ॥१॥
आश्रमग्रहणे प्रौढ़ आशापाशविवर्ज्जितः ।
यातायातविनिर्मुक्त एतदाश्रमलक्षणम् ॥२॥
सुरम्ये निर्झरे देशे वने वासं करोति यः ।
आशापाशविनिर्मुक्तो वननामा स उच्यते ॥३॥
अरण्ये संस्थितो नित्यमानन्दनन्दने वने ।
त्यक्त्वा सर्व्वमिदं विश्वमारण्यलक्षणं किल ॥४॥
वासो गिरिवरे नित्यं गीताभ्यासे हि तत्परः ।
गम्भीराचलबुद्धिश्च गिरिनामा स उच्यते ॥५॥
वसेत् पर्व्वतमूलेषु प्रौढ़ो यो ध्यानधारणात् ।
सारात् सारं विजानाति पर्व्वतः परिकीर्त्तितः ॥६॥
वसेत् सागरगम्भीरो वनरत्नपरिग्रहः ।
मर्य्यादाञ्च न लङ्घेत सागरः परिकीर्त्तितः ॥७॥
स्वरज्ञानवशो नित्यं स्वरवादी कवीश्वरः ।
संसारसागरे साराभिज्ञो यो हि सरस्वती ॥८॥
विद्याभारेण सम्पूर्णः सर्व्वभारं परित्यजेत् ।
दुःखभारं न जानाति भारती परिकीर्त्तितः ॥९॥
ज्ञानतत्त्वेन संपूर्णः पूर्णतत्त्वपदे स्थितः ।
परब्रह्मरतो नित्यं पुरीनामा स उच्यते ॥"१०॥
इति शङ्करविजये विद्यारण्यस्वामिधृतम् ॥

श्रीसदाशिव उवाच ।

"अवधूताश्रमो देवि कलौ सन्न्यास उच्यते ।
विधिना येन कर्त्तव्यं तत् सर्व्वं शृणु साम्प्रतम् ॥
ब्रह्मज्ञाने समुत्पन्ने विरते स्वर्गकर्म्मणि ।
अध्यात्मविद्यानिपुणः सन्न्यासाश्रममाचरेत् ॥
विहाय वृद्धौ पितरौ शिशुं भार्य्यां पतिव्रताम् ।
त्यक्त्वाक्षमर्थान् बन्धूंश्च प्रव्रजन्नारकी भवेत् ॥
सम्पाद्य गृहकर्म्माणि परितोष्यागमानपि ।
निर्म्ममो निलयाद्गच्छेन्निष्कामो विजितेन्द्रियः ॥
आहूय स्वजनान् बन्धून् ग्रामस्थान् प्रतिवासिनः ।
प्रीत्यानुमतिमन्विच्छेद्गृहाज्जिगमिषुर्नरः ॥
तेषामनुज्ञामादाय प्रणम्य परदेवताम् ।
ग्रामं प्रदक्षिणीकृत्य निरपेक्षो गृहाद्वियात् ॥
मुक्तः संसारपाशेभ्यः परमानन्दहर्षितः ।
कुलावधूतं ब्रह्मज्ञं गत्वा संप्रार्थयेदिदम् ॥
गृहाश्रमे परं ब्रह्मन् ममैतद्विगतं वयः ।
प्रसादं कुरु मे नाथ सन्न्यासग्रहणं प्रति ॥
निवृत्तगृहकर्म्माणं विचार्य्य विधिवद्गुरुः ।
शान्तं विवेकिनं वीक्ष्य द्वितीयाश्रममादिशेत् ॥
ततः शिष्यः कृतस्नानो यतात्मा विहिताह्निकः ।
ऋणत्रयविमुक्त्यर्थं देवर्षीन् अर्च्चयेत् पितॄन् ॥
देवा ब्रह्मा च विष्णुश्च रुद्रश्च स्वगणैः सह ।
ऋषयः सनकाद्याश्चाद्या देवर्ण्यस्तथा ॥
अथ ये पितरः पूज्या वक्ष्यामि शृणु ता[ल्लि]
पिता पितामहश्चैव प्रपितामह एव च ।
माता पितामही देवि तथैव प्रपितामही ।
मातामहादयोऽप्येवं मातामह्यादयोऽपि [च]
प्राच्यामृषीन् यजेद्देवान् दक्षिणस्यां पि[तॄन्]
[illegible]
पूर्व्वादिक्रमतो दद्यादासनानां द्वयं द्व[यम्]
देवादीन् क्रमतस्तत्रावाह्य [illegible]
समर्च्च विधिवत्तेभ्यः पिण्डान् [illegible]
पिण्डप्रदानविधिना दत्त्वा पिण्डं यथाक्रम[म्]
कृताञ्जलीपुटो भूत्वा प्रार्थयेत् [illegible]
तृप्यध्वं पितरो देवा देवर्षिमातृका[गणाः]
गुणातीतपदे यूयमनृणीकुरुताचिरात् ।
आनृण्यमर्थयित्वा तु प्रत्येकं च पुनः पुनः
ऋणत्रयविनिर्मुक्तस्तमात्मश्राद्धं प्रकल्पयेत् ।
पिता ह्यात्मैव सर्व्वेषां तत्पिता [illegible]
आत्मन्यात्मार्पणार्थाय कुर्य्यादात्मक्रियां
उत्तराभिमुखो भूत्वा पूर्व्ववत् कल्पि[तासने]
आब्रह्मात्मपितॄन् देवि दद्यात् पिण्डं [illegible]
प्रागग्रान् दक्षिणाग्रांश्च पश्चिमाग्रान् [illegible]
[illegible]
पिण्डार्थमास्तरेद्दर्भानुदगग्रान् [illegible]
समाप्य श्राद्धकर्म्माणि गुरुदर्शितवर्त्मना ।
मुमुक्षुश्चित्तशुद्धार्थमिमं मन्त्रं शतं जपेत् ।
ह्रीं त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् ।
उर्व्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मा[मृतात्]
उपासनानुसारेण विद्यामण्डलपूर्वकम् ।
संस्थाप्य कलसं तत्र गुरुः पूजां समारभेत् ।
ततस्तु परमब्रह्म ध्यात्वा [illegible]
विधाय पूजां ब्रह्मज्ञो ब्रह्मस्थापनमाचरेत् ।
प्रागुक्तसंस्कृते वह्नौ सङ्कल्पोक्ताहुतिं गुरुः ।
दत्त्वा शिष्यं समाहूय साकल्यं [illegible]
आदौ व्याहृतिभिर्हुत्वा प्राणहोमं प्रकल्पयेत् ।
प्राणोऽपानः समानश्चोदानव्यानौ च [illegible]
तत्र होमं ततः कुर्य्याद्धामिध्यतमुत्तमम् ।
पृथिवी सलिलं वह्निर्वायुराकाशमेव च ।
गन्धो रसश्च रूपश्च सार्शः शब्दो
ततो वाक्पाणिपादश्च पायूपस्थौ [illegible]
श्रोत्रं त्वक् नयनं [illegible]
एतानि मे पदान्ते च शुध्यन्ति परसु[illegible]
ह्रीं ज्योतिरहं विरजा विपाप्मा भूयास[म्]
[illegible]
चतुर्विंशतितत्त्वानि कर्म्माणि वैदिकानि
हुत्वाग्नौ निष्क्रियो देह [illegible]
विभाव्य मृतवत् काय रहितं सर्व्वकर्म
स्मरन् तत् परमं ब्रह्म यज्ञसूत्रं समुद्धरेत् ।
ऐं क्लीं हुं इति मन्त्रेण स्कन्धादुद्धा[र्य]
यज्ञसूत्रं करे धृत्वा पठित्वा व्याहृतित्र[यम्]
वह्निजायां समुच्चार्य्य घृताक्तमनले क्षिपेत् ।
हुत्वैवमुपवीतञ्च कामबीजं समुच्चरन् ।

त्वा शिखां करे कृत्वा घृतमध्ये नियोजयेत्॥
पुच्छि शिखे त्वं हि वाणीरूपा सनातनी।
गते पावके स्थानं गच्छ देवि नमोऽस्तु ते॥
सं मायां कूर्च्चमन्त्रं वह्निजायामुदीरयेत्।
श्रामाश्रित्य पितरो देवो देवर्षयस्तथा।
र्णाश्रमकर्म्माणि निवसन्ति शिखोपरि॥
सन्तर्प्य ताः सर्व्वाः देवर्षिपितृदेवताः।
श्वासूत्रपरित्यागात् देही ब्रह्ममयो भवेत्॥
सूत्रशिखात्यागात् सन्न्यासः स्याद्द्विजन्मनाम्
णामितरेषाञ्च शिखां हुत्वैव संस्क्रिया॥
ो मुक्तशिखासूत्रः प्रणमेद्दण्डवद्गुरुम्।
रुत्थाप्य तं शिष्यं दक्षकर्णे वदेदिमम्॥
ब्रमसि महाप्राज्ञ हंसः सोऽहं विभावय।
र्ममो निरहङ्कारः स्वभावेन सुखं चर॥
ो घटस्य वह्निश्च विसृज्य ब्रह्मतत्त्ववित्।
त्मस्वरूपं तं मत्वा प्रणमेच्छिरसा गुरुम्॥
स्तुभ्यं नमो मह्यं तुभ्यं मह्यं नमो नमः।
मेव त्वदहमेव विश्वरूपं नमोऽस्तु ते॥
ह्ममन्त्रोपासकानां तत्त्वज्ञानां जितात्मनाम्।
मन्त्रेण शिखाच्छेदात् सन्न्यासग्रहणं भवेत्॥
ह्मज्ञानविशुद्धानां किं यज्ञैः श्राद्धपूजनैः।
च्छाचारपराणान्तु प्रत्यवायो न विद्यते॥
ो निर्द्वन्द्वरूपोऽसौ निष्कामः स्थिरमानसः।
र्म्मो विहरेत् शिष्यः साक्षाद्ब्रह्ममयो भुवि॥
क्तो विधिनिषेधाभ्यां निर्योगक्षेम आत्मवित्।
खदुःखसमो धीरो जितात्मा विगतस्पृहः॥
धीरात्मा प्राप्तदुःखोऽपि सुखे प्राप्तेऽपि निस्पृहः
दानन्दः शुचिः शान्तो निरपेक्षो निराकुलः॥
ीहजकः स्याज्जीवानां सदा प्राणिहिते रतः।
गतामर्षभीर्दान्तो निःसङ्कल्पो निरुद्यमः॥
ोकद्वेषविमुक्तः स्याच्छत्रौ मित्रे समो भवेत्।
ीतवातातपसहः समो मानापमानयोः॥
मः शुभाशुभे तुष्टो यदृच्छालाभवस्तुना।
निस्त्रैगुण्यो निर्व्विकल्पो निर्लोभः स्यादसञ्चयी
थामत्यनुपाश्रित्य मृषा विश्वं प्रतिष्ठते।
ात्माश्रितस्तथा देही जानन्नेवं सुखी भवेत्॥
न्द्रियाण्येव कुर्व्वन्ति स्वं स्वं कर्म्म पृथक् पृथक्
आत्मा साक्षी विनिर्लिप्तो ज्ञात्वैवं मोक्षभाग् भवेत्॥
धातुप्रतिग्रहं निन्दामनृतं क्रीडनं स्त्रिया।
रेतस्त्यागमसूयाञ्च सन्न्यासी परिवर्ज्जयेत्॥
सर्व्वत्र समदृष्टिः स्यात् कीटे देवे तथा नरे।
सर्व्वं ब्रह्मेति जानीयात् परिव्राट् सर्व्वकर्म्मसु।
विप्रान्नं श्वपचान्नं वा यस्मात्तस्मात् समागतम्
देशं कालं तथा पात्रमश्नीयादविचारयन्।
अध्यात्मशास्त्राध्ययनैः सदा तत्त्वविचारणैः॥
अवधूतो नयेत् कालं स्वेच्छाचारपरायणः।
सन्न्यासिनां मृतं कायं दाहयेन्न कदाचन॥
संपूज्य गन्धपुष्पाद्यैर्निखनेद्वाप्सु मज्जयेत्।
अप्राप्तयोगमर्त्त्यानां सदा कामाभिलाषिणाम्।
प्रभावाज्जायते देवि प्रवृत्तिः कर्म्मसंकुले।
अत्रापि ते सानुरक्ता ध्यानार्च्चजपसाधने॥
श्रेयस्तदैव जानन्तस्तत्रैव दृढनिश्चयाः।
अतः कर्म्मविधानानि प्रोक्तानि चित्तशुद्धये॥
नामरूपं बहुविधं तदर्थं कल्पितं मया।
ब्रह्मज्ञानं विना देवि कर्म्मसंन्यसनं विना॥
कुर्व्वन् कल्पशतं कर्म्म न भवेन्मुक्तिभाजनः।
कुलावधूतस्तत्त्वज्ञो जीवन्मुक्तो नराकृतिः॥
साक्षान्नारायणं मत्वा गृहस्थस्तं प्रपूजयेत्।
यतेर्द्दर्शनमात्रेण विमुक्तः सर्व्वपातकात्।
तीर्थव्रततपोदानसर्व्वयज्ञफलं लभेत्॥"
इत्यवधूताश्रमः। इति महानिर्व्वाणतन्त्रे अष्टमोल्लासः॥

सप, सम्बन्धे। (भ्वा०-पर०-सक०-सेट्।) असोसपत्। इति दुर्गादासः॥ कविकल्पद्रुमे मूर्द्धन्यादिरयम्॥

सपत्त्राकरणं, क्ली, (सपत्त्र + कृ + ल्युट्। "सपत्त्रनिष्पत्त्रादतिव्यथने।" ५।४।६१। इति डाच्।) अत्यन्तपीड़नम्। इति हलायुधः॥

सपत्त्राकृतः, पुं, (सपत्त्र + कृ + क्तः। डाच्।) क्षतमृगादिः। अत्यन्तपीड़िते, त्रि। इति केचित्॥

सपत्त्राकृतिः, स्त्री, (सपत्त्र + कृ + क्तिन्। डाच्।) अत्यन्तपीड़नम्। तत्पर्य्यायः। निष्पत्त्राकृतिः २। इति हेमचन्द्रः॥

सपत्नः, पुं, (सह पतति एकार्थे इति। पत + नः। सहस्य सः।) शत्रुः। इत्यमरः॥ (यथा, महाभारते। १। १४५। ५।
"संरक्ष तात मन्त्रञ्च सपत्नांश्च ममोद्धर।
निपुणेनाभ्युपायेन यद्ब्रवीमि तथा कुरु॥")

सपत्नारिः, पुं, (सपत्नस्य शत्रोररिरिव दुर्गमभवात्।) वंशविशेषः। बेयुड़ बाँश इति भाषा। यथा,—
"ब्रह्मयष्टिः सपत्नारिर्बहुसन्ततिराशुपः।"
इति शब्दचन्द्रिका॥

सपत्नी, स्त्री, (समानः एकः पतिर्य्यस्याः। "नित्यं सपत्न्यादिषु।" ४। १। ३५। इति ङीप्। पत्युर्नकारादेशः समानस्य सभावोऽपि निपात्यते।) समानपतिका। सतीन इति भाषा॥ (यथा, आर्य्यासप्तशत्याम्। ४६३।
"या नीयते सपत्न्या प्रविश्य या वर्ज्जिता भुजङ्गेन।
यमुनाया इव तस्याः सखि मलिनं जीवनं मन्ये॥"
यथा च। दौहित्राभावे सपत्नीपुत्त्रः। तस्य पुत्त्रत्वस्मरणात्। यथा मनुः।
"सर्व्वासामेकपत्नीनामेका चेत् पुत्त्रिणी भवेत्।
सर्व्वास्तास्तेन पुत्त्रेण प्राह पुत्त्रवतीर्म्मनुः॥"
एकपत्नीनामिति एकः पतिर्य्यासामिति।
अत्र सपत्नीपुत्त्रस्य पुत्त्रत्वातिदेशात् तत्सत्त्वेऽपि स्त्रीणां सपिण्डनं मैथिलैरुक्तम्। तन्न।
"पुत्त्रेणैव तु कर्त्तव्यं सपिण्डीकरणं स्त्रियाः।
पुत्त्रस्य पुनस्तत्र भ्रातृपुत्त्रादयोऽपि ये॥"
इति लघुहारीतवचने एवकारेणातिदिष्टपुत्त्रनिषेधात्। इति शुद्धितत्त्वम्॥

सपदि, व्य, (संपद्यते इति। पद गतौ + इन्। पृषोदरादित्वात् मलोपः।) द्रुतम्। तत्क्षणः। इत्यमरः॥ (यथा, कुमारे। ३। ७६।
"सपदि मुकुलिताक्षीं रुद्रसंरम्भभीत्या
दुहितरमनुकम्प्यामद्रिरादाय दोर्भ्याम्।
सुरगज इव बिभ्रत् पद्मिनीं दन्तलग्नां
प्रतिपथगतिरासीत् वेगदीर्घीकृताङ्गः॥")

सपर्य्या, स्त्री, (सपर पूजायाम् + "कण्ड्वादिभ्यो यक्।" ३।१।२७। इति यक्। "अ प्रत्ययात्।" ३। ३। १०२। इति अः। ततष्टाप्।) पूजा। इत्यमरः॥ (यथा, माघे। १। १५।
"तमर्घ्यमर्घ्यादिकयादिपूरुषः
सपर्य्यया साधु स पर्य्यपूपुजत्॥")

सपादः, त्रि, पादेन सह वर्त्तमानः। स तु चरणयुक्तचतुर्थभागसहितश्च। यथा,—
"सपादपलमानेन वेला ब्रूयात्ति निश्चितम्।"
इति मलमासतत्त्वमुक्तावली॥

सपादपीठं, त्रि, (सपादं पादसहितं पीठं यत्र।) पादपीठयुक्तसिंहासनादि। यथा,—
"आदित्यदाप्तीसदृशानुकल्पं
सिंहासनं तस्य सपादपीठम्।
'सन्तप्तचामीकरवल्गुवज्र
विभागविन्यस्तमहार्घरत्नम्॥"
इति भट्टौ ३ सर्गः॥

सपिण्डः, पुं, (समानः पिण्डो मूलपुरुषो निवापो वा यस्य। समानस्य सः।) सप्तपुरुषान्तर्गतज्ञातिः। तत्पर्य्यायः। सनाभिः २। इत्यमरः॥ स च अशौचविवाहदायभेदात् त्रिविधः। तत्राशौचसपिण्डस्य लक्षणं यथा। सप्तपुरुषान्तर्गतत्वे सति गोत्रैक्ये सति दातृत्वभोक्तृत्वान्यतरसम्बन्धेन पिण्डलेपान्यतरवत्त्वम्। दत्तकन्यानान्तु भर्त्तृसापिण्ड्येन सापिण्ड्यम्। अदत्तानां पित्रवधित्रिपुरुषसापिण्ड्यम्। विवाहसपिण्डास्तु। पितृपितृबन्धपेक्षया सप्तमपुरुषावधयः मातामहमातृबन्धपेक्षया पञ्चमपुरुषावधयश्च। यथा,—
"पञ्चमात् सप्तमादूर्द्ध्वं मातृतः पितृतः क्रमात्।
सपिण्डता निवर्त्तेत सर्व्ववर्णेष्वयं विधिः॥"
इत्युद्वाहतत्त्वधृतनारदवचनम्॥
दायसपिण्डास्तु। त्रिपुरुषावधयः। ते च पितृपितामहप्रपितामहाः तेषां पुत्त्रपौत्त्रप्रपौत्त्रदौहित्राः। मातामहप्रमातामहवृद्धप्रमातामहाः। तत्पुत्त्रपौत्त्रप्रपौत्त्राश्च। इति दायभागः॥ * ॥ अथ सपिण्डादिविचारः। मत्स्यपुराणम्।
"लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः
पिण्डदः सप्तमस्तेषां सापिण्ड्यं साप्तपौरुषम्॥"
नन्वेवं भ्रात्रादिभिः सह पिण्डतल्लेपभोक्तृत्वासम्भवात् कथं सपिण्डत्वमिति चेदुच्यते। तेषामपि पिण्डलेपयोः सम्बन्धोऽस्ति। तथा च बौधायनः। प्रपितामहः पितामहः पिता स्वयं सोदर्य्यभ्रातरः। सवर्णायाः पुत्त्रः पौत्त्रः॥ पौत्त्रो

संवत्सरं वा प्राप्य पितृत्वप्रापकं इति न सपिण्डनान्तरम्। अत्र यः कर्त्तास्मीति निश्चित्य दाता विप्राभिमन्त्रयेत्। इतिवचनविरोधेति चत् कटकोटिकसम्भावनोपलक्षणम्। भविष्यन्निमित्तस्य कर्म्मणः प्रत्यूहार्हत्वात्। एवञ्च वृद्धिश्राद्धं यदर्थं कृतं तत्कर्म्म चेत् विघ्नात्तद्दिने न क्रियते तदा दिनान्तरे तत्कर्म्मणि क्रियमाणे तदङ्गत्वात् पुनर्वृद्धिश्राद्धं कर्त्तव्यमेव।

"प्रधानस्याक्रिया यत्र साङ्गं तत् क्रियते पुनः। तदङ्गस्याक्रियायान्तु नावृत्तिर्न च तत् क्रिया॥"

इति छन्दोगपरिशिष्टेन साङ्गकरणाभिधानात् हेमाद्रिधृतम्।

पूर्णे संवत्सरे श्राद्धं षोडशं परिकीर्त्तितम्। तेनैव च सपिण्डत्वं तेनैवाब्दिकमिष्यते॥"

अत्र पूर्णसंवत्सरक्रियमाणश्राद्धद्वयोरुभयनिर्व्वाहः। तथापकृष्टसपिण्डनादप्युभयनिर्व्वाहाच्च पूर्णसंवत्सरे आब्दिकान्तरं कार्य्यम्। एवञ्च पक्षद्वयश्राद्धे कृतेऽप्युनेयम्॥०॥ उदकपात्राणि इति अर्घ्यार्थमुदकयुक्तपात्राणि। अत्र त्रीणि पितॄणामेकं प्रेतस्येति पाठक्रमदर्शनात् सर्व्वत्र छन्दोगानां यजुर्वेदिनाञ्च गृह्यानुरोधात् सपिण्डीकरणे प्रेतकर्म्मकरणं पितृकर्म्मपूर्व्वकम्। तयोः पार्व्वणवत् पूर्व्वमेकोद्दिष्टमथापरम्। इति पूर्व्वलिखितवचने शब्दक्रमदर्शनात्। दैवकृत्यपितृकृत्ययोर्म्मध्ये प्रेतकृत्येन व्यवधानस्यायुक्तत्वाच्च। एतेन अथ सपिण्डीकरणं संवत्सरमेकं पिण्डमुद्दिश्य संवत्सरान्ते चत्वार्य्युदकपात्राणि प्रयुनक्ति तत्रैकं प्रेतस्य त्रीणि इतरेभ्यः। इत्याश्वलायनदर्शनात् सर्व्वशाखिनां सपिण्डीकरणे प्रेतादित्वं मैथिलोक्तं निरस्तम्। एतद्वचनस्य तच्छाखिमात्रपरत्वात्। किञ्चार्घ्यदानमात्रे पाठक्रमाच्छब्दक्रमस्य बलवत्त्वात् ब्रह्मपुराणे प्रेतार्घ्यदानान्तरं ततः पितामहादिभ्यः इति शब्दक्रमस्याबाधायार्घ्यपात्रे पुष्पगन्धदानपर्य्यन्तं पितृपूर्व्वं कृत्वा उत्सर्गं तु प्रेतपूर्व्वं कर्त्तेति। तथा ब्रह्मपुराणम्।

"चतुर्थं चार्घ्यपात्रेभ्य एकं वामेन पाणिना। गृहीत्वा दक्षिणेनैव पाणिना च तिलोदकम्॥ सम्मार्ज्जयित्वा पृथिवीं ये समाना इति स्मरन्। प्रेतविप्रस्य हस्ते तु चतुर्भागं जलं क्षिपेत्॥ ततः पितामहादिभ्यस्तन्मन्त्रेण पृथक् पृथक्। ये समाना इति द्वाभ्यां तज्जलन्तु समर्पयेत्॥ अर्घ्यं तेनैव विधिना प्रेतपात्राच्च पूर्व्ववत्। तेभ्यश्चार्घ्यं निवेद्यैव पश्चाच्च स्वयमाचमेत्॥"

एकं प्रेतपात्रं वामेन अनन्तरं दक्षिणेन गृहीत्वा इति सम्बन्धः। ये समाना इति मन्त्रद्वयं पठन् प्रेतपात्रस्थं उत्सृष्टजलं कुशरेखात्रयेण चतुर्धा विभज्य भागमेकं प्रेतब्राह्मणहस्ते क्षिपेत् दद्यात्। उत्सृष्टजलपिण्डयोर्व्विभागे मन्त्रस्य करणत्वं व्यक्तमाह शातातपः।

"निदध्यात् चतुरः पिण्डान् पिण्डदः प्रतिमामतः। ये समाना इति द्वाभ्यामाद्यन्तु विभजेत् त्रिधा॥ अथ तेन विधिः पूर्व्व[illegible]॥"

तन्मन्त्रादनन्तरं तन्मन्त्रे पितामहादिभिस्त्रिभिस्त्रिधा ह्रीयतां दिशा इति मन्त्रोपकारात् पितामहाद्युत्पन्नर्णगोत्रीयास्तृणं ये समाना इति द्वाभ्यां मन्त्राभ्यामर्घ्यं पृथोदकं समर्प्य प्रेतपात्रस्थमर्घ्यं तेनैव विधिना मन्त्रेण पूर्व्ववत् चतुर्भागरूपं प्रेतपात्रात् समर्पयेत्। तेभ्यः पितामहादिभ्यस्त्रिभ्यो ब्राह्मणपुष्पतिलोदकरूपमर्घ्यं निवेद्य तदनु ब्राह्मणहस्ते प्रक्षिप्य पश्चादाचमेदित्यर्थः। तेन प्रेतब्राह्मणहस्ते उत्सृज्य दत्तस्यैवार्घ्यजलस्य तदुत्सृष्टजलस्य भागत्रयं पितामहाद्युत्सृष्टार्घ्यजलेषु मिश्रीकर्त्तव्यमिति प्रतीयते। अतएव दत्तस्यैव प्रेतपिण्डस्य मिश्रीभाव इति श्राद्धविवेकः॥०॥ यत्र न चात्र दैवे भोजयेत् प्राग्वत् दैवे अर्घ्यं समाप्यैव दत्त्वा गन्धमाल्यैः पात्रमर्च्चयित्वा हुतशेषं पितृभ्यः पात्रेषु दद्यात् इत्याश्वलायनवचने पितृपात्रे दैवं न मिश्रयेदिति कल्पतरुव्याख्यानुरोधेन मैथिलोक्तं सर्व्वशाखिनान्तथाचरणम्। तदयुक्तम्। आश्वलायनेन काण्डानुगमस्योक्तत्वात् बह्वृचानामेव तथा युक्तत्वात्। न सामगयजुर्व्वेदिनोः। तयोः पदार्थानुगमस्योक्तत्वात्। अथ सामयजुर्व्वेदिनोः श्राद्धत्वे समन्त्रे मन्त्रदर्शनात्तत्रैव मन्त्रान्वयः पितृदयितादावुक्तः। वस्तुतस्तु पौराणिकत्वात् दैवतास्य इत्यस्य पाठवत् साधारणत्वेऽपि शातातपोक्तत्वाच्च विभागेऽपि मन्त्रान्वयो युक्तः अतएव मैथिलैरपि तथा लिखितमिति॥०॥ एवञ्च पार्व्वणे प्रागुक्तवचनेन शेषद्रव्येण पिण्डदानविधानात् तद्विकृतावपि सपिण्डीकरणे तन्नियमात् यद्यपि शेषाभावे पिण्डनिवृत्तिरायाति तथापि।

"यथोक्तवस्त्वसम्प्राप्तौ ग्राह्यं तदनुकारि यत्। यवानामिव गोधूमा व्रीहीणामिव शालयः॥"

इति छन्दोगपरिशिष्टवचनात् मुख्याभावे प्रतिनिधिः शास्त्रार्थ इति न्यायाच्च मध्वाद्यभावे गुड़ादिग्रहणवत् द्रव्यान्तरेणापि पिण्डदानम्। शेषद्रव्यनियमस्तु तदभावे द्रव्यान्तरव्यागाय। अन्यथा तदङ्गाभावे कर्म्मवैगुण्यं स्यात्। सह पिण्डक्रियायां इति मनूक्तेः प्रेतपिण्डस्य सह मिश्रीकरणं यथेति सपिण्डीकरणसमाख्यासिद्धार्थं सुतरां तत्र तथाचरणम्। प्रतिपत्तिरूपकर्म्माङ्ग एव प्रतिपाद्याभावे तन्निवृत्तिः। अग्न्यागारे लोहितं निरस्यति मरुद्विरस्यति इत्याद्युक्ता। अतएव यज्ञवास्तुरूपप्रतिपत्तियागेऽपि यज्ञो यत्र वसति इति यज्ञवास्तुसमाख्यानुरोधेनास्तृतकुशविनाशेऽपि कुशान्तरप्रतिनिधिर्भट्टनारायणैः गोभिलभाष्ये उक्तः। प्राक् स्विष्टकृत आवापः इति गोभिलसूत्रस्य व्याख्यानेऽपि आ उच्यते इत्यावापः प्रधानहोमः स तु स्विष्टकृद्धोमात् प्राक् न पश्चादित्यर्थः। एवञ्च मुख्यहोमे त्यक्ते यदि चरुर्नष्टो दुष्टो वा भवति तदाज्यं ग्राह्यः मुख्ये हवे ज्याने तदाज्येनैव निर्द्दिष्टेन [illegible] एतेन शेषनाशे [illegible] निन्दोत्थं ज्ञेयम्॥०॥ एतेन [illegible] पतेनार्घ्यदानविधानेन। पिण्ड[illegible] प्रमाणो व्याख्यातः। तथा च ब्रह्मपुराणम्

"अथ तेनैव विधिना दर्भमूले निनयेत्। पितृदत्ता तु पिण्डम् [illegible] दत्ताद्पिण्डान् पितृभ्यस्तु यथा [illegible] तन्तु पिण्डं त्रिधा [illegible]

निदध्यात्तेषु पिण्डेषु एवं मन्त्रेण [illegible] पितृभ्यः पितृपितामहादिभ्य [illegible] पश्चात् प्रेताय पार्व्वणे पूर्व्वदेशे निध[illegible] त्यर्थः। तं प्रेताय दत्तपिण्डं [illegible] पितामहादिक्रमेण। संसर्ज्जने [illegible] मिश्रयेत्। भविष्यपुराणम्।

"गन्धोदकतिलैर्युक्तं कुर्य्यात् [illegible] पर्य्याये पितृपात्रेषु प्रेतपात्रं प्रसेचयेत्। ये समाना इति द्वाभ्यामितरन्तु [illegible] निर्व्वेन तुल्यं शेषं स्यादेकोद्दिष्टं [illegible] नित्यनाशयशेन तत्र [illegible] एकोद्दिष्टेऽपि एकोद्दिष्टेन दिव [illegible] तुल्यम्। एकोद्दिष्टमिति एकोद्दिष्टत्वात् सपिण्डीकरणस्यैकोद्दिष्टत्वम् सपिण्डीकरणमेकोद्दिष्टं स्त्रिया इति याज्ञवल्क्यवचनैकवाक्यत्वात्। अर्घ्यं एकपात्राद्यं स्त्रियाः [illegible] दयिकश्राद्धादि। अत्र वा कर्त्तरि [illegible] कर्त्तरि षष्ठीति कर्त्तृत्वनियमः। स्त्रीणां भोजनदर्शनाच्च भोक्तृत्वनियमः [illegible] पितरि पूर्व्वमृते तदर्थमन्तरे [illegible] प्रपितामहे च मृते यथा [illegible] परिशिष्टे कात्यायनः।

'पितुः सपिण्डतां [illegible] असंस्कृतौ न संस्कार्य्यौ पूर्व्वौ पितरं तत्र संस्कुर्य्यादिति कात्यायनोक्त[illegible] पापिष्ठमपि शुद्धेन शुद्धं पापकृतापि वा पितामहेन पितरं संस्कुर्य्यादिति निश्च[illegible] पितुः सपिण्डतां कृत्वा प्र[illegible] मह्प्रपितामहयोः सतोः पार्व्वणं पितृप्रपितामहवृद्धप्रपितामहानां कर्त्तव्यं न तु तयोः सपिण्डीकरणं कार्य्यम्॥०॥ ननु सपिण्डनेनासंस्कृत[illegible] पितामहप्रपितामहाभ्यां सह पितु[illegible] सपिण्डनाख्यसंस्कारस्तस्मात् तदर्थं [illegible] सपिण्डीकरणमपकर्षणीयं [illegible] नमुत्कर्षणीयमित्यत आह असंस्कृतावित्या[illegible] कर्षापकर्षौ न कार्य्यौ किन्त्वनेन वचनेन [illegible] कथमसंस्कृतेन सह संस्कार इत्यत आह [illegible] कमपीति। पापिष्ठमकृतसं[illegible] कृतसपिण्डीकरणेन पितामहेन पापं

"कृतसपिण्डीकरणेनापि शुद्धं कुर्य्यादिति
नक्तनिश्चयः। अतो वचनबलाददोषः इति
तात्पर्य्यम्। अत्र तु प्रेतीभूतपितामहेन पितुः
ण्डने पितामहस्यैकोद्दिष्टमेव।
पिण्डीकृतं प्रेतमेकोद्दिष्टेन तर्पयेत्॥"
प्रागुक्तजाबालवचनात्। एवमन्यत्रापि
म्। वृद्धप्रपितामहस्य प्रेतत्वे तेन सह न
मिति तात्पर्य्यम्॥*॥ अत्र मातुः सपिण्डने
तार्थिश्वशुरयोः पिण्डौ कुशैराच्छादयेत्।
च गार्ग्यः।
नैकेन कर्त्तव्यं सपिण्डीकरणं स्त्रियाः।
ता हि मृतैकत्वं कुशैरन्तरयन् पितॄन्॥
ण्यामतो यस्माच्छिरःप्रच्छादनक्रिया।
दर्भेण सा कार्य्या मातुरभ्युदयार्थिभिः॥"
रयन्तीत्यर्थे अन्तरयन्निति लिङ्गव्यत्ययेन
मिति हलायुधः। परवचनं गोभिलश्राद्ध-
भाष्यकृतापि लिखितम्। अतएव प्रव्रजिते
ते वा पितरि मृते न पितामहादिभिर्मातुः
ण्डीकरणं किन्तु पितामह्यादिभिरेव।
न भर्त्रा सहैवास्याः सपिण्डीकरणं स्त्रियाः
त्वं सा गता यस्माच्चरुमन्त्राहुतिव्रतैः।
मन् सति सुताः कुर्य्युः पितामह्या सहैव तु॥"
व तस्मिन् सतीति श्राद्धानर्हभर्त्तुरुपलक्ष-
। अतएव।
श्वैव तु जीवन्त्यां तस्याः श्वश्र्वेति
निश्चयः।"
र लघुहारीतेन श्वश्रूजीवने तस्या श्वश्र्वे-
दं न तु श्वशुरेणेति क्वचिदप्युक्तम्॥*॥ एवं
तामह्यादिभिर्मातुः सपिण्डीकरणेऽपि साम-
ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा
मन्त्रो न पाठ्यः मन्त्रलिङ्गविरोधात्। अत-
आभ्युदयिके मातृपक्षे श्रीदन्तादिभिर्मन्त्रा
रं लिखितं न तु ये चात्र त्वामिति। वस्तु-
तु आभ्युदयिके छन्दोगानां मातृपक्ष एव
स्तीति वक्ष्यते। एवञ्च।
एवार्घं पितृपात्रेषु प्रेतपात्रं प्रसेचयेत्।
समाना इति द्वाभ्यां शेषं पूर्व्ववदाचरेत्॥"
तत् सपिण्डीकरणमेकोद्दिष्टं स्त्रिया अपि।
ति याज्ञवल्क्येन पार्व्वणैकोद्दिष्टविकृतीभूत-
सपिण्डनातिदेशात् तद्विकृतीभूतस्त्रीसपिण्डने
पि ये समाना इति मन्त्रद्वयस्य पार्व्वणोक्तस्य
ये चात्र त्वामिति मन्त्रस्य च लिङ्गार्थासम-
तत्वेऽपि प्रकृत्यर्थस्य समवेतार्थत्वात् पाठः।
तत्र च मातामहानामप्येवं श्राद्धं कुर्य्याद्विच-
क्षणः।
मन्त्रोहेन यथान्यायं शेषाणां मन्त्रवर्ज्जितम्॥"
इत्यनेन यच्छेषाणां मन्त्रवर्ज्जनमित्युक्तं तत्
शुन्धन्तां पितरः शुन्धन्तां पितामहाः इत्यादि
प्रकृत्यूह्यायोग्यमन्त्रवर्ज्जनपरमिति प्रागुक्तम्।
मार्कण्डेयपुराणम्।
"सर्व्वाभावे स्त्रियः कुर्य्युः स्वभर्त्तॄणाममन्त्रकम्।
तदभावे च नृपतिः कारयेत् स्वकुटुम्बवत्॥
स्त्रीणामप्येवमेवैतदेकोद्दिष्टमुदाहृतम्।
मृताहनि यथान्यायं नृणां यद्वद्दिहोदितम्॥"
स्त्रियोऽत्र असवर्णोढा अपरिणीता वेति
श्राद्धविवेकः। सवर्णोढायाः पुत्रपौत्रप्रपौत्रा-
भाव एव विधानात्। तथा शङ्खः।
"पितुः पुत्रेण कर्त्तव्या पिण्डदानोदकक्रिया।
तदभावे तु पत्नी स्यात्तदभावे सहोदरः॥"
स्त्रीणामिति तु सम्प्रदानपरम्। स्त्रीकर्त्तृक-
त्वस्य पूर्व्वार्द्धे एवोक्तत्वात्। एकमेवामन्त्रकमि-
त्यर्थः। इति श्राद्धविवेकः॥ अत्र स्त्रिय इत्य-
स्यासवर्णोढा अपरिणीतापरत्वव्याख्यानात्
स्त्रीणां मन्त्रनिषेधोऽपि तत्सम्प्रदानकश्राद्ध
एवावगम्यते। न तु स्त्रीसम्प्रदानकमात्रे।
कल्पतरौ तु स्त्रीणामप्येवमिति यादृशेन सम्ब-
न्धेन पितृत्वादिना पुरुषाणामेकादशाहादि-
श्राद्धं तादृशेन सम्बन्धेनैव स्त्रीणामेतत् कर्त्तव्य-
मिति। एतद्व्याख्याने स्त्रीसम्प्रदानकश्राद्धे
सुतरां मन्त्राः पाठ्याः। याज्ञवल्क्येनापि
समन्त्रकमेकोद्दिष्टं सपिण्डीकरणञ्चोक्ता एतत्
सपिण्डीकरणमेकोद्दिष्टं स्त्रिया अपीत्यनेन
स्त्रिया अपि तथैवोक्तम्।
"मातुः सपिण्डीकरणं पितामह्या सहोदितम्।
यथोक्तेनैव कल्पेन पुत्रिकाया न चेत् सुतः॥"
इति छन्दोगपरिशिष्टेनापि यथोक्तेनैव कल्पेन
इत्यनेन मन्त्रादिकसर्व्वमतिदिष्टं व्यवहारोऽपि
तथैति। अमन्त्रकं स्त्रीकर्त्तृकमन्त्रपाठरहितम्
अमन्त्रा हि स्त्रियो मताः। इति बौधायनेन
सामान्यतोऽभिधानात्। न तु ब्राह्मणकर्त्तृक-
मन्त्रपाठरहितम्। तथा च वराहपुराणम्।
"अयमेव विधिः प्रोक्तः शूद्राणां मन्त्रवर्ज्जितः।
अमन्त्रस्य तु शूद्रस्य विप्रो मन्त्रेण गृह्यते॥"
अत्रामन्त्रस्येति विशेषणस्य यावदमन्त्रश्राद्धार्थं
त्वेन परिभाषारूपत्वान्न प्रेतश्राद्धमात्रविषयः
न वा शूद्रकर्त्तृकश्राद्धमात्रविषयः। किन्तु स्त्री-
कर्त्तृकश्राद्धमप्यस्य विषयः। व्यक्तं ब्राह्मे।
"स्त्रीभिश्चावरवर्णैश्च श्राद्धं विप्रानुशासनात्।
मन्त्रवद्विधिपूर्व्वन्तु पङ्क्तिपाकविवर्ज्जितम्॥"
विप्रानुशासनात् विप्रपाठनात्। मन्त्रवन्मन्त्र-
युक्तम्। पङ्क्तिपाकविवर्ज्जितमित्यसवर्णस्त्रीकर्त्तृक
श्राद्धपरम्। पतिकर्त्तृकश्राद्धेऽपि पत्न्याः पाका-
धिकारदर्शनात्। तथा च छन्दोगपरिशिष्टम्।
शाकञ्च फाल्गुनाष्टम्यां स्वयं पत्न्यथवा पचेत्।
पत्नीत्वञ्च सवर्णोढायाः। ज्येष्ठा पत्नीति वच-
नात्। ज्येष्ठामाह मनुः।
"यदि स्वाश्च पराश्चैव विन्देरन् योषितो द्विजाः
तासां वर्णक्रमेणैव ज्यैष्ठ्यं पूजा च वेश्म च॥"
कुवेरोपाध्यायधृतम्।
"असंस्कृतप्रमीतानां पिता न श्राद्धमाचरेत्।
यदि स्नेहेन कुर्व्वीत सपिण्डीकरणं विना॥"
असंस्कृतप्रमीतानाम् अनुपनीतस्त्रूनानाम्।
लघुहारीतः।
"पुत्रेणैव तु कर्त्तव्यं सपिण्डीकरणं स्त्रियाः।
पुरुषस्य पुनस्त्वन्ये भ्रातृपुत्रादयोऽपि ये॥"
आदिशब्दग्राह्यानाह स एव।
"भ्राता वा भ्रातृपुत्रो वा सपिण्डः शिष्य एव
वा।
सहपिण्डक्रियां कृत्वा कुर्य्यादभ्युदयं ततः॥"
भ्राता वा इति वा शब्दात् भ्रात्रपेक्षया प्रधान-
त्वेन पूर्व्वाधिकारिणां दौहित्रान्तानां समुच्चयः
अतएव सपिण्डत्वेनैव भ्रातृतत्पुत्रयोरधिकार-
सिद्धौ पृथगुपादानं प्राधान्यज्ञापनार्थम्॥*॥
"महागुरौ प्रेतीभूते वृद्धिकर्म्म न युज्यते॥"
इति शूलपाणिलिखितवचनेन।
"प्रमीतौ पितरौ यस्य देहस्तस्याशुचिर्भवेत्।
नापि दैवं न वा पैत्रं यावत् पूर्णो न वत्सरः॥"
इति देवीपुराणवचनेन च प्रेतीभूतमातापितृ-
कस्य पितुः प्रेतीभूतमातापितृकस्य संस्कार्य्यस्य
प्रेतीभूतमातापितृकायाः अनूढायाः कन्यायाश्च
वैदिककर्म्मकर्त्तृत्वकर्म्मत्वानर्हत्वेन तत्परीहा-
राय यदहर्व्वा हविरापद्येत इत्यनेन पूर्व्वदिने
सपिण्डनं कृत्वा पित्रादिः परदिने अभ्युदयं
नामकरणादिकं कुर्य्यात्। ऊढायास्तु पतिरेको
गुरुः स्त्रीणाम्। इति वचनोक्तैकपदेन पत्युरेव
महागुरुत्वाभिधानात् तस्मिंस्तत्वमात्रे तस्याः
कर्म्मानधिकारः। एवञ्च पितृमात्रोर्म्महागुरुत्व-
व्यावृत्तेस्तयोर्म्मरणे ऊढाया न कर्म्मानधिकारः
अत्राभ्युदयसपिण्डनयोरानन्तर्य्यमात्रं क्त्वाप्रत्य-
यार्थः न त्वेककर्त्तृत्वमपि। अन्यथा सपिण्ड-
ताधिकारिण्याः पत्न्याः सत्त्वे अभ्युदयाधि-
कारिणो भ्रातुः सपिण्डनाधिकारापत्तेः।
यथा,—
"नानिष्ट्वा तु पितॄन् श्राद्धैः कर्म्म वैदिक-
मारभेत्॥"
इति शातातपवचने पितृकर्त्तृकाष्टकाश्राद्धा-
नन्तरमेव पुत्रेण विवाहः क्रियते। न तु पुत्रेण
श्राद्धान्तरं क्रियते॥*॥ अत्र पुरुषस्य पुनस्त्वन्ये
इत्यनेन पुत्रवत् शिष्यान्तस्य सपिण्डने सामान्य-
तोऽधिकारप्रतिपादनात् अभ्युदयं विनापि
पुरुषस्य सपिण्डनं प्रतीयते।
"सह पिण्डक्रियां कृत्वा कुर्य्यादभ्युदयं ततः।"
इति तु सपिण्डीकरणात् पूर्व्वमभ्युदयाभावार्थं
न त्वभ्युदयसत्त्व एव सपिण्डीकरणार्थमिति॥*॥
यत्तु।
"यानि पञ्चदशाद्यानि अपुत्रस्येतराणि च।
एकस्यैव तु दातव्यमपुत्रायाश्च योषितः॥"
इति छन्दोगपरिशिष्टीयं सपिण्डीकरणेतरपञ्च-
दशश्राद्धविधायकं तच्छिष्यपर्य्यन्ताभावे पुरुषस्य
बाध्यम्। इतराणि एकोद्दिष्टविधानेनैव यानि
मासानि प्रत्याब्दिकश्राद्धानि तान्येव दातव्यं
दातव्यानि इत्यर्थः। अपुत्रायाश्चेति चकारो-
ऽनुक्तसमुच्चायकः पतिरहिताया इति समु-
च्चिनोति।
"अपुत्रायां मृतायान्तु पतिः कुर्य्यात् सपिण्ड-
नम्।

मैत्रेयीभिरवदनेन्द्रस्यावश्यकत्वात्। अत च्छन्दोग-परिशिष्टे अनुमाया: अष्टकामायविधानात्। पिण्डीकरणं तासां पुत्राभावे न विद्यते।" मार्कण्डेयपुराणाच्च बालकपुत्रस्य सपि-ण्डीकरणं अन्येनापि कर्त्तव्यमिति प्रतीयते। प्रति: कुर्य्यादित्यत्राति पतिपत्नीमात्रं विव-तम्। तेन ऊढ़्या दुहिता सपिण्डनं र्त्तव्यम्। अत।

"ब्राह्मणिकरवदीतालिका येन पुत्रिणी भवेत् ... सम्प्राप्तेन पुत्रेण प्राह पुत्रवतीमितिः॥" न मनुवचने कन्यकीपुत्रस्य पुत्रत्वातिदेशात् पुत्रत्वेऽपि स्त्रीणां सपिण्डनं मैथिलैरुक्तम्। तु। मागृहन्तृहारीतवचने पुत्रेणैवैत्येव-र्णानिर्दिष्टपुत्रनिर्देशात्। अतएव तदुक्त-मिदं श्राद्धपुत्रोपादानं सङ्गच्छते। अन्यथा दत्तुकस्त्वे।

"देवरजाता दत्तकी मातरश्च सहोदरा:। ... श्यापि मृते जाते सर्व्वे ते पुत्रिणी मता:॥" न बृहस्पतिवचनेन पुत्रत्वातिदेशात् भ्रातृ-नस्य पितृव्यश्राद्धाधिकारे प्राप्ते भ्रातृपुत्री-पादानं व्यर्थं स्यात्। पुत्रातिदेशकस्तु तत्कर्त्तृ-सापिण्ड्यकरणं पुत्राद्यभावेऽप्यस्ति॥ लघु-हारीत:।

"सपिण्डीकरणान्तानि यानि श्राद्धानि षोड़श। पृथङ्नैव सुता: कुर्युः पृथग्द्रव्या अपि क्वचित्। ... संस्कारकर्म्माणि यानि श्राद्धानि षोड़श। ... एकादशाहान्तु कार्य्याणि सान्दया मुच्यते तत:॥" पृथग्द्रव्या अपि विभक्तधना अपि पृथक् न कुर्यु: इत्यादि पृथग्दना: पृथक् न कुर्यु: किन्त्व-कृत् कुर्यु:। अत विशेषयति मरीचि:।

"वत्सरे पितरि पुत्रेण क्रिया कार्य्या विधानत:। ... पुत्रा: पितुरेव वासिन:॥ यान्तु मतं कृत्वा श्रेष्ठेनैव तु यत् कृतम्। ... एव वासिनस्तेन सर्व्वैरेव कृतं भवेत्॥" वैदिकविधानात् सर्व्वेषामधिकारे प्राप्ते ज्येष्ठस्य ...ात् कर्त्तव्यताया वचनमिति। ज्येष्ठ नापि ... सर्व्वेषां भ्रातृणां मत्सरेणैव करणं भवतु इति ... प्राप्ते कृत्वाविभक्तेन द्रव्यसंवर्षेण च ... कर्म सर्व्वैरेव कृतकं भवेत्। तदानीं ... आदेषे च तस्मात् द्रव्यं प्रागस्त्यमिति कृत्वा ... यदि ... तत परिच्छन्ने तदा स ... भवति प्रत्यवायी च भवति। न तु दैव ... कर्त्तव्यमिति श्राद्धविवेकोक्तं युक्तम्। ... सुता: कुर्युरित्येन पृथक्करणस्य ... लेनानधिकारात्। यदाकार्य्यमिति ... कार्य्याणीत्यादिवचनादसमासपूर्तेषष्ठाह-... न च विधानमाम् ... ादिव ... निर्दिष्टमिति वाच्यम् ... द्वादशाहादेवया माषाद्यहीय-त्वात्॥ ०॥ अत।

... कृत्वा पुत्रपौत्राणां पुंसाञ्च सायुषः ... यात्।

... यस्मिन्नेव शरीरस्य द्वादशाहः प्रपद्यते॥" इति व्याघ्रवचनोत्तरार्धस्य द्वादशेन कुलाचार-... स्त्रीति शास्त्रादिष्टालम्बदितिनयरोपादिपद्वा-टिके ऋत्वेषादिगमनानुसारादेव सपिण्डीकर-णापकर्षे द्वादशाहादिषया प्रागुक्तस्वस्मामादि-गौणकालपरिग्रह:। अथवा यदाकानमिला-देर्यदृष्टी वृद्धिरापद्येत इत्यनेनाभ्युदयिकनाम-करणादिवृद्धकर्मोपायकर्षो न तदानन्दव इष्टा-पूर्त्तादर्थापकर्ष: कार्य्य इति तात्पर्य्यम्। अतएव लघुहारीतेन। तत्रैव काम्यं यत् कर्म्म वत्सरात् प्रथमाहे इत्यनेन काम्यस्यापकर्षनिमित्तता नाम्नोल्लुप्तम्। यदि त्वाभ्युदयिकवृद्धिनिमित्तेनाप-कर्ष: कृतस्तदा इष्टापूर्त्तादिकाम्यं वत्सराभ्य-न्तरेऽपि कर्त्तव्यमिति। श्राद्धविवेकोऽप्येवम्। यद्यपि गोभिलसूत्रादौ सपिण्डीकरणस्यैवाप-कर्ष: प्रागुक्तस्तथापि सपिण्डीकरणापकर्षे तत्-पूर्व्वकर्त्तव्यश्राद्धानामपि तदादितदन्तन्यायात्-पकर्ष:।

"सपिण्डीकरणान्ता तु ज्ञेया प्रेतक्रिया बुधै:।" इति शातातपवचने प्रेतक्रियाया: सपिण्डीकर-णान्तत्वं प्रतीयते॥०॥ अत वृद्धिनिमित्तं विना सपिण्डनापकर्षे कृते पूर्व्वसंवत्सरकालं प्राप्य प्रेतत्वपरिहारमाह विष्णुधर्म्मोत्तरम्।

"कृते सपिण्डीकरणे नर: संवत्सरात् परम्। प्रेतदेहं परित्यज्य भोगदेहं प्रपद्यते॥" वृद्धिनिमित्तकसपिण्डीकरणापकर्षे कृते तत्-क्षणादेव प्रेतत्वपरिहार:। तदर्थं शातातपवचन ... परीहार:। तत्कालस्य पू... त्वात्।

"अर्व्वाक् संवत्सराद्वृद्धौ पूर्णे संवत्सरेऽपि ये सपिण्डीकृता: प्रेता न तेषान्तु ...॥" इति शातातपवचनात्। इति श्राद्धतत्त्वम्।

सपीतक:, पुं, राजकोषातकी। इति ... निर्घण्ट:॥

सपीति:, स्त्री, (पा पाने + क्तिन्। ... गीति।" ६। ४। ६६। इति ईत्वम्। ... पीति: पानम्। ...) ... पानम् २। इत्यमरः ... शब्दरत्नावली॥ (... याम्। १८। ८।

"सखिष्व मे सपीतिव यहे न कन्दताम्॥")

सपीतिका, स्त्री, हस्तिघोषा। ...

सप्त, [न्] त्रि, (सप् ... इत्युणादि:। १। १५६।) इति माधा। ... यथा। पातालम् १ भुवनम् ... द्वीपा: ५ वार: ६ ... ७ व्रीहि: १० ... इति कविकल्पलता॥ ...

"सत सप्त विलिखेत् मेषादिक-त्रिषड्गुरुमथ कृत्तिकादिकम्। मेषपूर्व्वमिनिजिता समन्वितं चैकरेखगतयोग विद्यते॥" इति ज्योतिस्तत्त्वे ...॥

अपि च।

"क्रमात् धरायां ग्रहानामारोहयावरोहम् ... मूर्च्छनेत्युच्यते ग्रामद्वये ता: सप्त सप्त च॥" इति संगीतदर्पणम्॥

सप्तक:, त्रि, (सप्तन् + कन्।) सप्तानां पूरक:। यथा,—

"षोटके सप्तके मेषतुले युग्मद्वयौ तथा। सिंहघटौ सदा वर्ज्यौ मूर्त्तिं तवाब्रवीश्वर॥" इति ज्योतिस्तत्त्वम्॥

सप्तसंख्याविशिष्ट:। यथा,—

"यस्य जायु दरिद्रा च चक्राह शाखिरेव। दोषि देवो च विष्णुर्यो यथादि सप्तको स्मृत:॥" इति मुग्धबोधटीकायां दुर्गादास:॥

सप्तसंख्या। सप्त एव सप्तक: स्वार्थे कन्। सप्तकी, स्त्री, (सप्तभि: स्वरैरिव कायति शब्दं इति। कै + क:। गौरादित्वात् ङीष्।) काञ्ची। इत्यमर:॥

सप्तगोदावरं, क्ली, सप्तानां गोदावरीणां हार:। इति मुग्धबोधव्याकरणम्॥ (यथा, महाभारते। ३। ८५। ४४।

"सप्तगोदावरे स्नात्वा नियतो नियताशन:। ...

लोकसारसुन्दरी । कर्म्मविशेषे तासां नामान्तराणि यथा । हिरण्या १ कनका २ रक्ता ३ कृष्णा ४ सुप्रभा ५ बहुरूपा ६ अतिरक्ता ७ एताः सात्त्विके यागकर्म्मणि । काम्यकर्म्मणि तु पद्मरागा १ सुवर्णा २ भद्रलोहिता ३ लोहिता ४ श्वेता ५ धूमिनी ६ करालिका ७ एता राजस्यः । क्रूरकर्म्मणि तु । विश्वमूर्त्तिः १ स्फुलिङ्गिनी २ धूम्रवर्णा ३ मनोजवा ४ लोहिता ५ कराला ६ काली ७ एतास्तामस्यः ।१०॥ एतासामधिष्ठातृदेवता यथा,—

"अमरपितृगन्धर्व्वयक्षनागपिशाचकाः ।
राक्षसः सात्त्विकानामेता अधिदेवताः ॥"

एतासां वर्णदिक्स्थिती यथा । गणेशविमर्षिण्याम् ।

"हिरण्या तप्तहेमाभा शून्यपार्श्वदिशि स्थिता ।
वैदूर्य्यवर्णा कनका प्राच्यां दिशि समाश्रिता ॥
तरुणादित्यसङ्काशा रक्ता शिखाग्निसंस्थिता ।
कृष्णा नीलाभ्रसङ्काशा नैर्ऋत्यां दिशि संस्थिता ।
सुप्रभा पद्मरागाभा वारुण्यां दिशि संस्थिता ।
अतिरक्ता जवाभासा वायव्यां दिशि संस्थिता ।
बहुरूपा यथा ख्याता दक्षिणोत्तरसंस्थिता ॥"

इति तन्त्रसारः ॥

सप्तज्वालः, पुं, (सप्त ज्वाला यस्य ।) वह्निः । इति हेमचन्द्रः ॥

सप्ततन्तुः, पुं, (सप्तभिर्भूरादिभिर्म्महाव्याहृतिभिरग्निजिह्वाभिर्व्वा तन्यते इति । तन विस्तारे + "सितनिगमीति ।" उणा० १।७० । इति तुन् । सप्त तन्तवः संस्था यस्येति वा ।) यज्ञः । इत्यमरः ॥ (यथा, माघे । १४ । ६ ।

"सप्ततन्तुमधिगन्तुमिच्छतः
कुर्व्वनुग्रहमनुज्ञया मम ।
मूलतामुपगते खलु त्वयि
प्रापि धर्म्ममयवृक्षता मया ॥")

सप्ततिः, स्त्री, (सप्त दशतः परिमाणमस्य । "पंक्तिविंशतित्रिंशदिति ।" ५।१।५९ । इति निपातनात् साधुः ।) सङ्ख्याविशेषः । सत्तोर इति भाषा । यथा,—

"नवतिर्य्योजनानाञ्च सहस्राणाञ्च सप्ततिः ।
यावद्घटिकमात्रेण तावच्चलति भास्करः ॥"

इत्यादित्यहृदयम् ॥

सप्ततितमः, त्रि, (सप्तति "तस्य पूरणे डट् ।" ५।२।४८ । इति डट् । "षष्ट्यादेश्चासंख्यादेः ।" ५ । २ । ५८ । इति डटस्तमडागमः ।) सप्ततेः पूरणः । सप्ततिशब्दात् पूरणार्थे मयट्प्रत्ययनिष्पन्नः । इति मुग्धबोधव्याकरणम् ॥

सप्तदश, [न्] त्रि, (सप्ताधिका दश । सङ्ख्याविशेषः । सतरो इति भाषा । तत्सङ्ख्याविशिष्टः । यथा । एष वै सप्तदश प्रजापतिर्यज्ञे यज्ञे अन्वायत्तः । इति मलमासतत्त्वम् ॥ बहुवचनान्तोऽयम् ॥

सप्तदशः, त्रि, (सप्तदशन् + "तस्य पूरणे डट् ।" ५।२।४८ । इति डट् ।) सप्तदशानां पूरणः । यथा,

"ततः सप्तदशे जातः सत्यवत्यां पराशरात् ।
चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोऽल्पमेधसः ॥"

इति श्रीभागवते १ स्कन्धे ३ अध्यायः ॥

सप्तदीधितिः, पुं, सप्त दीधितयो यस्य ।) वह्निः । इति त्रिकाण्डशेषः ॥

सप्तद्वीपपतिः, पुं, (सप्तानां द्वीपानां पतिः ।) सप्तद्वीपानामधिपतिः । यथा,—

"न भूम्यमादाद्भेद्यातः समार्थैर्ज्जातिभिर्युतः ।
सप्तद्वीपपतिर्जातः सूर्य्योगुणसमप्रभः ॥"

इति तिथ्यादितत्त्वधृतमत्स्यपुराणम् ॥

सप्तद्वीपा, स्त्री, (सप्त द्वीपा यस्याम् ।) पृथिवी । यथा,

"मनोः स्वायम्भुवस्यासन् दशपुत्रास्तु तत्समाः
यैरियं पृथिवी सर्व्वा सप्तद्वीपा सपत्तना ।
ससमुद्रा करवती प्रतिवर्षं निवेशिता ॥"

इति मार्कण्डेयपुराणम् ॥

तेषां नामादि द्वीपशब्दे द्रष्टव्यम् ॥

सप्तधा, व्य, (सप्तन् + धाच् ।) सप्तप्रकारम् । यथा,

"सप्तधारानुपीत्येव सप्तधा संयतेन्द्रियः ।
सप्तजन्मकृतात् पापात् मुच्यते नात्र संशयः ॥"

इति तिथ्यादितत्त्वम् ॥

सप्तधातवः, पुं, (सप्तगुणिता धातवः ।) शरीरस्थसप्तसंख्यकधातवः । तद्यथा,—

"रसासृङ्मांसमेदोऽस्थिमज्जानः शुक्रसंयुताः ।
शरीरस्थैर्यदा सम्यक् विज्ञेयाः सप्तधातवः ॥"

इति राजनिर्घण्टः ॥

सप्तनाडीचक्रं, क्ली, (सप्तनाडीनां चक्रम् ।) वृष्टिज्ञानार्थं चण्डचक्रादितसप्तनाडिकसर्पाकारचक्रम् । यथा । अथ सप्तनाडीचक्रम् ।

"अथातः संप्रवक्ष्यामि यथाक्तं सप्तनाडिकम् ।
येन विज्ञानमात्रेण वृष्टिं जानन्ति साधकाः ॥
कृत्तिकादीनि ऋक्षाणि साभिजिद्धि क्रमेण च ।
सप्तनाड्यश्चक्रस्तत्र कर्त्तव्यः पन्नगाकृतिः ॥
ताराचतुष्कवेधेन नाडिका प्रजायते ।
तासां नामान्यहं वक्ष्ये तथा चैव फलानि च ॥
कृत्तिका च ३ विशाखा च १६ मैत्राख्या १७ भरणी २ तथा ।
कहीया शनिनाडी स्याच्चण्डनाद्यभिधा मता ॥
रोहिणी ४ स्वाती १५ ज्येष्ठा १८गि१द्वितीया नाडिका मता ।
आदित्यप्रभवा नाडी वायुनाडी तथैव च ॥
सौम्यम् ५ चित्रा १४ तथा मूलम् १९ पौष्णधिष्ण्यं २७ चतुर्थकम् ।
तृतीयाङ्गारका नाडी दहनाख्या च सम्मता ॥
रौद्रम् ६ हस्तम् १३ तथा पूर्व्वाषाढा २० भाद्रपदोत्तरा २६ ।
चतुर्थी जीवना नाडी सौम्यनाडी प्रकीर्त्तिता
पुनर्व्वसु- ७ त्तरफल्गुन्यु- १२ त्तराषाढ-२१ तारकाः ।
पूर्व्वभाद्रा च २५ शुक्राख्या पञ्चमी नीरनाडिकाः ।
पुष्यर्क्षम् ८ फल्गुनी पूर्व्वा ११ अभिजित् ० शततारकाः २४ ।
षष्ठी नाडी च विज्ञेया बुधाख्या जलनाडिका ॥
अश्लेषर्क्षम् ९ मघा १० विष्णु २२ र्धनिष्ठाभं२३ तथैव च ।
अमृताख्याऽपि सा चान्द्री सप्तमी चन्द्रनाडिका
मध्यनाडीस्थिता सौम्या नाडी तस्याश्च पृष्ठतः ।
सौम्ययाम्यगतं ज्ञेयं नाडिकानां त्रिकं त्रिकम् ॥
क्रूरा याम्यगता ज्ञेया सौम्या सौम्यदिशि स्थिता
मध्यनाडी च मध्यमा मध्यरूपफलप्रदाः ॥
एकनाडीगता ह्याद्या ग्रहाः क्रूराः शुभा यदि
ततो नाडीफलं वाच्यं शुभं वा यदि वाशुभम् ॥
ग्रहाः कुर्य्युर्महावातं गताश्चण्डाख्यनाडिकाम् ।
वायुनाडीगता वायुं दहनायाभिदाहकाः ॥
सौम्यनाडीगता मध्या नीरस्था मेघवाहकाः ।
जलायां वृष्टिदश्चन्द्रश्चन्द्रनाडीगतास्तथा ॥
एकोऽपि तत् फलं दत्ते स्वनाडीसंस्थितो ग्रहः
भूयतः सर्व्वनाडीषु दत्ते नाडीसमं फलम् ॥
प्रावृट्काले तु संप्राप्ते रौद्रर्क्षगते रवौ ।
नाडीवेधसमायोगे जलयोगं वदाम्यहम् ॥
यत्र नाडीस्थितश्चन्द्रस्तत्र स्युः खेचरा यदि ।
क्रूराः सौम्या विमिश्राश्च तद्दिने वृष्टिकृत्तमा ॥
एकत्रक्षसमायोगो जायते यदि खेचरैः ।
तत्काले च महावृष्टिर्यावदस्तंगतौ शशी ॥
केवलैः सौम्यैः पापैर्व्वा ग्रहैर्व्विद्धो यदा शशी ।
तदा तु तुच्छपानीयं दुर्द्दिनञ्च भवेद्ध्रुवम् ॥
यस्य यस्य नाडीस्थश्चन्द्रमास्तद्ग्रहेण च ।
दृष्टो युक्तः करोत्यभ्रो यदि चौणो न जायते ॥
स्त्रियौ सितासितौ चैव सौरिसौम्यौ नपुंसकौ ।
पुरुषाः पुरुषैर्व्वायुः क्लीबौ तु बुधकारकौ ॥
स्त्रीपुरुषसमायोगे वृष्टिस्तु प्रबला भवेत् ॥
पीयूषनाडीगश्चन्द्रस्तत्र खेटाः शुभाशुभाः ॥
द्वियतुःपञ्च पानीयं दिनान्येकत्रिसप्तकम् ।
एवं जलाख्यनाडीस्थे चन्द्रमिश्रग्रहान्विते ॥
दिनार्द्धं दिवसं पञ्च दिनानि जायते जलम् ।
नीरनाडीस्थिते चन्द्रे चरस्थैः पूर्व्ववद्ग्रहैः ॥
यामं दिनार्द्धकं त्रीणि दिनानि जायते जलम् ।
अमृतादि त्रिनाडीषु यदि स्युः सर्व्वखेचराः ॥
तत्र वृष्टिः क्रमाज्ज्ञेया छत्यर्करसवासरान् ।
सौम्यनाडीगताः सर्व्वे वृष्टिदास्ते दिनत्रयम् ॥
शेषानाद्यां महाराज दुष्टवृष्टिप्रदा ग्रहाः ।
निर्ज्जला जलदा नाडी भवेद्योगो शुभाधिकः ॥
क्रूराधिकसमायोगे जलदायापि निर्ज्जला ।
याम्यनाडीगताः क्रूरा अनावृष्टिप्रसूचकाः ॥
शुभयुक्ता जलागस्थायातिवृष्टिः शुभा ग्रहाः ।
एकनाडीसमायुक्तौ चन्द्रमोधरणीसुतौ ॥
यदि तत्र भवेज्जीवस्तदा वारिमयी मही ।
बुधशुक्रौ यदैकत्र गुरुणा च समन्वितौ ॥
चन्द्रयोगे तदा काले जायते वृष्टिरुत्तमा ।
जलयोगगतौ स्यातां यदा चन्द्रसितौ ग्रहौ ॥
क्रूरदृष्टौ युतौ वापि तदा मेघोऽल्पवृष्टिदः ।
उदयास्तगतौ मार्गे वक्रयुक्ते च संक्रमौ ॥
जलनाडीगतास्ते तु महावृष्टिप्रदा ग्रहाः
इति नरोदये सप्तना

तत्स्वरूपं यथा ।



सप्तनामा, स्त्री, (सप्त नामानि यस्याः । "डाबुभाभ्यामन्यतरस्याम् ।" ४ । १ । १३ । इति डाप् ।) आदित्यभक्ता । इति राजनिर्घण्टः ॥

सप्तपत्रः, पुं, (सप्त सप्त पत्राणि यस्य ।) सुद्गरवृक्षः । इति राजनिर्घण्टः ॥

सप्तपदी, स्त्री, सप्तानां पदानां समाहारः । ("द्विगोः ।" ४ । १ । २१ । इति ङीप् ।) इति व्याकरणम् ॥ विवाहाङ्गसप्तपदीगमनं यथा । ततो जामाता प्रागुदीच्यां गत्वा वधूं सप्तभिर्मन्त्रैः सप्तमण्डलिकासु सप्तपदानि नयेत् । वध्वश्च दक्षिणपादं नीत्वा पश्चाद्वामपादं मण्डलिकां नयेत् जामाता च वधूं ब्रूयात् । वामेन पादेन दक्षिणं पादमाक्रमयेति । सप्तानां मन्त्राणामृष्यादयः साधारणाः । प्रजापतिऋषिरेकपाद्विराट् छन्दो विष्णुर्देवता पादाक्रमणे विनियोगः । ॐ एकमिषे विष्णुस्त्वा नयतु । द्वे ऊर्ज्जे विष्णुस्त्वा नयतु । त्रीणि व्रताय विष्णुस्त्वा नयतु । चत्वारि मायो भवाय विष्णुस्त्वा नयतु । पञ्चपशुभ्यो विष्णुस्त्वा नयतु । षड्रायस्पोषाय विष्णुस्त्वा नयतु । सप्तसप्तभ्यो होत्राभ्यो विष्णुस्त्वा नयतु ॥ ततः सप्तमं पदं गतां वधूं पतिराभाषते । प्रजापतिऋषिर्विष्णुमकीर्पङ्क्तिश्छन्दः कन्या देवता पादाक्रमणानन्तरमाभाषणे विनियोगः । सखा सप्तपदी भव सख्यन्ते गमेयं सख्यन्ते मा योषाः सख्यन्ते मायोष्ठाः । इति सप्तपदीगमनम् । इति भवदेवभट्टः ॥

सप्तपर्णं, क्ली, (सप्तानां द्राक्षादीनां पर्णमिव यत्र ।) मिष्टान्नविशेषः । यथा,—

"द्राक्षादाडिमखर्ज्जूरस्रजितान्नं सशर्करम् ।
लाजचूर्णं समध्वाज्यं सप्तपर्णमुदाहृतम् ॥"

इति शब्दचन्द्रिका ॥

सप्तपर्णः, पुं, (सप्त सप्त पर्णानि यस्य ।) वृक्षविशेषः । छातिम् इति भाषा ॥ (यथा, रघुः । ४ । २३ ।

"प्रसवैः सप्तपर्णानां मदगन्धिभिराहताः ।
असूययेव तन्नागाः सप्तधैव प्रसुस्रुवुः ॥")

तत्पर्य्यायः । विशालत्वक् २ शारदी ३ विषमच्छदः ४ । इत्यमरः ॥ शारदः ५ देववृक्षः ६ दामगन्धिः ७ शिरोरुजा ८ बहुनामा ९ शुक्तिपर्णः १० स्थायी ११ बहुनामनः १२ । इति शब्दरत्नावली ॥ गुच्छपुष्पः १३ गन्धिपर्णः १४ सुपर्णकः १५ । इति जटाधरः ॥ इक्षुत्वक् १६ इति रत्नमाला ॥ अस्य गुणाः ।

"सप्तपर्णो व्रणश्लेष्मवातकुष्ठास्रजन्तुजित् ।
दीपनः श्वासगुल्मघ्नः स्निग्धोष्णस्तुवरः स्मृतः ॥"

अन्यत् सप्तच्छदशब्दे द्रष्टव्यम् ॥

सप्तपर्णी, स्त्री, (सप्त सप्त पर्णान्यस्याः । ङीप् ।) लज्जालुलता । इति रत्नमालाराजनिर्घण्टौ ॥

सप्तपातालं, क्ली, (सप्तानां पातालानां समाहारः ।) सप्तसंख्यकाधोभुवनम् । यथा,—

"आदित्यरश्मितो देवो वद्ररूपो जनार्द्दनः ।
निःसृत्य प्रथमं यातः पातालतलमन्ततः ॥
सप्तपातालसंस्थांस्तु नागगन्धर्व्वराक्षसान् ।
देवान्तपीड येषांश्च जघान वरमूलष्टक् ॥"

इति कालिकापुराणे २४ अध्यायः ॥

तन्नामानि यथाह भरतः ।

"अतलं वितलञ्चैव नितलञ्च गभस्तिमत् ।
महाख्यं सुतलञ्चाग्र्यं पातालं सप्तमं विदुः ॥"

सप्तपुत्त्रसूः, स्त्री (सप्त पुत्त्रान् सूते इति । सू + क्विप् ।) सप्तपुत्त्रप्रसूता । तत्पर्य्यायः । सुतवस्करा २ । इति त्रिकाण्डशेषः ॥

सप्तभद्रः, पुं, (सप्तसु स्थानेषु भद्रमस्य ।) शिरीषवृक्षः । इति शब्दचन्द्रिका ॥

सप्तमः, त्रि, (सप्तन् + "तस्य पूरणे डट् ।" ५ । २ । ४८ । इति डट् । "नान्तादसंख्यादेर्मट् ।" ५ । २ । ४९ । इति डटो मडागमः ।) सप्तानां पूरणः । सातइ इत्यादि भाषा । यथा,—

"लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः
पिण्डदः सप्तमस्तेषां सापिण्ड्यं साप्तपौरुषम् ॥"

इति शुद्धितत्त्वम् ॥

सप्तमी, स्त्री, (सप्तन् + टित्त्वात् ङीप् ।) तिथिविशेषः । चन्द्रस्य सप्तमकलाक्रिया । तत्र शुक्लपक्षे अमृतपूर्त्तावच्छिन्नसप्तमकलाक्रिया । कृष्णपक्षे तु अमृतक्षयानुकूलसप्तमकलाक्रियेति विशेषः । पञ्जिकायां तस्या अङ्कः शुक्लपक्षे ७ कृष्णपक्षे २२ ॥ * ॥ तत्र जातफलम् ।

"कन्याप्रजो वैरिकुलेभसिंहो
विशालनेत्रः प्रथितप्रभावः ।
देवद्विजार्च्चारसिको महात्मा
स्यात् सप्तमीजः पितृवित्तहर्त्ता ॥"

इति कोष्ठीप्रदीपः ॥ * ॥

अथ सप्तमी । सा च षष्ठीयुता ग्राह्या दुर्गोत्सवेतरत्र । यथा,—

"पञ्चमी सप्तमी चैव दशमी च त्रयोदशी ।
प्रतिपन्नवमी चैव कर्त्तव्या सम्मुखी तिथिः ॥"

सम्मुख्यमुक्तं स्कान्दे ।

"सम्मुखी नाम सायाह्नव्यापिनी दृश्यते यतः ।
अतएव परदिने त्रिमुहूर्त्तात्मिकाप्यमावास्या...
युग्मशास्त्राणामुपवासमात्र भविष्यपुराणम् ।
"षष्ठीसमेता कर्त्तव्या सप्तमी नाष्टमीयुता ।
पतङ्गोपासनायेह षष्ठ्यामाहुरुपोषणम् ।
यथा उपोषणे तथा कर्म्मान्तरे । तथा ।
"षष्ठ्या युक्ता सप्तमी च कर्त्तव्या
षष्ठी च सप्तमी यत्र तत्र संनिहितो हरिः ।"

इति स्कान्दपुराणात् ॥ तथा ।

"शुक्लपक्षस्य सप्तम्यां सूर्य्यवारो यदा भवेत् ।
सप्तमी विजया नाम तत्र दत्तं महाफलम् ।"

भविष्ये ।

"शालितण्डुलप्रस्थस्य कुर्य्यादन्नं सुसंस्कृतम् ।
सूर्य्याय चरुकं दत्त्वा सप्तम्याञ्च विशेषतः ।
यावन्तस्तण्डुलास्तस्मिन् तैर्यैः परिसङ्ख्यया ।
तावद्वर्षसहस्राणि सूर्य्यलोके महीयते ।"

गोपथब्राह्मणम् ।

"द्वात्रिंशत्पलिकं प्रस्थमुक्तं स्वयम्भुवा ।"

ज्योतिषे ।

"पलम्तु लौकिकैर्म्मानैः साष्टरक्तिद्विमाषकः ।
तोलकत्रितयं प्रोक्तं ज्योतिर्विद्भिः...

शततोलकमितः प्रस्थतण्डुलाः । इति ।
स्वैतच्च नाधिकयोः फलतारतम्यबोधनम् ।
देवतान्तरेऽपि तत्तल्लोकमहितत्वफलेन इत्यपि युक्तम् । अतएव शिवेऽप्येवं वक्ष्यते ॥"

वराहपुराणे ।

"अथापरं महाराज व्रतमारोग्यसंज्ञितम् ।
कथयामि परं पुण्यं सर्व्वपापप्रणाशनम् ।
तथैव माघमासस्य सप्तम्यां समुपोषितः ।
पूजयेद्भास्करं देवं विष्णुरूपं सनातनम् ।
आदित्य भास्कर रवे भानो सूर्य्य दिवाकर ।
प्रभाकरेति सम्पूज्यो देवः सर्व्वेश्वरो हरिः ।
पश्चाच्च कृताहारः सप्तम्या समुपोषितः ।
अष्टम्याञ्च भुञ्जीत एष एव विधिः क्रमात् ।
अनेन वत्सरं पूर्णं विधिना योऽर्च्चयेद्रविम् ।

न्यारोग्य' धनं धान्यमिह जन्मनि जायते ॥
न्त्र च दत्तं स्थानं गत्वा न निवर्त्तते ।"
तदा सप्तमीयम् इति वादिकर्मणि न्न: ।
न सप्तम्यां सप्तपदानुसारव्याप्तिलयः । गताव
म, सप्तम्यासप्तप्रदक्षिणम् । इत्थिद विल्व-
पत्रवा पूजाकाले श्रेयः । अभिन्नार्थे तु
निरावित्वा प्रारभेत शिवकार्योद्यापन-
ान्तपारमीविषयशुभकामनाभवाम: संवत्सरं
ारदादीयमन्तमिति विशेषः । ततः सप्तमि-
ास्वानुपदार्थं कुर्व्वन् ।
आदित्य भास्कर रवे भानो सूर्य्य दिवाकर ।
भाकर नमस्तुभ्यं सप्ताटीनादिमोचय ॥"
ति मन्त्रं न पूजयेत् । अत्र षष्ठ्यादिषु तत्तत्-
र्मविधानात् षष्ठीसहितत्वम्प न विषयः ।
ालिकापुराणे भक्तं प्रति सूर्य्यवाक्यम् ।
'षष्ठ्या मां न सुज्ञीत विल्वं च नेव दर्शयेत्॥"
था ।
'मदर्घाद्युतनिर्माल्यं शरीरे न तु धारयेत् ॥"
र्मा प्रतिमा ॥ * ॥ अथ विधानसप्तमी ।
त्यचिन्तामणौ ।
'पर्काग्रं शुचि गोमयं सुमरिचं तोयं फलं चाम्बुजं
मूलं नक्तमुपोषणञ्च विधिवत् कालैकभक्तं नरः।
ईरं वायुसनं घृताशनमिति प्रोक्तान्यमूनि
क्रमात्
त्वा द्वादश सप्तमीर्दिनकृतः प्राप्नोत्यभीष्टं
फलम् ॥"
अत्र धार्काग्रादीतरभोजननिवृत्तिरवश्यीयते ।
तपस्त्वात् । तथा च मत्स्यपुराणम् ।
"तपोभिः प्राप्यतेऽभीष्टं नासाध्यं हि तपस्यतः ।
दुर्भगत्वं वृथा लोको वहते सति साधने ॥"
तपस: क्लेशस्वभावत्वं तत्रैवोक्तम् ।
"उमेऽतिचपला बुद्धि न क्षमं तापकं वपुः ।
सोढुं क्लेशस्वभावस्य तपसः सौम्यदर्शने ॥"
व्यक्तमुक्तं यथा,—
"अर्कपत्राङ्कुरमात्रमन्तरीक्षगृहीतकम् ।
कपिलाविड्यवमात्रं सचूर्णं मरिचं जलम् ॥
कदलीफलमध्यन्तु कणामात्रमपक्वकम् ।
कुशमूलं यवमात्रं स्वच्छायाद्विगुणे क्षणे ॥
भक्ष्यं सितोदनं नक्तं गृहोपवसनं तथा ।
एकभक्तं मयूराण्डप्रमाणं भोजनं मतम् ॥
अर्द्धप्रसृतिमात्रन्तु कपिलादुग्धभक्षणम् ।
स्नात्वा सम्पूज्य मार्त्तण्डं प्राङ्मुखो वायुमा-
शयेत् ॥
घृतं स्वल्पं पौषमासे माघादर्द्धं समाचरेत् ।
ब्राह्मणान् भोजयेद्भक्त्या गुड़क्षीरनिरामिषैः ॥
विप्राय दक्षिणा देया विभवस्यानुरूपतः ।
अष्टम्यां पारणं कुर्य्यात् कटुक्षाररहितेन च ॥
मुद्गमाषतिलादीनि घृतञ्चैव विवर्ज्जयेत् ।
एकसिद्धं भक्ष्यमुक्तमर्कतन्त्रानुसारतः ॥"*॥
एतद्व्रतस्य माघादिमासविशेषविहितकर्मत्वेन
मलमासेतरकर्त्तव्यत्वं आह वशिष्ठलिङ्गपुरा-
णम् ।

"प्रारब्धे तु व्रते यस्मात् मध्ये स्यादधिमासकः ।
पूर्णमानेन तं स्नात्वा कार्य्यं द्वादशमासिकम् ॥"
पूर्णमानेन मलिम्लुचशून्यात्मकमानेन । तं मल-
मासम् । द्वादशमासिकं द्वादशमासैरेव कार्य्यं
न मलमास इत्यर्थः । अत्र ।
"मासि मलिम्लुचेऽप्येवं यजेद्देवीं महाद्भुताम् ।
किन्तु नोद्यापनं कार्य्यमित्याह भगवान्
शिवः ॥"
इति विष्णुरहस्यवचनम् ॥
तन्मासविशेषानह्निकमासवत्कत्वामयाथ्या-
दिव्रतकर्त्तव्यतापरम् । उद्यापनं प्रतिष्ठा ।
उपक्रमोऽपि निषिद्धः । गार्ग्यः ।
"अस्तं गते गुरौ शुक्रे बाले वृद्धे मलिम्लुचे ।
उद्यापनमुपारम्भं व्रतानां नैव कारयेत् ॥"
उद्यापनं प्रतिष्ठा । उपारम्भमारम्भम् । एतच्च
कालाशुद्धिमात्रपरं तत्तन्मात्रविधिकल्पने गौर-
वात् ॥*॥ भविष्ये ।
"भाद्रे मासि सिते पक्षे सप्तम्यां नियमेन या ।
स्नात्वा शिवं लेपयित्वा सगन्धेन महाम्बिकाम् ।
पूजयेच्च तदा तस्या दुष्प्रापं नैव विद्यते ॥"
इदं कुक्कुटीव्रतत्वेन ख्यातम् ॥*॥ भविष्ये ।
"सूर्य्यग्रहणतुल्या हि शुक्ला माघस्य सप्तमी ।
अरुणोदयवेलायां तस्यां स्नानं महाफलम् ॥
माघे मासि सिते पक्षे सप्तमी कोटिभास्करा ।
दद्यात् स्नानार्घ्यदानाभ्यामायुरारोग्यसम्पदः ॥
अरुणोदयवेलायां शुक्ला माघस्य सप्तमी ।
गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समा ॥"
कोटिभास्करा कोटिसप्तमीतुल्या । सूर्य्यग्रहण-
फलं स्नानजं गङ्गादिति बुद्धिरस्तरङ्गेति न्यायात्
तेन बहुशतसूर्य्यग्रहणकालीनगङ्गास्नानजन्य-
फलसमफलप्राप्तिः फलमत्र श्रेयम् । अत्र बहु-
शतसूर्य्यग्रहाणां प्रत्येकाधिकरणतासम्बन्धेनान्व-
यात् कालानां स्नानानां तत्फलानामपि बहु-
शतत्वं लभ्यते अतो नाप्रसिद्धिः । पूर्णसप्तम्यां
पूर्व्वपर्य्यायेऽरुणोदयकाले सप्तमी पूर्व्वदिने
तत्काले स्नानम् ।
"चतस्रो घटिका प्रातररुणोदय उच्यते ।
यतीनां स्नानकालोऽयं गङ्गाम्भःसदृशः स्मृतः ॥
त्रियामां रजनीं प्राहुस्त्यक्त्वाद्यन्तचतुष्टयम् ।
नाड़ीनां तदुभे सन्ध्ये दिवसाद्यन्तसंज्ञिते ॥"
इति काललाधवीयधृतब्रह्मवैवर्त्तीयेन पूर्व्वस्य
तत्कालस्य पूर्व्वतिथिसम्बन्धिदिनकर्त्तव्यकर्म्माङ्ग
त्वेन इतरस्य चेतराङ्गत्वेनाभिधानात् अतएव
दक्षेण तत्कालमारभ्याह्निककृत्यमभिहितम् ।
अत्रारुणोदयकाले मुहूर्त्तान्यूनतिथिलाभ एव
स्नानम् ।
"व्रतोपवासस्नानादौ घटिकैका यदा भवेत् ।
उदये सा तिथिर्ग्राह्या श्राद्धादावस्तगामिनी ॥"
इति विष्णुधर्म्मोत्तरात् ।
अत्र घटिका मुहूर्त्तं श्राद्धयोग्यकालानुरोधात्
इति वक्ष्यति । ब्रह्मवैवर्त्तवचने घटिका दण्ड-
रूपा परवचने नाड़ीनामाद्यन्तचतुष्टयमित्येक-

वाक्यत्वात् ॥ * ॥ यत्तु सूर्य्योदयात् प्रागपि
प्रातःस्नानविधानात् तत्रैव माघसप्तम्यामन्य-
गुणफलविधिर्नाघवादित्याहुस्तच्चिन्त्यम् । प्रक-
रणान्तरे प्रयोजनान्यत्वं इति जैमिनिसूत्रेण
प्रकरणभेदे गुणविध्यसिद्धेः । अतएव कल्पतरु-
रत्नाकरयोः ।
"य इच्छेद्विपुलान् भोगान् चन्द्रसूर्य्यग्रहोप-
मान् ।
प्रातःस्नायी भवेन्नित्यं द्वौ मासौ माघफाल्-
गुनौ ॥"
इति विष्णुस्मृतौ नित्यस्नानप्रकरणात् प्रकरणा-
न्तराम्नानात् प्रकरणान्तराधिकरणन्यायेन
काम्यस्नानान्तरमिदमित्युक्तं न तु गुणफल-
विधिः । किन्तु काम्यकरणे प्रसङ्गान्नित्यसिद्धि-
रिति । अत्र माघमासनिमित्तकमाघसप्तमी-
निमित्तककाम्यस्नानयोः प्रातर्व्विधानात् नैमि-
त्तिकत्वेन प्रायश्चित्तवत् सकृदनुष्ठानम् ।
"प्रधानस्याक्रिया यत्र साङ्गं तत् क्रियते पुनः ।
तदङ्गस्याक्रियायान्तु नावृत्तिर्न च तत्क्रिया ॥"
इति कात्यायनवचनात् ॥
"न स्नानमाचरेद्भुक्त्वा नातुरो न महानिशि ।
न वासोभिः सहाजस्रं नाविज्ञाते जलाशये ॥"
इति मनुवचनेनैकदाजस्रस्नाननिषेधाच्च ।
"धर्म्मविन्नाचरेत् स्नानमाह्निकञ्च पुनःपुनः ।"
इति मनुवचनाच्च ।
अतएव नान्दीमुखप्रकरणेऽपि प्रधानानामपि
काम्यानां तत्तद्देशकालविहितानां तन्त्रेणैव
सिद्धिरिति श्राद्धचिन्तामणिः । निष्कामविष्णु-
प्रीतिकामयोः सुतरां सकृदनुष्ठानं गुणतार-
तम्यात् फलतारतम्यं इति न्यायेन फलं
बोध्यम् । तत्तु इक्षुक्षीरगुड़ादिमाधुर्य्यभेदव-
न्निर्द्दिष्टुमशक्यम् ।
"पक्षान्तरेऽपि कन्यास्थे रवौ श्राद्धं प्रशस्यते ।
कन्यागते पञ्चमे तु विशेषेणैव कारयेत् ॥"
इति हेमाद्रिधृतादित्यपुराणोक्तवत् । एतद्व-
चनप्रागर्द्धं कार्त्तिकमलमासाद्यविषयम् ।
"देशकालाग्र्यसर्वद्रव्यदात्रमनोगुणाः ।
सुकृतस्यापि दानस्य फलातिशयहेतवः ॥"
इति ब्रह्मपुराणोक्तवच्च ।
तीर्थभेदे त्वेकदापि नानास्नानम् ।
"विषुवद्दिवसे प्राप्ते पञ्चतीर्थी विधानतः ।"
इति ब्रह्मपुराणादिवचनात् तीर्थभेदे तन्त्रप्रस-
ङ्गयोरसम्भवाच्च । अतएव गङ्गावाक्यावली-
श्राद्धचिन्तामण्योः । यत्तु प्रयागे वाहस्नान-
क्रोड़ीकृतेऽपि माघसप्तमीस्नानादावसाधारण-
सङ्कल्पेन पुनस्तथैव प्रातःस्नानाचरणं तद-
युक्तम् । तदा सकृत्स्नानस्यैव विहितत्वात्
अन्यथा तत्तद्दृष्टफलकामनायां तदानन्त्यापत्ते-
रित्युक्तम् ।*। स्नाने परिपाटीमाह कृत्य-
कल्पलतायां विष्णुः । सप्तबदरपत्राणि सप्तार्क-
पत्राणि च शिरसि निधाय ।
"यद्यज्जन्मकृतं पापं मया सप्तसु जन्मसु ।

तन्मे रोकञ्च शोकञ्च माकरी हन्तु सप्तमी ॥"
इत्यसार्थे स्नायादिति शेषः । रोकं छिद्रम् ।
तिथिकृत्यस्य पौर्णमास्यन्तमासाङ्गत्वान्माक-
रीति पदं मकरार्कारब्धचान्द्रमासीयतिथिपरम्
"तिथिकृत्ये च कृष्णादिं मतं शुक्लादिमेव च ।
विवाहादौ च सौरादिं मासं कृत्ये विनिर्द्दि-
शेत् ॥"

इति ब्रह्मपुराणात् ॥

मन्वन्तरादित्वेन तथा शुक्लत्वाच्च । यथा,मत्स्य-
पुराणे ।
"यस्मान्मन्वन्तरादौ तु रथमापुर्द्दिवाकराः ।
माघमासस्य सप्तम्यां तस्मात् सा रथसप्तमी ।
अरुणोदयवेलायां तस्यां स्नानं महाफलम् ॥"
अतएव मार्त्तण्डे रथाख्यायामित्युक्तम् । यथा,
"महानवम्यां द्वादश्यां भरण्यामपि चैव हि ।
तथाक्षयतृतीयायां शिष्यान्नाध्यापयेद्बुधः ।
माघमासे तु सप्तम्यां रथाख्यायान्तु वर्जयेत् ॥"
द्वादश्यां शयनोत्थानद्वादश्याम् । भरण्यां शक्र-
ध्वजपातभरण्याम् । इति कल्पतरुः । अत्र
महानवम्यादिसाहचर्य्याद्गौणचान्द्रत्वं प्रती-
यते । अतएव चतुर्द्दशमन्वन्तरादिगणने क्वापि
न रथयुक्तेखः । यथा, भविष्यमात्स्ययोः ।
"अश्वयुक्शुक्लनवमी द्वादशी कार्त्तिकी तथा ।
तृतीया चैत्रमासस्य तथा भाद्रपदस्य च ॥
फाल्गुनस्याप्यमावास्या पौषस्यैकादशी तथा ।
आषाढस्यापि दशमी तथा माघस्य सप्तमी ॥
श्रावणस्याष्टमी कृष्णा तथाषाढस्य पूर्णिमा ।
कार्त्तिकी फाल्गुनी चैत्री ज्यैष्ठी पञ्चदशी
सिता ।
मन्वन्तरादयस्त्वेता दत्तस्याक्षयकारिकाः ॥"
अत्रामावास्याष्टमीव्यतिरिक्ताः शुक्लाः । पुनः
पुनस्तथापदोपादानात् उपक्रमोपसंहारयोः
शुक्लत्वकीर्त्तनाच्च । अत्र कामधेनौ तृतीया
चैव माघस्येति । कल्पतरौ तु तृतीया चैत्र-
मासस्येति लिखितम् । अत्र पाठद्वैधे श्रीपति-
रत्नमालायाम् । अश्वयुजि शुक्लनवमी द्वाद-
श्यूर्ज्जे मधौ तृतीया चेति पाठाच्चैत्रतृतीयैव
ग्राह्या । श्रीदत्तोऽप्येवम् । माघसप्तम्याश्चान्द्रत्वं
सौरागमेऽपि ।
"मकरस्थे सवदरेर्द्दृष्ट्वांघतसचन्दनैः ।
अष्टाङ्गविधिना चार्घ्यं दद्यादादित्यतुष्टये ॥
माघे च फाल्गुने वापि भवेद्दै माघसप्तमी ।
महतीति च यत् प्रोक्तं तत् प्रायोहत्तिदर्श-
नात् ॥"
अष्टाङ्गविधिना ।
"योऽष्टाङ्गमर्घ्यमापूर्य्य भानोर्मूर्द्धि निवेदयेत् ।
तामपात्राघ्यदानेन पुण्यं दशगुणं स्मृतम् ॥"
इति विष्णुपुराणोक्तेन । आदित्यपुराणे ।
"अष्टवामिविशेषेण यत् कर्म्म विहितं नरैः ।
दैवं वाप्यथवा पैत्रं तदन्यथापि दृश्यते ॥"
अर्घमन्त्रस्तु ।
"सप्तसप्तिवहप्रीत सप्तलोकप्रदीपन ।
सप्तम्या सहितो देव गृहाणार्घ्यं दिवाकर ॥"
ईत्यादि । मन्त्रार्थः ।
"सप्तमी सर्वभूतानां सप्तमी सप्तसप्तिके ।

सप्तव्याहृतिके देवि नमस्ते रविमण्डले ॥"
प्रणाममन्त्रस्तु ।
"सप्तसप्तिवह प्रीत सप्तलोकप्रदीपन ।
सप्तम्यां हि नमस्तुभ्यं नमोऽनन्ताय वेधसे ॥"
सप्तिरश्वः । इति तिथ्यादितत्त्वम् ॥ * ॥ सप्तमी-
व्रतविशेषा यथा,—

ब्रह्मोवाच ।

"भगवन् भवसंसारसागरोत्तारकारकम् ।
किञ्चिद्व्रतं समाचक्ष्व स्वर्गारोग्यसुखप्रदम् ॥

श्रीभगवानुवाच ।

सौरधर्म्मं प्रवक्ष्यामि नाम्ना कल्याणसप्तमीम् ।
विशोकसप्तमीं तद्वत् फलदां पापनाशिनीम् ॥
शर्करासप्तमीं पुण्यां तथा कमलसप्तमीम् ।
मन्दारसप्तमीं पुण्यां तथैव शुभसप्तमीम् ॥
सर्व्वाः सर्व्वफलाः प्रोक्ताः सर्व्वदेवर्षिपूजिताः ।
विधानमासां वक्ष्यामि यथावदनुपूर्व्वशः ॥
यदा तु शुक्लसप्तम्यामादित्यस्य दिनं भवेत् ।
सा तु कल्याणिनी नाम विजया तु निगद्यते ॥"
आसां इतिकर्त्तव्यताकालौ च मत्स्यपुराणे
६८ अध्यायावधि ७५ अध्यायपर्य्यन्तं द्रष्टव्यौ ॥ * ॥
सा सूर्य्यमूर्त्तिप्रकाशिका तिथिः । यथा,—
"एवमुक्तस्तदा देवैः सौम्यां मूर्त्तिमथाकरोत् ।
प्रकाशत्वं जगामाशु देवतानां महाप्रभः ॥
एतत् सर्व्वं सुराणान्तु दहनं शामितं पुरा ।
सप्तम्यां खलु सूर्य्येण मूर्त्तिश्च कृतवान् भुवि ॥"
इति वाराहे सूर्य्योत्पत्तिनामाध्यायः ॥

सप्तरक्तं, क्ली, (सप्तानां रक्तानां तद्वर्णानां समा-
हारः ।) शरीरस्य रक्तवर्णसप्तावयवाः । ते च
हस्तपादतलनेत्रान्तरतालुकाधरजिह्वानखाः ।
यथा, सामुद्रके ।
"पाणिपादतलौ रक्तौ नेत्रान्तरनखानि च ।
तालुकाधरजिह्वाश्च सप्तरक्तं प्रशस्यते ॥"

सप्तर्षयः,पुं,भूम्नि, (सप्त ऋषयः ।) सप्तसंख्यकर्षय-
स्तेषां नामानि यथा । मरीचिः १ अत्रिः २
अङ्गिराः ३ पुलस्त्यः ४ पुलहः ५ क्रतुः ६ वशिष्ठः ७ ।
इत्यमरः ॥ अपि च ।
"सप्तर्षिमण्डलं तस्माद्दृश्यते सर्व्वतोपरि ।
तत्र सप्तर्षयः सन्ति विनियुक्ताः प्रजासृजा ॥
मरीचिरत्रिः पुलहः पुलस्त्यः क्रतुरङ्गिराः ।
वशिष्ठश्च महाभाग ब्रह्मणो मानसाः सुताः ॥
सप्तब्रह्माण इत्येते उच्यन्ते ब्रह्मवादिभिः ।
संभूतिरनसूया च क्षमा प्रीतिश्च सन्नतिः ॥
अरुन्धतिस्तथा लज्जा सप्तैता लोकमातरः ।
एतासां तपसा चैतद्धार्य्यते भुवनत्रयम् ॥
सन्ध्यात्रयमुपासीना गायत्रीजपतत्पराः ।
तस्मिन्लोके वसन्त्येते ब्राह्मणा ब्रह्मवादिनः ॥"
इति पाद्मे स्वर्गखण्डे ११ अध्यायः ॥
(प्रतिमन्वन्तरे सप्तर्षयो भिन्ना एवासन् । तद्-
वृत्तान्तस्तु ऋषिशब्दे द्रष्टव्यः ॥)


सप्तला,स्त्री, (सप्त लातीति । ला+कः ।)नव-
मालिका । इत्यमरः ॥ चर्म्मकषा । गुञ्जा ।
पाटला । इति मेदिनी ॥

सप्तशती, स्त्री, सप्तानां शतानां समाहारः ।
व्याकरणम् ॥ ("द्विगोः ।" ४ । १ । २१ ।
ङीप् ।) सप्तशतिका ।
माहात्म्यम् । चण्डीति ख्यातम् । यथा,—
"अर्गलं कीलकञ्चादौ पठित्वा कवचं तथा ।
जपेत् सप्तशतीं चण्डीं क्रम एष ...

तथा च नागोजीभट्टः ।
"तत्राद्ये चरिताध्याये श्लोका अशीतिः ।
अथ मध्ये चरित्रे तु पञ्चाष्टकसुसंख्यकाः ।
त्रयोऽध्यायाश्चतुःसप्तचतुर्व्वेदत्रयोदशकाः ।
अथोत्तरचरित्रे तु षट्षडस्मिन्शोकस्तु ।
अस्मीसोमाध्यायवती गीता ...

सप्तशलाकः, पुं, (सप्त शलाकाः तद्रूपरेखा य-
विवाहस्य शुभाशुभदिनज्ञानार्थं ...
रेखाविशिष्टचक्रविशेषः । यथा,—
"कृत्तिकादिचतुःसप्तरेखारामो परिमत्
मध्ये देकरेखास्थो वेधः सप्तशलाकजः ।
सप्त सप्त विलिखेत् प्ररेखिका-
स्तिर्य्यगूर्द्ध्वमथ कृत्तिकादिकम् ।
लेखयेदभिजिता समन्वितं
चैकरेखगखगेन विध्यते ॥
वेधस्य चतुर्थे ...॥ ८ ॥
अभिजित् तस्ये खचरे विश्वे या रोहिणी ता
लिसिका दण्डः ।
"यस्याः शशी सप्तशलाकभिन्नः
पापैरपापैरथवा विवाहे ।
रक्ताम्बरेणैव तु रोदमाना
श्मशानभूमिं प्रमदा प्रयाति ॥"
इति सप्तशलाकवेधः । इति ज्योतिस्तत्त्वम् ।

तच्चक्ररूपं यथा ।



सप्तशिरा, स्त्री, (सप्त शिरा यस्याः ।) नागवल्ली ।
इति राजनिर्घण्टः ॥

सप्तसप्तिः, पुं, (सप्त सप्तयो घोटका यस्य ।)
सूर्य्यः । इति हेमचन्द्रः ॥ (यथा, रघु । ११ ।
"इविर्भुजामेधवतां चतुर्णां,
मध्ये ललाटन्तपसप्तसप्तिः ।
असौ तपस्यत्यपरस्तपस्वी
नाम्ना सुतीक्ष्णश्चरितेन दान्तः ॥")

V. 9—10.

शब्दकल्पद्रुमः।

अर्थात्

एतद्देशीयसमस्तकोषाशेषशास्त्रसङ्कलिताकारादिवर्णक्रमविन्यस्तशब्द-तल्लिङ्ग-नानार्थ-पर्य्याय-प्रमाण-प्रयोग-धातु-तदनुबन्धाभिधेय-सहित-तत्तच्छब्दप्रसङ्गोत्थित-वेद-वेदाङ्ग-वेदान्त-न्याय-पुराणेतिहास-सङ्गीत-शिल्प-सूपकारशास्त्र-ज्योतिष-तत्त्वाख्यान-काव्यालङ्कार-छन्दःप्रभृति-नाम-लक्षणोदाहरण-द्रव्यगुण-रोगनिदानौषध-स्वत्युक्तव्यवस्थादिसंयुक्त-सर्व्वदर्शनमतानुसारि-संस्कृताभिधानग्रन्थः।

स्यार-राजा-राधाकान्तदेव-बाहादुरेण

विरचितः।

पाणिनिमतानुसारि प्रत्येकशब्दव्युत्पत्ति-मूलग्रन्थातिरिक्तबहुलशब्दार्थ-प्रमाण-प्रयोग-पर्य्याय-धातुपदोदाहरणादिभिः नूतनसङ्कलितबहुलशब्द-तदर्थ-तत्प्रमाण-प्रयोगादिसहित-सम्पूर्णपरिशिष्टेन च सार्द्धम्

श्रीवरदाप्रसादवसुना तदनुजेन श्रीहरिचरणवसुना च

स्वदेशशास्त्रविशारदकोविदवृन्दसाहाय्येन संपरिवर्द्धितः। नागराक्षरैः प्रकाशितश्च।

पञ्चमः काण्डः।

नवम-दशम-खण्डौ।

कलिकाता-राजधान्यां

स्वीये मुद्रितः। ७१ नं पाथुरियाघाट-ष्ट्रीट-स्थितभवनात् प्रकाशितश्च। शकाब्दाः

PRINTED BY PRESS; AND CONSIDERABLY IMPROVED, CAREFULLY REVISED AND PUBLISHED BY BARADA PRASAD BASU, AND HARI CHARAN BASU. 71, PATHURIAGHATA STREET. CALCUTTA:

To be had at the Sabdakalpadruma Office, No. 71 Pathuriaghata Street, Calcutta: and at the Baptist Mission Press. No. 24 Lower Circular Road Calcutta: Price for Subscribers in India, Re. 1. and Countries out of India 2s. for each number.

सप्तसागरः, पुं, (सप्त सागरा इव कुण्डानि यत्र ।) महादानविशेषः । यथा,—

मत्स्य उवाच ।

"अथातः संप्रवक्ष्यामि महादानमनुत्तमम् ।
सप्तसागरकं नाम सर्व्वपापविनाशनम् ॥
पुण्यं दिनमथासाद्य कृत्वा ब्राह्मणवाचनम् ।
तुलापुरुषवत् कुर्य्यात् लोकेशावाहनं बुधः ॥
ऋत्विङ्मण्डपसंभार भूषणाच्छादकादिकम् ।
कारयेत् सप्त कुण्डानि कनकानि विचक्षणः ॥
प्रादेशमात्राणि तथारत्निमात्राणि वा पुनः ।
कुर्य्यात् सप्तपलादूर्द्धमासहस्राच्च शक्तितः ॥
संस्थाप्यानि च सर्व्वाणि कृष्णाजिनतिलोपरि ।
प्रथमं पूरयेत् कुण्डं लवणेन विचक्षणः ॥
द्वितीयं पयसा तद्वत् तृतीयं सर्पिषा पुनः ।
चतुर्थन्तु गुड़ेनैव दध्ना पञ्चममेव च ॥
षष्ठं शर्करया तद्वत् सप्तमं तीर्थवारिणा ।
स्थापयेल्लवणस्यान्तु ब्रह्माणं काञ्चनं शुभम् ॥
केशवं क्षीरमध्ये तु घृतमध्ये महेश्वरम् ।
भास्करं गुड़मध्ये तु दधिमध्ये सुराधिपम् ॥
शर्करायां न्यसेत् लक्ष्मीं जलमध्ये तु पार्व्वतीम् ।
सर्व्वेषु सर्व्वरत्नानि धान्यानि च समन्ततः ॥
तुलापुरुषवत् शेषमत्रापि परिकल्पयेत् ।
ततो वारुणहोमान्ते स्नापितो वेदपुङ्गवैः ।
त्रिः प्रदक्षिणमाहृत्य मन्त्रानिमानुदीरयेत् ॥
नमो वः सर्व्वसिन्धूनां आधारेभ्यः सनातनाः ।
जन्तूनां प्राणदेभ्यश्च समुद्रेभ्यो नमो नमः ॥
क्षीरोदकाज्यदधिमाधवलावणेक्षु-
सारामृतेन भुवनत्रयजीवसंघान् ।
आनन्दयन्ति वसुभिश्च यतो भवन्त-
स्तस्मान्ममाप्यघविघातमलं विदध्वम् ॥
यस्मात् समस्तभुवनेषु भवन्त एव
तीर्थामरासुरसुवन्द्यमणिप्रतानम् ।
पापक्षयामरविलोपनभूषणाय
लोकस्य विभ्रति तदस्तु ममापि लक्ष्मीः ॥
इति ददाति रसाम्बरसंयुतान्
शुचिरविस्मयवानिह सागरान् ।
अमलकाञ्चनवर्णमयानसौ
पदमुपैति हरेरमरार्च्चितः ॥
सकलपापविघातविराजितं
पितृपितामहपुत्त्रकलत्रकम् ।
नरकलोकसमाकुलमप्यलं
झटिति नेतुमसौ शिवमन्दिरम् ॥"

इति मत्स्यपुराणे महादानानुकीर्त्तने सप्तसागरप्रादानिको नाम २६१ अध्यायः ॥

सप्तसूः, स्त्री, (सप्त सूते इति । सू + क्विप् ।) सप्तपुत्त्रप्रसूता । तत्पर्य्यायः । सुतश्रेष्ठा २ । इति शब्दरत्नावली ॥

सप्तांशुपुङ्गवः, पुं, (सप्तभिरंशुभिः पुङ्गव इव श्रेष्ठत्वात् ।) शनिग्रहः । इति जटाधरः ॥

सप्तार्च्चिः, [स्] पुं, (सप्त अर्च्चींषि यस्य ।) अग्निः । (यथा, रघुः । १० । २१ ।
"सप्तसामोपगीतं त्वां सप्तार्णवजलेशयम् ।
सप्तार्च्चिर्मुखमाचख्युः सप्तलोकैकसंश्रयम् ॥")
चित्रकवृक्षः । इत्यमरः ॥ शनिग्रहः । इति हेमचन्द्रः ॥ क्रूरचक्षुषि, त्रि । इति मेदिनी ॥ अग्नेः सप्तानामर्च्चिषां नामानि सप्तजिह्वशब्दे द्रष्टव्यानि ॥

सप्ताश्वः, पुं, (सप्त अश्वा यस्य ।) सूर्य्यः । अर्कवृक्षः । इत्यमरः ॥ (क्वचित् वाच्यलिङ्गेऽपि दृश्यते । यथा, ऋग्वेदे । ५ । ४५ । ९ ।
"आ सूर्य्यो यातु सप्ताश्वः क्षेत्रं यदस्योर्विया दीर्घयाथे ॥"
"सूर्य्यः सर्व्वस्य प्रेरको देवः सप्ताश्वः सर्पणस्वभावाश्वोपेतः सप्तसंख्याकाश्वो वा आयातु अस्मदभिमुखमागच्छतु ॥" इति तद्भाष्ये सायणः ॥)

सप्ताश्ववाहनः, पुं, (सप्त अश्वा वाहनान्यस्य ।) सूर्य्यः । यथा,—
"लोकसाक्षी त्रिलोकेशः कर्त्ता हर्त्ता तमिस्रहा ।
तपनस्तापनश्चैव शुचिः सप्ताश्ववाहनः ॥"
इति शाम्बपुराणे सूर्य्यस्तोत्रम् ॥

सप्तिः, पुं, ("षप समवाये । 'सपिनसिवसिपदिभ्यस्तिप्' इति श्रीभोजदेवः । सपति सङ्ग्रामेषु सहसामिवैति । गतिकर्म्मणो वा सप्तिः । समतेः स्पर्शार्थात् इति माधवः । सृपि गतौ । अस्माद्वा तिप्रत्यये गुणे च रेफलोपो बाहुलकात् सर्पति सप्तिः ।" इति निघण्टुटीकायां देवराजयज्वा । १ । १४ । ५ ।) अश्वः । इत्यमरः ॥ (यथा, ऋग्वेदे । ८ । ४ । १४ ।
"अर्व्वाञ्चं त्वा सप्तयोऽध्वरश्रियो वहन्तु सवनेदुप ॥")

सफरः, पुं, मत्स्यविशेषः । पुटी इति भाषा ॥ शयाना स्फुरति पार्श्वेन गच्छतीति शफरी मनीषादिः नदादित्वादीप् । शोणिशफरीशय्याशकटशिलाशरभशतपद्य इत्यूष्मभेदात् तालव्यादिः । दन्त्यादिरपीति केचित् । शफरश्च । इत्यमरटीकायां भरतः ॥

सफरी, स्त्री, (सफर + ङीप् ।) मत्स्यविशेषः । इति भरतः ॥ पुँटी इति भाषा ॥ तत्पर्य्यायः । शफरी २ प्रोष्ठी ३ । इत्यमरः ॥ शफरः ४ श्वेतकोलः ५ । इति त्रिकाण्डशेषः ॥ (यथा,—
"अगाधजलसञ्चारी रोहितोऽपि स्थिरायते ।
गण्डूषजलमात्रेण सफरी फर्फरायते ॥"
इत्युद्भटः ॥)

सफलं, त्रि, (फलेन सह वर्त्तमानम् ।) फलविशिष्टम् । तत्पर्य्यायः । अमोघम् २ । इति जटाधरः ॥ (यथा, मार्कण्डेये । ६१ । ३० ।
"सफलं मे भवेज्जन्म यदि मां नावमन्यसे ॥"
सशस्यम् । यथा, कथासरित्सागरे । २५ । १२ ।
"अपश्यदाश्रमपदं सफलस्निग्धपादपम् ॥")

सबलः, त्रि, (बलेन सह वर्त्तमानः ।) सैन्ययुक्तः । सामर्थ्यवान् । यथा,—
"सदसि च गृहे वापि दिनमात्रं प्रपश्यति ।
मध्ये बले तथा मासं वर्षं विद्याजयावले ॥"
इति पञ्चस्वराः ॥

सबलिः, पुं, विकालः । इति हेमचन्द्रः ॥

सबाधः, त्रि, पीड़ायुक्तः । निषेधयुक्तः । बाधया बाधेन च सह वर्त्तमानो यः इति बहुव्रीहिसमासनिष्पन्नः ॥

सब्रह्मचारी, [न्] पुं, (ब्रह्म वेदस्तदध्ययनार्थं यद्व्रतं तदपि ब्रह्म तच्चरतीति ब्रह्मचारी समानो ब्रह्मचारी । यद्वा, समाने ब्रह्मणि चरतीति । णिनिः । "चरणे ब्रह्मचारिणि ।" ६ । ३ । ८६ । इति समानस्य सः ।) परस्परैकब्रह्मव्रताचारः । इत्यमरः ॥ एकस्माद्गुरोर्ब्रह्मणि वेदाय अर्थात् वेदाध्ययनाय व्रतं अभिब्रह्मचर्य्याख्यं आचरन्ति ये तेऽन्योन्यं सब्रह्मचारिण उच्यन्ते । उपचारात् ब्रह्माध्ययनार्थं व्रतमपि ब्रह्म । समानं ब्रह्म चरन्तीति ग्रहादित्वाण्णिनि ज्योतिर्ज्जनपदेत्यादिना समानस्य सभावे सब्रह्मचारिणः । एकब्रह्मव्रताचारः इत्यत्र एकस्माद्ब्रह्मणे ब्रह्माध्येतुं व्रतमाचरन्तीति तुमर्थे चतुर्थी विग्रहतीति परे । सब्रह्मचारी शिवगुरुशिष्य इति हारलतेति नयनानन्दः । इति भरतः ॥

सभर्त्तृका, स्त्री, (भर्त्रा सह वर्त्तमाना । सहस्य सः ।) विद्यमानपतिका । तत्पर्य्यायः । पतिवत्नी २ । इत्यमरः ॥ सधवा ३ सनाथा ४ । इति जटाधरः ॥

सभा, स्त्री, (सह भान्ति शोभन्ते यत्रेति । भा दीप्तौ + भिदादित्वात् अधिकरणे अङ् । सहस्य सः ।) सह भान्ति अत्र । मज्‌लिस् इति पारसीक भाषा । पञ्चायित इति हिन्दीभाषा । मिटिं इति इङ्गरेजी भाषा । तत्पर्य्यायः । समज्या २ परिषत् ३ गोष्ठी ४ समितिः ५ संसत् ६ आस्थानी ७ आस्थानम् ८ सदः ९ समाजः १० । इत्यमरः ॥ पर्षत् १२ इति जटाधरः ॥ तल्लक्षणादि यथा । मनुः ।
"यस्मिन् देशे निषीदन्ति विप्रा वेदविदस्त्रयः ।
राज्ञः प्रतिकृतो विद्वान् ब्राह्मणस्तां सभां विदुः ॥" * ॥
विद्वत्संहतावपि सभापर्य्यायपरिषच्छब्दमाह स एव ।
"त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्म्मपाठकः ।
त्रयश्चाश्रमिणः पूर्व्वे परिषत् स्याद्दशावरा ॥"
त्रैविद्यः त्रिवेदपारगः । हैतुकः सद्युक्तिव्यवहारी । अतएवामरसिंहः । सभा सदसि सभ्ये च । अत्र भा दीप्तिः प्रकाशो ज्ञानमिति यावत् । तया सह साक्षात्परम्परया वा वर्त्तते इति सभा ॥ * ॥ कात्यायनः ।
"कुलशीलवयोवृत्तवित्तवद्भिरधिष्ठितम् ।
वणिग्भिः स्यात् कतिपयैः कुलवृद्धैरधिष्ठितम् ॥"
सद इति शेषः । इति व्यवहारतत्त्वम् ॥ * ॥
सामाजिकः । द्यूतम् । गृहम् । इति मेदिनी ॥

संमूहः। इति हेमचन्द्रः ॥ ॥ सभायां एकाकि-
गमननिषेधो यथा,—
"नैकश्चरेत् सभां विप्रः समवायञ्च वर्ज्ज-
येत् ॥"
इति कौर्म्मे उपविभागे १५ अध्यायः ॥
सभाज, त् क सेवने। प्रीतौ। दर्शने। इति
कविकल्पद्रुमः ॥ (अदन्तचुरा०-पर०-सक०-
सेट्।) अससभाजत्। इति दुर्गादासः ॥
सभाजनं, क्ली, (सभाज त् क सेवने प्रीतौ +
ल्युट्।) गमनागमनादिसमये सुहृदादेः आ-
लिङ्गनारोग्यप्रश्नस्वागतादिनानन्दोत्पादनम्।
तत्पर्य्यायः। आनन्दनम् २ आप्रच्छनम् ३।
इत्यमरः ॥ टु नदि समृद्धि सभाज त् क
सेवनप्रीतिदर्शने प्रच्छौ प्र ज्ञीप्से अनट्।
नन्दतिः पृच्छतियाङ्पूर्व्वोलिङ्गनादाविति
सुभूतिः। गमनसमये सुहृदमालिङ्ग्य गमना-
नुज्ञाग्रहणम्। आगतस्य वा स्वागतारोग्यादि-
पृच्छा आनन्दनमिति रमानाथः। इति भरतः ॥
(यथा, रघुः। १३। ४३।
"सभाजने मे भुजमूर्द्ध्वबाहुः
सव्येतरं प्राध्वमितः प्रयुङ्क्ते ॥"
सभाजयतीति। सभाज त् क प्रीतौ + ल्युः।
प्रीतिदायके, त्रि। यथा, महाभारते।४।१३।१०।
प्रभूतनागाश्वरथं सभाजनं
समृद्धियुक्तं बहुपानभोजनम्।
मनोहरं काञ्चनचित्रभूषणं
गृहं महत् शोभयतामियं मम ॥")
सभापतिः, पुं, (सभायाः पतिः।) समाजाधि-
पतिः। (यथा, भागवते। ६। १७। ७।
"जटाधरस्तीव्रतपा ब्रह्मवादी सभापतिः।
अङ्कीकृत्य स्त्रियञ्चास्ते गतह्रीः प्राकृतो यथा ॥")
द्यूतगृहस्वामी। इति केचित् ॥
सभासत् } पुं, (सभा + सद् + क्विप्।) सभायां
सभासद् } सीदति उपविशति यः। तत्पर्य्यायः।
सभास्तारः २ सभ्यः ३ सामाजिकः ४। इत्य-
मरः ॥ परिषद्वलः ५ पर्षद्वलः ६ परिषदः ७
पार्षदः ८ परिसभ्यः ९। इति शब्दरत्नावली ॥
तल्लक्षणादि यथा। कात्यायनः।
"सभ्येनावश्यवक्तव्यं धर्म्मार्थसहितं वचः।
शृणोति यदि नो राजा स्यात्तु सभ्यस्तदानृणः ॥"
सभ्यः सभायां साधुः। तथाविधानाह याज्ञ-
वल्क्यः।
"श्रुताध्ययनसम्पन्नाः कुलीनाः सत्यवादिनः।
राज्ञा सभासदः कार्य्याः शत्रौ मित्रे च ये
समाः ॥"
श्रुताध्ययनसम्पन्नाः धर्म्मशास्त्रज्ञाः। कुलीनाः
सङ्करादि-दोषशून्यमातापितृवंशपरम्पराकाः।
एवम्भूताः सभासदः सभायां यथा सीदन्ति
तथा दानमानसत्कारै राज्ञा कर्त्तव्याः। इति
व्यवहारतत्त्वम् ॥ ॥ अन्यच्च।
"समः शत्रौ च मित्रे च धर्म्मशास्त्रविशारदः।
विप्रमुख्यः कुलीनश्च धर्म्माधिकरणे भवेत् ॥
कार्य्यास्तथाविधास्तत्र द्विजमुख्याः सभासदः ॥"
इति मत्स्यपुराणे १८९ अध्यायः ॥
बृहस्पतिस्तु सप्त पञ्च त्रयो वा सभासदो
भवन्तीत्याह।
"लोकवेदज्ञधर्म्मज्ञाः सप्त पञ्च त्रयोऽपि वा।
यत्रोपविष्टा विप्राः स्युः सा यज्ञसदृशी सभा ॥"
किञ्च।
"सप्राड्विवाकः सामात्यः सब्राह्मणपुरोहितः।
ससभ्यः प्रेक्षको राजा स्वर्गे तिष्ठति धर्म्मतः ॥"
तत्र ब्राह्मणा अनियुक्ताः सभासदस्तु नियुक्ता
इति भेदः। तत्र नियुक्तानां यथावस्थितार्थ-
कथनेऽपि यदि राजान्यथा करोति तदासौ
निवारणीयोऽन्यथा दोषः। उक्तञ्च कात्यायनेन।
"अन्यायेनापि तं यान्तं येऽनुयान्ति सभासदः
तेऽपि तद्भागिनस्तस्माद्बोधनीयः स तैर्नृपः ॥"
इति मिताक्षरा ॥
सभास्तारः, पुं, (सभां स्तृणातीति। स्तृञ् आच्छा-
दने + "कर्म्मण्यण्" ३।२।१। इत्यण्।) सभा-
सद्। इत्यमरः ॥ (यथा, महाभारते। २।४८।२।
"के च तत्र सभास्तारा राजानो ब्रह्मवित्तम ॥")
सभिकः, पुं (सभा द्यूतसभा आश्रयत्वेनास्त्यस्येति
सभा + व्रीह्यादित्वात् ठन्।) द्यूतकारकः।
इत्यमरः ॥ ईं भडियार इति ख्याति। सभा
द्यूतमस्याश्रयत्वेनास्ति सभिकः विकारसंघेति
ष्णिकः। सभा द्यूतं सभा गृहमिति रुद्रः।
द्यूतं कारयति द्यूतकारकः अण्न्तात् स्वार्थे
कः। इति भरतः ॥ तत्पर्य्यायः।
"दुरोदरश्च निर्म्न्यद्यूतकारकलम्बकाः।
सभिकः प्रतिभूश्चेति——————॥"
इति जटाधरः ॥
(यथा, याज्ञवल्क्ये। २। २०२।
"ग्लहे शतिकवृद्धेस्तु सभिकः पञ्चकं शतम्।
गृह्णीयात् धूर्त्तकितवादितराद्दशकं शतम् ॥")
सभीकः, पुं, द्यूतकारकः। इति शब्दरत्नावली ॥
सभोचितः, पुं, (सभायामुचितः।) पण्डितः।
इति धनञ्जयः ॥ सभायोग्ये, त्रि ॥
सभ्यः, पुं, (सभायां साधुः। सभा + "सभाया यः।"
४।४।१०५। इति यः।) साधुः। सभासद्।
इत्यमरः ॥ (यथा, मनुः। ८। १०।
"सोऽस्य कार्य्याणि संपश्येत् सभ्यैरेव त्रिभि-
र्वृतः ॥"
अस्मिन्नर्थे वाच्यलिङ्गेऽपि दृश्यते। यथा, रघुः।
१। ५५।
"तस्मै सभ्याः सभार्य्याय गोप्त्रे गुप्ततमेन्द्रियाः
अर्हणामर्हते चक्रुर्मुनयो नयचक्षुषे ॥")
सभिकः। इति जटाधरः ॥
सभ्यः, त्रि, (सभा + यः।) प्रत्ययितः। इति
जटाधरः ॥ सभासम्बन्धी च ॥
सम्, व्य, समार्थः। प्रकृष्टार्थः। सङ्गतः। शोभनः।
इति शब्दरत्नावली ॥ समुच्चयः। इति हेम-
चन्द्रः ॥ चतुर्थोपसर्गः। इति व्याकरणम् ॥
अस्यार्थविशेषाः संशब्दे द्रष्टव्याः ॥
समः, त्रि, (समतीति। सम वैक्लव्ये + ...
सर्व्वम्। (अस्मिन्नर्थे सर्व्वनामसंज्ञा ...
यथा, मुग्धबोधे।
"समः समस्मात् पूर्व्वस्मा अन्यस्मा ...
...
समानम्। इत्यमरः ॥ (अस्मिन्नर्थे सर्व्वनाम-
संज्ञा न भवति। यथा, मुग्धबोधे।
"समायैव परायैषा मुक्तयेऽर्थोऽस्तु ...")
साधुः। इति मेदिनी ॥
समः, पुं, (सम वैक्लव्ये + पचाद्यच्।)
त्रिशोशानां संज्ञाविशेषः। ते तु ...
कर्कटकन्याश्चिकमकरमीनाः। यथा,—
"क्रूरोऽय सौम्यः पुरुषोऽङ्गना च
ओजोऽय युग्मं विषमः समश्च।
चरस्थिरद्व्यात्मकनामधेया
मेषादयोऽमी क्रमशः प्रदिष्टाः ॥"
इति ज्योतिस्तत्त्वम् ॥
तालस्य प्रकारविशेषः। ...
स्ताशः गायकस्य ...
समभावेन पतति तदा भवति। ...
शास्त्रम् ॥ ॥ वर्गमूलानयनार्थे ...
दत्त चतुरेखाविशेषः। यथा,—
"त्यक्त्वान्त्याद्विषमात् ...
...
त्यक्त्वा लब्धकृतिं तदाद्यविषमाल्लब्धं ...
...
इत्यादि लीलावती ...
समकन्या, स्त्री, (समा विवाहतुल्या ...
विवाहोपयुक्ता। इति धनञ्जयः ॥
कुमारी च ॥
समकोलः, पुं, (समः कोलो यस्य।) सर्पः। इति
त्रिकाण्डशेषः ॥
समक्तः, त्रि, गमनकर्त्ता। सपूर्व्व ...
क्तप्रत्ययेन निष्पन्नः। ...
समक्षं, त्रि, अक्ष्णोः समीपम्। सपूर्व्वाक्षि ...
अप्रत्ययेन निष्पन्नम्। इति मुग्धबोधव्याकरण-
णम् ॥ (यथा, कुमारे। ५। १।
"तथा समक्षं दहता मनोभवं
पिनाकिना भग्नमनोरथा सती।
निनिन्द रूपं हृदयेन पार्व्वती
प्रियेषु सौभाग्यफला हि चारुता ॥")
समगन्धकः, पुं, (समास्तुल्या गन्धा
यत्र। कप्।) कृत्रिमधूपः। यथा,—
"हृकाधूपे भल्लकरो गिरिः स्यात् समगन्धकः।"
इति शब्दचन्द्रिका ॥
समगन्धिकं, क्ली, (समस्तुल्यो गन्धोऽस्त्यस्य।
ठन्।) उशीरम्। इति राजनिर्घण्टः ॥
गन्धयुक्ते, त्रि ॥
समग्रः, त्रि, (समं समकालमेव ग्रसते।
ग्रस + डः।) सकलम्। (यथा, ...
२। ५२। ८४।
"चतुर्दश हि वर्षाणि समग्राण्युष्य कानने,

ाता वह मया सेव पुनः प्रत्यागमिष्यति ॥")
वम्। इत्यमरः ॥ (यथा, महाभारते।
।१४४।११।
"वैरमानत्कात्याय दिदिक्षो मानुषं वपुः।
मृदामप्रतिमशिरं समपेन्दुनिभाननम् ॥")
ज्ञा, स्त्री, मञ्जिष्ठा। इत्यमरः। मण्डूकपर्णी।
राहकाम्ना। इति रत्नमाला ॥ बाला। इति
जनिर्घण्टः ॥
चित्त, क्ली, (समं तुल्यं चित्तम्।) एकविष-
कालःकरणवृत्तिः। यथा,—
मनो बुद्धिं चित्तदं ते ज्ञानीया: शरीरिणाम्
कर्षितं मनः कृत्वा ध्यानेन प्रयुमीयते ॥
मचित्तं प्रपद्यन्ते न ते लिप्यन्ति मायया।
र्वभक्त्यादि भक्तः पेयापेयं तथैव च।
मं चित्तं मयि यदि तदा तस्य न च क्रिया॥"
ति वाराहे गुह्यकर्मसाद्याजारयणं नाम
ध्याय: ॥ (समं सर्व्वेषु पदार्थेषु तुल्यरूपं चित्तं
स्येति विग्रहे अस्य तुल्यदर्शक, त्रि। यथा,
भागवते। ७।१३।८।
न यतेराश्रम: प्रायो धर्म्महेतुर्महात्मन:।
शान्तस्य समचित्तस्य बिभृयादुत वा त्यजेत् ॥")
मजं, क्ली, (समजन्ति पशवो यत्र। सम्+अज
गतौ+अप्।) वनम्। इति मेदिनी ॥
मजः, पुं (स+अज गतौ+"समुदोरजःपशुषु"
३।३।६९। इति अप्।) पशुसमूहः। इत्यमरः॥
मूर्खसंहतिः। इति शब्दरत्नावली ॥
मज्ञा, स्त्री, (समैः सर्व्वैर्ज्ञायते इति। ज्ञा+
कर्म्मणि कः।) कीर्त्तिः। इत्यमरः ॥ समाज्ञा
समज्या समाज्ञा इति च पाठः। इति भरतः॥
मज्या, स्त्री,(समजन्ति सङ्गच्छन्तेऽस्यामिति।
सम्+अज+"संज्ञायां समजनिषदेति।" ३।
३।९९। इति क्यप्।) सभा। इत्यमरः ॥
कीर्त्तिः। इति तट्टीकायां रायमुकुटः ॥
मञ्जसं, क्ली, (सम्यक् अञ्ज औचित्यं यत्र।
अच्।) उचितम्। इत्यमरः ॥
मञ्जसः, त्रि, (सम्यक् अञ्ज औचित्यं यत्र।
अच्।) समीचीनः। इति त्रिकाण्डशेषः ॥
(यथा, भागवते। ६।८।३५।
"यतोऽस्विदाभाराम उपगमशीलः समञ्जस-
दर्शन उदास्त इतिह वाव न विदाम ॥")
अभ्यस्तः। इत्यजयपालः ॥
मण्डः, पुं, गण्डीरः। इति शब्दरत्नावली
हारावली च ॥
मता, स्त्री. समत्वम्। समस्य भावः इत्यर्थे
समशब्दात् तलप्रत्ययेन निष्पन्ना ॥ (यथा,
रघुः।८।६।
समतया वसुवृष्टिविसर्ज्जनैः
नियमनादसताञ्च नराधिपः ॥")
समतिरिक्तं, क्ली, सम्यगधिकम्। सम्यक्प्रकारे-
णातिरिक्तं इति तत्पुरुषसमासनिष्पन्नम् ॥
समत्रयं, क्ली, (समं त्रयं यत्र।) समभाग-
हरीतकीनागरगुडम्। इति राजनिर्घण्टः ॥

समदर्शी, [न्] त्रि. (समं पश्यतीति। दृश+
णिनिः।) सर्व्वभूतेषु तुल्यदर्शनशीलः। यथा,—
"विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥"
इति श्रीभगवद्गीता ॥
समदृष्टिः, स्त्री, (समा दृष्टिः।) सर्व्वत्र तुल्य-
दर्शनम्। यथा,—
"दुःखे सुखे च विप्रेन्द्र या दृष्टिर्वर्त्तते सदा।
तथा शत्रौ च मित्रे च समदृष्टिश्च सा स्मृता।"
इति पाद्मे क्रियायोगसारे १६ अध्यायः ॥
(समा दृष्टिर्यस्य।) समदर्शिनि, त्रि ॥
समधिकः, त्रि, (सम्यक् अधिकः।) अधिकः।
तत्पर्य्यायः। अतिरिक्तः २। इत्यमरः ॥ (यथा,
रघुः।१८।४१।
"प्रतिकृतिरचनाभ्यो दूतिसन्दर्शिताभ्यः
समधिकतररूपाः शुद्धसन्तानकामैः।
अधिविविदुरमात्यैराहृतास्तस्य यूनः
प्रथमपरिगृहीते श्रीभुवौ राजकन्याः ॥")
समन्तः, पुं, सीमा। सम्यक्प्रकारेण अन्तः इति
तत्पुरुषसमासनिष्पन्नः ॥
समन्ततः, [स] अव्य, चतुर्द्दिगभिव्याप्तः। तत्प-
र्य्यायः। परितः २ सर्व्वतः ३ विष्वक् ४। इत्य-
मरः ॥ समन्तात् ५। इति शब्दरत्नावली ॥
यथा, रामायणे।२।५०।१४।
"स्नियश्च सर्व्वा रुरुदुः समन्ततः
पुरं तदासीत् पुनरेव सङ्कुलम् ॥")
समन्तदुग्धा, स्त्री, (समन्तात् दुग्धं क्षीरमस्याः।)
स्नुहीवृक्षः। इत्यमरः ॥
समन्तपञ्चकं, क्ली, (समन्तात् पञ्चकं ह्रदपञ्चकं
यत्र।) कुरुक्षेत्रम्। तत्र कुरुपाण्डवयोर्युद्ध-
स्थानम्। तत्र पुरा परशुरामः क्षत्रियरुधिरेण
पञ्चह्रदान् चकार। यथा,—
"त्रिःसप्तकृत्वः पृथिवीं कृत्वा निःक्षत्रियां प्रभुः।
समन्तपञ्चके पञ्च कृतवान् रुधिरह्रदान् ॥
स तेषु तर्पयामास पितॄन् भृगुकुलोद्वहः।
साक्षात् ददर्श पितरं स च रामं न्यवारयत् ॥"
इति पाद्मे भूमिखण्डे १२४ अध्यायः ॥०॥
अन्यच।
"त्रिःसप्तकृत्वः पृथिवीं कृत्वा निःक्षत्रियां प्रभुः।
समन्तपञ्चके चक्रे शोणितोदान् ह्रदान् नव॥"
इति श्रीभागवते ९स्कन्धे १६अध्यायः॥०॥
तस्य माहात्म्यं सीमा च यथा,—
"पृथिव्यां नैमिषं तीर्थमन्तरीक्षे च पुष्करम्।
त्रयाणामपि लोकानां कुरुक्षेत्रं विशिष्यते ॥"
इत्यारभ्य,—
"तरन्तुकारन्तुकयोर्यदन्तरं
रामह्रदानाञ्च मचक्रुकस्य च।
एतत् कुरुक्षेत्रसमन्तपञ्चकं
पितामहस्योत्तरवेदिरुच्यते ॥"
इति महाभारतीयवनपर्व्वणि ८२ अध्यायः ॥
समन्तभद्रः, पुं, (समन्तात् भद्रमस्य।) बुद्धः।
इत्यमरः ॥

समन्तभुक्, [ज्] पुं, (समन्तात् भुङ्क्ते इति भुज्
+क्विप्।) अग्निः। इति त्रिकाण्डशेषः ॥
समन्तात् अव्य, समन्ततः। इति शब्दरत्नावली ॥
(यथा, ऋतुसंहारे।१।२२।
"दिनकरपरितापात् क्षीणतोयाः समन्तात्
विदधति भयमुच्चैर्वीक्ष्यमाणा वनान्ताः ॥")
समन्युः, पुं, (मन्युना क्रतुना क्रोधेन वा सह वर्त्त-
मानः।) शिवः। इति केचित् ॥ क्रोधयुक्ते ॥
(यथा, महाभारते।३।२६८।४।
"वृद्धिं समाख्याय च मे समन्युः
कङ्क्षति प्राणपतिः शरीरे ॥")
समन्वितः, त्रि, (सम्+अनु+इण्+क्तः।)
संयुक्तः। यथा, तिथ्यादितत्त्वे।
"विम्बटसङ्गुलं शास्त्रं स्फुटाक्षरपदं तथा।
कलस्वरसमायुक्तं रसभावसमन्वितम् ॥"
समपदं, क्ली, (समे पदे यत्र।) धन्विनां पादयो-
स्तुल्यरूपतया धारणम्। इत्यमरटीकायां
भरतः ॥
समपदः, पुं, (समे पदे चरणे यत्र।) रतिबन्ध-
विशेषः। यथा,—
"योषित्पादौ हृदि स्थाप्य कराभ्यां पीडयेत्
स्तनौ।
यथेष्टं ताडयेद्योनिं बन्धः समपदः स्मृतः ॥"
इति रतिमञ्जरी स्मरदीपिका च ॥
समपादं, क्ली, (समौ पादौ यत्र।) धन्विनां
पादयोस्तुल्यरूपतया धारणम्। इति हेम-
चन्द्रः ॥
समभिव्याहारः, पुं, (सम्+अभि+वि+आ+
हृ+घञ्।) सहितः। घटमानय इत्यत्र भवति
चाव्यवहितपूर्व्ववर्त्तितालक्षणसमभिव्याहारस-
म्बन्धेन घटपदनिष्ठस्यानुस्वारपदस्य व्यतिरेक-
प्रयुक्तो घटवत् कर्म्मत्वमिति भेदान्वयबुद्ध्यभाव
इति ताहशान्वयबोधे घटपदस्यानुस्वारपदवत्त्व-
साकाङ्क्षा एवं विनिगमनाविरहादव्यवहितो-
त्तरवर्त्तितारूपसमभिव्याहारसम्बन्धेन अनुस्वार-
पदनिष्ठस्य घटपदस्य व्यतिरेकप्रयुक्तोऽपि घटवत्
कर्म्मत्वमिति भेदान्वयबुद्ध्यभावइत्यनुस्वारपदस्य
घटपदवत्त्वमपि ताहशान्वयबोधे आकाङ्क्षा।
इति आकाङ्क्षाग्रन्थे मथुरानाथः ॥
समभिव्याहृतः, पुं, (सम्+अभि+वि+आ+
हृ+क्तः।) सहोच्चरितः सहितः। यथा
निमित्तानां उत्पत्तिविधिसमभिव्याहृतनियता-
नाम्। इति तिथ्यादितत्त्वम् ॥
समभिहारः, पुं, (सम्+अभि+हृ+घञ्।)
पौनःपुन्यम्। भृशार्थः। इति मेदिनी ॥
समभूमिः, स्त्री, (समा भूमिः।) समानस्थानम्।
तत्पर्य्यायः। आजिः २। इति जटाधरः ॥
(यथा, रामायणे २।५६।११।
"समभूमितले रम्ये द्रुमैर्बहुभिरावृते।
पुण्यैरंस्यामहे तात चित्रकूटस्य कानने ॥")
समम्, अव्य, सहितम्। यथा। सार्द्धन्तु साकं सत्रं
समं सह। इत्यमरः ॥ (यथा, मनुः।२।११३।

मयूरः। इति हेमचन्द्रः ॥०॥ सभायां एकाकि-गमननिषेधो यथा,—

"नैकश्चरेत् सभां विप्रः समवायञ्च वर्ज्ज-
येत् ॥"

इति कौर्म्मे उपविभागे १५ अध्यायः ॥

समाज, ऋ क सेवने। प्रीतौ। दर्शने। इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट्।) सममसमाजत्। इति दुर्गादासः ॥

सभाजनं, क्ली, (सभाज ऋ क सेवने प्रीतौ+ ल्युट्।) समागमनादिसमये सुहृदादेः आलिङ्गनारोग्यप्रश्नस्वागतादिनानन्दोत्पादनम्। तत्पर्य्यायः। आनन्दनम् २ आप्रच्छनम् ३। इत्यमरः॥ टु नदि समृद्धि सभाज ऋ क सेवनप्रीतिदर्शनेषु प्रच्छो ज्ञीप्सायां अनट्। नन्दतिः पृच्छतिराङ्पूर्व्वालिङ्गनादाविति चतुर्गतिः। समनसमये सुहृदमालिङ्ग्य गमनागमनादरवत्। आगतस्य वा स्वागतारोग्यादि-पृच्छा आनन्दनमिति रमानाथः। इति भरतः॥ (यथा, रघुः। ११। ५१।

"सभाजने मे भुजमूर्द्ध्वबाहुः
सव्येतरं प्राक्प्रमितः प्रयुङ्क्ते ॥"

सभाजयतीति। सभाज ऋ क प्रीतौ+ल्युः। प्रीतिदायके, त्रि। यथा, महाभारते। ४।१३।१०

"भूततनापहरं सभाजनं
बर्हिकृतं बहुपानभोजनम्।
मनोहरं वाद्यनवित्रभूषणं
यदं भरत मोदनामिदं मम ॥")

सभापतिः, पुं, (सभायाः पतिः।) सभाधिपतिः। (यथा, भागवते। ४।१०।०।

"यः सभायां प्रवक्ता ब्रह्मवादी सभापतिः।
यश्चोद्धर विवस्वाले मनश्चो प्राज्ञतो यथा॥")
द्यूताध्यक्षः। इति केचित् ॥

सभासद्, पुं, (सभा+सद्+क्विप्।) सभायां सीदति उपविशति यः। तत्पर्य्यायः। सभास्तार २ सभ्य ३ सामाजिकः ४ सभासद ५ परिषदः ६ पारिषदः ७ दर्शकः ८ ८ परिषद्य ९। इति शब्दरत्नावली ॥ सभासदादि यथा। कात्यायनः।

"धर्म्मशास्त्रार्थकुशला धर्म्मार्थसहितं वच।
सभ्यैरेव यदि को राजा धर्म सम्यक् प्रवर्त्तयेत्॥"
सभ्य सभायां साधुः। तथाविधास्तु याज्ञवल्क्यः।

"श्रुताध्ययनसम्पन्ना कुलीनाः सत्यवादिनः।
राज्ञा सभासदः कार्य्याः शत्रौ मित्रे च ये
समाः॥"

श्रुताध्ययनसम्पन्ना धर्म्मशास्त्रज्ञाः। कुलीनाः कुलक्रमागतसदाचाराः।
... सभासदः ... राज्ञा कर्त्तव्याः। इति ... १४१ ...

"वक्तुं सत्यं च लिङ्गं च कर्त्तव्यविनिश्चये।
निपुणा कुतश्च कर्त्तव्यविचारे भवेत् ॥
कार्य्यास्तथाविधास्तत्र द्विजमुख्याः सभासदः ॥"

इति मत्स्यपुराणे १८८ अध्यायः ॥

बृहस्पतिस्तु सप्त पञ्च त्रयो वा सभासदो भवन्तीत्याह।

"लोकवेदज्ञधर्म्मज्ञाः सप्त पञ्च त्रयोऽपि वा।
यत्रोपविष्टा विप्राः स्युः सा यज्ञसदृशी सभा॥"

किञ्च।

"सप्राड्विवाकः सामात्यः सब्राह्मणपुरोहितः।
ससभ्यः प्रेक्षको राजा स्वर्गे तिष्ठति धर्म्मतः॥"

तत्र ब्राह्मणा अनियुक्ताः सभासदस्तु नियुक्ता इति भेदः। तत्र नियुक्तानां यथावस्थितार्थ-कथनेऽपि यदि राजान्यथा करोति तदासौ निवारणीयोऽन्यथा दोषः। तथाच कात्यायनेन।

"अन्यायेनापि तं यान्तं येऽनुयान्ति सभासदः
तेऽपि तद्भागिनस्तस्माद्बोधनीयः स तैर्नृपः॥"

इति मिताक्षरा ॥

सभास्तारः, पुं, (सभां स्तृणातीति। स्तॄञ् आच्छादने+"कर्म्मण्यण्" ३।२।१। इत्यण्।) सभासद्। इत्यमरः॥ (यथा, महाभारते। २।४८।२।

"ये च तत्र सभास्तारा राजानो ब्रह्मवित्तम॥"

सभिकः, पुं, (सभा द्यूतसभा आश्रयत्वेनास्त्यस्येति सभा+ब्रीह्यादित्वात् ठन्।) द्यूतकारकः। इत्यमरः॥ ऐ सभियार इति ख्यातिः। सभा द्यूतमस्याश्रयत्वेनास्ति सभिकः विकारसंघेति णिकः। सभा द्यूतं सभा गृहमिति रुद्रः। द्यूतं कारयति द्यूतकारकः णकन्तात् स्वार्थे कः। इति भरतः॥ तत्पर्य्यायः।

"दुरोदरश्च निर्म्मन्थ्यद्यूतकारककल्पकाः।
सभिकः प्रतिभूश्चेति————॥"

इति जटाधरः ॥

(यथा, याज्ञवल्क्ये। २। २०२।

"ग्लहे शतिकवृद्धेस्तु सभिकः पञ्चकं शतम्।
गृह्णीयात् धूर्त्तकितवादितराद्दशकं शतम्॥")

सभीकः, पु, द्यूतकारकः। इति शब्दरत्नावली॥

सभोचितः, पुं, (सभायामुचितः।) पण्डितः। इति धनञ्जयः॥ सभायोग्ये, त्रि॥

सभ्य,पु,(सभायां साधुः। सभा+"सभाया यः" ४।४।१०५। इति यः।) साधुः। सभासद्। इत्यमरः॥ (यथा, मनुः। ८। १०।

"सोऽस्य कार्य्याणि संपश्येत् सभ्यैरेव त्रिभि-
र्वृतः॥"

अभिसर्थे वाच्यलिङ्गोऽपि दृश्यते। यथा, रघुः। १।५५।

"तमर्थ्यमर्घ्यादिकयादिकयादिमसम्यसभ्याः समर्थ्याय ...गुप्ततमेन्द्रियाः
अर्हणामर्हते चक्रुर्मुनयो नयचक्षुषे॥")
सभिकः। इति जटाधरः॥

सभ्यः, त्रि, (सभा+यः।) प्रत्ययितः। इति जटाधरः॥ सभासम्बन्धी च॥

सम,व्य,सर्व्वार्थे। प्रकटार्थे। सहितः। शोभनः। इति शब्दरत्नावली॥ समुच्चयः। इति हेमचन्द्रः॥ अनुगतोपसर्गः। इति व्याकरणम्॥ अस्यार्थविशेषाः संशब्दे द्रष्टव्याः॥

समः,त्रि, (समतीति।
सर्व्वम्। (अभिस...
यथा, मुग्धबोधे।

"नमः समस्तात् पूर्व्वस्या ...
...

समानम्। इत्यमरः॥ (...
संज्ञा न भवति। यथा, मुग्धबोधे।

"समाद्येषु परार्थेषु ..."
साधुः। इति मेदिनी॥

समः, पुं, (सम वैक्लव्ये+पचाद्यच्।)
विशेषाणां संज्ञाविशेषः। ते तु...
कर्कटकन्याद्युश्चिकमकरमीनाः। ...

"क्रूरोऽथ सौम्यः पुरुषोऽङ्गना
ओजोऽथ युग्मं विषमः समः।
चरस्थिरद्व्यात्मकनामधेया
मेषादयोऽमी क्रमशः प्रदिष्टाः॥"

इति ...
मानस्य प्रकारविशेषः। यत्र
स्तालः गायकस्य ...
समभावेन पतति तदा भवति। ...
शास्त्रम्॥ ०॥ वर्गमूलानयनार्थं
दत्त ऊर्ध्वरेखाविशेषः। यथा,—
"त्यक्त्वान्त्याद्विषमात् ...

त्यक्ता लब्धकृतिं तदाद्यविषमाद् ...

इत्यादि ...

समकन्या, स्त्री, (समा विवाहयुक्ता
विवाहोपयुक्ता। इति शब्दमाला।
कुमारी च॥

समकोलः,पुं, (समः कोलो यस्य।) स...
विशेषः॥

समक्षः, त्रि, समनक्षर्त्ता। संमुख ...
प्रमाणेन निरूपकः।

समक्षं, त्रि, अक्ष्णोः समीपम्। ...
प्रत्यक्षेण निरूपकम्। इति मुग्ध...
च॥ (यथा, कुमारे। ५। ...

"तथा समक्षं दहता मनोभवं
पिनाकिना भग्नमनोरथा सती।
निनिन्द रूपं हृदयेन पार्वती
प्रियेषु सौभाग्यफला हि चारुता॥"

समगन्धकः,पु, (समागन्धा यस्य
यत्र। कप्।) कृत्रिमधूपः। इत्यमर॥
"कृतधूपे समगन्धो निरीक्षणात् ...
इति ...

समग्रभिक्षं, क्ली, (समग्रो भिक्षा ...
ठञ्।) समोरम्। इति ...
मध्यमुखे, त्रि॥

समग्रः, त्रि, (सम समकातीर ...
ग्र+रः।) सकलम्। (...
२।१२।८४।
"चतुर्भ्यं हि बर्षाणि समग्रस्य ...

इह मया चेह पुनः प्रत्यागमिष्यति ॥")
इत्यमरः ॥ (यथा, महाभारते ।
।४।१२।
...सम्पाद हिडिम्बी मानुषं वपुः ।
...त्पूरितशिरं समपेन्दुनिभाननम् ॥")
...ी, शल्लिका । इत्यमरः । म्लाम्लका ।
...ान्ता । इति रत्नमाला ॥ वामा । इति
...र्णवः ॥
..., क्ली, (समं तुल्यं चित्तम् ।) एकविध-
...:करणवृत्तिः । यथा,—
...र्यहित चित्तस्य ते श्वर्तीगाः शरीरिणाम्
...सं मनः कृत्वा श्रामेव प्रगुणीषने ॥
...सं प्रपद्यन्ते न ते लिम्पन्ति मानवाः ।
...म्यापि भक्ष्याः पेयापेयं तथैव च ।
...र्त्तं मयि यदि तदा तस्य न च क्रिया ॥"
...राहे गुह्यकर्म्ममाहात्म्यवर्णनं नामा-
॥ (समं सर्व्वेषु पदार्थेषु तुल्यरूपं चित्तं
...विग्रहे सम्य इव तुल्यदर्शके, त्रि । यथा,
...ते । ७ । १३ । ८ ।
...राश्रमः प्रायो धर्म्महेतुर्महात्मनः ।
...य समचित्तस्य विग्रवादुत वा त्यजेत् ॥")
...ली, (समजन्ति पशवो यत्र । सम् + अज
...अप् ।) वनम् । इति मेदिनी ॥
...पुं (म + अज गतौ + "समुदोरजः पशुषु ।"
...८ । इति अप् ।) पशुसमूहः । इत्यमरः ॥
...हतिः । इति शब्दरत्नावली ॥
...स्त्री, (समैः सर्व्वैः श्रायते इति । श्रा +
...कः ।) कीर्त्तिः । इत्यमरः ॥ समाज्ञा
...ा समाख्या इति च पाठः । इति भरतः ॥
..., स्त्री, (समजन्ति सङ्गच्छन्तेऽस्यामिति ।
...अज + "संज्ञायां समजनिषदेति ।" ३ ।
...८ । इति क्यप् ।) सभा । इत्यमरः ॥
...: । इति तट्टीकायां रायमुकुटः ॥
...ं, क्ली, (सम्यक् अञ्च औचित्यं यत्र ।
...) उचितम् । इत्यमरः ॥
...सः, त्रि, (सम्यक् अञ्च औचित्यं यत्र ।
...) समाधानः । इति त्रिकाण्डशेषः ॥
..., भागवते । ६ । ८ । ३५ ।
...स्विदात्माराम उपशमशीलः समञ्जस-
... उदास्त इतिह वाव न विदाम ॥")
...स्तः । इत्यजयपालः ॥
...:, पुं, गण्डीरः । इति शब्दरत्नावली
...ावली च ॥
..., स्त्री. समत्वम् । समस्य भावः इत्यर्थे
...शब्दात् तप्रत्ययेन निष्पन्ना ॥ (यथा,
। ८ । ६ ।
समतया वसुवृष्टिविसर्ज्जनैः
नियमनादसताञ्च नराधिपः ॥")
...रिक्तं, क्ली, सम्यगधिकम् । सम्यक्प्रकारे-
...तिरिक्तं इति तत्पुरुषसमासनिष्पन्नम् ॥
...यं, क्ली, (समं त्रयं यत्र ।) समभाग-
...तकीनागरगुडम् । इति राजनिर्घण्टः ॥

समदर्शी, [न्] त्रि, (समं पश्यतीति । दृश + णिनिः ।) सर्व्वभूतेषु तुल्यदर्शनशीलः । यथा,—
"विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥"
इति श्रीभगवद्गीता ॥

समदृष्टिः, स्त्री, (समा दृष्टिः ।) सर्व्वत्र तुल्यदर्शनम् । यथा,—
"दुःखे सुखे च विप्रेन्द्र या दृष्टिर्व्वर्त्तते सदा ।
तथा शत्रौ च मित्रे च समदृष्टिश्च सा स्मृता ॥"
इति पाद्मे क्रियायोगसारे १६ अध्यायः ॥
(समा दृष्टिर्यस्य ।) समदर्शिनि, त्रि ॥

समधिकः, त्रि, (सम्यक् अधिकः ।) अधिकः । तत्पर्य्यायः । अतिरिक्तः २ । इत्यमरः ॥ (यथा, रघुः । १८ । ५३ ।
"प्रतिकृतिरचनाभ्यो दूतिसन्दर्शिताभ्यः
समधिकतररूपाः शुद्धसन्तानकामैः ।
अधिविविदुरमात्यैराहृतास्तस्य यूनः
प्रथमपरिगृहीते श्रीभुवौ राजकन्याः ॥")

समन्तः, पुं, सीमा । सम्यक्प्रकारेण अन्तः इति तत्पुरुषसमासनिष्पन्नः ॥

समन्ततः, [स्] व्य, चतुर्दिगभिव्याप्तः । तत्पर्य्यायः । परितः २ सर्व्वतः ३ विष्वक् ४ । इत्यमरः ॥ समन्तात् ५ । इति शब्दरत्नावली ॥ यथा, रामायणे । २ । ५० । ३४ ।
"विचेय सर्व्वां रुरुदुः समन्ततः
पुरं तदासीत् पुनरेव सङ्कुलम् ॥")

समन्तदुग्धा, स्त्री, (समन्तात् दुग्धं क्षीरमस्याः ।) स्नुहीवृक्षः । इत्यमरः ॥

समन्तपञ्चकं, क्ली, (समन्तात् पञ्चकं ह्रदपञ्चकं यत्र ।) कुरुक्षेत्रम् । तत्र कुरुपाण्डवयोर्युद्धस्थानम् । तत्र पुरा परशुरामः क्षत्रियरुधिरेण पञ्चह्रदान् चकार । यथा,—
"त्रिःसप्तकृत्वः पृथिवीं कृत्वा निःक्षत्रियां प्रभुः ।
समन्तपञ्चके पञ्च कृतवान् रुधिरह्रदान् ॥
स तेषु तर्पयामास पितॄन् भृगुकुलोद्वहः ।
साक्षात् ददर्श पितरं स च रामं न्यवारयत् ॥"
इति पाद्मे भूमिखण्डे १२४ अध्यायः ॥ ॥
अन्यच्च ।
"त्रिःसप्तकृत्वः पृथिवीं कृत्वा निःक्षत्रियां प्रभुः ।
समन्तपञ्चके चक्रे शोणितोदान् ह्रदान् नव ॥"
इति श्रीभागवते ८स्कन्धे १६ अध्यायः ॥ ॥
तस्य माहात्म्यं सीमा च यथा,—
"पृथिव्यां नैमिषं तीर्थमन्तरीक्षे च पुष्करम् ।
त्रयाणामपि लोकानां कुरुक्षेत्रं विशिष्यते ॥"
इत्यारभ्य,—
"तरन्तुकारन्तुकयोर्यदन्तरं
रामह्रदानाञ्च मचक्रुकस्य च ।
एतत् कुरुक्षेत्रसमन्तपञ्चकं
पितामहस्योत्तरवेदिरुच्यते ॥"
इति महाभारतीयवनपर्व्वणि ८२ अध्यायः ॥

समन्तभद्रः, पुं, (समन्तात् भद्रमस्य ।) बुद्धः । इत्यमरः ॥

समन्तभुक्, [ज्] पुं, (समन्तात् भुङ्क्ते इति भुज् + क्विप् ।) अग्निः । इति त्रिकाण्डशेषः ॥

समन्तात्, व्य, समन्ततः । इति शब्दरत्नावली ॥ (यथा, ऋतुसंहारे । १ । २२ ।
"दिनकरपरितापात् क्षीणतोयाः समन्तात्
विदधति भयमुच्चैर्वीक्ष्यमाणा वनान्ताः ॥")

समन्युः, पुं, (मन्युना क्रतुना क्रोधेन वा सह वर्त्तमानः ।) शिवः । इति केचित् ॥ क्रोधयुक्ते ॥ (यथा, महाभारते । ३ । २६८ । ४ ।
"वृहि समाख्याय च मे समन्युः
कह्यते प्राणपतिः शरीरे ॥")

समन्वितः, त्रि, (सम् + अनु + इण् + क्तः ।) संयुक्तः । यथा, तिथ्यादितत्त्वे ।
"विप्रहस्तद्रुतं शान्तं स्पष्टाक्षरपदं तथा ।
कलस्वरसमायुक्तं रसभावसमन्वितम् ॥"

समपदं, क्ली, (समे पदे यत्र ।) धन्विनां पादयोस्तुल्यरूपतया धारणम् । इत्यमरटीकायां भरतः ॥

समपदः, पुं, (समे पदे चरणे यत्र ।) रतिबन्धविशेषः । यथा,—
"योषित्पादौ हृदि स्थाप्य कराभ्यां पीड़येत् स्तनौ ।
यथेष्टं ताड़येद्योनिं बन्धः समपदः स्मृतः ॥"
इति रतिमञ्जरी स्मरदीपिका च ॥

समपादं, क्ली, (समौ पादौ यत्र ।) धन्विनां पादयोस्तुल्यरूपतया धारणम् । इति हेमचन्द्रः ॥

समभिव्याहारः, पुं, (सम् + अभि + वि + आ + हृ + घञ् ।) सहितः । घटमानय इत्यत्र भवति चाव्यवहितपूर्व्ववर्त्तितालक्षणसमभिव्याहारसम्बन्धेन घटपदनिष्ठस्यानुस्वारपदस्य व्यतिरेकप्रयुक्तो घटवत् कर्म्मत्वमिति भेदान्वयबुद्ध्यभाव इति तादृशान्वयबोधे घटपदस्यानुस्वारपदवत्त्वमाकाङ्क्षा एवं विनिगमनाविरहादव्यवहितोत्तरवर्त्तितारूपसमभिव्याहारसम्बन्धेन अनुस्वारपदनिष्ठस्य घटपदस्य व्यतिरेकप्रयुक्तोऽपि घटवत् कर्म्मत्वमिति भेदान्वयबुद्ध्यभाव इत्यनुस्वारपदस्य घटपदवत्त्वमपि तादृशान्वयबोधे आकाङ्क्षा । इति आकाङ्क्षाग्रन्थे मथुरानाथः ॥

समभिव्याहृतः, पुं, (सम् + अभि + वि + आ + हृ + क्तः ।) सहोच्चरितः सहितः । यथा निमित्तानां उत्पत्तिविधिसमभिव्याहृतनियतानाम् । इति तिथ्यादितत्त्वम् ॥

समभिहारः, पुं, (सम् + अभि + हृ + घञ् ।) पौनःपुन्यम् । भृशार्थः । इति मेदिनी ॥

समभूमिः, स्त्री, (समा भूमिः ।) समानस्थानम् । तत्पर्य्यायः । आजिः २ । इति जटाधरः ॥ (यथा, रामायणे २ । ५६ । ११ ।
"समभूमितले रम्ये द्रुमैर्बहुभिरावृते ।
पुण्ये रंस्यामहे तात चित्रकूटस्य कानने ॥")

समम्, व्य, सहितम् । यथा । सार्द्धन्तु साकं सत्रं समं सह । इत्यमरः ॥ (यथा, मनुः ।२।११३ ।

"प्रियमेव मम कामं मन्तव्यं ब्रह्मवादिना।
आपत्स्वपि हि घोरासु नलेनामरिषे वपेत्॥"
समयः, पुं, (सम्यगेतीति। सम्+इण् गतौ+पचाद्यच्।) कालः। (यथा, उत्तरचरिते१ अङ्के।
"समयः स वर्त्तत इवैष यत्र मां
समनन्दयत् सुमुखि! गौतमार्पितः।
अयमागृहीतकमनीयकङ्कण-
स्तव मूर्त्तिमानिव महोत्सवः करः॥")
शपथः। आचारः। (यथा, महाभारते। १३।८०।५०।
"कल्पोताः समये नित्यं ये चरन्ति युधिष्ठिर!।
निश्चिताः सर्व्वधर्म्मज्ञास्तान् देवान् ब्राह्मणान् विदुः॥")
सिद्धान्तः। संवित्। इत्यमरः॥ क्रियाकारः। निर्द्देशः। भाषा। (यथा, महाभारते। ५। ३१। ११६।
"देशाचारान् समयान् जातिधर्म्मान्
बुभूषते यः स परावरज्ञः॥")
सङ्केतः। इति मेदिनी॥ (व्यवहारः। यथा, मनुः। १०। ५१।
"न तैः समयमन्विच्छेत् पुरुषो धर्म्ममाचरन्॥")
सम्पत्। नियमः। (यथा, भागवते।३।२२।१८।
"यतो भजिष्ये समयेन साध्वीं
यावत्तेजो बिभृयादात्मनो मे॥")
अवसरः। इति हेमचन्द्रः॥*॥ कालप्रशंसा। यथा,—
परशुराम उवाच।
"राजेन्द्रोत्तिष्ठ समरं कुरु साहसपूर्व्वकम्।
कालभेदे जयो नृणां कालभेदे पराजयः॥
काले सिंहः शृगालश्च शृगालः सिंहमेव च।
काले व्याघ्रं मृगो हन्ति गजेन्द्रं हरिणस्तथा॥
मर्द्दयं मक्षिका काले गरुडञ्च यथोरगः।
किङ्करः स्तौति राजेन्द्रं काले राजा च किङ्करम्॥
इन्द्रश्च मनुः काले काले राजा भविष्यति।
तिरोहिता च प्रकृतिः काले श्रीकृष्णविग्रहे॥
मरिष्यन्ति सुराः सर्व्वे त्रिलोकस्थाश्चराचराः
सर्व्वे काले लयं यान्ति कालो हि दुरतिक्रमः॥
कालस्य कालः श्रीकृष्णः स्रष्टुः स्रष्टा यथेच्छया
संहर्त्ता चैव संहर्त्तुः पातुः पाता परात्परः॥
महास्थूलात् स्थूलतमः सूक्ष्मात् सूक्ष्मतमः क्रमः
परात् परमः कालः कालश्च कालभेदकः॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ३० अध्यायः॥*॥
अपि च।
"काल करोति संसारं कालश्च मनुभिः समम्
[illegible] सृष्टिं [illegible] शीर्षं प्रीतिमेव च॥
कालः [illegible] कुरुते कालश्च परिपाकम्।
कालः [illegible] कालः संहरते प्रजाः॥
[illegible] सुखं [illegible] कालश्च जय च।
सर्व्वं [illegible] काल एव करोति च।
[illegible] काल इह [illegible] न [illegible]॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८० अध्यायः॥

अथ कालनिरूपणम्।
"आनन्दमन्दनस्यैव परिपूर्णतमस्य च।
शृणु कालगतिं वत्स मदीयज्ञानगोचराम्॥
नराणाञ्च पितॄणाञ्च सुराणाञ्चापि ब्रह्मणः।
नागानां राक्षसादीनां तत्परिमाणञ्च पुत्रक॥
कथयामि निगूढार्थं सावधानं निशामय।
सर्व्वस्माच्च परः स्थूलः सर्व्वाधारो महान् विराट्॥
यस्य लोमसु विश्वानि चासंख्यानि च तानि च
सर्व्वस्माच्च परं सूक्ष्मं परमाणुं निशामय॥
कालारम्भात्मकं सर्व्वस्यानूर्द्धं परमोष्मितम्।
परमः सद्विशेषाणामनेकोऽयुतमस्तथा॥
परमाणुः स विज्ञेयो नृणामेकाभ्रमो यथा।
परमाणुद्वयेनाणुस्त्रसरेणुस्तु ते त्रयः॥
त्रसरेणुत्रिकेणापि त्रुटिरुक्ता मनीषिभिः।
वेधस्त्रुटिशतेनैव त्रिवेधेन लवस्तथा॥
त्रिलवेन निमेषश्च त्रिनिमेषेण च क्षणः।
काष्ठा पञ्चक्षणेनैव लघुश्च दशकाष्ठया॥
लघुपञ्चदशैर्दण्डस्तत्प्रमाणं निशामय।
द्वादशार्द्धपलोन्मा च चतुर्भिश्चतुरङ्गुलैः॥
स्वर्णमाषैः कृतच्छिद्रं यावत् प्रस्थजलप्लुतम्।
दण्डद्वये च मुहूर्त्तः षष्टिदण्डात्मिका तिथिः॥
तदष्टभागः प्रहरः प्रमाणञ्च निरूपणम्।
चतुर्भिः प्रहरै रात्रिश्चतुर्भिर्दिनमेव च॥
तिथिपञ्चदशेनैव पक्षमानं प्रकीर्त्तितम्।
पक्षद्वयेन मासः स्यात् शुक्लकृष्णाभिधेन च॥
ऋतुर्म्मासद्वयेनैव तत्षट्केनैव वत्सरः।
वसन्तग्रीष्मवर्षाश्च शरद्धेमन्तशीतकम्॥
वर्षाः पञ्चविधा ज्ञेयाः कालविद्भिर्निरूपिताः।
संवत्सरः परिवत्सर इडावत्सर एव च॥
अनुवत्सरो वत्सरोऽयमिति कालविदो विदुः।
चान्द्रो द्विषट्कमासैश्च तन्नाम शृणु बोद्धव॥*॥
वैशाखो ज्यैष्ठ आषाढः श्रावणो भाद्र एव च।
आश्विनः कार्त्तिको मार्गः पौषो माघस्तु फाल्गुनः॥
चैत्रस्तु चरमो ज्ञेयो वर्षशेषो निरूपितः।
वसन्तश्चैत्रवैशाखौ मासौ युग्मेन कीर्त्तितः॥
ज्यैष्ठाषाढद्वयेनैव ग्रीष्मस्तु परिकीर्त्तितः।
वर्षा श्रावणभाद्रे च आश्विने कार्त्तिके शरत्॥
मार्गे पौषे च हेमन्तः शिशिरो माघफाल्गुने।
चान्द्रस्तु चायने द्वे च चैत्रोत्तरे दक्षिणायने॥
माघादिषट्कं नियतं उत्तरायणमीप्सितम्।
श्रावणादिमासषट्कं दक्षिणायनमेव च॥
माघादाषाढपर्य्यन्तं दिनार्द्धं क्रमेण वै।
मर्त्त्ये इदं श्रावणाच्च पौषपर्य्यन्तमेव च॥*॥
प्रतिपदः पूर्णिमान्तः शुक्लः पक्षः प्रकीर्त्तितः।
पूर्णिमायाः प्रतिपदः अमावास्यान्त एव च॥
कृष्णपक्षस्तु विज्ञेयो वेदविद्भिर्निरूपितः।
द्वितीया च तृतीया च चतुर्थी पञ्चमी तथा॥
षष्ठी च सप्तमी चैव अष्टमी नवमी तथा।
दशम्येकादशी चापि द्वादशी च त्रयोदशी।
चतुर्दशी कुहूपौर्णमासीस्तु गदनं स्मृतम्॥*॥

अश्विनी भरणी
मृगशिरास्तथार्द्रा च नक्षत्रे ह
पुष्याश्लेषा मघा
हस्ता चित्रा तथा स्वाती
ज्येष्ठा मूला तथा ज्ञेया
श्रवणाप्यभिजिच्चैव धनिष्ठा च
ततः शतभिषा ज्ञेया पूर्व्वभाद्रपदा
तथोत्तरस्तु विज्ञेयो रेवती
अष्टाविंशच्च नक्षत्रं कल्प
क्रमेण ताभिः
सप्तविंशतिनक्षत्रं कल्प
अभिजिच्छ्रवणाख्याया
एकदा च सधी चन्द्रो रोहिण्या
रेमे दिवानिशं
छायां दत्त्वा
ततः पितरमानीय सा
बभूव तेन नक्षत्रमभिजिन्नाम
एतत् श्रुतं त्वन्मुखात्
नक्षत्रं कथितं वत्स तिथ्यां
योगञ्च करणञ्चैव मदुक्तेन
विष्कम्भः प्रीतिरायुष्मान् सौभाग्य
अतिगण्डः सुकर्म्मा च धृतिः
गण्डो वृद्धिर्ध्रुवश्चैव व्याघातो
सिद्धः साध्यः शुभः
ववश्च बालवश्चैव
गरश्च वणिजश्चापि
चतुष्पाच्चापि नागश्च
नराणाञ्चापि मानेन पितॄणां
शुक्ले तेषां दिनञ्चापि कृष्णे
वत्सरेण नराणान्तु सुराणां
दिनन्तेषामुत्तरेण नक्तञ्च दक्षिणे
सम्वत्सरस्तु दिव्यानां
मनोरायुःपरिमितं
पञ्चविंशत्कल्पञ्च तथा
तत्र सूर्य्यगतिर्नास्ति
युगानां षष्टिमधिकं
कालेनैतेन शक्रस्य
चतुर्द्दशेन्द्रावच्छिन्नकालेन
एतेनैव च तद्युग्मं
एतन्तेषां निपतनं
तत्र सूर्य्यगतिर्नास्ति
दिवानिशञ्च जानन्ति
दण्डद्वयं लवपर्व्व
एवं त्रिंशद्दिनैनैव
चान्द्रो द्वादशभिर्म्मासैः
ब्रह्मणः पतनेनैव निमेष
धातुः पातानुसारेण
तत्र सूर्य्यगतिर्नास्ति

समर्द्दनम्, क्ली. (समर्द्दस्य भावः । समर्द + तल्) [illegible] समर्द्दनम् । समर्द्दमन्दात् [illegible]

समर्द्दनं, क्ली. (सम + मर्द + ल्युट् ।) [illegible] ॥ (दश. [illegible]) [illegible]

[illegible]

हसयो मन्दकौशिको माठ विन्दुप्रवेशको ।
वीथ्यङ्गानि च तत्र स्युर्यथालाभं त्रयोदश ।
गायत्र्युष्णिङ्मुखान्यत्र छन्दांसि विविधानि च ।
त्रिशृङ्गारस्त्रिकपटः कार्यश्चायं त्रिविद्रवः ।
वस्तु द्वादशनाडीभिर्निष्पाद्यं प्रथमाङ्कगम् ।
द्वितीयेऽङ्के च तिसृभिर्द्वाभ्यामङ्के तृतीयके ॥
नाडिका घटिकाद्वयमुच्यते । विन्दुप्रवेशकौ च
नाटकोक्तावपि नेह विधातव्यौ । तत्र ।
धर्मार्थकामैस्त्रिविधः शृङ्गारः कपटः पुनः ।
स्वाभाविकः कृत्रिमश्च दैवजो विद्रवः पुनः ॥
अचेतनैश्चेतनैश्च चेतनाचेतनैः कृतः ॥
तत्र शास्त्राविरोधेन कृतो धर्मशृङ्गारः । अर्थ-
लाभार्थकल्पितः अर्थशृङ्गारः । प्रहसन-
शृङ्गारः कामशृङ्गारः । तत्र कामशृङ्गारः
प्रथमाङ्क एव । अन्ययोस्तु न नियम इत्याहुः ।
चेतनाचेतना गजादयः । समवकीर्य्यन्ते बह-
वोऽर्था अस्मिन्निति समवकारः । यथा, समुद्र-
मथनम् ।" इति साहित्यदर्पणे ।६।५१५-५२६॥)

समवकार, पुं.लीवम् । समवपूर्वकत्वधातोरप्-
प्रत्ययेन निपन्न ॥ (यथा, किराते । ५ । ७ ।
[illegible]
[illegible] ॥")

समवर्त्ती, [न्] पुं. (समं वर्त्तते इति । सम् +
वृत + णिनि. ।) यम इत्यमरः ॥ (यथा,
महाभारते । १२ । २०७ । २५ ।
"[illegible] [illegible] समवर्त्तिनम् ।
[illegible] [illegible] ॥")
तुल्यवर्त्तमाने, त्रि ॥

समवाय, पुं, (समवायन्ति इति । सम् + अव +
अय + घञ् ।) समूहः । इत्यमरः ॥ (यथा,
मनुः । ३ । १०८ ।
"[illegible] समवायो [illegible] ॥")
[illegible] । यथा,—
"[illegible] गुणकर्मणोः ।
[illegible] समवाय प्रकीर्त्तितः ॥"
इति भाषापरिच्छेदः ॥
[illegible] । इति सिद्धान्तमुक्तावली ॥

समवेत, त्रि, (सम् + अव + इण् + क्त ।) मिलितः ।
[illegible]

[illegible]
इति [illegible] ॥

"समष्टिरीश [illegible]
तदभावात्तदन्ये तु [illegible]
[illegible]"

समष्ठिल. पुं. (समं तिष्ठति । [illegible]) [illegible] । हिन्दी भाषा । तत्पर्य्यायः । [illegible] १ [illegible] २ [illegible] ३ [illegible] ४ उपदंशः ७ । [illegible] । [illegible] । इति राजनिर्घण्टः ।

समष्ठिला, स्त्री, (समष्ठिल + स्त्रियां [illegible]) गण्डीरः । इत्यमरः ॥ [illegible] इति ख्याते । [illegible] केचित् । [illegible] इति [illegible] सर्व्वानन्दः । [illegible] [illegible] गण्डीरः [illegible] । इति भरत ॥

समष्ठीला, स्त्री. समष्ठिला । [illegible]
"[illegible] गण्डीर [illegible]"

[illegible], स्त्री. (सम् + अस् + [illegible]) इत्यमरः ॥ (समास [illegible])

समसुप्तिः, पुं. (समा [illegible]) कल्पान्तः । प्रलयः । [illegible] २ । ७५ ॥ (यथा, [illegible]) [illegible] ॥

समस्त, त्रि, (सम् + अस् + क्त ।) [illegible] तत्पर्य्याय । समग्रं १ [illegible] ३ [illegible] [illegible] ८ [illegible] ९ [illegible] १२ [illegible] १३ [illegible] १४ [illegible] १५ । इति [illegible] विष्णुपुराणे । १ । ४ । ११ ।
"[illegible]
[illegible]"

समस्य, त्रि. ([illegible]) [illegible] । [illegible] ॥ [illegible] । १० । ६१ ।
"[illegible]
[illegible]"

[illegible]

…दिस्तदीयत्वेन प्रत्यभिज्ञायमानानां …क्षतेन परकृतेन वा भागान्तरेण …घटनं समस्येति माधवी ॥ श्लोकस्य … द्वाभ्यां त्रिभिर्वा पूरणम् । यथा,—
… किं तवाद्यापि चित्रकाननगोचरैः ।
…रायणं येन त्रेतायां रावणो हतः ॥"
…श्लोकादौ पादे पूरणरूपेणायमित्येके ।
…मुकुटः । तत्पर्य्यायः । समासार्था २ । …यसुकुटः । समस्यार्था ३ समासार्था ४ । इति …रः ॥ समस्यार्था ३ समासार्था ४ । इति …: ॥

…ार्था, स्त्री, (समस्या अर्थो यस्याः ।) …स्या । इत्यमरटीकायां भरतः ॥ …स्या । इति शब्दरत्नावली ॥

…द्या, स्त्री, यशः । इति …

…,स्त्री,(सम वैक्लव्ये + पचाद्यच् । ततष्टाप् ।) …त्सरः । इत्यमरः ॥ समति विकलयति भावान् …मा सम सम वैक्लव्ये पचादित्वादच् श्राप् । …मा नित्यबहुवचनान्ताः स्त्रियामिति वामनः …मा नित्यबहुवचनान्ता स्त्रियामिति … समां समां विजायते इत्येकत्वेऽपि दृश्यते …इयः । समां समां विजायते इत्येकवचनेन …इति स्वामी । अतएव समा इति बहुवचनेन …क्वचित् पाठः । समेति कश्चिदेकवचनेन । इति …टीकायां भरतः ॥ (यथा, रामायणे ।१।२।१५।)
"मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥"

समांशहारी,[न्] त्रि, (समांशं हरतीति । हृ + …णिनिः ।) समभागार्हः । यथा, दायतत्त्वे ।
"समांशहारिणी माता पुत्राणां स्यात् मृते पतौ ॥"

समांशिकः, त्रि, (समांशोऽस्त्यस्येति । ठन् ।) समभागार्हः यथा,—
"यदि कुर्य्यात् समानांशान् पत्न्यः कार्य्याः समांशिकाः ।
न दत्तं स्त्रीधनं यासां दत्ते त्वर्द्धं प्रकीर्त्तितम् ॥"
इति दायतत्त्वम् ॥

समांशी,[न्] त्रि, (समांशोऽस्त्यस्येति । इनिः ।) तुल्यभागविशिष्टः । समानभागी । यथा,—
"ज्येष्ठ वा श्रेष्ठभागेन सर्व्वे वा स्युः समांशिनः ॥"
इति दायतत्त्वम् ॥

समांसमीना,स्त्री, (समां समां विजायते इति । "समांसमां विजायते ।" ५।२।१२। इति खः ।) प्रतिवर्षप्रसवा गवी । इत्यमरः ॥

समाकर्षी, [न्] पुं, (समाकर्षति चित्तमिति । सम् + आ + कृष् + णिनिः ।) अतिदूरगामि- गन्धः । तत्पर्य्यायः । निर्हारी २ । इत्यमरः ॥ …गन्धः । तत्पर्य्यायः । … द्रव्ये इयमितरदिति …

…गः ॥ तत, त्रि ॥

…ख्या,स्त्री,(समाख्यायतेऽनयेति । सम् + आ + ख्या + अङ् ।) कीर्त्तिः । इति मन्दरता- …ली ॥ संज्ञा । यथा,—
"…समाख्याभिहिते …
तदाचरणम् ।" इति तिथ्यादितत्त्वम् ॥

समागत, त्रि, (सम् + आ + गम + क्त ।)सम्यगा- गतः । आगमनादनु । यथा,—
"कैर्म्मया सह योद्धव्यमस्मिन् रणसमुद्यमे ।
योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः ॥"
१ । २२ ॥ इति भगवद्गीतायाम् ।

समागतिः, स्त्री, समागमनम् । समाङ्पूर्व्वगम- धातोः क्तिप्रत्ययनिष्पन्नम् ॥

समागमः,पुं,(सं + आ + गम + घञ् ।)सम्यगा- गमनम् । सम्प्राप्तिः । यथा,—
"रतिशक्तिः स्त्रियः कान्ता भोज्यं भोजन- शक्तिता ।
दानशक्तिः सविभवा रूपमारोग्यसम्पदः ।
अल्पस्य तपसः प्रोक्तं फलं ब्रह्मसमागमः ॥"
श्राद्धपुण्यमिदं प्रोक्तं फलं ब्रह्मसमागमः ॥
इति श्राद्धतत्त्वधृतमत्स्यपुराणवचनम् ॥

समाघातः, पुं, (समाहन्यतेऽनेनेति । सं + आ + हन + घञ् ।) युद्धम् । इत्यमरः ॥ (यथा, साहित्यदर्पणे । ६ । ४२१ ।
"सम्फेटस्तु समाघातः क्रुद्धसंरब्धयोर्द्वयोः ॥")
वधः । इति मेदिनी ॥

समाचारः, पुं, (सम् + आ + चर + घञ् ।) सम्यगाचरणम् । यथा,—
"पुरुषस्त्रीणां समाचारं श्रोतुमिच्छामि तत्त्वतः ।"
इति मार्कण्डेये ६६ अध्यायः ॥
संवादः । इति लोकप्रसिद्धः ॥

समाजः, पुं,(संयीयतेऽत्रेति । सं + अज + घञ् । "अजेर्व्यघञपोः ।" २।४।५६। इति वीभावो न । "समुदोरजः पशुषु ।" ३।३।६९। इति … न । "अजिव्रज्योश्च ।" ७।३।६०। इति कुत्वनिषेधः ।) पशुभिन्नानां संघः । इत्यमरः ॥ सभा । इति हेमचन्द्रः ॥ (यथा, भागवते । १० । ४४ । ८ ।
"धर्म्मव्यतिक्रमोऽह्यस्य समाजस्य ध्रुवं भवेत् ।
यत्राधर्म्मः समुत्तिष्ठेन्न स्थेयं तत्र कर्हिचित् ॥")
गजः । इति अनेकार्थकोषः ॥

समाज्ञा,स्त्री, (समाज्ञायते इति । सम् + आ + ज्ञा + "आतश्चोपसर्गे ।" इत्यङ् । टाप् ।) समज्ञा । इत्यमरटीकायां भरतः ॥

समादानं, क्ली, सम् + आ + दा + ल्युट् ।)समी- चीनग्रहणम् । सम्यग्ग्रहणम् । (यथा, महा- भारते । १३ । ८४ । ३५ ।
"सर्व्वं पापमपादानं नृशंसे,चानृते च यत् ।
समस्यान्तु यदा पापं यस्य हर्त्ति पुष्करम् ॥")
सौगतानां नित्यकर्म्म । इति मेदिनी ॥

समाधा, पुं, निष्पत्तिः । विरोधभञ्जनम् । इति लोकप्रसिद्धम् । समाधानम् । समाङ्पूर्व्वधा- धातोर्विप्रत्ययेन निष्पन्नः ॥

समाधानं, क्ली, (सम् + आ + धा + ल्युट् ।) समाधिः । परमेकाग्र्यम् । चित्तैकाग्रतानम् । तत्- पर्य्यायः । प्रणिधानम् २ समाधिः ३ । इति हेमचन्द्रः ॥ चित्तस्य सम्यगैकाग्र्ये च समाधिः समा- धानम् । इति वेदान्तसारः । समाधि-…धान समर्थनं । …

विषयेभ्यो निगृहीतस्यान्तःकरणस्य श्रवणादौ तदनुगुणेषु तदुपकारकेषु अमानित्वादिसाधन- विषयेषु समाभिनैरन्तर्येण तच्चिन्तनं समा- धानमित्यर्थः । इति तट्टीकासुबोधिनी ॥ (यथा, भागवते । २ । २८ । ६ ।
"स्वधिष्ण्यानामेकदेशे मनसा प्राणधारणा ।
वैकुण्ठलीलाभिध्यानं समाधानं तथात्मनः ॥")
पूर्व्वपक्षस्योत्तरम् । इति लोकप्रसिद्धम् ॥(नाट- काङ्गविशेषः । यथा, साहित्यदर्पणे ।६।३३८।
"उपक्षेपः परिकरः परिन्यासो विलोभनम् ।
युक्तिः प्राप्तिः समाधानं विधानं परिभावना ।
उद्भेदः करणं भेद एतान्यङ्गानि वै मुखे ॥"
तल्लक्षणादिकं यथा, तत्रैव । ६ । ३४५ ।
"बीजस्यागमनं यत्तु तत् समाधानमुच्यते ।
यथा, वेणीसंहारे । (नेपथ्ये) भो भो विराटद्रुपदप्रभृतयः । श्रूयताम् ।
'यत् सत्यव्रतभङ्गभीरुमनसा यत्नेन मन्दीकृतं यद्विस्मर्त्तुमपीहितं शमवता शान्तिं कुलस्ये- च्छता ।
तद्द्यूतारणिसम्भृतं नृपसुताकेशाम्बराकर्षणैः क्रोधज्योतिरिदं महत् कुरुवने यौधिष्ठिरं जृम्भते ॥'
अत्र 'सुखा भवन्ति मयि जीवतीति' आदि- बीजस्य प्रधाननायकाभिमतत्वेन सम्यगाहित- त्वात् समाधानम् ॥"॰॥)

समाधिः,पुं,(समाधीयतेऽस्मिन् मनो अनेनेति । सम् + आ + धा + "उपसर्गे घोः किः ।" इति किः ।) समर्थनम् । नीवाकः । नियमः । इत्य- मरः ॥ (यथा, कुमारे । ५ । ६ ।
"यथाचतारस्त्वनियाममात्मनः …
फलोदयान्ताय तपःसमाधये ॥")
समर्थनं अगस्य अध्यवसायः दुर्घटस्य घटनत्व … समर्थनं … इति स्वामी ॥ वा । नीवाको यत्नमाभावः । इति … धान्यादिषु मूल्योत्कर्षपूर्व्वको अनादरः । इति … सुभूतिः ॥ नियमः अङ्गीकारः । … समा … भयः । समाधीयतेऽस्मिन् मनो अनेनेति कि … इति भरतः ॥ ध्यानम् । काव्यगुणविशेष … इति मेदिनी ॥ (अर्थालङ्कारविशेषः । … साहित्यदर्पणे । १० । ७४० ।
"समाधिः सुकरं कार्य्यं दैवाद्वस्त्वन्तरागम …
यथा,—
"मानमस्या निराकर्त्तुं पादयोर्मे पतिष्य … उपकाराय दिष्ट्येदमुदीर्णं घनगर्जितम् …
समाधायत्रेनेति … इति … रघुः । १ । ६८ ।
सामर्थ्यम् । (यथा, रघुः । १ । ६८ ।
"न …
… मेदिनी । … काव्यगुण …
…

अपि च तत्रैव २४० अध्याये ।

"द्वादशध्यानपर्य्यन्तं मनो ब्रह्मणि यो नरः ।
तुष्टे तु संयतो युक्तः समाधिः सोऽभिधीयते ॥
ध्येयमेव हि सर्व्वत्र ध्याता तन्मयतां गतः ।
पश्यति द्वैतरहितं समाधिः सोऽभिधीयते ॥"

अन्यच्च विष्णुपुराणे । ६ । ७ । ९० ।

तस्यैव कल्पनाहीनं स्वरूपग्रहणं हि यत् ।
मनसा ध्याननिष्पाद्यं समाधिः सोऽभिधीयते ॥"

अपरञ्च ।

"इमं गुणसमाहारमनात्मत्वेन पश्यतः ।
अन्तः शीतलता यस्य समाधिरिति कथ्यते ॥"

इति योगवाशिष्ठे उपशमप्रकरणम् ॥

योगाङ्गविशेषः । यथा । समाधिस्तु द्विविधः । सविकल्पको निर्विकल्पकश्चेति । तत्र सविकल्पको नाम ज्ञातृज्ञानादिविकल्पलयानपेक्षया द्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरवस्थानम् । तदा मृण्मयगजादिभानेऽपि मृद्भानवत् द्वैतभानेऽप्यद्वैतं वस्तु भासते । तदुक्तमभियुक्तैः

"दृशिस्वरूपं गगनोपमं परं
सकृद्विभातं त्वजमेकमक्षयम् ।
अलेपकं सर्व्वगतं यदद्वयं
तदेव चाहं सततं विमुक्तम् ॥
दृशिस्तु शुद्धोऽहमविक्रियात्मको
न मेऽस्ति बन्धो न च मे विमोक्षः ॥"

इत्यादि ॥*॥

निर्विकल्पकस्तु । ज्ञातृज्ञानादिविकल्पलयापेक्षया द्वितीयवस्तुनि तदाकाराकारिताया बुद्धिवृत्तेरतितरामेकीभावेनावस्थानम् । तदा तु जलाकाराकारितलवणानवभासेन जलमात्रावभासवद्द्वितीयवस्त्वाकाराकारितचित्तवृत्त्यनवभासेनाद्वितीयवस्तुमात्रमेवावभासते । ततश्चास्य सुषुप्तेश्चाभेदशङ्का न भवति उभयत्र वृत्त्यभाने समानेऽपि तत्सद्भावासद्भावमात्रेणानयोर्भेदोपपत्तेः । अस्याङ्गानि यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयः । तत्र अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहा यमाः ।१। शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः ।२। करचरणादिसंस्थानविशेषलक्षणानि पद्मस्वस्तिकादीन्यासनानि ।३। रेचकपूरककुम्भकलक्षणाः प्राणनिग्रहोपायाः प्राणायामाः ।४। इन्द्रियाणां स्वस्वविषयेभ्यः प्रत्याहरणं प्रत्याहारः ।५। अद्वितीयवस्तुन्यन्तरिन्द्रियधारणं धारणा ।६। तत्राद्वितीयवस्तुनि विच्छिद्य विच्छिद्य अन्तरिन्द्रियवृत्तिप्रवाहो ध्यानम् ।७। समाधिस्तूक्तः सविकल्पक एव ।८। एवमस्याङ्गिनो निर्विकल्पकस्य लयविक्षेपकषायरसास्वादलक्षणाश्चत्वारो विघ्नाः सम्भवन्ति । लयस्तावत् अखण्डवस्त्वनवलम्बनेन चित्तवृत्तेर्निद्रा ।१। अखण्डवस्त्वनवलम्बनेन चित्तवृत्तेरन्यावलम्बनं विक्षेपः ।२। लयविक्षेपाभावेऽपि चित्तवृत्ते रागादिवासनया स्तब्धीभावादखण्डवस्त्वनवलम्बनं कषायः ।३। अखण्डवस्त्वनवलम्बनेनापि चित्तवृत्तेः सविकल्पानन्दास्वादनं रसास्वादः । समाध्यारम्भसमये सविकल्पानन्दास्वादनं वा ।४। अनेन विघ्नचतुष्टयेन रहितं चित्तं निर्व्वातदीपवदचलं सदखण्डचैतन्यमात्रमवतिष्ठते यदा तदा निर्व्विकल्पकः समाधिरित्युच्यते ॥*॥ तदुक्तम् ।

"लये सम्बोधयेत् चित्तं विक्षिप्तं शमयेत् पुनः ।
सकषायं विजानीयात् शमप्राप्तं न चालयेत् ॥
नास्वादयेद्रसं तत्र निःसङ्गः प्रज्ञया भवेत् ॥"

इत्यादि । यथा दीपो निवातस्थो नेङ्गते इत्यादि च । इति श्रीसदानन्दयोगीन्द्रविरचितवेदान्तसारः ॥ (स्वनामख्यातवैश्यविशेषः । अयं हि महामायामाराध्य परं ज्ञानमलभत् । अस्य विशेषवृत्तान्तस्तु देवीमाहात्म्ये द्रष्टव्यः ॥)

समाधिस्थः, त्रि, (समाधौ तिष्ठतीति । स्था + कः । समाधियुक्तः । यथा,—

"मनः संकल्परहितमिन्द्रियार्थानचिन्तयन् ।
यस्य ब्रह्मणि संलीनं समाधिस्थः स कीर्त्तितः ॥
ध्यायतः परमात्मानमात्मस्थं यस्य योगिनः ।
मनस्तन्मयतां याति समाधिस्थः स कीर्त्तितः ॥"

इति गारुडे गीतासारे २४० अध्यायः ॥

समानं, त्रि,(समानीति सम्यक्प्रकारेण प्राणितीति । सम् + आ + अन + ल्युः । यद्वा,समानं मानमस्य । समानस्य च्छन्दसीति सः ।)सत् । समम् । यथा, रघुः । २ । ७४ ।

"भुजे भुजङ्गेन्द्रसमानसारे
भूयः स भूमेर्धुरमाससञ्ज ॥")

एकम् । इति मेदिनी ॥ (यथा, मनुः ।४।४० ।

"नोपगच्छेत् प्रमत्तोऽपि स्त्रियमार्त्तवदर्शने ।
समानशयने चैव न शयीत तया सह ॥"*॥

मानेन सह वर्त्तमानमिति विग्रहे गर्व्वसहितम् । यथा, भागवते । १ । १६ । ३६ ।

"कोर्य्यं समानमहरत् मधुमानिनीनां
रोमोत्सवो मम यदङ्घ्रिविटङ्किताया: ॥")

समानः,पुं,(सम्यक् आनयतीति । सम् + आ + अन + अच् ।) शरीरस्थवायुविशेषः । स तु नाभिसंस्थितः । हृद्यमरमतौ ॥ (यथा,—

"हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः ॥")

वर्णभेदे । इति हेमचन्द्रः ॥ स तु एकस्थानोच्चार्य्यवर्णः । यथा । साम्यक्के कस्थानत्वम् । इति मुग्धबोधव्याकरणम् ॥

समानकालीनः, त्रि, (समानकाले भवः । समान काल + खः ।) तुल्यकालोत्पन्नः । यथा । गोषु दुह्यमानासु गतः दुग्धास्वागत इत्यादौ समानकालीनत्वं भावे । तेन गोविषयककर्म्मानन्तरोत्पत्तिकाहावृत्तित्वकृततिमात् । तत्र गोविषयकानन्तरदोहनसमानकालीनात्मागमनकालयोरनुभवनात् । इति मारप्रबोधे ॥

समानोदक, पुं, (समानं उदकं तर्पणजलं देयमुदकं यस्य ।) सगोत्रः । स तु प्राणिविशेषः । तर्पणे समानं एकमुदकमस्य

"जातो नङ्गः सगोत्रस्तु स्वजनभ्रातिरस्य सकुल्यबन्धुदायादस्समानोदका अपि ।"

इति शब्दरत्नावली ।

स तु चतुर्द्दशपुरुषपर्य्यन्तः [illegible] पर्य्यन्तश्च । तत्र आद्यस्यैकादशपुरुषात् चतुर्द्दशपुरुषपर्य्यन्तस्याशौचं पक्षिणी त्रिरात्रं एकाहः । यथा । उदकक्रियामशौचञ्च संस्कारः । सर्व्वे ज्ञातयो भावयन्ति । [illegible]

मनुरपि युक्तौ इति भावयन्ति [illegible]

अत्र यावत्

मिति स्मरणं भवतीत्यनेनैव [illegible] प्राप्ते यदा समानादृशमादुक्तं तत्रविशेषं सम्येनाशौचभेदोऽप्युदककर्म्म समानं [illegible] अशौचभेदस्तु सप्तमपुरुषपर्य्यन्तं अशौचं त्र्यहः । ततश्च दशमपुरुषपर्य्यन्तं त्र्यहः तथा च विष्णुवृहस्पती ।

"दशाहेन सपिण्डास्तु शुध्यन्ति प्रेतसूतके ।
त्रिरात्रेण सकुल्यास्तु स्नात्वा शुध्यन्ति गोत्रजाः ।"

ततश्चतुर्द्दशपुरुषपर्य्यन्तं [illegible] सप्तमपर्य्यन्तमेकाहः । तथा च विवादचिन्तामणौ वृहन्मनुः ।

"सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते ।
समानोदकभावस्तु निवर्त्तेताचतुर्द्दशात् ।
जन्मनामस्मृतेरेके तत्परं गोत्रमुच्यते ।"

अत्र समानोदकत्वे द्विविधे पूर्व्व पक्षिणीमसपिण्डे । परम शातातपः । त्रिरात्रं स्यादेकाहस्त्वसपिण्डे इति । गोत्रजानामहः स्नानमिति [illegible] मतः परं सर्व्वं वा समानोदकानामिदं [illegible] मात्रमिति स्नात्वा शुध्यन्ति गोत्रजा इति [illegible] अत्युक्तत्वादिति । इति शुद्धितत्त्वम् ।

समानोदर्य्यः, पुं, (समाने उदरे शयितः । समानोदरे शयितः सोदराद्यः ।" ४ । ४ । १०८ । इति यत् । "विभाषोदरे ।" ६ । ३ । ८८ । इति पक्षे सादेशो न ।) सहोदरः । (यथा, भट्टिः । ७ । ८६ ।

"समानोदर्य्यमभ्यार्ज्य जटायुर्दृष्टवान् [illegible]

समापः,पुं,(समा आपो यस्मिन् । [illegible]

"समाप देवे प्रतिषेधो वक्तव्य ।" [illegible] इत्यस्य वार्त्तिकोक्त्या देवतनिषेध ।) [illegible] सम् । इति मुग्धबोधव्याकरणम् ।

समापकः, त्रि, समापनकर्त्ता । [illegible] संपूर्व्वापधातोर्णकप्रत्ययेन निष्पन्न । [illegible]

"वाच्यात्मस्थितादन्येषां [illegible] समापकत्वात् ।" इति दुर्गादासः ।

समापनं,क्ली,(सम + आप् + ल्युट् ।) [illegible] समाप्तिः । (यथा, मनुः । ४ । ९८ ।

"यादृशो मोदकं कुर्यादा [illegible]
समाप्ते दृश्यं कृत्वा [illegible]

नी ॥ समाधानम्। इति
इति धरणिः ॥
+आ+पद्+क्तः।)समासः।
यधः। इति विश्वः ॥
(समापयतीति। सम्+आप्+
त इत्वम्।) वाक्यसमापक-
तिप्रादयो भवन्ति। यथा।
हति। क्वचित् क्त्वादिपदेनापि
:। यथा। नाम्ना दृष्टः शिवो
त् तव्याद्यन्तक्रियाया अपि वाक्य-
। यथा। मया कां दिशं गन्तव्यम्।
क्रिया असमापिका। तत्र शवा-
न्त। यथा। गच्छन् भुङ्क्ते। भुक्त्वा
इति व्याकरणटीका ॥
त्रि, (सम्+आप्+णिच्+क्तः।)
पनम्। यथा,—
मलमासात् प्राक् यत् कर्म्म न
समापितम्।
मलमासेऽपि तत् समाप्यं न संशयः ॥"
इति मलमासतत्त्वम् ॥
, त्रि, (सम्+आप्+क्तः।) समापन-
। समाप्तिविशिष्टः। यथा,—
मासे यदि जानीयान्मयैतदन्यथाकृतम्।
स्तदन्यथाभूतं तत एव समापयेत् ॥"
इति तिथ्यादितत्त्वम् ॥
ासालः, पुं,(समाप्ताय अलतीति। अल+
च्।) पतिः। इति संक्षिप्तसारोणादिवृत्तिः ॥
ाप्तिः, स्त्री, (सम्+आप्+क्तिन्।) अव-
ानम्। (यथा, कुमारे। ३।२७।
"सद्यः प्रवालोद्गमचारुपत्रे
नीते समाप्तिं नवचूतवाणे।
निवेशयामास मधुर्द्विरेफान्
नामाक्षराणीव मनोभवस्य ॥")
। इति मेदिनी ॥ परिप्राप्तिः। इति
मर्थनम्। इति मेदिनी ॥
शब्दरत्नावली ॥
ाप्तार्था, स्त्री, (समाप्तः अर्थो यस्याः।)
समस्या। इति समासार्थाशब्दटीकायां
रतः ॥
ाप्यं, त्रि, (सम्+आप्+ण्यत्।) समा-
नीयम्। समापितव्यम्। अस्य प्रमाणं समा-
पितशब्दे द्रष्टव्यम् ॥
ायोगः, पुं, (सम्+आ+युज+घञ्।)
गः। (यथा, मनुः। ८। ३३।
वभूता स्मृता नारी वीजभूतः स्मृतः
पुमान्।
ववीजसमायोगात् सम्भवः सर्व्वदेहिनाम् ॥")
मवायः। प्रयोजनम्। इति मेदिनी ॥
ालम्बी [न्] पुं, (समालम्बते इति। सम्+
आ+लम्ब+णिनिः।) भूतृणम्। इति राज-
निर्घण्टः ॥
ालम्भः, पुं (सम्+आ+लभ+घञ्। "उप-
सर्गात् खलघञोः।"। ७।१।६७। इति नुम्।)
कुङ्कुमादिविलेपनम्। इत्यमरः ॥ (यथा, महा-
भारते। १३। १२१। ८।
"गोरोचनासमालम्भो वचाहस्तश्च यो भवेत्।
घृताचतश्च यो दद्यात् मस्तके तत्परायणः।
ये च मांसं न खादन्ति तान्न शक्नुम हिंसि-
तुम् ॥"
मारणम्। यथा, महाभारते। १२। ३४। २८।
"वृथा पशुसमालम्भं नैव कुर्य्यान्न कारयेत् ॥")
समालभनं, क्ली, (सम्+आ+लभ+ल्युट्।)
कुङ्कुमादिविलेपनम्। तत्पर्य्यायः। विच्छित्तिः २
कषायः ३। इति त्रिकाण्डशेषः ॥ समालम्भः ४
विलेपनम् ५। इत्यमरः ॥ (यथा, रामायणे।
४। २६। २८।
"समालम्भनमादाय गोरोचनमनःशिलाम्।
आजग्मुस्तत्र मुदिता वराः कन्याश्च षोड़श ॥")
सम्यक्स्पर्शनम्। यथा। अत
सम्यङ्मारणम्। सम्यक्स्पर्शनम्। यथा। अत
ऊर्द्ध्वसमालम्भनमाद्यरात्रादिति गोभिल-
सूत्रम् ॥
समाली, स्त्री, कुसुमाकरः। इति त्रिकाण्डशेषः ॥
समावर्त्तनं, क्ली, सम्+आ+वृत्+ल्युट्।)
गार्हस्थ्याधिकारप्रयोजकं
वेदाध्ययनान्तरं गार्हस्थ्याधिकारप्रयोजकं
कर्म्म। यथा। "अथ समावर्त्तनम्। ज्योतिषे।
'भौमभानुजयोर्व्वारे नक्षत्रे च व्रतोदिते।
ताराचन्द्रविशुद्धौ च समावर्त्तनमिष्यते ॥'
गोभिलः। अथाप्लवनम्। अथ व्रतानन्तर-
माप्लवनं स्नानं कुर्य्यादिति शेषः। उत्तरतः
पुरस्तादाचार्य्यकुलस्य परिव्रतं भवति।
आचार्य्यगृहादुत्तरस्यां पूर्व्वस्यां वा स्नानार्थं
माहृतं स्नानं कुर्य्यात्। अत्र प्रागग्रेषु दर्भेषु
उदगाचार्य्य उपविशति तत्राहृते उदक्
उदङ्मुखः प्राक् ब्रह्मचार्य्युदगग्रेषु दर्भेषु। प्राक्
प्राङ्मुख उपविशतीत्यन्वयः। सर्व्वौषधि-
विफाण्डाभिरद्भिर्गन्धवतीभिः शीतोष्णाभिरा-
चार्य्योऽभिषिञ्चेत्। सर्व्वौषधयश्च।
"व्रीहयः शालयो मुद्गा गोधूमाः सर्षपास्तिलाः
यवाश्चौषधयः सप्त विपदो घ्नन्ति धारिताः ॥"
इति छन्दोगपरिशिष्टोक्तास्ताभिः सह या
आपो विफाण्डा विपक्वा उष्णीकृतास्ताः सर्व्वौ-
षधिविफाण्डास्ताभिर्गन्धवतीभि-श्चन्दनादि-गन्ध
द्रव्ययुक्ताभिः शितोष्णाभिः शीतोदकमिश्र-
ताभिरिति भट्टभाष्यम् ॥ स्वयमेव तु मन्त्रवर्णा
भवति। स्वयमेव ब्रह्मचारी
भवति। तुशब्द एवार्थे। आचार्य्यकर्त्तृकाभिषेकस्तु
आत्मानमभिषिञ्चेत्। आचार्य्यकर्त्तृकाभिषेकस्तु
परमतो यतो मन्त्रवर्णा भवन्ति। मन्त्रवर्णः
अभिषेकमन्त्रलिङ्गं तच्च तेनाहं मामभिषिञ्चामि
इति तेन मामभिषिञ्चितमिति च। तद्विधि-
माह। येऽप्स्वन्तरग्नयः प्रविष्टा इत्यपामञ्जलि-
मवसिञ्चति। येऽप्स्वन्तरग्नय इति मन्त्रेण-
कामापामञ्जलिं ब्रह्मचारी अवसिञ्चति। क
भूमौ कुतः अवसिञ्चति वचनात्। तन्मन्त्रस्था-
भिहितान् सृजामीति यदपामिति मन्त्रस्याभि-
हितान् सृजामि इति मन्त्रलिङ्गदयाच्च सप्तो-
धारत्वेन प्राप्तायां भूमौ त्यजति। यदपां घोर
यदपां क्रूरं यदपामशान्तमिति च। अपाम-
ञ्जलिमवसिञ्चतीति वर्त्तते चकारात्। यो रोचन-
स्तमिह गृह्णामीत्यात्मानमभिषिञ्चति। प्रक्र-
तानामपामञ्जलिना यो रोचन इति मन्त्रेण
ब्रह्मचारी आत्मानमभिषिञ्चति। ओम् यशसे
तेजसे इति च। आत्मानमभिषिञ्चतीति वर्त्तते।
येन स्त्रियमकृणुतमिति च। आत्मानमभिषिञ्च-
तीति वर्त्तते। तूष्णीं चतुर्थम्। आत्मानमभिषिञ्च-
तीति वर्त्तते। अभिषेकः शिरसि कर्त्तव्यः शिरः
प्रधानमङ्गानामिति वचनात्। उपोत्थाया-
दित्यमुपतिष्ठेत उद्यन् भ्राजभृष्टिभिरित्येतत्-
प्रभृतिमन्त्रेण। आचार्य्यसमीपादुत्थाय उद्य-
न्नित्येतत्प्रभृतिमन्त्रेण मा हिंसीरित्यन्तमन्त्रेणा-
दित्यमुपतिष्ठेत उपात्मन्त्रेण चेत्यात्मनेपदम्।
मेखलामवमुञ्चते उदुत्तमं वरुणमिति। अव-
मुञ्चते अधस्तादवतारयति अवशब्दो अधस्ता-
दर्थे। ब्राह्मणान् भोजयित्वा स्वयं भुक्त्वा केश-
श्मश्रुरोमनखानि वापयतीति शिखावर्ज्जम्।
ब्राह्मणान् भोजयित्वा स्वयं भुक्त्वा नापितेन
मुण्डयीत। अत्र शिखावर्ज्जमिति वचनात्
प्राक् सशिखं वपनमिति दर्शयति। उक्तञ्च।
सशिखं वपनं कार्य्यमास्नानात् ब्रह्मचारिणा
इति। स्नात्वा अलङ्कृत्याहते वाससी परिधाय
स्रजमावध्नीत श्रीरसि मयि रमस्वेति। अलङ्कृत्य
कुण्डलादिनात्मानं योजयित्वा आहते।
"ईषद्धौतं नवं शुभ्रं सदशं यन्न धारितम्।
आहतं तद्विजानीयात् सर्व्वकर्म्मसु पावनम् ॥"
इति वशिष्ठोक्तलक्षणे।
ईषत् सूक्ष्मम्। न धारितं न परिधानादि कृतम्।
स्रजं ग्रथितपुष्पं आवध्नीत शिरसीति शेषः।
स्रजं ग्रथितपुष्पं आवध्नीत शिरसीति शेषः।
श्रीरसीति मन्त्रेण। नेत्र्यौ स्थो नयत मामित्यु-
पानहौ। आवध्नीतेत्यनुवर्त्तते। उपानहौ चर्म्म-
पादुके योग्यत्वात् पादयोः। गन्धर्व्वोऽसीति
मन्त्रेण वैणवं दण्डं गृह्णाति। वैणवं वंशप्रभवं
गन्धर्व्वोऽसीति मन्त्रेण। आचार्य्यं सपरिषत्क-
मभ्येत्याचार्य्यपरिषदमीक्षते। यक्षमिव चक्षुषः
प्रियो वो भूयासमिति। सपरिषत्कं शिष्यादि-
सभासहितं अभ्येत्याभिमुख्येन गत्वा आचार्य्यं
परिषदञ्चेक्षते यक्षमिति मन्त्रेण। उपोपविश्य
मुख्यान् प्राणान् संस्पृशन् ओष्ठापिधाना नकु-
लीति उपाचार्य्यसमीपे मुख्यान् प्राणान् मुख-
प्रभवान् वायून् संस्पृशन् स्नातकः। ओष्ठापि-
धानमिति मन्त्रं जपेत्। अत्रैनमाचार्य्योऽर्ह-
येत्। अत्रावसरे एनं स्नातकं विवाहोक्तवरा-
र्हणविधिनार्च्चयेत्। तदग्रतो गन्धपुष्पाभ्याम्।
गोयुक्तं रथमुपक्रम्य पक्षसी कूबरबाहू राभि-
मृशेत्। वनस्पतिविड्वङ्गो हि भूया इति।
पक्षसी चक्रे। कूबरं रथिकस्थानम्। बाहू रं
रथरश्मीत्यर्थः। वनस्पतीति मन्त्रेणाभिमृशेत्
स्पृशेत्। आस्थाता ते जयतु जेत्वानीत्यातिष्ठति।
रथमारुह्य आस्था ते जयतु जेत्वानीति वन-

मते इत्यादिमन्त्रस्य चतुर्थपादेनातिष्ठति । उपविशति प्राप्य उदगग्राभिमयाय प्रदक्षिणमावृत्य उपयाति । तेन रथेन प्राङ्मुखो वा प्रयाय प्रकर्षेण गत्वा उपयाति आचार्यसमीपमागच्छति उपयातायार्घ्यमिति कौथुमीयाः । उपयातायाचार्यसमीपमागतायार्घ्यं देयमिति कौथुमीया आचार्य्या आहुः । रथाभावेऽपि मन्त्रपाठाचारः । चरुकरणे तण्डुलावघातादिवत् । अस्य कर्मणः समावर्त्तनसंज्ञापि ।

गुरुणानुमतः स्नात्वा समावर्त्ती यथाविधि ।
उद्वहेत द्विजो भार्य्यां सवर्णां लक्षणान्विताम् ॥"

इति मनुः ॥

स्पष्टं गौणकारियाम् । कुर्व्वीत स्वयमेवैतत् समावर्त्तनसंज्ञकम् ।" इति संस्कारतत्त्वम् ॥

समाम्नायः, पुं, समूहः । इत्यमरटीकायां भरतः । (यथा, भागवते । २ । ८ । १२ ।

"यस्मिन् कर्म्मसमाम्नायो यथा येनोपगृह्यते ।
गुणानां गुणिनां चैव परिणाममभीप्सताम् ॥")

समावृतः, त्रि, (सम् + आ + वृ + क्तः ।) सम्यक् प्रकारेण आवृतः । यथा,—

"जय त्वं कालि भूतेशि सर्व्वभूतसमावृते ।
रक्ष मां निजभूतेभ्यो बलिं भुङ्क्ष्व नमोऽस्तु ते ॥"

इति दुर्गार्च्चनप्रयोगतत्त्वम् ॥

समावृत्तः, पुं, (सम् + आ + वृत् + क्तः ।) वेदाध्ययननिवृत्तः । तत्पर्य्यायः । समावृत्तः २ । इत्यमरः ॥ साङ्गवेदाध्ययनानन्तरं त्वमिदानीं स्वच्छन्दो भव इति गार्हस्थ्याय प्राप्ताज्ञागुरुमतिः समावृत्त उच्यते । समावर्त्तते अध्ययनात् निवर्त्तते इति समाङ्पूर्व्वात् वृतेः कर्त्तरि क्ते समावृत्तः । इति भरतः ॥

"स्नात्वा परं समावृत्तः कुर्य्याद्दारपरिग्रहम् ।"

इति उद्वाहतत्त्वम् ॥ *॥

तत्र समावर्त्तने मुख्यं यथा अधीताधिकारि-[illegible] । [illegible] परिणायनमिति । [illegible] समावृत्तानां [illegible] । यत् पुनराक्षस्तम्बः । न समावृत्ता वपेयुरन्यत्र वीहारादित्येके । वीहारात् [illegible] समा-वृत्ता [illegible] न वपेयुः । इत्येकेषां मतम् । तत् [illegible] । इति शुद्धितत्त्वम् ॥

समावृत्तकः, पुं, (समावृत्त एव । स्वार्थे कन् ।) समावृत्तः । इति शब्दरत्नावली ॥

समावेशः, पुं, (सम् + आ + विश + घञ् ।) एकत्र अवस्थानम् । यथा । [illegible] [illegible] । [illegible] [illegible] । न [illegible] । इति [illegible] [illegible] । (यथा, [illegible] । १ । ६ ।

"[illegible] ।
[illegible] ॥")

समावेशितः, त्रि, सहावस्थितः । प्रविष्टः । समावेशप्राप्तः । समावेश-शब्दादितप्रत्ययेन निष्पन्नः ॥

समाश्रयः, पुं, (सम् + आ + श्रि + अच् ।) सम्यगाश्रयः । (यथा, रघुः । ८ । १२ ।

"समरस्थसमाश्रयोन्मुखं
शिरसा वेष्टनशोभिना सुतः ।
पितरं प्रणिपत्य पादयो-
रपरित्यागमयाचतात्मनः ॥"

सम्यगाधारः । सहायः । समाङ्पूर्व्वकश्रिधातोरल्प्रत्ययेन निष्पन्नः ॥

समाश्रितः, त्रि, (सम् + आ + श्रि + क्तः ।) सम्यक्प्रकारेणाश्रितः । यथा,—

"रवेः कवेः किं समरस्य सारः
कर्णेभयं किं किमदन्ति भृङ्गाः ।
सदा भयश्चाप्यभयश्च केषां
भागीरथीतीरसमाश्रितानाम् ॥"

इत्यन्तर्लापिका ॥

समासः, पुं, (सम् + अस् + घञ् ।) संक्षेपः । (यथा, मनुः । ७ । २०२ ।

"सर्व्वेषान्तु विदित्वैषां समासेन चिकीर्षितम्
स्थापयेत् तत्र तद्वंश्यं कुर्य्याच्च समयक्रियाम् ॥")

समर्थनम् । इति मेदिनी ॥ समाहारः । इति हलायुधः ॥ एकपद्यम् । इति हेमचन्द्रः ॥ समसनं पदयोः पदानां वा एकपदीकरणं समासः । इति संक्षिप्तसारव्याकरणम् ॥ स च षड्विधः । द्वन्द्वः १ बहुव्रीहिः २ कर्म्मधारयः ३ तत्पुरुषः ४ द्विगुः ५ अव्ययीभावः ६ । तेषां लक्षणं यथा । मिथान्येकार्थद्व्यादिसंख्याव्यादीनां च-ह-य-ष-ग-वाः । इति मुग्धबोधव्याकरणम् ॥ *॥ अपि च ।

"नाम्नां समासो युक्तार्थस्तत्पुरुषा लोप्या विभक्तयः ॥"

इति वैयाकरणाः ॥ तस्य सामान्यलक्षणं यथा । अभिधानान्वितलोपाभावपदमध्यवर्त्तिविभक्तिशून्यसमास-समुदायत्व समासत्वम् । तत्र कर्म्मधारयद्विगु-तत्पुरुष-बहुव्रीहि-द्वन्द्वाव्ययीभावाः षट्समासा भवन्ति । तत्र कर्म्मधारयत्वं समासनियतलक्षणाशून्याभेदाप्राप्यसंख्यावाचक-पूर्व्वपदकान्यमध्यवर्त्तिविभक्तिशून्यतुल्याधिकरणपदसमुदायत्वम् । यथा नीलोत्पलमित्यादि ॥ १ ॥

तत्र द्विगुत्वम् । समासाधीनलक्षणाशून्यमध्यपदवर्त्तिविभक्ति-शून्याबाधप्राप्यसंख्यावाचक पूर्व्वपदक तुल्याधिकरणनामसमुदायत्वम् । स च तद्धितार्थे विषयीभूते तद्धितार्थेऽभिधेये उत्तरपदे वा समाहारे वाभिधेये भवति । उत्तरपदं पारिभाषिकं यत्पदघटितसमासान्तर्वर्त्ति द्विगुत्तरपदं तत् पदम् । तेन च पञ्चगावो धनमस्य पञ्चगवधन इत्यत्र द्विगुः न तु पञ्चगावः सन्तीति । तद्धितार्थे विषयीभूते यथा पञ्च सु कपालेषु संस्कृतः पञ्चकपालः पुरोडाशः पञ्चमाद्धृत्यः पञ्चनापितिः द्वैमातुर इत्यादि । तद्धितार्थेऽभिधेये यथा पञ्च गावः धनमस्य । समासस्य सम्भृतोऽयं संस्कारे,

[illegible] वैचित्र्यात् तथा च [illegible]
यथाभिन्न ओदनः । [illegible]
धानात् [illegible]
पञ्चगवं चतुष्पथं द्विपाद्रं त्रिभुवनं [illegible]
दयः । उत्तरपदे यथा । [illegible]
तत्पुरुषत्वन्तु । [illegible]
[illegible]पदकमध्यवर्त्तिविभक्ति- [illegible]
यथा । राजपुरुषः । कष्टाश्रितः । पुरेण
इत्यादि ॥ ३ ॥

[illegible]

बहुव्रीहित्वम् । [illegible]

[illegible]

यत्वं वा [illegible]
त्वं वा बहुव्रीहित्वम् । बहुव्रीहि[illegible]
समानाधिकरणो व्यधिकरणश्च ।
गृहधान्यकार्य्येषु [illegible] चक्रपाणिना [illegible]
इत्यादि ॥ ४ ॥
[illegible]
[illegible]
त्वम् । यथा धवखदिरपलाशाः [illegible]
द्विविधो द्वन्द्वः । इतरेतरयोग [illegible]
समाहारस्यावयवार्थः प्रधान [illegible]
द्विवचनेऽपि तत्रैव । यथा । देवदत्तयज्ञ[illegible]
धवखदिरपलाशाः । इति [illegible]
तत्र समाहारस्तत्रैकवचनं नपुंसकत्वं [illegible]
यथा वाग्दृषदं हस्त्यश्वम् । इत्यादि ॥ ५ ॥
[illegible]
[illegible] विभक्तिशून्य तत्पुरुषान्यत्व [illegible]
अव्ययीभावत्वम् । यथा । [illegible]
क्षिक अधिस्त्रि इत्यादि ॥ ६ ॥ [illegible]
वादः ॥ * ॥ अन्यच्च ।
"यादृशस्य [illegible]
यादृशार्थस्य बोधेऽत्र स समासस्तदा[illegible]
यादृशमहावाक्योत्तरः [illegible]
गार्थाविच्छिन्नविषयतासामिरीये [illegible]
तद्वाक्य तदभिधार्थे समास । [illegible]
"स चायं षड्विध कर्म्मधारयादि[illegible]
यद्वोपपदसमोऽन्यस्तेनासौ [illegible]
पूर्व्वमध्यास्यमस्त्रांश्चपदप्राधान्यतः पुनः [illegible]
प्राच्यैः पञ्चविधः प्रोक्तः समासो [illegible]
तेषु कर्म्मधारयं लक्षयति ।
"क्रमिकं यथासमयुगनिश्चा[illegible]
तादात्म्येन भवेदेष समासः कर्म्मधा[illegible]
क्रमिक यथासमयतयोरश्च [illegible]
तादात्म्येनापरमार्थोऽयं [illegible]
समदं तादृशनामद्वयं कर्म्मधारयः ।
नीलोत्पलम् ॥ १ ॥ द्विगुं लक्षयति ।
"संख्यासमभ्युत नाम तदक्षण[illegible]
पर्य्यवसितैव यत् स्यार्थे स द्विगुर्[illegible]
संख्यावच्छिन्नयस्य यत् [illegible]
स्वार्थधर्म्मिकं [illegible]

र्ं प्रति समर्थं तन्नामोत्तरतापन्नं तन्नामैव
तस्थार्थाभिन्नस्यार्थे द्विगुरुच्यते। तत्र
तार्थद्विगुं लक्षयति।
द्धितार्थान्वितस्वार्थस्तद्धितार्थद्विगुर्मतः।
तार्थे लाक्षणिकस्यान्त्यनाम त्वसम्बं गः॥
द्विगुः स उत्तरतद्धितार्थान्वितस्वार्थकः॥"
रपदद्विगुं लक्षयति।
ान्तर्निविष्टशब्दाभ्यां शब्दान्तरसमासगः।
द्विगुः शाब्दिकैरुक्तः स उत्तरपदद्विगुः॥"
द्विगुः स्वघटकनामभ्यां सह साकाङ्क्षनामा-
ेण समासस्यान्तर्गतः स उत्तरपदद्विगुः।
। पञ्चगवधनः। समाहारद्विगुं लक्षयति।
ार्थान्वितसमाहारलक्षकः स्वान्त्यशब्दकः।
ाभ्यामिनरः किं वा समाहारद्विगुर्द्विगुः॥"
ापञ्चाद्यार्थस्य समाहारलक्षको यदीयान्त्य-
ः स द्विगुः समाहारद्विगुः। यथा पञ्चपुली-
ादि॥ २॥ तत्पुरुषं लक्षयति।
यदीयेन सुबर्थेन युतयद्बोधनक्षमः।
: समासस्तस्य तत्र स तत्पुरुष उच्यते॥"
ार्थगतेन सुबर्थेन विशिष्टस्य यदर्थस्यान्वय-
धं प्रति यः समासः स्वरूपयोग्यः स तदर्थस्य
र्थे तत्पुरुषः। न तु यन्नामोत्तरं यन्नाम
ार्थगतसुबर्थावच्छिन्नस्य यत् स्वार्थस्य बोधकं
ात्तरतन्नामैव तदर्थयोस्तत्पुरुषः। पूर्व्वका-
ार्द्धपिप्पलीत्यादावव्याप्तेः। विभजते।
द्वितीयादिसुबर्थस्य भेदादेव च षड्विधः।
ायान्वयी द्वितीयादेरर्थः प्रायोऽत्र
योजितः॥"३॥
व्ययीभावं लक्षयति।
उत्तरार्थान्वितस्वार्थाव्ययपूर्व्वस्तु यो भवेत्।
समासः सोऽव्ययीभावः स्त्रीपुंलिङ्गविवर्जितः॥"
समासः सोऽत्तरपदोपस्थाप्येन यदर्थेनान्वि-
त्य यदर्थस्य बोधकाव्ययपूर्व्वभागकः स तद्वि-
शिष्टस्य तदर्थस्य बोधने अव्ययीभावः। यथा
ामक्षिकं उपकुम्भमित्यादि।
समासादिशं विना श्रूयमाणषष्ठी न बोधिका।
ार्थे यदर्थस्य यद्वा सोऽव्ययीभाव इष्यते॥"
ासादेशं विना श्रूयमाणषष्ठी स्वार्थे यत् समा-
ार्थस्यान्वयबोधं प्रत्यसमर्था स एव वाव्ययी-
ाव: श्रूयमाणैव षष्ठी स्वार्थे समासान्तरार्थ-
ान्वयबोधनेऽसमर्था न तु लुप्तापि॥ ४॥
बहुव्रीहिं लक्षयति।
बहुव्रीहिः स्वगर्भार्थसम्बन्धित्वेन बोधकः।
ानरूढ़्या लक्षणया स्वांशज्ञापकशब्दवान्॥"
ांशस्य निरूढ़लक्षणया ज्ञापकेन शब्देन
टितः स्वगर्भस्य यादृशार्थस्य सम्बन्धित्वप्रकारे-
ान्वयबोधं प्रति समर्थः समासः स्वगर्भतादृ-
ार्थसम्बन्धिबोधने बहुव्रीहिः।
"अस्यैकं प्रथमान्तं सत् सुबन्तैरितरैः सह।
यदा भेदसुबन्तेन साकाङ्क्षं नाम विग्रहः॥"
अस्य बहुव्रीहिघटकमेकं नाम प्रथमान्तं सत्
सुबन्तैरितरनामभिः सह भेदार्थकसुबन्तयच्छ-

ब्देन साकाङ्क्षं विग्रहः कथ्यते। बहुव्रीहिं विभ-
जते।
"तदतद्गुणसंविज्ञानौ द्वौ भेदौ तदादिमः।
विग्रहस्य विशेष्यो यस्तद्विशेष्यकबोधकृत्॥"
तत्र विग्रहवाक्यस्य विशेषविधया प्रत्याय्यो
योऽर्थस्तद्विशेष्यकबोधकृत् बहुव्रीहिस्तयोरा-
दिमः तद्गुणसंविज्ञानः। तस्य स्वार्थगुणी-
भूतस्य सम्यग्विशेष्यविधया विज्ञानं यस्मिन्निति
व्युत्पत्त्या स्वार्थान्वयः संज्ञात्वात् तद्भिन्नया
तद्गुणसंविज्ञानपरम इत्यर्थादवगम्यते।
प्राचां मतेन तद्गुणसंविज्ञानबहुव्रीहिमन्यथा
निर्व्वक्ति।
"यः स्वार्थघटकार्थस्य स्वार्थान्वयिनि बोधने।
अनुकूलो बहुव्रीहिः स तयोरथवादिमः॥"
यो बहुव्रीहिः स्वार्थस्यान्वयिनि स्वार्थघटक-
स्याप्यर्थस्यान्वयबोधने समर्थः स तयोस्तद्-
गुणातद्गुणयोरादिमः। लम्बकर्णमानय हार-
ग्रीवं पश्य इत्यादि। पुनर्विभजते।
"स्वान्तर्निविष्टद्वित्र्यादिनामभिर्विग्रहात् पुनः
बहुव्रीहिर्बहुविधो द्विपदत्रिपदादिकः॥"
द्वित्रिचतुरादिभिरेव स्वघटकनामभिर्विग्रह-
वशात् द्विपदत्रिपदचतुष्पदादिको बहुव्रीहि-
र्व्वोध्यः॥ ५॥ द्वन्द्वं लक्षयति।
"यद्यदर्थकयन्नामव्यूहो यद्यत्प्रकारके।
बोधे समर्थः स द्वन्द्वः समासस्तावदर्थकः॥"
यद्यदर्थोपस्थापकस्य क्रमिकयादृशनामस्तो-
मस्य नियमस्तदर्थप्रकारकान्वयबोधं प्रति
तत्तेन समर्थस्तादृशनामनिवह एव तावदर्थको
द्वन्द्वसमासः। द्वन्द्वं विभजते।
"द्वौ भेदावस्य शास्त्रोक्तौ समाहारेतरेतरौ।
एकान्यवचनाकाङ्क्षा हानोपादानतश्च तौ॥"
अस्य द्वन्द्वस्य द्वौ भेदौ समाहार इतरेतरश्च
शास्त्रसिद्धौ। तत्रैकवचनान्यसुबाकाङ्क्षाविहीनः
समाहारः। तथाविधसुबाकाङ्क्षी इतरेतरः।
यथा। पाणिपादं हस्त्यश्वं धवखदिरौ।
इत्यादि॥ ६॥ उपपदसमासं लक्षयति।
"यदुत्तरपदं नामानुत्तरं यदबोधकम्।
धातुकृत्सुपपदसमासः स तदन्तकः॥"
धातुकृद्भ्यां निष्पन्नं यस्योत्तरपदं शब्दानुत्तरं
स यादृशार्थस्य बोधं प्रत्यसमर्थं तादृशार्थे तादृ-
शार्थकान्यपदकः समास उपपदसंज्ञकः। कुम्भ-
कारः क्षीरपायीत्यादि। विभजते।
"कारकैकोपपदकः षड्विधोऽयमिति भ्रमः।
कर्म्मकर्त्राद्युपपदभेदात् बहुविधस्त्वसौ॥"७॥
इति शब्दशक्तिप्रकाशिका॥
समासक्तः, त्रि, (सम्+आ+सञ्ज+क्तः।)
संयुक्तः। यथा, कर्पूरादिस्तवे।
"त्रिपञ्चारे पीठे शवशिवहृदि स्मेरवदनां
महाकालेनोच्चैर्मदनरसलावण्यनिरताम्।
समासक्तो नक्तं स्वयमपि रतानन्दनिरतो
जनो यो ध्यायेत्त्वामयि जननि स स्यात् स्मर-
हरः॥"

समासञ्जनं, क्ली, (सं+आ+सञ्ज+ल्युट्।)
समासङ्गः। मेलनम्। संयोगः। समाङ्-
पूर्व्वकसन्जधातोरनट्प्रत्ययेन निष्पन्नम्॥
समासन्नं, त्रि, निकटस्थम्। समाङ्पूर्व्वसदधातोः
क्तप्रत्ययेन निष्पन्नम्॥ (यथा, रघुः। १०। ३५।
"अथ वेलासमासन्नशैलरन्ध्रानुनादिना।
स्वरेणोवाच भगवान् परिभूतार्णवध्वनिः॥")
समासवान्, [त्] पुं, (समासः संक्षेपोऽस्त्यस्येति।
समास+मतुप्। मस्य वः।) तुन्नवृक्षः। इति
शब्दचन्द्रिका॥ समासविशिष्टे, त्रि॥
समासादितः, त्रि, (सम्+आ+सद्+णिच्+
क्तः।) आहृतः। प्राप्तः। समाङ्पूर्व्व ण्यन्त-
सदधातोः क्तप्रत्ययेन निष्पन्नः॥
समासाद्यं, त्रि, (सम्+आ+सद्+ण्यत्।)
प्राप्यम्। इत्यमरः॥ अनुस्वारशून्यश्चेत् प्राप्त्य-
नन्तरबोधकक्रिया॥ (यथा, महाभारते। ५।
१६। १६।
"अपां फेनं समासाद्य विष्णुतेजोऽभिबृंहितम्
त्वया हतो हतः पूर्व्वं देवराज! जगत्पते!॥")
समासार्था, स्त्री, (समासेन संक्षेपेण अर्थो
यस्याः।) समस्या। श्लोकस्य पादेनैकेन द्वाभ्यां
त्रिभिर्व्वा पूरणम्। इत्यमरभरतौ॥
समाहरणं, क्ली, (सं+आ+हृ+ल्युट्। समा-
हारः। समाङ्पूर्व्वकहृञ्धातोरनट्प्रत्ययेन
निष्पन्नम्॥
समाहारः, पुं, (सं+आ+हृ+घञ्।) समु-
च्चयः। इत्यमरः॥ बहूनां भिन्नानां वाक्य-
व्यापारेण बुद्ध्या वा पञ्चमूली त्रिभुवनवत्
राशीकरणम्। इति भरतः॥ संक्षेपः। यथा,
"समासस्तु समाहारः संक्षेपः संग्रहोऽपि च।"
इति हेमचन्द्रः॥
समाहारद्वन्द्वसमाहारद्विगुसमासयोर्व्विवरणं
समासशब्दे द्रष्टव्यम्॥
समाहितः, त्रि, (सम्+आ+धा+क्तः।) समा-
धिस्थः। यथा, देवीभागवते। १। १७। ६६।
"स्नात्वा प्रातःक्रियां कृत्वा पुनरास्ते समा-
हितः॥")
उक्तसिद्धान्तः। आहितः। निर्व्विवादीकृतः।
प्रतिज्ञातः। इति मेदिनी॥ निष्पन्नः। इति
धरणिः॥ शुचौ, पुं। इति शब्दरत्नावली॥
समाहृतः, त्रि, सम्यक्प्रकारेण आहरणीकृतः।
संगृहीतः। एकत्रीकृतः। संक्षेपेण प्रति-
पादितः। समाङ्पूर्व्वकहृधातोः क्तप्रत्ययेन
निष्पन्नः॥
समाहृतिः, स्त्री, (सम्+आ+हृ+क्तिन्।)
संग्रहः। इत्यमरः॥ एककर्तृकाणामनेककर्तृ-
काणां वा एकाभिप्रायाणां वाक्यानां समा-
हरणं समाहृतिः। समाह्रियते संक्षेपेण प्रति-
पद्यते अनया समाहृतिः। संपूर्व्वात् आङ्पू-
र्व्वात् हृ ञ हरणे इत्यस्मात् क्तिः। इति भरतः॥
समाह्वयः, पुं, (समाह्वयतेऽनेनेति। सम्+आ+
ह्वे+पुंसीति घः। बाहुलकात् नात्वम्।)

द्यूतम्। आह्वानम्। इति शब्दरत्नावली॥ पद्यपक्षिद्यूतम्। सङ्गरम्। इति मेदिनी॥०॥ तस्य निषिद्धत्वं यथा,—
"द्यूतं समाह्वयञ्चैव राजा राष्ट्रान्निवारयेत्।
राज्यान्तकरणावेतौ द्वौ दोषौ पृथिवीक्षिताम्॥
प्रकाशमेतत् तास्कर्य्यं यद्देवनसमाह्वयौ।
तयोर्नित्यं प्रतीघाते नृपतिर्यत्नवान् भवेत्॥
अप्राणिभिर्यत् क्रियते तल्लोके द्यूतमुच्यते।
प्राणिभिः क्रियते यस्तु स विज्ञेयः समाह्वयः॥
द्यूतं समाह्वयञ्चैव यः कुर्य्यात् कारयेत वा।
तान् सर्व्वान् घातयेद्राजा शूद्रांश्च द्विजलिङ्गिनः॥"
इति मानवे। ९। २२१—२२४॥

समाह्वा, स्त्री, (सम्यक् आह्वा यस्याः।) गोजिह्वाक्षुपः। इति शब्दचन्द्रिका॥ समाख्या च॥

समिकं,स्त्री,शैलम्। इति शब्दरत्नावली॥ वँड़ सा इति भाषा॥

समित्, स्त्री, (समीयतेऽत्रेति। सम्+इण्+क्विप्।) युद्धम्। इत्यमरः॥ (यथा, महाभारते। ५। २२। २३।
"पाण्डवः राजा समितीन्द्रकल्पो
युधि प्रवीरैर्वृष्णिभिः समेतः॥")

समिध्, [ध्] स्त्री, (समिध्यतेऽनयेति। इन्ध+क्विप्) अग्निसन्दीपनार्थलघुकाष्ठादिः। तत्पर्य्यायः। इन्धनम् २ एधम् ३ इध्मम् ४ एधः ५। इत्यमरः॥ समिन्धनम् ६। एतस्मिन् सुक्तं किलिञ्जम्। इति शब्दरत्नावली॥ *॥
होमीयसमिल्लक्षणं मत्स्यपुराणे।
"प्रादेशमात्राः समिधः सवल्काश्च पलाशिनीः।
समिधः कल्पयेत् प्राज्ञः सर्व्वकर्म्मसु सर्व्वदा॥"
लक्षणान्तरं यथा, छन्दोगपरिशिष्टम्।
"नाङ्गुष्ठादधिका न्यूना समित् स्थूलतया क्वचित्
न निर्म्मुक्तत्वचा चैव न सकीटा न पाटिता॥
प्रादेशान्नाधिका नोना न तथा स्याद्विशाखिका।
न सपत्रा न निर्वीर्य्या होमेषु च विजानता॥"
इति संस्कारतत्त्वम्॥ *॥
तस्य निषिद्धलक्षणं यथा,—
"विशीर्णा विदला ह्रस्वा वक्राः स्थूला द्विधाकृताः।
कृमिदष्टाश्च दीर्घाश्च समिधो नैव कारयेत्॥"
अत्र दोषो यथा,—
"विशीर्णायुःक्षयं कुर्य्याद्विदला पुत्रनाशिनी।
ह्रस्वा नाशयते पत्नीं वक्रा बन्धुविनाशिनी॥
कृमिदष्टा रोगकरी विद्वेषकरणी द्विधा।
पशून् मारयते दीर्घा स्थूला चार्थविनाशिनी॥"
इति तत्त्वम्॥०॥
नवग्रहाणां समिधो यथा,—
"अर्कः पलाशः खदिरस्त्वपामार्गोऽथ पिप्पलः।
उडुम्बरः शमी दूर्व्वा कुशाश्च समिधः क्रमात्॥"
इति संस्कारतत्त्वे याज्ञवल्क्यवचनम्॥

समिता, स्त्री, (सम्यक्प्रकारेण इता प्राप्ता।) गोधूमचूर्णम्। इति हेमचन्द्रः॥ मयदा इति भाषा॥ तस्या लक्षणं यथा,—
"गोधूमा धवला धौताः कुट्टिताः शोषितास्ततः।
प्रक्षिप्ताः सा विनिष्पिष्टाश्चालिताः समिता स्मृता॥"
इति राजनिर्घण्टः॥

समितिः, स्त्री, (संयन्त्यस्यामिति। सं+इण्+क्तिन्।) सभा। यथा, महाभारते।१।२।२२९।
"प्रभाते राजसमितौ मन्त्रयो यत्र वा विभोः।
ऐकात्म्यं वासुदेवस्य प्रोक्तवानर्ज्जुनस्य च॥")
युद्धम्। (यथा, भागवते। २। ७। ३४।
"ये वा मृधे समितिशालिन आत्तचापाः
काम्बोजमत्स्यकुरुसृञ्जयकैकयाद्याः॥")
सङ्गः। इत्यमरमेदिनीकरौ॥ साम्यम्। इति हेमचन्द्रः॥ (सन्निपातः। इति श्रीधरस्वामी॥ यथा, भागवते। ११। २६। ८।
"प्रवृत्तिलक्षणे निष्ठा पुमान् यर्हि गृहाश्रमे।
स्वधर्म्मे चानुतिष्ठेत गुणानां समितिर्हि सा॥")

समिथः, पुं, (समेतीति। सम्+इण्+"समीणः।" उणा० २। ११। इति थक्।) अग्निः। इत्युणादिकोषः॥ युद्धम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (यथा, ऋग्वेदे। ४। २०। ८।
"गिर्वाणः समिथेषु प्रहावान्
वस्वो राशिमभिनेतासि भूरिम्॥"
अस्मिन्नर्थे क्वचित् क्लीवेऽपि दृश्यते। यथा, तत्रैव। १। ५५। ५।
"स इद्वनानि समिथानि मज्मना
कृणोति युध्म ओजसा जनेभ्यः॥")
आहुतिः। इति संक्षिप्तसारोणादिवृत्तिः॥

समिद्, [ध्] स्त्री, (समिध्यतेऽनयेति। सम्+इन्ध+क्विप्।) समित्। इत्यमरः॥ (यथा, मनुः। २। १७६।
"नित्यं स्नात्वा शुचिः कुर्य्यात् देवर्षिपितृतर्पणम्।
देवताभ्यर्च्चनञ्चैव समिदाधानमेव च॥")

समिद्धः, पुं, (सं+इन्ध+क्तः।) प्रदीप्तः। यथा, कात्यायनः।
"योऽनर्च्चिषि जुहोत्यग्नौ व्यङ्गारिणि च मानवः।
मन्दाग्निरामयावी च दरिद्रश्च स जायते।
तस्मात् समिद्धे होतव्यं नासमिद्धे कदाचन॥"
इति संस्कारतत्त्वम्॥

समिधः, पुं, (समिध्यते इति। सं+इन्ध+कः।) अग्निः। इति त्रिकाण्डशेषः॥ (यथा, रामायणे। २। २४। ६।
"अयन्तु मामात्मभवस्तवादर्शनमारुतः।
विलापदुःखसमिधो रुदिताश्रुहुताहुतिः॥")

समिन्धनं, क्ली, (समिध्यतेऽनेनेति। सं+इन्ध+ल्युट्।) समित्। इति शब्दरत्नावली॥ (यथा भट्टिः। २। २८।
"तपोमरुद्भिर्भवतां शरान्निः
संधुक्ष्यतां नोऽरिसमिन्धनेषु॥")

समिरः, पुं, वायुः। इति हेमचन्द्रः॥

समीकं, क्ली, (सम्+"अलीकादयश्च।" ...) युद्धम्। इत्यमरः॥ (यथा, कुमारे। ...
"तमिषवो विद्रवने समीके
रिरिक्षामस्तम्भः ...॥")

समीक्षितं, त्रि, एकोक्षतम्। ...
धातौ परे समयश्चात् ...

समीक्षा, क्ली, (सम्यगीक्ष्यतेऽनेनेति। सम्+...
घञ्।) सांख्यशास्त्रम्। ...
सम्यग्दर्शनञ्च॥

समीक्षणं, क्ली, सम्यक्प्रकारेण दर्शनम्। संपूर्व्वेक्षधातोरनट्(ल्युट्)
नम्॥ (प्रकाशके त्रि। यथा, ...
"त्वमर्कदृङ्मर्च्चदृशां समीक्षणो
हसो गुरुर्न स्वगतिं बुभुत्सन्॥")

समीक्षा, स्त्री, (सम्+ईक्ष+गुरोश्च ...
तत्त्वम्। बुद्धिः। निभालनम्। ...
मीमांसाशास्त्रम्। यत्न। ...
वन्नी॥ (आत्मविद्या। इति काशी।
भागवते। ११। २८। ३४।
"एवं समीक्षा निपुणा सती मे
हन्यात् तमिन्द्रं पुरुषस्य बुद्धेः॥"
सम्यग्दर्शनम्। यथा, भागवते। १...
"आम्नवतो मामनुरागहास-
समीक्षया विस्मयन् वाच॥")

समीचः, पुं, (संयन्ति नद्यो यत्र।
इण्+"समीचः।" उणा० ४। ...
चट्। दीर्घश्च।) समुद्रः।

समीचकः, पुं, मैथुनम्। इति केचित्।

समीची, स्त्री, (संयातीति। सं+इण्...
ङीप्।) मृगी। इत्युणादिकोषः।
इति त्रिकाण्डशेषः॥

समीचीन,क्ली, (सम्यगेव। सम्यच्+...
"अचेरदिक् स्त्रियाम्।" ५। ४। ८। ...
यथार्थम्। तत्पर्य्यायः। सत्यम् ...
ऋतम् ४ तथ्यम् ५ यथातथम् ६
सद्भूतम् ८। इति हेमचन्द्रः॥ ...
(यथा, भागवते। २। ४। ५।
"समीचीनं वचो ब्रह्मन् सर्व्वभूत...
तमो विशीर्य्यते मह्यं हरेः ...

समीदः, पुं, गोधूमचूर्णम्। इति केचित्।

समीनः,त्रि,(समामधीष्टो भृतो भूतो भावी वा।
समा+"समायाः खः।" ५। १। ८५। ...
खः।) वत्सरसम्बन्धी। समायस्त्...
प्रत्ययेन निष्पन्नः॥

समीनिका, स्त्री, प्रतिवर्षप्रसूता गौः। इति
शब्दचन्द्रिका॥

समीपः, त्रि, (सङ्गता आपो यत्र।
"ऋक्पूरब्धूःपथामानक्षे।" ५। ४। ७४। ...
"द्व्यन्तरुपसर्गेभ्योऽप ईत्।" ६। ३। ९७।
इति ईत्।) निकटः। इत्यमरः॥ (...
दृश्यते। यथा, मनुः। २। १०...

वां समीपे नियतो नैत्यिकं विधिमाश्रितः।
विक्नीमप्यधीयीत गत्वारण्यं समाहितः॥")
पता, क्लो, नैकट्यम्। समीपत्वम्। सामीप्यम्।
ीपशब्दात् तस्प्रत्ययेन निष्पन्नम्॥
यः, त्रि, (सम + "गहादिभ्यश्च।" ४।२।
८। इति छः।) समसम्बन्धी। तुल्यका-
कः। समशब्दात् णीयप्रत्ययेन निष्पन्नः॥
रः, पुं, (सम्यगीर्त्ते गच्छतीति। सं + ईर
ो + कः।) वायुः। इत्यमरः। १।१।६५॥
यथा, माघे। ४।५४।
"समीरगिशिरः शिरःसु वसतां
सतां जवनिका निकामसुखिनाम्॥")
रोहवः। इति राजनिर्घण्टः॥
रणः, पुं, (समीरयतीति। सम् + ईर + ल्युः।)
युः। (यथा, कुमारे। १।८।
"यः पूरयन् कीचकरन्ध्रभागान्
दरीमुखोत्थेन समीरणेन।
उद्गास्यतामिच्छति किन्नराणां
तानप्रदायित्वमिवोपगन्तुम्॥")
थकः। इत्यमरः।२।४।७८॥ पथिकः। इति
दिनी॥ (क्ली, सं + ईर + ल्युट्। प्रेरणम्।
ा, महाभारते। ८।८४।२३।
"शरामिघाताच्च रुषा च राजन्
स्वया च भासास्त्रसमीरणाच्च॥")॥
रके, त्रि। यथा, हरिवंशे। १०२।२२।
तोऽपिबत् पाण्डुराभ्राभस्तत्कालं प्रातिभिर्वृतः
ान्तरगतो रामः पानं मदसमीरणम्॥")
ख:, त्रि, (मुखेन सह वर्त्तमानः।) वाग्मी।
वदूकः। इति हेमचन्द्रः॥
चितः, त्रि, सम्यगुचितः। उपयुक्तः। यथा,—
दासस्ते किंवा जननि वयमुच्चैर्जड़धियो
धाता नापीशो हरिरपि न ते वेत्ति परमम्
ापि त्वद्भक्तिर्मुखरयति चास्माकमसिते
देतत् क्षन्तव्यं न खलु पशुरोषः समुचितः॥"
इति तन्त्रसारधृतश्यामास्तोत्रम्॥
चयः, पुं, (सं + उत् + चि + अच्।) समा-
रः। इत्यमरः। ३।२।१६॥ यथा,—
रागी द्वयोर्बहूनाञ्च समाहारः समुच्चयः॥"
इति शब्दरत्नावली॥
यथा, कुमारे। १।४९।
"सर्व्वोपमाद्रव्यसमुच्चयेन
यथाप्रदेशं विनिवेशितेन।
सा निर्म्मिता विश्वसृजा प्रयत्ना-
देकस्थसौन्दर्य्यदिदृक्षयेव॥")
च्छेदः, पुं, विनाशः। संपूर्व्वोत्पूर्व्वच्छिदधातो-
ञ्प्रत्ययेन निष्पन्नः॥ (यथा, किराते।११।४८
वंशलक्ष्मीमनुद्धृत्य समुच्छेदेन विद्विषाम्।
निर्व्वाणमपि मन्ये ऽहमन्तरायं जयश्रियः॥")
च्छ्रयः, पुं, (सं + उत् + श्रि + अच्।) विरोधः।
उत्सेधः। इति मेदिनी॥ (यथा, रघुः।८।२०।
"कनधूपसमुच्छ्रयशोभिनी
वितमसा तमसासरयूतटाः॥")

समुच्छ्रायः, पुं, समुच्छ्रयः। समुत्पूर्व्वश्रिधातो-
र्घञ्प्रत्ययेन निष्पन्नः॥
समुच्छ्रितः, त्रि, उच्चः। समुत्पूर्व्वश्रिधातोः
क्तप्रत्ययेन निष्पन्नः॥
समुज्झितः, त्रि, (सम् + उज्झ उत्सर्गे + क्तः।)
त्यक्तः। इत्यमरः। ३।१।१०७॥
समुत्क्रमः, पुं, ऊर्द्ध्वगमनम्। समुत्पूर्व्वक्रमधातो-
र्घञ्प्रत्ययेन निष्पन्नः॥
समुत्क्रोशः, पुं, (समुत्क्रोशतीति। सं + उत् +
क्रुश + अच्।) कुररपक्षी। इति शब्दरत्ना-
वली॥ (भावे घञ्।) उच्चैःशब्दः॥
समुत्थः, त्रि, (समुत्तिष्ठतीति। सं + उत् +
स्था + कः।) समुद्भवः। समुत्थितः। समुत्-
पूर्व्वस्थाधातोर्डप्रत्ययेन निष्पन्नः॥ (यथा,
मनुः। ७।४५।
"दश कामसमुत्थानि तथाष्टौ क्रोधजानि च।
व्यसनानि दुरन्तानि प्रयत्नेन विवर्ज्जयेत्॥")
समुत्थानं, क्ली, (सम् + उत् + स्था + ल्युट्।)
समुद्योगः। (यथा, महाभारते। ३।३२।७
"सर्व्वे हि स्वं समुत्थानमुपजीवन्ति जन्तवः।
अपि धाता विधाता च यथायमुदके बकः॥")
व्याधीनां निर्णयः। इति मेदिनी॥ (यथा,
मनुः। ८।२८७।
"अङ्गावपीड़नायाञ्च व्रणशोणितयोस्तथा।
समुत्थानव्ययं दाप्यः सर्व्वदण्डमथापि वा॥")
ऊर्द्ध्वगमनम्। सम्यक्प्रकारेण उत्थानम्। उत्तो-
लनम्। यथा,—
"इन्द्रध्वजसमुत्थानं प्रमादात्र कृतं यदि।
तदा द्वादशमे वर्षे कर्त्तव्यं नान्तरा पुनः॥"
इति तिथ्यादितत्त्वम्॥
समुत्थितः, पुं, (सम् + उत् + स्था + क्तः।) सम्य-
गुत्थितः। यथा,—
"समुत्थितस्त्वं श्रवणाद्यपादे
गृहाण पूजां भगवन्नमस्ते॥"
इति तिथ्यादितत्त्वे शक्रोत्थानपूजामन्त्रः॥
समुत्पन्नः, त्रि, (सम् + उत् + पद + क्तः।) समु-
द्भूतः। यथा,—
"पुस्तकस्था च या विद्या परहस्तगतं धनम्।
कार्य्यकाले समुत्पन्ने न सा विद्या न तद्धनम्॥"
इति चाणक्यम्॥
समुत्पिञ्जः, त्रि, (सम् + उत् + पिजि हिंसायाम्
+ अच्।) अत्यन्तव्याकुलः। यथा,—
"उत्पिञ्जलसमुत्पिञ्जपिञ्जला भृशमाकुले॥"
इति हेमचन्द्रः॥
समुत्पिञ्जः, पुं, (सम् + उत् + पिञ्ज + पचाद्यच्।
भृशमाकुलसैन्यम्। इत्यमरः। २।८।९८॥
समुत्सुकः, त्रि, (सम्यगुत्सुकः।) सम्यगुत्कण्ठितः।
इति हेमचन्द्रे उत्सुकशब्दार्थदर्शनात्॥ सम्य-
गिष्टार्थोद्युक्तः। इत्यमरे उत्सुकशब्दार्थ-
दर्शनात्॥ (यथा, रघुः। १।३३।
"तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः।
विलम्बितफलैः कालं स निनाय मनोरथैः॥")

समुदक्तं, त्रि, (समुदच्यते स्मेति। सम + उत् +
अन्च + क्तः।) उद्धृतम्। कूपादेरुद्धृत-
जलादि। इत्यमरः। ३।१।९०॥
समुद्भूतः, त्रि, (सम् + उत् + भू + क्तः।) समुत्-
पन्नः। यथा, देवीमाहात्म्ये।
"साब्रवीत्तान् सुरान् सुभ्रूर्भवद्भिस्तूयतेऽत्र का
शरीरकोषतश्चास्याः समुद्भूताब्रवीच्छिवा॥"
समुदयं, क्ली, (सम् + उत् + इण् + अच्।)
लग्नम्। यथा,—
"सामर्थ्यं तनु कल्पते समुदये वित्तं कुटुम्बं ततो
विक्रान्तिं सहजं तृतीयभवने योधश्च सञ्चि-
न्तयेत्।"
इत्यादि ज्योतिस्तत्त्वम्॥
पञ्चार्द्धचक्रान्तर्गतचतुर्थनाड़ी। सा तु जन्म-
नक्षत्रावधिकाष्टादशनक्षत्ररूपा। तत्पर्य्यायः।
सामुदायिकम् २। यथा, ज्योतिस्तत्त्वे।
"जन्मर्क्षं कर्म्म ततो दशमं सांघातिकं
षोड़शभम्।
समुदयमष्टादशभं विनाशसंज्ञं त्रयोविंशम्॥
सन्तापं सामुदायिके मित्रभूत्यर्थसंचयः॥"
समुदयः, पुं, (सम् + उत् + इण् + अच्।) समूहः।
इत्यमरः। २।५।४०॥ (यथा, कथासरित्-
सागरे। १०।१९६।
"तमुपाजग्मतुस्तौ च सेनासमुदयान्वितौ।
तं विज्ञायैव संवर्ध्य मुदा दुहितृवत्सलौ॥")
युद्धम्। (यथा, महाभारते। ६।११९।४४।
"द्रोणः पाञ्चालपुत्रेण समागम्य महारणे।
महासमुदयं चक्रे शरैः सन्नतपर्व्वभिः॥")
समुद्गमः। इति मेदिनी॥ दिवसः। इति
शब्दचन्द्रिका॥
समुदागमः, पुं, (सम् + उत् + आ + गम + घञ्।
समन्ताज्ज्ञानम्। इति त्रिकाण्डशेषः॥
समुदाचारः, पुं, (सम् + उत् + आ + चर +
घञ्।) आशयः। इति त्रिकाण्डशेषः॥
समुदायः, पुं, (सम् + उत् + अय + घञ्।)
समूहः। युद्धम्। इत्यमरः। २।५।४०॥
२।८।१०६॥ पृष्ठस्थायिबलम्। इत्यजयः॥
समुच्छ्रयः। इति मेदिनी॥
समुदितः, त्रि, सम्यक्प्रकारेण कथितः। संपूर्व्व-
वदधातोः क्तप्रत्ययेन निष्पन्नः। उदयं प्राप्तः।
समुद्गतः। संपूर्व्वोत्पूर्व्वेणधातोः क्तप्रत्ययेन
निष्पन्नः॥
समुद्गः, पुं, (समुद्गच्छतीति। सम् + उत् + गम् +
अन्येष्वपीति डः।) सम्पुटकः। इति हेम-
चन्द्रः॥ (यथा, रामायणे। २।९१।७५।
"गृहीतचन्दनकल्कांश्च समुद्गेष्ववतिष्ठतः॥"
मुद्गेन सह वर्त्तमानः।) मुद्गसहितश्च॥
समुद्गकः, पुं, (समुद्ग एव। स्वार्थे कन्।) सम्पुटकः।
इत्यमरः। २।६।१३८॥ सौंपुड़ा इति ख्याते।
समुद्गच्छतीति इनजनाद्रसादेरिति डे समुद्गः
ततः स्वार्थे कः। सम्पुटति ट्यं संश्लिष्टो भवति
सम्पुटकः पुट श्लि संषे इगुपधत्वात् कः ततः

स्वार्थे कः। इति भरतः॥ (यथा, कथा-सरित्सागरे। १८। ४७।
"भिक्षुः प्रपञ्चबुद्ध्याख्यः समुद्गकमुपानयत्॥")
चन्द्रोविशेषश्च॥

समुद्गमः, पुं, ऊर्द्ध्वगतिः। उत्पत्तिः। सम्पूर्व्वात् उत्पूर्व्व गमधातोः अल् प्रत्ययेन निष्पन्नः॥(यथा, कथासरित्सागरे। १११। ८८।
"शुष्कतामग्निहोत्राणि धूमराजिसमुद्गमैः।
प्रदर्शयद्दिवारोहमार्गं दिवि तपस्विनाम्॥")

समुद्गीतं, त्रि, उच्चैर्गीतम्। समुत्पूर्व्व गैधातोः क्तप्रत्ययेन निष्पन्नम्॥

समुद्गीर्णः, त्रि, वमितः। उत्तोलितः। कथितः। समुत्पूर्व्व गॄधातोः क्तप्रत्ययेन निष्पन्नः॥

समुद्घतः, त्रि, (सम्+उत्+हन+क्तः।) अविनीतः। इत्यमरः। ३।१।२॥ समुद्गीर्णः। इति हेमचन्द्रः॥

समुद्धरणं, क्ली, (सम्+उत्+हृ+ल्युट्।) वान्तान्नम्। उन्नयः। इत्यमरः॥ वान्तार्थं उद्गीर्णं: उन्नयः कूपादेर्जलाद्युत्तोलनं द्वयोः शुक्तन्नं वा अनयोः समुद्धरणम्। समुद्ध्रियते उत्तोल्यते यत् समुद्धरणं कर्म्मण्यनट्। भुक्तोज्झितोन्मूलितयोः स्यादुद्धरणमुन्नये। इति रभसः। इति भरतः॥ (यथा, महाभारते। १२। ३२७। १८।
"सोऽक्रूयमाणस्तद्वाक्यं समुद्धरणनिश्चितः।
अथाह तां तदा शक्तिं न चैनां स व्यकम्पयत्॥"

समुद्धृतं, त्रि, (सम्+उत्+हृ+क्तः।) समुत्-क्षिप्तम्। अपनीतम्। इति मेदिनी॥ सम्यक् प्रकारेण उद्धृतम्। उत्थापितम्। यथा,—
"जलौघमग्ना सचराचरा धरा
विषाणकोट्याखिलविश्वमूर्त्तिना।
समुद्धृता येन वराहरूपिणा
स मे स्वयम्भुर्भगवान् प्रसीदतु॥"
इति पाण्डवगीता॥

समुद्रः, पुं, जलसमूहस्थानम्। तस्य व्युत्पत्तिर्यथा। "चन्द्रोदयात् आपः सम्यगुन्दन्ति क्लिद्यन्ति यत्र। चन्द्रोदयात् समुन्दयन्ति वा समुद्रः। उन्दधौ क्लेदे नाम्नीति रक् इसुङ्नलोप इति नलोपः।
'आपो चैव समुन्नेन स समुद्र इति स्मृतः।'
इति वायुपुराणम्॥
मुद्रा मर्य्यादा तया सह वर्त्तते इति वा समुद्रः सम्यगुद्गतो रोऽग्निरत्र इति। मुदं राति ददातीति डे। मुद्राणि रत्नादीनि तैः सह वर्त्तते इति वा।" इति भरतः॥ तत्पर्य्यायः। अब्धिः २ अकूपारः ३ पारावारः ४ सरित्पतिः ५ उदन्वान् ६ उदधिः ७ सिन्धुः ८ सरस्वान् ९ सागरः १० अर्णवः ११ रत्नाकरः १२ जलनिधिः १३ यादःपतिः १४ अपाम्पतिः १५। इत्यमरः। १।१०।१॥ महाकच्छः १६ नदीकान्तः १७ नदीशः १८ द्वीपवान् १९ जलेन्द्रः २० मन्थिरः २१ क्षीरोमार्णीरम् २२ मकरालयः २३। इति जटाधरः॥ सरिताम्पतिः २४ जलधिः २५ नीरनिधिः २६ नीरधिः २७ अम्बुधिः २८ पाथोनिधिः २९ पाथोधिः ३० यादसाम्पतिः ३१ नदीनः ३२ इन्द्रजनकः ३३ तिमिकोषः ३४ वारांनिधिः ३५ वारिनिधिः ३६ वार्द्धिः ३७ वारिधिः ३८ तोयनिधिः ३९ कीलालधिः ४० धरणीपूरः ४१ क्षीराब्धिः ४२ धरणिप्लवः ४३ वाहः ४४ कचङ्गलः ४५ पेरुः ४६ मितद्रुः ४७ वाहिनीपतिः ४८ गङ्गाधरः ४९ दारदः ५० तिमिः ५१ प्राणभास्वान् ५२ ऊर्म्मिमाली ५३ महाशयः ५४ अम्भोनिधिः ५५ अम्भोधिः ५६ तरिपः ५७ कूलङ्कषः ५८ तारिपः ५९। इति शब्दरत्नावली॥ वारिराशिः ६० शैलशिविरम् ६१ पराकुधः ६२ तरन्तः ६३ महीप्राचीरम् ६४। इति त्रिकाण्डशेषः॥ पयोधिः ६५ सरिन्नाथः ६६ अम्भोराशिः ६७ धुनीनाथः ६८ मितद्युः ६९ कम्पिः ७० अपान्नाथः ७१। अस्य जलगुणाः। विस्रत्वम्। लवणरसामयप्रदत्वम्। उष्णत्वम्। वैवर्णदोषजनकत्वम्। विशेषाद्दाहार्त्तिपित्तकारित्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"सामुद्रमुदकं क्षारं सर्व्वदोषप्रकोपणम्॥"
इति राजवल्लभः॥
मुद्रायुक्ते, त्रि॥ *॥ स च समुद्रो ब्रह्मणो मेढ्राज्जातः। यथा,—
"हृदि कामो भ्रुवोः क्रोधो लोभश्चाधरदच्छदात्।
आस्याद्वाक् सिन्धवो मेढ्रात् निरृतिः पायो-रघाश्रयः॥"
इति श्रीभागवते। ३। १२। २६॥
कल्पभेदे श्रीकृष्णौरसेन विरजागर्भजातः। यथा,
"श्रीकृष्णो विरजां दृष्ट्वा सरिद्रूपां प्रियां सतीम्
उच्चै रुरोद विरजातीरे नीरमनोहरे॥
जलादुत्थाय चागच्छ निधाय तनु मूतनम्।
आजगाम हरेरग्रं साक्षाद्राधेव सुन्दरी॥
ताञ्च रूपवतीं दृष्ट्वा प्रेम्णोद्रेकां जगत्पतिः।
चकारालिङ्गनं तूर्णं चुचुम्ब च मुहुर्मुहुः॥
नानाप्रकारशृङ्गारं विपरीतादिकं प्रभुः।
रहसि प्रेयसीं प्राप्य चकार च पुनः पुनः॥
विरजा सा रजोयुक्ता धृत्वा वीर्य्यममोघकम्।
सद्यो बभूव तत्रैव धन्या गर्भवती सती।
तस्थौ तत्र सुखासीना सार्द्धं पुत्रैश्च सप्तभिः॥
एकदा हरिणा सार्द्धं वृन्दारण्ये सुनिर्जने।
विजहार पुनः साध्वी शृङ्गारासक्तमानसा॥
एतस्मिन्नन्तरे तत्र मातुः क्रोड़ं जगाम ह।
कनिष्ठपुत्रस्तस्याश्च भ्रातृभिः पीड़ितो भिया॥
भीतं स्वतनयं दृष्ट्वा तत्याज तां कृपानिधिः।
क्रोड़े चकार बालं सा कृष्णो राधागृहं ययौ।
प्रबोध्य बालं सा साध्वी न ददर्शान्तिके प्रियम्॥
विललाप भृशं तत्र शृङ्गारासक्तमानसा॥
शशाप स्वसुतं कोपात् लवणोदो भविष्यति।
कदापि ते जलं केन न खादिष्यन्ति जीविनः॥
शशाप सर्व्वान्
गच्छध्वञ्च महीं मूढा जम्बुद्वीपं मनोरम
स्थितिर्भवत्वत्र युष्माकं भविष्यति ध्रुवम्
द्वीपे द्वीपे स्थितिं कृत्वा तिष्ठत
द्वीपस्थाभिर्नदीभिश्च सह क्रीडन् निरन्तरम्
कनिष्ठो मातृशापाच्च लवणोदो बभूव ह।
कनिष्ठः क्षयामास ...
आजग्मुः स्थिता सर्व्वे
श्रुत्वा विवरणं सर्व्वं प्रजग्मुर्धर्षीतम्
प्रणम्य मातुश्चरणं भक्तिनम्रात्मकन्धराः।
सप्तद्वीपे समुद्राश्च सप्त तत्र्यां विभागशः।
कनिष्ठाद्द्वयपर्य्यन्तं द्विगुणं द्विगुणं पुरः॥
तत्रापीक्षुसुरासर्पिर्दधिदुग्धजलाश्रयाः।
एतेषाञ्च जलं पुण्यं गम्यावैश्च सर्व्वेषाम्
व्यासाः समुद्राः सप्तैव सप्तद्वीपा वसुन्धराः
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे। ...
तस्य ह्रासवृद्धिकारणं यथा,—
"अपां चैव समुद्रे ...
उदयत्यम्दौ पूर्व्वे तु समुद्रः पूर्य्यते सदा।
प्रक्षीयमाणे बहुले क्षीयतेऽस्तमिते च वै।
आपूर्य्यमाणो ह्युदधिरात्मनैवाभिपूर्य्यते।
ततो वै क्षीयमाणस्य स्वात्मन्येव क्षयः
उदीर्य्यतेऽग्निसंयोगात् उच्छ्रायो ...
तथा स्मृतः समुद्रोऽपि वर्द्धते भागशो ...
अन्यूनानतिरिक्तास्ता
उदयास्तमयेष्विन्दोः पक्षयोः शुक्लकृष्णयोः।
क्षयो वृद्धिश्च उदधेः सोमवृद्धिक्षयो ...
दशोत्तराणि पञ्चाहुरङ्गुलानां शतानि ...
अपां वृद्धिः क्षयो दृष्टः
इति मात्स्ये १०० ...
अन्यत् विष्णुपुराणे २।४ अध्याये ...
समुद्रे वर्ज्जनीयानि यथा,—
"अब्धौ द्वीपाद्रिस्त्रोभिर्पोतयादोऽम्बुः
विष्णुकुल्यागमश्चन्द्राद्दिरोऽश्रीरापूरणम्
इति कविकल्पलतायाम् १ स्तवके २ ...
कलौ द्विजानां समुद्रयात्रादिनिषेधो
उद्वाहतत्त्वधृततद्वारदीयवचनम्।
"समुद्रयात्रास्वीकारः कमण्डलुविधारणम्।
द्विजानामसवर्णासु कन्यासूपयमस्तथा।
देवरेण सुतोत्पत्तिर्मधुपर्के पशोर्वधः।
मांसादनं तथा श्राद्धे वानप्रस्थाश्रमस्तथा।
दत्तायाश्चैव कन्यायाः पुनर्दानं परस्य च।
दीर्घकालं ब्रह्मचर्य्यं नरमेधाश्वमेधकौ।
महाप्रस्थानगमनं गोमेधश्च तथा मखः।
इमान् धर्म्मान् कलियुगे वर्ज्यानाहुर्मनीषिणः
(केषाञ्चिमते कलावपि समुद्रयात्रायां न दोषः॥) क्षीरोदसमुद्रस्य मन्थनं
यथा, भागवते। ८। ७। १—१०।
"कृतस्थानविभागास्त एवं कश्यपनन्दनाः
ममन्थुः परमं यत्ता अमृतार्थं पयोनिधिम्।
मथ्यमानेऽर्णवे सोऽद्रिरनाधारो ह्यपोऽविशत्

णोऽपि बलिभिर्गौरवात् पाण्डुनन्दन ॥
र्ज्जिकमकम: पविश्यागमण्णन्धिय: ।
(कुपौरुषे नष्टे दैवेनातिबलीयसा ॥
श्लोक्य विघ्नेशविधिं तदेश्वरो
दुरन्तवीर्य्योऽवितथाभिसन्धि: ।
त्वा वपु: काच्छपमद्भुतं महत्
विश्य तोयं गिरिमुज्जहार ॥
मुत्थितं वीक्ष्य कुलाचलं पुन:
मुद्यता निर्म्मथितुं सुरासुरा: ।
धार पृष्ठेन स लक्षयोजन-
प्रस्तारिणा द्वीप इवापरो महान् ॥
सुरासुरेन्द्रैर्भुजवीर्य्यवेपितं
परिभ्रमन्तं गिरिमङ्ग पृष्ठत: ।
बिभ्रत्तदावर्त्तनमादिकच्छपो
मेनेऽङ्गकण्डूयनमप्रमेय: ॥"
तत्रैव । ८ । ७ । १८—१९ ।
निर्म्मथ्यमानादुदधेरभूद्विषं
महोल्बणं हालाहलाह्वमग्रत: ।
सम्भ्रान्तमीनोन्मकराहिकच्छपात्
तिमिद्विपग्राहतिमिङ्गिलाकुलात् ॥
तदुग्रवेगं दिशि दिश्युपर्य्यधो
विसर्पदुत्सर्पदसह्यमप्रति ।
भीता: प्रजा दुद्रुवुरङ्ग सेश्वरा
अरक्ष्यमाणा: शरणं सदाशिवम् ॥"
इति तत्रैव । ८ । ७ । ३६—४३ ।
ष्य व्यसनं तासां कृपया भृशपीडित: ।
देवसुहृद्देव इदमाह सतीं प्रियाम् ॥
यत भवान्येतत् प्रजानां पश्य वैशसम् ।
क्षीरोदमथनोद्भूतात् कालकूटादुपस्थितम् ॥
आं प्राणपरीप्सूनां विधेयमभयं हि मे ।
यान् हि प्रभोरर्थो यद्दीनपरिपालनम् ॥
य प्राणिन: पान्ति साधव: क्षणभङ्गुरै: ।
बैरेषु भूतेषु मोहितेष्वात्ममायया ॥
: कृपयतो भद्रे सर्व्वात्मा प्रीयते हरि: ।
हरौ भगवति प्रीतेऽहं सचराचर: ॥
ादिदं गरं भुञ्जे प्रजानां स्वस्तिरस्तु मे ।
मामन्त्र्य भगवान् भवानीं विश्वभावन: ॥
दयं लब्धुमारेभे प्रभावज्ञान्वमोदत ।
: करतलीकृत्य व्यापि हालाहलं विषम् ॥
रभक्षयन्महादेव: कृपया भूतभावन: ।
स्यापि दर्शयामास स्ववीर्य्यं जलकल्मष: ॥
चकार गले नीलं तच्च साधोर्विभूषणम् ॥"
ा तत्रैव । ८ । ८ । १—९ ।
ीते गरे वृषाङ्केण प्रीतास्तेऽमरदानवा: ।
ममन्थुस्तरसा सिन्धुं हविर्धानी ततोऽभवत् ॥
तामग्निहोत्रीमृषयो जगृहुर्ब्रह्मवादिन: ।
ब्रह्मस्य देवयानस्य मेध्याय हविषे नृप ॥
त उच्चै:श्रवा नाम हयोऽभूच्चन्द्रपाण्डुर: ।
स्मिन् बलि: स्पृहाञ्चक्रे नेन्द्र ईश्वरशिक्षया ॥
तो ऐरावतो नाम वारणेन्द्रो विनिर्गत: ।
न्तैश्चतुर्भि: श्वेताद्रेर्हरन् हिमवतो महान् ॥
ऐरावणादयस्त्वष्टौ दिग्गजा अभवंस्तत: ।

अभ्रमुवल्लयोऽष्टौ च करिण्यस्त्वभवन्नृप ॥
कौस्तुभाख्यमभूद्रत्नं पद्मरागो महोदधे: ।
तस्मिन् मणौ स्पृहाञ्चक्रे वक्षोऽलङ्करणे हरि: ॥
ततोऽभवत् पारिजात: सुरलोकविभूषणम् ।
पूरयत्यर्थिनो योऽर्थै: शश्वद्भुवि यथा भवान् ॥
ततश्चाप्सरसो जाता निष्ककण्ठ्य: सुवासस: ।
रमण्य: स्वर्गिणां वल्गुगतिलीलावलोकनै: ॥
ततश्चाविरभूत् साक्षात् श्रीरमा भगवत्परा ।
रञ्जयन्ती दिश: कान्त्या विद्युत्सौदामनी यथा ॥
तस्यां चक्रु: स्पृहां सर्व्वे ससुरासुरमानवा: ।
रूपौदार्य्यवयोवर्णमहिमाक्षिप्तचेतस: ॥"
तथा तत्रैव । ८ । ८ । २१ ।
"तस्या: श्रियस्त्रिजगतो जनको जनन्या
वक्षोनिवासमकरोत् परमं विभूते: ।
श्री: स्वा: प्रजा: सकरुणेन निरीक्षणेन
यत्र स्थितैधयत साधिपतींस्त्रिलोकान् ॥"
तत्रैव । ८ । ८ । ३०—३६ ।
"अथासीद्वारुणी देवी कन्या कमललोचना ।
असुरा जगृहुस्तां वै हरेरनुमतेन ते ॥
अथोदधेर्मथ्यमानात् काश्यपैरमृतार्थिभि: ।
उदतिष्ठन्महाराज पुरुष: परमाद्भुत: ॥
दीर्घपीवरदोर्दण्ड: कम्बुग्रीवोऽरुणेक्षण: ।
श्यामलस्तरुण: स्रग्वी सर्व्वाभरणभूषित: ॥
पीतवासा महोरस्क: सुमृष्टमणिकुण्डल: ।
स्निग्धकुञ्चितकेशान्तसुभग: सिंहविक्रम: ॥
अमृतापूर्णकलसं बिभ्रद्वलयभूषित: ।
स वै भगवत: साक्षाद्विष्णोरंशांशसम्भव: ॥
धन्वन्तरिरिति ख्यात आयुर्व्वेददृगिज्यभाक् ।
तमालोक्यासुरा: सर्व्वे कलसं चामृताभृतम् ॥
लिप्सन्त: सर्व्ववस्तूनि कलसं तरसाहरन् ।
नीयमानेऽसुरैस्तस्मिन् कलसेऽमृतभाजने ।
विषण्णमनसो देवा हरिं शरणमाययु: ॥"
तत्रैव । ८ । ८ । ४१ ।
"एतस्मिन्नन्तरे विष्णु: सर्व्वोपायविदीश्वर: ।
योषिद्रूपमनिर्द्देश्यं दधार परमाद्भुतम् ॥"
तत्रैव । ८ । ९ । १२ ।
"ततो गृहीतामृतभाजनं हरि-
र्ब्बभाष ईषत्स्मितशोभया गिरा ।
यद्यभ्युपेत: क्व च साध्वसाधु वा
कृतं मया वो विभजे सुधामिमाम् ॥"
तत्रैव । ८ । ९ । २० ।
"कल्पयित्वा पृथक्पङ्क्तीरुभयेषां जगत्पति: ।
तांश्चोपवेशयामास स्वेषु स्वेषु च पङ्क्तिषु ॥
दैत्यान् गृहीतकलसो वञ्चयन्नुपसञ्चरै: ।
दूरस्थान् पाययामास जरामृत्युहरां सुधाम् ॥"
तत्रैव । ८ । ९ । २४ ।
"देवलिङ्गप्रतिच्छन्न: स्वर्भानुर्द्देवसंसदि ।
प्रविष्ट: सोममपिबच्चन्द्रार्काभ्याञ्च सूचित: ॥
चक्रेण क्षुरधारेण जहार पिबत: शिर: ।
हरिस्तस्य कबन्धस्तु सुधयाप्लावितोऽपतत् ॥
शिरस्त्वमरतां नीतमजो ग्रहमचीक्लृपत् ।
यस्तु पर्व्वणि चन्द्रार्कावभिधावति वैरधी: ॥

पीतप्रायेऽमृते देवैर्भगवान् लोकभावन: ।
पश्यतामसुरेन्द्राणां स्वरूपं जगृहे हरि: ॥"
पाद्मे उत्तरखण्डे ६८ अध्यायेऽप्येवम् ॥ (अन्त-
रिक्षम् । इति निघण्टु: । १ । ३ । अस्य व्युत्-
पत्तिर्यथा तट्टीकायाम् । "समुद्द्रवन्ति सद्रुता
ऊर्द्ध्वं द्रवन्ति गच्छन्त्यस्मादापो रश्मिभिराकृष्य-
माणा आदित्यमण्डलम् । समुत्-पूर्व्वात् द्रवते
र्गत्यर्थात् अन्येष्वपि दृश्यते इति अपादाने
ड-प्रत्यये टि-लोपे च रूपम् । यद्वा, संहता
अभिद्रवन्त्येनमापो भौमरसेन्द्रलग्ना वायुना
प्रेर्य्यमाणा: आदित्यमण्डलाद्वा वर्षाकाले
रश्मिभि: प्रवर्त्तमाना: । अत्र उदित्येष उप-
सर्गोऽभीत्यर्थे वर्त्तते । कर्म्मणि ड-प्रत्यय इति
विशेष: । समोदन्तेऽस्मिन् भूतानि अन्तरिक्ष-
चारीणीति वा । सम्पूर्व्वात् मुद हर्षे इत्यस्मात्
स्फायितञ्चिवञ्चि इत्यादिना अधिकरणे रक्-
प्रत्यये ससो स-लोपे च रूपम् । यद्वा, सम्
इत्येकीभावे उदकात् उन्दः; रो मत्वर्थीय: ।
एकीभूतमुदकमस्मिन् विद्यते वर्षास्विति उदक-
शब्दस्योद्भावश्छान्दस: । यद्वा सम्पूर्व्वात् उन्दी
क्लेदने इत्यस्मात् स्फायितञ्चिवञ्चि इत्यादिना
कर्त्तरि रक्-प्रत्यये कित्त्वान्नलोपे च समुद्र: ॥",
इति देवराजकृतनिर्व्वचनम् ॥)

समुद्रकफ:, पुं, (समुद्रस्य कफ इव ।) समुद्रफेन: ।
इति त्रिकाण्डशेष: ॥

समुद्रकान्ता, स्त्री, (समुद्रस्य कान्ता ।) नदी ।
इति हलायुध: ॥ पृक्का । इति राजनिर्घण्ट: ॥

समुद्रगा, स्त्री, (समुद्रं गच्छतीति । गम + ड: ।)
नदी । इति हेमचन्द्र: ॥ गङ्गा । यथा,—
"अब्दद्वयं श्रावणादि सर्व्वा नद्यो रजस्वला: ।
तासु स्नानं न कुर्व्वीत वर्ज्जयित्वा समुद्रगाम् ॥",
इति प्रायश्चित्ततत्त्वे छन्दोगपरिशिष्टवचनम् ॥
यथा च महाभारते । ३ । १०८ । १० ।
"सा बभूव विसर्पन्ती त्रिधा राजन् समुद्रगा ।
फेनपुञ्जाकुलजला हंसानामिव पङ्क्तय: ॥")
समुद्रगामिनि, त्रि ॥

समुद्रगृहं, क्ली, (समुद्र इव जलयुक्तं गृहम् ।)
जलयन्त्रगृहम् । इति त्रिकाण्डशेष: ॥

समुद्रचुलुक:, पुं, (समुद्रश्चुलुक इव अनायासेन
पेयत्वात् यस्य ।) अगस्त्यमुनि: । इति त्रिकाण्ड-
शेष: ॥

समुद्रदयिता, स्त्री, (समुद्रस्य दयिता ।) नदी ।
इति हेमचन्द्र: ॥

समुद्रनवनीतं, क्ली, (समुद्रस्य क्षीरोदस्य नव-
नीतमिव ।) अमृतम् । चन्द्र: । इति
मेदिनी ॥

समुद्रफलं, क्ली, (समुद्रस्य फलमिव ।) अब्धि-
फलम् । औषधविशेष: । यथा,—
"समुद्रनाम प्रथमं पश्चात् फलमुदाहरेत् ।
समुद्रफलमित्यादि नाम वाच्यं भिषग्वरै: ॥
फलं समुद्रस्य कटूष्णकारि
वातापहं भूतनिरोधकारि ।

दण्डी शस्त्रधरो भिक्षुर्नग्नादिः कालदूतकः ।
वक्त्रे बाह्वो च ग्रीवायां पृष्ठे च नहि जीवति॥
पूर्व्वं दिनपतिर्भुङ्क्ते ह्यर्द्धयाममतोऽपरे ।
शेषा ग्रहाः प्रतिदिनं षट्सङ्ख्यापरिवर्त्तनैः ॥
नागभोगक्रमो ज्ञेयो रात्रौ वाणविवर्त्तनैः ।
शेषोऽर्कः फणिपश्चन्द्रस्तक्षको भौम ईरितः ॥
कर्क्कोटो ज्ञो गुरुः पद्मो महापद्मश्च भार्गवः ।
शङ्खः शनैश्चरो राहुः कुलिकश्चाहयो ग्रहाः ॥
रात्रौ दिवा सुरगुरोर्भोगे स्यादमरान्तकः ।
षष्ठीः कालो दिवा राहुः कुलिकेन सह
स्थितः ॥
यामार्द्धसन्धिसंस्थः स वेलां कालयतीश्वरेत् ।
वाणद्विषडब्धिवाजियुगभूरेकभागतः ॥
दिवा षड्वेदनेत्रादिपञ्चत्रिवसुसांशकैः ।
पादाङ्गुष्ठे पादपृष्ठे गुल्फे जानुनि लिङ्गके ॥
नाभौ हृदि स्तनतटे कण्ठे नासापुटेक्षणे ।
कर्णयोश्च भ्रुवोः शङ्खे मस्तके प्रतिपत्क्रमात् ॥
तिष्ठेच्चन्द्रश्च जीवेन पुंसो दक्षिणभागके ।
कायस्य वामभागे तु स्त्रिया वायुवहात् करात्॥
अमृतस्रवकृतो मोक्षो निवर्त्तेत च मर्द्दनात् ।
आत्मनः परमं वीजं हंसाख्यं स्फाटिकामलम्॥
ज्ञातव्यं विषपापघ्नं वीजं तस्य चतुर्व्विधम् ।
विन्दुपञ्चस्वरयुतमाद्यमुक्तं द्वितीयकम् ॥
षष्ठारूढं तृतीयं स्यात् सविसर्गं चतुर्व्विधम् ।
ॐ कुरु कुल्ले स्वाहा ॥
विद्यां त्रैलोक्यरक्षार्थं गरुड़ेन धृता पुरा ।
सर्पेमनां च नागानां सुखेऽस्य प्रणवं न्यसेत् ॥
गले कुरु न्यसेत् पश्चात् हृदि चैव विशेषतः ।
कुल्ले स्वा गुह्ययोः पादयुग्मे हान्यास ईरितः ।
गृहेऽपि लिखिता यत्र तत्रागाः सन्त्यजन्ति च॥
सहस्रमन्त्रजप्तन्तु सूत्रं कर्णे धृतं तथा ।
यद्गृहे शर्करा जप्ता क्षिप्ता नागास्त्यजन्ति च ।
सप्तलक्षस्य जप्यार्द्धे सिद्धिः प्राप्ता सुरासुरैः ॥
ॐ सुवर्णरेखे कुक्कुटविग्रहरूपिणि स्वाहा ॥
पत्रष्टाष्टदले पद्मे दले वर्णयुगं लिखेत् ।
नामैतत् वारिधाराभिः स्नातो दष्टो विषं
त्यजेत् ॥
ॐ पक्षि स्वाहा ।
अङ्गुष्ठादिकनिष्ठान्तं करे न्यस्याथ देहके ।
… वक्त्रे हृदि लिङ्गे च पादयोर्गरुडो हि सः ॥
नाक्रामन्ति च तच्छायां स्वप्नेऽपि विषपन्नगाः
यस्तु लक्षं जपेत्तस्य … दृष्टिं नाशयेद्विषम् ॥
ॐ ह्रीं ह्रौं ह्रौं भिरुण्डायै नमः ॥
… जप्ता त्वियं विद्या दष्टकस्य विषं हरेत् ।
… न्यसेत् पादाग्रे इ ई गुल्फेऽथ जानुनि ॥
उ ऊ ए ऐ कटितटे ओ नाभौ विन्यसेत्
सुधीः ।
… ओ वक्त्रदेशे च … च हंसमयुताः ॥
… विषादि च हरेत् जप्ता ध्यातोऽथ पूजित
… ऽहमिति ध्यात्वा कुर्य्याद्विषहरां क्रियाम्
… गात्रविन्यस्तं विषादिहरमीरितम् ।
… दंश वामकरे नामामुष्यनिरोधकृत् ।

मन्त्रो हरेत् दष्टकस्य त्वग्मांसादिगतं विषम् ।
स वायुना समाकृष्य दष्टानां गरलं हरेत् ।
तनौ न्यसेद्दष्टकेश नीलकण्ठादि संस्मरेत् ॥*॥
पीतं मत्स्याक्षिरामूलं तण्डुलाद्भिर्व्विषापहम् ।
पुनर्नवाफलिनीनां मूलं चक्रजमीदृशम् ॥
मूलं शुक्लबृहत्यास्तु कर्क्कोट्या गैरिकर्णिकम् ।
अङ्घ्रिष्टं दष्टलेपितलेपोऽयं विषमर्द्दनः ॥
विषसृद्धिं न शक्नोति उष्णं पिबति यो घृतम् ।
पञ्चाङ्गन्तु शिरीषस्य मूलं गृञ्जनजन्तथा ।
सर्व्वाङ्गलेपतश्चापि पानाद्वा विषहृद्भवेत् ॥
क्षौं गोनसादिविषहृत् ॥
हृल्ललाटविसर्गान्तं ध्यातं वश्यादिकृद्भवेत् ।
न्यस्तं योनौ वशेत् कन्यां कुर्य्यान्मदजलाविलाम्
जप्ता सप्ताष्टसाहस्रं गरुत्मानिव सर्व्वगः ।
कविः स्यात् श्रुतिधारी स्याद्वश्यस्त्रीयायुरा-
प्नयात् ।
विषहृत् स्यात् कथा तद्वत् लिंगी सम्मतो
ध्रुवम् ॥”
इति गारुडे प्राणेश्वरं गारुड़ं समाप्त १८
अध्यायः ॥*॥*॥ अपरञ्च ।
अग्निरुवाच ।
“नागादयोऽथ ताराविदशस्थानानि मर्म्म च ।
सूतकं दष्टचेष्टेति सप्तलक्षणमुच्यते ॥
शेषवासुकितक्षाख्याः कर्क्कोटोऽब्जो महाम्बुजः ।
शङ्खपालश्च कुलिक इत्यष्टौ नागवर्य्यकाः ॥
दशाष्टपञ्चत्रिगुणशतमूर्द्धान्विताः क्रमात् ।
विप्रौ नृपौ विशौ शूद्रौ द्वौ द्वौ नागेषु कीर्त्तितौ॥
तदन्वयाः पञ्चशतं तेभ्यो जाता ह्यसङ्ख्यकाः ।
फणिमण्डलिराजीलवातपित्तकफात्मकाः ॥
व्यन्तरा दोषमिश्रास्ते सर्पा दर्व्वीकराः स्मृताः ।
रथाङ्गलाङ्गलच्छत्रस्वस्तिकाङ्कुशधारिणः ॥
गोनसा मन्दगा दीर्घा मण्डलैर्विविधैः स्थिताः ।
राजीलाश्चित्रिताः स्निग्धास्तिर्य्यगूर्द्धञ्च
राजिभिः ॥
व्यन्तरा मिश्रचिह्नाश्च भूवर्षाग्नेयवायवः ।
चतुर्व्विधास्ते षड्विंश भेदाः षोड़श गोनसाः॥
त्रयोदश च राजीला व्यन्तरा एकविंशतिः ।
येऽनुक्तकाले जायन्ते सर्पास्ते व्यन्तराः स्मृताः॥
आषाढ़ादित्रिमासैः स्याद्गर्भो मासचतुष्टये ।
अण्डकानां शते द्वे च चत्वारिंशत् प्रसूयते ।
सर्पा ग्रसन्ति सूतौ तान् विनास्त्रीपुंनपुंसकान् ।
उन्मीलतेऽक्षि सप्ताहात् कृष्णो मासाद्भवेद्बहिः ॥
द्वादशाहात् सुबोधः स्याद्दन्ताः स्युः सूर्य्य-
दर्शनात् ।
द्वात्रिंशद्दिनविंशत्या चतस्रस्तेषु दंष्ट्रिकाः ॥
कराली मकरी कालरात्री च यमदूतिका ।
एतास्ताः सविषा दंष्ट्रा … … …
षण्मासान्मुञ्चते कृत्तिं … …
नागाः सूर्य्यादिवारेशाः सप्त … …
तेषां षट् प्रतिवारेषु कुलिकः
सर्व्वेन वा महासेन …
द्वयोर्व्वा नाडिकामन्त्रमन्तरं

दुष्टः सकालः सर्व्वत्र सर्व्वदंशे त्रिनिर्द्दिशेत् ।
कृत्तिका भरणी स्वाती मूलं पूर्व्वात्रयाश्विनी ।
विशाखार्द्रा मघाश्लेषा चित्रा श्रवणरोहिणी ।
हस्ता मन्दकुजौ वारौ पञ्चमी चाष्टमी तिथिः
षष्ठी रिक्ता शिवा निन्द्या पञ्चमी च चतुर्द्दशी
सन्ध्याचतुष्टयं दुष्टं दग्धयोगाश्च राशयः ।
एकद्विबहवो दंशा दष्टविद्धञ्च खण्डितम् ।
अदंशमवगुप्तं स्याद्दंशमेवं चतुर्व्विधम् ।
त्रयो द्वित्र्येकक्षता दंशा वेदना रुधिरोल्वणम् ।
नक्तं द्वौ त्र्येकाङ्घ्रिकूर्म्माभा दंशाश्च यमचोदिताः
दाहो पिपीलिकास्पर्शो कण्ठशोफरुजान्वितः ।
सतोदो ग्रथितो दंशः सविषो न्यस्तनिर्व्विषः ।
देवालये शून्यगृहे वल्मीकोद्यानकोटरे ।
रथ्यासन्ध्यां श्मशाने च श्मशाने सिन्धुसङ्गमे ।
द्वीपे चतुष्पथे सौधे गृहेऽब्जे पर्व्वताग्रके ।
विलद्वारे जीर्णकूपे जीर्णवेश्मनि कुड्यके ।
शिग्रुश्लेष्मातकाक्षेषु जम्बूडुम्बरणेषु च ।
वटे च जीर्णप्राकारे खास्यहृत्कक्षजत्रुणि ।
तालौ शङ्खे गले मूर्द्ध्नि चिबुके नाभिपादयोः ।
दंशोऽशुभः शुभो भूतः पुष्पहस्तः शु… …
लिङ्गवर्णसमानश्च शुक्लवस्त्रोऽमलः शुचिः ।
अपद्वारागतः शस्त्री प्रमादी भूगतेक्षणः ।
विवर्णवासाः पाशादिहस्तो गद्गदवर्णभाक् ।
शुष्ककाष्ठाश्रितः खिन्नस्तिलाक्तककरांशुकः ।
आर्द्रवासाः कृष्णरक्तपुष्पो हेमशिरोरुहः ।
कुचमर्द्दी नखच्छेदी गुदस्पृक् पादलेखकः ।
केशलुञ्ची तृणच्छेदी दुष्टा दूतास्तथैककः ।
इडान्यावाहयद्द्वेधा यदि दूतस्य चात्मनः ।
आभ्यां द्वाभ्यां दृष्टयान्यान् विद्यात् स्त्रीपुन-
पुंसकान् ।
दूतः स्पृशति यद्गात्रं तस्मिन् दंशमुदाहरेत् ।
दूतान्घ्रिचलनं दुष्टं सुस्थिभिर्निश्चला शुभा ।
जीवपार्श्वे शुभो दूतो दुष्टोऽन्यत्र समागतः ।
जीवो गतागते दुष्टः शुभो दूतनिवेदने ।
दूतस्य वाक् प्रदुष्टा सा पूर्व्वामर्द्धनिन्दिता
विभक्तैस्तस्य वाक्यान्तैर्व्विषनिर्व्विषकालता
आद्यैः स्वरैश्च काद्यैश्च वर्गैर्भिन्नलिपिर्द्विधा ।
स्वरजोवसुमान् वर्गो इति ज्ञेयश्च मातृका ।
वाताग्नीन्द्रजलात्मानो वर्गेषु च चतुष्टयम् ।
नपुंसकाः पञ्चमाः स्युः स्वराः शक्राम्बुयोनयः ।
दुष्टौ दूतस्य वाक्पादौ वाताग्नी मध्यमौ …
प्रशस्ता वारुणा वर्णा अतिदुष्टा नपुंसकाः ।
प्रस्थाने मङ्गलं वाक्यं गर्ज्जितं मेघहस्तिनोः ।
प्रदक्षिणं फली वृक्षे वासस्य च रुतं जितम् ।
शुभा गीतादिशब्दाः स्युरीदृशं स्यादसिद्धये ।
अनर्थगीताद्याक्रन्दो दक्षिणे विकृतं सुतम् ।
वेश्या विप्रो नृपः कन्या गौर्दन्ती मुरजध्वनिः ।
… … शङ्खाम्बुच्छत्रं भेरी फलं सुरा ।
… … सिद्धयेऽभिमुखा चमी ।
… … कार्म्मलिनाम्बरभारकृत् ।
… … धौलकपर्द्दिका ।
… … गे भग्नदर्थं ।

विषदेशाश्च सप्त स्पर्शगोदोहमात्रामिताः ।
विषदंशो ललाटं यात्यतो नेत्रं ततो मुखम् ।
मुखाच्चरणनाभी द्वौ धातून् प्राप्नोति हि
क्रमात् ॥"

इत्याग्नेये २९४ अध्याये लक्षणानि ॥*॥

अग्निरुवाच ।

"मन्त्रध्यानौषधैर्दष्टचिकित्सां प्रवदामि ते ।
ॐ नमो भगवते नीलकण्ठायेति ॥
जपनाद्विषहानिः स्याज्जीवरक्षणम् ।
मान्यं सघृतं पेयं द्विविधं विषमुच्यते ॥
जङ्गमं सर्पलूतादि शृङ्गादि स्थावरं विषम् ।
शान्तस्वरान्वितो ब्रह्मा लोहितं तारकः शिवः ॥
विषते नाम मन्त्रोऽयं तार्क्ष्यः शब्दमयः स्मृतः ।
ज्वल महामते हृदयाय । गरुडविलासशिरसे ।
गरुडशिखायै । गरुडविषभञ्जन २ प्रभेदन २ ।
वित्रासय २ विमर्द्दय २ कवचाय । अप्रति-
हतशासनं वं हूँ फट् अस्त्राय । उग्ररूप-
धारक सर्व्वभयङ्कर भीषय २ सर्व्वं दह २
भस्मीकुरु कुरु स्वाहा नेत्राय ।
सप्तवर्णान्तयुग्माष्टदिग्दलस्वरकेशरात् ।
वर्णरत्नं बहिश्चाभूत् कर्णिकं मातृकाम्बुजम् ।
कृत्वा हृदिस्थं तन्मन्त्री वामहस्ततले स्मरेत् ॥
अङ्गुष्ठादौ न्यसेद्वर्णान् विषभेदोदिताः कलाः ।
पाद्मं चतुरस्रकोणं पार्थिवं शक्रदैवतम् ॥
वृत्तार्द्धमाप्यं पद्माढ्यं शुक्रं वरुणदैवतम् ।
वामं स्वस्तिकयुक्तञ्च भैषजं वह्निदैवतम् ॥
वृत्तबिन्दुवृतं वायुदैवतं कृष्णमानिलम् ।
अङ्गुष्ठाद्यङ्गुलीमध्ये पर्व्वास्तेषु स्वयेश्वसु ॥
सवर्णनागवाहनवेष्टितेषु न्यसेत् क्रमात् ।
विषते चतुरो वर्णान् स्वमण्डलसमत्विषः ।
अरूपे वरतस्माच्च आकाशे शिवदैवते ॥
कनिष्ठामध्यपर्व्वान्ते न्यसेत्तस्याद्यमक्षरम् ।
नागानामादिवर्णांश्च स्वमण्डलगतान्न्यसेत् ॥
भूतादिवर्णान् विन्यस्य अङ्गुष्ठाद्यन्तपर्व्वसु ।
तन्मात्रादिगुणाद्यर्णानङ्गुलीषु न्यसेद्बुधः ॥
स्पर्शनादेव तार्क्ष्येण हस्ते हन्याद्विषद्वयम् ।
मण्डलादिषु तान् वर्णान् विषते करयोजितान् ॥
अङ्गुष्ठाद्यङ्गुलिभिर्दहनाभिस्थानेषु पर्व्वसु ।
मन्त्रोऽन्ततः सवर्णाभमानाभि स्तुहिनप्रभम् ॥
कुङ्कुमारुणमाकण्ठादाकेशान्तात् सितेतरम् ।
ब्रह्माण्डव्यापिनं तार्क्ष्यं चन्द्राख्यं नागभूषणम् ॥
नीलाभनासमाध्मानं महापक्षं स्मरेद्बुधः ।
एवं तार्क्ष्यात्मनो वाक्यान्मन्त्रः स्यान्मन्त्रिणो विषे
स्वस्ति तार्क्ष्यकरस्यान्तःस्थिताङ्गुष्ठविषापहा ।
तार्क्ष्यहस्तं समुद्यम्य तत्पञ्चाङ्गुलिचालनात् ॥
कुर्य्याद्विषस्य स्तम्भादींस्तदुक्तमदवोपया ।
आकाशादिश्च भूबीजः पञ्चाङ्गाधिपतिर्मनुः ॥
संस्तम्भयेति बीजान्ते भाषया स्तम्भयेद्विषम् ।
व्यत्यस्तभूषया बीजो मन्त्रोऽयं साधुसाधितः ॥
संप्लवः प्लावयश्चः शब्दादयः संहरेद्विषम् ।
दष्टमुत्थापयेद्वैषं स्वजसाम्भोऽभिषेकतः ॥
स्वजातशङ्खभेर्य्यादिनिस्वनश्रवणेन वा ।
संदालेव संयुक्तो भूतेशोऽप्यव्ययात् स्थितः ॥
भूवायुश्चाव्ययान्मन्त्री विषं संक्रामयत्यसौ ।
अन्तस्थो निजदेशस्थो बीजाग्नीन्दुजलाम्बुभिः ।
एतत् कर्म्म नवेन्मन्त्री गरुडाकृतिविग्रहः ।
तार्क्ष्य वारुणमेहव्यस्तार्जनाशयेद्विषम् ॥
जानुदण्डीन्दुमुदितं सुधार्थीबीजलाञ्छितम् ।
स्नानपानात् सर्व्वविषजरारोगापमृत्युजित् ॥
पक्षि पक्षिमहापक्षि महापक्षि विषि स्वाहा ।
पक्षिपक्षि महापक्षि महापक्षि क्षीक्षी स्वाहा
द्वावेतौ पक्षिराड्मन्त्रौ विषघ्नावभिमन्त्रणात् ।
पक्षिराजाय विद्महे पक्षिदेवाय धीमहि तन्नो
गरुडः प्रचोदयात् ॥
वह्निस्थो पार्श्वतत्पूर्व्वौ दन्तस्थौकौ च दन्तिनौ
सकलौ लाङ्गलौ चेति नीलकण्ठाद्यमीरितः ॥
वक्षःकण्ठशिखाग्रेतं न्यसेत् स्तम्भे सुसंस्कृतौ ।
हर हर हृदयाय नमः कपर्द्दिने च शिरसे
नीलकण्ठाय वै शिखाम् ॥
कालकूटविषभक्षणाय स्वाहाचर्म्म वर्म्म च ।
कण्ठिनेवं कृत्तिवासं नेत्रैः प्रत्येकशस्त्रिभिः ।
पूर्व्वादेराननैर्युक्तं ग्रतपो तारुण्यासितैः ॥
अभयं वरदञ्चापं वासुकिञ्च दधद्भुजः ।
यज्ञोपवीतपार्श्वं तु गौरी रुद्रोऽस्य देवता ॥
पादजानुगुह्यनाभिहृत्कण्ठाननमूर्द्धसु ।
मन्त्रवर्णाश्चस्य करयोरङ्गुष्ठाद्यङ्गुलीषु च ॥
तर्ज्जन्यादितदन्तासु सर्व्वमङ्गुष्ठयोर्न्यसेत् ।
ध्यात्वैवं संहरेत् क्षिप्रं वहया मूलमुद्रया ॥
कनिष्ठा ज्येष्ठया बद्धा तिस्रोऽन्याः प्रसृतिर्जवः ।
विषनाशो वामहस्तमन्यस्मिन् दक्षिणं करम् ॥
नमो भगवते नीलकण्ठाय चिः । अमलकण्ठाय
चिः सर्व्वज्ञकण्ठाय चिः क्षिप ओम् स्वाहा ॥
नमो नीलकण्ठाय नैकसर्व्वविषापहाय । नमस्ते
रुद्रमन्यव इति समार्ज्जनाद्विषं विनश्यति ॥
न सन्देहः कर्णजाप्या उपनेत्रा विधानतः ।
यजेद्रुद्रविधानेन नीलग्रीवं महेश्वरम् ।
विषव्याधिविनाशः स्यात् कृत्वा रुद्र विधानतः ॥"

इत्याग्नेये महापुराणे दष्टचिकित्सा नाम १९५ अध्यायः ॥ * ॥ * ॥ यात्राकाले तस्य शुभाशुभसूचकत्वं यथा,—

"गोनासदर्व्वीकरराजिलाद्या
ज्ञात्वैव सर्व्वे भयदा भुजङ्गाः ।
विलोक्य सर्पं यदि निर्व्विकल्पा
निवृत्तविप्रस्य शुभं विचिन्त्यम् ॥
पाषाणसंस्तम्भितकण्टकेषु
दत्त्वा पदं यान्ति विनष्टविघ्नाः ।
सर्पच्छया पक्षनखाभिधेयः
प्रयाणकाले स तु वामभागे ।
दृष्टः शुभैः सिद्धिकृदुन्नताग्र-
स्तिष्ठेत् पयोर्द्धे यदि राज्यलाभः ॥"

इति सर्पः । इति वसन्तराजशाकुने १५ वर्गः ॥

सर्पकङ्कालिका, स्त्री, (सर्पकङ्काली एव । स्वार्थे कन् ।) वृक्षविशेषः । तत्पर्य्यायः । तीक्ष्णा २ विषदंष्ट्रा ३ विषापहा ४ । इतिरत्नमाला ॥

महा ५ सर्पकङ्काली ६ विषनाशिनी ७ । इति शब्दचन्द्रिका ॥

सर्पकङ्काली, स्त्री, (सर्पस्य कङ्कालमिवाङ्गं यस्याः । ङीष् ।) सर्पकङ्कालिका । इति शब्दचन्द्रिका ॥

सर्पगन्धा, स्त्री, (सर्पं गन्धयति हिनस्तीति । गन्ध हिंसने + अण् । टाप् ।) वृक्षविशेषः । यथा,
"छत्राकी सर्पगन्धा च रसना च पलङ्कषा ॥"
इति जटाधरः ॥

सर्पघातिनी, स्त्री, (सर्पं हन्तीति । हन + णिनिः । ङीप् ।) सर्पकङ्कालीभेदः । यथा,—
"सर्पमहा सर्पनामा सर्पाङ्गी सर्पघातिनी ॥"
इति रत्नमाला ॥

सर्पतृणः, पुं, (सर्पस्तृणमिव च्छेद्यो यस्य ।) नकुलः । इति हेमचन्द्रः ॥

सर्पदंष्ट्रः, पुं, (सर्पस्य दंष्ट्रेव पुष्पमस्य ।) दन्तीवृक्षः । इति शब्दचन्द्रिका ॥

सर्पदंष्ट्रा, स्त्री, (सर्पस्य दंष्ट्रेव ।) वृश्चिकाली । इति रत्नमाला ॥

सर्पदंष्ट्रिका, स्त्री, (सर्पदंष्ट्रा + स्वार्थे कन् । टापि अत इत्वम् ।) अजशृङ्गी । इति राजनिर्घण्टः ॥

सर्पदण्डा, स्त्री, (सर्पं दण्डयतीति । दण्ड + अण् । टाप् ।) सैंहली । इति राजनिर्घण्टः ॥

सर्पदण्डी, स्त्री, (सर्पं दण्डयतीति । दण्ड + अण् । ङीप् ।) गोरक्षी । इति राजनिर्घण्टः ॥

सर्पदन्ती, स्त्री, (सर्पस्य दन्त इव पुष्पमस्याः । गौरादित्वात् ङीष् ।) नागदन्ती । इति राजनिर्घण्टः ॥

सर्पदमनी, स्त्री, (सर्पस्य दमनमस्याः । ङीप् ।) वन्ध्याकर्क्कोटकी । इति राजनिर्घण्टः ॥

सर्पनामा, स्त्री, (सर्पस्य नाम नाम यस्याः ।) सर्पकङ्कालीभेदः । इति रत्नमाला ॥

सर्पपुष्पी, स्त्री, (सर्पस्य दन्त इव पुष्पमस्याः । ङीप् ।) नागदन्ती । इति राजनिर्घण्टः ॥

सर्पफणजः, पुं, (सर्पस्य फणात् जायते इति । जन + डः ।) सर्पफणजातमणिः । इति शब्दरत्नावली ॥

सर्पभुक्, [ज्] पुं, (सर्पं भुङ्क्ते इति । भुज + क्विप् ।) मयूरः । इति हेमचन्द्रः ॥ सर्पभक्षके, त्रि, ॥

सर्पमाला, स्त्री, (सर्पस्य मालेव ।) सर्पकङ्कालीभेदः । इति क्वचित् रत्नमाला ॥ सर्पनामा इति साधुपाठः ॥

सर्पराजः, पुं, (सर्पाणां राजा समासे टच् ।) वासुकिः । इत्यमरः । १ । ८ । ४ ॥ (सर्पश्रेष्ठे, त्रि । यथा, हरिवंशे ६८ । १५ ।
"एष मोहं गतः कृष्णो मग्नो वै कालिये ह्रदे ।
भक्ष्यते सर्पराजेन तदागच्छत मारिचम् ॥")

सर्पलता, स्त्री, (सर्प इव लता ।) नागवल्ली । इति राजनिर्घण्टः ॥

सर्पसत्रं, क्ली, (सर्पनाशकं सत्रम् ।) सर्पनाशकयज्ञविशेषः । यथा, श्रीभागवते । १२।६।१६-२८ ।
"जनमेजयः स्वपितरं श्रुत्वा तक्षकभक्षितम् ।
यथा जुहाव संक्रुद्धः सर्पान् सत्रे सह द्विजैः ॥

सर्पसत्त्रे समिद्धाग्नौ दह्यमानान् महोरगान् ।
दृष्ट्वेन्द्रं भयसंविग्नस्तक्षकः शरणं ययौ ॥
अपश्यंस्तक्षकं तत्र राजा पारीक्षितो द्विजान् ।
उवाच तक्षकः कस्मान्न दह्येतोरगाधमः ॥
तं गोपायति राजेन्द्र शक्रः शरणमागतम् ।
तेन संस्तम्भितः सर्पस्तस्मान्नाग्नौ पतत्यसौ ॥
पारीक्षित इति श्रुत्वा प्राहर्त्विज उदारधीः ।
सहेन्द्रस्तक्षको विप्रा नाग्नौ किमिति पात्यते ॥
तच्छ्रुत्वा जुहुवुर्विप्राः सहेन्द्रं तक्षकं मखे ।
तक्षकाय पतस्वेह सहेन्द्रेण मरुत्वता ॥
इति ब्रह्मोदिताक्षेपैः स्थानादिन्द्रः प्रचालितः ।
बभूव संभ्रान्तमतिः सविमानः सतक्षकः ॥
तं पतन्तं विमानेन सह तक्षकमम्बरात् ।
विलोक्याङ्गिरसः प्राह राजानं तं बृहस्पतिः ॥
नैष त्वया मनुष्येन्द्र वधमर्हति सर्पराट् ।
अनेन पीतममृतमथवा अजरामरः ॥
जीवितं मरणं जन्तोर्गतिः स्वेनैव कर्म्मणा ।
राजंस्ततोऽन्यो नास्त्यस्य प्रदाता सुखदुःखयोः ।
सर्पचौराग्निवज्राम्बुक्षुत्तृड्व्याध्यादिभिर्नृप ।
पञ्चत्वमिच्छते जन्तुर्भुङ्क्ते प्रारब्धकर्म्म तत् ॥
तस्मात् सत्रमिदं राजन् संस्थीयेताभिचारिकम् ।
सर्पा अनागसो दग्धा जनैर्दृष्टं हि भुज्यते ॥
इत्युक्तः स तथेत्याह महर्षेर्मानयन् वचः ।
सर्पसत्रादुपरतः पूजयामास वाक्पतिम् ॥"
(जरत्कारुपुत्त्रस्यास्तीकस्य वचनादेव जनमेजय-
सर्पसत्रात् विरराभेति पुराणान्तरमतम् ॥)

सर्पसत्त्री, [न्] पुं, (सर्पसत्त्रमस्यास्तीति । इनिः ।) जनमेजयराजः । इति शब्दरत्नावली ॥

सर्पसहा, स्त्री, (सर्पं सहते इति । सह + अच् ।) सर्पकङ्कालीभेदः । इति रत्नमाला ॥

सर्पहा, [न्] पुं, (सर्पं हन्तीति । हन् + क्विप् ।) नकुलः । इति हेमचन्द्रः ॥

सर्पाक्षं, क्ली, (सर्पस्य अक्षीव अङ्गं यस्य । अच् ।) रुद्राक्षम् । इति राजनिर्घण्टः ॥

सर्पाक्षी, स्त्री, (सर्पस्य अक्षीव पुष्पं यस्याः । अच् । ङीष् ।) गन्धनाकुली । इति राजनिर्घण्टः ॥ क्षुपविशेषः । सहचरी इति गण्डिनी इति च हिन्दि भाषा । तत्पर्य्यायः । गण्डाली २ नाड़ीकलापकः ३ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । क्रिमिनाशित्वम् । वृश्चिकोन्दुरुसर्पाणां विषनाशित्वम् । व्रणरोपणत्वञ्च । इति भावप्रकाशः ॥

सर्पास्यः, पुं, (सर्पस्य आस्यम् आस्यम् यस्य ।) मत्स्यकन्दभेदः । इति राजनिर्घण्टः । नागकेशरः । इति रत्नमाला ॥ सर्पनाशके, त्रि ॥

सर्पाङ्गी, स्त्री, (सर्पस्येव अङ्गं यस्याः । ङीष् ।) सर्पकङ्कालीभेदः । इति रत्नमाला ॥ पिङ्गली । इति राजनिर्घण्टः ॥

सर्पादनी, स्त्री, (सर्पस्य तद्विषस्य अदनं भक्षणं यस्याः । ङीष् ।) नाकुली । इति राजनिर्घण्टः ॥

सर्पारातिः, पुं, (सर्पस्य अरातिः ।) गरुड़ः । इति हेमचन्द्रः ॥

सर्पारिः, पुं, (सर्पस्य अरिः ।) नकुलः । इति राजनिर्घण्टः ॥ गरुड़श्च ॥ (यथा, हरिवंशे । ६८ । ३७ ।
"तं दृष्ट्वा पञ्चमूर्द्धानं सर्पं सर्पारिकेतनः ।
अक्रुद्ध एव भगवान् प्रत्युवाचोरगेश्वरम् ॥")

सर्पावासं, क्ली, (सर्पस्य आवासो यत्र ।) चन्दनम् । इति राजनिर्घण्टः ॥ सर्पस्थाने, पुं ॥ (यथा, हरिवंशे । ६८ । २५ ।
"यशोदामनुगच्छन्त्यः सर्पावासमिमं ह्रदम् ।
प्रविशामो न यास्यामो विना दामोदरं
व्रजम् ॥")

सर्पाशनः, पुं, (सर्पमश्नातीति । अश + ल्युः ।) मयूरः । इति हलायुधः ॥ गरुड़श्च ॥

सर्पिः, [स्] क्ली, (सर्पतीति । सृप गतौ + "अर्चिशुचिहुसृपीति ।" उणा० २ । १०८ । इति इसिः ।) घृतम् । इत्यमरः । २ । ५२ ॥ (यथा, मनुः । ३ । २७४ ॥
"अपि नः स कुले जायात् यो नो दद्यात्
त्रयोदशीम् ।
पायसं मधुसर्पिर्भ्यां प्राक्छाये कुञ्जरस्य च ॥"
उदकम् । इति निघण्टुः । १ । १२ ॥)

सर्पिणी, स्त्री, (सर्पतीति । सृप् + णिनिः । ङीप् ।) सर्पभार्य्या । साँपिनी इति भाषा ॥ यथा, शब्दरत्नावल्याम् ।
"आशीराशी सर्पदंष्ट्रा तत्स्त्री सर्पी च
सर्पिणी ॥"
क्षुद्रक्षुपभेदः । तत्पर्य्यायः । भुजगी २ भोगी ३ कुण्डली ४ पन्नगी ५ फणी ६ । तस्या गुणौ । विषघ्नत्वम् । कुचवर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥

सर्पी, स्त्री, (सर्प + जातौ ङीष् ।) सर्पिणी । इति शब्दरत्नावली ॥

सर्पी, [न्] त्रि, गमनकर्त्ता । सृपधातोर्णिन्प्रत्ययेन निष्पन्नः ॥ (यथा, किराते । ५।२५ ।
"स एष कलाम उपान्तसर्पिणः
करोत्यकालेऽस्तमयं विवस्वतः ॥")

सर्पेष्टं, क्ली, (सर्पीणां सर्पभार्य्याणामिष्टम् ।) श्रीखण्डचन्दनम् । इति रत्नमाला ॥

सर्पेष्टं, क्ली, (सर्पाणामिष्टम् ।) श्रीखण्डचन्दनम् । इति जटाधरः ॥

सर्ब्ब, सर्पणे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) दन्त्यादिः । ओष्ठ्यवर्गशेषोपधः । सर्ब्बति सिसर्ब्बयिषति । इति दुर्गादासः ॥

सर्व्वः, पुं, (सर्व्वस्मिन् सर्व्वतीति सर्व्व गतौ + पचाद्यच् । यद्वा, सृ गतौ + "सर्व्वनिघृष्वेति ।" उणा० १ । १५३ । इति वन्प्रत्ययेन साधुः ।) शिवः । इत्यमरः । १ । १ । ३२ ॥ क्षितिमूर्त्तिरयम् । यथा, विमर्द्दनात् पूर्व्वं भविष्यपुराणोक्तस्वभावसिद्धप्रार्थेशान्यादिदिक्षु वामावर्त्तेन पूजनम् । यथा, सर्व्वाय क्षितिमूर्त्तये नम इत्यादि तिथ्यादितत्त्वम् ॥ विष्णुः । यथा,—
"असतश्च सतश्चैव सर्व्वस्य प्रभवाप्ययात् ।
सर्व्वस्य सर्व्वदा ज्ञानात् सर्व्वमेनं प्रचक्षते ॥"
इति विष्णुपुराणे
विष्णुसहस्रनामस्तोत्रेऽप्येवमेव ॥

सर्व्वः, त्रि, (सृ + वन् ।) अशेषः । इत्यमरः । ३ । १ । ६४ ॥ अस्य पर्य्यायः द्रष्टव्यः । प्रयोगो यथा,—
"सर्व्वरत्नमयो मेरुः सर्व्वाश्चर्य्यमयं नभः ।
सर्व्वतीर्थमयी गङ्गा सर्व्वदेवमयो हरिः ॥"
इति वह्निपुराणे ८० ।   ८१

सर्व्वंसहा, स्त्री, (सर्व्वं सहते इति । सह + "सर्व्वयोर्दारिसहोः ।" ३ । २ । ४१ । इति खच् । अरुर्द्विषदिति मुम् ।) पृथिवी । इत्यमरः ॥ (यथा आर्य्यासप्तशत्याम् । १३८ ।
"जड़ामुनातिवाह्य पृष्ठे लग्नापि कान्त
हन्ति ।
सर्व्वंसहे कठोरत्वचः किमङ्ग न कमठस्य ॥")
राशि, पुं, । इति कामिका ॥
सहे, त्रि, । यथा, साहित्यदर्पणे । २ । १६ ।
"कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्व्वंसहो
वैदेही तु कथं भविष्यति हहा हा देवि
धीरा भव ॥")

सर्व्वकः, त्रि, सकलः । सर्व्वशब्दस्य टेः अकच्-प्रत्ययात् स्वार्थे के च निष्पन्नः । इति मुग्धबोधव्याकरणम् ॥

सर्व्वकर्त्ता, [ऋ] पुं, (सर्व्वेषां कर्त्ता ।) ब्रह्मा । इति शब्दरत्नावली ॥

सर्व्वकर्म्मीणः, त्रि, (सर्व्वकर्म्माणि व्याप्नोति । सर्व्वकर्म्म + "तत्सर्व्वादेः पथ्यङ्गकर्म्मपत्रपात्रं व्याप्नोति ।" ५ । २ । ७ । इति खः ।) सर्व्वकर्म्मकर्त्ता । यथा, भट्टौ ५ सर्गे ।
"संग्रामे सर्व्वकर्म्मीणौ बाहू यस्योपकुर्व्वतः ॥"

सर्व्वत्र, अव्य, सर्व्वस्मिन् । सर्व्वशब्दात् त्रल्-प्रत्ययेन निष्पन्नः । इति सिद्धान्तकौमुदी ॥

सर्व्वकेशी, [न्] पुं, (सर्व्वकेशोऽस्यास्तीति । सर्व्वकेश + "सर्व्वादेश्चेति वक्तव्यम् ।" ५ । २ । ११५ । इत्यस्य वार्त्तिकोक्त्या इनिः ।) नटः । इति शब्दरत्नावली ॥

सर्व्वक्षारः, पुं, (सर्व्वेषां क्षारः ।) क्षारभेदः । सावान् इति भाषा । इति केचित् ॥ तत्पर्य्यायः । बहुक्षारः २ समूहक्षारकः ३ क्षौमकरः ४ महाक्षारः ५ मलारिः ६ क्षारमेलकः ७ । अस्य गुणाः । अतिक्षारत्वम् । उष्णत्वम् । दृष्टिशोधनत्वम् । उदावर्त्तक्रिमिनाशित्वम् । अजस्रविशोधनत्वञ्च । इति राजनिर्घण्टः ॥

सर्व्वगं, क्ली, (सर्व्वं गच्छतीति । गम + "अन्यत्रापि दृश्यत इति ।" ३।२।४८ । इति डः ।) जलम् । इति मेदिनी ॥

सर्व्वगः, पुं, (सर्व्वं गच्छतीति । गम + डः ।) शिवः । (यथा, महाभारते । १३ । १७ । १०१ ।
"प्रभावः सर्व्वगो वायुरर्य्यमा सविता रविः ॥") ब्रह्मा । इति मेदिनी ॥ आत्मा । इति हेमचन्द्रः ॥

। । सिन्धुस्य दृष्ट. । यथा, महाभारते ।
। ५ । ७० ।
...ति काश्मी कमाद् कार्यातोति दौति-
... सर्वं माधोपादानमाम ।"
सर्व्वगामि, त्रि । (यथा, माघकाव्ये ।
। ६० ।
"निलिम्पानादि पूर्ण्णापार्थं गतगम ।
सर्व्वगता गमात् सर्व्वतोऽपि न वेद-
नाम ।")
सर्व्वं, स्त्री. (सर्व्वं गच्छति गमित ।) यमुनाग-
दः । यथा, मार्कण्डेयपुराणम् ।
...नवपद्मोत्पन्नदृग्गामनिर्दृष्टम् ।
सर्व्वमिदं यादं द्युतिभिः पर्व्वणीनिगम"
... माघवर्षार्था ।
दुर्गानवपर्व्वत्पद्मोत्पन्नदृग्गुणम् ।
... व सर्व्वगतं विनिर्दिशेत् ।"
सर्व्वेऽपि हन्ति । यथा, हृत्वर्षदिताथाम् ।
। ५२ ।
...नि सर्व्वगमाय विन्ध्य भविनदनम् ।
...ामध्यो दिव्य महामानि च ।"
सर्व्वविशिष्टे, त्रि । यथा, काशीखण्ड-
...टि । ६ । १४ । २ ।
...सर्व्वं सर्व्वं सर्व्वं तासः सर्व्वं गम-
...म: सर्व्वमिदमध्यात्मोऽपरनादरः ।")
...गा, स्त्री, (सर्व्वं गच्छतीति । गम् + डः ।
...।) प्रियङ्गुवृक्षः । इति शब्दचन्द्रिका ॥
...ग्रन्थिः, पुं, (सर्व्वं ग्रन्थिः पन्थिरिव यत्र ।)
पर्व्वमूलम् । इति राजनिर्घण्टः ॥
...ग्रन्थिका, स्त्री, (सर्व्वत्र ग्रन्थिरिवास्य । कन् ।)
पर्व्वमूलम् । इति हेमचन्द्रः ॥
सर्व्वचर्म्मीणः, त्रि, (सर्व्वचर्म्मणा कृतः । सर्व्व-
...न् + "सर्व्व चर्म्मणः कृतः खखञौ ।" ५ ।
। ५ । इति खः ।) सकलचर्म्मनिर्म्मितः ।
...ति सिद्धान्तकौमुदी ॥
...जनीनः, त्रि,(सर्व्वजनाय हितः । सर्व्वजन +
सर्व्वजनात् ठञ् खश्च ।" ५ । १ । ८ । इत्यस्य
...र्त्तिकोक्त्या खः ।) सर्व्वजनसम्बन्धी । इति
महाजनकौमुदी ॥
...जया, स्त्री,(सर्व्वेषां जयो यस्याः ।)स्त्रीकर्त्त-
...मार्गशीर्षादिद्वादशमासनिष्पाद्यव्रतविशेषः ।
...था । अथ सर्व्वजयाव्रतम् । सामान्योक्तं कृत्वा
...द्य मार्गशीर्षे मासि अमुकपक्षे अमुकतिथौ
...विष्णुपदीसंक्रान्त्यामारभ्य वर्षपर्य्यन्तं अमुक-
गोत्रा श्रीअमुकी द्वादशमासगाकादित्यागफल-
...ताप्तिपूर्व्वकपुत्तपौत्रायुर्यशःप्राप्त्युत्तर-स्वर्गकामा
मनोरथकामा वा गणेशादिहरगौरीपूजाकर्म्मा-
सर्व्वजयाव्रतमहं करिष्ये । ततः सामान्योक्तं
नवग्रहपूजान्तं कृत्वा षडङ्गन्यासं प्रणवेन कृत्वा
गौरीसहितहरं ध्यायेत् ।
"श्वेतवर्णं वृषारूढं व्यालयज्ञोपवीतिनम् ।
विभूतिभूषिताङ्गञ्च व्याघ्रचर्म्माम्बरं शुभम् ॥
पञ्चवक्त्रं दशभुजं जटिलं चन्द्रचूडकम् ।
त्रिदिवं ... सर्व्वगं गणैव समन्वितम् ।
... देवं ध्यायेत् ...।"
इति ध्यात्वा ... ततः ... श्रीं ... दुर्गायै
नमः । इति सर्व्वेषामर्च्चनं कृत्वा पूर्व्वोक्ता ...
गौरीसहिताय नमः । इत्यावाहिता पूज-
येत् । ततः षड्वृक्षादिकादिदानं कृत्वा प्रार्थयेत् ।
"नमस्ते पार्व्वतीनाथ ! नमस्ते ...
नमस्ते पार्व्वतीदेवि अग्निकायै नमो नमः ।"
अथ कथा ।
स्कन्द उवाच ।
"भगवन् सर्व्वधर्म्मज्ञ सर्व्वाणि वृत्तानि कैलासम् ।
केन व्रतेन देवेश नारी सर्व्वसमीहितम् ॥
सौभाग्यसम्पदाचापि पुत्रपौत्रविवर्द्धनम् ।
मामाभुक्तयसाद्युक्तं प्राप्नोति दैवतं पदम् ॥
तद्व्रतं ब्रूहि मे देव ! नियतं च यथा प्रभो ॥
श्रीभगवानुवाच ।
अस्ति सर्व्वजया नाम व्रतानां परमुत्तमम् ।
सर्व्वसौभाग्यसहितं स्त्रीणां सर्व्वसमीहितम् ॥
सौभाग्यदिने पूजा निष्फलेव न संशयः ।
शृणु त्वं तद्व्रतं देवि ! प्रवक्ष्यामि महोत्तमे ॥
सर्व्वोवाच ।
प्रसन्नो यदि देवेश विधानं मयि कथ्यताम् ।
कथितं येन देवेश ! विधानं व्रतमुत्तमम् ॥
श्रीभगवानुवाच ।
सर्व्वजयाव्रतं चरतां शृणु वक्ष्ये सुशोभनम् ।
येन दृष्टं मया देवि यथा सर्व्वजयाव्रतम् ॥
पुत्रदानां गवादीनां दानानां सर्व्वसम्भवम् ।
पितृदारव्यञ्च नाम सर्व्वसम्पत्प्रदायकम् ॥
व्रतराजमिदं भद्रे नारीणां सुखदायकम् ।
मार्गशीर्षे त्यजेत् शाकं सौन्दर्य्यं तत्फलं लभेत्
पौषे तु लवणं त्यक्ता सौभाग्यफलं माप्नुयात् ।
माघे तैलं परित्यज्य प्रियं प्राप्नोति मानवी ॥
फाल्गुने च त्यजेत् पूगं भवेत् पतिव्रता सती ।
चैत्रे पुष्पं परित्यज्य सा याति परमां गतिम् ॥
भक्तं त्यक्ताथ वैशाखे याति चन्द्रपुरीं शुभाम् ।
ज्यैष्ठे धाराजलं त्यक्ता वारुणं लोकमाप्नुयात् ।
आषाढ़े च दधि त्यक्ता वारुणं लोकमाप्नुयात् ।
श्रावणे व्यञ्जनं त्यक्ता प्रजापतिपुरं व्रजेत् ।
भाद्रे तु व्यञ्जनं त्यक्ता नारायणपुरं व्रजेत् ॥
आश्विने च घृतं त्यक्ता लावण्यमुत्तमं लभेत् ।
गव्यञ्च कार्त्तिके त्यक्ता प्रयाति परमां गतिम् ।
मासान्ते भोजयेद्भुञ्जीत सर्व्वं दत्त्वा द्विजातये ।
शय्या देया व्रते पूर्णे दानानि विविधानि च ।
गौर्य्यां हरञ्च संपूज्य शाकं भुञ्जीत पायसम् ॥
एवं या कुरुते नारी वर्षं यावत् समाप्यते ।
स्वर्गे वसति सा नित्यं पुत्रपौत्रसमन्विता ॥
तत् कुरुष्व प्रयत्नेन येन सर्व्वजया भव ।
अचाव देवराजस्य रतीव मदनस्य च ।
तत्सदृशो भवेत् भद्रे व्रतस्यास्य प्रसादतः ॥"
इति स्कन्दपुराणोक्ता सर्व्वजयाव्रतकथा समाप्ता।
ततः श्रुत्वा प्रणम्य विसर्ज्जयेत् । वर्षान्ते प्रतिष्ठा
कर्त्तव्या। द्रव्यदानेऽमुकमासामुकद्रव्यत्यागजन्य-
फलप्राप्तिकामा निष्कृतिप्राप्तिकामा वा
सम्पूर्णफलार्थं ददे इति वदेत् । इति कृत्य-
चन्द्रिका ॥
सर्व्वजित्, पुं, (सर्व्वान् जयतीति । जि + क्विप् ।)
षष्ट्यब्दस्य एकविंशवर्षः । इति केचित् ॥
(त्रिषु जयी मात्रजयः । यथा, हृत्वर्षदि-
तायाम् । ८ । ३० ।
"त्वाहृष्टे तृषि सर्व्वजिद्भव जनः
संपन्नसौख्यः पन्नु सर्व्वधारी ॥")
सकलजयकर्त्तरि, त्रि ॥
सर्व्वज्ञः, पुं, (सर्व्वं जानातीति । ज्ञा + कः ।)
शिवः । (यथा, महाभारते । १३ । १७ । १२६ ।
"सुवर्णरेता सर्व्वज्ञः सुबीजो बीजवाहनः ॥"
बुद्धः । इत्यमरः । १ । १ । १४ ; १ । १ । १७ (विष्णुः ।
यथा, महाभारते । १३ । १४९ । ६१ ।
"सर्व्वदर्शी विमुक्तात्मा सर्व्वज्ञो ज्ञानमुत्तमम् ॥")
सकलज्ञातरि, त्रि ॥ (यथा, मनुः । १० । २० ।
"सर्व्वज्ञस्वरविज्ञानः सर्व्वयोनिस्वजातजः ॥")
सर्व्वज्ञा, स्त्री, (सर्व्वं जानातीति । ज्ञा + कः ।
टाप् ।) दुर्गा । यथा, देवीपुराणे ४५ अध्याये ।
"सर्व्वज्ञानमितिमार्गेषु ब्रह्मादिविगुणा मता ।
सर्व्वज्ञा सर्व्ववेत्तृत्वात्सर्व्वस्या ह्याविरयते ॥"
सर्व्वतः, अ, चतुर्दिग्भिन्नार्थकः । तत्पर्य्यायः ।
समन्ततः २ परितः ३ विष्वक् ४ । इत्यमरः । ३ ।
४ । १६ ॥ (यथा, मुण्डकोपनिषदि । ३ । २ । ५ ।
"ते सर्व्वगं सर्व्वतः प्राप्य धीरा
युक्तात्मानः सर्व्वमेवाविशन्ति ॥")
सर्व्व + तसिल् । सर्व्वः । यथा, मनुः । १ । ५ ।
"अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्व्वतः ॥"
"प्रसुप्तमिव सर्व्वतः प्रथमार्थे तसिः । सकार्य्या-
क्षमम्त्यिर्थः ।" इति तट्टीकायां कुल्लूकः ॥ पञ्च-
म्यास्तसिल् । सर्व्वस्मात् । सर्व्वेभ्यः । यथा,
मनुः । ४ । २४० ।
"सर्व्वतः प्रतिगृह्णीयात्मध्यायभयदक्षिणाम् ॥"
सप्तम्यास्तसिल् । सर्व्वस्मिन् । यथा, ऋतु-
संहारे । १ । २३ ।
"भ्रमति गवययूथः सर्व्वतस्तोयमिच्छन्
शरभकुलमजिह्मं प्रोद्धरत्यम्बु कूपात् ॥")
सर्व्वतःशुभा, स्त्री, (सर्व्वतः शुभं यस्याः ।)
प्रियङ्गुवृक्षः । इति शब्दचन्द्रिका ॥
सर्व्वतन्त्रः, पुं,(सर्व्वं तन्त्रमस्येति ।) सकलतन्त्रा-
ध्येता । इति केचित् ॥ (क्ली, सर्व्वं तन्त्रमिति ।)
सकलशास्त्रञ्च ॥
सर्व्वतापनः, पुं, (सर्व्वान् तापयतीति । तप +
णिच् + ल्युः ।) कामदेवः । इति केचित् ॥
सर्व्वतापके, त्रि, ॥
सर्व्वतिक्ता, स्त्री, (सर्व्वतस्तिक्ता ।) काकमाची ।
इति राजनिर्घण्टः ॥
सर्व्वतोभद्रं, क्ली, पु, (सर्व्वतो भद्रमस्मादिति ।)
ईश्वरगृहविशेषः । इत्यमरः । २ । २ । १० ॥ द्वारा-
लिन्दादिभिर्दशभिश्चाद्यगृहम् । तस्य लक्षणमुप-
न्यस्तं मात्स्ये यथा,—


स्वस्तिकं प्राङ्मुखं यत् स्यादलिन्दानुगतं भवेत्
तत्प्रागनुगतौ चान्यौ तत्पर्य्यन्तगतोऽपरः ॥
चतुर्दिक्ष्वलिन्दभेदं चतुर्द्वारञ्च यद्‌गृहम् ।
तद्भवेत् सर्व्वतोभद्रं चतुरालिन्दशोभितम् ॥
प्राक्पश्चिमानुगतौ च शेषावुदरविस्तृतौ ।
यत्रालिन्दौ [illegible] न चेत् स्यादुत्तरामुखम्
क्रमेणोपचीयमानं यत्रालिन्दद्वयं गृहे ।
तद्वर्द्धमानमित्याहुर्न चेत् स्यादुत्तरामुखम् ॥
दक्षिणानुगतालिन्दत्रयं यत् पश्चिमामुखम् ।
पूर्व्वशेषोत्तरोच्छ्रायं नन्द्यावर्त्तं वदन्ति तत् ॥
उपर्य्युपरि यद्‌गेहं तद्विच्छन्दकसंज्ञकम् ॥"
इति वचनेषु स्वस्तिकादीनां कौशलदर्शनात्
स्वस्तिकादीनां [illegible] मन्तव्यम् । एवमादि
[illegible] मार्गौ पुनिरावपि यदुक्तम् ।
'स्वस्तिकः सर्व्वतोभद्रो रुचको वर्द्धमानकः ।
नन्द्यावर्त्तादयश्चापि द्वारालिन्दादिभेदजाः ॥"
इति भरतः ॥*॥

[illegible] यथा, भविष्योत्तरे ।
"[illegible] कालस्य मूल्ये, [illegible] क्रमात् ।
द्वादशैव गृहान् कृत्वा तेषां [illegible] ॥
कृतस्तु सर्व्वतोभद्रो मध्ये [illegible] ।
[illegible] विस्तारश्च विस्तारो विमलस्तथा ॥
[illegible] निर्म्मितो घोरो द्वादशैते प्रकीर्त्तिताः ॥"
[illegible] यथा,—
"[illegible] दक्षिणाद्ये तथैव च ।
[illegible] सर्व्वतोभद्रं [illegible] ॥
[illegible] पूर्व्वाद्ये चात्र यत्नतः ।
चतुर्द्वारञ्च द्वाराणि [illegible] च ॥
[illegible] सर्व्वाणि [illegible] ।
[illegible] सर्व्वान् शत्रून् निकृ-
न्तति ॥"
दैर्घ्यं ११ हस्त १० इति सर्व्वतोभद्रं । इति
युक्तिकल्पतरुः ॥ (सर्व्वतो भद्रमस्ति । त्रि ।
[illegible] १०।७१।११ ।

"इत्यब्रवचो राजन् सर्व्वतोभद्रमच्युतम् ।
देवपियंदुहनाय क्षत्रय सत्यपूजयन् ॥")
सर्व्वतोभद्रं,क्ली. (सर्व्वतो भद्रमस्येति ।) ह्यदेत्-
सर्गव्रतप्रतिष्ठादौ पूजाधारमण्डलविशेषः । यथा,
शारदायाम् ।
"चतुरस्रे चतुःकोष्ठे कर्णसूत्रसमन्विते ।
चतुर्ष्वपि च कोष्ठेषु कोणसूत्रचतुष्टयम् ॥
मध्ये मध्ये यथा मत्स्या भवेयुः पातयेत्तथा ।
पूर्व्वापरायते द्वे द्वे सूत्रे याम्योत्तरायते ॥
पातयेत्तेषु मत्स्येषु समं सूत्रचतुष्टयम् ।
पूर्व्ववत् कोणकोष्ठेषु कर्णसूत्राणि पातयेत् ।
तदग्रेतेषु मत्स्येषु दद्यात् सूत्रचतुष्टयम् ।
ततः कोष्ठेषु मत्स्याः स्युस्तेषु सूत्राणि पातयेत्
यावत् शतद्वयं सन्तौ षट्‌पञ्चाशत् पदान्यपि ।
तावत्तेनैव विधिना तत्र सूत्राणि पातयेत् ॥
षट्‌त्रिंशता पदैर्मध्ये लिखेत् पद्मं सुलक्षणम् ।
बहिःपङ्‌क्त्या भवेत् पीठं पङ्‌क्तियुग्मेन वीथिका
द्वारशोभोपशोभार्थान् शिष्टाभ्यां परिकल्पयेत्
शास्त्रोक्तविधिना सम्यक् ततः पद्मं समालिखेत्
पद्मक्षेत्रस्य संत्यज्य द्वादशांशं बहिः सुधीः ।
तन्मध्यं विभजेत् वृत्तैस्त्रिभिः समविभागतः ॥
आद्यं स्यात् कर्णिकास्थानं केशराणां द्वितीयकम्
तृतीयं पद्मपत्राणां सूत्रार्थेन दलाग्रकम् ॥
[illegible] मानेन विधिना सुधीः ।
निधाय केशराग्रेषु परितोऽर्द्धनिशाकरान् ॥
निखिला मन्धिषत्राणि तत्र सूत्राणि पातयेत्
दलानामाद्य यन्मानं तन्मानाद्‌वृत्तमालिखेत् ॥
तदन्तरालमध्यस्थसूत्राग्रोभयतः सुधीः ।
पार्श्वयोर्[illegible] दलाग्राणि समन्ततः ॥
दलमूलेषु युगशः केशराणि प्रकल्पयेत् ।
एतत् साधारणं प्रोक्तं पङ्कजं तत्त्ववेदिभिः ॥
पदानि कोष्ठे पादार्थं पीठकोणेषु मार्ज्जयेत् ।
अवशिष्टैः पदैर्विंशात् पीठगात्राणि कारयेत् ॥
पदानि वीथिसंस्थानि मार्ज्जयेत्‌पङ्‌क्तयमिदतः ।

दिक्षु द्वाराणि रचयेत् त्रिषु कोष्ठेषु [illegible]
पदैस्त्रिभिरथैकेन शोभाः स्युर्द्वारपार्श्वतः ।
उपशोभाः स्युरेकेन त्रिभिः कोष्ठैः [illegible]
अवशिष्टैः पदैः षड्‌भिः [illegible]
रञ्जयेत् पञ्चभिर्वर्णैर्मण्डलं तत्त्ववित्तमः ।
पीतं हरिद्राचूर्णं स्यात् सितं [illegible]
कुसुम्भचूर्णमरुणं कृष्णं दग्धपुलाकजम् ।
बिल्वादिपत्रजं श्यामं इत्युक्तं वर्णपञ्चकम्
अङ्गुलोत्सेधविस्तारा सीमारेखाः [illegible]
[illegible]
कर्णिका पीतवर्णेन केशरास्त्वरुणेन च ।
[illegible]
रजसा रञ्जयेत् सम्यक् यद्वा पीतेन [illegible]
केशराः पीतरक्ताः स्युररुणानि दलानि [illegible]
सन्धयः कृष्णवर्णाः स्युः सितेनाप्यपि [illegible]
रञ्जयेत् पीठगर्भाणि पादाः स्युररुण-
गात्राणि तस्य शुक्लानि वीथीषु [illegible]
आलिखेत् कल्पलतिका दलपुष्प[illegible]
वर्णैर्नानाविधैश्चित्रैः सर्व्वदृष्टिमनोहराः ।
द्वाराणि शुक्लवर्णानि शोभा रक्ता [illegible]
उपशोभाः पीतवर्णाः कोणान्यसितानि [illegible]
तिस्रो रेखा बहिः कार्य्याः [illegible]
[illegible]
मण्डलं सर्व्वतोभद्रमेतत् साधारणं [illegible]
प्रकारान्तरं यथा,—
"चतुरस्रां भुवं भित्त्वा दिग्भ्यो द्वादशधा [illegible]
पातयेत्तत्र सूत्राणि कोष्ठानां द्वे शते [illegible]
चतुश्चत्वारिंशदाद्य पद्मात् षट्‌त्रिंशता [illegible]
कोष्ठैः प्रकल्पयेत् पीठं पङ्‌क्त्या [illegible]
द्वारशोभे यथा पूर्व्वमुपशोभा न [illegible]
अवशिष्टैः पदैः कुर्य्यात् [illegible]
[illegible]
विदध्यात् पूर्व्ववत् शेषमिदं वा मण्डलं [illegible]
इति तन्त्रसारे १ परिच्छेदः ॥*॥

सर्व्वतोभद्रमण्डलस्य रूपं यथा ।



राणां शुभाशुभज्ञानार्थं चक्रविशेषः । यथा,
“अथातः संप्रवक्ष्यामि चक्रं त्रैलोक्यदीपनम् ।
विख्यातं सर्व्वतोभद्रं सद्यः प्रत्ययकारकम् ॥
ऊर्द्ध्वगा दश विन्यस्य तिर्य्यग्रेखास्तथा दश ।
एकाशीतिपदं चक्रं जायते नात्र संशयः ॥
अकारादिस्वराः कोष्ठेष्वीशादौ विदिशि
क्रमात् ।
प्रदक्षिणक्रमाज्ज्ञेया ज्योतिःशास्त्रविशारदैः ॥
कृत्तिकादीनि धिष्ण्यानि पूर्व्वाशादि लिखेत्ततः
सप्त सप्त क्रमेणैव अष्टाविंशतिसंख्यया ॥
अ-व-क-ह-डाः पूर्व्वस्यां म-ट-प-र-ता
इतिति दक्षिणस्याम् ।
न-य-भ-ज-खा वारुण्यां ग-श-द-च ला-श्चोत्त-
रस्यां स्युः ॥
वयस्तयो हपाद्यास्तु पूर्व्वादिक्रमतो बुधैः ।
राशयो द्वादश स्थाप्या मेषान्ता दक्षमार्गतः ॥
शेषेषु कोष्ठकेष्वेवं नन्दादितिथिपञ्चकम् ।
वाराणां सप्तकं लेख्यं भौमाद्यं तत्तिथिक्रमात् ॥
इत्येवं सर्व्वतोभद्रप्रकारः कथितो मया ।
यस्मिन्नृक्षे स्थितः खेटस्ततो वेधत्रयं भवेत् ॥
ग्रहदृष्टिवशेनात्र वामदक्षिणसंमुखे ।
भुक्तं भोग्यं तथाक्रान्तं विद्धं क्रूरग्रहेण भम् ॥
शुभाशुभेषु कार्य्येषु वर्ज्जनीयं प्रयत्नतः ।
वक्रगे दक्षिणा दृष्टिर्व्वामा दृष्टिश्च शीघ्रगे ॥
संमुखी मध्यचारे च ज्ञेया भौमादिपञ्चके ।
सूर्य्यमुक्ता ग्रहाः शीघ्रास्तथा चार्के द्वितीयगे ॥
समास्तृतीयगे ज्ञेया मन्दा भानौ चतुर्थगे ।
वक्राः स्युः पञ्चषष्ठेऽर्के त्वतिवक्रा नगाष्टगे ॥
नवमे दशमे भानौ जायते सहजा गतिः ।
द्वादशैकादशे सूर्य्ये लभन्ते शीघ्रतां पुनः ॥
रविस्थित्यंशकांशावधेः संख्यात्र कल्पते ।
न तु राश्यन्तरस्पर्शात् द्वितीयादिनिरूपणम् ॥
राहुकेतू सदा वक्रौ शीघ्रगौ चन्द्रभास्करौ ।
गतेरेकस्वभावत्वादेषां दृष्टिस्त्रयं सदा ॥
क्रूरा वक्रा महाक्रूराः सौम्या वक्रा महाशुभाः
स्युः सहजस्वभावस्थाः सौम्या क्रूराश्च शीघ्रगाः ॥
च-ङ छाः प-ण-ठाश्चैव ध-फ-टाश्च-भ-ञा-
स्तथा ।
एतत् त्रिकं त्रिकं विद्धं विद्धैः क-प-भ-दैः
क्रमात् ॥
घ-ङ-छा रौद्रगे वेधे प-ण-ठा पञ्चगे ग्रहे ।
ध-फ-ढाः पूर्व्वाषाढायां थ-भ-ञा भाद्र उत्तरे ।
बवौ शसौ षखौ चैव जयौ चनौ परस्परम् ।
एकेन हि द्वयं ज्ञेयं शुभाशुभपदद्वयमे ॥
अवर्णादिस्वरद्वन्द्वे त्वेकवेधात् द्वयोर्व्वधः ।
युग्मवर्णात्मके वेधे अनुस्वारविसर्गयोः ॥”
आकारादियुग्मवर्णात्मकवेधवदनुस्वारविसर्गयो
एकवेधादुभयवेध इत्यर्थः ।
“कोणस्वरद्वयोर्म्मध्ये नन्दादिपादगे ग्रहे ।
अकारादिचतुष्केषु वेधः पूर्णतिथौ तथा ॥
एकादिक्रूरवेधेन फलं पुंसां प्रजायते ।
उद्वेगश्च भयं हानिर्व्याधिर्म्मृत्युः क्रमेण च ॥

ऋक्षे भ्रमोऽक्षरे हानिः स्वरे व्याधिर्भयं तिथौ ।
राशौ विद्धे महाविघ्नः पञ्चविद्धो न जीवति ॥
एकवेधे भयं युद्धे युग्मवेधे धनक्षयः ।
त्रिवेधे तु भवेद्भङ्गो मृत्युर्वेधचतुष्टये ॥”
दृष्टित्रये उदाहरणमाह ।
“भरण्यकारहपभं नन्दां भद्रां तुलाञ्च भम् ।
विशाखां हरिभं विध्येद्ग्रह आग्नेयसंस्थितः ॥”
उदाहरणान्तरमाह ।
“वं युग्ममौस्वरं कन्यां रेफं स्वातीमुकारकम् ।
अश्विनीं रोहिणीस्थोऽभिजिद्भमेवं परेष्वपि ॥
यथा दृष्टफलाः क्रूरास्तथा सौम्याः शुभप्रदाः ।
क्रूरयुक्तः पुनः सौम्यो ज्ञेयः क्रूरफलप्रदः ॥
अर्कवेधे मनस्तापो द्रव्यहानिश्च भूसुते ।
रोगपीडाकरः सौरी राहुकेतू च विघ्नदौ ॥
चन्द्रे मिश्रफलं पुंसां रतिलाभश्च भार्गवे ।
बुधवेधे भवेत् प्रज्ञा जीवः सर्व्वशुभप्रदः ॥
स्वर्क्षेवस्थे बलं पूर्णं पादोनं मित्रभे ग्रहे ।
अर्द्धं समगृहे प्रोक्तं पादं शत्रुगृहे स्थिते ॥
इदञ्च सौम्यक्रूराणां बलं स्थानवशात् समम् ।
एतदेव फलं विद्धि सौम्यैः क्रूरैर्विपर्य्ययात् ॥
स्थानवेधसमायोगात् यत्संख्यं जायते बलम् ।
तत्संख्यं वेध्यवस्तूनां फलं ज्ञेयं शुभाशुभम् ॥
दृष्टिहीने पुनर्वेधे न स्यात् किञ्चित् शुभाशुभम्
ग्रहाः सौम्यास्तथा क्रूरा वक्राः शीघ्रोच्चनीचगाः
स्थानञ्च वेधमित्येवं बलं ज्ञात्वा फलं वदेत् ।
वक्रग्रहे फलं द्विघ्नं त्रिगुणं स्वोच्चसंस्थिते ॥
स्वभावजं फलं शीघ्रे नीचस्थोऽर्द्धफलो ग्रहः ।
तिथिराश्यंशनक्षत्रं विद्धं क्रूरग्रहेण यत् ॥
सर्व्वेषु शुभकार्य्येषु वर्ज्जयेत्तत् प्रयत्नतः ।
न नन्दति विवाहे च यात्रायां न निवर्त्तते ॥
रोगात्र मुच्यते रोगी वेधविज्ञानलीयमः ।
रोगकाले भवेद्वेधः क्रूरखेचरसम्भवः ॥
वक्रगत्या भवेन्मृत्युः शीघ्रे जाप्यरुजान्वितः ।
वेधस्थाने रणे भङ्गो दुर्गे खण्डिः प्रजायते ॥
कविप्रवेशनं तत्र योधाघातश्च तत्र वै ॥”
कविशौर्योदाहा ।
“यत्र पूर्व्वादिकाष्ठायां ह्यपराश्यादिगो रविः ।
सा दिगस्तमिता ज्ञेया शेषास्तिस्रः सदोदिताः
ईशानस्थाः स्वराः प्राच्यां ज्ञेया याम्या-
मथाग्निगाः ।
नैरृतस्थाश्च वारुण्यां वायव्यां सौम्यगा मताः
नक्षत्राणि स्वरा वर्णा राशयस्तिथयो दिशः ॥
ते सर्व्वेऽस्तमिता ज्ञेया यत्र भानुस्त्रिमासिकः
नक्षत्रेऽस्ते रुजा वर्णे हानिः शोकः स्वरेऽस्तगे
राशौ विघ्नस्तिथौ भीतिः पञ्चास्ते मरणं भवेत्
यात्रा युद्धं विवादश्च द्वारं प्रासादहर्म्ययोः ।
न कर्त्तव्यं शुभं चान्यदस्ताशाभिमुखं नरैः ॥
अस्ताशायां स्थितं यस्य नाम्नः प्रथमनक्षत्रम् ।
स चार्त्तः सर्व्वकार्य्येषु ज्ञेयो दैवहतो नरः ॥
कर्णे कोष्ठे तथा द्वन्द्वे चतुरङ्गमहाहवे ।
वर्ण्योदयास्तं गता योधा यदोर्च्चेदिक्षयं रखे ॥
नक्षत्रेऽभ्युदिते पुष्टिर्व्वर्णे लाभः स्वरे सुखम् ।

राशौ जयस्तिथौ तेजः पदासिः पञ्चकोदये ॥
प्रश्नकाले भवेद्विद्धं यल्लग्नं क्रूरखेचरैः ।
तद्दृष्टं शोभनं सौम्यैर्मिश्रैर्मिश्रफलं भवेत् ॥
ग्रहाविद्धन्तु यल्लग्नं फलं लग्नस्वभावतः ।
ज्ञातव्यमीक्षिते केन्द्रे भाषितं यच्चरादिकम् ॥
शीर्षोदये सौम्यविलग्नवर्गे
लग्नेऽपि वा सौम्ययुते शुभं स्यात् ।
अतोऽन्यथात्वे तु तदन्यथात्वं
मिश्रं विमिश्रैरधिकं बलाढ्यैः ॥
केन्द्रोपगा नवमपञ्चमगाश्च सौम्याः
केन्द्राष्टवर्ज्जमशुभास्त्र्यषष्ठसंस्थाः ।
सर्व्वार्थसाधनकराः परिपृच्छतां स्यु-
रेभिर्विपर्य्ययगतैस्तु विपर्य्ययः स्यात् ॥
लग्नाधिनाथो यदि केन्द्रगः स्यात्
तन्मित्रमेतस्य च केन्द्रगं वा ।
व्ययाष्टकेन्द्रानपहाय पापा
अन्यत्र याता यदि तच्छुभं स्यात् ॥
आद्यो लग्नाधिपः कार्य्ये लग्ने कार्य्याधिपो यदि
द्वितीयो लग्नपो लग्ने कार्य्ये कार्य्याधिपो यदि
लग्नपः कार्य्यपश्चापि लग्ने यदि तृतीयकः ।
चतुर्थः कार्य्यपौ स्यातां यदि लग्नपकार्य्ययौ ॥
कार्य्यसिद्धिस्तदा ज्ञेया मित्रश्चेदधिकं मतम् ।
एवं दृष्टिवशाज्ज्ञेयं फलं तद्वच्चतुष्टयम् ॥
पूर्णनाडीस्थितो दूती यत् पृच्छति शुभाशुभम् ।
तत् सर्व्वं सिद्धिमाप्नोति शून्ये शून्यं समीरणे ॥
आद्यो शून्यगतः पृच्छेत्पश्चात् पूर्णं विशेद्यदि
तदा सर्व्वार्थसिद्धिः स्यात् यामे यामं न संशयः
श्वासप्रवेशकाले चेद्दूती जल्पति वाञ्छितम् ।
तस्यार्थः सिद्धिमाप्नोति निर्गमे नास्ति सुन्दरम्
ऊर्द्ध्ववामाग्रतो दूतो ज्ञेयो वामपथस्थितः ।
पृष्ठे दक्षे तथाधस्ताद्दक्षवाही गतो मतः ॥
यात्रादानविवाहेषु वस्त्रालङ्कारभूषणे ।
शुभे कर्म्मणि सन्धौ च प्रवेशे वामगः शुभः ॥
कलहद्यूतयुद्धेषु स्नानभोजनमैथुने ।
व्यवहारे भये भङ्गे दक्षनाडी प्रशस्यते ॥
क्रूरैरुभयतो विद्धा यस्याचरतिथिस्वराः ।
राशिर्धिष्ण्यश्च यत्रापि तस्य मृत्युर्न संशयः ॥
मण्डलं नगरं ग्रामो दुर्गं देवालयं पुरम् ।
क्रूरैरुभयतो वेधे विनश्यन्ति न संशयः ॥
कृत्तिकायां तथा पुष्ये रेवत्याञ्च पुनर्व्वसौ ।
विद्धे सति क्रमाद्वेधो वर्णेषु ब्राह्मणादिषु ॥
तैलं भाण्डं रसो धान्यं गजाश्वादिचतुष्पदाः ।
सर्व्वं महार्घतां याति यावत् क्रूरस्थितम्
क्रूरवेधसमायोगे यस्तोपपदसम्भवः ।
तस्य मृत्युर्न सन्देहो रोगाद्वाथ रणादपि ॥
मुच्यमान् पदमं धिष्ण्यं ज्ञेयं विद्वन् साभिधम्
गृहाष्टमकं प्रोक्तं सन्निपातं चतुर्द्दशम् ॥
कैमुरटादशं प्रोक्तमुक्ता ष्याटेकविंशतिम् ।
द्वाविंशतितमं मन्यं वर्ष्येविंशञ्च वज्रकम् ॥
निर्घातश्च चतुर्विंशमुक्ता पदादुत्पदाः ।
प्रस्थाने विघ्नदाः प्रोक्ताः सर्व्वकार्य्येषु सर्व्वदा ॥”
इति नर्म्मसौभद्रसंग्रहम् । इति ज्योतिषतत्त्वम् ॥

सर्व्वतोभद्रचक्रस्य रूपं यथा ।

पूर्व्व

उत्तर | दक्षिण

अ	३	४	५	६	७	८	८	आ
२	उ	अ	य	क	ह	ड	ऊ	१०
१	ल	ऌ	वृष:	मिथुन:	कर्क्कट:	ॡ	म	११
२७	च	मेष:	ओ	नन्दा	औ	सिंह:	ट	१२
२६	द	मीन:	रिक्ता	पूर्णा	भद्रा	कन्या	प	१३
२५	श	कुम्भ:	अं	जया	अः	तुला	र	१४
२४	ग	ऐ	मकर:	धनु:	वृश्चिक:	ए	त	१५
२३	ऋ	ख	ज	भ	य	न	ॠ	१६
ई	२२	०	२१	२०	१९	१८	१७	इ

पश्चिम

सर्व्वतोभद्र:, पुं, सर्व्वतो (भद्रमस्येति) निम्ब-वृक्ष:। इत्यमर: ।२।४।६२॥ व्यूहविशेष: । इति तट्टीका ॥ विष्णुरथ: । इति शब्दरत्नावली । वंश: । इति शब्दचन्द्रिका ॥ चित्रकाव्यविशेष:। इति मेदिनी ॥

तदुदाहरणं यथा ।

स	का	र	ना	ना	र	का	स
का	य	सा	द	द	सा	य	का
र	सा	ह	वा	वा	ह	सा	र
ना	द	वा	द	द	वा	द	ना

इति सर्व्वतोभद्र: । इति माघे । १९ । २७ ॥ अस्यार्थ: । "सकारेति । पुन: कीदृशी ।
'कारो वधे निग्रहे च मदे यत्ने रतावपि ।'
इति विश्व: ॥
सकारा: सवधा: सोत्साहा: नाना नानाविधाय ये आरा: चरीणां समूहा: । भिक्षादिभ्योऽण् । तेषां कामा गतिभेदा: काया विग्रहाय येषां सार्टं ददतीति साददा: नायकारका सायका यस्यां सा तथोक्ता । रसेन रागेणाहवो यस्यां सा रसाहवा रणरागिणीत्यर्थ: । वाहसारावां वाहयेष्ठानां ये नादा हेषादिघोषास्तेषां वार्टं कलहं ददतीति वाददानि । तै: सह कलहायमानानि वादनानि वाद्यानि यस्यां सा वाहसारनादवाददवादना तूर्यशब्दघोषेत्यर्थ: । अनयत तेषां तुष्यतीष्टेतिरर्थोक्ति: । सर्व्वतो भ्रमणात् सर्व्वतोभद्रा चक्रबन्ध । अत्र दण्डी ।
'तदिदं सर्व्वतोभद्रं भ्रमणं यदि सर्व्वत: ।' इति।
उद्धारस्तु । चतु:कोष्ठे चतुरङ्गबन्धे पंक्तिचतुष्टये पादचतुष्कं विलिख्यानन्तरं पङ्क्तिचतुष्टयेऽप्यध:क्रमेण पादचतुष्टयलेखने प्रथमासु चतसृषु प्रथमपाद: सर्व्वतो वाच्यते । एवं द्वितीयादिषु द्वितीय इत्यादि ।" इति तट्टीकायां मल्लिनाथ ॥ (वटिकौषधविशेष: । यथा,—
"विशुद्धं गगनं ग्राह्यं द्विकर्षं शुद्धगन्धकम् ।
तोलकं तोलकार्द्धं च हिङ्गुलोत्थरसन्तथा ॥
कर्पूरं केशरं मांसी तेजपत्रं लवङ्गकम् ।
जातीकोषफलञ्चैव सूक्ष्मैलाकरिपिप्पली ॥
कुष्ठं तालीशपत्रञ्च धातकी चोचमुस्तकम् ।
हरीतकी मरिचञ्च शृङ्गवेरविभीतकम् ॥
पिप्पल्यामलकञ्चैव शाणभागं विचूर्णितम् ।
सर्व्वमेकीकृतं पिष्ट्वा वटीं कुर्य्याद्द्विगुञ्जिकाम् ॥
भक्षयेत् पर्णखण्डेन मधुना सितयापि वा ।
रोगं मात्रानुपानञ्च प्रात: कुर्य्याद्विचक्षण: ॥
हन्ति मन्दानलान् सर्व्वानामदोषं विसूचिकाम् ।
पित्तश्लेष्मभवं रोगं वातश्लेष्मभवन्तथा ॥
पानाहं मूत्रकृच्छ्रञ्च संग्रहग्रहणीं वमिम् ।
अम्लपित्तं शीतपित्तं रक्तपित्तं विशेषत: ।
चिरज्वरं पित्तभवं धातुस्थं विषमज्वरम् ॥
कासं पञ्चविधं हन्ति कामलां पाण्डुमेव च ।
सर्व्वलोकहितार्थाय शिवेन भाषित: पुरा ।
सर्व्वतोभद्रनामायं रस: साक्षान्महेश्वर: ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे ॥
"सूतं तपनगगनं कान्तलौहस्य चूर्णं
तुल्यैकस्मिन् द्रवादि पिषितं शृङ्गवेरस्य वारा ।
गुञ्जाद्वौ यज्ञतिगुदजे शोथे सर्व्वज्वरेषु
शोथे पाण्डौ क्रमिजातगदे सर्व्वत: कामलायाम् ।
कासे श्वासे प्रमिहजठरे सर्व्वदोषप्रभूते
ख्यातो योग: सुरमपिजात: सर्व्वरोगैकहन्ता ॥"
इति च रसेन्द्रसारसंग्रहे शोथाधिकारे ॥)
सर्व्वतोभद्रा, स्त्री, (सर्व्वतो भद्रं ... इति ।) गम्भारी । नटयोषित् । इति ...
सर्व्वतोमुखं, क्ली, (सर्व्वतो मुखमस्येति ।) इत्यमर: ।१।१०।४॥ आकाशम् । इति ... (समन्ततोमुखविशिष्टे, त्रि । यथा, ... १ । २११ । १२ ।
"एवं सर्व्वान् समादिश्य पूर्व्वतीरे ... क्रूरां मतिं समास्थाय जग्मतु: सर्व्वतोमुखौ"
सर्व्वतोमुख:, पुं, (सर्व्वत: मुखमस्येति ।) ... (यथा, महाभारते । १३ । २७ । ...
"सर्व्वकामवरश्चैव सर्व्वद: सर्व्वतोमुख: ।"
ब्रह्मा । (यथा, कुमारे । २ । ३ ।
"अथ सर्व्वस्य धातारं ते सर्व्वे सर्व्वतोमुखम् ।
वागीशं वाग्भिरर्थ्याभि: प्रणिपत्योपतस्थिरे ॥")
आत्मा । इति मेदिनी ॥ (विष्णु: । ... महाभारते । १३ । १४९ । १०० ।
"अमृतांशोऽमृतवपु: सर्व्वज्ञ: सर्व्वतोमुख: ।")
ब्राह्मण: । इति शब्दरत्नावली ॥ स्वर्ग: । इति शब्दमाला ॥ अग्नि: । यथा,—
"सर्व्वत: पाणिपादान्त: सर्व्वतोऽक्षिशिरोमुख: ।
विश्वरूपो महानग्नि: प्रणीत: सर्व्वकर्म्मसु ।"
इति तिथ्यादितत्त्वधृताग्निप्रणयनमन्त्र: ।
सर्व्वत्र, व्य, (सर्व्वस्मिन्निति । सर्व्व + ... ५ । ३ । १० । इति त्रल् ।) सर्व्वदिगुदेशे ... इति शब्दरत्नावली ॥ (यथा, रघु । ३ । ...
"तुतोष वीर्य्यातिशयेन वृत्रहा
पदं हि सर्व्वत्र गुणैर्निधीयते ॥")
सर्व्वत्रग:, पुं, (सर्व्वत्र गच्छतीति । गम + "अन्यत्रेषु सर्व्वत्रपन्नयोरुपसंख्यानम् ।" ... इत्यस्य वार्त्तिकोक्त्या ड: ।) वायु: । इति ... सर्व्वत्र-गामिनि, त्रि । इति ... (यथा, गीतायाम् । ८ । ६ ।

ाकाशस्थितो नित्यं वायुः सर्व्वत्रगो महान्
सर्व्वाणि भूतानि मत्स्थानीत्युपधारय॥")
गामी,[न्]पुं, (सर्व्वत्र गच्छतीति। गम +
ः।) वायुः। इति शब्दचन्द्रिका॥ सर्व्वदिग्
ाले गमनकर्त्तरि, त्रि ॥
, व्य, (सर्व्वेण प्रकारेण। सर्व्व+"प्रकार-
ं थाल्।" ५। ३। २३। इति थाल्।)
प्रकारम्। इति व्याकरणम्॥ (यथा,
।२।१५।
देतेऽनुदिते चैव समयाध्युषिते तथा।
था वर्त्तते यज्ञ इतीयं वैदिकी श्रुतिः॥")
ग्ना। भगम्। हेतुः। इति शब्दरत्नावली॥
मनः,पुं,(सर्व्वान् दमयतीति। दम+ल्युः।)
राजः। स तु शकुन्तलापुत्त्रः। इति
ाण्डशेषः॥ (अस्य नामनिरुक्तिर्यथा महा-
ते। १। ७४। ५—७।
ड्वर्ष एव बालः स कण्वाश्रमपदं प्रति।
ान् व्याघ्रान् वराहांश्च महिषांश्च गजां-
स्तथा॥
न्ध हृचे बलवानाश्रमस्य समीपतः।
ोहन् दमयंश्चैव क्रीडंश्च परिधावति॥
ोऽस्य नाम चक्रुस्ते कण्वाश्रमनिवासिनः।
त्वयं सर्व्वदमनः सर्व्वान् हि दमयत्यसौ॥
र्व्वदमनो नाम कुमारः समपद्यत॥"*॥
ंदमनकर्त्तरि, त्रि। इति व्याकरणम्॥)
र्शी, [न्] पुं, (सर्व्वं पश्यतीति। दृश+
निः।) बुद्धः। इति शब्दरत्नावली॥ सकल-
िनकर्त्तरि, त्रि॥ (यथा, रामायणे। २।
६। ६।
र्व्वज्ञः सर्व्वदर्शी च बुद्धिमांश्चासि राघव!॥'
दा, व्य, (सर्व्व+"सर्व्वैकान्यकिंयत्तदः काले
।" ५। ३। १५। इति दा।) सर्व्वस्मिन्
ाले इत्यमरः। ३।४।२२॥ (यथा, नरसिंह-
राणे। १२। ५६।
त्पादपद्मे देवेश भक्तिं मे देहि सर्व्वदा।
दि तुष्टो ममाद्य त्वमन्यदेकं वृणोम्यहम्॥")
दुःखक्षयः,पुं,(सर्व्वेषां दुःखानां क्षयो यत्र।)
ोक्षः। इति हेमचन्द्रः॥ सकलपीड़ानाशश्च॥
र्व्वदेवमुखः, पुं, (सर्व्वेषां देवानां मुखं यत्र।)
ग्निः। इति जटाधरः॥
र्व्वद्रुह्, [स्]त्रि, सर्व्वस्य पूजकः। सर्व्वानद्रुति
त्यर्थे क्विप्प्रत्ययेन निष्पन्नः। इति व्याकरणम्॥
र्व्वधारी,[न्]पुं,(सर्व्वं धरतीति। धृ+णिनिः।)
ालचक्रस्य द्वाविंशवर्षः। इति केचित्॥
(यथा, वृहत्संहितायाम्। ८। २७।
"त्वाष्ट्रे युगे सर्व्वजिदाद्य उक्तः
संवत्सरोऽन्यः खलु सर्व्वधारी।
तस्मात् विरोधी विकृतः खरश्च।
शस्तो द्वितीयोऽत्र भवाय शेषाः॥"*॥
सर्व्वधारके, त्रि॥)
र्व्वधुरावहः, पुं, (सर्व्वा चासौ धूश्चेति। सर्व्व-
धुरा। ऋक्पूरित्यः। वहतीति। वह+अच्।
सर्व्वधुराया वहः।) सकलभारवाहकः। रथ-
लाङ्गलादीनां भारवाहकगवादिः। इत्यमरः॥
सर्व्वधुरीणः, पुं, (सर्व्वधुरां वहतीति।"खः सर्व्व-
धुरात्।" ४। ४। ७८। इति खः।) सकल-
भारवाहकः। रथलाङ्गलादीनां भारवाहक-
गवादिः। इत्यमरः। २। ८। ६६॥
सर्व्वन्दमः, पुं, (सर्व्वं दमयतीति। दम+अच्।
द्वितीयाया अलुक्।) भरतराजः। स तु शकु-
न्तलापुत्त्रः इति हेमचन्द्रः॥
सर्व्वपा, स्त्री, (सर्व्वं पातीति। पा+कः। टाप्।)
बलिराजपत्नी। इति केचित्॥ सर्व्वरक्षण-
कर्त्तरि सर्व्वपानकर्त्तरि च त्रि॥
सर्व्वपूर्णत्वं,क्ली, (सर्व्वैर्द्रव्यैः पूर्णत्वम्।) सम्भारः।
इति त्रिकाण्डशेषः॥
सर्व्वप्रियः,त्रि,सर्व्वेषां जनानां प्रियः। सकलजन-
वल्लभः॥ सर्व्वस्य शिवस्य प्रियः। सर्व्वः प्रियो
यस्येति वा। शिवभक्तः॥
सर्व्वभक्षा,स्त्री,(सर्व्वान् भक्षयतीति। भक्ष+अण्
छागी। इति हेमचन्द्रः॥ सर्व्वभक्षणकर्त्तरि,
त्रि॥ (यथा, महाभारते। १। ६। १४।
"इति श्रुत्वा पुलोमाया भृगुः परममन्युमान्।
शशापाग्निमतिक्रुद्धः सर्व्वभक्षो भविष्यसि॥")
सर्व्वमङ्गला, स्त्री, (सर्व्वाणि मङ्गलानि यस्याः।)
दुर्गा। इत्यमरः॥ अस्या व्युत्पत्तिर्यथा,—
"मङ्गलं मोक्षवचनं चाशब्दो दातृवाचकः।
सर्व्वान्मोक्षान् या ददाति सा एव सर्व्वमङ्गला॥
हर्षे सम्पदि कल्याणे मङ्गलं परिकीर्त्तितम्।
तान् ददाति च या देवी सा एव सर्व्वमङ्गला॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५४ अध्यायः॥
अपि च।
"सर्व्वमङ्गलशब्दश्च सम्पूर्णैश्वर्य्यवाचकः।
आकारो दातृवचनस्तस्मात् सा सर्व्वमङ्गला॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे सर्व्वमङ्गला-
स्तोत्रं २७ अध्यायः॥ अन्यच्च।
"सर्व्वाणि हृदयस्थानि मङ्गलानि शुभानि च।
ददाति चेप्सितान् लोके तेन सा सर्व्वमङ्गला॥"
इति देवीपुराणे ४५ अध्यायः॥
सर्व्वमयः, त्रि, सर्व्वात्मकः। सर्व्वशब्दात् मयट्-
प्रत्ययेन निष्पन्नः॥ (यथा, मार्कण्डेये। ८८। ३३।
"आप्याय्यन्ते च ते यज्ञास्त्वदाधारा हुताशन।
यतः सर्व्वस्य योनिस्त्वं वह्ने सर्व्वमयस्तथा॥")
सर्व्वमूल्यं, क्ली, (सर्व्वस्य मूल्यम्।) कपर्द्दकम्।
इति त्रिकाण्डशेषः॥
सर्व्वमूषकः,पुं,(सर्व्वान् मुष्णातीति। मुष+ण्वुल्।
पृषोदरादित्वात् साधुः।) कालः। इति हेम-
चन्द्रः॥
सर्व्वरसः, पुं, (सर्व्वो रसो यत्र।) धूपी।
पण्डितः। इति शब्दरत्नावली॥ धूनकः। इत्य-
मरः॥ वाद्यभाण्डम्। तत्तु वीणाभेदः। इति
मेदिनी॥ लवणरसः। इति हेमचन्द्रः। (मधु-
रादिरसः। यथा, भागवते। २। ६। १।
"वाचां वह्नेर्मुखं क्षेत्रं छन्दसां सप्त धातवः।
हव्यकव्यामृतान्नानां जिह्वासर्व्वरसस्य च॥"
सर्व्वरसविशिष्टे, त्रि। यथा, छान्दोग्योप-
निषदि। ३। १४। २।
"सर्व्वकामः सर्व्वगन्धः सर्व्वरसः इति॥")
सर्व्वरसोत्तमः, पुं, (सर्व्वरसेषु उत्तमः।) लवण-
रसः। इति हेमचन्द्रः॥
सर्व्वरात्रः, पुं, सर्व्वा रात्रिः। "अहःसर्व्वैक-
देशसंख्यातपुण्याच्च रात्रेः।" ५। ४। ८७।
इति अच्।) समस्तरजनी। इति सिद्धान्त-
कौमुदी॥
सर्व्वरी, स्त्री, शर्व्वरी। रात्रिः। इति वक्ष्यमाण-
शब्ददर्शनात्॥
सर्व्वरीकरः, पुं, (सर्व्वर्य्याः करः।) चन्द्रः। इति
धरणिः॥
सर्व्वर्त्तुपरिवर्त्तः, पुं, (सर्व्वर्त्तूनां परिवर्त्तो यत्र।)
वत्सरः। इति जटाधरः॥
सर्व्वर्त्तुफलं,क्ली, (सर्व्वर्त्तुजातं फलम्।) सकलर्त्तु-
जातफलम्। यथा,—
"सर्व्वर्त्तुकुसुमाकीर्णे सर्व्वर्त्तुफलशोभिते।
स्थिरच्छायद्रुमाकीर्णे सन्तानकवनावृते॥"
इति भविष्यपुराणे शिवरात्रिव्रतकथा॥
सर्व्वरक्षणकवचं, क्ली, (सर्व्वरक्षणं सर्व्वरक्षाकरं
कवचम्।) कवचविशेषः। यथा,—
"शिशोः स्वस्त्ययनं चक्रुस्तूर्णं ब्राह्मणपुङ्गवाः।
हस्तं दत्त्वा शिशोर्गात्रे पपाठ कवचं द्विजः॥
वदामि तत्ते विप्रेन्द्र कवचं सर्व्वरक्षणम्।
तद्दत्तं मायया पूर्व्वं ब्रह्मणे नाभिपङ्कजे॥
निद्रिते जगतां नाथे जले च जलशायिनि।
भीताय स्तुतिकर्त्रे च मधुकैटभयोर्भयात्॥
योगनिद्रोवाच।
दूरीभूतं कुरु भयं भयं किन्ते मयि स्थिते।
स्थितायां मयि च ब्रह्मन् सुखी तिष्ठ जगत्पते॥*
श्रीहरिः पातु ते वक्त्रं मस्तकं मधुसूदनः।
श्रीकृष्णश्चक्षुषी पातु नासिकां राधिकापतिः॥
कर्णयुग्मञ्च कण्ठञ्च कपालं पातु माधवः।
कपोलं पातु गोविन्दः केशांश्च केशवः स्वयम्॥
अधरौष्ठं हृषीकेशो दन्तपंक्तिं गदाग्रजः।
रासेश्वरश्च रसनां तालुकं वामनो विभुः॥
वक्षः पातु मुकुन्दस्ते जठरं पातु दैत्यहा।
जनार्द्दनः पातु नाभिं पातु विष्णुश्च ते हनुम्॥
नितम्बयुग्मं गुह्यञ्च पातु ते पुरुषोत्तमः।
जानुयुग्मं जानकीशः पातु ते सर्व्वदा विभुः॥
हस्तयुग्मं नृसिंहश्च पातु सर्व्वत्र सङ्कटे।
पादयुग्मं वराहश्च पातु ते कमलोद्भव॥
ऊर्द्ध्वं नारायणः पातु अधस्तात् कमलापतिः।
पातु पूर्व्वे च गोपालः पातु वह्नौ दशास्यहा॥
वनमाली पातु याम्यां वैकुण्ठः पातु नैरृते।
वारुणे वासुदेवश्च पातु ते जलशायिन!॥
पातु ते सततमजो वायव्यां विष्टरश्रवाः।
उत्तरे च सदा पातु सोऽनन्तोऽनन्तकः स्वयम्॥
ऐशान्यामीश्वरः पातु सर्व्वत्र पातु सर्व्वजित्।
जले स्थले चान्तरीक्षे निद्रायां पातु माधवः।

इत्येवं कथितं ब्रह्मन् ! कवचं परमाद्भुतम् ।
कृष्णेन कृपया दत्तं स्मृतेनैव पुरा मया ॥
शुम्भेन सह संग्रामे निर्लक्षे घोरदारुणे ।
गगनस्थितो यः सद्यः प्राप्तिमात्रेण शक्तितः ॥
कवचस्य प्रसादेन धरण्यां पतितो मृतः ।
पूर्व्वं वर्षंगतं खे च कृत्वा युद्धं भयावहम् ॥
मृते शुम्भे च गोविन्दः कृपालुर्गगने स्थितः ।
माल्यञ्च कवचं दत्त्वा गोलोकं स जगाम ह ॥
कल्पान्तरस्य वृत्तान्तं कृपया कथितं मुने ।
आभ्यां तव भयं नास्ति कवचस्य प्रभावतः ॥
कोटिशः कोटिशो नष्टा मया दृष्टाश्च सर्व्वशः ।
अहञ्च हरिणा सार्द्धं कल्पे कल्पे स्थिरा सदा ॥
इत्युक्त्वा कवचं दत्त्वा सान्तर्द्धानं चकार ह ।
निःशङ्को नाभिकमले तस्थौ स कमलोद्भवः ॥*॥
सुवर्णगुटिकायान्तु कृत्वेदं कवचं परम् ।
कण्ठे वा दक्षिणे बाहौ बध्नीयात् यः सुधीः सदा ।
विषाग्निजलशत्रुभ्यो भयं तस्य न विद्यते ।
जले स्थले चान्तरीक्षे निद्रायां रक्षतीश्वरः ॥
संग्रामे वज्रपाते च विपत्तौ प्राणसङ्कटे ।
कवचस्मरणादेव सद्यो निःशङ्कतां व्रजेत् ॥
यद्धृदं कवचं कण्ठे शङ्करस्त्रिपुरं पुरा ।
जघान लीलामात्रेण दुरन्तमसुरेश्वरम् ॥
यद्धृदं कवचं काली रक्तबीजं चखाद सा ।
सहस्रगोपी धृत्वेदं विश्वं धत्ते तिलं यथा ॥
धाता सनत्कुमारश्च धर्म्मः साक्षी च कर्म्मणाम् ।
कवचस्य प्रसादेन सर्व्वत्र जयिनो वयम् ॥
त्वस्य सन्दीपिनो: कण्ठे जगाम कवचं द्विजः ।
प्राक्तनः कवचं कण्ठे दधार च हरिः स्वयम् ॥
प्रभावं कथितं सर्व्वं कवचस्य हरेस्तथा ।
अनन्तस्याप्यनन्तस्यैव प्रभावमतुलं मुने ! ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १२ अध्यायः ॥

सर्व्वला, स्त्री, (सर्व्वं लातीति । ला + कः । टाप् ।) तोमरः । इत्यमरः । २ । ८ । ८३ ॥

सर्व्वलिङ्गी [न्] पुं, (सर्व्वेषां वर्णाश्रमाणां लिङ्गं चिह्नमस्यास्तीति । इनिः ।) पाषण्डः । इत्यमरः ॥ हे वेदविरुद्धधारिषु सर्व्ववर्णचिह्नधारिषु बौद्धक्षपणकादिषु । पापं संवन्ति ददति पापण्डाः सम्पादित्वात् साधुत्वं मूर्द्धन्यमध्योऽयम् । सर्व्वेषां वर्णाश्रमाणां किञ्चित् किञ्चित् लिङ्गमस्त्येषामिति । इन् । इति भरतः ॥ सकलचिह्नधारिणि, त्रि ॥

सर्व्वली, स्त्री, (सर्व्वं लातीति । ला + कः । गौरादित्वात् ङीष् ।) तोमरः । इति शब्दरत्नावली ॥

सर्व्वलोहः, पुं, (सर्व्वो लोहो यस्य ।) लौहमयबाणः । यथा, —
“प्रत्त्वं इमः सर्व्वलोहो नाराच एषणश्च सः ।”
इति हेमचन्द्रः ॥
सकलधातुश्च ॥

सर्व्ववर्णिका, स्त्री, (सर्व्वं वर्णयतीति । वर्ण + ण्वुल् टापि अत इत्वम् ।) गम्भारीवृक्षः । इति जटाधरः ॥

सर्व्ववल्लभा, स्त्री, (सर्व्वेषां वल्लभा ।) असती नारी । इति धरणिः । इति केचित् ॥ सकलप्रिये, त्रि ॥

सर्व्ववित्, पुं, (सर्व्वं वेत्तीति । विद् + क्विप् ।) परमेश्वरः । यथा, —
“यः सर्व्वज्ञः सर्व्ववित् यस्य ज्ञानमयं तपः ।
तस्मादेतत् ब्रह्मनाम रूपमन्नञ्च जायते ॥”
इति मुण्डकोपनिषत् । १ । १ । ९ ।
सर्व्वज्ञे, त्रि ॥)

सर्व्ववेदः, पुं, (सर्व्ववेदानधीते इति । “क्रतूक्थादिसूत्रान्तात् ठक् ।” ४ । २ । ६० । इति ठक् । “सर्व्वादेः सादेश्च लुग्वक्तव्यः ।” इति लुक् ।) सर्व्ववेदाध्येता ब्राह्मणः । इति केचित् ॥ सर्व्वज्ञे, त्रि, ॥

सर्व्ववेदाः, [स्] पुं, (सर्व्वं धनं वेदयति निवेदयति ऋत्विग्भ्य इति । विद् + णिच् + असुन् ।) सर्व्वस्वदक्षिणयागो येनेष्टः सः । इत्यमरः ॥ सर्व्वस्वं दक्षिणा यत्र स सर्व्वस्वदक्षिणो विश्वजिन्नामयागः स येनेष्टः सम्पादितः स सर्व्ववेदा उच्यते । सर्व्वं स्वं वेदयति लम्भयति ऋत्विजो इति सर्व्ववेदाः विद लृ लाभे जन्तात् चासुसिति अस् । इति भरतः ॥

सर्व्ववेशी, [न्] पुं, (सर्व्वेषां वेशोऽस्यास्तीति । इनिः ।) नटः । इति । हेमचन्द्रः ॥ सकलवेशधारिणि, त्रि ॥

सर्व्वशान्तिकृत्, पुं, (सर्व्वशान्तिं करोतीति । कृ + क्विप् ।) भरतराजः । स तु शकुन्तलापुत्त्रः । इति शब्दरत्नावली ॥ सकलशमकारके, त्रि ॥

सर्व्वसङ्गतः, पुं, (सर्व्वं सङ्गतमस्येति ।) षष्टिकाधान्यम् । इति शब्दचन्द्रिका ॥ सकलसङ्गतियुक्ते, त्रि ॥

सर्व्वसंसर्गलवनं, क्ली, (सर्व्वसंसर्गेण जातं लवणम् ।) औषरकम् । इति राजनिर्घण्टः ॥

सर्व्वसन्नहनार्थकः, पुं, (सर्व्वेषां सन्नहनस्य अर्थो यत्र ।) चतुरङ्गसैन्यसन्नाहः । तत्पर्य्यायः । सर्व्वाभिसारः २ सर्व्वौघः ३ । इत्यमरः ॥ सर्व्वसन्नहनं अर्थोऽभिधेयमस्य । सर्व्वैरभिसियतेऽभिमुखं गम्यतेऽनेन सर्व्वाभिसारः करणे घञ् । सर्व्वेषां ओघो वृन्दमत्र सर्व्वौघः । इति भरतः ॥

सर्व्वसन्नाहः, पुं, (सर्व्वेषां सन्नाहो यत्र ।) सर्व्वात्मा । इति हलायुधः ॥ सर्व्वसन्नहनञ्च ॥

सर्व्वसहः, पुं, (सर्व्वं सहते इति । सह + अच् ।) गुग्गुलुः । इति रत्नमाला ॥ सकलसहिष्णौ, त्रि ॥ (यथा, भागवते । ८ । ५ । ८ ।
“स त्वं जगत्त्राणखलप्रहाणये
निरूपितः सर्व्वसहो गदाभृता ॥”)

सर्व्वसिद्धिः, पुं, (सर्व्वेषां सिद्धिरस्मात् ।) श्रीफलः । इति शब्दचन्द्रिका ॥ सकलसाधनञ्च ॥

सर्व्वस्वं, क्ली, (सर्व्वं स्वम् ।) समुदायधनम् । यथा,
“गुरवे दक्षिणा दद्यात् सत्यमात्र शिवात्मने ।
सर्व्वस्वं वा तदर्द्धं वा तदर्द्धं वा तदाज्ञया ॥”
इति तन्त्रसारः ॥

सर्व्वस्वी, [न्] पुं, वर्णसङ्करविशेषः । गोपकन्यायां नापिताज्जातः ब्रह्मखण्डे १० अध्यायः ॥ (… त्रि ॥

सर्व्वहितं, क्ली, (सर्व्वस्मिन् हितम् ।) … इति राजनिर्घण्टः ॥

सर्व्वाङ्गं, क्ली, (सर्व्वं अङ्गम् ।) … यथा, —
“पादौ रक्षतु मे केतुः सर्व्वाङ्गं मे
आपादमस्तकञ्चैव सर्व्वविघ्नविनायकः ।”
इति कर्म्मलोचने नवग्रहकवचम् ।
(पुं, महादेवः । इति महाभारतम् ॥ १३ । ३१ ॥)

सर्व्वाङ्गसुन्दररसः, पुं … स एव रसः ।) औषधविशेषः । यथा, —
“रसगन्धकतुल्यांशौ द्वौ भागौ टङ्कणस्य
मौक्तिकं विद्रुमं शङ्खमश्वनीय समांशकः ।
हेमभस्मार्द्धभागश्च सर्व्वं खल्वे विभावयेत्
निम्बुद्रवस्य योगेन पिष्टिकां …
पश्चात् गजपुटं दद्यात् …
हेमभस्मसमं तीक्ष्णं तोलार्द्धे …
एकीकृत्य समस्तानि …
ततः पूजां प्रकुर्व्वीत भक्षयेत् दिवसे …
सर्व्वाङ्गसुन्दरो ह्येष रोगराजनिकृन्तनः ।
वातपित्तज्वरे घोरे सन्निपाते सुदारुणे ।
अर्शःसु ग्रहणीरोगे मेहे गुल्मे भगन्दरे ।
निहन्ति वातजान् रोगान् श्लेष्मिकांश्च विशेषतः
पिप्पलीमधुसंयुक्तं घृतयुक्तमथापि वा ।
भक्षयेत् वर्णखण्डेन सितया चार्द्रकेण वा ।
गुडूचीसत्त्वसहितं प्रमेहे च विशेषतः ।
रसरत्नाकरप्रोक्तः सिद्धयोगो रसोत्तमः ।
राजिकाहिङ्गुतैलाम्लं वर्जयेत् …
सर्व्वाङ्गसुन्दररसः । इति भैषज्यरत्नावली ॥
(यथा च ।
“रसगन्धकयोः कर्षं ग्राह्यमेकं सुशोधितम्
ततः कज्जलिकां कृत्वा मृदुपाकेन …
जातीफलं तथा कोषं लवङ्गं रिद्धकम् ।
सिन्धुवारदलञ्चैव एलाबीजं तथैव च ।
एषाञ्च कर्षमात्रेण तोयेनाथ विमर्दयेत्
सुक्षालये पुनः स्थाप्य पुटपाकेन …
घनपङ्कं वह्निलिप्ता पुटमध्ये निधापयेत्
गुञ्जाष्टकप्रमाणेन प्रत्यहं भक्षयेन्नरः ।
एतत् प्रोक्तं कुमाराणां रक्षणाय …
ज्वरघ्नं दीपनञ्चैव बलवर्णप्रसादनम् ।
दुर्व्वारं ग्रहणीरोगं जयत्येव प्रवाहिकाम् ।
सूतिकाञ्च रुयेदेतद्बालानां रसभक्षणम् ।
पिशाचा दानवा दैत्या बालानां विघ्नकारिणः
यत्रौषधवरस्तिष्ठेत् तत्र सीमां न …
बालानां गदयुक्तानां …
महागन्धकमेतद्धि सर्व्वव्याधिनिसूदनम् ।
विना पाकेन सर्व्वाङ्गसुन्दरोऽयं …
इति वैद्यकरसेन्द्रसारसंग्रहे …

र्व्वाङ्गीणः, त्रि, (सर्व्वाङ्गं व्याप्नोतीति । "तत्सर्व्वादेः पथ्यङ्गकर्म्मपत्रपात्रं व्याप्नोति ।" ५ । २ । ७ । इति खः ।) सर्व्वावयवसम्बन्धयुक्तः । सर्व्वावयवव्यापकः । यथा, भट्टौ । ४ । १० ।
"समानस्मान्यकनिभे सर्व्वाङ्गीणे तनुत्वचौ ।
काण्डीरः खाड्गिकः शार्ङ्गी रघान् विप्रांस्तनुत्रवान् ॥"

सर्व्वाणी, स्त्री, (सर्व्वस्य पत्नी । सर्व्व + "इन्द्रवरुण-भवसर्व्वेति ।" ४।१।४९। इति ङीष् । आनुगागमश्च ।) दुर्गा । इत्यमरः ।१।१।३८॥ अस्या व्युत्पत्तिर्यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५४ अध्याये ।
"सर्व्वाभीष्टं प्रापयति जन्ममृत्युजरादिकम् ।
चराचरांश्च विश्वस्मात् सर्व्वाणी तेन कीर्त्तिता ॥"

सर्व्वानुकारिणी, स्त्री, (सर्व्वमनुकरोतीति । कृ + णिनिः । ङीप् ।) शालपर्णी । इति राजनिर्घण्टः ॥

सर्व्वानुभूतिः, स्त्री, (सर्व्वेषामनुभूतिर्यत्र ।) श्वेतत्रिवृता । इत्यमरः ।२।४।१०८॥ (अस्याः पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ।
"श्वेता त्रिवृता भण्डी स्यात्त्रिवृता त्रिपुटापि च ।
सर्व्वानुभूतिः सरला निशोत्रा रेचनीति च ॥")
चतुर्व्विंशतिभूताईदन्तर्गताईद्भेदः । चतुर्व्विंशतिभाव्यर्हदन्तर्गतार्हद्भेदश्च । इति हेमचन्द्रः ॥

सर्व्वान्नभक्षकः, त्रि, (भक्षयतीति । भक्ष + ण्वुल् । सर्व्वेषामन्नं सर्व्वान्नम् । तस्य भक्षकः ।) सकलान्नभोजी । तत्पर्य्यायः । उदरपिशाचः २ सर्व्वान्नीनः ३ । इति हेमचन्द्रः ॥

सर्व्वान्नभोजी, [न्] त्रि, सर्व्वेषां चतुर्णां वर्णानामेवान्नं भुङ्क्ते सर्व्वान्नभोजी । इति भरतः ॥ भुज + णिनिः ।) सर्व्वेषामन्नभक्षकः । इत्यमरः ।३।१।२२॥ सर्व्वप्रकारान्नभक्षकः । इति केचित् ॥

सर्व्वान्नीनः, त्रि, (सर्व्वान्नानि भक्षयतीति । सर्व्वान्न + "अनुपदसर्व्वान्नायानयमिति ।" ५।२।९। इति खः ।) सर्व्वान्नभोजी । इत्यमरः ॥

सर्व्वाभिसन्धी, [न्] पुं, (सर्व्वस्मिन् विषये अभिसन्धास्त्यस्येति । इनिः ।) वैडालव्रतिकः । छद्मतापसः । इति त्रिकाण्डशेषः ॥ सकलाभिसन्धानविशिष्टे, त्रि ॥

सर्व्वाभिसारः, पुं, (सर्व्वेषामभिसारो यत्र ।) चतुरङ्गसैन्यसन्नाहः । इत्यमरः । २ । ८ । ९४ ॥ अस्य पर्य्यायः सर्व्वसन्नहनशब्दे द्रष्टव्यः ॥

सर्व्वार्थसाधिका, स्त्री, (सर्व्वान् अर्थान् साधयतीति । साधि + ण्वुल् । टापि अत इत्वम् ।) दुर्गा । यथा, मार्कण्डेये देवीमाहात्म्ये ।
"सर्व्वमङ्गलमङ्गल्ये शिवे सर्व्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥"
सकलप्रयोजनसाधके, त्रि ॥

सर्व्वार्थानुसाधिनी, स्त्री, (सर्व्वानर्थाननुसाधयतीति । अनु + साधि + णिनिः । ङीप् ।) दुर्गा । यथा, देवीपुराणे ४५ अध्याये ।
"धर्म्मादीन् चिन्तितान् यस्मात् सर्व्वलोकेषु यच्छति ।
ततो देवी समाख्याता सा सर्व्वार्थानुसाधिनी ॥"

सर्व्वार्थसिद्धः, पुं, सर्व्वेषु अर्थेषु सिद्धः । बुद्धः । इत्यमरः । १ । १ । १५ ॥ सकलप्रयोजनसिद्धियुक्ते, त्रि ॥

सर्व्वावसरः, पुं, (सर्व्वेषामवसरो यत्र ।) अर्द्धरात्रः । इति त्रिकाण्डशेषः ॥

सर्व्वास्त्रा, स्त्री, सर्व्वाणि अस्त्राणि यस्याः ।) षोड़शविद्यादेव्यन्तर्गतदेवीविशेषः । इति हेमचन्द्रः ॥ सकलास्त्रयुक्ता च ॥

सर्व्वाह्णः, पुं, (सर्व्वमहः । "राजाहःसखिभ्यष्टच्" ५।४।९१। इति टच् । "अह्नोऽह्न एतेभ्यः ।" ५ । ४ । ८८ । इति अह्नादेशः । णत्वञ्च ।) समस्तदिनम् । इति व्याकरणम् ॥

सर्व्वीयः, त्रि, (सर्व्वस्मै हितः । सर्व्व + "सर्व्वाण्णस्य वा वचनम् ।" ५ । १ । १० । इत्यस्य वार्त्तिकोक्त्या पक्षे छः ।) सर्व्वसम्बन्धी । सर्व्वशब्दात् छीयप्रत्ययेन निष्पन्नः । इति व्याकरणम् ॥

सर्व्वेश्वरः, पुं, (सर्व्वेषामीश्वरः ।) शिवः । इति केचित् ॥ सार्व्वभौमश्च । (निखिलप्रभौ, त्रि । यथा, भागवते । ६ । ८ । ३३ ।
"केवलजगदाधार लोकैकनाथ सर्व्वेश्वर लक्ष्मीनाथ इति ॥")

सर्व्वौघः, पुं, (सर्व्वेषामोघो यत्र ।) चतुरङ्गसैन्यसन्नाहः । इत्यमरः ॥ गुरुवेगः । इति मेदिनी ॥

सर्व्वौषधिः, पुं, (सर्व्वा ओषधयो यत्र ।) ओषधिवर्गविशेषः । यथा,—
"कुष्ठमांसीहरिद्राभिर्व्वचाशैलेयचन्दनैः ।
मुराचन्दनकर्पूरैः मुस्तैः सर्व्वौषधिः स्मृतः ॥"
अत्र द्वितीयचन्दनपदं रक्तचन्दनपरम् ॥ इति राजनिर्घण्टः ॥ (क्वचित् स्त्रीलिङ्गेऽपि दृश्यते ॥)

सर्व्वौषधिगणः, पुं, (सर्व्वौषधीनां गणः ।) मुराद्यौषधिसमूहः । यथा,—
"मुरा मांसी वचा कुष्ठं शैलेयं रजनीद्वयम् ।
शटी चम्पकमुस्तञ्च सर्व्वौषधिगणः स्मृतः ॥"
इति शब्दचन्द्रिका ॥

अन्यच्च ।
"हरिद्रा चन्दनं दार्व्वी मुस्तकं देवताड़कम् ।
धन्याकं जीरकं मेथी धात्रीफलमुपीरकम् ॥
त्रिसुगन्धिः शटी गन्धमाद्री कर्पूरकं वचा ।
नखी मरुवकं कुष्ठं देवदारु विड़ङ्गकम् ॥
सरलं पद्मकाष्ठञ्च वालकं भद्रमुस्तकम् ।
ग्रन्थिकञ्च जटामांसी पलाशः शैलजं शमी ॥
अर्कश्चागरुकं दूर्व्वा मुरामांसी च कुङ्कुमम् ।
अपामार्गो मधुरिका विकासा खदिरः कुशा ॥
चातुर्ज्जातकमश्वोऽथोऽष्टवर्गो यज्ञडुम्बरः ।
नागेश्वरञ्च कस्तूरी त्रिफला पद्मकेशरम् ॥
कक्कोलं धातकीपुष्पं त्रिकटु रेणुकं यवः ।
तिलाः कुन्दुरु ललुकं भार्गी गोरोचना वकः ॥
शुण्ठी पुष्पञ्च नड्डुनी श्रीफलं वंशलोचना ।
इन्दीवरं बहुसुता वकुलं मालतीदलम् ॥
इन्द्रबीजं कोकनदं जयन्ती गजपिप्पली ।
श्वेतापराजितापुष्पं सर्व्वौषधिगणः स्मृतः ॥"
इति पाद्मोत्तरखण्डे १०७ अध्यायः ॥

सर्षपः, पुं, (सरतीति । सृ गतौ + "सर्त्तेरपः षुक् च ।" उणा० ३ । १४१ । इति अपः षुगागमश्च ।) शस्यविशेषः । सरिषा इति भाषा ॥ तत्पर्य्यायः । तन्तुभः२ कदम्बकः३ । इत्यमरः । २।९।१७ ॥ सरिषपः४ । इति भरतः ॥ तन्तुकः ५ । इति रमानाथः ॥ कटुस्नेहः ६ । इति जटाधरः ॥ शर्षपः ७ । इति शब्दरत्नावली ॥ राजक्षवकः ८ । इति राजनिर्घण्टः ॥ (यथा, छान्दोग्योपनिषदि । ३ । १४ । ३ ।
"एष म आत्मान्तर्हृदयेऽणीयान् व्रीहेर्वा यवाद्वा सर्षपाद्वा श्यामाकाद्वा इति ॥")
अस्य गुणाः । कफवातघ्नत्वम् । तीक्ष्णत्वम् ॥ उष्णत्वम् । रक्तपित्तकारित्वम् । कटुत्वम् । कृमिकुष्ठनाशित्वञ्च । सिद्धार्थस्यापि तद्गुणः । इति राजवल्लभः ॥ * ॥ अपरञ्च ।
"आसुरी राजिका राज्ञी रक्तिका रक्तसर्षपः ।
तीक्ष्णगन्धा मधुरिका क्षवकः क्षतकः क्षवः ॥
आसुरी कटुतिक्तोष्णा वातशोफार्त्तिशूलनुत् ।
दाहपित्तप्रदा हन्ति कफगुल्मकृमिव्रणान् ॥ * ॥
सर्षपो राजक्षवकः कृष्णा तीक्ष्णफला राजिका
राज्ञी सा कृष्णा सर्षपाख्या विज्ञेया राजसर्षपाख्या च ॥
राजसर्षपकास्तिक्ताः कटूष्णा वातशूलनुत् ।
पित्तदाहप्रदो गुल्मकण्डूकुष्ठव्रणापहः ॥"
इति कालेयसरिषपः ॥ * ॥
"सर्षपस्त्वनघो गौरः सिद्धार्थो भूतनाशनः ।
कटुस्नेहो ग्रहघ्नश्च कण्डूघ्नो राजिकाफलः ॥
तीक्ष्णकश्च दुराधर्षो रक्षोघ्नः कुष्ठनाशनः ।
सिद्धप्रयोजनः सिद्धः साधनः सितसर्षपः ॥
सिद्धार्थः कटुकोष्णश्च वातरक्तग्रहापहः ॥";
त्वग्दोषशमनो रुच्यो विषभूतव्रणापहः ॥"
इति सर्षपः ॥ * ॥

तत्तैलगुणाः ।
"सर्षपतैलं तिक्तं कटुकं वातकफविकारघ्नम् ।
पित्तास्रदोषदं कृमिकुष्ठघ्नं तिलजवच्चक्षुष्यम् ॥"
तत्पत्रशाकगुणाः ।
"सार्षपं पत्रमत्युष्णं रक्तपित्तप्रकोपणम् ।
विदाहि कटुकं स्वादु शुक्रहृत् रुचिदायकम् ॥"
इति राजनिर्घण्टः ॥ * ॥

अन्यच्च ।
"सर्षपः कटुकस्नेहस्तन्तुभश्च कदम्बकः ।
गौरस्तु सर्षपः प्राज्ञैः सिद्धार्थ इति कथ्यते ॥
सर्षपस्तु रसे पाके कटुः स्निग्धः सतिक्तकः ।
तीक्ष्णोष्णः कफवातघ्नो रक्तपित्ताग्निवर्द्धनः ॥
रक्षोहरो जयेत् कण्डूकुष्ठकोठकृमिग्रहान् ।
यथा रक्तस्तथा गौरः किन्तु गौरो वरो मतः ॥"
अथ राइ । कृष्णराइ ।
"राजी तु राजिका तीक्ष्णगन्धा क्षुज्जनिकासुरी ।
क्षवः क्षुताभिजनकः कृमिकः कृष्णसर्षपः ॥
राजिका कफवातघ्नी तीक्ष्णोष्णा रक्तपित्तकृत्

किञ्चिद्दूषाग्निदा कण्डूकुष्ठकोठक्रमीन् हरेत्॥
अतितीक्ष्णा विशेषेण तद्वत् कृष्णापि राजिका”
तत्तैलगुणाः ।
“दीपनं सार्षपं तैलं कटुपाकरसं लघु ।
लेखनं स्पर्शवीर्य्योष्णं तीक्ष्णं पित्तासृदूषकम् ॥
कफमेदोऽनिलार्शोघ्नं शिरःकर्णामयापहम् ।
कण्डूकोठक्रमिश्वित्रकुष्ठदुष्टव्रणप्रणुत् ॥
तद्वत् राजिकयोस्तैलं विशेषान्मूत्रकृच्छ्रकृत् ॥”
राजिकयोः कृष्ण राइ। आरक्त राइ।
सयोः ॥ * ॥ तच्छाकगुणाः ।
“कटुकं सार्षपं शाकं बहुमूत्रमलं गुरु ।
अम्लपाकं विदाहि स्यादुष्णं रूक्षं त्रिदोषकृत्॥
सक्षारं लवणं तीक्ष्णं स्वादुशाकेषु निन्दितम् ।
तीक्ष्णोष्णं सार्षपं नालं वातघ्नं व्रणापहम् ।
कण्डूकृमिहरं दद्रुकुष्ठघ्नं रुचिकारकम् ॥”
इति भावप्रकाशः ॥*॥
स्थावरविषभेदः । इति हेमचन्द्रः ॥ षड्लिख्या-
परिमाणम् । यथा,—
“जालान्तरगते भानौ यचाणुर्दृश्यते रजः ।
तैश्चतुर्भिर्भवेल्लिख्या लिख्याषड्भिश्च सर्षपः ॥”
इति शब्दचन्द्रिका ॥
सर्षपतैलं, क्ली, (सर्षपोद्भवं तैलम् ।) सर्षपजात-
स्नेहः । यथा,—
“सर्षपतैलं तिक्तं कटुकं वातकफविकारघ्नम् ।
पित्तास्रदोषदं कृमिकुष्ठघ्नं तिलजवच्चक्षुष्यम् ॥”
इति राजनिर्घण्टः ॥
सर्षपी,(स्त्री,(सृ गतौ + अपः पुगागमश्च । ततो
ङीप् ।) खञ्जनिका । इति त्रिकाण्डशेषः ॥
(पिड़काविशेषः । यथा, सुश्रुते । २ । ६ ।
“गौरसर्षपसंस्थाना तत्प्रमाणा तु सर्षपी ॥”)
सलं, क्ली, (सरतीति । सृ गतौ + अच् । रस्य
लः । सल गतौ + अच् वा ।) जलम् । इत्यमर-
टीकायां भरतः ॥
सलिलं,क्ली, (सलति गच्छतीति । सल गतौ +
“सलिकल्यनीति ।” उणा० १ । ५५ । इति
इलच् ।) जलम् । इत्यमरः । १।१०।३ ॥ तत्र
विण्मूत्रत्यागनिषेधो यथा, मनुः ।
“न मूत्रं पथि कुर्व्वीत न भस्मनि न गोव्रजे ।
न फालकृष्टे न जले न चित्यां न च पर्व्वते ॥
न जीर्णदेवायतने न वल्मीके कदाचन ।
न ससत्त्वेषु गर्त्तेषु न गच्छन्नपि संस्थितः ॥
न नदीतीरमासाद्य न च पर्व्वतमस्तके ।
वाय्वग्निविप्रानादित्यमपः पश्यंस्तथैव च ।
न कदाचन कुर्व्वीत विण्मूत्रस्य विसर्ज्जनम् ॥”
इत्याह्निकतत्त्वम् ॥
अपि च ।
“मूत्रश्लेष्मपुरीषाणि येऽन्नसृष्टानि वारिणि ।
“ते यान्त्यन्ते च विण्मूत्रे दुर्गन्धे पूयपूरिते ॥”
इति वामनपुराणे कर्म्मविपाको नाम १२
अध्यायः ॥*॥ अथ सलिलपरीक्षा । पितामहः ।
“तोयस्याथ प्रवक्ष्यामि विधिं धर्म्यं सनातनम् ।
गन्धैर्म्माल्यैः पुष्पधूपाभ्यां वारयेत् सुविचक्षणः ॥

शरान् संपूजयेत्तत्र वैणवञ्च धनुस्तथा ॥”
तत्र प्रथमतो वरुणं पूजयेत् । यथा नारदः ।
“गन्धमाल्यैः सुरभिभिर्मधुक्षीरघृतादिभिः ।
वरुणाय प्रकुर्व्वीत पूजामादौ समाहितः ॥”
ततो धर्म्मावाहनादिसकलदेवतापूजाहोमसम-
न्त्रकप्रतिज्ञापत्रशिरोनिवेशनान्तं कर्म्म कुर्य्यात् ।
कात्यायनः ।
“शरांस्त्वनायसाग्रांस्तु प्रकुर्व्वीत विशुद्धये ।
वेणुकाष्ठमयांश्चैव क्षेप्ता च सुदृढं क्षिपेत् ॥”
पितामहः ।
“क्षेप्ता च क्षत्त्रियः कार्य्यः तद्वित्तिर्ब्राह्मणोऽथवा
अक्रूरहृदयः शान्तः सोपवासस्तथा शुचिः ॥
इषुञ्च प्रक्षिपेद्धीमान् मारुते याति वा भृशम् ।
विषमे भूप्रदेशे च वृक्षस्थाणुसमाकुले ॥”
नारदः ।
“क्रूरं धनुः सप्तशतं मध्यमं षट्शतं मतम् ।
मन्दं पञ्चशतं प्रोक्तमेष ज्ञेयो धनुर्व्विधिः ॥”
अङ्गुलीनां सप्ताधिकं शतं यस्य धनुषः परिमाणं
तत् सप्तशतं एवं षट्शतादिकम् । पिता-
महः ।
“मध्यमेन तु चापेन प्रक्षिपेत्तु शरत्रयम् ।
हस्तानाञ्च शते सार्द्धे लक्ष्यं कृत्वा विचक्षणः ॥
तेषाञ्च प्रेषितानान्तु शराणां शास्त्रदेशनात् ।
मध्यमस्तु शरो ग्राह्यः पुरुषेण बलीयसा ॥
शराणां पतनं ग्राह्यं सर्पणं परिवर्ज्जयेत् ।
सर्पन् सर्पन् शरो याति दूराद्दूरतरं यतः ॥”
पतनं ग्राह्यमिति शरपतनस्थानपर्य्यन्तं गच्छे-
दित्यर्थः । तेन प्रसरणपक्षेऽपि पतनस्थानकशर-
ग्रहणम् । ततश्च प्रथमतः पुरुषान्तरेण तत्स्थाने
शर आनेतव्यः । नारदः ।
“नदीषु नातिवेगासु तडागेषु सरःसु च ।
ह्रदेषु स्थिरतोयेषु कुर्य्यात् पुंसां निमज्जनम् ॥”
नातिवेगासु स्थितिविरोधिवेगशून्यासु । विष्णुः ।
पङ्कशैवालदुष्टग्राहमत्स्यजलौकादिवर्ज्जिते तस्य
नाभिमात्रजले मग्नस्यारागद्वेषिणः पुरुषस्यान्य-
स्योरू गृहीत्वाभिमन्त्रिताम्भः प्रविशेत् । तत्-
समकालञ्च नातिक्रूरमृदुना धनुषा पुरुषोऽपरः
शरमोक्षं कुर्य्यादिति । तत्र शोध्यस्येत्यर्थः ।
अन्यथा तस्येति व्यर्थं स्यात् ॥*॥ अन्यपुरुषस्य
स्तम्भधारणमाह स्मृतिः ।
“उदके माप्रतिष्ठेद्धर्मास्तम्भं प्रगृह्य च ॥”
प्राङ्विवाककर्त्तृकजलाभिमन्त्रणमाह पिता-
महः ।
“तोय त्वं प्राणिनां प्राणः सृष्टेराद्यन्तु निर्म्मितम्
शुद्धेश्च कारणं प्रोक्तं द्रव्याणां देहिनान्तथा ।
अतस्त्वं दर्शयात्मानं शुभाशुभपरीक्षणे ॥”*॥
शोध्यकर्त्तृकाभिमन्त्रणमाह याज्ञवल्क्यः ।
“सत्येन माभिरक्षस्व वरुणेत्यभिशाप्य कम् ।
नाभिमात्रोदकस्थस्य गृहीत्वोरू जलं विशेत्॥”
मा माभिशाप्य शपथं कारयित्वा कं जलं
विशेत् निमज्जेत् । तोरणञ्च निमज्जनसमीपे
समे स्थाने श्रोत्रकर्णप्रमाणोच्छ्रितं कार्य्यम् ।

यथा, नारदः ।
“गत्वा तु तज्जलस्थानं तटे तोरणमुच्छ्रितम्
कुर्व्वीत कर्णमात्रन्तु [illegible]
शरमोक्षे विशेषमाह तु नारदस्तथा ।
“शरप्रक्षेपणस्थानाद्युवा जवसमन्वितः ।
गच्छेत् परमया शक्त्या यत्रासौ [illegible]
मध्यमं शरमादाय पुरुषोऽन्यस्तथाविधः ।
प्रत्यागच्छेत् तु वेगेन यतः स पुरुषो गतः ।
आगतस्तु शरग्राही न पश्यति यदा यदि ।
अन्तर्ज्जलगतं सम्यक् तदा शुद्धिं [illegible]
अन्यथा न विशुद्धः स्यादेकाङ्गस्यापि दर्शनात्
स्थानाद्वान्यत्र [illegible]
जविनौ विशेषयति नारदः ।
“पञ्चाशतो धावकानां यौ स्यातामधिकौ
तौ च तत्र नियोक्तव्यौ शरानयनकर्मणि ।
एकाङ्गस्य दर्शनादिति कर्णाद्यभिप्रायेण ।
“शिरोमात्रन्तु दृश्येत न [illegible]
अपसु प्रवेशने यस्य शुद्धं तमपि निर्दिशेत्
इति विशेषाभिधानात्
कात्यायनः ।
“निमज्जोत्प्लवते यस्तु [illegible]
पुनस्तत्र निमज्जेत दंशचिह्नविचारणे ।
जलान्तर्गतमत्स्यजलौकादिना [illegible]
यदि तदा दष्टे [illegible]
पितामहः ।
“गन्तुश्चापि च कर्त्तुश्च समं गमनमज्जनम् ।
गच्छेत्तोरणमूलात्तु शरस्थानं जवी नरः ।
तस्मिन् गते द्वितीयोऽपि वेगादादाय सायकं
[illegible]
गच्छेत्तोरणमूलन्तु यतः स पुरुषो गतः ।
आगतस्तु शरग्राही न पश्यति यदा जले ।
अन्तर्ज्जलगतं सम्यक् ततः [illegible]
अत्र मज्जनसमकालं गमनाभिधानात् [illegible]
मोक्षसमकालं गमनं शून्यपाद्यमन्यत्
मज्जनसमकालक्षिप्तं मध्यम
सुतरामपि प्रमाणशून्यम् । ततश्च त्रिषु [illegible]
मुक्तेषु एको वेगवान्
गत्वा तमादाय तत्रैव तिष्ठति अन्यस्तु पुनः
वेगवान् शरमोक्षस्थाने तोरणमूले स्थितः
एवं स्थितयोस्तृतीयायां करतालिकायां प्र
विवाकदत्तायां शोध्यो निमज्जति तत्क्षण
मेव तोरणमूलस्थितोऽपि द्रुततरं मध्यम
पतनस्थानं गच्छति शरग्राही च तस्मिन् स्थाने
द्रुततरं तोरणमूलं प्राप्याऽन्तर्ज्जलगतं यदि
पश्यति तदा शुद्धो भवतीति [illegible]
तत्र प्रयोगः । उक्तलक्षणजलाशयनिकटे
तोरणं विधाय उक्तदेशे सप्त शरान् कृत्वा तत्
समीपे सशरं धनुः संपूज्य अनामृष्ट तत्
मावाह्य पूजयित्वा तत्तीरे धर्म्मादीन् देव
वरुणमपिहा दक्षिणा कृत्वा शोध्यस्य शिरसि
प्रतिज्ञापत्रं बद्ध्वा प्राड्विवाको [illegible]
मन्त्रयेत् ।

तीय त्वं प्राणिनां प्राण: सृष्टेराद्यन्तु
निर्म्मितम् ।
। कारणं प्रोक्तं द्रव्याणां देहिनां तथा ।
त्वं दर्शयात्मानं शुभाशुभपरीक्षणे ॥"
इति मन्त्रेण ॥
न्तु ॐ सत्येन माभिरक्षस्व वरुणेत्यनेन
ाभिमन्त्र्य गृहीतस्थूणस्य शोध्यनाभिमात्रो-
श्स्थितस्य बलीयस: प्राङ्मुखस्य पुरुषस्य
पं जलमध्ये गच्छेत् । तत: शरेषु त्रिषु
। मध्यमशरपतनस्थाने मध्यमशरं गृहीत्वा
न्येकस्मिन् पुरुषे स्थिते अन्यस्मिंश्च तोरण-
स्थिते प्राड्विवाकेन तालत्रये दत्ते शोध्यो
तस्थूणप्राङ्मुखपुरुषस्योरू गृहीत्वा निम-
। । तत्समकालमेव तोरणमूलस्थोऽपि
मशरस्थानं द्रुतं गच्छति । तत: शरप्राही
स्मिन् प्राप्ते द्रुतं तोरणमूलं प्राप्य जला-
ं यदि न पश्यति तदा शुद्ध: । कर्णाद्यङ्ग
। शिरोमात्रदर्शनेऽपि शुद्ध: मज्जनस्थाना-
त्र गमनेऽप्यशुद्ध: । दक्षिणादिकं दद्यात् ।
दिव्यतत्त्वम् ॥
लकुन्तल:, पुं, (सलिलस्य कुन्तल इव ।)
ल: । इति त्रिकाण्डशेष: ॥
लजं,क्ली,(सलिले जायते इति । जन+ड: ।)
म् । इति राजनिर्घण्ट: ॥ जलजाते, त्रि ॥
ा, महाभारते । ७ । १२५ । २१ ।
र हृष्यामवीरेण भ्रात: सलिलजो भृशम् ।
ाघोषान्तरौघश्च निनादयति शङ्खराट् ॥")
लाशय:, पुं, (सलिलानामाशय: ।) जला-
: । तस्य वैकल्ये दोषो यथा,—
गर्ग उवाच ।
शरादपसर्पन्ते समीपमुपयान्ति च ।
ो ह्रदा: प्रस्रवणा: विरसाश्च भवन्ति ते ।
र्णं कलुषं तप्तं फेनवज्जन्तुसङ्कुलम् ।
रं स्नेहं सुरां रक्तं वहन्ते चाकुलोदका: ॥
ासाभ्यन्तरे तत्र परचक्रभयं भवेत् ।
ाशया नदन्ते वा प्रज्वलन्ति कथञ्चन ॥
मुञ्चन्ति तथा यद्यन् ज्वालाधूमरजांसि च ।
खाते वा सलीलोत्पत्ति: ससत्त्वा वा जलाशया: ॥
गीतशब्दा ह्रश्यन्ते तत्र मारभयं वदेत् ।
ध्यसम्भोभयं सर्पिर्मधुना त्ववसेचनम् ।
ाम्या वारुणा मन्त्रास्तैश्च होमो जले भवेत् ॥
मध्याप्ययुक्तं परमान्नमत्र
देयं द्विजानां द्विजभोजनार्थम् ।
गावश्च देया: सितवस्त्रयुक्ता-
स्तथोदकुम्भा: सलिलाशयान्ते ॥"
इति मात्स्ये २०८ अध्याय: ॥
लिलेन्धन:, पुं, (सलिलं इन्धनं यस्य ।) वाड़-
ानल: । इति त्रिकाण्डशेष: ॥
लील:, त्रि, लीलया सह वर्त्तमान: । लीला-
विशिष्ट: । यथा,—
"शाद्वलमूलमरण्ये विपिनतटनिर्म्मिते
सलीलतामभूषिते मर्त्यलोकविलासनम् ।

सुराङ्गणाभवक्त्रवीकरप्रपश्चचामर-
स्फुरत्समीरवीजितं सदाच्युतं भजामि तम् ॥"
इति छन्दोमञ्जरी ॥
सल्लकी,स्त्री,(सत्कृत्य लक्यते स्वाद्यते गजैरिति ।
सत्+लक+क्वुन् । गौरादित्वात् ङीष् ।)स्वना-
मख्याततरु: । तत्पर्य्याय: । गजभक्ष्या २ सुवहा
३ सुरभी ४ रसा ५ महेरणा ६ कुन्दुरुकी ७
ह्लादिनी ८ । इत्यमर: ।२।४।१२४ ॥ गजभक्षा
८ सुरभि: १० सुरभीरसा ११ महेरुणा १२
शल्लकी १३ सिल्लकी १४ शिल्लकी १५
ह्लादिनी १६ । इति तट्टीका ॥ शल्यते श्लाघ्यते
गजै: शल्लकी । शल क ङ श्लाघे चुरादि: वेर-
भावपक्षे नाम्नोति लकट् । श्वाविद्द्रुभेदौ
शल्लक्यौ शङ्का त्रासवितर्कयोरिति तालव्यादौ
रभस: । सलति गच्छति सलगतौ दन्त्यादि:
षक: भौवादि: निपातनात् लस्य द्वित्वम् ।
सत्कृत्य लक्यते स्वाद्यते गजैरिति वा सल्लकी
दन्त्यादिरित्यन्ये । सिल्लकी चेत्येके । देशी-
प्रायेयम् । सल्लकी सिल्लकी ह्लादेति रुद्र: ।
इति स्वामी । इत्यमरटीकायां भरत: ॥
संव(म्व)रं,क्ली, (संव्रियते इति । सं+वृ+अप् ।)
संयम: । इति त्रिकाण्डशेष: ॥ बौद्धव्रतविशेष: ।
इति मेदिनी ॥ जलम् । इत्यमर: । १।१०।४ ॥
"सम्वति सम्बरम् । [सम्ब सर्पणे पूर्व्वेण अर
सम्बरं दन्त्यादि । शम्ब गतावित्यस्मादरे ताल-
व्यादि च ।
'क्लीवन्तु सम्बरं नीरबौद्धव्रतविशेषयो: ।
विशेषे पुंसि दैत्यस्य मत्स्यस्य हरिणस्य च ॥'
इति दन्त्यादौ रभस: ॥
'शम्बरो हरिणे दैत्ये मत्स्ये च सलिले स्मृत: ॥'
इति तालव्यादावजय: ।" इति भरत: ॥
संव(म्ब)र:,पुं,(संवृणोति आवृणोति जलमिति ।
सं+वृ+अच् ।) सेतु: । यथा । सेतौ पल्यालि-
संवरा: । इति हेमचन्द्र: ॥ दैत्यविशेष: ।
हरिणविशेष: । मत्स्यविशेष: । शैलविशेष: ।
जिनविशेष: । इति मेदिनी ॥ स तु भाव्यर्हन् ।
इति हेमचन्द्र: ॥
संवरणं, क्ली. (सं+वृ+ल्युट् ।) आवरणम् ।
(यथा, महाभारते । १ । १४१ । ७१ ।
"मन्त्रसंवरणे यत्न: सदा कार्य्योऽनसूयता ॥")
इन्द्रियसंयम: । इति संवरादिशब्दटीकायां
भरत: ॥ (प्राकार: । यथा, रामायणे । २ ।
८८ । २४ ।
"शून्यसंवरणारक्षामयन्त्रितहयद्विपाम् ।
अनावृतपुरद्वारां राजधानीमरक्षिताम् ॥"
"शून्यसंवरणारक्षां संवरणानां प्राकाराणामा-
समन्तात् रक्षया शून्याम् ।" इति तट्टीका । [illegible]
पु [illegible] । [illegible] । इति
महाभारतम् । १ । [illegible] ।)
संवरारि: पुं,(संवरस्य अरि: ।) कामदेव: । इत्य-
मर: [illegible] । "संवरस्य दैत्यविशेषस्य अरि: ।
[illegible] ।

विशेषे पुंसि दैत्यस्य मत्स्यस्य हरिणस्य च ॥'
इति दन्त्यादौ रभस: । संवरणं संवर: भावेऽल् ।
इन्द्रियसंयम: संवरस्तस्यारिरिति वा । तदुक्तं
साहित्यकल्पतरुणा । रुद्रस्य सम्बरारिश्च पुष्प-
वतीनां कुसुमधन्वेति तदयं संवरारिरिह
तालव्यादिर्दन्त्यादिश्च ॥ इति भरत: ॥
संवरी, स्त्री, शतावरी । इति शब्दचन्द्रिका ॥
मूषिकपर्णी । इत्यमर: । २।४ । ८८ ॥ इन्दुर-
काणी इति ख्यातायां थुलकुड़ी इति ख्याता-
यामिति केचित् । शं कल्याणं वृणोति शंवरी
पूर्व्ववदच् ङीप् तालव्यशादि: दन्त्यसादिश्चेति
स्वामी । इति भरत: ॥
संवलं, क्ली, (संवृणोतीति । सं+वृ+अच् । रस्य
ल: ।) जलम् । इति शब्दरत्नावली ॥
संवल:,पुं,क्ली, पाथेयम् । तालव्यादिर्दन्त्यादिश्च ।
इत्यमरभरतौ ॥
सवं, क्ली, (सूते रसानिति । सू+अच् ।) जलम् ।
इति जटाधर: ॥ पुष्परस: । इति केचित् ॥
सव:, पुं, (सूयते सोमोऽत्रेति । सू+अप् ।)
यज्ञ: । इत्यमर: । २।७।१३ ॥ (यथा, महा-
भारते । १ । ८४ । २५ ।
"राजसूयाश्वमेधाद्यै: सोऽयजत् क्रतुभि: सवै: ॥")
सन्तान: । इति मेदिनी ॥ सूर्य्य: । चन्द्र: । इति
केचित् ॥ (अर्घ्ये, त्रि । यथा, वाजसनेयसंहि-
तायाम् । ९ । ३९ ।
"सविता त्वा सवानां सुवताम् ।"
"सविता सवानां प्रसवानामज्ञानामाधिपत्ये हे
यजमान त्वा त्वां सुवतां प्रेरयतु ।" इति
तद्भाष्यम् ॥)
सवनं, क्ली, (षु ञ् अभिषवे+ल्युट् ।) यज्ञ-
स्नानम् । (यथा, किराते । १२ । १० ।
"प्रविवेश गामिव कृशस्य
नियमसवनाय गच्छत: ।
तस्य पदविनमितो हिमवान्
गुरुतां नयन्ति हि गुणा न संहति: ॥")
तत्पर्य्याय: । सुत्या २ अभिषव: ३ । इत्यमर: ।
२।७।४७॥ सोमसन्धानम् ४ । इति जटाधर: ॥
सोमपानम् । इति भरत: ॥ अध्वरम् । (यथा,
रघु: । ८ । ७५ ।
"अथ तं सवनाय दीक्षित:
प्रणिधानात् गुरुराश्रमस्थित: ।
अभिपद्य जड़ं विजज्ञिवान्
इति शिष्येण किलान्वबोधयत् ॥")
सोमनिर्दलनम् । इति मेदिनी ॥ प्रसव: । इति
केचित् ॥ (सु+युट् । अग्नि:, पुं । [illegible] ।)
सवनस्वरूप: । [illegible] । सवनेन सह वर्त्तमानमिति
विग्रहे सवनविशिष्टं, त्रि । यथा, महाभारते ।
१ । १८ । ८ ।
[illegible]
[illegible] ।"
[illegible]
[illegible] । इति [illegible] ।

समवयस्का । तत्पर्य्यायः । आलिः २ वयस्या ३ सखी ४ सहचरी ५ । इति जटाधरः ॥

सवयाः, [स्] पुं, (समानं वयो यस्य ।) वयस्यः । इत्यमरः । २ । ८ । १२ ॥ समानवयस्के, त्रि ॥ (यथा रघुः । ५ । ६५ ।

"सुतात्मजाः सवयसः प्रथितप्रबोधं
प्राबोधयन्नुषसि वाग्भिरुदारवाचः ॥")

सवरः, पुं, सलिलम् । शिवः । इति त्रिकाण्डशेषः ॥

सवर्णः, त्रि, (समानो वर्णोऽस्य । "ज्योतिर्जनपदेति ।" ६ । ३ । ८५ । इति समानस्य सः ।) सदृशः । इति हेमचन्द्रः ॥ (यथा, रघुः ।८।५१।

"ग्रथितमौलिरसौ वनमालया
तरुपलाशसवर्णतनुच्छदः ॥")

समानवर्णः । (यथा, महाभारते ।७।२२।४२ ।
"इन्द्रायुधसवर्णैस्तु कुन्तिभोजो हयोत्तमैः ।
आयात् सदश्वैः पुरुजित् मातुलः सव्यसाचिनः ॥")

तुल्यजातिः । यथा, मनुः ।
"पाणिग्रहणसंस्कारः सवर्णासूपदिश्यते ।
असवर्णास्वयं ज्ञेयो विधिरुद्वाहकर्म्मणि ॥"
इत्युद्वाहतत्त्वम् ॥

एकस्थानोत्पन्नवर्णः । यथा । सवर्णेनाकदीर्घः । इति संक्षिप्तसारव्याकरणम् ॥

सवर्णा, स्त्री, (समानो वर्णो यस्याः ।) सूर्य्यपत्नी छाया । इति शब्दरत्नावली ॥ (समानवर्णा स्त्री । यथा, मनुः । ३ । ४ ।
"उद्वहेत द्विजो भार्य्यां सवर्णां लक्षणान्विताम् ॥")

सवहा, स्त्री, त्रिवृता । इत्यमरटीकायां भरतः ॥

सविकाशः, त्रि, विकसितः । प्रफुल्लः । विकाशेन सह वर्त्तमानः ॥

सविता, [ऋ] पुं, (सूते लोकादीनिति । सू + तृच् ।) सूर्य्यः । इत्यमरः । १।३ । ३१ ॥ यथा, कुमारे । ५ । २० ।

"विजित्य नेत्रप्रतिघातिनीं प्रभा-
मनन्यदृष्टिः सवितारमैक्षत ॥")

तस्य व्युत्पत्तिर्यथा,—
"धीशब्दवाच्यो ब्रह्माणं प्रचोदयति सर्व्वदा ।
तदर्थे भगवान् विष्णुः सविता स तु कीर्त्तितः ॥
सर्व्वलोकप्रसवनात् सविता स तु कीर्त्त्यते ।
यतस्तद्देवता देवी सावित्रीत्युच्यते ततः ॥"
इति वह्निपुराणे गायत्त्रीकल्पो नामाध्यायः ॥

अर्कवृक्षः । इति चामरः । २ । ४ । ८० ॥

सवितृदैवतः, पुं, (सविता दैवतं यस्य ।) हस्तनक्षत्रम् । इति हेमचन्द्रः ॥

सवितृसः, त्रि, सवितृसम्बन्धी । सवितृशब्दात् इदमर्थेऽण् निष्पन्नः ॥

सवित्रं, क्ली, (सूयतेऽनेनेति । सू प्रसवे + "अर्त्तिलूधूसूखनसहचर इत्रः ।" ३।२।१८४ । इति करणे इत्रः ।) प्रसवकारणम् । इति मुग्धबोधव्याकरणम् ॥

सवित्रिय, त्रि, (सवितुरयमिति । सवितृ + घः ।) सवितृसम्बन्धीयः । इति सिद्धान्तकौमुदी ॥

सवित्री, स्त्री, (सूते या । सू + तृच् । ङीप् ।) माता । इति हेमचन्द्रः ॥ (यथा, कुमारे ।१।२४।
"तया दुहित्रा सुतरां सवित्री
स्फुरत्प्रभामण्डलया चकाशे ॥")

गौः । इति केचित् ॥

सविधः, त्रि, (समाना विधास्येति ।) निकटम् । इत्यमरः । ३ । १ । ६७ ॥ (यथा, कथासरित्सागरे । ५२ । ३० ।
"अथ सविधमागत्य राजस्तस्योपविष्टवान्")

समानप्रकारच ॥ (यथा, भागवते ।३।३।८ ।
"तासां मुहूर्त्त एकस्मिन् नानागारेषु योषिताम्
सविधं जगृहे पाणीननुरूपः स्वमायया ॥")

सविस्मयः, त्रि, (विस्मयेन सह वर्त्तमानः ।) विस्मयापन्नः । तत्पर्य्यायः । वीक्षापन्नः २ । इति हारावली ॥

सवेगः, त्रि, (वेगेन सह वर्त्तमानः ।) वेगान्वितः । इति धरणिः ॥ निकटम् । इत्यमरः ।३।१।६७॥

सव्यः, त्रि, (षू प्रेरणे + "माच्छाससिसूभ्यो यः ।" उणा० ४ । १०८ । इति यः ।) वामः । इत्यमरः । ३ । १ । ८५ ॥ (यथा, मनुः । २ । ६३ ।
"उद्धृते दक्षिणे पाणावुपवीत्युच्यते द्विजः ।
सव्ये प्राचीन आवीती निवीती कण्ठसज्जने ॥")

दक्षिणः । (यथा, अनर्घराघवे । ६ । ७० ।
"एकेन सव्यपाणिना विमिद्धमुखाय किमाह रावणः । साधु रे मनुष्यडिम्भ साधु ।"
"सव्यपाणिना दक्षिणहस्तेन ।" इति तट्टीका ॥)

प्रतिकूलः । इति हेमचन्द्रः ॥

सव्यः, पुं, (सूते विश्वमिति । सू प्रसवे + "माच्छाससिसूभ्यो यः ।" उणा० ४ । १०९ । इति यः ।) विष्णुः । इति शब्दमाला ॥

सव्यसाची, [न्] पुं, (सव्येन वामेन हस्तेनापि सचति सन्दधाति बाणमिति । सच सन्धाने + णिनिः ।) अर्ज्जुनः । इति हेमचन्द्रः ॥ (यथा, महाभारते । ४ । ४२ । १९ ।
"उभौ मे दक्षिणौ पाणी गाण्डीवस्य विकर्षणे ।
तेन देवमनुष्येषु सव्यसाचीति मां विदुः ॥")

सव्येष्ठः, पुं, (सव्ये तिष्ठतीति । स्था + कः । "स्थास्थिन्स्थूणाम् ।" ८ । ३ । ९७ । इत्यस्य वार्त्तिकोक्त्या षत्वम् । हलदन्तादित्यलुक् ।) सारथिः । इति हलायुधः ॥

सव्येष्ठा, [ऋ] पुं, सव्ये तिष्ठतीति । स्था + "सव्ये स्थश्छन्दसि ।" उणा० २ । १०२ । इति छन्दसि ऋः । स च डित् । "स्थास्थिन्स्थूणाम् ।" ८।३।९७ । इति षत्वम् । सप्तम्या अलुक् ।) सारथिः । इत्यमरः । २ । ८ । ६० ॥

सव्रीडा, स्त्री, (व्रीडेन सह वर्त्तमाना ।) नागदन्ती । इति रत्नमाला ॥ लज्जायुक्तभूम्यादौ, त्रि ॥

सशूकः, पुं, (शूकेन दयया सह वर्त्तमानः ।) आस्तिकः । इति केचित् ॥

सश्मश्रुः, स्त्री, (श्मश्रुणा सह वर्त्तमाना ।) श्मश्रुयुक्ता स्त्री । तत्पर्य्यायः । नरमालिनी २ । इति हेमचन्द्रः ॥ (श्मश्रुविशिष्टे, त्रि ॥)

ससत्त्वा, स्त्री, (सत्त्वेन सह वर्त्तमाना ।) इति शब्दरत्नावली ॥ (यथा, रघुः ।१।...
नदीमिवान्तःसलिलां सरस्वतीं
"नृपः ससत्त्वां महिषीममन्यत ॥")

प्राणियुक्ते, त्रि । यथा, मनुः । ४ ।
"न मूत्रं पथि ...
"न ससत्त्वेषु गर्त्तेषु न गच्छन्नापि संस्थितः ।
ससत्त्वेषु प्राणिमत्सु ।" इति कुल्लूकः ॥

ससनं, क्ली, (सस स्वप्ने + ल्युट् ।) हननम् । इत्यमरटीका । २ । ८ ।११.
कपालरं गमनं गदनञ्च ॥

सस्मितः, त्रि, (स्मितेन सह वर्त्तमानः ।) हास्ययुक्तः । यथा,—
"सस्मितानन सरोजमङ्गने
रिङ्गमाणमतिनीलकुन्तलम् ।
रोचनीलसितभालमस्तु मे
केशवं मनसि शैशवं वपुः ॥"

सस्यं, क्ली, (सस स्वप्ने + ...
उणा० ४ । १०९ । इति यः ।)
फलम् । यथा,—
"संसनं सीसकं सस्यं सख्यं ...
इत्युत्पलिनीकारात् । इत्यमरटीकायां
धान्यम् । यथा, हेमचन्द्रः ।
...
शस्त्रम् । गुणः । इति विश्वः । तस्य प्रमाणं
"जीर्णमन्नं प्रशंसीयात् भार्य्याञ्च गतयौवनाम् ।
रणात् प्रत्यागतं शूरं सस्यञ्च गृहमागतम् ॥"
इति चाणक्यः ॥
अन्यत् शस्यशब्दे द्रष्टव्यम् ॥

सस्यकः, पुं, (सस्येन गुणेन परिजातः । सस्य + "सस्येन परिजातः ।" ५।२।६८ । इति कन् ।) मणिभेदः । (यथा, ...तायाम् । ७ । २० ।
"हेमकान्तिरथवा शुकवर्णः
सस्यकेन मणिना सदृशो वा ॥")
खड्गः । इति मेदिनी ॥
"सस्यको नालिकेरान्तः सस्याभः शिखराकृतिः" इति हेमचन्द्रः

(शालिः । साधुः । इति कामिका ॥)

सस्यमारी, [न्] पुं, (सस्यं मारयतीति । सस्य + णिच् + णिनिः ।) महामूषकः । इति राजनिर्घण्टः ॥ सस्यनाशके, त्रि ॥

सस्यसंवरः, पुं (सस्यैः संव्रियते इति । ... "ग्रहवृदृनिश्चिगमश्च ।" ३।३।५८ । इति अप् ।) शालवृक्षः । इत्यमरः । २ । ४ । ४४ ॥

सस्यसंवरणः, पुं, (सस्यैः संवरणं यस्य ।) अश्वकर्णवृक्षः । इति राजनिर्घण्टः ॥

ससैन्दा, स्त्री, (सैन्देन सह वर्त्तमाना ।) ... कन्या । इति शब्दरत्नावली ॥ (... त्रि ॥)

…क, क्लीनम् । सहविष्ट । चाकरः चार्श्न
…स्तम् २ सहम् ४ । इत्यमर । ३ । ४ । ५ ।
…म् ६ । इति जटाधर । (यथा, मनु । ३ । ११ ।
…रम मिति दुरित्यर्थं सार्धं श्र्द्ध्या ।
…दिह सह सहाद्' लिखितं लिखतामि ।")
…स्म । निस्नात । सारसम् । मौनस्य…
…ति । सहज । इति मेदिनी । साधनम् ।
…ति सहचरार्थं ।
…का. (सहते इति । सह + अच् ।) परिच्छ-
…स्य । इति शब्दनिर्णय ।
…:, पुं, (सहते इति । सह + पचादच् ।)
…सहावस्थायः । (यथा, शाकुन्तलम्-
…नाम् । ११ । ३० ।
…सह सहकार मिलितायाम् ।"…
…सहायः । इति महाभारतम् । १३ । १०।
२६ ।) समि. त्रि । इति हेमचन्द्रः । (यथा,
…महाभारते । १६ । ८ । १० ।
…महावियाजीनां सहाः परिवारकाः ।
…सहायमिलिताः पञ्च वाभस्य पर्वताम् ।")
…., पुं, क्ली, (सहते इति । सह + अच् ।)
…म् । इति मेदिनी ॥
…[न्] पुं, (सहते इति । सह + "सर्व-
…मुम्पोऽसुन् ।" उणा० ४ । १८८ । इति असुन्)
…प्रीतिः । बलम् । इति शब्दरत्नावली ॥ (यथा,
…पु. । ८ । ७ ।
"सदयं बुभुजे महाभुजः
सहसोद्वेगमियं व्रजेदिति ।
अचिरोपनतां स मेदिनीं
नवपाणिगृहीतां वधूमिव ।")
…कार:, पुं, (सह युगपत् कारयति विशेषयति
…मित्यमिति । कृ + णिच् + अच् ।) अति-
…सौरभाम्रः । इत्यमरः । २ । ४ । ३३ ॥ (यथा,
…पु: । ४ । ८ ।
"मन्दोत्कण्ठाः कृतास्तेन गुणाधिकतया गुरौ ।
फलेन सहकारस्य पुष्पोद्गम इव प्रजाः ॥")
सहकारी, [न्] पुं, (सह करोतीति । कृ +
णिनिः ।) प्रत्ययः । यथा,—
"अथ हेतुरुपादानं प्रत्ययाः सहकारिणः ॥"
इति त्रिकाण्डशेषः ॥
न्यायमते तद्विकले सति तज्जन्यजनकत्वं सह-
कारित्वम् ॥ (मिलिता, वारणशीलः, त्रि ॥)
सहचर:, पुं, स्त्री, सह चरतीति । चर + अच् ।)
पातभिण्टी । नीलझिण्टी । इति रत्नमाला ॥
(यथा, सुश्रुते । १ । ३८ ।
"वीततरसहचरद्वयदर्भवृकादर्शीति ॥")
सहचर:, पुं, (सह चरतीति । चर + अच् ।)
झिण्टी । वयस्यः । (यथा, कथासरित्सागरे ।
२४ । १६२ ।
"ततः सहचरैः सार्कं तस्यैवागिरयाद्द्दिम् ॥")
प्रतिबन्धकः । इति हेमचन्द्रः ॥ अनुचरे, त्रि ।
इति मेदिनी ॥ (यथा, कुमारे । २ । ६४ ।

"सहस्रास्रापहस्तमवशुक्लाद् यमाः
सहस्रधार्मिः प्राप्नोति, दृश्यमान ।")
सहचरी, स्त्री, (सह चरति या । चर + अच् ।
पचादिषु चरडिति पाठात् ङीप् ।) पीत-
झिण्टी । इत्यमरः । २ । ४ । ७४ ॥ सखी ।
इति जटाधरः ॥ पत्नी । इति हेमचन्द्रः ॥
(यथा, रघु. । ८ । ४७ ।
"मदमीलितमा कविता हरिणमदः
मैव किला सहचरी व्यवधाय देहम् ।
आकर्णमप्युदवि यामिनवा स पत्नी
दारं गुणानुदग्रमा: प्रतिपद्ययत ।")
सहजः, पुं, (सह जायते इति । जन + डः ।)
सहोदरः । इत्यमरः । २ । ६ । ३४ ॥ निसर्गः ।
सहोत्थे, त्रि । इति मेदिनी ॥ (यथा, रघुः ।
८ । ४६ ।
"विललाप स बाष्पगद्गदं
सहजामप्यपहाय धीरताम् ।
अभितप्तमयोऽपि मार्दवं
भजते कैव कथा शरीरिषु ।")
लग्नलग्नात् तृतीयस्थानम् । यथा,—
"सुतसहजभवाध्ये पूर्णदृष्टिः सुरारि-
र्धनमदनमराशौ दृष्टिपादत्रयार्द्धः ।
सहजरिपुचतुर्थेऽप्यष्टमे चार्द्धदृष्टिः
स्थितिभवनमुपाख्यं नैव दृष्टं हि राहोः ॥"
इति ज्योतिस्तत्त्वम् ॥
सहजमित्रं, क्ली, (सहजं मित्रम् ।) स्वाभाविक-
सुहृत् । यथा,—
"अरिमित्रमुदासीनोऽनन्तरस्तत्परः परः ।
क्रमशो मण्डलं चिन्त्यं सामादिभिरुपक्रमैः ॥"
अरिः शत्रुः । मित्रं सुहृत् । उभयविलक्षण
उदासीनः । ते च त्रयस्त्रिविधाः । सहजाः
कृत्रिमाः प्राकृताश्चेति । सहजं मित्रं भागि-
नेयपैतृष्वस्रीयमातृस्वस्रीयादिः । इति मिता-
क्षरायामाचाराध्यायी १ अध्यायः ॥
सहजातः, त्रि, (सह जातः उत्पन्नः ।) सहो-
दरः । यमजः इति केचित् ॥ (सहोत्थे, त्रि ।
यथा, कथासरित्सागरे । ११३ । २२ ।
"तारावलीकनामा च क्रमाद् हि जगाम सः
दानधर्मविवेकाद्यैः सहजातैर्गुणैः सह ॥")
सहजारिः, पुं, (सहजः स्वाभाविकः अरिः ।)
स्वाभाविकशत्रुः । यथा । "सहजारिः सापत्न-
पितृव्यतत्पुत्रादिः ।" इति मिताक्षराया-
माचाराध्यायः ॥
सहजोदासीनः, पुं, (सहज उदासीनः ।) स्वाभा-
विकपरतरः । यथा । "सहजकृत्रिमभित्रशत्रु-
लक्षणरहितौ सहजकृत्रिमोदासीनौ ।" इति
मिताक्षरायामाचाराध्याय ॥
सहण्डकं, क्ली, सांग्राह्यजनविशेष । यथा,—
"द्राक्षादौ माममूर्दौ कृद्दिते खण्डितं पुनः ।
गुडसार्कविधानेन पर्चितं तत् सहण्डकम् ।
सहण्डकं गुणयन्ये गुडसार्कगुणं स्मृतम् ॥"
इति भावप्रकाशः ॥

सहदेवः, पुं (शाल्मलिविशेषः । इति मेदिनी ॥
स च पाण्डुराजस्य पञ्चमपुत्रः । माद्रीगर्भे
अश्विनीकुमाराभ्यां जातः । जरासन्धपुत्रः ।
स दुर्योधनजनकाग्नौ सर्पेषु शतात्मेषु ।
इति श्रीभागवतम् ॥ (हर्यश्वपुत्रः । यथा,
हरिवंशे । २८ । ३ ।
"हर्यश्वनसुतो राजा सहदेवः प्रतापवान् ।
सहदेवस्य धर्मात्मा नदोन इति विश्रुतः ॥"
सोमदत्तपुत्र. । यथा, तत्रैव । ३२ । ८० ।
"सोमदत्तस्य दायादः सहदेवो महायशाः ।
सहदेवसुतश्चापि सोमको नाम पार्थिवः ॥
देवैः सह वर्तमाने, त्रि । यथा, भागवते ।
४ । २ । ८ ।
"शृण्वतां यजवंशो मे सहदेवाः सहाग्नयः ।
साधूनां ब्रुवतो वृत्तं नाद्रानाप्यम सत्कृताम् ॥")
सहदेवा, स्त्री, (सह देवयतीति । दिव + अच्
टाप् ।) बला । दण्डोत्पलः । गारिचीपधिः ।
इति मेदिनी ॥ पर्णकाला । इति हेमचन्द्रः ॥
(देवकन्यान्यतमा । सा तु वसुदेवपत्नी । यथा,
भागवते । ९ । २४ । २३ ।
"शान्तिदेवोपदेवा च श्रीदेवा देवरक्षिता ।
सहदेवा देवकी च वसुदेव उवाह ताः ॥")
सहदेवी, स्त्री, सर्पाक्षी । इति मेदिनी ॥ पीत-
दण्डोत्पला । इति रत्नमाला ॥ बलाभेदः ।
तत्पर्यायः । सहायता २ ज्येष्ठवला ३ कट-
म्भरा ४ देवगन्धा ५ कैमरिका ६ भुजाटनी ७
दर्पपुष्पा ८ देवगन्धिनी ९ पुराशिनी १० देव-
घला ११ मारिदी १२ पीतपुष्पी १३ देवाह्वी
१४ गन्धवल्लरी १५ मृगा १६ मगरमा १७ ।
अस्या गुणाः । छर्दीगवातार्तीशोफहारित्वम् ।
सूकहृद्विकारित्वम् । बल्यत्वम् । विषमज्वर-
नाशित्वञ्च । इति राजनिर्घण्टः ॥ सहदेव-
पत्नी च ॥
सहदेवीगणः, पुं, (सहदेवीनां गणः ।) प्रति-
ष्ठायां देवस्नानार्थौषधिसमूहः । यथा,—
"पञ्चगव्यैः स्नापयेच्च सहदेव्यादिभिस्ततः ।
सहदेवी बला चैव शतमूली शतावरी ॥
कुमारी च गुडूची च सिंही व्याघ्री तथैव च ।
य ओषधीति मन्त्रेण स्नानमोषधिसङ्कलेः ॥"
इति गारुडे ४८ अध्यायः ॥
सहधर्मिणी, स्त्री, (सह धर्मोऽस्त्यस्या इति ।
इनिः । ङीप् ।) वेदविधानेनोढ़ा । इत्यमरः ।
२ । ६ । ५ ॥
सहनं, क्ली, (सह + ल्युट्)क्षान्तिः। तत्पर्यायः।
तितिक्षा २ क्षमा ३ । इति हेमचन्द्रः ॥ (यथा,
साहित्यदर्पणे । ६ । ३६० ।
"कार्य्यसंग्रह आदानं तदाहुश्छादनं पुनः ।
कार्य्यार्थमपमानादेः सहनं खलु यद्भवेत् ॥")
सहन:, त्रि, (सहते इति । सह + ल्युः ।) सहन-
शीलः । इत्यमरः । ३ । १ । ३१ ॥ तत्पर्यायः ।
सहिष्णुः २ क्षमिता ३ क्षमी ४ तितिक्षुः ५
क्षन्ता ६ । इति हेमचन्द्रः । …

सहनर्त्तनं, क्ली, (सह मिलित्वा नर्त्तनम् ।) एकत्र मण्डलाकारनृत्यकरणम् । इति केचित् ॥

सहपांशुकिलः, पुं, (सह पांशुना रजसा किलति क्रीड़तीति । किल क्रीड़ने + कः ।) वयस्यः । इति त्रिकाण्डशेषः ॥

सहपानं, क्ली, (सह मिलित्वा पानम् ।) एकत्र मद्यभक्षणम् । तत्पर्य्यायः । सपीतिः २ । इति हेमचन्द्रः ॥ तुल्यपानम् ३ । इत्यमरः । २।८।५५ ॥ सहपीतिः ४ । इति शब्दरत्नावली ॥

सहपूर्व्वाह्णं, क्ली, (पूर्व्वाह्णस्य सदृशम् । "अव्ययीभावे चाकाले । ६।३।८१ । इत्यत्र अकाले इति कथनात् न सादेशः ।) पूर्व्वाह्णसदृशम् । इति मुग्धबोधव्याकरणे अव्ययीभावसमासः ॥

सहभावी, [न्] त्रि, (सह भवतीति । भू + णिनिः ।) सहायः । इति त्रिकाण्डशेषः ॥

सहभोजनं, क्ली, (सह मिलित्वा भोजनम् ।) एकत्र भक्षणम् । तत्पर्य्यायः । सग्धिः २ ॥ इत्यमरः । २।८।५५ ॥ (सहभोगकरणम् । यथा, महाभारते । १ । १८६ । २४ ।

एष नः समयो राजन् रत्नस्य सहभोजनम् ।
न च तं हातुमिच्छामः समयं राजसत्तम ॥")

सहमरणं, क्ली, (सह पत्या मरणम् ।) मृतस्वामिसहितज्वलच्चितारोहण-पूर्व्वकमरणम् । यथा । "अथ सहानुगमनम् । अङ्गिराः ।
'मृते भर्त्तरि या नारी समारोहेद्धुताशनम् ।
सारुन्धतीसमाचारा स्वर्गलोके महीयते ॥
तिस्रः कोट्योऽर्द्धकोटी च यानि लोमानि मानवे ।
तावन्त्यब्दानि सा स्वर्गे भर्त्तारं यानुगच्छति ॥
व्यालग्राही यथा व्यालं बलादुद्धरते बिलात् ।
तद्वद्भर्त्तारमादाय तेनैव सह मोदते ॥
मातृकं पैतृकञ्चैव यत्र कन्या प्रदीयते ।
पुनाति त्रिकुलं नारी भर्त्तारं यानुगच्छति ॥
तत्र सा भर्त्तृपरमा परा परमलालसा ।
क्रीड़ते पतिना सार्द्धं यावदिन्द्राश्चतुर्द्दश ॥"
भर्त्तृपरमा भर्त्ता परमो यस्याः सा तथा । परा परमलालसेत्यत्र स्तूयमानाप्सरोगणैरिति व्यासेन पठितम् ।
'ब्रह्मघ्नो वा कृतघ्नो वा मित्रघ्नो वापि यो नरः ।
तं वै पुनाति सा नारी इत्याङ्गिरसभाषितम् ॥
साध्वीनामिह नारीणामग्निप्रपतनादृते ।
नान्यो धर्म्मो हि विज्ञेयो मृते भर्त्तरि कर्हिचित् ॥'
या नारीत्युपादानात् सहमरणाभावपक्षोऽपि सूचितः । नान्यो धर्म्म इति तु सहमरणस्तुत्यर्थम् । तथा च विष्णुः । मृते भर्त्तरि ब्रह्मचर्य्यं तदन्वारोहणं वा इति । ब्रह्मचर्य्यमैथुनवर्ज्जनं ताम्बूलादिवर्ज्जनञ्च । यथा प्रचेताः ।
'ताम्बूलाभ्यञ्जनञ्चैव कांस्यपात्रे च भोजनम् ।
यतिश्च ब्रह्मचारी च विधवा च विवर्ज्जयेत् ॥'
अभ्यञ्जनमत्र अङ्गदैहिकपारिभाषिकम् । यथा,—
'मूर्द्धि दत्तं यदा तैलं भवेत् सर्व्वाङ्गसङ्गतम् ।
तैलाभिव्यञ्जनपेयाङ्ग अभ्यङ्गः स उदाहृतः ॥
तैलमङ्गं यदाङ्गेषु न च स्यादाहुतर्पणम् ।
सा मार्ष्टिः पृथगभ्यङ्गो मस्तकादौ प्रकीर्त्तितः ॥'
स्मृतिः ।
'एकाहारः सदा कार्य्यो न द्वितीयः कदाचन ।
पर्य्यङ्कशायिनी नारी विधवा पातयेत् पतिम् ॥
गन्धद्रव्यस्य सम्भोगो नैव कार्य्यस्तया पुनः ।
तर्पणं प्रत्यहं कार्य्यं भर्त्तुस्तिलकुशोदकैः ।
तत्पितुस्तत्पितुश्चापि नामगोत्रादिपूर्व्वकम् ॥'
एतत् तु तर्पणं पुत्रपौत्राद्यभावविषयमिति मदनपारिजातः ॥
'वैशाखे कार्त्तिके माघे विशेषनियमञ्चरेत् ।
स्नानं दानं तीर्थयात्रां विष्णोर्नामग्रहं मुहुः ॥'
अत्र साध्वीत्वमाह ।
'आर्त्तार्त्ते मुदिता हृष्टे प्रोषिते मलिना कृशा ।
मृते म्रियेत या पत्यौ साध्वी ज्ञेया पतिव्रता ॥'
छन्दोगपरिशिष्टीयमिति कल्पतरुः ॥ साध्वीप्रसादेन लोकधारणमप्याह ॥ ब्रह्मपुराणम् ।
'तस्मात् साध्व्यः स्त्रियः पूज्याः सततं देववज्जनैः ।
तासां राज्ञ प्रसादेन धार्य्यते च जगत्त्रयम् ॥'
महाभारते ।
'अवमत्य च याः पूर्व्वं पतिं दुष्टेन चेतसा ।
वर्त्तन्ते याश्च सततं भर्त्तॄणां प्रतिकूलतः ॥
भर्त्रनुमरणं काले याः कुर्व्वन्ति तथाविधाः ।
कामात् क्रोधात् भयान्मोहात् सर्व्वाः पूता भवन्ति ताः ॥'
अत्र ऐहिकब्रह्मप्रपतेर्द्दाहनिषेधात् जन्मान्तरीयतत्पापवत एव सहमरणेनोद्धारः । ब्रह्मपुराणे ।
'देशान्तरमृते पत्यौ साध्वी तत्पादुकाद्वयम् ।
निधायोरसि संशुद्धा प्रविशेज्जातवेदसम् ॥
ऋग्वेदवादात् साध्वी स्त्री न भवेदात्मघातिनी ।
त्र्यहाशौचे निवृत्ते तु श्राद्धं प्राप्नोति शास्त्रवत् ॥'
ऋग्वेदवादात् इमा नारीरविधवा इत्यादिमन्त्रात् । एतच्च अङ्गिरोब्रह्मपुराणवचनपर्य्यालोचनया ब्राह्मण्यादिसकलभार्य्याणां स्वगतभर्त्तृगतफलविशेषार्थिनीनां गर्भवतीबालापत्यादिव्यतिरिक्तानां सहमरणानुमरणयोरधिकार इति विवादकल्पतरुरत्नाकरौ । तत्र ब्राह्मण्या अनुमरणाधिकारोऽसङ्गतस्तस्यास्तन्निषेधात् । तथा च मिताक्षरायां दिवशोधकलतायाञ्चस्कारटीकायाञ्च गोतमः ।
'पृथक्चितिं समारुह्य न विप्रा गन्तुमर्हति ।
इतरासान्तु नारीणां स्त्रीधर्म्मोऽयं परः स्मृतः ॥'
तस्मादब्राह्मण्याः सहमरणमेव इतरासान्तु उभयमिति । कल्पतरुरत्नाकरशुद्धिचिन्तामणिषु पादुकाद्वयमिति दर्शनात् पादुकादिकमित्यपपाठः किन्तु पादुकाद्वयमित्युपलक्षणम् अगमनः विप्रेतरासां द्रव्यविशेषमनुपादाय पृथक्चित्यारोहणमात्रोक्तेः । यथोशनाः ।
'पृथक्चितिं समारुह्य न [illegible]
अन्यासामेव नारीणां स्त्रीधर्म्मो [illegible]
मदनपारिजातोऽप्येवम् । मिताक्षरो [illegible]
कल्पतरुरत्नाकरे हृदयादौ [illegible]
'बालापत्याश्च गर्भिण्यो ह्यदृष्टऋतवस्तथा ।
रजस्वला राजसुते ! नारोहन्ति [illegible]
राजसुते इति सगरमातुः सम्बोधनम् ।
स्मृतिः ।
'बालसम्वर्द्धनं [illegible]
रजस्वला सूतिका च रक्षेद्गर्भञ्च गर्भिणी ।
एवमन्यतये [illegible]
अप्यधिकारः । व्यासः ।
'दिनैकगम्यदेशस्था साध्वी [illegible]
न दहेत् स्वामिनं [illegible]
भविष्यपुराणे ।
[illegible]
तस्यानुमरणार्थाय स्थापयेदेकरात्रकम् ।
तस्य भर्त्तुः । तथा,—
'एकां [illegible]
तद्वर्त्तुः क्रियाकर्त्ता च
एतच्च पिण्डदानपर्य्यन्तम् ।
'यथाग्निदाता प्रेतस्य [illegible]
इति वायुपुराणवाक्यात्
ब्रह्मपुराणे ।
'आवयेद्दत्तं जायान्तु [illegible]
चितामारोपयन् प्रायः प्रसूते [illegible]
इमाः पतिव्रताः पुण्याः स्त्रियो याः [illegible]
सह भर्त्तृशरीरेण संविशन्तु विभावसुम् ।
एवं श्रुत्वा ततो नारी ब्रह्मार्पितसमर्पितम् ।
पितृमेधेन यज्ञेन दृष्टा स्वर्गमवाप्नुयात् ।
प्रसूते भर्त्तरीति शेषः । पितृमेधेन [illegible]
चितारोहणरूपेण । [illegible]
नुमरणेऽपि सह भर्त्तृशरीरेण [illegible]
प्रयोज्यः । देशान्तरमृते पत्याविन्यादि
प्रतिनिधित्वेन तदीयद्रव्यविधानात् [illegible]
च यथाश्रुतमन्त्रपाठमाह कात्यायन [illegible]
इविप्रतिपत्तिः [illegible]
न च अग्निजलप्रविष्टाना
मृतानां गर्भाणां जातदन्तानां मृते [illegible]
शुद्धिः । इति काश्यपवचनात्
अप्यग्निप्रवेशेन विराचार्य्योर्ध्वं [illegible]
पिण्डदानमिति वाच्यम् । [illegible]
पृथक्चितिसमारोहणमात्रे [illegible]
मात् अन्यत्र भर्त्तृत्याशौचप्रतीतेः [illegible]
काश्यपोक्तविरात्राशौचाद्वाऽर्थि [illegible]
शौचस्य हृदा पत्यशौचकालावधि [illegible]
'असहैगाहे स्यातायेत् पुनर्मरणवर्द्धन
तावत्स्यादशुचिर्विप्रो यावत्तत् [illegible]
इति मनुब्राह्मणोक्तसहे प्रत्यक्षेण [illegible]
शौचकालावधिस्यादित्यप्रतीते । [illegible]
अशौचकालसहोऽपि तत्सम्य एव [illegible]

ं तथाशौचकालहृद्धावपि यावदशौचं यथा-
ं दश पिण्डा देया इति। अतएव शिक-
ान्त्येष्टिविध्यनुमरणविवेकयोर्थ्यास:।
स्थितं पतिमालिङ्ग्य प्रविशेद्या हुताशनम्।
ाः पिण्डादिकं देयं क्रमशः पतिपिण्डवत् ॥'
णुः।
न्विता पिण्डदानन्तु यथा भर्त्तुर्दिने दिने।
न्वारोहिणी यस्मात्तस्मात् सा नात्मघातिनी'
ानुः सहार्थः। पतिमालिङ्ग्य त्वनेनैकवाक्य-
त्। स्वाम्यशौचाभ्यन्तरे पृथक्चितामृताया-
ाहेण पिण्डदानं स्वाम्यशौचापगमे तु श्राद्धम्
न्वितायाः प्रदातव्या दशपिण्डास्त्रयहेण तु।
ाम्यशौचव्यतीते तु तस्याः श्राद्धं विधीयते ॥'
इति शिकनधृतपैठीनसिवचनात् ॥
ग्निपुराणस्थं दमिति शूलपाणिः। अन्वानुः
ादर्थः। अतीते तु भर्त्तृशौचे पादुकाद्यसु-
दाय ज्वलदग्निप्रवेशे त्र्यहाशौचव्यवस्थया
ण्डदानं चतुर्थदिने श्राद्धं पूर्व्वोक्तब्रह्मपुराण-
ामात्। तत्र तु भर्त्तुः संग्रामहतत्वादिना
द्यःशौचं तत्र पृथक्चितामृताशौचस्य पूर्व्वोक्त-
ह्मपुराणवचनात् त्रिरात्रत्वेन बहुकालव्यापि-
ौनाधहरिमत्त्वात् तेनैव पूर्व्वाशौचस्य व्यपग-
ात् तत्र भर्त्तुरपि त्र्यहेण पिण्डदानम्। तत्रा-
ाकचितारोहणे भर्त्तृशौचव्यपगमात् शुद्धिः।
स्थितं पतिमालिङ्ग्य इति अन्वितापिण्डदान
ाति पूर्व्वोक्तवचनाभ्यां अग्निप्रवेशे सुमन्तुना
ाद्यःशौचविधानाच्च। यथा भृग्वग्निजलसंग्राम
ाान्तरस्थसन्न्यासनशनाशनिमहाध्वनिकानां
ादकक्रिया कार्य्या सद्यःशौचं भवति इति।
ागुरुचदेशः। महाध्वनिकः पुण्यार्थं हिमा-
ायावधिकमहापथगमनेन सम्पादितमरणः।
ा चैतत् सद्यःशौचं नित्यवेदाध्यापकैरग्निहोत्र-
भय एकाहाशौचविषय कर्त्तव्यमिति हार-
तादत्तविषयत्वेन नैतद्विषयकमिति वाच्यम्
न्मात्रविषयकत्वे प्रमाणाभावात्। सामान्य-
ुखप्रवृत्ततया वचनान्तरसंवादितया चैत-
ाद्विषयकमिति। अन्यथा कश्यपोक्तत्रिरात्रा-
ाौचमपि अग्निजलसंग्रामप्रविष्टानां प्रमादा-
ादेव मरण इति हारलतादर्शनात् अनुमरण-
विषयकं न स्यात् तस्मात् कश्यपवचनं ब्रह्म-
पुराणसमानविषयकं इति। सुमन्तुवचनं संग्राम-
हतभर्त्तृसहगमनविषयकमपीति ॥*॥ एवञ्च
समाधिना त्यक्तदेहस्य मुक्तस्य धृतराष्ट्रस्य
पर्णोटजाग्निना देहदाहकाले तत्पत्न्या
गान्धार्य्या अग्निप्रवेशदर्शनादिदानीं काश्यादि-
मृतस्य मुक्तस्यापि पत्युस्तत्पत्न्याः सहमरणं
सङ्गच्छते। श्रीभागवते तदुक्तम्।
'दह्यमानेऽग्निभिर्देहे पत्युः पत्नी सहोटजे।
बहिःस्थिता पतिं साध्वी तमग्निमनुवेक्ष्यति ॥'
अनुवेक्ष्यति अग्निप्रवेशनं करिष्यति इति
युधिष्ठिराय नारदस्य भविष्यत्कथनम्।
'दयितं यान्यदेशस्थं मृतं श्रुत्वा पतिव्रता।
समारोहति शोकाग्नौ तस्याः सिद्धिं निबोधत ॥'
इति व्यासवचनादिना सहमरणानुमरणयो-
र्नित्यकाशनैमित्तिककाम्यत्वेन मलमासादा-
वपि कर्त्तव्यता।
'नैमित्तिकानि काम्यानि निपतन्ति यथा यथा।
तथा तथैव कार्य्याणि न कालस्तु विधीयते ॥'
इति दक्षवचनात् ॥ * ॥
तदयं प्रयोगः। पुत्रादिना स्वगृह्योक्तविधिना
अग्नौ दत्ते ज्वलितायां भर्त्तृचितायां सहगन्त्री
साध्वी स्नाता परिहितधौतवासोयुगा कुश-
हस्ता प्राङ्मुखी वा दैवतीर्थेनाचान्ता तिल-
जलकुशत्रयमादाय ॐ तत् सदिति ब्राह्मणै-
रुच्चारिते नारायणं संस्मृत्य नमोऽद्यामुके मासि
अमुके पक्षे अमुकतिथौ अमुकगोत्रा श्रीमती
अमुकीदेवी अरुन्धतीसमाचारत्वपूर्व्वकस्वर्ग-
लोकमहीयमानत्वमानवाधिकरणकलोमसम-
संख्याब्दावच्छिन्नस्वर्गवासभर्त्तृसहितमोदमान-
त्वमातृ-पितृ-श्वशुरकुलत्रयपूतत्व-चतुर्दशेन्द्रा-
वच्छिन्नकालाधिकरणकाप्सरोगणस्तूयमानत्व-
पतिसहितक्रीडमानत्वब्रह्मघ्नपतिपूतत्वकामा
भर्त्तृज्वलच्चितारोहणमहं करिष्ये इति। अनु-
मरणे तु भर्त्तृज्वलच्चितारोहणमित्यत्र ज्वल-
च्चिताप्रवेशेन भर्त्रनुमरणमिति सङ्कल्प्य अष्टौ
लोकपाला आदित्यचन्द्रानिलाग्न्याकाशभूमि-
जलहृदयावस्थितान्तर्यामिपुरुषयमदिनरात्रि-
सन्ध्याधर्म्मा यूयं साक्षिणो भवत ज्वलच्चितारोह-
णेन भर्त्तृशरीरानुगमनमहं करोमि इति। अनु-
मरणे तु भर्त्तृशरीरानुगमनमित्यत्र भर्त्रनुमरण-
मित्युच्चार्य्य ज्वलच्चिताग्निं त्रिः प्रदक्षिणीकृत्य

'ॐ इमा नारीरविधवाः सपत्नी-
राञ्जनेन सर्पिषा संविशन्तु।
अनश्रवो अनमीवाः सुरत्ना
आरोहन्तु जनयो योनिमग्रे ॥'
इति ऋग्वेदोक्तमन्त्रे ।१०।१८।७॥

'ॐ इमाः पतिव्रताः पुण्याः स्त्रियो या याः
सुशोभनाः।
सह भर्त्तृशरीरेण संविशन्तु विभावसुम् ॥'
इति पौराणिके मन्त्रे च ब्राह्मणेन पठिते नमो
नम इत्युच्चार्य्य ज्वलच्चितां समारोहेत् ॥*॥
प्रायश्चित्तः।
'चितिभ्रष्टा तु या नारी मोहाद्विचलिता
भवेत्।
प्राजापत्येन शुध्येत्तु तस्माद्धि पापकर्म्मणः ॥',
प्रायश्चित्तनिर्णयामृते स्मृतिः।
'एकचित्यां समारूढौ दम्पती निधनं गतौ।
पृथक् श्राद्धं तयोः कुर्य्यादोदनन्तु पृथक् पृथक् ॥'
विद्याकरधृता स्मृतिः।
'एकाहेन मृतानान्तु बहूनामथवा द्वयोः।
तन्त्रेण श्रपणं कृत्वा पृथक् श्राद्धं प्रवर्त्तयेत् ॥'
यत्तु।
'यदा नारी विशेदग्निं स्वेच्छया पतिना सह।
अशौचमुदकं तस्याः सह भर्त्रेति निश्चितम्।
तिथ्यन्तरमृतायान्तु पृथक् श्राद्धं न विद्यते ॥'
इति चतुर्भुजभट्टाचार्य्यधृतयमवचनाद्भिन्नतिथि-
मृताया अपि पत्युर्मृततिथौ श्राद्धमिति हरि-
दासतर्काचार्य्याः। तत्र अस्य वचनस्यामूलत्वात्
समूलत्वेऽपि श्राद्धपदं पिण्डपरम्। एकोद्दिष्टं
मृताहनीति यमवचनविरोधात्।" इति शुद्धि-
तत्त्वम् ॥*॥ अन्यत् ब्रह्मवैवर्त्ते गणपतिखण्डे
२८ अध्याये। मार्कण्डेयपुराणे दमचरिताध्याये
विष्णुपुराणे ५ अंशे ३८ अध्याये। कल्किपुराणे
३३ अध्याये च द्रष्टव्यम् ॥

सहयायी, [न्] त्रि, (सह यातीति। या+
णिनिः।) मिलितगामी। यथा,—
"न नदीषु नदीं ब्रूयात् पर्व्वतेषु च पर्व्वतान्।
आवासे भोजने वापि न त्यजेत् सहयायिनम् ॥"
इति कूर्म्मपुराणे उपविभागे। १५। ५८ ॥

सहरसा, स्त्री, (सह रसो यस्याः।) मुद्गपर्णी।
इति शब्दरत्नावली ॥

सहरि, व्य, हरेः सदृशम्। इति मुग्धबोधव्याक-
रणम् ॥ सूर्य्ये वृषे च, पुं। इति केचित् ॥

सहर्षः, पुं, (सह हर्षो यत्र।) स्पर्द्धनम्। हर्षः।
इति त्रिकाण्डशेषः ॥ (हर्षेण सह वर्त्तमानः।)
हर्षयुक्ते, त्रि ॥ (यथा, कथासरित्सागरे।
२। २३।
"एतच्छ्रुत्वा वचः शम्भोः सहर्षोऽहमिहा-
गतः ॥")

सहसा, व्य, हठात्। तत्पर्य्यायः। अतर्कितः २।
इत्यमरः। ३। ४। ७ ॥ अकस्मात् ३। इति
शब्दरत्नावली ॥ सहसा कर्म्मकरणनिषेधो
यथा, किरातार्ज्जुनीये। २। ३०।
"सहसा विदधीत न क्रिया-
मविवेकः परमापदां पदम्।
वृणते हि विमृश्यकारिणं
गुणलुब्धाः स्वयमेव सम्पदः ॥"
हास्ययुक्ते, त्रि। यथा,—
"प्रियतमेन यया सरुषा स्थितं
न सहसा सहसा परिरभ्य तम्।
श्लथयितुं क्षणमक्षमतां गता
न सहसा सहसा कृतवेपथुः ॥"
इति माघे। ६। ५७ ॥

सहसादृष्टः, त्रि, हठात् दृष्टः। दत्तकपुत्रे, पुं।
इति केचित् ॥

सहमानः, पुं, (सहते इति। सह+"ऋञ्जिवृधि-
मन्दिसहिभ्यः कित्।" उणा० २। ८३। इति
असानच्।) मयूरः। यज्ञः। क्षमायुक्ते, त्रि।
इत्युणादिकोषः ॥ (शत्रूणामभिभवितरि, त्रि।
इति सायणः ॥ यथा, ऋग्वेदे। १। १८९। ८।
"मानस्य सूनुः सहमाने अग्नौ ॥")

सहस्यः, पुं,(सहसि बले साधुः। तत्र साधुरिति
यत्।) पौषमासः ॥ इत्यमरः। १। ४। १५ ॥
(यथा, कुमारे। ५। २६।
"निनाय सात्यन्तहिमोत्किरानिलाः
सहस्यरात्रीरुदवाससतत्पराः ॥")

सहस्रं, क्ली, (सहो बलमस्त्यस्मिन्निति। सहस्+र:। "सहो बलनामसु व्याख्यातम्। रो मत्वर्थीय:। अत्रापि भाविनी शक्तिरस्मिन्नस्ति।" इति निघण्टुटीकायां देवराजयज्वा। ३।१।) दशशतसंख्या। इति हेमचन्द्र:॥ हाजार इति पारस्यभाषा। (यथा, मनु:। ३। १०१।
"पापरोगी सहस्रस्य दातुर्नाशयते फलम्॥")
तद्वाचकानि यथा। जाह्नवीवक्त्रम् १ शेषमौर्षम् २ पद्मच्छद: ३ रविकर: ४ अर्ज्जुनबाहु: ५ वेदशाखा ६ इन्द्रदृष्टि: ७। इति कविकल्पलता॥ (बहु। इति निघण्टु:।३।१॥ यथा,—
"सहस्रशीर्षा पुरुष: सहस्राक्ष: सहस्रपात्।"
इति पुरुषसूक्तम्॥)
सहस्रकाण्डा, स्त्री, (सहस्रं काण्डानि यस्या:।) श्वेतदूर्व्वा। इति राजनिर्घण्ट:॥
सहस्रकिरण:, पुं, (सहस्रं किरणानि यस्य।) सूर्य्य:। इति हलायुध:॥ (यथा, बृहत्संहितायाम्। ४२। १२।
"राशौ राशौ यस्मिन्
शिशिरमयूख: सहस्रकिरणो वा॥")
सहस्रदंष्ट्र:, पुं, (सहस्रं दंष्ट्रा यस्य।) पाठीनमत्स्य:। इत्यमर:। १। १०। १८॥ (यथा, सुश्रुते। १। ४६। "रोहितपाठीनपाटलाराजीववर्म्मिगोमत्स्य-कृष्णमत्स्य-वागुञ्जारमुरलसहस्रदंष्ट्रप्रभृतयो नादेया:॥")
सहस्रदंष्ट्री, [न्] पुं, (सहस्रदंष्ट्रा: सन्त्यस्येति। इनि:।) बोदालमत्स्य:। इति शब्दरत्नावली॥
सहस्रदो:, [स्] पुं, (सहस्रं दोषो बाहवो यस्य।) कार्त्तवीर्य्यार्ज्जुन:। इति जटाधर:॥
सहस्रधार:, पुं, (सहस्रं धारा यस्य।) विष्णुचक्रम्। इति केचित्॥
सहस्रधारा, स्त्री, (सहस्रं बहवो धारा जलप्रपाता यत्र।) देवतास्नानार्थसहस्रच्छिद्रयुक्तपात्रगलितजलधारा। यथा,—
"सहस्रधारया देवीं स्नापयामि सुरेश्वरीम्॥"
इति दुर्गोत्सवपद्धति:॥
सहस्रनयन:, पुं, (सहस्रं नयनानि यस्य।) इन्द्र:। इति हलायुध:॥ (यथा, कथासरित्सागरे। १०।१२२७।
"केयं सहस्रनयनप्रेयसी किमप्सरा:।
वनश्रीरथवा पुष्पलावकरयतेव॥"
वाच्यलिङ्गेऽपि दृश्यते। यथा, महाभारते। १३। १४। २०४।
"किञ्चान्य बहुभि: सूक्तैर्हेतुवादै: पुरन्दर।
सहस्रनयनं दृष्ट्वा त्वामेव सुरसत्तम॥")
सहस्रनेत्र:, पुं, (सहस्रं नेत्राणि यस्य।) इन्द्र:। इति हेमचन्द्र:॥ (यथा, रघु:। ३। ४३।
"क्रियाप्रबन्धादयमध्वराणा-
मजस्रमाहूतसहस्रनेत्र:।
शच्याश्चिरं पाण्डुकपोललम्बान्
मन्दारशून्यानलकांश्चकार॥"
वाच्यलिङ्गेऽपि दृश्यते। यथा, महाभारते। १। २१२। २३।
"एवं चतुर्मुख: स्थाणुर्महादेवोऽभवत् पुरा।
तथा सहस्रनेत्रश्च बभूव बलसूदन:॥")
विष्णु:। इति श्रीभागवतम्॥
सहस्रपत्रं, क्ली, (सहस्राणि पत्राणि यस्य।) पद्मम्। इत्यमर:। १। १०। ४१॥ (यथा, रघु:। ७। ११।
"तासां मुखैरासवगन्धगर्भै-
र्व्याप्तान्तरा: सान्द्रकुतूहलानाम्।
विलोलनेत्रभ्रमरैर्गवाक्षा:
सहस्रपत्राभरणा इवासन्॥")
सहस्रपात्, [द्] पुं, (सहस्रं पादा यस्य। संख्यासुपूर्व्वस्येति पादस्यान्तलोप:।) विष्णु:। यथा,
"सहस्रशीर्षा पुरुष: सहस्राक्ष: सहस्रपात्॥"
इति पुरुषसूक्तम्॥
(तथा च महाभारते। १३। १४८। १३।
"सहस्रमूर्द्धा विश्वात्मा सहस्राक्ष: सहस्रपात्॥"
महादेव:। यथा, तत्रैव। १३। १७। १३०।
"हर्य्यक्ष: ककुभो वज्री शतजिह्व: सहस्रपात्॥"
ऋषिविशेष:। यथा, तत्रैव। १। १०। ७।
"अहं पुरा रुरो! नाम्ना ऋषिरासं सहस्रपात्।
सोऽहं शापेन विप्रस्य भुजङ्गत्वमुपागत:॥")
सहस्रपाद:, पुं, (सहस्रं पादा यस्य।) कारण्डपक्षी। सूर्य्य:। विष्णु:। इति मेदिनी॥
सहस्रबाहु:, पुं, (सहस्रं बाहवो यस्य।) बाणराज:। यथा,—
"बाण: पुत्त्रशतज्येष्ठो बलेरासीन्महात्मन:।
सहस्रबाहुर्वाद्येन ताण्डवे तोषयन्मृडम्॥"
इति श्रीभागवते। १०। ६२। २॥
(कार्त्तवीर्य्यार्ज्जुन:। शिव:। यथा, महाभारते। १३। १७। १३१।
"सहस्रबाहु: सर्व्वाङ्ग: शरण्य: सर्व्वलोककृत्॥"
बहुबाहुविशिष्टे, त्रि। यथा, भागवते।४।५।३।
"ततोऽतिकायस्तनुवा स्पृशन् दिवं
सहस्रबाहुर्घनरुक् त्रिसूर्य्यदृक्॥")
सहस्रभुज:, पुं, (सहस्रं भुजा यस्य।) विष्णु:। यथा,—
"पश्यन्त्यदोरूपमदभ्रचक्षुषा
सहस्रपादोरुभुजाननाद्भुतम्।
सहस्रमूर्द्धश्रवणाक्षिनासिकं
सहस्रमौल्यम्बरकुण्डलोल्लसत्॥"
इति श्रीभागवते। १। ३। ४॥
कार्त्तवीर्य्यार्ज्जुन:॥ (बाणराजश्च॥)
सहस्रभुजा, स्त्री, (सहस्रं भुजा यस्या:।) महालक्ष्मी:। सा च महिषासुरमर्द्दिनी। यथा,—
"श्वेतानना नीलभुजा सुश्वेतस्तनमण्डला।
रक्तमध्या रक्तदेशा नीलजङ्घोरुतालुका॥
चित्रानुलेपना कान्ता सर्व्वसौभाग्यदायिनी।
अष्टादशभुजा पूज्या सा सहस्रभुजा सती॥
आयुधान्यत्र रचन्ति दक्षिणाध:करक्रमात्।
अक्षमाला च सुपलं बाणासिकुलिशं गदाम्॥
चक्रं त्रिशूलं परशुं शङ्खघण्टे ...
शक्तिं दण्डं चर्म्म चापं पानपात्रं ...
पद्मञ्चतसृभुजा त्वेभिरायुधै: परमेश्वरी।
स्मर्त्तव्या ...
इत्येषा राजसी मूर्त्ति: सर्व्वदेवमयी ...
यां ध्यात्वा मानसी नित्यं ...
...
सहस्रमूर्द्धा, [न्] पुं, (सहस्रं मूर्द्धानो यस्य।)
विष्णु:। यस्य ...
(तथाच महाभारते। १३। १४८। ३।
"सहस्रमूर्द्धा विश्वात्मा ...
शिव:। यथा, महाभारते। १३। १७ ...
"सहस्रमूर्द्धा देवेन्द्र: सर्व्वदेवमयो गुरु:॥
सहस्रमूली, स्त्री, (...
द्रवन्ती। इति राजनिर्घण्ट:॥
सहस्रमौलि:, पुं, (सहस्रं मौलयो यस्य।)
अस्य प्रमाणं सहस्रभुजशब्दे द्रष्टव्यम्।
देव:। यथा, देवीभागवते। १। २। ४।
"विष्णुस्तु शेषशयने स्वपितीति वार्त्ते
तन्नाभिपद्ममुकुले खलु तस्य जन्म।
आधारता किल गतोऽत्र सहस्रमौलि:
सर्व्वाश्रितो स भगवान् ...
सहस्ररश्मि:, पुं, (सहस्रं रश्मयो यस्य।)
इति सहस्रकिरणशब्ददर्शनात्॥ (यथा, ...
१। ५३।
"प्रयत्नवन् सोढुमधीरलोचन:
सहस्ररश्मेरिव यस्य दर्शनम्॥")
सहस्रवदन:, पुं, (सहस्रं वदनानि यस्य।) ...
इति शब्दरत्नावली॥
सहस्रवीर्य्या, स्त्री, (सहस्रं वीर्य्याण्यस्या:।)
दूर्व्वा। इत्यमर:। २। ४। ११८॥
वरी। इति राजनिर्घण्ट:॥ (...
१। १८।
"शतवीर्य्या सहस्रवीर्य्या शिरसा
धारयेत्॥"॥ प्रभूतवीर्य्यशालिनि, त्रि।
वाजसनेयसंहितायाम्। १३। ११।
"सहस्रवीर्य्यासि सा मा जिन्व॥")
सहस्रवेधं, क्ली, (सहस्रं वेधा यस्य।)
काञ्जिकविशेष:। इति राजनिर्घण्ट:॥
सहस्रवेधि, [न्] क्ली, (सहस्रं विध्यति।
छिद्रिकरणे+णिनि:।) हिङ्गु। इति ...
राजनिर्घण्टौ॥
सहस्रवेधी, [न्] पुं, (सहस्रं वेधितुं ...
विध छिद्रकरणे+णिनि:।) ...
इति मेदिनी॥ कस्तूरी। इति राजनि...
सहस्रवेधकर्त्तरि, त्रि॥
सहस्रशिखर:, पुं, (सहस्रं शिखराणि ...
विन्ध्यपर्व्वत:। इति केचित्॥ (यथा, ...
५५। १०।
"सहस्रशिखरश्चाद्रि: पारियात्र: ...
सहस्रश्रवण:, पुं, (सहस्रं श्रवणानि ...
विष्णु:। अस्य प्रमाणं सहस्रभुजशब्दे द्रष्टव्यम्॥

…क्षांशु, पुं, सूर्य्यः । इति हेमचन्द्रः ॥
…र्णी, (सहस्रं शीर्षाणि सन्त्यस्यामिति । … टाप् ।) शतपदी । इति भावप्रकाशः ॥
…क्षः, पुं, (सहस्रं अक्षीणि यस्य ।) इन्द्रः । …मरः । १ । १ । ४२ ॥ (यथा, मनुः । ११ । ८ ।
…सहस्राक्षः महाबाहुः …
…न् सर्व्वं स्वयं तथा सर्व्वलोकपितामहः ॥")
…पात्, पुं, (सहस्रमक्षीण्यस्येति । "बहुब्रीहौ …स्यक्ष्णोः स्वाङ्गात् षच् ।" ५।४।११३ । इति …।) इन्द्रः । इत्यमरः । १।१ । ४३ ॥ (यथा, …भारते । १ । २५ । ८ ।
…मुचिघ्न नमस्तेऽस्तु सहस्राक्ष शचीपते ! ॥")
…षः । यथा,—
"सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।"
इति पुरुषसूक्तम् ॥
…ठस्थानविशेषः । यथा, देवीभागवते । ७ । … । ६५ ।
…त्यमाक्षी सहस्राक्षी दिव्याक्षी महो-
त्पला ॥")
…ानन:, पुं, (सहस्रं आननानि यस्य ।) …सुः । अस्य प्रमाणं सहस्रभुजशब्दे द्रष्टव्यम् ॥
…ानीकः, पुं, शतानीकराजपुत्रः । यथा,—
…तानीकोऽभवत् पूर्व्वं पुराकल्पे महीपतिः ।
…ाय सुबहून् यज्ञान् यज्ञापूर्णेन चेतसा ॥
… यश्च सहस्राणि गजाश्वरथदन्तिनाम् ।
…भ्योऽददद्राजन् ग्रामानाञ्च शतं शतम् ॥
…जस्तुष्टो ददौ पुत्रं कौशिकी भुभृते तथा ।
…ास्तस्य स जातोऽपि कालात् कालं व्यवर्द्धत ॥
…वेदाङ्गतत्त्वज्ञो धर्म्मज्ञो नियतव्रतः ।
…न्त्या चन्द्रसमस्तुल्यः प्रतापात् सूर्य्यवत् प्रभुः ॥
…दी धर्म्मराजेव क्षमया पृथिवीसमः ।
…द्गुणवतो ज्ञात्वा सुतं राज्ञो द्विजातयः ।
…हस्रानीकनामानं चक्रुस्तस्य सुहृत्पिता: ॥"
…ति वह्निपुराणे पापनाशनद्वादशीनामाध्यायः ॥
…तथा च भागवते । ९ । २२ । ३८—३९ ।
…स्य पुत्रः शतानीको याज्ञवल्क्यात् त्रयीं
पठन् ।
…स्त्रज्ञानं क्रियाज्ञानं शौनकात् परमेष्यति ॥
…हस्रानीकस्तत्पुत्रस्ततश्चाश्वमेधजः ॥")
…सारः,पुं क्ली,(सहस्रं आराणि कोणा यस्य ।) …रोऽवस्थिताधोमुखसहस्रदलकमलम् । यथा,
…सहस्रारे हिमनिभे सर्व्ववर्णविभूषिते ।
…-क्ष-यादिविरेखात-ह-स-च त्रयभूषिते ॥
…न्मध्ये परबिन्दुञ्च सृष्टिस्थितिलयात्मकम् ।
…वं समाहितमना ध्यायेन्मासोऽयमान्तरः ॥"
इति तन्त्रसारोक्तान्तर्म्मातृकान्यासः ॥
…सहस्रं अराणि यस्येति । बहुचक्राङ्गविशिष्टे, …त्रि । यथा, देवीभागवते । ६ । ५ । १८ ।
"चक्रं मुमोच वेगेन सहस्रारं सुदर्शनम् ॥")
…हस्री, [न्] पुं, (सहस्रं बलमस्त्यस्येति । …हस्र + "तपःसहस्राभ्यां विनीनी ।" ५ । २ । १०२ । इति इनिः ।) सहस्रेण यो बली । तत्-
पर्य्यायः । साहस्रः २ । इत्यमरः । २ । ८ । ६२ ॥ हे छाजरा इति ख्याते । ये सहस्रेण सहस्रसंख्येन गजादिना बलिनः सैन्यवन्तः ते । सहस्रं धनानि सन्त्येषामिति सहस्री विकारसंघव्यादिना त्वौ मैकाज्ञादिति इनि च रूपद्वयम् । इति भरतः ॥ (सहस्रविशिष्टे, त्रि । यथा, मनुः । ८ । १७६ ।
"याग्नर्णी यदनुमाय यस्योत्ता वैश्यपार्थिवौ ।
वैश्यं पञ्चसमं कुर्य्यात् अविषस्तु सहस्रिणम् ॥"
तथाच भागवते । १ । ८ । ३० ।
"नटोपसंहृत्य गिरः सहस्रिणी-
र्विमुक्तमहं मन आदिपुरुषे ॥"
"सहस्रिणीः सहस्रार्थवतीः ।"इति तट्टीका ॥)
सहा, स्त्री, (सहत इति । सह + अच् । टाप् ।) घृतकुमारी । मुद्गपर्णी । इत्यमरः । २।४।७३ ; २ । ४ । ११३ ॥ सत्त्वभेषजम् । दण्डोत्पला । पृथिवी । इति मेदिनी ॥ पीतझिण्टी । सर्पकङ्काली । इति शब्दचन्द्रिका ॥ रास्ना । स्वर्णक्षीरी । पीतदण्डोत्पला । इति रत्नमाला ॥ तरुणीपुष्पम् । इति राजनिर्घण्टः ॥
सहाः, [स्] पुं, (सहते इति । सह + असुन् ।) अग्रहायणमासः । इत्यमरः ॥ (यथा, भागवते । १२ । ११ । ४१ ॥
"अयांशुः काश्यपस्तार्क्ष्य ऋतसेनस्तथोर्व्वशी ।
विद्युच्छत्रुर्महाशङ्खः सहोमासं नयन्त्यमी ॥")
हेमन्तकालः । इति मेदिनी ॥
सहाचरः, पुं, (सह आचरतीति । आ + चर + अच् ।) पीतझिण्टी । इति शब्दरत्नावली ॥ (अस्य पर्य्यायो यथा,—
"सैरेयकः श्वेतपुष्पः सैरेयः कटसारिका ।
सहाचरः सहचरः स च भिन्द्यपि कथ्यते ॥"
इति भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ॥
यथा, सुश्रुते चिकित्सितस्थाने । ३७ ।
"सहाचरवरीविश्लाकाकनाशाविदारिभिः ॥"
यथाच ।
"वासानिम्बपटोलकेतकीबलाकुष्माण्डकेन्दीवरी-वर्षाभूकुटजाश्वगन्धसहिते द्वे पूतिगन्धामृते ॥ मांसं नागबलासहाचरपुरैर्हिंस्राद्रके नित्यशो ग्राह्यास्तत्क्षणमेव न द्विगुणिता ये चेक्षुजाता घनाः ॥"
इति वैद्यकपरिभाषायाम् ॥)
सहचरश्च ॥
सहायः, पुं, (सह अयते इति । अय + अच् ।) अनुकूलः । तत्पर्य्यायः । अनुप्लवः २ अनुचरः ३ अभिसरः ४ । इत्यमरः । २।८ । ७१ ॥ (यथा, मनुः । ६ । ४८ ।
"अध्यात्मरतिरासीनो निरपेक्षो निरामिषः ।
आत्मनैव सहायेन सुखार्थी विचरेदिह ॥")
राज्ञां सहाया यथा, मात्स्ये । २१५ । ७४ ।
"सद्वृत्ताश्च तथा पुष्टाः सततं प्रतिमानिताः ।
राज्ञा सहायाः कर्त्तव्याः पृथिवीं जेतु-
मिच्छता ॥"
सहायता, स्त्री, (सहाय + "ग्रामजनबन्धुसहायेभ्यस्तल् ।" ४ । २ । ४३ । इति तल् ।) सहायानां समूहः । इत्यमरः । ३ । ३ । ४१ ॥ (सहायस्य भावः कर्म्म वा । तल् ।) साहाय्यञ्च ॥ (यथा, रघुः । ९ । १९ ।
"स किल संयुगमूर्द्धि सहायतां
मघवतः प्रतिपद्य महारथः ।
स्वभुजवीर्य्यमगापयदुच्छ्रितं
सुरवधूरवधूतभयाः शरैः ॥")
सहायत्वं, क्ली, सहायता । सहायस्य भावः । सहायशब्दाद्भावे त्वप्रत्ययेन निष्पन्नम् ॥ (यथा, कथासरित्सागरे । ३० । ८७ ।
"अङ्गीचक्रे सहायत्वं राजा तस्यारिमर्द्दने ॥")
सहारः, पुं,(सहते इति । सह + "तुषाराद्यश्च ।" उणा० ३।१३९। इत्यारन् ।) आम्रवृक्षः । इत्युणादिकोषः ॥ महाप्रलयः । इति हलायुधः ॥
सहारोग्यः, त्रि, (आरोग्येण सह वर्त्तमानः ।) नीरुक् । इति हेमचन्द्रः ॥
सहार्द्रः, त्रि, हार्द्देन सह वर्त्तमानः ॥ सप्रेमः । स्नेहयुक्तः ॥
सहितः, त्रि, (सं + धा + क्तः । "समो वा हितततयोः ।" ६ ।१।१४४ । इत्यस्य वार्त्तिकोक्त्या सलोपः ।)सहशब्दात् इतच्प्रत्ययेन च निष्पन्नः । इति सिद्धान्तकौमुदी ॥ समभिव्याहृतः । संयुक्तः । (मिलितः । यथा, मनुः । ९ । २१२ ।
"सोदर्य्या विभजेरंस्तं समेत्य सहिताः समम् ।
भ्रातरो ये च संसृष्टा भगिन्यश्च सनाभयः ॥")
संहितः । सम्यग्हितः । इति मुग्धबोधव्याकरणम् ॥ हितेन सह वर्त्तमानश्च ॥
सहिता, [तृ] त्रि, (सहते इति । सह + तृच् । "तीषसहेति ।" ७।२।४८ । इति पक्षे इट् ।) सहनशीलः । सोढ़ा । इति सिद्धान्तकौमुदी ॥
सहित्रं, क्ली, (सह्यते अनेनेति । सह + "अर्त्तिलूधूसूखनसहचर इत्रः ।" ३ । २ । १८४ । इति इत्रः ।) सहनकरणम् । इति व्याकरणम् ॥
सहिष्णुः, त्रि, (सहते इति । सह + "अलंकृञ्निराकृञिति ।" ३ । २ । १३६ । इति इष्णुच् ।) सहनशीलः । तत्पर्य्यायः । सहनः २ क्षन्ता ३ तितिक्षुः ४ क्षमिता ५ क्षमी ६ । इत्यमरः । ३ । १ । ३१ ॥ (यथा, किराते । २ । ५० ।
"अपरागसमीरणेरितः
क्रमशीर्णाकुलमूलसन्ततिः ।
सुकरस्तरुवत्सहिष्णुना
रिपुरुन्मूलयितुं महानपि ॥")
सहिष्णुता, स्त्री, (सहिष्णोर्भावः । सहिष्णु + तल् ।) सहिष्णोर्भावः । तत्पर्य्यायः । तितिक्षा २ क्षमा ३ क्षान्तिः ४ । इति जटाधरः ॥ (यथा, सुश्रुते । ४ । २४ ।
"श्रमक्लमपिपासोष्णशीतादीनां सहिष्णुता ॥")
सहुरिः, पुं, (सहते इति । सह + "जसिसहोरुरिन् ।" उणा० २ । ७३ । इति उरिन् ।) सूर्य्यः । इत्युणादिकोषः ॥

सहुरिः, स्त्री, (सह मर्षणे + उरिन् ।) पृथिवी । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

सहृदयः, त्रि, (हृदयेन अन्तःकरणेन सह वर्त्तमानः ।) प्रशस्तमनाः । इत्यमरटीकायां भरतः ३ । १ । ३ ॥ (यथा, रामायणे ।२। ११ । २२ ।
"कुरु साधुप्रसादं मे बाले सहृदया ह्यसि ॥")

सहृल्लेखं, क्ली, (हृल्लेखेन सह वर्त्तमानम् ।) विचिकित्सितान्नम् । यथा,—
"विचिकित्सा तु हृदये यस्मिन् प्रजायते ।
सहृल्लेखन्तु विज्ञेयं पुरीषन्तु स्वभावतः ॥"
इति प्रायश्चित्तविवेकः ॥

सहोक्तिः, स्त्री, (सह उक्तिः ।) अलङ्कारविशेषः । यथा,—
"सहोक्तिः सहभावश्चेत् भासते जनरञ्जनः ।
दिगन्तमगमत्तस्य कीर्त्तिः प्रत्यर्थिभिः सह ॥"
इति चन्द्रालोकः ॥

(अस्य लक्षणोदाहरणानि यथा, साहित्यदर्पणे । १० । ७०१ ।
"सहार्थस्य बलादेकं यत्र स्याद्वाचकं द्वयोः ।
सा सहोक्तिर्मूलभूतातिशयोक्तिर्यदा भवेत् ॥"
अतिशयोक्तिरत्राभेदाध्यवसायमूला कार्य्यकारणपौर्व्वापर्य्यविपर्य्ययरूपा च । अभेदाध्यवसायमूलापि श्लेषभित्तिका अन्यथा च । क्रमेणोदाहरणम् ।
"सहाधरदलेनास्या यौवने रागभाक् प्रियः ॥"
अत्र रागपदे श्लेषः ।
"सह कुमुदकदम्बैः काममुल्लासयन्तः
सह घनतिमिरौघैर्धैर्य्यमुत्सारयन्तः ।
सह सरसिजषण्डैः स्वान्तमामीलयन्तः
प्रतिदिशममृतांशोरंशवः सञ्चरन्ति ॥"
अत्र च । अत्रोल्लासादीनां सम्बन्धिभेदादेव भेदो न तु श्लिष्टतया ।
"समसेव नराधिपेन सा
गुरुसम्मोहविलुप्तचेतना ।
अगमत् सह तैलबिन्दुना
ननु दीपार्च्चिरिव क्षितिस्तलम् ॥"
इयञ्च मालयापि सम्भवति । तयोदाहृते सह कुमुदकदम्बैरित्यादौ ।
"लक्ष्मणेन समं रामः काननं गहनं ययौ ।"
इत्यादौ चातिशयोक्तिमूलत्वाभावान्नायमलङ्कारः ॥ ० ॥)

सहो[illegible] सह वर्त्तमानः ।) सुनीना [illegible]
[illegible] स्फोटजी ।"
[illegible] ॥
[illegible] वादन-
[illegible] : ॥

या गर्भवती अज्ञातगर्भा ज्ञातगर्भा वा परिणीयते स गर्भस्तस्यां जातः परिणेतुः पुत्रो भवति सहोढ इति व्यपदिश्यते । इति कुल्लूकभट्टः ॥ (चोढ़ेन हृतद्रव्येण सह वर्त्तमाने, त्रि । यथा, मनुः । ८ । २७० ।
"न होढ़ेन विना चौरं घातयेद्धार्म्मिको नृपः ।
सहोढं सोपकरणं घातयेदविचारयन् ॥")

सहोदरः, पुं, (उदरेण सह वर्त्तते इति । सह समानं उदरं यस्येति वा ।) एकमातृगर्भजातभ्राता । तत्पर्य्यायः । सहजः २ सोदरः ३ भ्राता ४ सगर्भः ५ समानोदर्य्यः ६ सोदर्य्यः ७ । इति जटाधरः ॥ (यथा, मनुः । ९ । १९२ ।
"जनन्यां संस्थितायान्तु समं सर्व्वे सहोदराः ।
भजेरन् मातृकं रिक्थं भगिन्यश्च सनाभयः ॥")

सहोबलं, क्ली, (सहसा तेजसा सह बलमत्रेति ।) हीराख्यम् । इति केचित् ॥

सह्वोरः, त्रि, (सहते सर्व्वमिति । सह + "चिझोरादयश्च ।" उणा० १ । ६६ । इति ओरन् ।) साधुः । इत्युणादिकोषः ॥

सह्यं, क्ली, (सह्यते इति । सह + यत् ।) आरोग्यम् । साम्यम् । सुमधुरम् । इति शब्दरत्नावली ॥ (प्रियम् । यथा, महाभारते । ३ । २७७ । १० ।
"ततस्तं प्रत्युवाचाथ मारीचो राक्षसेश्वरम् ।
किन्ते सह्यं मया कार्य्यं करिष्याम्यवशोऽपि तत् ॥")

सह्यः, पुं, पर्व्वतविशेषः । इति मेदिनी ॥ (यथा, रघुः । ४ । ५२ ।
"असह्यविक्रमः सह्यं दूरात् मुक्तमुदन्वता ।
नितम्बमिव मेदिन्याः स्रस्तांशुकमलङ्घयत् ॥")
स तु पुनाख्यदेशस्य उत्तरपश्चिमदिशि वर्त्तते ॥

सह्यः, त्रि, (सोढुं शक्यः । सह + "शकिसहोश्च ।" ३ । १ । ९९ । इति यत् ।) सोढ़व्यः । सहनीयः इति मेदिनी ॥ (यथा, मार्कण्डेये । १०६ । ५६ ।
"सह्यं भवतु ते तेजो भूतानां भूतभावन ! ॥")

सा, स्त्री, गौरी । लक्ष्मीः । इति शब्दरत्नावली ॥ पूर्व्वोक्तपरामर्शविषयीभूता । प्रसिद्धा । इति स्त्रीलिङ्गतच्छब्दस्य प्रथमैकवचननिष्पन्ना । इति व्याकरणम् ॥ (यथा, साहित्यदर्पणे ।
"सङ्गमविरहविकल्पे वरमिह विरहो न सङ्गमस्तस्याः ।
सङ्गे सैव तथैका त्रिभुवनमपि तन्मयं विरहे ॥")

सांख्य, क्ली, (संख्या सम्यग्ज्ञानं सा अस्त्यस्येति संख्या + अण् ।) सम्यक् ख्यायते प्रकाश्यते वस्तुतत्त्वमनयेति संख्या सम्यक् ज्ञानं तस्यां प्रकाशमानमात्मतत्त्वं सांख्यम् । इति श्रीभगवद्गीताटीकायां श्रीधरस्वामी ॥ षड्दर्शनान्तर्गतदर्शनशास्त्रविशेषः । तत्पर्य्यायः । कापिलम् २ । इति हेमचन्द्रः ॥ यथा,—
"पञ्चमः कपिलो नाम सिद्धेशः कालविप्लुतम् ।
प्रोवाचासुरये सांख्यं तत्त्वग्रामविनिर्णयम् ॥"
इति श्रीभागवते । १ । ३ । १० ॥

अपि च मात्स्ये । ३ । २९ ।
"सांख्यं संख्यात्मकत्वाच्च
अथ सांख्यैराख्यायते परिणामवादे
आगच्छेत् कथंकारं विवर्त्तवाद
भवेदेव हि तेषामाघोषः । संक्षेप
शास्त्रे चतस्रो विधाः समाश्रये ।
रेव कश्चिद्विकृतिः प्रकृतिश्च ।
इति । तत्र केवला प्रकृतिः । प्रधान
गौया मूलप्रकृतिः । नासावन्यप्र
कृतिः । प्रकरोतीति प्रकृतिरिति
सत्त्वरजस्तमोगुणानां साम्याव
स्थानात् । तदुक्तम् ।
मूलञ्चासौ प्रकृतिश्चेति मूलप्रकृतिः
कार्य्यकलापस्यासौ मूलं न तस्य
मूलान्तरमस्ति अनवस्थापातात् ।
तुरवदनवस्थादोषो न भवति इति
प्रमाणाभावादिति भावः । प्रकृत्य
हङ्कारतन्मात्राणि । तदप्युक्तम् ।
प्रकृतिविकृतयः सप्तेति । अस्यार्थः ।
ता विकृतयश्चेति प्रकृतिविकृतयः
दीनि तत्त्वानि । तत्रान्तःकरणादि
तत्त्वमहङ्कारप्रकृतिः मूलप्रकृतेस्तु
एवमहङ्कारतत्त्वं
विकृतिः । प्रकृतिश्च तदेवाहङ्कार
सत् पञ्चतन्मात्राणां सूक्ष्माभिधान
सात्त्विकं सत् प्रकृतिरेकादशेन्द्रि
न्द्रियाणां चक्षुःश्रोत्र
कर्म्मेन्द्रियाणां
मुभयात्मकस्य मनसश्च रजस्तु
पादनद्वारेण कारणमस्तीति न
तदुक्तमीश्वरकृष्णेन ।
"अभिमानोऽहङ्कारस्तस्मात् द्विविध

एकादशकश्च गणस्तन्मात्रा पञ्चकं
सात्त्विकमेकादशकः प्रवर्त्तते वै
भूतादेस्तन्मात्रः स तामस
बुद्धीन्द्रियाणि चक्षुःश्रोत्र
वाक्पादपाणिपायूपस्थाख्यानि ॥

उभयात्मकमत्र मनः
मिन्द्रियञ्चेति । विकृतश्च तत्र
साधर्म्यवाचस्पतिभिः । [illegible]
वियदादीनि पञ्चभूतानि
च । तदुक्तं षोडशकस्तु विकार
सङ्ख्यावच्छिन्नो गणः षोडशको वि
प्रकृतिरित्यर्थः । यद्यपि पृथिव्या
दीनां प्रकृतिस्तथापि न ते
स्तत्त्वान्तरमिति न प्रकृतिः ।
दामत्वस्येव प्रकृतित्वमभिमतं
स्थूलत्वेन्द्रियग्राह्यत्वयोः समानत्वे
रत्वाभावः । तत्र
पूर्व्वपूर्व्वसूक्ष्मभूतसहितेभ्य उत्त

ोति कर्मेन्द्रियाणीति पञ्चभूतानि । इन्द्रियाणीति प्रागेवोक्ता। तदुक्तम्। ाम् महतोऽहङ्कारः तस्मात् पञ्च षोड-कादपि षोडशकात् पञ्चभ्यः पञ्चभूता- ऽनुभयात्मकः पुरुषः। तदुक्तम्। न विकृतिः पुरुष इति। पुरुषस्तु कूटस्थो परिणामी न कस्यचित्। प्रकृतिर्नापि कस्यचिदित्यर्थः। एतत्पञ्चविंशति-धकत्वेन प्रमाणत्रयमभिमतम्। तद- । दृष्टमनुमानमाप्तवचनं सर्व्वप्रमाण-ात् त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः ाद्धीति। इह कार्य्यकारणभावे चतुर्धा पत्तिः प्रसरति। असतः सज्जायत इति : प्राहुरन्ये। नैयायिकादयः सतो यते इति। वेदान्तिनः सतो विवर्त्तः ातं न वस्तु सदिति। सांख्याः पुनः सतः त इति। तत्रासतः सज्जायत इति न णिकः पक्षः। असतो निरुपाख्यस्य ाणवत् कारणत्वानुपपत्तेः तुच्छातु-च्छादात्म्यानुपपत्तेश्च। नापि सतोऽस- कारकव्यापारात् प्रागसतः शशविषाण-ना सम्बन्धलक्षणोत्पत्तेः। न हि नीलं तमेनापि पीतं कर्त्तुं पार्य्यते। ननु सत्त्वा-घटस्य धर्माविति चेत्तदचारु। असति ेि तद्धर्म्म इति व्यपदेशानुपपत्त्या धर्म्मिणः त्तेः। तस्मात् कारकव्यापारात् प्रागपि म्। सदेव सतयाभिव्यक्तिरुपपद्यते। पीड़नेन तिलेषु तैलस्य दोहनेन सौर-पयसः। असतः करणे किमपि निदर्शनं । किञ्च कार्य्येण कारणं सम्बद्धं तज्जनकं द्धं वा प्रथमे कार्य्यस्य सत्त्वमायातं सतो-म्बन्ध इति नियमात्। चरमे सर्व्वं कार्य्य- सर्व्वस्माज्जायेत असम्बद्धत्वाविशेषात्। ह्यापि सांख्याचार्य्यैः।

त्वान्नास्ति सम्बन्धः कारणैः सत्त्वसङ्गिभिः।
बद्धस्य चोत्पत्तिमिच्छतो न व्यवस्थितिः॥”

मनुष्ठेयमसम्बद्धमपि तदेव जनयति यत्र क्तं शक्तिश्च कार्य्यदर्शनोन्नेयेति तन्न संग-। तिलेषु तैलजननशक्तिरित्यत्र तैलस्या- सम्बद्धत्वासम्बद्धत्वविकल्पेन तच्छक्तिरिति रूपणायोगात् कार्य्यकारणयोरभेदाच्च। यस्य सत्त्वं कारणात् पृथक् न भवति पट-तुभ्यो न भिद्यते तद्धर्म्मत्वात् यदेवं न तदेवं । गौरश्वः। तद्धर्म्मश्च पटः तस्मान्नार्थान्तरं ि प्रत्येकं त एव प्रावरणकार्य्यं कुर्य्युरिति । संस्थानभेदेनाविर्भूतपटभावानां प्रावर-र्थक्रियाकारित्वोपपत्तेः। यथा हि। कूर्म-ङ्गानि कूर्म्मशरीरे निविशमानानि तिरो-न्ति निःसरन्ति चाविर्भवन्ति एवं कारण-वादेः पटादयो विशेषा निःसरन्त आविर्भ-ा उत्पद्यन्त इत्युच्यन्ते निविशमानास्तिरो-न्तो विनश्यन्तीत्युच्यन्ते न पुनरसतामुत्पत्तिः सतो वा विनाशः। यथोक्तं भगवद्गीतायाम्।

नासतो विद्यते भावो नाभावो विद्यते सतः।

इति। ततश्च कार्य्यानुमानात्तत्प्रधानसिद्धिः। तदुक्तम् असदकरणादुपादानग्रहणात् सर्व्वसम्भवाभावात्। शक्तस्य शक्यकरणात् कारणाभावाच्च सत्कार्य्यमिति। नापि सतो ब्रह्मतत्त्वस्य विवर्त्तः प्रपञ्चः बाधानुपलम्भात्। अधिष्ठानारोप्ययोः चिज्जडयोः कलधौतशुक्त्यादिवत् सारूप्याभावेनापि संभवाच्च। तस्मात् सुखदुःखमोहात्मकस्य तथाविधकारणमवधारणीयम्। तथा च प्रयोगः। विमतं भावजातं सुखदुःखमोहात्मककारकं तदन्वितत्वात् यत् येनान्वीयते तत्तत्कारणकं यथा रुचकादिकं सुवर्णान्वितं सुवर्णकारणकं तथा चेदं तस्मात्तथेति। तत्र जगत्कारणे येयं सुखात्मकता तत् सत्त्वम्। या दुःखात्मकता तद्रजः। या च मोहात्मकता तत्तम इति त्रिगुणात्मककारणसिद्धिः। यथा हि प्रत्येकं भावास्त्रैगुण्यवन्तोऽनुभूयन्ते यथा मैत्रदारेषु सत्यवती मैत्रस्य सुखमाविरस्ति तं प्रति सत्त्वगुणप्रादुर्भावात्तत्सपत्नीनां दुःखं ताः प्रति रजोगुणप्रादुर्भावात् तामलभमानस्य चैत्रस्य मोहो भवति तं प्रति तमोगुणसद्भावात्। एवमन्यदपि घटादिकं लभ्यमानं सुखं करोति परैरपि ह्रियमाणं दुःखं करोति उदासीनस्योपेक्षाविषयत्वेनोपतिष्ठते उपेक्षाविषयत्वं नाम मोहः मुह वैचित्त्ये इत्यस्माद्धातोर्मोहशब्दनिष्पत्तेः उपेक्षणीयेषु चित्तवृत्त्यनुदयात्तस्मात् सर्व्वं भावजातं सुखदुःखमोहात्मकं त्रिगुणप्रधानकारणकमवगम्यते। तथा च श्वेताश्वतरोपनिषदि श्रूयते।

“अजामेकां लोहितशुक्लकृष्णां
बह्वीं प्रजां जनयन्तीं सरूपाम्।
अजो ह्येको जुषमाणोऽनुशेते
जहात्येनां भुक्तभोगामजोऽन्यः॥” इति॥

अत्र लोहितशुक्लकृष्णशब्दा रञ्जकत्वप्रकाशकत्वावरकत्वसाधर्म्म्यात् रजःसत्त्वतमोगुणत्वप्रतिपादनपराः। नन्वचेतनं प्रधानं चेतनानधिष्ठितं महदादिकार्य्ये न व्याप्रियते अतः केनचित् चेतनाधिष्ठात्रा भवितव्यम्। तथा च सर्व्वार्थदर्शी। परमेश्वरः लोककर्त्तव्यः स्यादिति चेत्। तदसङ्गतौ अचेतनस्य। यथा वत्सविवृद्ध्यर्थमचेतनं क्षीरं प्रवर्त्तते। यथा च जलमचेतनं लोकोपकाराय प्रवर्त्तते। तथा च प्रकृतिरचेतनापि पुरुषविमोक्षाय प्रवर्त्स्यतीति। तदुक्तम्। वत्सविवृद्ध्यर्थं क्षीरस्य यथा प्रवृत्तिरेतस्याः पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्येति। यत्तु परमेश्वरः करुणया प्रवर्त्तक इति परमेश्वरास्तित्ववादिनां डिण्डिमः स प्रायेण गतः विकल्पानुपपत्तेः। स किं सृष्टेः प्राक् प्रवर्त्तते सृष्ट्युत्तरकालं वा। आद्ये शरीराद्यभावेन दुःखानुपपत्तौ जीवानां दुःखप्रहाणेच्छानुपपत्तिः। द्वितीये परस्पराश्रयप्रसङ्गः। करुणया सृष्टिः सृष्ट्या कारुण्यमिति तस्मादचेतनस्यापि चेतनानधिष्ठितस्य प्रधानस्य महदादिरूपेण परिणामः पुरुषार्थप्रयुक्तप्रधानपुरुषसंयोगनिमित्तः। यथा। निर्व्यापारस्याप्ययस्कान्तसन्निधानेन लौहितस्य व्यापारः। तथा निर्व्यापारस्य पुरुषस्य सन्निधानेन प्रधानव्यापारो युज्यते। प्रकृतिपुरुषसम्बन्धश्च पङ्ग्वन्धवत् परस्परापेक्षानिबन्धनः। प्रकृतिर्हि भोग्यतया भोक्तारं पुरुषमपेक्षते। पुरुषोऽपि भेदाग्रहाद्बुद्धिच्छायापत्त्या तद्गतं दुःखत्रयं वारयमाणः कैवल्यमपेक्षते। तत्प्रकृतिपुरुषविवेकनिबन्धनः। न च तदन्तरेण युक्तमिति कैवल्यार्थं पुरुषः प्रधानमपेक्षते। यथा खलु कौचित् पङ्ग्वन्धौ पथि सार्थेन गच्छन्तौ दैवकृतादुपप्लवात् परित्यक्तसार्थौ मन्दमन्दमितस्ततः परिभ्रमन्तौ भयाकुलौ दैववशात् संयोगमुपगच्छेताम्। तत्र चान्धेन पङ्गुः स्कन्धमारोपितः पङ्गुदर्शितेन मार्गेणान्धः समीहितं स्थानं प्राप्नोति पङ्गुरपि स्कन्धाधिरूढः तथा परस्परापेक्षप्रधानपुरुषनिबन्धनः सर्गः पुरुषस्य दर्शनार्थं कैवल्यार्थतया प्रधानस्य पङ्ग्वन्धवत् उभयोरपि सम्बन्धस्तत्कृतः सर्गः इति। ननु पुरुषार्थनिबन्धना भवतु प्रकृतेः प्रवृत्तिः निवृत्तिस्तु कथमुपपद्यते इति चेदुच्यते यथा भर्त्रा दृष्टदोषा स्वैरिणी पुनर्भर्त्तारं नोपैति यथा वा कृतप्रयोजना नर्त्तकी नर्त्तने तथा प्रकृतिरपि यथोक्तं रङ्गस्य दर्शयित्वा निवर्त्तते नर्त्तकी यथा नृत्यात् पुरुषस्य तथात्मानं प्रकाश्य निवर्त्तते प्रकृतिरिति। तदयं निरीश्वरसांख्यशास्त्रप्रवर्त्तककपिलानुसारिणां मतमुपन्यस्तम्। इति माधवाचार्य्यकृतसर्व्वदर्शनसंग्रहे सांख्यदर्शनम्॥ अस्य चत्वारः अध्यायाः। तत्र प्रकृतिपुरुषयोरुभयोः सृष्टिकर्त्तृत्वं अन्धपङ्गुन्यायेन स्थापितम्। तत्त्वानां संख्यानञ्च कृतम्। इति केचित्॥

सांघातिकः, त्रि, (संघाते साधुः) संघात+“गुडादिभ्यष्ठञ्।” ४।४।१०२। इति ठञ्।) सम्यक्प्रकारेण हननकारकः। मारात्मकः॥ जन्मनक्षत्रावधिकषोड़शनक्षत्रम्। यथा,—

“जन्माद्यं कर्म्म ततोऽपि दशमं सांघातिकं
षोड़शमम्॥”

तत्फलम्।

“देहद्रविणबन्धूनां हानिः सांघातिके तथा।”
इति ज्योतिस्तत्त्वम्॥

सांदृष्टिकं, क्ली, (संदृष्टौ प्रत्यक्षे भवम्। संदृष्टि+ठञ्।) सद्यःफलम्। इत्यमरः॥ दृष्टिपरिकल्पनान्यायः। यथा। दौहित्रान्तस्वसन्तानाभावे पितुरधिकारवत् दौहित्रान्तपितृसन्तानाभावे पितामहाधिकारस्य सांदृष्टिकन्यायसिद्धत्वाच्च। यथा पित्रभावे माता तथा पितामहाभावे पितामहीति सांदृष्टिकन्यायेन पितामह्यधिकारस्य सिद्धत्वाच्च। इति श्रीकृष्णतर्कालङ्कारकृतक्रमसंग्रहः॥

सांयात्रिकः, पुं, (संयात्रा द्वीपान्तरगमनम् । सा प्रयोजनमस्येति । संयात्रा + "तदस्य प्रयोजनम् ।" इति ठञ् ।) पोतवणिक् । इत्यमरः । १ । १० । १२ ॥ द्वे वहित्रगामिनि वणिग्जने । संपूर्व्वो यातिर्द्वीपान्तरगमनवृत्तिस्ततस्त्रास-सिति त्रः स्त्रियामाप् संयात्रा द्वीपान्तरगमनं तदस्य प्रयोजनमिति विकारसंघेति ष्णिकः । सम्यक् यात्रा संयात्रा तया व्यवहरतीति ढघेकादिति ष्णिको वा । इति भरतः ॥ (यथा, हरिवंशे । ५८ । १४ ।
"सिद्धिः सांयात्रिकाणान्तु वेला त्वं सागरस्य च ॥")

सांयुगीनः, त्रि, (संयुगे साधुः । संयुग + "प्रतिजनादिभ्यः खञ् ।" ४ । ४ । ९९ । इति खञ् ।) युद्धकुशलः । रणे साधुः । इत्यमरः । २ । ८ । ७७ ॥ (यथा, रघुः । ११ । ३० ।
"इत्यपास्तमखविघ्नयोस्तयोः
सांयुगीनमभिनन्द्य विक्रमम् ।
ऋत्विजः कुलपतेर्यथाक्रमं
वाग्यतस्य निरवर्त्तयन् क्रियाः ॥")

सांराविणं, क्ली, (सं + रु ध्वनौ + "अभिविधौ भावे इनुण् ।" ३ । ३ । ४४ । इति इनुण् । "अणिनुणः ।" ५ । ४ । १५ । इति स्वार्थे अण् ।) हट्टस्य सम्यक् शब्दः । इति मुग्धबोधव्याकरणम् ॥ संपूर्व्व रु ध्वनौ भावे णिनि णित्वाद्वृद्धौ संराविण इति स्थिते ततः स्वार्थे ष्णे णित्वे विराधच इति वृद्धौ यवोर्लोप इत्यकारलोपे सांराविणं हट्टस्य सम्यक् शब्दो व्याप्त इत्यर्थः । इति तट्टीकायां दुर्गादासः ॥ (यथा, अनर्घराघवे । ७ । ५७ ।
"यं दोर्मात्रपरिच्छदो युधि मुदोत्क्षिप्य मनीच्छभुजः
संरेने दशभिर्निजैरपि मुखैः सांराविणं रावणः ॥")

सांवत्सरः, पुं, (संवत्सरं तज्ज्ञानोपयोगि शास्त्रं वेत्ति अधीते वा । संवत्सर + अण् ।) गणकः । इत्यमरः । २ । ८ । १४ ॥ (यथा, बृहत्संहितायाम् । २ । १०—११ ।
"मुहूर्त्तं तिथिनक्षत्रमृतवश्चायने तथा ।
सर्व्वाण्येवाकुलानि स्युर्न स्यात् सांवत्सरो यदि ॥
तस्माद्राज्ञाभिगन्तव्यो विद्वान् सांवत्सरोऽग्रणीः ।
जयं यशः श्रियं भोगान् श्रेयश्च समभीप्सता ॥"
अस्य लक्षणादिकं तत्रैव २ अध्याये विशेषतो द्रष्टव्यम् ॥ ॥ क्ली, पर्व्वणि च क्ली । इति पाणिनिः । ४ । ३ । १६ ॥ संवत्सरस्येदमिति । अण् ।) संवत्सरसम्बन्धिनि, त्रि ॥ (यथा, हरिवंशे । १४० । १ ।
"स सांवत्सरदीक्षायां दीक्षितः पट्पुरार्थये ।
आरभतादिमं लोके पुनश्चा मुनिसुष्टया ॥")

सांवत्सरिकः, त्रि, (संवत्सर + "कालात् ठञ्" ४ । ३ । ११ । इति ठञ् ।) संवत्सरे भवः । संवत्सरं व्याप्य भूतः । प्रतिवर्षकर्त्तव्यश्राद्धम् । यथा, अथ सांवत्सरिकश्राद्धम् । तत्र गोभिलः । अत ऊर्द्ध्वं संवत्सरे संवत्सरे प्रेतायान्नं दद्यात् यस्मिन्नहनि प्रेतः स्यात् इति । अत ऊर्द्ध्वं सपिण्डीकरणान्तश्राद्धनिमित्ताद्यसंवत्सरादूर्द्ध्वं संवत्सरे संवत्सरे प्रतिवर्षं यस्मिन्नहनि मृतस्तस्मिन्नहनि मृताय दद्यात् । व्यासः । प्रतिसंवत्सरञ्चैवमेकोद्दिष्टं मृताहनि । एतेन सपिण्डीकरणापकर्षे आद्यसंवत्सरेऽपि मृताहे श्राद्धान्तरं कर्त्तव्यमिति मैथिलोक्तं हेयम् । यत्तमाह हेमाद्रिधृतं वचनम् ।
"पूर्णे संवत्सरे श्राद्धं षोडशं परिकीर्त्तितम् ।
तेनैव च सपिण्डत्वं तेनैवाब्दिकमिष्यते ॥"
अत्र पूर्णसंवत्सरक्रियमाणश्राद्धद्वयस्योभयनिर्व्वाहस्तथापकृष्ट-सपिण्डीकरणश्राद्धादप्युभयनिर्व्वाहो न पूर्णसंवत्सरे आब्दिकान्तरम् । एवं पञ्चदशश्राद्धेऽप्ययम् । मत्स्यपुराणम् ।
"ततः प्रभृति संक्रान्तावुपरागादिपर्व्वसु ।
त्रिपिण्डमाचरेत् श्राद्धमेकोद्दिष्टं मृताहनि ॥"
ततः प्रेतत्वपरीहारात् त्रिपिण्डं त्रैपुरुषम् । निरुपपदमृताहशब्दः मृतसम्बन्धिमासपक्षतिथिविशेषपरः । उपपदात्तु क्वचित्तिथिविशेषमात्रपरः । यथा मृताहे प्रतिमासं कुर्य्यादित्यादौ । शङ्खः ।
"सपिण्डीकरणादूर्द्ध्वं यत्र यत्र प्रदीयते ।
तत्र तत्र त्रयं कुर्य्यात् वर्जयित्वा मृताहनि ॥
अमावास्यां क्षयो यस्य प्रेतपक्षेऽथवा पुनः ।
सपिण्डीकरणादूर्द्ध्वं तस्योक्तः पार्व्वणो विधिः ॥"
त्रयं सम्प्रदानानां त्रयं कुर्य्यात् त्रिभ्यो दद्यात् इत्यर्थः । मृताहपर्य्युदस्तत्रिदैवतत्वस्य प्रतिप्रसवमाह । अमावास्यामिति । प्रेतपक्षोऽत्र पितृपक्षः आश्वयुक्कृष्णपक्ष इति यावत् । न तु कृष्णपक्षमात्रं कृष्णपक्षसामान्यपरत्वे अमावास्यापदवैयर्थ्यापत्तेः ॥ ॥ पितृपक्षं विशेषयति हेमाद्रिमाधवाचार्य्यधृतं नागरखण्डम् ।
"नभो वाथ नभस्यो वा मलमासो यदा भवेत् ।
सप्तमः पितृपक्षः स्यादन्यत्रैव तु पञ्चमः ॥"
अत्र श्रावणभाद्रयोरन्यतरस्य मलमासत्वे आषाढ्यपेक्षया सप्तमपक्षस्य पितृपक्षत्वात् । अत्र मृतस्यैव प्रेतपक्षमृतत्वं न तु मलमासमाद्यकृष्णपक्षमृतस्य । ततश्च तत्र मृतस्य वर्षान्तरे आश्वयुक्कृष्णपक्षेऽपि तच्छ्राद्धकरणे न पार्व्वणम् । किन्त्वेकोद्दिष्टमिति । अत्र पार्व्वणो विधिः पार्व्वणेतिकर्त्तव्यताकैकोद्दिष्टविधिरिति नव्यवर्द्धमानप्रभृतयः । तत्पूर्व्ववचनोक्तत्रैपुरुषिकस्य मृताहे पर्य्युदस्तस्य पार्व्वणो विधिरित्यनेन प्रतिप्रसवात् । तस्मादत्र सदैवतैकोद्दिष्टं न युक्तं किन्तु त्रैपुरुषिकं न तु मातृपुरुषिकम् ।
"कर्षूसमन्वितं मुक्त्वा तथाद्यं श्राद्धषोडशम् ।
प्रत्याब्दिकञ्च शेषेषु पिण्डाः स्युः षडिति स्थितिः ॥"
इति छन्दोगपरिशिष्टवचनेन प्रत्याब्दिकश्राद्धतिरेकेण षट्संख्यानियमात् ॥ ॥
वास्त्वादिमरणनिमित्तेन [illegible]
पार्व्वणविधिनैव ।
"अपुत्रा ये मृताः केचित् [illegible]
तेषामपि च देयं स्यादेकोद्दिष्टं न पार्व्वणम् [illegible]
इत्यापस्तम्बवचने अपुत्रा इति [illegible]
पादानात् सपुत्राणां [illegible]
एतच्च मात्रादित्रितयदैवतं पार्व्वणम् ।
"पितामहं प्रपितामहं च [illegible]
भोजयित्वा इत्यष्टकायां तथा दर्शनात् [illegible]
सानदिननिमित्तेन [illegible]
मात्रादित्रिकाणां श्राद्धं कर्त्तव्यम् ।
पृथग्दद्यादथ मात्रादिनाहते । [illegible]
शिष्टवचने विशेषतः प्रतिप्रसवात्
करणेऽपि । एतच्च मृताहपार्व्व-
णेव । तथा च हेमाद्रिधृतं
"सपिण्डीकरणादूर्द्ध्वं पितॄणामेव [illegible]
पितृभ्रातृमातृणामेकोद्दिष्टं सदा [illegible]
मातृपदं सपत्नीमातृपरम् ।
मातृपदस्य राजदन्तादित्वात् [illegible]
ततश्च वाक्ये मातृसपत्नीति न [illegible]
सपत्नीमातरित्यादिकम् ॥ ॥ एवं [illegible]
क्षेत्रजाभ्यां मृताहे पार्व्वणं कार्य्यम् ।
"औरसक्षेत्रजौ पुत्रौ विधिना पार्व्वणेन [illegible]
प्रत्यब्दमितरे कुर्य्युरेकोद्दिष्टं मृताहनि [illegible]
इति जाबालवचनस्य ।
"यत्र यत्र प्रदातव्यं सपिण्डीकरणात् [illegible]
पार्व्वणेन विधानेन देयमग्निमता [illegible]
इति मत्स्यपुराणवचनस्य चैकशाखत्व [illegible]
उपनाय ।
"प्रत्यब्दं दर्शवच्छ्राद्धं साग्निः कुर्व्वीत [illegible]
एकोद्दिष्टं [illegible]
अत्र प्रागुक्तयुक्त्या प्रेतश्राद्धस्य [illegible]
भिधानात् सांवत्सरिकश्राद्धे [illegible]
तत् प्रेतश्राद्धधर्मप्राप्त्यर्थम् । [illegible]
त्वादेकार्घ्यादिलाभः । न तु यथा [illegible]
पितृशब्दस्थाने प्रेतपदोहः तथा
वाच्यं [illegible]
प्रपत्तेः । एवं प्रतिसांवत्सरिकश्राद्धे [illegible]
पदं आगो प्रार्थन शेषभोजनञ्च [illegible]
रजस्वलायां विशेषयति गौतमः ।
"अपुत्रा तु यदा भार्य्या सम्प्राप्ते भर्त्तु [illegible]
रजस्वला भवेत् सा तु कुर्य्यात् तत् [illegible]
कुर्य्याच्छ्राद्धमिति शेषः । [illegible]
एकोद्दिष्टं दैवहीनेन विधानेन [illegible]
"एकोद्दिष्टं कर्त्तव्यं पाकेनैव सदा [illegible]
अभावे पाकपात्राणां तदहः समुपोषणम् [illegible]
इति लघुहारीतः [illegible]
पाकपात्राभावः पाकपात्रसत्त्वे [illegible]
तदापि नामश्राद्धं किन्तूपोषणमेव [illegible]
मित्यर्थः । उपयमित्यभिधानात् [illegible]

ःहेणा कार्य्यमित्यर्थः । एतच्च उपवासिभिर्
ःक्षोभिन तदन्तरमप्राप्यविषेण वा तत-
त्रतः श्राद्धविदं इत्यादिवचनादपि नैवा-
ात्रमन्तरमिति तच्च । पितृदेवं रक्षोन्तं
ादन्तं तदनन्तरस्य बलत्वात् । अन्यथा
ामाद्याधिकारिण: कदाचिदपालं ।
ःदैवानि न दोषस्ते प्रेतश्राद्धानि पोडश ।
ाचलं भवं तस्य दत्तैः श्राद्धशतैरपि ॥"
एतद्वचनेन पोडशश्राद्धाभावे प्रेतत्वपरो-
ो न स्यात् । तस्मादुपवासो न श्राद्धार्थः
स्तु तदामीमांसाकारमप्रायश्चित्तार्थः । यथा
ामात्ततर्पस्कारं प्रायश्चित्तं कृत्वा कामा-
: तत्करणं तथापि तद्दिने उपवासं
ा एकादश्यां श्राद्धं कर्त्तव्यमिति । एकोद्दिष्टं
यद्वारा कार्य्यमित्यत्रापि गोत्रजेतरत्वेन
ावणीयम् ।
तदाचित् सगोत्राय श्राद्धं कार्य्यमगोत्रजैः ।"
इति प्रेतश्राद्धे ब्रह्मपुराणात् ।
र हि नागोत्रजस्य श्राद्धकर्त्तृत्वं निषिध्यते,
ाविल्वमव्याप्तेः । तस्मात् सगोत्रैर्दार-
ः सगोत्राय श्राद्धं न कार्य्यमित्यर्थः । तथा
पर्य्युदासपक्षे गोत्रजद्वारा कारयितव्यमिति
यक्षमेव । प्रसज्यपक्षे तु सगोत्रत्वविशेषण-
ात् गोत्रजलाभः । प्रेतश्राद्धधर्म्मप्राप्तिवात्
यत्सरिकमपि तथेति श्राद्धविवेकः । वाच्य-
ःरत्नाकरयोस्तु स्वगोत्रायेति पठितं स्वमा-
ायं गोत्रं यस्य स स्वगोत्र: विद्यमानगोत्र
ार्थः । यस्मै श्राद्धं कर्त्तव्यं तस्य स्वगोत्रमि
यमानेऽन्यगोत्रजेन संघातान्तर्गतेन श्राद्धा
ाद्धं न कारयितव्यमिति व्याख्यातञ्च । एतन्मते
र दुहित्रादीनामसगोत्रत्वेऽपि न निषेधः ।
तुनस्तु तत्पाठेऽपि कर्म्मधारयापेक्षया बहु-
ाहिर्लघुत्वात् स्वमात्मीयञ्च तत् गोत्रञ्चेति
ःस्मै अन्यगोत्रजद्वारा श्राद्धं न कार्य्यमित्यर्थः ।
ती लघुहारीतवचने स्वयं पदं स्वगोत्रपरम् ।
यथा ब्रह्मपुराणोक्तागोत्रजपदवैयर्थ्यापत्तेः ॥०
ञ्च भविष्यपुराणप्रभासखण्डयोः ।
ातादनि पितुर्य्यस्तु न कुर्य्यात् श्राद्धमादरात् ।
ातुश्चैव वरारोहे वत्सरान्ते मृताहनि ।
ाहन्तस्य महादेवि ! पूजां गृह्णामि नो हरिः ॥"
ारीचिः ।
पण्डिता मानिनो मूर्खाः स्त्रियोऽथ ब्रह्म-
चारिणः ।
ातादं समतिक्रम्य चाण्डालेष्वभिजायते ॥"
ात्याभ्यां कालमाधवीयधृताभ्यां वचनाभ्यां
ांवत्सरिकश्राद्धस्य मृताहकर्त्तव्यत्वेनावश्यक-
ात् भविष्यमृताहे स्वयं कर्त्तव्यत्वसम्भावना-
ाहितेन मृताहात् पूर्व्वकालेऽपि प्रतिनिधीयते ।
'प्रक्षिप्याग्निं स्वदारेषु परिकल्पर्त्विजं तथा ।
ावसेत् कार्य्यवान् विप्रो ह्यथैव न चिरं क्वचित् ॥'
इति छन्दोगपरिशिष्टोक्तसायंप्रातर्होमप्रति-
नधिवत् । एवं सति प्रतिनिध्यकरण एव एका-

दर्शो विधत्ते ॥ * ॥ न च पाकस्याद्वल्वेन
प्रधाननिविधिकर्त्तव्यतानियम इति वाच्यम् ।
"एतोपवासनियमे घटिकैका यदा भवेत् ।
सा तिथि: सकला ज्ञेया पित्रर्थे चापराह्णिकी ॥"
इति वचनेन मुख्यकर्म्मासम्भवेऽपि कर्म्मलोप-
दोषात् तदानीं पाके सदसम्भवात् । एवमुद्दो-
ष्याद्दौपभोजनेऽपि न तन्नियमः । इति श्राद्ध
तत्त्वम् ॥ (गर्त्ते, पुं । यथा, बृहत्संहितायाम् ।
२ । १२ ।
"सांवत्सरिके देशे वस्तव्यं भूतिमिच्छता ।
चक्षुर्भूतो हि यत्रैव पापं तत्र न विद्यते ॥")
सांवादिकः, पुं, (सम्यक् वादाय प्रभवतीति ।
संवाद + ठञ् ।) नैयायिकः । यथा,—
"नैयायिक-सांवाद: स्यात्सांवादिक आहितः ॥"
इति जटाधरः ॥
संवाददातरि, त्रि ॥
सांशयिकः, त्रि, (संशयमापन्नः । संशय +
"संशयमापन्नः ।" ५ । १ । ७३ । इति ठञ् ।)
संशययुक्तः । तत्पर्य्यायः । संशयापन्नमानसः २
इत्यमरः । ३ । १ । ५ ॥ सन्दिहानः ३ । इति
जटाधरः ॥ द्वे संशयविषये स्याण्वादौ । संशय-
मापन्न: सांशयिक: स्थाणु: संशयमापन्नं मानसं
यत्र स्थाण्वादौ स तथा । संशयमापन्नं मानसं
यस्य स तथेति पदान्तपदार्थत्वे संशयितरि
पुरुषादावप्येतच्छब्दद्वयप्रवृत्तिः स्यादिति
भरतः ॥ (संशयविषयकः । यथा, मार्कण्डेये ।
१० । ४५ ।
"तद्ब्रूहि त्वं महाभाग यत् ते सांशयिकं
हृदि ॥")
सांस्थानिकः, त्रि, (संस्थाने व्यवहरतीति । संस्थान
+ "कठिनान्तप्रस्तारसंस्थानेषु व्यवहरति ।" ४ ।
४ । ७२ । इति ठक् ।) समानदेशीयः । इति
सिद्धान्तकौमुदी ॥ संस्थानयुक्तश्च ॥
सांसायिणं, क्ली, हस्तस्य हस्तं व्याप्य सम्यक् स्रावः ।
इति संक्षिप्तसारोणादिवृत्तिः ॥
साकं, व्य, सहार्थम् । इत्यमरः । ३ । ४ । ४ ॥
(यथा, कथासरित्सागरे । ४ । १३६ ।
"अहं जनन्या गुरुभिश्च साक-
मासाद्य लक्ष्मीमयमं चिराय ॥")
साकल्यं, क्ली, (सकल + भावे ष्यञ् ।) समुदायः ।
सकलस्य भावः । (यथा, मनुः । १२ । २५ ।
"यो यदैषां गुणो देहे साकल्येनातिरिच्यते ।
स तदा तद्गुणप्रायं तं करोति शरीरिणम् ॥")
साकारः, त्रि, (आकारेण सह वर्त्तमानः ।)
आकारविशिष्टः यथा,—
"साकारञ्च निराकारं सगुणं निर्गुणं प्रभुम् ।
सर्व्वाधारञ्च सर्व्वञ्च स्वेच्छारूपं नमाम्यहम् ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे । ३२ । ३१ ॥
साकुरुण्डः, पुं, (सकुरुण्ड एव । स्वार्थे अण् ।)
वृक्षविशेषः । सकुरुण्डर इति गुर्ज्जरदेशीय-
भाषा । तत्पर्य्यायः । ग्रन्थिफलः २ विकटः ३
वस्त्रभूषणः ४ कुरुण्डः ५ कर्व्वुरफलः ६ सकु-

रुण्डः ७ । अस्य गुणाः । कषायत्वम् । रुचि-
कारित्वम् । दीपनत्वम् । मारकत्वम् । श्लेष्मान-
नाशित्वम् । वस्त्ररञ्जनकत्वम् । लघुत्वञ्च । इति
राजनिर्घण्टः ॥
साकेतं, क्ली, अयोध्यानगरम् । इति शब्दरत्ना-
वली ॥ (यथा, रघुः । ५ । ३१ ।
जनस्य साकेतनिवासिनस्तौ
द्वावप्यभूतामभिनन्द्यसत्त्वौ ॥")
साक्तुकः, पुं, (सक्तुषु साधुः । सक्तु + "गुडादिभ्य-
ष्ठञ् ।" ४ । ४ । १०३ । इति ठञ् ।) यवः ।
इति सिद्धान्तकौमुदी ॥ (सक्तूनां समूहः ।
सक्तु + "अचित्तहस्तिधेनोष्ठक् ।" ४ । २ । ४७ ।
इति ठक् ।) सक्तुसमूहे, क्ली । सक्तुसम्बन्धिनि,
त्रि ॥ (सक्तवे प्रभवतीति । "तस्मै प्रभवति
संतापादिभ्यः ।" ५ । १ । १०१ । इति ठञ् ।
सक्तुसमर्थे च त्रि ॥)
साक्षरं, त्रि, अक्षरयुक्तम् । अक्षरेण सह वर्त्त-
मानम् । इति बहुव्रीहिसमासनिष्पन्नम् ॥
साक्षात्, व्य, प्रत्यक्षम् । (यथा, कुमारे । ६ । २२ ।
"साक्षात् दृष्टोऽसि न पुनर्विद्मस्त्वां वयमञ्जसा
प्रसीद कथयात्मानं न धियां पथि वर्त्तसे ॥")
तुल्यम् । इत्यमरः । ३ । ३ । २४ ॥
साक्षी, [न्] त्रि, (अक्ष्णा दर्शनेन्द्रियेण सह
वर्त्तमानं तत् यत् साक्षं प्रत्यक्षज्ञानम् । तद-
स्यास्तीति । साक्ष + इनिः ।) द्रष्टा । इति
हेमचन्द्रः ॥ तत्पर्य्यायः । प्रत्यक्षदर्शनः २ । इति
शब्दमाला ॥ तस्य मिथ्याकथने अकथने च
दोषो यथा, महाभारते आदिपर्व्वणि ।
"पृष्टो हि साक्षी यः साक्ष्यं जानन्नप्यन्यथा
वदेत् ।
स पूर्व्वानात्मनः सप्त कुले हन्यात्तथापरान् ॥
यश्च कार्य्यार्थतत्त्वज्ञो जानन्नपि न भाषते ।
सोऽपि तेनैव पापेन लिप्यते नात्र संशयः ॥"
अपि च ।
"ब्रह्मस्वस्यापहारी च मिथ्यासाक्ष्यप्रदायकः ।
मित्रद्रोही कृतघ्नश्च हयवाहकसूपकृत् ॥
एते महापातकिनस्त्रिषु लोकेषु निन्दिताः ।
कालसूत्रे च नरके पतन्ति ब्रह्मणः शतम् ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे । ४४ । ५० ; ५४ ॥
अपरञ्च ।
"मिथ्यासाक्ष्यं यो ददाति कामात् क्रोधात्तथा
भयात् ।
सभायां पाक्षिकं वक्ति स कृतघ्न इति स्मृतः ॥
मिथ्यासाक्ष्यं पाक्षिकं वा भारते वक्ति यो नृप
यावदिन्द्रसहस्रञ्च सर्पकुण्डे वसेद्ध्रुवम् ॥
सन्ततं वेष्टितैः सर्पैर्भीतश्च भक्षितस्तथा ।
भुङ्क्ते च सर्पविण्मूत्रं यमदूतेन ताडितः ॥
कृकलासो भवेत्तत्र भारते सप्तजन्मसु ।
सप्तजन्मसु मण्डूकः पितृभिः सप्तभिः सह ॥
ततो भवेच्च वृक्षश्च महारण्ये च शाल्मलिः ।
ततो भवेन्नरो मूकस्ततः शूद्रस्ततः शुचिः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४८ अध्यायः ॥ *

सर्व्वशरीरेषु श्रीकृष्णस्य साक्षिरूपत्वं यथा,—
"स्थूलात् स्थूलतरं प्राप्तमतिसूक्ष्ममदर्शनम् ।
स्थितं सर्व्वशरीरेषु साक्षिरूपमदृश्यकम् ।
शरीरवन्तं सगुणमशरीरं गुणोत्करम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे । ८।९४-९५॥
(पुं, विष्णुः । इति महाभारतम् । १३।१४९।१५॥)

साक्ष्यं, क्लौ, (साक्षिणो भावः कर्म्म वा । साक्षिन्+ष्यञ् । यद्वा, साक्षिणि भवम् । साक्षिन्+"दिगादिभ्यो यत् ।" ४।३।५४। इति यत् ।) साक्षिकर्म्म । यथा । मनुः ।
"समक्षदर्शनात् साक्ष्यं श्रवणाच्चैव सिध्यति ।"
एतत् प्रमाणमात्रोपलक्षणम् ।
"अनुभावी च यः कश्चित् कुर्य्यात्साक्ष्यं विवादिनाम् ।"
इति तद्वचनान्तरात् ॥
अतएवाकृतमपि साक्षिणमाह । मनुः ।
अन्यच्च ते प्रवक्ष्यामि महाश्चर्य्यं शृणुष्व
मम भक्ताय पश्यन्ति तिष्ठन्तो हि वसुन्ध
मधुमत्स्यसहस्राणि कोट्यो धम्र्देहि व
चिपि: पिण्डञ्च तन्मध्ये येन येन विदि
पञ्चास्य स्वनमत्स्यो भूमिचक्रे च अदृश्य
तावत् वधिर मत्स्यानि यावत्तेन न दृश्य
तत्र रामसरं नाम तस्मिन् क्षेत्रे परं
अगाधञ्चाप्यपारञ्च रक्तपद्मविभूषितम्
तत्र स्नानन्तु कुर्व्वीत एकरात्रोषितो नर:
कुधस्य भवनं गत्वा मोदते नात्र संशय:
यद प्राणान् प्रमुच्येत तस्मिं रामसरे
कुधस्य भवनं त्यक्ता मम लोकञ्च गच्छति
तत्र रामसरे भूमि महाश्चर्य्यं शृणुष्व
मनुजाश्चात्र पश्यन्ति मम कर्म्मगतं

र: कोमिलिमशं बहुगुल्मलताकुलम् ।
ोऽहं रमणीयञ्च जम्बेवापि संहतम् ॥
मृदाक्लिपदानि द्योतयन्ति दिशो दश ।
न्मु हरन्ति मितभिषं रक्तमयं तथा ॥
सङ्गमं नाम गुह्यं हि परं मम ।
ऽैल तु पार्श्वेन मम चैतच्च सुन्दरि ॥
कुल्यं महाभागे पर्वते च समाश्रितम् ।
ा यत्र पर्वतेव स्कृता सुपवनमश्रिता ॥
। स्नानञ्च कुर्व्वीत पञ्चकामोपितो नर: ।
ग्लोकं समासाद्य मोदते नात्र संशय: ॥
ा प्राणान् प्रमुञ्चेत तत्र सङ्गमके मम ।
ग्णा समनुज्ञातो मम लोकञ्च गच्छति ॥
ाचर्य्यं महाभागे रम्ये सङ्गमके शृणु ।
ना यानि पश्यन्ति घोरं संसारमोक्षणम् ॥
ुर्व्विंशतिद्वादश्यां सा धारा पृथक्स्रवति ।
थाङ्के पतते भूमि यावत् सूर्य्य: स तिष्ठति ॥
ाहत्ते तु मध्याह्ने सा धारा न पतद्भुवि ।
ं तत्र महाचर्य्यं पुण्ये सङ्गमके मम ॥"
ति वाराहे सानन्दूरमाहात्म्यनामाध्याय: ॥
ानसि:,पुं, (मन्यते दीयते दक्षिणार्थमिति ।
ु दाने + "सानसिवर्णसीति ।" उणा० ४ ।
०७ । इति असिप्रत्ययेन साधु: ।) सुवर्णं: ।
ुणादिकोष: ॥ (संभजनीये, त्रि । यथा,
ग्वेदे । १० । १४० । ४ ।
"पृणक्षि सानसिं क्रतुम् ॥"
ानसिं संभजनीयं क्रतुं कर्म्म पृणक्षि
स्माभि: संपर्च्चयसि फलेन वा संयोजयसि ॥"
ति तद्भाष्ये सायण: ॥)
ानिका,स्त्री,(सनति सुस्वरमिति । षणुदाने +
ुल् । टापि अत इत्वम् ।) वंशी । इति शब्द-
त्नावली ॥
ानु:,पुं,क्ली,(सन्यते सेव्यते मुनिप्रभृतिभिरिति
न सेवायाम् + "दृसनिजनीति ।" उणा० १।
। इति ञुण् ।)पर्व्वतसमभूभाग: । तत्पर्य्याय:।
ु: २ प्रस्थ: ३ । इत्यमर: । २।३।५ ॥ (यथा,
ामायणे । २ । ३१ । २७ ।
'भवांस्तु सह वैदेह्या गिरिसानुषु रंस्यते ।
अहं सर्व्वं करिष्यामि जाग्रत: स्वपतश्च ते ॥")
ानम् । वात्या । मार्ग: । अपम् । कोविद: ।
इति मेदिनी ॥ अर्क: । पल्लव: । इति जटाधर: ॥
ानुजं, क्ली, (सानौ जायते इति । जन् + ड: ।)
प्रपौण्डरीकम् । इति राजनिर्घण्ट: ॥
ानुज:, पुं, (सानौ पर्व्वतप्रस्थे जायते इति ।
जन + ड: ।) तुम्बुरुवृक्ष: । इति राजनिर्घण्ट: ॥
अनुजेन सह वर्त्तमाने सानुजाते च त्रि ॥
ानुमान्, [त्] पुं, (सानुर्विद्यतेऽस्येति । सानु +
मतुप् ।) पर्व्वत: । इति हेमचन्द्र: ॥ (यथा,
रघु: । ८ । ८० ।
"न पृथग्जनवच्छुचो वशं
वशिनामुत्तम ! गन्तुमर्हसि ।
द्रुमसानुमतां किमन्तरं
यदि वायौ द्वितयेऽपि ते चला: ॥"

वाच्यलिङ्गेऽपि दृश्यते । यथा, रामायणे । २ ।
४८ । १० ।
"आपगाश महानद्य: सानुमन्तश्च पर्व्वता: ॥")
सानेयिका,स्त्री, (सानेयी + स्वार्थे कन् ।)वंशी ।
इति शब्दरत्नावली ॥
सानेयी, स्त्री, वंशी । इति शब्दरत्नावली ॥
सान्तपनं,क्ली,(सन्तपतीति । सम् + तप + ल्यु: ।
तत: स्वार्थे अण् ।) व्रतविशेष: । इत्यमर: ।२।
७ । ५२ ॥ यथा,—
"गोमूत्रं गोमयं क्षीरं दधि सर्पि: कुशोदकम् ।
एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतम् ॥"
इति मानवे ११ अध्याय: ॥
गोमूत्रमिति । गोमूत्रादि एकीकृत्य एकस्मिन्न-
हनि भक्षयेत् नान्यत् किञ्चिदद्यात् अपरदिने
चोपवास: । इत्येतत् सान्तपनं कृच्छ्रं स्मृतम् ।
यदा तु गोमूत्रादिषट् प्रत्येकं षड्दिनानुप-
भुज्यते सप्तमे दिने चोपवास: तदा महासान्त-
पनं भवति । तथा च याज्ञवल्क्य: ।
"कुशोदकञ्च गोक्षीरं दधि मूत्रं शकृद् घृतम् ।
जग्ध्वा परेऽह्न्युपवसेत् कृच्छ्रं सान्तपनञ्चरन् ॥
पृथक्सान्तपनद्रव्यै: षडह: सोपवासिक: ।
सप्ताहेन तु कृच्छ्रोऽयं महासान्तपनं स्मृतम् ॥"
इति कुल्लूकभट्ट: ॥
गारुडे १०५ अध्यायेऽप्येवम् ॥ (सन्तापके,
त्रि ॥ यथा, ऋग्वेदे । ७ । ५९ । ९ ।
"सान्तपना इदं हविर्मरुतस्तज्जुजुष्टन ॥"
"सान्तपना: शत्रूणां संतापका हे मरुत: ॥"
इति तद्भाष्ये सायण: ॥ सन्तपनस्य सूर्य्यस्येद-
मिति । अण् । सूर्य्यसम्बन्धिनि च त्रि । यथा,
वाजसनेयसंहितायाम् । १७ । ८५ ।
"स्वतवांश्च प्रघासी च सान्तपनश्च गृहमेधी च ।"
'सन्तपन: सूर्य्यस्तत्सम्बन्धी सान्तपन: ।' इति
तद्भाष्यम् ॥)
सान्तरं, त्रि, विरलम् । इति जटाधर: ॥ (यथा,
बृहत्संहितायाम् । २२ । ३ ।
"यदि ता: स्युरेकरूपा:
शुभास्तत: सान्तरास्तु न शिवाय ॥")
अन्तरेण सह वर्त्तमानश्च ॥ (सावकाशम् ।
यथा, महाभारते । ७ । ११ । १८ ।
"तस्य जिह्ममभिप्रायं ज्ञात्वा द्रोणोऽथ तत्त्व-
वित् ।
तं वरं सान्तरं तस्मै ददौ संचिन्त्य बुद्धिमान् ॥")
सान्त्व,क सामप्रयोगे । इति कविकल्पद्रुम: ॥(चुरा०
पर०-सक०-सेट् ।) क, सान्त्वयति शोकार्त्तं
दयालु: । इति दुर्गादास: ॥
सान्त्व, त् क सान्त्वने । इति कविकल्पद्रुम: ॥
(अदन्तचुरा०-पर०-सक०-सेट् ।) दन्त्यादि-
स्तमध्य: वकारोपध: । सान्त्वनं प्रियकरणम् ।
सान्त्वयति सान्त्वापयति । इति दुर्गादास: ॥
सान्त्व, क्ली, (सान्त्व सान्त्वने + घञ् ।) अत्यर्थ-
मधुरम् । तत् कर्णमन:प्रीतिजनक वाक्यम् ।
(यथा, महाभारते । ५ । १४० । २ ।

"कानि सान्त्वानि गोविन्द: सूतपुत्रे प्रयुक्त-
वान् ॥")
साम । तच्च प्रियवाक्यार्थप्रदानसम्बन्धादिभि:
क्रोधोपशमनम् । इत्यमरभरतौ ॥ (यथा,
माघे । २ । ५४ ।
"चतुर्थोपायसाध्ये तु रिपौ सान्त्वमपक्रिया ।
स्वेद्यमामज्वरं प्राज्ञ: कोऽम्भसा परिषिञ्चति ॥"
दाक्षिण्यम् । इति मेदिनी ॥
सान्त्वनं, क्ली, (सान्त्व + ल्युट् ।) सामोपाय: ।
इति हेमचन्द्र: ॥ प्रियकरणम् । इति सान्त्व-
धातुटीकायां दुर्गादास: ॥ (यथा, महाभा-
रते । २ । ३८ । ६ ।
"नास्मै देयो ह्यनुनयो नायमर्हति सान्त्वनम् ।
लोकवृत्ततमे कृष्णे योऽर्हनां नाभिमन्यते ॥")
सान्त्वना,स्त्री,क्ली,सान्त्व + युच् । टाप् । क्लीपक्षे
ल्युट् ।) सान्त्वनम् । प्रणय: । यथा । "प्रणय:
सान्त्वना न ना ।" इति जटाधर: ॥
सान्त्ववाद:, त्रि, (सान्त्वस्य साम्नस्य वाद:
कथनम् ।) सान्त्वनावाक्यम् । इति केचित् ॥
सान्दीपनि:,पुं,(सन्दीपनस्यापत्यमिति । सन्दी-
पन + इञ् ।) मुनिविशेष: । यथा, ब्रह्मवैवर्त्ते
श्रीकृष्णजन्मखण्डे । ८८ । ३० ।
"विश्वामित्र: शतानन्दो जाजलिस्त्वैतिलिस्तथा
सान्दीपनिश्च ब्रह्मांशो योगिनां ज्ञानिनां गुरु: ॥"
अपि च ।
"विदिताखिलविज्ञानौ तत्त्वज्ञानमयावपि ।
शिष्याचार्य्यक्रमं वीरौ ख्यापयन्तौ यदूत्तमौ ॥
तत: सान्दीपनिं काश्यमवन्तिपुरवासिनम् ।
अस्त्रार्थं जग्मतुर्वीरौ बलदेवजनार्द्दनौ ॥"
काश्यं काश्यां जातम् ।
"तस्य शिष्यत्वमभ्येत्य गुरुवृत्तिपरौ हि तौ ।
दर्शयाञ्चक्रतुर्वीरावाचारमखिले जने ॥
सरहस्यं धनुर्व्वेदं ससंग्रहमधीयताम् ।
अहोरात्रैश्चतु:षष्ट्या तदद्भुतमभूद्द्विज ॥
सान्दीपनिरसंभाव्यं तयो: कर्म्मातिमानुषम् ।
विचिन्त्य तौ तदा मेने प्राप्तौ चन्द्रदिवाकरौ ॥
अस्त्रग्राममशेषञ्च प्रोक्तमात्रमवाप्य तौ ।
ऊचतुर्व्रियतां या ते दातव्या गुरुदक्षिणा ॥
सोऽप्यतीन्द्रियमालोक्य तयो: कर्म्म महामति: ।
अयाचत मृतं पुत्त्रं प्रभासे लवणार्णवे ॥"
अतीन्द्रियं अन्यवादृष्टपूर्व्वम् ।
"गृहीतास्त्रौ ततस्तौ तु सार्घपात्रो महोदधि:
उवाच न मया पुत्त्रो हृत: सान्दीपनेरिति ॥
दैत्य: पञ्चजनो नाम शङ्खरूप: स बालकम् ।
जग्राह सोऽस्ति सलिले ममैवारिनिसूदन ॥
इत्युक्तोऽन्तर्जलं गत्वा हत्वा पञ्चजनञ्च तम् ।
कृष्णो जग्राह तस्यास्थिप्रभवं शङ्खमुत्तमम् ॥
तं पाञ्चजन्यमापूर्य्य गत्वा यमपुरीं हरि: ।
बलदेवश्च बलवान् जित्वा वैवस्वतं यमम् ॥
तं बालं यातनासंस्थं यथापूर्व्वशरीरिणम् ।
पित्रे प्रदत्तवान् कृष्णो बलश्च बलिनां वर: ॥"
इति विष्णुपुराणे । ५ । २१ । १८ । ३ ॥

साम्दृष्टिकं, क्ली, (सन्दृष्टौ प्रत्यक्षे भवम्। सन्दृष्टि +ठञ्।) सद्यःफलम्। इत्यमरः।२।८।२८॥ दृष्टपरिकल्पनान्यायः। यथा पितामहदौहित्राभावे प्रपितामहप्रपितामह्योः क्रमेणाधिकारः प्रपितामहपिण्डस्य धनिभोग्यत्वात् पूर्व्वोक्तसांदृष्टिकन्यायसिद्धत्वाच्च। इति दायक्रमसंग्रहः॥

सान्द्रं, क्ली, (षदि बन्धने+बाहुलकात् रक्। बन्द्रेण सह वर्त्तते इति।)वनम्। इति मेदिनी॥

सान्द्रः, त्रि, (बन्द्रेण निविड़बन्धनेन सह वर्त्तते इति।)घनः। इत्यमरः। ३। १। ६६॥(यथा, माघे। ४। २८।

"उच्चैर्महारजतराजिविराजितासौ
दुर्वर्णभित्तिरिह सान्द्रसुधासवर्णा॥")

मृदु। इति मेदिनी॥ स्निग्धः। मनोज्ञः। इति शब्दरत्नावली॥

सान्द्रपुष्पः, (सान्द्रं पुष्पमस्य।) विभीतकवृक्षः। इति शब्दचन्द्रिका॥

सान्द्रस्निग्धः, त्रि, (सान्द्रः स्निग्धश्च।) निविड़स्निग्धः। तत्पर्य्यायः। मेदुरः २। इति शब्दरत्नावली॥

सान्धिकः, पुं, (सन्धा मद्यसन्धीकरणं शिल्पमस्य सन्धा+ठक्।)शौण्डिकः। इति शब्दमाला॥ (सन्धिं करोतीति। ठक्।) सन्धिकर्त्ता च॥

सान्धिवेलं, त्रि, (सन्धिवेला+"सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्।" ४।३।१६। इति अण्।) सन्धिवेलायां भवम्। इति सिद्धान्तकौमुदी॥

सान्ध्यः, त्रि,(सन्ध्यायां भवः। सन्ध्या+सन्धिवेलादित्वात् अण्।) सन्ध्यासम्बन्धीयः। (यथा, रघुः। २। २१।

"गुरोः सदारस्य निपीड्य पादौ
समाप्य सान्ध्यञ्च विधिं दिलीपः।
दोहावसाने पुनरेव दोग्ध्रीं
भेजे भुजोच्छिन्नरिपुर्निषण्णाम्॥"

सान्ध्यकुसुमा, स्त्री, (सान्ध्यं सन्धिकालोद्भवं कुसुमं यस्याः।) त्रिसन्धिपुष्पवृक्षः। इति राजनिर्घण्टः॥

सान्नहनिकः, त्रि, (सन्नहनं प्रयोजनमस्येति। सन्नहन+तदस्य प्रयोजनमिति ठक्।)सन्नाहविशिष्टः। इति सिद्धान्तकौमुदी॥

सान्नाय्यं, क्ली, (सम्यक् नीयते होमार्थमिति। सं+नी+"पाय्यसान्नाय्येति।" ३।१।१२९। इति ण्यत्प्रत्ययादेशः समो दीर्घत्वञ्च निपात्यते हविः। इत्यमरः। ३। ३। २७॥

सान्निध्यं, क्ली, (सन्निधिरेव। सन्निधि+"चातुर्वर्ण्यादीनां स्वार्थे उपसंख्यानम्।" ५। १। १२४। इत्यस्य वार्त्तिकोक्त्या स्वार्थे ष्यञ्।) निकटम्। यथा,—

"सर्व्वस्य तपोयोगात् सर्व्वस्याभिगमनात्।
सान्निध्याय विश्वात्मा देवः सान्निध्य-
मृच्छति॥"
इति तिथ्यादितत्त्वम्॥

सान्निपातिकः, त्रि, (सन्निपातस्य शमनं कोपनं वा। "सन्निपाताच्च।" ५।१।३८। इत्यस्य वार्त्तिकोक्त्या स्वार्थे ष्यञ्।) सन्निपातजरोगः। इति राजनिर्घण्टः॥ यथा, कुमारे। २।४८।

"तस्मिन्नुपायाः सर्व्वे नः क्रूरे प्रतिहतक्रियाः।
वीर्य्यवन्त्यौषधानीव विकारे सान्निपातिके॥")

तद्विवरणं सन्निपातशब्दे द्रष्टव्यम्॥

सान्न्यासिकः, पुं, (संन्यासः प्रयोजनमस्येति। ठक्।) सन्न्यासी। तत्पर्य्यायः। भिक्षुः २ यतिः ३ कर्म्मन्दी ४ रक्तवसनः ५ परिव्राजकः ६ तापसः ७ पाराशरी ८ पारिकाङ्क्षी ९ मस्करी १० पारिरक्षकः ११। इति हेमचन्द्रः॥

सापत्नः, पुं,(सपत्न एव। स्वार्थे ष्यञ्) शत्रुः। इत्यमरटीकायां रमानाथः। २। ८। १०॥ (सपत्न्या अपत्यमिति। सपत्नी+ष्यञ्।) सपत्नीपुत्त्रः। यथा, बृहस्पतिः।

"पित्रा सह विभक्ता ये सापत्ना वा सहोदराः
जघन्यजाश्च ये तेषां पितृभागहरास्तु ते॥"
इति दायतत्त्वम्॥

(सपत्न्या भावः। सपत्नी+ब्राह्मणादित्वात् ष्यञ्।) सपत्नीभावे, क्ली॥ (यथा, माघे। ८। १५।

"शिल्याया निजवसतेर्निरासिरे य-
द्रागेण श्रियमरविन्दतः करार्पैः।
व्यक्तश्च्यं नियतमनेन निन्युरस्याः
सापत्न्यं क्षितिसुतविद्रुमो महिष्यः॥")

सापिण्ड्यं, क्ली, (सपिण्डस्य भावः। सपिण्ड+ष्यञ्।) सपिण्डता। सा तु पुंसां सप्तमपुरुषपर्य्यन्तं अनूढ़कन्यानां त्रिपुरुषपर्य्यन्तञ्च स्थायिनी। यथा,—

"लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः
पिण्डदः सप्तमस्तेषां सापिण्ड्यं साप्तपौरुषम्
इति मत्स्यपुराणम्॥

अप्रत्तानां त्रिपौरुषम्। इति वशिष्ठः॥ अपि च
"पित्रादिषड्भिः सापिण्ड्यं तत्तत्सन्ततिसप्तकैः
गोत्रैक्ये सति तत्तु स्यात् षड्भिः पुत्त्रादिभि-
स्तथा।
अप्रत्तानान्तु कन्यानां त्रिभिः पित्रादिभिः
स्मृतम्॥"
इति कारिका॥

अन्यत् सपिण्डशब्दे द्रष्टव्यम्॥

साप्तपदीनं, क्ली, (सप्तभिः पदैरवाप्यते इति। "साप्तपदीनं सख्यम्।" ५। २। २२। इति खञ् प्रत्ययेन साधुः।) सख्यम्। इत्यमरः। २। ८। १२॥ (यथा, कुमारे। ५। ३९।

"अयुक्तमत्कारविशेषमात्मना
न मां परं सम्प्रतिपत्तुमर्हसि।
यतः सतां सन्नतगात्रि! सङ्गतं
मनीषिभिः साप्तपदीनमुच्यते॥")

सप्तपदसम्बन्धिनि, त्रि॥

साफल्यं, क्ली,(सफलस्य भावः। सफल+ष्यञ्।) सफलता। (यथा, मुकुन्दमालायाम्। २८।

"जिह्वे श्रीकृष्णमन्त्रं जप जप
स

साम्बी, स्त्री, द्राक्षाविशेषः। इति वैद्यक।

साम, क सान्त्वे। इति कविकल्पद्रुमः। (चुरा० पर०-सक० सेट्।) दन्त्यादिरिदन्तीयवर्गः। प्रियकरणम्। क, सामयति दीनं इति दुर्गादासः॥

साम, त् क सान्त्वने। इति (अदन्तचुरा० पर०-सक० सेट्।) करणम्। असमामत् दीनं द. इति दुर्गादासः॥

साम, [न्] क्ली, (स्यति छिनत्ति दुःखं ... त्वात् स्यति दुःखयति दुःख... +"सातिभ्यां मनिन्मनिणौ।" उणा० इति मनिन्।) वेदविशेषः। इत्यमरः॥ स्यति पापं साम यो य गायेद्वा ... इति भरतः॥ तल्लक्षणमाह जैमिनिः। सामाख्या इति। गीयमानेषु ... त्वर्थः। इति तिथ्यादितत्त्वम् ... गीतस्तृतीयवेदः। तस्य सहस्रशाखा ... छान्दोग्यादिः। विवरणन्तु वेदशब्दे ... सामध्वनिश्रवणानन्तरं ... छात्रदेवताकथनञ्च यथा,—

"सामध्वनावृग्यजुषी नाधीयीत कदाच
वेदस्याधीत्य वाप्यन्तमारण्यकमधीत्य च।
ऋग्वेदो देवदैवत्यो यजुर्वेदस्तु मानुषः।
सामवेदः स्मृतः पित्र्यस्तस्मात्तस्याशुचिर्ध्वनिः॥"
इति मानवे। ४। १२३।॥

(वेदोऽयं गजोत्पत्तिकारणम्। ... टीकायां मल्लिनाथधृतपालकाव्ये। ११।

"सूर्य्यस्याण्डकपाले द्वे समानीय
हस्ताभ्यां परिगृह्णाय सप्तसामान्यगायत्।
गायतो ब्रह्मणस्तस्मात् समुत्पेतुर्मतङ्गजाः।

शत्रुवशीकरणोपायविशेषः। इत्यमरः। २। ८। प्रियवादार्थप्रदानसम्बन्धादिभिः क्रोधोपशमः साम। स्यति ... सान्त्वयतीति मन्। सान्त्व साम त् क इत्यस्मात् सामीति अन् वा। साम इत्यादि शमयति विरोधमिति शाम नाम तालव्यादि इति केचित्। इति भरतः॥ ...

मनुरुवाच।

"उपायांस्त्वं समाचक्ष्व सामपूर्व्वान् ...
लक्षणञ्च तथा तेषां प्रयोगञ्च सुरोत्तम।

मत्स्य उवाच।

सामभेदस्तथा दानं दण्डश्च मनुजोत्तम।
उपेक्षा च तथा माया इन्द्रजालञ्च पार्थिव।
प्रयोगाः कथिताः सप्त तन्मे निगदतः शृणु।
द्विविधं कथितं साम तथ्यञ्चातथ्यमेव च।
तत्राप्यतथ्यं साधूनामाक्रोशायैव जायते।
तथ्यं साधुमियत्तेव सामसाध्या नरा मताः।
महाकुलीना ऋजवो धर्म्मनित्या जितेन्द्रियाः।
सामसाध्या नरास्तथ्यं तेषु साम प्रयोजयेत्।

थश्च साम कर्त्तव्यं कुलशीलादिवर्त्तिना ।
ग्रा सदुपचाराणां कृतानाञ्चानुवर्णनम् ॥
नैयैव तथा युक्त्या कृतज्ञाप्यापनं स्वकम् ।
वं सान्त्वेन कर्त्तव्या वशगा धर्म्मतत्पराः ॥
ाम्ना यद्यपि रक्षांसि गृह्णन्तीति परा श्रुतिः ।
ग्राप्येतदसाधूनां प्रयुक्तं नोपकारकम् ।
तिशान्तिकमित्येवं पुरुषं सामवादिनम् ।
साधवोऽवजानन्ति तस्मात् तेषु विवर्ज्जयेत् ॥
ये शुद्धवंशा ऋजवः प्रतीता
धर्म्मे स्थिताः सत्यपरा विनीताः ।
ते साम साध्याः पुरुषाः प्रदिष्टा
मानोन्नता ये सततञ्च राजन् ॥"
। मात्स्ये राजधर्म्मे सामविधिः।२२२।१-१०॥
प्रियवाक्यादिना सान्त्वनम्। यथा, देवीभाग-
ते । १ । १७ । ३१ ।
ामपूर्व्वमुवाचासौ तं चत्ता संस्थितं मुनिम्।
च्छतां यत्र ते कार्य्यं यथेष्टं द्विजसत्तम ! ॥")
मकं, क्ली, (सममेव सामम् । अण् । ततः
र्थे कन् ।) मूलऋणम् । (यथा, मिता-
रायाम् । २ । ६४ ।
द्विमात्रापाकरणार्थन्तु बन्धकं सामकं स्मृता-
। याहृणी सम मूल्यं सममेव सामकम् ॥")
मकः, पुं, (समतीति । सम अवैकल्ये +
वुल् ।) तर्कशाणः । इति त्रिकाण्डशेषः ॥
साम अधीते वेद वा । सामन् + "क्रमादिभ्यो
वुन् ।" ४।२।६१ । इति वुन् । सामाभिज्ञे, त्रि ॥)
ामगः, पुं, (साम गायतीति । गै शब्दे + टक् ।
सामवेदी ब्राह्मणः । इति जटाधरः ॥ (विष्णुः ।
इति महाभारतम् । १३ । १४९ । ७५ ॥ ७ ॥
सामवेदज्ञे, त्रि । यथा, भागवते ।१।४।२१।
"तत्रर्ग्वेदधरः पैलः सामगो जैमिनिः कविः ।
वैशम्पायन एवैको निष्णातो यजुषामुत ॥")
ामगर्भः, पुं, (साम गर्भे यस्य ।) विष्णुः । इति
शब्दरत्नावली ॥
ामगी, स्त्री, (साम गायतीति । गै + टक् ।
ङीप् ।) सामगब्राह्मणपत्नी । इति केचित् ॥
ामग्री, स्त्री, (समग्रस्य भावः । ष्यञ् । अभि-
धानात् स्त्रीत्वम् । ङीप् । यलोपः) कारण-
समूहः । यथा,—
"सामग्री चेत्र फलविरहो ध्यामिरेवेति तत्त्वम्"
इति पदाङ्कदूतः ॥
द्रव्यम् । यथा,—
"एकोद्दिष्टन्तु कर्त्तव्यं पाकेनैव सदा स्वयम् ।
अभावे पाकपात्राणां तदह्नः समुपोषणम् ॥"
इति सगुडारीतवचनात् पाकपात्राभावः पाक-
सामग्र्यभावोपलक्षणम् । इति श्राद्धतत्त्वम् ॥
ामग्र्यं, क्ली,(समग्रस्य भावः । समग्र + ष्यञ् ।)
समुदायत्वम् । (यथा, कुमारे । ३ । २८ ।
"वर्णप्रकर्षे सति कर्णिकारं
दुनोति निर्गन्धतया स्म चेतः ।
प्रायेण सामग्र्यविधौ गुणानां
पराङ्मुखी विश्वसृजः प्रवृत्तिः ॥")

सामजः, पुं, (साम्नो वेदभेदात् जायते इति ।
जन + डः ।) हस्ती । सामोत्थे, त्रि । इति
मेदिनी ॥ (उभयार्थे प्रमाणम् । यथा, माघे ।
१२ । ११ ।
"नानाविधाविष्कृतसामजस्वरः
सहस्रवर्त्मा चपलैर्दुरध्ययः ।
गान्धर्व्वभूयिष्ठतया समानतां
स सामवेदस्य दधौ बलोदधिः ॥")
सामञ्जस्यं, क्ली,(समञ्जसस्य भावः । समञ्जस +
ष्यञ् ।) औचित्यम् ॥
सामनी, स्त्री,पशुबन्धनरज्जुः । इति दामशब्द-
टीकायां सारसुन्दरी ॥
सामन्तः, पुं,(समन्तायाः संलग्नैकदेशाया भूमे-
रयमिति । समन्ता + तस्येदमिति अन् । सम-
न्तात् भवः । तत्र भव इति अण् वा ।) स्ववि-
षयानन्तरराजा । सम् संलग्नोऽन्त एकदेशो
यस्याः सा समन्ता स्वविषयानन्तरा भूमिः तस्या
ईश्वरा इति पर्य्ये सामन्ताः । इत्यमरटीकायां
भरतः ॥ (यथा, रघुः । ५ । २८ ।
"सामन्तसम्भवनयैव धीरः
कैलासनाथं तरसा जिगीषुः ॥"
सीमान्तरभवे, त्रि । यथा, मनुः । ८ । २५८ ।
"साक्ष्यभावे तु चत्वारो ग्रामाः सामन्तवासिनः
सीमाविनिर्णयं कुर्य्युः प्रयता राजसन्निधौ ॥"
"ग्रामसामन्ताः सीमान्तरवासिनः प्रष्टव्याः ।"
इति मेधातिथिः ॥ "समन्तभवाः सामन्तास्त-
द्वासिनश्चत्वारो ग्रामवासिनः ।" इति तट्टी-
कायां कुल्लूकः ॥)
सामन्यः, पुं, (सामसु साधुः । सामन् + "तत्र
साधुः ।" ४ ।४।९८। इति यत् ।) सामवेदज्ञ-
ब्राह्मणः । (यथा, भट्टिः । ४ । ९ ।
"ऋग्यजुषमधीयानान् सामन्यांश्च समर्चयन् ।
बुभुजे देवसात्कृत्वा शून्यमुख्यश्च होमवान् ।"
सामयिकः, त्रि, (समयः प्राप्तोऽस्य । समय +
"समयस्तदस्य प्राप्तम् ।"५।१।१०४।इति ठञ्)
समयोचितः । (यथा, याज्ञवल्क्ये । २ । १९२ ।
"निजधर्म्माविरोधेन यस्तु सामयिको भवेत् ।
सोऽपि यत्नेन संरक्ष्यो धर्म्मो राजकृतश्च यः ॥"
सामयोनिः,पुं,(साम्नः योनिः कारणम् ।) ब्रह्मा
(साम वेदभेदः योनिः कारणं यस्य ।) हस्ती ।
सामोत्थवस्तुनि, त्रि । इति मेदिनी ॥ (यथा,
रघुः । १६ । ३ ।
"चतुर्भुजांशप्रभवः स तेषां
दानप्रवृत्तेरनुपारतानाम् ।
सुरद्विपानामिव सामयोनि-
र्भिन्नोऽष्टधा विप्रससार वंशः ॥")
सामर्थ्यं,क्ली,(समर्थस्य भावः । समर्थ + ष्यञ् ।)
योग्यता । (यथा, रामायणे । २ । ४३ । २० ।
"न हि मे लोचिते किञ्चित् सामर्थ्यमिह दृश्यते
यदरण्यात् प्रियं पुत्रं …………… महाद्युतम् ॥")
शक्तिः । इति मेदिनी ॥ (यथा, गीतायाम् ।
२ । ३६ ।
"अवाच्यवादांश्च बहून् वदिष्यन्ति तवाहिताः ।
निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम् ॥")
सामवायिकः, पुं, (समवायान् समवैति । सम-
वाय + "समवायान् समवैति ।" ४ । ४ ।४३ ।
इति ठक् ।) मन्त्री । इति हेमचन्द्रः ॥ सम-
वायसम्बन्धिनि, त्रि ॥
सामाजिकः,पुं,(समाजं समवतीति । समाज +
"समवायान् समवैति ।"४।४।४३। इति ठक् ।
यद्वा, समाजं रक्षतीति । "रक्षति ।" ४ । ४ ।
३३ । इति ठक् ।) सभ्यः । इत्यमरः । २ । ७ ।
१६ ॥ (यथा, साहित्यदर्पणे । ३ । २२९ ।
"सामाजिकैस्ततो हास्यरसोऽयमनुभूयते ॥")
समाजसम्बन्धिनि सभासम्बन्धिनि च त्रि॥(यथा,
साहित्यदर्पणे । ३ । २९ ।
"ननु कथं रामादिरत्याद्युद्बोधकारणैः सीता-
दिभिः सामाजिकरत्याद्युद्बोध इत्युच्यते ॥")
सामान्यं, क्ली, (समान एव । स्वार्थे ष्यञ् ।)
जातिः । यथा,—
"जातिर्जातिश्च सामान्यं व्यक्तिस्तु पृथगात्मिका"
इत्यमरः । १ । ४ । ३० ॥
तद्द्विविधं यथा, भाषापरिच्छेदे ।
"सामान्यं द्विविधं प्रोक्तं परञ्चापरमेव च ।
द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते ॥
परभिन्ना च या जातिः सैवापरतयोच्यते ।
व्यापकत्वात् परापि स्यात् व्याप्यत्वादपरापि च
द्रव्यत्वादिकजातिस्तु परापरतयोच्यते ॥"
तल्लक्षणं यथा । नित्यत्वे सत्यनेकसमवेतत्वम् ।
अनेकसमवेतत्वं संयोगादीनामप्यस्ति अतः
सत्यन्तं नित्यत्वे सति समवेतत्वं गगनपरिमाणा-
दीनामप्यस्ति अत उक्तं अनेकेति नित्यत्वे सति
अनेकवृत्तित्वमत्यन्ताभावस्याप्यस्ति अतोवृत्ति-
सामान्यमुपेक्ष्य समवेतत्वमुक्तम् । एकव्यक्ति-
वृत्तिस्तु न जातिः । तथा चोक्तम् ।
"व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः ।
रूपहानिरसम्बन्धो जातिबाधकसंग्रहः ॥"
एकव्यक्तिकत्वात् आकाशत्वं न जातिः । तुल्य-
वृत्तिकत्वात् घटत्वं कलसत्वं न जातिद्वयम् ।
संकीर्णत्वात् भूतत्वं मूर्त्तत्वं न जातिः । अन-
वस्थाभयात् सामान्यत्वं न जातिः । विशेषस्य
व्यावृत्तस्वभावस्य रूपहानिः स्यादतो विशेषत्वं
न जातिः । समवायसम्बन्धाभावात् समवायो
न जातिः । द्रव्यादित्रिकवृत्तिरिति परत्वं
अधिकदेशवृत्तित्वं अपरत्वमल्पदेशवृत्तित्वम् ।
सकलजात्यपेक्षया अधिकदेशवृत्तित्वात् सत्तायाः
परत्वम् । तद्बोधनाय द्रव्यादीति । तदपेक्षया
अन्यासां जातीनां अपरत्वम् । परभिन्ना सत्ता-
भिन्ना । व्यापकत्वात् परापि स्यात् व्याप्यत्वाद-
परापि च । पृथिवीत्वापेक्षया व्यापकत्वात्
अधिकदेशवृत्तित्वात् द्रव्यत्वस्य परत्वम् । सत्तापे-
क्षया अल्पदेशवृत्तित्वात् द्रव्यत्वस्य अपरत्वम् ।
तथा च धर्म्मद्वयसमावेशात् उभयमविरुद्धम् ।
इति सिद्धान्तमुक्तावली । (…………… । सत्ता-

नत्वम् । यथा, महाभारते । १२ । २२८ । ४ ।
"सामान्यमपि भिर्गत्वा ब्रह्मलोकनिवासिभिः ।
ब्रह्मैवामितदीप्तौजाः शान्तपापा महातपाः ।
विचचार यथाकामं त्रिषु लोकेषु नारदः ॥")

सामान्यं, त्रि, (समानस्य भावः । समान + ष्यञ् ।) अनेकसम्बन्ध्येकवस्तु । साधारणम् । इत्यमरः । ३ । १ । ८२ ॥ यथा, देवलः ।
"सामान्यं पुत्रकन्यानां मृतायां स्त्रीधनं विदुः ।
अप्रजायां हरेद्भर्त्ता माता भ्राता पितापि वा ॥"
इति दायतत्त्वम् ॥
(यथा च कुमारे । ७ । ४४ ।
"एकैव मूर्त्तिर्बिभिदे त्रिधा सा
सामान्यमेषां प्रथमावरत्वम् ।
विष्णोर्हरस्तस्य हरिः कदाचित्
वेधास्तयोस्तावपि धातुराद्यौ ॥")

सामान्यलक्षणा, स्त्री, (सामान्यं साधारणधर्म्मः लक्षणं यस्याः ।) अलौकिकसन्निकर्षविशेषः । स तु आश्रयज्ञापकसामान्यज्ञानम् । यथा । एकघटदर्शने सकलघटज्ञानं भवति ईदृशघटत्वादिज्ञानम् । तल्लक्षणं यथा, भाषापरिच्छेदे ।
"अलौकिकः सन्निकर्षस्त्रिविधः परिकीर्त्तितः ।
सामान्यलक्षणा ज्ञानलक्षणा योगजस्तथा ॥
आसत्तिराश्रयाणान्तु सामान्यज्ञानमिष्यते ।
तदिन्द्रियजतद्धर्म्मबोधसामग्र्यपेक्षते ॥"

सामान्यशासनं, क्ली, (सामान्यं शासनम् ।) सामान्याधिकारः । यथा,—
"सर्व्वेन्द्रकोर्षो स्यादब्रह्मशासनं धर्म्मकीलकः ।
सामान्यशासनं सौरं सुकृतिः शूद्रशासनम् ॥"
इति पुरवर्गे शब्दरत्नावली ॥

सामान्या, स्त्री, (सामान्य + टाप् ।) साधारणी नायिका । अस्या लक्षणम् । धनमात्रलाभार्थ-सकलपुरुषाभिलाषा ॥ सा त्रिधा । अन्यसम्भोग-दुःखिता । वक्रोक्तिगर्व्विता । मानवती । वक्रोक्तिगर्व्वितापि द्विविधा । प्रेमगर्व्विता सौन्दर्य्यगर्व्विता च । एता नायिका अवस्थाभेदेन प्रत्येकं अष्टप्रकारा भवन्ति । यथा । प्रोषित-भर्त्तृका १ खण्डिता २ कलहान्तरिता ३ विप्र-लब्धा ४ उत्कण्ठिता ५ वासकसज्जा ६ स्वाधीन-पतिका ७ अभिसारिका ८ । इति रस-मञ्जरी ॥ (यथा च साहित्यदर्पणे । ३ । १११—११२ ।
"धीरा कलाप्रगल्भा स्याद्वेश्या सामान्य-नायिका ।
निर्गुणानपि न द्वेष्टि न रज्यति गुणिष्वपि ।
वित्तमात्रं समालोक्य सा रागं दर्शयेद्बहिः ॥
काममङ्गीकृतमपि परिक्षीणधनं नरम् ।
मात्रा निष्कासयेदेषा पुनः सन्धानकाङ्क्षया ॥
तस्कराः पण्डका मूर्खाः सुखप्राप्तधनास्तथा ।
लिङ्गिनश्छन्नकामाद्या आसां प्रायेण वल्लभाः ॥
एषापि मदनायत्ता क्वापि सत्यानुरागिणी ।
रक्तायां वा विरक्तायां रतमस्यां सुदुर्लभम् ॥"

पण्डको वातरोगपण्डादिः । छन्नं प्रच्छन्नं यथा कामयन्ते ते छन्नकामाः । तत्र रागहीना यथा नटकभिक्षुकादौ मदनमञ्जर्य्यादिः । रक्ता यथा मृच्छकटिकादौ वसन्तसेनादिः । पुनश्च ।
"अवस्थाभिर्भवन्त्यष्टावेताः षोडशभेदिताः ॥
स्वाधीनभर्त्तृका तद्वत् खण्डिताथाभिसारिका
कलहान्तरिता विप्रलब्धा प्रोषितभर्त्तृका ।
अन्या वासकसज्जा स्याद्विरहोत्कण्ठिता
तथा ॥"
एतासां लक्षणानि तु तत्तच्छब्दे विशेषतो द्रष्टव्यानि ॥)

सामि, व्य, अर्द्धम् । निन्दा । इत्यमरः । ३ । ३ । २४८ ॥

सामिकृतः, त्रि, अर्द्धकृतः । सामिशब्दात् कृधातोः क्तप्रत्ययेन निष्पन्नः ॥

सामिधेनी, स्त्री, (समिधां आधानी । समिध् + "सामिधामाधाने षेण्यण् ।" ४ । ३ । १२० । इत्यस्य वार्त्तिकोक्त्या षेण्यण् । षित्वात् ङीष्) अग्निसमिन्धना ऋक् । अग्नेर्ज्वालने या ऋक् पठ्यते । तत्पर्य्यायः । धाय्या २ । इत्यमरः । २ । ७ । २२ ॥ (यथा, महाभारते । ३ । १३४ । १६ ।
"नवैवोक्ताः सामिधेन्यः पितॄणां
तथा प्राहुर्नवयोगं विसर्गम् ॥"
समित् । इति मेदिनी ॥

सामिपीतः, त्रि, अर्द्धपानकृतः । सामिशब्दात् पाधातोः क्तप्रत्ययेन निष्पन्नः ॥

सामिभुक्तः, त्रि, अर्द्धभुक्तः । सामिशब्दात् भुज-धातोः क्तप्रत्ययेन निष्पन्नः ॥ (यथा, रघुः । १९ । १६ ।
"वल्लभाभिरुपसृत्य चक्रिरे
सामिभुक्तविषयाः समागमाः ॥")

सामीची, स्त्री, वन्दना । इति हारावली ॥

सामीप्यं, क्ली, (समीपस्य भावः । समीप + चतु-र्वर्णादित्वात् ष्यञ् ।) समीपत्वम् । नैकट्यम् । यथा,—
"वः कसामीप्यसादृश्यसाकल्यानुक्रमर्द्धिषु ॥"
इति मुग्धबोधव्याकरणम् ॥
अधिकरणविशेषः । आधारभेदः । यथा,—
"सामीप्याक्षेपविषयैर्व्याप्त्याधारश्चतुर्व्विधः ।"
इति कारके मुग्धबोधव्याकरणम् ॥

सामुद्रं, क्ली, (समुद्रे भवम् । अण् ।) समुद्र-लवणम् । इति हेमचन्द्रः ॥ करकच् इति भाषा । तत्पर्य्यायः ।
"सामुद्रं यत्तु लवणं त्रिकुटं कड़कच्च तत् ॥"
इति रत्नमाला ॥
अस्य गुणाः ।
"सामुद्रं लवणं पाके नात्युष्णमविदाहि च ।
भेदनं मधुरं स्निग्धं शूलघ्नं नातिपित्तलम् ॥"
इति राजवल्लभः ॥
अन्यत् समुद्रलवणशब्दे द्रष्टव्यम् ॥ * ॥
समुद्रफेनम् । इति राजनिर्घण्टः ॥ (समुद्रेण ऋषिणा प्रोक्तमिति । अण् ।) देहचिह्नम् । इति मेदिनी ॥ (तल्लक्षणान्वितग्रन्थविशेषः । इति केचित् ॥) समुद्रजाते, त्रि । मेदिनी ॥ (पुं, समुद्रगामी वणिक् । याज्ञवल्क्ये । २ । ३८ ।
"कान्तारगास्तु
दशकं सामुद्रा विंशकम् ॥"
मत्स्यविशेषः । यथा, सुश्रुते । १ । ८ ।
"मत्स्याः सामुद्राः
क्षाराः
देशः गोपय । पार्व्वतीयस्तु वैदे
स्तुल्यलक्षणः ॥" * ॥ देशविशेष
भक्तेषु । ५८ । १३ ।
"प्राग्ज्योतिषाः सलौहित्याः

* * *

वर्द्धमानाः कोशलाश्च मुखे

सामुद्रकं, क्ली, (सामुद्रमेव । ...) लवणम् । इति राजनिर्घण्टः ॥ ... लक्षणग्रन्थः । तद्विवरणं यथा,—
श्रीकृष्ण उवाच ।
"कीदृशः ...
कन्या वा कीदृशी यस्या गर्हिता यदि
वैरे
महेश उवाच ।
शृणु त्वया प्रवक्ष्यामि समुद्रवचनं यथा ।
लक्षणन्तु मनुष्याणां एकैकेन वदाम्यहम् ।
वामभागे तु नारीणां दक्षिणे पुरुषस्य च ।
निर्दिष्टं लक्षणं तेषां समुद्रेण यथोदितम् ।
पूर्व्वमायुः परीक्षेत पश्चाल्लक्षणमेव च ।
आयुर्हीनं नराणाञ्चेत् लक्षणैः किं प्रयो

अथ पुरुषलक्षणम् ।
"पञ्चदीर्घं चतुर्ह्रस्वं पञ्चसूक्ष्मं षडुन्नतम् ।
सप्तरक्तं त्रिगम्भीरं त्रिविशालं प्रशस्यते ।
बाहुनेत्रद्वयं कुक्षी द्वौ तु नासा तथैव च ।
स्तनयोरन्तरञ्चैव पञ्चदीर्घं प्रशस्यते ॥
ग्रीवा च कर्णौ पृष्ठञ्च ह्रस्वे जङ्घे सपूजिते ।
चत्वारि यस्य ह्रस्वानि पूजां प्राप्नोति ...
सूक्ष्माण्यङ्गुलिपर्व्वाणि दन्तकेशनखत्वचः ।
पञ्च सूक्ष्माणि येषां हि ते नरा दीर्घजीविनः ।
नासा नेत्रञ्च दन्ताश्च ललाटञ्च शिरस्तथा ।
हृदयञ्चैव विज्ञेयमुन्नतं षट् प्रशस्यते ॥
पाणिपादतलौ रक्तौ नेत्रान्तरनखानि च ।
तालुकोऽधरजिह्वा च सप्तरक्तं प्रशस्यते ।
स्वरो बुद्धिश्च नाभिश्च त्रिगम्भीरमुदाहृतम् ।
उरः शिरो ललाटञ्च त्रिविस्तीर्णं प्रशस्यते ।
कटिर्विशाला बहुपुत्रभागी
विशालहस्तो नरपुङ्गवः स्यात् ।
उरो विशालं धनधान्यभागी
शिरो विशालं नरपूजितः स्यात् ।
न श्रीस्त्यजति रक्ताङ्गं नार्थः कनकपिङ्गलम् ।
दीर्घबाहुं न चैश्वर्य्यं न मांसोपचितांसकम् ।
कदाचिद्दन्तुरो मूर्खः कदाचित् लोमशः सुखी ।

दाचित् तुन्दिलो दुःखी कदाचित् चञ्चला सती ॥
बस्ने हेन सौभाग्यं दन्तस्ने हेन भोजनम् ।
स्तस्ने हेन चैश्वर्य्यं पादस्ने हेन वाहनम् ॥
कर्म्मकठिनौ हस्तौ पादावध्वनि कोमलौ ।
स्य पाणितलौ रक्तौ तस्य राज्यं विनिर्द्दिशेत्॥
र्घलिङ्गेन दारिद्रं स्थूललिङ्गेन निर्धनः ।
शलिङ्गेन सौभाग्यं ह्रस्वलिङ्गेन भूपतिः ॥
हुभिर्बहुभिर्दुःखं स्वल्पाभिर्धनहीनता ।
काभिः श्रियमाप्नोति कृष्णाभिः प्रेष्यतां व्रजेत्
ङ्गुष्ठोदरमध्ये तु यवो यस्य विराजितः ।
मतं भोजनं तस्य शतं जीवति मानवः ॥
ङ्कुशं कुलिशं छत्रं यस्य पाणितले भवेत् ।
स्यैश्वर्य्यं विनिर्द्दिष्टं षष्ठीत्यायुर्भवेद्ध्रुवम् ॥
नुर्यस्य भवेत् पाणौ पङ्कजं वाथ तोरणम् ।
स्यैश्वर्य्यञ्च राज्यञ्च षष्ठीत्यायुर्भवेद्ध्रुवम् ॥
निष्ठात्तर्ज्जनीं यावद्रेखा भवति चाक्षता ।
ंशत्यब्दाधिकशतं नरो जीवत्यनामयः ॥
निष्ठामध्यमां यावद्रेखा भवति चाक्षता ।
ताब्दं चाथ वाशीतिं नरो जीवेन्न संशयः ॥
निष्ठानामिकायाञ्चेत् रेखा भवति चाक्षता ।
ष्टिं पञ्चाशदब्दं वा नरा जीवन्त्यसंशयम् ॥
खया भिद्यते रेखा स्वल्पायुश्च भवेन्नरः ।
निष्ठाधःस्थिता रेखाः संख्या यावतिका स्मृताः ।
ावती पुरुषाणान्तु नारी भवति निश्चितम् ॥
रमध्यगता रेखा ध्रुवा ऊर्द्ध्वं भवेद् यदि ।
ृपो वा नृपतुल्यो वा ख्यातोऽर्थवान् भवेत् ॥
त्सपुच्छप्रकीर्णेन विद्यावित्तसमन्वितः ।
पतामहस्य वा किञ्चिद्धनञ्च लभते ध्रुवम् ॥
ध्यमायां यदि यवा दृश्यन्तेऽत्यन्तशोभनाः ।
दान्यसञ्चितं वित्तं प्राप्नोत्यङ्गुष्ठके यवे ॥
स्याञ्च चक्रमङ्गुष्ठे यवः पूर्णश्च दृश्यते ।
दा पितामहादीनामर्ज्जितं धनमाप्नुयात् ॥
र्ज्जन्यामथ चक्रञ्च मित्रद्वारा धनम्भवेत् ।
तेनैव विपरीतन्तु व्ययो भवति निश्चितम् ॥
मध्यमायां स्थिते चक्रे देवद्वारा धनं लभेत् ।
तेनैव विपरीतन्तु व्ययो भवति निश्चितम् ॥
अनामिकायां भवेच्चक्रं सर्व्वद्वारा भवेद्धनम् ।
तेनैव विपरीतन्तु व्ययो भवति निश्चितम् ॥
कनिष्ठायां भवेच्चक्रं वाणिज्येन धनं भवेत् ।
तेनैव विपरीतन्तु व्ययो भवति निश्चितम् ॥
ललाटे दृश्यते यस्य चक्ररेखाचतुष्टयम् ।
षष्ठीत्यायुः समाप्नोति पञ्चरेखाः शतं समाः ॥
यस्योन्नतं ललाटञ्च ताम्रवर्णञ्च दृश्यते ।
रेखाहीनञ्च कम्बञ्च स चौरश्च महीं भ्रमेत् ॥
यस्य जिह्वा भवेद्दीर्घा नासाग्रं लेढि सर्व्वदा ।
योगी भवति निर्व्वाणः पृथ्वीं भ्रमति सर्व्वदा ॥
दन्ताश्च विरला यस्य गण्डे कूपोऽपि जायते ।
परस्त्रीरमणो नित्यं परवित्तं न विश्वसन् ॥
कर्कशैः कठिनैर्लिङ्गैः प्रमाणादधिकैः सदा ।
रमते च सदा दासीं निर्धनो भवति ध्रुवम् ॥

कृशलिङ्गेन सूक्ष्मेण रक्तवर्णेन भूपतिः ।
बहुस्त्रीरमणो नित्यं नारीणां वल्लभो भवेत् ॥
यस्य पादतले पद्मं चक्रं वाप्यथ तोरणम् ।
अङ्कुशं कुलिशं वापि स राजा भवति ध्रुवम् ॥
कृशातिलोमशा ये स्युः केकराक्षाः कुचेलकाः ।
कातरं व्यालजिह्वाश्च ते दरिद्रा न संशयः ॥
कपिला मलिनाङ्गाश्च ह्रस्वाश्चैव हृतनखाः ।
कृशातिदीर्घा मनुजास्ते दरिद्रा न संशयः ॥
चिबुके श्मश्रुशून्या ये निर्लोमहृदयाश्च ये ।
ते धूर्त्ता नैव सन्देहः समुद्रवचनं यथा ॥
सूचीमुखा भग्नपृष्ठाः कृष्णदन्ता कुचेलकाः ।
वक्रनासा वधनासास्ते नरा दुष्टमानसाः ॥
दयालवश्च दातारो रूपवन्तो जितेन्द्रियाः ।
परोपकारिणश्चैव तेऽपूर्व्वा मानवाः स्मृताः ॥”
इति पुरुषलक्षणम् ॥ * ॥

अथ स्त्रीलक्षणम् ।

“यस्याः पादतले रेखा सा भवेत् क्षितिपाङ्गना ।
भवेदखण्डभोगा च या मध्याङ्गुलिसङ्गता ॥
उन्नतो मांसलोऽङ्गुष्ठो वर्त्तुलोऽतुलभोगदः ।
वक्रो ह्रस्वश्च चिपिटः सुखसौभाग्यभञ्जकः ॥
दीर्घाङ्गुलीभिः कुलटा कृशाभिरतिनिर्धना ।
ह्रस्वाभिः स्याच्च ह्रस्वायुः भग्नाभिर्भुग्नवर्त्तिनी॥
चिपिटाभिर्भवेद्दासी विरलाभिर्दरिद्रिणी ।
परस्परं समारूढ़ा यस्याङ्गुल्यो भवन्ति हि ॥
हत्वा बहूनपि पतीन् परप्रेष्या तदा भवेत् ।
स्निग्धा समुन्नतास्ताम्रा वृत्ताः पादनखाः शुभाः ॥
राज्ञीत्वसूचकं स्त्रीणां पादपृष्ठं समुन्नतम् ।
समपार्ष्णी शुभा नारी पृथुपार्ष्णी सुदुर्भगा ॥
कुलटोन्नतपार्ष्णी स्यात् दीर्घपार्ष्णी च दुःखभाक् ।
रोमहीने समे स्निग्धे जङ्घे च क्रमवर्त्तुले ॥
सा राजपत्नी भवति विशिरे सुमनोहरे ।
वृत्तं पिशितसंलग्नं जानुयुग्मं प्रशस्यते ॥
निर्म्मांसं स्वैरचारिण्या दरिद्रायाश्च विश्लथम् ।
विशिरैः करभाकारैरूरुभिर्मसृणैर्घनैः ।
सुवृत्तै रोमरहितैर्भवेयुर्भूपवल्लभाः ॥
चतुर्भिरङ्गुलैः शस्ता कटिर्विंशतिसंयुतैः ।
समुन्नतनितम्बाढ्या चतुरस्रा मृगीदृशाम् ॥
नितम्बबिम्बो नारीणां उन्नतो मांसलः पृथुः ।
महाभोगाय संप्रोक्तः तदन्योऽशर्म्मणाय च ॥
गम्भीरा दक्षिणावर्त्ता नाभिः स्यात् सुखसम्पदे ।
वामावर्त्ता समुत्ताना व्यक्तग्रन्थी न शोभना ॥
उदरेणाभितुच्छेन विशिरेण मृदुत्वचा ।
योषित् भवति भोगाढ्या नित्यमिष्टान्नसेविनी ॥
कुम्भाकारं दरिद्राया घटाख्यं मृदङ्गवत् ।
कुचाग्राभं यशाभिः दृष्टं जायते स्त्रिया ॥
निर्लोम हृदयं यस्याः समं निम्नत्ववर्ज्जितम् ।
ऐश्वर्य्यं चाप्यवैधव्यं प्रियप्रेम च सा भवेत् ।
घनौ वृत्तौ दृढौ पीनौ समौ शस्तौ पयोधरौ ।
स्थूलाग्रौ विरलौ शुष्कौ वामोरूणां न शर्म्मदौ ॥
दक्षिणोन्नतवक्षोजा पुत्रिणी पूर्व्वगर्भिणी ।

वामोन्नतकुचा सूते कन्यां सौभाग्यसुन्दरीम् ॥
मूले स्थूलौ क्रमकृशावग्रे तीक्ष्णौ पयोधरौ ।
सुखदौ बाल्यकाले तु पश्चादत्यन्तदुःखदौ ॥
अम्भोजमुकुलाकारमङ्गुष्ठाङ्गुलिसम्मुखम् ।
हस्तद्वयं मृगाक्षीणां बहुभोगाय जायते ॥
मृदुमध्योन्नतं रक्तं तलं पाण्योररन्ध्रकम् ।
प्रशस्तं शस्तरेखाढ्यमल्परेखं शुभप्रदम् ॥
विधवा बहुरेखेण विरेखेण दरिद्रिणी ।
भिक्षुकी सुशिराढ्येन नारी करतलेन वै ॥
मत्स्येन सुभगा नारी स्वस्तिकेन च सुप्रजा ।
पद्मेन भूपतेः पत्नी जनयेत् भूपतिं सुतम् ॥
चक्रवर्त्तिस्त्रियाः पाणौ नन्द्यावर्त्तप्रदक्षिणः ।
शङ्खातपत्रकमठा राजमातृत्वसूचकाः ॥
कृषीवलस्य पत्नी स्याच्छकटेन युगेन वा ।
चामराङ्कुशकोदण्डैः राजपत्नी भवेद् ध्रुवम् ॥
अङ्गुष्ठमूलान्निर्गत्य रेखा याति कनिष्ठिकाम् ।
यदि स्यात् पतिहन्त्री सा दूरतस्तां त्यजेत् सुधीः ॥
त्रिशूलासिगदाशक्तिदुन्दुभ्याकृतिरेखया ।
नितम्बिनी कीर्त्तिमती करेण पृथिवीतले ॥
पाटलो वर्त्तुलः स्निग्धो रेखाभूषितमध्यभूः ।
सीमन्तिनीनामधरो राज्ञां चैव प्रियो भवेत् ॥
श्यामः स्थूलोऽधरोष्ठः स्यात् वैधव्यकलहप्रदः ।
मसृणो मत्तकाशिन्याश्चोत्तरोष्ठः सुभोगदः ॥
पीताः श्यामाश्च दशनाः स्थूला दीर्घा द्विपङ्क्तयः ।
शुक्त्याकाराश्च विरला दुःखदौर्भाग्यकारणम् ।
अधस्तादधिकैर्दन्तैर्मातरं भक्षयेत् स्फुटम् ॥
पतिहीना च विकटैः कुलटा विरलैर्भवेत् ।
समवृत्तपुटा नासा लघुच्छिद्रा शुभावहा ॥
स्थूलाग्रा मध्यनम्रा च न प्रशस्ता समुन्नता ।
ललना लोचने शस्ते रक्तान्ते कृष्णतारके ॥
गोक्षीरवर्णविशदे सुस्निग्धे कृष्णपक्ष्मणी ।
उन्नताक्षी न दीर्घायुः वृत्ताक्षी कुलटा भवेत् ॥
मेषाक्षी महिषाक्षी च केकराक्षी न शोभना ।
कामग्रहीता नितरां गोपिङ्गाक्षी सुदुर्म्मदा ॥
पारावताक्षी दुःशीला रक्ताक्षी भर्तृघातिनी ।
कोटराक्षी नयना दुष्टा गजनेत्रा न शोभना ॥
पुंश्चली वामकाणाक्षी वन्ध्या दक्षिणकाणिका ।
मधुपिङ्गाक्षी रमणी धनधान्यसमृद्धिभाक् ।
प्रलम्बमलिकं यस्या देवरं हन्ति सा ध्रुवम् ॥
रोमशेन शिरालेन प्रांशुना रोगिणी मता ॥
स्थूलमूर्द्धा च विधवा दीर्घशीर्षा च बन्धकी ।
विशालेनापि शिरसा भवेद्दौर्भाग्यभाजनम् ॥
केशा अलिकुलच्छायाः स्निग्धाः सूक्ष्माः सुकोमलाः ।
किञ्चिदाकुञ्चिताग्राश्च कुटिलाश्चातिशोभनाः ॥
भ्रूमध्ये मसूराभो लाञ्छनं वा ललाटे वा मशकं राज्यसूचकः ।
वामे कपोले मशकं शोणं मिष्टान्नदं शुभम् ॥
तिलकं लाञ्छनं वापि हृदि सौभाग्यकारणम् ।
यस्या दक्षिणवक्षोजे भवेत् लिङ्गमलञ्छनम् ॥
कन्याचतुष्टयं सूते सूते सा च .... ।

तिलकं लाञ्छनं शोणं यस्या वामकुचे भवेत् ॥
एकं पुत्रं प्रसूयादौ पश्चे च विधवा भवेत् ।
गुह्यस्य दक्षिणे भागे तिलकं यदि योषितः ॥
तदा क्षितिपतेः पत्नी सूते च क्षितिपं सुतम् ।
नासाग्रे मशकः शोणो महिष्या एव जायते ॥
कृष्णः स एव भर्त्तृघ्नाः पुंश्चल्या वा प्रकीर्त्तितः ।
नाभेरधस्तात् तिलकं मशको लाञ्छनं शुभम् ॥
मशकस्तिलकं चिह्नं गुल्फदेशे दरिद्रकृत् ॥
सुलक्षणापि दुःशीला कुलक्षणशिरोमणिः ॥
कुलक्षणापि या साध्वी सर्व्वलक्षणभूस्तु सा ।
कृष्णा कपिलकेशी च मिलितभ्रू कुटिस्तथा ।
गमनं मन्दरश्चैव त्यक्तव्या स्यात् सदा बुधैः ॥
यस्या गमनमात्रेण भूमौ कम्पः प्रजायते ।
बहुश्रिणीं मनीमात्र तां नारीं परिवर्जयेत् ॥
शिरा दृश्या यस्याः कृष्णोष्ठी कृष्णजिह्विका
भर्त्तारं प्रथमं हन्ति द्वितीयश्चैव छिन्दति ॥
चङ्क्रमी विरला यस्याः सलोमा गात्रकर्कशा ।
मेढा पिङ्गलाक्षी सदा दूरतः परिवर्जयेत् ॥
मौचि यस्या प्रसन्नानि ललाटं उदरं भगम् ।
चौचि सा भक्षवादारी श्वशुरं देवरं पतिम् ॥
ललाटे उदरं हन्यात् भटं देवरं तथा ।
अत्र हन्याद्भर्त्तारं महादोषाश्रयः स्मृताः ॥
यस्या अङ्गुष्ठं नाभ्यो वक्तव्य विस्तृतं भवेत् ।
उपरोहे च लोमानि शीघ्रं सा भक्षयेत् पतिम् ॥
करणामानिका यस्याः क्षितिं न स्पृशते यदि ।
द्वितीया वा तृतीया वा सा कन्या सुखवर्जिता ॥
[illegible] तिलकं मशकोऽपि च ।
[illegible] पतिं हरेत् ॥
[illegible] या भवेत्
[illegible] प्राप्नोति विपुलं सुखम् ॥”
इति सामुद्रके स्त्रीलक्षण समाप्तम् ॥
([illegible], त्रि । यथा, महाभारते ।
[illegible] ।

“सामुद्रकं [illegible]
[illegible] ।
[illegible]
[illegible] ॥”)

सामुद्रिक, त्रि, ([illegible] इति
[illegible] इति
[illegible] । (यथा, महा
भारते । १२ । ११८ । २ ।
“[illegible]
इति ।
[illegible] ॥”)
[illegible] । इति [illegible]
[illegible] ([illegible]
[illegible]
[illegible] । इति [illegible] । [illegible]
[illegible]

काले हितम् । सम्पराय+ठक् ।) पारलौकिके, त्रि । यथा,—
“प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्त्तते ।
न साम्परायिकं तस्य दुर्म्मतेर्व्विद्यते फलम् ॥”
इति मनुः । ११ । ३० ।
(सम्परायं युद्धमर्हतीति । तदर्हतीति ठक् । युद्धार्हे, त्रि । यथा, रघुः । १७ । ६२ ।
“पित्रा संवर्द्धितो नित्यं कृतास्त्रः साम्परायिकः ।
तस्य दण्डवतो दण्डः स्वदेहान्न व्यशिष्यत ॥”)

साम्प्रतं, व्य, (सम् च प्रति च द्वयोः समाहारः । ततः प्रज्ञाद्यण् ।) युक्तम् । (यथा, कुमारे । २ । ५५ ।
“इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम् ।
विषवृक्षोऽपि संवर्द्ध्य स्वयं छेत्तुमसाम्प्रतम् ॥”)
इदानीम् । इत्यमरः । ३ । ४ । ११ । २२ ॥
(यथा, ऋतुसंहारे । १ । ७ ।
“नितम्बबिम्बैः सदुकूलमेखलैः
स्तनैः सहाराभरणैः सचन्दनैः ।
शिरोरुहैः स्नानकषायवासितैः
स्त्रियो निदाघं शमयन्ति कामिनाम् ॥”)

माम्भूतस्ते दधिताङ्गमन्धयो… [printed as:]
“समुद्धृतस्ते दयिताङ्गमध्ययो
विमुच्य वासांसि गुरूणि साम्प्रतम् ।
स्तनेषु तन्वंशुकमुन्नतस्तना
निवेशयन्ते प्रमदाः सयौवनाः ॥” * ॥
सम्प्रति भवं साम्प्रतम् । अण् । इदानीन्तने, त्रि । यथा, हरिवंशे । ७ । १६ ।
“वैवस्वतेऽन्तरे चास्मिन् साम्प्रते समुपस्थिते ।
चैष्यात् प्रभृति राजेन्द्र सर्व्वस्यैतस्य सम्भवः ॥”
तथाच तत्रैव । ७ । ३७ ।
“मनोर्वैवस्वतस्यैते वर्त्तन्ते साम्प्रतेऽन्तरे ।
इक्ष्वाकुप्रमुखाश्चैव दशपुत्रा महात्मनः ॥”
तथाच तत्रैव । ८ । ४१ ।
“तस्य ते कीर्त्तयिष्यामि मनोर्वैवस्वतस्य च ।
निसर्गं भरतश्रेष्ठ साम्प्रतस्य महाद्युतेः ॥”)

साम्ब, क सम्बन्धे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) ओष्ठ्यवर्गशेषोपधः । दन्त्यादिः । क, साम्बयति धनं लोकः संबध्नाति इत्यर्थः । इति दुर्गादासः ॥

साम्बरं, क्ली, (सम्बरदेशे भवम् । अण् ।) गडलवणम् । यथा,—
“गडादिलवणं गुप्तं पृथ्वीजं गडदेशजम् ।
गडोत्थञ्च महारम्भं साम्बरं सम्बरोद्भवम् ॥”
इति राजनिर्घण्टः ॥

साम्बरी, स्त्री (सम्बरेण कृता । सम्बर+अण्+ङीप् ।) माया । यथा,—
“शाम्बरी साम्बरी माया मायाकृत्कुहुके नटे”
इति शब्दरत्नावली ॥

साम्बरी, स्त्री, रक्तलोध्रः । इति शब्दचन्द्रिका ॥

साम्बाग्रुर, पु ([illegible] । [illegible] +
“[illegible]” ॥ १ । १ । १ ॥ इति
अण् । [illegible] ।) सनातनः । तत्पर्य्यायः । सान्दमन्दरः । इति हेमचन्द्रः । ३ । ३३० ॥

साम्यं, क्ली, (समस्य भावः । सम+ष्यञ् ।) समता । तुल्यता । यथा,—
“[illegible] सभा सुधा च प्रतिमा च ।

पतत्यप्रानतो विप्रो .
इति
साम्यन्तकस्यानलम् । इति
रणम् ॥ (साम्यावस्थापन्ने, त्रि । यथा,
गीते । ८ । ३ । १२ ।
“नमः शान्ताय घोराय मूढाय …
निर्व्विशेषाय

साम्राज्यं, क्ली, (सम्राजो भावः । ष्यञ् ।) समस्तराज्यम् । (यथा, रघुः । ४ । ५ ।
“छायामण्डललक्ष्येण
पद्मा पद्मातपत्रेण भेजे
दशलक्षाधिपत्यम् । यथा,—
“लक्षाधिपत्यं राज्यं स्यात् साम्राज्यं …

शतलक्षे महेशानि महासाम्राज्यमुच्यते ।”
इति वरदातन्त्रे ॥

साम्राणिकर्द्दमः, क्ली,
द्रव्यम् । इति राजनिर्घण्टः ॥
साम्राणिजं, क्ली, महापारेवतम् । …
निर्घण्टः ॥

सायं, व्य, (स्यति समापयति दिनमिति । षो + बाहुलकात् अम् । युगागमश्च ।) दिनान्तः । इत्यमरः । ३ । ४ । १८ । सन्ध्या । … निर्घण्टः ॥ तथा,—
“दिनान्ते पुंसि सायः स्यात् सायाह्नः सन्ध्यम् ॥”
इति

(यथा, रघुः । १ । ४८ ।
“सद्युत्थापयशाः सापदाश्रमं सायम् …
सायं संयमिनस्तस्य महर्षिमहिषीसख ।”

सायंकालः, पुं, (सायं सायाह्न एव कालः ।) सायाह्नः । सायंसन्ध्यासमयः । …
सागरधृतमकारसूत्रम् ।
“ज्येष्ठा वाप्यवरा पत्नी सायंकाले …
सायमेव तथापि स्यादिष्टका …”
इति तिथ्यादितत्त्वम् ॥

सायंसन्ध्या, स्त्री, (सायं सायाह्ने सन्ध्या ।)
सायंकालोपास्या देवता ।
पासना । सायंसन्ध्योपासनाप्रकार …
सन्ध्याशब्दे द्रष्टव्यम् । पश्चिमा सन्ध्या । …
उत्पत्तिर्यथा,—
मार्कण्डेय उवाच ।
“नारायणः स्वयं सन्ध्या [illegible]
ततः पुरोहाममयं [illegible]
महामुनेर्म्महायज्ञे [illegible]
नाम्नि: [illegible]
एवं कृत्वा [illegible]
सन्ध्यायामहृदये [illegible]
पद विष्णोः प्रमादेन [illegible]
प्रविश्य सदा यत्र सन्ध्या [illegible]
वशिष्ठेन पुरा या तु [illegible]
उपदिष्टा तदन्तु [illegible]

नेव कृत्वा मनसि तपश्चर्योपदेशकम्।
तेलेन तदा सन्ध्या ब्राह्मणं ब्रह्मचारिणम्॥
मेधातिथेर्महायज्ञे मुनिभिर्नोपलक्षिता।
ा विष्णोः प्रसादेन सा विवेश विधेः सुता॥
ाः पुरोडाशमयं शरीरं तत्पलात्ततः।
यं पुरोडाशगन्धं व्यस्तारयदलक्षितम्॥
कृतस्याः शरीरं तद्दग्ध्वा सूर्य्यस्य मण्डले।
ं प्रवेशयामास विष्णोरेवाज्ञया पुनः॥
र्य्यो द्विधा विभज्याथ तच्छरीरं तदा रथे।
के संस्थापयामास प्रीतये पितृदेवयोः॥
र्द्ध भागं तस्यास्तु शरीरस्य द्विजोत्तमाः।
तःसन्ध्याभवत् सा तु अहोरात्रादिमध्यगा॥
च्छेषभागस्तस्यास्तु अहोरात्रान्तमध्यगा।
सायमभवत् सन्ध्या पितृप्रीतिप्रदा सदा॥
र्य्योदयाच्च प्रथमं यदा स्यादरुणोदयः।
तःसन्ध्या तदोदेति देवानां प्रीतिकारिणी॥
स्तं गते ततः सूर्य्ये शोणपद्मनिभा सदा।
देति सायंसन्ध्या सा पितॄणां मोदकारिणी॥"
ति श्रीकालिकापुराणे अरुन्धतीजन्मकथने
२ अध्यायः॥
ंसन्ध्यादेवता, स्त्री, (सायंसन्ध्याया देवता।)
रस्वती। इति कविकल्पलता॥
यः, पुं, (स्यति समापयति दिनमिति। सो +
ाह्वयेति णः। ततो युगागमः।) दिनान्तः।
त्यमरः। १। ४। ३॥ वाणः। इति मेदिनी॥
ायोऽस्त्री विकालके। इति त्रिकाण्डशेषः॥
(सा)यकः, पुं, (स्यति छिनत्तीति। सो +
ण्वुल् + युक्।) वाणः। (यथा, रामायणे।
१। ३१। ६०।
"अभेद्ये कवचे दिव्ये तूणी चाक्षय्यसायकौ॥")
खड्गः। इत्यमरः। ३।३।२॥ (यथा, महा-
भारते। ४। ४०। १४।
"कस्य पाण्डवश्रेष्ठ कोषे सायको हेमविग्रहः।
प्रमाणरूपसम्पन्नः पीत आकाशसन्निभः॥"
पञ्चमसंख्या। यथा, साहित्यदर्पणे। ४।२६४।
"सङ्करेण त्रिरूपेण संसृष्ट्या चैकरूपया।
वेदखाग्निशराः शुद्धे रिपुबाणाग्निसायकाः॥")
सायकपुङ्खा, स्त्री, (सायकस्य पुङ्ख इव पुङ्खो
यस्याः।) शरपुङ्खा। इति राजनिर्घण्टः॥
(सायकस्य पुङ्खे, पुं। यथा, रघुः। २। ३१।
"सक्ताङ्गुलिः सायकपुङ्ख एव
चित्रार्पितारम्भ इवावतस्थे॥")
सायन्तनः, त्रि, (सायं भवः। सायम् + "सायं-
चिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च।" ४।३।
२३। इति ट्युल् तुट् च।) सायंकालभवः।
यथा,—
"सन्ध्यां सायन्तनीं कुर्य्यात् द्वादश्यादिष्वपि
तिथौ।
अकुर्व्वन्निरयं याति यतो नित्यागमक्रिया॥"
इति इन्द्रनीलतन्त्रे प्रथमपटलः॥
सायाह्नः, पुं, (सायमह्नः। "संख्याविसायेति।"
६। ३। ११०। आपकाल् समासः।) पञ्चधा-
विभक्तदिनपञ्चमांशः। दिवसस्य शेषमुहूर्त्त-
त्रयम्। यथा,—
"प्रातःकालो मुहूर्त्तांस्त्रीन् सङ्गवस्तावदेव तु।
मध्याह्नस्त्रिमुहूर्त्तं स्यादपराह्णस्ततः परम्॥
सायाह्नस्त्रिमुहूर्त्तं स्यात् श्राद्धं तत्र न कारयेत्
राक्षसी नाम सा वेला गर्हिता सर्व्वकर्म्मसु॥"
इति तिथ्यादितत्त्वम्॥
तत्पर्य्यायः।
"सायो दिनान्तः सायाह्नो विकालः सायमेव च"
इति शब्दरत्नावली॥
सायिका, स्त्री, क्रमस्थितिः। इति शब्दरत्नावली॥
सायी, [न्] पुं, (सायति नाशयति गतिक्लेश-
मिति। सै क्षये + णिनिः।) अश्वारोहः।
इति केचित्॥
सायुज्यं, क्ली, (सयुजो सहयोगस्य भावः।
ब्राह्मणादित्वात् ष्यञ्।) सहयोगः। एकत्वम्।
तत्तु पञ्चधामुक्त्यन्तर्गतमुक्तिविशेषः। यथा,—
"सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः॥"
इति श्रीभागवते। ३। २८। १३॥
"भक्तानां निष्कामतां कैमुतिकन्यायेनाह।
सालोक्यं मया सह एकस्मिन् लोके वासम्।
सार्ष्टिं समानैश्वर्य्यम्। सामीप्यं निकटवर्त्ति-
त्वम्। सारूप्यं समानरूपताम्। एकत्वं
सायुज्यम्। उत अपि दीयमानमपि न गृह्णन्ति
कुतस्तत्कामना इत्यर्थः।" इति श्रीधरस्वामी॥
"एकत्वं भगवत्सायुज्यं ब्रह्मसायुज्यञ्च। अनयो-
स्तत्कौलात्मकत्वेन तत्सेवनार्थत्वाभावात् ग्रह-
णावश्यकत्वमेवेति भावः।" इति क्रमसन्दर्भः॥
साये, व्य, दिनान्ते। सायंकाले। इति केचित्॥
सार, त् क दौर्व्वल्ये। इति कविकल्पद्रुमः॥
(अदन्तचुरा०-पर०-अक०-सेट्।) रेफोपधः।
अससारत्। इति दुर्गादासः॥
सारं, क्ली, पुं, (सार त् क दौर्व्वल्ये + अच्। सृ गतौ
+ घञ् इति वा।) जलम्। धनम्। (यथा,
रघुः। ४। ७८।
"परस्परेण विज्ञातस्तेषूपायनपाणिषु।
राज्ञा हिमवतः सारो राज्ञः सारो हिमा-
द्रिणा॥")
न्याय्यम्। इति मेदिनी॥ (सरात् जातम्।
सर + अण्।) नवनीतम्। इति राजनिर्घण्टः॥
(यथा, सुश्रुते उत्तरतन्त्रे। २६।
"क्षीरशेषञ्च तन्मथ्य शीतं सारमुपाहरेत्॥"
अमृतम्। यथा, भागवते। ७। ६। २५।
"धर्म्मादयः किमगुणेन च काङ्क्षितेन
सारं जुषां चरणयोरुपगायतां नः॥")
लौहम्। इति भावप्रकाशः। विपिनम्। इति
शब्दरत्नावली॥ ॥ सारवस्तुनि यथा,—
"सारं रसानान्तु घृतं घृतसारं हुतञ्च यत्।
हुतस्य सारं स्वर्गश्च स्वर्गात् सारन्तु योषितः॥
अतो राजन् प्रदेयाः स्युः स्त्रियः स्वर्गमभीप्-
सतः।
तथैवेह सुखं ताभिः सह राज्यं नृपोत्तम॥"
इति वह्निपुराणे दासीदानाध्यायः॥
अपि च।
"असारे खलु संसारे सारमेतच्चतुष्टयम्।
काश्यां वासः सतां सङ्गो गङ्गाम्भः शम्भु-
सेवनम्॥"
इति कवितारत्नाकरधृतपुराणवचनम्॥
सारः, पुं, (सृ + "सृ स्थिरे।" ३।३।१७। इति
घञ्।) बलम्। (यथा, महाभारते। १। १५५।
२३।
"तरस्व भीम मा क्रीड़ जहि रक्षो विभीषणम्।
पुरा विकुरुते मायां भुजयोः सारमर्पय॥")
स्थिरांशः। इत्यमरः। ३। ३। १७०॥ (यथा,
रघुः। १०। १०।
"प्रभानुलिप्तश्रीवत्सं लक्ष्मीविभ्रमदर्पणम्।
कौस्तुभाख्यमपां सारं बिभ्राणं बृहतोरसा॥")
मज्जा। इत्यमरः। २। ४। १२॥ वज्रक्षारम्।
इति राजनिर्घण्टः॥ वायुः। इति जटाधरः॥
रोगः। इति धरणिः॥ पाशकः। इति शब्द-
रत्नावली॥ दध्युत्तरम्। इति शब्दचन्द्रिका॥
(अर्थालङ्कारविशेषः। यथा, साहित्यदर्पणे।
१०। ७२१।
"उत्तरोत्तरमुत्कर्षो वस्तुनः सार उच्यते॥"
यथा,—
"राज्ये सारं वसुधा वसुधायामपि पुरं पुरे
सौधम्।
सौधे तल्पं तल्पे वराङ्गनासर्व्वस्वम्॥")
सारः, त्रि, (सृ + घञ्।) अतिदृढ़ः। इति
शब्दरत्नावली॥ वरः। श्रेष्ठः। इत्यमरमेदिनी-
करौ॥ यथा,—
"सर्व्वसारो यथा कृष्णो व्रतानां पुण्यकं तथा॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे। ३।२०॥
अपि च।
श्रीमार्कण्डेय उवाच।
"जगत् सर्व्वन्तु निःसारमनित्यं दुःखभाजनम्।
उत्पद्यते क्षणादेतत् क्षणादेतत् विपद्यते॥
यथैवोत्पद्यते सारान्निःसारं जगदञ्जसा।
पुनस्तस्मिन्विलीयन्ते महाप्रलयसङ्गमे॥
उत्पत्तिप्रलयाभ्यान्तु जगन्निःसारतां हरिः।
शम्भवे दर्शयामास भावेन जगतां पतिः॥
एकं शिवं शान्तमनन्तमच्युतं
परात्परं ज्ञानमयं विशेषम्।
अद्वैतमव्ययमचिन्त्यरूपं
सारन्त्वेकं नास्ति सारं त्वदन्यत्॥
यस्मादेतज्जायते विश्वमग्रं
यस्मिल्लीनं स्यात् तत्प्रयात् स्थितञ्च।
आकाशमध्ये घटशालस्य हृत्वा
यद्दिश्वं वै भ्रियते तच्च सारम्॥
अष्टाङ्गयोगैर्यदाम विच्छन्
योगी युनक्त्यात्मरूपं सदैव।
निवर्त्तते प्राप्य यत्रेह लोके
तद्धि सारं सारमन्यन्न चास्ति॥

सारो द्वितीयो धर्म्मस्तु यो नित्यप्रासयो भवेत्।
यो वै निवर्त्तको नाम तथाचारः प्रवर्त्तकः ॥
सर्व्वं चरति लोकेऽस्मिन् धर्म्मो नैव च्युतो भवेत्
स्वधर्म्माद्यो न चलति स एवाचार उच्यते ॥
एतद्वः कथितं सारं निःसारञ्च यथा जगत्।
यथा स्वयं ददर्शाग्र शम्भुर्मानेन खेऽम्बरे ॥
एतद्वै दर्शयामास स विष्णुर्जगतां पतिः।
स्वयं जगाद मनसा ध्यानेनात्मनि शङ्करः ॥
सारं तत्त्वं परमं निष्कलं य-
न्मूर्त्यो हीनं मूर्त्तिमान् धर्म्म एषः।
सारोऽन्योऽसौ सारहीनं तदन्यत्
ज्ञात्वैवेष्यं याति नित्यं महाधीः ॥"
इति श्रीकालिकापुराणे २७ अध्यायः ॥

सारकः, पुं, (सारयति मलमिति। सृ + णिच् + ण्वुल्।) जयपालः। इति राजनिर्घण्टः ॥ विरेचके, त्रि। इति वैद्यकम् ॥

सारखदिरः, पुं, (सारः अतिदृढः खदिरः।) दुःखदिरः। इति राजनिर्घण्टः ॥

सारगन्धः, पुं, (सारो गन्धो यस्य।) चन्दनम्। इति शब्दचन्द्रिका ॥

सारग्राही, [न्] त्रि, (सारं गृह्णातीति। ग्रह + णिनिः) सारग्रहणकर्त्ता ॥

सारघं, क्ली, (सरघाभिर्म्मधुमक्षिकाभिः कृतमिति सरघा + अण्।) मधु। इति जटाधरः ॥ (यथा, भागवते। १०। १६। ४२।
"पीत्वा मुकुन्दमुखसारघमक्षिभृङ्गै-
स्तापं जहुर्विरहजं व्रजयोषितोऽह्नि ॥")

सारङ्गः, पुं, (सरतीति। सृ गतौ + "सृवृभूशु-षिमुषिभ्यः।" उणा० १। १२१। इति अङ्गच्। वृद्धिश्च।) चातकपक्षी। इत्यमरः। २।५।१७॥ (यथा, रामायणे। २। ६३। १६।
"उष्णमन्तर्दधे सद्यः स्निग्धा ददृशिरे घनाः।
ततो जहृषिरे सर्व्वे भेकसारङ्गबर्हिणः ॥")
हरिणः। (यथा, भट्टिः। ३। २६।
"गोमायुसारङ्गगणाश्च सम्यक्
मायाविपुर्भीमरवाविपुश्च ॥")
मातङ्गजः। इति मेदिनी ॥ पक्षिभेदः। भृङ्गः। इति विश्वः ॥ यथा,—
"नानुद्वेष्टि कलिं सम्राट् सारङ्ग इव सारभुक्
कुशलान्याशु सिध्यन्ति नेतराणि कृतानि यत् ॥"
इति श्रीभागवते। १। १८। ७ ॥
"ननु अधर्म्महेतुं कलिं सर्व्वथा किं न हतवान् तत्राह नानुद्वेष्टीति। सारङ्गो भ्रमर इव सारग्राही। सारमाह यत् यस्मिन् कुशलानि पुण्यानि आशु संकल्पमात्रेण फलन्ति इतराणि पापानि आशु न सिध्यन्ति यतस्तानि कृतान्येव सिध्यन्ति न तु संकल्पितमात्राणीति।" इति श्रीधरस्वामी ॥ * ॥ छत्रम्। राजहंसः। चित्रमृगः। (यथा, महाभारते। ७। २२। २१।
"वाकोऽश्वो वहन्ति स्म सारङ्गशबला हयाः ॥")
वाद्यभेदः। चम्पकम्। इति शब्दरत्नावली ॥ नानावर्णः। मयूरः। कामदेवः। धनुः। केशः।
स्वर्णम्। आभरणम्। पद्मम्। शङ्खः। चन्दनम्। कर्पूरम्। पुष्पम्। कोकिलः। मेघः। पृथिवी। रात्रिः। दीप्तिः। सिंहः। इत्यनेकार्थकोषः ॥ * ॥ सारङ्गहरिणमांसगुणाः।
"सारङ्गं जाङ्गलं स्निग्धं मधुरं लघु हृद्यदम्।"
इति राजनिर्घण्टः ॥

सारङ्गः, त्रि, (सृ + अङ्गच्।) शबलः। इत्यमरः। ३। ३। २१ ॥ "सारङ्गश्चातके ख्यातः शबले हरिणेऽपि च। इति तालव्यादावजयः। अतएव सारङ्गो दृश्यादिस्तालव्यादिश्च।" इति भरतः ॥

सारङ्गिकः, पुं, (सारङ्गं हन्तीति। सारङ्ग + "पक्षि-मत्स्यमृगान् हन्ति।" ४।४।३५। इति ठक्।) व्याधः। इति सिद्धान्तकौमुदी ॥

सारङ्गी, स्त्री, वाद्यविशेषः। इति केचित् ॥

सारजं, क्ली, (सारात् जायते इति। जन + डः।) नवनीतम्। इति शब्दचन्द्रिका ॥

सारणं, क्ली, (सारयतीति। सृ + णिच् + ल्युः।) गन्धभेदः। इति धरणिः ॥

सारणः, पुं, (सृ + णिच् + ल्युः।) अतीसाररोगः। रावणमन्त्री। इति हेमचन्द्रः ॥ भद्रबला। इति धरणिः ॥ आम्रातकः। इति शब्दचन्द्रिका ॥

सारणिः, स्त्री, (सृ + णिच् + अनिः। इत्युणादिवृत्तौ उज्ज्वलः। २।१०३।) क्षुद्रनदी। प्रसारणी। इत्युणादिकोषः ॥

सारणिकः, त्रि, पथिकः। सरणिशब्दात् ठिणक्-प्रत्ययेन निष्पन्नः ॥ (यथा, महाभारते। १२। ८१। ३६।
"यदा सारणिकान् राजा पुत्त्रवत् परिरक्षति।
भिनत्ति च न मर्य्यादां स राज्ञो धर्म्म उच्यते ॥")

सारणिकघ्नः, पुं, (सारणिकान् पथिकान् हन्तीति हन + टक्।) दस्युः। इति केचित् ॥

सारणी, स्त्री, (सारणि + वा ङीष्।) प्रसारणी। स्वल्पनदी। इति मेदिनी ॥ (यथा, अनर्घराघवे। २। २५।
"आलवालवलयेषु भूरुहां
मांसलस्तिमितमन्तरान्तरा।
केरलीचिकुरभङ्गिभङ्गुरं
सारणीषु पुनरम्बु दृश्यते ॥")

सारण्डः, पुं, सर्पाण्डः। इति जटाधरः ॥

सारतरुः, पुं, (सारं जलं तत्प्रधानस्तरुः।) कदलीवृक्षः। इति धनञ्जयः ॥

सारथिः, पुं, (सरत्यश्वानिति। सृ + अन्तर्भावितण्यर्थः + "सर्त्तेर्णिच।" उणा० ४। ८८। इति अथिन्।) रथादिघोटकनियोगकर्त्ता। तत्पर्य्यायः। नियन्ता २ प्राजिता ३ यन्ता ४ सूतः ५ क्षत्ता ६ सव्येष्टा ७ दक्षिणस्थः ८ रथकुटुम्बी ९। इत्यमरः। २।८।५९-६० ॥ सादी १० सव्येष्ठः ११ नियामकः १२ चातुरिकः १३। इति जटाधरः ॥ प्रवेता १४ रथनागरः १५। इति शब्दरत्नावली ॥ सरथस्यापत्यं सारथिः बाह्वादित्वात् इञ्। इति केचित्। सह रथेन वर्त्तते योऽसौ सरथः अश्वः तं प्रेरयति इति प्रेरयति अस्मात् नाम्नीति अथिप्रत्ययो वा। इति टीकायां भरतः ॥ तत्पर्य्यायो यथा, २१५। २०—२१।
"निमित्तमक्रूरमनो हयविद्याविशारदः
व्यायुर्व्वेदतत्त्वज्ञो भूरिभागविचक्षणः।
सूरश्च कृतविद्यश्च सारथिः
समुद्रः। इति संक्षिप्तसारोणादिवृत्तिः।

सारदा, स्त्री, (सारं ददातीति। दा + क।) सरस्वती। इति शब्दरत्नावली ॥ दुर्गा शरत्कालबोधनीयत्वेन तालव्यादि
स्तृपदं तालव्यादि
मुक्तालतिका। इति तिथ्यादितत्त्वम्।
दातरि, त्रि ॥

सारद्रुमः, पुं, (सारः अतिदृढः द्रुमः।) इति राजनिर्घण्टः
४३। ५८।
"उत्थापयेत् लक्ष सहस्रयुर
सारद्रुमाभग्नकुमारिकान्वितम् ॥")

सारपादपः, पुं, (सारः अतिदृढः पादपः) धामनिवृक्षः। इति रत्नमाला ॥

सारभाण्डं, क्ली, (सारस्य भाण्डमिव।) पात्रम्। यथा मृगनाभ्यादि ॥ (वल्कारः। २। २५०।
"समुद्रपरिवर्त्तञ्च सारभाण्डञ्च कथितम्
आधानं विक्रयं वापि नयतो दण्डकल्पना")

सारमितिः, पुं, वेदः। इति हेमचन्द्रः ॥ यथार्थं मीयते ज्ञायते अनेन सारमितिः। सारोपपदात् माधातोर्णाप्नोति तिः।

सारमूषिका, स्त्री, (सारे मूषिकेव) इति राजनिर्घण्टः ॥

सारमेयः, पुं, (सरमाया अपत्यं पुमानिति ढक्।) कुक्कुरः। इत्यमरः। २। १०। २१ ॥ (यथा, महाभारते। ६। ८। ७२।
"अन्योन्यस्यावलुम्पन्ति
राजानो भरतश्रेष्ठ भोक्तुकामा वसुन्धराम्।

सारमेयी, स्त्री, (सरमाया अपत्यं स्त्री। ढक् ङीष्।) कुक्कुरी। इति शब्दरत्नावली ॥

सारलोहं, क्ली, (सारं श्रेष्ठं लोहम्।) सारः। इति भूरिप्रयोगः ॥

सारवः, त्रि, (सरय्वां भवः। अण्। "दाण्डिनायनहास्तिनायनेति।" ६। ४। १७४। इति निपातनात् साधुः।) सरयुनदीभवजलम्। इत्यमरः। १। १०। ३६ ॥

सारवर्ज्जितः, त्रि, स्थिरांशरहितः। असारः। सारेण वर्ज्जित इति तृतीयातत्पुरुषसमासेन निष्पन्नः ॥

सारसं, क्ली, (सरसि भवम्। सरस् + अण्।) पद्मम्। इत्यमरः। १। १०। ४० ॥ स्त्रीकट्याभरणम्। इति केचित् ॥

[illegible] । सारस्वत, पु, सारस्वती देवतास्येति । अण् ।)

[illegible] । यथा,—

[illegible]

[illegible]

[illegible]

[illegible] ॥"

इति [illegible] ॥

[illegible]

"[illegible]

[illegible] ।

[illegible]

[illegible] ॥"

इति [illegible] ॥)

[illegible] इति [illegible] ॥

[illegible] (सरति अच । अण् ।) [illegible] । तत्पर्यायः । पुष्कराह्वः १ । [illegible] २ । ४ । ३३ ॥ [illegible] ३ [illegible] ४ [illegible] ५ [illegible] ६ [illegible] ७ [illegible] ८ [illegible] ९ [illegible] १० । [illegible] । मधुरत्वम् । [illegible] । [illegible] । [illegible] ॥ [illegible] यथा,—

"[illegible] दिक्षु

[illegible] ।

[illegible] न गर्षात्

[illegible] एव यथात् ॥

[illegible] योषित्कुसुमास्त्रकारी

[illegible] नृपतीऽयमर्थे ।

यः सारसाभ्यां युगपद्विराव:

[illegible] ।

[illegible] कथितार्थकारी

[illegible] वर्गः ॥"

इति वसन्तराजशाकुने सारसवर्गः ॥

सारसनं, क्ली, (सारं सनोति ददातीति । षण + अच् ।) काञ्ची । स्त्रीकट्याभरणम् । इत्यमरः ।२।६।१०८ ॥ अस्य पर्य्यायः काञ्ची-शब्दे द्रष्टव्यः ॥ कञ्चुकदार्ढ्यार्थं मध्यकायनिबद्ध-पट्टिकादि । तत्पर्य्यायः । अधिकाङ्गम् २ । इत्यमरः । २ । ८ । ६३ ॥ दे कञ्चुकदार्ढ्यार्थे मध्यकाये निबद्धे पट्टिकादौ । सकञ्चुकाः सन्नद्धाः मध्ये दार्ढ्यार्थं यद्बध्नन्ति तत् सारसनं अधिकाङ्गञ्चोच्यते । इति भरतः ॥ (यथा, [illegible] । १८ । ३२ ॥

"तवोत्तरीयं करिचर्म्म साङ्गजं

ज्वलन्मणिः सारसनं महानहिः ।

स्रगास्यपङ्क्तिः शवभस्म चन्दनं

कला हिमांशोश्च समञ्चकासत ॥")

सारसी, स्त्री, (सारस + जातौ ङीष् ।) सारस-पक्षी । इति हेमचन्द्रः ॥ (यथा, महाभारते । ११ । १८ । १४ ।

"हंसगद्गदभाषिण्यो दुःखशोकप्रमोहिताः ।

सारस्य इव वासन्त्यः पतिताः पश्य माधव ! ॥")

[illegible] । ([illegible] ।) [illegible] । [illegible] इति हेमचन्द्रः ॥ यथा । [illegible] ।

"[illegible] ॥"

इति ज्योतिस्तत्त्वम् ॥

[illegible] । [illegible] । यथा,—

"सारस्वताः कान्यकुब्जा गौडमैथिलकोत्कलाः ।

पञ्च गौडा इति ख्याता विन्ध्यस्योत्तरवासिनः ॥"

इति पुराणम् ॥

कल्पविशेष ॥ यथा,—

"सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः ।

तद्वृत्तान्तोद्भवं लोके तद्भागवतमुच्यते ॥"

इति मात्स्ये ५० अध्यायः ॥

व्याकरणविशेषः । (नवमद्वापरयुगस्य व्यासः । यथा, देवीभागवते । १ । ३ । २८ ।

"सारस्वतस्तु नवमे त्रिधामा दशमे तथा ॥"

घृतविशेषे, क्ली । यथा,—

"समूलपत्रामादाय ब्राह्मीं प्रक्षाल्य वारिणा ।

उदूखले क्षोदयित्वा रसं वस्त्रेण गालयेत् ॥

रसे चतुर्गुणे तस्मिन् घृतप्रस्थं विपाचयेत् ।

औषधानि तु पिष्टानि तानीमानि प्रदापयेत् ॥

हरिद्रा मालती कुष्ठं त्रिवृतो सहरीतकी ।

पलिका पलिकान् भागान् शेषाणि कार्षिकाणि तु

पिप्पल्योऽथ विडङ्गानि सैन्धवं शर्करा वचा ।

सर्व्वमेतत् समालोड्य शनैर्मृद्वग्निना पचेत् ॥

एतत्प्राशितमात्रेण वाग्विशुद्धिश्च जायते ।

सप्तरात्रप्रयोगेण किन्नरैः सह गीयते ॥

अर्द्धमासप्रयोगेण सोमराजीवपुर्भवेत् ।

मासमात्रप्रयोगेन श्रुतमात्रन्तु धारयेत् ॥

हन्त्यष्टादशकुष्ठानि अर्शांसि विविधानि च ।

पञ्चगुल्मान् प्रमेहांश्च कासं पञ्चविधं जयेत् ॥

वन्ध्यानाञ्चैव नारीणां नराणामल्परेतसाम् ।

घृतं सारस्वतं नाम बलवर्णाग्निवर्द्धनम् ॥"

इति वैद्यकचक्रपाणिसंग्रहे रसायनाधिकारे ॥

इदमेव ब्राह्मीघृतमित्याख्ययापि प्रसिद्धम् ॥०॥

त्रि, सरस्वतीसम्बन्धी । (यथा, याज्ञवल्क्ये । ३ । ८३ ।

"वर्णिनां हि वधो यत्र यत्र साध्यन्तं वदेत् ।

तत्पावनाय निर्व्वाप्यश्चरुः सारस्वतो द्विजैः ॥")

सारस्वतदेशसम्बन्धी ॥ (सरस्वतीनदीसम्बन्धी । यथा, मेघदूते । ५१ ।

"कृत्वा तासामभिगममपां सौम्य सारस्वतीना-मन्तः शुद्धस्त्वमपि भविता वर्णमात्रेण कृष्णः ॥")

सारस्वतकल्पः, पुं, (सारस्वतः कल्पः ।) सरस्वत्युपासनाप्रकरणम् । यथा,—

ब्रह्मोवाच ।

"शृणु ब्रह्मन् परं गुह्यं कल्पं सारस्वतं मम ।

यस्य विज्ञानमात्रेण जाड्यापहरणं भवेत् ॥

सर्व्वशास्त्रप्रकाशश्च सर्व्वज्ञो जायतेऽचिरात् ।

अभ्यासात् भवेद्रूप्य यावदिच्छा मनसि हि ॥

[illegible] दृष्टमतिः ।

देवासुरोऽपि [illegible] ॥

मन्त्रोद्धारं प्रवक्ष्यामि साङ्गावरणपूजनैः ।

[illegible] वासरणान्तभूषितम् ॥

जपेत् द्वादशलक्षन्तु मूकोऽपि वाक्पतिर्भवेत्

नाभौ [illegible] ध्यात्वैवमिदं सुधीः ॥

तन्मध्ये भावयेत्पद्मं मन्त्राणां [illegible] ।

रत्नसिंहासनं तत्र वर्णमयीं सन्नामयं पुनः ॥

तस्योपरि पुनर्ध्यायेद् वै वागीश्वरीं ततः ।

मुक्ताकान्तिनिभां देवीं ज्योत्स्नाजाल-

विकाशिनीम् ॥

मुक्ताहारयुतां शुभ्रां शशिखण्डविमण्डिताम् ।

बिभ्रतीं दक्षहस्ताभ्यां व्याख्यां वर्णस्य मालि-

काम् ॥

अमृतेन तथा पूर्णं घटं दिव्यञ्च पुस्तकम् ।

दधतीं वामहस्ताभ्यां पीनस्तनभरान्विताम् ॥

मध्ये क्षीणां तथा स्वच्छां नानारत्नविभूषिताम्

ध्यात्वाभेदेन ध्यात्वैव ततः संपूजयेत् क्रमात् ॥

चापेन दीर्घयुक्तेन कुर्य्यादङ्गानि हस्तयोः ।

हृदयादौ तथा कुर्य्याद्बीजेनाङ्गक्रिया पुनः ॥

भ्रुवोर्मध्ये तथा नाभौ गुह्ये च दिगिकस्तथा ।

स्वशिरोऽङ्गे पुनर्न्यस्तो व्यापकं विन्यसेत्ततः ॥

पीठन्यासं ततो कुर्य्यात् देवताभावशुद्धये ।

मातृकायान्तु यत् प्रोक्तं पीठमभ्यर्च्य यत्नतः ॥

ध्यानेनावाहनं दद्यात् मूर्त्तिं मूलेन कल्पयेत् ।

आवाह्य पूजयेत्तस्यां देवीं वागीश्वरीं ततः ॥

अङ्गैः प्रथमा हृत्तिः स्यात् द्वितीया शक्ति-

भिस्ततः ।

दलाग्रेषु समभ्यर्च्य ब्राह्म्याद्या यथाविधि ॥

लोकपाला बहिः पूज्यास्तेषामस्त्राणि तद्बहिः ।

एवं सम्पूजयेन्मन्त्री जपहोमरतस्तदा ॥

कवित्वं लभते वाग्मी सर्व्वद्वादभिर्ध्रुवम् ।

प्रातर्ब्राह्मी सहस्रन्तु पिबेद्ब्राह्मीं वचान्विताम्

न विस्मरति मेधावी श्रुतान् वेदागमानपि ।

कण्ठमात्रोदके स्थित्वा ध्यायेन्मार्त्तण्डमण्डले ॥

ज्योतिःपुञ्जनिभां देवीं परिवारसमन्विताम् ।

वराभययुतां हस्ते मुद्रापुस्तकधारिणीम् ॥

जपन् सहस्रमात्रेन षण्मासं विजितेन्द्रियः ।

भीमां सम्प्राप्य वाक्सिद्धिं कवीनामग्रणीर्भवेत्

अथ योगं प्रवक्ष्यामि जाड्यनाशकरं परम् ।

रात्रिशेषे समुत्थाय शुचिर्भूत्वा समाहितः ॥

शुद्धभावेन चात्मानं गुरुञ्च परिकल्पयेत् ।

तत्प्रभापटलव्याप्तं जगत् सर्व्वं विचिन्तयेत् ॥

मूलाधारे स्थितां देवीं कुण्डलीं परदेवताम् ।

सुप्तां प्रोत्थाप्य तां शक्त्या क्रमाच्चक्राणि भेदयेत्

ततः परशिवे नीत्वा सौधोच्च प्रापयेत्ततः ।

ऊर्द्ध्वग्रन्थिं विनिर्भिद्य जिह्वां दीपस्वरूपिणीम्

बीजरूपस्वशक्त्या तु श्रीप्रसन्तीं परात्मिकाम् ।

शब्दब्रह्मस्वरूपाञ्च निश्चलां चिन्तयेत् पुनः ॥

तत्प्रभापटलव्याप्तं शरीरं चिन्तयेत्ततः ॥

नित्यं सहस्रमानेन जपेत् संवत्सरं यदि।
ततः संजायते मन्त्री वाचस्पतिरिवापरः ॥
छन्दोऽलङ्कारतर्कादिनानाशास्त्रार्थविद्भवेत्।
कवित्वं ज्ञानमतुला तु पाण्डित्यमधिकं भवेत् ॥
अथापरं प्रवक्ष्यामि योगं भुवि सुदुर्लभम्।
नाभिचक्रस्थितां सौम्यां रक्ताकारां विचिन्तयेत् ॥
क्षौमाबद्धनितम्बाञ्च रत्नाभरणभूषिताम्।
पाशाङ्कुशधरां दिव्यां वराभययुतां पुनः ॥
दृष्टां चामृतवर्षिण्या पूरयन्तीं मनोरथान्।
एवं ध्यात्वा जपेल्लक्षं मनुज्ञो विधिवत् ततः ॥
होमं कुर्य्यात् त्रिमध्वक्तं रक्तोत्पलयुतैर्द्विजः।
ततः सन्तर्पयेद्देवीं दुग्धयुक्तेन सर्पिषा ॥
पायसेन बलिं दद्यात् दधिपिष्टमधुप्लुतैः।
एवं कृत्वा विधानन्तु साक्षाद्वैश्रवणो भवेत् ॥
सिद्धार्थैस्त्रिमधुरोपेतैर्हुत्वा जगद्वशं नयेत्।
पद्मदानेन महतीं प्राप्नुयात् श्रियमूर्जिताम् ॥
देवीहृदयविद्याया नास्ति किञ्चित् सुदुर्लभम्
स्नेहभावेन सम्प्रोक्तं न देयं यस्य कस्यचित् ॥
एतत्ते कथितं दिव्यं विद्योत्पत्तेश्च कारणम्।
विष्णुना दत्तमक्षय्यं मया तुभ्यं द्विजोत्तम ॥
सिद्धमन्त्री यदा मन्त्री बालिशस्यापि मूर्द्धनि।
हस्तं दत्त्वा जपेत् सोऽपि सौधीं वाचमनर्गलाम् ॥"

इति स्वायम्भुवमातृकातन्त्रे सारस्वतः पटलः।
इति तन्त्रसारः ॥

सारस्वतव्रतः, पुं, (सारस्वतः सरस्वतीदेवताकः व्रतः।) सरस्वत्या व्रतविशेषः। यथा,—

मनुरुवाच।
"मधुरा भारती केन व्रतेन मधुसूदन।
तथैव जनसौभाग्यमतिविद्यासुकौशलम् ॥
अभेदश्चापि दम्पत्योस्तथा बन्धुधनेन च।
आयुश्च विपुलं पुंसां तन्मे कथय माधव ॥

मत्स्य उवाच।
सम्यक् पृष्टं त्वया राजन् शृणु सारस्वतं व्रतम्
यस्य सङ्कीर्त्तनादेव तुष्यतीह सरस्वती ॥
यो यद्भक्तः पुमान् कुर्य्यादेतद्व्रतमनुत्तमम्।
तद्वासरादौ सम्पूज्य विप्रानेतत् समारभेत् ॥
अथवादित्यवारेण ग्रहताराबलेन वा।
पायसं भोजयेद्विद्वान् कृत्वा ब्राह्मणवाचनम् ॥
शुक्लवस्त्राणि दत्त्वा च सहिरण्यानि शक्तितः।
गायत्रीं पूजयेद्भक्त्या शुक्लमाल्यानुलेपनैः ॥
यथा न देवो भगवान् ब्रह्मा लोकपितामहः।
त्वां परित्यज्य सन्तिष्ठेत्तथा भव वरप्रदा ॥
वेदाः शास्त्राणि सर्व्वाणि नृत्यगीतादिकञ्च यत्।
न विहीनं त्वया देवि तथा मे सन्तु सिद्धयः ॥
लक्ष्मीर्मेधा धरा पुष्टिर्गौरी तुष्टिः प्रभा मतिः।
एताभिः पाहि तन्वष्टाभिर्मां सरस्वति ॥
एवं सम्पूज्य गायत्रीं वीणाक्षमालधारिणीम्।

शुक्लपुष्पाक्षतैर्भक्त्या सकमण्डलुपुस्तकाम् ।
मौनव्रतेन भुञ्जीत सायं प्रातश्च धर्म्मवित् ॥
पञ्चम्यां ...

तथैव तण्डुलप्रस्थं घृतपात्रेण संयुतम्।
क्षीरं दद्याद्धिरण्यञ्च गायत्री प्रीयतामिति ॥
सन्ध्यायाञ्च तथा मौनमेतत् कुर्व्वन् समाचरेत्।
नान्तराभोजनं कुर्य्यात् यावन्मासास्त्रयोदश ॥
समाप्ते तु व्रते दद्यात् भोजनं शुक्लतण्डुलैः।
सुवर्णं वस्त्रयुग्मञ्च गाञ्च विप्राय शोभनाम्।
देव्या वितानं घण्टाञ्च सितनेत्रपटावृताम्।
चन्दनं वस्त्रयुग्मञ्च दध्यन्नं शिखरं पुनः।
तथोपदेष्टारमपि भक्त्या सम्पूजयेद्गुरुम् ॥
वित्तशाठ्येन रहितो वस्त्रमाल्यानुलेपनैः।
अनेन विधिना यस्तु कुर्य्यात् सारस्वतं व्रतम्।
विद्यावानर्थयुक्तश्च रक्तकण्ठश्च जायते ॥
सरस्वत्याः प्रसादेन ब्रह्मलोके महीयते।
नारी वा कुरुते या तु सापि तत्फलभागिनी
ब्रह्मलोके वसेद्राजन् यावत् कल्पायुतत्रयम्।
सारस्वतं व्रतं यस्तु शृणुयादथवा पठेत्।
विद्याधरपुरे सोऽपि वसेदब्दायुतत्रयम् ॥"

इति मत्स्यपुराणे। ६६। १—२४ ॥

सारस्वताः, पुं भूम्नि, (सारस्वते भवाः। अण्।) सारस्वतदेशजातमनुष्यः। यथा, हेमचन्द्रे।
"काश्मीरास्तु माधुमताः सारस्वतास्तु विकर्णिकाः ॥"

सारस्वतोत्सवः, पुं, (सारस्वतः सरस्वतीसम्बन्धी उत्सवः।) सरस्वत्या उत्सवः। इति तिथ्यादितत्त्वम् ॥ अस्य प्रमाणादिकं सरस्वतीशब्दे द्रष्टव्यम् ॥

सारा, स्त्री, (सारयतीति। सृ+णिच्+अच् टाप्।) कृष्णत्रिवृता। इति शब्दरत्नावली ॥ दूर्व्वा। इति शब्दचन्द्रिका ॥ (स्नुहीभेदः॥ शातला अनेन नाम्ना प्रसिद्धा ॥ यथा,—
"सातला सप्तला सारा विमला विदुला च सा
तथा निगदिता भूरिफेना चर्म्मकषेत्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

सारालः, पुं, (सारेण सरत्वेन अलति पर्य्याप्नोतीति। अल अच्।) तिलः। इति शब्दचन्द्रिका ॥

सारिः, पुं, स्त्री, (सरतीति। सृ+इण्।) पाशकः। इति शब्दरत्नावली ॥

सारिका, स्त्री, (सरति गच्छतीति। सृ+ण्वुल् टाप्।) पक्षिविशेषः। इत्यमरः। २।५।८ ॥ शालिक इति भाषा ॥ (यथा, रामायणे। २।५३।२२।
"मन्ये प्रीतिविशिष्टा सा मत्तो लक्ष्मण सारिका।
यस्तस्याः श्रूयते वाक्यं शुक पादमरेर्दंश ॥")
तत्पर्य्यायः। पीतपादा २ गोराटी ३ गोकिराटिका ४। इति हेमचन्द्रः॥ शारिका ५ सारी ६ शारी ७ चित्रलोचना ८। इति शब्दरत्नावली ॥ मधुरालापा ९ पूती १० मेधाविनी ११ गोराष्टिका १२ गोकिराटी १३ गोरिका १४ कलहप्रिया १५। इति राजनिर्घण्टः ॥)

सारिणी, स्त्री, (सरतीति। सृ+णिनि।) सहदेवी। कार्पासी। दुरालभा। शिंशपा। प्रसारिणी। रक्तपुनर्नवा। इति राजनिर्घण्टः ॥

सारिवा, स्त्री, लताविशेषः। ... ख्याता। गोरिया साव ... सा तु अनन्तमूलेत्युच्यते। ... तत्पर्य्यायः। शारदा २ गोपी ३ गोपवल्ली ५ प्रतानिका ... काष्ठसारिवा ८। इति ... १० उत्पलसारिवा ११ अनन्ता १२ ... १३ श्यामा १४। गुणाः। मधुरत्वम्। स्निग्धत्वम्। पित्तप्रणाशित्वञ्च। इति ...

कृष्णसारिवा। ... कालघण्टेति प्रसिद्धा। करिया ... हिन्दी भाषा। तत्पर्य्यायः। कृष्णमूली २ कृष्णा ... सारिवा ४ भद्रा ५ चन्दनगोपा ६ ... कृष्णवल्ली ८। अस्या गुणाः। ... त्वम्। तिक्तत्वम्। कटुरसत्वञ्च। ... निर्घण्टः ॥ अपि च।
"सारिवाद्वौ तु मधुरौ हिमौ
कुष्ठकण्डुज्वरहरौ देहदुर्गन्धिनाशनौ।" इति ...

किञ्च।
"सारिवायुगलं स्वादु स्निग्धं
अग्निमान्द्यरुचिश्वासकासामविषनाशनम्।
दोषत्रयास्रप्रदरज्वरातिसारनाशनम्।"
इति भावप्रकाशः।

सारी, स्त्री, (सारि+वा ङीष्।) ... पक्षिणी। पाशकः। इति ... सप्तला। इति राजनिर्घण्टः ॥ (अस्या गुणादयो ज्ञातव्याः ॥)

सारोष्ट्रिकः, पुं, (सारोष्ट्रे देशे भवः। ... ठञ्।) विषभेदः। सारोष्ट्री ... सारोष्ट्रिकः ढघे कादिति ... सुराष्ट्रशब्दात् सौराष्ट्रिकः। इति ... इत्यमरभरतौ। १।८।१०॥

सार्थः, पुं, (सरतीति। सृ+ ... २।५। इति थन्। स च णित्।) ... इत्यमरः। २।६।४१॥ वणिक्समूहः। (... रघुः। १०।६४।
"वापीष्विव स्रवन्तीषु वनेषूपवनेष्विव।
सार्थाः स्वैरं स्वकीयेषु चेरुर्वेश्मस्विवाद्रिषु ॥")
समूहमात्रम्। इति मेदिनी ॥ (यथा, ... संहितायाम्। ८६। ४८।
"पश्चिमे शर्व्वरीभागे नौमुकोभयतः ...
सर्व्व एव विपर्य्यस्ता याम्याः सार्थ्य ...")

सार्थः, त्रि, अर्थेन सह वर्त्तमानः। ... इति हेमचन्द्रः ॥ यथा, वनपर्व्वणि।

ार्थः प्रमथनो मित्रं भार्य्या मित्रं गृहे सतः ।
तुरस्य भिषङ्मित्रं दानं मित्रं मरिष्यतः ॥"
इति शुद्धितत्त्वम् ॥
कः, त्रि, (सार्थ+कन् ।) अर्थेन सह वर्त्त-
नः । यथा,—
"दात्मरमपेक्ष्यैव सार्थकः सार्थबोधकृत् ।
ःतिः प्रत्ययश्चैव निपातश्चेति स त्रिधा ॥"
इति शब्दशक्तिप्रकाशिका ॥
नफलः । यथा, भागवते । १० । ४१ । ४५ ।
"ह नः सार्थकं जन्म पावितञ्च कुलं प्रभो ।
दैवर्षयो मह्यं तुष्टा ह्यागमनेन वाम् ॥"
वाहः, पुं, (सार्थं वहतीति । वह+अण् ।)
णक् । इत्यमरः । २ । ९ । ७८ ॥ (यथा,
विलासे । १ । ११ ।
कोत्तरं सहृदयरात्मनीसंस्थितं कदा-
चित्तम् ।
स्य सार्थवाहो दत्तमहार्घोपहारमणि-
कनकः ॥")
त्रि, (आर्द्रेण सह वर्त्तमानम् ।) आर्द्रम् ।
मरः । ३ । १ । १०५ ॥ आर्द्रयुक्ते, त्रि ।
हुमात्रं स्थौल्येन वाहुमात्रः प्रमाणतः ।
य सपलाशश्च दण्ड इत्यभिधीयते ॥"
इति प्रायश्चित्ततत्त्वधृताङ्गिरोवचनम् ॥
व्य,सहितम् । इत्यमरः । ३।४।४ ॥ (यथा,
ाभारते । ७ । २७ । २ ।
र्मा भ्रातृभिः सार्द्धं युद्धार्थी पृष्ठतोऽन्व-
यात् ॥")
,त्रि, अर्द्धेन सह वर्त्तमानम् । अर्द्धयुक्तम् ।
ा,—
निभिर्द्विरशनं प्रोक्तं विप्राणां मर्त्त्यवासिनां
नित्यम् ।
इनि च तथा तमस्विन्यां सार्द्धप्रहरया-
मान्तः ॥"
इति तिथ्यादितत्त्वम् ॥
पि च ।
तिऽब्दे दितये सार्द्धे पहुपक्षे दिनद्वये ।
वसस्याष्टमे भागे पतत्येकोऽधिमासकः ॥"
इति मलमासतत्त्वम् ॥
र्पिषः, त्रि, (सर्पिषः अयं सर्पिषा संस्कृतो
। सर्पिस्+अण् ।) सर्पिःसम्बन्धी । सर्पिः-
कृतवस्तु । सर्पिःशब्दात् ष्णप्रत्ययेन निष्पन्नः ॥
र्पिष्कं, त्रि, (सर्पिस्+"तेन संस्कृतम् ॥"इति
क् ।) सर्पिषा संस्कृतम् । यथा,—
सार्पिष्कं दाधिकं सर्पिर्दधिभ्यां संस्कृतं
क्रमात् ।"
इति हेमचन्द्रः ॥
र्प्यः, पुं,(सर्पो देवता यस्य । यत् ।) अश्लेषा-
ाक्षत्रम् । इति हेमचन्द्रः ॥ (यथा, रामायणे ।
। । १८ । १५ ।
पुष्ये जातस्तु भरतो मीनलग्ने प्रसन्नधीः ।
सार्प्ये जातौ तु सौमित्री कुलीरेऽभ्युदिते रवौ ॥
सर्षपस्यायमिति ।) सर्षपसम्बन्धिनि, त्रि ॥

सार्व्वः, पुं, (सर्व्वस्मै हितः । सर्व्व+"सर्व्वसर्व्व-
पुरुषाभ्यां णढञौ ।" ५ । १ । १० । इति णः ।)
बुद्धः । जिनः । इति हेमचन्द्रः ॥ सर्व्वसम्ब-
न्धिनि, त्रि ॥
सार्व्वजनिकः, त्रि, (सर्व्वजनाय हितः । "सर्व्व-
जनात् ठञ्खञौ ।" ५ । १ ।९। इत्यस्य वार्त्ति-
कोक्त्या ठञ् ।) सकलजनहितः । सर्व्वजन-
शब्दात् ष्णिकप्रत्ययेन निष्पन्नः ॥
सार्व्वजनीनः, त्रि,(सर्व्वजनाय हितः । सर्व्वजन
+खञ् ।) सार्व्वजनिकः । सर्व्वजनशब्दात्
ष्णीनप्रत्ययेन निष्पन्नः ॥
सार्व्वभौमः,पुं,(सर्व्वभूमौ विदितः ।"तत्र विदित
इति च ।" ५।१।४३। इत्यण् ।) उत्तरदिग्-
गजः । इत्यमरः । १ । ३ । ४ ॥ सर्व्वभूमीश्वरः ।
तत्पर्य्यायः । चक्रवर्त्ती २ एकजन्मा ३ नृपा-
ग्रणीः ४ । इति शब्दरत्नावली ॥ (यथा,
महाभारते । ३ । ९३ । ९ ।
"भरतस्य च वीरस्य सार्व्वभौमस्य पार्थिव ! ।
भुवं प्राप्स्यति दुष्प्रापान् लोकांस्तीर्थपरि-
प्लुतः ॥")
विदूरथपुत्त्रः । यथा,—
"परिच्चिरनपत्योऽभूत् सुरथो नाम जाह्नवः ।
ततो विदूरथस्तस्मात् सार्व्वभौमस्ततोऽभवत् ॥"
इति श्रीभागवते ९ स्कन्धे २२ अध्यायः ॥
(पुरुवंशीयाहंयातिनृपस्य पुत्त्रः । यथा, महा-
भारते । १ । ९५ । १५—१६ । "अहंयातिः
खलु कृतवीर्य्यदुहितरमुपयेमे भानुमतीं नाम ।
तस्यामस्य यज्ञे सार्व्वभौमः । सार्व्वभौमः खलु
जित्वा जहार कैकेयीं सुनन्दां नाम तामुप-
येमे ॥"॥) सकलभूमिसम्बन्धिनि, त्रि ॥
सार्व्वलौकिकः,त्रि,(सर्व्वलोके विदितः । "लोक-
सर्व्वलोकात् ठञ् ।" ५।१।४४ । इति ठञ् ।)
सर्व्वजनविदितः । यथा,—
"भवन्तं कार्त्तवीर्य्योयो हीनपक्षिमचीकरत् ।
जिगाय तस्य हन्तारं स रामः सार्व्वलौकिकः ॥"
इति भट्टिकाव्ये ५ सर्गः ॥
सार्व्वलौकिकः सर्व्वलोकविदितः । इति तट्टीका ॥
सार्व्ववेदः, पुं, (सर्व्ववेदं वेत्तीति । सर्व्ववेद+
ष्यञ् ।) सकलवेदज्ञब्राह्मणः । सर्व्ववेदशब्दात्
ष्णप्रत्ययेन निष्पन्नः ॥
सार्षपः,त्रि, (सर्षपस्यायमिति । सर्षप+अण् ।)
सर्षपसम्बन्धीयशाकतैलादिः । यथा,—
"घृतञ्च सार्षपं तैलं यत्तैलं पुष्पवासितम् ।
अदुष्टं पक्वतैलञ्च स्नानाभ्यङ्गेषु नित्यशः ॥"
इति तिथ्यादितत्त्वम् ॥
सालः, पुं, (शलति इति । शल गतौ+घञ् ।)
शालमत्स्यः । इत्यमरटीकायां भरतः ॥ वृक्ष-
मात्रम् । प्राकारः । इति मेदिनी ॥ रालः ।
इति राजनिर्घण्टः ॥ (सारोऽस्त्यस्येति । अच् ।
रस्य लः ।) स्वनामख्यातवृक्षः । इत्यमरः ।२।२।
३ ॥ सखुया इति हिन्दी भाषा । तत्पर्य्यायः ।
सर्ज्जः २ सर्ज्जरसः ३ कलः ४ कललोद्भवः ५
वल्लीहृत्तः ६ चीरपर्णः ७ शालकार्य्यः ८ पुस्तका-
न्तरे रालः कार्य्येति शब्दद्वयम् । अजकर्णकः
९ वस्त्रकर्णः १० कषायी ११ ललनः १२ गन्ध-
वृक्षकः १३ वंशः १४ रालनिर्यासः १५ दिव्य-
सारः १६ सुरेष्टकः १७ शूरः १८ अग्निवल्लभः
१९ यक्षधूपः २० सिद्धिकः २१ । अस्य गुणाः ।
कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । हिमत्वम् ।
स्निग्धत्वम् । अतिसारपित्तास्रदोषकुष्ठकण्डूवि-
स्फोटवातनाशित्वञ्च । इति राजनिर्घण्टः ॥
अपि च ।
"सालस्तु सर्ज्जकार्य्याश्वकर्णकाः शस्यसम्वरः ।
अश्वकर्णः कषायः स्याद्व्रणस्वेदकफक्रिमीन् ॥
भग्नविद्रधिबाधिर्य्ययोनिकर्णगदान् हरेत् ॥"
अथ सालभेदाः ।
"सर्ज्जकोऽन्योऽजकर्णः स्याच्छालो मरिचपत्त्रकः ।
अजकर्णः कटुस्तिक्तः कषायोष्णो व्यपोहति ।
कफपाण्डुश्रुतिगदान् मेहकुष्ठविषव्रणान् ॥"
इति भावप्रकाशः ॥
सालङ्कः, पुं, रागस्य प्रकारविशेषः । यो रागो
रागान्तरामिश्रितः सन् रागान्तराभासयुक्तः ।
इति सङ्गीतशास्त्रम् ॥
सालनः,पुं,(सालः कारणत्वेनास्त्यस्येति । पमादि-
त्वात् नः ।) सर्ज्जरसः । इति रत्नमाला ॥
सालनिर्यासः,पुं,(सालस्य निर्य्यासः ।)सर्ज्जरसः ।
इति रत्नमाला ॥
सालपर्णी, स्त्री, (सालस्य पर्णमिव पर्णमस्याः ।
ङीष् ।) शालपर्णी । इत्यमरः ।२।४।११५ ॥
शालपानि इति भाषा । यथा,—
"शालपर्णी सालपर्णी स्थिरा चांशुमती ध्रुवा ॥"
इति शब्दरत्नावली ॥
"अभावे पृश्निपर्ण्याश्च शालपर्णीं नियोजयेत् ।"
इति वैद्यशास्त्रम् ॥
सालपुष्पं, क्ली,(सालस्येव पुष्पमस्य ।) स्थलपद्मम् ।
इति शब्दरत्नावली ॥
सालभञ्जिका,स्त्री, (सारं भनक्तीति । भन्ज+
ण्वुल् । टापि अत इत्वम् । रस्य लः ।) पुत्त-
लिका । यथा,—
"पाञ्चालिका तु पाञ्चाली पुत्रिका साल-
भञ्जिका ।"
इति जटाधरः ।
वेश्या । यथा,—
"वेश्या तु गणिका क्षुद्रा वारस्त्री सालभञ्जिका ।"
इति च जटाधरः ॥
सालरसः, पुं, (सालस्य रसः ।) रालः । इति
राजनिर्घण्टः ॥
सालवाहनः, पुं, (सालः तन्नामा यक्षो वाहनं
यस्य ।) शालिवाहनराजः । इति केचित् ॥
(अस्य विवरणं शातवाहनशब्दे द्रष्टव्यम् ॥)
सालवेष्टः,पुं,(सालस्य वेष्टः निर्य्यासः ।) धूनकः ।
इति भूरिप्रयोगः ॥
सालशृङ्गं, क्ली, (सालस्य शृङ्गमिव ।) प्राची-
राग्रम् । इति केचित् ॥

मात्रा,स्त्री (मात्र प्रकारो।स्त्यस्या इति। अर्श। टाप्।) चरम्। इत्यमरटीकायां भरत: ॥
माताकारी, स्त्री, दुष्टं पराजितनारी। इति केचित् ॥
[illegible] पुं ऋषिविशेषः। इति हेमचन्द्रः ॥
[illegible]कारादि: साधुपाठ:। यथा,—
"[illegible]"
इति शब्दरत्नावली ॥
[illegible], स्त्री. (मात्रां रातीति। रा+क।) [illegible]। डाल्हा इति भाषा। इति केचित् ॥
[illegible], पुं. ([illegible]) कुक्कुरः। [illegible]। इति केचित् ॥ [illegible]
[illegible], पुं [illegible]। इति शब्दरत्नावली ॥

[illegible]

इति शब्दरत्नावली ॥

अपि च। ब्रह्मसिद्धान्ते।
"चान्द्रः शुक्लादिदर्शान्तः सावनस्त्रिंशता दिनैः।
एकराशौ रविर्यावत् कालं मास: स भास्कर:।
सर्व्वर्क्षपरिवर्त्तैश्च नाक्षत्र इति चोच्यते॥"
विष्णुधर्म्मोत्तरे च।
"मलिनकर्पादयारभ्य मलिनकर्षमथापरम्।
चन्द्रार्कयोर्युर्धैर्म्मासश्चान्द्र इत्यभिधीयते।
सावने च तथा मासि त्रिंशत्सूर्य्योदयाः स्मृताः।
आदित्यराशिभोगेन सौरो मासः प्रकीर्त्तितः।
सर्व्वर्क्षपरिवर्त्तैश्च नाक्षत्र इति चोच्यते॥"॥
सावनमासकर्त्तव्यकर्म्मादि यथा,—
"सूतकादिपरिच्छेदो दिनमासाब्दपास्तथा।
मध्यमग्रहभुक्तिश्च सावनेन प्रकीर्त्तिता॥
पितामहः।
"आब्दिके पितृकृत्ये च मासश्चान्द्रमसः स्मृतः।
विवाहादौ स्मृतः सौरो यज्ञादौ सावनो मतः॥"
अत्र आदिपदेन सवनत्रितयसमावर्त्तनादिबुद्धर्या-गौच समाधान पुंसवन-सीमन्तोन्नयन नामकर-णान्नप्राशन निष्क्रमण चूडादिग्रहणम्। तथा च विष्णुधर्म्मोत्तरम्।
"अध्यायनञ्च यज्ञारम्भं
सौरेण मानेन सदाभ्यसेत्।
सत्राण्युपास्याश्च सावनेन
सौम्यश्च यत् स्यादपरञ्च कर्म्म॥"
इति मलमासतत्त्वम्॥ *॥
वर्षभेदे। यथा,—
"सौरेणाब्दस्तु मानेन यदा भवति भार्गव।
सावनेन च मानेन दिनषट्कं प्रपूर्य्यते॥"
सौरवत्सरात् दिनषट्काधिकः सावनः संवत्-सरो भवतीति। इति मलमासतत्त्वम्॥
सावर, पुं (सवरणामयमिति। अण्।) लोध्रः। इत्यमरटीका शब्दरत्नावली च॥ (यथा, सुश्रुते। ४। ३३।
"[illegible]॥")
पापम्। अपराधः। इति त्रिकाः॥ (सूर्गविशेष-स्त्रि स्त्री। तस्य गुणा यथा,—
"[illegible] गुरु च स्मृतम्।
[illegible]॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)
[illegible]॥
सावर्णिः, पुं. (सवर्णं एव। स्वार्थे अण्। सवर्णाया: [illegible] वा।) अष्टममनुः। यथा,—
"[illegible]॥"
इति देवीभागवतम्॥
([illegible]। ८। १८।
"[illegible]।
[illegible]॥")
[illegible]। ८। ३१—३३।
"[illegible]।
[illegible]॥"

सतानन्दः काश्यप राजा [illegible]
धृतिर्व्वरीयान् यशः [illegible]
चरिष्णुरीय सुमतिः [illegible]
भविष्या दशसावर्णी मनोः पुत्र: [illegible]
सावर्णमन्व,स्त्री.([illegible]
[illegible] शब्दरत्नावली ॥
सावर्णिः, पुं, (सवर्णाया अपत्यमिति। अष्टममनुः। स च सूर्य्यपुत्रः। [illegible]
"विश्वकर्म्म दे आर्थे विवस्वतो [illegible]
संज्ञा छाया च राजेन्द्र [illegible]
तृतीयां बडवामेके तासां संज्ञासुत[illegible]
यमो यमी श्राद्धदेवश्छायायाश्च
सावर्णिस्तपती कन्या भार्य्या
[illegible]
अष्टमेऽन्तर आयाते सावर्णिर्भविता [illegible]
निर्म्मोकविरजस्काद्याः सावर्णितनयाः
तत्र देवाः सुतपसो विरजा [illegible]
तेषां विरोचनसुतो [illegible]
[illegible]
[illegible]
योऽसौ भगवता बद्धः [illegible]
[illegible]
[illegible]
[illegible]
इदानीमासते राजन् [illegible]
[illegible]
इति श्रीभागवते। ८। १३।
([illegible]
[illegible]
सावित्र, स्त्री. (सविता देवता अस्याः [illegible]
[illegible]
"[illegible]"
सावित्र, पुं. (सविता देवता अस्य [illegible]
[illegible] इति हेमचन्द्रः॥
[illegible] इति शब्दरत्नावली॥ ([illegible]
८।
"[illegible]
[illegible]

:सम्बन्धिनि च त्रि । यथा, मनुः । ४ ।
।
त्राम् शान्तिहोमांश्च कुर्य्यात् पर्व्वसु
नित्यशः ॥")
,स्त्री,शाल्वदेशीयसत्यवद्राजपत्नी । सा
देशीयाश्वपतिराजकन्या ।(अस्या विशेष-
णन्तु महाभारते वनपर्व्वणि२८२ अध्याय-
४ द्रष्टव्यम् ॥ ॥) उमा । इति मेदिनी ॥
नकरणं यथा,—
शैरर्चिता देवी वेदयोगेषु पूजिता ।
ह्मस्वरूपा तु सावित्री तेन सा स्मृता ॥"
इति देवीपुराणे ४४ अध्यायः ॥
च ।
लोकप्रसवनात् सविता स तु कीर्त्त्यते ।
देवता देवी सावित्रीत्युच्यते ततः ।
५ सावित्री प्रोच्यते बुधैः ॥"
वह्निपुराणे ब्राह्मणप्रशंसानामाध्यायः ॥
त्री । इति त्रिकाण्डशेषः ॥ ॥ (उप-
कर्म्म । यथा, मनुः । २ । ३८ ।
षोड़शात् ब्राह्मणस्य सावित्री नातिवर्त्तते ।
विंशात् क्षत्रबन्धोरा चतुर्व्विंशतेर्व्विशः ॥"
वित्रीशब्देन तदनुवचनसाधनमुपनयनाख्यं
लक्ष्यति ।" इति मेधातिथिः ॥) ब्रह्मपत्नी ।
तु सवितुः पुत्र्यां पत्न्यां जाता । अस्या
त्तिनामान्तराणि यथा,—
ः संजपतस्तस्य भित्त्वा देहमकल्मषम् ।
रूपमर्द्धमकरोदर्द्धं पुरुषरूपवत् ॥
रूपा च सा ख्याता सावित्री च निगद्यते ।
सत्यथ गायत्री ब्रह्माणी च परन्तप ॥"
इति मात्स्ये । ३ । ३०—३२ ॥ ॥
ा शतनामानि यथा,—
विष्णुरुवाच ।
ावित्री पुष्करे नाम तीर्थानां प्रवरे शुभे ।
ाणस्यां विशालाक्षी नैमिषे लिङ्गधारिणी ।
ागे ललिता देवी कामुका गन्धमादने ।
नसे कुमुदा नाम विश्वकाया तथाम्बरे ॥
मते गोमती नाम मन्दारे कामचारिणी ।
ोत्कटा चैत्ररथे जयन्ती हस्तिनापुरे ॥
ान्यकुब्जे तथा गौरी रम्भा मलयपर्व्वते ।
ाम्रके कीर्त्तिमती विश्वा विश्वेश्वरे तथा ॥
ा वराहशैले तु कमला कमलालये ।
द्रकोट्यान्तु रुद्राणी काली कालञ्जरे गिरौ ॥
ालिङ्गे तु कपिला कर्कोटे मुकुटेश्वरी ।
ग्रामे महादेवी शिवलिङ्गे जलप्रिया ॥
ोत्पला मायापुर्य्यां मन्दन्ती ललिते तथा ।
त्पलाक्षी माहेशाक्षे हिरण्याक्षी महोत्पले ।
ायां मङ्गला नाम विमला पुरुषोत्तमे ।
गालायाममोघाक्षी पाटला पाण्डुपर्व्वते ॥
ारायणी सुपार्श्वे तु त्रिकूटे भद्रसुन्दरी ।
पुले विपुला नाम कल्याणी मलयाचले ॥
ोटरी कोटरीतीर्थे सुगन्धा गन्धमादने ।
कुब्जाम्रके त्रिसन्ध्या तु गङ्गाद्वारे हरिप्रिया ॥

शिवचण्डे शुभा चण्डा नन्दिनी देविकातटे ।
रुक्मिणी द्वारवत्यान्तु राधा वृन्दावने वने ॥
देवकी मथुरायान्तु पाताले परमेश्वरी ।
सीता चित्रकूटे तथा रौद्री कालिन्द्यां विन्ध्य-
वासिनी ॥
सह्याद्रावेकवीरा तु हरिश्चन्द्रे तु चन्द्रिका ।
रमणा रामतीर्थे तु यमुनायां मृगावती ॥
करवीरे महालक्ष्मीरुमा देवी विनायके ।
अरोगे तु रोगहन्त्री महाकाले महेश्वरी ॥
अभयेत्युष्णतीर्थे तु अमृता विन्ध्यकन्दरे ।
माण्डव्ये माण्डवी देवी महागौरी महेश्वरी ॥
गणेशे च प्रचण्डा तु चण्डिकामरकण्टके ।
सोमेश्वरी वराहे तु प्रभासे पुष्करावती ॥
देवी माता सरस्वत्यां पारावारतटे स्थिता ।
महालये महापद्मा पयोष्ण्यां पिङ्गलेश्वरी ।
सिंहिका कृतशौचे च कार्त्तिकेये तु शङ्करी ।
उत्पलावर्त्तके लोला सुभद्रा सिन्धुसङ्गमे ॥
माता सिद्धवने लक्ष्मीरनङ्गा भरताश्रमे ।
जालन्धरे विश्वमुखी तारका विन्ध्यपर्व्वते ॥
देवदारुवने पुष्टिर्मेधा काश्मीरमण्डले ।
भीमा देवी हिमाद्रौ तु सेतुर्व्विश्वेश्वरे तथा ॥
कपालमोचने शुद्धा माता कायावरोहणे ।
शङ्खोद्धारे ध्वनिर्नाम धृतिः पिण्डारके वने ॥
काली तु चन्द्रभागायामच्छोदे सिद्धिदायिनी ।
नरनारायणे देवी बदर्य्यामुर्व्वशी तथा ॥
औषधीशोत्तरकुले कुशद्वीपे कुशोदका ।
मन्मथा हेमकूटे तु कुमुदे सत्यवादिनी ॥
अश्वत्थवन्दनीका तु विविक्ते श्रमणालये ।
गायत्री वेदशालायां सावित्री ब्रह्मसन्निधौ ॥
सूर्य्यबिम्बे प्रभा नाम मातृणां वैष्णवी मता ।
अरुन्धती सतीनान्तु रामासु च तिलोत्तमा ॥
ब्रजे ब्रह्मकला नाम शक्तिः सर्व्वशरीरिणाम् ।
एतदुद्देशतः प्रोक्तं नामाष्टशतमुत्तमम् ॥
अष्टोत्तरञ्च तीर्थानां शतमेतदुदाहृतम् ।
यो जपेत् शृणुयाद्वापि सर्व्वपापैः प्रमुच्यते ॥
एषु तीर्थेषु यत् कृत्वा स्नात्वा पश्येन्नरो हि यः
सर्व्वपापविनिर्म्मुक्तः कल्पं ब्रह्मपुरे वसेत् ॥
नामाष्टशतकं यस्तु श्रावयेद्ब्रह्मसन्निधौ ।
पौर्णमास्याममावस्यां बहुपुत्त्रो भवेन्नरः ॥
गोदाने श्राद्धदाने च अहन्यहनि वा पुनः ।
देवार्च्चनविधौ विद्वान् परं ब्रह्माधिगच्छति ॥"
इति पद्मपुराणे सृष्टिखण्डे १७ अध्यायः ॥ ॥
अपि च ।
नारद उवाच ।
"श्रुतम्युपाख्यानमिदं श्रुतमीश सुधोपमम् ।
अथ सावित्र्युपाख्यानं तन्मे व्याख्यातुमर्हसि ॥
पुरा येन समुद्भूता सा श्रुता च श्रुतिप्रसूः ।
केन वा पूजिता देवी प्रथमे कैश्च वा परे ॥
नारायण उवाच ।
ब्रह्मणा वेदजननी पूजिता प्रथमे मुने ।
द्वितीये च वेदगणैस्तत्पश्चाद्विदुषां गणैः ॥
तदा चाश्वपतिः पूर्व्वं पूजयामास भारते ।

तत्पश्चात् पूजयामासुर्व्वर्णाश्चत्वार एव च ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे । २३ । १—४ ॥
सावित्रीव्रतं, क्ली, (सावित्र्या व्रतम् ।) ज्यैष्ठ-
कृष्णचतुर्द्दश्यां स्त्रीकर्त्तव्यनियमविशेषः । तद्वि-
वरणं यथा, । पराशरः ।
"मेषे वा वृषभे वापि सावित्रीं तां विनिर्द्दिशेत् ॥"
तां चतुर्द्दशीम् ।
"ज्यैष्ठकृष्णचतुर्द्दश्यां सावित्रीमर्च्चयन्ति याः ।
वटमूले सोपवासा न ता वैधव्यमाप्नुयुः ॥"
राजमार्त्तण्डकृत्यचिन्तामण्योः ।
"ज्यैष्ठे मासि चतुर्द्दश्यां सावित्रीव्रतमुत्तमम् ।
अवैधव्याय कुर्व्वन्ति स्त्रियः श्रद्धासमन्विताः ॥"
व्रतमात्रे तु अनन्तचतुर्द्दशीव्रतोक्तमाचरन्ति ।
दृष्टपरिकल्पनान्यायात् । तदुक्तं मत्स्यपुराणे ।
"गर्भिणी सूतिका नक्तं कुमारी च रजस्वला ।
यदाशुद्धा तदान्येन कारयेत् क्रियते सदा ॥"
उपवासाशक्तौ नक्तं भोजनं कुर्य्यात् ।
"उपवासेष्वशक्तानां नक्तं भोजनमिष्यते ।"
इति तद्धृतवचनान्तरात् । अशुद्धा चेत् पूजां
कारयेत् । कायिकञ्चोपवासादिकं सदा शुद्धया
अशुद्धया च स्वयं क्रियते । एवं स्मृतिपरि-
भाषायां वर्द्धमानोपाध्यायाः । नारदः ।
"दिवाभागे त्रयोदश्यां यदा चतुर्द्दशी भवेत् ।
तत्र पूज्या महासाध्वी देवी सत्यवता सह ॥"
दिवाभागे दण्डद्वयमात्रसत्त्वेऽपि अतएव प्रदोषे
व्रतमाचरन्ति । पूर्व्वाह्णे तद्विधत्वेऽपि पराह्णे
त्रिसन्ध्यव्यापित्वे पराह्ण एव त्रिसन्ध्यव्यापीति
वचनात् । यदा तु पूर्व्वापरयोर्न तथाविधा ।
तदापि पराह्ण एव । यथा । ज्योतिषे ।
"चतुर्द्दश्याममावास्या यदा भवति नारद ! ।
उपोष्य पूजनीया सा चतुर्द्दश्यां विधानतः ॥"
सा सावित्री । तत्रामावास्यायां सावित्रीव्रत-
विधानं शिवा घोरा तथा प्रेतेति वचनघटित-
परम् । पराशरः ।
"सावित्रीमर्च्चयित्वा तु फलाहारा परेऽहनि ।
ततश्चाविधवा नारी चित्तभोगान् लभेत सा ॥"
इति तिथ्यादितत्त्वम् ॥
अन्यत् वनपर्व्वणि सावित्रीव्रतकथायां द्रष्टव्यम् ॥
सावित्रीसूत्रं, क्ली, (सावित्र्याः दीक्षाकालिक-
सूत्रम् ।) यज्ञोपवीतम् । इति शब्दरत्नावली ॥
साशयन्दकः, पुं, ज्येष्ठी । इति केचित् ॥
साशूकः, पुं, कम्बलः । इति हारावली । १५९ ॥
सासुधीः, स्त्री, श्वश्रूः । इति त्रिकाण्डशेषः ॥
सास्थितास्राहं, क्ली, (सास्थि अस्थियुक्तं
सास्राहं यत्र ।) कांस्यम् । इति त्रिकाण्ड-
शेषः ॥
सास्ना, स्त्री, (षस स्वप्ने + "रास्नासास्नास्थूणा-
वीणाः" उणा० ३ । १५ । इति नप्रत्ययेन
साधुः ।) गलकम्बलः । इत्यमरः । २ । ९ । ६३ ॥
(यथा, माघे । ५ । ६२ ।
"रोमन्थमन्थरचलद्गुरुसास्नमासा-
ञ्चक्रे निमीलदलसेक्षणमौक्षकेण ॥")

साहचर्य्यं, क्ली, (सहचरस्य भावः कर्म्म वा । सहचर+ष्यञ् ।) सहचरस्य भावः । (यथा, कुमारे । ४ । ११ ।

"मधुना मे मन्मथ ! साहचर्य्या-
दसावनुक्तोऽपि सहाय एव ।
समीरणो नोदयिता भवेति
व्यादिश्यते केन हुताशनस्य ॥")

सहगमनम् । सहचरशब्दात् ष्यञ्प्रत्ययेन निष्पन्नम् ॥ सहचारः । सामानाधिकरण्यम् । एकाधिकरणवृत्तित्वम् । यथा,—

"प्रायशो रूपभेदेन साहचर्य्याच्च कुत्रचित् ।"

इत्यमरः ॥

(सहधर्म्माचरणम् । इति मल्लिनाथः ॥ यथा, रघुः । १६ । ८० ।

"मध्याः स्पृष्टे मनुजपतिना साहचर्य्याय हस्ते माङ्गल्योर्णावलयिनि पुरः पावकस्योच्छिखस्य ॥")

साहयः, त्रि, (साहयतीति । साहि+"अनुपसर्गात् लिम्पविन्देति ।" ३ । १ । १३८ । इति शः ।) सहनकारयिता । इति व्याकरणम् ॥

साहसं, क्ली, (सहसा बलेन निर्वृत्तम् । सहस्+"तेन निर्वृत्तम् ।" ४।२।६८ । इति अण् ।) दमः । इत्यमरः । ३।८।२१ ॥ स च त्रिविधः । यथा, याज्ञवल्क्यः ।

"साशीतिपणसाहस्रो दण्ड उत्तमसाहसः ।
तदर्द्धं मध्यमः प्रोक्तस्तदर्द्धमधमः स्मृतः ॥"

इति प्रायश्चित्ततत्त्वम् ॥

बलात्कारकृतकार्य्यम् । इति मेदिनी ॥ (यथा, "[illegible] साहसादिषमागमात् । [illegible] दुष्टयात् ॥" इति साहसकरं [illegible] साधि-कारे । "साहसादिति साहसं [illegible] दिकादि [illegible] कारणत्वम् ।" इति [illegible] टीकायां विजयरक्षितः ॥) दुष्कृतकर्म्म । अविमृश्यकारिता । (यथा, महाभारते । १।४२।१ ।

"यद्येतत् साहसं तात ! यदि वा दुष्कृतं कृतम् ।
प्रिय वाप्रियं वापि वाक्यं वा न वृथा भवेत् ॥")

[illegible] । इति हेमचन्द्रः ॥ [illegible] करणम् । [illegible] । इति मुग्धबोधटीकायां दुर्गादासः ॥ साहसमाह [illegible] ।

"[illegible] ।
[illegible] साहसं [illegible] कृतम् ॥"

[illegible] । यथा,—

"[illegible] ।
[illegible] ॥"

[illegible] । इति मुग्ध-[illegible] ।

"[illegible]-
[illegible] ।
[illegible] ॥"

इति [illegible] ॥

(तद्युक्ते, त्रि । यथा, हरिवंशे भविष्यपर्व्वणि । ३८ । ३७ ।

"न जाने इति यद्ब्रूषे किमतः साहसं वचः ॥")

साहसः, पुं, (सहसे बलाय हितः । सहस्+अण् ।) अग्निविशेषः । यथा,—

"प्रायश्चित्ते विधुश्चैव पाकयज्ञे तु साहसः ।
लक्षहोमे च वह्निः स्यात् कोटिहोमे हुताशनः ॥"

इति तिथ्यादितत्त्वम् ॥

साहसाङ्कः, पुं, (साहसः एव अङ्कश्चिह्नं यस्य ।) विक्रमादित्यराजः । इति जटाधरः ॥

साहसिकः, त्रि, (सहसा बलेन वर्त्तते इति । सहस्+"ओजःसहोम्भसा वर्त्तते ।" ४ । ४ । २७ । इति ठक् ।) मनुष्यमारकः । चौरः । पारदारिकः । परुषवादी । अनृतवादी । इति साहसशब्दार्थदर्शनात् । एते असाक्षिणः । यथा नारदः ।

"स्तेनाः साहसिका धूर्त्ताः कितवा योधकाश्च ये ।
असाक्षिणस्तु ते दुष्टास्तेषु सत्यं न विद्यते ॥"

इति व्यवहारतत्त्वम् ॥

(हठकारी । यथा । "केचित् साहसिकास्त्रिलोकममिति पेठुः ।" इति कुमारटीकायां मल्लिनाथः । २ । ४४ ॥)

साहस्रं, क्ली, (सहस्राणां समूहः । सहस्र+"भिक्षादिभ्योऽण् ।" ४ । २ । ३८ । इति अण् ।) सहस्रसमूहः इत्यमरः । ३ । २ । ४५ ॥ (यथा, महाभारते । २ । ५८ । १३ ।

"एतावन्ति च दासानां साहस्राण्युत सन्ति मे ॥"

सहस्रमेव । स्वार्थे अण् ।) सहस्रमात्रम् । यथा,—

"हरिस्ते साहस्रं कमलबलिमाधाय पदयो-
र्यदेकोने तस्मिन्निजमुदहरन्नेत्रकमलम् ।
गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा
त्रयाणां रक्षायै त्रिपुरहर जागर्त्ति जगताम् ॥"

इति महिम्नस्तवः ॥

(सहस्रेण क्रीतमिति । "शतमानविंशतिकसहस्रवसनादण् ।" ५ । १ । २७ । इति अण् ।) सहस्रेण क्रीते, त्रि ॥ (सहस्रस्येदमिति । अण् ।) सहस्रसम्बन्धिनि च त्रि ॥ (यथा, विष्णुपादादिकेशान्तवर्णनस्तोत्रे । १४ ।

"साहस्री वापि सख्या प्रकटमभिहिता सर्व्ववेदेषु येषाम् ॥")

साहस्रः, पुं (सहस्रमस्यास्तीति । सहस्र+"अण् च ।" ५ । २ । १०३ । अण् ।) सहस्रसङ्ख्यकसेनादिमान् । इत्यमरः । २ । ८ । ६२ ॥ (सहस्रशिरस्कः, त्रि । यथा, मनुः । ८ । १८१ ।

"शतं साहस्रो दण्डं दाप्यो गुर्वे तु ते प्रजन्
[illegible] सर्व्वेदशिनो साहसा वै सर्व्वरसः ॥")

साहाय्यं, क्ली, (सहायस्य भावः कर्म्म वा । सहाय+"योपधात् गुरूपोत्तमात् वुञ् ।" ५ । १ । १३२ । इत्यत्र सहायादिभ्य इत्यस्य उपसंख्यानात् वुञ् ।) साहायकम् । इत्यर्थे कण्प्रत्ययेन निष्पन्नम् ॥ (यथा, [illegible] १७ । ५ ।

"स कुलोचितमिन्द्रस्य [illegible]
जघान समरे दैत्यं दुर्जयं तेन वार्षि ।")

साहाय्यं, क्ली, (सहायस्य भावः कर्म्म वा । +पक्षे ब्राह्मणादित्वात् ष्यञ् ।) [illegible] सहायशब्दात् [illegible] महाभारते । १ । १५५ । १८ ।

"साहाय्येऽस्मि स्थितः पार्थ ! [illegible]

साहित्यं, क्ली, स्त्री, (सहित+ष्यञ् ।) [illegible] सहितस्य भावः इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नम् । परस्परसापेक्षाणां तुल्यरूपाणां [illegible] क्रियान्वयित्वं साहित्यम् । इति [illegible] तुल्यवदेकक्रियान्वयित्वम् । [illegible] वा । इति शब्दशक्तिप्रकाशिका । एकक्रियान्वयित्वम् । तद्यथा । पलाशांश्छिन्धि इत्यत्र [illegible] यौगिकं यत् साहित्यं [illegible] विभागरूपफलं तज्जनिका या [illegible] तदनुकूलकृतिमांस्त्वम् । इति [illegible] मनुष्यकृतश्लोकमयग्रन्थविशेषः । स तु कुमारसम्भव-माघ-भारवि मेघदूत-[illegible] मण्डनशान्तिशतकप्रभृतयः ॥

साह्यं, क्ली, (सहस्य भावः । सह+ष्यञ् ।) मिलनम् । सहितत्वम् । इति धरणिः ॥ ([illegible] -ह्यम् । यथा, महाभारते । ५ । ७ । ११ ।

"ततो दुर्य्योधनः [illegible]
विग्रहेऽस्मिन् भवान् साह्यं मम दातुमिहार्हति ।"

साह्यकृत्, पुं, (साह्यं करोतीति । कृ+क्विप् ।) समभिव्याहारी ॥

साह्वयः, पुं, (आह्वयेन सह वर्त्तमानः ।) [illegible] प्राणिद्यूतम् । पक्षयुद्धम् । यथा,—

"मेषादिप्राणिद्यूते स्यात् साह्वय [illegible]
इति शब्दरत्नावली ।

(नामयुक्ते, त्रि । यथा, भागवते । १ । ११ ।
"कथमालक्षितः पौरैः स प्राप कुरुजाङ्गलम् ।
उन्मत्तमूकजडवत् विचरन् गजसाह्वयम् ॥")

सिंहः, पुं, (सिञ्चति तेजः पक्षे इति । "सिचेः संज्ञायां हनुमौ कश्च ।" उणा० । ५ । ६२ । इति कः । अन्त्यादेशौ हकार [illegible] पृषोदरादित्वात् वर्णविपर्य्यये सिंहः [illegible] हिंस इत्यपि भवति ।) [illegible] (यथाह कश्चित् ।

"सिंहो बली द्विरदशूकरमांसभोजी
संवत्सरेण कुरुते रतिमेकवारम् ।
पारावतः खलु शिलाकणमात्रभोजी
कामी भवेदनुदिनं वद कोऽत्र हेतुः ॥")

तत्पर्य्यायः । मृगेन्द्रः २ पञ्चास्यः ३ हर्य्यक्षः ४ केशरी ५ हरिः ६ । इत्यमरः । २ । ५ । १ ॥

रीन्द्रः ७ श्वेतपिङ्गलः ८ कण्ठीरवः ८ पञ्च-
नखः १० मृगराट् ११ भीमविक्रमः १२
टाङ्गः १३ मृगराट् १४ मृगराजः १५ मृगेन्द्र
व.१६ केसरी१७ नखीका:१८करिदारकः१८।
ति शब्दरत्नावली ॥ महावीरः२०श्वेतपिङ्गः२१
प्रमोचन: २२ मृगारिः २३। इति जटाधरः॥
भारिः २४ नखरायुधः २५ महानादः २६
गपतिः २७। इति हेमचन्द्रः॥ पञ्चमुखः२८
खी २८ मानी३० क्रव्यादः३१मृगाधिपः३२
रः ३३ विक्रान्तः ३४ हिरदान्तकः३५ धनु-
नः ३६ दीप्तः३७ वली३८विक्रमी३८ दीप्त-
ङ्गलः ४०। तस्मांसगुणाः। अर्शःप्रमेहजठरा-
न्यशाद्यनाशित्वम्। इति राजनिर्घण्टः॥
पि च।
सिंहव्याघ्रहका ऋचतरचुदीपिनस्तथा।
भ्रु जम्बु कमार्जारा इत्याद्यास्तु गुहाशयाः॥
हाशया वातहरा गुरूष्णमधुराश्च ते।
क्षुधा बल्या हिता नित्यं नेत्रगुह्यविकारि-
णाम्॥"
इति भावप्रकाशः॥ * ॥
दान्ते श्रेष्ठार्थवाचकः। इत्यमरः। ३।१।५८॥
यथा, रामायणे। २। ७३। ७।
क यास्यसि महाराज! हित्वेमं दुःखितं
जनम्।
ऐनं पुनरुपसिंहेन रामेणाक्लिष्टकर्मणा॥")
र्त्तां ध्वजः। इति हेमचन्द्रः॥ राशिभेदः।
ति राजनिर्घण्टः॥ (यथा, सुश्रुते। ४। ८।
तुत्थालकटुकाव्योषसिंहार्कहयमारकाः॥")
पादिद्वादशराश्यन्तर्गतपञ्चमराशिः। तत्-
र्य्यायः। लेयः २। इति सतत्त्वमुक्तावली॥
स्याधिष्ठात्री देवता सिंहः। स च मघा-
र्वफल्गुनी-समुदायोत्तरफल्गुनी-प्रथमपादेन
भवति। धन्विराशिः। पीतवर्णः। रूक्षः। एवं
मृगवर्णः। पित्तप्रकृतिः। पूर्व्वदिक्स्वामी।
र्व्वतचारी। क्षत्रियवर्णः। क्रूरः। महाशब्दः।
मल्पसन्तानः। अल्पस्त्रीसङ्गश्च। तत्र जात-
फलम्। क्रोधी। शीघ्रगतिः। हास्यवाग्मिः।
र्षातवक्ता। चञ्चलः। शीतलः। मत्स्यप्रियश्च।
इति वृहज्जातकादयः॥ * ॥ मेषादिद्वादश-
लग्नान्तर्गतपञ्चमलग्नम्। तत्र जातफलम्।
"सिंहलग्ने समुत्पन्नो भोगी शत्रुविमर्द्दनः।
स्वल्पोदरोऽल्पपुत्रश्च सोत्साही रणविक्रमः॥"
इति कोष्ठीप्रदीपः॥
सिंहकेलिः, पुं, (सिंहस्येव केलिर्यस्य।) मञ्जु-
घोषः। जिनविशेषः। इति त्रिकाण्डशेषः॥
सिंहकेशरः, पुं, (सिंहस्येव केशरो यस्य।)
वकुलः। इति त्रिकाण्डशेषः॥ सिंहस्य जटा
च॥
सिंहतलः, पुं, (सिंहस्येव तलमत्र। यद्वा, सिंह-
तलः। पृषोदरादित्वात् साधुः।) कृताञ्जलिः।
करद्वययोजनम्। इत्यमरटीकायां रामाश्रमः।
२। ६। ८५॥

सिंहतुण्डः, पुं, (सिंहस्य तुण्डमिव पुष्पमस्य।)
सेहुण्डवृक्षः। इति राजनिर्घण्टः॥ (अस्य
पर्य्यायो यथा,—
"सेहुण्डः सिंहतुण्डः स्यात् वज्री वज्रद्रुमोऽपि च
सुधासमन्तदुग्धा च स्नुक् स्त्रियां स्यात्
स्नुही गुडा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
सिंहस्य तुण्डमिव तुण्डमस्य। मत्स्यविशेषः।
यथा, मनुः। ५। १६।
"पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः।
राजीवान् सिंहतुण्डांश्च सशल्कांश्चैव सर्व्वशः॥"
सिंहमुखे, क्ली॥)
सिंहद्वारं, क्ली, (सिंहचिह्नितं द्वारमिति मध्य-
पदलोपिकर्मधारयः।) प्रवेशद्वारम्। तत्-
पर्य्यायः। प्रवेशनम् २। इति हेमचन्द्रः॥
(यथा, कथासरित्सागरे। ४३। १०५।
"सिंहद्वारे युवा देवि दृष्टोऽस्माभिर्मनोहरवान्।
महितीयोऽपि यो धत्ते सौन्दर्य्येणाद्वितीयताम्॥")
सिंहध्वनिः, पुं, (सिंहस्य ध्वनिः।) सिंहशब्दः।
सिंहनादसदृशशब्दः। यथा,—
"तुषारसंघातशिलाः खुराग्रैः
समुल्लिखन् दर्पकलः ककुद्मान्।
दृष्टः कथञ्चिद्गवयैर्विविग्नै-
रसोढ़सिंहध्वनिरुन्ननाद॥"
इति कुमारसम्भवम्॥
सिंहनादः, पुं, (सिंहस्येव नादः।) योधानां
रणोत्साहजलरवः। तत्पर्य्यायः। क्ष्वेड़ा २। इत्य-
मरः। २। ८। १०७॥ गजयूथदर्शनात् तद्भ-
ङ्गाय यथा सिंहस्य नादस्तथा परबलभङ्गाय
स्वोत्साहविवृद्धये च यो रावः सः। सिंहस्येव
नादः सिंहनादः। इति भरतः॥ (यथा आर्य्या-
सप्तशत्याम्। ७००।
"कविसमरसिंहनादः स्वरानुनादः सुधैक-
संवादः।
विद्वद्विनोदकन्दः सन्दर्भोऽयं मया सृष्टः॥"
महादेवः। इति महाभारतम्। १३। १७।
११०॥ * ॥ सिंहस्य नादः।) सिंहशब्दश्च॥
सिंहनादकः, पुं, (सिंह इव नदतीति नद+
ण्वुल्।) वुक्कारः। इति हारावली। १८४॥
सिङ्गा इति भाषा॥
सिंहनादिका, स्त्री, सिंहमपि नादयतीति। नद
+णिच्+ण्वुल्। टापि अत इत्वम्।) दुरा-
लभा। इति शब्दचन्द्रिका॥
सिंहपर्णी, स्त्री, सिंहस्य शिशोः पर्णमिव पर्ण-
मस्याः। ङीप्।) वासकः। इति जटाधरः॥
सिंहपुच्छिका,स्त्री, (सिंहपुच्छी+स्वार्थे कन्।)
चित्रपर्णिका। इति रत्नमाला॥ चुट्टचाकुलिया
इति भाषा॥
सिंहपुच्छी, स्त्री, (सिंहस्य पुच्छ इव पुष्पमस्याः।
ङीप्।) चित्रपर्णिका। पृश्निपर्णी। इत्यमरः।
२। ४। ८३॥ माषपर्णी। इति रत्न-
माला॥

सिंहपुष्पी, स्त्री, (सिंहस्य पुच्छ इव पुष्पमस्याः।
ङीप्।) पृश्निपर्णी। इति राजनिर्घण्टः॥
सिंहमुखी, स्त्री, (सिंहस्य मुखमिव पुष्पमस्याः।
ङीप्।)वासकः। इति राजनिर्घण्टः॥
सिंहयाना, स्त्री, (सिंहो यानं वाहनं यस्याः।)
दुर्गा। इति हेमचन्द्रः॥
सिंहरथा,स्त्री, (सिंह एव रथो यस्याः।) दुर्गा।
इति शब्दरत्नावली॥ (यथा, हरिवंशे।१७६।
१७।
"वराङ्गनां सिंहरथां बहुरूपां हयध्वजाम्॥")
सिंहलं,क्ली,(सिंहलो देशः प्रभवत्वेनास्त्यस्येति।
अच्।) रङ्गम्। इति हेमचन्द्रः॥ रीतिः।
त्वचम्। इति राजनिर्घण्टः॥
सिंहलः, पुं, स्त्री, (सिंहं लाति प्राप्नोतीति।
ला+कः।) देशविशेषः। सिलोन इति
ख्यातः। यथा,—
"दक्षिणेऽवन्तिमाहेन्द्रमलया ऋष्यमूककाः।
चित्रकूटमहाराष्ट्रकाञ्चीसिंहलकोङ्कणाः॥"
इति ज्योतिस्तत्त्वम्॥
(अयच्च जम्बुद्वीपस्य अष्टमसिंहद्वीपानामन्य-
तमः। यथा, भागवते। ५। १८। २८—३०।
"जम्बुद्वीपस्य च राजन् उपद्वीपानष्टौ हैक
उपदिशन्ति सागरात्मजैरश्वान्वेषण इमां महीं
परितो निखनद्भिरुपकल्पितान्। तद्यथा
स्वर्णप्रस्थचन्द्रशुक्ल आवर्त्तनो रमणको मन्द-
हरिणः पाञ्चजन्यः सिंहलो लङ्केति॥" * ॥
तद्देशवासिनि, पुं भूम्नि। यथा, महाभारते।
१। १७६। ३५।
"पौण्ड्रान् किरातान् यवनान् सिंहलान्
वर्व्वरान् खशान्।
ससर्ज फेनतः सा गौर्म्लेच्छान् बहुविधानपि॥")
सिंहलस्था, स्त्री, (सिंहले तिष्ठति या। स्था+
कः।) सैंहली। इति राजनिर्घण्टः॥ सिंहल-
देशवासिनी च॥
सिंहलास्थानः, पुं, (सिंहल आस्थानं यस्य।)
तालद्रुमसदृशवृक्षविशेषः। यथा,—
"प्रोतफलः सिंहलास्थानस्थडी पिञ्जा छटापि
च॥"
इति शब्दमाला॥
सिंहलीलः, पुं, (सिंहस्य लीलेव लीला यत्र।)
रतिबन्धविशेषः। तस्य लक्षणं यथा,—
"लिङ्गोपरिस्थिता नारी भूमौ दत्त्वा पदद्वयम्।
हृदये दत्तहस्ता च सिंहलीलः प्रकीर्त्तितः॥
लिङ्गोपरिस्थिता नारी कान्तोरूस्थपदद्वया।
हृदये दत्तहस्ता च सिंहलीलोऽप्ययमावपि॥"
इति रतिमञ्जरी॥
सिंहवाहिनी, स्त्री, सिंहरूपो वाहो वाहन-
मस्त्यस्या इति। इनि।) दुर्गा। यथा,—
"सिंहमारुह्य कल्पान्ते निहतो महिषो
यतः।
महिषघ्नी ततो देवी कथ्यते सिंहवाहिनी॥"
इति देवीपुराणे ४५ अध्यायः॥

सिंहविक्रान्त, पुं, (सिंह इव विक्रान्तः ।) अश्वः । इति हारावली ।४२। शब्दमाला च ॥ सिंहतुल्यविक्रमविशिष्टे, त्रि ॥

सिंहविन्ना, स्त्री, (सिंह इव विन्ना विख्याता ।) माषपर्णी । इति राजनिर्घण्टः ॥

सिंहसंहनन, त्रि, (सिंहस्येव संहननं अवयवो यस्य ।) वराङ्गरूपोपेतः । इत्यमरः ।३।१।१२॥ प्रत्येकमवयवशस्तु सुन्दरः । सिंहसंहननः स स्यादृषो हि सर्वाङ्गसुन्दरः । इति कोषान्तरम्॥ सिंहस्येव संहननं देहोऽस्य सिंहसंहननः । कठिनदेहोऽयं यथाकथञ्चिदन्वयः । इति भरतः॥ (सिंहस्य संहननम् ।) सिंहनाशने, क्ली ॥

सिंहा, स्त्री, (सिंहतीति । सिंह + अः । अस्या-देशो हकारः । नुम् च । टाप् ।) नाड़ी । इति राजनिर्घण्टः ॥

सिंहाण, क्ली, लौहमलम् । इत्यमरटीका । २ । ९ । ९८ ॥

सिंहाण, क्ली, लौहमलम् । इत्यमरः । २।९।९८॥ अस्य रूपान्तराणि यथा । सिंघाणम् २ सिंहाणम् ३ सिंहानम् ४ । इति टीका ॥ नासिकामलम् [illegible] इति भाषा । तत्पर्य्यायः । सिंहाणकम् १ सिंघाणम् २ सिंहणम् ३ । इति शब्दरत्नावली ॥ [illegible] इति जटाधरः ॥

सिंहासन, क्ली, (सिंहचिह्नितमासनम् ।) स्वर्णादिरचितासनम् । इत्यमरः । २ । ८ । ३१ ॥ अस्य [illegible] ।

"राज्ञा [illegible] नाम श्रीसिंहासनमुत्तमं ।
[illegible]
[illegible] ।
[illegible]
[illegible] ॥
[illegible] ।
[illegible]
[illegible] । [illegible] ।
[illegible]
[illegible] ।
[illegible]
[illegible] ।
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible]
[illegible] ।
[illegible]
[illegible] ॥"

[illegible]

राजासनं चतस्रश्च एवं द्वादशपुत्तिकाः ।
रत्नैश्च नवभिः कार्य्यं निर्म्माणं चान्तरान्तरा ॥
रत्नवस्त्राद्यतं ह्येतत् पद्मसिंहासनं मतम् ।
अत्रोपविष्टो नरपतिः प्रतापमतिविन्दति ॥१॥
भद्रेन्द्रकाष्ठघटितः शङ्खमालोपशोभितः ।
शुद्धस्फटिकचित्राङ्गः शुद्धरूप्योपशोभितः ॥
चरणाग्रे शङ्खनाभिः पुत्तिकाः सप्तविंशतिः ।
स्थाने स्थाने विधातव्याः शुद्धस्फटिकसत्तमाः ।
शङ्खपट्टावृतं ह्येतत् शङ्खसिंहासनं मतम् ॥२॥
चन्दनेनोपघटितो गजमालोपशोभितः ।
विद्रुमैरपि वैदूर्य्यैः काञ्चनेनापि शोभितः ॥
चरणाग्रे गजशिरः पुच्छादेकैकपुत्तिका ।
माणिक्यैरचिता रत्नवस्त्रादिकविभूषणम् ।
गजसिंहासनं नाम साम्राज्यफलदायकम् ॥३॥
शालकाष्ठेन घटितो हंसमालोपशोभितः ।
पुष्परागैः काञ्चनेन कुरुविन्दैश्च चित्रितः ॥
चरणाग्रे हंसरूपं पुत्तिकास्त्वेकविंशतिः ।
गोमेदकोपघटितापीतवस्त्रविभूषणम् ।
हंससिंहासनं नाम सर्व्वानिष्टविनाशनम् ॥४॥
चन्दनेनोपघटितः सिंहमालोपभूषितः ।
शुद्धहीरकचित्राङ्गः शुद्धकाञ्चननिर्म्मितः ॥
चरणाग्रे सिंहशिरः पुत्तिकाश्चैकविंशतिः ।
मुक्ताशुक्तिभिरन्यैश्च निर्म्मलैरेव भूषणम् ॥
शुद्धशुक्लाद्यतं ह्येतत् सिंहसिंहासनं मतम् ।
अत्रोपविष्टो नरपतिः कृत्स्नां साधयति
क्षितिम् ॥ ५ ॥
भद्रशालोपमखितं शुद्धचम्पककल्पितम् ।
शरैर्मरकतैर्युक्तं पादाग्रे पद्मकोषिकाः ॥
द्वाविंशति पुत्तिकाश्च नीलवस्त्रादिभूषणम् ।
शङ्खसिंहासनं नाम शत्रुक्षयजयप्रदम् ॥ ६ ॥
निम्बकाष्ठेन घटनामृगमालोपशोभितम् ।
इन्द्रनीलैर्महानीलैः काञ्चनेनापि चित्रितम् ॥
चरणाग्रे मृगशिरश्चन्द्राविंशश्च पुत्तिकाः ।
नीलवस्त्रादियुक्तन्तु मृगसिंहासनं मतम् ।
सर्व्वाभिजयमत्यर्थं [illegible] ॥ ७ ॥
[illegible] हयमालोपशोभितम् ।
[illegible] पुत्तिकाः पञ्चमानि ॥
चरणाग्रे हयशिरः [illegible] ।
हयसिंहासनं नाम सर्व्वाभिजयवर्द्धनम् ॥ ८ ॥
इत्येतत् कथितं सार्द्धं सर्व्वसिंहासनाष्टकम् ।
[illegible] ॥
[illegible] पृथिवीपतिः
[illegible] ॥
[illegible] निरासनः ।
[illegible] ॥

राजा च नृपतिं [illegible]
द्विगुणं । [illegible]
मित्रसिंहासनं पार्थं यदा [illegible]
तदा सिंहासनं नाम सर्व्वं भवति
यदा सिंहासनं कर्त्तुं राजा [illegible]
तदा घातेन हन्तव्यो बलेनापि [illegible]
योगासनविशेषः । यथा, हठप्रदीपे ।
"गुल्फौ च वृषणस्याधः [illegible]
[illegible]
दक्षिणे सव्यगुल्फन्तु दक्षगुल्फन्तु
हस्तौ च जान्वोः [illegible]
व्यात्तवक्त्रो निरीक्षेत नासाग्रं [illegible]
सिंहासनं भवेदेतत् पूजितं योगिभि
बन्धत्रयस्य सन्धानं कुरुते चासनोत्तमम्।"

सिंहासन, पुं, (सिंहस्य आसनं [illegible] आसनं यत्र ।) [illegible] बन्धः । तस्य लक्षणं यथा,—
"स्वजङ्घाद्वयमाह्य च कृत्वा [illegible]
स्कन्धौ धृत्वा रमेत् कामी [illegible]
इति [illegible]

सिंहासनचक्र, क्ली, (सिंहासनमिव [illegible] सप्तविंशति नक्षत्राङ्कित नराकार [illegible] यथा,—
"अथातः संप्रवक्ष्यामि चक्रं सिंहासना[illegible]
सप्तविंशतिनक्षत्रैरेकैकाश्च नराकृत[illegible]
अश्विनीमघमूलाद्यं पञ्चनाड़ीविभेद[illegible]
अश्विन्याद्युत्तरे भागे मघाद्यं पूर्व[illegible]
मूलाद्यं दक्षिणे भागे पाश्चात्ये [illegible]
इतरेषु च राज्येषु नृपनामक्षतो [illegible]
शुभाशुभमिदं सर्व्वं यत्र यत्र [illegible]
नाड़िकापञ्चवेधेन पञ्चैकासनं [illegible]
आधारासनं पट्टं मित्रं सिंहासनं
[illegible]
[illegible] आधारेण राजा अभिषिक्तो [illegible]
पराधीनगतं राज्यं कुरुते नात्र [illegible]
आसनस्थेन ऋक्षेण नीतियुक्तो [illegible]
प्रधानपुरुषो देव प्रजामानिता [illegible]
पट्ट ऋक्षे यदा राजा उपविष्टो [illegible]
पृथ्वीराज्यमितिस्तुल्यचिर [illegible]
सिंहरूपो भवेद्राजा सिंहर्क्षे [illegible]
संग्रामस्य प्रियो नित्यमजाभ्यां [illegible]
सिंहासनगते चिन्ते [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

ता व्याधिपीडा च मनोदुःखं प्रजायते ॥
कन्ये यदा सौरिः पद्दराज्ञो विनश्यति ।
ो वाथ कुमारी वा मन्त्रिवन्धुचयोऽपि वा ॥
हे सिंहासने वापि यदा तिष्ठति सूर्य्यजः ।
। मृत्युर्न सन्देहो यदि शक्रसमो नृपः ॥
राहुकर्माङ्गिया यदा चन्द्रेण संयुताः ।
ासनगता एते तस्य राज्ञो भयङ्कराः ॥
युक्तोऽथ वक्रस्तु क्रूरनाडीगतोऽपि वा ।
नि चन्द्रयोगेन कालरूपी शनैश्चरः ॥
...कल दद्यादेवमन्त्री न संशयः ।
इति विपुलं राज्यं यस्यासनगतो गुरुः ॥"
इति ज्योतिस्तत्त्वम् ॥
स्यः, पुं, (सिंहस्य आस्यमिव पुष्पमस्य ।)
कः । इत्यमरः । २ । ४ । १०३ ॥ सिंह-
मुखे, त्रि ॥
का, स्त्री, कश्यपपत्नी । राहुमाता । यथा,
"कश्यपस्य प्रिया यौ तु सिंहिका
राहुवास्तुतनयावजीजनत् ।
पूर्व्वजो हरिनिकृत्तकन्धरो
देवतेरवरजो निपातितः ॥"
इति वास्तुयागतत्त्वम् ॥
ठस्य देवीविशेषः । यथा, देवीभागवते ।
३० । ७५ ।
हिका कृतशौचे तु कार्त्तिके त्वतिशाङ्करी ॥"
कासुनुः, पुं, (सिंहिकायाः सूनुः पुत्रः ।
ः । इति शब्दरत्नावली । वास्तुपुरुषः ।
वास्तुयागतत्त्वम् ॥
, स्त्री, (सिंह+ङीप् ।) सिंहपत्नी ।
था, कथासरित्सागरे । ६ । १०२ ।
प्रं स वहिर्तोऽन्यासां सिंहीनां पयसा
मया ॥")
ाकी । इत्यमरः । २ । ४ । ११४ ॥ कण्ट-
री । वासकः । इति मेदिनी ॥ वृहती ।
ुमाता । इति विश्वः ॥ मुद्गपर्णी । इति
ानिर्घण्टः ॥
ेलता, स्त्री, (सिंह्याः लता ।) वृहती । इति
वप्रकाशः ॥
,सेचने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-
क०-सेट् ।) दन्त्यादिः । सिकता । इति
ीदासः ॥ मोवधातुरयम् ॥
ता, स्त्री (सिक सेचने + बाहुलकात् अतच् ।
कतिलः । वालुकायुक्तभूमिः । इति मेदिनी ॥
१९८ ॥ वालुका । इति राजनिर्घण्टः ॥
कताः, स्त्री, भूम्नि, (सिक + अतच् ।) वालुका ।
ति मेदिनी । ते, १९८ ॥ अमरः । ३ । ३ । ८३ ॥
यथा, महाभारते । २ । २६ । १६ ।
सिकता वपन् कक्षमाणो राजानमनुगच्छति
पाण्डाः सिकतास्तस्य यथा स्पृशति भारत ।
सिकं शरवर्षाणि तथा मोक्ष्यति संयुगे ॥")
कतामयं, क्ली, (सिकताप्रचुरम् । मयट् ।)
ालुकामयतटम् । तत्पर्य्यायः । सैकतम् २ ।
त्यमरः । १ । १० । ८ ॥

सिकतावान्, [त्] त्रि, (सिकताः सन्त्यत्रेति । मतुप् । मस्य वः ।) वालुकाबहुलदेशः । तत्-पर्य्यायः । सिकता २ सिकतिलः ३ सैकतः ४ । इत्यमरभरतौ । २ । १ । ११ ॥
सिकतिलः, त्रि, (सिकताः सन्त्यत्रेति । सिकता + "देशे लुबिलचौ च ।" ५ । २ । १०५ । इति इलच् ।) सिकतावान् । इत्यमरटीकायां भरतः । २ । १ । ११ ॥
सिक्, [च] स्त्री, (सिच्यते इति । सिच् + क्विप् ।) वस्त्रम् । इति हेमचन्द्रः ॥ (जालम् । यथा, भागवते । ६ । १२ । ८ ।
"लोकाः सपाला यस्येमे श्वसन्ति विवशा वशे । द्विजा इव सिचा वद्धाः स काल इह कारणम् ॥")
सिक्तः, त्रि, (सिच् + क्तः ।) सेकाश्रयः । कृत-सेचनः । यथा, वायुपुराणे गयामाहात्म्ये ।
"आम्राश्च सिक्ताः पितरश्च तृप्ता
एका क्रिया द्व्यर्थकरी प्रसिद्धा ॥"
सिक्थं, क्ली, (सिञ्चति क्षरतीति । सिच क्षरणे + "पातृतुदिवचीति ।" उणा० २ । ७ । इति थक् ।) मधूच्छिष्टम् । इति मेदिनी ॥ मोम इति भाषा ॥ (यथा,—
"तिलाः सिक्थनिशावटीलक्षाद्यफलपत्रकैः ।
पटोलमालतीनिम्बपत्रैर्व्रण्यं घृतं स्मृतम् ॥"
इति तिलाद्यघृतम् ॥
इति वैद्यकचक्रपाणिसंग्रहे व्रणशोथाधिकारे ॥)
नीली । इति हेमचन्द्रः ॥
सिक्थः, पुं, (सिच + थक् ।) भक्तपुलाकः । (सिटी इति भाषा ॥ यथा,—
"————पेया सिक्थसमन्विता ॥"
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥)
ग्रासः । इति मेदिनी ॥ (यथा, कथासरित्सागरे । १०८ । ७७ ।
"भक्तसिक्थद्वयं प्राप्य पाकभाण्डादसञ्चयम् ॥")
सिक्थकं, क्ली, (सिक्थमेव । स्वार्थे कन् ।) मधूच्छिष्टम् । इत्यमरः । २ । ८ । १०८ ॥ (पुं, भक्तपुलाकः । सिटी इति भाषा । यथा,—
"सिक्थकैरहितो मण्डः पेया सिक्थसमन्विता यवागूर्बहुसिक्था स्याद्विलेपी विरलद्रवा ॥"
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥
यथा च वृहत्संहितायाम् । २६ । ८ ।
"दन्तैर्नागा गोश्चयाश्च लोप्या
ईष्या भूपाः सिक्थकेन द्विजाद्याः ।
तद्देश्या वर्षमाना दिशश्च
सिपद्यालाकरूपस्थितानि ॥")
सिध्यः, पुं, स्फटिकः । इति केचित् ॥
सिङ्घाण, क्ली, नासिकामलम् । इति शब्दरत्ना-वली ॥ सिकनी इति भाषा ॥
सिङ्घाण, क्ली, नासिकामलम् । इति शब्दरत्ना-वली ॥
सिङ्घाणक, क्ली, नासिकामलम् । इति शब्दरत्ना-वली । (यथा, वाभटे शारीरस्थाने ३८ अध्याये ।
"कफस्य विच्छिन्नं पीनसं शिङ्घाणकं ...")

सिङ्घिनी, स्त्री, नासिका । इति हलायुधः ॥
सिचयः, पुं, (सिचं सिञ्चनमिति प्राप्नोतीति । इन् + अच् ।) वस्त्रम् । इति हेमचन्द्रः ॥ (यथा, राजतरङ्गिण्याम् । १ । १ ।
"भूषाभोगिफणारत्नरोचिःसिचयचारवे ।
नमः प्रलीनमुक्ताय हरकल्पमहीरुहे ॥")
जीर्णवस्त्रम् ॥ इति त्रिकाण्डशेषः ॥
सिञ्चन्, [त्] त्रि, (सिञ्चतीति । सिच् + शतृ ।) सेचनकर्त्ता ॥
सिञ्चिता, स्त्री, (सिञ्च + णिच् + क्तः । टाप् ।) पिप्पली । इति शब्दचन्द्रिका ॥
सिञ्जा, स्त्री, अलङ्कारध्वनिः । इति केचित् ॥ तालव्यशकारादिः साधुपाठः ॥
सितं, क्ली, (सितः शुक्लवर्णोऽस्त्यस्येति । अच् ।) रौप्यम् । मूलकम् । इति राजनिर्घण्टः ॥ चन्दनम् । इति रत्नमाला ॥ (तत्तु शुक्लचन्द-नम् । यथा,—
"सितं मलयजं शीतं गोशीर्षं सितचन्दनम् ॥"
इति गारुडे २०८ अध्याये ॥)
सितः, पुं, (सिनोतीति । सि वन्धने + "अञ्जिघृ-सिभ्यः क्तः ।" उणा० ३ । ८८ । इति क्तः ।) शुक्लवर्णः । इत्यमरः । १ । ३ । ८० ॥ शुक्रा-चार्य्यः । इति शब्दरत्नावली ॥ शरः । इति नानार्थध्वनिमञ्जरी ॥
सितः, त्रि, (सितः शुक्लवर्णोऽस्त्यस्येति । अच् ।) शुक्लवर्णयुक्तः । इत्यमरः । ३ । ३ । ७८ ॥ (यथा, माघे । १ । २५ ।
सितं सितिम्ना सुतरां मुनेर्वपु-
र्विसारिभिः सौधमिवाथ लम्भयन् ॥") ष्ठ
सो + क्तः ।) समाप्तः । नियद्धः । ज्ञातः । इति विश्वः ॥
सितकण्टा, स्त्री, (सितः शुक्लः कण्टो यस्याः ।) श्वेतकण्टकारी । इति राजनिर्घण्टः ॥
सितकण्टारिका, स्त्री, श्वेतकण्टकारी । इति राजनिर्घण्टः ॥
सितकण्ठः, पुं, (सितः कण्ठो यस्य ।) दात्यूह-पक्षी । इति शब्दरत्नावली । शुक्लकण्ठयुक्ते, त्रि ॥
सितकरः, पुं, (सिताः शुक्लाः कराः यस्य ।) कर्पूरः । इति राजनिर्घण्टः ॥ चन्द्रः ॥
सितकर्णी, स्त्री, (सितः कर्ण इव पुष्पमस्याः । ङीप् ।) वासकः । इति राजनिर्घण्टः । (सित-पर्णी इति क्वचित् पाठः ॥ गुणादयोऽस्या वासकशब्दे ज्ञातव्याः ॥)
सितकुञ्जरः, पुं, (सितः कुञ्जरो यस्य ।) इन्द्रः । (सितः शुक्लः कुञ्जरः । ऐरावतः ।) इति केचित् ॥
सितकुम्भी, स्त्री, (सिता कुम्भी ।) श्वेतकुम्भा । इति राजनिर्घण्टः ॥
सितच्छत्र, पुं, (सितानि छत्राणि यस्य ...) ...इति ... इति भाषा ॥

सितच्छत्रं, क्ली, (सितं छत्रम् ।) राजच्छत्रम् । इति भूरिप्रयोगः ॥
सितच्छत्रा, स्त्री, (सितं छत्रमिव पुष्पमस्याः ।) शतपुष्पा । इत्यमरः । २ । ४।१५२॥ (विवृतिरस्याः शतपुष्पाशब्दे द्रष्टव्या ॥)
सितच्छत्रितः, पुं, (सितच्छत्रं जातमस्येति । इतच् ।) श्वेतच्छत्रयुक्तः । यथा, नैषधे । १ । १ ।
"निपीय यस्य क्षितिरक्षिणः कथां
तथाद्रियन्ते न बुधाः सुधामपि ।
नलः सितच्छत्रितकीर्त्तिमण्डलः
स राशिरासीन्महसां महोज्ज्वलः ॥"
सितच्छदः,पुं,(सितौ छदौ पक्षौ यस्य ।) हंसः। इति हेमचन्द्रः ॥
सितच्छदा, स्त्री, (सितश्छदो यस्याः ।) श्वेतदूर्व्वा । इति राजनिर्घण्टः ॥
सितदर्भः, पुं, (सितो दर्भः ।) श्वेतकुशः । इति राजनिर्घण्टः ॥
सितदीधितिः, पुं,चन्द्रः । सिता शुक्ला दीधितिः किरणो यस्य इति बहुव्रीहिसमासनिष्पन्नः ॥
सितदीप्यः, पुं,(सितं दीप्यं दीप्तिर्यस्य ।) श्वेतजीरकः । इति राजनिर्घण्टः ॥
सितदूर्व्वा, स्त्री, (सिता दूर्व्वा ।) श्वेतदूर्व्वा । इति रत्नमाला ।
सितद्रुः, पुं, (सितः द्रुर्वृक्षो यस्य ।) मोरटविशेषः । इति रत्नमाला ॥ (सितो द्रुरिति ।) शुक्लवर्णवृक्षश्च ॥
सितधातुः,पुं,(सित+शुक्लो धातुः ।) कठिनी । इति राजनिर्घण्टः ॥ शुक्लवर्णधातुमात्रञ्च ॥
सितपक्षः,पुं,(सितौ पक्षौ यस्य ।) हंसः । इति शब्दरत्नावली ॥ (सितः पक्षः ।) शुक्लपक्षः । यथा, बृहत्संहितायाम् । ६० । २० ।
"उदगयने सितपक्षे
शिशिरगभस्तौ च जीववर्गस्थे ॥")
सितपर्णी, स्त्री, (सितं पर्णमस्याः । ङीप् ।) अर्कपुष्पिकावृक्षः । इति रत्नमाला ॥
सितपाटलिका, स्त्री, (सिता पाटलिका ।) शुक्लपाटलावृक्षः । श्वेतपाड़रि इति हिन्दी भाषा । तत्पर्य्यायः । सितकुम्भी २ फलेरुहा ३ सितामोघा ४ कुबेराक्षी ५ श्वेताह्वा ६ काष्ठपाटला ७ धवलपाटली ८ । अस्या गुणाः । तिक्तत्वम् । गुरुत्वम् । उष्णत्वम् । वातदोषवमिहिक्काश्वयथुशोफनाशित्वञ्च । इति राजनिर्घण्टः ॥
सितपुङ्खा, स्त्री.(सितः पुङ्खो यस्याः ।) श्वेतशरपुङ्खा । इति राजनिर्घण्टः ॥
सितपुष्पं, क्ली. (सितं पुष्पमस्य ।) कैवर्त्तीमुस्तकम् । इति जटाधरः ॥ तालव्यशकारादिरपि पाठः ॥
सितपुष्पः, पुं. (सितं पुष्पमस्य ।) तगरवृक्षः । इति शब्दरत्नावली ॥ श्वेतरोहितः । काशः । इति राजनिर्घण्टः ॥

सितपुष्पा,स्त्री, (सितं पुष्पं यस्याः ।) मल्लिका । इति शब्दरत्नावली ॥
सितपुष्पी, स्त्री, (सितं पुष्पं यस्याः । ङीप् ।) श्वेतापराजिता । इति राजनिर्घण्टः ॥ अस्याः पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"गवाक्ष्यश्वखुरी श्वेता श्वेतभण्डापराजिता ।
द्विविधा सा सिता नीला गिरिकर्णी गवादनी॥"
सितमरिच, क्ली, (सितं मरिचम् ।) श्वेतमरिचम् । तत्पर्य्यायः । सिताख्यम् २ सितवल्लीजम् ३ बालुकम् ४ बहुलम् ५ धवलम् ६ चन्द्रकम् ७ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । विषभूतदृष्टिरोगनाशित्वम् । अहृद्यत्वम् । युक्त्या रसायनत्वञ्च । इति राजनिर्घण्टः ॥
सितमाषः, पुं, (सितो माषः ।) राजमाषः । इति हारावली ॥
सितरञ्जनः,पुं,(सितं रञ्जयतीति । रञ्ज+ल्युः ।) पीतवर्णः । इति हेमचन्द्रः ॥
सितरश्मिः, पुं, चन्द्रः । सितः शुक्लो रश्मिः किरणो यस्य सः ॥
सितवर्षाभूः, पुं, (सितो वर्षाभूः ।) पुनर्नवा । इति राजनिर्घण्टः ॥
सितशायिका, स्त्री,(सिता शायिका ।) श्वेतशरपुङ्खा । इति राजनिर्घण्टः ॥
सितशिम्बिकः, पुं, (सिता शिम्बिर्यस्य । कप् ।) गोधूमः । इति हेमचन्द्रः ॥ शितिशिम्बिकोऽपि पाठः ॥
सितशिवं,क्ली,(सितं शुक्लं शिवं मङ्गलजनकञ्च ।) सैन्धवलवणम् । तस्य रूपान्तराणि । शितशिवम् । सितसिवम् । शीतशिवम् । शीतसिवम् । इत्यमरटीका । २ । ९ । ४२ ॥
सितशिंशपा, स्त्री, (सिता शिंशपा ।) श्वेतशिंशपावृक्षः । इति राजनिर्घण्टः ॥
सितशूकः,पुं,(सितः शूको यस्य ।) यवः । इत्यमरटीकायां भरतः ॥ (यवशब्देऽस्य विवरणं ज्ञातव्यम् ॥)
सितशूरणः, पुं, (सितः शूरणः ।) वनशूरणः । इति राजनिर्घण्टः ॥
सितसप्तिः, पुं, (सिता सप्तयो घोटका यस्य ।) अर्ज्जुनः । इति केचित् ॥ (यथा,किराते।१३।१८
"स भवस्य भवत्ययैकहेतोः
सितसप्तेश्च विघाश्यतोः सहार्थम् ।
रिपुराप पराभवाय मध्यं
प्रकृतिप्रत्यययोरिवानुबन्धः ॥" * ॥
सितः सप्तिः ।) श्वेताश्वश्च ॥
सितसर्षपः, पुं, (सितः सर्षपः ।) गौरसर्षपः । इति राजनिर्घण्टः ॥
सितसारः, पुं, (सितः सारो निर्य्यासो यस्य ।) शालिञ्चशाकः । इति राजनिर्घण्टः ॥
सितसारकः, पुं, (सितसार एव । स्वार्थे कन् ।) शालिञ्चशाकः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"शालिञ्च सितसारश्च पत्तूरो लोहमारकः ॥")

सितसिंही, स्त्री, (सिता सिंही ।) कारी । इति राजनिर्घण्टः ॥
सितसिन्धुः,स्त्री,(. ।
इति शब्दरत्नावली ॥
सिता, स्त्री, (सित+टाप् ।) शर्करा. २ । ९ । ४३ ॥ अस्या गुणाः ।
"खण्डन्तु सिकतारूपं सुश्वेतं
सिता सुमधुरा रुच्या वातपित्तास्रदा
मूर्च्छाच्छर्द्दिज्वरान् हन्ति सुशीता
(यथा, महानिर्व्वाणतन्त्रे । ९ । ८८ ।
"ततो दुग्धं सिताश्चैव दत्त्वा
सुपचेत् संस्कृते वह्नौ
मल्लिका । इति शब्दरत्नावली ।
कारी । वाकुची । विदारी ।
चन्द्रिका । कुटुम्बिनी । मद्यम्
माषा । तेजनी । इति राजनिर्घण्टः ।
जातापराजिता । इति रत्नमाला ।
सितांशुः, पुं, (सिता अंशवो यस्य ।)
(यथा, नैषधे । १ । १२ ।
"सितांशुवर्णैर्वयति स्म तद्गुणै-
र्महासिवेम्नः सहकृत्वरी बहुम् ।
दिगङ्गनाङ्गाभरणं रणाङ्गणे
यशः पटं तद्भटचातुरीतुरी ॥")
कर्पूरः । इति शुभ्रांशुशब्ददर्शनात् ।
सितांशुतैलं, क्ली, (सितांशुजातं
तैलम् ।) कर्पूरतैलम् ।
सिताखण्डः, पुं, (सितायाः खण्डो
मधुजातशर्करा । तत्पर्य्यायः ।
सितजा ३ शर्करजा ४ माधवी ५
६ माक्षीकशर्करा ७ । अस्य गुणाः ।
मधुरत्वम् । चक्षुष्यत्वम् ।
श्वासहिक्कापित्तास्रदोषनाशित्वञ्च ।
निर्घण्टः ॥
सितापः, पुं, (सितः पक्षो यस्य ।)
इति हारावली ॥
सिताङ्गः, पुं, (सितः अङ्गो यस्य ।)
गडमत्स्यः । इति हारावली ।१८०।
इति पाठः साधुः ॥
सिताङ्गः, पुं, (सितमङ्गं यस्य ।)
इति राजनिर्घण्टः ॥ (वालुकाशाकम
हारावली । १८० ॥)
सिताजाजी,स्त्री,श्वेतजीरकः । इति राजनिर्घण्टः ।
(गुणादयोऽस्याः श्वेतजीरकशब्दे ज्ञेयाः ।
सितादिः, पुं, (सितायाः आदि
गुडः । इति राजनिर्घण्टः ॥
सिताननः, पुं, (सितमाननं यस्य ।)
इति केचित् ॥ शुक्लमुखयुक्ते, त्रि ।
सितापाङ्गः,पुं,(सितौ अपाङ्गौ यस्य ।)
इति त्रिकाण्डशेषः ॥

ङ्गं, क्ली. (सितमङ्गम् ।) श्वेतवल्कलम् । ति राजनिर्घण्टः ॥ (यथा, मत्स्यतीर्थानि । सारसितापाङ्गौ गच्छिसक्ता सितापाङ्गे ॥")

भः, पुं,(सिता शुभ्रा आभा यस्य ।) कर्पूरः । इत्यमरटीकायां रायमुकुटः ॥

भा, स्त्री,(सिता आभा यस्याः ।) तक्राह्वा । इति राजनिर्घण्टः ॥

भ्रः, पुं,(सितं शुभ्रमभ्रति प्राप्नोतीति । अभ्र ति + अण् ।) कर्पूरः । इत्यमरः । २ । ६ । १३० ॥ अस्य पर्य्यायो यथा,—
"ति क्लीवे च कर्पूरः सिताभ्रो हिमवालुकः । सारश्चन्द्रसंज्ञो हिमनामापि स स्मृतः ॥" इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

भ्रकं, क्ली,(सितं शुभ्रमभ्रति प्राप्नोतीति । भ्र + ण्वुल् ।) कर्पूरम् । इति रत्नमाला ॥

म्बरः, पुं, (सितमम्बरं यस्य ।) श्वेतवस्त्र- रहितव्रती । इति हलायुधः ॥ शुक्लवस्त्र- धारिणि, त्रि ॥

म्भोजं, क्ली,(सितं अम्भोजम् ।) श्वेतपद्मम् । इत्यमरः । १ । ८ । ४१ ॥

र्ज्जकः, पुं, (सितमर्ज्जयतीति । अर्ज्ज + ण्वुल् ।) श्वेततुलसी । श्वेताजवला इति हिन्दी भाषा । तत्पर्य्यायः । वैकुण्ठः २ बटपत्रः ३ ठेरकः ४ जम्बीरः ५ गन्धबहुलः ६ सुमुखः ७ कुपत्रकः ८ । अस्य गुणाः । कटुत्वम् । उष्ण- त्वम् । कफवातनेत्रामयनाशित्वम् । रुच्यत्वम् । सुप्रसवकारकत्वञ्च । इति राजनिर्घण्टः ॥

लकः, पुं,(आलयति भूषयतीति । अल + णिच् + ण्वुल् । सितः आलकः ।) श्वेतमन्दा- रः । इति राजनिर्घण्टः ॥

लता, स्त्री, (सिता लता ।) श्वेतदूर्व्वा । इति रत्नमाला ॥ (श्वेतदूर्व्वाशब्देऽस्या विषयो ज्ञातव्यः ॥)

लिकटभी, स्त्री, श्वेतकिणिहीवृक्षः । इति राजनिर्घण्टः ॥

तावरः, पुं, (सितमावृणोतीति । आ + वृ + अच् ।) शाकविशेषः । सुसुनी इति भाषा । तत्पर्य्यायः । सूच्याह्वः २ सूचीपत्रकः ३ श्रीवा- रकः ४ शिखी ५ वभ्रुः ६ स्वस्तिकः ७ सुनि- षण्णकः ८ कुरुटः ९ कुक्कुटः १० सूचीदलः ११ शितावरः १२ मेधाकृत् १३ ग्राहकः १४ । अस्य गुणाः । संग्राहित्वम् । कषायत्वम् । उष्णत्वम् । त्रिदोषनाशित्वम् । मेधारुचिप्रदत्वम् । दाह- ज्वरहारित्वम् । रसायनत्वञ्च । इति राज- निर्घण्टः ॥ निद्राकारित्वम् । इति लोकप्रसिद्धम् ॥ अस्य लक्षणं यथा,—
"चाङ्गेरीसदृशः पत्रे चतुर्द्दल इतीरितः । शाको जलान्विते देशे चतुष्पत्रीति चोच्यते ॥"
इति भावप्रकाशः ॥

सितावरी, स्त्री, (सितमावृणोतीति । आ + वृ + अच् । ङीप् ।) वाकुची । इति राज- निर्घण्टः ॥

सितासितः, पुं, (वर्णेन सितः वस्त्रेण असितः ।) बलदेवः । इति हेमचन्द्रः ॥ शुक्लकृष्णमिश्रितगतिः । यथा । ज्योतिस्तत्त्वे ।
"सितासितौ चन्द्रसमौ न कश्चित्
बुधः शनी सौम्यसितौ रवीन्दू ।
रवीन्दुभौमा रवितस्त्वमित्रा
मित्राण्यशेषस्य समः प्रदिष्टः ॥"
शुक्लमिश्रितकृष्णश्च ॥ (यथा, महाभारते । ७ । १३० । २८ ।
"ते हया वहतोभस्त्र मिश्रिता वातरंहसः । सितासिता महाराज यथा व्योम्नि बलाहकाः ॥")

सिताशयः, पुं, (सित आशयो यस्य ।) श्वेत- शिग्रुः । श्वेतरोहितः । इति राजनिर्घण्टः ॥

सितिः, त्रि, शुक्लः । कृष्णः । इत्यमरटीकायां रमानाथः ॥

सितिकण्ठः, पुं, (सितिः कृष्णः कण्ठो यस्य ।) शितिकण्ठः । शिवः । इत्यमरटीकायां सिति- शब्दस्य दन्त्यादित्वदर्शनात् ॥

सितिमा, [न्] पुं, (सितस्य सितेर्वा भावः । इम- निच् । शुक्लता । (यथा, माघे । १ । २५ ।
"सितं सितिम्ना सुतरां मुनेर्वपु-
र्विसारिभिः सौधमिवाथ लम्भयन् ॥")
कृष्णता । इति सितिशब्दादिमनप्रत्ययेन निष्पन्नः ।

सितिवारः, पुं, (सितिं वृणोतीति । वृ + अण्) सुनिषण्णकः । इति भावप्रकाशः ॥

सितिवासाः, [स्] पुं, (सिति नीलं वासो यस्य ।) बलदेवः । इति नीलाम्बरशब्ददर्शनात् ॥ (यथा, माघे । १ । ६ ।
"पिशङ्गमौञ्जीयुजमर्ज्जुनच्छविं
वसानमेणाजिनमञ्जनद्युति ।
सुवर्णसूत्राकलिताधराम्बरां
विडम्बयन्तं सितिवाससस्तनुम् ॥")

सितेक्षुः, पुं, (सितः इक्षुः ।) श्वेतेक्षुः । इति राजनिर्घण्टः ॥

सितेतरः, पुं, (सितादितरः ।) श्यामशालिः । कुलत्थः । इति राजनिर्घण्टः ॥ शुक्लेतरवर्णश्च ॥ (यथा, कुमारे । ३८ ।
"नीविमतिक्रम्य सितेतरस्य
तन्मेखलामध्यमणिरिवार्च्चिः ॥"
सितश्च इतरश्च इति विग्रहे । कृष्णशुक्लौ । अत्र द्विवचनप्रयोगः स्यात् । यथा, भागवते । १० । ४१ । ४१ ।
"नानालक्षणवेषाभ्यां कृष्णरामौ विरेजतुः । स्वलङ्कृतौ बालगजौ पर्व्वणीव सितेतरौ ॥")

सितेतरगतिः, पुं, (सितेतरा कृष्णा गतिरस्य ।) अग्निः । इति हलायुधः ॥

सितोदरः, पुं, (सितमुदरं यस्य ।) कुवेरः । इति हेमचन्द्रः ॥ शुक्लकुक्षियुक्ते, त्रि ॥ (सितमुदर- मिति ।) शुक्लकुक्षौ, क्ली ॥

सितोद्भवं, क्ली, (सित उद्भवो यस्य ।) श्वेत- चन्दनम् । इति केचित् ॥ (सिताया उद्भवो यस्य ।) शर्कराजाते, त्रि ॥

सितोपलं, क्ली, (सितमुपलमिव ।) खटिनी । इति त्रिकाण्डशेषः ॥

सितोपलः, पुं, (सितः उपलः ।) स्फटिकः । इति राजनिर्घण्टः ॥

सितोपला, स्त्री, (सित उपल इव आकृतिर्यस्याः स्त्रियां टाप् ।) शर्करा । इति हेमचन्द्रः ॥ (यथा,—
"सिता सितोपला चैव मत्स्यण्डी शर्करा स्मृता"
इति गारुडे २०८ अध्यायः ॥
अस्या गुणा यथा,—
"सितोपला सरा लघ्वी वातपित्तहरी हिमा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

सिद्धं, क्ली, (सिध + क्तः ।) सैन्धवलवणम् । इति राजनिर्घण्टः ॥

सिद्धः, पुं, (षिध + क्तः) देवयोनिविशेषः । इत्यमरः । १ । १ । ११ ॥ स तु अणिमादिगुणो- पेतो विश्वावसुप्रभृतिः । इति भरतः ॥ (यथा, कुमारे । १ । ५ ।
"उद्वेजिता वृष्टिभिराश्रयन्ते
शृङ्गाणि यस्यातपवन्ति सिद्धाः ॥")
व्यासादिः । विष्कम्भादिसप्तविंशतियोगान्तर्गतैकविंशयोगः । इति मेदिनी ॥ तत्र जातफलम् ।
"जितेन्द्रियः सर्व्वकलानिधानो
गौरोऽतिशूरो मधुरो विनीतः ।
सत्योपपन्नः कृतभूरिभोगो
यस्य प्रसूतौ किल सिद्धयोगः ॥"
इति कोष्ठीप्रदीपः ॥
व्यवहारः । इति शब्दरत्नावली ॥ कृष्ण- धुस्तूरः । गुडः । इति राजनिर्घण्टः ॥

सिद्धः, त्रि, (सिध + क्तः ।) प्रसिद्धः । (यथा, भागवते । १० । १८ । १६ ।
"एवं तौ लोकसिद्धाभिः क्रीड़ाभिश्चेरतुर्व्वने ॥")
नित्यः । निष्पन्नः । इति शब्दरत्नावली ॥ (यथा, रामायणे । २ । ८८ । ८ ।
"सिद्धार्थः खलु सौमित्रिर्यश्चन्द्रविमलोपमम् । मुखं पश्यति रामस्य राजीवाक्षं महाद्युतिम् ॥")
मुक्तः । इति हेमचन्द्रः ॥ (यथा, भागवते । ६ । १२ । १९ ।
"अहो दानव सिद्धोऽसि यस्य ते मतिरीदृशी ॥")
पक्वम् । यथा, सुमन्तुः ।
"पर्य्युषितं पुनःसिद्धमभोज्यमन्यच्च हिरण्यो- दकस्पर्शात् ।" इति प्रायश्चित्ततत्त्वम् ॥ मन्त्रसिद्धि- विशिष्टः । यथा,—
अथ मन्त्रसिद्धेरुपायाः । गौतमीये ।
"सम्यगनुष्ठितो मन्त्रो यदि सिद्धिर्न जायते ।
पुनस्तेनैव कर्त्तव्यं ततः सिद्धो भवेद्ध्रुवम् ॥
पुनरनुष्ठितो मन्त्रो यदि सिद्धिर्न जायते ।
पुनस्तेनैव कर्त्तव्यं ततः सिद्धो न संशयः ॥
पुनः सोऽनुष्ठितो मन्त्रो यदि सिद्धिर्न जायते ।
उपायास्तत्र कर्त्तव्याः सप्त शङ्करभाषिताः ।
भ्रामणं रोधनं वश्यं पीड़नं पोषशोषणम् ।
दहनान्तं क्रमात् कुर्य्यात् ततः सिद्धो भवेन्मनुः ॥

भ्रामणं वायुबीजेन यथानुक्रमयोगतः ।
तमन्त्रं यन्त्र आलिख्य सिद्धकर्पूरकुङ्कुमैः ।
उशीरचन्दनाभ्यान्तु मन्त्रं संग्रथितं लिखेत् ।
क्षीराज्यमधुतोयानां मध्ये तन्निक्षिप्तं भवेत् ॥
पूजनाज्जपनाद्धोमात् भ्रामितः सिद्धिदो भवेत्
भ्रमितो यदि न सिद्धः स्याद्बोधनं तस्य कारयेत्
सारस्वतेन बीजेन संपुटीकृत्य संजपेत् ।
एवं कृते भवेत् सिद्धो न चेदेतद्वशीकुरु ॥
रक्तचन्दनं कुष्ठं हरिद्रा मादनं शिला ।
एतैस्तु मन्त्रमालिख्य भूर्जपत्रे सुशोभने ।
धार्यकण्ठे भवेत् सिद्धः पीडनं चास्य कारयेत् ॥
अधरोत्तरयोगेन पदानि परिजप्य वै ।
ध्यायेच्च देवतां तद्वत् अधरोत्तररूपिणीम् ॥
विद्यामादित्यदुग्धेन लिखित्वाक्रम्य चाङ्घ्रिणा
तथाभूतेन मन्त्रेण होमः कार्य्यो दिने दिने ॥
पीडितो लज्जयाविष्टः सिद्धः स्यादथ पोषयेत्
बालायास्त्रितयं बीजं चाद्यन्ते तस्य योजयेत् ॥
गोक्षीरमधुनालिख्य विद्यां पाणौ विभावयेत्
पोषितोऽयं भवेत् सिद्धो न चेत् कुर्व्वीत शोषणम् ॥
द्वाभ्यान्तु वायुबीजाभ्यां मन्त्रं कुर्य्याद्विदर्भितम्
यथा विद्या गले धार्य्या लिखित्वा वरभस्मना ॥
शोषितोऽपि न सिद्धः स्यात् दहनीयोऽग्निबीजतः ।
आग्नेयेन तु बीजेन मन्त्रस्यैकैकमक्षरम् ॥
आद्यन्तमथ कर्त्तव्य योजयेद्दाहकर्म्मणि ।
ब्रह्मवृक्षस्य तैलेन मन्त्रमालिख्य धारयेत् ॥
कण्ठदेशे ततो मन्त्रः सिद्धः स्याच्छङ्करोदितम् ।
इत्येतत् कथितं सम्यक् केवलं तव भक्तितः ॥
यत्नेनैव कृतार्थः स्याद्बहुभिः किमु सुव्रते ॥"
इति तन्त्रसारः ॥ * ॥

सिद्धिविशिष्टः । स च चतुस्त्रिंशद्विधः । यथा,—
"चतुस्त्रिंशद्विधः सिद्धः सर्व्वकर्म्मोपकारकः ।
तमुपैति स्वयं सिद्धं भक्तस्तं नैव वाञ्छति ॥
द्वात्रिंशद्विधं सिद्धं सर्व्वसाधनकारणम् ।
मन्मुखात् श्रूयतां मन्द सिद्धमन्त्रं गृहाण च ॥
अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा
ईशित्वञ्च वशित्वञ्च तथा कामावसायिता ॥
दूरश्रवणमेवेति परकायप्रवेशनम् ।
मनोयायित्वमेवेति सर्व्वज्ञत्वमभीप्सितम् ॥
वह्निस्तम्भं जलस्तम्भं चिरजीवित्वमेव वा ।
वायुस्तम्भं क्षुत्पिपासानिद्रास्तम्भनमेव च ॥
कायव्यूहस्य वाक्सिद्धं मृतानयनमीप्सितम् ।
सृष्टौ च करणञ्चैव प्राणाकर्षणमेव च ॥
प्राणानाञ्च प्रदानञ्च क्षोभादीनाञ्च स्तम्भनम् ।
इन्द्रियाणां स्तम्भनञ्च बुद्धिस्तम्भनमेव च ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे । ७८।२०-२८

सिद्धकः, पुं, (सिद्ध इव । इवार्थे कन् ।) सिन्धुवारः । शालः । इति राजनिर्घण्टः ॥ (यथा, रघुः । ४ । ३ ।
"[illegible]
[illegible] सिद्धकमोचकौ च ॥")

सिद्धकामेश्वरी, स्त्री, (सिद्धा कामेश्वरी ।) कामाख्यायाः पञ्चमूर्त्त्यन्तर्गतप्रथममूर्त्तिः । तस्या रूपं यथा, कालिकापुराणे ६१ अध्याये ।
"रविशशियुतकर्णा कुङ्कुमापीतवर्णा
मणिकनकविचित्रा लोलजिह्वा त्रिनेत्रा ।
अभयवरदहस्ता साक्षसूत्रप्रशस्ता
प्रणतसुरनरेशा सिद्धकामेश्वरी सा ॥
अरुणकमलसंस्था रक्तपद्मासनस्था
नवतरुणशरीरा मुक्तकेशी सुहारा ।
शवहृदि पृथुतुङ्गस्तन्ययुग्मा मनोज्ञा
शिशुरविसमवस्त्रा सिद्धकामेश्वरी सा ॥
विपुलविभवदात्री स्मेरवक्त्रा सुकेशी
दलितकरकदन्ता सामिचन्द्रावतंसा ।
मनसिजदृशदिस्था योनिमुद्रालसन्ती
पवनगगनसक्ता संश्रुतस्थानभागा ॥"

सिद्धगङ्गा, स्त्री, (सिद्धा गङ्गा । 'क्वचित् सिद्धजनाकीर्णां पश्य मन्दाकिनीं नदीम् ।' रामा० २ । ९५।८। इत्युक्तेः सिद्धसेविता गङ्गा इति वा ।) मन्दाकिनी । इति जटाधरः ॥

सिद्धजलं, क्ली, (सिद्धं पक्वं जलं यत्र ।) काञ्जिकम् । इति हारावली ॥ (सिद्धं जलमिति ।) पक्ववारि च ॥

सिद्धदेवः, पुं, (सिद्धो देवः ।) शिवः । इति शब्दरत्नावली ॥

सिद्धधातुः, पुं, (सिद्धो धातुः ।) पारदः । इति त्रिकाण्डशेषः ॥

सिद्धपीठः, पुं, (सिद्धः पीठः ।) सिद्धस्थानम् । यथा —
"जाती लक्षवलिर्यत्र होमो वा कोटिसंख्यकः ।
महाविद्याजपः कोटिः सिद्धपीठः प्रकीर्त्तितः ॥"
इति तन्त्रम् ॥

सिद्धपुरं, क्ली, (सिद्धं पुरम् ।) भूगोलस्याधोदेशविशेषः । यथा,—
"लङ्का कुमध्ये यमकोटिरस्याः
प्राक्पश्चिमे रोमकपत्तनञ्च ।
अधस्ततः सिद्धपुरं सुमेरुः
सौम्येऽथ याम्ये वड़वानलश्च ॥
कुवृत्तपादान्तरितानि तानि
स्थानानि षड़्गोलविदो वदन्ति ॥"
इति सिद्धान्तशिरोमणिः ॥

सिद्धपुष्पः, पुं, (सिद्धप्रियं यस्य सिद्धं वा पुष्पमस्य) करवीरवृक्षः । इति राजनिर्घण्टः ॥

सिद्धप्रयोजनः, पुं, (सिद्धानां प्रयोजनं यत्र ।) गौरसर्षपः । इति राजनिर्घण्टः ॥

सिद्धमन्त्रः, पुं, (सिद्धो मन्त्रः ।) सिद्धप्राप्तमन्त्रः । यथा, ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे । ७८।२१ ; २०—२८ ।
"द्वात्रिंशद्विधं सिद्धं सर्व्वसाधनकारणम् ।
मन्मुखात् श्रूयतां मन्द सिद्धमन्त्रं गृहाण च ॥"
"ओम् सर्व्वेश्वराय सर्व्वविघ्नविनाशिने मधुसूदनाय स्वाहेत्येवं मन्त्रश्च सर्व्वेषां कल्पपादपः । सामवेदे च कथितः सिद्धानां सर्व्वसिद्धिदः ॥"

अनेन योगिनः [illegible]
शतलक्षजपेनैव मन्त्रसिद्धिर्भवेत्

सिद्धमोदकः, पुं, (सिद्धान् मोदयतीति । णिच् + ण्वुल् ।) तवराजीक्षुः । राजनिर्घण्टः ॥

सिद्धयोगिनी, स्त्री, (सिद्धा योगिनी ।) [illegible] विशेषः । इत्यपराजितास्तोत्रम् । (कथासरित्सागरे । ३७ । ११ ।
"इत्युक्त्वैव गतायाञ्च तस्यां [illegible]
तत्प्रतीघातहेतोर्मामस्तौच्छम्भोः [illegible]

सिद्धरसः, पुं, (सिद्धो रसः ।) पारदः । इत्यजयपालः ॥

सिद्धरसः, त्रि, (सिद्धो रसो यस्य ।) [illegible] इति मेदिनी ॥

सिद्धविद्या, स्त्री, (सिद्धा विद्या ।) [illegible] विशेषः । यथा,—
"काली तारा [illegible]
भैरवी छिन्नमस्ता च [illegible]
वगलामुखी [illegible]
एता दश महाविद्याः [illegible]
इति [illegible]

सिद्धसलिलं, क्ली, (सिद्धं पक्वं [illegible]) काञ्जिकम् । इति त्रिकाण्डशेषः ॥

सिद्धसाधनं, क्ली, (सिद्धस्य साधनम् ।) [illegible] वस्तुनः साधनम् । [illegible] मानम् । यथा,—
"अतएव न स्वरूपासिद्धिः सिद्धसाधनं [illegible]
इति सिद्धान्तलक्षणे

सिद्धसाधनः, पुं, (सिद्धानां साधनमस्मिन्) गौरसर्षपः । इति राजनिर्घण्टः ॥

सिद्धसाध्यः, पुं, (सिद्धात् साध्यः ।) [illegible] यथा,—
"सिद्धसिद्धो यथोक्तेन द्विगुणात् [illegible]
[illegible]
इति [illegible]

सिद्धसिद्धः, पुं, (सिद्धात् सिद्धः ।) [illegible] यथा,—
"सिद्धसिद्धो [illegible]
सिद्धसुसिद्धोऽर्द्धजपात् [illegible]
इति [illegible]

सिद्धसिन्धुः, स्त्री, (सिद्धसेविता सिन्धुः ।) [illegible] इति त्रिकाण्डशेषः ॥

सिद्धसुसिद्धः, पुं, (सिद्धात् सुसिद्धः ।) [illegible] विशेषः । अस्य प्रमाणं सिद्धसाध्यशब्दे द्रष्टव्यम् ॥

सिद्धसेनः, पुं, (सिद्धा सेना यस्य ।) [illegible] इति शब्दरत्नावली ॥

सिद्धसेवितः, पुं, (सिद्धैः सेवितः ।) [illegible] भैरवः । इति तन्त्राटीकाधृतशब्दार्णवः ॥ सिद्धजनोपासिते, त्रि ॥

सिद्धा, स्त्री, (सिध + क्तः । टाप् ।) ऋद्धिः । इति राजनिर्घण्टः ॥ योगिनीविशेषः । इति शब्दार्थचिन्तामणिदीपिकायाम् ।

ङ्गला पिङ्गला धन्या भ्रामरी भद्रिका तथा।
ा सिद्धा सङ्कटा च योगिन्योऽष्टौ प्रकी-
र्त्तिताः ॥"
न्तः, पुं, (सिद्धः अन्तो यस्मात् ।) पूर्व्व-
निरस्य सिद्धपक्षस्थापनम् । इति भरतः ॥
था, महाभारते । १ । ७० । ४२ ।
पनाक्षेपसिद्धान्तपरमार्थज्ञतां गतैः ॥")
र्य्यायः । राद्धान्तः २ । इत्यमरः ।।१।५।४ ॥
विषज्योतिर्ग्रन्थाः । यथा । ब्रह्मसिद्धान्तः१
सिद्धान्तः २ सोमसिद्धान्तः ३ वृहस्पति-
न्तः ४ गर्गसिद्धान्तः ५ नारदसिद्धान्तः ६
ारसिद्धान्तः७ पुलस्त्यसिद्धान्तः८ वशिष्ठ-
ान्तः९॥ तन्त्राधिकरणाभ्युपगमसंस्थितिः
ान्तः । स च चतुर्व्विधः । सर्व्वतन्त्रप्रति-
ाधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात्
तन्त्राविरुद्धस्तन्त्रेऽधिकृतोऽर्थः सर्व्वतन्त्र-
ान्तः ॥१॥ समानतन्त्रसिद्धः परतन्त्रासिद्धः
तन्त्रसिद्धान्तः॥२॥ यत्सिद्धावन्यप्रकरणसिद्धिः
धिकरणसिद्धान्तः ॥३॥ अपरीक्षिताभ्युप-
ात् तद्विशेषपरीक्षणमभ्युपगमसिद्धान्तः॥४॥
गौतमसूत्रम् ॥ (तथास्य विवृतिर्यथा,—
य सिद्धान्तः । सिद्धान्तो नाम यः परीक्षकै-
विधं परीक्ष्य हेतुभिः साधयित्वा स्थाप्यते
र्णयः स सिद्धान्तः । स चोक्तश्चतुर्विधः । सर्व्व-
त्रसिद्धान्तः, प्रतितन्त्रसिद्धान्तः, अधिकरण-
द्धान्तः, अभ्युपगमसिद्धान्त इति ।
सर्व्वतन्त्रसिद्धान्तो नाम सन्ति निदानानि,
न्ति व्याधयः,सन्ति सिद्धुपायाः साध्यानामिति
तितन्त्रसिद्धान्तो नाम तस्मिंस्तस्मिंस्तन्त्रे तत्तत्
सिद्धं यथान्यत्राष्टौ रसाः षड़त्र । पञ्चेन्द्रि-
णि यथान्यत्र षड़िन्द्रियाणि । वाताधिकृताः
र्व्वविकारा यथान्यत्र वातादिकृता भूतकृताश्च
सिद्धाः ।
धिकरणसिद्धान्तो नाम यस्मिन्नधिकरणे
स्तूयमाने सिद्धान्यन्यान्यपि अधिकरणानि
वन्ति । न मुक्तः कर्म्मानुबन्धिकं कुरुते निस्पृ-
त्वादिति प्रस्तुते सिद्धाः कर्म्मफलमोक्षपुरुष-
त्यभावा भवन्ति ।
भ्युपगमसिद्धान्तः । अभ्युपगमसिद्धान्तो नाम
मर्थमसिद्धमपरीक्षितमनुपदिष्टमहेतुकं वा
ादकालेऽभ्युपगच्छन्ति भिषजः। तद्यथा द्रव्यं
प्रधानमिति कृत्वा वक्ष्यामः। गुणाः प्रधाना
ति कृत्वा वक्ष्यामः । इत्येवमादिश्चतुर्विधः
सिद्धान्तः ।" इति चरके विमानस्थाने
८ अध्यायः ॥)
द्धान्ताचारः, पुं, (सिद्धोऽन्तो यस्य । तादृश
आचारः ।) तान्त्रिकाचारविशेषः । यथा,—
"आत्मानं देवतां मत्वा यजेद्देवीं मानसैः ।
सदा शुद्धः सदा शान्तः सिद्धान्ताचार उच्यते॥"
इत्याचारभेदतन्त्रम् ॥
सिद्धान्ती,[न्]पुं, (सिद्धान्तोऽस्यास्तीति । इनि ।)
मीमांसकः । इति भूरिप्रयोगः ॥

सिद्धापगा, स्त्री, सिद्धसेविता आपगा ।) गङ्गा ।
इति हेमचन्द्रः ॥
सिद्धायिका, स्त्री, चतुर्व्विंशतिबुद्धशासनदेव-
तान्तर्गतदेवीविशेषः । इति हेमचन्द्रः ॥
सिद्धारिः, पुं, मन्त्रविशेषः । एतत्प्रमाणं सिद्ध-
साध्यशब्दे द्रष्टव्यम् ॥
सिद्धार्थः, पुं,(सिद्धोऽर्थो यस्य ।) हृत्तार्हत्पिता ।
इति हेमचन्द्रः ॥ शाक्यसिंहः । इति मेदिनी॥
(सिद्धोऽर्थो यस्मात् ।) श्वेतसर्षपः । इत्यमरः ।
२ । ९ । १८ ॥ (यथा, भागवते । ४ । ९ ।५८ ।
"भ्रवाय पथि दृष्टाय तत्र तत्र पुरस्त्रियः ।
सिद्धार्थाक्षतदध्यम्बुपूर्व्वापुष्पफलानि च ।
उपजह्रुः प्रयुञ्जाना वात्सल्यादाशिषः सतीः॥")
अस्य पर्य्यायगुणाः गौरसर्षपशब्दे द्रष्टव्याः ॥
वटीवृक्षः । इति राजनिर्घण्टः ॥ प्रसिद्धार्थः ।
यथा,—
"सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्त्तते ।
ग्रन्थादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः ॥"
इति व्याकरणटीका ॥
सिद्धार्थी, स्त्री, (सिद्धोऽर्थो यस्याः ।) चतुर्थ-
जिनमाता । इति हेमचन्द्रः ॥
सिद्धिः, स्त्री, (सिध + क्तिन् ।) दुर्गा । यथा,—
साधनात् सिद्धिरित्युक्ता साधका वाथ ईश्वरी॥"
इति देवीपुराणे ४५ अध्यायः ॥
ऋद्धिनामौषधम् । इत्यमरः । २ । ४ । ११२॥
योगविशेषः । निष्पत्तिः । यथा, मनुः ।२।९७।
"वेदास्त्यागश्च यज्ञाश्च नियमाश्च तपांसि च ।
न विप्रदुष्टभावस्य सिद्धिं गच्छन्ति कर्हिचित्॥")
पादुका । अन्तर्द्धिः । वृद्धिः । इति मेदिनी ॥
मोक्षः । इति हेमचन्द्रः ॥ (यथा, मनुः ।
१२ । ११ ।
"कामक्रोधौ तु संयम्य ततः सिद्धिं नियच्छति॥")
सम्पत्तिः । इति धरणिः ॥ बुद्धिः । इति शब्द-
रत्नावली ॥*॥ अष्टसिद्धिनामलक्षणानि यथा,
"अणिमा महिमा चैव लघिमा प्राप्तिरेव च ।
प्राकाम्यञ्च तथेशित्वं वशित्वञ्च तथापरम् ॥
यत्र कामावसायित्वं गुणानेतानथैश्वरान् ।
प्राप्नोत्यष्टौ नरव्याघ्र परनिर्व्वाणसूचकान् ॥
सूक्ष्मात् सूक्ष्मतरोऽणीयान् शीघ्रत्वाल्लघिमा
गुणः ।
महिमाशेषपूज्यत्वात् प्राप्तिर्नाप्राप्यमस्य यत्॥
प्राकाम्यमस्य व्यापित्वात् ईशित्वं चेश्वरो यतः।
वशित्वात् वशिता नाम योगिनः सप्तमो गुणः॥
यत्रेच्छास्थानमप्युक्तं यत्र कामावसायिता ।
ऐश्वर्य्ये कारणैरेभिर्योगिनः प्रोक्तमष्टधा ॥"
इति मार्कण्डेये दत्तात्रेयालर्कसंवादे योगवृत्त-
नामाध्यायः ३७ ॥ (अष्टादशसिद्धिनामानि
यथा, ब्रह्मवैवर्त्ते । १ । ६ । १८—१९ ।
"अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा
तथा ।
ईशित्वञ्च वशित्वञ्च सर्व्वकामावसायिता ॥
सर्व्वज्ञत्वं दूरश्रवणं परकायप्रवेशनम् ।

वाक्सिद्धिः कल्पवृक्षत्वं स्रष्टुं संहर्त्तुमीशता ।
अमरत्वञ्च सर्व्वाग्र्यं सिद्धयोऽष्टादश स्मृताः ॥")
भावनासिद्धिर्यथा,—
"तीर्थे कान्त्यौषधे देवे गुरौ मन्त्रे भवौषधे ।
आस्था च यादृशी यासां सिद्धिस्तासाञ्च
तादृशी ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे३९अध्यायः॥
ज्ञानात् सिद्धिर्यथा,—
"तस्मात् त्वमपि भूपाल देहि न्यायार्ज्जितं
धनम् ।
दानात् ज्ञानं ततः प्राप्य ज्ञानात् सिद्धिमवा-
प्स्यसि ॥"
इति वह्निपुराणे शिवरूपाख्याननामाध्यायः॥
सिद्धिदः, पुं, (सिद्धिं ददातीति । दा + कः ।)
वटुकभैरवः । इति तस्य स्तोत्रम् ॥ सिद्धिदातरि,
त्रि । (यथा, देवीभागवते । ६ । २ । ५१ ।
"तं कुन्ती वचनं प्राह मम मन्त्रोऽस्ति कामदः
दत्तो दुर्व्वाससा पूर्व्वं सिद्धिदः सर्व्वथा प्रभो॥")
यथा च ।
"मधुमासे तु संप्राप्ते शुक्लपक्षे चतुर्द्दशी ।
प्रोक्ता मदनभञ्जीति सिद्धिदा तु महोत्सवे ॥"
इति तिथ्यादितत्त्वम् ॥
सिद्धियोगः, पुं, (सिद्धेर्योगो यत्र ।) तिथिवार-
घटितशुभयोगविशेषः । यथा,—
"शुक्रे नन्दा बुधे भद्रा शनौ रिक्ता कुजे जया
गुरौ पूर्णा च संयुक्ता सिद्धियोगः प्रकीर्त्तितः ॥
इति ज्योतिःसागरः ॥
सिद्धियोगिनी, स्त्री, (सिद्धिप्रिया योगिनी ।)
योगिनीभेदः । यथा,—
"प्रणवाद्याश्च या विद्याः शूद्रादौ न समीरिताः
अभ्यासेन विशेषेण यत् शीघ्रं समुपासयेत् ॥
डाकिनी सा भवत्येव डाकिनीभिः प्रजायते ।
पतिहीना पुत्रहीना यथा स्यात् सिद्धियोगिनी"
इति तन्त्रसारः ॥ ७ ॥
दक्षस्य पञ्चाशत् कन्याः । तथा,—
"सती ख्यातिः स्मृतिः स्वाहा ह्यनसूया स्वधा
तथा ।
प्रीतिः क्षमा च संभूतिः सन्नतिश्च पतन्मसी ॥
कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः
बुद्धिर्लज्जा वपुःशान्तिस्तुष्टिः सिद्धिस्तथा रतिः॥
अरुन्धती वसुर्यामी लम्बा भानुर्मरुत्वती ।
सङ्कल्पा च मुहूर्त्ता च साध्या विश्वा च नामतः
अदितिश्च दितिश्चैव दनुः कालादनायुषा ।
सिंहिका सुरसा कद्रूर्विनता सुरभिः खसा ॥
क्रोधा इरा च प्राधा च दक्षकन्याः प्रकीर्त्तिताः
पञ्चाशत् सिद्धियोगिन्यः सर्व्वलोकस्य मातरः॥"
इति वह्निपुराणे सर्गभेदनामाध्यायः ॥
सिद्धिनी, स्त्री, (सिद्धिं प्राप्नोति । प्र + अः ।
ङीप् ।) श्वेतविषालिका । इति वैद्यकम् ॥
सिद्धिस्थानं, क्ली, (सिद्धेः स्थानम् ।) पुण्यस्थान-
विशेषः । यथा,—
"अतः परं प्रवक्ष्यामि सिद्धिस्थानानि तानि नु

यस्मिन्नाराधिता देवी क्षिप्रं भवति सिद्धिदा ॥
तुङ्गारं शतशृङ्गञ्च त्रिकूटं पर्व्वतं तथा ।
विन्ध्या गङ्गा सरिद्यत्र रेवातीरमथापि वा ॥
पयोष्णी मसुराख्या तु अथवा मण्डलेश्वरे ।
शङ्करेश्वरसामीप्ये अथवा अमरेश्वरे ॥
वेत्रवत्यास्तटे रम्ये हरिश्चन्द्रे तथा प्रिये ।
सरस्वतीतटे पुण्ये सुगन्धायतनेऽपि वा ।
स्थानेष्वेषु जपं कुर्य्यात् नन्दाहे क्षतमानसः ।
भैरवं शूलभेदञ्च चण्डीशं त्रिपुरान्तकम् ॥
षट्चक्रं चक्रोच्छासं कपालाख्यनामकम् ।
अजाविकं खरोष्ट्राख्यं स्थानान्येतानि वर्जयेत् ॥"
इति देवीपुराणे कुण्डप्रवेशनामाध्यायः ॥

सिद्धेश्वरी, स्त्री, (सिद्धा ईश्वरी ।) देवीविशेषः । यथा,—
"सिद्धां सिद्धेश्वरीं सिद्धविद्याधरगणैर्युताम् ।
मन्त्रसिद्धिप्रदां योनिसिद्धिदां लिङ्गशोभिताम् ॥"
इति मुण्डमालातन्त्रे ११ पटले महाविद्यास्तोत्रम् ॥ अपि च ।
"कृष्णेन बलभद्रेण गोपैः कंसजिघांसुभिः ।
षड्तर्कं कृतं तत्र मन्त्रनिश्चयकारकम् ॥
तदा षड्तर्कैः सा च सिद्धा देवी प्रतिष्ठिता ।
सिद्धिप्रदा भोगदा च तेन सिद्धेश्वरी स्मृता ।
षड्तर्केश्वरीं चैव दृष्ट्वा सिद्धिमवाप्नुयात् ॥"
इति वाराहे मथुरापरिक्रमप्रादुर्भावनामाध्यायः ॥

सिद्धौघः, पुं, (सिद्धानामोघः ।) गुरुक्रमविशेषः । यथा, तन्त्रे ।
"अथ तारागुरून् वक्ष्ये दृष्टादृष्टफलप्रदान् ।
ऊर्द्धकेशो व्योमकेशो नीलकण्ठो वृषध्वजः ॥
दिव्यौघाः सिद्धिदा वत्स सिद्धौघान् शृणु यत्नतः ।
वशिष्ठः कूर्म्मनाथश्च मीननाथो महेश्वरः ॥
हरिनाथो मानवौघान् शृणु वक्ष्यामि तद्गुरून् ।
तारावती भानुमती जयाविद्या महोदरी ॥
सुखानन्दः परानन्दः पारिजातः कुलेश्वरः ।
विरूपाक्षः फेरवी च कथितं तारिणीकुलम् ।
आनन्दनाथशब्दान्ता गुरवः सर्व्वसिद्धिदाः ।
स्त्रियोऽपि गुरुरूपाश्च अम्बान्ताः परिकीर्त्तिताः ॥"
इति तन्त्रसारः ॥
अन्यच्च ।
"ब्रह्मानन्दः पूर्णदेवश्चलचित्तश्चलाचलः ।
कुमारः क्रोधनश्चैव तथा च वरदोत्पलः ॥
मायो मायावती चैव मानवौघान् शृणु प्रिये ।
वशिष्ठः कूर्म्मनाथश्च मीननाथो महेश्वरः ।
हरिनाथो मानवौघानथ वक्ष्यामि सद्गुरून् ॥"
इति शक्तिरत्नाकरतन्त्रम् ॥
तथा ।
"नारदः काश्यपश्चैव शम्भुर्भार्गव कुम्भयोनिजः ।
एते पञ्च महादेवि सिद्धौघाः परिकीर्त्तिताः ॥"
इति तन्त्रम् ॥

सिध्म, [न्] क्ली, (सिध+मन् । स च कित् ।) किलासरोगः । इत्यमरः । २ । ६ । ५३ ॥ (यथा, सुश्रुते । २ । ५ ।
"क्षुद्रकुष्ठान्यपि स्थूलारुष्कं महाकुष्ठमेककुष्ठ-चर्म्मदलं विसर्पः परिसर्पः सिध्म विचर्च्चिका किटिभं पामा रकसा चेति ॥")

सिध्मं, क्ली, (सिध+बाहुलकात् मक् ।) किलासरोगः । इति हेमचन्द्रः ॥ सप्तमहाकुष्ठान्तर्गतकुष्ठरोगविशेषः । तल्लक्षणं यथा,—
"श्वेतं ताम्रं तनु च यद्रजो घृष्टं विमुञ्चति ।
प्रायशोरसि तत् सिध्ममलाबुकुसुमोपमम् ॥"
इति माधवकरः ॥
त्वक्स्थगता सिध्मपुष्पिका इति अलाबुपुष्पवत् श्वेतं सिध्मं सिध्मपुष्पिका । महाकुष्ठन्तु सिध्मं धातुप्रविष्टं सिध्मपुष्पिकेतरं श्वेतलोहितवर्णम् एतेन सिध्मस्य द्वैविध्यं सूचितम् । इति विजयरक्षितादयः ॥

सिध्मपुष्पिका, स्त्री, (सिध्मस्य किलासस्य पुष्पं विद्यते यस्याः । सिध्मपुष्प+ठन् ।) कुष्ठव्याधिभेदः । सा च त्वक्स्थगता अलाबुपुष्पवत्श्वेता इति रुग्विनिश्चयटीकायां विजयरक्षितादयः ॥

सिध्मलः, त्रि, (सिध्मं अस्यास्तीति । सिध्म+"सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति लच् ।) किलासी । इत्यमरः । २ । ६ । ६१ ॥ (यथा, वाजसनेयसंहितायाम् । ३० । १७ ।
"विश्वेभ्यो भूतेभ्यः सिध्मलं भूत्यै जागरणमभूत्यै इति ॥")

सिध्मला, स्त्री, (सिध्ममस्या अस्तीति । लच् । टाप् ।) मत्स्यविकृतिः । इति मेदिनी ॥ (औषधविशेषः । तद्यथा,—
"त्वगादिहीनाः संशुद्धाः मत्स्याः शकुलादयः ।
सुश्लक्ष्णचूर्णीकृतं तेषां शीते पलशतत्रयम् ॥
शतेन कटुतैलेऽस्य व्योषरामठधान्यकैः ।
कृमिघ्नदीप्यकनिशाचविकाग्निकार्द्रकैः ॥
जीरकद्वयहबुषारसुरसाज्जकसिन्धुकैः ।
दशमूलामृताभ्यां मार्कवैर्लवणैस्त्रिभिः ॥
चूर्णितैः पलिकैः सार्द्धं मारणान्परिप्लुतैः ॥
विन्यसेत् स्वे दृढे पात्रे तु धान्यराशौ पुनर्न्यसेत् ।
सप्तरात्रात् समुद्धृत्य पानभक्ष्यभोजनैः ।
सिध्मलेयं प्रयोक्तव्या नाम्नि वायौ विशेषतः ॥
भग्नरुग्नाश्च तृष्णाः कम्पिनः पीठसर्पिणः ।
गृध्रसीमग्निमान्द्यञ्च शूलगुल्मोदराणि च ।
वलीपलितखालित्यं हन्यात् स्यादमलेन्द्रियाः ॥"
इति वैद्यकचक्रपाणिसंग्रहे आमवाताधिकारे)

सिध्मवान्, [त्] त्रि, (सिध्ममस्यास्तीति । सिध्म+पक्षे मतुप् । मस्य वः ।) किलासरोगविशिष्टः इति सिध्मशब्दादस्त्यर्थे मतुप्प्रत्ययेन निष्पन्नः ॥

सिध्मा, स्त्री, किलासरोगः । इति हेमचन्द्रः ॥

सिध्यः, पुं, (सिध्यन्त्यस्मिन्नर्था इति । सिध+"पुष्यसिध्यौ नक्षत्रे ।" ३ । १ । ११६ । इति क्यप्प्रत्ययेन निपातितः ।) पुष्यनक्षत्रम् । इत्यमरः । १ । ३ । २२ ॥

सिध्रः, पुं, साधुः । वृक्षः । ...

सिध्रका, स्त्री, (सिध्र+स्वार्थे कन् । स्त्रीत्वम् ।) वृक्षविशेषः । इत्यमरः ।
सेधति ... ख्यातो वृक्षः । षिधु गत्यां ... स्वार्थे कः ... भरतः ॥

सिध्रकावणं, क्ली, (सिध्रकाणां वनमिति) देवोद्यानम् । इति त्रिकाण्डशेषः ।

सिनं, क्ली, (सिनोति बध्नाति ... बन्धने+"इण्षिञ्जीति ।" उणा० ... इति नक् ।) शरीरम् । इति ... णादिवृत्तिः ॥ (ग्रासम् । इति निघण्टुः ।)

सिनः, पुं, (सिनोतीति । ... सिञ्जीति ।" उणा० ३ । २ । इति ... ग्रासः । इति मुग्धबोधव्याकरणम् । ... इति केचित् ॥ शुक्लगुणविशिष्टे, त्रि ।

सिनी, स्त्री, शुक्लगुणविशिष्टा । यथा, सिनी श्वेनी । इति व्याडिः । इति शब्दटीकायां भरतः ॥

सिनी(वा)वाली, स्त्री, (... कला अस्यामिति । यद्वा, सिन्या कलया वध्यते सियते या । ... घञ् । ततो ङीप् ।) दृष्टेन्दुकलामावास्या । इत्यमरः । १ । ४ । ८ ॥ सा ... मावस्या । सिनी श्वेता ... सिनीवाली नदादित्वात् ङीप् । भरतः ॥ (यथा, भागवते । ४ । १ । ३४ ।
"पौर्णमास्या सिनीवाल्यां द्वादश्यां ...")
दुर्गा । इति मेदिनी ॥

सिन्दुकः, पुं, सिन्दुवारवृक्षः । इत्यमरः । २ । ४ । ... (तथास्य पर्य्यायगुणाश्च ।
"सिन्दुवारः श्वेतपुष्पः सिन्दुकः ...
नीलपुष्पी तु निर्गुण्डी शेफाली ...
सिन्दुकः स्मृतिदस्तिक्तः कषाय...
केश्यो नेत्रहितो हन्ति शूलशोथाममारुतान्
कृमिकुष्ठारुचिश्लेष्मज्वरान्नीलापि तद्विधा ।
सिन्दुवारदलं जन्तु वातश्लेष्महरं लघु ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ...)

सिन्दु(न्धु)वारः, पुं, सिन्धुं गजमदं ... त्वात् । वृ+अण् । पार्थिवो भव ... विशेषः । निसिन्दा इति भाषा । ... च क्वचित् । तत्पर्य्यायः । सिन्धुकः १ सुरसः ३ निर्गुण्डी ४ इन्द्राणिका ५ । इत्यमरः । २ । ४ । ६८ ॥ सिन्दुकः ६ सिन्धुवारकः ७ ... ८ शेफाली ९ शेफाली १० ... इति रत्नकोषः ॥ श्वेतपुष्पः १२ सिन्दुवारः ... २३ स्थिरसाधनकः १४ अमृतः १५ ... १६ अर्थसिद्धकः १७ । अस्य गुणाः । ... तिक्तत्वम् । कफवातक्षयकुष्ठकृमिनाशित्वम् । कार्य्यसिद्धिदत्वञ्च । इति राजनिर्घण्टः ॥

पि च।
सिन्धुकः स्मृतिदस्तिक्तः कषायः कटुको लघुः
ष्णो नेत्रहितो हन्ति शूलशोथाममारुतान्।
मिकुष्ठारुचिश्लेष्मव्रणान् नीलापि तद्विधा।
न्धुवारदलं तत्तु वातश्लेष्महरं लघु॥"
इति भावप्रकाशः॥*॥
शब्दं वारयति सिन्धुवारः पण् निपातनात् सिः
त इव। सिन्दुकसिन्दुवारौ दन्त्यमाद्यौ तवर्ग-
तीयवन्ताविति वहवः। केचित्तु सिन्धुं समुद्र-
पि वारयति शोषयति तीव्ररसत्वेन कफघ्न-
ात् सिन्धुवारः सिन्धुकसिन्धुवारौ तवर्गचतुर्थ-
न्ताविव्याहुः।" इति भरतः॥
न्दूरं, क्ली, (स्यन्दते इति स्यन्दू ङ क्षरणे +
स्यन्देः सम्प्रसारणञ्च।" उणा० १।६८।
ति ऊरन्। सम्प्रसारणञ्च।) रक्तवर्णचूर्ण-
विशेषः। सिंदूर इति भाषा। तत्पर्य्यायः।
नागसम्भवम् २। इत्यमरः।२।८।१०५॥
नागरेणुः ३ रक्तम् ४ सीमन्तकम् ५ नागजम् ६
नागगर्भम् ७ शोणम् ८ वीररजः ९ गणेश-
भूषणम् १० सन्ध्यारागम् ११ शृङ्गारकम् १२
सौभाग्यम् १३ अरुणम् १४ मङ्गल्यम् १५।
अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्।
व्रणविरोपणत्वम्। कुष्ठास्रभ्रमकण्डूतिविसर्पश्म-
त्वञ्च। इति राजनिर्घण्टः॥*॥ अपि च।
"सिन्दूरं रक्तरेणुश्च नागगर्भञ्च सीसजम्।
सीसोपधातुः सिन्दूरं गुणैस्तत् सीसवन्मतम्॥
संयोगजप्रभावेण तस्याप्यन्ये गुणाः स्मृताः।
सिन्दूरमुष्णं वीसर्पकुष्ठकण्डूविषापहम्।
भग्नसन्धानजननं व्रणशोधनरोपणम्॥"*॥
सिन्दूरस्य शोधनमाह।
"दुग्धाम्लयोगतस्तस्य विशुद्धिर्गदिता बुधैः।"
इति भावप्रकाशः॥*॥
सिन्दूरदानमन्त्रो यथा,—
"सिन्दूरञ्च वरं रम्यं भाले शोभाविवर्द्धनम्।
भूषणं भूषणानाञ्च सिन्दूरं प्रतिगृह्यताम्॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २१ अध्यायः॥*॥
तस्य धारणात् पत्युरायुर्व्वृद्धिर्भवति। यथा,—
"हरिद्रां कुङ्कुमञ्चैव सिन्दूरं कज्जलं तथा।
कार्पासकञ्च ताम्बूलं माङ्गल्याभरणं शुभम्॥
केशसंस्कारकवरीकरकर्णविभूषणम्।
भर्त्तुरायुष्यमिच्छन्ती दूरयेन्न पतिव्रता॥"
इति काशीखण्डे ४ अध्यायः॥
सिन्दूरः, पुं, (स्यन्दते इति। ऊरन्।) वृक्ष-
विशेषः। इति मेदिनी॥
सिन्दूरकारणं, क्ली, (सिन्दूरस्य कारणमिति।)
सीसकम्। इति हेमचन्द्रः॥
सिन्दूरतिलकः, पुं, (सिन्दूरस्येव तिलको यस्य।)
हस्ती। इति मेदिनी॥
सिन्दूरतिलका, स्त्री, (सिन्दूरस्य तिलको यस्याः।)
साधवा नारी। इति मेदिनी॥
सिन्दूरपुष्पी, स्त्री, (सिन्दूरवत् रक्तवर्णं पुष्पं
यस्याः। पाककर्णेति ङीप्।) पुष्पवृक्षविशेषः।
तत्पर्य्यायः। सिन्दूरी २ वीरपुष्पी ३ तृणपुष्पी ४
करच्छदा ५ शोणपुष्पी ६। अस्या गुणाः।
कटुत्वम्। तिक्तत्वम्। कषायत्वम्। श्लेष्मवात-
शिरोऽर्त्तिभूतनाशित्वम्। वर्ण्यप्रियत्वञ्च।
इति राजनिर्घण्टः॥
सिन्दूरी, स्त्री, (सिन्दूरं तद्वर्णोऽस्या अस्तीति।
अच्। गौरादित्वात् ङीष्।) रोचनी। रक्त-
चेलिका। धातकी। इति मेदिनी॥
सिन्धुः, पुं, (स्यन्दते इति। स्यन्दू प्रस्रवणे +
"स्यन्देः सम्प्रसारणं धश्च।" उणा० १।१२।
इति उः। धकारादेशः सम्प्रसारणञ्च।)
समुद्रः। इत्यमरः।१।१०।१॥ यथा,
भागवते।३।११।३१।
तावत्त्रिभुवनं सद्यः कल्पान्तैधितसिन्धवः।
प्लावयन्त्युत्कटाटोपचण्डवातेरितोर्म्मयः॥")
वमथुः। देशविशेषः। (यथा, रघुः।१५।
८७।
"युधाजितश्च सन्देशात् स देशं सिन्धुनामकम्।
ददौ दत्तप्रभावाय भरताय भृतप्रजः॥")
नदविशेषः। इति मेदिनी॥ इन्दस् इति
ख्यातः। (यथा, रघुः।४।६७।
"विनीताध्वश्रमास्तस्य सिन्धुतीरविचेष्टनैः।
दुधुवुर्वाजिनः स्कन्धान् लग्नकुङ्कुमकेशरान्॥")
गजमदः। इति हेमचन्द्रः॥ सिन्धुवारवृक्षः।
इति शब्दचन्द्रिका॥ श्वेतटङ्कणम्। इति राज-
निर्घण्टः॥ रागविशेषः। स च मालकौशराग-
पुत्त्रः। यथा,—
"माधवः शोभनः सिन्धुर्मारुमेवाड्कुन्तलाः।
कलिङ्गः सोमसंयुक्तः कौशिकस्य सुता इमे॥"
इति सङ्गीतसिन्धुः॥
सिन्धुः, स्त्री, (स्यन्दते इति। स्यन्द + उः। सम्प्र-
सारणम्। दस्य धश्च।) नदी। इति मेदिनी॥
(यथा, मुण्डकोपनिषदि।२।१।९।
"अतः समुद्रा गिरयश्च सर्व्वे-
ऽस्मात् स्यन्दन्ते सिन्धवः सर्व्वरूपाः।
अतश्च सर्व्वा ओषधयो रसश्च
येनैष भूतैस्तिष्ठते ह्यन्तरात्मा॥")
नदीविशेषः। तज्जलगुणाः। यथा,—
"शतद्रोर्विपाशायुजः सिन्धुनद्याः
सुशीतं लघु स्वादु सर्व्वामयघ्नम्।
जलं निर्म्मलं दीपनं पाचनञ्च
प्रदत्ते बलं बुद्धिमेधायुषञ्च॥"
इति राजनिर्घण्टः॥
सिन्धुकः, पुं, (सिन्धुरेव। स्वार्थे कन्।) सिन्धु-
वारवृक्षः। इति शब्दचन्द्रिका॥ (यथा, बृहत्-
संहितायाम्।५८।६।
"वैश्यानां जीवकखदिर-
सिन्धुकस्यन्दनाश्च शुभफलदाः॥")
सिन्धुकफः, पुं, (सिन्धोः कफ इव।) समुद्रफेनः।
इति शब्दरत्नावली॥
सिन्धुकरं, क्ली, (सिन्धौ सिन्धुदेशे कीर्य्यते इति
कॄ + अप्।) श्वेतटङ्कणम्। इति राजनिर्घण्टः॥
सिन्धुखेलः, पुं, (सिन्धौ तत्समीपे खेलतीति।
खेल + कः।) सिन्धुदेशः। इति शब्दरत्ना-
वली॥
सिन्धुजं, क्ली, (सिन्धोर्जायते इति। जन + डः।)
सैन्धवलवणम्। इत्यमरः।२।९।४२॥
(यथा, सुश्रुते।४।१७।
"वचापुष्करकुष्ठैलामदनामरसिन्धुजैः॥")
समुद्रजाते, त्रि॥ (यथा, महाभारते।३।
७१।१४।
"शुद्धान् दशभिरावर्त्तैः सिन्धुजान् वातरंहसः॥)
सिन्धुजन्म, [न्] क्ली, (सिन्धोर्जन्म उत्पत्तिर्यस्य।)
सैन्धवलवणम्। इति रत्नमाला॥
सिन्धुजन्मा, [न्] पुं, (सिन्धोः क्षीरसमुद्रात्
जन्म यस्य।) चन्द्रः। इति जटाधरः॥
सिन्धुजा, स्त्री, (सिन्धोर्जायते इति। जन + डः।)
लक्ष्मीः। इति जटाधरः॥
सिन्धुड़ा, स्त्री, मालवरागभार्य्या। यथा,—
"धानुषी मालसी रामकिरी च सिन्धुड़ा तथा।
अशावारी भैरवी च मालवस्य प्रिया इमाः॥"
इति सङ्गीतदामोदरः॥
सिन्धुनन्दनः, पुं, (सिन्धोः क्षीरोदस्य नन्दनः।)
चन्द्रः। इति त्रिकाण्डशेषः॥
सिन्धुनाथः, पुं, (सिन्धूनां नदीनां नाथः।)
समुद्रः। इति केचित्॥ (यथा, माघे।१४।६८।
"मत्कुणाविव पुरा परिप्लवौ
सिन्धुनाथशयने निषेदुषः।
गच्छतः स्म मधुकैटभौ विभो-
र्यस्य नैद्रसुखविघ्नतां क्षणम्॥")
सिन्धुपुत्त्रः, पुं, (सिन्धोः पुत्त्रः।) मर्कटेन्दुः। इति।
शब्दचन्द्रिका॥ चन्द्रश्च॥
सिन्धुपुष्पः, पुं, (सिन्धौ पुष्यति प्रकाशते इति।
पुष्प विकसने + अच्।) शङ्खः। इति शब्द-
चन्द्रिका॥
सिन्धुमन्थजं, क्ली, (सिन्धुमन्थात् जायते इति।
जन + डः।) सैन्धवलवणम्। इति रत्नमाला॥
सिन्धुरः, पुं, (सिन्धुं मदं राति ददातीति। रा +
कः।) हस्ती। इति हेमचन्द्रः॥ (यथा,
आर्य्यासप्तशत्याम्।१९८।
"गतिगञ्जितवरयुवतिः करौ कपोलौ करोतु
मदमलिनौ।
सुखबन्धभाव सिन्धुर लम्बोदर किं मदं वहसि॥")
सिन्धुरद्वेषी, [न्] पुं, (सिन्धुरं हस्तिनं द्वेष्टीति।
द्विष + णिनिः।) सिंहः॥
सिन्धुलवणं, क्ली, (सिन्धुजातं लवणम्।) सैन्ध-
वम्। इति रत्नमाला॥
सिन्धुवारः, पुं, (सिन्धुमपि वृणोति गन्धेनेति॥
वृ + अण्।) वृक्षोत्तमः। इति त्रिकाण्डशेषः॥
(सिन्धुं मदजलमपि वारयति तिरस्करोति
तीक्ष्णरसेन। वृ + णिच् + अण्।) सिन्धुवार-
वृक्षः। इत्यमरः।२।४।६८॥ यथा,—
"निर्गुण्डिकः सिन्धुवारः सिन्धुकः सुरसोऽपि च।
तथेन्द्रसुरसश्चेन्द्रसुरिस सिन्धुवारितः।

सिन्धुकोन्द्राविकेन्द्राणी सुरसा सिन्धुवारकः ॥"
इति शब्दरत्नावली ॥

अस्य गुणाः ।
"सिन्धुवारो विषश्लेष्मत्रणकुष्ठक्षयापहः ।"
इति राजवल्लभः ॥

सिन्धुवारकः, पुं, (सिन्धुवार एव । स्वार्थे कन् ।) सिन्धुवारवृक्षः । इति शब्दरत्नावली ॥

सिन्धुवारितः, पुं, (सिन्धुः मदजलं वारितो येन ।) सिन्धुवारवृक्षः । इति शब्दरत्नावली ॥

सिन्धुवेषणः, पुं, गम्भारीवृक्षः । इति शब्दचन्द्रिका ॥

सिन्धुशयनः, पुं, (सिन्धुः क्षीरोदः शयनं यस्य ।) विष्णुः । क्षीरोदशायित्वात् ॥

सिन्धुसङ्गमः, पुं, (सिन्धूनां सङ्गमो यत्र ।) नदीनदसमुद्राणां परस्परमेलकः । तत्पर्य्यायः । सम्भेदः २ । इत्यमरः । १ । १० । ३५ ॥ सिन्धोर्नद्योः सङ्गमो मेलकः सम्भेदः । सम्भिदन्ति मिलन्ति अस्मिन्निति सम्भेदः घञ् । सिन्धुशब्देन नदी नदः समुद्रश्चोच्यते तेन नद्योर्नदयोर्नदीसमुद्रयोश्च मेलकः सम्भेदः । इति वैकुण्ठादयः । इति भरतः ॥

सिन्धूत्थं, क्ली, (सिन्धोरुत्पत्तिर्यस्य ।) सैन्धवलवणम् । इति रत्नमाला ॥ (यथा, सुश्रुते । १ । ४४ ।
"विडङ्गमरीचं सदारु-
योगः स सिन्धूत्थमूत्रयुक्तः ॥")

सिन्धूपलं, क्ली, (सिन्धोः समुद्रस्य उपलमिव ।) सैन्धवलवणम् । इति हारावली । ५५ ॥

सिप्रः, क्ली (सिप् + क्विप् । सिपं चरणं रातीति । रा + कः । पृषोदरादित्वात् षस्य पः ।) सरोवरविशेषः । यथा, कालिकापुराणे ४१ अध्याये ।
"तत्र क्षितिधरे शम्भुः सिप्रं यस्मात् तदा सरः ।
गङ्गावतारमगमत् हिमवत्प्रस्थमुत्तमम् ॥"

सिप्रः, पुं, (सिप् चरणे + क्विप् । तं रातीति । रा + कः । पृषोदरादित्वात् साधुः ।) चन्द्रः । इति त्रिकाण्डशेषः ॥ निदाघजनितजलम् । घर्म्मः । इति मेदिनी ॥

सिप्रा, स्त्री, (सिप्र + स्त्रियां टाप् ।) नदीभेदः । इति मेदिनी ॥ सा तु उज्जयिनीदिग्वर्त्तिनी वर्त्तते । (यथा, रघुः । ६ । ३५ ।
"अनेन यूना सह पार्थिवेन
रम्भोरु ! कच्चिन्मनसो रुचिस्ते ।
सिप्रातरङ्गानिलकम्पितासु
विहर्त्तुमुद्यानपरम्परासु ॥")
अस्या उत्पत्तिर्यथा कालिकापुराणे २३ अध्याये ।
"एवं विरञ्चे विनिवृत्ते गौरवं मानमात्मनि ।
कन्दर्पो दर्शितुम् मंदमादं तथा यदा ॥
अथ तत्र दर्शितं गिरं मानमात्मनः हरे ।
[illegible] पुरा कृतम् ॥
[illegible] समुद्रान्तिकम् ।
[illegible] ॥
हिमाद्रेः कन्दरे मानी सरस्याश्च पृथक् पृथक् ।
तत्तोयं पतितं सिप्रे देवभोग्ये सरोवरे ।
तेन सिप्रा नदी जाता विष्णुना प्रेरिता
क्षितिम् ॥"

सिमः, पुं, (षि ञ् बन्धने + "अविसिविसिशुषिभ्यः कित् ।" उणा० १ । १४३ । इति मन् । स च कित् ।) समुदायः । सिमः सर्व्वः । इति सिद्धान्तकौमुदी ॥ (यथा, ऋग्वेदे । १ । ११५ । ४ ।
रात्री वासस्तनुते सिमस्मै ॥")

सिम्बा, स्त्री, (षम वैक्लव्ये + उल्वादयश्चेति साधुः ।) शमी । यथा, —
"शमी शमी शिम्बिशिम्बसिम्बासिम्बिरपीष्यते
इति द्विरूपकोषः ॥
इ छिमिड़ा इति ख्याते श्ँठी इति ख्याते । शाम्यति हरिरनया शमी शमभिर्ये शमे नाम्नीति इः पाक्षिकत्वादीति ईपि शमी तालव्यादिः शमेः पूर्व्ववच्च निपातनादकारस्य इत्वे शिम्बापि तालव्यादिः । सिम्बा दन्त्यादिरिति पुरुषोत्तमादयः । सिम्बिशब्दोऽप्यत्र शिम्बिरपि तालव्यादिर्दन्त्यादिश्च । इति भरतः ॥

सिम्बिः, स्त्री, शिम्बा । इति द्विरूपकोषः ॥ नखीनामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥

सिम्बिजा, स्त्री, शमीधान्यम् । इति भावप्रकाशः ॥ तालव्यशकारादिरपि ॥

सिम्बी, स्त्री, (सिम्बि + पक्षे ङीप् ।) निष्पावी । इति राजनिर्घण्टः ॥ अपि च ।
"सिम्बा सिम्बी पुस्तसिम्बिस्तथा पुस्तकसिम्बिका
शिम्बिद्वयञ्च मधुरं रसे पाके हिमं गुरु ।
बल्यं दाहकरं प्रोक्तं श्लेष्मलं वातपित्तजित् ॥"
इति भावप्रकाशः ॥

सिरः, पुं, पिप्पलीमूलम् । इति हेमचन्द्रः ॥ (पिप्पलीमूलशब्देऽस्य विषयो ज्ञेयः ॥)

सिरा, स्त्री, (सिनोतीति । षिञ् बन्धने + रक् । इत्युणादौ उज्ज्वलः । २ । १३ ।) नाड़ी । (यथा, सुश्रुते । ३ । ७ ।
"व्याप्याभितो देहं नाभितः प्रसृताः सिराः
प्रतानाः पद्मिनीकन्दाद्बिसादीनां यथा जलम् ॥"
यथा च ।
"आनायमन्यः सरणात् स्रोतांसि सरणात्
सिराः ॥"
इति चरके सूत्रस्थाने त्रिंशेऽध्याये ॥
तथा च ।
"अथ सिराशतानि भवन्ति । याभिरिदं शरीरमाराम इव जलहारिणीभिः केदार इव च कुल्याभिरुपस्निह्यतेऽनुगृह्यते चाकुञ्चनप्रसारणादिभिर्विशेषैः । द्रुमपत्रसेवनीनामिव च तासां प्रतानास्तासां नाभिर्मूलं ततश्च प्रसरन्त्यूर्द्ध्वमधस्तिर्य्यक् च ॥ भवतश्चात्र ॥
यावत्यस्तु सिराः काये सम्भवन्ति शरीरिणाम् ।
नाभ्यां सर्व्वा निबद्धास्ताः प्रतन्वन्ति समन्ततः ॥
नाभिस्थाः प्राणिनां प्राणाः प्राणान्नाभिर्व्युपाश्रिता ।
सिराभिरावृता
तासां
दश पित्तवाहिन्यो
रक्तवाहिन्यः । तासान्तु
स्थानगतानां
पित्तवाहिन्यः पित्तस्थाने
स्थाने
सिराशतानि ।
तत्र वातवाहिन्यः
विंशतिः
विशेषतस्तु कोष्ठे
श्रोण्यामष्टौ द्वे द्वे पार्श्वयोः षट् पृष्ठे
चोदरे दश वक्षसि ।
तासां चतुर्दश ग्रीवायां कर्णयोश्च
जिह्वायाम् । षट् नासिकायाम् ।
एवमेतत् पञ्चसप्तत्यधिकशतं
सिराणां व्याख्यातम् । एव
णामपि । विशेषतस्तु
कर्णयोर्द्वे । एवं रक्तवहाः कफवहाः
मेतानि सप्त सिराशतानि स
तानि । भवन्ति चात्र ।
क्रियाणामप्रतीघातममोहं
करोत्यन्यान् गुणांश्चापि स्वाः सिराः
यदा तु कुपितो वायुः स्वाः
तदास्य विविधा रोगा जायन्ते
भ्राजिष्णुतामन्नरुचिमग्निदीप्तिम
संसर्पन् स्वाः सिराः पित्तं कुर्य्याच्चान्यान्
गुणान्
यदा प्रकुपितं पित्तं सेवते स्वाः सि
तदास्य विविधा रोगा
स्नेहमङ्गेषु सन्धीनां स्थैर्य्यं बलमु
करोत्यन्यान् गुणांश्चापि बलासः स्वाः
यदा तु कुपितः श्लेष्मा स्वाः
तदास्य विविधा रोगा जायन्ते
धातूनां पूरणं वर्णं स्पर्शज्ञानमसंशय
स्वाः सिराः सञ्चरद्रक्तं
यदा तु कुपितं रक्तं सेवते स्वाः सि
तदास्य विविधा रोगा जायन्ते रक्त
नहि वातं सिराः काश्चिन्न पित्तं
श्लेष्माणं वा वहन्त्येता अतः
प्रदुष्टानां हि दोषाणां
भ्रमन्मार्गगमनमत
तत्रारुणा वातवहाः पूर्य्यन्ते
पित्तादुष्णाश्च नीलाश्च शीता गौर्य्यः
सिरा
सम्यग्व्यधात् रोहिण्यः सिरा
मन दक्षं प्रवक्ष्यामि न विध्येत्
वैकल्यं मरणं वापि
सिराशतानि चत्वारि विद्यात्

मंत्र शतं कोष्ठे चतु:पट्टिश्च मूर्हनि ।
ाश्च षोड़श सिरा: कोष्ठे द्वात्रिंशदेव तु ॥
शजत्रुणोर्हसवेध्या: परिकीर्त्तिता: ॥"
इति सुश्रुते शारोरस्थाने सप्तमेऽध्याये ॥)
,वाहिनी । इति हेमचन्द्र: ॥
ी, स्त्री, शस्त्रकोहल: । इत्यमरटोकायां
ः । २ । ४ । १२४ ॥
, पु, हस्ती । इति जटाधर: ॥
धयिषा, स्त्री, (साधयितुमिच्छा । साध +
+ष: । स्त्रियां टाप् ।) साधनेच्छा । यथा,
ापरिच्छेदे । ७० ।
पाधयिषया शून्या सिद्धिर्यत्र न विद्यते ।
ास्तत्र हित्तिलज्ञानादनुमितिर्भवेत् ॥"
क:, पुं, स्नुहोवृत्त: । इति शब्दरत्नावली ॥
;ोशब्दोऽप्य विहतिर्विज्ञ या ॥)
, पुं, (सिह्नति मनो यत्र । सिह + घञ् ।
दरादित्वात् साधु: ।) गन्धद्रव्यविशेष: ।
ा इति ख्यात: । तत्पर्य्याय: । तुरुष्क: २
हक: ३ यावन: ४ । इत्यमर: । २।४।१२८॥
हक: ५ पिण्याक: ६ कपिचन्दन:७ तैलाढ्य:
ाव: ८ यावल: १० । इति शब्दरत्नावली ॥
कोट्रय:११ पिटक:१२ तैलपर्णी १३ हक-
: १४ कल्कधूप: १५ । इति जटाधर: ॥
क:,पुं,(सिह्न एव । स्वार्थे कन् ।) सिह्न: ।
१ शब्दरत्नावली ॥ (शिलारस: । अस्य
ाणो यथा,—
ापिनामा कपितैलं कृत्रिमं कपिलचन्दन: ।
ाल्को मुक्तिमुक्तश्च पिण्डात: सिह्लको रस:॥"
इति वैद्यकरत्नमालायाम् ॥
सिह्लकस्तु तुरुष्क: स्याद्यतो यवनदेशज: ।
पितैलश्च सद्रातस्तथाच कपिनामक: ॥"
स्य गुणा यथा,—
सिह्लक: कटुक: स्वादु: स्निग्धोष्ण: शुक्र-
कान्तिकृत् ।
ष्य: कण्ठ्य: स्वेदकुष्ठज्वरदाहग्रहापह: ॥"
ति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
ह्लकी, स्त्री, सल्लकी । इति शब्दरत्नावली ॥
ह्लभूमिका, स्त्री, सल्लकी । इति शब्दरत्ना-
वली ॥
ीक, ऋ ङ सेके । इति कविकल्पद्रुम: ॥ (भ्वा०-
आत्म०-सक०-सेट् ।) ऋ, असिसीकत् । ङ,
सीकते । इति दुर्गादास: ॥
ीक, कि आर्द्रीशे । इति कविकल्पद्रुम: ॥ (चुरा०-
पक्षे भ्वा०-पर०-सक०-सेट् ।) कि, सीकयति
सीकति । आर्द्रीशे स्पर्शे । प्रमाणं तालव्यादौ
दृश्यम् । इति दुर्गादास: ॥
ीकर:, पुं, शीकर: । इत्यमरटीकायां भरत: ।
१ । ३ । ११ ॥ (यथा, रघु: । ५ । ४२ ।
"स नर्मदा रोधसि सीकरार्द्र-
मरुद्भिरानर्त्तितनक्तमाले ।
निवेशयामास विलङ्घिताध्वा
क्लान्तं रजोधूमरकेतु सैन्यम् ॥")

सीता, स्त्री, (सिनोतीति । षिञ् बन्धे + बाहु-
लकात् क्त: । दीर्घश्च । इत्युणादौ उज्ज्वल: । ३ ।
८० ।) लाङ्गलपद्धति: । इत्यमर: । २।९।१४॥
"द्वे लाङ्गलरेखायां सिनोति खनति भूमिं सीता
षि ञ श ञ बन्धे नाम्नीति त: निपातनाद्दीर्घ: ।
सीता दन्त्यसादि: । शेते भुवि इति शीता
तालव्यशादिश्च ।" इति भरत: ॥ (यथा,
कुमारे । ५ । ६१ ।
"न वेद्मि स प्रार्थितदुर्लभ: कदा
सखीभिरस्रोत्तरमीक्षितामिमाम् ।
तप:कृशामभ्युपपत्स्यते सखीं
वृषेव सीतां तदवग्रहक्षताम् ॥")
जनकराजनन्दिनी । सा तु श्रीरामपत्नी । तत्-
पर्य्याय: । वैदेही २ मैथिली ३ जानकी ४
धरणीसुता ५ । इति हेमचन्द्र: ॥ भूमिसम्भवा ६
इति जटाधर: ॥ अस्या उत्पत्तिर्यथा, वाल्मी-
कीये रामायणे । ६६ । १३—१४ ।
"अथ मे कृषत: क्षेत्रं लाङ्गलादुत्थिता तत: ।
क्षेत्रं शोधयता लब्धा नाम्ना सीतेति विश्रुता ॥
भूतलादुत्थिता सा तु व्यवर्द्धत ममात्मजा ।
वीर्य्यशुल्केति मे कन्या स्थापितेयमयोनिजा ॥"
अपि च तट्टीकाधृतपद्मपुराणम् ।
"अथ लोकेश्वरी लक्ष्मीर्जनकस्य पुरे स्वत: ।
शुभक्षेत्रे हलोत्खाते तारे चोत्तरफल्गुने ॥
अयोनिजा पद्मकरा बालार्कशतसन्निभा ।
सीतामुखे समुत्पन्ना बालभावेन सुन्दरी ॥
सीतामुखोद्भवात् सीता इत्यस्यै नाम चाकरोत् ।
ततोऽभूदौरसी तस्य ऊर्म्मिला नाम कन्यका ॥"
तज्जन्मव्रतादि गौतमं प्रति शिवेनोक्तं यथा,—
"वैशाखशुक्लपक्षे तु अष्टम्यां संयमनं कुरु ।
परेद्युर्विकुरुष्व त्वं जानकीजन्मनो व्रतम् ॥
सन्तुष्टा जानकी तेन भविष्यति न संशय: ।
एतद्व्रतं समाप्यस्ति कर्त्तव्यं त्वो द्विजोत्तम ॥
माहात्म्यं तस्य गदितुं नास्ति मे नियतं मन: ।
अहं तद्रसलीनोऽस्मि शक्तस्तद्वदितुं न हि ॥
तस्मादेकं वदामि त्वां मार्कण्डेयाश्रमेऽधुना ।
गत्वा मुनीन्द्र: सकलं मार्कण्डेयोऽनुपृच्छ्यताम्
सर्व्वं निवेदितं तस्मै व्रतमाहात्म्यमुत्तमम् ।
विधानञ्च फलं तस्य स मुनिस्त्वां वदिष्यति ॥
मार्कण्डेयोपदिष्टेन विधिनाचर तद्व्रतम् ।
यथाशक्त्यपि कुर्व्वाणो व्रतस्योत्सवमादरात् ॥
लप्स्यसे सकलान् कामान्नात्र कार्य्या विचा-
रणा ॥"
इत्यादि गौतमप्रश्नानन्तरं श्रीमार्कण्डेय उवाच
"त्रेतायुगे उत्तरायां गते कमलिनीपतौ ।
सर्व्वर्त्तुनिकरश्रेष्ठ ऋतौ तु कुसुमाकरे ॥
मासि पुण्यतमे विप्र माधवे माधवप्रिये ।
नवम्यां शुक्लपक्षे च वासरे मङ्गले शुभे ॥
सार्प्ये ऋक्षे च मध्याह्ने जानकी जनकालये ।
आविर्भूता स्वयं देवी योगेषु गतिरुत्तमा ॥
एतद्योगे कृतश्चैतद्व्रतं प्रोक्तमनन्तकम् ॥
अष्टम्यां यदि विद्धा स्यान्नवमी माधवे सिते ।

कुर्य्यान्नेदं व्रतं तस्यां कृतश्चेन्नरनता भवेत् ॥
मध्याह्नव्यापिनी ग्राह्या व्रतेऽस्मिन्नवमी तिथि:
दिनद्वयगतायान्तु तस्यां कार्य्या परा नरै: ॥
एतैर्योगैर्विनापि स्यात् तद्दिनं पापनाशनम् ।
व्रतानां नित्यमाम्नातं कर्त्तव्यं व्रतमुत्तमम् ॥*॥
यस्तु नो कुरुते मोहात् जानकीजन्मसम्भवम् ।
व्रतं स पच्यते घोरे नरके नात्र संशय: ॥
तस्मिन्नहनि मूढात्मा भुक्त्वाप्यन्नन्तु यो नर: ।
मुने स कृमिसङ्घातं सपूयं खादति स्फुटम् ॥
न करोति हि य: श्रुत्वा व्रतानामुत्तमं व्रतम् ।
स महापातकी ज्ञेय: सर्व्वधर्म्मबहिष्कृत: ॥*॥
कुरुते यो व्रतं सोऽपि पृथ्वीदानफलं लभेत् ।
महाषोड़शदानानां यज्ञानां मुनिपुङ्गव ! ॥
प्राप्नोति सर्व्वतीर्थानां प्राप्नुयात् सकलं फलम्
सर्व्वभूतदयां कृत्वा फलमाप्नोति यज्जन: ।
तत्प्राप्नोति व्रतादस्मात् नात्र कार्य्या विचारणा
अष्टम्यां प्रातरुत्थाय कृत्वा शौचमतन्द्रित: ।
महानद्यां तड़ागे वा कूपे वाप्यन्तिकेऽपि वा ॥
स्नात्वा कुर्य्यान्नित्यकर्म्म प्रात:सन्ध्यादिवन्दनम्
देवान् पितॄंश्च संतर्प्य हविष्याशी च संयत: ॥
एकभुक् ब्रह्मचारी स्याद्भूमिशायी च गौतम ॥
नवम्यां प्रातरुत्थाय दान्तो भूत्वा समाहित: ॥
तीर्थादौ विधिवत् स्नात्वा कृतनित्यक्रियो नर:
कुर्व्वीत मण्डपं रम्यं षोड़शस्तम्भमण्डितम् ॥
अष्टस्तम्भयुतं वापि चतु:स्तम्भमथापि वा ।
तोरणै: सहितं कुर्य्याद्वितानवरशोभितम् ॥
द्वारेषु शङ्खचक्रादिपताकाभिर्ध्वजैस्तथा ।
अलङ्कुर्य्यात् प्रतिस्तम्भं स्थापयेत् कलसान्
शुभान् ॥
शुद्धतण्डुलराशीषु पूर्णपात्रैरलङ्कृतान् ।
मध्ये तु चत्वरं कुर्य्यात् चतुर्हस्तप्रमाणत: ॥
हस्तमात्रोच्छ्रितं रम्यं चतुरस्रं सदा मुने ।*।
पलद्वयमितां कुर्य्यात् जानकीप्रतिमां शुभाम्
काञ्चनीमथवा शक्त्या कुर्य्यादेकपलोन्मिताम् ।
तदर्द्धेन तदर्द्धेन कुर्य्याच्छक्त्या चतुर्भुजाम् ॥
वित्तशाठ्यमकृत्वैवं राजतीमपि कारयेत् ।
श्रीड़म्बरीं पैत्तलीं वा मृण्मयीं द्विजसुत ॥
कुड्ये पटेऽथ वा लेख्या वर्णकै: प्रतिमां वराम् ।
लेख्यञ्च सूतिकागारं सर्व्वतश्च पटावृतम् ॥
पर्य्यङ्कशयने सुप्ता तत्र राज्ञी महामति: ।
तस्या: समीपत: सुप्ता मैथिली स्तनपायिनी ॥
जातकर्म्मकरो लेख्यो जनकश्च महीपति: ।
शतानन्द: पुरोधाश्च लेखनीय: प्रयत्नत: ॥
इत्यादि चरितं लेख्यं जानकीजन्मसम्भवम् ।
यथाशक्ति द्विजं कुर्य्यात् काञ्चनं किल गौतम ॥
राजतं चेत्रममलं स्वर्णसिंहासनं तथा ।
कुर्य्यात्ताम्रमयं कुम्भं पूर्णपात्रावृतं मुखे ॥
तन्मध्ये पञ्चरत्नादि तीर्थाम्बु निक्षिपेन्मुने ॥
आचार्य्यं शास्त्रकुशलं वेदाध्ययनकोविदम् ।
वृणुयाद्विमलाचारमवतंसाङ्गदासनै: ॥
अन्तरीयोत्तरीयैश्च पद्मपात्रादिभिर्व्रती ।
श्रीफलादिभिरभ्यर्च्य गन्धमाल्यानुलेपनै: ॥

कुर्य्याद्दै विधानेन ततः षोडश ऋत्विजः ॥
विद्यावतः सदाचारानष्टौ वा भक्तिसंयुतः ।
मध्ये वेदीं समालिप्य विचित्रैर्वर्णकैस्ततः ॥
पद्ममष्टदलं तत्र स्थापयेत् कलसं ततः ।
रत्नसिंहासनं रम्यं संस्थाप्य विजितेन्द्रियः ॥
मन्त्राधिवासनं कुर्य्यादन्युत्तारणपूर्व्वकम् ।
प्रतिमायां विधानेन देवीमावाहयेत्ततः ॥*॥
प्राणानायम्य मूलेन स्थिरेकाग्रेण चेतसा ।
मूलमन्त्रस्य जनकं मुनिं विन्यस्य मूर्द्धनि ॥
मुखे छन्दश्च गायत्रीं सीतादेवीं हृदि न्यसेत् ।
नाभौ तु विन्यसेद्ब्रह्मन् लक्ष्मीवीजं सविन्दुकम् ।
पादयोश्च नमः शक्तिं ततो विन्यस्य मन्त्रवित् ।
श्रीं श्रीमित्यादिभिर्व्वीजैर्दीर्घषट्स्वरसंयुतैः ।
कृत्वा करषडङ्गेषु न्यासं ध्यायेत्ततो व्रती ॥*॥
चतुर्भुजां सुवर्णाभां रामालोकनतत्पराम् ।
श्रीराघवान्वितां सीतां चिन्तयेद्धृदि सर्व्वदा ॥
इति ध्यात्वा समुच्चार्य्य मूलमन्त्रं कृताञ्जलिः ।
सविन्दुकमथाबीजं पूर्व्वमुच्चार्य्य गौतम ॥
सीतायै इति पश्चात्तु नमःशब्दं वदेत् किल ।
संपूज्य प्रतिमां रात्रौ कुर्य्यादेवमधिवासनम् ।
ब्रह्मचारी भूमिशायी तस्यां रात्रौ भवेद्व्रती ॥
तस्यां नवम्यां विधिवत् कृत्वा शौचमतन्द्रितः ।
नद्यादौ विमले स्नात्वा नित्यकर्म विधाय च ॥
ततस्तु प्रथमे यामे नित्यपूजाविधिं व्रती ।
कृत्वा द्वितीयप्रहरे शौनकाद्युपुरःसरम् ॥
संध्यात्रमनघे भक्त्या कुर्य्यादेकाग्रचेतसा ।
आसने उपविश्यादौ भूमिं विन्यस्य पूर्व्ववत् ॥
चतुरस्रं षट्कोणं त्रिकोणञ्च पुरस्ततः ।
कृत्वा मण्डलमाधारं तत्र संपूज्य मन्त्रवित् ॥
मूलेन शङ्खं संस्थाप्य जलमापूर्य्य निर्म्मलम् ।
निक्षिप्य तत्र संचिन्त्य तीर्थमङ्कुशमुद्रया ॥
चाप्लुत्य मूलमन्त्रेण सप्तवाराभिमन्त्रितैः ।
जलैः संप्रोक्षयेद्विद्वान् सामग्रीं पूजनोचिताम् ॥
पात्राणि तान्यर्घ्यादीनि निर्म्मितानि ततो मुने ।
पाद्यार्घ्यदानार्थं च मधुपर्कार्थमेव च ॥
स्नानाचमनीयार्थमेवमापादयेत् क्रमात् ।
एवं विधानतः पात्रे पाद्यादीनि प्रकल्पयेत् ॥
प्राणायामं समाधाय ततोऽन्तर्यागमाचरेत् ।
पुष्पाञ्जलिं समादाय ध्यायेत् प्रतिमागताम् ॥
[illegible] चतुर्भुजे ।
[illegible] जनकस्य महात्मनः ॥
[illegible] त्वम् ।
सीतां देवीं हृदि ध्यात्वा मूलमन्त्रेण मन्त्रवित् ।
पुष्पाञ्जलिञ्च देवीं प्रतिमामूर्द्धनि क्षिपेत् ।
[illegible] देवीमावाहयेत्ततः ॥
[illegible] संप्रदर्शयेत् ।
[illegible] देव्यासने मुने ॥
[illegible] सततः ।
[illegible] दद्यादाचमनीयकम् ॥
[illegible] ।
[illegible] ॥
[illegible] ।

मधुना मधुवातेति ऋचया सितया मुने ॥
स्वादुपवस्वमन्त्रेण ततस्तीर्थाम्बुभिः क्रमात् ।
उपैतु मामिति प्रोक्तः सीतायाः स्नपने मनुः ॥
स्वर्णसिंहासने रम्ये प्रतिमां स्थापयेद्व्रती ।
वासोभिः सुरभिपासेति पूजयेद्विमलोत्तमैः ॥
गन्धद्वारामिति भवेद्दाने गन्धादिकस्य तु ।
मनसः काममित्याद्युर्म्मन्त्रमाभरणादिके ॥
मधुपर्कं ततो दद्यात् सीतादेव्यै विधानतः ।
कस्तूरीकुङ्कुमोपेतैः कर्पूरागुरुचन्दनैः ॥
प्रतिमां पूजयेद्भक्त्या यतः पुष्पैः स्वकालिकैः ।
सुगन्धैः कर्द्दमेनेति मन्त्रेण किल गौतम ॥
अर्च्चयेत्तुलसीपत्रैः कोमलैर्म्मञ्जरीयुतैः ।
प्रतिमां मूलमन्त्रेण शतमष्टोत्तरं जपेत् ।
ततः संपूजयेद्विद्वान् राजानं जनकं व्रती ॥"
जनकपूजामन्त्रः ।
'देवी पद्मालया साक्षादवतीर्णा यदालये ।
मिथिलापतये तस्मै जनकाय नमो नमः ॥"
महामतिपूजामन्त्रः ।
"श्रीसीताजननी मातर्महिषी जनकस्य च ।
पूजां गृहाण मद्दत्तां महामति नमोऽस्तु ते ॥"
शतानन्दपूजनमन्त्रः ।
"निधानं सर्व्वविद्यानां विद्वत्कुलविभूषणः ।
जनकस्य पुरोधास्त्वं शतानन्दाय ते नमः ॥"
हलपूजनमन्त्रः ।
"जीवयस्यखिलं विश्वं चालयन् वसुधातलम् ।
प्रादुर्भावयसे सीतां सीर तुभ्यं नमोऽस्तु वै ॥"*
सुभगापूजनमन्त्रः ।
"त्वयैवोत्पादितं सर्व्वं जगदेतच्चराचरम् ।
त्वमेवासि महामाया मुनीनामपि मोहिनी ॥
त्वदायत्ता इमे लोकाः श्रीसीतावल्लभा परा ।
वन्दनीयासि देवानां सुभगे त्वां नमाम्यहम् ॥*॥
ततोऽष्टदलमध्यस्थजयाद्या भक्तितः क्रमात् ।
संपूजयेद्विशालात्मा गन्धपुष्पाक्षतादिभिः ॥
वहिर्म्मण्डलवर्त्तिन्यः षोड़शाद्यास्तु देवताः ।
पश्चिमाद्यभिधाः पूज्या वहिः सर्व्वा ऋचस्ततः ॥
संपूज्यावरणान्येवं मुख्यदेव्यास्ततो व्रती ।
दशाङ्गं गुग्गुलेर्द्द्याद्धूपमापः स्ततिभिः ॥
दीपन्तु साज्यवर्त्तीभिरग्रे पुष्करिणीमिति ।
नैवेद्यं घृतपक्वान्नैर्नानाव्यञ्जनसंयुतैः ॥
प्रदद्यात् पायसाद्यैरप्याद्रांपःकरिणीमिति ।
रात्रौ च गुड़खण्डवान् महामत्ये निवेदयेत् ॥
ताम्बूलञ्च ततो दद्यात् कर्पूराद्यैः समन्वितम् ।
मातृनामित्यर्थं देया यथाशक्ति च दक्षिणा ॥
नीराजयेत्ततो देवीं घनमन्तदनन्तरम् ।
तामाहूय च मन्त्रेण पुष्पाञ्जलिमथार्पयेत् ॥*॥
मूलेन चार्पयेत् [illegible] ।
[illegible] मन्त्रं रायुतम् ॥
[illegible] ततः पश्चान्मुने कुर्य्यात् प्रदक्षिणाम् ।
पुनः पुष्पाञ्जलिं दद्यात् सीतामूर्द्धनि भक्तितः ।
[illegible] तुलसीदलं पुष्पं यत्किञ्चिदेव वा ।
[illegible] तदाकारं विभावयन् ॥
[illegible] भूत्वा रोपयेत्तत् स्वमूर्द्धनि ।

ततः सीता
कराञ्जलिपुटं बद्ध्वा
भक्त्या परमया ब्रह्मन्
दुरन्तसंसारसमुद्रमग्नं
सीते शरण्यां शरणागतं माम् ।
उद्धारयस्वाशु कृतं भवे-
द्धृतं ततो देवि सखि प्रदेहि ।
संप्रार्थ्य जानकीमेवं
पुष्पाञ्जलिं [illegible]
नीलनीरजदलायतेक्षणां
कौशलेशभुजसन्नवक्रलाम् ।
सानुरागहरिवीक्षणोद्भवा
भावये मनसि रामवल्लभाम् ।
मन्दहासगतिमाप्त कम्रदं
काम्यकान्तिपरिभूतचन्द्रिकाम् ।
ताड़कारिसहस्रेक्षणीशां
भावये मनसि रामवल्लभाम् ।
कुन्तलालककपोलशालिनीं
राहुवक्त्रगतधामसद्द्युतिम् ।
वाससा पिदधतीं [illegible]
भावये मनसि रामवल्लभाम् ।
कायवाङ्मनसगोचरातिगां
स्वप्रजागतिषु राघवेश्वरि ।
शिवविरिञ्चिभिरहर्न्निवन्दितां
भावये मनसि रामवल्लभाम् ।
भक्तलोकगम्यां प्रकृतेः परां
चित्ते भर्यां लोकमङ्गलाम् ।
भूषायुक्त [illegible]
विभावये चेतसि रामवल्लभाम् ।
इन्द्ररुद्रधनदादुपासितैः
सद्विमानगणमाश्रितैर्दिवि ।
पुष्पवर्षमनुसंस्तुतयोषां
भावये मनसि रामवल्लभाम् ।
ध्येयमाननसरेश स्वरूपां
रामधामतनुनिर्म्मितां [illegible]
कुङ्कुमीरजविभाकराननां
भावये मनसि रामवल्लभाम् ।
सञ्चयेद्धि विमदां विभाव्य
[illegible]
तेजसापि दधतीं सदा दिवं
भावये मनसि रामवल्लभाम् ।
एतदष्टकमिदं [illegible]
यः पठेदथ [illegible] ।
चन्द्रायक्षिता तु [illegible]
तस्य भक्तिमतुलां प्रयच्छति ।
स्तुत्वैवं जानकीं देवीं [illegible]
रात्रौ जागरणैः सर्व्वां तां
ततः प्रातः [illegible]
प्रतिमां पुत्रमित्रादा वा [illegible]
तस्मै सोपस्करां दद्यात्
दक्षिणाञ्च यथाशक्ति ततः [illegible]
पूर्व्वाद्युक्तविधानेन कृत्वा च [illegible]

नाया: प्रीतये दद्यात् मणपादि विसृज्य च ।
मार्प्यीति वाचयीत ब्राह्मणाद्यभ्यर्भावितैः ।
दिभ्योऽपि यथाशक्त्या भूयसीं दक्षिणां ददेत्॥
तथिभ्योऽन्नदानञ्च कर्त्तव्यं तद्दिने दिन ।
शेष सकलान् लोकान् कुटुम्बसहितो सती॥
धमा पारणं कुर्य्यात् भूमिशायी च मानवः ।
दोपरि सदा प्रीता सीता स्यात्रात्र संशयः॥
गृहे शिल्पपूज्या स्यात् प्रतिमा तव गौतम ।
शमितोत्सवं कुर्य्याज्जानक्याः पूजनादिकम् ॥
त्यपूज्या न यस्य स्यात् सीतायाः प्रतिमा यदा
लपासमिलायां स कुर्य्यात् सीतोत्सवं बुधः ॥
श्रीमारायणी यस्मात्स्यां संवसतः सदा ।
र्शौक्तविधिना सीतानवम्या व्रतमथ द्विज ॥
तं कुर्व्वीत वै तस्याः सर्व्वां पञ्चामृतादिभिः।
येत तेन वै तस्मिन् जानकीरघुनन्दनौ ॥*॥
यं निगदितं सर्व्वं जानकीजन्मनो व्रतम्।
यन्तीन्द्रादयः सर्व्वे व्रतमेतदनुत्तमम् ॥
न्धर्व्वाः किन्नरा यक्षा गुह्यकाः सिद्धचारणाः।
गाश्च मुनयश्चापि प्रकुर्व्वन्ति व्रतं द्विज ॥
कुर्य्याद्व्रतमेतद्धि जानकीजन्मसम्भवम् ।
लभेत् सकलं ब्रह्मन् पृथ्वीयात्राफलं किल॥
ा षोड़शदानानां फलं प्राप्नोति मानवः ।
श्वमेधादियज्ञानां तीर्थानामपि गौतम ॥
अपतपसां चापि वेदोक्तायुष विन्दति ।
तमिदं व्रतं तस्मादवश्यं कुरु भक्तितः ॥
ं वक्तुं समर्थास्ते फणीन्द्रचतुराननाः ।
ताद्व्रतोत्तमादस्माद्दीर्घायुः प्राप्तवानहम् ।
तानां नित्यमाम्नातं भक्तिदं कुर्व्वतां सताम्॥

सूत उवाच ।

नघे गौतमायेत्थं जानकीजन्मसम्भवम् ।
तस्य व्रतमाहात्म्यं विधानं श्रुतिचोदितम्।
गाद सकलं व्यक्तं मार्कण्डेयो मुनीश्वरः ॥"
त्यादि श्रीभविष्यपुराणे श्रीसीतानवमीव्रत-
ाहात्म्यं समाप्तम् ॥ * ॥ स्वर्गगङ्गा । इति
ादिनी ॥ सा तु भद्राश्ववर्षगङ्गा । यथा, श्रीभाग-
ते ५ स्कन्धे । "सीता तु ब्रह्मसदनात् केशवा-
चलादिगिरिशिखरेभ्योऽधोऽधः प्रस्रवन्ती गन्ध-
मादनमूर्द्धसु पतित्वान्तरेण भद्राश्वं वर्षं प्राच्यां
दिशि क्षारसमुद्रमभिप्रविशति ॥" अपि च ।

मार्कण्डेय उवाच ।

"यत्र देवसभा भूता सानौ तस्य महागिरेः ।
तत्र जाता देवनदी सीताख्या वचनाद्विधेः ॥
स्नापयित्वा यथा चन्द्रं सीतातोयैर्मनोहरैः ।
चन्द्रं पपुश्च तत्स्थात् सर्व्वे ते त्रिदिवौकसः॥
तदा सीताजलं चन्द्रस्नानयोगाच्च साम्प्रतम् ।
भूत्वा निपतितं तस्मिन् हृदक्षोषितसंज्ञके ॥
तद्विहृष्टं तदा तोयं तस्मिन् सरसि निर्म्मलम् ।
तद्दृष्टं स्वयं ब्रह्मा विदृष्टं साधु तज्जलम् ॥
तद्दर्शनाज्जलात्तस्मादुत्थिता कनकोत्तमा ।
चन्द्रभागेति तन्नाम विधिश्चक्रे स्वयं ततः ।
भार्य्यार्थे सागरस्तान्तु जग्राह ब्रह्मसम्मते ॥"

इति कालिकापुराणे २२ अध्यायः ॥

सर्पीः । उमा । शम्याधिदेवता । इति नानार्थ-
ध्वनिमञ्जरी ॥ मदिरा । इति राजनिर्घण्टः ॥
गङ्गास्रोतः । यथा,—
"गङ्गायान्तु भद्रसोमा महाभद्रा च पाटला ।
तस्याः स्रोतसि सीता च वङ्क्षुर्भद्रा च कीर्त्तिता
तद्वेऽमलकनन्दापि शारिणी त्वपनिम्नगा ॥"
इति शब्दमाला ॥
(नदीविशेषः । इति केचित् ॥ यथा, महा-
भारते । ३ । १८८ । १०० ।
"गाङ्गं शतद्रुं सीताञ्च यमुनामथ कौशिकीम् ।
*   *   *   *
एतावान्याश्च सरितः पृथिव्यां या नरोत्तम ।
परिक्रामन् प्रपश्यामि तस्य कुक्षौ महात्मनः॥")

सीतापतिः, पुं, (सीतायाः पतिः ।) श्रीरामचन्द्रः ।
इति शब्दरत्नावली ॥

सीतायाःपतिः, पुं, (सीतायाः पतिः । अलुक्
समासः ।) श्रीरामचन्द्रः । इति शब्दरत्ना-
वली ॥ (यथा, रामायणटोकाकृतो मङ्गला-
चरणे ।
"रामाय रामभद्राय रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय सीतायाःपतये नमः ॥")

सीतौलकः, पुं, सतीलकः । इत्यमरटीकायां
रायमुकुटः ॥

सीत्कारः, पुं, (सीत्+कृ+भावे घञ् ।) मनु-
ष्याणां गुणानुरागजशब्दः । (यथा, आर्य्या-
सप्तशत्याम् । २१६ ।
"शेफिस्त्वा चिकुरग्रहसमयसीत्कारमीलित-
दृशापि ।
बाला कपोलपुलकं विलोक्य निहतोऽस्मि
शिरसि पदा ॥")

सीत्कृतं, क्ली,(सीत्+कृ+भावे क्तः ।) मनु-
ष्याणां गुणानुरागजशब्दः । यथा,—
"शब्दो गुणानुरागोत्थः प्रणादः सीत्कृतं
नृणाम् ॥"
इति हेमचन्द्रः ॥

सीत्यं, क्ली,(सीतया निर्वृत्तमिति । सीता+यत्)
धान्यम् । इति हेमचन्द्रः ॥

सीत्यं, त्रि, (सीतया सम्मितम् । सीता+"नौ-
वयोधर्म्मेति ।" ४ । ४। ९१ । इति यत् ।)
कृष्टक्षेत्रादि । इत्यमरः । २ । ९ । ८ ॥

सौद्यं, क्ली, आलस्यम् । इति भूरिप्रयोगः ॥

सीधुः, पुं, (शीधुः । पृषोदरादित्वात् शस्य सः ।)
मद्यम् । इति शब्दरत्नावली ॥ (यथा, देवी-
भागवते । ५ । २४ । ६० ।
"अशोकं कुरुराजानं पादघातविकाशितम् ।
वकुलं सीधुसेकेन तथा कुरुवकं कुरु ॥")
मद्यभेदः । इत्यमरः । २।१०।४२ ॥ यथा,—
"इक्षोः पक्वैः रसैः सिद्धः सीधुः पक्वरसश्च सः ।
आमैस्तैरेव यः सीधुः स च शीतरसः स्मृतः ॥
सीधुः पक्वरसः [illegible] ग्निबलवर्णकृत् ।
वातपित्तकरः [illegible] रोचनो हरेत् ॥
विबन्धमेदशोफ [illegible] कफामयान् ।
तस्मादल्पगुणः शीतरसः संलेखनः स्मृतः ॥"
इति राजनिर्घण्टः ॥
(यथा च ।
"सीधुः कषायाम्लकमाधुरी वा
सन्दीपनो भेदमलापहा च ।
आमातिसारानिलपित्तशूल-
श्लेष्मामयार्शोग्रहणीगदघ्नः ॥"
इति हारीते प्रथमे स्थाने ११ अध्यायः ॥)

सीधुगन्धः, पुं,(सीधोरिव गन्धो यस्य ।) वकुलः ।
इति शब्दरत्नावली ॥

सीधुपुष्पः, पुं,(सिधुवत् गन्धयुक्तं पुष्पं यस्य ।)
कदम्बः । वकुलः । इति राजनिर्घण्टः ॥

सीधुपुष्पी, स्त्री,(सीधुवत् गन्धयुक्तं पुष्पं यस्याः ।
ङीप् ।) धातकी । इति राजनिर्घण्टः ॥
(धातकीशब्देऽस्या विवरणं ज्ञातव्यम् ॥)

सीधुरसः, पुं, (सीधोरिव रसो यस्य ।) आम्र-
वृक्षः । इति राजनिर्घण्टः ॥

सीधुसंज्ञः, पुं, (सोधोः संज्ञा संज्ञा यस्य ।)
वकुलवृक्षः । इति राजनिर्घण्टः ॥

सीध्रं, क्ली, अपानम् । इति केचित् ॥

सीपः, पुं, तर्पणाद्यर्थंजलपात्रम् । कोषा इति
भाषा । यथा,—
"वस्तुतस्तु अत्रानुद्धृतस्य चेपासम्भवात् उद्धृत-
पदं हस्तादन्येन सीपादिनोद्धृतपरम् । तेन
सीपादियुक्तकरतर्पणे तत्रैव जले तिलान्
मिश्रयेत् ।" इति गोपालन्यायपञ्चाननकृत-
विचारनिर्णयः ॥

सीमन्तः, पुं, (सीम्नोऽन्तः । शकन्ध्वादित्वात्
साधुः ।) केशेषु वर्त्म । इति हेमचन्द्रः ॥
सिंति इति भाषा॥(यथा महाभारते ।१।४४।२
"अपश्यन्त तथा यान्तमाकाशे नागमुत्तमम् ।
सीमन्तमिव कुर्व्वाणं नभसः पद्मवर्च्चसम् ॥")
सीमन्तोन्नयनसंस्कारः । यथा, याज्ञवल्क्यः ।
१ । ११ ।
"गर्भाधानमृतौ पुंसःसवनं स्पन्दनात् पुरा ।
षष्ठेऽष्टमे वा सीमन्तः प्रसवे जातकर्म्म च ॥"
(प्रत्यङ्गविशेषः । यथा, सुश्रुते । ३ । ५ ।
"चतुर्द्दशैव सीमन्ताः । ते चास्थिसङ्घातवद्गण-
नीया यतस्तैर्युक्ता अस्थिसंघाताः । ये तूक्ताः
संघातास्तु खल्वष्टादशैकेषाम् ॥")

सीमन्तकं, क्ली, (सीमन्ते कायति शोभते इति ।
कै+कः ।) सिन्दूरम् । इति राजनिर्घण्टः ॥

सीमन्तकः, पुं, नरकावासः । यथा,—
"लक्ष पञ्चैव नरकावासाः सीमन्तकादयः ॥"
इति हेमचन्द्रः ॥

सीमन्तिनी, स्त्री, (सीमन्तोऽस्या अस्तीति ।
इनिः । ङीप् ।) नारी । इत्यमरः । २।६।२ ॥
(यथा, रामायणे । २ । ३५ । २१ ।
"नास्म सीमन्तिनी काचित् जन [illegible]

सौमित्रे ! योऽहम

सीमन्तोन्नयनं, क्ली, (सीमन्तस्य उन्नयनं उत्तोलनं यत्र ।) संस्कारविशेषः । इति जटाधरः ॥ तद्विधानञ्च यथा,—

अथ सीमन्तोन्नयनम् ।

"यदि पुंसवनं न कृतं तदा तस्मिन्नेव दिने प्रायश्चित्तात्मकमहाव्याहृतिहोमं कृत्वा पुंसवनञ्च कृत्वा सीमन्तोन्नयनं कार्य्यम् । तथा च नारदः ।

'येषान्तु न कृताः पित्रा संस्कारविधयः क्रमात् ।
कर्त्तव्या भ्रातृभिस्तेषां पैतृकादेव तद्धनात् ॥
अविद्यमाने पित्रर्थे स्वांशादुद्धृत्य वा पुनः ।
अवश्यकार्य्याः संस्कारा भ्रातृभिः पूर्व्वसंस्कृतैः ॥'

क्रमात् भ्रातॄणां संस्काराणाञ्च पौर्व्वापर्य्यक्रमात् भ्रातृक्रमस्तु सोदरविषय एव । विवाहे तथा दर्शनात् । छन्दोगपरिशिष्टम् ।

'देवतानां विपर्य्यासे जुहोतिषु कथं भवेत् ।
सर्व्वं प्रायश्चित्तं कृत्वा क्रमेण जुहुयात् पुनः ॥
संस्कारा अतिपत्येरन् स्वकालाच्चेत् कथञ्चन ।
हुत्वैतदेव कुर्व्वीत ये तूपनयनादधः ॥'

एतदित्यनेन सर्व्वप्रायश्चित्तमनुकृष्टं तच्च प्रागेव विहितम् । उभयत्रापि तन्त्रेणैव मातृकापूजादि ।

'तन्त्रः क्रियमाणे तु मातृणां पूजनं सकृत् ।
सकृदेव भवेत् श्राद्धमादौ न पृथगादिषु ॥'

इति छन्दोगपरिशिष्टात् ॥ ० ॥

गोभिलः । अथ सीमन्तोन्नयनं प्रथमे गर्भे चतुर्थे मासि षष्ठेऽष्टमे वा । अथ पुंसवनानन्तरम् । सीमन्तः केशरचनाविशेषः । [illegible] चतुर्दिक्षोभाना [illegible] । [illegible] पूर्व्वपुंस- [illegible] । [illegible] इति [illegible] प्रायश्चित्तं कृत्वैव [illegible] । [illegible] । यदि [illegible] गर्भमासि पुन- [illegible] न किन्तु गर्भस्पन्दने [illegible] । इति मद- [illegible] । इत्यादि प्रमाणै । [illegible] प्रसूते च कथञ्चन । [illegible] पुनः संस्कारमर्हति ॥ [illegible]

[illegible] तिष्ठो थे [illegible]

[illegible] सर्व्वे ।

[illegible] सीमन्तकर्म्म ॥

[illegible]

टप्रयूं नीलस्तवके स युगमान् तं मतुबन्तम् । तथा च भट्टनारायणधृतं छन्दोगपरिशिष्टम् ।

'शलाटु नीलमित्युक्तं अपक्वस्तवक उच्यते ।
कर्पुष्पिकाभितः केशा मूर्द्धि पश्चात् कपुच्छलः'

सुधाजीवी, [न्] पुं, (सुधा + जीव + [illegible] सुधया लेपनेन जीवति यः ।) [illegible] तत्पर्य्यायः । पलगण्डः २ लेपकः ३ । इति त्रिकाण्डशेषः ॥

सुधाधारः, पुं, (सुधाया आधारः ।) [illegible] इति शब्दरत्नावली ॥ अमृतपात्रम् ॥

सुधानिधिः, पुं, (सुधाया निधिः ।) चन्द्रः । इति शब्दरत्नावली ॥

सुधापयः, [स्] क्ली, सुधेवयस्य पयः सुक्षीरम् । इति केचित् ॥

सुधापाणिः, पुं, (सुधा पाणौ यस्य ।) [illegible] इति केचित् ॥

सुधाभुक्, [ज्] पुं, (सुधां भुङ्क्ते इति । भुज + क्विप् ।) देवः । इति हेमचन्द्रः ॥

सुधाभृतिः, पुं, (सुधाया भृतिर्यस्मात् ।) चन्द्रः । यज्ञः । इति मुद्राङ्कितमेदिनी ॥ मेदिन्यां सुधासूतिरिति पाठः ॥

सुधामयः, पुं, (सुधात्मकः इति । सुधा + मयट् ।) भूपालभवनम् । इति शब्दरत्नावली ॥ अमृतमये, त्रि । यथा, श्रीजयदेवः ।
"रासोल्लासभरेण विभ्रमभृतामाभीरवामभ्रुवा-
मभ्यर्णं परिरभ्य निर्भरमुरः [illegible]
साधु त्वद्वदनं सुधामयमिति व्याहृत्य [illegible]
व्याजादुद्भटचुम्बितः स्मितमनोहारी [illegible] पातु ॥"

सुधामोदकः, पुं, (सुधेव मोदयतीति । मुद + णिच् + ण्वुल् ।) यवासशर्करा । इति राजनिर्घण्टः ॥

सुधामोदकजः, पुं, (सुधामोदकात् जायते इति । जन + डः ।) तवराजाख्यखण्ड [illegible] इति राजनिर्घण्टः ॥

सुधावर्षी, [न्] पुं, (सुधां वर्षतीति । वृष + णिनि ।) ब्रह्मा । इति शब्दरत्नावली ॥ बुद्धभेदः । इति त्रिकाण्डशेषः ॥

सुधावासः, पुं, (सुधाया आवासः ।) चन्द्रः । [illegible]
"ज्योत्स्नायाः पतये तुभ्यं [illegible]
नमस्ते रोहिणीकान्त सुधावास [illegible] ॥"
इति [illegible]
(त्रपुसम् । तत्पर्य्यायो यथा,—
"त्रपुसं कण्टकिफलं सुधावासः [illegible]
इति भावप्रकाशस्य पूर्व्वखण्डे [illegible]

सुधाश्रवा, स्त्री, (सुधाया आश्रवो यस्याः ।) [illegible] इति राजनिर्घण्टः ॥

सुधासिन्धुः, पुं, (सुधायाः सिन्धुः ।) [illegible] समुद्रः । यथा,—

सुरविटपिवाटीपरिहृते
पे नीपोपवनवति चिन्तामणिगृहे।
कारे मञ्चे परमशिवपर्य्यङ्कनिलयां
त्वा धन्याः कतिचन चिदानन्दलहरीम्॥"
इत्यानन्दलहरी॥

ति:, पुं, (सुधायाः सूतिरुत्पत्तिर्यत्र।) । चन्द्रः। यज्ञम्। इति शब्दरत्नावली॥

वा, स्त्री, (स्रवतीति। सु+अच्। टाप्। याः स्रवा।) प्रतिजिह्वा। अलिजिह्विका। त्रिकाण्डशेषः॥ रुदन्तीवृक्षः। इति निर्घण्टः॥

र:, पुं, (सुधां हरतीति। हृ+अच्। या हर इति वा।) गरुड़ः। इति शब्द-॥

त्, पुं, (सुधां हरतीति। हृ+क्विप्।) ड़:। इति हेमचन्द्रः॥

ते:, पुं, स्त्री, स्वधितिः। इत्यमरटीकायां मुकुटः॥

, पुं, (सु शोभना धीर्यस्य।) पण्डितः। मरः। २। ७। ५॥

, स्त्री, (शोभना धीः।) सुन्दरबुद्धिः। धीः। इति मुग्धबोधव्याकरणम्॥ शोभना स्य।) शोभनबुद्धियुक्ते, त्रि॥ (यथा, :। १२। ६।
"मात्रातिमात्रं शमयैव बुद्ध्या
चिरं सुधीरभ्यधिक समाधात्॥")

य:, पुं, स्वादुनामगन्धद्रव्यम्। इति राज-निर्घण्टः॥

द्भव:, पुं, (सुधया सह उद्भवो यस्य।) वन्तरिः। इति त्रिकाण्डशेषः॥

द्भवा, स्त्री, (सुधाया उद्भवो यस्याः।) रीतकी। इति त्रिकाण्डशेषः॥ (हरीतकी-शब्देऽस्य विवरणं ज्ञेयम्॥)

न्दं, क्ली, (सुष्ठु नन्दयतीति। नन्द+अच्।) लभद्रस्य मुषलम्। इति शब्दमाला॥(कुजृम्भ-त्यस्य मुषलम्। यथा, मार्कण्डेये। ११६। १८
सुनन्दं नाम मुषलं त्वष्ट्रा यन्निर्म्मितं पुरा।
जहार स दुष्टात्मा तेन हन्ति रणे रिपून्॥)
सुन्दरानन्दजनके, त्रि॥

न्दः, पुं, (सुष्ठु नन्दयतीति। नन्द+अच्।) श्रीकृष्णस्य पार्षदविशेषः। यथा, श्रीभागवते १०। ८८। ५६।
"सुनन्दनन्दप्रमुखैः स्वपार्षदैः
चक्रादिभिर्मूर्त्तिधरैर्निजायुधैः।
पुष्ट्या श्रिया कीर्त्त्यजयाखिलर्द्धिभि-
र्निषेव्यमाणं परमेष्ठिनां पतिम्॥"
द्वादशविध-राजगृहान्तर्गतगृहविशेषः। यथा,
"चतुःशालं त्वेकशालं मार्गं तस्य तथैव च कल्पना।
राज्ञः स्वस्तिकमस्तु दीर्घं सर्व्वत्र निःक्षिपेत्॥
चापाख्यं सुनन्दः स्यात् ... पदैः।
परिणाहे चतुर्भिश्च राजहर्म्यः प्रतिष्ठितः॥
अस्याधिदेवता भौमो रक्षतीदं वसुन्धरा।
द्वाराणि विंशतिश्चास्य रत्नचित्राहृतानि च॥
रत्नपट्टावृतो गेहः सकलार्थप्रसाधकः।
अत्र स्थित्वा महीपालः सुचिरं पाति मेदिनीम्॥"
दीर्घः ५१ प्रस्थः ४०। इति सुनन्दः॥ सुन्दरः इति च पाठः। इति युक्तिकल्पतरुः॥

सुनन्दा, स्त्री, (सुष्ठु नन्दयति या। नन्द+अच्। टाप्।) उमा। गोरोचना। इति मेदिनी॥ नारी। इति विश्वः॥ उमासखीभेदः। इति शब्दमाला॥ (अजपत्नी इन्दुमत्याः सखी द्वारपालिका। यथा, रघुः। ६। २०।
"ततो नृपाणां श्रुतवृत्तवंशा
पुंवत्प्रगल्भा प्रतिहाररक्षी।
प्राक् सन्निकर्षं मगधेश्वरस्य
नीत्वा कुमारीमवदत् सुनन्दा॥")
अर्कपत्रीवृक्षः। इति रत्नमाला॥ इपेरमूल इति भाषा॥ (पुरुवंशीयसार्व्वभौमनृपतेः पत्नी। यथा, महाभारते। १। ९५। १६।
"सार्व्वभौमः खलु जित्वा जहार कैकेयीं सुनन्दां नाम तामुपयेमे। तस्यामस्य जज्ञे जयत्सेनो नाम॥"॥ दुष्मन्तपुत्त्रभरतस्य पत्नी। यथा, तत्रैव। १। ९५। ३२।
"भरतः खलु काशेयीमुपयेमे सार्व्वसेनीं सुनन्दां नाम। तस्यामस्य जज्ञे भुमन्युः॥"॥ चेदिराजकन्या। यथा, तत्रैव। ३। ६५। ५०।
"एवमुक्त्वा ततो भैमीं राजमाता विशाम्पते।
उवाचेदं दुहितरं सुनन्दां नाम भारत॥")

सुनयन:, पुं, (शोभने नयने यस्य।) मृगः। इति शब्दचन्द्रिका॥ शोभनचक्षुर्युक्ते, त्रि॥ (यथा, रघुः। ९। ५२।
"दृढगुरध्वनि तं वनदेवताः
सुनयनं नयनन्दितकोशलम्॥")

सुनयना, स्त्री, (सु शोभने नयने यस्याः।) नारी। इति राजनिर्घण्टः॥

सुनाक्षत:, पुं, कर्पूरकः। इति शब्दचन्द्रिका।

सुनाभ:, पुं, (सुष्ठु नाभिरस्य। अच् समासे।) मैनाकपर्व्वतः। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। २। १०। ३०।
"इन्द्रकीलः सुनाभश्च तथा दिव्यौ च पर्व्वतौ॥"
धृतराष्ट्रपुत्त्रविशेषः। यथा, तत्रैव। १। ११७। ५।
"ऊर्णनाभः सुनाभश्च तथानन्दोपनन्दकौ॥"
सुष्ठु नाभिश्चक्रमध्यमस्येति। सुदर्शनचक्रे, क्ली यथा, भागवते। ३। ३। ६।
"युद्धं मृधे स्वं वपुषा यमस्त
दृष्ट्वा सुनाभोन्मथितं धरित्र्या।
यामन्त्रितस्तत्तनयाय शेषं
दत्त्वा तदन्तःपुरमाविवेश॥"
वाच्यलिङ्गेऽपि दृश्यते। यथा, महाभारते। २। ३। ४८।
"तत्तस्मा दत्तं चक्रं सुनाभं विश्वकर्म्मणा।
देवराज्ञां महीदेव नाभिकः सोऽदिनन्दनः॥")

सुनामद्वादशी, स्त्री, (सुनामा द्वादशी। यद्वा, सुनामप्रिया द्वादशी।) द्वादशमासीयद्वादश-कर्त्तव्यव्रतविशेषः। यथा,—
अम्बरीष उवाच।
"कथं सुनामभिर्देवो द्वादश्यां मुनिसत्तम।
पूज्यते केशवो मर्त्त्यैर्भुक्तिकामफलार्थिभिः॥
वशिष्ठ उवाच।
शृणुष्वैकमना भूयः सुनामद्वादशीं शुभाम्।
सर्व्वपापहरां स्वर्ग्यां भुक्तिमुक्तिप्रदायिकाम्॥
मनसापि चिकीर्षन्ति ये द्वादशीं नरोत्तमाः।
तेऽपि घोरं न पश्यन्ति पुनः संसारसागरम्॥
आद्यं सर्व्वव्रतानान्तु वैष्णवानां नृपोत्तम।
नरैः स्त्रीभिश्च कर्त्तव्यं विष्णोस्तुष्टिकरं परम्॥
मार्गशीर्षे शुभे मासि शुक्लपक्षे यतव्रतः।
प्रथमं चैव गृह्णीयात् द्वादशीं विधिवन्नरः॥
मनोवाक्कायचेष्टाभिः स विशुद्धो जितेन्द्रियः।
दशम्यां नियतः स्नात्वा प्रणिपत्य जनार्द्दनम्॥
हविष्यास्कृताहारः शुचिर्भूत्वा भवेद्व्रती।
उपलिप्ते शुचौ देशे भक्षयेत् दन्तधावनम्॥
उपोष्यैकादशीं सम्यक् पूजयित्वा जनार्द्दनम्।
सुनामद्वादशीं देव अहं भोक्ष्ये परेऽहनि॥
एवं सङ्कल्प्य नियमं प्रणम्य गरुड़ध्वजम्।
दशम्यामेकभक्ताशी संयतः संयमेन्निशाम्॥
एकादश्यां ततः कुर्य्यादेकचित्तः समाहितः।
पूर्व्वं प्रपूजयेत् सूर्य्यं ततो देवं प्रपूजयेत्॥
नमस्ते देवदेवेश नमस्ते भक्तवत्सल।
भास्कराय नमस्तुभ्यं रवये कार्य्यभानवे॥
नमः सूर्य्याय देवाय नमस्ते सप्तसप्तये।
एकस्मै हि नमस्तुभ्यमेकचक्ररथाय च॥
ज्योतिषां पतये नित्यं सर्व्वलोकोहराय च।
दिवाकर नमस्तेऽस्तु प्रभाकर नमोऽस्तु ते॥
एवं संपूज्य विधिवत् पुष्पधूपानुलेपनैः।
दीपैर्व्वस्त्रैः सुनैवेद्यैस्ततो विष्णुगृहं व्रजेत्॥
ततोऽनु स्नापयेद्देवं दधिक्षीरघृतादिभिः।
सर्व्वौषधिजलैः पुष्पैस्तथा चन्दनवारिभिः॥
कुङ्कुमोशीरकर्पूरैश्चन्दनेन विलेपयेत्।
अच्युतं चार्च्चयेत्तद्वा मालतीकुसुमैः शुभम्॥
गुग्गुलुं घृतसंयुक्तं धूपं दद्यादहर्निशम्।
पायसापूपसंयावकरम्भाज्यकदम्बकैः॥
नैवेद्यं हरये दद्यात् फलमोदकयान्वितैः।
गीतवाद्यैर्हरेश्चैव प्रणमेच्च मुहुर्मुहुः॥
एवं पूजां हरेः कृत्वा दिनं ... ।
पूजयेदन्तरं नास्ति विप्रं शक्यांरपि॥
ततोऽव्रणं समादाय चन्दनेन नवं घटम्।
सुविस्तृतं तोयसम्पूर्णं स्थापयेत्तस्य सन्निधौ॥
सर्व्वरत्नौषधिकाश्चैव दत्त्वा ...।
स्थापयेत् ... ॥
... ॥
... ।
... ।
... ॥
... ।

सर्व्वकामप्रदो देवः स मे पापं व्यपोहतु ॥
एवमभ्यर्च्य देवेशं प्रणिपत्य समापयेत् ।
द्वादश्यां तत्र तोयेन स्नापयेत्तेन मानवः ॥
सर्व्वपापविनिर्मुक्तो वैष्णवीं लभते तनुम् ।
कृताभिषेकः पुण्यात्मा सम्यगभ्यर्च्य केशवम् ॥
नवनीतकृतां धेनुं ब्राह्मणायोपपादयेत् ।
केशवः प्रीयतां देवः केशिहन्ता महाच्युतः ।
स मे भवतु सुप्रीतः इष्टान् कामान् प्रयच्छतु ॥
एवं प्रदक्षिणं कृत्वा शृणु तस्यापि यत् फलम् ॥
[illegible] पापं हित्वा स त्रिविधं नरः ।
षष्टिं वर्षसहस्राणि स्वर्गे मोदति देववत् ॥
यदा कामादिहायाति सधर्म्मी धनवान् भवेत्
समासाद्य धेनूनां तत् पापं कल्पयेत्ततः ॥
तत्फलं हि विनिर्दिष्टं यथाशक्त्या तु दक्षिणा ।
भक्त्या फलं समाप्नोति भक्तिरेवात्र कारणम् ॥ * ॥
पौषस्येह तु मासस्य योऽप्येवं स्नपयेन्नरः ।
समाहितमना भूप रसधेनुप्रदायकः ॥
आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
अयनं यस्य तस्मात् नारायण इति स्मृतः ॥
नारायणः प्रीयतां मे देवो नारप्रियः सदा ।
सर्व्वकामप्रदो नित्यं स मे पापं व्यपोहतु ॥
ततः प्रदक्षिणं कृत्वा ब्राह्मणान् भोजयेत्ततः ।
एवं हि पौषमासस्य तस्य पुण्यफलं शृणु ॥
सप्तजन्मार्जितं पापं स्वल्पं वा यदि वा बहु
हत्वा स्वर्गं समाप्नोति वर्षाणामयुतायुतम् ॥ * ॥
माघस्यैव तु मासस्य द्वादश्यां शुक्लपक्षतः ।
[illegible] एकचित्तः समाहितः ॥
धारये पूर्व्वं विप्र ब्राह्मणानाञ्च तदर्थे ।
[illegible] सम्यगुदीरयेत् ॥
[illegible] पुरा वेदा [illegible] ।
[illegible] सर्व्वकामद माधव ॥
[illegible] माधवो देवो मधुकैटभसूदनः ।
[illegible] मम पापं व्यपोहतु ॥
[illegible] पुण्यफलं शृणु ।
[illegible] पापं हत्वा सर्व्व[illegible] ॥
[illegible] स्वर्गे वसति मानवः ।
[illegible] सदा सुखी ॥
[illegible] पुत्रपौत्रसमन्वितः ।
[illegible] ॥ * ॥
[illegible] द्वादश्यां [illegible] ।
[illegible] देवदेव [illegible] ॥
[illegible] ।
[illegible] ।
[illegible] पापं व्यपोहतु ।
[illegible] दद्यात् [illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥ * ॥
[illegible] ।
[illegible] ।
[illegible] ।

स्नापयित्वामृतेनैव पञ्चानां गन्धसंयुतैः ॥
अद्भिः पश्चात् प्रपूज्यैवं गन्धधूपविलेपनैः ।
पुष्पैर्व्वासोभिरेवं हि मन्त्रेणानेन बुद्धिमान् ॥
प्रवेशने यथाशीलो जगतां रक्षणाय च ।
दुष्टनाशां विनिर्जेतुमसि विष्णुरतो हरे ॥
विष्णुर्भवतु मे प्रीतो विष्णुर्देवः सनातनः ।
सर्व्वपापविनाशाय विष्णुर्मे प्रीयतामिति ॥
मधुधेनुमभावाच्च शक्तितः पायसेन च ।
दत्त्वा यत् फलमाप्नोति तदिहैकमनाः शृणु ॥
पूर्व्वजन्मनि यत् पापमिह जन्मनि साम्प्रतम् ।
वर्त्तते सकलं हत्वा स्वर्गलोके महीयते ॥ * ॥
वैशाखस्य तु मासस्य पूजयेन्मधुसूदनम् ।
पूर्व्वोक्तविधिना राजन् सौवर्णं मधुसूदनम् ॥
जलकुम्भे तु संस्थाप्य मन्त्रेणानेन पूजयेत् ।
एकार्णवे जले धातुर्हृता वेदाः पुरा हरे ॥
मधुना ते हतः सोऽपि तेनासि मधुसूदनः ।
स मे भवतु सुप्रीतो देवदेवः सनातनः ॥
सर्व्वपापविनाशाय प्रीयतां मधुसूदनः ।
घृतधेनुमथो दत्त्वा ब्राह्मणान् भोजयेत्ततः ॥
ततः प्रदक्षिणं कुर्य्यात् दत्त्वा देयान् यथोपगान्
एवन्तु स्नपमानस्य तस्य पुण्यफलं शृणु ॥
कपिलानां सहस्रस्य सम्यग्दत्तस्य पुष्करे ।
तत्फलं समवाप्नोति भक्तियुक्तोऽप्यसंशयः ।
यावदिन्द्रो वसेत् स्वर्गे तावदेव स तिष्ठति ॥ * ॥
ज्यैष्ठस्यैव तु मासस्य शुक्लपक्षे तु द्वादशीम् ।
पूजयेद्विधिवद्भक्त्या समुपोष्य त्रिविक्रमम् ॥
अन्नधेनुमथो दद्याद्विप्राय नियतः शुचिः ।
यज्ञभागभुजो देवान् सन्निहत्य क्रमैस्त्रिभिः ॥
त्रैलोक्यमाहृतं तस्मात् तेनासि त्वं त्रिविक्रमः
त्रिविक्रम त्रिलोकेश प्रीणयामि त्रिविक्रमम् ॥
ततः प्रदक्षिणं कृत्वा ब्राह्मणेभ्यश्च दक्षिणाम् ।
दत्त्वा तु भोजयेत्तांस्तु शृणु तस्यापि यत् फलम्
वाजपेयस्य यज्ञस्य सम्यगिष्टस्य पार्थिव ।
तत्फलं लभते मर्त्त्यः परत्रेह सुखी भवेत् ॥ * ॥
वामनन्तु तथाषाढ़े समुपोष्य प्रयत्नतः ।
द्वादश्यां नियताहारो वामनं तत्र पूजयेत् ॥
हिताय सर्व्वदेवानां यादित्यः कामदो यथा ।
तथा त्वं भव मे देव वामनो बलिबन्धनः ॥
तिलधेनुं ततो दद्यात् वामनः प्रीयतामिति ।
तदभावात्तथा पायं यथाशक्त्या च दक्षिणाम् ॥
पूर्व्वजन्मकृतं पापमिहजन्मकृतञ्च यत् ।
तत् सर्व्वं विनिहत्याशु परत्र च शुभां गतिम् ॥ * ॥
श्रावणस्य तु मासस्य द्वादश्यां शुक्लपक्षतः ।
यः श्रिदेविदयितो भूत्वा समुपोष्य जनार्द्दनम् ॥
समर्च्चयेत् ततस्तस्मा पूर्व्वोक्तविधिना ततः ।
धेनुं [illegible] ब्राह्मणाय निवेदयेत् ॥
[illegible] राजेन्द्र [illegible] च ।
[illegible] क्षीरसागरे ।
[illegible] ॥
[illegible] ।
[illegible] दद्यात् [illegible]
[illegible] फलम् ।

सकलं लभते मर्त्त्यो [illegible]
स्वर्गेषु विपुलान् भोगान् [illegible]
तेनैव विधिना राजन् स[illegible]
समुपोष्य ततो भक्त्या हृषीकेशं [illegible]
गुडधेनुमथो [illegible]
[illegible] ॥
करोति कर्म्मभूतोऽसौ हृषीकेशो [illegible]
देवदेवं हृषीकेशं भूतेषु प्रभवाव्यय[illegible]
प्रीणयामि सुसंप्रीतो मम पापं [illegible]
एवं प्रदक्षिणं कृत्वा [illegible]
द्वादश्यां समुपोष्यैव पद्मनाभं तथा[illegible]
पूजयेद्विधिवद्भक्त्या गन्धधूपविलेप[illegible]
गन्धधेनुं ततो दद्यात् कर्पूरागुरु[illegible]
कुङ्कुमेन हि राजेन्द्र विलिप्याश्च [illegible]
एकार्णवगते तोये स्वपतो यस्य वेध[illegible]
निवासाय भववाब्धौ पद्मनाभोऽसि [illegible]
प्रीयतां पद्मनाभो मे दुष्कृतं चोपश[illegible]
इत्युक्त्वा तं समभ्यर्च्य दद्यात् धेनुं [illegible]
इत्येवं स्नपमानस्य तस्य पुण्यमतः [illegible]
सप्तजन्मकृतं पापं स्वल्पं वा यदि वा [illegible]
दग्ध्वा तत् सकलं भूप विष्णुलोकं स[illegible]
कार्त्तिकस्य तु मासस्य एकादश्यामु[illegible]
प्रसुप्तं बोधयेद्रात्रौ श्रद्धाभक्तिसम[illegible]
नृत्यैर्गीतैस्तथा वाद्यैर्ऋग्यजुःसाम[illegible]
वीणापणवशब्दैश्च पुराणश्रवणैस्त[illegible]
वासुदेवकथाभिश्च स्तोत्रैरन्यैश्च शा[illegible]
सुभाषितैरिन्द्रजालैर्भू [illegible]
पुष्पैर्धूपैश्च नैवेद्यैर्दीपवृन्दैः प्र[illegible] ।
छागैर्भक्ष्यैरपूपैश्च फलैः शाकैश्च पाय[illegible]
इक्षोर्विकारैर्मधुना द्राक्षाक्षोडैः म[illegible]
कुठेरकस्य मञ्जर्य्या मल्लिकाकर्णिक[illegible]
छत्राभ्यां चामराभ्यां चन्दनाभ्याञ्च [illegible]
कुङ्कुमामलकाभ्याञ्च रजसूत्रैः सह[illegible]
तथा नानाविधैः पुष्पैर्द्रव्यैर्विविधवर्ण[illegible]
तस्यां रात्र्यां व्यतीतायां द्वादश्याम[illegible]
स्नात्वा नद्यां जलैः पुण्यैः प्रतिमा का[illegible]
हरितालं स्वर्णे रम्यां ताम्रा रौप्या [illegible]
वैष्णवी प्रतिमा यत्र विष्णुं शुभा [illegible]
तत्र स्नानादिपूजा च वैष्णवी कार्य्या च [illegible]
पादौ घृतेन तैलेन मधुना तद[illegible]
दध्ना क्षीरेण च ततः पञ्चगव्येन मार्ज[illegible]
उद्वर्त्तनं माषचूर्णं मसूरामलकैश्च [illegible]
रौप्य [illegible] नाना [illegible]
[illegible] ।
[illegible]
[illegible]
[illegible]
[illegible]

[illegible] ।
[illegible]
[illegible] ।

. . . ॥. सफलाय सकाञ्चनाः।
ग्राग्वेदमग्रेन वीणावेणुरवेण च ॥
देन मधुरेणैव सूतमागधवन्दिनाम्।
संस्थाप्य गोविन्दं स्वनुलिप्तं स्वलङ्कृतम् ॥
ासं पूलयेत्तनु सुमनोभिश्च कुङ्कुमैः।
ैर्धूपैर्मनोज्ञैश्च पायसेन तु भूरिणा ॥
गारत्नप्रदानैश्च होमैः पुण्यैः सदर्चिषैः।
मोभिर्भूषणैश्च वैर्गोभिरश्वैर्गजैरपि ॥
ाणाः पूजनीयाय विष्णोरायाः समूर्त्तयः।
शो रात्रौ प्रसुप्तस्य दामोदरगतं यतः ॥
प्राण्डस्य च तेनासि दामोदर इति स्मृतः।
मोदर इमां धेनुं गृह्णातु स्वयमेव हि ॥
लक्ष्मीश्च ते विष्णो प्रकल्पेषा सनातनी।
ग्रेवं पृथिवीदानात् फलं प्राप्नोति मानवः ॥
र्णस्य महाधेनुं दत्त्वा नृपवरोत्तमः।
वा पापान्यशेषाणि शतजन्मान्तराणि वै ॥
णवं लोकमाप्नोति यावदिन्द्राश्चतुर्दश।
म्यगत व्रते चीर्णे सप्तजन्मानुगं फलम् ॥
ाति भगवान् विष्णुः कामान् मोचं नरेश्वर।
ब्राह्मणान् भोजयेद्भक्त्या भक्ष्यैरुच्चावचैरपि ॥
ः प्रदक्षिणं कृत्वा यथाशक्त्या च दक्षिणाम्।
लसान् द्वादशैवैवं ब्राह्मणेभ्यः प्रदापयेत् ॥
र्णावेष्टितग्रीवान् हेमगर्भोपशोभितान्।
धिक्षीरयुतांश्चैव सगुडान् नृप भूरिशः।
क्तियथा तथा दद्यात् भक्तिरेवात्र कारणम् ॥
मङ्गेनापि यो राजन् सुनामद्वादशीं नरः।
रोति पुण्यभागी स यथा दैत्योद्भवो बलिः ॥
ं यः कुरुते राजन् सुनामद्वादशीं नरः।
जसूयस्य यज्ञस्य फलं समधिकं भवेत् ॥
र्थदानेषु यत् पुण्यं यच्च पुण्यं तपोवने।
र्थतीर्थेषु यत् पुण्यं तत् पुण्यं समुदाहृतम् ॥
ावो द्वादश दातव्या वस्त्रयुग्मानि काञ्चनम्।
लाभे चैव गामेकां पात्रं वा स्वर्णसंयुतम् ॥
ासे मास्यथवाप्येवं चञ्चलं जीवितं यतः।
र्हुविघ्ना हि धर्मस्य कर्त्तुश्छिद्रं न जायते ॥
तज्ज्ञात्वा सुमेधावी न तत्र त्वरयेन्मनः।
ा तस्य वित्तंसाभोऽस्तिं भक्तिग्राह्यो हि केशवः॥
र्नेन विधिना यस्तु द्वादशीं प्रतिवत्सरम्।
त्वा नरः परं याति विष्णुलोकमनामयम् ॥
ुनामद्वादशी चैव व्रतानामुत्तमा नृप।
ाद्या नरैस्तु कर्त्तव्या तोषयद्धिर्सनार्दनम् ॥
पर्वं तां कीर्त्तयेत् पुण्यां शृणुयात् द्वादशीं नरः।
ताबुभौ गच्छतः स्वर्गं कर्त्ता विष्णुपुरं व्रजेत्॥"
इति वह्निपुराणे सुनामद्वादशीनामाध्यायः ॥
ारः, पुं, (सुष्ठु नाममस्य। अस्य रः।)
दनीसाथम्। सर्पाण्डः। वल्मीकः। इति
मेदिनी ॥
नामकः, पुं, (सुष्ठु नाममस्य। कप्।) चक्र-
पुष्पकः। इति शब्दचन्द्रिका ॥ सुन्दरनाल-
युक्ते, त्रि ॥
ुनासिका, स्त्री, (सुष्ठु नासिका यस्याः।)
काकनासा। इति राजनिर्घण्टः ॥ (शोभना

नासिका।) शोभननासा। तद्युक्ते, त्रि ॥
(यथा, भागवते। ४। २४। ४६।
"पद्मकोषपलाशाक्षं सुन्दरभ्रु सुनासिकम् ॥")
सुनासीरः, पुं, (सुष्ठु नासीरं अग्रगामिसैन्यं
यस्य।) इन्द्रः। इत्यमरः। १। १।४४॥ (देवः।
यथा, भागवते। ४। ७। ७।
"ततो मीढ्वांसमामन्त्र्य सुनासीराः सहर्षिभिः।
भूयस्तद्देवयजनं समीढ्वद्वेधसो ययुः ॥")
सुनासीरश्च ॥
सुनिर्यासा, स्त्री, (शोभनो निर्यासो यस्याः।)
लिङ्गिनीवृक्षः। इति भावप्रकाशः ॥
सुनियितः, पुं, (सुष्ठु नियितं नियमो यस्य।)
बुद्धविशेषः। इति त्रिकाण्डशेषः ॥
सुनियितः, त्रि,(सुष्ठु नियितः।) सुन्दरनियम-
विषयीभूतः। इति हलायुधः ॥
सुनिषण्णं, क्ली, (सुष्ठु निषण्णं निद्रा यस्मात्।)
सुनिषण्णकशाकम्। इति त्रिकाण्डशेषः ॥
(यथा, सुश्रुते। ६। ४५।
"पटोलशेलुसुनिषण्णयूथिका
वटातिमुक्ताङ्कुरमिन्द्रवारजम्।
हितश्च शाकं घृतसंस्कृतं सदा
तथैव धात्रीफलदाड़िमान्वितम्॥"
क्वचित् पुंलिङ्गेऽपि दृश्यते। यथा,—
सुनिषण्णो हिमो ग्राही मोहदोषत्रयापहः।
अविदाही लघुः स्वादुः कषायो रूक्षदीपनः।
हृद्यो वृष्यो ज्वरश्वासमेहकुष्ठभ्रमप्रणुत् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
सुनिषण्णकं,क्ली,पुं,(सुनिषण्णमेव। स्वार्थे कन्।)
शाकविशेषः। सुषुणी इति भाषा। तत्पर्य्यायः।
वितुन्नम्२। इत्यमरः। २। ४। १४८॥ सुनि-
षण्णम्३ चुचूः ४। इति त्रिकाण्डशेषः ॥ (यथा,
"शितिवारः शितिवरः स्वस्तिकः सुनिषण्णकः।
श्रीवारकः सूचिपत्रः पर्णकः कुक्कुटः शिखी ॥
चाङ्गेरीसदृशं पत्रं चतुर्द्दल इतीरितः।
शाको जलान्विते देशे चतुःपत्रीति चोच्यते ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
अस्य गुणाः। यथा,—
"अविदाही त्रिदोषघ्नः संग्राही सुनिषण्णकः।"
इति राजवल्लभः ॥
अन्यत् सितावरशब्दे द्रष्टव्यम् ॥
सुनिष्टप्तः, त्रि, अत्यन्तप्तः। सुपूर्व्वनिरपूर्व्वतप-
धातोः क्तप्रत्ययेन निष्पन्नः ॥
सुनीतिः, स्त्री, (शोभना नीतिः।) शोभननयः॥
ध्रुवमाता। इति मेदिनी ॥ सा तु उत्तानपादस्य
राज्ञोऽप्रेयसी पत्नी। यथा, भागवते।४।८।८।
"जाये उत्तानपादस्य सुनीतिः सुरुचिस्तयोः।
सुरुचिः प्रेयसी पत्युर्नेतरा यत्सुतो ध्रुवः॥")
शोभननीतिविशिष्टे, त्रि ॥
सुनीथः, त्रि, (सुष्ठु नयति धर्म्ममिति। सु+नी
+ "हनिकुषिनीरमिकाशिभ्यः क्थन्।" उणा०
२। २। इति क्थन्।) धर्म्मशीलः। इत्यु-
णादिकोषः। पुं, ब्राह्मणः। इति संक्षिप्तसारो-

णादिवृत्तिः ॥ (चन्द्रवंशीयालर्कराजपौत्रः।
यथा, भागवते। ९। १७। ८।
"अलर्कात् सन्ततिस्तस्मात् सुनीथोऽथ निके-
तनः ॥")
सुनीलं,क्ली,(सुष्ठु नीलम्।) लामज्जकम्। इति
राजनिर्घण्टः ॥
सुनीलः,पुं,(अतिशयो नीलः।) दाड़िमः। इति
राजनिर्घण्टः ॥ सुन्दरनीलवर्णश्च ॥
सुनीलकः,पुं,(सुनील एव। स्वार्थे कन्।) नील-
भृङ्गराजः। नीलासनः। नीलरत्नम्। इति
राजनिर्घण्टः ॥
सुनीला, स्त्री, (अतिशयनीला) अतसी।
विष्णुक्रान्ता। जरतीतृणम्। इति राजनिर्घण्टः॥
सुनु,[नी] क्ली,जलम्। शोभना नीर्यत्र तत् सुनु
जलम्। इति मुग्धबोधटीकायां दुर्गादासः ॥
सुनौः,त्रि,शोभननौकाविशिष्टः। शोभना नौर्यत्र
यस्य वा इति बहुव्रीहिसमासनिष्पन्नः। शोभन-
नौकायाम्, स्त्री ॥
सुन्दः, पुं, वानरविशेषः। यथा,—
"जाम्बुवान् ऋषभः सुन्दो वभ्रुः शतवलिः
पृथुः।
व्यूढानीकाश्च यत्ताश्च द्रुमानादाय सर्व्वतः॥"
इति वाल्मीकीये रामायणे युद्धकाण्डे ४७सर्गः॥
राक्षसविशेषः। यथा,—
"अथ कालोपमौ युद्धे सुतौ सुन्दोपसुन्दयोः।
यज्ञविघ्नकरौ तौ ते नैव दास्यामि पुत्रकम् ॥"
इति रामायणे बालकाण्डे २० सर्गः ॥
(संह्रादपुत्रः। यथा, हरिवंशे। ३। ७२।
"संह्रादपुत्रौ सुन्दश्च निसुन्दश्चैव तावुभौ ॥"
विष्णुः। इति महाभारतम् ।१३।१४८।८९॥)
सुन्दरं, त्रि, (सुष्ठु उनत्ति आर्द्रीकरोति चित्त-
मिति। सु+उन्द क्लेदने+अरः। शकन्ध्वा-
दित्वात् साधुः।) मनोहरम्। तत्पर्य्यायः॥
रुचिरम् २ चारु ३ सुषमम् ४ साधु ५ शोभ-
नम् ६ कान्तम् ७ मनोरमम् ८ रुच्यम् ९
मनोज्ञम् १० मञ्जु ११ मञ्जुलम् १२। इत्य-
मरः। ३। १। ५२॥ मनोहारि १३ सौम्यम्
१४ भद्रकम् १५ रमणीयम् १६ रामणीयकम्
१७। इति तट्टीका॥ बन्धुरम् १८ बन्धुरम् १९
पेशलम् २० पेसलम् २१ वामम् २२ रामम् २३
अभिरामम् २४ नन्दितम् २५ सुसमम् २६ ॥
इति शब्दरत्नावली॥ वल्गु २७ हारि २८
स्वरूपम् २९ अभिरूपम् ३० दिव्यम् ३१। इति
जटाधरः ॥
सुन्दरः, पुं, (सु+उन्द+अरः।) कामदेवः॥
इति हेमचन्द्रः ॥ वृक्षविशेषः। सुंदरी इति
भाषा। यथा,—
"सम्युद्धवोषदिरोदिरस्पाराव सुन्दरः।
पदामन्दतमा . . . निर्मलानि भार्वम्॥"
इति . . . ।
सुन्दरी, स्त्री, (सुन्दर+गौरादित्वात् ङीष्।)
नारीभेदः। इत्यमरः।३।१।४॥ सुष्ठु उनत्ति

शाद्र यति मनः इति सुन्दरी। उन्द धौ क्लेदे सुपूर्व: नाप्नोति शरः निपातनादुलोपः नदादित्वाडीप्। रूपलावण्यसम्पन्ना सुन्दरी। इति महीकायां भरतः ॥ तरुभेदः। इति मेदिनी ॥ हरिद्रा। इति शब्दचन्द्रिका ॥ त्रिपुरसुन्दरी। यथा,—

"अङ्गुष्ठानामिकायोगात् वामहस्तस्य पार्श्वतः।
तर्पयेत् सुन्दरीं देवीं समुद्राञ्च सवाहनाम् ॥"

इति तन्त्रसारे श्रीविद्याप्रकरणम् ॥

योगिनीविशेषः। यथा,—

"तावज्जपं जपेद्विद्वान् यावदायाति सुन्दरी।
प्रात्वा इष्टं साधकेभ्यो निशीथे याति निश्चितम्॥"

इति तत्रैव योगिनीसाधनप्रकरणम् ॥

सुन्भ, दुम्भे। हिंसे। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-हिंसे सक०-सेट्।) सुम्भति। इति दुर्गादासः ॥

सुप्रम् [न्] त्रि, यज्ञकर्त्ता। "सुञो यज्ञसंयोगे।" ३। २। १३२। इति सुनोतेः शतृप्रत्ययः ॥ सर्व्वे सुन्वन्तः। सर्व्वे यजमानाः सत्रिणः। इति सिद्धान्तकौमुदी ॥

सुपकः, पुं, (सु + पच् + अः।) सुगन्ध्याम्रः। इति शब्दचन्द्रिका ॥ शोभनपरिपक्वे, त्रि ॥ (यथा, भागवते। १। ८। ४०।

"इमे जनपदाः स्वृद्धाः सुपक्वौषधिवीरुधः।
वनाद्रिनद्युदन्वन्तो ह्येधन्ते तव वीक्षिताः ॥")

सुपत्रं, क्ली, (शोभनं पत्रमस्य।) तेजपत्रम्। इति शब्दचन्द्रिका ॥

सुपत्र, पुं, (शोभनं पत्रमस्येति।) आदित्यपत्रः। [illegible] इति राजनिर्घण्टः ॥

सुपत्रकः, पुं, (शोभनं पत्रमस्य। कन्।) शिग्रुः। इति राजनिर्घण्टः ॥ (शिग्रुशब्देऽस्य विशेषो ज्ञातव्यः।)

सुपत्रा, स्त्री, (शोभनं पत्रमस्याः।) रुद्रजटा। शतावरी। शालपर्णी। शमी। पालङ्की। इति राजनिर्घण्टः ॥

सुपत्रिका, स्त्री, जतुका। इति राजनिर्घण्टः ॥

सुपथ, पुं, (सु शोभनः पन्थाः। अच् समासे।) सत्पथः। यथा,—

"[illegible] सुपथेति च।"

इति [illegible] ॥

(यथा, [illegible]। १०। १८७।

"[illegible]"

[illegible], त्रि ॥

सुपर्वा, स्त्री, (शु पर्वं यस्याः।) श्वेतदूर्वा। इति [illegible] ॥ [illegible], त्रि ॥

सुपर्ण, पुं, (शोभनं पर्णं यस्य।) [illegible]। इति [illegible] ॥

सुपर्ण, पुं, [illegible] यथा,—

"[illegible]"

[illegible]

[illegible]

पर्यादिश्चित्तौ रचिता च धातुकौमुदी ॥"

इति तदीयपरिभाषावृत्तिः ॥

(पुं, क्ली। शोभनं पद्मम्।) शोभनपद्मञ्च। शोभनपद्मविशिष्टे, त्रि ॥

सुपद्मा, स्त्री, वचा। इति शब्दचन्द्रिका ॥

सुपर्णः, पुं, (सुष्ठु पर्णं पक्षो यस्य।) गरुडः। इत्यमरः। १।१।२९॥ (यथा, रघुः। १०। ६१।

"उह्यन्ते स्म सुपर्णेन वेगाकृष्टपयोमुचा ॥")

स्वर्णचूडपक्षी। कृतमालकवृक्षः। इति मेदिनी ॥ (पक्षिमात्रम्। यथा, मनुः। १। ३७।

"नागान् सर्पान् सुपर्णांश्च पितॄणाञ्च पृथग्गणान् ॥")

विष्णुः। इति महाभारतम्। १३। १४८। २४॥) शोभनपर्णविशिष्टे, त्रि ॥

सुपर्णकः, पुं, (सु शोभनानि पर्णानि यस्य। कन्।) आरग्वधवृक्षः। इति रत्नमाला ॥ सप्तच्छदवृक्षः। इति जटाधरः ॥ गरुडः। इति हेमचन्द्रः ॥

सुपर्णकेतुः, पुं, (सुपर्णः केतौ यस्य।) विष्णुः। इति हलायुधः ॥

सुपर्णी, स्त्री, (सु शोभनानि पर्णानि पत्राणि यस्याः।) पद्मिनी। इति शब्दमाला ॥

सुपर्णाख्यः, पुं, (सुपर्ण इति आख्या यस्य।) नागकेशरः। इति त्रिकाण्डशेषः ॥ (अस्य पर्यायो यथा, वैद्यकरत्नमालायाम्।

"दीपः सर्पः सुपर्णाख्यस्ताम्रो यो नागकेशरः॥")

सुपर्णिका, स्त्री, (शोभनानि पर्णानि यस्याः। कप्। टापि अत इत्वम्।) स्वर्णजीवन्ती। पलाशी। शालपर्णी। रेणुका। वाकुची। इति राजनिर्घण्टः ॥ (अस्याः पर्यायो यथा,—

"अवल्गुजो वाकुची स्यात् सोमराजी सुपर्णिका।
शशिलेखा कृष्णफला सोमा पूतिफलीति च।
सोमवल्ली कालमेषी कुष्ठघ्नी च प्रकीर्त्तिता ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

सुपर्णी, स्त्री, (सुष्ठु पर्णान्यस्याः। गौरादित्वात् ङीष्।) कमलिनी। गरुडमाता। इति मेदिनी ॥ (पक्षिणीमात्रे च। यथा, महाभारते। १। २२४। १०।

"सुपर्णी सा तदा भूत्वा निर्जगाम महावनात्")

सुपर्णीतनयः, पुं, (सुपर्ण्यास्तनयः।) गरुडः। इति हलायुधः ॥

सुपर्व्वा, [न्] पुं, (सुष्ठु पर्व्व यस्य।) देवताः। इत्यमरः। १। १। ७॥ बाणः। वंशः। धूमः। इति मेदिनी ॥

सुपर्व्वा, स्त्री (शोभनं पर्व्व यस्याः।) श्वेतदूर्व्वा। इति राजनिर्घण्टः ॥ सुन्दरपर्व्वविशिष्टे च ॥

सुपाकः, क्ली (सुपाकाय हितम्। सुपाक + यत्।) [illegible]। इति राजनिर्घण्टः ॥

सुपात्र, क्ली, (सुष्ठु पात्रम्।) [illegible]। (यथा, भागवते। ७। १४। ३९।

"[illegible] सुपात्रं [illegible]।
[illegible] सुपात्रं [illegible]॥")

तत्र दानविधिर्यथा,—

"सर्व्वेषामेव पात्राणां परं पात्रं [illegible]
पतन्तं त्रायते यस्मात्तस्मात्
पात्राख्याध्यात्मिका [illegible]

देवताश्च तथा मुख्या गोदानं [illegible]
सर्व्वत्र गुणवद्दानं स्वपाकादिष्वपि [illegible]
देशे काले विधानेन पात्रे दत्तं [illegible]।
पात्रे विद्यातपस्यादिगुणयुक्ते।

[illegible] ॥ अपि च।

"तस्मात् सर्व्वात्मना पात्रे [illegible]
अपात्रे पातयेद्दत्तं सुवर्णं नरकार्णवे।"

इति [illegible]।

शोभनभाजनम्। शोभनञ्च [illegible] धारयसमासनिष्पन्नम्। [illegible]

सुपानः, त्रि, (सुखेन पीयते इति। "आतो युच्।" ३। ३। १२८। [illegible]) पानयोग्यः। सुखेन पीयतेऽसौ। [illegible] रिद्र इत्यनेन कर्म्मणि अनप्रत्ययेन [illegible]। इति मुग्धबोधव्याकरणम् ॥

सुपार्श्वः, पुं, (सुष्ठु पार्श्वोऽस्य।) [illegible] हस्ताईदग्गतहस्ताईदिर्विशेषः। इति [illegible]। प्लक्षवृक्षः। इति राजनिर्घण्टः ॥ [illegible] स तु सम्पातिपुत्रः। यथा,—

"निर्दग्धपक्षं सम्पातिं वानराः सुमहौजसः

इत्युपक्रम्य।

"क्व सीता केन वा दृष्टा को [illegible]

तदाख्यातु भवान् सर्व्वं गतिर्भव [illegible]
सहरोम् प्रतिमसुतान् [illegible]
पुनराश्वासयन् प्रीत इदं वचनमब्रवीत्।
अस्मिन् गिरौ दुर्गे बहुयोजनमायते।
चिरान्निपतितो वृद्धः क्षीणप्राणपराक्रमः।
तं मामेवं गतः पुत्रः सुपार्श्वो नाम [illegible]
आहारेण यथाकालं बिभर्त्ति [illegible]

इति वाल्मीकीये रामायणे [illegible] ५८ सर्गः ॥ (पाठान्तरमिदम्। [illegible] भागवते। ७। १०। ११।

"नारायणो सुपार्श्वे तु [illegible]
[illegible] पर्व्वतश्रेष्ठे। [illegible]

पुराणे। २। २। १०।

"[illegible]"

सुपार्श्वकः, पुं, (सुष्ठु पार्श्वो यस्य।) [illegible]
[illegible] इति महाभारतम्। [illegible]
[illegible] ४३॥ (अस्य [illegible]
इति श्रीदे।

"[illegible]
[illegible]"

इति भावप्रकाशस्य पूर्व्वखण्डे [illegible]

[illegible]र्णा, स्त्री, (सुष्ठु पिच्छला ।) शीरर्णी । शिकर्णी । इति राजनिर्घण्टः ॥

[illegible]नं, क्ली, (सु + पीड + ल्युट् ।) सुष्ठु [illegible]नम् इति केचित् ॥ गाथाया इति [illegible]ः ॥

[illegible]नं, क्ली, (सु + पा + क्तः ।) नक्तरम् । इति [illegible]निर्घण्टः ॥

[illegible]न्, [न्] त्रि, (सुष्ठु पिबतीति । सु + पा + [illegible]तो मनिन्कनिप्वनिपश्च ।" ३ । २ । ७४ । [illegible] क्वनिप् ।) शोभनपानकर्त्ता । इति मुग्ध-[illegible]टीकायां दुर्गादासः ॥

[illegible]ः, पुं, (सुष्ठु पुटमस्य ।) कोलकन्दः । विष्णु-[illegible]ः । इति राजनिर्घण्टः ॥

[illegible]ष्पिका, स्त्री, (शोभना पुष्पिकेव ।) पातुका । [illegible]ति राजनिर्घण्टः ॥

[illegible]करा, स्त्री, स्वर्णपक्षिणी । इति राजनिर्घण्टः ॥

[illegible]ष्पं, क्ली, (शोभनं पुष्पमस्य ।) लवङ्गम् । इति [illegible]ब्दचन्द्रिका ॥ आढकम् । प्रपौण्डरीकम् । [illegible]म् । इति राजनिर्घण्टः ॥ स्त्रीणां रजः । [illegible] ॥,—

"[illegible]पुष्पे राकीर्णे कुसुमधनुषो मन्दिरमहो
[illegible]ो ध्यायन् ध्यायन् यदि जपति भक्तस्तव मनुम् ।"

इति तन्त्रसारः ॥

[illegible]ष्पः, पुं, (शोभनानि पुष्पाणि यस्य ।) रक्त-[illegible]यकः । इति शब्दचन्द्रिका ॥ पालितामादार [illegible]ति भाषा ॥ शिरीषः । हरिद्रुः । राजतरुणी । [illegible]ति राजनिर्घण्टः ॥

[illegible]ष्पिका, स्त्री, (शोभनानि पुष्पाणि यस्याः । [illegible]ीप् । ततः कन् ।) पाटला । इति राज-[illegible]निर्घण्टः ॥ (गुणादयोऽस्याः पाटलाशब्दे [illegible]ातव्याः ॥)

[illegible]ष्पी, स्त्री, (सुष्ठु पुष्पं यस्याः । ङीष् ।) श्वेता-[illegible]राजिता । शोणझण्टी । शतपुष्पी । सिध्येया । [illegible]णपुष्पी । इति राजनिर्घण्टः ॥ कदली । [illegible]ति शब्दचन्द्रिका ॥

[illegible]पूरः, पुं, बीजपूरः । इति राजनिर्घण्टः ॥

[illegible]पूरकः, पुं, (सुष्ठु पूरयतीति । पूर + ण्वुल् ।) [illegible]रक्तपुष्पवृक्षः । इति रत्नमाला ॥

[illegible]प्, क्ली, लिङ्गोत्तरप्रयुज्यमानप्रत्ययविशेषः । स तु [illegible]सप्तमीविभक्तेर्बहुवचनम् । इति मुग्धबोधव्याक-[illegible]रणम् ॥ सुपद्मादिव्याकरणमते एकविंशति-विभक्तीनां संज्ञा ॥ (यथा, "सुप्तिङन्तचयो वाक्यम् ।" इति व्याकरणटीकायां वाक्य-लक्षणम् ॥

[illegible]प्तं, क्ली, (स्वप् + क्तः ।) सुषुप्तिः । तत्पर्य्यायः । [illegible] स्वापिका २ । इति हेमचन्द्रः ॥

[illegible]प्तः, त्रि, (स्वप् + क्तः ।) निद्रितः । तत्पर्य्यायः । निद्राणः २ शयितः ३ । इति हेमचन्द्रः ॥ तस्य बोधने विधिनिषेधौ यथा,—

"क्षुधितस्तृषितः कामी विद्यार्थी कृषिकारकः ।
भाण्डारी च प्रवासी च सप्त सुप्तान् प्रबोधयेत् ॥
अहिकं भ्रमरी सर्पो राजा वै बालकस्तथा ।
परश्वापि च मूर्खश्च सप्त सुप्तान् न बोधयेत् ॥"

(विकार्य्याभेदः । यथा,—

"त्वक् या स्फुटिता सुप्ता रूक्षा श्यावा च सुप्तति
धावन्त्यपि मन्दगा च पर्व्वेषु रूक्षगन्धिनिस्रे ॥"

इति माधवकरसंगृहीतरुग्विनिश्चये वात-व्याध्यधिकारे । ६ ॥)

सुप्तघातकः, त्रि, (सुप्तमपि हन्तीति । हन + ण्वुल् ।) हिंस्रः । तत्पर्य्यायः । दमेरः २ । इति त्रिकाण्डशेषः ॥

सुप्तजनः, पुं, (सुप्ता जना यत्र ।) अर्द्धरात्रः । इति जटाधरः ॥ (सुप्तो जनः ।) निद्रितलोकश्च ॥

सुप्तज्ञानं, क्ली, (सुप्ते निद्रावस्थायां ज्ञानम् ।) स्वप्नः । इति जटाधरः ॥

सुप्तविज्ञानं, क्ली, (सुप्ते निद्रावस्थायां विज्ञा-नम् ।) स्वप्नः । इति जटाधरः ॥

सुप्तिः, स्त्री, (स्वप् + क्तिन् ।) स्वप्नता । निद्रा । (यथा, भागवते । ४ । २८ । ७१ ।

"सुप्तिमूर्च्छोपतापेषु प्राणायनविघाततः ।
नेहतेऽहमिति ज्ञानं मृत्युप्रज्वारयोरपि ॥")

विश्रम्भः । शयनम् । इति मेदिनी ॥

सुप्रतिभा, स्त्री, (सुष्ठु प्रतिभा यस्याः ।) मदिरा । इति राजनिर्घण्टः ॥

सुप्रतिष्ठा, स्त्री, (सुष्ठु प्रतिष्ठा यस्याः ।) पञ्चा-क्षराहत्तिच्छन्दः । स तु द्विविधः । पङ्क्तिः । प्रिया च यथा,—

"उक्त्यात्युक्त्या तथा मध्या प्रतिष्ठा सा सुपूर्व्विका ।
गायत्री च ततोष्णिगनुष्टुप् बृहती तथा ॥"

पङ्क्तेरुदाहरणं तच्छब्दे द्रष्टव्यम् । प्रियाया यथा । स-ल-गाः प्रिया ।

"व्रजसुभ्रुवो विलसत्कलाः ।
अभवन् प्रिया सुरवैरिणः ॥"

इति छन्दोमञ्जरी ॥

(शोभना प्रतिष्ठा ।) सुन्दरप्रशंसा च । (शोभनप्रतिष्ठाविशिष्टे, त्रि । यथा, महा-भारते । ३ । ६४ । ६४ ।

"सुभ्रूः सुकेशी सुश्रोणी सुकुचा सुद्विजानना ।
वर्च्चस्विनी सुप्रतिष्ठा स्वसितायतलोचना ।
सा विदर्भाद्यसदृशं वीरसेनसुतप्रिया ॥")

सुप्रतिष्ठितः, पुं, (सुष्ठु प्रतिष्ठितः ।) उडुम्बरवृक्षः । इति राजनिर्घण्टः ॥ सुन्दरप्रतिष्ठायुक्ते, त्रि ॥ (यथा, महाभारते । २ । ५८ । ४ ।

"अयं सहस्रसमितो वैयाघ्रः सुप्रतिष्ठितः ॥"

तथाच ।

"अल्पापि याति देवत्वं महद्भिः सुप्रतिष्ठितः ॥"

इत्युद्भटः ॥)

सुप्रतीकः, पुं, (शोभनाः प्रतीका अङ्गानि यस्य ।) ईशानदिग्गजः । इत्यमरः । १ । ३ । ४ ॥ (यथा, रघुः । ५ । ७५ ।

"मदपटुनिनदद्भिर्बोधितो राजहंसैः
सुरगज इव गाङ्गं सैकतं सुप्रतीकः ॥")

शिवः । कामदेवः । इति केचित् ॥ (साधुः । इति श्रीधरस्वामी ॥ यथा, भागवते । १ । ८८ । ३१ ।

"एवं धार्त्ताज्ञं गति कुरुते मिष्टनादीनि वाक्यो
श्रेयोपायैर्विरचितकृतिः सुप्रतीको यथाप्तो ॥"

शोभनः प्रतीकः ।) शोभनाङ्गम् । तद्युक्ते, त्रि ॥ (यथा, भागवते । ५ । ३ । २ ।

"भगवान् भागवतवात्सल्यतया सुप्रतीक आत्मानमपराजितं निजजनाभिप्रेतार्थविधि-त्सया गृहीतहृदय इति ॥")

सुप्रभः, पुं, (सुष्ठु प्रभा यस्य ।) शुक्रबलः । इति हेमचन्द्रः ॥ सुन्दरप्रभायुक्ते, त्रि ॥ (यथा, मार्कण्डेये । ८० । २७ ।

"वसुः पुत्त्रास्तथा याताः सुप्रभोऽभूद्दिवा-करः ॥")

सुप्रभा, स्त्री, (सुष्ठु प्रभा यस्याः ।) वाकुची । इति राजनिर्घण्टः ॥ अग्निजिह्वाविशेषः । यथा,—

"सुप्रभा पद्मरागाभा वारुण्यां दिशि संस्थिता ॥"

इति तन्त्रसारः ॥

शोभनदीप्तिश्च ॥

सुप्रभातं, क्ली, (सुष्ठु प्रभातम् ।) शुभसूचक-प्रातःकालः । (यथा, भ्रमराष्टके । ८ ।

"रात्रिर्गमिष्यति भविष्यति सुप्रभातं
भास्वानुदेष्यति हसिष्यति पद्मजालम् ।
इत्थं विचिन्तयति कोषगते द्विरेफे
हा हन्त हन्त नलिनीं गज उज्जहार ॥")

प्राभातिकपाठ्यमङ्गलवाक्यम् । यथा,—

सुकेशिरुवाच ।

"किं तदुक्तं सुप्रभातं शङ्करेण महात्मना ।
प्रभाते यत् पठन्मर्त्यो मुच्यते पापबन्धनात् ॥

ऋषय ऊचुः ।

श्रूयतां राक्षसश्रेष्ठ सुप्रभातं हरोदितम् ।
श्रुत्वा स्मृत्वा पठित्वा च सर्व्वपापैः प्रमुच्यते ॥

ब्रह्मा मुरारिस्त्रिपुरान्तकारी
भानुः शशी भूमिसुतो बुधश्च ।
गुरुः सशुक्रः सह भानुजेन
कुर्व्वन्तु सर्व्वे मम सुप्रभातम् ॥
भृगुर्व्वशिष्ठः क्रतुरङ्गिराश्च
मनुः पुलस्त्यः पुलहः सगौतमः ।
रैभ्यो मरीचिश्च्यवनोऽमलोरुः
कुर्व्वन्तु सर्व्वे मम सुप्रभातम् ॥
सनत्कुमारः सनकः सनन्दनः
सनातनोऽप्यासुरिपिङ्गलौ च ।
सप्तस्वराः सप्तरसातलाश्च
कुर्व्वन्तु सर्व्वे मम सुप्रभातम् ॥
पृथ्वी सगन्धा सरसास्तथापः
सस्पर्शवायुर्ज्ज्वलितञ्च तेजः ।
नभः सशब्दं महता सहैव
कुर्व्वन्तु सर्व्वे मम सुप्रभातम् ॥
सप्तार्णवाः सप्त कुलाचलाश्च
सप्तर्षयो द्वीपवराश्च सप्त ।
भूरादि कृत्वा भुवनानि सप्त
कुर्व्वन्तु सर्व्वे मम सुप्रभातम् ॥

इत्थं प्रभाते परमं पवित्रं
यः संस्मरेद्वा शृणुयाच्च भक्त्या ।
दुःस्वप्ननाशो ननु सुप्रभाते
भवेच्च सत्यं भगवत्प्रसादात् ॥"

इति वामनपुराणे १४ अध्यायः ॥

सुप्रभाता, स्त्री, नदीविशेषः । यथा । अरुणा नृमणा आङ्गिरसी सावित्री सुप्रभाता ऋतम्भरा सत्यम्भरेति महानद्यः । इति श्रीभागवते ५ । २० । ४ ॥ शोभनप्रभातयुता रात्रिश्च ॥

सुप्रयुक्तः, त्रि, (सु+प्र+युज+क्तः ।) शोभनप्रयोगविशिष्टः । (यथा, साहित्यदर्पणे । १ परिच्छेदे ।
एकः शब्दः सुप्रयुक्तः सम्यक् ज्ञातः स्वर्गे लोके च कामधुग् भवति ॥")

सुप्रयुक्तशरः, पुं, (सुप्रयुक्तः शरो येन ।) कृतहस्तः । इति हेमचन्द्रः ॥

सुप्रयोगविशिखः, पुं, सुशिक्षितबाणमोचकः । साध्यसाधनचमत्वात् शोभनः प्रयोगो निक्षेपो यस्य स सुप्रयोगः तादृशो विशिखो बाणो यस्य स तथा । कृतहस्तः सुप्रयोगविशिखः कृतपुङ्खवत् । इत्यमरभरतौ । २ । ८ । ६८ ॥

सुप्रलम्भः, पुं, (सु+प्र+लभ+खल् । "उपसर्गात् खल्घञोः ।" ७ । १ । ६७ । इति नुम् ।) सुखलभ्यः । इति सिद्धान्तकौमुदी ॥

सुप्रलापः, पुं, (सु+प्र+लप+घञ् ।) सुवचनम् इत्यमरः । १ । ६ । १८ ॥

सुप्रसन्नः, पुं, (सुष्ठु प्रसन्नः ।) कुबेरः । इति शब्दमाला ॥ सुप्रसादयुक्ते, त्रि ॥ (यथा, मार्कण्डेये । १०५ । ७ ।
"तथानुकम्पां पुत्राणां सुप्रसन्नो रवे मम ।
कुरु प्रसवार्त्तिहर स्थितिकर्त्ता त्वमुच्यते ॥"

सुप्रसन्नकः, पुं, (सुप्रसन्न+संज्ञायां कन् ।) कृष्णार्जकः । इति राजनिर्घण्टः ॥

सुप्रसरा, स्त्री, (सुप्रसरतीति । सु+प्र+सृ+अच् । टाप् ।) प्रसारिणी लता । इति राजनिर्घण्टः ॥

सुप्रसादः, पुं, (सुष्ठु प्रसादो यस्य ।) शिवः । इति त्रिकाण्डशेषः ॥ (विष्णुः । इति महाभारतम् । १३ । १४९ । ३८ ॥ सु+प्र+सद+घञ् ।) सुप्रसन्नता च । (प्रसन्नतायुक्ते, त्रि । यथा, महाभारते । १२ । ५७ । २१ ।
"क्षिप्रकारी जितक्रोधः सुप्रसादो महामनाः ॥"

सुप्रिया, स्त्री, (सुष्ठु प्रिया ।) सुन्दरद्रया । अस्याः प्रमाणं सुभगाशब्दे द्रष्टव्यम् ॥ (अप्सरोविशेषः । यथा, महाभारते । १ । १२३ । ६० ।
"दर्शिता च सुबाहुश्च सुप्रिया सुवपुस्तथा ॥")

सुफलः, पुं, (सुष्ठु फलं यस्य ।) कर्णिकारः । दाड़िमः । बदरः । मुद्गः । इति राजनिर्घण्टः ॥ कपित्थः । इति शब्दचन्द्रिका ॥ शोभनफलयुक्ते, त्रि । (यथा, मार्कण्डेये । १२० । १६ ।
"सुफलानि च शस्यानि रमयन्ति फलानि च ॥"
शोभनखड्गे, क्ली ॥ ० ॥ सुष्ठु फला यस्येति विग्रहे शोभनफलाविशिष्टे, त्रि । यथा, महाभारते । ४ । ४० । १२ ।
"सुफलश्चित्रकोषश्च किङ्किणीसायको महान् ।
कस्य हेमत्सरुर्दिव्यः खड्गः परमनिर्म्मलः ॥")

सुफला, स्त्री, (सुष्ठु फलं यस्याः ।) इन्द्रवारुणी । कुष्माण्डी । काश्मरी । कदली । कपिलद्राक्षा । इति राजनिर्घण्टः ॥

सुफेनः, पुं, (सुष्ठु फेनः ।) समुद्रफेनः । इति राजनिर्घण्टः ॥ (क्वचित् क्लीवलिङ्गोऽपि दृश्यते ॥)

सुबन्धः, पुं, (सुष्ठु बन्धो यस्य ।) तिलः । इति शब्दचन्द्रिका ॥

सुब्रह्मण्यः, पुं, कार्त्तिकेयः । इति केचित् ॥

सुब्रह्मवासुदेवः, पुं, ब्रह्मरूपवसुदेवसुतः । यथा,
"सुब्रह्मवासुदेवाय गोब्राह्मणहिताय च ।
शान्तिरस्तु शिवञ्चास्तु इत्युक्त्वा तान् विसर्जयेत्
इति तिथ्यादितत्त्वे जन्माष्टमीप्रकरणम् ॥

सुभगः, पुं, (सुष्ठु भगं माहात्म्यं श्रीर्वा यस्य ।) टङ्कणः । चम्पकः । रक्तम्लानः । अशोकः । इति राजनिर्घण्टः ॥

सुभगः, त्रि, (सुष्ठु भगं श्रीर्यस्य ।) सुहृद्यः । तत्पर्य्यायः । चतुष्यः २ । इति हेमचन्द्रः ॥ (यथा, रघुः । ११ । ८० ।
"केवलोऽपि सुभगो नवाम्बुदः
किं पुनस्त्रिदशचापलाञ्छितः)")
शोभनैश्वर्य्यादियुक्तश्च ॥ —

सुभगा, स्त्री, (सुष्ठु भगं यस्याः ।) कैवर्त्ती । शालपर्णी । हरिद्रा । नीलदूर्व्वा । तुलसी । प्रियङ्गुः । कस्तूरी । सुवर्णकदली । इति राजनिर्घण्टः ॥ वनमल्ली । इति शब्दरत्नावली ॥ पतिप्रिया । यथा, माण्डव्यः ।
"मघा ऋक्षं परित्यज्य यदा सिंहे गुरुर्भवेत् ।
तदाब्दे कन्यका चोढ़ा सुभगा सुप्रिया भवेत् ॥"
इति मलमासतत्त्वम् ॥

सुभगासुतः, पुं, (सुभगायाः सुतः ।) सौभागिनेयः । इत्यमरः । २ । ६ । २४ ॥

सुभङ्गः, पुं, (सुखेन भज्यते इति । सु+भञ्ज+घञ् ।) नारिकेलवृक्षः । इति जटाधरः ॥

सुभद्रः, पुं, (सुष्ठु भद्रं यस्मात् ।) विष्णुः । इति शब्दमाला ॥ राजभेदः । इति हेमचन्द्रः ॥ (पौरवीगर्भसम्भूतो वसुदेवस्य पुत्रविशेषः । यथा, भागवते । ९ । २४ । ४७ ।
"सुभद्रो भद्रबाहुश्च दुर्म्मदो भद्र एव च ।
पौरव्यास्तनया ह्येते भूताद्या द्वादशाभवन् ॥")
शोभनमङ्गलयुक्ते, त्रि ॥ (यथा, महाभारते । १ । २३३ । १७ ।
"त्वत्त एताः पुनः शक्र नीरधो हरितच्छदाः ।
जायन्ते पुष्करिण्यश्च सुभद्रश्च महोदधिः ॥")

सुभद्रकः, पुं, (सुष्ठु भद्रमस्मात् । ततः कन् ।) देवरथः । यथा, शब्दरत्नावल्याम् ।
"व्योमयानं दिव्यरथो विमानोऽस्त्री सुभद्रकः ॥
बिल्ववृक्षः । इति शब्दचन्द्रिका ॥

सुभद्रा, स्त्री, (शोभनं भद्रमस्याः ।)
इति शब्दमाला ॥ (अस्याः
"कामपेषी
दीर्घमूला ...
इति
हस्तमण्डा । इति शब्दचन्द्रिका ॥
इति राजनिर्घण्टः ॥ श्रीकृष्णभगिनी । अर्ज्जुनभार्य्या । यथा,—
श्रीकृष्ण उवाच ।
"ममैषा भगिनी पार्थ सारणस्य
सुभद्रा नाम भद्रं ते पितुर्मे दयिता सुता ।
यदि ते वर्त्तते बुद्धिर्वक्ष्यामि पितरं स्वयम् ।
अर्ज्जुन उवाच ।
दुहिता वसुदेवस्य वासुदेवस्य च स्वसा ।
रूपेण चैषा सम्पन्ना कमिवैषा न मोहयेत् ।
निवृत्तयाज्जुनस्तत्र विवाहं कृतवान् प्रभुः ।
पूर्णे तु द्वादशे वर्षे खाण्डवप्रस्थमागतः ॥"
इति महाभारते आदिपर्व्वणि २२ ।
(पीठस्थानस्थदेवीविशेषः । यथा, देवीभागवते । ७ । ३० । ७५ ।
"उत्पलावर्त्तके लोला सुभद्रा शोणसङ्गमे ॥")

सुभद्राणी, स्त्री, त्रायन्ती । इति बहुला इति ख्याता ॥

सुभद्रेशः, पुं,(सुभद्राया ईशः ।) अर्ज्जुनः । इति हेमचन्द्रः ॥

सुभाञ्जनः, पुं, (सु शोभनं अञ्जनं यस्मात् ।) शोभाञ्जनवृक्षः । इति भरतद्विरूपकोषः ॥

सुभाषितः, पुं, (सुष्ठु भाषितं यस्य ।) बुद्धः । यथा,—
"कौमारो द्वादशाक्षश्च वीतरागः सुभाषितः ।"
इति त्रिकाण्डशेषः ॥
सुन्दरकथिते, त्रि ॥ (सुन्दरवाक्यविशिष्टे च त्रि । यथा, महाभारते । ३ । ६० । ४ ।
"नलश्च हृतसर्व्वस्वमुपलभ्य दमन्तोत् ।
बृहत्सेनामतियशां तां धात्रीं परिचारिकाम् ।
हिता सर्व्वार्थकुशलामनुरक्तां सुभाषिताम् ॥")
सुष्ठु भाषितम् । सुवाक्ये, क्ली, ॥ यथा, हितोपदेशे ।
"विषादप्यमृतं ग्राह्यममेध्यादपि काञ्चनम् ।
नीचादप्युत्तमा विद्यां बालादपि सुभाषितम् ॥"

सुभिक्षः, त्रि,(सुखेन लभ्या भिक्षा यत्र ।) सुलभभैक्षद्रव्यम् । सुलभभैक्ष्ययुक्तकालादिः । यथा,—
"द्वाविमौ पुरुषौ लोके सूर्य्यमण्डलभेदिनौ ।
दाता यस्तु दुर्भिक्षे सुभिक्षे ब्रह्मचर्य्यवान् ॥"
इति वह्निपुराणे आह्निकतपोनामाध्यायः ॥
किञ्च ।
"शं ते क्षेमसुभिक्षं ब्राह्मणपीडाय निर्द्दिष्टौ ।"
इति तिथ्यादितत्त्वम् ॥

सुभिक्षा, स्त्री,(सुष्ठु भिक्ष्यतेऽसौ । सु+भिक्ष+घञ् ।) धातकीपुष्पिका । इत्यमरः । २ । ४ । १२१ ॥
(अस्याः पर्य्याया यथा,—

'धातकी धातुपुष्पी च ताम्रपुष्पी च कुञ्जरा।
सुभिक्षा बहुपुष्पी च वह्निज्वाला च सा स्मृता॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
सुभीरक:, पुं, पलाशवृक्ष:। इति हारावली ॥
सुभू:, त्रि, (शोभना भूरुत्पत्तिर्यस्य।) सुजन्मा।
इति मुग्धबोधव्याकरणम् ॥(शोभना भूर्भूमि:।)
सुभूमौ, स्त्री। तत्सम्बन्धिनि, त्रि ॥
सुभूतिक:,पुं,(सुष्ठु भूतिर्यत्र। कप्।)विल्ववृक्ष:।
इति राजनिर्घण्ट: ॥
सुभूम:, पुं, कार्त्तवीर्य्य:। स तु जिनानां अष्टम-
चक्रवर्त्ती। इति हेमचन्द्र: ॥
सुभृशं, क्ली,(सुष्ठु भृशम्।) वाढ़म्। अतिशयम्।
इति शब्दरत्नावली ॥ (यथा, देवीभागवते।
२।६।२६।
"शपामि तं द्विलधाद्य येन मन्त्र: समर्पित:।
त्राह्मापि सुभृशं कुन्ति। नो चेत् मां त्वं
भजिष्यसि ॥")
तद्वति, त्रि ॥
सुभ्रु:) स्त्री. (सुष्ठु भ्रुर्यस्या:। वा ऊङ्।)
सुभ्रू:) नारी। इति जटाधर: ॥ (शोभना
भ्रु:। यथा, भागवते। ३।२३।३२।
"सुभ्रुवा सुदता स्नग्धस्निग्धापाङ्गेन चक्षुषा।
पद्मकोषस्पृधा नीलैरलकैश्च लसन्मुखम् ॥")
सुन्दरभ्रुयुक्ते, त्रि ॥ (यथा,भागवते।४।८।४५।
"सुनसं सुभ्रुवं चारु कपोलं सुरसुन्दरम् ॥")
सुमं, क्ली,(सुष्ठु मातीति। मा+क:।) पुष्पम्।
इत्यमरटीकायां भरत: ॥ (यथा, राजेन्द्र-
कर्णपूरे। ७४।
"किं हारै: किमु कङ्कणै: किमु सुमै: किं
कर्णपूरैरलं
केयूरैर्मणिकुण्डलैरलमलं माड़म्बरैरम्बरै:।
पुंसामेकमखण्डनं पुनरिदं शम्भोर्मते मण्डनं
यन्निष्पीड़ितपार्व्वणेन्दुशकलस्यन्दोपमा:
सूक्तय: ॥")
सुम:,पुं,(सुष्ठु माति सौन्दर्य्यमिति। मा+क:।)
चन्द्र:। नभ:। इति संक्षिप्तसारोणादिवृत्ति: ॥
सुमङ्गला, स्त्री, (सुष्ठु मङ्गलं यस्या:।) गाय-
त्रोलो। इति रत्नमाला ॥ माकड़हाता इति
माकड़िया इति च भाषा ॥ अर्हतां माता।
इति हेमचन्द्र: ॥ कामाख्यादेशीयनदीविशेष:।
यथा, कालिकापुराणे ८१ अध्याये।
"नदी सुमङ्गला नाम हिमपर्व्वतनिर्गता।
पूर्व्वस्यां मणिकूटस्य सदा स्रवति शोभना ॥
मणिकूटं समारुह्य यस्तां पश्यति वै नदीम्।
स गङ्गास्नानजं पुण्यमवाप्य त्रिदिवं व्रजेत् ॥"
अतिशयशेमयुक्ते, त्रि ॥
सुमत:, त्रि, सुन्दरज्ञानविषय:। सुशब्दपूर्व्वक-
मनधातो: क्तप्रत्ययेन निष्पन्न: ॥
सुमति:,पुं,(शोभना मतिर्यस्य।) वर्त्तमानकल्पो-
यार्हद्भेद:। भूतकल्पीयार्हद्भेद:। इति हेम-
चन्द्र: ॥ सुन्दरमतियुक्ते, त्रि। (यथा, भाग-
वते। १०।६०।३८।

"त्वं वै समस्तपुरुषार्थमय: फलात्मा
यद्वाञ्छया सुमतयो विसृजन्ति कृत्स्नम्।
तेषां विभो समुचितो भवत: समाज:
पुंस: स्त्रियाश्च रतयो: सुखदु:खिनोर्न ॥")॥
शोभना मति:।) शोभनमती, स्त्री ॥
सुमति:, स्त्री, (शोभना मतिर्यस्या:।) विष्णु-
यशस: पत्नी। सा कल्किमाता। यथा,—
"शम्भले विष्णुयशसो गृहे प्रादुर्भवाम्यहम्।
सुमत्यां मातरि विभो: कन्यायां त्वन्निदेशत:।
चतुर्भिर्भ्रातृभिर्देव करिष्यामि कलिक्षयम् ॥"
इति कल्किपुराणे २ अध्याय: ॥
अपि च। तत्रैव।
"सुमत्यां विष्णुयशसा गर्भमाधत्त वैष्णवम् ॥"
"सुमतिस्तं सुतं लब्ध्वा विष्णुं जिष्णुं जगत्पतिम्
पूर्णकामा विप्रमुख्यानाहूयादाद्गवां शतम् ॥"
सुमदन:, पुं, (सुष्ठु मदयति कोकिलादीनिति।
सु+मद+णिच्+ल्यु:।) आम्रवृक्ष:। इति
राजनिर्घण्ट: ॥
सुमदात्मजा, स्त्री, (सुमद: आत्मज इव यस्या:।
सुमदस्य आत्मजेव इति वा।) अप्सरा:। इति
त्रिकाण्डशेष: ॥
सुमधुरं, क्ली, (सुष्ठु मधुरम्।) अत्यर्थमधुर-
वाक्यम्। तत्पर्य्याय:। सान्त्वम् २। इति हेम-
चन्द्र: ॥ अतिशयमधुररसयुक्ते, त्रि ॥ (यथा,
महाभारते। १३। ५४। १५।
"गीतध्वनिं सुमधुरं तथैवाध्यापनध्वनिम्।
हंसानां सुमधुरांश्चापि तत्र शुश्राव पार्थिव ॥")
सुमधुर:, पुं, (सुष्ठु मधुरो रसो यत्र।) जीव-
शाक:। इति राजनिर्घण्ट: ॥
सुमन:,पुं,(सुष्ठु मन्यते इति। सु+मन+अच्।
गोधूम:। इत्यमर:। २।९।१८॥ (अस्य
पर्य्यायो यथा,—
"गोधूम: सुमनोऽपि स्यात्त्रिविध: स च कीर्त्तित:।
महागोधूम इत्याख्य: पश्चाद्देशात् समागत: ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
धुस्तूर:। इति शब्दमाला ॥ मनोहरे, त्रि।
इति शब्दरत्नावली ॥
सुमन:,[स्]क्ली, (शोभनं मनो यस्मात्।)पुष्पम्।
इत्यमर: ॥ (यथा, भागवते। ४। १५। ७।
"प्रशंसन्ति स्म तं विप्रा गन्धर्व्वप्रवरा जगु:।
मुमुचु: सुमनोधारा: सिद्धा नृत्यन्ति स्व:स्त्रिय: ॥")
उत्तममनश्च। शोभनमनोयुक्ते, त्रि ॥ (यथा,
महाभारते। १। ४८। १०।
"ब्राह्मणा: क्षत्रिया वैश्या: शूद्राश्चैव स्वकर्म्मसु।
स्थिता: सुमनसो राजंस्तेन राज्ञा स्वधि-
ष्ठिता: ॥")
सुमन:पत्रिका,स्त्री,(सुमनसो जात्या: पत्रिका।)
जातीपत्रिका। इति राजनिर्घण्ट: ॥
सुमन:फलं, क्ली, (सुमनसो जात्या: फलम्।)
जातीफलम्। इति राजनिर्घण्ट: ॥
सुमन:फल:, पुं,(सुष्ठु मनो दधाति तादृशं फलं
यस्य।) कपित्थवृक्ष:। इति शब्दचन्द्रिका ॥

सुमनस:,स्त्री,भूम्नि, पुष्पम्। इत्यमर:।२।४।१७॥
सुप्रीतं मन आभिरिति सुमनस: नित्यबहुवच-
नान्तत्वात् बहुवचननिर्देश:। भूम्नि स्त्रिय:
सुमनस:। इति रत्नकोष: ॥ बहुवच समा-
सिकता अप् सुमनसोऽप्सरस इति भूम्नि वाम-
नोऽपि। भूम्नि भूरिप्रयोग:। एकत्वञ्च दृश्यते।
सुमना: पुष्पमालत्यो: स्त्रियां ना धीरदेवयो-
रिति मेदिनी। वेश्या श्मशानसुमना इव वर्ज्ज-
नीया इति शूद्रकप्रयोगश्च। सुमनस: क्लीवत्व-
मपि पुष्पं सुमन: कुसुममिति नाममालादिदर्श-
नात्। अमरव्याख्येये दधिसुमनसीति क्लीवत्वं
छान्दसमित्येके। इति भरत: ॥ (यथा, महा-
भारते। १३। ९८। २०—२२।
"मनो ह्लादयते यस्मात् श्रियञ्चापि दधाति च।
तस्मात् सुमनस: प्रोक्ता नरै: सुकृतकर्म्मभि: ॥
देवताभ्य: सुमनसो यो ददाति नर: शुचि:।
तस्य तुष्यन्ति वै देवास्तुष्टा: पुष्टिं ददत्यपि ॥
यं यमुद्दिश्य दीयेरन् देवं सुमनस: प्रभो।
मङ्गलार्थं स तेनास्य प्रीतो भवति दैत्यप ॥")
सुमना, स्त्री, जातीपुष्पवृक्ष:। इति शब्दरत्ना-
वली ॥ (यथा, भरतधृतसुश्रुत:।
"सुमनायाश्च पत्राणि पटोलारिष्टयोस्तथा ॥")
सुमना:,[स्]पुं, (शोभनं मनो यस्य।) देवता।
इत्यमर:। १। १। ७॥ सुष्ठु मन्यते सुमना-
अस्। शोभनं मनोऽस्य इति वा। इति भरत: ॥
पण्डित:। इति मेदिनी ॥ पूतिकरञ्ज:। इति
शब्दमाला ॥ निम्ब:। महाकरञ्ज:। गोधूम:।
इति राजनिर्घण्ट: ॥(शोभनचित्ते, त्रि। यथा,
महाभारते। ३। २६। २१।
"ततस्ते ब्राह्मणा: सर्व्वे वकं दाल्भ्यमपूजयन् ॥
युधिष्ठिरे स्तूयमाने भूय: सुमनसोऽभवन् ॥")
सुमना:,[स्]स्त्री, (सुष्ठु मनो यस्या:।) पुष्पम्।
मालती। इति मेदिनी ॥ जाती। शतपत्री।
इति राजनिर्घण्ट: ॥ "सुष्ठु मन्यते जनैर्मनोज्ञ-
त्वात् शोभनं मनोऽस्यामिति वा सुमना: साम्ना
स्त्रीलिङ्गा च।
'स्त्रियां सुमनसो भूम्नि पुष्पे जातौ च मेदत:।
विदुष्यपि यदा दृष्टस्तदा भेदेन शिष्यते ॥'
इति व्याड़ि:।
'सुमना: पुष्पमालत्यो: स्त्रियां नाधीरदेवयो: ।'
इति शास्त्रेषु मेदिनी। चावस्थापि सुमनास्ति।
'सुमनायाश्च पत्राणि पटोलारिष्टयोस्तथा।'
इति सुश्रुत:।" इत्यमरटीकायां भरत: ॥
सुमनोरज:, [स्] क्ली, (सुमनसां रज:।)
पराग:। इत्यमर:। २। ४। १७ ॥
सुमन्तु:, पुं,मुनिविशेष:। स चाथर्व्ववेदशाखा-
प्रचारक:। वेदव्यासशिष्य:। यथा,—
"सुमन्तुं दधत: पैल: सामगो जैमिनि: कवि:।
वैशम्पायन एवैको निष्णातो यजुषामुत ॥
अथर्व्वाङ्गिरसामासीत् सुमन्तुर्दारुणो मुनि:
इतिहासपुराणानां पिता मे रोमहर्षण:।"

"जैमिनिश्च सुमन्तुश्च वैशम्पायन एव च ।
पुलस्त्यः पुलहश्चैव पञ्चैते वज्रवारकाः ॥"
इति पुराणम् ॥
(सुष्ठु मन्तुरपराधो यस्य ।) अल्पापराधिनि, त्रि ॥

सुमन्त्रः, पुं, कल्किदेवस्य ज्येष्ठभ्राता । यथा,—
"कल्केर्ज्येष्ठास्त्रयः शूराः कविप्राज्ञसुमन्त्रकाः
तातमातृप्रियकरा गुरुविप्रप्रतिष्ठिताः ॥"
इति कल्किपुराणे २ अध्यायः ॥
अपि च ।
"विशाखयूपभूपालः प्रायात् साधुजनप्रियः ।
कल्किं द्रष्टुं हरेरंशमाविर्भूतञ्च सम्भले ॥
कविं प्राज्ञं सुमन्त्रञ्च पुरस्कृत्य महाप्रभम् ।
गार्ग्यभार्ग्यविशालैश्च ज्ञातिभिः परिवारितम् ॥"
इति तत्रैव ३ अध्यायः ॥
दशरथराजस्य सारथिः मन्त्री च । यथा,—
"तद्गच्छ त्वरितं सूत राजपुत्रं यशस्विनम् ।
राममानय भद्रं ते नात्र कार्य्या विचारणा ॥
अश्रुत्वा राजवचनं कथं गच्छामि भामिनि ।
तच्छ्रुत्वा मन्त्रिणो वाक्यं राजा मन्त्रिणमब्रवीत्
सुमन्त्र रामं द्रक्ष्यामि शीघ्रमानय सुन्दरम् ॥"
इति वाल्मीकीये रामायणे अयोध्याकाण्डे १४ सर्गः ॥

सुमित्रः, पुं, चतुर्व्विंशतितमसमानार्हत्पितृसर्गगत-विशार्हत्पिता । इति हेमचन्द्रः ॥ इक्ष्वाकुवंशीयबृहद्बलान्वयः सुरथराजपुत्रः । इति विष्णुपुराणे ४ अंशे २२ अध्यायः ॥

सुमित्रभूः, पुं, सगरः । स तु जिनानां चक्रवर्त्तिभेदः । इति हेमचन्द्रः ॥

सुमित्रा, स्त्री, दशरथराजपत्नी । सा तु लक्ष्मणशत्रुघ्नमाता । यथा, भट्टौ २ सर्गे ।
"प्रातिष्ट शत्रुघ्नसहोदरश्चेष्टमैत्रा सुमित्रा सह लक्ष्मणेन ॥"
तत्पर्य्यायः । लक्ष्मणप्रसूः २ । इति शब्दरत्नावली ॥

सुमुखं, क्ली, नखक्षतविशेषः । इति शब्दरत्नावली ॥ (शोभनं सुखमिति ।) उत्तमास्यञ्च ॥

सुमुखः, पुं, (शोभनं मुखं यस्य ।) गरुड़पुत्रः । (यथा, महाभारते । ५ । १०१ । २ ।
"वैनतेयसुतैः सूत षड्भिस्ततमिदं कुलम् ।
सुमुखेन सुनाम्ना च सुनेत्रेण सुवर्च्चसा ।
सुवचा पक्षिराजेन सुबलेन च मातले ! ॥")
ऋषिः । गणेशः । नागभेदः । इति शब्दरत्नावली ॥ (यथा, महाभारते । १।३५।१४।
"हरिद्रकः पिठरकः सुमुखः कौणपाशनः ।
कुठरः कुञ्जरश्चैव तथा नागः प्रभाकरः ॥")
पण्डितः । इति विश्वः ॥ शितार्ज्जकः । वनबर्ब्बरिका । बर्ब्बरः । इति राजनिर्घण्टः ॥

सुमुखः, त्रि, (सुष्ठु मुखं यस्य ।) मनोज्ञः । सुन्दराननः । इति शब्दरत्नावली ॥ (यथा, कादम्बर्य्याम् । ३ । २१ । १२ ।
"दृश्यते सुमुखः सौम्यः पौराणः सुदिन-क्रिमः ॥")

सुमुखसूः, पुं, (सुमुखस्य सूरुत्पत्तिर्यस्मात् ।) गरुड़ः । इति त्रिकाण्डशेषः ॥ उत्तमाननपुत्रपिता च ॥

सुमुखा, स्त्री, (शोभनं मुखं यस्याः । टाप् ।) सुन्दरी नारी । सुन्दरानना । इति भरतद्विरूपकोषः ॥ सुमुखा शाला । इति मुग्धबोधव्याकरणम् । दर्पणः । इति केचित् ॥

सुमुखी, स्त्री, (सुष्ठु मुखं यस्याः । "स्वाङ्गाच्चोपसर्ज्जनादसंयोगोपधात् ।" ४ । १ । ५४ । इति ङीप् ।) सुन्दरी नारी । सुन्दरानना । (यथा, कुमारे । १ । २६ ।
"उ मेति मात्रा तपसो निषिद्धा
पश्चादुमाख्यां सुमुखी जगाम ॥")

सुमुष्टिः, पुं, (मुष वधने + क्तिन् । शोभना मुष्टिर्यस्मात् ।) विषमुष्टिक्षुपः । इति राजनिर्घण्टः ॥

सुमूलः, पुं, (सुष्ठु मूलं यस्य ।) श्वेतशिग्रुः । इति राजनिर्घण्टः ॥

सुमूलकं, क्ली, (शोभनं मूलं यस्य । कप् ।) गर्ज्जरम् । इति राजनिर्घण्टः ॥

सुमूला, स्त्री, (शोभनं मूलं यस्याः ।) शालपर्णी पृश्निपर्णी । इति राजनिर्घण्टः ॥ सुन्दरमूलयुक्ते, त्रि ॥

सुमेखलः, पुं, (शोभना मेखला यस्मात् ।) मुञ्जः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—
"मुञ्जो मुञ्जातको बाणः स्थूलदर्भः सुमेखलः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
शोभनमेखलायुक्ते, त्रि ॥

सुमेधाः, [स्] स्त्री, (सुष्ठु मेधा अस्याः । "नित्यमसिच् प्रजामेधयोः ।" ५ । ४ । १२२ । इति असिच् ।) ज्योतिष्मती । (सुष्ठु मेधा यस्य ।) सुबुद्धौ, त्रि । इति मेदिनी ॥ (यथा, भागवते । ८ । ४ । ३ ।
"इमे अङ्गिरसः सत्रमासतेऽद्य सुमेधसः ॥")

सुमेरुः, पुं, (सुष्ठु मिनोति क्षिपति ज्योतींषि इति सु + मि + "मिपीभ्यां रुः ।" उणा० ४।१०१। रुः ।) पर्व्वतविशेषः । तत्पर्य्यायः । मेरुः २ हेमाद्रिः ३ रत्नसानुः ४ सुरालयः ५ । इत्यमरः । १ । १ ।५२॥ अमराद्रिः ६ भूस्वर्गः ७ । इति जटाधरः ॥ तद्विवरणं यथा,—
"एषां मध्ये इलावृतं नामाभ्यन्तरवर्षं यस्य नाभ्यामवस्थितः सर्व्वतः सौवर्णः कुलगिरिराजो मेरुर्द्वीपायामसमुन्नाहः कर्णिकाभूतः कुवलयकमलस्य मूर्द्धनि द्वात्रिंशत्सहस्रयोजनविततो मूले षोड़शसहस्रं तावतान्तर्भूम्यां प्रविष्टः ॥" ७ ॥
"मन्दरो मेरुमन्दरः सुपार्श्वः कुमुद इत्ययुतयोजनविस्तारोन्नाहा मेरोश्चतुर्दिशमवष्टम्भगिरय उपक्लृप्ताः ॥ ११ ॥
चतुर्षु एतेषु चूतजम्बूकदम्बन्यग्रोधाश्चत्वारः पादपप्रवराः पर्व्वतकेतव इवाधिसहस्रयोजनोन्नाहास्तावद्विटपविततयः शतयोजनपरिणाहाः ॥ १२ ॥
कूटाश्चत्वारः
यदुपस्पर्शिन ७५८
त्रिकानि भारतर्षभ धारयन्ति ॥ १३ ॥
देवोद्यानानि च भवन्ति चत्वारि
चैत्ररथं वैभ्राजकं सर्व्वतोभद्रमिति
"मेरोर्मूर्द्धनि भगवत आत्मयोनेर्मध्यत
कुलसं पुरीमयुतयोजनसाहस्रीं
शातकौम्भीं वदन्ति । २८ ॥
तामनुपरितो
यथारूपं तुरीयमानेन पुरोऽष्टावुपक्लृप्ताः
इति श्रीभागवते ५ स्कन्धे १६ ॥
"अस्यैवैन्द्रीं पुरीं पूर्व्वस्यां
नाम दक्षिणतो याम्या संयमनीं नाम
वारुणीं निम्लोचनीं नाम उत्तरतः
विभावरीं नाम ।" इति च तत्रैव
अपि च ।
"परिमण्डलस्तयोर्मध्ये मेरुः कनकपर्व्वतः ।
चातुर्व्वर्ण्यः स सौवर्णश्चतुरस्रः समुच्छ्रितः ।
नानावर्णः स पार्श्वे तु पूर्व्वान्ते श्वेत उच्यते ।
पीतन्तु दक्षिणं तत्र भृङ्गपत्रनिभं परम् ।
उत्तरं तस्य रक्तं वै इति वर्णसमन्वितः ।
मेरुस्तु शुशुभे दिव्यो राजवत् समधिष्ठितः ।
आदित्यतरुणाभासो विधूम इव पावकः ।
योजनानां सहस्राणि चतुरशीतिरुच्छ्रितः ।
प्रविष्टः षोड़शाधस्तादष्टाविंशतिविस्तृतः ।
विस्ताराात्त्रिगुणस्तस्य परिणाहः समन्ततः ।
स पर्व्वतो महादिव्यो दिव्यौषधिसमन्वितः ।
भुवनैरावृतः सर्व्वैर्जातरूपपरिष्कृतैः ।
तत्र देवगणाः सर्व्वे गन्धर्व्वोरगराक्षसाः ।
शैलराजे प्रमोदन्ते सर्व्वतोऽप्सरसां गणाः ।
स तु मेरुः परिवृतो भुवनैर्भूतभावनैः ।
यस्येमे चतुरो देशा नानापार्श्वेषु संस्थिताः ।
भद्राश्वो भारतश्चैव केतुमालश्च पश्चिमे ।
उत्तराश्चैव कुरवः कृतपुण्यप्रतिश्रयाः ।
विष्कम्भपर्व्वतास्तद्वन्मन्दरो गन्धमादनः ।
विपुलश्च सुपार्श्वश्च सर्व्वरत्नविभूषिताः ॥"
इति मात्स्ये ८५ अध्यायः ॥
किञ्च ।
"मध्ये पृथिव्यामद्रीन्द्रो भास्वान् मेरुर्हिरण्मयः ।
योजनानां सहस्राणि चतुरशीतिः समुच्छ्रितः ।
प्रविष्टः षोड़शाधस्ताद्धरण्यां धरणीधरः ।
तावत्प्रमाणा पृथिवी पर्व्वतस्य समन्ततः ।
तस्य शृङ्गत्रयं मूर्द्धि स्वर्गो यत्र प्रतिष्ठितः ।
नानाद्रुमलताकीर्णं नानाधातुविभूषितम् ।
मध्यगं पश्चिमं पूर्व्वं मेरोः शृङ्गाणि वै त्रयः ।
प्रयुतोच्छ्रितमात्राणि हि शृङ्गं तत्र मध्यमम् ।
मध्यमं स्फाटिकं शृङ्गं वैदूर्य्यमणिकाञ्चनम् ।
इन्द्रनीलमयं पूर्व्वं माणिक्यं पश्चिमं स्मृतम् ।
योजनानां सहस्राणि नियुतानि चतुर्द्दश ।
उच्छ्रितं मध्यमं शृङ्गं स्वर्गो यत्र प्रतिष्ठितः ।
प्रयुतान्तरितं शृङ्गं मूर्द्धि, चतुर्द्दश स्थितम् ।
पूर्व्वमध्यमशृङ्गाणां मध्यनं समम् च ।

पृष्ठो नाकपृष्ठो वा अप्सरःशान्तिनिर्वृतौ ।
नन्दोऽथ प्रमोदश्च स्वर्गाः शृङ्गे च मध्यमे ॥
अथ पौष्टिकश्चैव उपशोभनमन्मथौ ।
ह्लादः स्वर्गराजश्च स्वर्गाः शृङ्गे तु पश्चिमे ॥
प्रेमो निरहङ्कारः सौभाग्यश्चातिनिर्मलः ।
र्यैते द्विजश्रेष्ठ पूर्व्वशृङ्गे समर्थिताः ॥
... स्वर्गा निविष्टा मेरुमूर्द्धनि ॥
हेमादानकर्त्ता च यज्ञानां तपसां तथा ।
तेषु वसन्ति स्म जनाः क्रोधविवर्ज्जिताः ।
... चानन्दं प्रमोदं वह्निसाहसः ॥
प्रयाते सौम्यस्तु रणे चैवास्य निर्मलः ॥
शने तु संवासे मृतो गच्छेत्त्रिपिष्टपम् ।
याजी नाकपृष्ठमग्निहोत्री च निर्वृतिम् ॥
गकूपकर्त्ता च लभते पौष्टिकं द्विज ।
र्णदायी सौभाग्यं लभेत् स्वर्गं महातपाः ॥
तकाले महावह्निं प्रज्वालयति यो नरः ।
र्वसत्त्वहितार्थाय स्वर्गं चाप्सरसं लभेत् ॥
रणगोप्रदानेन निरहङ्कारमाप्नुयात् ।
मेदानेन शुद्धेन लभते शान्तिकं पदम् ॥
प्यदानेन शुद्धेन स्वर्गं गच्छति निर्मलम् ।
वदानेन पुण्याहं कन्यादानेन मङ्गलम् ॥
जैर्भस्तर्पणं कृत्वा दत्त्वा वस्त्राणि भक्तितः ।
तन्तु लभते स्वर्गं यत्र गत्वा न शोचति ॥
पिलागोप्रदानेन परार्द्धंचानुभूयते ।
हयस्य प्रदानेन स्वर्गं मन्मथमश्नुते ॥
पुमान् स सरित्स्नायी तिलधेनुप्रदस्तथा ।
सोपानहदाता च स्वर्गं तत्फलशोभनम् ॥
वायतनकर्त्तारो गुरुशुश्रूषणपरस्तथा ।
र्थयात्रापरश्चैव स्वर्गराजे महीयते ॥
काशभोजी यो मर्त्यो नक्तभोजी च नित्यशः ।
पवासी त्रिरात्राद्यैः शान्तस्वर्गं शुभं लभेत् ॥
रित्स्नायी जितक्रोधी ब्रह्मचारी दृढ़व्रतः ।
निर्मलं स्वर्गमाप्नोति तथा भूतहिते रतः ।
विद्यादानेन मेधावी निरहङ्कारमाप्नुयात् ॥
येन येन हि भावेन यद्यद्दानं प्रयच्छति ।
तत्तत् स्वर्गमवाप्नोति यद्यदिच्छति मानवः ॥
यस्तु सर्व्वाणि दानानि ब्राह्मणेभ्यः प्रयच्छति ।
संप्राप्य न निवर्त्तेत दिव्यं शान्तमनामयम् ॥
शृङ्गन्तु पश्चिमं यत्र ब्रह्मा तत्र स्थितः स्वयम् ।
पूर्व्वशृङ्गे स्वयं विष्णुर्मध्ये चैव शिवः स्थितः ॥"

इति वाराहे । ३० । १४—४५ ॥

अन्यत् कौर्म्मे ४२ । ४३ अध्याययोः वाराहे-रुद्रगीतासु च द्रष्टव्यम् ।

सुयोध ... उत्पलगन्धः, पुं, कर्पूरकः । इति शब्दचन्द्रिका ॥

...भः, पुं, देशविशेषः । इति शब्दरत्नावली ॥

सुयामुनः, पुं, (शोभनं अतिप्रियं यामुनं यमुना-सम्बन्धि जलं यस्य ।) विष्णुः । वत्सराजः । प्रासादः । पर्व्वतविशेषः । इति हेमचन्द्रः ॥ मेघविशेषः । इति मेदिनी ॥

सुयोधनः, पुं, (सुखेन युध्यतेऽसौ । सु+युध+युच् ।) दुर्य्योधनराजः । इति त्रिकाण्डशेषः ॥ यथा, महाभारते । १ । १५५ । ३४ ।

"शीघ्रं गच्छाम भद्रं ते न नो विद्यात् सुयोधनः ॥")

सुर, श ऐश्वर्य्ये । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-अक०-सेट् ।) दन्त्यादिः । श, सुरति सोरिता सुषोर सुसोर । भा, दीप्तिः । ऐश्वं ऐश्वर्य्यम् । इति दुर्गादासः ॥

सुरः, पुं, (सुष्ठु राति ददात्यभीष्टमिति । रा+कः । यद्वा, सुरति शोभते इति । सुर+इगुपधेति कः । यद्वा, सुनोतीति । षुञ् अभिषवे+ "सुसूधाञ्गृधिभ्यः क्रन् ।" उणा० २।२४ । क्रन् ।) देवः । इत्यमरः । १ । १ । ७ ॥ (यथा, रघुः । ३ । ५६ ।
"चुकोप तस्मै स भृशं सुरश्रियः
प्रसह्य केशव्यपरोपणादिव ॥"
सूर्य्यः । पण्डितः । इति केचित् ॥ (स्वरः । यथा, महाभारते । १२ । ८५ । ८१ ।
"लक्षणानि सुरास्तोमा निरुक्तं सुरपङ्क्तयः ॥")

सुरकरीन्द्रदर्पापहा, स्त्री, (सुरकरीन्द्रस्य ऐरावतस्य दर्पं हन्तीति । हन+डः । टाप् ।) गङ्गा । यथा,—
"भगीरथपथानुगा सुरकरीन्द्रदर्पापहा
महेशमुकुटप्रभा गिरिशिरःपताका सिता ।
सुरासुरनरोरगैरजभवाच्युतैः संस्तुता
विमुक्तिफलदायिनी भगवती स्वयं राजते ॥"
इति कल्किपुराणे ३४ अध्यायः ॥

सुरकारुः, पुं, विश्वकर्म्मा । सुराणां कारुः शिल्पीति बहुव्रीहिसमासनिष्पन्नः ॥

सुरलता, स्त्री, (सुरेण लता ।) गुड़ूची । इति राजनिर्घण्टः ॥

सुरक्तः, त्रि, (सु+रञ्ज+क्तः ।) शोभनरागयुक्तः । अतिशयरक्तविशिष्टः । अत्यनुरक्तः । इति केचित् ॥

सुरक्तकः, पुं, (सुरक्त+संज्ञायां स्वार्थे वा कन् ।) कोषाम्रः । स्वर्णगैरिकम् । इति राजनिर्घण्टः ।

सुरखण्डनिका, स्त्री, वीणाभेदः । इति शब्दरत्नावली ॥ सुरमण्डलिका इति पाठान्तरम् ॥

सुरगण्डः, पुं, रोगविशेषः । इति भूरिप्रयोगः ॥ राजगाँड़ इति भाषा ॥

सुरगुरुः, पुं, (सुराणां गुरुः ।) बृहस्पतिः । इति त्रिकाण्डशेषः ॥ (यथा, कथासरित्सागरे । ११५ । ७२ ।
"ततो मुक्ता रणं देवसैन्यं उपेन्द्रमनुद्रुते ।
निनाय ब्रह्मभवनं भीतः सुरगुरुः शचीम् ॥"
देवपूज्ये, त्रि । यथा, महाभारते । ११ । ३२ ।
"यस्मात् पितामहो जज्ञे प्रभुरेकः प्रजापतिः ।
ब्रह्मा सुरगुरुः स्थाणुर्म्मनुः कः परमेष्ठ्यथ ॥")

सुरग्रामणीः, पुं, (सुराणां ग्रामणीर्नेता ।) इन्द्रः । इति त्रिकाण्डशेषः ॥

सुरङ्ग, क्ली, (सुष्ठु रङ्गो यस्मात् ।) हिङ्गुलम् । पत्तङ्गम् । इति राजनिर्घण्टः ॥

सुरङ्गः, पु, (सुष्ठु रङ्गो यस्मात् ।) नागरङ्गः । इति राजनिर्घण्टः ॥ गर्त्तविशेषः । इति सुरङ्गयुक्-शब्ददर्शनात् ॥

सुरङ्गदं, क्ली, (सुष्ठु रङ्गं ददातीति । दा+कः ।) पत्तङ्गम् । इति राजनिर्घण्टः ॥

सुरङ्गधातुः, पुं, (सुष्ठु रङ्गो यस्मात् तादृशो धातुः ।) गैरिकम् । इति राजनिर्घण्टः ॥

सुरङ्गयुक्, [ज्] पुं, (सुरङ्गं युनक्तीति । युज्+क्विप् ।) सुरङ्गं कृत्वा अपहरति यः । यथा,—
"कुलभिलः सुरङ्गाहिरथयोः सुरङ्गयुक् ॥"
इति शब्दरत्नावली ।)

सुरङ्गा, स्त्री, सन्धिः । सौंध इति भाषा । इति हलायुधः ॥ कैवर्त्तिका । इति राजनिर्घण्टः ॥

सुरङ्गिका, स्त्री, मूर्व्वा । इति राजनिर्घण्टः ॥

सुरङ्गी, स्त्री, (सुष्ठु रङ्गो यस्याः । ङीष् ।) काकनासा । इति राजनिर्घण्टः ॥ रक्तशोभाञ्जनः । इति रत्नमाला ॥

सुरजःफलः, पुं, (सुष्ठु रजो यत्र तादृशं फलं यस्य ।) पनसवृक्षः । इति भूरिप्रयोगः ॥

सुरजनी, स्त्री, (सुशोभना रजनी ।) रात्रिः । इति शब्दचन्द्रिका ॥

सुरज्येष्ठः, पुं, (सुरेषु ज्येष्ठः ।) ब्रह्मा । इत्यमरः । १ । १ । १६ ॥

सुरञ्जनः, पुं, (सुष्ठु रञ्जयतीति । रञ्ज+णिच्+ल्युः ।) गुवाकवृक्षः । इति त्रिकाण्डशेषः ॥

सुरतं, क्ली, (सुष्ठु रतं रमणं यत्र ।) निधुवनम् । इति मेदिनी ॥ (यथा, कुमारे । १ । १० ।
"भवन्ति यत्रौषधयो रजन्या-
मतैलपूराः सुरतप्रदीपाः ॥")
सुरते वर्णनीयानि । यथा,—
सुरते सात्त्विका भावाः शीत्काराः कुट्मलायिता ।
काञ्चीकङ्कणमञ्जीररवाधरनखक्षतिः ॥"
इति कविकल्पलतायाम् १ स्तबके ७ कुसुमम् ॥
दयालौ, त्रि । इत्यमरटीका सारसुन्दरी । ३ । १ । १५ ॥ अत्रार्थे सुरतः इति पाठः साधुः ॥
क्रीड़ायुक्तः । इति उणादिवृत्तौ उज्ज्वलदत्तः । ५ । १४ ॥)

सुरततालो, स्त्री, (सुरतं तालयतीति । तल+णिच्+अण् । गौरादित्वात् ङीष् ।) दूती । शिरस्रक् । इति मेदिनी ॥

सुरता, स्त्री, (सुराणां भावः समूहो वा । सुर+तल् ।) देवत्वम् । इति मेदिनी ॥ (यथा, महाभारते । ५ । ८८ । १४ ।
"भवनं यस्य वादयन्ं यदेतत् सर्व्वमात्मनम् ।
यत् प्राप्य सुरतां प्राप्ताः सुराः सुरपतिः सह ॥")
सुरसमूहः । इति व्याकरणम् ॥ (सुष्ठु रता । अप्सरोविशेष । यथा, महाभारते । १ । १२३ । ६१ ।
"केशिनी च सुबाहुश्च सुरता सुरजा तथा ॥")

सुरतोषकः, पुं, (सुरान् तोषयतीति । तुष+णिच्+ण्वुल् ।) कौस्तुभमणिः । इति शब्दरत्नावली । देवप्रीतिकारके, त्रि ॥

सुरथ, पु, चन्द्रवंशीयराजपुत्र । यथा,—
मार्कण्डेये ।
"उदितः ... सुरथं नाम ... ।

स च कृत्वा राजसूयं द्विजराजो बभूव ह ॥
गुरुपत्न्याञ्च तारायां तद्बभूव बुधः सुतः ।
बुधपुत्त्रश्च चैत्रश्च तत्पुत्त्रः सुरथश्च सः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे । ५८ । ४—५ ॥
स च स्वारोचिषमन्वन्तरे कोलापुर्य्यधिपतिः ।
तेनादौ पृथिव्यां दुर्गापूजा कृता । तत्प्रसादेन
च असौ सावर्णिर्नाम मनुर्जातः । यथा,—
"कालान्तरे पूजिता सा सुरथेन महात्मना ।
राज्ञा मेधसशिष्येण मृण्मय्याञ्च सरित्तटे ॥
मेषादिभिश्च महिषैः कृष्णसारैश्च गण्डकैः ।
छागैर्मीनैश्च कुष्माण्डैः पक्षिभिर्बलिभिर्मुने ॥
वेदोक्तानि च दत्त्वैव उपचाराणि षोडश ।
धृत्वा च कवचं ध्यात्वा संपूज्य च विधानतः ॥
राजा कृत्वा परीहारं वरं प्राप यथेप्सितम् ।
मुक्तिं संप्राप वैश्यश्च संपूज्य च सरित्तटे ॥
तुष्टाव राजा वैश्यश्च साश्रुनेत्रः पुटाञ्जलिः ।
विससर्ज्ज मृण्मयीं तां गभीरे निर्म्मले जले ॥
दृष्ट्वा मृण्मयीं दृष्ट्वा जलधौतां नराधिपः ।
रुरोद तत्र वैश्यश्च ततः स्थानान्तरं ययौ ॥
त्यक्त्वा देहञ्च वैश्यश्च पुष्करे दुष्करं तपः ।
कृत्वा जगाम गोलोकं दुर्गादेवीवरेण च ॥
राजा ययौ स्वराज्यञ्च पूज्यो निष्कण्टकं बली
भोगञ्च बुभुजे भूपः षष्टिवर्षसहस्रकम् ॥
भार्य्यां स्वराज्यं संन्यस्य पुत्त्रे स कालयोगतः ।
मनुर्बभूव सावर्णिस्तप्त्वा च पुष्करे तपः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५४ अध्यायः ॥*॥
विस्तारस्तु दुर्गाशब्दे द्रष्टव्यः ॥
सुरदारु, क्ली, (सुरप्रियं दारु ।) देवदारु । इति
रत्नमाला ॥ (यथा, भागवते । ८।२।१३ ।
"पिचुमर्द्दैः कोविदारैः सरलैः सुरदारुभिः ॥")
सुरदीर्घिका, स्त्री, (सुराणां दीर्घिका ।) स्वर्ग-
गङ्गा । इत्यमरः । १ । १ । ५२ ॥
सुरदुन्दुभी, स्त्री, (सुराणां दुन्दुभीव आह्लाद-
कत्वात् ।) तुलसी । इति राजनिर्घण्टः ॥
सुरद्रुमः, पुं, (सुराणां द्रुमः ।) देवनलः । इति
राजनिर्घण्टः ॥ देवदारु च ॥ (कल्पवृक्षादिः ।
यथा, भागवते । १० । ३८ । २२ ।
"न तस्य कश्चिद्दयितः सुहृत्तमो
न चाप्रियो द्वेष्य उपेक्ष्य एव वा ।
तथापि भक्तान् भजते यथा तथा
सुरद्रुमो यद्वदुपाश्रितोऽर्थदः ॥")
सुरद्विट्, [ष्] पुं, सुरान् द्वेष्टीति । द्विष् +
(क्विप् ।) असुरः । इत्यमरः । १ । १ । १२ ॥
(यथा, रघुः । १० । १५ ।
"प्रणिपत्य सुरास्तस्मै शमयित्रे सुरद्विषाम् ।
अथैनं तुष्टुवुः स्तुत्यमवाङ्मनसगोचरम् ॥"
राहुः । यथा, तत्रैव । २ । ३९ ।
"उपस्थिता शोणितपारणा मे
सुरद्विषश्चान्द्रमसी सुधेव ॥"
तथाच बृहत्संहितायाम् । ८७ । २ ।
"षड्भिः पितरस्य मासैरष्टम यमे सुरद्विषो-
ऽन्दार्द्धात् ॥")
देवद्विपकः ॥ (यथा, भागवते । १ । ३ । २४ ।
"ततः कलौ संप्रवृत्ते संमोहाय सुरद्विषाम् ।
बुद्धो नाम्नाञ्जनसुतः कीकटेषु भविष्यति ॥")
सुरद्विपः, पुं, (सुराणां द्विपः ।) देवहस्ती । इति
केचित् ॥ (ऐरावतः । यथा, रघुः । ३ । ५५ ।
"हरेः कुमारोऽपि कुमारविक्रमः
सुरद्विपास्फालनकर्कशाङ्गुलौ ।
भुजे शचीपत्रविशेषकाङ्किते
स्वनामचिह्नं निचखान सायकम् ॥")
सुरधनुः, [स्] क्ली, (सुरस्य धनुः ।) इन्द्रधनुः ।
इति जटाधरः ॥ (यथा, किराते ।७।१६ ।
"यातस्य ग्रथितनरङ्गसैकताभे
विच्छेदं विपयसि वारिवाहजाले ।
आतेनुस्त्रिदशवधूजनाङ्गभाजां
सन्धानं सुरधनुषः प्रभामणीनाम् ॥")
सुरधूपः, पुं, (सुरप्रियो धूपः ।) रालः । इति
राजनिर्घण्टः ॥
सुरनदी,, स्त्री, (सुराणां नदी ।) गङ्गा । इति
भूरिप्रयोगः ॥ (यथा, महाभारते । ६।८०।५।
"गङ्गायाः सुरनद्या वै स्वादुभूतं यथोदकम् ।
महोदधिगुणाभ्यासात् लवणत्वं नियच्छति ॥")
सुरनन्दा, स्त्री, (सुरान् नन्दयतीति । नन्द +
णिच् + अण् । टाप् ।) नदीविशेषः । इति
शब्दरत्नावली ॥
सुरनालः, पुं, (सुरप्रियं नालमस्य ।) देवनलः ।
इति राजनिर्घण्टः ॥
सुरनिम्नगा, स्त्री, सुराणां निम्नगा ।) गङ्गा ।
इत्यमरः । १ । १० । ३१ ॥ (यथा, कथा-
सरित्सागरे । ५२ । ३४२ ।
"त्यक्त्वा सर्व्वं तनुं त्यक्ष्यंस्तपसा सुरनिम्नगाम् ॥")
सुरनिर्गन्धं, क्ली, पत्रकम् । इति राजनिर्घण्टः ॥
सुरपतिः, पुं,(सुराणां पतिः ।) इन्द्रः । इत्यमरः
१।१।४६॥ (यथा, महाभारते ।७।१०१ । १८ ।
"पुनर्द्ददौ सुरपतिर्म्मह्यं वर्म्म सुमेघहम् ॥")
सुरपथं, क्ली, (सुराणां पन्थाः । समासे अः ।)
आकाशम् । इति हेमचन्द्रः ॥
सुरपर्णं, क्ली, (सुरप्रियं पर्णमस्य ।) ओषधि-
विशेषः । माचीपत्री इति ख्यातः । तत्पर्य्यायः ।
देवपर्णम् २ वीरपर्णम् ३ सुगन्धिकम् ४ माची-
पत्रम् ५ सूक्ष्मपत्रम् ६ देवार्हम् ७ गन्धपत्र-
कम् ८ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् ।
कृमिश्वासहिक्कानिलकफकासनाशित्वम् । दीपनत्वम्
बल्यत्वम् । वातहितत्वञ्च । इति राजनिर्घण्टः ॥
सुरपर्णिकः, पुं, (सुरप्रियं पर्णमस्यास्तीति ।
ठन् ।) सुरपुन्नागः । इति राजनिर्घण्टः ॥
सुरपर्णिका, स्त्री, (सुरपर्णी । संज्ञायां कन् ।)
पुन्नागः । इति हेमचन्द्रः ॥
सुरपर्णी, स्त्री, (सुरप्रियं पर्णमस्याः । ङीप् ।)
पलाशी । इति राजनिर्घण्टः ।
सुरपादपः,पुं,(सुराणां पादपः ।)कल्पवृक्षः । देव-
तरुशब्दस्वरसात् ॥ (यथा, भागवते ।८।५।१७।
"चैत्रकीचकवेणूनां गुल्मानि सुरपादपान् ॥")
सुरपुन्नागः, पुं, (सुरप्रियः पुन्नागः ।
वृक्षविशेषः । तत्पर्य्यायः । ...
सुरपर्णिकः ४ सुरताङ्गः ५ । अस्य
पुन्नागवत् । इति राजनिर्घण्टः ॥
सुरपुरी, स्त्री, (सुरस्य पुरी ।)
इति त्रिकाण्डशेषः ॥
सुरप्रियः, पुं, (सुराणां प्रियः ।
वृक्षः । इति राजनिर्घण्टः । इन्द्रः ।
इति केचित् ॥ देवप्रिये, त्रि ॥
सुरप्रिया, स्त्री,(सुराणां प्रिया ।)
रम्भा । इति राजनिर्घण्टः ॥ ...
भागवते । ८ । १५ । १८ ।
...
पाण्डरैश्च ...
सुरभि, क्ली, (सुष्ठु रमतेऽत्रेति ।
इन् ।) स्वर्णम् । गन्धाश्म । इति
वली ॥ सुन्दरः । साधुगन्धः । ...
सुरभिः,पुं, (सु + रभ + इन् ।) सुगन्धि ...
मरः । १ । ५ । ११ ॥ चम्पकः ।
जातीफलवृक्षः । इति मेदिनी ॥ ...
कदम्बवृक्षः । कणगुग्गुलु ।
बकुलवृक्षः । रालः । इति
चैत्रमासः । धीरः । इति धरणि ।
इति शब्दरत्नावली ॥
सुरभिः, स्त्री, (सु + रभ + इन् ।) ...
मातृभेदः । सुरा । गौः । ...
कान्तरे सुरास्थाने मुरा इति पाठः । ...
वनमालिका । तुलसी । माची । इति
निर्घण्टः ॥ पृथिवी ।
(यथा, रघुः । १ । ८१ ।
"सुतां तदीयां सुरभेः कृत्वा प्रतिनिधिं शुचिः ।
आराधय सपत्नीकः
तस्या उत्पत्त्यादिर्यथा,—
नारद उवाच ।
"सा का वा सुरभी देवी ...
तज्जन्मचरितं ...
श्रीनारायण उवाच ।
गवामधिष्ठातृदेवी गवामाद्या गवां प्रसूः ।
गवां प्रधाना सुरभी गोलोके सा समुद्भवा ।
सर्व्वादिसृष्टिकथनं कथयामि निशामय ।
बभूव येन तज्जन्म पुरा वृन्दावने वने ।
एकदा राधिकानाथो राधया सह कौतुकी ।
गोपाङ्गनापरिवृतः पुण्यं वृन्दावनं ययौ ।
सहसा तत्र रहसि विजहार स कौतुकी ।
बभूव क्षीरपानेच्छा तदा स्वेच्छामयस्य च ।
ससृजे सुरभिं देवीं लीलया वामपार्श्वतः ।
वत्सयुक्तां दुग्धवतीं वत्सो नाम्ना मनोरथः ।
दृष्ट्वा सवत्सां सुदामा रत्नभाण्डे दुदोह च ।
क्षीरं सुधातिरिक्तञ्च जन्ममृत्युजरापहम् ।
तदुष्णञ्च पयः स्वादु पपौ गोपीपतिः स्वयम् ।
सरो बभूव पयसा भाण्डविस्रंसनेन च ।
दैर्घ्ये च विस्तृते चैव परितः शतयोजनम् ।

सुप्रसिद्धश्च स च क्षीरसरोवरः ॥
गोपिकानाञ्च राधायाः क्रीड़ावापी बभूव सा ।
रत्नेन खचिता तूर्णं भूता वापीश्वरेच्छया ॥
बभूवुः कामधेनूनां सहसा लक्षकोटयः ।
तावन्तो हि च वत्साश्च सुरभीलोमकूपतः ॥
तासां पुत्त्राः प्रपौत्त्राश्च सम्बभूवुरसंख्यकाः ।
कथिता च गवां सृष्टिस्तया च पूजितं जगत् ॥
पूजाञ्चकार भगवान् सुरभ्याश्च पुरा मुने ।
ततो बभूव तत्पूजा त्रिषु लोकेषु दुर्लभा ॥
दीपान्वितापरदिने श्रीकृष्णस्याज्ञया हरेः ।
बभूव सुरभीपूजा धर्म्मवक्त्रादिति श्रुतम् ॥
ध्यानं स्तोत्रं मूलमन्त्रं यद्यत् पूजाविधिक्रमम् ।
वेदोक्तञ्च महाभाग निबोध कथयामि ते ॥
ॐ सुरभ्यै नम इति मन्त्रस्तस्याः षड़क्षरः ।
सिद्धो लक्षजपेनैव भक्तानां कल्पपादपः ॥
ध्यानं यजुर्व्वेदोक्तं तत् पूज्यञ्च सर्व्वसम्मतम् ।
ऋद्धिदं वृद्धिदञ्चैव मुक्तिदं सर्व्वकामदम् ॥
लक्ष्मीस्वरूपां परमां राधासहचरीं पराम् ।
गवामधिष्ठातृदेवीं गवामाद्यां गवां प्रसूम् ॥
पवित्ररूपां पूज्याञ्च भक्तानां सर्व्वकामदाम् ।
यया पूतं सर्व्वविश्वं तां देवीं सुरभीं भजे ॥
घटे वा धेनुशिरसि बद्धस्तम्भे गवामपि ।
शालग्रामे जले वाग्नौ सुरभीं पूजयेद्द्विजः ॥
दीपान्वितापरदिने पूर्व्वाह्णे भक्तिसंयुतः ।
यः पूजयेच्च सुरभिं स च पूज्यो भवेद्भुवि ॥
एकदा त्रिषु लोकेषु वाराहे विष्णुमायया ।
क्षीरं जहार सहसा चिन्तिताश्च सुरादयः ॥
ते गत्वा ब्रह्मलोकञ्च ब्रह्माणं तुष्टुवुस्तदा ।
तदाज्ञया च सुरभीं तुष्टाव पाकशासनः ॥

महेन्द्र उवाच ।

नमो देव्यै महादेव्यै सुरभ्यै च नमो नमः ।
गवां बीजस्वरूपायै नमस्ते जगदम्बिके ॥
नमो राधाप्रियायै च पद्मांशायै नमो नमः ।
नमः कृष्णप्रियायै च गवां मात्रे नमो नमः ॥
कल्पवृक्षस्वरूपायै सर्व्वेषां सततं परम् ।
श्रीदायै धनदायै च वृद्धिदायै नमो नमः ।
यशोदायै कीर्त्तिदायै धर्म्मदायै नमो नमः ॥
स्तोत्रश्रवणमात्रेण तुष्टा हृष्टा जगत्प्रसूः ।
आविर्ब्बभूव तत्रैव ब्रह्मलोके सनातनी ॥
महेन्द्राय वरं दत्त्वा वाञ्छितञ्चातिदुर्लभम् ।
जगाम सा च गोलोकं ययुर्देवादयो गृहम् ॥
बभूव विश्वं सहसा दुग्धपूर्णञ्च नारद ।
दुग्धाद्घृतं ततो यज्ञस्ततः प्रीतिः सुरस्य च ॥
इदं स्तोत्रं महापुण्यं भक्तियुक्तश्च यः पठेत् ।
स गोमान् धनवांश्चैव कीर्त्तिमान् पुत्त्रवान् भवेत् ॥
स स्नातः सर्व्वतीर्थेषु सर्व्वयज्ञेषु दीक्षितः ।
इह लोके सुखं भुक्त्वा यात्यन्ते कृष्णमन्दिरम् ॥
सुचिरं निवसेत्तत्र करोति कृष्णसेवनम् ।
न पुनर्भवनं तस्य ब्रह्मपुत्त्र भवे भवेत् ॥"
इति श्रीब्रह्मवैवर्त्ते प्रकृतिखण्डे सुरभ्युपाख्यानं नाम ४७ अध्यायः ॥

सुरभिः, त्रि, (सु+रभ+इन् ।) सुगन्धिः । (यथा, मनुः । ३ । २०९ ।
"उपवेश्य तु तान् विप्रानासनेष्वजुगुप्सितान् ।
गन्धमाल्यैः सुरभिभिरर्च्चयेद्दैवपूर्व्वकम् ॥")
कान्तम् । इति मेदिनी ॥ (यथा, रघुः ।२।२।
"निवर्त्त्य राजा दयितां दयालु-
स्तां सौरभेयीं सुरभिर्यशोभिः ।
पयोधरीभूतचतुःसमुद्रां
जुगोप गोरूपधरामिवोर्व्वीम् ॥")
धीरः । विख्यातः । इति धरणिः ॥

सुरभिका, स्त्री, (सुरभि+स्वार्थे कन् ।) स्वर्णकदली । इति राजनिर्घण्टः ॥

सुरभिगन्धिः, त्रि,(सुरभिर्गन्धो यस्य । "गन्धस्येदुत्पूतिसुसुरभिभ्यः ।" ५ । ४ । १३५ । इति इकारः ।) शोभनगन्धयुक्तः । इति केचित् ॥

सुरभित्रिफला,स्त्री, (सुरभिः सुगन्धिस्त्रिफला।) सुगन्धत्रिफला । इति राजनिर्घण्टः ॥

सुरभित्वक्, [च्] स्त्री, (सुरभिः त्वक् यस्याः ।) वृहदेला । इति राजनिघण्टः ॥

सुरभिदारुः, पुं, (सुरभि सुगन्धि दारु यस्य । सरलद्रुमः । इति राजनिर्घण्टः ॥

सुरभिपत्रा, स्त्री (सुरभि पत्रं यस्याः ।) जम्बूवृक्षः । राजजम्बूः । इति-राजनिर्घण्टः ॥

सुरभिबाणः, पुं, (सुरभिः साधुगन्धः वकुलादिपुष्पं वा बाणो यस्य ।) कामदेवः । इति केचित् ॥

सुरभिवल्कलं, क्ली, (सुरभि सुगन्धि वल्कलं यस्य ।) गुड़त्वक् । इति शब्दरत्नावली ॥

सुरभिस्रवा,स्त्री,(सुरभिः सुगन्धिः स्रवो निर्य्यासो यस्याः ।) सल्लकी । इति राजनिर्घण्टः ॥

सुरभी, स्त्री, (सुरभि+वा ङीप् ।) सुगन्धिः । इत्यमरटीकायां भरतः । २ । ४ । १२३ ॥ शल्लकी । इति शब्दचन्द्रिका ॥ (यथा,—
"शल्लकी गजभक्ष्या च सुवहा सुरभी रसा ।
महेरुणा कुन्दरुकी वल्लकी च बहुस्रवा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) कृत्स्नेकारान्तसुरभिशब्दार्थोऽप्यत्र ॥ गोमाता । यथा,—
"सा का वा सुरभी देवी गोलोकादागता च या ।
तज्जन्मचरितं ब्रह्मन् श्रोतुमिच्छामि तत्त्वतः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४७ अध्यायः ॥ (कृत्स्नेकारान्तसुरभिशब्देऽस्याः विशेषविवरणं ज्ञेयम् ॥) अथ गोयात्राप्रवेशविक्रयादिनम् । तत्र तिथयः अमावस्याष्टमीचतुर्द्दशीवर्ज्जिताः तत्र नक्षत्राणि रोहिणी पूर्व्वफल्गुनी पूर्व्वाषाढ़ा पूर्व्वभाद्रपद् उत्तरफल्गुनी उत्तराषाढ़ा उत्तरभाद्रपद् श्रवणा भरणी चित्रा एतद्भिन्नानि । योगाः व्यतीपातवैधृतिभिन्नाः । तत्र वाराः मङ्गलवारभिन्नाः । इति ज्योतिस्तत्त्वम् ॥

सुरभीरसा, स्त्री,शल्लकीवृक्षः । इत्यमरटीकायां मधुरेशः । २ । ४ । १२३ ॥

सुरभूरुहः, पुं, (सुराणां भूरुहः ।) देवदारुः । इति भावप्रकाशः ॥ (कल्पवृक्षादिश्च ॥)

सुरमृत्तिका,स्त्री,(सुरप्रिया मृत्तिका ।) तुवरी । इति राजनिर्घण्टः ॥

सुरमेदा, स्त्री,(सुरप्रियो मेदो यस्याः ।) महामेदा । इति राजनिर्घण्टः ॥ (महामेदाशब्देऽस्या विशेषो ज्ञातव्यः ॥)

सुरर्षिः, पुं, (सुरश्चासौ ऋषिश्चेति ।) देवर्षिः । इत्यमरः । १ । १ । ५१ ॥ स तु नारदतुम्बुरुकोलाहलादिः । यथा । ब्रह्मर्षिदेवर्षिराजर्षिमहर्षिपरमर्षिकाण्डर्षिश्रुतिभेदात् सप्तप्रकारऋषयस्तत्र नारदाद्याः सुरर्षय उक्ता इति भरतः ॥ (यथा, भागवते । ४ । २४ । ६३ ।
"महानहं खं मरुदग्निवार्धराः
सुरर्षयो भूतगणा इदं यतः ॥"
तथाच महाभारते । १ । १ । २२७ ।
"इति राज्ञां चतुर्व्विंशन्नारदेन सुरर्षिणा ।
पुत्त्रशोकाभितप्ताय पुरा शैब्याय कीर्त्तितम् ॥")

सुरलता, स्त्री, (सुरप्रिया लता ।) महाज्योतिष्मती । इति राजनिर्घण्टः ॥

सुरला, स्त्री, (सुरान् लातीति । ला+कः ।) गङ्गा । इति हारावली ॥ नदीविशेषः । इति शब्दचन्द्रिका ॥

सुरलासिका, स्त्री, (सुरानपि लासयति आह्लादयतीति । लस्+णिच्+ण्वुल् । टापि अत इत्त्वम् ।) वंशीवाद्यम् । यथा,—
"सालेयिका च सालेयी सालिका सुरलासिका ॥",
इति शब्दरत्नावलीति केचित् ॥

सुरलोकः, पुं, (सुराणां लोकः ।) स्वर्गः । इत्यमरः । १।१।६॥ (यथा, भागवते ।७।१०।१३।
"कीर्त्तिं विशुद्धां सुरलोकगीतां
विहाय मामेष्यति मुक्तबन्धः ॥")

सुरवर्त्म,[न्] क्ली,(सुराणां वर्त्म ।) आकाशम् । इत्यमरः । १ । २ । १ ॥

सुरवल्लभा,स्त्री,(सुराणां वल्लभा ।) श्वेतदूर्व्वा । इति राजनिर्घण्टः ॥

सुरवल्ली, स्त्री, (सुराणां वल्ली ।) तुलसी । इति राजनिर्घण्टः ॥

सुरवैरी, [न्] पुं, (सुराणां वैरी ।) असुरः ॥ इति शब्दरत्नावली ॥

[इन्द्रायुधः ॥

सुरशत्रुः, पुं, (सुराणां शत्रुः ।) असुरः । इति

सुरशाखी,[न्]पुं,(सुराणां शाखी ।)कल्पवृक्षः । इति जटाधरः ॥

सुरश्रेष्ठा, स्त्री, (सुरेषु श्रेष्ठा ।) ब्राह्मी । इति राजनिर्घण्टः ॥

सुरसं, क्ली, (शोभनो रसो यस्य ।) बोलम् । त्वचम् । गन्धतृणम् इति राजनिर्घण्टः ॥ तुलसी । इति मेदिनी ॥

सुरसः, पुं,(शोभनो रसो यस्य ।) सिन्धुवारः । इति शब्दरत्नावली ॥ (अस्य पर्य्यायो यथा,—
"इन्द्राणी चेन्द्रसुरसो निर्गुण्डी सिन्धुवारकः ॥"
इति वैद्यकरत्नमालायाम् ॥)

मोचरस: । इति राजनिर्घण्ट: ॥ (पीतशाल: । अस्य पर्य्यायो यथा,—
"सुरसो बीजकश्चैव पीतशालोऽभिधीयते ॥"
इति गारुडे २०८ अध्याय: ॥
तुलसीविशेष: । अस्य गुणा यथा,—
"हिक्काकासविषश्वासपार्श्वशूलविनाशन: ।
पित्तकृत्कफवातघ्न: सुरस: पूतिगन्धनुत् ॥"
इति चरके सूत्रस्थाने । २७ अध्याय: ॥
"कफानिलविषश्वासकासदौर्गन्ध्यनाशन: ।
पित्तकृत् पार्श्वशूलघ्न: सुरस: समुदाहृत: ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्याय: ॥)
सुरस:, त्रि,(शोभनो रसो यस्य ।) स्वादु: । इति मेदिनी ॥ सुन्दररसयुक्तश्च । (यथा, बृहत्संहितायाम् । ५४ । १०२ ।
"तस्यां प्रभूतं सुरसञ्च तोयं
कृष्णाथवा यत्र च रक्तमृत् वा ॥")
सुरसद्म, [न्] क्ली,(सुराणां सद्म ।) स्वर्ग: । इति हलायुध: ॥ (देवगृहम् । यथा, कथासरित्सागरे । ८३ । ८३ ।
"एत मोर्च्च प्रयातेति वदन्त्यामिव दूरत: ।
वाताक्षिप्तसमुत्क्षिप्तै: सुरसद्मध्वजांशुकै: ॥")
सुरसम्भवा, स्त्री, (सुरप्रिय: सम्भवो यस्या: ।) आदित्यभक्ता । इति राजनिर्घण्ट: ॥
सुरसरित्, स्त्री,(सुराणां सरित् ।) गङ्गा । इति हलायुध: ॥ (यथा, रघु: । २ । ७५ ।
"सुरसरिदिव तेजो वह्निनिष्ठ्यूतमैशम् ॥")
सुरसर्षपक:, पुं,(सुरप्रिय: सर्षप: । तत: कन् ।) देवसर्षप: । इति राजनिर्घण्ट: ॥
सुरसा, स्त्री, (शोभनो रसो यस्या: ।) तुलसी । यथा । सुरसा स्त्री तु पर्णासे । इति शब्दरत्नावली ॥ पर्णासि तु नपुंसकम् । इति मुद्राङ्कितमेदिनी ॥ पर्णासे पुंनपुंसकम् । इति हस्तलिखितमेदिनी ॥ सुरसस्तु त्रिषु स्वादौ पर्णासे न नपुंसकम् । इति च कस्याञ्चिन्मेदिन्यां पाठ: ॥०॥ रास्ना । इत्यमर: । २ । ४ । ११४ ॥ सिन्धेया । इति शब्दचन्द्रिका ॥ ब्राह्मी । इति रत्नमाला ॥ महाशतावरी । इति राजनिर्घण्ट: ॥ दुर्गा । इति केचित् ॥ नागमाता । इति मेदिनी ॥ यथा,—
"ततो देवा: सगन्धर्व्वा: सिद्धाश्च परमर्षय: ।
अब्रुवन् सूर्य्यसङ्काशां सुरसां नागमातरम् ॥
अयं वातात्मज: श्रीमान् प्लवते सागरोपरि ।
हनूमान्नाम तस्य त्वं मुहूर्त्तं विघ्नमाचर ॥
राक्षसं रूपमास्थाय सुघोरं पर्व्वतोपमम् ।
दंष्ट्राकरालं पिङ्गाक्षं वक्त्रं कृत्वा नभस्पृशम् ॥
बलमिच्छामहे ज्ञातुं भूयश्चास्य पराक्रमम् ।
त्वां विजेष्यत्युपायेन विषादं वा गमिष्यति ॥"
इति वाल्मीकीये रामायणे सुन्दराकाण्डे १ सर्ग: ॥
मनोभिद: । इति श्रीभागवते ५ स्कन्धे १८ अध्याय: ॥ (अप्सरोविशेष: । यथा, महाभारते । १ । १२३ । ६० ।
"पुण्डरीका सुगन्धा च सुरसा च प्रमाथिनी ।"

राक्षसीविशेष: । तद्विषयको मन्त्रो यथा,—
"हिमवदुत्तरे कूले सुरसा नाम राक्षसी ।
तस्या नूपुरशब्देन विशल्या गुर्व्विणी भवेत् ॥"
इति हारीते चिकित्सितस्थाने ५१ अध्याये ॥)
सुरसाष्ट, पुं, द्रव्यगणविशेष: । यथा,—
"निर्गुण्डी तुलसी ब्राह्मी बृहती कण्टकारिका
पुनर्नवेति मुनिभि: सुरसाष्ट: प्रकीर्त्तित: ॥"
इति शब्दचन्द्रिका ॥
सुरसिन्धु:, पुं, (सुराणां सिन्धु: ।) गङ्गा । इति केचित् ॥ (यथा, कथासरित्सागरे । १८ । ६२ ।
"निवसन्ति च देशेऽपि सुरसिन्धुसमाश्रिते ॥")
सुरसुन्दरी, स्त्री, (सुराणां सुन्दरी रमणी सुरेषु सुन्दरी इति वा ।) अप्सरा: । दुर्गा । इति केचित् ॥ योगिनीविशेष: । तद्विवरणं योगिनीशब्दे द्रष्टव्यम् ॥ (सुरस्त्री । यथा, किराते । ५ । २८ ।
"अस्मिन् रतिश्रममुदश्च सरोजवाता:
स्मर्त्तुं दिशन्ति न दिव: सुरसुन्दरीभ्य: ॥")
सुरा, स्त्री, (सु अभिषवे + क्रन् । स्त्रियां टाप् । इत्युणादिवृत्तौ उज्ज्वल: । २ । २४ । यद्वा, सुष्ठु रायन्त्यनयेति । सु + रै शब्दे + "आतश्चोपसर्गे । ३ । ३ । ११६ । इत्यङ् । टाप् ।) चषकम् । मद्यम् । इति मेदिनी ॥ अस्या: पर्य्यायगुणादि मदिराशब्दे मद्यशब्दे च द्रष्टव्यम् । सुराया विशेषगुणा यथा,—
"कृशानां सक्तमूत्राणां ग्रहण्यर्शोविकारिणाम्
सुरा प्रशस्ता वातघ्नी स्तन्यरक्तक्षयेषु च ॥"
इति राजवल्लभ: ॥
तत्पानप्रायश्चित्तं यथा,—
"ब्रह्मघ्नश्च सुरापश्च स्तेयी च गुरुतल्पग: ।
सेतुं दृष्ट्वा विशुध्यन्ते तत्संयोगी च पञ्चम: ।
ततो धेनुशतं दद्यात् ब्राह्मणानान्तु भोजनम् ॥"
इति गारुडे २२६ अध्याय: ॥ * ॥
तत्पाने शुक्राचार्य्यशापो यथा,—
"सुरापानाद्वञ्चना प्रापयित्वा
संज्ञानाशं चैनमस्यातिघोरम् ।
दृष्ट्वा कचञ्चापि तथापि रूपं
पीतं तथा सुरया मोहितेन ॥
समन्युरुत्थाय महानुभाव-
स्तदोशना विप्रहितं चिकीर्षु: ।
काव्य: स्वयं वाक्यमिदं जगाद
सुरापानं प्रति वै जातमन्यु: ॥
यो ब्राह्मणोऽद्यप्रभृतीह कश्चित्
मोहात् सुरां पास्यति मन्दबुद्धि: ।
अपेतधर्म्मा ब्रह्महा चैव स स्यात्
अस्मिन् लोके गर्हित: स्यात् परे च ॥
मया चेमां विप्रधर्म्मोक्तसीमां
मर्य्यादां वै स्थापितां सर्व्वलोके ।
सन्तो विप्रा: शुश्रुवांसो गुरूणां
देवा दैत्याश्चोपशृण्वन्तु सर्व्वे ॥"
इति महाभारते । १ । ७६ । ५८—६२ ॥
ब्राह्मणक्षत्त्रियवैश्यानां विविधसुरापानप्रायश्चित्तादि यथा,—

"सुरां पीत्वा द्विजो मोहादग्निवर्णां ...
तया स्वकाये निर्दग्धे मुच्यते ...
गोमूत्रमग्निवर्णं वा पिबेदुदकमेव वा ।
पयो घृतं वा मरणाद्गोशकृद्रसमेव वा ।
कणान् वा भक्षयेदब्दं ...
सुरापानापनुत्त्यर्थं बालवासा जटी ध्वजी ।
सुरा वै मलमन्नानां पाप्मा च मलमुच्यते ।
तस्माद्ब्राह्मणराजन्यौ वैश्यश्च ...
गौडी पैष्टी च माध्वी च विज्ञे- ...
यथैवैका तथा सर्व्वा न ...
यक्षरक्ष:पिशाचान्नं मद्यं मांसं सुरासवम् ।
तद्ब्राह्मणेन नात्तव्यं देवानामश्नता हवि: ॥
अमेध्ये वा पतेन्मत्तो वैदिकं वाप्युदाहरेत् ।
अकार्य्यमन्यत् कुर्य्याद्वा ...
यस्य कायगतं ब्रह्म मद्येनाप्लाव्यते सकृत् ।
तस्य व्यपैति ब्राह्मण्यं शूद्रत्वञ्च स गच्छति ॥
एषा विचित्राभिहिता सुरापानस्य निष्कृति: ...
इति मानवे ११ । ९१—...
सौत्रामणियज्ञेऽपि तत्पाननिषेधो यथा,—
"यद्घ्राणभक्षो विहित: सुराया-
स्तथा पशोरालभनं न हिंसा ।
एवं व्यवाय: प्रजया न रत्यै
इमं विशुद्धं न विदु: स्वधर्म्मम् ॥"
इति श्रीभागवते । ११ । ५ । १३ ।
"यस्मात् सुराया घ्राणभक्ष
विहित: न पानं तथा
विहितं न तु हिंसा । अतो
मुख्यार्थ: । व्यवायोऽपि प्रजया
रत्यै । अतो मनोरथवादिन इमं
न विदुरिति ।" इति तट्टीका ॥
अन्यत् प्रायश्चित्तशब्दे द्रष्टव्यम् ॥ * ॥ सुराया वर्णनीयानि यथा,—
सुरापाने विकलता स्खलनं वचने मतौ ।
लज्जा मानच्युति: प्रेमाधिक्यं रक्तायता दृशो: ॥
इति कविकल्पलतायां १ स्तबके २ कुसुमम् ॥
सुरा:, [रै] पुं स्त्री, धनवान् । सु शोभनो रा: धनं यस्येति बहुव्रीहौ कृते रैशब्दस्य रूपं निष्पन्न: ॥
सुराकर:, पुं, (सुराया आकर: ।) नारिकेलवृक्ष: । इति केचित् । मद्योत्पत्तिस्थानम् । यथा,—
"आकरा: शुचय: सर्व्वे वर्जयित्वा सुराकरम् ।"
इति शुद्धितत्त्वे बौधायनवचनम् ।
सुराङ्गना, स्त्री, (सुराणामङ्गना ।) देवस्त्री । अप्सरा: ॥ इति केचित् । यथा,—
"सुरद्रुमूलमण्डपे विचित्ररत्ननिर्म्मिते
लसद्वितानभूषिते सलील विभ्रमालसम् ।
सुराङ्गनाभवल्लभीकरप्रपञ्च चामर-
स्फुरत्समीरवीजितं सदाश्रितं भजामि तम् ॥"
इति छन्दोमञ्जर्य्याम् २ स्तबक: ॥
सुराचार्य्य:, पुं, (सुराणामाचार्य्य: ।) बृहस्पति: । इत्यमर: । १ । २ । २४ ॥

…राजकः, पुं, सुष्ठु राजते इति । राज + ण्वुल् ।) …हराजः । इति शब्दमाला ॥

…राजा, [न्] पुं, (सुष्ठु पूजितो राजा । “न …समात् ।” ५।४।६८ । इति न टच् ।) शोभनो …राजा । इति मुग्धबोधव्याकरणम् ॥ (सुष्ठु- …राजा यस्य । सुन्दरनृपतियुक्ते देशादौ, त्रि । …यथा,—

“…सुराज्ञि देशे राजन्वान् स्यात्ततोऽन्यत्र राजवान् ॥”

इत्यमरः । २ । १३ ॥)

…राजीवी, [न्] पुं, सुरया जीवतीति । जीव + …णिनिः ।) शौण्डिकः । यथा,—

“…कल्यपालः सुराजीवी शौण्डिको मण्डहारकः ।
…पारिवासः पानवणिक् ध्वजो ध्वज्यासुतीवलः ॥”

इति हेमचन्द्रः ॥

…यथा याज्ञवल्क्यः । १ । १६४ ।

“…चैलधावसुराजीविसहोपपतिवेश्मनाम् ॥”)

…रापः, (त्रि, सुरां पिवतीति । पा + कः ।) …सुरापानकर्त्ता । यथा,—

“…ब्रह्महा जायते यक्ष्मी सुरापः श्यावदन्तकः ।
…सुवर्णहारी कुनखी दुश्चर्म्मा गुरुतल्पगः ॥”

इति प्रायश्चित्तविवेकः ॥

…रापगा, स्त्री, (सुराणां आपगा ।) गङ्गा । इति जटाधरः ॥ (यथा, किराते । ५ । ४० ।

“इह मनियमयोः सुरापगाया-
मुषसि सयावकसव्यपादलेखा ।
कथयति शिवयोः शरीरयोगं
विषमपदा पदवी विवर्त्तनेषु ॥”)

…रापाणाः, पुं, भूम्नि, (सुरा पानं येषाम् । “पानं देशे ।” ८।४।८ इति णत्वम् ।) पूर्व्वदेशस्थाः । यथा । सुरापाणाः प्राच्याः । इति संक्षिप्तसार-टीकायां गोयीचन्द्रः ॥

…सुरापा(णं)नं, क्ली, (सुरायाः पानम् । “वा भाव-करणयोः ।” ८ । ४ । १० । इति विभाषया णत्वम् ।) मद्यपानम् । यथा,—

“ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः ।
महान्ति पातकान्याहुः संसर्गश्चापि तैः सह ॥”

इति प्रायश्चित्तविवेकः ॥

…प्लवङ्गः । इति शब्दरत्नावली ॥

सुराभागः, पुं, (सुराया भागः ।) सुराया अग्र-भागः । इति शब्दचन्द्रिका ॥

सुरामण्डः, पुं, (सुराया मण्डः ।) सुराया अग्र-भागः । तत्पर्य्यायः । कारोत्तरः २ । इत्य-मरः । २ । १० । ४३ ॥ कारोत्तमः ३ । इति तट्टीका ॥ कालोत्तरः ४ सुराभागः ५ । इति शब्दचन्द्रिका ॥

सुरारिः, पुं, (सुराणां अरिः ।) असुरः । इति शब्दरत्नावली ॥ (यथा, कुमारे । ३ । ८ ।

“प्रमोद विश्राम्यतु वीर वज्रं
शरैर्मदीयैः कतमः सुरारिः ।
बिभेतु मोघीकृतबाहुवीर्य्यः
स्त्रीभ्योऽपि कोपस्फुरिताधराभ्यः ॥”)

सुरारिहन्ता, [ऋ] पुं, (सुरारीणां हन्ता ।) विष्णुः । यथा,—

“मेषादिपादे स्वपितीह विष्णु-
र्व्वृश्चिकस्य मध्ये परिवर्त्तते च ।
पौष्णावसाने च सुरारिहन्ता
प्रबुध्यते मासचतुष्टयेन ॥”

इति तिथ्यादितत्त्वम् ।

सुरार्हं, क्ली, (सुरान् अर्हतीति । अर्ह + अण् ।) हरिचन्दनम् । इति राजनिर्घण्टः ॥ स्वर्णम् । इति केचित् ॥

सुरालयः, पुं, (सुराणां आलयः ।) सुमेरुः । इत्य-मरः । १ । १ । ५२ ॥ स्वर्गः । यथा गारुडे ।

“गङ्गां येऽत्रावगाहन्ते विधिना च नराधिप ।
चतुर्युगसहस्रं ते न पतन्ति सुरालयात् ॥”

इति तिथ्यादितत्त्वम् ॥

(देवमन्दिरम् । यथा, भागवते ।७।१५। ४८ ।

“पूर्त्तं सुरालयारामकूपाजीव्यादिलक्षणम् ॥”

सुराया आलयः ।) सुरानिलयश्च ॥

सुराष्ट्रः, पुं, (शोभनं राष्ट्रं यस्य ।) देशवि-शेषः । सुरत् इति ख्यातः । स तु भारतवर्षस्य प्रतीच्यां दिशि वर्त्तते । इति सौराष्ट्रिकशब्द-टीकायां भरतः ॥(यथा महाभारते ।३।८८।१८।

“सुराष्ट्रेष्वपि वक्ष्यामि पुण्यान्यायतनानि च ॥”

श्रीरामचन्द्रस्य परिवारविशेषः । स तु श्रीराम-यन्त्रे पद्मदलमध्यतः पूज्यः । यथा, अगस्त्य-संहितायाम् ।

“धृष्टं जयन्तं विजयं सुराष्ट्रं राष्ट्रवर्द्धनम् ।
अकोपं धर्म्मपालाख्यं सुमन्त्रं दलमध्यतः ॥”

इति तिथ्यादितत्त्वम् ॥

सुराष्ट्रजं, क्ली, (सुराष्ट्रे जायते इति । जन् + डः ।) तुवरिका । इत्यमरः ।२।४।१३१॥ अस्य पर्य्यायो यथा,—

“सौराष्ट्री तुवरी काङ्क्षी मृत्तालकसुराष्ट्रजे ।
आढकी चापि साख्याता मृत्स्ना च सुर-मृत्तिका ॥”

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

सुराष्ट्रजः, पुं, (सुराष्ट्रे जायते इति । जन् + डः ।) कृष्णमुद्गः । इति राजनिर्घण्टः ॥ विष-भेदः । इति शब्दचन्द्रिका ॥ तद्देशजाते, त्रि ॥

सुराष्ट्रजा, स्त्री, (सुराष्ट्रे जायते इति । जन् + डः । टाप् ।) तुवरी । इति राजनिर्घण्टः ॥ (तुवरीशब्देऽस्या विशेषो विज्ञेयः ॥)

सुराह्वः, पुं, (सुरस्य आह्वा आख्या यस्य ।) देव-दारु । इति शब्दरत्नावली ॥ (क्वचित् क्ली । अस्य पर्य्यायो यथा,—

“सुरदारु द्रुकिलिमं सुराह्वं भद्रदारु च ।
देवकाष्ठं पीतदारु देवदारु च दारु च ॥”

इति वैद्यकरत्नमालायाम् ॥)

हरिद्रुहक्षः । मरुवकः । इति राजनिर्घण्टः ॥

सुरि, [रै] त्रि, (सु शोभनं रा धनं यस्य ।) शोभनधनवत् । इति मुग्धबोधव्याकरणम् ॥

सुरुङ्गः, पुं, शोभाञ्जनः । इति शब्दमाला ॥

सुरुङ्गा, स्त्री, सुरङ्गा । सींध इति सुरङ्ग इति च भाषा । तत्पर्य्यायः । सन्धिला २ सन्धिः ३ । इति जटाधरः ॥ (यथा, महाभारते । १ । १४८ । ११ ।

“ज्ञात्वा तु तद्गृहं सर्व्वमादीप्तं पाण्डुनन्दनाः ।
सुरुङ्गां विविशुस्तूर्णं मात्रा सार्द्धमरिन्दमाः ॥”

सुरुङ्गाहिः, पुं, (सुरुङ्गायामहिरिव ।) चौर-विशेषः । यथा,—

“कुजम्भिलः सुरङ्गाहिरथचौरः सुरङ्गयुक् ।”

इति शब्दरत्नावली ॥

सुरूपं, क्ली, (सु शोभनं रूपमस्य ।) तूलम् । इति राजनिर्घण्टः ॥

सुरूपः, त्रि, (सु सुन्दरं रूपमस्य ।) शोभनरूप-विशिष्टः । यथा,—

“सुन्दरं रुचिरं चारु मनोज्ञं मञ्जु मञ्जुलम् ।
कान्तं मनोरमं रुच्यं सुषमं साधु शोभनम् ॥
वल्गु हारि सुरूपाभिरूपदिव्यमनोहरम् ॥”

इति जटाधरः ॥

(यथा, वृहत्संहितायाम् । ५८ । ४० ।

“शाम्बश्च गदाहस्तः प्रद्युम्नश्चापभृत् सुरूपश्च ॥”

विद्वान् । यथा,—

“विद्वान् विपश्चिद्दोषज्ञः सन् सुधीः कोविदो बुधः
व्यक्तो मनीषी ज्ञः प्राज्ञः संख्यावान् पण्डितः कविः ॥
धीमान् सूरिः कृतिः कृष्टिर्लब्धवर्णो विचक्षणः ।
प्राप्तरूपसुरूपाभिरूपदूरदृशः समाः ॥”

इति जटाधरः ॥

सुरूपा यथा । नकुलः१ पुरूरवाः २ अश्विनी-कुमारौ ३ नलकूवरौ ४ कन्दर्पः ५ साम्बः ६ । इति कविकल्पलता ॥

सुरूपा, स्त्री, (सु शोभनं रूपं यस्याः ।) शालपर्णी भार्गी । इति राजनिर्घण्टः ॥

सुरूहकः, पुं, गर्द्दभाश्वः । इति हेमचन्द्रः ॥

सुरेज्यः, पुं, (सुराणां इज्यः ।) वृहस्पतिः । इति केचित् ॥ (यथा, वृहत्संहितायाम् । ८ । २३ ।

“विष्णुः सुरेज्यो वलभिद्धुताश-
स्त्वष्टोत्तरप्रोष्ठपदाधिपश्च ॥”)

सुरेज्या, स्त्री, (सुराणामिज्या ।) तुलसी । इति राजनिर्घण्टः ॥

सुरेन्द्रः, पुं,(सुरेषु इन्द्रः ऐश्वर्य्यशाली ।) इन्द्रः । इति केचित् ॥ (यथा, भागवते ।८।७।२१ ।

“न ते गिरित्राखिललोकपाल-
विरिञ्चवैकुण्ठसुरेन्द्रगम्यम् ॥”

लोकपालः । इति मल्लिनाथः ॥ यथा, रघुः । ३ । ११ ।

“सुरेन्द्रमात्राश्रितगर्भगौरवात्
प्रयत्नमुक्तासनया गृहागतः ॥”

तथाच मनुः । ७ । ५ ।

“यस्मादेषां सुरेन्द्राणां मात्राभ्यो निर्म्मितो नृपः ।
तस्मादभिभवत्येष सर्व्वभूतानि तेजसा ॥”)

सुरेन्द्रजित्, पुं, (सुरेन्द्रं देवराजं जितवानिति। जि+क्विप्। तुगागमश्च।) गरुड़ः। इति हलायुधः॥ इन्द्रजिच्च॥

सुरेभं, क्ली, (सु+रेभ+अच्।) रङ्गम्। इति त्रिकाण्डशेषः॥

सुरेवटः, पुं, रामपूगः। इति त्रिकाण्डशेषः॥

सुरेश्वरः, पुं, (सुराणामीश्वरः।) रुद्रः। इति जटाधरः॥ (यथा, मात्स्ये। ५। २८—३०।
"अजैकपादहिर्बुध्नो विरूपाक्षोऽथ रैवतः।
हरश्च बहुरूपश्च त्र्यम्बकश्च सुरेश्वरः॥
सावित्रश्च जयन्तश्च पिनाकी चापराजितः।
एते रुद्राः समाख्याता एकादश गणेश्वराः॥"
इन्द्रः। यथा, रघुः। २। ६४।
"नरेन्द्रसूनुः प्रतिसंहरन्निषुं
प्रियंवदः प्रत्यवदत् सुरेश्वरम्॥"
देवश्रेष्ठे, त्रि। यथा, भागवते। ४। १५। ८।
"ब्रह्मा जगद्गुरुर्देवैः सहासृत्य सुरेश्वरैः।
वैण्यस्य दक्षिणे हस्ते दृष्ट्वा चिह्नं गदाभृतः।
पादयोररविन्दञ्च तं वै मेने हरेः कलाम्॥"
सुरेश्वराचार्य्यः। यथा, पञ्चदशी। ६। १८०।
"अन्योन्याध्यासमत्रापि जीवकूटस्थयोरिव।
ईश्वरब्रह्मणोः सिद्धं कृत्वा ब्रूते सुरेश्वरः॥")

सुरेश्वरी, स्त्री, (सुराणामीश्वरी।) स्वर्गगङ्गा। इति शब्दरत्नावली॥ दुर्गा च॥

सुरेष्ट, पुं, (सुराणामिष्टः।) शिवमल्ली। शालः। सुरपुन्नागः। इति राजनिर्घण्टः॥

सुरेष्टा, स्त्री, (सुराणामिष्टा।) ब्राह्मी। इति राजनिर्घण्टः॥

सुरोत्तमः, पुं, (सुरेषु उत्तमः।) सूर्य्यः। इति केचित्॥ देवश्रेष्ठश्च॥ (यथा, महाभारते।३।५६।७।
"विप्रियं ह्याचरन् मर्त्त्यो देवानां मृत्युमृच्छति।
त्राहि मामनवद्याङ्गि! वरयस्व सुरोत्तमान्॥"

सुरोत्तरः, पुं, (सुरेषु मतपूजनेषु उत्तरः श्रेष्ठः।) चन्दनम्। इति शब्दचन्द्रिका॥

सुरोदः, पुं, (सुरा उदकं यस्य। उत्तरपदस्योदकस्योदादेशः।) सुरासमुद्रः। इति जटाधरः॥ (यथा, भागवते। ५। १। ३३।
"क्षारोदेक्षुरसोद-सुरोद-घृतोद-क्षीरोद-दधिमण्डोद-शुद्धोदाः सप्त जलधयः॥")

सुलक्षणा, स्त्री (सुशोभनं लक्षणं यस्याः।) उमासखीविशेषः। इति शब्दमाला॥ सुन्दरलक्षणयुक्ते, त्रि॥ (यथा, कथासरित्सागरे। १५। ६८।
"तच्छ्रुत्वा व्यसृजत् राजा सोऽथ प्रत्ययितान्
द्विजान्।
कन्या सुलक्षणा सा वा न वेत्याशोधयामिति॥

सुलभ, त्रि, सुखेन लभ्यते इति। सु+लभ+खल्। "न दुर्भ्यां केवलाभ्याम्।" ७।१।६८। इति नुमःप्रसक्तिः।) सुखलभ्यः। अनायासलभ्यः। यथा, शार्ङ्गधरे।
"सुलभं वचनं पुंसां यथाशास्त्रमिदं वचनम्।
... स्वीयं सुदुर्लभम्॥"

सुलभा, स्त्री, (सुखेन लभ्यते इति। लभ+खल्। टाप्।) माषपर्णी। धूम्रपत्रा। इति राजनिर्घण्टः॥

सुलोचनः, पुं, (शोभने लोचने यस्य।) हरिणः। इति राजनिर्घण्टः॥ दुर्य्योधनः। इति केचित्॥ (धृतराष्ट्रपुत्राणामन्यतमः। यथा, महाभारते १। ६७। ९४।
"विविंशतिर्विकर्णश्च जलसन्धः सुलोचनः॥")
सुन्दरचक्षुर्युक्ते, त्रि॥ (यथा, महाभारते। १। ५५। १३।
"मतीवसुकुमाराङ्गीं तनुमध्यां सुलोचनाम्।
आक्षिपन्तीमिव च भाः शशिनः स्वेन तेजसा॥"

सुलोचना, स्त्री, (शोभने लोचने यस्याः।) माधवराजपत्नी। यथा,—

माधव उवाच।

"श्रीमद्विक्रमभूभर्त्तुः पुत्रोऽहं माधवाह्वयः।
सर्व्वभावैर्भविष्यामि वशगस्तव सुन्दरि!॥

चन्द्रकलोवाच

समुद्रपारे तरुणपुरन्दरपुरोपमा।
प्रसिद्धोऽपि स्ति विख्याता दीव्यन्ती संज्ञया
पुरी॥
गुणाकराह्वयस्तत्र राजा श्रेष्ठो महायशाः।
सुशीला नाम तद्भार्य्या सर्व्वलक्षणसंयुता॥
सुलोचनाह्वया कन्या वीर तत्कुक्षिसम्भवा।
उद्वाह तां विवाहेन स्वर्गभोगं यदीच्छसि॥"
इत्युपक्रम्य।
"ततः शुभे क्षणे तस्मिन् पृष्ठमारुह्य वाजिनः।
अपेष्टाश्वेन भृत्येन विलङ्घ्य जलधिं ययौ॥
ततो गन्धर्व्वविधिना स राजतनयः सुधीः।
चक्रे विवाहं तां कन्यां तत्रैव प्राप्तकौतुकः॥"
इति पाद्मे क्रियायोगसारे ५ अध्यायः॥

सुलोमशा, स्त्री, (शोभना लोमशा।) काकजङ्घा। इति राजनिर्घण्टः॥ शोभनलोमयुते, त्रि॥

सुलोमा, स्त्री, (सुष्ठु लोमान्यस्याः। डाप्।) ताम्रवल्ली। मांसच्छदा। इति राजनिर्घण्टः॥

सुलोहकं, क्ली, (सुष्ठु लोहमिव। कन्।) पित्तलम्। इति हेमचन्द्रः॥

सुलोहिता, स्त्री, (सुष्ठु लोहिता।) अग्निजिह्वाविशेषः। इति शब्दमाला॥ (यथा, मुण्डकोपनिषदि। १। २। ४।
"काली कराली च मनोजवा च
सुलोहिता या च सुधूम्रवर्णा।
स्फुलिङ्गिनी विश्वरूपी च देवी
लोलायमाना इति सप्त जिह्वाः॥"
सुन्दररक्तवर्णे, पुं॥ तद्वति, त्रि॥

सुवल्कः, पुं, (सुष्ठु वल्कं यस्मात्।) वनबर्व्वरी। इति राजनिर्घण्टः॥ सुन्दराननं, त्रि॥ (यथा, महाभारते। १४। ८। १६।
"उष्णीषिणे सुवक्त्राय सहस्राक्षाय मीढुषे॥")

सुवचनं, क्ली, (सुष्ठु वचनम्॥) शोभनोक्तिः। तत्पर्य्यायः। सुप्रलापः २। इत्यमरः। ११६।१७॥ (यथा, अमरुशतके। १ पद्ये।

"स्नानस्य जीवकुसुमस्य
सन्तर्पणानि सकलेन्द्रियमोहनानि।
एतानि ते सुवचनानि सरोरुहाक्षि
कर्णामृतानि मनसश्च ...

सुवचनी, स्त्री, (सुष्ठु वचनं यस्याः। ङीप्। एतदाराधनया
माहात्म्यात्तथात्वम्।) देवीविशेषः।
स्त्रियो यस्याः पूजां मन्यते कुर्व्वन्ति
आचारमार्त्तण्डे शुभसुवनीति वर्ण्णं।

सुवचाः, [स्] त्रि, (सुष्ठु वचो यस्य।)
इति जटाधरः॥

सुवनः, पुं, (सूते विश्वमिति। सू+
जिभ्यश्छन्दसि।" उणा० २।८०।
सूर्य्यः।
केचित्॥

सुवर्चकः, पुं, स्वर्ज्जिकाक्षारः।

सुवर्चला, स्त्री, सूर्य्यपत्नी। इति
अतसी। इति रत्नमाला॥
इति केचित्। आदित्यभक्ता।(
गुणाश्च यथा,—
"सुवर्चला सूर्य्यभक्ता वरदा वरदापि च।
सूर्य्यावर्त्ता रविप्रीतापरा ब्रह्मसुवर्चला।
सुवर्चला हिमा रूक्षा
अपित्तला कटुः क्षारा विष्टम्भकफवातजित्॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
ब्राह्मी। इति राजनिर्घण्टः।

सुवर्चाः, [स्] त्रि,
वर्चो यस्येति बहुव्रीहिसमासनिष्पन्न।
महाभारते। १। ५३। ७।
"तं स भीमः प्रजाकामस्तोषयामास
महिष्या सह राजेन्द्र तपसा च सुवर्चसः।
पुं, धृतराष्ट्रपुत्रविशेषः। १। ६७। ९७।
"दृढ़हस्तः सुहस्तश्च वातवेगसुवर्चसौ।")

सुवर्च्चिकः, पुं, स्वर्ज्जिकाक्षारः। इति रा-
घण्टः॥ (यथा,—
"कथितः स्वर्ज्जिकाभेदो विशेषः सुवर्च्चि
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥

सुवर्च्चिका, स्त्री, अतुका। इति राजनिर्घ
(स्वर्ज्जिकाक्षारः। अस्याः पर्य्याया यथा—
"कापोतं स्वर्ज्जिका स्वर्जिः सुवर्च्चिका
चि॥

इति वैद्यकरत्नमाला॥

तथास्या गुणाः।
"सुवर्च्चिका स्वर्ज्जिकावत् बोद्धव्या गुणैः
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥

सुवर्च्ची, [न्] पुं, स्वर्ज्जिकाक्षारः। इति रा
निर्घण्टः॥

सुवर्णं, क्ली, (शोभनो वर्णो यस्य।) स्वर्णम्।
सोना इति भाषा। तत्पर्य्यायः। स्वर्णम् १
कम् ३ हिरण्यम् ४ हेम ५ हाटकम् ६
यम् ७ शातकुम्भम् ८ गाङ्गेयम् ९ भर्म्म १०
कर्व्वुरम् ११ चामीकरम् १२ जातरूपम्

[illegible] १६ [illegible] १९ [illegible] ११
[illegible]
[illegible] १२
[illegible]
[illegible] २५ [illegible] २६ [illegible]
[illegible] २८ [illegible] ३० [illegible] ३१
[illegible] ३२ [illegible] इति रत्न-
[illegible]
[illegible] ३७ [illegible] ३८
[illegible] ३९। इति शब्दरत्नावली। उज्ज्वलम्
[illegible] ४१ [illegible] ४२ अग्निवीर्य्यम्
[illegible] ४४ [illegible] ४५ [illegible] ४६
[illegible] ४७ [illegible] ४८ [illegible]
[illegible] ५१ [illegible] ५२ [illegible] ५३
[illegible] ५४ [illegible] ५५ [illegible] ५६
[illegible] ५७ [illegible] ५८। अस्य गुणाः।
[illegible]त्वम्। [illegible]त्वम्। तिक्तत्वम्। मधुरत्वम्।
[illegible]त्वम्। शीतत्वम्। बल्यत्वम्।
[illegible]त्वम्। [illegible]त्वम्। [illegible]त्वम्।
[illegible]त्वम्। [illegible]
[illegible] गुणाः। कान्तिदत्वञ्च [illegible]
[illegible]। ॥ तत्परीक्षादि यथा,—

"दाहेऽतिरक्तमथ यत् सितं छिदायां
[illegible] कषे च विभाति निकषपट्टे:।
[illegible] गौरवमुपैति च यत्तुलायां
[illegible] स्निग्धं मृदु [illegible]॥
पत्रं रसवेधजं तदपरं जातं स्वयं भूमिजं
[illegible] लोहसङ्करभवं चेति त्रिधा काञ्चनम्।
तत्राद्यं कलपीतरक्तमपरं रक्तं ततोऽन्यद्यथा
गौराभं तदिति क्रमेण गदितं स्यात् पूर्व्वपूर्व्वोत्तमम्॥"
इति राजनिर्घण्टः॥०॥

अपिच सुवर्णस्योत्पत्तिनामलक्षणगुणाः।
"पुरा निजाश्रमस्थानां सप्तर्षीणां जितात्मनाम्।
पत्नीर्विलोक्य लावण्यलक्ष्मीसम्पन्नयौवनाः॥
कन्दर्पदर्पविध्वस्तचेतसो जातवेदसः।
पतितं तद्धरापृष्ठे रेतस्तु हेमतामगात्॥
कृत्रिमं चापि भवति तद्रसेन्द्रस्य वेधतः।
स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम्॥
तपनीयं कलधौतं गाङ्गेयं भर्म्म काञ्चनम्।
चामीकरं शातकुम्भं तथा कार्त्तस्वरञ्च तत्॥
जाम्बूनदं जातरूपं महारजतमित्यपि।
दाहे रक्तं सितं छेदे निकषे कुङ्कुमप्रभम्॥
तारशुल्वोऽज्झितं स्निग्धं कोमलं गुरु हेम यत्॥"
सत् उत्तमम्।
"तच्छ्वेतं कठिनं रूक्षं विवर्णं समलं दलम्।
दाहे छेदेऽसितं श्वेतं कषे त्याज्यं लघुस्फुटम्॥"
दलं दोपन इति लोके। स्फुटं यद्घनाहत स्फुटति॥

"स्वर्णं शीतलं [illegible] गुरु रसायनम्।
स्वादु तिक्तं तुवरं पाके च स्वादु पिच्छिलम्॥
पवित्रं बृंहणं नेत्र्यं मेधास्मृतिमतिप्रदम्।
हृद्यमायुष्करं कान्तिवाग्विशुद्धिस्थिरत्वकृत्।
विषक्षयोन्मादत्रिदोषज्वरशोषजित्॥
स्वर्णं यद्यशुद्धं सत्
बलं वीर्य्यञ्च हन्ति।
करोत्यनेकांश्च सदा रुजान्
[illegible]॥
तस्मात् [illegible] स्वर्णं हन्तं शोधनं नाशयेत्।
करोति रोगान् [illegible]॥"
इति भावप्रकाशः॥०॥

अथ सुवर्णकरणम्।
"सञ्जातं गृहनाशञ्च कामानामादिमं रसम्।
अगणाद्य भवेद्देवि सुवर्णकरणं शृणु॥
पीतं धुस्तूरपुष्पञ्च पीतकाञ्च तथैव च।
पाठा मातुलुङ्गी च मूलमावर्त्तनात्तैः॥"
इति गारुड़े १८८ अध्यायः॥०॥
अपि च।

श्रीभैरव उवाच।
"आनीय पारदं देवि स्थापयेत् प्रस्तरोपरि।
तस्योपरि जपेन्मन्त्रं सर्वंस्वमयाक्षरम्॥
पाटलञ्च देवेशि मर्द्दयेत् माघफाल्गुने:।
रक्तपुष्पसंयुक्ते मर्द्दे पारदमर्द्दिनि॥
संस्थाप्य पारदं देवि ताम्रपात्रे सुगन्धि प्रिये।
पुष्पयुक्ते च यत्नेन बध्नीयात् सुदृढं ततः॥
मृत्तिकया दृढमेव धान्यस्य परमेश्वरि।
लेपयेद्दृढयत्नेन रौद्रे शुष्काणि कारयेत्॥
पुनश्च लेपयेद्धीमान् ततो वह्नौ विनिःक्षिपेत्।
अष्टमीनवमीरात्रौ क्षिपेदेव सुरेश्वरि॥
अथवा परमेशानि ताम्रपात्रे स्थापयेद्रसम्।
वर्णाश्रमेन तद्द्रव्यं शोधयेद्दृढयत्नतः॥
घृतमारीरसेनैव तथैव शोधनं चरेत्।
एवं कृते तु गुटिकां यदि स्यात् दृढबन्धनम्॥
धुस्तूरञ्च समानीय मध्ये शून्यञ्च कारयेत्।
कृष्णाख्यातुलसीयोगे तथा घृतकुमारिका॥
एवं कृते वह्नियोगे भस्मसात् जायते किल।
भस्मयोगे भवेत् स्वर्णं धनदायाः प्रसादतः।
विवर्णं जायते द्रव्यं यदि पूजां न चाचरेत्॥"
इति मातृकाभेदतन्त्रे ५ पटलः॥०॥

अस्य धार्य्यत्वं सर्व्वदेवतात्मकत्वञ्च यथा, रामायणे महाभारते च परशुरामं प्रति वसिष्ठवाक्यम्।
"सर्व्वरत्नानि निर्मथ्य तेजोराशि समुत्थितम्।
सुवर्णमेभ्यो विप्रेन्द्र रत्नं परममुत्तमम्॥
एतस्मात् कारणाद्देवगन्धर्व्वोरगराक्षसाः।
मनुष्याश्च पिशाचाश्च प्रयता धारयन्ति तत्॥"
तथा।
"तस्मात् सर्व्वपवित्रेभ्यः पवित्रं परमं स्मृतम्॥"
तथा।
"अग्निर्व्वै सकला देवाः सुवर्णञ्च तदात्मकम्।
तस्मात् सुवर्णं ददता दत्ताः स्युः सर्व्वदेवताः॥"
तस्मात्तत् पदादौ न धार्य्यं देवतात्मकत्वात्।

इति मत्स्यपुराणम्॥०॥ तद्दानफलं यथा,—
वसिष्ठ उवाच।
"न सुवर्णं विना दानं तिलैर्वा मुनिसत्तम।
तस्मात् पवित्रमित्युक्तं भवानेतत् ब्रवीतु मे॥
वसिष्ठ उवाच।
अत्र ते कथयिष्यामि इतिहासं पुरातनम्।
जामदग्न्यस्य रामस्य मुनिभिः सह पार्थिव॥
त्रिःसप्तकृत्वः पृथिवीं मनीन् पराङ्ग पार्थिव।
कृत्वा तु कृपयाविष्टो निःक्षत्रां भार्गवः पुरा॥
राम उवाच।
क्रोधादिदं कृतं कर्म्म मया मुनिवरोत्तमाः।
कथं कस्मादिमुच्येऽहं पापात् क्षत्रवधादतः॥
इत्युक्ता धर्म्मतत्त्वज्ञाः पापानां पावनं परम्।
दानदं च सुवर्णस्य ते तत्प्रश्नमुपेयः॥
एतत् पवित्रमतुलं मङ्गलमिह शस्तम्।
अग्नेर्वीर्य्यात् परं तेजो हापलं जातवेदसः॥
मङ्गलं कार्त्तिकेयस्य रुद्रशक्रानुग्रहम्।
पवित्रं यत् नरैः सर्व्वधर्म्मिभिः मकुटादिभिः।
अग्निस्तु देवताः सर्व्वाः प्रीयन्ते सर्व्वदेवताः।
तस्मात् सुवर्णं ददतां सुवर्णञ्च तदात्मकम्॥
दत्तं पूर्व्वापराधे च प्रीयाचेदं बृहस्पतिः।
सुवर्णं ये प्रयच्छन्ति नरकात्तारयन्ति ते॥
सर्व्वान् कामान् प्रयान्त्येते पितामहसुतोऽब्रवीत।
मरीचिर्भगवान् पूर्व्वं ये प्रयच्छन्ति काञ्चनम्॥
यः सुवर्णं नरो नित्यं ब्राह्मणेभ्यः प्रयच्छति।
स चिरं विरजा विद्वान् देववद्दिवि मोदते॥
सर्व्वेषामेव दानानामेकजन्मानुगं फलम्।
हाटकक्षितिगौरीणां सप्तजन्मानुगं फलम्॥
विद्यमानं सुवर्णं तु यो लोभान्न प्रयच्छति।
स सदा जनपापैस्तु वेष्टितो नरकं व्रजेत्॥
कृत्वापि सुमहत् पापं जातरूपं ददाति यः।
स सद्यस्तेन पापेन मुच्यते नात्र संशयः॥
एवं ज्ञात्वा तु शुद्ध्यर्थं सुवर्णं देहि भार्गव।
तुलामारुह्य कायस्य समानमात्मनस्तया॥
इत्युक्तो मुनिभिर्दिव्ये रामो धर्म्मभृतांवरः।
प्रादात् सुवर्णं विप्रेभ्यः ततः पापादमुच्यत॥
तस्मात्त्वमपि राजेन्द्र द्विजेभ्यो देहि काञ्चनम्
विष्वक्सेनं समुद्दिश्य यदीच्छेः शाश्वतीं गतिम्॥"
इति वह्निपुराणे तुलापुरुषदाननामाध्यायः॥०॥
अपि च।
"सुवर्णदानं गोदानं भूमिदानं तथैव च।
नाशयन्त्याशु पापानि महापातकजान्यपि॥"
इति प्रायश्चित्ततत्त्वम्॥०॥

उत्सृष्टस्वर्णस्य गृहे चिरस्थापननिषेधो यथा,
"न चिरं स्थापयेद्गेहे हेम संप्रोक्षितं बुधः।
तिष्ठत् भयावहं यस्मात् शोकव्याधिकरं नृणाम्॥
शीघ्रं परस्वीकरणात् श्रेयः प्राप्नोति पुष्कलम्॥"
संप्रोचितं पात्रमुद्दिश्य त्यक्तम्। अतएव विष्णुपुराणे।
"तस्मात् सर्व्वात्मना पात्रे दद्यात् कनकमुत्तमम्
अपात्रे पातयेद्दत्तं सुवर्णं

सुसीता, स्त्री, (सु, सीता ।) शतपत्री । इति राजनिर्घण्टः ॥

सुसीरिका, स्त्री, कन्दविशेषः । वाराहीकन्दः । इति शब्दचन्द्रिका ॥

सुसीम, पु सीमयुक्तः । इत्यमरटीकायां स्वामी ॥ [illegible], त्रि ॥

सुसीम, पुं (सु शोभनं सीमसम ।) चोलराज । यथा,—

"श्री [illegible] न तु [illegible]
[illegible] न [illegible]नामा ।
[illegible]
[illegible] तेन [illegible] ॥"

इति [illegible] पुराणे [illegible] अध्यायः ॥

[illegible], त्रि ॥ (यथा, भागवते । [illegible] ।

"[illegible]

[illegible]

पितुर्श्चैवनमाकर्ण्य सुश्रुतः काशिकां गतः ।
तेन सार्द्धं समभ्येतुं मुनिपुत्रशतं ययौ ॥
अथ धन्वन्तरिं सर्व्वयानप्रस्थाश्रमे स्थितम् ।
भगवन्तं सुरश्रेष्ठं मुनिभिर्बहुभिः स्तुतम् ॥
काशिराजं दिवोदासं तेऽपश्यन् विनयान्विताः ।
स्वागतं च इति स्माह दिवोदासो यशोधनः ॥
कुशलं परिपप्रच्छ तथागमनकारणम् ।
ततस्ते सुश्रुतद्वारा कथयामासुरुत्तरम् ॥
भगवन् मानवान् दृष्ट्वा व्याधिभिः परिपीडितान् ।
क्रन्दतो म्रियमाणांश्च जातास्माकं हृदि व्यथा ॥
आमयानां शमोपायं विज्ञातुं वयमागताः ।
आयुर्व्वेदं भवानस्मानध्यापयतु यत्नतः ॥
अङ्गीकृत्य वचस्तेषां नृपतिस्तानुपादिशत् ।
व्याख्यातं तेन ते यत्नात् जगृहुर्मुनयो मुदा ॥
काशिराजं जयाशीर्भिरभिनन्द्य मुदान्विताः ।
सुश्रुताद्याः सुशिष्यास्ते जग्मुर्गेहं स्वकं स्वकम् ॥
प्रथमं सुश्रुतस्तेषु यं तन्त्रे लभवान् स्फुटम् ।
सुश्रुतस्य मतार्थोऽपि पृथक् तन्त्राणि तेनिरे ॥
सुश्रुतेन कृतं तन्त्रं सुश्रुतं बहुभिर्यतः ।
तस्मात्तत् सुश्रुतं नाम्ना विख्यातं क्षितिमण्डले ॥"

इति भावप्रकाशः ॥

(क्ली, गोत्रीयार्थे शास्त्रप्रथः । यथा, मनुः । [illegible] ।

"[illegible] वाच्यं शोने तु सुश्रुतम् ।
[illegible] कर्भितास्यपि ॥")

सुषम, त्रि (सुष्ठु समं सर्व्वं यस्मात् । "सुविनिर्दुर्भ्यः [illegible] ।" ८।३।८८ । इति षत्वम् ।) शोभनम् । इत्यमरः । ३।१।५२ ॥ समः । इति मेदिनी ॥

सुषमा, स्त्री, (सु शोभनं समं सर्व्वं यथा ।) परमा शोभा । इत्यमरः । १।३।१७ ॥ (यथा, [illegible] । १८ । २ ।

"अथ [illegible] सुषमामिमां [illegible] ॥")

[illegible] । इति हेमचन्द्रः ॥

[illegible] (सु, [illegible] । सु + सु + [illegible] ।) [illegible] । इत्यमरः । २।४।१३१ ॥ [illegible] । इति [illegible] । इति राजनिर्घण्टः ॥

[illegible] (सु, [illegible] । सु + सी + [illegible] ।) [illegible] । इत्यमरः । [illegible] ॥ [illegible] । इति [illegible] ॥

[illegible] । इत्यमरटीकायां भरतः । [illegible] । इति मेदिनी ॥ [illegible], त्रि । [illegible] । ३।१।८८ ।

"[illegible]
[illegible] ।" इति मेदिनी ॥ [illegible] । इति [illegible] ॥

सुषीमः, त्रि, शीतस्पर्शयुक्तः । इत्यमरः । मनोज्ञः । इति मेदिनी ॥

सुषुप्त, क्ली, (सु + स्वप + क्त ।) यथा,—

"यो जागरे बहिरनुक्षणधर्म्मिणोऽर्थान्
भुङ्क्ते समस्तकरणैर्हृदि तत्सदृक्षान् ।
स्वप्ने सुषुप्त उपसंहरते स एकः
स्मृत्यन्वयात्त्रिगुणवृत्तिदृगिन्द्रियेशः ॥"

इति श्रीभागवते । ११ । [illegible] ।

सुषुप्सिषु, त्रि ॥ (यथा, भागवते । [illegible] । ५२ ।

"यथा सुषुप्तः पुरुषो विश्वं पश्यति [illegible]
आत्मानमेकदेशस्थं मन्यते [illegible] ।")

सुषुप्तिः, स्त्री, (सु + स्वप् + क्तिन् ।) [illegible] अज्ञानम् । तस्य नामान्तरम् । कारण[illegible] आनन्दमयकोषश्च । इति वेदान्तसारः । स्थूलसूक्ष्मोपाधेः कारणोपाधौ [illegible] लयम् । इति महेशः ॥ [illegible]

"स्वप्नावस्था परीक्षिता सुषुप्त्यवस्था [illegible] [illegible] । तदेताः सुषुप्तिविषयाः [illegible] यद्यपि सन् सुप्तः समस्त [illegible] विज्ञानात्यासु नाडीषु सूक्ष्मो [illegible] स्वस्थस्य श्रूयते । तासि [illegible] शेते इति । विकल्पमानेषु तु [illegible] कदाचिन्नाडीभ्यः प्रतिबुध्यते कदाचित् [illegible] कदाचिदात्मन इत्यनियमः [illegible] तु सुषिप्त्यानमिति ।" इति शारीरक[illegible] अध्याये२ पादः ॥ किञ्च । "यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत् सुषुप्तम् ।" इति माण्डूक्योपनिषत् । [illegible] ॥

सुषुम्ना, स्त्री, (सुषु इत्यव्यक्तशब्दं म्नाति । म्ना + क ।) [illegible] मध्यस्थनाडीविशेषः । यथा,—

"[illegible]
मध्ये नाडी सुषुम्ना [illegible] ।"

इति [illegible] ॥

तस्या [illegible] यथा,—

"[illegible]
सुषुम्ना [illegible]
[illegible]
[illegible]
[illegible]"

इति [illegible] ॥

"[illegible]
सुषुम्ना [illegible] ।"

इति [illegible] ॥

सुषेण, पुं, [illegible]
[illegible]

...वराहो गोविन्दः सुषेणः कनकाङ्गदी ॥"
...शोभना सेना स्वगणात्मिका यस्य ।" इति तत्र
...रभाष्यम् ॥ वानरराजसुग्रीववैद्यः । इति
...दिनी ॥ चेतसः । इति राजनिर्घण्टः ॥ (वसु-
...पुत्रविशेषः । यथा, भागवते । ९ । २४ ।
...—५४ ।
"...देवस्तु देवक्यामष्टपुत्रानजीजनत् ।
...र्त्तिमन्तं सुषेणञ्च भद्रसेनमुदारधीः ॥
...जुं समर्दनं भद्रं सङ्कर्षणमहीश्वरम् ।
अष्टमस्तु तयोरासीत् स्वयमेव हरिः किल ॥"
...गविशेषः । इति महाभारतम् ।१।५७।१६॥
...ग्रविशेषः । स च शूरसेनाधिपतिः । यथा,
...ः । ६ । ४५ ।
"सा शूरसेनाधिपतिं सुषेण-
मुद्दिश्य लोकान्तरगीतकीर्त्तिम् ।
आचारशुद्धोभयवंशदीपं
शुद्धान्तरक्ष्या जगदे कुमारी ॥")
...णिका, स्त्री, कृष्णत्रिवृता । इत्यमरः । २ ।
... । १०८ ॥
...णी, स्त्री, त्रिवृत् । इति राजनिर्घण्टः ॥
...षोमा, स्त्री, नदीभेदः । इति श्रीभागवते ।५।
...९ । १७ ।
..., व्य, (सुतिष्ठतीति । सु + स्था + "अपदुःसुषु
स्थः ।" उणा० १ । २६ । इति कुः । सुषमा-
...त्वात् षत्वम् । प्रशंसा । अतिशयम् । इत्य-
मरः । ३ । ४ । १ ॥ सत्यम् । इति संक्षिप्त-
सारोणादिवृत्तिः ॥ (यथा, भागवते ।४।२२।१७
"पृथीस्तत्सूक्तमाकर्ण्य सारं सुष्ठु मितं मधु ।
स्मयमान इव प्रीत्या कुमारः प्रत्युवाच ह ॥"
"सुष्ठु गम्भीरार्थम् ।" इति तट्टीका ॥)
...म, क्ली, रज्जुः । इत्यमरटीकायां स्वामी ॥
सुसंयतः, त्रि, । (सु + सम् + यम + क्तः ।) यथा-
विधिसंयमविशिष्टः । यथा, ब्रह्मपुराणम् ।
"यो यः कश्चित्तीर्थयात्रान्तु गच्छेत्
सुसंयतः स च पूर्व्वं गृहे स्वे ।
कृतोपवासः शुचिरप्रमत्तः
संपूजयेत् भक्तिनम्रो गणेशम् ॥"
इति प्रायश्चित्ततत्त्वम् ॥
सुसंस्कृतं, त्रि, (सुष्ठु संस्क्रियते इति । सु + सं +
कृ + क्तः ।) घृतादिनानाद्रव्येण प्रयत्नसंस्कृत-
व्यञ्जनादि । तत्पर्य्यायः । प्रयस्तम् २ इत्यमरः ॥
"तैलपाकसुसंस्कारे प्रयस्तमुपसंस्कृतम् ॥"
इति शब्दरत्नावली ॥
उत्तमसंस्कारविशिष्टञ्च ॥
सुसत्या, स्त्री, जनकराजभार्य्या । यथा,—
"जानामि पितरं चाहं विदेहाधिपतिं नृपम् ।
तस्य भार्य्यां सुसत्याख्यामहं जानामि मातरम् ॥
भ्रातरस्तत्सुताः सर्व्वे सीता मे भगिनी शुभा ।
सुसत्या मम मातेति लोको जानाति सन्ततम् ॥"
इति कालिकापुराणे ६० अध्यायः ॥
सुसवी, स्त्री, सुषवी । इत्यमरटीकायां राय-
मुकुटः । २ । ४ । १५५ ॥

सुसम्पत्) (सुष्ठु सम्पत् । प्रादिसमासः ।)
सुसम्पद्) सौभाग्यम् । तत्पर्य्यायः । परभागः २
इति त्रिकाण्डशेषः ॥
सुसहः, त्रि, सुखसह्यः ॥ दुःसहभिन्नः । सुखेन
सह्यतेऽसाविति सहधातोः कर्म्मण्यल्प्रत्ययेन
निष्पन्नः ॥
सुसारः, पुं (सुष्ठु सारो यस्य ।) रक्तखदिरः ।
इति राजनिर्घण्टः ॥ अतिशयसारविशिष्टे, त्रि ॥
सुसारवत्, क्ली, (सुसारोऽस्त्यस्येति । मतुप् ।
मस्य वः ।) स्फाटिकम् । इति त्रिकाण्ड-
शेषः ॥
सुसिकता, स्त्री, (सुष्ठु सिकतेव ।) शर्करा । इति
राजनिर्घण्टः ॥ उत्तमवालुका च ॥
सुसीमा, स्त्री, हत्त्वार्हन्माता । सा तु षष्ठजिन-
जननी । इति हेमचन्द्रः ॥ (शोभना सीमा ।)
उत्तमसीमा च ॥
सुस्थः, त्रि, (सु + स्था + कः ।) सुखेन तिष्ठति यः ।
अरोगी । यथा, श्रीभागवते । १० । ३ । २७ ।
"मर्त्त्यो मृत्युव्यालभीतः पलायन्
सर्व्वान् लोकान् निर्भयं नाध्यगच्छत् ।
त्वत्पादाब्जं प्राप्य यदृच्छयाद्य
सुस्थः शेते मृत्युरस्मादपैति ॥"
सुस्थता, स्त्री, (सुस्थस्य भावः । तल् ।) आरो-
ग्यम् । इति शब्दचन्द्रिका ॥
सुस्थिरः, त्रि, (सुष्ठु स्थिरः ।) स्थिरतरः । यथा,
श्रीभागवते । ११ । ९ । ३१ ।
"न ह्येकस्माद्गुरोर्ज्ञानं सुस्थिरं स्यात् सुपु-
ष्कलम् ।
ब्रह्मैतदद्वितीयं वै गीयते बहुधर्षिभिः ॥"
सुस्नाः, पुं (सुष्ठु स्नात्यनेन रूक्षत्वात् । सु + स्नै
+ क्विप् ।) शमीधान्यभेदः । खेसारी इति
भाषा । अस्य गुणाः ।
"सुस्ना दुर्व्वातलो रूक्षः कषायो विशदो गुरुः ॥"
इति राजनिर्घण्टः ॥
सुस्नातः, पुं (सुष्ठु + स्नातः ।) यज्ञान्तस्नानकृत् ।
इति शब्दावली ॥ सुन्दररूपकृतस्नाने, त्रि ।
यथा,—
"अथाहःसु निवृत्तेषु सुस्नाताः कृतमङ्गलाः ।
आशुच्याद्विप्रमुच्यन्ते ब्राह्मणान् स्वस्तिवाच च ॥"
इति शुद्धितत्त्वम् ॥
सुस्मिता, स्त्री, (सुष्ठु स्मितं यस्याः ।) स्त्रीभेदः ।
इति हेमचन्द्रः ॥ सुन्दरेषद्धास्ययुक्ते त्रि ॥
सुहस्ती, [न्] पुं, बौद्धभेदः । यथा,—
"महागिरिसुहस्त्यथा वज्रान्ता दशपूर्व्विणः ।"
इति हेमचन्द्रः । ३४ ॥
सुहितः, त्रि, (सु + धा + क्तः ।) विहितः । तृप्तः ।
इति विश्वः ॥ (यथा, बृहत्संहितायाम् ।
५१ । २९ ।
"अतिबहु तदा भुक्तान्नं संस्थितः सुहितो
वदेत् ॥")
सुहिता, स्त्री, (सु + धा + क्तः । टाप् ।) अग्नि-
जिह्वाविशेषः । इति जटाधरः ॥

सुहृत्) पुं, (सु शोभनं हृत् हृदयं यस्य ।)
सुहृद्) मित्रम् । सखा । इत्यमरः ।२।८।१२॥
(यथा, हितोपदेशे ।
"सुहृदां हितकामानां यः शृणोति न भाषि-
तम् ।
विपत्सन्निहिता तस्य स नरः शत्रुनन्दनः ॥")
एकस्माल्लग्नात्तुर्य्यलग्नम् । यथा,—
"पातालं हिबुकञ्चैव सुहृद्भवचतुर्थकम् ।"
इति ज्योतिस्तत्त्वम् ॥
"शशिजः सुहृदष्टगतः करोति चातुर्य्यहास्य-
धनवन्तं वचसामधिपः ।" इत्यादिकोष्ठीप्रदीपः ॥
(महादेवः । इति महाभारतम् ।१३।१७।८८॥)
सुहृदयः, त्रि, (सुष्ठु हृदयमन्तःकरणं यस्य ।)
प्रशस्तमनाः । तत्पर्य्यायः । हृदयालुः २ । इत्य-
मरः । ३ । १ । ३ ॥ सहृदयः ३ । इति शब्द-
रत्नावली ॥
सुहोत्रः, पुं, चन्द्रवंशीयबृहदिषुराजपुत्त्रः । यथा,
"बृहदिषोश्च दायादः सुहोत्रो नाम धार्म्मिकः
सुहोत्रस्यापि दायादो हस्ती नाम बभूव ह ॥"
इति महाभारते हरिवंशे पितृकल्पे २० अः ॥
(सहदेवपुत्त्रः । यथा, महाभारते ।१।९५।८०।
"सहदेवोऽपि माद्रीमेव स्वयंवरे विजयां नामो-
पयेमे मद्रराजस्य द्युतिमतो दुहितरं तस्यां
पुत्त्रमजनयत् सुहोत्रं नाम ॥" ॥ भरतवंशी-
यस्य भुमन्योः पुत्त्रविशेषः । यथा, तत्रैव । १ ।
९४ । २४ ।
"सुहोत्रश्च सुहोता च सुहविः सुयजुस्तथा ।
पुष्करिण्यामृचीकश्च भुमन्योरभवन् सुताः ॥")
सूः, स्त्री, सूतिः । क्षेपः । सूधातोः क्विप्प्रत्ययेन
निष्पन्नमिति केचित् ॥
सूकः, पुं, वाणः । वातः । उत्पलम् । इति मेदिनी ॥
सूकरः, पुं, (सू इत्यव्यक्तशब्दं कर्त्तुं शीलमस्य ।
कृ + टः ।) वराहः । इत्यमरः । २ । ५ । २ ॥
(यथा, वैराग्यशतके । १६ ।
"कामिजनपरमभोग्ये कामसुखे धारयन्ति
बीभत्सम् ।
सन्तः शमसुखरसिकाः सुधाशनाः सूकराश्च
इव ॥" ॥
सुष्ठु कर्त्तुं शीलमस्य । सु + कृ + टः । पृषो-
दरादित्वात् दीर्घत्वम् ।) कुम्भकारः । इति
शब्दरत्नावली ॥ मृगभेदः । इति जटाधरः ॥
सूकरी, स्त्री, (सूकर + जातौ ङीष् ।) सूकर-
भार्य्या ॥ (यथा, याज्ञवल्क्ये । ३ । २५६ ।
"पतिलोकं न सा याति ब्राह्मणी या सुरां
पिबेत् ।
इहैव सा शुनी गृध्री सूकरी चोपजायते ॥")
वराहक्रान्ता । इति शब्दमाला ॥
सूक्तं, त्रि, (सुष्ठु उक्तम् ।) शोभनोक्तिविशिष्टम् ।
वेदोक्तस्तोत्रमन्त्रादि । यथा । ऋग्वेदस्य अग्नि-
मीळे इत्यादि अग्निसूक्तम् । १ । १ । १ ॥ ...
सहस्रशीर्षेत्यादि पुरुषसूक्तम् । १०।९०।१ ...
अहं रुद्रेभिरित्यादि देवीसूक्तम् ।१०।१२५।१ ...

सुशीता, स्त्री, (सुष्ठु शीता ।) शतपत्री । इति राजनिर्घण्टः ॥

सुशीविका, स्त्री,कन्दविशेषः । वाराहीकन्दः । इति शब्दचन्द्रिका ॥

सुशीमः,पुं,शीतगुणः । इत्यमरटीकायां स्वामी ॥ तद्वति, त्रि ॥

सुशीलः,पुं,(सु शोभनं शीलमस्य ।) चोलराजः । यथा,—

"यो विष्णुदासः स तु पुण्यशीलो
यशोलभूपः स सुशीलनामा ।
द्वावासुभौ तत्समरूपभाजौ
द्वाःस्थौ कृतौ तेन रमाप्रियेण ॥"

इति पाद्मे उत्तरखण्डे ५४ अध्यायः ॥

शोभनशीलविशिष्टे, त्रि ॥ (यथा, भागवते । ६ । १ । १७ ।

"सध्रीचीनो ह्ययं लोके पन्थाः क्षेमोऽकुतोभयः ।
सुशीलाः साधवो यत्र नारायणपरायणाः ॥"

शोभनं शीलमिति । मञ्चरिते, क्ली । यथा, महाभारते । ३ । २८७ । ४३ ।

"त्वया सुशीलव्रतपुण्ययुतया
समुद्धृतं साध्वि पुनः कुलीनया ॥")

सुशीलता, स्त्री, (सुशीलस्य भावः । तल् । टाप् । सत्स्वभावः । सुशीलत्वम् ॥

सुशीला,स्त्री,(शोभनं शीलं यस्याः।टाप् ।(श्रीकृष्णस्याष्टमहिष्यन्तर्गतमहिषीविशेषः । यथा,—

"अष्टौ महिष्यस्ताः सर्व्वा रुक्मिण्याद्या महात्मनः ।
रुक्मिणी सत्यभामा च कालिन्दी च शुचिस्मिता ॥
मित्रविन्दा जाम्बवती नाग्नजिती सुलक्षणा ।
सुशीला नाम तन्वङ्गी महिष्यश्चाष्टमाः स्मृताः ॥"

इति पाद्मोत्तरखण्डे ६८ अध्यायः ॥

यमभार्य्या । इति केचित् ॥

सुश्रीका, स्त्री, (शोभना श्रीः शोभा यस्याः । कप् ।) सल्लकी । इति राजनिर्घण्टः ॥ सुन्दरश्रीयुक्ते,त्रि ॥ (यथा, हरिवंशे । १८३।११३।

"द्वारोपशोभितां कृत्वा सर्व्वां द्वारवतीं पुरीम् ।
रत्नदरथ्यां सुश्रीकां बहुरत्नोपशोभिताम् ॥")

सुश्रुतः,पुं,विश्वामित्रमुनिपुत्त्रः । स तु चिकित्साशास्त्रकर्त्ता । यथा,—

"तथा धन्वन्तरिवंशे जातः क्षीराब्धिमन्थने ।
देवादीनां जीवनाय आयुर्व्वेदमुवाच ह ।
विश्वामित्रसुतायेव सुश्रुताय महात्मने ॥"

इति गारुडे १५० अध्यायः ॥

अथ सुश्रुतप्रादुर्भावः ।

"अथ [illegible] विश्वामित्रमहानयोऽवदत् ।
अयं धन्वन्तरिः काश्यां काशिराजोऽयमुच्यते ॥
विश्वामित्रो मुनिस्तेषु पुत्त्रं सुश्रुतमुक्तवान् ।
वत्स वाराणसीं गच्छ त्वं विश्वेश्वरवल्लभाम् ॥
तत्र नाम्ना दिवोदासः काशिराजोऽस्ति बाहुजः ।
स हि धन्वन्तरिः साक्षादायुर्व्वेदविदां वरः ॥
आयुर्व्वेदं ततोऽधीष्व लोकोपकृतिहेतवे ।
[illegible] महामनाः ॥
पितुर्व्वचनमाकर्ण्य सुश्रुतः काशिकां गतः ।
तेन सार्द्धं समध्येतुं मुनिसूनुशतं ययौ ॥
अथ धन्वन्तरिं सर्व्वानप्रस्थाश्रमे स्थितम् ।
भगवन्तं सुरश्रेष्ठं मुनिभिर्ब्बहुभिः स्तुतम् ॥
काशिराजं दिवोदासं तेऽपश्यन् विनयान्विताः ।
स्वागतं च इति प्राह दिवोदासो यशोधनः ॥
कुशलं परिपप्रच्छ तथागमनकारणम् ।
ततस्ते सुश्रुतद्वारा कथयामासुरुत्तरम् ॥
भगवन् मानवान् दृष्ट्वा व्याधिभिः परिपीडितान् ।
क्रन्दतो म्रियमाणांश्च जातास्माकं हृदि व्यथा ॥
आमयानां शमोपायं विज्ञातुं वयमागताः ।
आयुर्व्वेदं भवानस्मानध्यापयतु यत्नतः ॥
अङ्गीकृत्य वचस्तेषां नृपतिस्तानुपादिशत् ।
व्याख्यातं तेन ते यत्नात् जगृहुर्मुनयो मुदा ॥
काशिराजं जयाशीर्भिरभिनन्द्य मुदान्विताः ।
सुश्रुताद्याः सुशिक्षार्था जग्मुर्गेहं स्वकं स्वकम् ॥
प्रथमं सुश्रुतस्तेषु स्वं तन्त्रं कृतवान् स्फुटम् ।
सुश्रुतस्य सखायोऽपि पृथक् तन्त्राणि तेनिरे ॥
सुश्रुतेन कृतं तन्त्रं सुश्रुतं बहुभिर्मतः ।
तस्मात्तत् सुश्रुतंनाम्ना विख्यातं क्षितिमण्डले ॥"

इति भावप्रकाशः ॥

(क्ली, गोष्ठीश्राद्धे तृप्तिप्रश्नः । यथा, मनुः । ३ । २५४ ।

"पित्र्ये स्वदितमित्येव वाच्यं गोष्ठे तु सुश्रुतम् ।
सम्पन्नमित्यभ्युदये दैवे रुचितमित्यपि ॥")

सुषमः,त्रि,(सुष्ठु समं सर्व्वं यस्मात् । "सुविनिर्दुर्भ्यः सुपिसूतिसमाः ।" ८।३।८८ । इति षत्वम् ।) शोभनम् । इत्यमरः । ३ । १ । ५२ ॥ समः । इति मेदिनी ॥

सुषमा,स्त्री,(सु शोभनं समं सर्व्वं यया ।) परमा शोभा । इत्यमरः । १ । ३ । १७ ॥ (यथा, नैषधे । १८ । २ ।

"जयजय महाराज प्राभातिकीं सुषमामिमां सफलयतमां दानादस्योर्द्दरालसपक्ष्मणोः ॥")

निजानां कालभेदः । इति हेमचन्द्रः ॥

सुषवी,स्त्री,(सुष्ठु सूते फलानीति । सु + सू + अच् गौरादित्वात् ङीष् ।) कारवेल्लः । इत्यमरः । २ । ४ । ११५ । कृष्णजीरकः । जीरकः । इति मेदिनी ॥ क्षुद्रकारवेल्लः । इति राजनिर्घण्टः ॥

सुषिः, स्त्री, (सुष्ठु स्यतीति । सु + षो + बाहुलकात् किः ।) शुषिः । इत्यमरः । १।८।१ ॥

सुषिरं,क्ली,(शुष शोषणे + "इषिमदीति ।" उणा० १ । ५२ । इति किरच् । पृषोदरादित्वात् शस्य सः । यद्वा,सुषिरस्यास्तीति । सुषि + "ऊषसुषि मुष्कमधो रः ।" ५ । २ । १०७ । इति रः ।) शुषिरम् । इत्यमरटीकायां भरतः । १।८।१ ॥ (काष्ठम् । इति काशिका ॥ छिद्रयुक्ते, त्रि । यथा, बृहत्संहितायाम् । ५३ । ८८ ।

"शस्तौषधिद्रुमलतामधुरा सुगन्धिः
स्निग्धा समा न सुषिरा च मही नराणाम् ॥")

सुषीमः, पुं, सर्पविशेषः । इति मेदिनी ॥ चन्द्रकान्तमणिः । इति जटाधरः ॥

सुषीमः, त्रि,शीतगुणयुक्तः, मनोज्ञः । इति मेदिनी ॥

सुषुप्तं, क्ली, (सु + स्वप + क्त ।
यथा,—

"यो जागरे [illegible]
भुङ्क्ते समस्तचरितेन्द्रि [illegible]
स्वप्ने सुषुप्त उपसंहरते स एव
स्मृत्यन्वयात्त्रिगुणवृत्तिदृगिन्द्रियेशः ।"

इति श्रीभागवते । ११ । [illegible]

सुषुप्तियुक्ते, त्रि ॥ (यथा, भागवते । ([illegible] ५३ ।

"यथा सुषुप्तः पुरुषो विश्वं पश्यति [illegible]
आत्मानमेकदेशस्थं मन्यते स्वप्न [illegible]

सुषुप्तिः, स्त्री, (सु + स्वप् + क्तिन् ।) अज्ञानम् । तस्य नामान्तरम् । आनन्दमयकोषश्च । इति वेदान्तसारः । स्थूलसूक्ष्मोपाधेः कारणोपाधौ लीनत्वम् । इति तट्टीका ॥ अवस्थाविशेषः । "स्वप्नावस्था प[illegible] [illegible] घ्यते । तत्रैताः सुषुप्तिविषया [illegible] यद्द्वयमेतत् सुप्तः समस्तः समाप्त [illegible] विज्ञानात्मासु नाड़ीषु सुप्तो भवतीति [illegible] रनुक्रम्य श्रूयते । ताभिः प्रत्यवसृप्य [illegible] शेत इति । विकल्पमानेषु तु [illegible] कदाचिन्नाड़ीभ्यः प्रतिबुध्यते कदाचित् [illegible] कदाचिदात्मन इत्यशास्त्रिषत् । तस्मात् [illegible] तु सुप्तिस्थानमिति ।" इति शारीरिक[illegible] अध्यायेर पादः ॥ किञ्च । "यत्र सुप्तो [illegible] कामं कामयते न कञ्चन स्वप्नं [illegible] सुषुप्तम् ।" इति माण्डूक्योपनिषत् । [illegible] च ॥

सुषुम्ना, स्त्री, (सुषु इत्यव्ययशब्दं [illegible] म्ना + कः ।) मेरुदण्डवाह्ये इड़ापि[illegible] मध्यस्थनाड़ीविशेषः । यथा,—

"शिरोर्द्ध्वाग्रप्रदेशे शशिमिहिरशिरे [illegible]
मध्ये नाड़ी सुषुम्ना त्रितयगुणमयी [illegible]
सूर्य्याग्नि[illegible]"

इति षट्चक्र[illegible]

तस्या शुभलक्षणं यथा,—

"क्षणं वामे क्षणं दक्षे यदा वहति [illegible]
सुषुम्ना सा च विज्ञेया सर्व्वकार्य्य[illegible]
तस्यां नाड्यां स्थितो वह्निर्ज्वलति[illegible]
विषमं तं विजानीयात् सर्व्वकार्य्यविना[illegible]
यदानुक्रममुल्लङ्घ्य तस्यां नाड्यां द्वयं [illegible]
तदा तस्य विजानीयादशुभं [illegible]"

इति [illegible]

"मेरुबाह्ये इड़ा नाड़ी पिङ्गला [illegible]
सुषुम्ना भानुमार्गेण [illegible]"

इति [illegible]

सुषेणः,पुं,करम[illegible] विष्णुः । (यथा [illegible]

मेदिनी ॥ (ज्ञापनम् । यथा, साहित्य-र्पणे । ६ । ३१२ ।
त्र स्यादङ्ग एकस्मिन्नङ्गानां सूचनाखिला ।
दङ्गमुखमित्याहुर्बीजार्थख्यापकञ्च तत् ॥")
:, स्त्री, (सूच्यतेऽनयेति । सूच + णिच् +
च इः ।" उणा० ४ । १३८ । इति इः ।)
धनी । इत्यमरः । ३।५।७ ॥ (यथा, कथा-
रित्सागरे । १०४ । ७५ ।
वन्हीऽग्निविषमाहारो गीतानि स्तुतिसूचयः ।
दानं वन्धनं पौष्पी माला दिधा शरावली ॥"
विध्य भरतोऽतीव व्रणे तथैव सूचिना ।"
ति रामायणे । २ । ७५ । १७ । इत्यत्र तु
शाकविप्रयोगवशात् साधुत्वम् ॥)नृत्यप्रभेदः।
शखा । यथा,—
सूचिर्नृत्यप्रभेदे च व्यधनीशिखयोरपि ।"
इति रत्नकोषः ॥
यथा, कुमारे । ५ । ४३ ।
"अलभ्यशोकाभिभवेयमाकृति-
र्विमानना सुभ्रु कुतः पितुर्गृहे ।
पराभिमर्शो न तवास्ति कः करं
प्रसारयेत् पन्नगरत्नसूचये ॥" ॥
तकीपुष्पम् । इति सूचिपुष्पशब्दर्शनात् ॥
था, ऋतुसंहारे । २ । २३ ।
"मुदित इव कदम्बैर्जातपुष्पैः समन्तात्
पवनचलितशाखैः शाखिभिर्नृत्यतीव ।
हसितमिव विधत्ते सूचिभिः केतकीनां
नवसलिलनिषेकात् शान्ततापो वनान्तः॥"
व्यूहविशेषः । यथा, मनुः । ७ । १९१ ।
'संहतान् योधयेदल्पान् कामं विस्तार-
येद्बहून् ।
सूच्या वज्रेण चैवैतान् व्यूहेन व्यूह्य योधयेत्॥")
सूचिकः, पुं, सूच्या जीवति यः । दरजी इति
भाषा । तत्पर्यायः । सौचिकः २ सौचिः ३
तुन्नवायः ४ सूचभित् ५ । इति शब्दरत्ना-
वली ॥ (यथा, वृहत्संहितायाम् । १० । ८ ।
"हस्ते नापितचाक्रिकचौरभिषक्सूचिक-
द्विपग्राहाः ॥")
सूचिका,स्त्री,(सूचिरेव स्वार्थे कन् ।) सूचिः ।
हस्तिशुण्डः । इति केचित् ॥
सूचिकाधरः, पुं, (सूचिकायाः शुण्डस्य धरः ।)
हस्ती । इति शब्दमाला ॥
सूचिकाभरणः, पुं, औषधविशेषः । यथा,—
"विषं पलमितं सूतः शाणकञ्च [illegible]
तचूर्णं संपुटे कृत्वा काचलिप्तशरावयोः ॥
मुद्रां दत्वाथ संशोष्य ततश्चुल्ल्यां निवेशयेत् ।
वह्निं शनैः शनैः कुर्यात् प्रहरद्वयसङ्ख्यया ॥
ततः उद्घाट्य तन्मुद्रामुपरिस्थशरावकात् ।
[illegible] यो भवेद्धूमस्तं गृह्णीयाच्छनैः शनैः ॥
[illegible] यदा न स्यात्तदा कूप्यां निवेशयेत् ।
यावत् सूच्या मुखे लग्नं कूप्या निर्याति भेषजम्
[illegible] तदा देयो मूर्च्छिते [illegible]
[illegible]

रक्तभेषजसम्पर्कात् मूर्च्छितोऽपि हि जीवति ।
तथैव सर्पदष्टोऽपि मृतावस्थोऽपि जीवति ।
यदा तापो भवेत्तस्य मधुरं तत्र दीयते ॥"
इति सूचिकाभरणो रसः ॥
इति भैषज्यरत्नावली ॥ * ॥ अपि च ।
"विषं पलं रस शाणं तच्चूर्णं काचलेपिते ।
मृत्संपुटे च संरुध्य चुल्ल्यां संस्थाप्य पाच-
येत् ॥
शनैर्यामद्वयं पक्का तं समुद्घाट्य शीतलम् ।
ऊर्द्ध्वपात्रगतं धूमं गृहीत्वा सृष्टमारुतम् ॥
यावत् सूच्या मुखे लग्नं कूप्या आयाति भेषजम्
क्षुरेण प्रचले शीर्षे तत्राङ्गुल्या च घर्षयेत् ॥
त्रिदोषे मूर्च्छितो जीवो रक्तभेषजसङ्गमात् ।
सर्पदष्टो मृतावस्थः सोऽपि जीवति तत्क्षणात्
दद्याच्च मधुरं तोयं सूचिकाभरणे रसे ॥"
इति सूचिकाभरणरसः सन्निपाते ॥
इति रसप्रदीपः ॥ * ॥ (अपि च ।
"रसगन्धकनागञ्च विषं स्थावरजङ्गमम् ।
मात्स्यवाराहमायूरच्छागपित्तैर्विभावयेत् ॥
सूचिकाभरणो नाम भैरवेण प्रकीर्त्तितः ।
सूचिकाग्रेण दातव्यः सन्निपातनिवर्हणः ॥"
इति सूचिकाभरणो रसः ॥
इति वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे ॥)
सूचिकामुखं,स्त्री,(सूचिकेव क्रमसूक्ष्मं मुखं यस्य)
शङ्खः । इति हारावली ।११०॥ सूच्यास्ये, त्रि॥
सूचितः,त्रि,(सूच + क्तः ।) कथितः । बोधितः ।
(यथा, साहित्यदर्पणे । ६ । ३११ ।
"अङ्कान्ते सूचितः पात्रैस्तदङ्कस्याविभागतः ।
यत्राङ्कोऽवतरत्येषोऽङ्कावतार इति स्मृतः ॥")
सूचिपत्रकः, पुं, (सूचिवत् सूक्ष्माणि पत्राणि
यस्य । कप् ।) सितावरशाकः । इति राज-
निर्घण्टः ॥
सूचिपुष्पः,पुं,(सूच्याकारं पुष्पमस्य । सूचिरिति
नाम्ना ख्यातं पुष्पमस्येति वा ।) केतकवृक्षः ।
इति जटाधरः ॥
सूचिरोमा, [न्] पुं,(सूचिवत् रोमाणि यस्य ।)
वराहः । इति हारावली ॥
सूचिवदनः, पुं, (सूचिवत् सूक्ष्मं वदनं यस्य ।)
नकुलः । मशकः । इति राजनिर्घण्टः ॥
सूचिवान्, [त्] पुं, (सूचिस्तदाकारचञ्चुरस्त्य-
स्येति । मतुप् । मस्य वः ।) गरुडः । इति
शब्दरत्नावली ॥
सूचिशालिः, पुं, (सूचिवत् सूक्ष्मः शालिः ।)
इति राजनिर्घण्टः ॥
सूची,स्त्री,(सीव्यतेऽनया । सिव + "सिवेष्टे टेरू
उणा० ४ । ९३ । इति ष्टन् । टेरूत्व-
[illegible] ङीष् । गौरादित्वात् ङीष् इति केचित्
सूच + इ । कृदिकारादिति ङीष् वा ।) सीवन-
द्रव्यम् । सूँच इति भाषा । (यथा, महा-
भारते । ५ । ६८ । १८ ।
"यावद्धि तीक्ष्णया सूच्या विध्येदग्रेण मारिष
[illegible] त्यजामो भूमेर्वै पाण्डवान् प्रति ।"

वैद्यकोक्तकार्य्यमस्या यथा,—
"एषणागतिमन्विष्य क्षारसूत्रानुसारिणीम् ।
सूचीं निदध्याद्गत्यन्ते चोन्नम्याशु च निर्हरेत् ॥
सूत्रस्यान्तं समानीय गाढबन्धनमाचरेत् ।
ततः क्षारबलं वीक्ष्य सूत्रमन्यत् प्रवेशयेत् ॥
क्षाराक्तं मतिमान् वैद्यो यावन्न छिद्यते गतिः
भगन्दरेऽप्येष विधिः कार्य्यो वैद्येन जानता ॥
अर्ब्बुदादिषु चोत्क्षिप्य मूले सूत्रं न धापयेत् ।
सूचीभिर्यववक्त्राभिराचितं वासमन्ततः ।
मूले सूत्रेण बध्नीयाच्छिन्ने चोपचरेद्व्रणम् ॥"
इति वैद्यकचक्रपाणिसङ्ग्रहे नाडीव्रणाधिकारे॥)
आङ्गिकाभिनयविशेषः । अङ्गचारचेष्टा । इति
मेदिनी ॥ करणम् । इति हेमचन्द्रः ॥ दृष्टिः ।
इति केचित् ॥ (केतकीपुष्पम् । इति सूचिशब्द-
दर्शनात् ॥ व्यूहविशेषः । यथा, मनुः ।७।१८७।
"वराहमकराभ्यां वा सूच्या वा गरुडेन वा॥")
सूची, [न्] त्रि, (सूचयतीति । सूच + णिनिः ।)
सूचकः । (पिशुनः । यथा, महाभारते ।
५ । ३५ । ४६ ।
"पूर्व्वकारी च सूची च मित्रध्रुक् पारदा-
रिकः ॥")
सूचीदलः, पुं, (सूचीवत् दलानि यस्य ।) सिता-
वरः । इति राजनिर्घण्टः ॥
सूचीपत्रा, स्त्री, (सूचीवत् पत्राणि यस्याः ।)
गण्डदूर्व्वा । इति राजनिर्घण्टः ॥
सूचीपुष्पः, पुं, (सूचीवत् सूक्ष्मं पुष्पमस्य ।
सूचीति नाम्ना प्रसिद्धं पुष्पमस्येति वा ।)
केतकी । इति रत्नमाला ॥
सूचीमुखं, स्त्री, (सूचीवत् सूक्ष्मं मुखं यस्य ।)
हीरकम् । इति हेमचन्द्रः ॥ (यथा, साहित्य-
दर्पणे । ८ । ६१२ ।
"सूचीमुखेन सकृदेव कृतव्रणस्त्वं
मुक्ताकलाप लुठसि स्तनयोः प्रियायाः ।
वाणैः स्मरस्य शतशो विनिकृत्तमर्म्मा
स्वप्नेऽपि तां कथमहं न विलोकयामि ॥"*॥
नरकविशेषः । यथा, भागवते । ५ । २६ । ७ ।
"पर्य्यावर्त्तनः सूचीमुखमित्यष्टाविंशतिर्नरका
विविधयातनाभूमयः ॥"*॥ सूच्या मुखम् । यथा,
कादम्बर्य्याम् । "तमपि सूचीमुखग्रायमर्म्मभेदि [illegible]"
सूच्यास्ये, त्रि । (यथा, महाभारते ।१।१८८।१।
"सूचीमुखमनीकं स्यादल्पानां बहुभिः सह ।"
तथा, मार्कण्डेये । १४ । ५१ ।
"दृष्टास्ते पुरुषास्तैस्तु [illegible] सूचीमुखान्तके ।")
सूचीमुखः, पुं, (सूचीवत् सूक्ष्मं मुखं यस्य ।)
[illegible] । इति राजनिर्घण्टः ।
सूचीरोमा, [न्] पुं, (सूचीवत् रोमाणि यस्य ।)
शूकरः । इति त्रिकाण्डशेषः । सूचीतुल्य-
लोमविशिष्टे, त्रि ।
सूच्यग्रस्थूलकः, पुं, [illegible]
[illegible] । इति भाषा । यथा,—
"सूच्यग्रस्थूलकश्चैव [illegible] ॥"
इति [illegible] ॥

[illegible] यथा । [illegible] ।
[illegible] सूतिकागारं [illegible]
[illegible] सूतिकागारं [illegible]"
इति [illegible] ॥
[illegible] यथा,—
[illegible] तदा
[illegible]म् ।
[illegible] ॥
[illegible] ।
[illegible] पतितं [illegible] ॥
[illegible] ।
[illegible] ये ।
[illegible] शोधनमात्मनः ॥"
[illegible] यथा,—
[illegible] कुक्कुटान् ।
[illegible] धर्म्मवित् ॥
[illegible] ।
[illegible] सूतिकागोष्ठदूषितौ [illegible] ॥
[illegible] उवाच ।
[illegible] कीर्त्तिता [illegible] सूतिकादयः ।
[illegible] मोतुमिच्छामि [illegible] ॥
महात्मोवाच ।
[illegible] यावत् [illegible]मागतौ ।
[illegible] सूतिकेल्वगौ तयोरन्त्यं विगर्हितम् ॥"
इति मार्कण्डेयपुराणे महापाराध्यायः ॥
[illegible]पुराणे १४ अध्याये च द्रष्टव्यम् ॥
[सूति]कागारं, क्ली, (सूतिकाया आगारम् ।) प्रसवगृहम् । इति जटाधरः ॥ (यथा, हरि-[वं]शे । १६३ । ४७ ।
"[illegible] त्वमिहानीतोऽसि मानद ।
[illegible] त्वमस्पर्शं सूतिकागारमध्यतः ॥")
[सू]तिकागृहं, क्ली, (सूतिकाया गृहम् ।) प्रसवा-[ल]यः । तत्पर्य्यायः । अरिष्टम् २ । इत्यमरः ।
२ । ८ ॥ सूतकागृहम् ३ । इति तट्टीका ।
[illegible]गृहम् ४ सूतिगृहम् ५ । इति जटाधरः ॥
[अ]स्याकृतिर्यथा,—
"अष्टहस्तायतं चारु चतुर्हस्तविशालकम् ।
[illegible]द्वारमुदग्द्वारं विदध्यात् सूतिकागृहम् ॥"
इति भावप्रकाशः ॥
तत्र पिशाचानां वासो यथा,—
"सर्व्वकगानप्रतिघान् सूतिकागृहसेविनः ।
[illegible] पाणिपादांश्च पृष्ठग्रीवान् सुरं हमः ॥
एवंविधान् पिशाचांश्च दृष्ट्वा ब्रह्मानुकम्पया ।
अन्तर्धानं वरं प्रादात् कामशायित्वमेव च ॥"
इति वह्निपुराणे प्रजापतिसर्गनामाध्यायः ॥
प्रसवात् पूर्व्वं तत्संस्कारमाह शाङ्खायनगृह्यम्
काकादन्या मेचकधातक्या वृहत्याः कोपतक्या कालक्लीतकस्य मूलानि पेषयित्वा उपलेपयेद्वेशं यस्मिन् प्रजायते रक्षसामपहत्यै इति । काकादनी काकजङ्घा । मेचकधातकी काकमोचिका कोपातकी घोषकम् । कालक्लीतकः यष्टिमधुकेति कल्पतरुः ॥ अतएव हरिवंशे ।

"एष सा नृपते यत्रो मानुषैरेव साध्यते ।
न च शक्यं दिन दैवं हि महर्षिः प्रतिदृश्यते ॥
सम्पदामेः कृषिहितैरौषधैश्च यौगिकैः ।
यर्षे न सानुकूलेन दैवमप्यनुमोक्ष्यते ॥"
इत्यनुवरान् प्रति कंसवाक्यम् । इति ज्योतिस्तत्त्वम् ॥
सूतिकागेहं, क्ली, (सूतिकाया गेहम् ।) प्रसवगृहम् । यथा,—
"जगाम सूतिकागेहं नारीरूपं विधाय भूः ।
जगाम्बः सद्गाम्बो हरिणाम्बो बभूव ह ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४ अध्यायः ॥
सूतिकाभवनं, क्ली, (सूतिकाया भवनम् ।) प्रसवगृहम् । इति हलायुधः ॥
सूतिकावासः, पुं,(सूतिकाया आवासः ।) प्रसवगृहम् । यथा,—
"सूतिकावासनिलया जन्मदा नाम देवताः ।
तासां यागनिमित्तन्तु शुद्धिर्जन्मनि कीर्त्तिता ।
षष्ठेऽह्नि रात्रियागन्तु जन्मदानान्तु कारयेत् ॥"
इति शुद्धितत्त्वम् ॥
सूतिकारोगः, पुं, (सूतिकाया रोगः ।) नवप्रसूताया व्याधिभेदः । तन्निदानादि यथा,—
"मिथ्योपचारात् संक्लेशात् विषमाजीर्णभोजनात् ।
सूतिकायान्तु ये रोगा जायन्ते दारुणाश्च ते ॥"
मिथ्योपचारात् अनुचिताचरणात् । स्नानादिसेवनात् । संक्लेशात् संक्लिश्यन्ते दोषा अनेन इति संक्लेशः दोषजनकमन्नं तस्मात् । दारुणाः कष्टसाध्याः । के ते व्याधय इत्याकाङ्क्षायामाह ।
"अङ्गमर्द्दो ज्वरः कासः पिपासा गुरुगात्रता ।
शोथः शूलातिसारौ च सूतिकारोगलक्षणम् ॥"
एतेऽङ्गमर्द्दादयः प्रायेण सूतिकाया भवन्तः सूतिकारोगत्वेन लक्ष्यन्ते ॥ ० ॥ ज्वरादीनां रोगविशेषाणां निदानविशेषमाह ।
"ज्वरातीसारशोथाश्च शूलानाहबलक्षयाः ।
तन्द्रारुचिप्रसेकाद्या वातश्लेष्मसमुद्भवाः ॥
कृच्छ्रसाध्या हि ते रोगाः क्षीणमांसबलाश्रिताः
ते सर्व्वे सूतिका नाम्ना रोगास्ते चाप्युपद्रवाः ॥"
सूतिकाभवत्वेन सूतिकानाम्ना ते रोगाः । आश्रयाश्रितयोरभेदोपचारात् । ते चाप्युपद्रवा इति । त एव ज्वरादय उक्तानां रोगाणामन्यतमं प्रधानीकृत्योपद्रवाश्च ॥ * ॥
अथ सूतिकारोगचिकित्सा ।
"सूतिकारोगशान्त्यर्थं कुर्य्यात् वातहरीं क्रियाम् ।
दशमूलकृतं क्वाथं कोष्णं दद्यात् घृतान्वितम् ॥
अमृतानागरसहचरभद्रोत्कटपञ्चमूलकं जलदम् ।
शृतशीतं मधुयुक्तं शमयत्यचिरेण सूतिकातङ्कम् ॥
देवदारु वचा कुष्ठं पिप्पली विश्वभेषजम् ।
भूनिम्बकट्फलं मुस्तं तिक्ताधान्यं हरीतकी ॥
गजकृष्णा सदुःस्पर्शा गोक्षुरं धन्वयासकः ।
वृहत्यतिविषा छिन्ना कर्कटः कृष्णजीर[illegible] ॥

समभागान्वितैरेतैः सिन्धुरामठसंयुतैः ।
क्वाथमष्टावशेषन्तु प्रसूतां पाययेत् स्त्रियम् ॥
शूलकासज्वरश्वासमूर्च्छाकम्पशिरोऽर्त्तिभिः ।
युक्तं प्रलापतृड्दाहतन्द्रातीसारवान्तिभिः ॥
निहन्ति सूतिकारोगं वातपित्तकफोद्भवम् ।
कषायो देवदार्व्वादिः सूताया: परमौषधम् ॥"
इति देवदार्व्वादिक्वाथः ॥ * ॥
"जीरकः स्थूलजीरश्च शतपुष्पाप्यजमोदा ।
यवानी चाजमोदा च धान्यकं मेथिकापि च ॥
शुण्ठी कृष्णा कणामूलं चित्रकं हपुषापि च ।
वदरीफलचूर्णञ्च कुष्ठं कम्पिल्लकं तथा ॥
एतानि पलमात्राणि गुडं शतपलं मतम् ।
क्षीरं प्रस्थद्वयं दद्यात् सर्पिषः कुड़वत्रयम् ॥
पञ्चजीरकपाकोऽयं प्रसूतानां प्रशान्तये ।
युज्यते सूतिकारोगे योनिरोगे ज्वरे क्षये ।
कासे श्वासे पाण्डुरोगे कार्श्ये वातामयेषु च ॥"
इति पञ्चजीरकपाकः ॥ * ॥
"धान्यस्याञ्जलियुग्ममत्र पयसःप्रस्थद्वयंखण्डतः पञ्चाशत्पलमत्र चूर्णितमथ प्रक्षिप्यते नागरम् ।
प्रस्थार्द्धं गुड़वद्विपाच्य विधिना सुष्टिद्वयं धान्यकात्
मिश्राः पञ्चपलं पलं क्रिमिरिपोः माजाजिजीरादपि ॥
क्षोपाम्भोदकीरगेन्द्र-कुसुमत्वक्तद्राविड़ीनां पलं पक्वं नागरखण्डसञ्ज्ञकमिदं सौभाग्यदं योषिताम् ।
तट्शत्वासज्वरदाहशोषशमनं सश्वासकासापहं
प्लीहव्याधिविनाशनं क्रिमिहरं मन्दाग्निसन्दीपनम् ॥"
दलं पत्रकम् । उरगेन्द्रकुसुमं नागकेशरम् ।
द्राविड़ी सूक्ष्मैला । सौभाग्यशुण्ठीपाकः । इति भावप्रकाशः ॥
सूतिकाषष्ठी, स्त्री, (सूतिकायाः षष्ठी । सूतिकागृहपूज्या षष्ठीति मध्यपदलोपी कर्म्मधारयो वा ।) सूतिकागारे जातबालकस्य षष्ठदिने पूज्यदेवीविशेषः । अथ सूतिकाषष्ठी-पूजा ।
विष्णुधर्म्मोत्तरे ।
"सूतिकावासनिलया जन्मदा नाम देवताः ।
तासां यागनिमित्तार्थं शुद्धिर्जन्मनि कीर्त्तिता ॥
षष्ठेऽह्नि रात्रियागन्तु जन्मदानाञ्च कारयेत् ।
रक्षणीया सदा षष्ठी निशां तत्र विशेषतः ॥
राम ! जागरणं कार्य्यं जन्मदानां तथा बलिः ॥"
रामेति सम्बोधनम् ॥ * ॥ तत्राशौचान्तरदोषोऽपि नास्ति ।
"अशौचे तु समुत्पन्ने पुत्रजन्म यदा भवेत् ।
कर्त्तुस्तात्कालिकी शुद्धिः पूर्व्वाशौचाद्विशुध्यति ॥"
इति प्रजापतिवचनात् । पुत्रजन्मेति [illegible]
पितुरेवाशौचाभावः न तु मातुः [illegible]
पुंलिङ्गनिर्द्देशाच्च । कारयेदिति [illegible]
प्रायेण ॥ * ॥ तत्रादौ [illegible]
मातृकापूजनम् । तथा च [illegible]

"ह्यागजागरणं कार्य्यं खड्गो धार्य्यः समीपतः ।
आवाह्य पूजयेद्देवीं गणेशं मातरं गिरिम् ॥"
देवीं षष्ठीम् । गिरिं मन्थानदण्डम् ॥*॥ मातृनामान्याह । बह्वृचगृह्यपरिशिष्टम् ।
"गौरी पद्मा शची मेधा सावित्री विजया जया
देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥
शान्तिः पुष्टिर्धृतिस्तुष्टिरात्मदेवतया सह ।
आदौ विनायकः पूज्यो अन्ते च कुलदेवताः ॥"
तासामभिधाय भविष्ये ।
"पूज्यास्त्विदेऽथवा कार्य्या वरदाभयपाणयः ।"
मातरः इति सर्व्वासां विशेषणम् । अतएव गौर्य्यै मात्रे नमः । इत्यादिप्रयोगः । एता मातरो लोकमातरो ज्ञेयाः अतएव तयोर्व्वहुत्वेन निर्द्देशः ॥*॥ गणेशपूजायां प्रार्थनामन्त्रो यथा,
"सर्व्वविघ्नहरो देव एकदन्तो गजाननः ।
षष्ठीगृहेऽर्च्चितः प्रीत्या शिशुं दीर्घायुषं कुरु ॥"
ततः ।
"आयाहि वरदे देवि महाषष्ठीति विश्रुता ।
शक्तिरूपेण मे पुत्रं रक्ष जागरवासरे ॥"
इति षष्ठ्या आवाहनम् । ततः षष्ठीं पूजयेत् ।
"गौर्य्याः पुत्त्रो यथा स्कन्दः सदा सरक्षितस्त्वया
तथा ममाप्ययं बालो रक्ष्यतां षष्ठि ते नमः ॥"
इति वा पूजयेदिति । भोजराजः ।
"नन्दिनी च सुनन्दा च पूतना मुखमण्डिका ।
विडालिका शकुनिका शुष्करेवा च जम्भिका ॥
आयार्य्यिका रेवती च पिलिपिच्छा ततः परम् ।
स्कन्दा च द्वादशैतास्ताः रक्षार्थं मातृकाग्रहाः ॥"
इत्यपि स्मृतिः ।
"जय देवि जगन्मातर्जगदानन्दकारिणि ।
प्रसीद मम कल्याणि नमोऽस्तु षष्ठि देवि ते ॥"
वरप्रार्थनम् ।
"रूप देहि यशो देहि भाग्यं भगवति देहि मे ।
पुत्त्रान्देहि धनं देहि सर्व्वान् कामांश्च देहि मे ॥
धात्री त्वं कार्त्तिकेयस्य महाषष्ठीति विश्रुता ।
त्वत्प्रसादादविघ्नेन चिरं जीवतु बालकः ॥
देवतानामृषीणाञ्च सर्व्वेषां हितकारिणि ।
रक्षस्व पुत्रं महाषष्ठि नमोऽस्तु ते ॥
इत्यनेन बालं ध्यजनस्य कृत्वा समर्पयेत् ॥"
मन्थानदण्डं पूजयेत् ।
"मन्थानमन्दरोऽसि त्वं मथितः सागरस्त्वया ।
तथा ममापि पुत्त्रस्य मथ विघ्नं नमोऽस्तु ते ॥"
तत्र पञ्चशिखाः पूजयेत् । तत्र ।
"शिखा मधुलिकाख्यो च कीर्त्तिः मन्तिरेव च ।
चम्पका चमा चैव पञ्चैता शिखाः स्मृताः ॥"
मार्कण्डेयपुराणम् ।
"दम्पत्योर्यदनुस्मो न शिशुरे सूतिकागृहे ।
चतुर्दशममूर्द्धे मुण्डमर्दनं शिते ।
चतुर्थ तत्र वा भाल्लभद्रवासमभक्षणम् ।
यथा ... नाम ... मर्षितं हि ॥
वा ... नाम ... त्रिविक्रमः ।

तस्मात् संरक्षणं कार्य्यं यत्नतः सूतिकागृहे ॥"
यूपो वद्धच्छागस्तम्भः । पशुः छागः । छागजागरणं कार्य्यमित्येकवाक्यत्वात् ॥*॥ पाद्मे ।
"पायसं सर्पिषा मिश्रं द्विजेभ्यो यः प्रयच्छति ।
गृहं तस्य न रक्षांसि धर्षयन्ति कदाचन ॥"
इति ज्योतिस्तत्त्वम् ॥
अन्यत् षष्ठीशब्दे द्रष्टव्यम् ॥

सूतिगृहं, क्ली, (सूत्याः प्रसवस्य गृहम् ।) प्रसवगृहम् । इति शब्दरत्नावली ॥

सूतिमासः, पुं, (सूतेः प्रसवस्य मासः ।) प्रसवमासः । तत्पर्य्यायः । वैजननः २ । इत्यमरः । २ । ६ । ३८ ।
"सूतिमासो वैजननो नवमो दशमोऽपि च ।"
इति जटाधरः ॥

सूतीगृहं, क्ली, (सूत्याः गृहम् ।) प्रसवागारः । इति शब्दरत्नावली ॥ (यथा, भागवते । १० । ८५ । २० ।
सूतीगृहे ननु जगाद भवानजो नौ
सञ्जज्ञ इत्यनुयुगं निजधर्म्मगुप्त्यै ॥")

सूत्कारः, पुं, (सूत् इति शब्दस्य कारः करणम् ।) अनुकरणशब्दविशेषः । सूत् इति शब्दं करोति । यथा, सीत्कारादिः ॥

सूत्थानः, त्रि, (सुष्ठु उत्थानं उद्‌योगो यस्य ।) चतुरः । इत्यमरः ॥ सुन्दरीत्थाने, क्ली ॥

सूत्वर, क्ली, सुरासन्धानम् । इति शब्दचन्द्रिका ॥

सूत्या, स्त्री (सू + क्यप् । निपातनात् साधुः ।) यज्ञस्नानम् । तत्पर्य्यायः । अभिषवः २ सवनम् ३ । इत्यमरः ॥ सोमलतारसपानम् । इति भरतः ॥

सूत्याशौचं, क्ली, (सूतिनिमित्तकमाशौचम् ।) जननाशौचम् । यथा,—
"दशाहाभ्यन्तरे बाले प्रमीते तस्य बान्धवैः ।
शावाशौचं न कर्त्तव्यं सूत्याशौच विधीयते ॥"
इति शुद्धितत्त्वम् ॥

सूत्र, त् क ग्रन्थने । इति कविकल्पद्रुमः ॥ (अदन्त चुरा०-पर०-सक०-सेट् ।) दीर्घी दन्त्यवर्गाद्यमध्यः । वेष्टने इत्यन्ये । सूत्रयति सूत्रापयति सूत्रेण हस्त लोकः । इति दुर्गादासः ॥

सूत्र, क्ली, (सूत्र्यतेऽनेनेति । सूत्रम् क ग्रन्थने + णिच् + "एरच् ।" इत्यच् । यद्वा षिवु तन्तुसन्ताने + "सिविमुच्योष्टेरू च ।" उणा० ४ । १६२ । इति ष्ट्रन् । टेरू च ।) वस्त्रारम्भकम् । सूता इति भाषा । तत्पर्य्यायः । तन्तुः २ । इत्यमरजटाधरौ ॥ सूत्रतन्तुः ३ । इति भरतधृतहारावली ॥ (यथा, रघुः । १ । ४ ।
"अथवा कृतवाग्द्वारे वंशेऽस्मिन् पूर्व्वसूरिभिः ।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः ॥"
यज्ञसूत्रम् । यथा, शिशुपालवधे । १ । ४८ ।
"बाल्यं व्यपेक्ष्य हितानि चरं सूत्रधारणम् ॥")
व्यवस्था । शास्त्रादिसूचनापत्र । इति मेदिनी ॥
सूत्रलक्षणं यथा,—

"स्वल्पाक्षरमसन्दिग्धं
... सारवद्विश्वतोमुखम् ।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः ॥"
इति ...
(कारणम् । निमित्तम् । यथा, भागवते । ६ । ४३ ।
त्वमेव धर्म्मार्थदुघाभिपत्तये
दक्षेण सूत्रेण ससर्ज्जिथाध्वरम् ॥")

सूत्रकण्ठः, पुं, (सूत्रं कण्ठे यस्य ।) खञ्जरीटः । कपोतः । इति मेदिनी ।

सूत्रकोणः, पुं, (सूत्रवत् कोणो यस्य) इति हारावली ॥

सूत्रकोणकः, पुं, (सूत्रकोण एव । स्वार्थे क) डमरुः । इति त्रिकाण्डशेषः ॥

सूत्रगण्डिका, स्त्री, (सूत्रं गण्डयतीति ण्वुल् ।) तन्तुवायोपकरणविशेषः । पण्णी २ । इति शब्दरत्नमाला ॥

सूत्रतन्तुः, पुं, (सूत्रमेव तन्तुः ।) सूत्रम् । हारावली ॥

सूत्रतर्कुटी, स्त्री, (सूत्रस्य तर्कुटी ।) इति जटाधरः ॥ टेको इति भाषा ॥

सूत्रधरः, पुं, (धरतीति । धृ + अच् । सूत्रस्य धरः ।) सूत्रधारः । इति केचित् ॥

सूत्रधारः, पुं, (सूत्रं धरति धारयति वा । धृ + णिच् वा + अण् ।) शचीपतिः । इन्द्रः । नाट्यस्य प्रस्तावनाकारः । स तु रङ्गभूमिं परिक्रम्य कीयकथासूत्रसूचकः । (यथा, साहित्यदर्पणे । ६ । २८३ ।
"पूर्व्वरङ्गं विधायैव सूत्रधारो निवर्त्तते ।
प्रविश्य स्थापकस्तद्वत् काव्यमास्थापयेत्ततः ॥")
शिल्पिभेदः । छुतार इति भाषा । इति मेदिनी ॥ स च ... जातः । इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे ।

सूत्रपुष्पः, पुं, (सूत्रार्थं पुष्पमस्य ।) कार्पासः । इति त्रिकाण्डशेषः ॥

सूत्रवीणा, स्त्री, (सूत्रवद्धा वीणा ।) वीणाभेदः । तत्पर्य्यायः । लावुकी २ । इति ... वली ॥

सूत्रभित्, पुं, (सूत्रं भिनत्तीति । भिद् + क्विप् ।)
सूत्रभिदः, कौषिकः । इति शब्दमाला ॥

सूत्रमध्यभूः, पुं, (सूत्रमध्यस्य भूः) यक्षधूपः । इति शब्दचन्द्रिका ॥

सूत्रयन्त्रं, क्ली (सूत्रस्य यन्त्रम् ।) सूत्रवेष्टनं तांत इति भाषा । यथा,—
"आयापनं सूत्रयन्त्र ... ।"
इति ...

सूत्रला, स्त्री, (सूत्रं लातीति । ला + क ।) तर्कुटी । इति हारावली ॥

सूत्रवेष्टनं, क्ली, (वेष्ट्यतेऽनेनेति । वेष्ट + ल्युट् । सूत्रस्य वेष्टनम् । तन्तुवायोपकरणविशेषः ।) तामनी इति भाषा । तत्पर्य्यायः । ... इत्यमरः । २ । १० । २८ । ... भरतः ॥

।, [न्] पुं, सुष्ठु त्रायते इति । सु+त्रै+
धातुभ्यो मनिन् ।" उणा० ४ । १४४ ।
मनिन् । पक्षे उपसर्गस्य दीर्घत्वम् ।)
। इत्यमरः । १ । १ । ४५ ॥
।, स्त्री,(सूत्रस्य आली श्रेणिर्यत्र ।) गल-
। तत्पर्य्यायः । गलमेखला २ । इति
वली ॥
न्] पुं, (सूत्रमस्यास्तीति । सूत्र + इनिः ।
: । इति त्रिकाण्डशेषः॥सूत्रविशिष्टे, त्रि॥
,(सूदयति रसानिति । सूद क्षरणे + णिच्
च् ।) सूपकारः । (यथा, महाभारते ।
।३४ । २१ ।
ाद्दानित्यमुद्युक्तमिष्वस्त्रं प्रति फाल्गुनम्
य वचनं द्रौणी रहः सूदमभाषत ॥")
नम् । इत्यमरः । ३ । ३ । ८० ॥ (यथा,
भारते । १ । १२८ । ३४ ।
ं भोज्यञ्च पेयञ्च चोष्यं लेह्यमथापि वा ।
क्षतं नरैस्तत्र कुशलैः सूदकर्म्मणि ॥")
। इति विश्वः ॥ सारथ्यम् । अपराधः ।
: । पापम् । इत्यजयपालः ॥
स्त्री, (सूद+ल्युट् ।) अङ्गीकरणम् ।
नम् । (यथा, हरिवंशे । १६३ । ९२ ।
ाायाम्नं प्रयच्छामि वधार्थं शम्बरस्य च ।
यं कवचं तस्य प्रयच्छासुरसूदने ॥")
क्षेपणम् । षूदधातोरनट्प्रत्ययेन निष्पन्नम् ॥
ते, त्रि । (यथा, महाभारते । १।१८।२० ।
त्र दिव्यं धनुर्दृष्ट्वा नरस्य भगवानपि ।
तयामास तच्चक्रं दितिदानवसूदनम् ॥")
ाला, स्त्री, (सूदस्य शाला ।) पाकशाला ।
ा,—
दशाला रसवती पाकस्थानं महानसम् ॥"
इति हेमचन्द्रः ॥
ध्यक्षः, पुं, (सूदानां सूपकाराणामध्यक्षः ।)
मशालाध्यक्षः । तत्पर्य्यायः । पौरोगवः १ ।
त हेमचन्द्रः ॥ पुरोगमः २ । इति शब्द-
ावली ॥ तल्लक्षणं यथा,—
ाशार्थ्यः शुचिर्दक्षश्चिकित्सितविदांवरः ।
ाास्त्रविशेषज्ञः सूदाध्यक्षः प्रशस्यते ॥"
इति मात्स्ये १९८ अध्यायः ॥
, क्ली,(षू यो ङ य सूतौ + क्तः ।) प्रसवः ।
पम् । विकसिते, त्रि । इति विश्वमेदिन्यौ ॥
, त्रि, (षू + क्तः । "ओदितश्च ।" ८।२।४५।
त निष्ठातस्य नः ।) जातः । इति मुग्धबोध-
ाकरणम् ॥
वान्, [त्] त्रि, (षू + क्तवतु ।) जातः । इति
[illegible]
ा, स्त्री, (सूयते स्मेति । षू + क्तः । टाप् ।)
[illegible] ([illegible] "[illegible] दीर्घश्च ।"
उणा० ३ । १३ । इति नः । दीर्घश्च धातोः ।)
[illegible] । [illegible] । इति मेदिनी ।
[illegible]
[illegible] । इति [illegible] ।

(यथा, भागवते । १ । १७ । ३८ ।
"अभ्यर्थितस्तदा तस्मै स्थानानि कलये ददौ ।
द्यूतं पानं स्त्रियः सूना यत्राधर्म्मश्चतुर्व्विधः ॥")
जाता । इति सूनशब्दार्थदर्शनात् । सूनाप्रका-
राणि तत्पापनाशकानि च पञ्चसूनाशब्दे
द्रष्टव्यानि ॥
सूनी,[न्]पुं.(सूना अस्त्यस्येति । इनिः ।) व्याधः ।
मांसविक्रयी । (यथा, याज्ञवल्क्ये । १।१४१ ।
"प्रतिग्रहे सूनिचक्रिध्वजिवेश्यानराधिपाः ।
दुष्टा दशगुणं पूर्व्वात् पूर्व्वादेते यथाक्रमम् ॥")
सूनुः, पुं, (सूयते इति । षू+"सुवः कित् ।"
उणा० ३ । ३५ । इति नुः । स च कित् ।)
पुत्रः । (यथा, रघुः । १ । ८५ ।
"सूनुः सूनृतवाक् स्रष्टुः विससर्ज्जोदितश्रियम् ॥")
अनुजः । सूर्य्यः । इति मेदिनी ॥ अर्कवृक्षः ।
इत्यमरः ॥
सूनुः, } स्त्री, (षू+नुः । वा ऊङ् ।) कन्या ।
सूनूः, } इति हेमचन्द्रः ॥
सूनृतं,क्ली,(सुष्ठु नृत्यत्यनेनेति।सु+नृत्+घञर्थे क ।
उपसर्गस्य दीर्घः ।)सत्यप्रियवाक्यम् । इत्यमरः ।
१।६।१८॥ (यथा, साहित्यदर्पणे । ३ । १५५ ।
"भाषते सूनृतं स्निग्धमनुरक्ता नितम्बिनी ॥")
मङ्गलम् । इत्यजयः ॥ तद्वति, त्रि । (यथा,
भागवते । १ । १९ । ३१ ।
"प्रणम्य मूर्द्ध्नावहितः कृताञ्जलि-
र्नत्वा गिरा सूनृतयान्वपृच्छत ॥")
सून्मदः, त्रि, (सुष्ठु उन्मदः ।) उन्मत्तः । उन्म-
दिष्णुः । इत्यमरे उन्मदशब्दटीकायां भरतः ।
३ । १ । २० ॥
सून्मादः, त्रि, (सुष्ठु उन्मादः ।) उन्मादरोग-
विशिष्टः । इत्यमरे उन्मदशब्दटीकायां रमा-
नाथः ॥
सूपः,पुं,(सौतिरसानिति । षु + "कुसुभ्यां निच्च ।"
उणा० ३ । २६ । इति पः । चकारात् कित्
दीर्घत्वञ्च ।) व्यञ्जनविशेषः । डाल इति भाषा ।
सूदः । इति मेदिनी ॥ भाण्डम् । शायकम् ।
इति शब्दरत्नावली ॥ * ॥ अथ दाली ।
"दलितन्तु शमाधान्यं दालिर्दालिश्च कियामुभे ।
दाली तु सलिले सिद्धा लवणाद्रकहिङ्गुभिः ।
संयुक्ता सूपनाम्नी स्यात् कथ्यते तद्गुणा अथ ॥
सूपो विष्टम्भको रूक्षः शीतस्तु स विशेषतः ।
निस्तुषा भृष्टसिद्धः स लाघवं सुतरां व्रजेत् ॥"
इति भावप्रकाशः ॥
सूपकारः, पुं, (सूपं करोतीति । कृ + अण् ।)
पाककर्त्ता । तत्पर्य्यायः । बल्लवः २ आरा-
लिकः ३ आन्धसिकः ४ सूदः ५ औदनिकः ६
गुणः ७ । इत्यमरः । २ । ९ । २८ ॥ पाचकः
८ । इति शब्दरत्नावली ॥ [illegible] ९ । [illegible]-
[illegible] ॥ [illegible] १० । इति हेमचन्द्रः ॥
अस्य लक्षणं यथा, मात्स्ये ।
"[illegible] - [illegible] ।
[illegible] ॥"

शूद्रपाकोपजीवी । यथा,ब्रह्मवैवर्त्ते प्रकृतिखण्डे
२७ अध्याये ।
"देवोपजीवाजीवी यः देवलश्च प्रकीर्त्तितः ।
शूद्रपाकोपजीवी यः सूपकारः प्रकीर्त्तितः ॥
सन्ध्यापूजाविहीनश्च प्रमत्तः पतितः स्मृतः ।
उक्तपूर्व्वप्रकारेण लक्षण वृषलीपतिः ॥
एते महापातकिनः कुम्भीपाकं प्रयान्ति ते ।
कुण्डान्यन्यानि ते यान्ति निबोध कथयामि
तान् ॥"
सूपधूपनं,क्ली,(सूपस्य धूपनमस्मादिति ।) हिङ्गु ।
इति त्रिकाण्डशेषः ॥
सूपपर्णी,स्त्री,(सूपकरं सूपस्य स्वादुताकरं पर्ण-
मस्याः । ङीप् ।) मुद्गपर्णी । इति रत्नमाला ॥
सूपश्रेष्ठः, पुं, (सूपेषु तत्साधनेषु श्रेष्ठः ।) मुद्गः ।
इति राजनिर्घण्टः ॥
सूपाङ्गं,क्ली, (सूपस्य अङ्गम् । तत्साधनत्वात् ॥
हिङ्गु । इति राजनिर्घण्टः ॥
सूमं,क्ली, (षू + "इषियुधीति ।"उणा०१।१४४।
इति मक् ।) क्षीरम् । आकाशम् । इति
मेदिनी ॥ जलम् । इति शब्दरत्नावली ॥
सूरः, पुं, (सूते जगदिति । षू + "सुसूधाञ्-
गृधिभ्यः क्रन् ।" उणा० २ । २४ । इति क्रन् ।)
सूर्य्यः । (यथा, ऋग्वेदे । १ । १६३ । २ ।
"सूरादश्वं वसवो निरतष्ट ॥")
अर्कवृक्षः । इत्यमरः।१।३।२८;२।४।८०॥ दृष्टा-
र्हत्पितृविशेषः । इति हेमचन्द्रः ॥ पण्डितः ।
इति केचित् ॥
सूरणः, पुं, शूरणः । इति शब्दरत्नावली ॥
कार्त्तिकमासे तस्य भक्षणनिषेधो यथा, कर्म्म-
लोचने ।
"मकरे मूलकञ्चैव सिंहे चालाबुकं तथा ।
कार्त्तिके शूरणञ्चैव मद्यो गोमांसभक्षणम् ॥"
सूरतः, त्रि, (सुष्ठु रमते इति । सु + रम + "मी
रमतेः क्तो दमे पूर्व्वपदस्य च दीर्घः ।" उणा०
५ । १४ । इति क्तः सुशब्दस्य च दीर्घः ।)
कृपालुः । इत्यमरः । ३ । १ । १५ ॥
सूरसूतः, पुं, (सूरस्य सूर्य्यस्य सूत सारथि ।)
अरुणः । स सूर्य्यसारथिः । इत्यमरः ।१।३।३२ ॥
सूरिः, पुं, (सूते महाकाव्यानीति । षू + "सूङः
क्रिः ।" उणा० ४ । ६४ । इति क्रिः ।)
पण्डितः । इत्यमरः । २ । ७ । ५ ॥ (यथा,
भागवते । १ । १ । १ ।
"जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः
स्वराट् ॥
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्
सूरयः ॥")
यादवः । सूर्य्यः । [illegible] ॥
सूरी, [न्] पुं, ([illegible] ।
[illegible] । इति शब्द-
रत्नावली ॥
सूरी, स्त्री, (सू + क्रिः । ङीप् ।) [illegible] ।
इति [illegible] । [illegible] । [illegible]

उज्ज्वलः। ४। ६४ ॥ * ॥ सूर्य्यस्य स्त्री। "यंयोगादाख्यायाम्।" ४।१।४८। इति ङीप्। सूर्य्यतिष्यागस्त्येति यलोपः। कुन्ती। इति व्याकरणम् ॥)

सूर्क्ष,नादरे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) रेफयुक्तः षष्ठस्वरी दन्त्यादिः। सूर्क्षति दुष्टं लोकः। सुसूर्क्ष। इति दुर्गादासः॥

सूर्क्षण, क्ली, (सूर्क्ष+ल्युट्।) अनादरः। इति शब्दरत्नावली॥

सूर्क्ष्य, अनादरे। ईर्ष्ये। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) दन्त्यादिर्दीर्घी रेफमध्यः। सूर्क्ष्यति सुसूर्क्ष्य। इति दुर्गादासः॥

सूर्क्ष्यः, पुं,(सूर्क्ष्यते अनाद्रियते इति। सूर्क्ष्य+घञ्।) माषः। इति शब्दरत्नावली॥

सूर्पः, पुं, क्ली, शूर्पः। इति शब्दरत्नावली॥ कुम्भपरिमाणम्। हिद्रोणपरिमाणम्। इति वैद्यकपरिभाषा॥

सूर्म्मी, स्त्री, शूर्म्मी। इतिकेचित्॥

सूर्य्यः,पुं,(सरति आकाशे सुवति कर्म्मणि लोकं प्रेरयति वा। सृ गतौ षू प्रेरणे वा+"राजसूयसूर्य्यमृषोद्येति।"३।१।११४। इति क्यप्प्रत्ययेन साधुः।) ग्रहविशेषः। अर्कपर्णः। इति मेदिनी॥ बलिपुत्रः। इति केचित्॥ (यथा, हरिवंशे। ३। ७४।

"बलेः पुत्रशतञ्चासीत् बाणज्येष्ठं नराधिप।
धृतराष्ट्रश्च सूर्य्यश्च चन्द्रमाश्चेन्द्रतापनः॥")

दानवविशेषः। यथा,—

"अभवन् दनुपुत्राश्च वंशे ख्याता महासुराः।
विप्रचित्तिप्रधानास्ते शतं तीव्रपराक्रमाः॥
स्वर्भानुर्वृषपर्व्वा च कुहदश्च महासुरः।
धृतराष्ट्रश्च सूर्य्यश्च दनुमानिन्द्रतापनः॥"

इति वह्निपुराणे काश्यपीयवंशः॥

अस्यविशेषस्य पर्य्यायो यथा। सूरः२ अर्य्यमा३ आदित्यः४ द्वादशात्मा५ दिवाकरः६ भास्करः७ अहस्करः८ ब्रध्नः९ प्रभाकरः१० विभाकरः ११ भास्वान्१२ विवस्वान्१३सप्ताश्वः१४ हरिदश्वः १५ उष्णरश्मिः १६ विकर्त्तनः १७ अर्कः१८ मार्त्तण्डः१९ मिहिरः२० अरुणः२१ पूषा २२ द्युमणिः २३ तरणिः २४ मित्रः२५ चित्रभानुः २६ विरोचनः २७ विभावसुः २८ ग्रहपतिः २९ त्विषाम्पतिः ३० अहःपतिः ३१ भानुः ३२ हंसः ३३ सहस्रांशुः ३४ तपनः ३५ सविता३६ रविः३७। इत्यमरः।१।३।२८—३१॥ शूरः ३८ भगः ३९ वृध्नः ४० पद्मिनीवल्लभः४१ हरिः ४२ दिनमणिः ४३ चण्डांशुः ४४ सप्तसप्तिः ४५ अंशुमान् ४६ कालकृत् ४७ कर्म्मसाक्षी ४८ जगच्चक्षुः ४९ भानुमान् ५० लोकबान्धवः ५१ ग्रहराजः ५२ ज्योतिष्मान् ५३ ... ५४ तापनः ५५ विश्वपः ५६ खद्योतः ५७ दिवामणिः ५८ कर्म्मसाक्षी ५९ ... ६० दस्युः ६१ ... ६२ दिननाथः ६३ ... ६४ भास्करः ६५ ... ६६

तमोनुदः ६७ रत्नाधारः ६८ प्रतिदिवा ६९ ज्योतिःपीथः ७० इनः ७१। इति शब्दरत्नावली॥ कर्म्मसाक्षी ७२ जगच्चक्षुः ७३ त्रयीतपः ७४ प्रद्योतनः ७५ खद्योतः ७६ लोकबान्धवः ७७ पद्मिनीकान्तः ७८ अंशुहस्तः ७९ पद्मपाणिः ८० हिरण्यरेताः ८१ पीतः ८२ अद्रिः ८३ अगः ८४ हरिवाहनः ८५ अम्बरीषः ८६ धामनिधिः ८७ हिमारातिः ८८ गोपतिः ८९ कुञ्जारः ९० प्लवगः ९१ सूनुः ९२ तमोपहः ९३ गभस्तिः ९४। इति जटाधरः॥ * ॥ अस्य वर्णः रक्तश्याममिश्रितः। स च पूर्व्वदिक्-पुरुष-क्षत्रियजाति-सत्त्वगुण-कटुरससिंहराशीनामधिपतिः। धान्यादिसुवर्णद्रव्यचतुष्पदगोभूमिस्वामी। चतुष्कोणाकृतिः। मध्याह्नकाले प्रबलः। ह्रस्वः। रणचारी। तिक्तरसप्रियश्च। इति बृहज्जातकादयः॥ * ॥ ग्रहयज्ञे तु। वर्त्तुलाकारः। मण्डलमध्यस्थः। अस्य जन्मभूमिः कलिङ्गदेशः। गोत्रं काश्यपः। वर्णः रक्तः। पूर्व्वमुखः। जातिः ब्राह्मणः। बलिर्गुडौदनम्। धूपो गुग्गुलुः। गन्धो रक्तचन्दनम्। समित् अर्कः। अस्य ध्यानम्।

"क्षत्रियं काश्यपं रक्तं कालिङ्गं द्वादशाङ्गुलम्।
पद्महस्तद्वयं पूर्व्वाननं सप्ताश्ववाहनम्।
शिवाधिदैवतं ध्यायेद्वह्निप्रत्यधिदैवतम्॥"

अस्य मन्त्रः।

"आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्त्यञ्च हिरण्ययेन सविता रथेन देवो याति भुवनानि पश्यन्॥" दक्षिणा धेनुः। इति ग्रहयागसंस्कारतत्त्वे॥ * ॥ तस्योत्पत्त्यादिर्यथा,—

"अथाम्लवीभादाभार्य्या काश्यपं मुनिसत्तमम्।
सतोयमेघगम्भीरा वागुवाचाशरीरिणी॥
मारितञ्च यतः प्रोक्तमेतदण्डं त्वयादितिम्।
तस्मान्मुने सुतस्तेऽयं मार्त्तण्डाख्यो भविष्यति॥
सूर्य्याधिकारञ्च विभुर्जगत्येष करिष्यति।
हनिष्यत्यसुराश्चायं यज्ञभागहरानरीन्॥
देवा निशम्येति वचो गगनात् समुपागतम्।
प्रहर्षमतुलं याता दानवाश्च हतौजसः॥
ततो युद्धाय दैतेयानाजुहाव शतक्रतुः।
सह देवैर्मुदा युक्तो दानवाश्च तमभ्ययुः॥
तेषां युद्धमभूद्घोरं देवानामसुरैः सह।
शस्त्रास्त्रदीप्तिसन्दीप्तसमस्तभुवनान्तरम्॥
तस्मिन् युद्धे भगवता मार्त्तण्डेन निरीक्षिताः।
तेजसा दह्यमानास्तु भस्मीभूता महासुराः॥
ततः प्रहर्षमतुलं प्रापुः सर्व्वे दिवौकसः।
तुष्टुवुस्तेजसो योनिं मार्त्तण्डमदितिं तथा॥
स्वाधिकारं ततः प्रापुर्यज्ञभागांश्च पूर्व्ववत्।
भगवानपि मार्त्तण्डः स्वाधिकारमथाकरोत्॥
कदम्बपुष्पवद्भास्वानधश्चोर्द्ध्वञ्च रश्मिभिः।
वृतोऽग्निपिण्डसदृशो दधे नातिस्फुटं वपुः॥"

इति मार्कण्डेयपुराणे मार्त्तण्डोत्पत्तिः॥ * ॥

मार्कण्डेय उवाच।

"अथ तस्मै ददौ कन्यां संज्ञां नाम विवस्वते।

प्रसाद्य प्रणतो भूत्वा विश्वकर्म्मा
विवस्वतस्तु संभूतौ मनू द्वौ चरितं ...
पूर्व्वमेव तवाख्यातं मयैतद्विस्तरं द्विज।
... तस्यां जनयामास
द्वौ पुत्रौ ...
मनुर्व्वैवस्वतो ज्येष्ठः श्राद्धदेवः प्रजापतिः।
तेषां यमो यमी चैव यमजौ संबभूवतुः।
तत्तेजोऽप्यधिकं चैव मार्त्तण्डस्य ...
असहन्ती तु तत्तेजः स्वां छायां ...

संज्ञोवाच।

अहं यास्यामि भद्रं ते स्वमेव भवनं ...
निर्व्विकारं त्वयाप्यत्र ...
इमौ च बालकौ मह्यं कन्या
संभाव्या नैव ...

छायोवाच।

आकेशग्रहणाद्देवि ...
आख्यास्यामि मतं तुभ्यं ...
इत्युक्ता छायया संज्ञा जगाम ...
तत्रावसत् पितुर्गेहे कञ्चित् कालं ...
भर्त्तुः समीपं याहीति ...
अगच्छद्वडवा भूत्वा कुरून् ...
तत्र तेपे तपः साध्वी निराहारा ...
पितुः समीपं याताया:
तद्रूपधारिणी छाया भास्करं ...
तस्याञ्च भगवान् सूर्य्यः संज्ञेयमिति ...
तथैव जनयामास पुत्रौ द्वौ कन्यकां ...
पूर्व्वजस्य मनोस्तुल्यः सावर्णिस्तेन ...
यस्तयोः प्रथमं जातः पुत्रयोर्द्विजसत्तम
द्वितीयो योऽभवत्तान्यः स ...
कन्याभूत्तपती या तां वव्रे संवरणो नृपः।
संज्ञा तु पार्थिवी तेषामात्मजानां ...
स्नेहं न पूर्व्वजातानां तथा कृतवती ...
मनुस्तत् क्षान्तवांस्तस्या यमस्तस्या ...
बहुशः पीड्यमानस्तु पितुः पत्न्या सुदुःखितः।
स वै कोपाच्च बाल्याच्च ...
पदा सन्तर्ज्जयामास छायां संज्ञां ...
तं शशाप ततः क्रुद्धा संज्ञा सा ...

छायोवाच।

पदा तर्ज्जयसि यस्मात् पितृभार्य्यां यशस्विनीम्।
तस्मात्तवैष चरणः पतिष्यति न संशयः।
यमस्तु तेन शापेन भृशं पीड़ितमानसः।
मनुना सह धर्म्मात्मा सर्व्वं पित्रे न्यवेदयत्।

यम उवाच।

स्नेहेन तुल्यमस्मासु माता देव न वर्त्तते ...
विसृज्य ज्यायसोऽस्मान् कनीयांसं बुभूषति।
तस्या मयोद्यतः पादो न तु देहे निपातितः।
बाल्याद्वा यदि वा मोहात् ...
शप्तोऽहं तात कोपेन जनन्या ...
ततो न मन्ये जननीमेनां ...
निर्गुणेष्वपि पुत्रेषु न माता निर्गुणा भवेत्।
पादस्ते पततां पुत्र ...
तव प्रसादाच्चरणो न पतेत् ...

५ [illegible] मेऽद्य तथा चिन्तय गोपते ॥
रविरुवाच ।
[illegible]ऽत्र पुत्र भविष्यत्यत्र कारणम् ।
[illegible]लामाविशत् क्रोधो धर्म्मज्ञं सत्यवादिनम् ॥
[illegible] शापानां प्रतिघातो हि विद्यते ।
मात्राभिशप्तानां क्वचिच्छापनिवर्त्तनम् ॥
[illegible]क्यमेतन्मिथ्या तु कर्त्तुं मातुर्वचस्तव ।
[illegible]चित्ते संविधास्यामि पुत्रस्नेहादनुग्रहम् ।
[illegible]यो मांसमादाय प्रयास्यन्ति महीतलम् ।
तस्या वचः सत्यं त्वञ्च त्राता भविष्यसि ॥
मार्कण्डेय उवाच ।
[illegible]देत्यस्त्वब्रवीच्छायां किमर्थं तनयेषु वै ।
[illegible] ष्वेकस्य क्रियते त्वया ॥
न चैषां जननी संज्ञा कापि त्वमागता ।
[illegible]विगुणेष्वपत्येषु माता शापं न दास्यति ॥
[illegible] परिहरन्तीव नाचचक्षे विवस्वतः ।
[illegible] समाधाय युक्तस्तत्त्वमवैक्षत ॥
[illegible]पुत्रं दृष्ट्वा छायासंज्ञा दिनाधिपम् ।
न कम्पिता ब्रह्मन् यथावृत्तं न्यवेदयत ॥
[illegible]स्वाम्तु तदा क्रुद्धः श्रुत्वा श्वशुरमभ्यगात् ।
[illegible]पि तं यथान्यायमर्च्चयित्वा दिवाकरम् ।
[illegible]ष्टु कामं रोषेण सान्त्वयामास सुव्रतः ॥
विश्वकर्म्मा उवाच ।
[illegible]तितेजसा व्याप्तमिदं रूपं सुदुःसहम् ।
[illegible]शक्ती ततः संज्ञा वने चरति वै तपः ॥
[illegible]ति तां भवानद्य स्वां भार्य्यां शुभचारिणीम् ।
[illegible]र्थं भवतोऽरण्ये चरन्ती सुमहत्तपः ॥
[illegible]मे ब्रह्मणो वाक्यात् यदि ते देव रोचते ।
[illegible] निवर्त्तयाम्यद्य तव कान्तं दिवस्पते ॥
मार्कण्डेय उवाच ।
[illegible] हि भास्वतो रूपं प्रागासीत् परि-
मण्डलम् ।
[illegible]त्युक्तेति तं प्राह त्वष्टारं भगवान् रविः ॥
[illegible]
[illegible]

ततश्च नासिकायोगात् तयोस्तत्र समेतयोः ।
नासत्यदस्रौ तनयावश्ववक्त्राद्विनिर्गतौ ॥
रेतसोऽन्ते च रेवन्तः खड्गी धन्वी तनुत्रभृक् ।
अश्वारूढः समुत्पन्नो वाणतूणसमन्वितः ॥
ततः स्वरूपमतुलं दर्शयामास भानुमान् ।
तस्याश्च सा समालोक्य स्वरूपं मुदमाददौ ॥
स्वरूपधारिणीं चैनामानिनाय निजाश्रयम् ।
संज्ञां भार्य्यां प्रीतिमतीं भास्करो वारितस्करः ॥
ततः पूर्व्वसुतो योऽस्याः सोऽभूद्वैवस्वतो मनुः ।
द्वितीयश्च यमः शापात् पापदर्शनतत्परः ॥
कृमयो मांसमादाय पादतस्ते महीतलम् ।
पतिष्यन्तीति शापान्तं तस्य चक्रे पिता स्वयम् ॥
धर्म्मदृष्टिर्यतश्चासौ समो मित्रे तथाहिते ।
ततो नियोगे तं याम्ये चकार तिमिरापहः ॥
यमुनाञ्च नदीञ्चक्रे कलिन्दान्तरवाहिनीम् ।
अश्विनौ देवभिषजौ कृतौ पित्रा महात्मना ॥
गुह्यकाधिपतित्वे च रेवन्तो विनियोजितः ॥
रेवन्तमप्याह ततो भगवान् लोकभावनः ।
त्वमप्यशेषलोकस्य पूज्यो वत्स भविष्यसि ॥
अरण्येऽग्नौ महादावे वैरिदस्युभयेषु च ।
त्वां स्मरिष्यन्ति ये मर्त्त्या मोक्ष्यन्ते ते महापदः ॥
क्षेमं वृद्धिं सुखं राज्यमारोग्यं कीर्त्तिमुन्नतिम् ।
नराणां परितुष्टस्त्वं पूजितः संप्रदास्यसि ॥
छायासंज्ञासुतश्चापि सावर्णः सुमहायशाः ।
भाव्यः सोऽनागते काले मनुः सावर्णिकोऽष्टमः ॥
मेरुपृष्ठे तपो घोरमद्यापि चरति प्रभुः ।
भ्राता शनैश्चरस्तस्य ग्रहोऽभूद्भास्करात्मजः ॥
यवीयसी च या कन्या तस्य चासीद्द्विजोत्तम ।
अभवत् सा सरिच्छ्रेष्ठा तपती लोकपावनी ॥
यस्तु ज्येष्ठो महाभाग [illegible] साम्प्रतम् ।
विस्तरं तस्य वक्ष्यामि मनोर्वैवस्वतस्य च ॥
य इदं जन्म देवानां शृणुयाद्वा पठेत्तदा ।
विवस्वतस्तु जातानां रवेर्माहात्म्यमेव च ।
आपदं प्राप्य मुच्येत प्राप्नुयाच्च महद्यशः ।
अहोरात्रकृतं पापं [illegible] शमयति श्रुतम् ।
माहात्म्यमादिदेवस्य मार्त्तण्डस्य महात्मनः ॥"
इति मार्कण्डेयपुराणे मार्त्तण्डमाहात्म्या-
ध्यायः ॥ अपि च ।
प्रजापाल उवाच ।
"कथमस्य भवेन्मूर्त्तिर्देवस्य ज्योतिषो द्विज ।
एतन्मे संशयं छिन्धि [illegible] ॥
महातपा उवाच ।
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

अतोऽसौ भास्करः प्रोक्तः प्रकाशाच्च प्रभाकरः ।
दिवा दिवस इत्युक्तस्तत्कारित्वाद्दिवाकरः ।
सर्व्वस्य जगतश्चादिरादित्यस्तेन उच्यते ॥
एतस्य द्वादशादित्याः संभूतास्तेजसा पृथक् ।
प्रधान एक एवायं जगत्सु परिवर्त्तते ॥
तं दृष्ट्वा जगतो व्याप्तिं कुर्व्वाणं परमेश्वरम् ।
तस्यैवान्तःस्थिता देवा विनिष्क्रम्य स्तुतिं जगुः ॥"
इति वाराहे आदित्योत्पत्तिनामाध्यायः ॥*॥
उत्तरायणदक्षिणायनयोरनुलोमप्रतिलोमं गत्वा-
न्यानि मण्डलानि प्रतिमासं सूर्य्यरथस्याधि-
कारिगणाश्च यथा,—
"अशीतिमण्डलशतं काष्ठयोरन्तरं द्वयोः ।
आरोहणावरोहाभ्यां भानोरब्देन या गतिः ॥
स रथोऽधिष्ठितो देवैरादित्यैर्ऋषिभिस्तथा ।
गन्धर्व्वैरप्सरोभिश्च ग्रामणीसर्पराक्षसैः ॥
धाता कृतस्थला चैव पुलस्त्यो वासुकिस्तथा ।
रथभृद्ग्रामणीर्हेतिस्तुम्बुरुश्चैव सप्तमः ॥
एते वसन्ति वै चैत्रे मधुमासे सदैव हि ।
मैत्रेय स्यन्दने भानोः सप्त मासाधिकारिणः ॥
अर्य्यमा पुलहश्चैव रथौजाः पुञ्जिकस्थला ।
प्रहेतिः कच्छनीरश्च नारदश्च रथे रवेः ।
माधवे निवसन्त्येते शुचिसंज्ञे निबोध मे ॥
मित्रोऽत्रिस्तक्षको रक्षः पौरुषेयोऽथ मेनका ।
हाहा रथस्वनश्चैव मैत्रेयैते वसन्ति वै ॥
वसिष्ठो वरुणो रम्भा सहजन्या हुहुर्बुधः ।
रथचित्रस्तथा शुक्रे वसन्त्याषाढसंज्ञिते ॥
इन्द्रो विश्वावसुः स्रोत एलापत्रस्तथाङ्गिराः ।
प्रम्लोचा च नभस्येते सर्पश्चार्के वसन्ति हि ॥
विवस्वानुग्रसेनश्च भृगुरापूरणस्तथा ।
अनुम्लोचा शङ्खपालो व्याघ्रो भाद्रपदे तथा ॥
पूषा च सुरुचिर्धाता गौतमोऽथ धनञ्जयः ।
सुषेणोऽन्यो घृताची च वसन्त्याश्वयुजे रवौ ॥
विश्वावसुर्भरद्वाजः पर्जन्यैरावतौ तथा ।
विश्वाची सेनजिच्चापि कार्त्तिके चाधिकारिणः ॥
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]

[illegible]

[illegible] विशा ॥

[illegible]

[illegible] तथा [illegible] यथा

[illegible]

ेन गतियोगेन यदा काष्ठान्तु दक्षिणाम्।
र्वागच्छत् पतङ्गोऽसौ वामकोष्ठेऽन्तरेऽहनि॥
ध्येन पुष्करस्याथ भ्रमते दक्षिणायने।
नसोत्तरमेरोस्तु अन्तरं त्रिगुणन्तु तत्॥७॥
र्ते दक्षिणायान्तु काष्ठायान्तु निबोधत।
कोट्यः प्रसंख्याता योजनैः परिमण्डलम्॥
ा शतसहस्राणि चत्वारिंशच्च पञ्च च।
होरात्रा पतङ्गस्य गतिरेषा विधीयते॥
क्षिणाद्विनिवृत्तोऽसौ विषुवस्थो यदा रविः।
ीरोदस्य समुद्रस्य उत्तरातो दिशञ्चरन्।
ण्डलं विषुवञ्चापि योजनैस्तन्निबोधत॥
ाः कोट्यस्तु संपूर्णं विषुवस्याथ मण्डलम्।
ा शतसहस्राणां त्रिंशत्येकाधिका पुनः॥८॥
ावणे चोत्तरां काष्ठां चित्रभानुर्यदा भवेत्।
ोमेदकस्य द्वीपस्य उत्तराञ्च दिशञ्चरन्॥
त्तरायाः प्रमाणन्तु काष्ठाया मण्डलस्य तु।
क्षिणोत्तरमध्यानि तानि विद्याद् यथाक्रमम्।
ानं शरद्वसन्तयोर्मध्ये तद्वैरावतमुत्तमम्।
स्थानरं दक्षिणतो निर्दिष्टमिह तत्त्वतः॥
ागवीथ्युत्तरा वीथी अजवीथ्याश्च दक्षिणे।
ौ चाषाढ़मूलन्तु अजवीथ्युदयास्त्रयः॥
भिजित् पूर्व्वतः स्वाती नागवीथ्युत्तरास्त्रयः।
श्विनी कृत्तिका याम्या नागवीथ्युत्तरा स्मृता॥
ोहिण्यार्द्रा मृगशिरो नागवीथीरिति स्मृता।
ुष्याश्लेषा पुनर्व्वसुर्वीथीरैरावती स्मृता॥
ीसृतु वीथयो ह्येता उत्तरो मार्ग उच्यते।
ूर्वा उत्तरफल्गुन्योर्मघा चैवार्षभी भवेत्॥
ूर्व्वोत्तरे प्रोष्ठपदे गोवीथी रेवती स्मृता।
वणा तु धनिष्ठा च वारुणञ्च जरद्गवम्।
ताश्च वीथयस्तिस्रो मध्यमो मार्ग उच्यते॥
हस्ता चित्रा तथा स्वाती नागवीथीरिति
स्मृता।
[illegible]
[illegible]

अष्टन्तु चरते नाभिं सूर्य्यो वै मण्डलक्रमात्॥
कुलालचक्रपर्यन्तो यथा रविः शशी तथा।
दक्षिणे चक्रवत् सूर्य्यस्तथा शीघ्रं निवर्त्तते॥
तस्मात् प्रकृष्टां भूमिन्तु कालेनाल्पेन गच्छति।
सूर्य्यो द्वादशभिः शीघ्रं मुहूर्त्तैर्दक्षिणायने॥
त्रयोदशार्द्धमृक्षाणां मध्ये चान्तरमण्डलम्।
मुहूर्त्तैस्तानि ऋक्षाणि नक्तमष्टादशैश्चरन्॥
कुलालचक्रमध्यस्थो यथामन्दं प्रसर्पति।
उदगयने तथा सूर्य्यः स सर्पेत् मन्दविक्रमः॥
तस्माद् दीर्घेण कालेन भूमिं सोऽल्पां प्रसर्पति
सूर्य्योऽष्टादशभिर्वद्धो मुहूर्त्तैरुदगायने॥
त्रयोदशानां मध्ये तु ऋक्षाणां चरते रविः।
मुहूर्त्तैस्तानि ऋक्षाणि रात्रौ द्वादशभिश्चरन्।
ततो मन्दतरं ताभ्यां चक्रन्तु भ्रमतां पुनः।
मृत्पिण्ड इव मध्यस्थो भ्रमतेऽसौ ध्रुवस्तथा॥
मुहूर्त्तैस्तावत् त्रिंशद्भिरहोरात्रं ध्रुवं भ्रमन्।
उभयोः काष्ठयोर्मध्ये भ्रमते मण्डलानि तु॥
उत्तरे प्रक्रमेऽर्कस्य दिवा मन्दगतिः स्मृता।
तस्यैव तु पुनर्नक्तं शीघ्रा सूर्य्यस्य वै गतिः॥
दक्षिणे प्रक्रमे चापि दिवा शीघ्रं विधीयते।
गतिः सूर्य्यस्य वै नक्तं मन्दा चापि पुनः स्मृता।
एवं गतिविशेषेण विभजंस्तावरात्राणि तु।
अजवीथ्या दक्षिणं यल्लोकालोकस्य चोत्तरम्।
लोकसन्तानको ह्येष वैश्वानरपथाद्बहिः।
व्युष्टा यावत् प्रभा सौरी पुष्करात् सम्प्रवर्त्तते।
पार्श्वेभ्यो बाह्यतस्तावल्लोकालोकश्च पर्व्वतः।
योजनानां सहस्राणि दशोर्द्ध्वं चोच्छ्रितो गिरिः।
प्रकाशश्चाप्रकाशश्च सर्व्वतः परिमण्डलः।
नक्षत्रचन्द्रसूर्य्याश्च ग्रहास्ताराग[illegible] सह।
अभ्यन्तरे प्रकाशन्ते लोकालोकस्य वै गिरेः।

इति मात्स्ये १२४ अध्यायः।

अस्य राहुग्रस्तादिकारण यथा,—

मनुरुवाच।

"राहुग्रस्तः कथं सूर्य्यश्चन्द्रो वापि जनार्दन।
महदन्तु कथं याति चतुर्दशे निशाकरे।
वेदानां [illegible] [illegible] त्वयि सदा स्थिता।

श्रीभगवान् उवाच।

शृणु मनु प्रवक्ष्यामि यथाकथा पुरातनीम्।
[illegible]

उवाच सूर्य्यं रक्ताक्षः कोपज्वालासमन्वितः॥
रेणुका लज्जिता तत्र विधाय वाससा मता॥

यमदग्निरुवाच।

यस्य मे नित्यं नस्नाने रसभङ्गस्त्वया कृतः।
मम शापात् पापहत्वो राहुग्रस्तो भविष्यति॥
दृष्ट्वा त्वां मेघगणाः सर्व्वे दूरीभूता भवन्ति ते।
त्वामाच्छन्नं करिष्यन्ति वायुना प्रेरितास्तथा॥
स्वतेजसा भवान् सर्व्वो हततेजा भविष्यति।
मेघाच्छन्नः स्वल्पतेजा राहुग्रस्तो भवान् भव॥
ब्राह्मणस्य वचः श्रुत्वा भगवान् भास्करः स्वयम्
अस्तः पुटाञ्जलिर्भूत्वा तुष्टाव मुनिपुङ्गवम्॥

सूर्य्य उवाच।

अहमेव त्वया शप्तो मया शप्तो भवान् भव।
अन्यथा मां वदन्त्येवं सूर्य्यं निस्तेजसं जनाः॥
पराभूतः [illegible] भविष्यसि द्विजेश्वरः।
मरणं [illegible] भविष्यति॥
सूर्य्यस्य वचनं श्रुत्वा [illegible] पुनः।
तं [illegible] च स्थितो
भवान्॥
उभयोः [illegible]।
[illegible] ब्रह्मा विधाता [illegible]॥
[illegible] ब्रह्मा [illegible]।
[illegible]॥

ब्रह्मोवाच।

[illegible]

प्रभूतं विमलं सारं समाराध्यं परमसुखं विन्यस्य आधारशक्त्यादि धं सूर्य्यमण्डलाय द्वादशकलात्मने नमः इत्यन्तं विन्यसेत्। तथा च निबन्धे।
"पीठे क्रमे च प्रथमं दिक्षु मध्ये च संयजेत्।
प्रभूतं विमलं सारं समाराध्यमनन्तरम्॥
परमादि सुखं पीठं स्वविम्बान्तं प्रकल्पयेत्॥"
ततः केशरेषु मध्ये च वां दीप्तायै नमः॥
एवं वीं सूक्ष्मायै वूं जयायै वें भद्रायै वैं विभूत्यै वों विमलायै वौं अमोघायै वं विद्युतायै वः सर्व्वतोमुख्यै। तथा च निबन्धे।
"दीप्ता सूक्ष्मा जया भद्रा विभूतिर्विमला पुनः
अमोघा विद्युता सर्व्वतोमुखी पीठशक्तयः॥
दीप्तदीपशिखाकारान् बीजन्यासान् विदुः क्रमात्।
अक्लीवकस्वविलयस्वरान् बिन्द्वग्निसंयुतान्॥"
तदुपरि ब्रह्मविष्णुशिवात्मकाय सौराय योगपीठाय नमः। यथा च शारदायाम्।
"वदेत् पदं चतुर्थ्यन्तं ब्रह्मविष्णुशिवात्मकम्।
सौराय योगपीठाय नमःपदमनन्तरम्॥
पीठमन्त्रोऽयमाख्यातो दिनेशस्य जगत्पतेः॥"
तत ऋष्यादिन्यासः। शिरसि देवभागऋषये नमः। मुखे गायत्रीच्छन्दसे नमः। हृदि आदित्याय देवतायै नमः। निबन्धे।
"देवभागो मुनिः प्रोक्तो गायत्रीच्छन्द ईरितम्
आदित्यो देवता प्रोक्तो दृष्टादृष्टफलप्रदः॥"
ततः कराङ्गन्यासौ। सत्याय तेजोज्वालामणे हुँ फट् स्वाहा अङ्गुष्ठाभ्यां नमः। एवं ब्रह्मणे १० तर्ज्जनीभ्यां स्वाहा। विष्णवे १० मध्यमाभ्यां वषट्। रुद्राय १० अनामिकाभ्यां हुम्। अग्नये १० कनिष्ठाभ्यां वौषट्। सर्व्वाय १० करतलपृष्ठाभ्यां फट्। एवं हृदयादिषु। तथा च शारदायाम्।
"सत्याय हृदयं प्रोक्तं ब्रह्मणे शिर ईरितम्।
शिखा विष्णवे स्याच्छिखावर्म्म रुद्राय परिकीर्त्तितम्॥
अग्नये नेत्रमाख्यातं सर्व्वायास्त्रमुदीरितम्।
तेजोज्वालामणे हुँ फट् द्विठान्ताः परिकीर्त्तिताः॥"
ततो मूर्त्तिन्यासः। यथा शिरसि ॐ आदित्याय नमः। मुखे एं रवये। हृदये ऊं भानवे। गुह्ये ईं भास्कराय। चरणयोः अं सूर्य्याय। तथा च निबन्धे।
"आदित्यं विन्यसेन्मूर्ध्नि रविं मुखगतं न्यसेत्।
हृदये भानुनामानं भास्करं गुह्यदेशतः।
सूर्य्यं चरणयोर्न्यस्येद्वर्णैः सत्यादिपञ्चभिः॥"
ततो मन्त्रन्यासः। शिरसि ॐ ॐ नमः। मुखे ॐ घृ नमः। कण्ठे ॐ णि नमः। हृदि ॐ सू नमः। कुक्षौ ॐ र्य्य नमः। नाभौ ॐ आ नमः। लिङ्गे ॐ दि नमः। पादयोः ॐ त्य नमः। तथा च।
"मूर्ध्नास्यकण्ठहृदयकुक्षिनाभिध्वजाङ्घ्रिषु।
... ...। मन्त्रस्यैकं प्रणवादिकान्॥"
ध्यानम्।

"रक्ताब्जयुग्माभयदानहस्तं
केयूरहाराङ्गदकुण्डलाढ्यम्।
माणिक्यमौलिं दिननाथमीडे
बन्धूककान्तिं विलसत्त्रिनेत्रम्॥"
एवं ध्यात्वा मानसैः संपूज्य अर्घस्थापनं कृत्वा गुरुपंक्तिं संपूज्य पीठपूजां कुर्य्यात्। ततः खं खसोल्काय नमः। इति मन्त्रेण मूर्त्तिं संकल्प्य पुनर्ध्यात्वा आवाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधायावरणपूजामारभेत्। तथा च निबन्धे।
"तारादि खं खसोल्काय मनुना मूर्त्तिकल्पना साक्षिणं सर्व्वलोकानां तस्यामावाह्य पूजयेत्"
केशरेष्वग्न्यादिकोणेषु मध्ये दिक्षु च सत्याय तेजोज्वालामणे हुँ फट् स्वाहा हृदयाय नमः। एवं ब्रह्मणे शिरसे स्वाहा। विष्णवे शिखायै वषट्। रुद्राय कवचाय हुम्। अग्नये नेत्रत्रयाय वौषट्। सर्व्वाय अस्त्राय फट्। दिक्पत्रेषु पूर्व्वादि ॐ आदित्याय नमः। एवं एं रवये ऊं भानवे ईं भास्कराय। विदिक्पत्रेषु अग्न्यादि उं उषायै यं प्रज्ञायै पं प्रभायै सं सन्ध्यायै। तथा च।
"अङ्गानि पूजयेदादौ दिक्पत्रेष्वर्कमूर्त्तयः।
आदित्याद्यास्ततोऽस्त्रैशाः शक्तयः कोणपत्रगाः॥
स्वस्वनामादिवर्णाः स्युस्तासां बीजान्यनुक्रमात्
उषा प्रज्ञा प्रभा सन्ध्या शक्तयः परिकीर्त्तिताः॥"
ततः पत्राग्रेषु ब्राह्म्याद्याः संपूज्य पुरतोऽरुणमर्च्चयेत्। तथा च शारदायाम्।
"पत्राग्रसंस्था ब्राह्म्याद्याः पुरतोऽरुणमर्च्चयेत्।"
तद्बाह्ये चन्द्रादीन् पूजयेत्। यथा चन्द्राय नमः एवं मङ्गलाय बुधाय बृहस्पतये शुक्राय शनैश्चराय राहवे केतवे। तथा च शारदायाम्।
"चन्द्रादीन्पूजयेत्पश्चात्ग्रहानष्टौ ततो बहिः॥"
ततः इन्द्रादीन् वज्रादींश्च सम्पूज्य धूपादिविसर्ज्जनान्तं कर्म्म समापयेत्। अस्य पुरश्चरणमष्टलक्षजपः। तथा च।
"वसुलक्षं जपेन्मन्त्रं समिद्भिः क्षीरशाखिनाम्।
तत्सहस्रं प्रजुहुयात् क्षीराक्ताभिर्जितेन्द्रियः॥"
वाचनिक एवाष्टसहस्रहोमः॥ ॥मन्त्रान्तरं यथा
"आकाशमग्निदीर्घेन्दुसंयुतं भुवनेश्वरी।
सर्गान्वितो भृगुर्भानोस्त्र्यक्षरोऽयं समीरितः॥"
ह्रां ह्रीं सः। अस्य पूजाप्रयोगः। प्रातःकृत्यादिपूर्व्वमुक्तपीठन्यासं विधाय पूर्व्वोक्तं ऋष्यादिन्यासं कुर्य्यात्। ततो मन्त्रन्यासः। यथा आधारादिपादपर्य्यन्तं ह्रां नमः। कण्ठादाधारपर्य्यन्तं ह्रीं नमः। मूर्द्धादिकण्ठपर्य्यन्तं सः नमः। शारदायाम्।
"आधारादिपदायान्तं कण्ठादाधारकावधि।
मूर्द्धादिकण्ठपर्य्यन्तं क्रमाद्बीजत्रयं न्यसेत्॥"
ततः कराङ्गन्यासौ। ह्रां अङ्गुष्ठाभ्यां नमः। ह्रीं तर्ज्जनीभ्यां स्वाहा। ह्रूं मध्यमाभ्यां वषट्। ह्रैं अनामिकाभ्यां हुँ। ह्रौं कनिष्ठाभ्यां

वौषट्। ह्रः ... ... दिषु। तथा च निबन्धे।
"षड्दीर्घभाजा मन्त्रेण ...
ततो ध्यानम्।
"रक्ताम्बुजासनमशेषगुणैकसिन्धुं
भानुं समस्तजगतामधिपं भजामि।
पद्मद्वयाभयवरान् दधतं कराब्जै-
र्माणिक्यमौलिमरुणाङ्गरुचिं त्रिनेत्रम्॥"
एवं ध्यात्वा मानसैः संपूज्य ...
पूर्व्वोक्तक्रमेण पीठपूजां विधाय ...
मूर्त्तिं सङ्कल्प्य ...
ञ्जलिदानपर्य्यन्तं ...
अग्निनिर्ऋतिवायुशानेषु मध्ये ...
हृदयाय नमः इत्यादिना पूजयेत्। ...
दीन् पूजयेत्। तत इन्द्रादीन् ...
ततो धूपादिविसर्ज्जनान्तं कर्म्म समापयेत्।
अस्य पुरश्चरणं द्वादशलक्षजपः। तथा।
"भानुलक्षं जपेन्मन्त्रमाज्येन च दशांशतः
तिलैर्वा मधुरासिक्तैर्जुहुयादिति निर्दिशः।
मन्त्रान्तरम्।
"आकाशमग्निपवनसत्यान्तार्घीशबिन्दुना।
मार्त्तण्डभैरवं नाम बीजमेतदुदाहृतम्।
पुटितं विश्वबीजेन सर्व्वकामफलप्रदम्।
विश्वबीजमाह।
"टान्तं दहननेत्रेन्दुसहितं तदुदाहृतम्।
ठ्रिं ह्स्ख्फ्रें ठ्रिम्। अस्य पूजाप्रयोगः।
...
विधाय ऋष्यादिन्यासं कुर्य्यात्। ...
न्यासः। ठ्रं सूर्य्याय नमोऽङ्गुष्ठयोः। ठ्रिं ...राय नमस्तर्ज्जन्योः। ठ्रुं भानवे नमः ...मयोः। ठ्रैं रवये नमोऽनामिकयोः। ... दिवाकराय नमः कनिष्ठयोः। ततः वदने हृदये गुह्ये पाददेशेषु तावत्यैः दिका न्यसेत्। तथा च निबन्धे।
"पञ्चह्रस्वाख्यबीजेन पञ्चमूर्त्तीः प्रविन्यसेत्।
अङ्गुष्ठादिकनिष्ठान्तं अङ्गुलिषु क्रमादिमाः।
सूर्य्यस्तु भास्करो भानुस्ततो रविदिवाकरौ
शिरोवदनहृद्गुह्यपाददेशेषु ताः क्रमात्।
ततः कराङ्गन्यासौ। ठ्रां अङ्गुष्ठाभ्यां नमः। ... तर्ज्जनीभ्यां स्वाहा। ठ्रूं मध्यमाभ्यां वषट्। ठ्रैं अनामिकाभ्यां हुम्। ठ्रौं कनिष्ठा... वौषट्। एवं हृदयादिषु। ठ्रां हृदयाय नमः इत्यादि। तथा च निबन्धे।
"दीर्घयुक्तेन बीजेन नेत्रान्ताङ्गानि विन्यसेत्
ततो मूलबीजेन व्यापकं कृत्वा ध्यायेत्। ... च।
"व्यापकं मूलबीजेन कुर्व्वीत तदनन्तरम्।
ध्यानम्।
हेमाम्भोजप्रवालप्रतिमनिजरुचिं चारु... स्थाने
चक्रं शक्तिं सपाशं सृणिमतिरुचिराम... मालां ...

ख्ताम्भोजेदधानं त्रिनयनविलसद्देववक्त्राभिराम
मार्त्तण्डं वल्लभार्द्धं मणिमयमुकुटं हारदीप्तं भजामः ॥"
एवं ध्यात्वा मानसैः सम्पूज्यार्घ्यस्थापनं कुर्य्यात्
ततः पूर्व्वोक्तक्रमेण पीठं संपूज्य पूर्व्वादिदिक्षु
कर्णिकायाम्। उं उषायै नमः। एवं पं प्रभायै
प्रज्ञायै सं सन्ध्यायै इति संपूज्य मूर्त्तिं मूलेन
कल्पयेत्। ततः पूर्व्वादिदिक्षु सूर्य्यं भास्करं भानुं
रविं पूजयेत्। कोणेषु दिवाकरम्। ततः
अग्निदक्षिणपश्चिमोदीचीषु दिक्षु ह्रां हृदयाय
नमः। इत्यादिना पूजयेत्। ईशाने ह्रौं नेत्राय वौषट्। शारदायाम्।
"सूर्य्यादीन् चतुरो दिक्षु विदिक्ष्वन्यं समर्च्चयेत्
इपूजा यथापूर्व्वा नेत्रमीशानदिग्गतम् ॥"
... पूर्व्ववच्चन्द्रादिग्रहान् पूजयेत्। ततो
लोकपालान् पूजयेत्। तथा च निबन्धे।
"...तथा बाह्ये लोकपालांस्ततः परम्॥"
... धूपादिविसर्ज्जनान्तं कर्म्म समापयेत्।
अस्य पुरश्चरणजपो लक्षत्रयसंख्यः। त्रिमधुरो-
... कमलैर्द्दशांशहोमः। तथा च।
"लक्षत्रयं जपेन्मन्त्री बीजं बिम्बपुटीकृतम्।
दशांशं कमलैः फुल्लैर्जुहुयान्मधुरोक्षितैः॥
एवं मन्त्रं जपन्मर्त्त्यः कान्तिं पुत्त्रान् धनं द्युतिम्
...मिहिममितां लक्ष्मीं सौभाग्यमपि साधयेत्
इति तन्त्रसारः ॥ * ॥
अस्य प्रकारान्तरमन्त्रध्यानपूजादिकं गरुड-
पुराणे ३८ अध्याये द्रष्टव्यम् ॥ * ॥ सूर्य्ये वर्ण-
नानि यथा। अरुणता१ रविमणिप्रकाशः२
कृपाकप्रीतिः३ पद्मप्रकाशः४ पथिकप्रीतिः५
...दप्रीतिः६ तारार्त्तिः७ चन्द्रापकाशः८
दीपापकाशः९ चौपध्यप्रकाशः १० पेच-
कार्त्तिः११ तमोऽभावः १२ चौरार्त्तिः १३ कुमु-
दार्त्तिः १४ कुलटार्त्तिः १५। इति कविकल्प-
लता ॥

सूर्य्यकान्तः, पुं, (सूर्य्यः कान्तो यस्य। सूर्य्यस्य कान्तः प्रियो वा।) स्फटिकः। इति हेम... ॥ मणिविशेषः (यथा, रघुवंशे। ११। २१।
"स्पृशन्निव ... भास्करात्
सूर्य्यकान्त इव ... ।")
[illegible]

"सूर्य्यकान्तिस्ताम्रवर्णा चोड्रपर्य्याय इत्यपि ॥" इति शब्दचन्द्रिका ॥ सूर्य्यस्य दीप्तिश्च ॥

सूर्य्यकालः, पुं, (सूर्य्योपलक्षितः कालः।) दिवसः। इति शब्दचन्द्रिका ॥

सूर्य्यकालानलचक्रं, क्ली, नराणां शुभाशुभज्ञानार्थं नक्षत्रघटितचक्रविशेषः। यथा,—
"ऊर्द्ध्वं शास्त्रिविशूलप्रान्तिसंस्थितं व्यवस्थिता
द्वे द्वे नाड्यौ स्थिते कोणे शृङ्गयुग्मं तथैकया ॥
मध्यत्रिशूलदण्डादौ भानुभाद्यं भमण्डलम्।
साभिजिच्च दातव्यं मध्यमार्गेण सर्व्वदा ॥
नाम ऋक्षं स्थितं यत्र फलं तत्र शुभाशुभम्।
अधोगतैस्त्रिनक्षत्रैरुद्वेगो बधबन्धनम् ॥
रेखाष्टके जयो लाभ ऋक्षषट्के तथा पुनः।
शृङ्गयुग्मे रुजाभङ्गो मृत्युः शूलत्रये स्फुटम् ॥
विवादे व्यसने युद्धे रोगार्त्ते गमने तथा।
सूर्य्यकालानलं चक्रं ज्ञातव्यन्तु प्रयत्नतः ॥"
इति स्वरोदयः ॥

सूर्य्यग्रहः, पुं, (सूर्य्यरूपो ग्रहः।) नवग्रहाणां प्रथमग्रहः। (सूर्य्यस्य ग्रहः ग्रहणम्।) सूर्य्योपरागः। यथा, गारुडे।
"सूर्य्यग्रहः सूर्य्यवारे सोमे सोमग्रहो भवेत्।
चूडामणिरयं योगस्तत्रानन्तफलं स्मृतम् ॥"
इति तिथ्यादितत्त्वम् ॥

सूर्य्यग्रहणं, क्ली, (सूर्य्यस्य ग्रहणम्।) सूर्य्योपरागः। तत्कारणं यथा, वह्निपुराणे गणभेदनामाध्याये।
"सूर्य्येन्दोरुपरागस्तु सोमकच्छायाया भवेत्।
अन्योन्ययोस्तयोरेव व्यापयोरेव कारणात् ॥
ग्रासमोक्षौ तु जायेते तथातः पूर्व्वपश्चिमौ।
तत्र पुण्यफलाद्यागः कृतो राहोस्तु विश्रुतः॥"
अन्यत् ग्रहणशब्दे द्रष्टव्यम् ॥

सूर्य्यजः, पुं,(सूर्य्यात् जायते इति। जन + डः।) सुग्रीववानरः। इति जटाधरः ॥ शनिश्चरः। (यथा, बृहत्संहितायाम्। १०४। ४४।
"गन्धर्व्वधाम ... च
... सूर्य्यजे ... ॥"
यमः। मनुः। रेवन्तः। कर्णः।)

सूर्य्यजा, स्त्री, (सूर्य्यात् जायते इति। जन + डः। टाप्।) यमुना नदी। इति हेमचन्द्रः ॥

सूर्य्यतनयः, पुं, (सूर्य्यस्य तनयः।) शनैश्चरः। यमः। (सावर्णिमनुः। रेवन्तः।) यथा—
[illegible]
इति मात्स्ये ११ अध्यायः ॥
[illegible]

सूर्य्यतनया, स्त्री, (सूर्य्यस्य तनया।) यमुना नदी। इत्यमरः। १। १०। ३२ ॥

सूर्य्यपत्रः, पुं, (सूर्य्य इव तीक्ष्णं पत्रमस्य।) आदित्यपत्रः। इति राजनिर्घण्टः ॥

सूर्य्यपुत्त्रः, पुं, सूर्य्यस्य पुत्त्रः।) वरुणः। शनिः। इति केचित् ॥ (यथा, महाभारते। ६। ३। १३।
"मघास्वङ्गारको वक्रः श्रवणे च बृहस्पतिः।
भाग्यं नक्षत्रमाक्रम्य सूर्य्यपुत्त्रेण पीड्यते ॥")
यमः। यथा,—
"धर्म्मराज नमस्तुभ्यं नमस्ते यमुनाग्रज।
पाहि मां किङ्करैः सार्द्धं सूर्य्यपुत्त्र नमोऽस्तु ते॥"
इति तिथ्यादितत्त्वम् ॥
(अश्विनीकुमारौ। यथा, महाभारते। १३। १५०। १८।
"पितेतामश्विनौ सोमं भवद्भिः सहितावुभौ।
उभावेतावपि सुरौ सूर्य्यपुत्त्रौ सुरेश्वर। ॥")
अन्यत् सूर्य्यतनयशब्दे द्रष्टव्यम् ॥

सूर्य्यपुत्त्री, स्त्री, (सूर्य्यस्य पुत्त्री।) यमुना। यथा, महाभारते।
"यमस्वसर्नमस्तेऽस्तु यमुने लोकपूजिते।
वरदा भव मे नित्यं सूर्य्यपुत्त्रि नमोऽस्तु ते ॥"
इति तिथ्यादितत्त्वम् ॥
विद्युत्। इति केचित् ॥

सूर्य्यफणिचक्रं, क्ली, सर्व्वकार्य्यशुभाशुभज्ञापकचक्रविशेषः। यथा,—
"सप्तविंशतिभान्यत्र पङ्क्तियुक्त्या क्रमेण तु।
वामावर्त्ताक्षरे वेधः फणिचक्रं लिखेद्बुधः।
यत्र ऋक्षे स्थितो भानुर्मेदादौ गणयेद्बुधः।
नाम ऋक्षं स्थितं यत्र फलं तत्र शुभाशुभम् ॥
पुच्छान्ते ... शिरस नाडीषु ... नृणाम्।
वर्ज्जयेत् सर्व्वकार्य्येषु युद्धकाले विशेषतः ॥
निर्द्दिष्टमध्यमं यस्य नाम प्रजायते।
सिध्यन्ति सर्व्वकार्य्याणि संग्रामे च जयो भवेत्॥"
इति स्वरोदयः ॥

सूर्य्यभक्तः, पुं,(सूर्य्यस्य भक्तः प्रियः।) बन्धूकपुष्पवृक्षः। सूर्य्यपूजकः, त्रि। इति मेदिनी ॥

सूर्य्यभक्तकः, पुं, (सूर्य्यभक्त एव। स्वार्थे कन्।) बन्धूकपुष्पवृक्षः। इति शब्दमाला ॥ सूर्य्यपूजकः, त्रि ॥

सूर्य्यमणिः, पुं,(सूर्य्यप्रियो मणिः।) सूर्य्यकान्तमणिः। इति हेमचन्द्रः ॥ पुष्पवृक्षविशेषः। यथा शब्दचन्द्रिकायाम्।
"सूर्य्यकान्तः सूर्य्यमणिः पुष्पाख्यः ... ॥"

सूर्य्यमण्डलं, क्ली, (सूर्य्यस्य मण्डलम्।) सूर्य्य-[illegible]
[illegible]
"[illegible]"
[illegible]

सूर्य्यलोकः,पुं,(सूर्य्यस्य लोकः ।) सौरभुवनम् । यथा,—

"विनौषधैर्व्विना वैद्यैर्व्विना पथ्यपरिग्रहैः ।
कालेन निधनं प्राप्य सूर्य्यलोके महीयते ॥"
इति काशीखण्डे सूर्य्यार्घ्यदानफलम् ॥

अपि च ।

"सौरं लोकमथावाप्य क्षणेन स विमानगः ।
यथा कदम्बकुसुमं किञ्जल्कैः सर्व्वतोवृतम् ॥
देदीप्यमानं हि तथा समन्ताद्भानुभानुभिः ।
दूराद्रविं स विज्ञाय वृततामरसद्वयम् ॥
नवभिर्य्योजनानाञ्च सहस्रैः सम्मितेन च ।
विचित्रेणैकचक्रेण सप्तसप्तियुतेन च ॥
अनूरुणाधिष्ठितेन सर्व्वतो धृतरश्मिना ।
अप्सरोमुनिगन्धर्व्वसर्पग्रामणिनेकृतैः ॥
स्यन्दनेनातिजविना प्रणनाम कृताञ्जलिः ।
तस्य प्रणामं देवोऽपि भ्रूभङ्गेनानुमन्य च ।
अतिदूरं नभोवर्त्म प्रतिचक्राम स क्षणात् ॥
प्रक्रान्ते द्युमणौ दूरं शिवशर्म्मातिशर्म्मवान् ।
प्रोवाच भगवद्भृत्यौ कथं लभ्यं रवेः पदम् ॥"
इति स्कन्दपुराणे काशीखण्डे सूर्य्यलोकवर्णनं नाम ८ अध्यायः ॥

सूर्य्यवंशः,पुं,(सूर्य्यस्य वंशः ।) सूर्य्यस्य सन्तानः । तद्विवरणं यथा । परमेश्वरात् ब्रह्मा जातः । तस्य पुत्त्रो मरीचिः । तस्य काश्यपः । तस्य सूर्य्यः । तस्य वैवस्वतो मनुः । सत्ययुगे मनुरेव राजासीत् । त्रेतायुगे तस्य पुत्त्रः इक्ष्वाकुः अयोध्यायां राजासीत् । अस्मिन् युगे अतिदीर्घायुषो राजानो बहुकालं राज्यं कृतवन्तः । त्रेताद्वापरयोः सन्धौ श्रीरामचन्द्रो दशरथसुतरूपेण अवतीर्णः । द्वापरयुगस्य प्रथमे तस्य पुत्त्रः कुशो जातः । तद्वंशः सुमित्रान्तः कलेः सहस्रवर्षपर्य्यन्तं राज्यं कृतवन्तः एतत्पर्य्यन्तं सूर्य्यवंशविश्रान्तिः । पुनः सत्ययुगे मरुः नष्टं सूर्य्यवंशं भावयिष्यति । यः योगसिद्धः सन् कलापग्रामे आस्ते । इति श्रीभागवतमतम् ॥ वंशवर्णनविस्तारस्तु मत्स्यपुराणे ११ अध्यायादौ गरुड़पुराणे १४३ अध्याये च द्रष्टव्यः ॥

सूर्य्यवल्ली,स्त्री,(सूर्य्यप्रिया वल्ली ।) अर्कपुष्पिकाहयः । इति रत्नमाला ॥

सूर्य्यसंज्ञं, क्ली, (सूर्य्यस्य संज्ञा संज्ञा यस्य ।) कुङ्कुमम् । इति त्रिकाण्डशेषः ॥(पु,अर्काह्वयः । इत्यमरे अर्काह्व इति दर्शनात् । २।४।८०।)

सूर्य्यसारथि,पुं,(सूर्य्यस्य सारथिः ।)अरुणः।इति शब्दरत्नावली ।(यदुक्तं महाभारते ।१।१६।२३।
"अरुणो दृश्यते ब्रह्मन् प्रभातसमये सदा ।
आदित्यरथमध्यास्ते सारथ्यं समकल्पयत् ॥")

सूर्य्यहृदयं,क्ली,(सूर्य्यस्य हृदयमिव ।) सूर्य्यस्य स्तवविशेषः । यथा,—

"अथोपतिष्ठेदादित्यमुदयन्तं समाहितः ।
मन्त्रैस्तु विविधैः सौरैरृग्यजुःसामसम्भवैः ॥
. . महायोगं देवदेवं दिवाकरम् ।
कुर्व्वीत दर्शनं भूमौ मूर्द्ध्ना निपत्य मन्त्रतः ॥
ॐ खं खमोल्काय शान्ताय कारणत्रयहेतवे ।
निवेदयामि चात्मानं नमस्ते ज्ञानरूपिणे ॥
क्वचित् पुस्तके खखोल्कायेति च पाठः ।
नमस्ते घृणिने तुभ्यं सूर्य्याय ब्रह्मरूपिणे ।
त्वमेव ब्रह्म परममापो ज्योती रसोऽमृतम् ॥
भूर्भुवः स्वस्त्वमोङ्कारः सर्व्वे रुद्राः सनातनाः ।
पुरुषः सन्महोऽन्तस्त्वां प्रणमामि कपर्द्दिनम् ॥
त्वमेव विश्वं बहुधा जातं वै जायते च न ।
नमो रुद्राय सूर्य्याय त्वामहं शरणं गतः ॥
प्रचेतसे नमस्तुभ्यमुमायाः पतये नमः ।
नमो नमस्ते रुद्राय त्वामहं शरणं गतः ॥
हिरण्यबाहवे तुभ्यं हिरण्यपतये नमः ।
अम्बिकापतये तुभ्यमुमायाः पतये नमः ॥
नमस्ते नीलकण्ठाय नमस्तुभ्यं पिनाकिने ।
विलोहिताय भर्गाय सहस्राक्षाय ते नमः ॥
नमो हंसाय ते नित्यं आदित्याय नमोऽस्तु ते ।
प्रपद्ये त्वां विरूपाक्ष महतं परमेश्वरम् ॥
हिरण्मये गृहे गुप्तमात्मानं सर्व्वदेहिनाम् ।
नमस्यामि परं ज्योतिर्ब्रह्माणं त्वां परामृतम् ॥
विश्वं पशुपतिं भीमं नरनारीशरीरिणम् ।
नमः सूर्य्याय रुद्राय भास्वते परमेष्ठिने ॥
उग्राय सर्व्वभक्षाय त्वां प्रपद्ये सदैव हि ॥
एतद्वै सूर्य्यहृदयं जप्त्वा स्तवमनुत्तमम् ।
प्रातःकालेऽथ मध्याह्ने नमस्कुर्य्याद्दिवाकरम् ॥
इदं पुत्त्राय शिष्याय धार्म्मिकाय द्विजातये ।
प्रदेयं सूर्य्यहृदयं ब्रह्मणा तु प्रदर्शितम् ॥
सर्व्वपापप्रशमनं वेदसारं समुद्धृतम् ।
ब्राह्मणानां हितं पुण्यं ऋषिसङ्घैर्निषेवितम् ॥
यस्तु नित्यं पठेद्धीमान् प्रेक्ष्यादित्यमण्डलम् ।
महापातकयुक्तोऽपि पूयते नात्र संशयः ॥
क्षयापस्मारकुष्ठाद्यैर्व्याधिभिः पीड़ितोऽपि सन् ।
जप्त्वा शतगुणं स्तोत्रं स श्लाघ्यो भवति द्रुतम् ॥
भूतग्रहपिशाचातिशीतज्वरमनर्थिभिः ।
स्तुवन् ध्यात्वा हरिं विप्रो मुच्यते महतो भयात् ॥
इति कूर्म्मपुराणे उपविभागे १७ अध्यायः ॥

गारुड़े ५० अध्याये चैतद्द्रष्टव्यम् ॥ (भविष्योत्तरोक्तसूर्य्यहृदयन्तु बहुभिः समाद्रियते पठ्यते च अतस्तत् सप्रक्रियमुच्यते । अथ आदित्यहृदयारम्भः । आचम्य देशकालौ संकीर्त्य ममारोग्यावाप्तये श्रीसवितासूर्य्यनारायणप्रीत्यर्थं द्वादशनमस्काराख्यं कर्म्म करिष्ये । अथ ध्यानम्

"ध्येयः सदा सवितृमण्डलमध्यवर्त्ती
नारायणः सरसिजासनसन्निविष्टः ।
केयूरवान् मकरकुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥
एकचक्रो रथो यस्य दिव्यः कनकभूषितः ।
स मे भवतु सुप्रीतः पद्महस्तो दिवाकरः ॥"

मित्राय नमः । रवये नमः । सूर्य्याय नमः । भानवे नमः । खगाय नमः । पूष्णे नमः । हिरण्यगर्भाय नमः । मरीचये नमः आदित्याय नमः । सवित्रे नमः । अर्काय नमः । भास्कराय नमः ।

"नमः सवित्रे जगदेकचक्षुषे
जगत्प्रसूतिस्थितिनाशहेतवे ।
त्रयीमयाय त्रिगुणात्मधारिणे
विरिञ्चिनारायणशङ्करात्मने ॥
नमोऽस्तु सूर्य्याय सहस्ररश्मये
सहस्रशाखान्वितसम्भवात्मने ।
सहस्रयोगोद्भवभावभागिने
सहस्रसङ्ख्यायुगधारिणे नमः ।
आदित्यस्य नमस्कारं ये कुर्व्वन्ति
जन्मान्तरसहस्रेषु दारिद्र्यं नोपजा
इति

शतानिक उवाच ।

"कथमादित्यमुद्यन्तमुपतिष्ठेद्द्विजो
एतन्मे ब्रूहि विप्रेन्द्र प्रपद्ये शरणं

सुमन्तुरुवाच ।

इदमेव पुरा दृष्टः शङ्खचक्रगदाधर
प्रणम्य शिरसा देवमर्ज्जुनेन महा
कुरुक्षेत्रे महाराज निवृत्ते भारते

[illegible]

अर्ज्जुन उवाच ।

ज्ञानञ्च धर्म्मशास्त्राणां गुह्य .
मया कृष्ण परिज्ञातं वाङ्मयं
सूर्य्यस्तुतिमयं न्यासं वक्तुमर्हसि ।
भक्त्या पृच्छामि देवेश कथयस्व
सूर्य्यभक्तिं करिष्यामि कथ सूर्य्यं
तदहं श्रोतुमिच्छामि त्वत्प्रसादेन

श्रीभगवानुवाच ।

रुद्रादिदैवतैः सर्व्वैः पृष्टेन कथितं
वक्ष्येऽहं सूर्य्यविन्यासं शृणु पार
अस्माकं यत्त्वया पृष्टमेकचित्तो भ
तदहं सम्प्रवक्ष्यामि आदिमध्याव

अर्ज्जुन उवाच ।

नारायण सुरश्रेष्ठ पृच्छामि त्वां
कथमादित्यमुद्यन्तमुपतिष्ठेत् द्व

श्रीभगवानुवाच ।

साधु पार्थ महाबाहो बुद्धिमान
यन्मां पृच्छस्युपस्थानं तत् पवित्रं
सर्व्वमङ्गलमाङ्गल्यं सर्व्वपापप्रणा
सर्व्वरोगप्रशमनमायुर्व्वर्द्धनमुत्तमम्
अमित्रदमनं पार्थ संग्रामे जयव
वर्द्धनं धनपुत्त्राणामादित्यहृदयं श
यच्छ्रुत्वा सर्व्वपापेभ्यो मुच्यते ना
त्रिषु लोकेषु विख्यातं निःश्रेयस
देवदेवं नमस्कृत्य प्रातरुत्थाय या
विघ्नान्यनेकरूपाणि नश्यन्ति स्म
तस्मात् सर्व्वप्रयत्नेन सूर्य्यमारा
आदित्यहृदयं नित्यं जाप्यं तच्छ्
यज्जपान्मुच्यते जन्तुर्दारिद्र्यादाशु
लभते च महासिद्धिं कुष्ठव्याधिवि
अस्मिन् मन्त्रे ऋषिश्छन्दोदेवता
सर्व्वमेव महाबाहो कथयामि तव
मया ते गोपितं न्यास सर्व्वशास्त्र

ते कथयिष्यामि उत्तमं मन्त्रमेव च ॥"
[अ]स्य श्रीआदित्यहृदयस्तोत्रमन्त्रस्य । श्रीकृष्ण [ऋषि]: श्रीसूर्य्यात्मा त्रिभुवनेश्वरो देवता । [अनु]ष्टुप् छन्दः । हरितहयरथं दिवाकरं [घृणि]रिति बीजम् । ॐ नमो भगवते जित- [वैश्वा]नरजातवेदसे इति शक्तिः । ॐ नमो [भग]वते आदित्याय नम इति कीलकम् ॥ [ॐ] अग्निगर्भदेवता इति मन्त्रः ॥ ॐ नमो [भग]वते तुभ्यमादित्याय नमो नमः । श्रीसूर्य्य- [नार]ायणप्रीत्यर्थे जपे विनियोगः । अथ न्यासः । [ॐ] ह्रां अङ्गुष्ठाभ्यां नमः । ॐ ह्रीं तर्ज्जनीभ्यां [नमः]। ॐ ह्रूं मध्यमाभ्यां नमः । ॐ ह्रैं अना- [मिक]ाभ्यां नमः । ॐ ह्रौं कनिष्ठिकाभ्यां नमः। [ॐ] ह्रः करतलकरपृष्ठाभ्यां नमः । ॐ ह्रां [हृद]याय नमः । ॐ ह्रीं शिरसे स्वाहा । ॐ ह्रूं [शिख]ायै वषट् । ॐ ह्रैं कवचाय हुम् । ॐ ह्रौं [नेत्र]त्रयाय वौषट् । ॐ ह्रः अस्त्राय फट् । [ॐ] ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः । इति दिग्बन्धः ॥

। ध्यानम् ।

[भा]स्वद्रत्नाढ्यमौलिं स्फुरदधररुचा रञ्जितं चारुकेशं
[भा]स्वन्तं दिव्यतेजः करकमलयुतं स्वर्णवर्ण- प्रभाभिः ।
[विश्व]ाकाशावकाशग्रहपतिशिखरे भाति यश्चोदयाद्रौ
[सर्व]ानन्दप्रदाता हरिहरनमितः पातु मां विश्वचक्षुः ॥
[रक्त]मष्टदलं पद्मं प्रणवादिप्रतिष्ठितम् ।
[मा]यावीजं दलाष्टाग्रे यन्त्रमुद्धारयेदिति ॥
[आ]दित्यं भास्करं भानुं रविं सूर्य्यं दिवाकरम् ।
[मार्त्त]ण्डं तपनं चेति दलेष्वष्टसु योजयेत् ॥
[दीप्ता] सूक्ष्मा जया भद्रा विभूतिर्विमला तथा ।
[अ]मोघा विद्युता चेति मध्ये श्रीः सर्व्वतोमुखी ॥
[स]र्व्वेशः सर्व्वमयं च सर्व्वकारणदेवता ।
[स]र्व्वेशं सर्व्वहृदयं नमामि सर्व्वसाक्षिणम् ॥
[स]र्व्वात्मा सर्व्वकर्त्ता च सृष्टिजीवनपालकः ।
[हि]तः स्वर्गापवर्गद भास्करेश नमोऽस्तु ते ॥"
इति प्रार्थना ॥

"नमो नमस्तेऽस्तु सदा विभावसो
सर्व्वात्मने सप्तहयाय भानवे ।
अनन्तशक्तिर्मणिभूषणेन
ददस्व भुक्तिं मम मुक्तिमव्ययाम् ॥
[सर्व्व]ं तु सूर्य्यं शिरसि ललाटे तु रविं न्यसेत् ।
[ने]त्रयोर्दक्षयोः सूर्य्यं कर्णयोश्च दिवाकरम् ।
नासिकायां न्यसेद्भानुं मुखे वै भास्करं न्यसेत् ।
[illegible]

जान्वोस्तु गोपतिं न्यस्य सवितारन्तु जङ्घयोः ।
पादयोश्च विवस्वन्तं गुल्फयोश्च दिवाकरम् ॥
वाह्यतस्तु तमोध्वंसं भगमभ्यन्तरे न्यसेत् ।
सर्व्वाङ्गेषु सहस्रांशु दिग्विदिक्षु भगं न्यसेत्॥"
इति दिग्बन्धः ॥

"एष आदित्यविन्यासो देवानामपि दुर्लभः ।
इमं भक्त्या न्यसेत् पार्थ स याति परमां गतिम्
कामक्रोधकृतात् पापात् मुच्यते नात्र संशयः ।
सर्पादपि भयं नैव संग्रामेषु पथिष्वपि ॥
रिपुसंघट्टकालेषु तथा चोरसमागमे ।
त्रिसन्ध्यं जपतो न्यासं महापातकनाशनम् ॥
विस्फोटकसमुत्पन्नं तीव्रज्वरसमुद्भवम् ।
शिरोरोगं नेत्ररोगं सर्व्वव्याधिविनाशनम् ॥
कुष्ठव्याधिस्तथा दद्रुरोगाश्च विविधाश्च ये ।
जपमानस्य नश्यन्ति शृणु भक्त्या तदर्ज्जुन ॥
आदित्यो मन्त्रसंयुक्त आदित्यो भुवनेश्वरः ॥
आदित्यान्नापरो देवो ह्यादित्यः परमेश्वरः ॥
आदित्यमर्च्चयेद् ब्रह्मा शिव आदित्यमर्च्चयेत् ।
यदादित्यमयं तेजो मम तेजस्तदर्ज्जुन ॥
आदित्यं मन्त्रसंयुक्तमादित्यं भुवनेश्वरम् ।
आदित्यं ये प्रपश्यन्ति मां पश्यन्ति न संशयः ॥
त्रिसन्ध्यमर्च्चयेत् सूर्य्यं स्मरेद्भक्त्या तु यो नरः
न स पश्यति दारिद्र्यं जन्मजन्मनि चार्ज्जुन ॥
एतत्ते कथितं पार्थ आदित्यहृदयं मया ॥
शृणुष्वा च पापेभ्यः सूर्य्यलोके महीयते ।
ॐनमो भगवते तुभ्यमादित्याय नमो नमः ।
आदित्यः सविता सूर्य्यः खगः पूषा गभस्तिमान्
सुवर्णः स्फटिको भानुः स्फुरितो विश्वतापनः ।
रविर्व्विश्वो महातेजाः सुवर्णः सुप्रबोधकः ॥
हिरण्यगर्भस्त्रिशिरास्तपनो भास्करो रविः ।
मार्त्तण्डो गोपतिः श्रीमान् कृतज्ञश्च प्रतापवान्
तमिस्रहा भगो हंसो नासत्यश्च तमोनुदः ।
शुद्धो विरोचनः केशी सहस्रांशुर्महाप्रभुः ॥
विवस्वान् पूषणो मृत्युर्मिहिरो जामदग्न्यजित्
धर्म्मरश्मिः पतङ्गश्च शरण्यो मित्रहा तपः ॥
दुर्व्विज्ञेयगतिः शूरस्तेजोराशिर्महायशाः ।
[illegible]

भानुमान् भानुरूपश्च स्वर्भानुर्भानुदीप्तिमान् ॥
धूमकेतुर्म्महाकेतुः सर्व्वकेतुरनुत्तमः ।
तिमिरावरणः शम्भुः स्रष्टा मार्त्तण्ड एव च ॥
नमः पूर्व्वाय गिरये पश्चिमाय नमो नमः ।
नमोत्तराय गिरये दक्षिणाय नमो नमः ॥
नमो नमः सहस्रांशो ह्यादित्याय नमो नमः ।
नमः पद्मप्रबोधाय नमस्ते द्वादशात्मने ॥
नमो विश्वप्रबोधाय नमो भ्राजिष्णुजिष्णवे ।
ज्योतिषे च नमस्तुभ्यं ज्ञानार्काय नमो नमः ॥
प्रदीप्ताय प्रगल्भाय युगान्ताय नमो नमः ।
नमस्ते होतृपतये पृथिवीपतये नमः ॥
नमोङ्कार वषट्कार सर्व्वयज्ञ नमोऽस्तु ते ।
ऋग्वेदादि यजुर्वेद सामवेद नमोऽस्तु ते ॥
नमो हाटकवर्णाय भास्कराय नमो नमः ।
जयाय जयभद्राय हरिदश्वाय ते नमः ॥
दिव्याय दिव्यरूपाय ग्रहाणां पतये नमः ।
नमस्ते शुचये नित्यं नमः कुरु कुलात्मने ॥
नमस्त्रैलोक्यनाथाय भूतानां पतये नमः ।
नमः कैवल्यनाथाय नमस्ते दिव्यचक्षुषे ॥
त्वं ज्योतिस्त्वं द्युतिर्ब्रह्मा त्वं विष्णुस्त्वं प्रजापतिः
त्वमेव रुद्रो रुद्रात्मा वायुरग्निस्त्वमेव च ॥
योजनानां सहस्रे द्वे द्वे शते द्वे च योजने ।
एकेन निमिषार्द्धेन क्रममाण नमोऽस्तु ते ॥
नवयोजनलक्षाणि सहस्रद्विशतानि च ।
यावद्घटीप्रमाणेन क्रममाण नमोऽस्तु ते ॥
अग्रतश्च नमस्तुभ्यं पृष्ठतश्च सदा नमः ।
पार्श्वतश्च नमस्तुभ्यं नमस्ते चास्तु सर्व्वदा ॥
नमः सुरारिहन्त्रे च सोमसूर्य्याग्निचक्षुषे ।
नमो दिव्याय वीराय सर्व्वलक्षणदाय च ॥
नमो वेदान्तवेद्याय सर्व्वकर्म्मादिसाक्षिणे ।
नमो हरितवर्णाय सुवर्णाय नमो नमः ॥
अरुणो माघमासे तु सूर्य्यो वै फाल्गुने तथा ।
चैत्रमासे तु वेदाङ्गो भानुर्वैशाखतापनः ॥
ज्येष्ठमासे तपेदिन्द्र आषाढे तपते रविः ।
गभस्तिः श्रावणे मासि यमो भाद्रपदे तथा ॥
इषे सुवर्णरेताश्च कार्त्तिके च दिवाकरः ।
मार्गशीर्षे तपेन्मित्रः पौषे विष्णुः सनातनः ॥
पुरुषस्त्वधिके मासि मासाधिक्ये तु कल्पयेत् ।
इत्येते द्वादशादित्याः काश्यपेयाः प्रकीर्त्तिताः ॥
उग्ररूपा महात्मानस्तपन्ते विश्वरूपिणः ।
[illegible]

एष धाता विधाता च बीजं चैव प्रजापतिः॥
एष एव प्रजा नित्यं संवर्द्धयति रश्मिभिः।
एष यज्ञः स्वधा स्वाहा ह्रीः श्रीश्च पुरुषोत्तमः
एष भूतात्मको देवः सूक्ष्मो व्यक्तः सनातनः।
ईश्वरः सर्व्वभूतानां परमेष्ठी प्रजापतिः॥
कालात्मा सर्व्वभूतात्मा वेदात्मा विश्वतोमुखः
जन्ममृत्युजराव्याधिसंसारभयनाशनः॥
दारिद्र्यव्यसनध्वंसी श्रीमान् देवो दिवाकरः।
विकर्त्तनो विवस्वांश्च मार्त्तण्डो भास्करो रविः
लोकप्रकाशकः श्रीमांल्लोकचक्षुर्महेश्वरः।
लोकसाक्षी त्रिलोकेशः कर्त्ता हर्त्ता तमिस्रहा॥
तपनस्तापनश्चैव शुचिः सप्ताश्ववाहनः।
गभस्तिहस्तो ब्रह्मण्यः सर्व्वदेवनमस्कृतः॥
आयुरारोग्यमैश्वर्य्यं नरा नार्य्यश्च मन्दिरे।
यस्य प्रसादात् सन्तुष्टिरादित्यहृदयं जपेत्॥
इत्येतैर्नामभिः पार्थ आदित्यं स्तौति नित्यशः।
प्रातरुत्थाय कौन्तेय तस्य रोगभयं न हि॥
पातकान्मुच्यते पार्थ व्याधिभ्यश्च न संशयः।
एकसन्ध्यं द्विसन्ध्यं वा सर्व्वपापैः प्रमुच्यते॥
त्रिसन्ध्यं जपमानस्तु पश्येच्च परमं पदम्॥
यदह्नः कुरुते पापं तदह्नः प्रतिमुच्यते॥
यद्रात्र्याः कुरुते पापं तद्रात्र्याः प्रतिमुच्यते।
दद्रुस्फोटककुष्ठानि मण्डलानि विषूचिका॥
सर्व्वव्याधिमहारोगभूतबाधास्तथैव च॥
डाकिनी शाकिनी चैव महारोगभयं कुतः॥
ये चान्ये दुष्टरोगाश्च ज्वरातीसारकादयः।
जपमानस्य नश्यन्ति जीवेच्च शरदां शतम्॥
संवत्सरेण मरणं यदा तस्य ध्रुवं भवेत्।
अशीर्षां पश्यति छायामहोरात्रं धनञ्जय॥
यस्त्विदं पठते भक्त्या भानुवारे महात्मनः।
प्रातःस्नाने कृते पार्थ एकाग्रकृतमानसः॥
सुवर्णचक्षुर्भवति न चान्धस्तु प्रजायते।
पुत्रवान् धनसम्पन्नो जायते चारुजः सुखी॥
सर्व्वसिद्धिमवाप्नोति सर्व्वत्र विजयी भवेत्।
आदित्यहृदयं पुण्यं सूर्य्यनामविभूषितम्॥
श्रुत्वा च निखिलं पार्थ सर्व्वपापैः प्रमुच्यते।
अतःपरतरं नास्ति सिद्धिकामस्य पाण्डव॥
एतज्जपस्व कौन्तेय येन श्रेयो ह्यवाप्स्यसि।
आदित्यहृदयं नित्यं यः पठेत् सुसमाहितः॥
भ्रूणहा मुच्यते पापात् कृतघ्नो ब्रह्मघातकः।
गोघ्नः सुरापो दुर्भोगी दुष्कृतिपहकारकः॥
पातकानि च सर्व्वाणि दहत्येव न संशयः।
य इदं शृणुयान्नित्यं जपेद्वापि समाहितः॥
सर्व्वपापविशुद्धात्मा सूर्य्यलोके ...
अपुत्रो लभते पुत्रान् निर्धनो
सुरोगी मुच्यते रोगाद्भक्त्या यः पठते ...
रक्ष्यादित्यदिने पार्थ नाभिमात्रजले स्थितः॥
उदयाचलमारूढं भास्करं प्रणतः स्थितः।
जपते मानवो भक्त्या शृणुयादापि भक्तितः॥
स याति परमं स्थानं यत्र देवो दिवाकरः।
... पार्थ यदा कर्त्तुं समारभेत्॥
... रक्तपाणिभिः।

प्रारभ्य वामपादेन आदित्यहृदयं जपेत्॥
एतन्मन्त्रं समाहृत्य सर्व्वसिद्धिकरं परम्॥"
ॐ ह्रीं हिमालीढं स्वाहा। ॐ ह्रीं निलीढं
स्वाहा। ॐ ह्रीं मालीढं स्वाहा। इति मन्त्रः।
"विभिन्न रोगी भवति ज्वरी भवति पञ्चभिः।
जपेत्तु सप्तभिः पार्थ राक्षसीं तनुमाविशेत्॥
राक्षसेनाभिभूतस्य विकारान् शृणु पाण्डव।
गीयते नृत्यते नग्न आस्फोटयति धावति॥
शिवारुतञ्च कुरुते हसते क्रन्दते पुनः।
एवं संपीड्यते पार्थ यद्यपि स्यान्महेश्वरः॥
किं पुनर्मानुषः कश्चिच्छौचाचारविवर्ज्जितः।
पीडितस्य न सन्देहो ज्वरो भवति दारुणः॥
यदा चानुग्रहं तस्य कर्त्तुमिच्छेच्छुभङ्करम्।
तदा सलिलमादाय जपेन्मन्त्रमिमम्बुधः॥
नमो भगवते तुभ्यमादित्याय नमो नमः।
जयाय जयभद्राय हरिदश्वाय ते नमः॥
स्थापयित्तेन मन्त्रेण शुभं भवति नान्यथा।
अन्यथा च भवेद्दोषो नश्यते नात्र संशयः॥
अतस्ते निखिलः प्रोक्तः पूजाञ्चैव निबोध मे।
उपलिप्ते शुचौ देशे नियता वाग्यतः शुचिः॥
वृत्तं वा चतुरस्रं वा लिप्तभूमौ लिखेच्छुचिः।
त्रिधा तत्र लिखेत् पद्ममष्टपत्रं सकर्णिकम्॥
अष्टपत्रं लिखेत् पद्मं लिप्तगोमयमण्डले।
पूर्व्वपत्रे लिखेत् सूर्य्यमाग्नेय्यान्तु रविं न्यसेत्
याम्यायाञ्च विवस्वन्तं नैरृत्यान्तु भगं न्यसेत्।
प्रतीच्यां वरुणं विन्द्याद्वायव्यां मित्रमेव च॥
आदित्यमुत्तरे पत्रे ईशान्यां ...
मध्ये तु भास्करं विन्द्यात्
अतः परतरं नास्ति ...
महातेजःसमुद्यन्तं ...
सर्व्वकराणि पद्मानि ...
तिलतण्डुलसंयुक्तं ...
रक्तचन्दनमिश्राणि कृत्वा वै
धृत्वा शिरसि ...
मन्त्रपूतं गुडाकेश चार्घ्यं ...
आयुधं भरयद्भव सूर्य्यं
स्वागतो भव। सुप्रतिष्ठो
भवोद्दिष्टो भव। ...
स्फुटयित्वार्घ्यं ददेत् सूर्य्यं ...
ॐ श्रीं विद्या किलिकिलि
धनाय स्वाहा। ॐ श्रीं
नमः स्वाहा। ॐ श्रीं ह्रां
सूर्य्यमूर्त्तये स्वाहा। ॐ श्रीं
... ॐ ह्रूं

...
पश्चिमे सूर्य्य
अनुकम्प्य ...

नमो भगवते तुभ्यं नमस्ते जातवेदसे॥
ममेदमर्घ्यं गृह्ण त्वं देवदेव नमोऽस्तु ते॥
सर्व्वदेवाय देवाय आधिव्याधिविनाशिने।
इदं गृहाण मे देव सर्व्वव्याधिर्विनश्यतु॥
नमः सूर्य्याय शान्ताय सर्व्वरोगविनाशिने।
ममेप्सितं फलं दत्त्वा प्रसीद परमेश्वर॥"
ॐ नमो भगवते सूर्य्याय स्वाहा। ॐ शिवाय
स्वाहा। ॐ सर्व्वात्मने सूर्य्याय नमः स्वाहा।
ॐ अक्षय्यतेजसे नमः स्वाहा।
"सर्व्वसङ्कटदारिद्र्यं शत्रुं नाशय नाशय।
सर्व्वलोकेषु विश्वात्मा सर्व्वात्मा सर्व्वदर्शकः॥
नमो भगवते सूर्य्य कुष्ठरोगान् विखण्डय।
आयुरारोग्यमैश्वर्य्यं देहि देव नमोऽस्तु ते॥
नमो भगवते तुभ्यमादित्याय नमो नमः॥"
ॐ अक्षय्यतेजसे नमः। ॐ सूर्य्याय नमः।
ॐ विश्वमूर्त्तये नमः।
"आदित्यश्च शिवं विन्द्याच्छिवमादित्यरूपिणम्।
उभयोरन्तरं नास्ति आदित्यस्य शिवस्य च॥
एतदिच्छाम्यहं श्रोतुं पुरुषो वै दिवाकरः।
उदये ब्रह्मणो रूपं मध्याह्ने तु महेश्वरः॥
अस्तमाने स्वयं विष्णुस्त्रिमूर्त्तिश्च दिवाकरः।
नमो भगवते तुभ्यं विष्णवे प्रभविष्णवे॥
ममेदमर्घ्यं प्रतिगृह्ण देव
देवाधिदेवाय नमो नमस्ते॥"
श्रीसूर्य्याय भास्कराय सपरिवाराय श्रीसूर्य्य-
नारायणायेदमर्घ्यम्।
... च ते नमः।
छत्रधराय ...
... ...
मनोज्ञो ...

योऽधीते सूर्य्यहृदयं सकलं सफलं भवेत् ।
अष्टानां ब्राह्मणानाञ्च लेखयित्वा समर्पयेत् ॥
ब्रह्मलोककपोणाञ्च जायते मानुषोऽपि वा ।
जातिस्मरत्वमाप्नोति शुद्धात्मा नात्र संशयः ॥
नमाय लोकत्रयपावनाय
भूतात्मने गोपतये वृषाय ।
सूर्य्याय सर्व्वप्रलयान्तकाय
नमो महाकारुणिकोत्तमाय ॥
विवस्वते ज्ञानभृतान्तरात्मने
जगत्प्रदीपाय जगद्धितैषिणे ।
स्वयम्भुवे दीप्तसहस्रचक्षुषे
सुरोत्तमायामिततेजसे नमः ॥
सुरैरनेकैः परिसेविताय
हिरण्यगर्भाय हिरण्मयाय ।
महात्मने मोक्षपदाय नित्यं
नमोऽस्तु ते वासरकारणाय ॥
आदित्यश्चार्च्चितो देव आदित्यः परमं पदम् ।
आदित्यो मातृको भूत्वा आदित्यो वाङ्मयं जगत् ॥
आदित्यं पश्यते भक्त्या मां पश्यति ध्रुवं नरः ।
आदित्यं पश्यते भक्त्या न स पश्यति मां नरः ॥
त्रिगुणञ्च त्रितत्त्वञ्च त्रयो वेदास्त्रयोऽग्नयः ।
त्रयाणाञ्च त्रिमूर्त्तिस्त्वं तुरीयस्त्वं नमोऽस्तु ते ॥
नमः सवित्रे जगदेकचक्षुषे
जगत्प्रसूतिस्थितिनाशहेतवे ।
त्रयीमयाय त्रिगुणात्मधारिणे
विरिञ्चिनारायणशङ्करात्मने ॥
यस्योदये नेह जगत्प्रबुध्यते
प्रवर्त्तते चाखिलकर्म्मसिद्धये ।
ब्रह्मेन्द्रनारायणरुद्रवन्दितः
स नः सदा यच्छतु मङ्गलं रविः ॥
नमोऽस्तु सूर्य्याय सहस्ररश्मये
सहस्रशाखान्वितसम्भवात्मने ।
सहस्रयोगोद्भवभावभागिने
सहस्रसंख्यायुगधारिणे नमः ॥
यन्मण्डलं दीप्तिकरं विशालं
रत्नप्रभं तीव्रमनादिरूपम् ।
दारिद्र्यदुःखक्षयकारणञ्च
पुनातु मां तत्सवितुर्व्वरेण्यम् ॥
यन्मण्डलं देवगणैः सुपूजितं
विप्रैः स्तुतं भावनमुक्तिकोविदम् ।
तं देवदेवं प्रणमामि सूर्य्यं
पुनातु मां तत्सवितुर्व्वरेण्यम् ॥
यन्मण्डलं ज्ञानघनं त्वगम्यं
त्रैलोक्यपूज्यं त्रिगुणात्मरूपम् ।
समस्ततेजोमयदिव्यरूपं
पुनातु मां तत्सवितुर्व्वरेण्यम् ॥
यन्मण्डलं गूढमतिप्रबोधं
धर्म्मस्य वृद्धिं कुरुते जनानाम् ।
तत् सर्व्वपापक्षयकारणञ्च
पुनातु मां तत्सवितुर्व्वरेण्यम् ॥
यन्मण्डलं व्याधिविनाशदक्षं
ऋग्यजुःसामसु सम्प्रगीतम् ।
प्रकाशितं येन च भूर्भुवः स्वः
पुनातु मां तत्सवितुर्व्वरेण्यम् ॥
यन्मण्डलं वेदविदो वदन्ति
गायन्ति यच्चारणसिद्धसङ्घाः ।
यद्योगिनो योगजुषाञ्च सङ्घाः
पुनातु मां तत्सवितुर्व्वरेण्यम् ॥
यन्मण्डलं सर्व्वजनेषु पूजितं
ज्योतिश्च कुर्य्यादिह मर्त्यलोके ।
यत्कालकालादिमनादिरूपं
पुनातु मां तत्सवितुर्व्वरेण्यम् ॥
यन्मण्डलं विष्णुचतुर्मुखाख्यं
यदक्षरं पापहरं जनानाम् ।
यत्कालकल्पक्षयकारणञ्च
पुनातु मां तत्सवितुर्व्वरेण्यम् ॥
यन्मण्डलं विश्वसृजं प्रसिद्ध-
मुत्पत्तिरक्षाप्रलयप्रगल्भम् ।
यस्मिन् जगत् संहरतेऽखिलञ्च
पुनातु मां तत्सवितुर्व्वरेण्यम् ॥
यन्मण्डलं सर्व्वगतस्य विष्णो-
रात्मा परं धाम विशुद्धतत्त्वम् ।
सूक्ष्मान्तरैर्योगपथानुगम्यं
पुनातु मां तत्सवितुर्व्वरेण्यम् ॥
यन्मण्डलं ब्रह्मविदो वदन्ति
गायन्ति यच्चारणसिद्धसङ्घाः ।
यन्मण्डलं वेदविदः स्मरन्ति
पुनातु मां तत्सवितुर्व्वरेण्यम् ॥
यन्मण्डलं वेदविदोपगीतं
यद्योगिनां योगपथानुगम्यम् ।
तत् सर्व्ववेदं प्रणमामि सूर्य्यं
पुनातु मां तत्सवितुर्व्वरेण्यम् ॥
मङ्गलाष्टमिदं पुण्यं यः पठेत् सततं नरः ।
सर्व्वपापविशुद्धात्मा सूर्य्यलोके महीयते ॥
ध्येयः सदा सवितृमण्डलमध्यवर्त्ती
नारायणः सरसिजासनसन्निविष्टः ।
केयूरवान् मकरकुण्डलवान् किरिटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥
सशङ्खचक्रं रविमण्डले स्थितं
कुशेशयाक्रान्तमनन्तमच्युतम् ॥
भजामि बुद्ध्या तपनीयमूर्त्तिं
सुरोत्तमं चित्रविभूषणोज्ज्वलम् ॥
एवं ब्रह्मादयो देवा ऋषयश्च तपोधनाः ।
कीर्त्तयन्ति सुरश्रेष्ठं देवं नारायणं विभुम् ॥
वेदवेदाङ्गशरीरं दिव्यदीप्तिकरं परम् ।
रक्षोघ्नं रक्तवर्णञ्च सृष्टिसंहारकारकम् ॥
एकचक्रो रथो यस्य दिव्यः कनकभूषितः ।
स मे भवतु सुप्रीतः पद्महस्तो दिवाकरः ॥
आदित्यः प्रथमं नाम द्वितीयन्तु दिवाकरः ।
तृतीयं भास्करः प्रोक्तं चतुर्थन्तु प्रभाकरः ॥
पञ्चमन्तु सहस्रांशुः षष्ठञ्चैव त्रिलोचनः ।
सप्तमं हरिदश्वश्च अष्टमञ्च विभावसुः ॥
नवमं दिनकृत् प्रोक्तं दशमं द्वादशात्मकः ।
एकादशं त्रयीमूर्त्तिर्द्वादशं सूर्य्य एव च ॥
द्वादशादित्यनामानि प्रातःकाले पठेन्नरः ।
दुःस्वप्ननाशनश्चैव सर्व्वदुःखञ्च नश्यति ॥
दद्रुकुष्ठहरश्चैव दारिद्र्यं हरते ध्रुवम् ।
सर्व्वतीर्थप्रदश्चैव सर्व्वकामप्रवर्द्धनम् ॥
यः पठेत् प्रातरुत्थाय भक्त्या नित्यमिदं नरः ।
सौख्यमायुस्तथारोग्यं लभते मोक्षमेव च ॥
अग्निमीले नमस्तुभ्यमिषेत्वोर्जस्वरूपिणे ।
अग्न आयाहि वीतस्त्वं नमस्ते ज्योतिषां पते ।
शन्नोदेवी नमस्तुभ्यं जगच्चक्षुर्नमोऽस्तु ते ।
पञ्चमायोपवेदाय नमस्तुभ्यं नमो नमः ॥
पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः ।
सप्ताश्वरथसंयुक्तो द्विभुजः स्यात् सदा रविः ॥
आदित्यस्य नमस्कारं ये कुर्व्वन्ति दिने दिने ।
जन्मान्तरसहस्रेषु दारिद्र्यं नोपजायते ॥
उदयगिरिमुपेतं भास्करं पद्महस्तं
निखिलभुवननेत्रं भक्तरत्नोपमेयम् ।
तिमिरकरिमृगेन्द्रं बोधकं पद्मिनीनां
सुरवरमभिवन्दे सुन्दरं विश्ववन्द्यम् ॥"
इति श्रीभविष्योत्तरपुराणे श्रीकृष्णार्ज्जुनसंवादे आदित्यहृदयस्तोत्रं संपूर्णम् ॥*॥)

सूर्य्या, स्त्री,(सूर्य्यस्य भार्य्या । टाप् ।) सूर्य्यभार्य्या संज्ञा । इति शब्दरत्नावली ॥ इन्द्रवारुणी । इति राजनिर्घण्टः । नवोढ़ा । इति शब्दरत्नावली ॥ यथा, श्रीभागवते । १० । १ । २८ ।
"तस्यां हि कर्हिचिच्छौरिर्व्वसुदेवः कृतोद्वहः ।
देवक्या सूर्य्यया सार्द्धं प्रयाणे रथमारुहत् ॥"
(वाक् । इति निघण्टुः । १ । ११ । "सर्त्तेर्गत्यर्थात् सुवतेर्व्वा प्रेरणार्थात् राजसूयसूर्य्येत्यादिना निपातनात् क्यपि सर्त्तेरुत्वं सुवतेर्व्वा रुड़ागमः । सरति गच्छति स्तोतॄन् प्रति, कर्णशष्कुलिं वा सुवति प्रेरयति चोदनारूपा पुरुषार्थोनिदं कुर्व्विति । यद्वा, सुपूर्व्वादीरतेः कृत्यल्युटो बहुलम् । इति कर्म्मणि क्यपि निपातनाद्रूपसिद्धिः । सुष्ठु ईर्य्यते उच्चार्य्यते इति सूर्य्या । यद्वा, षु प्रेरणे सुसूधोगृधिभ्यः क्रन् इति क्रन्-प्रत्ययः । प्रेर्य्यते उच्चारणकाले प्राणेन सूरा छन्दसि स्याच्च इति यत्प्रत्ययः सूर्य्या । यद्वा, सूरयो मेधाविनः तानर्हति छन्दसि च, इति यत् प्रत्ययः । यद्वा, सूरिषु साधुः । तत्र साधुः इति यत् ।" इति तट्टीकायां देवराजयज्वा ॥)

सूर्य्यार्घ्यं, क्ली,(सूर्य्याय देयमर्घ्यम् ।) सूर्य्यसम्प्रदानकार्घ्यम् । मक्तिपूजायां अच्छिद्रावधारणार्थं सूर्य्यार्घ्यदानम् । यथा,—
"ततो भास्करबीजेन वह्नितनाम्ना पुनः ।
मन्त्रेण भास्करायार्घ्यमच्छिद्रार्थं निवेदयेत् ॥
नमो विवस्वते ब्रह्मन् भास्वते विष्णुतेजसे ।
जगत्सवित्रे शुचये सवित्रे कर्म्मदायिने ॥
ततः कृताञ्जलिर्भूत्वा पठित्वा मन्त्रमीरितम् ।
एकाग्रमनसा वाग्भिरच्छिद्रमवधारयेत् ॥
यच्छिद्रं तपश्छिद्रं यच्छिद्रं पूजने मम ।
सर्व्वं तदच्छिद्रमस्तु भास्करस्य प्रसादतः ।"
इति कालिकापुराणे ५६ अध्यायः ॥

रोगादिशान्त्यर्थं सूर्य्यस्य इंमादिमसतिनामभिः अर्नतिधार्घ्यप्रदानप्रमाणं यथा,—

"हंसो भानुः सहस्रांशुस्तपनस्तापनो रविः।
विकर्त्तनो विवस्वांश्च विश्वकर्म्मा विभावसुः॥
विश्वरूपो विश्वकर्त्ता मार्त्तण्डो मिहिरोऽंशुमान्।
आदित्यश्चोष्णगुः सूर्य्योऽर्य्यमा ब्रध्नो दिवाकरः॥
द्वादशात्मा सप्तहयो भास्करोऽहस्करः खगः।
सूरः प्रभाकरः श्रीमान् लोकचक्षुर्ग्रहेश्वरः॥
त्रिलोकेशो लोकसाक्षी तमोऽरिः शाश्वतः शुचिः।
गभस्तिहस्तस्तीव्रांशुस्तरणिः सुमहोरणिः॥
द्युमणिर्हरिदश्वोऽर्को भानुमान् भयनाशनः।
छन्दोऽश्वो वेदवेद्यश्च भास्वान् पूषा हषाकपिः॥
एकचक्ररथो मित्रो मन्देहारिस्तमिस्रहा।
दैत्यहा पापहर्त्ता च धर्म्माधर्म्मप्रकाशकः॥
हेलिश्चित्रभानुश्च कलिघ्नस्तार्क्ष्यवाहनः।
दिक्पतिः पद्मिनीनाथः कुशेशयकरो हरिः॥
घर्म्मरश्मिर्दुर्निरीक्ष्यश्चण्डांशुः कश्यपात्मजः।
एभिः सप्ततिसंख्याकैः पुण्यैः सूर्य्यस्य नामभिः॥
प्रणवादिचतुर्थ्यन्तैर्नमस्कारसमन्वितैः।
प्रत्येकमुच्चरन्नाम दृष्ट्वा दृष्ट्वा दिवाकरम्॥
निधाय पात्रयुग्मे न ताम्रपात्रं सुनिर्म्मलम्।
जानुभ्यामवनीं गत्वा परिपूर्य्य जलेन च॥
करवीरादिकुसुमै रक्तचन्दनमिश्रितैः।
दूर्व्वाङ्कुरैरक्षतैश्च तिलैः पात्रमध्यतः॥
दद्यादर्घ्यं भगवते सवित्रे ध्यानपूर्व्वकम्।
उपसीमिमसानीय तत्वार्थं नाम्यहस्तना॥
प्रतिसर्व्वं समस्कुर्य्यादुदयास्तमये रविम्।
अनया नाम माला मदाममन्त्ररहस्यया॥
एवं कुर्व्वन्नरो जातु न दरिद्रो न दुःखभाक्।
व्याधिभिर्म्मुच्यते घोरैरपि जन्मान्तरार्ज्जितैः॥
विनैव धर्व्विना वेदैर्व्विना यथापरिग्रहैः।
कालेन निधनं प्राप्य सूर्य्यलोके महीयते॥"

इति स्कन्दपुराणे काशीखण्डे ८ अध्यायः॥

सूर्य्यालोकः, पुं, (सूर्य्यस्य आलोकः।) आतपः। इति राजनिर्घण्टः॥

सूर्य्यावर्त्तः, पुं, (सूर्य्य इव आवर्त्तते इति। आ + वृत् + अच्।) क्षुपविशेषः। हुड्हुड़िया इति भाषा। अस्य गुणः। सूर्य्यावर्त्तो विषघ्नः। इति राजवल्लभः॥ शाकविशेषः। सुलचिया इति भाषा। तत्पर्य्यायः।

"दाव्वंगदव करभी वज्रिरः कपिपिप्पली।
कामातार्मी कथित् प्रोक्तः सूर्य्यावर्त्तः मितोऽपरः॥"

इति रत्नमाला॥

"वराहकान्ती कथितः सूर्य्यावर्त्तस्तु माङ्गिकेः॥"

इति हारावली॥

सूर्य्यावर्त्ता, स्त्री, (सूर्य्य इव आवर्त्तते या। आ + वृत् + अच्। टाप्।) आदित्यभक्ता। राजनिर्घण्टः॥

सूर्य्याश्मा, [न्] पुं, (सूर्य्यप्रियोऽश्मा प्रस्तरः।) सूर्य्यकान्तमणिः। इति हेमचन्द्रः॥

सूर्य्याश्वः, पुं, (सूर्य्यस्य अश्वः।) सूर्य्यघोटकः। तत्पर्य्यायः। वाताटः २ हरितः ३। इति त्रिकाण्डशेषः॥

सूर्य्यास्तं, क्ली, (सूर्य्यस्य अस्तम्।) सूर्य्यस्यास्ताचलगमनम्। यथा,—

"निर्य्यायादच इत्यनेन अहोरात्रपूर्व्वकालत्वेन सूर्य्यास्तमयकालस्यापि लाभात्॥" इति तिथ्यादितत्त्वम्॥

सूर्य्याह्वं, क्ली, (सूर्य्यस्य आह्वा आख्या यस्य।) ताम्रम्। इति त्रिकाण्डशेषः॥ सूर्य्यनामके, त्रि॥

सूर्य्याह्वः, पुं, (सूर्य्यस्य आह्वा आख्या यस्य।) अर्कवृक्षः। इति राजनिर्घण्टः॥

सूर्य्येन्दुसङ्गमः, पुं, (सूर्य्येण सह इन्दोः सङ्गम एकराश्येकस्थानरूपमिलनं यत्र।) अमावास्या। इत्यमरः। १। ४। ८॥ सूर्य्यचन्द्रमिलनञ्च॥

सूर्य्योढः, पुं, (सूर्य्य ऊढोऽस्तगतो यत्र।) सूर्य्यास्तकालप्राप्तोऽतिथिः। यथा,—

"सूर्य्योढस्तु स सम्प्राप्तो यः सूर्य्येऽस्तं गतेऽतिथिः॥"

इति हेमचन्द्रः॥

यथा, विष्णुपुराणम्।

"दिवातिथौ तु विमुखे गते यत् पातकं भवेत्
तदेवाष्टगुणं विद्यात् सूर्य्योढे विमुखे गते॥"

इत्याह्निकाचारतत्त्वम्॥

सूर्य्योदयः, पुं, (सूर्य्यस्य उदयः।) सूर्य्यस्य प्रकाशः। यथा, विष्णुधर्म्मोत्तरे।

"सावने च तथा मासि त्रिंशत्सूर्य्योदयाः स्मृताः
आदित्यराशिभोगेन सौरो मासः प्रकीर्त्तितः॥"

इति मलमासतत्त्वम्॥

तत्र शयननिषेधो यथा,—

"सूर्य्योदये चास्तमिते च शायिनं
विमुञ्चति श्रीरपि चक्रपाणिनम्॥"

इति लक्ष्मीचरित्रम्॥ * ॥

तत्काले स्नानादेः कर्त्तव्यता यथा,—

"सूर्य्योदयं विना नैव स्नानदानादिकाः क्रियाः"

इति प्रायश्चित्ततत्त्वम्॥

सूष, प्रसवे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) षत्वस्वरी। सूषति। इति दुर्गादासः॥

सृ, गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-अनिट्।) सरति। मालानं करिणा सस्रे इति रघौ कर्म्मकर्त्तृत्वादिति रमानाथः। तच्चिन्त्यं कर्त्तृत्वाभावधातूनां तन्निषेधात्। वस्तुतस्तु . . . । नाप्नोरिति वा . . . भावे प्रत्ययः। इति . . . गतौ।

सृ, र लि गतौ। इति कविकल्पद्रुमः॥ (जु०-पर०-सक०-अनिट्।) र, वैदिकः। ससर्त्ति। इति दुर्गादासः॥

सृक्, [ज्] पुं, (सृजतीति। सृज् + क्विन्।) सृष्टिकर्त्ता। तस्य रूपान्तराणि। सृक्। सृङ्। इति सिद्धान्तकौमुदी॥

सृकः, पुं, (सरतीति। सृ गतौ + सृवृभूशुषिमुषिभ्यः कक्।" उणा० ३। ४१। इति) कैरवः। बाणः। इत्युणादिकोषः॥ वायुः। इति . . . (वज्रः। इति निघण्टुः। २। २०॥) त्रि। यथा, ऋग्वेदे। १०। १८०। २।

"सृकं संशाय पविमिन्द्र तिग्मम्।"

"सृकं सरणशीलम्।" इति तद्भाष्यम्॥)

सृकण्डुः, स्त्री, कण्डूरोगः। इति . . .

सृकालः, पुं, शृगालः। इति शब्दचन्द्रिका॥

सृक्क, [न्] क्ली, (सृजति लालादीनिति। बाहुलकात् कनिन्।) सृक्कणी। इति इत्यमरटीकायां भरतः॥ (यथा, १। १२५। २।

"भयात्सस्तम्भितभुजः . . .

सृक्कं, क्ली, सृक्कणी। इत्यमरटीकायां भरतः। (यथा, सुश्रुते। २। १६।

"जलाशयाच मूर्च्छन्ति . . .

सृक्कणी, स्त्री, ओष्ठयोः प्रान्तभागः। पाणिनि। इत्यमरटीकायां भरतः॥ (सुश्रुते। ४। ६०।

"भूमौ यः प्रसरति सर्व्वतः . . .
सृक्कण्यौ विलिहति जिह्वया . . .

सृक्कि, क्ली, सृक्कणी। इत्यमरः। भरतः॥

सृक्व, [न्] क्ली, (सृजति लालादीनिति। . . . वनिप्।) ओष्ठप्रान्तभागः। यथा,—

"————प्रान्तावोष्ठस्य सृक्वणी॥

"ओष्ठयोर्व्वामदक्षिणौ . . .
ओष्ठस्येति जातावेकत्वम्। सृक्वणी सास्विति क्वनिप् निपातनात्। सृक्वणी कर्त्तृप्रयोगात् वर्णयोः। टायां सदानीऽलोप इत्यलोपः स्यात्।
'महाहकाय शोभितौ . . .
इति शेषः . . .
क्लीवे सृक्वणी क्लीवे इति . . .
सृक्वणी . . .
सृक्वणी। सृक्वणौ . . .
इत्यनियमः।
'स सृक्वणी . . .
प्रलेलिहानो . . .
इति . . .
इति क्लीबमिदम् . . .
. वारिः . . .
. . .

इत्युक्तिः। वामं लिहन् सृक्कमरण्यपूर्णं इति वसन्तराजप्रयोगाच्च।" इति भरतः॥

[सृक्]कं, क्ली, ओष्ठप्रान्तभागः। इति वसन्तराजप्रयोगः। इत्यमरटीकायां भरतः॥

[सृक्]कणी, स्त्री, ओष्ठप्रान्तभागः। कस इति भाषा। इति पाणिनिः। इत्यमरटीकायां भरतः। २। ६। ९१॥

[सृक्]कि, क्ली, ओष्ठयोः प्रान्तभागः। इत्यरुणः। इत्यमरटीकायां भरतः। २। ६। ९१॥

[सृ]क्किणी, स्त्री, ओष्ठयोरन्तरम्। इति राजनिर्घण्टः॥

[सृ]गः, पुं, (सरतीति। सृ+बाहुलकात् गक्।) भिन्दिपालः। इत्यमरः। २। ८। ९१॥

[सृ]गालः, पुं, (सृजति मायामिति। सृज्+बाहुलकात् कालन्। न्यङ्क्वादित्वात् कुत्वम्।) जम्बुकः। इति शब्दरत्नावली। दैत्यविशेषः। इति केचित्॥

[सृङ्का], स्त्री, शब्दवती रत्नमयी माला। यथा,—

"तमब्रवीत् प्रीयमाणो महात्मा
वरं तवेहाद्य ददामि भूयः।
तवैव नाम्ना भवितायमग्निः
सृङ्काञ्चेमामनेकरूपां गृहाण॥"

इति कठोपनिषदि प्रथमा वल्ली॥

'सृङ्कां शब्दवतीं रत्नमयीं मालां इमामनेकरूपां विचित्रां गृहाण स्वीकुरु। सृङ्कां वाकुत्सितां गतिं कर्म्ममयीं गृहाण। अन्यदपि कर्म्मविज्ञानमनेकफलहेतुत्वात् स्वीकुर्व्वित्यर्थः।" इत्यादिशाङ्करभाष्यम्॥

[सृज], घौ श विसर्गे। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-अनिट्।) घौ, असाक्षीत्। श, सृजति। इति दुर्गादासः॥

[सृज], य ङ घौ विसर्गे। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-सक०-अनिट्।) य ङ, सृज्यते। घौ, स्रष्टा। सर्गो सृज्यते। विसर्गस्त्यागः। त्यागो ऽत्र परं एव अन्यत्र करोतीत्यर्थः। यदा। रुपाममामित्य पितुः स सृज्यते इति [illegible]॥ संपृक्तोऽयमर्णवः। यथा। संसृज्यते सरसिजैररुणांशुभिन्नैः क्रियापरिणाम-वादुरिति रघुः। इति दुर्गादासः॥

[सृ]ण्वाहारः, पुं, दर्व्विकाहारः। इत्यमरटीकायां रमानाथः॥

[सृणि], पुं, (सरतीति। सृ+"सृवृषिभ्यां कित्।" उणा० ४। ४८। इति निः। स च कित्।) अङ्कुशः। इति शब्दमाला॥

[सृणि], स्त्री, (सृ+निः। कित्।) अङ्कुशः। इत्यमरः। २। ८। ४१॥ (स्त्रियां [illegible]। [illegible] यथा, [illegible]। १। १।

"[illegible]
[illegible]॥")

[सृणिका], स्त्री, लाला। इत्यमरः। २। ६। ६७॥

[सृणी], स्त्री, (सृणि+कृदिकारादक्तिनः इति ङीष्।) अङ्कुशः। इत्यमरः। २। ८। ४१॥

सृणीका, स्त्री, लाला। इत्यमरटीकायां रामाश्रमः। २। ६। ६७॥

सृतः, त्रि, (सृ+क्तः।) गतः। (यथा, महाभारते। ८। २३। २९।

"गान्धारराजस्तु पुनर्वाक्यमाह ततो बली।
निवर्त्तध्वमधर्म्मोऽयं युध्यध्वं किं सृतेन वः॥")

सृतिः, स्त्री, (सृ+क्तिन्।) गमनम्। मार्गः। इति मेदिनी॥ (यथा, गीतायाम्। ८। २७।

"नैते सृती पार्थ जानन् योगी मुह्यति कश्चन।
तस्मात् सर्व्वेषु कालेषु योगयुक्तो भवार्ज्जुन॥")

जन्म। इति स्वामी॥ यथा, भागवते। १०। ६०। ४३।

"त्वाम्मे तवाङ्घ्रिशरणं सृतिभिर्भ्रमन्त्या
यो वै भजन्तमुपयात्यनृतापवर्गः॥"

निर्म्माणम्। यथा, भागवते। ३। २। १३।

"कार्त्स्न्येन चाद्येह गतं विधातु-
रर्व्वाक्सृतौ कौशलमित्यमन्यत॥"

"अर्व्वाक्सृतौ अर्व्वाचीनसंसारनिर्म्माणे मनुष्यनिर्म्माणे वा।" इति तट्टीका॥)

सृत्वरः, त्रि, (सरति तच्छीलः। सृ गतौ+"इण्नशजिसर्त्तिभ्यः क्वरप्।" ३। २। १६३। इति क्वरप्।) गमनकर्त्ता। सृधातोः घुरप्प्रत्यये तनागमेन निष्पन्नः। इति मुग्धबोधव्याकरणम्॥

सृत्वरी, स्त्री, (सृ+क्वरप्। सृ+क्वनिप्। ङीप्।) माता। इति संक्षिप्तसारोणादिवृत्तिः॥ गमनकर्त्री। इति मुग्धबोधव्याकरणम्॥

सृत्वा, [न्]पुं, (सृ गतौ+"शीङ्क्रुशीत्यादीनि।" उणा० ४। ११५। इति क्वनिप्।) विसर्पः। हरिः। प्रजापतिः। इति संक्षिप्तसारोणादिवृत्तिः॥

सृदरः, पुं, (दृ विदारणे+"कृदराढयः।" उणा० ५। ४१। इति अच्प्रत्ययेन निपातनात् साधुः।) सर्पः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

सृदाकुः, पुं, (सरतीति। सृ+"सर्त्तेर्दुक् च।" उणा० ३। ७८। इति काकुर्दुगागमश्च।) वायुः। वज्रम्। अग्निः। प्रतिसूर्य्यकः। इति मेदिनी॥ मृगः। इति संक्षिप्तसारोणादिवृत्तिः॥

सृदाकुः, स्त्री, (सरतीति। सृ गतौ+काकुर्दुगागमश्च।) नदी। इत्युणादिकोषः॥

[सृप], सृ ऌ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-अनिट्।) ऌ, असृपत्। [illegible] [illegible] इति [illegible] [illegible] [illegible] [illegible]। घौ, स्रप्ता। इति दुर्गादासः॥

[सृपाटः], पुं, सृपाटी। इति शब्दचन्द्रिकायाममरटीकायां भरतः। २। ६। २८॥

[सृपाटिका], स्त्री, चञ्चुः। इति त्रिकाण्डशेषः॥

[सृपाटी], स्त्री, (सृपाट+गौरादित्वात् ङीष्।) [illegible]। इति शब्दचन्द्रिकायाममरटीकायां भरतः। २। ६। २८। [illegible]। इति [illegible]॥

सृप्रः, पुं, (सृप गतौ+"स्फायितञ्चिवञ्चीति।" उणा० २। १३। इति रक्।) चन्द्रः। इत्युणादिकोषः॥

सृफ, उ हिंसे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्। क्त्वावेट्।) असर्फीत्। उ, सर्फित्वा सृफ्वा। इति दुर्गादासः॥

सृमरः, पुं, (सरति तच्छीलः। सृ गतौ+"सृघस्यदः क्मरच्।" ३।२।१६०। इति क्मरच्।) पशुविशेषः। इत्यमरः। २। ५। ११॥ बालमृगः। इति केचित्॥ (यथा, रामायणे। ३। १०३। ४२।

"वराहमृगसिंहाश्च महिषाः सृमरास्तथा।
व्याघ्रगोकर्णगवया वित्रेसुः पृषतैः सह॥")

सृष्टः, त्रि, (सृज्+क्तः।) निर्म्मितम्। युक्तम्। निश्चितम्। बहुलम्। इति मेदिनी॥ भूषितम्। इत्यजयः॥ त्यक्तम्। (यथा, रामायणे। २। ३५। १५।

"महाब्रह्मविसृष्टा या ज्वलन्तो भीमदर्शनाः।
धिक्वाग्दण्डा न हिंसन्ति रामप्रव्राजनं
कृताम्॥")

सृष्टिः, स्त्री, (सृज्+क्तिन्।) निर्म्मितिः। स्वभावः। इति मेदिनी॥ निर्गुणः इति शब्दरत्नावली॥ ब्रह्माण्डसृष्टिर्यथा। सृष्टेः पूर्व्वं सकलप्राणिगोचरो भगवान् एक एवासीत्। [illegible] [illegible] [illegible] त्रिगुणमयीं मायां प्रकाशयामास। [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]

[illegible]

तस्मात्ताभ्यः तनुस्त्येन सत्त्वप्रायमभूद्दिनम्।
ततो हि बलिनो रात्रावसुरा देवता दिवा ॥
सत्त्वमात्रात्मिकामेव ततोऽन्यां जगृहे तनुम्।
पितृवन्मन्यमानस्य पितरस्तस्य जज्ञिरे ॥
उत्ससर्ज ततस्तान्तु पितॄन् सृष्ट्वापि स प्रभुः।
सा चोत्सृष्टाभवत् सन्ध्या दिननक्तान्तरस्थितिः ॥
रजोमात्रात्मिकामन्यां जगृहे स तनुं ततः।
रजोमात्रोत्कटा जाता मनुष्या द्विजसत्तम ॥
तामप्याशु स तत्याज तनुमाद्यः प्रजापतिः।
ज्योत्स्ना समभवत् सापि प्राक्सन्ध्या याभिधीयते ॥
ज्योत्स्नोद्गमे तु बलिनो मनुष्याः पितरस्तथा।
मैत्रेय सन्ध्यासमये तस्मादेते भवन्ति वै ॥
ज्योत्स्ना रात्र्यहनी सन्ध्या चत्वार्य्येतानि वै प्रभोः।
ब्रह्मणस्तु शरीराणि त्रिगुणोपाश्रयाणि तु ॥
रजोमात्रात्मिकामेव ततोऽन्यां जगृहे तनुम्।
ततः क्षुद्ब्रह्मणो जाता जज्ञे कोपस्तया ततः ॥
क्षुत्क्षामानन्धकारेऽथ सोऽसृजद्भगवांस्ततः।
विरूपाः श्मश्रुला जातास्तेऽभ्यधावन्त तं प्रभुम् ॥
मैवं भो रक्ष्यतामेष यैरुक्तं राक्षसास्तु ते।
ऊचुः खादाम इत्यन्ये ये ते यक्षास्तु जक्षणात् ॥
अप्रियेणाथ तान् दृष्ट्वा केशाः शीर्य्यन्त वेधसः।
हीनाश्च शिरसो भूयः समारोहन्त तच्छिरः ॥
सर्पणात्तेऽभवन् सर्पा हीनत्वादहयः स्मृताः।
ततः क्रुद्धो जगत्स्रष्टा क्रोधात्मानो विनिर्म्ममे ॥
वर्णेन कपिशेनोग्रा भूतास्ते पिशिताशनाः।
गायतोऽङ्गात् समुत्पन्ना गन्धर्व्वास्तस्य तत्क्षणात्
पिबन्तो जज्ञिरे वाचं गन्धर्व्वास्तेन ते द्विज।
[illegible]

उच्चावचानि भूतानि गात्रेभ्यस्तस्य जज्ञिरे।
देवासुरपितॄन् सृष्ट्वा मनुष्यांश्च प्रजापतिः ॥
ततः पुनः ससर्जादौ सङ्कल्पात् स पितामहः।
यक्षान् पिशाचान् गन्धर्व्वान् तथैवाप्सरसां गणान् ॥
नरकिन्नररक्षांसि वयःपशुमृगोरगान्।
अव्ययञ्च व्ययञ्चैव यदिदं स्थाणुजङ्गमम्।
तत् ससर्ज तदा ब्रह्मा भगवानादिकृत् प्रभुः ॥
तेषां ये यानि कर्म्माणि प्राक्सृष्ट्यां प्रतिपेदिरे।
तान्येव ते प्रपद्यन्ते सृज्यमानाः पुनः पुनः ॥
हिंस्राहिंस्रे मृदुक्रूरे धर्म्माधर्म्मावृतानृते।
तद्भाविताः प्रपद्यन्ते तस्मात्तत्तस्य रोचते ॥
इन्द्रियार्थेषु भूतेषु शरीरेषु च स प्रभुः।
नानात्वं विनियोगञ्च धातैव व्यसृजत् स्वयम् ॥
नाम रूपञ्च भूतानां कृत्यानाञ्च प्रपञ्चनम्।
वेदशब्देभ्य एवादौ देवादीनां चकार सः ॥
ऋषीणां नामधेयानि यथा वेदश्रुतानि वै।
तथा नियोगयोग्यानि ह्यन्येषामपि सोऽकरोत् ॥
यथर्त्तावृतुलिङ्गानि नानारूपाणि पर्य्यये।
दृश्यन्ते तानि तान्येव तथा भावा युगादिषु ॥
करोत्येवंविधां सृष्टिं कल्पादौ स पुनः पुनः।
सिसृक्षाशक्तियुक्तोऽसौ सृज्यशक्तिप्रचोदितः ॥"
इति विष्णुपुराणे। १। ५। २७—६५ ॥

सृष्टिप्रदा, स्त्री, (सृष्टिं तद्धेतुभूतगर्भं प्रददातीति प्र + दा + कः।) गर्भदात्रीक्षुपः। इति राजनिर्घण्टः ॥

सॄ, गि हिंसि। इति कविकल्पद्रुमः ॥ (क्र्या०-पर०-सक०-अनिट्।) दन्त्यादिरयं तालव्योपधः तद्विनोऽपीति केचित्। गि, सृणाति। सीर्णः सीर्णिः। इति दुर्गादासः ॥

सेक, ऋ ङ गत्याम्। इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट्।) ऋ, असिसेकत्। ङ, सेकते। इति दुर्गादासः ॥

सेकः, पुं, (सिच् + घञ्।) सेचनम्। तत्पर्य्यायः। चारः २। इति हेमचन्द्रः ॥ (यथा, रघुः। १। ५१।
"सेकान्ते मुनिकन्याभिस्तत्क्षणोज्झितवृक्षकम्।
विश्वासाय विहङ्गानामालवालाम्बुपायिनाम् ॥")
[illegible]

सेक्ता, [ऋ] पुं, (सिञ्चति रेतः। सिच् + तृच्।) भर्त्ता। इति हेमचन्द्रः ॥ सेचनकर्त्तरि, (यथा, ऋग्वेदे। १। ३२। १५।
"सेक्तेव कोशं सिसिचे पिबध्यै ॥")

सेक्त्रं, क्ली, (सिच्यतेऽनेनेति। सिच् + [illegible] ३। २। १८२। इति करणे ष्ट्रन्।) सेकपात्रम्। इति सिद्धान्तकौमुदी ॥

सेचकः, पुं, (सिञ्चतीति। सिच् + ण्वुल्।) सेककर्त्तरि, त्रि। इति मेदिनी ॥

सेचनं, क्ली, (सिच क्षरणे + ल्युट्।) क्षरणम्। सेकः। (यथा, मार्कण्डेये। ३१। १३।
"भुक्ता चाचामतां यच्च जलं यच्चाङ्घ्रिसेचने।
ब्राह्मणानां तथैवान्ये तेन तृप्तिं प्रयान्ति वै")
नौकायाः सेकभाजनम्। इति [illegible]
(अभिषेकः। यथा, महानिर्व्वाणे। २। ११५।
"तद्गात्रेण श्रवणं तर्पणं तद्गात्रतः।
सेचनं तद्गात्रेण तद्गात्रेण सुन्दरि ! ॥")

सेटुः, पुं, फलविशेषः। तरमुज इति भाषा। पर्य्यायः। चेलालः २ चित्रफलम् ३ सुफलः ४ राजतेलिपः ५ लतापनसः ६ नाटाम्रः ७। इति त्रिकाण्डशेषः जटाधरश्च ॥

सेतिका, स्त्री, अयोध्या। इति भूरिप्रयोगः ॥

सेतुः, पुं, (सिनोति बध्नाति जलमिति। सिञ् बन्धने + "सितनिगमिमसीति।" उणा० १। ७०। इति तुन्। चेत्यादेराति:।) अमरः। २। १। १४ ॥ तत्पर्य्यायः। आलिः २ इति भरतः ॥ पुलः ३ पिण्डलः ४। इति शब्दरत्नावली ॥ पद्धारः ५ जङ्गालः ६ मघरः ७। इति जटाधरः ॥ पिण्डिलः ८। इति शब्दरत्नावली ॥ धरणः ९। इति त्रिकाण्डशेषः ॥ अस्य तडागादिफलं यथा,—
"सेतुप्रदानादिन्द्रस्य लोकमाप्नोति मानवः।
प्रपाप्रदानाद्वरुणलोकमाप्नोत्यसंशयम् ॥
संक्रमाणाञ्च यः कर्त्ता स स्वर्गे याति मानवः।
[illegible] सदा ॥"
इति मठादिप्रतिष्ठातत्त्वम् ॥

वरणद्रुमः। इति मेदिनी राजनिर्घण्टश्च ॥ (अस्य पर्य्यायो गुणाश्च यथा,—
[illegible]

कृतेऽधुना सौम्ये सेतुरेषा सुदुर्गमः ।
सानुमाचलपार्श्वे ग्रहाणां सेतुरुच्यते ॥
शिशिरेषु यथा तोयं पर्व्वाशिर्वं प्रसर्पति ।
एवमेव निःसीमः कालात् गच्छति शङ्करात्॥
सुराः सर्व्वे मत्तेषु चतुर्व्वर्णा द्विजातयः ।
कार्य्यो सेतुमादाय ऊर्द्ध्वगं समारभेत् ॥
दुराचारादिसेतुर्व्वा द्विसेतुर्व्वा यथेप्सतः ।
सेतुः स्यात् समाख्याताः सर्व्वदेव द्विजातयः ॥"

इति कालिकापुराणे ५५ अध्यायः ॥

सेतुकः, पुं, (सेतुरेव । स्वार्थे कन् ।) वरुणवृक्षः । इति शब्दरत्नावली ॥

सेतुबन्धः, पुं, (सेतोर्बन्धः ।)लङ्कागमनार्थश्रीरामकृतसमुद्रबन्धनसेतुः । तत्पर्य्यायः । समुद्रारः२ । इति जटाधरः ॥ तद्विवरणं यथा,—

"ततोऽब्रवीद्रघुश्रेष्ठं सागरो विनयान्वितः ।
नलः सेतुं करोत्वस्मिन् जले मे विश्वकर्म्मणः ॥
नलो धीमान् समर्थोऽस्मिन् कार्य्ये लब्धवरो हरिः ।
कीर्त्तिं गायन्तु ते लोकाः सर्व्वलोकमलापहाम्॥
इत्युक्त्वा राघवं नत्वा ययौ सिन्धुरदृश्यताम् ।
. . . . समन्वितः ।
. . . . तुबन्धने ॥
ततोऽतिहृष्टः प्लवगेन्द्रयूथपै-
र्महानगेन्द्रप्रतिमैर्युतो नलः ।
बबन्ध सेतुं शतयोजनायतं
सुविस्तरं पर्व्वतपादपैर्दृढम् ॥"

इति श्रीमदध्यात्मरामायणे लङ्काकाण्डे ३ अः ॥

"सेतुमारभ्यमाणस्तु तत्र रामेश्वरं शिवम् ।
सङ्कल्पनियतो गत्वा पुरीं वाराणसीं नरः ॥
आनाय गङ्गासलिलं रामेशमभिषिच्य च ।
क्षिप्त्वा समुद्रे तद्भारिं ब्रह्म प्राप्नोत्यसंशयः ॥
कृतानि प्रथमेनाह्ना योजनानि चतुर्द्दश ।
द्वितीयेन तथा चाह्ना योजनानाञ्च विंशतिः ॥
तृतीयेन तथा चाह्ना योजनान्येकविंशतिः ।
चतुर्थेन तथा चाह्ना द्वाविंशति तथा कृतम् ॥
पञ्चमेन त्रयोविंशद्योजनानां समन्ततः ।
बबन्ध सागरे सेतुं नलो वानरसत्तमः ॥
तेनैव जग्मुः कपयो योजनानां शतं द्रुतम् ।
असंख्याताः सुवेलाद्रिं रुरुधुः प्लवगोत्तमाः ॥
आरुह्य मारुतिं रामो लक्ष्मणोऽप्यङ्गदं तथा ।
ददृशू राघवो लङ्कां नानाचित्रध्वजाकुलाम्॥"

इति तत्रैव ४ अध्यायः ॥

(सेवाटेरालिबन्धनम् । यथा, महाभारते । ७ । ८४ । २ ।

"गतोदके सेतुबन्धो यादृक् तादृगयं तव ।
विलापो निष्फलो राजन् मा शुचो भरतर्षभ ॥")

सेतुभेदी, [न्] पुं, (सेतुं भिनत्तीति । भिद् + णिनिः ।) दन्तीवृक्षः । इति शब्दचन्द्रिका ॥

सेतुवृक्षः, पुं,(सेतुनामको वृक्षः ।) वरुणवृक्षः । इति शब्दमाला राजनिर्घण्टश्च ॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।

"वरुणस्तिक्तशाकश्च सेतुवृक्षोऽश्मरीपतिः ॥")

सेत्रं, क्ली, (सीयतेऽनेनेति । षिञ् बन्धने + "दाम्नीशसयुयुजेति ।" ३ । २ । १८२ । इति ष्ट्रन् ।) निगडः । इति सिद्धान्तकौमुदी ॥ बेड़ी इति भाषा ॥

सेना, स्त्री, चतुर्व्विंशतितमार्हन्मातॄणां तृतीया माता । इति हेमचन्द्रः ॥ इनेन प्रभुणा सह वर्त्तते या । (यद्वा, सिनोति शत्रुमिति । षिञ् बन्धने + "कृवृजॄसीति ।" उणा० ३ । १० । इति नः । स च नित् । टाप् ।) चतुरङ्गबलम् । फौज इति पारस्यभाषा । (यथा, रघुः ।१।१९।

"सेनापरिच्छदस्तस्य द्वयमेवार्थसाधनम् ।
शास्त्रेष्वकुण्ठिता बुद्धिर्मौर्व्वी धनुषि चातता॥")

तत्पर्य्यायः । ध्वजिनी २ वाहिनी ३ पृतना ४ अनीकिनी ५ चमूः ६ वरूथिनी ७ बलम् ८ सैन्यम् ९ चक्रम् १० अनीकम् ११ । इत्यमरः । २ । ८ । ७८ ॥ वाहना १२ पृतना १३ गुल्मिनी१४ वरचमूः१५ । इति शब्दरत्नावली॥ केचित्तु ध्वजिन्यादि सप्तकं सेनायाम् । बलादि चतुष्कं सेनाङ्गे इत्याहुः । अतएव ध्वजिन्यादि सप्तकं सामान्येन सेनायाम् । बलादि चतुष्कन्तु सामान्येन सेनायां सेनाङ्गे च इति मतम् ॥ इति भरतः ॥

सेनाङ्गं, क्ली, (सेनाया अङ्गम् ।) हस्त्यश्वरथपदातीनां समूहः । यथा,—

"हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुष्टयम् ॥"

इत्यमरः । २ । ८ । ३३ ॥

(यथा, बृहत्संहितायाम् । ११ । ४२ ।

"सेनाङ्गेषु नृपाणां गृहतरुशैलेषु चापि देशानाम् ॥")

सेनाचरः, त्रि, (सेनायां चरतीति । चर + "भिक्षासेनादायेषु ।" ३ । २ ।१७। इति टः ।) सैन्यानुगामी । सेनया सह गन्ता । इति केचित् ॥ (यथा, महाभारते । १ । १३०।१४।

"मृगयाश्चरतो राज्ञः शान्तनोस्तु यदृच्छया ।
कस्यचित् सेनाचरोऽरण्ये मिथुनं तदपश्यत ॥")

सेनानीः, पुं, (सेनां नयतीति । नी + "सत्सूद्विषेति ।" ३ । २ । ६१ । इति क्विप् ।) कार्त्तिकेयः । इत्यमरः ।१।१।४२॥(यथा,रघुः ।२।३७।

"अवैहि मां किङ्करमष्टमूर्त्तेः" ...
"अयैनमद्रेस्तनया शुशोच
सेनान्यमालीढमिवासुरास्त्रैः ॥")

वाहिनीपतिः । इति चामरः । २ । ८ । ६२ ॥ (यथा, महाभारते । ४ । २ । ६ ।

"स तु कामाग्निसंतप्तः सुदेष्णामभिगम्य वै ।
प्रहसन्निव सेनानीरिदं वचनमब्रवीत् ॥")

सेनापतिः, पुं, (सेनायाः पतिः ।) कार्त्तिकेयः । (क्वचित् वाच्यलिङ्गेऽपि दृश्यते । यथा, महानिर्व्वाणतन्त्रे १ । १४ ।

"किमुच्यते महाप्राज्ञ कथ्यतां प्राणवल्लभे ।
यद्वक्ष्य गणेशोऽपि स्कन्दे सेनापतावपि ॥")

अनीकाधिपतिः । इति मेदिनी ॥ अस्य पर्य्यायः । सेनानीः २ वाहिनीपतिः ३ । इत्यमरः । २ । ८ । ६२ ॥ सेनापतेर्गुणा यथा,—

"कुलीनः शीलसम्पन्नो धनुर्व्वेदविशारदः ।
हस्तिशिक्षाश्वशिक्षासु कुशलः श्लक्ष्णभाषणः ॥
निमित्ते शकुनज्ञाने वेत्ता चैव चिकित्सिते ।
कृतज्ञः कर्म्मणां शूरस्तथा क्लेशसहो ऋजुः ॥
व्यूहतत्त्वविधानज्ञः फल्गुसारविशेषवित् ।
राज्ञा सेनापतिः कार्य्यो ब्राह्मणः क्षत्त्रियोऽथवा ॥"

इति मात्स्ये राजधर्म्मे । २१५ । ८—१० ॥

सेनापतौ वर्णनीयानि यथा,—

"सेनापतिर्ज्जितायासः स्वामिभक्तः सुधीरधीः ।
अभ्यासी वाहने शस्त्रे शास्त्रे च विजयी रणे॥"

इति कविकल्पलतायाम् १ स्तवके वर्ण्यस्थितिनाम ३ कुसुमम् ॥

सेनामुखं,क्ली,(सेनाया मुखम् ।)पत्तित्रयः । स तु सेनासङ्ख्याविशेषः । तद्यथा । हस्ती ३ रथः ३ अश्वः ९ पदातिः १५ समुदायेन त्रिंशत् ३० । इत्यमरः । २ । ८ । ८१ ॥ (यथा च महाभारते । १ । २ । १९ ।

"एको रथो गजश्चैको नराः पञ्च पदातयः ।
त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते ॥
पत्तिन्तु त्रिगुणामेतामाहुः सेनामुखं बुधाः ॥")

पुरद्वारसंमुखवर्त्तिपथः । इति केचित् ॥

सेनारक्षः, पुं, (सेनां रक्षतीति । रक्ष + अण् ।) सेनारक्षकप्रहरिकादिः । तत्पर्य्यायः । सैनिकः२ इत्यमरः । २ । ८ । ६१ ॥

सेफः, पुं, शेफः । इति जटाधरः ॥

सेमन्ती,स्त्री,पुष्पविशेषः । सेँउती इति भाषा । यथा, नारसिंहे ५२ अध्याये ।

"चम्पकानां पुष्पशतादशोकं पुष्पमुत्तमम् ।
अशोकानां सहस्राद्धि सेमन्ती पुष्पमुत्तमम् ॥"

सेराहः,पुं,पीयूषवर्णाश्वः । स तु दुग्धवच्छ्वेतवर्णः इति हेमचन्द्रः ॥

सेरुः, त्रि, (षिञ् बन्धने + "दाधेट्सिशदसदो रुः ।" ३ । २ । १५९ । इति रुः ।) बन्धनकर्त्ता । इति मुग्धबोधव्याकरणम् ॥

सेल,ऋ चालगत्योः । इति कविकल्पद्रुमः॥(भ्वा० पर०-सक० सेट् ।) ऋ, असिसेलत् । इति दुर्गादासः ॥

सेलुः पुं, शेलुवृक्षः । स तु श्लेष्मातकः । इति भरतद्विरूपकोषः ॥

सेव,ङ ङ ऋ सेवने । इति कविकल्पद्रुमः॥(भ्वा०-आत्म०-सक०-सेट् ।) ङ, सेवति सेवते । ङ, सेवते । ऋ, असिसेवत् । सेवनं आराधनं उपभोगः आश्रयणञ्च । विष्णुं सेवते। सुखं सेवते । तीर्थं सेवते साधुः । अन्ये त्वस्मात् परस्मैपदमप्यमन्यमानाः । नीचं समृद्धमपि सेवति नीच एव । स्वाधीने विभवेऽप्यहो नरपतिं सेवन्ति किं मानिनः । इत्यादौ गणकृतानित्यत्वमाहुः । इति दुर्गादासः ॥

सेवं,क्ली, (सेव्यते यदिति । सेव + घञ्) फलम् । इति राजनिर्घण्टः ॥ (अ... गुणाश्च यथा,—

"मुष्टिप्रमाणं बदरं सेवं सिञ्चितिकाफलम्।
सेवं समीरविष्टम्भं वृंहणं कफकृद्गुरु:।
रसे पाके च मधुरं शिशिरं रुचिशुक्रकृत्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

सेवक:, पुं, (सेवते इति। सेव + ण्वुल्।) प्रसेवक:। इति मेदिनी॥

सेवक:, त्रि, (सेवते इति। सेव सेवने + ण्वुल्।) अनुजीवी। भृत्य:। इति मेदिनीशब्दरत्नावल्यौ॥ (यथा, वृहत्संहितायाम्। ५। ३४।
"पूर्व्वेण सलिलपूर्णां करोति वसुधां समागतो दैत्य:।
पश्चात् कर्षकसेवकबीजविनाशाय निर्द्दिष्ट:॥")
तस्य प्रभुसन्निधौ प्रश्नकरणसमत्वं यथा,—
"किङ्कर: किङ्करी वापि सर्व्वथा प्रष्टुमीश्वर:।
यो यस्य सेवानिरत: स कं पृच्छति तं विना॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १६ अध्याय:॥
(आश्रयिता। यथा, भागवते। ४। १६। १६।
"दृढव्रत: सत्यसन्धो ब्रह्मण्यो वृद्धसेवक:।
शरण्य: सर्व्वभूतानां मानदो दीनवत्सल:॥")

सेवकालु:, पुं, निशाभङ्गावृक्ष:। दुग्धपेया इति ख्यात:। इति शब्दचन्द्रिका॥

सेवती, स्त्री, पुष्पविशेष:। सेंउती इति भाषा। तत्पर्य्यायगुणा:।
"शतपत्री तरुण्युक्ता कर्णिका चारुकेसरा।
महाकुमारी गन्धाढ्या लक्षपुष्पातिमञ्जुला॥
शतपत्री हिमा हृद्या ग्राहिणी शुक्रला लघु:।
दोषत्रयास्रजिद्वर्ण्या तिक्ता कट्वी च पाचनी॥"
इति भावप्रकाश:॥

सेवधि:, पुं, (सेव: सेवनं धीयतेऽस्मिन्निति। सेवां विना निधिलाभाभावादित्यर्थ:। धा + कि:।) निधि:। इत्यमरटीकायां भरत:॥ तालव्यशकारादिरप्ययम्॥

सेवनं, क्ली, (सिव तन्तुसन्ताने + ल्युट्।) सूच्यादिना वस्त्रादिसीवनम्। सेलाइ इति सेयासो इति च भाषा। तत्पर्य्याय:। सीवनम् २ स्यूति: ३। इत्यमर:। ३। २। ५॥ ऊति: ४ व्यूति: ५। इति शब्दरत्नावली॥ [यथा, सुश्रुते। १। ८।
"सूच्य: सेवने। इत्यष्टविधे कर्म्मण्युपयोग: शस्त्राणां व्याख्यात:॥"*॥ सेव सेवने + ल्युट्।) उपास्ति:। उपासना। इति मेदिनी॥ (यथा, भागवते। ४। १८। १६।
"तमन्वीसुर्भागवता ये च तत्सेवनोत्सुका:॥"
आश्रय:। यथा, भागवते। ७। १२। २०।
"सत्यानृतञ्च वाणिज्यं श्ववृत्तिर्नीचसेवनम्।
वर्ज्जयेत् तां सदा विप्रो राजन्यश्च जुगुप्सिताम्॥"
उपभोग:। यथा, मनु:। ११। १७८।
"यत् करोत्येकरात्रेण वृषलीसेवनात् द्विज:।
तद्भैक्ष्यभुग्जपन्नित्यं त्रिभिर्व्वर्षैर्व्यपोहति॥")

सेवनी, स्त्री, (सीव्यत्यनयेति। सिव + ल्युट्। ङीप्।) सूची। इति हेमचन्द्र:॥ शरीरावयवसंयोगविशेष:। यथा,—
"सेवन्य: सप्त तासान्तु भवेयु: पञ्च मस्तके।
एका शेफसि जिह्वायामेका विज्ञेयता: कृतिन्॥"
इति भावप्रकाश:॥
(यथा च माधवकरसंगृहीतसुश्रुतस्त्रिविधशिरोऽभिघातधिकारे।
"सामान्यलिङ्गं रुजाभिसेवनीवस्तिमूर्द्धसु॥")

सेवा, स्त्री, (सेव सेवने + "गुरोश्च हल:।" ३। ३। १०३। इत्य:। टाप्।) सेवनम्। तत्पर्य्याय:। श्ववृत्ति: २। इत्यमर:। २। ९। २॥ (यथा, मनु:। ४। ६।
"सत्यानृतञ्च वाणिज्यं तेन चैवापि जीव्यते।
सेवाश्ववृत्तिराख्याता तस्मात् तां परिवर्ज्जयेत्॥")
आराधना। उपभोग:। आश्रयणम्॥ इति सेवधात्वर्थदर्शनात्॥ (यथा, मनु:। १२। ८३।
"वेदाभ्यासस्तपो ज्ञानमिन्द्रियाणाञ्च संयम:।
अहिंसा गुरुसेवा च नि:श्रेयसकरं परम्॥")
अथ माघादिद्वादशमासेषु विष्णुसेवाविधिस्तत्फलञ्च। यथा,—

व्यास उवाच।
"विप्र द्वादशमासेषु माघादिषु सनातन:।
पूजितव्यो विधानेन शृणु तानि वदाम्यहम्॥
माघे मासि समायाते सर्व्वमासोत्तमे शुभे।
आमिषं मैथुनञ्चैव वर्ज्जयेद्वैष्णवो जन:॥
प्रात:स्नायी भवेन्नित्यं तैलान्यपि च वर्ज्जयेत्।
द्विर्भोजनं परान्नञ्च माघे मासि परित्यजेत्॥
प्रात: शुक्लाम्बरधर: कृतपञ्चमहाध्वर:।
सपर्य्यामारभेद्विष्णो: स्थिरहस्तो हि वैष्णव॥
ईषदुष्णजलैर्द्दिव्यै: स्नापयेद्विष्णुमव्ययम्।
अतिशस्तं चन्दनेन विष्णोरङ्गञ्च लेपयेत्॥
पूजार्थे जगदीशस्य देवदेवस्य चक्रिण:।
प्रक्षालितानि पात्राणि जलहीनानि कारयेत्॥
स्नापयित्वा जगन्नाथमीषदुष्णजलैस्तत:।
प्रोञ्छितञ्च तच्छरीरं दिव्यवस्त्रेण यत्नत:॥
सलिलैरीषदुष्णैर्य्य य: स्नापयति केशवम्।
माघे मासि द्विजश्रेष्ठ फलं तस्य वदोच्यते॥
विमुक्त: पातकै: सर्व्वैर्जन्मजन्मान्तरार्ज्जितै:।
इह भुक्त्वा सुखं सर्व्वं शेषे याति हरेर्गृहम्॥
यस्तु प्रक्षाल्य पात्राणि कृत्वा हीनानि वारिभि:।
य: पूजयेज्जगन्नाथं तस्य पुण्यं निशामय॥
इह भुक्त्वा वरान् भोगान् रोगशोकविवर्ज्जित:।
अन्ते युगसहस्राणि तिष्ठेत् केशवमन्दिरे॥
प्रभातेऽपि च सन्ध्यायां पुरतश्चक्रपाणिन:।
ज्वलन्तं स्थापयेद्वह्निं निर्धूमं वैष्णवो जन:॥
शीतस्यावरणार्थाय प्रात: सायञ्च यो जन:।
माघे विष्णुव्रती वह्निं ज्वालयेत्तत्फलं शृणु॥
इह भुक्त्वाखिलान् भोगान् पुत्त्रपौत्त्रसमन्वित:।
अन्ते विष्णुपुरं याति दैवतैरपि दुर्लभम्॥
यथैवात्मा तथा विष्णु: सन्देहो नात्र विद्यते।
तस्मादात्मानुमानेन विष्णुसेवा विधीयते॥
प्रभाते रौद्रदेशे च पवित्रे स्थापयेद्धरिम्।
न भुनक्ति द्विजश्रेष्ठ यावत् शीतं सुदु:सहम्॥
स्वपन्तं देवदेवेशं पर्य्यङ्कोपरि केशवम्।
स्थापयेद्विधि निशान्ते देवे ... ।
न प्राप्नोति यथा शीतं देवदेवो जगद्गुरु:।
शुक्लै: पवित्रैर्द्दिव्यैस्त ...
आसनं कुरुते मर्त्त्यो यथा ...
तथा शीतत्रयं कुर्य्याद्देवदेवस्य चक्रिण:॥
क्षीरेण स्नापयेद्यस्तु माघे मासि ...
तस्मै देवोत्तमो विष्णु सन्तुष्टो ...
य: पूजयेत् सन्माघे स्नापयित्वा ...
नारिकेलोदकैर्द्दिव्यै: फलं तस्य
नरकाद्धो सप्तमासात् दुस्तरे स्वेन
उद्धृत्य कोटिपुरुषान् मन्दिरं याति
माघे मासि च शुक्लायां पञ्चम्यां
एकादश्याञ्च सप्तम्यां हरि: पूज्यो विशेषत:
दातव्यो देवदेवाय सपत्राय मुरारये।
पायसोऽपूपसहितो माघे मासि दिने दि
अपूपं पायसं यस्तु माघे यच्छति चक्रिणे।
तस्य पुण्यफलं वच्मि शृणु वैष्णव जैमिने
अन्ते विष्णुपुरं गत्वा मन्वन्तरचतुष्टयम्।
भुङ्क्ते मनोरथान् भोगान्
पुनरागत्य धरणीं चक्रवर्त्ती नृपो भवेत्।
भुङ्क्ते भोगञ्च सुचिरं ततो याति हरेर्गृहम्
पञ्चम्याञ्चैव सप्तम्यामेकादश्याञ्च जैमिने।
अशक्तो वैष्णवो दद्यात् परमान्नं मुरारये॥
कृष्णपक्षाद्द्विजश्रेष्ठ शुक्लपक्षो विशिष्यते।
शुक्लपक्ष तिथिष्वासु दद्यादन्नं मुरारये॥
एकाहमपि यो माघे विष्णवे दैत्यजिष्णवे।
सापूपं पायसं दद्यान्न तस्य दुर्ल्लभो हरि:॥
यत्किञ्चित् विष्णूद्देशार्थं माघे मासि
तदक्षयं भवेत् सर्व्वं कोऽपि नात्यत्र संशय:
माघे मासि कृतं कर्म्म शुभं वाप्यशुभञ्च च।
तस्य नास्ति क्षयं विप्र मन्वन्तरशतैरपि॥
माघे चम्पकपुष्पेण योऽर्च्चयेत् कमलापतिम्
स गच्छेत् परमं धाम विमुक्त: सर्व्वपातकै
यावन्ति स्वर्णपुष्पाणि दीयन्ते चक्रपाणये।
तावत् युगसहस्राणि स्थीयते विष्णुमन्दिरे॥
मेरुतुल्यसुवर्णानि दत्त्वा भवति यत् फलम्।
एकेन स्वर्णपुष्पेण दत्त्वा भवति तत् फलम्॥
सुवर्णपुष्पं विप्रेन्द्र सर्व्वदा केशवप्रियम्।
माघ मासि विशेषेण पवित्रे केशवोपमे॥
सुवर्णकुसुमैर्द्दिव्यैर्येन नाराधितो हरि:।
रत्नैर्हीन: सुवर्णाद्यै: स भवेज्जन्मजन्मनि॥"
इति पाद्मे क्रियायोगसारे ८।१० अध्यायौ॥*॥

व्यास उवाच।
"फाल्गुने ब्राह्मणश्रेष्ठ श्रीकृष्णं सुरवन्दितम्।
पूजयेद्भक्तिभावेन प्रत्यहं वैष्णवो जन:॥
फाल्गुने स्नापयेद्यस्तु सर्पिषा देवकीसुतम्।
फलं तस्य प्रवक्ष्यामि मत्त: सम्यक् निशामय॥
सर्व्वयज्ञफलं प्राप्य सर्व्वदानफलं तथा।
अन्ते याति हरे: स्थानं सर्व्वपापविवर्ज्जित:॥
युगकोटिसहस्राणि भुक्त्वा भोगं हरेर्गृहे।
तत्रैव मोक्षमाप्नोति संप्राप्य ज्ञानमुत्तमम्॥
यस्तु यच्छति कृष्णाय शिशिरे गोपमूर्त्तये॥

...कां मोदकं दिव्यं स नन्दैर्दधिसम्भितम् ।
...दुग्धपूर्णं दद्यात् कैशवाय महात्मने ।
...र्षिशकरां स्नात्वा सम्यक्त्वसमाराध ॥
...र्षे भक्तिमान् यस्तु यस्याति जैमिने ।
...विष्णुः प्रसन्नात्मा विशन्ति भगवन्नामम् ॥
...विषफाणितं यस्तु दद्यादाशये द्विज ।
...शक्रपुरं गत्वा स भवेत् सुरवन्दितः ॥
...मां शर्करां यश्चेद्यस्तु कृष्णाय भक्तिमान्
...किं न लभते विप्र वासुदेवप्रसादतः ॥
...फाल्गुने मासि मधुरं वदरीफलम् ।
...यस्यास्ति कृष्णाय फलं तस्य वदामि ते ॥
...भुक्त्वा सुखं सर्व्वं पुत्रपौत्रसमन्वितः ।
...हर्गृहं याति रथमारुह्य शोभनम् ॥
दद्याद्गुडसंयुक्तं हरये वदरीफलम् ।
...नाद्द्विजाग्र्यश्रेष्ठ दद्याद्येषरको भवेत् ॥
...गुने मासि यो दद्याद्धरये दाडिमीफलम् ।
...के तत्फलं विप्र वदतो मे निशामय ॥
यावन्ति बीजानि तिष्ठन्ति दाडिमीफले ।
...मन्वन्तरं विष्णोर्गृहे तिष्ठति वैष्णवः ॥
...ल्गुने मासि यो दद्याद्धरये गुडपिष्टकम् ।
...वर्षे यो द्विजश्रेष्ठ वाजिमेधमखस्तु फलम् ॥
...मासि द्विजश्रेष्ठ मधुना मधुसूदनम् ।
...पयेज्जभते सत्येस्तद्विष्णोः परमं पदम् ॥
...ना स्नापयेत् यस्तु नारायणमनामयम् ।
...वर्षा क्रियते तस्य कदाचिद्रविसूनुना ॥
...किंशुकपुष्पेण योऽर्च्चयेत् कमलापतिम् ।
...नाम चित्रगुप्तेन पञ्जिकायां न लिख्यते ॥
...वैके जगतामीशं कृष्णं तिलकपुष्पकैः ।
...तो नास्ति वै जन्म पुनरस्मिन् महीतले ॥
...णं वकुलपुष्पेण सर्व्वदेवशिरोमणिम् ।
...येन्मनुजो विप्र लभते नापदं क्वचित् ॥
...मल्लीभिः सुगन्धाभिर्व्वसन्ते यस्तु पूजयेत् ।
...गवन्तं परात्मानं स देवैरपि पूज्यते ॥
...यकिंशलयैर्दिव्यैरखण्डैर्योऽर्च्चयेद्धरिम् ।
वदन्ते समुत्थाय स्वयं पीठाद्यमोऽपि च ॥
...नीपवैर्नवैर्नेव कोमलैर्हरिमर्च्चयन् ।
...चिरेणैव लभते सकलं वाञ्छितं जनः ॥
...ण्ड्याखण्डपत्रैश्च धुस्तूरैयार्कपुष्पकैः ।
...र्च्चयेद्विष्णुमीशश्च स संसाराब्धिपारगः ॥
...दद्याद्विष्णवे विप्र कदलीफलमुत्तमम् ।
...कायास्त्रिदशाः सर्व्वे वदन्ते तमहर्निशम् ।
...दद्याच्चैत्रिके मासि भक्त्या गोपालरूपिणे ।
गोधूमपिष्टकं विप्र सर्व्वपापैः प्रमुच्यते ॥ ८ ॥
...यातं माधवे मासि पवित्रे माधवप्रिये ।
...मिषं मैथुनं तैलं विष्णुभक्तः परित्यजेत् ॥
...तः समाचरेत् स्नानं माधवे मासि वैष्णवः ।
...रित्यजेत् परान्नञ्च न च कुर्य्यात् द्विभोजनम् ॥
...प्रभाते पूजयेद्विष्णुं पूर्व्वोक्तविधिना द्विजः ।
वैशाखे स्नापयेद्विष्णुं पुष्पवासितवारिणा ॥
...स्नापयेत् शीततोयेन सन्ध्यापर्य्यन्तमच्युतम् ।
...विसर्ज्य पूजयेद्भक्त्या नैवेद्यैर्व्विविधैः प्रभुम् ॥
वैशाखे चामलस्रग्भिर्लक्ष्मीपतिरलङ्कृतः ।

स किं ददाति विप्रर्षे प्रसन्नः परमेश्वरः ॥
वैशाखे मासि यो दद्यात् यवान्नं चक्रपाणये ।
तस्य पुण्यानि संख्यातुं कः समर्थोऽस्ति पण्डित ।
यत्किञ्चिन्माधवे मासि माधवप्रीतिहेतवे ।
दीयते मानवैर्व्विप्र तत् सर्व्वमक्षयं भवेत् ।
यदन्यत् सुकृतं कर्म्म क्रियते मासि माधवे ।
माधवप्रीतये विप्र क्षयं तस्य न विद्यते ॥
वैशाखो दुग्धसौ मासः सर्व्वकामफलप्रदः ।
पूजितव्यो हरिस्तत्र हित्वा कार्य्यशतान्यपि ॥
एकाहमपि यः पूजां वैशाखे कुरुते हरेः ।
शतवर्षं हरिं यष्ट्वा यत् फलं लभते स तत् ॥
वैशाखे मासि यः कुर्य्यात् प्रपां माधवतुष्टये ।
दिने दिनेऽश्वमेधस्य फलं प्राप्नोति मानवः ॥
वैशाखे मिष्टवैश्यैस्तु विष्णुमशक्तरूपिणम् ।
चतुर्व्वर्गफलावाप्तिहेतवे वैष्णवो जनः ॥
गण्डूषमात्रतोयेन कुर्य्याद्योऽश्वत्थसेचनम् ।
सोऽपि याति परं स्थानं विमुक्तः पाप-
कोटिभिः ॥

व्यास उवाच ।
साक्षाद्देवः स्वयं विष्णुरश्वत्थोऽखिलविश्वराट् ।
तद्वार्म्मि कुर्व्वतः पुंसो विद्यते नाशुभं क्वचित् ॥
अश्वत्थं सेवते यस्तु विष्णुबुद्ध्या नरोत्तमः ।
तस्य प्रसन्नो भगवान् ददाति परमं पदम् ॥"
इति पाद्मे क्रियायोगसारे ११ अध्यायः ॥*॥

व्यास उवाच ।
"ज्यैष्ठे मासि द्विजश्रेष्ठ भगवन्तं जनार्द्दनम् ।
पूजयेद्भक्तिभावेन जलैः संस्थाप्य शीतलैः ॥
उद्वर्त्तनञ्च दातव्यं सुगन्धामलकीं तथा ।
तैलं सुगन्धं हरये ग्रीष्मकाले दिने दिने ॥
सुवासिते शीतले च मन्दिरेऽतिमनोहरे ।
प्रत्यहं कमलाकान्तं स्नापयेत् जलमण्डपे ॥
न रौद्रदेशे विप्रेन्द्र सधूमे रन्धनालये ।
न सूतिकागृहे चैव स्नापयेत् कमलापतिम् ॥
चामरैर्वीजितः श्वेतैः सुदीर्घैः कमलापतिः ।
ज्यैष्ठे मासि द्विजश्रेष्ठ सुप्रीतः किं न यच्छति ॥
मयूरपुच्छव्यजनैर्निदाघे पूजितो हरिः ।
ददात्यभिमतं सर्व्वं अचिरेणैव सत्तम ॥
तालवृन्तकवातेन पवित्राम्बरवायुना ।
येर्ग्रीष्मे वीज्यते विष्णुस्ते सर्व्वे स्वर्गगामिनः ॥
यो गात्रलेपनं कुर्य्यात् सुगन्धैश्चन्दनकर्द्दमैः ।
ग्रीष्मे हरेश्चन्दनैश्च स विशेन्माधवीं तनुम् ॥
गन्धैर्म्मृगमदाद्यैश्च यो लिम्पेन्माधवीं तनुम् ।
उपागमे द्विजश्रेष्ठ स मुक्तो नात्र संशयः ॥
प्रफुल्लकुमुदोद्याने तुलसीकानने तथा ।
सन्ध्यायां स्नापयेद्विष्णुं देशे धीरसमीरणे ॥
स्रग्भिः पाटलिपुष्पाणां येन विष्णुरलङ्कृतः ।
ज्यैष्ठे मासि स विज्ञो यो वाजिमेधसहस्रकृत् ॥
यस्तु मुक्तावलीं दद्यात् ग्रीष्मे श्रीपतये जनः ।
भूपालत्वं हरिस्तस्मै यच्छेज्जन्मनि जन्मनि ॥
यस्तु मण्डयति ग्रीष्मे श्रीकृष्णं मणिमालया ।
तस्य पुण्यफलं विप्र वदतो मे निशामय ॥
यावद्ब्रह्मा सृजत्येतत् जैमिने सकलं जगत् ।

तावद्विष्णुपुरे तिष्ठेन्मणिमालाविभूषितः ॥
सुवर्णाभरणैर्यस्तु रजताभरणैस्तथा ।
कृष्णं मण्डयति ग्रीष्मे सोऽपि तत्फलमाप्नुयात्
विचित्रं यस्तु पर्य्यङ्कं मगरुकं प्रयच्छति ।
हरये देवदेवाय न स्याद्दुःखी कदापि सः ॥
ग्रीष्मकाले न देयानि गुरूणि वसनानि च ।
हरये ब्राह्मणश्रेष्ठ देयं तन्तं शूक्ष्मं शुचि ॥
यस्तु चूतफलैर्दिव्यैः सुपक्वैः पूजयेद्धरिम् ।
अन्ते शक्रपुरं गत्वा स विवेदस्तं मुदा ॥
पियालानां फलैः पक्वैर्योऽर्च्चयेत् कमलापतिम्
सोऽपि तत्फलमाप्नोति किमन्यैर्व्वहुभाषितैः ॥
निदाघे हरये दद्याद्यवागूमतिशीतलाम् ।
नानाव्यञ्जनसंयुक्तां श्रद्धया वैष्णवो जनः ॥*॥
आषाढे मासि विप्रेन्द्र देवदेवं जगत्पतिम् ।
दधिभिः स्नापयित्वा तु पूजयेद्भक्तितो बुधः ॥
दधिभिः स्नापयेद्यस्तु भगवन्तं जनार्द्दनम् ।
मातुः पयोधरपयः पुनस्तेन न पीयते ॥
घनागमे घनश्यामं कदम्बकुसुमैर्हरिम् ।
आराध्य यान्ति विप्रर्षे पापिनोऽपि परां
गतिम् ॥
कदम्बपुष्पमालाभिर्म्मण्डयत्यब्जलोचनम् ।
यस्तस्य ब्राह्मणश्रेष्ठ पुण्यं वच्मि निशामय ॥
तस्यां यावन्ति मालायां तिष्ठन्ति कुसुमानि वै ।
प्रतिपुष्पे द्विजश्रेष्ठ वाजिमेधफलं लभेत् ॥
सुगन्धैः केतकीपुष्पैः पूजितः कमलेक्षणः ।
सर्व्वं दुःखं हरत्येष मानवानां द्विजोत्तम ॥
पनसानां फलैर्दिव्यैः सुपक्वैर्घृतमिश्रितैः ।
पूजितो भगवान् विष्णुर्द्दात्यैश्वर्य्यमुत्तमम् ॥
आषाढे मासि दध्यन्नं हरये प्रतिवासरम् ।
श्रद्धया वैष्णवो दद्यान्मुक्तिमिच्छन् द्विजोत्तम ॥
कृष्णाय नवनीतं यो ददाति वैष्णवो जनः ।
तस्य पुण्यं न संख्यातुं शक्तोऽस्म्यब्दशतैरपि ॥
हैयङ्गवीनं यो दद्याद्गोपालाय महात्मने ।
आसिद्धां सगुडाञ्चैव स महात्मा हरेः प्रियः ॥
सशर्कराणि दुग्धानि कृष्णाय यस्तु यच्छति ।
तस्य प्रसन्नो भगवान् ददात्यभिमतं फलम् ॥*॥
श्रावणे मासि विप्रेन्द्र देवकीनन्दनं प्रभुम् ।
स्नापयेन्निर्म्मलैस्तोयैः शुद्धैः कलुषवर्ज्जितैः ॥
मल्लिकाकुसुमैर्व्विष्णुं योऽर्च्चयेद् वैष्णवो जनः ।
विमुक्तः सकलैः पापैर्ब्रह्मलोकं स गच्छति ॥
शेफालिकाप्रसूनैश्च यूथिकाकुसुमैस्तथा ।
अर्च्चयन् कमलाकान्तं मनुजो नावसीदति ॥
सुगन्धैः स्तवकैः पुष्पैः सप्तलाकुसुमैस्तथा ।
योऽर्च्चयेत् कमलाकान्तं तस्य वश्यं जगत्त्रयम् ॥
प्रफुल्लमालतीपुष्पैः सुगन्धैर्योऽर्च्चयेद्धरिम् ।
तत्पुण्यं नास्ति तत्तुल्यं येन स्याद्भुवि
मानवः ॥
कुन्दपुष्पैश्च बन्धूकैर्व्वन्दयेञ्जनार्द्दनम् ।
अत्र यत् सकलं काममवाप्नोति भुवि मानवः ॥
महामल्लप्रसूनैश्च तथा कुरुवकैर्हरिम् ।
कुरुण्टकैः पूजयेद्यस्तस्य तुष्टः सदा हरिः ॥
गैरीपकुसुमैर्व्विष्णुं प्रसूपुष्पैश्च योऽर्च्चयेत् ।

करवीरप्रसूनैश्च स याति हरिसन्निधिम् ॥
श्रावणे मासि यो दद्यात् लाजान् घृतसम-
न्वितान् ।
हरये तस्य विप्रर्षे न विपत्तिरिह भवेत् ॥
श्रावणे पिष्टकं यस्तु हरये गुडपूरकम् ।
ददाति तस्य विप्रर्षे गृहे श्रीर्निश्चला भवेत् ॥*॥
भाद्रे मासि द्विजश्रेष्ठ नारायणमनामयम् ।
श्रद्धया पूजयेत् प्राज्ञश्चतुर्व्वर्गफलप्रदम् ॥
निवीडे नूतनागारे सर्व्वोपद्रववर्ज्जिते ।
स्थापयेत् पुण्डरीकाक्षं भगवन्तं जनार्द्दनम् ॥
दंशैश्च मशकैश्चैव प्रकीर्णेर्म्मक्षिकादिभिः ।
हरिं पुरातनागारे स्थापयेन्न हि भक्तिमान् ॥
मकर्द्दमे पतद्वारि गलद्भित्तौ गृहे तथा ।
हरिं न स्थापयेत् प्राज्ञो वर्षासु परमेश्वरम् ॥
विष्णवालये द्विजश्रेष्ठ बध्नीयाद्यस्तु मानवः ।
चन्द्रातपं विचित्रञ्च चन्द्रलोकं स गच्छति ॥
रात्रौ नानाविधैर्धूपैर्म्मन्दिरे जगतीपतेः ।
दंशांश्च मशकांश्चैव वर्षाकाले निवारयेत् ॥
मसारिकाभिः प्राहृत्य मञ्चशायिनमच्युतम् ।
प्रावृषि स्थापयेद्विष्णुं निशायां दिव्यमन्दिरे ॥
कह्लारपद्मैर्द्देवेशं सुगन्धैर्नूतनैस्तथा ।
मुमुक्षुः पूजयेन्मर्त्त्यो भाद्रे मासि दिने दिने ॥
न भाद्रे केतकीपुष्पैः पूजितव्यो जनार्द्दनः ।
यतो भाद्रपदे मासि केतकी स्यात् सुरासमा ॥
पक्वस्तालफलैर्द्दिव्यैर्योऽर्च्चयेद्यदुनन्दनम् ।
गर्भवासमहादुःखं स भूयो लभते न हि ॥
संयुक्तं घृतदुग्धाभ्यां पक्वतालं मुरारये ।
यो दद्यात् श्रद्धया मर्त्यः स गच्छेन्मन्दिरं हरेः ॥
भाद्रे मासि द्विजश्रेष्ठ हरये तालपिष्टकम् ।
सघृतं वैष्णवो दद्यात् कैवल्यप्राप्तिहेतवे ॥
मासि भाद्रपदे विप्र न कुर्य्याच्छाकभक्षणम् ।
न रात्रौ भोजनं कुर्य्यान्मुमुक्षुर्वैष्णवो जनः ॥*॥
आश्विने मासि विप्रेन्द्र केशवं क्लेशनाशनम् ।
पूजयेद्भक्तिभावेन पूर्व्वोक्तविधिना जनः ॥
पूर्व्वाह्णे पूजयेद्यस्तु भक्त्या लक्ष्मीपतिं हरिम् ।
विष्णुपूजाफलं विप्र सम्पूर्णं तेन लभ्यते ॥
यत्तोयं दीयते विप्र पूर्व्वाह्णे हरये जनैः ।
पीयूषमिव तत्तोयं गृह्णाति कमलापतिः ॥
मध्याह्ने दीयते यच्च सलिलं चक्रपाणये ।
तोयं तोयमिव स्वामी तद्गृह्णाति द्विजोत्तम ॥
अपराह्णे तु यत्तोयं गोविन्दाय प्रदीयते ।
तत्तोयं रक्ततुल्यं स्यात्र गृह्णाति यतो हरिः ॥
अतएव द्विजश्रेष्ठ पूर्व्वाह्णे हरिमर्च्चयेत् ।
सकलं लभते कामं केशवस्यानुकम्पया ॥
एकवस्त्रेण विप्रेन्द्र न कुर्य्यात् पूजनं हरेः ।
कुर्य्याद्यदापि तदा पूजां तां न गृह्णाति केशवः ॥
अधौतेन च वस्त्रेण या पूजा कमलापतेः ।
निष्फला सा च पूजा स्यान्न च विष्णुः प्रमोदति ॥
यस्त्ववद्वशिखः पूजां चक्रिणः कुरुते जनः ।
पूजाफलं न चाप्नोति अनिर्याह्या च सा भवेत् ॥
असंस्कृतगृहे पूजा क्रियते या जगत्पतेः ।
पूजा साप्रवश्यैव अनिर्याह्या भवेत् खलु ॥

स्नानं देवार्च्चनञ्चैव दानञ्च पितृतर्पणम् ।
तिलकेन विना विप्र न च कुर्य्याद्विचक्षणः ॥
तिलकाश्च गृहीत्वा यत् पुण्यकर्म्म विधीयते ।
भस्मीभवति तत् सर्व्वं कर्त्ता च नारकी भवेत् ॥
शङ्खचक्रगदापद्मैरङ्कितं यस्य दृश्यते ।
शरीरं ब्राह्मणश्रेष्ठ विज्ञेयः सोऽच्युतः स्वयम् ॥”
इत्यादि ॥
“विपत्रीकृतदूर्व्वाभिराश्विने योऽर्च्चयेद्धरिम् ।
दूर्व्वेव सन्ततिस्तस्य अविच्छिन्ना प्रवर्त्तते ॥
आश्विने मासि यो दद्याद्धरये कर्क्कटीफलम् ।
शोको न जायते तस्य कदाचिद्धृदये द्विज ॥*॥
कार्त्तिके तु समायाते सर्व्वमासोत्तमे शुभे ।
दामोदरं देवदेवं भक्त्या प्राज्ञः प्रपूजयेत् ॥
कार्त्तिके मासि विप्रेन्द्र विष्णुप्रीणनहेतवे ।
यथोक्तविधिना प्राज्ञः प्रातःस्नानं समाचरेत् ॥
आमिषं मैथुनञ्चैव कार्त्तिके मासि यस्त्यजेत् ।
जन्मान्तरार्ज्जितैः पापैर्मुक्तो याति परां गतिम् ॥
तुलाराशिगते सूर्य्ये प्रातःस्नानं द्विजोत्तम ।
हविष्यं ब्रह्मचर्य्यञ्च महापातकनाशनम् ॥
आमिषं मैथुनञ्चैव कार्त्तिके यस्तु न त्यजेत् ।
जन्मजन्मनि विप्रेन्द्र स भवेत् ग्राम्यशूकरः ॥
द्विर्भोजनं परान्नञ्च तैलञ्च वैष्णवो जनः ।
आयाते कार्त्तिके मासि यत्नादपि परित्यजेत् ॥
दामोदराय नभसि प्रदीपं यस्तु यच्छति ।
फलं तस्य प्रवक्ष्यामि समासेन शृणु द्विज ॥
ब्रह्महत्यादिभिः पापैर्व्विमुक्तः क्लेशदायकैः ।
दामोदरपुरं गत्वा तिष्ठेत् कोटियुगावधि ॥
दीपं ज्वलन्तं नभसि त्रिदशा वासवादयः ।
विलोक्य हर्षिताः सर्व्वे वदन्तीति परस्परम् ॥
असौ पुण्यात्मनां श्रेष्ठः केशवार्च्चनतत्परः ।
प्रदीपं कार्त्तिके मासि यतो यच्छति चक्रिणे ॥
आगमिष्यति पुण्यात्मा कदायं त्रिदिवं प्रति ।
करिष्यामि कदा सख्यमनेन हरिसेविना ॥
मुहूर्त्तमपि यो दद्याद्दीपं नभसि चक्रिणे ।
कार्त्तिके मासि विप्रेन्द्र तस्य तुष्टः सदा हरिः ॥
दद्यादक्षयदीपं यः कार्त्तिके हरिमन्दिरे ।
दिने दिनेऽश्वमेधस्य फलं प्राप्नोति मानवः ॥
तुलसीदललक्षैर्यः कार्त्तिके पूजयेद्धरिम् ।
लक्षैकवाजिमेधस्य मानवो लभते फलम् ॥
विल्वच्छदनलक्षेण योऽर्च्चयेत् विष्णुमव्ययम् ।
कार्त्तिके शङ्करं वापि लभते सोऽपि तत्फलम् ॥
कार्त्तिके वकपुष्पेण हरिपूजनतत्परः ।
परमं मोक्षमाप्नोति प्रसादाज्जगतीपतेः ॥
यत्किञ्चित् कार्त्तिके मासि विष्णुमुद्दिश्य दीयते ।
तदक्षयं भवेत् सर्व्वं सत्यमेतन्मयोदितं ॥
घृताक्तं गुग्गुलं यः कार्त्तिके विष्णवे नरः ।
दद्याद्दिने दिने विप्र तस्य विष्णुपुरे स्थितिः ॥
प्रफुल्लपद्मपुष्पेण सितेनाप्यसितेन वा ।
योऽर्च्चयेत् कमलाकान्तं तस्य किं भुवि दुर्लभम् ॥
कमलैः कार्त्तिके मासि सितैर्व्वा लोहितैस्तथा ।
संपूज्य पद्मिनं मर्त्त्यो लभते परमं पदम् ॥
प्रदत्तं कार्त्तिके मासि हरये येन पङ्कजम् ।

न दत्तं तेन किं विप्र विष्णवे ...
एकमेवाम्बुजं यस्तु ददाति कैटभारये ।
तस्मै किं भगवान् विष्णुर्न ददाति ...
कमलैः कार्त्तिके मासि येन नाराधितो ...
जन्मजन्मनि तद्गेहे कमला न हि ...
पद्मबीजानि यो दद्यात् केशवाय महात्मने ।
स जायते विप्रकुले शुद्धे च प्रतिजन्मनि ॥
ब्राह्मणस्य कुले जातः स चतुर्व्वेदविद्भवेत् ।
धनवान् बहुपुत्रश्च कुटुम्बानाञ्च पोषकः ॥
नास्ति पद्मसमं पुण्यं जैमिने सत्यमुच्यते ।
येन संपूज्य गोविन्दं पापात्मापि ...
सत्यं सत्यं पुनः सत्यं सत्यमेव मयोच्यते ।
कमलैर्हरिमभ्यर्च्च्य लभते परमं पदम् ॥
एकमेवारविन्दं यः प्रददाति मुरारये ।
तस्य नास्ति पुनर्जन्म संसारेऽस्मिन् सुभैरवे ॥
इति पाद्मे क्रियायोगसारे १२ अध्यायः ॥*
व्यास उवाच ।
“मार्गशीर्षे द्विजश्रे ...
पूजयेदव्ययं विष्णुं भक्तिभावेन वैष्णवः ॥
उच्छिष्टदेशे विप्रेन्द्र तथैव पतितालये ।
दुर्गन्धेश्च परिव्याप्ते स्थाने विष्णुं न पूजयेत् ॥
पाषण्डानां समीपे तु महापातकिनां तथा ।
असत्यभाषिणाञ्चैव न कुर्य्याद्विष्णुपूजनम् ॥
तस्मादेकमना भूत्वा भक्तिश्रद्धासमन्वितः ।
पूजयेत् कमलाकान्तं चतुर्व्वर्गफलाप्तये ॥
शाल्यन्नं सघृतञ्चैव मुद्गसूपसमन्वितम् ।
सवास्तूकादिशाकञ्च दद्यात् सदधि विष्णवे ॥
नागरङ्गफलं दिव्यं सुपक्वं यस्तु यच्छति ।
केशवाय द्विजश्रेष्ठ सोऽस्माभिरपि पूज्यते ॥
यदन्यं नूतनं वस्तु प्रियं भगवतो हरेः ।
तदेवाग्रहायणे मासि भक्त्या दद्यान्मुरारये ॥
पौषे मासि समायाते श्रीकृष्णं वरदं प्रभुम् ।
नित्यमिक्षुरसैर्द्दिव्यैः स्नापयेद्वैष्णवो जनः ॥
यः स्नापयति विप्रेन्द्र विष्णुमिक्षुरसैः प्रभुम् ।
इह भुङ्क्ते सुखं सर्व्वं मृतो याति सुसागरम् ॥
यो दद्यादिक्षुनैवेद्यं देवदेवाय विष्णवे ।
सोऽपि तत्फलमाप्नोति किमन्यैर्बहुभाषितैः ॥
सदुग्धं पृथुकं पौषे दधिभिर्व्वा समन्वितम् ।
दत्त्वा मुरारये मर्त्त्यः सर्व्वान् कामानवाप्नुयात् ॥
सर्व्वं पुरातनं वस्त्रं दूरीकृत्य मुरारये ।
शीतस्य वारणार्थाय दद्याद्वस्त्रञ्च नूतनम् ॥
पौषे संक्रमणे विप्र सलक्ष्मीकाय विष्णवे ।
दद्यान्मुमुक्षुर्मनुजो दशवर्णञ्च पिष्टकम् ॥
यस्तु शङ्खध्वनिं कुर्य्यात् संपूज्य कमलापतिम् ।
तस्य पुण्यफलं वच्मि शृणु वत्स समाहितः ॥
अगम्यागमनाच्चैव विमुक्तः सर्व्वपातकैः ।
शेषे विष्णुपुरं गत्वा विष्णुना सह मोदते ॥
वैनतेयाङ्किता घण्टा यस्तु वादयते हरेः ।
पूजाकाले द्विजश्रेष्ठ तस्य पुण्यं वदाम्यहम् ॥
अभक्ष्यभक्षणाच्चैव मुक्तः पापैः सुदारुणैः ।
प्रयाति मन्दिरं विष्णो रथमारुह्य शोभनम् ॥
तत्र भुक्ताखिलं भोगं कल्पकोटिशतावधि ।

…हिन्दी भाषा ॥
…विर्वर्जितः ।
…प्राप्नोति यथाम् ॥
…काले च्युतागमः ।
…पतितान् उत्तमान्
…यां पंरमाथिनः ।
…दव्याप्नोति परम् ॥
…मधुरां तथा ।
…मिथुनादनम् ॥
…घदेगं वादयेत् च यः ।
…पुण्यं निशामय ॥
…मन्दिरं याति चक्रिणः ।
…तत्रैव परिमुच्यते ॥
…पूजाकाले जगद्गुरोः ।
…पुण्यं यथोच्यते ॥
…प्रयाति हरिमन्दिरम् ।
…सोपमवयमाप्नुयात् ॥
…तत्रैव भक्तियुक्तः प्रनृत्यति ।
…यस्तु भक्तियुक्तः प्रनृत्यति ।
…तद्विष्णोः परमं पदम् ॥
…नारायणाग्रतः ।
…गीतानि भक्त्या गन्धर्वाणां पुरेषु च ॥
…प्नोति गन्धर्वाणां पुरेषु च ॥
…वैष्णवो जनः ।
स्तोत्रं जगन्नाथं यो भक्त्या वैष्णवो जनः ।
…भगवान् सर्व्वान् कामान् प्रयच्छति ।
…मासे हरिं यस्तु विधिनानेन पूजयेत् ।
…विपर्ये प्रमादस्त्वति सोऽच्युतम् ॥
…दधिमिमं ये तत्तु मिच्छन्ति मर्त्याः
…तरगभीरं सर्व्वदुःखप्रदञ्च ।
…परमपुरुषपादाम्भोजयुग्मं मनोज्ञं
…विदगनिवहसेव्यं ते तु सर्व्वं यजन्तु ॥"
इति पाद्मे क्रियायोगसारे १२ अध्यायः ॥*॥
अथ द्वात्रिंशत् सेवापराधाः । भगवद्भक्तानां
अचियमिश्रान्नभोजनम् १ अनिषिद्धदिने दन्त-
धावनमकृत्वा विष्णोरुपसर्पणम् २ मैथुनं
कृत्वास्नात्वा विष्णोरुपसर्पणम् ३ मृतं नरं
स्पृष्ट्वास्नात्वा विष्णुकर्म्मकरणम् ४ रजस्वलां
स्पृष्ट्वा विष्णुगृहप्रवेशनम् ५ मानवं शवं स्पृष्ट्वा-
स्नात्वा विष्णुं सन्निधावस्थानम् ६ विष्णुं स्पृशतः
पायुवायुप्रयोगः ७ विष्णोः कर्म्म कुर्व्वतः पुरीष-
त्यागः ८ विष्णुशास्त्रमनादृत्य, शास्त्रान्तर-
मा ९ अतिमलिनं वासः परिधाय विष्णु-
र्पाचरणम् १० अविधानेनाचम्य विष्णोरुप-
र्पणम् ११ विष्णोरपराधं कृत्वा विष्णोरुप-
र्पणम् १२ क्रुद्धस्य विष्णुस्पर्शनम् १३ निषिद्ध-
पुष्पेण विष्णुं च नम् १४ रक्तं वासः परिधाय
विष्णोरुपसर्पणम् १५ अन्धकारे दीपेन विना
विष्णोः स्पर्शनम् १६ कृष्णवस्त्रं परिधाय विष्णो-
कर्म्माचरणम् १७ वायसाहृतवासः परिधाय
विष्णोः कर्म्माचरणम् १८ विष्णवे कुक्कुरोच्छिष्ट-
दानम् १९ वराहमांसं भुक्त्वा विष्णोरुप-
सर्पणम् २० हंसजालपदसरारिमांसं भुक्त्वा
विष्णोरुपसर्पणम् २१ दीपं स्पृष्ट्वा हस्तमप्रक्षाल्य
विष्णोः स्पर्शनं कर्म्मकरणं वा २२ श्मशानं

गत्वास्नात्वा विष्णुपसर्पणम् २३ पिण्याकं भुक्त्वा
विष्णोरुपसर्पणम् २४ विष्णवे वराहमांस-
निवेदनम् २५ मद्यमादाय पीत्वा वा स्पृष्ट्वा
विष्णुगृहप्रवेशनम् २६ परकीयेनाशचिना
वस्त्रेण परिवेष्टितेन विष्णुकर्म्माचरणम् २७ गव्य-
विष्णवे नवान्नमप्रदाय तद्भोजनम् २८ गन्ध-
पुष्पे ऽप्रदाय धूपदीपदानम् २९ उपानहावारुह्य
विष्णुस्थानप्रवेशनम् ३० भेरीशब्देन विना विष्णु-
प्रबोधनम् ३१ अजीर्णे सति विष्णुस्पर्शनम् ३२ ।
एतदुपलक्षणम् । इत्याह्निकाचारतत्त्वम् ॥ *॥
अपि च ।

धरण्युवाच ।

"तवापराधान् देवेश वर्ज्जान् यान् वैष्णवेन च ।
निरापराधो मनुजः सापराधश्च जायते ॥
कर्म्मणाचरति येन करणेन जुगुप्सितम् ।
तस्य पूजाफलं सर्व्वं जायते तद्वदस्व मे ॥

वराह उवाच ।

कर्म्मणा मनसा वाचा ये पापरुचयो जनाः ।
भक्षणं दन्तकाष्ठस्य राजान्नस्य तु भोजनम् ॥
मैथुनं शवसंस्पर्शं पुरीषोत्सर्गमेव च ।
मैथुनं शवसंस्पर्शं पुरीषोत्सर्गमेव च ।
मृतवधूदयाः घपणं स्पर्शनं मेहनं तथा ॥
अभाष्यभाषणं कोपं पिण्याकस्य च भक्षणम् ।
अभाष्यभाषणं कोपं पिण्याकस्य च भक्षणम् ॥
रक्तापरवमलिनं वस्त्रधारित्वनीलिजम् ।
गुरोरालोकनिर्व्बन्धं पतितान्नस्य भक्षणम् ।
गुरोरालोकनिर्व्बन्धं तण्डुलीयविभीतकम् ॥
अभक्ष्यभक्षणञ्चैव तण्डुलीयविभीतकम् ॥
प्रदानं तु वराहस्य जालपादवराकयोः ।
भक्षणं देवतागारे सोपानत्कोपसर्पणम् ॥
तथैव देवपूजानां निषिद्धकुसुमार्च्चनम् ।
अनुत्ताप्य च निर्म्माल्यं पूजा जीर्णान्धकारयोः ॥
पानं सुराया देवस्य अन्धकारे प्रबोधनम् ।
यातकर्म्मार्च्चने विष्णोरनमस्करणं तथा ॥
अपराधास्त्वयस्त्रिंशत् समाख्याता मया धरे ।
एभिर्युक्तस्तु पुरुषो विष्णुं नैव प्रपश्यति ॥
दूरस्थो न नमस्कारं कुर्य्यात् पूजा तु राक्षसी ॥"
तत्प्रायश्चित्तं यथा,—
"एकरात्रं द्विरात्रं वा त्रिरात्रं स्नानमेव च ।
सवासाः पञ्चगव्याशी मलवस्त्रान्तिकं क्रमात् ॥
नीलीरङ्गापनोदार्थं गोमयेन प्रघर्षणम् ।
नीलीरङ्गापनोदार्थं गोमयेन प्रघर्षणम् ।
नीलीरङ्गापनोदार्थं नीलीवस्त्रस्य धार-
णात् ।
प्राजापत्येन शुद्धिः स्यात् नीलीवस्त्रस्य धार-
णात् ।
चान्द्रायणद्वयं कुर्य्यात् गुरोः क्षमितमुत्तमम् ।
चान्द्रायणद्वयं कुर्य्यात् पतितान्नस्य भक्षणात् ॥
चान्द्रायणं पराकञ्च प्राजापत्यं तथैव च ।
चान्द्रायणं पराकञ्च अभक्ष्यस्य च भक्षणे ॥
गोप्रदानञ्च भोज्यञ्च पञ्चगव्येन शुध्यति ।
उपवासस्तु पश्चाच्च पञ्चगव्येन शुध्यति ।
सोपानत्कश्चरेत् पादं कृच्छ्रस्य द्विरभोजनम् ॥
पुष्पाभावेऽर्च्चने स्नानं देवस्पर्शञ्च कारयेत् ।
अनिर्म्माल्यं नमस्कार स्नानं पञ्चामृतेन तु ॥
सुरापाने द्विजातीनां चान्द्रायणचतुष्टयम् ।
तथैव द्वादशाब्दं तु प्राजापत्यत्रयं चरेत् ॥
ब्रह्मकूर्च्चेन शुद्धिः स्यात् गोप्रदानेन च ।
तथाप्यमिकरात्रे च पञ्चामृतेन…

मुच्यते त्वपराधेभ्यः…
एतत्ते कथितं गुह्यं किमन्यत् श्रोतु…

धरण्युवाच ।

अस्ति कश्चिदुपायोऽत्र येन त्वं नृप तुष्यसि ।
पूजितः सफलयामि अपराधविशोधनः ॥

वराह उवाच ।

संवत्सरस्य मध्ये तु तीर्थे शौकरवे मम ।
कृतोपवासः स्नानेन गङ्गायां शुद्धिमाप्नुयात् ।
मथुरायां तथाप्येवं सापराधः शुचिर्भवेत् ॥
अनयोस्तीर्थयोरेव यः सेवेत सुसत्वरः ।
सहस्रजन्मजनि तानपराधान् जहाति सः ।
स्नानात् पानात् तथा ध्यानात् कीर्त्तनाद्धा-
रणात्तथा ।
श्रवणात्स्मरणाच्चैव दर्शनाद्द्याति पातकम् ॥
इति वाराहपुराणे अपराधप्रायश्चित्तनामा-
ध्यायः ॥
सेवि, स्त्री, (सेव्यते लोकैरिति । सेव + इन् ।)
फलविशेषः । सेव्री इति हिन्दी भाषा । तत्प
र्य्यायः । वदरम् २ सिञ्चितिकाफलम् ३ मुष्टि
प्रमाणम् ४ सेवितम् ५ सेवम् ६ । अस्य
गुणाः । वातपित्तहरत्वम् । गुरुत्वम् । वृंह-
णत्वम् । कफकरत्वम् । हृद्यत्वम् । पाके स्वादु-
रसत्वम् । हितत्वञ्च । इति राजनिर्घण्टः ॥
सेविका, स्त्री, मिष्टान्नविशेषः । सेवीयाजि इति
भाषा । यथा,—
"समितायर्त्तिकाः कृत्वा सुसूक्ष्मा यवसन्निभाः ।
शुष्काः घोरेण संसाध्या भोज्या घृतसिता-
न्विताः ॥",

अस्या गुणाः ।
"सेविका तर्पणी बल्या गुर्व्वी पित्तानिलापहा
ग्राहिणी सन्धिकृद्रुच्या तां खादेन्नातिमात्रया
इति भावप्रकाशः ।
इति केचित् ॥)
(दासी । भुजिष्या । इति केचित् ॥)
सेवितः, त्रि, (सेव + क्तः ।) समुपासितगुर्व्वादि
तत्पर्य्यायः । वरिवसितः २ वरिवस्यितः
उपासितः ४ उपचरितः ५ । इति शब्दर
वली ॥ आराधितः । उपभुक्तः । आश्रि
इति सेवधात्वर्थदर्शनात् ॥ (यथा, महाभ
१ । १७ । ६ ।
"काञ्चनाभरणं चित्रं देवगन्धर्व्वसेवित
इति राजनिर्घण्टः ॥
सेविफलं, क्ली । इति राजनिर्घण्टः ॥
सेव्यं, क्ली, (सेव्यते इति । सेव + ण्यत् ।) वीरण-
मूलम् । इत्यमरः । २ । ४ । १६४ ॥ (अस्य
पर्य्यायो यथा,—
"वीरणस्य तु मूलं स्यादुशीरं नलदञ्च तत् ।
अमृणालञ्च सेव्यञ्च समगन्धिकमित्यपि ॥"
इति भावप्रकाशे पूर्व्वखण्डे…
लामज्जकम् । उशीरवत्पीतच्छ…
तत्पर्य्यायो यथा,—
"लामज्जकं सुनालं…
इष्टकापथकं सेव्यं नल…
इति च भावप्रकाशे…

"स्वादुशीरं मृणालञ्च सैव्यं लामज्जकन्तथा।"
इति गारुडे २०८ अध्यायः ॥)
सैव्यः, पुं, (सेव्यते इति । सेव + ण्यत् ।) अश्वत्थवृक्षः । इति राजनिर्घण्टः ॥ हिज्जलवृक्षः । इति शब्दरत्नावली ॥
सैव्यः, त्रि, (सेवृ सेवने + ण्यत् ।) सेवार्हः । इति मेदिनी ॥ (यथा, कथासरित्सागरे । ५२ । १३७ ।
"अहं तं सैव्यमन्येषां करिष्यामीश्वरं क्षणात् ।
तत्तं वृणीष्व भर्त्तारं यदि ते पुत्त्रि रोचते ॥")
सैव्या, स्त्री, (सेव + ण्यत् । टाप् ।) वन्दावृक्षः । इति शब्दरत्नावली ॥
सै, चित्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-अनिट् ।) सायति । चितिः क्षयः । इति दुर्गादासः ॥
सैंहः, त्रि, (सिंहस्यायमिति । सिंह + अण् ।) सिंहसम्बन्धी । सिंहतुल्यः । इति सिद्धान्तकौमुदी ॥ (स्त्रियां ङीप् । यथा, माघे ।१।४७।
"सटाच्छटाभिन्नघनेन बिभ्रता
नृसिंह सैंहीमतनुं तनुं त्वया ।
स मुग्धकान्तास्तनसङ्गभङ्गुरै-
रुरोविदारं प्रतिचस्करे नखैः ॥
सैंहली, स्त्री, (सिंहले देशे भवा । सिंहल + अण् । ङीप् ।) सिंहपिप्पली । तत्पर्य्यायः । सर्पदण्डा २ सर्पाङ्गी ३ ब्रह्मभूमिजा ४ पार्व्वती ५ शैलजा ६ ताम्रा ७ लम्बबीजा ८ उत्कटा ९ अद्रिजा १० सिंहलस्था ११ लम्बदन्ता १२ जीवला १३ जीवाला १४ जीवनेत्री १५ कुरुम्बी १६ । अस्या गुणाः । कटुत्वम् । उष्णत्वम् । जन्तुनाशित्वम् । दीपनत्वम् । कफश्वाससमीरार्त्तिशमनत्वम् । कोष्ठशोधनत्वञ्च । इति राजनिर्घण्टः ॥ सिंहलद्वीपभवे, त्रि ॥
सैंहिकः, पुं, (सिंहिकायां भवः । अण् ।) राहुः । इति शब्दरत्नावली ॥
सैंहिकेयः, पुं, (सिंहिकाया अपत्यं पुमानिति । सिंहिका + ढक् ।) राहुः । इत्यमरः ॥ (यथा, माघे । २ । ३५ ।
"ध्रियते यावदेकोऽपि रिपुस्तावत् कुतः सुखम् ।
पुरः क्लिश्नाति सोमं हि सैंहिकेयोऽसुरद्रुहाम् ॥")
सैकतं, क्ली, (सिकताः सन्त्यत्रेति । अण् ।) वालुकामयतटम् । इत्यमरः । १ । १० । ९ ॥ (यथा, कुमारे । १ । २९ ।
"मन्दाकिनीसैकतवेदिकाभिः
सा कन्दुकैः कृत्रिमपुत्त्रकैश्च ।
रेमे मुहुर्मध्यगता सखीनां
क्रीडारसं निर्व्विशतीव बाल्ये ॥"
सैकत, त्रि, (सिकताः सन्त्यत्रेति । सिकता + "सिकताशर्कराभ्याञ्च ।" ५ । २ । १०४ । इति अण् ।) सिकतामयः । इत्यमरः ।२। १०। ८ ॥ तत्पर्य्यायः । सिकतिलः २ सिकतावान् ३ । इति [illegible] ॥ (यथा, भागवते । ११।२७।१२।
"शैली दारुमयी लौही लेप्या लेख्या च सैकती ।
मनोमयी मणिमयी प्रतिमाष्टविधा स्मृता ॥")
सैकतिकं, क्ली, मात्रयात्रा । मङ्गलसूत्रकम् । इति मेदिनी ॥
सैकतिकः, पुं, (सैकतं पुलिनं प्रियत्वेनास्त्यस्येति । सैकत + ठन् ।) संन्यस्तः । क्षपणकः । सन्देहजीविनि, त्रि । इति मेदिनी ॥
सैकतेष्टं, क्ली, (सैकतं स्थानमिष्टमस्य ।) आर्द्रकम् । इति राजनिर्घण्टः ॥ वालुकामयप्रिये, त्रि ॥
सैतवाहिनी, स्त्री, बाहुदानदी । इत्यमरः । १ । १० । ३३ ।
सैद्धान्तिकः, त्रि, (सिद्धान्तं वेत्तीति । सिद्धान्त + ठक् ।) सिद्धान्तज्ञः । इति हेमचन्द्रः कौमुदी च ॥
सैनापत्यं, क्ली, (सेनापतेर्भावः कर्म्म वा । सेनापति + "पत्यन्तपुरोहितादिभ्यो यक् ।" ५।१।१२८। इति यक् ।) सेनापतेर्भावः । तत्कर्म्म च । इति सिद्धान्तकौमुदी ॥ (यथा, मनुः ।१२।१००।
"सैनापत्यञ्च राज्यञ्च दण्डनेतृत्वमेव च ।
सर्व्वलोकाधिपत्यञ्च वेदशास्त्रविदर्हति ॥"
सेनापतेरिदमिति । "दित्यदित्यादित्येति ।" ४। १ । ८५ । इति ण्यः ।) सेनापतिसम्बन्धिनि, त्रि ॥
सैनिकः, पुं, (सेनां समवैतीति । सेना + "सेनाया वा ।" ४ । ४ । ४५ । इति पक्षे ठक् ।) सेनायां समवेतः । इत्यमरः । २ । ८ । ६१ ॥ मिलितहस्त्यश्वरथपादातं सेना तत्र ये समवेताः एकदेशीभूतास्ते सैन्याः सैनिकाश्च । इति भरतः ॥ (यथा, रघुः । ३ । ६१ ।
"निमेषमात्रादवधूय तद्व्यथां
सहोत्थितः सैनिकहर्षनिस्वनैः ॥")
सैन्यरक्षकः । इति मेदिनी अमरश्च ॥ प्राणिवधनियुक्तः । यथा, श्रीभागवते पञ्चमस्कन्धगद्यम् । ये त्विह वै पुरुषाः पुरुषमेधेन यजन्ते याश्च स्त्रियो नृपशून् खादन्ति तांश्च ताश्च ते पशव इह निहता यमसदने यातयन्तो रक्षोगणाः सैनिका इव स्वधितिना अवदायासृक् पिबन्तीति । सैनिकाः प्राणिवधनियुक्ताः । इति तिथ्यादितत्त्वम् ॥ सेनासम्बन्धिनि, त्रि ॥ (यथा, महाभारते । ७ । १९० । ४१ ।
"एवं तं निहतं संख्ये दृष्ट्वा सैनिको जनः ॥")
सैन्धवं, क्ली, पुं, (सिन्धौ समुद्रतीरे सिन्धुदेशे वा भवम् । सिन्धु + "अणञौ च ।" ४।३।३३ । इति अण् ।) लवणविशेषः । स तु सिन्धुनद्युपलक्षितदेशोद्भवः । तत्पर्य्यायः । शीतशिवम् २ माणिमन्थम् ३ सिन्धुजम् ४ । इत्यमरः । २।९।४२ ॥ वशिरम् ५ सिन्धुदेशजम् ६ माणिमन्थम् ७ । इति जटाधरः ॥ शितशिवम् ८ । इति शब्दरत्नावली ॥ नादेयम् ९ शिवम् १० शिवम् ११ शिवात्मजम् १२ पथ्यम् १३ । अस्य गुणाः ।
"सैन्धवं लवणं हृद्यं चक्षुष्यं दीपनं रुचि ।
पूतं स्वादु त्रिदोषघ्नं व्रणदोषविबन्धजित् ॥
सैन्धवं द्विविधं ज्ञेयं सितं [illegible]
रसवीर्य्यविपाकेषु गुणाढ्यं कथितं सितम् ॥"
इति राजनिर्घण्टः ॥
अपि च ।
"सैन्धवं लवणं स्वादु दीपनं पाचनं लघु ।
स्निग्धं रुच्यं हिमं हृद्यं सूक्ष्मनेत्र[illegible]"
इति भावप्रकाशः ॥
किञ्च ।
"सैन्धवं दोषजिद्वृष्यं चक्षुष्यमविदाहि च ।
अग्निसन्दीपनं स्निग्धं रोचनं मधुरं लघु ॥"
इति राजवल्लभः ॥
तत्तु हविष्यान्नम् । यथा, स्मृतिः ।
"लवणे सैन्धवसामुद्रे गव्ये च दधिसर्पिषी ।"
इति हविष्यान्नगणने तिथ्यादितत्त्वम् ॥
सैन्धवः, पुं, (सिन्धुरभिजनोऽस्येति । सिन्धु + "सिन्धुतक्षशिलादिभ्योऽणञौ ।" ४।३।९३। [illegible] अण् ।) घोटकः । स तु सिन्धोरदूरभवः । विकारसंघेति अदूरभवार्थे अणः । इत्यमरभरतौ । २।८।४४। (यथा, भागवते ।८।१।२२।
"स एकदा महाराज ! विचरन् मृगयां वने ।
वृतः कतिपयामात्यैरश्वमारुह्य सैन्धवम् ॥"
सिन्धुदेशाधिपतिः । जयद्रथः । यथा, महाभारते । १ । १ । १९६ ।
"यदा द्रोणः कृतवर्म्मा कृपश्च
कर्णो द्रौणिर्मद्रराजश्च शूरः ।
अमर्षयन् सैन्धवं वध्यमानं
तदा नाशंसे विजयाय सञ्जय ॥"
सिन्धुदेशोत्पन्नमात्रे । यथा, तत्रैव । ३ । ५१ । २४
"हारहूणांश्च चीनांश्च तुखारान् सैन्धवांस्तथा ॥")
सैन्धी, स्त्री, तालादिरसनिर्य्यासः । तत्पर्य्यायः । हाला २ । अस्या गुणाः । शीतत्वम् । कषायत्वम् । अम्लत्वम् । पित्तदाहनाशित्वम् । वातदत्वञ्च । इति राजनिर्घण्टः ॥
सैन्यं, क्ली, (सेना एव । चतुर्वर्णादित्वात् ष्यञ् ।) सेना इत्यमरः । २ । ८ । ७८ ॥ (यथा, मार्कण्डेये । ८७ । २१ ।
"हतशेषं ततः सैन्यं दृष्ट्वा चण्डं निपातितम् ।
मुण्डञ्च सुमहावीर्य्यं दिशो भेजे भयातुरम् ॥")
सैन्यः, पुं, (सेनां समवैतीति । सेना + "सेनाया वा ।" ४ ।४। ४५ । इति ण्यः ।) सेनासमवेतः । इत्यमरः । २ । ८ । ६१ । "मिलितहस्त्यश्वरथपादातं सेना तत्र ये समवेता एकदेशीभूतास्ते सैन्याः सैनिकाश्च ।" इति भरतः ॥ किञ्च ।
"सैन्यं क्लीबं बलेऽपि ना समवेते तु वाच्यवत् ।"
इति मेदिनी ॥
सैन्यपृष्ठं, क्ली, (सैन्यस्य पृष्ठम् ।) सैन्यस्य पश्चाद्भागः । यत्र स्थितं राजा ससैन्यं प्रतिगृह्णाति । तत्पर्य्यायः । प्रतिग्रहः २ । इत्यमरः ॥ परिग्रहः ३ । इति भरतः ॥ पतद्ग्रहः ४ । इति टीकान्तरम् ॥

...तैरेयः
...म् । इति केचित् ॥ सीमन्त-
...वेन निष्पन्नम् ॥
...स्वातन्त्र्यं धरतीति । धृ +
...त् कः । पृषोदरादित्वात्
...सम्या स्वतन्त्रा शिल्पजीविनी ।
...६ । १८ । (यथा, महाभारते ।
...।
...जानीष्व सुनन्दे देवरूपिणीम् ।
...तां प्राप्ता सखी तव भवत्वियम् ॥")
...इति हेमचन्द्रः ॥ (वर्णसङ्करसम्भूत-
...था, महाभारते । १३ । ४८ । १९ ।
...आगमनाच्चैव जायते वर्णसङ्करः ।
...नामनुजायन्ते सैरन्ध्र्यां मागधेषु च ।
...वनोपचारज्ञमदासं दासजीवनम् ॥") सीरेण लाङ्गलेन
...क, पुं, (सीर+ठक् ।) सीरं वह-
...तीति यः । कृषाण् इति भाषा ॥ ४ । ४ ।
...तीति । सीर+"हलसीरात् ठक् ।" हलिकस्य-
...८१ । इति ठक् ।) सीरस्य वोढा । "हलसीरात्
...इति भाषा ॥ (सीरस्येदमिति । इति ठक् ।) सीर-
...ठक् ।" ४ । ३ । १२४ । इति ठक् ।) हालिकः २
...सीरिनि, त्रि । तेषां पर्य्यायः । हालिकः २
...शाङ्गलिकः ३ । इत्यमरः । २ । ९ । ६४ ॥
...न्ध्री, स्त्री, (सैरं स्वातन्त्र्यं धरतीति । धृ +
...मूलविभुजादित्वात् कः । पृषोदरादित्वात्
...साधुः । गौरादित्वात् ङीष् ।) परवेश्मस्था
...स्ववशा शिल्पकारिका । इत्यमरः । २ । ६ ।
...१८ ॥ तत्पर्य्यायः । सैरन्ध्री २ सैरिन्ध्रिः ३ इति
...तट्टीका ॥ (यथा, महाभारते । ४ । ८ । २ ।
...मथ परिधायैकं कृष्णा सुमलिनं महत् ।
...त्वा वेशं हि सैरिन्ध्र्याः कृष्णा च व्यचरत् तदा ॥")

वर्णसङ्करसम्भूतस्त्री । महल्लिका । इति मेदिनी ।
द्रौपदी । इति धरणिः ॥ (यथा, महाभारते ।
४ । २३ । ५ ।
"यथा सैरिन्ध्रीदोषेण न ते राजन्निदं पुरम् ।
विनाशमेति वै क्षिप्रं तथा नीतिर्विधीयताम् ॥"
सैरिभः, पुं, (सीरे लाङ्गलवहने इभ इव । शक-
न्ध्वादित्वात् साधुः । ततः स्वार्थे अण् ।) महिषः ।
इत्यमरः । २ । ५ । ४ ॥ स्वर्गः । इति त्रिकाण्ड-
शेषः ॥
सैरीयः, पुं, (सीरे भवः । अण् । सैरः कर्पस्तत्र
भवः । वृद्धात् छः ।) झिण्टी । इति शब्द-
रत्नावली ॥
सैरीयकः, पुं, (सैरीय एव । स्वार्थे संज्ञायां वा
कन् ।) झिण्टी । इत्यमरः । २ । ४ । ७५ ॥
अस्य गुणः । कफवातनाशित्वम् । इति राज-
वल्लभः ॥
सैरेयः, पुं, (सैरे कर्पे भवः । सैर+"नद्यादिभ्यो
ढक् ।" ४।२।९७। इति ढक् ।) झिण्टी । इति
शब्दमाला भरतश्च ॥ (अस्य पर्य्यायो यथा,—
"सैरेयकः श्वेतपुष्पः सैरेयः कटसारिका ।
सहचरः स च भिन्द्यपि कथ्यते ॥"

अस्य गुणाः ।
"सैरेयः कुष्ठवातास्रकफकण्डूविषापहः ।
तिक्तोष्णो मधुरोऽनम्लः सुस्निग्धः केशरञ्जनः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
सैरेयकः, पुं, (सैरेय एव । स्वार्थे कन् ।) झिण्टी ।
इति राजनिर्घण्टो भरतश्च ॥ (अस्य पर्य्यायो
यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"सैरेयकः श्वेतपुष्पः सैरेयः कटसारिका ।
सहाचरः सहचरः स च भिन्द्यपि कथ्यते ॥")
सैवालं, क्ली, शैवालम् । यथा,—
"या पांशुपाण्डरवपुर्विरसा पुरासीत्
सैवालकाङ्कुरलतामधुना बिभर्त्ति ।
वक्रं प्रसर्पति तनोर्वितनोति लक्ष्मीं
प्रायः पयोधरसमुन्नतिरत्र हेतुः ॥"
इति प्रसिद्धश्लेषकाव्यम् ॥
सोः, स्त्री, पार्व्वती । इति केचित् ॥ षोधातोः
क्विप्प्रत्ययेन निष्पन्ना ॥
सोढः, त्रि, (सह मर्षणे + क्तः । "सहिवहोरोद-
वर्णस्य ।" ६ । ३ । ११२ । इति अवर्णस्य
ओत् ।) क्षान्तः । इत्यमरः । ३ । १ । ९७ ॥
दुःखादिसहनशीलः । इति तट्टीकायां नील-
कण्ठः ॥
सोढा, [ऋ] त्रि, (सहते इति । सह + तृच् ।)
क्षमायुक्तः । शक्तः । इति मेदिनी ॥ (यथा,
महाभारते । ७ । २६ । ६ ।
"सोढा मस्त्रनिपातानामग्निस्पर्शस्य चानघ ।
स पाण्डववलं सर्व्वमेको नाशयिष्यति ॥")
सोत्कण्ठः, त्रि, (उत्कण्ठया सह वर्त्तमानः ।)
उत्कण्ठायुक्तः । तत्पर्य्यायः । उत्कः २ उन्मनाः
३ । इति जटाधरः ॥ (यथा, कथासरित्-
सागरे । ३१ । ४५ ।
"तत्रोद्यानगतं सा तं वत्सेशं समुदीरितम् ।
ददर्श दूरात् सोत्कण्ठा चकोरीवामृतत्विषम् ॥")
सोत्प्रासं, क्ली, (उत्प्रासेन सह वर्त्तमानम् ।)
प्रियावाक्यम् । यथा, शब्दरत्नावल्याम् ।
"सोल्लुण्ठनन्तु सोत्प्रासं चटु चाटु प्रियोदितम् ॥"
सोत्प्रासः, पुं, (उत्प्रासेन आधिक्येन सह वर्त्त-
मानः ।) सशब्दहास्यम् । यथा,—
"सोत्प्रास आच्छुरितकमवच्छुरितकं तथा ।
अट्टहासो महाहासो हासः प्रहास इत्यपि ॥"
इति शब्दरत्नावली ॥
सोदयं, त्रि, उदयेन सह वर्त्तमानम् । हृद्धियुक्तम् ।
सुद समेत् इति भाषा । यथा,—
"दत्तां कन्यां हरन् दण्ड्यो व्ययं दद्याच्च सोदयम् ।
मृतायां वर आदद्यात् परिशोध्योभयव्ययम् ॥"
इत्युद्वाहतत्त्वधृतयाज्ञवल्क्यवचनम् ॥
सोदरः, पुं, (सह समानं उदरं यस्य । सहस्य
सः ।) सहोदरः । इति शब्दरत्नावली ॥
(यथा, मनुः । ८ । २९९ ।
"भार्य्या पुत्त्रश्च दासश्च शिष्यो भ्राता च सोदरः ।
प्राप्तापराधास्ताड्याः स्यू रज्ज्वा वेणुदलेन वा ॥")

सोदरा, स्त्री, सहोदरा । सोदर-
शब्दादाप्प्रत्ययेन निष्पन्ना ॥
सोदर्य्यः, पुं, (समानोदरे शयितः । सोदर +
"सोदरात् यः ।" ४।४।१०९। इति यः ।) सहो-
दरः । इत्यमरः।२।६।३४॥ (यथा, रघुः ।१५।२६।
"स हत्वा लवणं वीरस्तदा मेने महौजसम् ।
भ्रातुः सोदर्य्यमात्मानमिन्द्रजिद्वधशोभिनः ॥")
सोनहः, पुं, लशुनम् । इति शब्दरत्नावली ॥
सोन्मादः, त्रि, (उन्मादेन सह वर्त्तमानः ।)
उन्मदः । उन्मदिष्णुः । तस्य रूपान्तराणि
यथा । उन्मादः । सून्मादः । सून्मदः । इत्य-
मरटीकायां भरतः । ३ । १ । २३ ॥
सोपकरणं, त्रि, उपकरणेन सह वर्त्तमानम् ।
उपकरणविशिष्टम् । यथा,—
"एवञ्च अमुककाम इति सोपकरणं वस्त्रतरी-
चतुष्टययुक्तं रूपमिति चाभिलप्य उत्सर्गः सङ्क-
ल्प्यते ।" इति रूपोत्सर्गतत्त्वम् ॥ इदं सोप-
करणमामान्ननैवेद्यमुकट्वताये नमः । इति
च पूजापद्धतिः ॥
सोपकारः, त्रि, उपकारविशिष्टः । उपकारेण
सह वर्त्तमान इति बहुव्रीहिसमासे कृते सह-
शब्दस्य सादेशेन निष्पन्नः ॥
सोपधं, त्रि, (उपधया सह वर्त्तमानमिति ।) ।
सच्छद्मदानादि । यथा हारीतः । अथासद्व्य-
दानमस्वर्ग्यं यच्च दत्त्वा परितप्यते । तद्व्यदान-
मफलं यच्चोपकारिणे ददाति तस्माद् परि-
लिष्टं यच्च सोपधं ददाति अन्ययाचितमल्पं
यच्चापात्राय ददाति अनिष्टदानं भवति यच्च
दत्त्वा प्रकीर्त्त्यते अयदानं यच्चाश्रद्धया ददाति
क्रोधादाचरं यच्चाक्रुश्य ददाति दत्त्वा वाक्रो-
शति असत्कृतं पैशाचं यच्चावज्ञातं ददाति
दत्त्वा वावजानीते सुमूर्षोस्तामसं यच्चाप्रकृतो
ददाति । एते दानोपसर्गा येरुपसृष्टं दान-
मप्रसिद्धमस्वर्ग्यं भयग्रस्तमभ्युदयफलं भवत्यल्पफलं
वेति । तर्हि त्यागानन्तरकाले इस्तार्पणमसम्भवे
ऽपि अदानमसमर्पणम् । उपकारिणे व्यसनो-
पकारिणे । तस्मात् यदोक्तोपकरणरहितम-
सोपधं सच्छद्म । अन्ययाचितं लोकमध्या-
नार्थं प्रकाशितम् । अनिष्टदानं शवदे दान-
क्षयो मानभङ्गः । अप्रकृतो भयादिमान् ।
शुद्धितत्त्वम् ॥
सोपप्लवः, पुं, (उपप्लवेन सह वर्त्तमानः ।)
ग्रस्तः चन्द्रः सूर्य्यश्च । इत्यमरः । १ । ४ ...
सोपवासः, त्रि, (उपवासेन सह वर्त्तमानः ।)
उपवासविशिष्टः । यथा,—
"मत्स्यांस्तु कामतो जग्ध्वा सोपवासस्त्र्यहं वसेत् ।"
इति तिथ्यादितत्त्वे याज्ञवल्क्यः ...
सोपाकः, पुं, श्वपाकः । इति केचित् ॥
पुक्कस्यां मनुष्यदोऽन्त्यजजातिविशेषः ...
मनुः । १० । ३८ ।
"चण्डालेन तु सोपाको मूलव्यसनवृत्तिमान् ।
पुक्कस्यां जायते पापः सदा सज्जनगर्हितः ॥"

"स्यादुशीरं मृणालञ्च सेव्यं लामज्जकन्तथा।"
इति गारुड़े २०८ अध्यायः ॥)

सेव्यः, पुं, (सेव्यते इति । सेव + ण्यत् ।) अश्वत्थवृक्षः । इति राजनिर्घण्टः ॥ हिज्जलवृक्षः । इति शब्दरत्नावली ॥

सेव्यः, त्रि, (सेवृ सेवने + ण्यत् ।) सेवार्हः । इति मेदिनी ॥ (यथा, कथासरित्सागरे । ५२ । १२७ ।
"अहं तं सेव्यमन्येषां करिष्यामीश्वरं क्षणात् । तत्त्वं वृणीष्व भर्त्तारं यदि मे पुत्रि रोचते ॥")

सेव्या, स्त्री, (सेव + ण्यत् । टाप् ।) वन्दावृक्षः । इति शब्दरत्नावली ॥

सै, क्षित्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-अनिट् ।) सायति । क्षितिः क्षयः । इति दुर्गादासः ॥

सैंहः, त्रि, (सिंहस्यायमिति । सिंह + अण् ।) सिंहसम्बन्धी । सिंहतुल्यः । इति सिद्धान्तकौमुदी ॥ (स्त्रियां ङीप् । यथा, माघे । १ । ४७ ।
"सटाच्छटाभिन्नघनेन बिभ्रता
नृसिंह सैंहीमतनुं तनुं त्वया ।
स मुग्धकान्तास्तनसङ्गभङ्गुरै-
रुरोविदारं प्रतिचस्करे नखैः ॥")

सैंहली, स्त्री, (सिंहले देशे भवा । सिंहल + अण् । ङीप् ।) सिंहपिप्पली । तत्पर्य्यायः । सर्पदण्डा २ सर्पाक्षी ३ ब्रह्मभूमिजा ४ पार्व्वती ५ शैलजा ६ ताम्रा ७ लम्बबीजा ८ उत्कटा ९ अद्रिजा १० सिंहलस्था ११ लम्बदन्ता १२ जीवला १३ जीवाला १४ जीवनेत्री १५ कुरुम्बी १६ । अस्या गुणाः । कटुत्वम् । उष्णत्वम् । जन्तुनाशित्वम् । दीपनत्वम् । कफश्वाससमीरार्त्तिशमनत्वम् । कोष्ठशोधनत्वञ्च । इति राजनिर्घण्टः ॥ सिंहलद्वीपभवे, त्रि ॥

सैंहिकः, पुं, (सिंहिकायां भवः । अण् ।) राहुः । इति शब्दरत्नावली ॥

सैंहिकेयः, पुं, (सिंहिकाया अपत्यं पुमानिति । सिंहिका + ढक् ।) राहुः । इत्यमरः ॥ (यथा, माघे । २ । ३५ ।
"ध्रियते यावदेकोऽपि रिपुस्तावत् कुतः सुखम् ।
पुरः क्लिश्नाति सोमं हि सैंहिकेयोऽसुरद्रुहाम् ॥")

सैकतं, क्ली, (सिकताः सन्त्यत्रेति । अण् ।) वालुकामयतटम् । इत्यमरः । १ । १० । ९ ॥ (यथा, कुमारे । १ । २९ ।
"मन्दाकिनीसैकतवेदिकाभिः
सा कन्दुकैः कृत्रिमपुत्त्रकैश्च ।
रेमे मुहुर्मध्यगता सखीनां
क्रीड़ारसं निर्व्विशतीव बाल्ये ॥")

सैकतः, त्रि, (सिकताः सन्त्यत्रेति । सिकता + "सिकताशर्कराभ्याञ्च ।" ५ । २ । १०४ । इति अण् ।) सिकतामयः । इत्यमरः । ३ । १ । ९८ ॥ तत्पर्य्यायः । सिकतिलः २ सिकतावान् ३ । इति राजनिर्घण्टः ॥ (यथा, भागवते । ११ । २७ । १२ ।
"शैली दारुमयी लौही लेप्या लेख्या च सैकती ।
मनोमयी मणिमयी प्रतिमाष्टविधा स्मृता ॥")

सैकतिकं, क्ली, मात्ययात्रा । मङ्गलसूत्रकम् । इति मेदिनी ॥

सैकतिकः, पुं, (सैकतं पुलिनं प्रियत्वेनास्त्यस्येति । सैकत + ठन् ।) संन्यस्तः । क्षपणकः । सन्देहजीविनि, त्रि । इति मेदिनी ॥

सैकतेष्टं, क्ली, (सैकत स्थानमिष्टमस्य ।) आर्द्रकम् । इति राजनिर्घण्टः ॥ वालुकामयप्रिये, त्रि ॥

सैतवाहिनी, स्त्री, बाहुदानदी । इत्यमरः । १ । १० । ३३ ।

सैद्धान्तिकः, त्रि, (सिद्धान्तं वेत्तीति । सिद्धान्त + ठक् ।) सिद्धान्तज्ञः । इति हेमचन्द्रः कौमुदी च ॥

सैनापत्यं, क्ली, (सेनापतेर्भावः कर्म्म वा । सेनापति + "पत्यन्तपुरोहितादिभ्यो यक् ।" ५ । १ । १२८ । इति यक् ।) सेनापतेर्भावः । तत्कर्म्म च । इति सिद्धान्तकौमुदी ॥ (यथा, मनुः । १२ । १०० ।
"सैनापत्यञ्च राज्यञ्च दण्डनेतृत्वमेव च ।
सर्व्वलोकाधिपत्यञ्च वेदशास्त्रविदर्हति ॥")
सेनापतेरिदमिति । "दित्यदित्यादित्येति ।" ४ । १ । ८५ । इति ण्यः ।) सेनापतिसम्बन्धिनि, त्रि ॥

सैनिकः, पुं, (सेनां समवैतीति । सेना + "सेनाया वा ।" ४ । ४ । ४५ । इति पक्षे ठक् ।) सेनायां समवेतः । इत्यमरः । २ । ८ । ६१ ॥ मिलितहस्त्यश्वरथपादातं सेना तत्र ये समवेताः एकदेशीभूतास्ते सैन्याः सैनिकाश्च । इति भरतः ॥ (यथा, रघुः । २ । ६१ ।
"निशम्य तावत् दवधूय तद्व्यथां
सहोत्थितः सैनिकहर्षनिस्वनैः ॥")
सैन्यरक्षकः । इति मेदिनी अमरश्च ॥ प्राणिवधनियुक्तः । यथा, श्रीभागवते पञ्चमस्कन्धगद्यम् । ये त्विह वै पुरुषाः पुरुषमेधेन यजन्ते याश्च स्त्रियो नृपशून् खादन्ति तांश्च तांश्च ते पशव इह निहता यमसदने यातयन्तो रक्षोगणाः सैनिका इव स्वधितिना अवदायासृक् पिबन्तीति । सैनिकाः प्राणिवधनियुक्ताः । इति तिथ्यादितत्त्वम् ॥ सेनासम्बन्धिनि, त्रि ॥ (यथा, महाभारते । ७ । १९० । ४१ ।
"एवं तं निहतं संख्ये ददृशे सैनिको जनः ॥")

सैन्धवं, क्ली, पुं, (सिन्धौ समुद्रतीरे सिन्धुदेशे वा भवम् । सिन्धु + "अणञौ च ।" ४ । ३ । ३३ । इति अण् ।) लवणविशेषः । स तु सिन्धुनद्युपलक्षितदेशोद्भवः । तत्पर्य्यायः । शीतशिवम् २ माणिमन्थम् ३ सिन्धुजम् ४ । इत्यमरः । २ । ९ । ४२ ॥ वशिरम् ५ सिन्धुदेशजम् ६ माणिबन्धम् ७ । इति जटाधरः ॥ शितशिवम् ८ । इति शब्दरत्नावली ॥ नादेयम् ९ शिवम् १० सिद्धम् ११ शिलात्मजम् १२ पथ्यम् १३ । अस्य गुणाः ।
"सैन्धवं लवणं हृद्यं चक्षुष्यं दीपनं रुचि ।
वृष्यं स्वादु त्रिदोषघ्नं व्रणदोषविबन्धजित् ॥
सैन्धवं द्विविधं ज्ञेयं सितं रक्तमिति क्रमात् ।
रसवीर्य्यविपाकेषु गुणाढ्यं कथितं सितम् ॥"
इति राजनिर्घण्टः ॥
अपि च ।
"सैन्धवं लवणं स्वादु दीपनं पाचनं लघु ।
स्निग्धं रुच्यं हिमं वृष्यं सूक्ष्मनेत्रं त्रिदोषहृत् ॥"
इति भावप्रकाशः ॥
किञ्च ।
"सैन्धवं दोषजिद्वृष्यं चक्षुष्यमविदाहि च ।
अग्निसन्दीपनं स्निग्धं रोचनं मधुरं लघु ॥"
इति राजवल्लभः ॥
तत्तु हविष्यान्नम् । यथा, स्मृतिः ।
"लवणे सैन्धवसामुद्रे गव्ये च दधिसर्पिषी ।"
इति हविष्यान्नगणने तिथ्यादितत्त्वम् ॥

सैन्धवः, पुं, (सिन्धुरभिजनोऽस्येति । सिन्धु + "सिन्धुतक्षशिलादिभ्योऽणञौ ।" ४ । ३ । ९३ । इति अण् ।) घोटकः । स तु सिन्धोरदूरभवः । विकारश्चेति अदूरभवार्थे अण् । इत्यमरभरतौ । २ । ८ । ४४ । (यथा, भागवते । ८ । ११ । २३ ।
"स एकदा महाराज ! विचरन् मृगयां वने ।
वृतः कतिपयामात्यैरश्वमारुह्य सैन्धवम् ॥")
सिन्धुदेशाधिपतिः । जयद्रथः । यथा, महाभारते । १ । १ । १८६ ।
"यदा द्रोणः कृतवर्म्मा कृपश्च
कर्णो द्रौणिर्मद्रराजश्च शूरः ।
अमर्षयन् सैन्धवं वध्यमानं
तदा नाशंसे विजयाय सञ्जय ॥"
सिन्धुदेशोत्पन्नमात्रे । यथा, तत्रैव । २ । ५१ । २४ ।
"हारहूणांश्च चीनांश्च तुषारान् सैन्धवांस्तथा ॥")

सैन्धी, स्त्री, तालादिरसनिर्य्यासः । तत्पर्य्यायः । हाला २ । अस्या गुणाः । शीतत्वम् । कषायत्वम् । अम्लत्वम् । पित्तदाहनाशित्वम् । वातदत्वञ्च । इति राजनिर्घण्टः ॥

सैन्यं, क्ली, (सेना एव । चतुर्वर्णादित्वात् ष्यञ् ।) सेना इत्यमरः । २ । ८ । ७८ ॥ (यथा, मार्कण्डेये । ८७ । २१ ।
"हतशेषं ततः सैन्यं दृष्ट्वा चण्डं निपातितम् ।
मुण्डञ्च सुमहावीर्य्यं दिशो भेजे भयातुरम् ॥")

सैन्यः, पुं, (सेनां समवैतीति । सेना + "सेनाया वा ।" ४ । ४ । ४५ । इति ण्यः ।) सेनासमवेतः । इत्यमरः । २ । ८ । ६१ । "मिलितहस्त्यश्वरथपादातं सेना तत्र ये समवेता एकदेशीभूतास्ते सैन्याः सैनिकाश्च ।" इति भरतः ॥ किञ्च ।
"सैन्यं क्लीबं बलेऽपि ना समवेते तु वाच्यवत् ॥"
इति मेदिनी ॥

सैन्यपृष्ठं, क्ली, (सैन्यस्य पृष्ठम् ।) सैन्यस्य पश्चाद्भागः । यत्र स्थित्वा राजा स्वसैन्यं प्रतिगृह्णाति । तत्पर्य्यायः । प्रतिग्रहः २ । इत्यमरः ॥ परिग्रहः ३ । इति भरतः ॥ पतद्ग्रहः ४ । इति टीकान्तरम् ॥

अ्री सिन्दूरम्। इति केचित्। सीमन्त-
शिकप्रत्ययेन निष्पन्नम् ॥
न्ध्री, (सैरं स्वातन्त्र्यं धरतीति। धृ+
मूलविभुजादित्वात् कः। पृषोदरादित्वात्
।) परवेश्मस्था स्ववशा शिल्पजीविनी।
। २। ६। १८। (यथा, महाभारते।
४। ९। ५१।
ग्रामभिजानीष्व सुनन्दे देवरूपिणीम्।
स्था तुष्टतां प्राप्ता मत्तो तव भवत्वियम्॥")
द्रौपदी। इति हेमचन्द्रः ॥ (वर्णसङ्करसम्भूत-
स्त्री। यथा, महाभारते। १३। ४८। १८।
"दस्यागमनाद्येव जायते वर्णसङ्करः।
साह्वानामनुजायन्ते सैरन्ध्र्यां मागधेषु च।
प्रसाधनोपचारज्ञमदासन्दासजीवनम्॥")
रिकः, पुं, (सीर+ठक्।) सीरेण लाङ्गलेन
चरति यः। क्षयान् इति भाषा ॥ (सीरं वह-
तीति। सीर+"हलसीरात् ठक्।" ४। ४।
८१। इति ठक्।) सीरस्य वोढ़ा। हेलेगरु
इति भाषा ॥ (सीरस्येदमिति। "हलसीरात्
ठक्।" ४। ३। १२४। इति ठक्।) सीर-
सम्बन्धिनि, त्रि। तेषां पर्य्यायः। हालिकः २
लाङ्गलिकः ३। इत्यमरः। २। ९। ६४॥
सैरिन्ध्री, स्त्री, (सैरं स्वातन्त्र्यं धरतीति। धृ+
मूलविभुजादित्वात् कः। पृषोदरादित्वात्
साधुः। गौरादित्वात् ङीष्।) परवेश्मस्था
स्ववशा शिल्पकारिका। इत्यमरः। २। ६।
१८॥ तत्पर्य्यायः। सैरन्ध्री २ सैरिन्ध्रिः ३ इति
तट्टीका ॥ (यथा, महाभारते। ४। ८। २।
"वासश्च परिधायैकं कृष्णं सुमलिनं महत्।
कृत्वा वेशं हि सैरिन्ध्र्याः कृष्णा व्यचरत्
तदा॥")
वर्णसङ्करसम्भूतस्त्री। मल्लिका। इति मेदिनी।
द्रौपदी। इति धरणिः ॥ (यथा, महाभारते।
४। २३। ५।
"यथा सैरिन्ध्रीदोषेण न ते राजन्निदं पुरम्।
विनाशमेति वै क्षिप्रं तथा नीतिर्विधीयताम्॥")
सैरिभः, पुं, (सीरे लाङ्गलवहने इभ इव। शक-
न्ध्वादित्वात् साधुः। ततः स्वार्थे अण्।) महिषः।
इत्यमरः। २। ५। ४॥ स्वर्गः। इति त्रिकाण्ड-
शेषः ॥
सैरीयः, पुं, (सीरे भवः। अण्। सैरः कर्पस्तत्र
भवः। वृद्धात् छः।) झिण्टी। इति शब्द-
रत्नावली ॥
सैरीयकः, पुं, (सैरीय एव। स्वार्थे संज्ञायां वा
कन्।) झिण्टी। इत्यमरः। २। ४। ७५॥
अस्य गुणः। कफवातनाशित्वम्। इति राज-
वल्लभः ॥
सैरेयः, पुं, (सैरे कर्पे भवः। सैर+"नद्यादिभ्यो
ढक्।" ४।२।९७। इति ढक्।) झिण्टी। इति
शब्दमाला भरतश्च ॥ (अस्य पर्य्यायो यथा,—
"सैरेयकः श्वेतपुष्पः सैरेयः कटसारिका।
सहाचरः सहचरः स च भिन्ट्यपि कथ्यते॥"

यथास्य गुणाः।
"सैरेयः कुष्ठवातास्रकफकण्डूविषापहः।
तिक्तोष्णो मधुरोऽनम्लः सुस्निग्धः केशरञ्जनः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
सैरेयकः, पुं, (सैरेय एव। स्वार्थे कन्।) झिण्टी।
इति राजनिर्घण्टो भरतश्च ॥ (अस्य पर्य्यायो
यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"सैरेयकः श्वेतपुष्पः सैरेयः कटसारिका।
सहाचरः सहचरः स च भिन्ट्यपि कथ्यते॥")
सैवालं, क्ली, शैवालम्। यथा,—
"या पांशुपाण्डुरवपुर्विरसा पुरासीत्
सैवालकाङ्कुरलतामधुना बिभर्त्ति।
वक्त्रं प्रसर्पति तनोर्वितनोति लक्ष्मीं
प्रायः पयोधरसमुन्नतिरत्र हेतुः॥"
इति प्रसिद्धश्लेषकाव्यम् ॥
सोः, स्त्री, पार्व्वती। इति केचित् ॥ षोधातोः
क्विप्प्रत्ययेन निष्पन्ना ॥
सोढः, त्रि, (सह मर्षणे+क्तः। "सहिवहोरोद-
वर्णस्य।" ६। ३। ११२। इति अवर्णस्य
ओत्।) क्षान्तः। इत्यमरः। ३। १। ९७॥
दुःखादिसहनशीलः। इति तट्टीकायां नील-
कण्ठः ॥
सोढा, [ऋ] त्रि, (सहते इति। सह+तृच्)
क्षमायुक्तः। शक्तः। इति मेदिनी॥ (यथा,
महाभारते। ७। २६। ६।
"सोढा शस्त्रनिपातानामग्निसंस्पर्शस्य चानघ।
स पाण्डवबलं सर्व्वमथैको नाशयिष्यति॥")
सोत्कण्ठः, त्रि, (उत्कण्ठया सह वर्त्तमानः।)
उत्कण्ठायुक्तः। तत्पर्य्यायः। उत्कः २ उन्मनाः
३। इति जटाधरः॥ (यथा, कथासरित्-
सागरे। ३१। ४५।
"तत्रोद्यानगतं सा तं वत्सेशं सख्युदीरितम्।
ददर्श दूरात् सोत्कण्ठा चकोरीवामृतत्वि-
षम्॥")
सोत्प्रासं, क्ली, (उत्प्रासेन सह वर्त्तमानम्।)
प्रियावाक्यम्। यथा, शब्दरत्नावल्याम्।
"सोल्लुण्ठनन्तु सोत्प्रासं चटु चाटु प्रियोदितम्॥"
सोत्प्रासः, पुं, (उत्प्रासेन आधिक्येन सह वर्त्त-
मानः।) सशब्दहास्यम्। यथा,—
"सोत्प्रास आच्छुरितकमवच्छुरितकं तथा।
अट्टहासो महाहासो हासः प्रहास इत्यपि॥"
इति शब्दरत्नावली ॥
सोदयं, त्रि, उदयेन सह वर्त्तमानम्। वृद्धियुक्तम्।
सुद् समेत् इति भाषा। यथा,—
"दत्तां कन्यां हरन् दण्ड्यो व्ययं दद्याच्च सोदयम्।
मृतायां वर आदद्यात् परिशोध्योभयव्ययम्॥"
इत्युद्वाहतत्त्वधृतयाज्ञवल्क्यवचनम् ॥
सोदरः, पुं, (सह समानं उदरं यस्य। सहस्य
सः।) सहोदरः। इति शब्दरत्नावली ॥
(यथा, मनुः। ८। २९९।
"भार्य्या पुत्त्रश्च दासश्च शिष्यो भ्राता च सोदरः।
प्राप्तापराधास्ताड्याः स्यू रज्ज्वा वेणुदलेन वा॥")

सोदरा, स्त्री, सहोदरा भगिनी। इति सोदर-
शब्दादाप्प्रत्ययेन निष्पन्ना ॥
सोदर्य्यः, पुं, (समानोदरे शयितः। सोदर+
"सोदराद् यः।" ४।४।१०९। इति यः।) सहो-
दरः। इत्यमरः। २।६।३४॥ (यथा, रघुः। १५।२६।
"स हत्वा लवणं वीरस्तदा मेने महौजसम्।
भ्रातुः सोदर्य्यमात्मानमिन्द्रजिद्वधशोभिनः॥")
सोनहः, पुं, लशुनम्। इति शब्दरत्नावली ॥
सोन्मादः, त्रि, (उन्मादेन सह वर्त्तमानः।)
उन्मदः। उन्मदिष्णुः। तस्य रूपान्तराणि
यथा। उन्मादः। सून्मादः। सून्मदः। इत्य-
मरटीकायां भरतः। ३। १। २३॥
सोपकरणं, त्रि, उपकरणेन सह वर्त्तमानम्।
उपकरणविशिष्टम्। यथा,—
"एवञ्च अमुककाम इति सोपकरणं वत्सतरी-
चतुष्टययुक्तं वृषमिति चाभिलप्य उत्सर्गः सङ्क-
ल्पते।" इति वृषोत्सर्गतत्त्वम्॥ इदं सोप-
करणमामान्ननैवेद्यममुकदेवतायै नमः। इति
च पूजापद्धतिः ॥
सोपकारः, त्रि, उपकारविशिष्टः। उपकारेण
सह वर्त्तमान इति बहुव्रीहिसमासे कृते सह-
शब्दस्य सादेशेन निष्पन्नः ॥
सोपधं, त्रि, (उपधया सह वर्त्तमानमिति।)
सच्छद्मदानादि। यथा हारीतः। अथासद्व्य-
दानमस्वर्ग्यं यच्च दत्त्वा परितप्यते। तच्चदान-
मफलं यच्चोपकारिणे ददाति तच्चार्त्तं परि-
क्लिष्टं यच्च सोपधं ददाति अन्यथावितमल्पं
यच्चापात्राय ददाति अनिष्टदानं स्रवति यच्च
दत्त्वा प्रकीर्त्तयते अयदानं यच्चाश्रद्धया ददाति
क्रोधाद्राजसं यच्चाक्रुश्य ददाति दत्त्वा वाक्रो-
शति असत्कृतं पैशाचं यच्चावज्ञातं ददाति
दत्त्वा चावजानीते सुमूर्षोस्तामसं यच्चाप्रकृतौ
ददाति। एते दानोपसर्गा यैरुपसृष्टं दान-
मप्रसिद्धमस्वर्ग्यं भयशस्यमध्रुवफलं भवत्यल्पफलं
वेति। तर्हि त्यागानन्तरकाले हस्तार्पणमभावे-
ऽपि अदानममसर्पणम्। उपकारिणे व्यसनो-
पकारिणे। तच्चार्त्तं यथोक्तोपकरणरहितम्।
सोपधं सच्छद्म। अन्यथावितं लोकसम्भाव-
नार्थं प्रकाशितम्। अनिष्टदानं स्रवदे दानम्।
अयो मानभङ्गः। अप्रकृतौ भयादिमान्। इति
शुद्धितत्त्वम् ॥
सोपप्लवः, पुं, (उपप्लवेन सह वर्त्तमानः।) राहु-
ग्रस्तः चन्द्रः सूर्य्यश्च। इत्यमरः। १। ४। १०॥
सोपवासः, त्रि, (उपवासेन सह वर्त्तमानः।)
उपवासविशिष्टः। यथा,—
"मत्स्यांस्तु कामतो जग्ध्वा सोपवासस्त्र्यहं वसेत्॥"
इति तिथ्यादितत्त्वे याज्ञवल्क्यवचनम् ॥
सोपाकः, पुं, श्वपाकः। इति केचित्। (चण्डालात्
पुक्कस्यां समुत्पन्नोऽन्त्यजजातिविशेषः। यथा,
मनुः। १०। ३८।
"चण्डालेन तु सोपाको मूलव्यसनवृत्तिमान्।
पुक्कस्यां जायते पापः सदा सज्जनगर्हितः॥")

तस्य राहुग्रासकारणं यथा,—

ब्रह्मोवाच ।

"इदन्तु वदते सोमो वाक्यमेतन्महामते ।

[illegible]

सर्वाश्चादयते राहुरम्बरस्थौ शशिभास्करौ ।
राहुरम्बकसंस्थानः सोममाच्छाद्य तिष्ठति ॥
उद्भूय पार्थिवीं छायां धूममेव दृशोत्थितः ।
चन्द्रस्य यद्ग्रहणं राहुणा भास्करस्य च ॥
तदावखण्डितं तस्य केवलं श्यामलीकृतम् ।
कर्द्दमेन यथा वस्त्रं शुक्लमप्युपलभ्यते ॥
एकदेशेऽथ सर्व्वे वा राहुणा चन्द्रमास्तथा ।
प्रक्षालितं तदेवेह पुनः शुक्लतरं भवेत् ॥
राहुयुक्तं भवेत्तद्वत् निर्म्मलं चन्द्रमण्डलम् ।
राहुणाच्छादितौ वापि दृष्टा चन्द्रदिवाकरौ ॥
विप्राः शान्तिपरा भूत्वा पुनराप्याययन्ति तम् ।
दर्शं न त्यजते सूर्य्यचन्द्रमास्तथ त्यजते ॥
चक्षुभ्यां न पश्यन्ति मानुषा मांसचक्षुषः ।
तत्तमसोऽन्यदेतत् ग्रहणं चन्द्रसूर्य्ययोः ॥"
इति देवीपुराणे ग्रहणविशेषनामाध्यायः ॥

सोमचर, पु, (सोमस्य चन्द्रस्य चयो यत्र ।) चमारम्भा । इति महाभारते दानधर्म्मः ॥

सोमगर्भ, पुं (सोमः चमृतं तदद्भुतो गर्भे यस्य ।) विष्णु । इति त्रिकाण्डशेषः ॥

सोमज,क्लो (सोमात् जायते इति । जन+डः ।) दुग्ध । इति हेमचन्द्रः ॥ चन्द्रजाते, त्रि ॥

सोमतीर्थ,क्ली,(सोमेन कृतं तीर्थम् ।) प्रभासतीर्थम् । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । ३ । ८३ । १८ ।

"ततो गच्छेत राजेन्द्र सोमतीर्थं समाविशेत् ।
स्नात्वा फलमवाप्नोति राजसूयस्य मानवः ॥")

तस्य विवरणं यथा,—

"यत्र तत्र तपस्तप्तं सोमेन सुमहात्मना ।
[illegible]

[illegible]

सम चैवप्रभावेण सृगाली मानुषी
रूपवती गुणवती चतुःषष्टिकलान्विता ॥"

सोमधारा, स्त्री, (सोमस्य धारेव ।)
इति त्रिकाण्डशेषः ॥

सोमपः,पुं,(सोमं पिबतीति । पा+कः ।)
पीतसोमलतारसः । तत्पर्य्यायः ।
इत्यमरः । २ । ७ । ८ ॥ सोमपाः १ ।
तट्टीका ॥ (यथा, गीतायाम् । ९ । २० ।

"त्रैविद्या मां सोमपाः पूतपापा
यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते ॥")

सोमपत्र, पुं, (सोमस्य पत्रमिव पत्रमस्य ।) तृणविशेषः । धलु घड़ इति भाषा । यथा

"दर्भः पुरश्छदः गर्भः सोमपत्रः
इति शब्दचन्द्रिका

दर्भशब्देऽस्य गुणादयो ज्ञातव्याः ॥

सोमपाः, पुं, (सोमं पिबतीति । पा+क्विप् ।) यज्ञे सोमलतारसपानकर्त्ता । इत्यमरः । २ । ७ । ८ ॥ (सोमरसपानकर्त्तरि, त्रि । यथा, भागवते । ३ । ३२ । ३ ।

"तच्छ्रद्धयाक्रान्तमतिः पितृदेवव्रतः ।
गत्वा चान्द्रमसं लोकं सोमपाः पुनरेष्यति ॥")

सोमपीती, [न्] पुं, (सोमस्य पीतं पानमस्यास्तीति । इनि ।) सोमपः । इत्यमरः । २ । ७ । ९ ॥ (वाच्यलिङ्गेऽपि दृश्यते । यथा, महाभारते । १ । १ । १४५ ।

"सोमस्यमपि चाप्याथ चाश्विनौ
शर्य्यातियज्ञे नासत्यौ कृतवान्
तस्य कृपालयं सोमपीथो । सोमपीथी । इति
केचित् ॥

सोमबन्धु, पु, (सोमो बन्धुर्यस्य ।) कुमुदं । इति शब्दरत्नावली ॥ सूर्य्यः । बुधः । यथा,

"मित्रादि मर्य्याच्चसिभौमसौरा
सूर्य्येन्दुजौ सूर्य्यगणाङ्कशौराः ।
चादित्यसूनौ रविचन्द्रभौमा
बुधार्क्कजौ चन्द्रभार्गवौ च ॥"
इति ज्योतिषतत्त्वम् ।

सोमभू, पुं, (सोमात् भूरुत्पत्तिर्यस्य ।) जिनराजभेदः । इति हेमचन्द्रः ॥ बुधश्च । चन्द्रपुत्रवान् । सोमवंशोद्भवे त्रि ॥

सोमयाग,पु,(सोमाख्यो यागः ।) सोमरसपानाद्यर्थं यागविशेषः । [illegible]

[illegible]

देवो वा यागं कर्त्तुमलं मुने ।
यो यज्ञोऽयं बहन्नो वहुदक्षिणः ॥"
वर्त्ते श्रीकृष्णजन्मखण्डे ।६०।५४-५८॥
[न्] पुं, (सोमेन यजते इति । यज
ः ।) सोमयागकर्त्ता ॥
, स्त्री, (सोमो योनिर्यस्य ।) चन्दन-
ः । यथा,—
तलं चन्दनं यत् तैलपर्णिकमुच्यते ।
तु तस्य पर्य्यायौ सोमयोनि शिलोद्भवम् ॥"
इति शब्दचन्द्रिका ॥
राजिका, स्त्री, (सोमराजी एव । स्वार्थे
न् ।) सोमराजी । इतिशब्दरत्नावली ॥
मराजी, [न्] पुं, सोमेन सोमवद्वा राजते
इति । राज + णिनिः ।) ओषधिविशेषः ।
सोमराज इति हाकुच इति च भाषा । तत्प-
र्य्यायः । अवल्गुजः २ सुवल्लिः ३ सोमवल्लिका
४ कालमेषी ५ कृष्णफला ६ वाकुची ७ पूति-
फली ८ । इत्यमरः । २ । ४ । ८६ ॥ सोमराजी
९ सुवल्ली १० सोमवल्लिः ११ कालमेषी १२ ।
इति भरतः ॥ सोमवल्ली १३ वागुजी १४ वाकुजी
१५ कालमेषिका १६ सोमराजिका १७ ।
इति शब्दरत्नावली ॥ अन्यच्च ।
"वागुजी चन्द्रलेखा स्यात् सोमराजी त्ववल्-
गुजा ।
कृष्णा पूतिफला कुष्ठनाशिनी सा सिता परा ॥"
इति रत्नमाला ॥
स्य गुणाः । वातकफकुष्ठत्वग्दोषनाशित्वम् ।
इति राजवल्लभः ॥ अपि च ।
"अवल्गुजी वाकुची स्यात् सोमराजी सुप-
र्णिका ।
शशिलेखा कृष्णफला सोमा पूतिफलीति च ॥
सोमवल्ली कालमेषी कुष्ठघ्नी च प्रकीर्त्तिता ।
वाकुची मधुरा तिक्ता कटुपाका रसायनी ॥
विष्टम्भहृद्धिमा रुच्या सरा श्लेष्मास्रपित्तनुत् ।
रूक्षा हृद्या श्वासकुष्ठमेहज्वरकृमिप्रणुत् ॥
तत्फलं पित्तलं कुष्ठकफानिलहरं कटु ।
केश्यं त्वच्यं कृमिश्वासकासशोथामपाण्डुहृत् ॥"
इति भावप्रकाशः ॥
राजनिर्घण्टोक्तगुणपर्य्यायौ वाकुचीशब्दे द्रष्टव्यौ ।
सोमराजी, स्त्री, (सोमेन राजते इति । राज-
टीका + अच् । गौरादित्वात् ङीष् ।) वाकुची ।
इत्यमरटीकायां भरतः । २ । ४ । ८६ ॥ (यथा,
वृहत्संहितायाम् । ४४ । १० ।
"श्वेतां सपूर्णकोशां
कटम्भरावायमाणसहदेवीः ।
नागकुसुमं स्वगुप्तां
शतावरीं सोमराजीञ्च ॥")
षड्क्षरच्छन्दोविशेषः । यथा,—
"इदं सोमराजीसमा ते यशः श्रीः ।
[illegible]

सोमरोगः, पुं, स्त्रीरोगविशेषः । यथा,—
अथ सोमरोगाधिकारः ।
तत्र सोमरोगस्य निदानपूर्व्विकां सम्प्राप्तिमाह ।
"स्त्रीणामतिप्रसङ्गेन शोकाच्चापि श्रमादपि ।
अतिसारकयोगाद्वा गरयोगात्तथैव च ॥
आपः सर्व्वशरीरस्थाः क्षुभ्यन्ति प्रस्रवन्ति च ।
तस्यास्ताः प्रच्युताः स्थानान्मूत्रमार्गं व्रजन्ति
हि ॥"
अथ तस्य लक्षणमाह ।
"प्रसन्ना विमला शीता निर्गन्धा नीरुजः सिताः ।
स्रवन्ति चातिमात्रं ताः सा न शक्नोति दुर्ब्बला ॥
वेगं धारयितुं तासां न विन्दति सुखं क्वचित् ।
शिरःशिथिलता तस्या मुखं तालु च शुष्यति ॥
मूर्च्छा जृम्भा प्रलापश्च त्वग्रूक्षा चातिमात्रतः ॥
भक्ष्यैर्भोज्यैश्च पेयैश्च न तृप्तिं लभते सदा ॥
सन्धारणाच्छरीरस्य ता आपः सोमसंश्रिताः ।
ततः सोमक्षयात् स्त्रीणां सोमरोग इति स्मृताः ॥"
अथ सोमरोगस्य चिकित्सा ।
"कदलीनां फलं पक्वं धात्रीफलरसं मधु ।
शर्करासहितं खादेत् सोमधारणमुत्तमम् ॥१॥
माषचूर्णं समधुकं विदारीं मधुशर्कराम् ।
पयसा पाययेत् प्रातः सोमधारणमुत्तमम् ॥२॥
स एव सरुजः सोमः स्रवेन्मूत्रेण चेन्मुहुः ।
तत्रैलापत्रचूर्णेन पाययेत्तरुणीं सुराम् ॥३॥
जलेनामलकीवीजकल्कं समधुशर्करम् ।
पिवेद्दिनत्रयेणैव श्वेतप्रदरनाशनम् ॥ ४ ॥
तक्रोदनाहाररता संपिवेन्नागकेशरम् ।
त्र्यहं तक्रेण संपिष्टं श्वेतप्रदरनाशनम् ॥"५॥
तत्रैव मूत्रातीसारस्य लक्षणं चिकित्साञ्चाह ।
"सोमरोगे चिरं जाते यदा मूत्रमतिस्रवेत् ।
मूत्रातिसारं तं प्राहुर्बलविध्वंसनं परम् ॥
तालकन्दञ्च खर्ज्जूरं मधुकञ्च विदारिकाम् ।
सितामधुयुतां खादेत् मूत्रातीसारनाशनम् ॥१
चक्रमर्द्दकमूलन्तु संपिष्टं तण्डुलाम्बुना ।
प्रभातसमये पीतं जलप्रदरनाशनम् ॥"२॥ इति
इति सोमरोगे मूत्रातिसाराधिकारः । इति
भावप्रकाशः ॥ (तथाचास्य चिकित्सोपयोगि-
वटिकौषधं यथा,—
"कर्षं जारितलौहस्य तदर्द्धं रसगन्धकम् ।
एलापत्रं निशायुग्मं जम्बुवीरणगोक्षुरम् ॥
विडङ्गं जीरकं पाठा धात्रीदाड़िमटङ्कणम् ।
चन्दनं गुग्गुलुं लोध्रशालाञ्जुगरसाञ्जनम् ॥
छागीदुग्धेन वटिकां कारयेद्गर्दलिकाम् ।
निर्म्मितो नित्यनाथेन सोमनाथरसस्त्वयम् ॥
सोमरोगं बहुविधं प्रदरं हन्ति दुर्ज्जयम् ।
योनिशूलं मेढ्रशूलं सर्व्वाङ्गं चिरसाधनम् ।
बहुमूत्रं विशेषेण दुर्ज्जयं हन्त्यसंशयः ॥"
इति सोमनाथरसः ॥
इति वैद्यकरसेन्द्रसारसंग्रहे सोमरोगाधिकारे ।)
सोमलता, स्त्री, (सोम एव लता ।) स्वनाम-
ख्याता लता । तत्पर्य्यायगुणाः ।
"सोमवल्ली सोमलता सोमा क्षीरी द्विजप्रिया ।

सोमवल्ली त्रिदोषघ्नी कटुस्तिक्ता रसायनी ॥"
इति भावप्रकाशः ॥
अपि च ।
"सोमवल्ली महागुल्मा यज्ञश्रेष्ठा धनुर्लता ।
सोमार्हा गुल्मवल्ली च यज्ञवल्ली द्विजप्रिया ।
सोमक्षीरा च सोमा च यज्ञाङ्गा रुद्रसंख्यया ॥
सोमवल्ली कटुः शीता मधुरा पित्तदाहहृत् ।
कृष्णा विशोषशमनी पावनी यज्ञसाधनी ॥"
इति राजनिर्घण्टः ॥
सोमलतिका, स्त्री, (सोमलतेव । इवार्थे कन् ।)
गुड़ूची । इति राजनिर्घण्टः ॥
सोमवंशः, पुं, (सोमस्य वंश उत्पत्तिस्थानत्वेना-
स्त्यस्य ।) युधिष्ठिरराजः । इति धरणिः ॥
(सोमस्य वंशः ।) चन्द्रसन्तानः । तद्विवरणं यथा,
हरिरुवाच ।
"सूर्य्यस्य कथितो वंशः सोमवंशं शृणुष्व मे ।
नारायणसुतो ब्रह्मा ब्रह्मणोऽत्रिसमुद्भवः ॥
अत्रेः सोमस्तस्य भार्य्या तारा सुरगुरोः प्रिया ।
सोमात्तस्यां वुधो जज्ञे वुधपुत्रः पुरूरवाः ॥
वुधपुत्रादथोर्व्वश्यां षट् पुत्रास्तु श्रुतायुषः ।
विश्वावसुः शतायुश्च आयुर्धीमानमावसुः ॥
अमावसोरभूद्भीमो भीमपुत्रश्च काञ्चनः ।
काञ्चनस्य सुहोत्रोऽभूत् जह्नुश्चाभूत् सुहोत्रतः ॥
जह्नोः सुमन्तुरभवत् सुमन्तो रूपराजकः ।"
रूपराजकस्थाने अपजापकोऽपि पाठः ।
"वलाकाश्वोऽस्य पुत्रोऽभूत् वलाकाश्वात् कुशः
स्मृतः ॥
कुशाश्वः कुशनाभश्चामूर्त्तरयो वसुः कुशात् ।
गाधिः कुशाश्वात् संजज्ञे विश्वामित्रस्तदात्मजः ।
कन्या सत्यवती दत्ता ऋचीकाय द्विजाय सा ।
ऋचीकादयमदग्निश्च रामस्तस्याभवत् सुतः ॥
विश्वामित्राद्देवरातमधुच्छन्दादयः सुताः ।
[illegible] ॥
आयुषो नहुषः पुत्रस्त्वनेनाराजिरम्भकौ ॥
[illegible] ।
क्षत्रवृद्धः [illegible] सुहोत्रादभवन्नृपः ॥
काश्यकाशगृत्समदाः सुहोत्रादभवंस्त्रयः ॥
काश्यकाशगृत्समदाः [illegible] काश्याद्दीर्घतमास्तथा ।
गृत्समदाच्छौनकोऽभूत् [illegible] धन्वन्तरिस्तस्मात् केतुमांश्च तदात्मजः ।
वैद्यो धन्वन्तरिस्तस्मात् इत्यपि पाठः ।
वैद्यस्थाने [illegible] इत्यपि पाठः ।
भीमरथः केतुमतो दिवोदासस्तदात्मजः ।
दिवोदासात् प्रतर्द्दनोऽभूच्छत्रुजित् सोऽ[illegible]
[illegible]
ऋतध्वजस्तस्य पुत्रो [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

...,त्रि, (सुखेन जीवतीति । सुख + "चेत-
...यो जीवति ।" ४ । ४ । १२ । इति ठक् ।)
...र्थी । सौखीन इति भाषा ॥ (यथा, महा
...ते । १२ । १८ । २३ ।
...यया विहीने रधने त्यक्तामितैरकिञ्चनैः ।
...सौखिकैः सम्भृतानर्थान् यः सन्त्यजति किन्नु
तत् ॥")

सौख्यं, क्ली, (सुखमेव । स्वार्थे ष्यञ् ।) सुखम् । इति
हेमचन्द्रः ॥ यथा, उत्तररामचरिते २ अङ्के ।
"यत्किञ्चिदपि कुर्व्वाणः सौख्यैर्दुःखान्यपोहति ।
तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः ॥"
सुखस्य भावः कर्म्म वा । सुख + ष्यञ् ।) सुख-
त्वम् । सुखस्य भावः इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नम् ॥

सौगतः, पुं, (सुगत एव । स्वार्थे अण् ।) बुद्ध-
विशेषः । तत्पर्य्यायः । शून्यवादी २ । इति
हेमचन्द्रः ॥ (यथा, माघे । २ । २८ ।
"सर्व्वकार्य्यशरीरेषु मुक्त्वाङ्गस्कन्धपञ्चकम् ।
सौगतानामिवात्मान्यो नास्ति मन्त्रो महीभृताम् ॥"
सुगतसम्बन्धिनि, सुगतमताध्यायिनि च त्रि ॥)

...तकः, पुं, (सौगतं मतं वेत्तीति । ठक् ।)
...विशेषः । इति केचित् ॥

...न्धं, क्ली, (सुष्ठु गन्धो यस्य । ततः स्वार्थे
...ष्यञ् ।) कत्तृणम् । यथा,—
"सौगन्धिकश्च सौगन्धं रामकर्पूरके तृणे ॥"
इति शब्दरत्नावली ॥

... (पुं, सङ्करजातिविशेषः । यथा, महाभारते ।
१३ । ४८ । २२ ।
"चतुरो मागधी सूते क्रूरान्मायोपजीविनः ।
मांसं स्वादुकरं चौद्रं सौगन्धमिति विश्रुतम् ॥"
शोभनगन्धयुक्ते, त्रि ॥

सौगन्धिकं, क्ली, (सुगन्धोऽस्त्यस्येति । सुगन्ध +
ठन् । ततः स्वार्थे अण् ।) कत्तृणम् । (अस्य
पर्य्यायो यथा,—
"कत्तृणं रौहिषं देवजग्धं सौगन्धिकन्तथा ।
भूतिकं व्यामपौरञ्च श्यामकं धूमगन्धिकम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) पद्म-
कह्लारम् । इत्यमरः । १ । १० । ३६ ॥ पद्म-
रागमणिः । इति मेदिनी ॥ नीलोत्पलम् । इति
राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—
"इन्दीवरं कुवलयं पद्मं नीलोत्पलं स्मृतम् ।
सौगन्धिकं शतदलमस्रं कमलमुच्यते ॥"
इति गारुडे २०८ अध्यायः ॥
यथा, महाभारते । ३ । १५४ । २ ।
"अपश्यत्तत्र पाञ्चाली सौगन्धिकमनुत्तमम् ।
अनिर्देशमितो नूनं मा वहनि परांप्सति ॥")

सौगन्धिकः, पुं, (सौगन्धोऽस्यास्तीति । ठन् ।) सुगन्ध-
गन्धकः । इत्यमरः । २ । ८ । १०२ ॥ गन्धीति हिन्दी
भाषा । इति मेदिनी ॥ ...
[illegible] ...कृमिविशेषः । यथा, "तेषां विष-
[illegible]

अन्नादा उदरादा हृदयादायुरवो दर्भपुष्पाः
सौगन्धिका महागुदाय इति ॥")

सौगन्ध्यं, क्ली, सुगन्धत्वम् । सुगन्धस्य भाव इत्यर्थे
सुगन्धशब्दात् ष्यञ् (यञ्) प्रत्ययेन निष्पन्नम् ॥
(यथा, महाभारते । १ । ६३ । ७८ ।
"एवमुक्ता वरं वव्रे गात्रसौगन्ध्यमुत्तमम् ॥")

सौचिः, पुं, सौचिकः । इति शब्दरत्नावली ॥

सौचिकः, पुं, (सूच्या जीवतीति । सूची + ठक् ।)
सूचीकर्म्मोपजीवी । दरजी इति भाषा । तत्-
पर्य्यायः । तुन्नवायः २ । इत्यमरः । २।१०।६ ॥
सूचिकः ३ सौचिः ४ सूत्रभित् ५ । इति शब्द-
रत्नावली ॥

सौजन्यं, क्ली, (सुजनस्य भावः कर्म्म वा । सुजन
+ ष्यञ् ।) सुजनता । यथा,—
"सौजन्यं वरवंशजन्म विभवो दीर्घायुरारोग्यता
विज्ञत्वं विनयित्वमिन्द्रियवशः सत्पात्रदाने
रुचिः ।
सन्मन्त्री सुसुतः प्रिया प्रियतमा भक्तिश्च
नारायणे
सत्पुरुषे न विना त्रयोदश गुणाः संसारिणां
दुर्लभाः ॥"
इत्युद्भटः ॥
इति शब्दचन्द्रिका ॥

सौण्डी, स्त्री, पिप्पली । इति शब्दचन्द्रिका ॥
(पिप्पलीशब्देऽस्या विशेषो विज्ञेयः ॥)

सौत्रः, पुं, (सूत्रं यज्ञसूत्रमर्हतीति । सूत्र +
अण् ।) ब्राह्मणः । इति हेमचन्द्रः ॥ (सूत्रे
पठितः पाणिन्यादिभिः कर्म्मविशेषायेति ।
अण् ।) नियतप्रयोगाभावधातुविशेषः । यथा,—
"धातूनामिह सौत्राणां द्विचत्वारिंशदीरिताः ॥"
इति कविकल्पद्रुमः ॥
(सूत्रस्येदमित्यण् ।) सूत्रसम्बन्धिनि, त्रि ॥

सौत्रामणी, स्त्री, (सुत्रामा इन्द्रो देवता अस्याः ।
सुत्रामन् + अण् । बहुलवचनात् न टिलोपः ।
ततः स्त्रियां ङीप् ।) यागविशेषः । प्रक्रियत । स
यथ सौत्रामणी विभिरध्यायैः प्रक्रियत ... इति श्रुतः ।
अथ सौत्रामणी ... सौत्रामणीमिति श्रुतः ।
एतं महाक्रतुमपश्यत् सौत्रामणीमिति ... स्वाद्वीन्त्वा
तत्र सुरां सन्धीयते । तत्र मन्त्रः । स्वाद्वीन्त्वा
स्वादुना तीव्रां तीव्रेणामृताममृतेन । मधुमती
मधुमता सृजामि सं सोमेन सोमोऽस्यश्विभ्यां
पचस्व सरस्वत्यै पचस्वेन्द्राय सुत्राम्णे पचस्व ।
सौत्रामण्याः ऋषिः प्रजापतिः । सुरा देवता ।
अनुष्टुप् छन्दः । इति यजुर्व्वेदस्य काण्व-
शाखायाम् २१ अध्यायः ॥ विस्तारस्तु
तत्रैव २१ । २२ । २३ । अध्यायेषु द्रष्टव्यः ।
योगक्रमस्तु कात्यायनसूत्रभाष्ये द्रष्टव्यः ॥ (एव
सुरां पिबन् ब्राह्मणः पतितो न भवति । यदुक्तम्
"सौत्रामण्यां कुमाचारे ब्राह्मणः प्रपिबेत्
सुराम् ।
अन्यत्र कामतः पीत्वा पतितस्तु द्विजो भवेत् ॥"

सौदामनी, स्त्री, (सुदामा मेघः दम्नेती ... ।
"एकदिक् । ... सुदामदिक् ।" ४ । ३ । ११२ ।
इति अण् ।) विद्युत् । इत्यमरः । १ । १ । ८ ॥
(सुदामा ऐरावतस्तस्य स्त्री सौदामनी पत्नी-
त्वेन । ... मनीषादित्वात् । श्वेतद्विपः
सुदामा चेति ऐरावतपर्य्याये त्रिकाण्डशेषः ॥
"खेऽभ्रं जगाम काञ्चन-
सरससौदामनीलताधामास्तम् ।
कुवलयमयमिव सरजः
सरससौदामनीलताधामास्तम् ॥"
इति हरिप्रबोधयमकात् सौदामिनीत्यपपाठ
इति मुकुटः । इति भरतः ॥ * ॥ यथा, महा-
भारते । १ । १७२ । ४२ ।
"ततो लालप्यमानस्य पार्थिवस्यायतेक्षणा ।
सौदामनीव चाभ्रेषु तत्रैवान्तरधीयत ॥")
अप्सरोभेदः । विद्युद्भेदः । इति मेदिनी ॥
(यथा, भागवते । १ । ६ । २८ ।
"एवं कृष्णमतेर्ब्रह्मन्नासक्तस्यामलात्मनः ।
कालः प्रादुरभूत् काले तडित् सौदामनी यथा ॥"
सुदामा माला तत्र भवा सौदामनी माला-
कारा इत्यर्थः । सुदामा पर्व्वतः तेनैकदिगिति
सूत्रेण अण् स्फटिकमयपर्व्वतप्रान्तभागभवा हि
विद्युदतिस्फुटा भवति । इतितट्टीकायां श्रीधर-
स्वामी ॥)

सौदामिनी, स्त्री, विद्युत् । इत्यमरटीका । १।३।८
(यथा, ऋतुसंहारे । ३ । १२ ।
"नष्टं धनुर्बलभिदो जलदोदरेषु
सौदामिनी स्फुरति नाद्य वियत्पताका ।")
तडिद्भेदः । (यथा, महाभारते । ३ । ५३ । १२ ।
"तत्र स्म राजते भैमी सर्व्वाभरणभूषिता ।
सखीमध्येऽनवद्याङ्गी विद्युत् सौदामिनी यथा ॥")
अप्सरोभेदः । इति हेमचन्द्रः ॥ देशविशेष...
इत्यजयः ॥
सौदाम[illegible] ... । इति शब्दरत्नाव...
सौ[illegible] ...भ्यः पितृमातृभर्तृ...
...ते । सुदाय + ठञ् ...
...धनम् । यथा, का...
...वे पत्युः पितृगृहे ...
भर्त्तुः सकाशात् पित्रोर्व्वा लब्धं सौदा...
सौदायिकं धनं प्राप्य स्त्रीणां स्वातन्त्र्य...
यस्मात् तदानृशंस्यार्थं तैर्दत्तं तत्...
सौदायिके सदा स्त्रीणां स्वातन्त्र्यं ...
विक्रये चैव दाने च यथेष्टं स्थाव...
सुदायिभ्यः पितृमातृभर्तृकुलगत...
सौदायिकम् । आनृशंस्यमनेन...
दायतत्त्वम् ॥

सौदासः, पुं, इक्ष्वाकुवंशीयः नृप...
अस्य नामान्तरम् । कल्माष...
सहः २ । इति पुराणम् ॥ ...
भारते । १ । १२२ । २१ ।
"सौदासेन च रक्षोऽपि नियु...
मदयन्ती जनार्णवं ...
...दिव्यमिच्छन्तु ...
...तम् ।)

सौहार्द्दं, क्ली, (सुहृदः सुहृदयस्य वा भावः कर्म्म वा । सुहृत् सुहृदय वा + "हायनान्तयुवादिभ्योऽण् ।" ५ । १ । १३० । इत्यण् । हृदयस्य हृदादेशः । "हृद्भगसिन्ध्वन्ते पूर्व्वपदस्य च ।" ७ । ३ । १९ । इति उभयपदवृद्धिः ।) सुहृदो भावः । तत्पर्य्यायः । सख्यम् २ सौहृदम् ३ साप्तपदीनम् ४ मैत्री ५ अजर्य्यम् ६ सङ्गतम् ७ इति हेमचन्द्रः ॥ (यथा, महाभारते । १ । ७७ । ११ ।
"सौहार्द्दे चानुरागे च वेत्थ मे भक्तिमुत्तमाम् ।
न मामर्हसि धर्म्मज्ञ त्यक्तुं भक्तामनागसम् ॥")

सौहार्द्दः, पुं, (सुहृदोऽपत्यमिति । सुहृद् + अण् ।) सुहृत्पुत्रः । इति केचित् ॥

सौहार्द्यं, क्ली, (सुहृदयस्य भावः । सुहृदय + ष्यञ् । "वा शोकष्यञ्रोगेषु ।" ६ । ३ । ५१ । इति हृदयस्य हृदादेशः ।) सौहार्द्दम् । इति सिद्धान्तकौमुदी ॥

सौहित्यं, क्ली, (सुहितस्य भावः कर्म्म वा । सुहित + "पत्यन्तपुरोहितादिभ्यो यक् ।" ५ । १ । १२८ । इति यक् ।) तृप्तिः । इत्यमरः । २ । ९ । ५६ ॥ (यथा, महाभारते । १२ । २४४ । १२ ।
"चरेदेव सदाहीनः सौहित्याचरकादिव ।
कृपणादिव च सौख्यं देवा ब्राह्मणं विदुः ॥")

सौहृदं, क्ली, (सुहृदः कर्म्म भावो वा । सुहृत् + अण् ।) सख्यम् । सौहार्द्दम् । इति हेमचन्द्रः ॥ तस्य माहात्म्यं यथा,—
"तद्भुङ्क्ते यद्द्विजभुक्तशेषं
स बुद्धिमान् यो न करोति पापम् ।
तत् सौहृदं यत् क्रियते परोक्षे
दम्भैर्विना यः क्रियते स धर्म्मः ॥"
इति गारुडे ११५ अध्यायः ॥

स्कद, इ ङ आप्लवे । उत्प्लुत्य गत्याम् इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) पञ्चमस्वरी । इ, स्कन्द्यते । ङ, स्कन्दते विस्कन्दिषते । पञ्चमस्वरीति धातुप्रदीपरामौ । स्कन्दते स्कुन्दते चापि चराप्लवनवाचिनः । इति भट्टमल्लोऽपि । स्कुन्दिषते । इति दुर्गादासः ॥

स्कन्द,इर् घोर शोषणे । गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-अनिट् ।) इर्, अस्कदत् । अस्कान्त्सीत् । घो, स्कन्ता स्कन्द । इति दुर्गादासः ॥

स्कन्द, त श समाप्लुतौ । इति कविकल्पद्रुमः ॥ (चुरादि०-पर०-सक०-सेट् ।) दन्त्यवर्गपञ्चमोपधोऽयम् । तालव्योपधः इति केचित् । स्कन्दयति स्कन्दापयति पञ्चपञ्चमम् । इति दुर्गादासः ॥

स्कन्दः, पुं, (स्कन्दते स्कन्दति स्कन्दयति दैत्यान् इति स्कन्दति देवान् वा । स्कन्द + अच् ।) कार्त्तिकेयः । इत्यमरः । १ । १ । ४१ । अस्य उत्पत्तिर्यथा, कार्त्तिकेयस्य जन्मवृत्तान्तः पञ्चविंशतितमाध्याये वामने उक्तः यथा,—

नारद उवाच ।
"किमर्थमेषकः क्रौञ्चो भिन्नः स्कन्देन सुव्रत ।
एतन्मे विस्तराद्ब्रह्मन् कथयस्वामितद्युते ॥
पुलस्त्य उवाच ।
एतां ते कथयिष्यामि कथां पुण्यां पुरातनीम् ।
यशोवृद्धिं कुमारस्य कार्त्तिकेयस्य नारद ॥
यत् पीतं शौक्रमेव वीर्य्यं त्यक्तं पिनाकिनः ।
तेनाक्रान्तोऽभवद्ब्रह्मन् मन्दतेजा हुताशनः ॥
ततो जगाम देवानां सकाशममितद्युतिः ।
देवतैः प्रहितस्तूर्णं ब्रह्मलोकं जगाम ह ॥
स गच्छन् कुटिलां देवीं ददर्श पथि पावकः ।
तां दृष्ट्वा प्राह चाधत्स्व तेजो यत्तम दुर्द्धरम् ॥
महेश्वरेण सन्त्यक्तं निर्दहेत् भुवनान्यपि ।
तद्धारयाश्व कुटिले पुत्त्रो धन्यो भविष्यति ॥
इत्यग्निना सा कुटिला श्रुत्वा सुतमनुत्तमम् ।
प्रक्षिप्तमात्रं जग्राह तेज ऐशं महापगा ॥
ततस्त्वधारयद्देवी शार्व्वं तेजः स्वपूरुषत् ।
हुताशनोऽपि च भयात् यत्र तत्र परिभ्रमन् ॥
पञ्चवर्षसहस्राणि ध्यायस्तं हव्यभुक् ततः ।
मांसमस्थीनि रक्तानि मेदोमज्जस्त्वचस्तथा ॥
रोमाणि चाक्षिकेशाद्याः सर्व्वं जाता हिरण्मयाः ।
हिरण्यरेता लोकेऽस्मिन् विख्यातः पावकस्तदा ॥
पञ्चवर्षसहस्राणि कुटिला ज्वलनोपमम् ।
धारयन्ती तदा गर्भं ब्रह्मणः स्थानमागता ॥
पितामहस्तां चौषाढ्यां सन्तप्यन्तीं महापगाम् ।
दृष्ट्वा पप्रच्छ केनायं तव गर्भः समाहितः ॥
सा चाह शाङ्कर तेजः पावकेन समर्पितम् ।
अप्यगस्त्येन तेनाद्य निक्षिप्तं मयि सत्तम ॥
पञ्चवर्षसहस्राणि धारयन्त्याः पितामह ।
वर्द्धमानादिकमपि न भेऽपश्यत कथञ्चित् ॥
तच्छ्रुत्वा भगवानाह गच्छ त्वमुदयं गिरिम् ।
तत्रास्ति योजनशतं विस्तीर्णं सुरसेवितम् ॥
तमनुप्राप्य सुश्रोणि विस्तीर्णं गिरिसानुनि ।
दशवर्षसहस्रान्ते ततो बालो भविष्यति ॥
ब्रह्मणो वचनं श्रुत्वा कुटिला गिरिमागता ।
आगत्य गर्भं तत्याज सुखेनैवाद्रिनन्दिनी ॥
सा तु संत्यज्य तं बालं ब्रह्माणं सहसागमत् ।
आपोमयी मन्त्रबलात् संयता कुटिला सती ॥
तेजसा चापि शार्व्वेण रौक्मः शरवणोऽभवत् ।
तद्विशामरतस्तत्र पादपा मृगपक्षिणः ॥
ततो दशसु पूर्णेषु शरत्सु अर्कसन्निभः ।
बालार्कदीप्तिः सञ्जातो बालः कमललोचनः ॥
उत्तानशायी भगवान् दिव्ये शरवणे स्थितः ।
मुखेऽङ्गुष्ठं समाक्षिप्य रुरोद घनराडिव ॥
एतस्मिन्नन्तरे देव्यः कृत्तिकाः षट् सुतेजसः ।
ददृशुः स्वेच्छया यान्त्यो बालं शरवणे स्थितम् ॥
कृपायुक्ताः समाजग्मुर्यत्र स्कन्दः स्थितोऽभवत् ।
अहं पूर्व्वमहं पूर्व्वं तस्मै स्तन्यं हि चक्रुः ॥
विवदन्त्यो न ताः दृष्ट्वा षण्मुखः समपादयत् ।
षड्भिरास्यैः स्तन्यं पपौ ताभिः संलालितः
कृत्तिकाः ॥
ध्रियमाणः सतीभिस्तु बालो
कार्त्तिकेय इति ख्यातो जातः
एतस्मिन्नन्तरे ब्रह्मन् पावकं प्राह पद्मभू
क्रियमाणः पुत्त्रस्ते वर्त्तते साम्प्रतं गुहः
स तद्वचनमाकर्ण्य अजानन् तं
प्रोवाच पुत्त्रं देवेश न वेद्मि कतमो गुहः
तं प्राह भगवान् शुक्रं तेजः पीतं
त्र्यम्बकं त्रिलोकेशं जातः शरवणे शिशुः ।
श्रुत्वा पितामहवचः
उदयाद्रिस्थ कुटिला तं ददर्श हिते रता ।
पप्रच्छ कुटिला देवी क एष वदत
सोऽब्रवीत् पुत्त्रस्त्वयं जातं शरवणे शिशुम्
साब्रवीत्तनयो मह्यं ममेत्याह च पावकः ।
विवदन्तौ ददर्शाथ स्वैरच्छाचारी जनार्दनः
तौ पप्रच्छ किमर्थं वा विवादमिह चक्रतु
तमूचतुः पुत्त्रहेतो रुद्रशुक्रोद्भवादिति ॥
तावुवाच हरिर्देवो गच्छतं त्रिपुरान्तकम् ।
स यद्वक्ष्यति देवेशः कुरुतं तदसंशयम् ॥
इत्युक्तौ वासुदेवेन
समभ्येत्योचतुस्तथ्यं कस्य पुत्त्रो भवेद्गुहः
रुद्रस्तद्वाक्यमाकर्ण्य हर्षनिर्भरमानसः ।
दिष्ट्या दिष्ट्येति गिरिजां
ततोऽम्बिका प्राह हरं देव गच्छाव तं
दृष्ट्वा समागमिदर्या स तस्याः पुत्त्रो भविष्यति
बाढमित्येव भगवान् समुत्तस्थौ वृषध्वजः ।
सहोमया कुटिलया पावकेन च धीमता ।
सम्प्राप्तास्ते शरवणं हरोमाकुटिलानलाः ।
ददृशुः शिशुकं तत्र कृत्तिकोत्सङ्गशायिनम् ॥
ततः स बालकस्तेषां मत्वा
योगी चतुर्म्मूर्त्तिरभूत् षण्मुखः स
कुमारः शङ्करमगात् विशाखो
कुटिलामगमच्छाखो
ततः प्रीतियुतो रुद्रः उवाच कुटिला तथा ।
पावकश्चापि देवेशः परां मुदमवाप च ॥
ततोऽब्रुवन् कृत्तिकास्ताः षण्मुखः किं हरा
ऽत्र ।
ता अब्रवीत् हरः प्रीत्या विधेयं वचनं मुदे ।
नाम्ना तु कार्त्तिकेयेति युष्माकञ्च भवत्वसौ ।
कुटिलायाः कुमारेति पुत्त्रोऽयं भविताव्यय ।
स्कन्द इत्येव विख्यातो गौरीपुत्त्रो भवत्वसौ ।
गुह इत्येव नाम्ना च ममासौ तनयः स्मृतः ।
महासेन इति ख्यातो हुताशस्यास्तु पुत्त्रकः ।
सारस्वत इति ख्यातः सुतः शरवणस्य च ।
एवमेव महायोगी पृथिव्यां ख्यातिमेष्यति ।
षडास्यत्वान्महाबाहुः षण्मुखो नाम गीयते ।
इत्येवमुक्ता भगवान् शूलपाणिः पितामहः ।
सस्मार दैवतैः सार्द्धं तेऽप्याजग्मुस्त्वरान्विताः ।
प्रणिपत्य च कामारिं प्रणम्य गिरिनन्दिनीम् ।
दृष्ट्वा हुताशनं प्रीता कुटिलां कृत्तिकास्तथा ।
ददृशुः षण्मुखं बालं षण्मुखं दर्पनिर्म्मितम् ।
मुक्ताफलमिव पद्मस्य देवानां चक्षुरेव च ॥
कौतुकाभिवृता सर्व्वे षण्मुखं हुताशनः ।

तया देव कृतं देव्याग्निना तथा ॥
व्रजामोऽद्य तीर्थमीजमसव्ययम् ।
एषैव सरस्वत्यामभिषिञ्चाम परमुखम् ॥
तथाः पतिरस्त्वेष देवगन्धर्व्वकिन्नराः ।
रिपुं घातयत्वेष तारकञ्च सुदारुणम् ॥
सार्द्धमिप्यब्रवीच्छ्र्व्वः समुत्तस्थुः सुरास्ततः ।
सहिता जग्मुः कुरुक्षेत्रं महाफलम् ॥
देवताः सेन्द्रा रुद्रब्रह्मजनार्द्दनाः ।
अभिषेकार्थं चक्रुर्मुनिगणैः सह ॥
ततोऽम्बुना सप्तसमुद्रवाहिनी-
नदीजलेनापि महाफलेन ।
तथौषधीभिश्च महत्समूर्त्तिभि-
स्तदाभ्यषिञ्चन्त हरात्मजाताः ॥
अभिषिञ्चति सेनान्यां कुमारं दिव्यरूपिणि ।
[illegible]पतयो नन्दुघाक्षरोगणाः ॥
[illegible] कुमारञ्च गिरिपुत्री निरीक्ष्य हि ।
[illegible] स्कन्दं मूर्द्धाजिघ्रन्मुहुर्मुहुः ॥
[illegible] कार्त्तिकेयस्य अभिषेकार्द्रमाननम् ।
[illegible] यथेन्द्रस्य देवमातादितिः पुरा ॥
[illegible] तनयं दृष्ट्वा शर्व्वो मुदं ययौ ।
[illegible] कृत्तिकाश्चैव कुटिला च यशस्विनी ॥
[illegible] हरः सैनापत्ये गुहस्य तु ।
[illegible] प्रादात्कामतुल्यपराक्रमान् ॥
[illegible] लोहिताक्षं नन्दिषेणं सुदारुणम् ।
[illegible] कुमुदमालिनम् ॥
[illegible] गणान् दृष्ट्वा देवाः स्कन्दस्य नारद ।
[illegible] प्रददावन्यान् सर्व्वे ब्रह्मपुरोगमाः ॥
[illegible] प्रादाद्विष्णुः प्रादात् गणत्रयम्
[illegible] पराक्रमम् ॥
[illegible]

गणाः पञ्चदशैते वै यक्षेन्द्रस्त्वा गुहस्य च ।
कालिन्द्याः कलकन्दञ्च नर्म्मदाया रणोत्कटः ।
गोदावर्य्याः सिद्धपात्रस्तमसायास्तु पङ्कजः ॥
सहस्रबाहुः सीताया वञ्जुलायाः सितोदरः ।
मन्दाकिन्याः सुबाहुञ्च विपाशायाः प्रियङ्करः ॥
ऐरावत्याश्चतुर्दंष्ट्रः षोड़शाक्षोऽपरस्तथा ।
मार्ज्जारं कौशिकी प्रादात् क्रथक्रौञ्चौ च
गौतमी ॥

बाहुदा शतशीर्षञ्च बाहा गोनन्दनन्दिनी ।
भीमं भीमरथी प्रादात् दुर्गारिं मरयुर्ददौ ॥
अष्टबाहुं ददौ काशी सुबाहुमपि गण्डकी ।
महानन्दी चित्रदेवं चित्रा चित्ररथं ददौ ॥
कुहुः कुवलयं प्रादात् मधुवर्णं मधूदका ।
जम्बूकं धूतपापा च वेणा श्वेताननं ददौ ॥
श्रुता प्रथमपर्णञ्च रेवा सागरवेगिनम् ।
प्रभावा पाशजं प्रादात् काञ्चना कनकप्रभम् ॥
[illegible] विमला चारवक्त्रं मनोहरा ।
[illegible] महारावं वेणा विद्रुमसुप्रभम् ॥
[illegible] शिप्रा सौवर्णी ददौ ।
[illegible] विशाला च सरस्वत्या ददुर्गणान् ।
[illegible]

प्रादाद्वै कार्त्तिकेयाय सर्व्वपापविमोचनः ॥
मात्तानिकां विकलिकां चमुकां खरवासिनी
ललेश्वरी कुक्कुटिका सुदामा लोहमेखला ॥
वपुष्मत्युल्मुकाक्षी च केकनामा महाशनी ।
रौद्रा भूभूषिका तुम्रा श्वेततीर्था ददौ त्रिमाः ॥
एतानि भूतानि गणाय मातरौ
दृष्ट्वा महात्मा विनतातनूजः ।
ददौ मयूरं स्वसुतं महाबलं
तथारुणस्ताम्रचूड़मुत्तमम् ॥
शक्तिं हुताशोऽदितिना तु चक्रं
दण्डं गुरुः सा कुटिला कमण्डलुम् ।
मालां हरिः शूलधरः पताकां
कण्ठे च हारं मघवाङ्गुरस्याः ॥
[illegible]
[illegible]

नदीतटम्। पण्डितः। इति केचित्॥ बालकस्य ग्रहविशेषः। (यथा,—
"स्कन्दो विशाखो मेषाख्यः श्वग्रहः पितृसंज्ञितः।
शकुनिः पूतना शीतपूतना दृष्टिपूतना॥
मुखमण्डलिका तद्वद्रेवती शुष्करेवती।
तेषां ग्रहीष्यतां रूप प्रततं रोदनं ज्वरः॥
सामान्यं रूपमुत्त्रासजृम्भाभ्रूक्षेपदीनताः।
फेनस्रावोर्द्ध्वदृष्ट्योष्ठदन्तदंशप्रजागराः॥
रोदनं कूजनं स्तन्यविद्वेषस्वरवैकृतम्।
नखैरकस्मात् परितः स्वधात्र्यङ्गविलेखनम्॥
तत्रैकनयनस्रावी शिरो विक्षिपते मुहुः।
हतैकपक्षः स्तब्धाङ्गः सस्वेदो नतकन्धरः॥
दन्तखादी स्तनद्वेषी त्रस्यन् रोदिति विस्वरः।
वक्रवक्त्रो वमेल्लालां भृशमूर्द्धं निरीक्षते॥
वसासृग्गन्धिरुद्विग्नो बद्धमुष्टिशकृच्छिशुः।
चलितैकाक्षिगण्डभ्रूः संरक्तो भयलोचनः॥
स्कन्दार्त्तस्तेन वैकल्यं मरणं वा भवेद्ध्रुवम्॥"
इत्युत्तरस्थाने तृतीयेऽध्याये वाभटेनोक्तम्॥)
तस्य चिकित्सा बालग्रहशब्दे द्रष्टव्या॥

स्कन्दनं, क्ली, (स्कन्द + ल्युट्।) रेचनम्। इति त्रिकाण्डशेषः॥ (यथा, सुश्रुते। १। १४।
"चतुर्व्विधं यदेतद्धि रुधिरस्य निवारणम्।
सन्धानं स्कन्दनञ्चैव पाचनं दहनन्तथा॥")
गमनम्। शोषणम्। इति स्कन्दधात्वर्थदर्शनात्॥

स्कन्दषष्ठी, स्त्री, (स्कन्दप्रिया षष्ठी।) चैत्रमासीयशुक्लषष्ठी। तत्प्रमाणादि षष्ठीशब्दे द्रष्टव्यम्॥ अन्यच्च।
"अमावस्यासमुत्पन्नः स्कन्दः पूर्व्वं हुताशनात्।
ततः षष्ठ्यान्तु शुक्लायां मासि तु चैत्रनामनि।
सैनापत्येऽभिषिक्तस्तु देवानां ब्रह्मणा स्वयम्॥"
इति संवत्सरकौमुदीधृतब्रह्मपुराणवचनम्॥

स्कन्दांशकः, पुं, (स्कन्दस्य अंश इव अंशो यत्र। शिववीर्य्योद्भवत्वात्। ततः कन्।) पारदः। इति राजनिर्घण्टः॥

स्कन्धः, [स्] क्ली, (स्कन्द्यते इति। स्कन्द + "स्कन्देश्च स्वाङ्गे।" उणा० ४। २०६। इति असुन् धश्चान्तादेशः।) अंसः। प्रकाण्डः। यथा, "स्कन्धः सान्तं नपुंसकमिति केचित्।" इत्यमरटीकायां भरतः॥ (यथा, ऋग्वेदे। १।३२।५।
"स्कन्धांसीव कुलिशेनाविवृक्णा॥")

स्कन्धः, पुं, (स्कन्द्यतेऽसौ इति। स्कन्द + घञ्। पृषोदरादित्वात् साधुः। स्कन्द + असुन्। धश्चान्तादेशः। सर्व्वे सान्ता अदन्ताश्च इति न्यायात् अकारान्तो वा।) अवयवविशेषः। काँध इति भाषा॥ तत्पर्य्यायः। भुजशिरः २ अंसः ३। इत्यमरः। २। ६। ७८॥ स्कन्धः ४। इति शब्दरत्नावली॥ दोःशिखरम् ५। इति राजनिर्घण्टः॥ (यथा, भागवते। ४। २९। ३३।
"यथा हि पुरुषो भारं शिरसा गुरुमुद्वहन्।
तं स्कन्धेन स आधत्ते तथा सर्व्वाः प्रतिक्रियाः॥")
तरोर्मूलादिशाखापर्य्यन्तम्। गुँड़ी इति भाषा। तत्पर्य्यायः। प्रकाण्डः २। इत्यमरः॥ काण्डम् ३ इति शब्दरत्नावली॥ दण्डः ४। इति जटाधरः॥ (यथा, रघुः। ४। ५७।
"खर्ज्जूरीस्कन्धनद्धानां मदोद्गारसुगन्धिषु।
कटेषु करिणां पेतुः पुन्नागेभ्यः शिलीमुखाः॥")
नृपतिः। सम्परायः। समूहः। कायः। (यथा, महाभारते। १२। १५। २६।
"सूक्ष्मयोनीनि भूतानि तर्कगम्यानि कानिचित्।
पक्ष्मणोऽपि निपातेन येषां स्यात् स्कन्धपर्य्ययः॥")
भद्रादिः। छन्दोभेदः। इति मेदिनी॥ विज्ञानादिपञ्च। (यथा, शिशुपालवधे। २। २८।
"सर्व्वकार्य्यशरीरेषु मुक्ताङ्गस्कन्धपञ्चकम्।
सौगतानामिवात्मान्यो नास्ति मन्त्रो महीभृताम्॥"
"रूपवेदनाविज्ञानसंज्ञासंस्काराः पञ्च स्कन्धाः तत्र विषयप्रपञ्चो रूपस्कन्धः। तज्ज्ञानप्रपञ्चो वेदनास्कन्धः। आलयविज्ञानसन्तानो विज्ञानस्कन्धः। नामप्रपञ्चः संज्ञास्कन्धः। वासनाप्रपञ्चः संस्कारस्कन्धः। एवं पञ्चधा परिवर्त्तमानो ज्ञानसन्तान एवात्मा इति बौद्धाः।" इति तट्टीकायां मल्लिनाथः॥) व्यूहः। इति हेमचन्द्रः॥ (यथा, रघुः। ४। ३०।
"प्रतापोऽग्रे ततः शब्दः परागस्तदनन्तरम्।
ययौ पश्चाद्रथादीति चतुस्कन्धेव सा चमूः॥")
पन्थाः। इति शब्दरत्नावली॥ (यथा महाभारते। ३। २३०। ५५
"तथाब्रवीत् महासेनं महादेवो बृहद्वचः।
सप्तमं मारुतस्कन्धं रक्ष नित्यमतन्द्रितः॥")
ग्रन्थपरिच्छेदः। यथा—
श्रीपार्व्वत्युवाच।
स्कन्धैर्द्वादशभिः प्रोक्तं श्रीमद्भागवतं प्रभो।
शुकस्तच्छ्रावयामास महाराजं परीक्षितम्॥"
इति पाद्मे पातालखण्डे ७१ अध्यायः॥

स्कन्धचापः, पुं, (स्कन्धे चाप इव।) वंशादिनिर्म्मितशिक्याधानम्। तत्पर्य्यायः। विहङ्गिका २। इति हारावली॥

स्कन्धजः, पुं, (स्कन्धात् जायते इति। जन + डः।) शल्लक्यादिः। यथा, हेमचन्द्रे।
"पर्व्वयोनय इक्ष्वाद्याः स्कन्धजाः शल्लकीमुखाः॥"
मुद्राङ्कितहेमचन्द्रे कन्दज इति पाठः॥ (वटः। अस्य पर्य्यायो यथा,—
"वटो रक्तफलः शृङ्गी न्यग्रोधः स्कन्धजो ध्रुवः।
क्षीरी वैश्रवणावासो बहुपादो वनस्पतिः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

स्कन्धतरुः, पुं, (स्कन्धप्रधानस्तरुः।) नारिकेलवृक्षः। इति राजनिर्घण्टः॥

स्कन्धदेशः, पुं, (स्कन्धस्य देशः।) गजस्य स्कन्धः। यत्र हस्तिपक उपविशति। तत्पर्य्यायः। आसनम् २। इत्यमरः॥ स्कन्धमात्रम्। यथा,—
"त्रिपुरारिः स्कन्धदेशे खण्डे कामाङ्गनाशनः॥"
इति भृगुभरतसंवादे माहेश्वरकवचम्॥

स्कन्धफलः, पुं, (स्कन्धे फलमस्य।) ... इति राजनिर्घण्टः॥ उडुम्बरवृक्षः। ... चन्द्रिका॥

स्कन्धबन्धना, स्त्री, (स्कन्धे ... मधुरिका। इति शब्दचन्द्रिका॥

स्कन्धमल्लकः, पुं, (स्कन्धेन मल्ल इव। ... कङ्कपक्षी। इति हेमचन्द्रः॥

स्कन्धरुहः पुं, (स्कन्धात् रोहतीति। रुह ... वटवृक्षः। इति राजनिर्घण्टः॥

स्कन्धवाहः, पुं, (स्कन्धेन वाहयतीति। णिच् + अच्।) शकटादिवाहकवृषः।
"स्कन्धवाहस्तु शकटे शृङ्गी गौरवधूर्त्तिमः ...
इति ...

स्कन्धवाहकः, पुं, (स्कन्धेन वहतीति। ण्वुल्।) शकटादिवाहकवृषः ... स्कन्धिकः २। इति हेमचन्द्रः॥ ... कर्त्तरि, त्रि॥

स्कन्धशाखा, स्त्री, (स्कन्धस्य शाखा।) मुख्यशाखा। तत्पर्य्यायः। शाला २। ... २। ४। ११॥ (यथा, भागवते। ८। ...
"यथा हि स्कन्धशाखानां तरो ...
एवमाराधनं विष्णोः सर्व्वेषामात्मनश्च हि ...

स्कन्धशृङ्गः, पुं, (स्कन्धपर्य्यन्तं शृङ्गमस्य।) महिषः। इति केचित्॥

स्कन्धा, स्त्री, शाखा। लता। इति केचित्॥

स्कन्धाग्निः, पुं, (स्कन्धस्य काण्डस्य ... स्थूलकाष्ठाग्निः। इति त्रिकाण्डशेषः॥

स्कन्धानलः, पुं (स्कन्धस्य ... स्थूलकाष्ठाग्निः। तत्पर्य्यायः। स्थूलकाष्ठधक् इति जटाधरः॥

स्कन्धावारः, पुं, (स्कन्धेन सैन्यसमूहेन व्यूहेन तिना वा आव्रियते इति। आ + वृ + घञ्।) सैन्यस्थितिः। (यथा, रामायणे। ६। ४२। २२।
"एतस्मिन्नन्तरे चक्रुः ...
राजधानी। इति हेमचन्द्रः॥ (यथा, महाभारते। १। १८५। ६।
"ते तु दृष्ट्वा परं तत्र स्कन्धावारञ्च पाण्डवाः ...
कुम्भकारस्य शालायां निवासं चक्रिरे ...
कटकः। इति भूरिप्रयोगः॥

स्कन्धिकः, पुं, (स्कन्धेन वहतीति। स्कन्ध + ठक्।) स्कन्धवाहकवृषः। इति हेमचन्द्रः॥

स्कन्धी, [न्] पुं, (स्कन्धोऽस्यास्तीति। इनि।) वृक्षः। इति रत्नमाला॥ स्कन्धयुक्ते, त्रि॥ (काण्डविशिष्टे, च त्रि। यथा, महाभारते। १२। १५४। ५।
"हिमवन्तं समासाद्य महानासीद्वनस्पतिः।
वर्षपूगाभिसंवृद्धः शाखी स्कन्धी पलाशवान्॥"

स्कन्नं, त्रि, (स्कन्द + क्तः।) च्युतम्। इत्यमरः। ३। १। १०४॥ (यथा, महाभारते। १। ६३। ५८।
स्कन्नमात्रञ्च तद्रेतो वृक्षपत्रे च भूमिपः।
प्रतिजग्राह मिथ्या मे न पतेद्रेत इत्युत॥")
शुष्कम्। गतम्। इति स्कन्दधात्वर्थदर्शनात्॥

[illegible]

"[illegible] कुर्दितकूर्दन"

[illegible]

[illegible] इति [illegible]

[illegible]

"[illegible]

[illegible] महाकृष्णवर्णाधिनः ।"

इति भरतः ।

[illegible] इति [illegible] । [illegible] इति स्वा-[illegible] । इति दुर्गादासः ॥

स्कुन्द, ङ आप्रवणे । लम्फे । उत्प्लुत्य गमनम् । इति कविकल्पद्रुमः ।(भ्वा०-आत्म०-सक०-सेट् ।) "स्कन्दमानाविति धातुप्रदीपपाठो ।

"स्कुन्दने स्पन्दने चापि यद्यप्युभयपाठिनः ।"

इति भरतसेऽपि ।

कुन्दमिच्छति ।" इति दुर्गादासः ॥

स्कुभ, श म उ रोधने । इति कविकल्पद्रुमः ॥ (क्र्या०-स्वा०-पर०-सक०-सेट् । क्त्वावेट् ।) दन्त्यादिः । पवर्गतृतीयान्तः । श, स्कुभ्नाति । म, स्कुभ्नोति । उ, स्कुभित्वा स्कुब्ध्वा । रोधनमावरणम् । इति दुर्गादासः ॥ सौत्रधातुरयम् ॥

स्कोटिका, स्त्री, पक्षिविशेषः । यथा,—

अथ मयूरी ।

"दापुसिका काष्ठनिका सुलिकास्कोटिके समे ॥"

इति त्रिकाण्डशेषः ॥

स्खद, म ष ङ विदारे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) म, स्खदयति । उपसर्गात् परस्य तु वा शम यम फण इत्यादिना वा ह्रस्वः । प्रस्खदति प्रस्खादयति । अव परिभ्यां उपसर्गात् परस्य घटादित्वं नास्ति इति ज्ञातव्याख्याः । तथैव अवखादि अव इति भीमः । प्रस्खादयति अवस्खादयति परिस्खादयति । अपपरिभ्यां परस्य घटादित्वं नास्तीति सीमराख्याः । अपस्खादयति परिस्खादयति प्रस्खदयति । स्खदद स्खदने इति प्राचः । स्खदनं स्थैर्य्यमिति विलोचनरामौ । पाटनमिति गोविन्दः । क्लेशोत्पादनमिति गोयीचन्द्रः । हिंसेति रमानाथः । इति दुर्गादासः ॥

स्खदनं, क्ली (स्खद+ल्युट् ।) विदारणम् । इति स्खदधात्वर्थदर्शनात् ॥ स्थैर्य्यम् । पाटनम् । क्लेशोत्पादनम् । हिंसा । इति कविकल्पद्रुमटीकायां दुर्गादासः ॥

[illegible] इति कविकल्पद्रुमः ॥

[illegible] ॥) स्ति, [illegible] ।

"[illegible]

[illegible] ।"

इति दुर्गादास ॥

स्तनकं, क्ली, (स्तन+स्वार्थे कन् ।) स्तनम् । [illegible] । इत्यमरः ।१।०।२६ ॥ [illegible] । इति हेमचन्द्रः । (यथा, कुमारे । ४ । २४ ।

"[illegible] क्ष्मदौनिग्ध [illegible] ।

[illegible] इम ।"

[illegible] । इति मल्लिनाथः ॥ यथा, माघे । ८ । ५४ ।

"[illegible]

[illegible] ।

[illegible]

[illegible] ॥"

[illegible] । यथा साहित्यदर्पणे । ३।२१८ ।

"[illegible] ॥"

तथाच भागवते । ४ । ३ । १२ ।

"अथ कदाचित् [illegible] स्तनमण्डलकनदुरल्पा-दिषु विवरणां [illegible] दशायामपि सकलकमलसभिरूपाणि तव गुप्तलनानामर्थयानि अननगोचराणि भवन्तु ॥")

स्तनितं, क्ली, (स्तन+क्तः ।) कुट्टन्यादिना गुदमयोदायाः शब्दनम् । तत्पर्य्यायः । स्तनम् । ९ । इत्यमरः । २ । ८ । १०८ ॥ भेदः । स्ति, स्तनितम् । इति मेदिनी । ते, ११४ ॥ (यथा, आर्य्यासप्तशत्याम् । ६०२ ।

"भौधगवाधगतापि हि दृढितं स्थितिक्षत-

प्रयत्नमपि ।

हिमगिरिशिखरस्खलिता गङ्गेपैरावतं

हरति ॥")

स्तक, म प्रतीघाते । इति कविकल्पद्रुमः॥(भ्वा०-पर०-सक०-सेट् ।) म, तिष्टकयिषति तिस्तकयिषति । इति दुर्गादासः ॥

स्तन, त क अभ्रशब्दे । इति कविकल्पद्रुमः ॥ (अदन्तचुरा०-पर०-अक०-सेट् ।) स्तनयति मेघः । इति दुर्गादासः ॥

स्तन, मि शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) मि स्तनयति स्तानयति । अतिस्तनत् । इति दुर्गादासः ॥

स्तनः, पुं, (स्तन्यते शब्दाते कामुकैः स्तनयति कथयति वयःशोभामिति वा । स्तन शब्दे + घञ् ।) अवयवविशेषः । माइ इति चूँची इति च भाषा ॥ तत्पर्य्यायः । कुचः २ । इत्यमरः । २ । ६ । ७७ ॥ कूचः ३ उरोजः ४ वक्षोजः ५ पयोधरः ६ वक्षोरुहः ७ उरसिजः ८ । तत्याम्

[illegible] । इति [illegible] । तस्य प्रमाणं यथा, भावप्रकाशे । ४१ । ८५ ।

"[illegible]

[illegible] ।

[illegible] ॥"

[illegible] यथा, [illegible] । १८४ । ४ ।

"[illegible] ।

[illegible] ॥"

[illegible] ।

"[illegible] स्तनौ स्त्रियः

[illegible] स्तनरोगाय कल्पते ॥"

[illegible] स्तनौ प्रसूताया गर्भिण्याश्च स्त्रिया दोषतो । यत आह सुश्रुतः ।

"धमन्यः संवृतद्वाराः कन्यानां स्तनसंश्रिताः ।

दोषाभिसरणात्तासां न भवन्ति स्तनामयाः ॥"

दोषाभिसरणात् संवृतद्वारत्वेन दोषाणामभिसरणमप्रवेशो याभ्यु ताः ।

"तासामेव प्रसूतानां गर्भिणीनाञ्च ताः पुनः ।

स्वभावादेव विवृता जायन्ते सम्भवन्त्यतः ॥" १

स्तनरोगाणामतिदेशेन लक्षणान्याह ।

"स्तनानामपि सर्वान् हित्वा शोणितविद्रधिम् ।

लक्षणानि समानानि बाह्यविद्रधिलक्षणैः ॥"

स्तनानां वातपित्तकफसन्निपाताभिघातजानाम् । आगन्तुजस्तनरोगाभिघातेन शब्देन च बोद्धव्यः ॥ रक्तजस्यासम्भवः । स्वभावात् ॥ १०

अथ स्तनरोगस्य चिकित्सा ।

"शोथं स्तनोत्थितमवेक्ष्य भिषग्विदध्यात्

यद्विद्रधावभिहितं बहुधा विधानम् ।

आमे विदाहिनि तदेव च तस्य पाके

तस्याः स्तनौ सततमेव च निर्दुहीतौ ॥

पित्तघ्नानि तु शीतानि द्रव्याण्यत्र प्रयोजयेत् ।

जलौकाभिर्हरेद्रक्तं न स्तनावुपनाहयेत् ॥"

उपनाहयेत् स्वेदयेत् ।

"लेपो विशालामूलेन हन्ति पीडां स्तनो-

त्थिताम् ।

निशाकनककल्काभ्यां लेपः प्रोक्तः स्तना-

र्त्तिहा ॥"

विशाला इन्द्रवारुणी । कनकस्य धत्तूरस्य पत्रं ग्राह्यम् ।

"लेपाद्धिहन्ति मूलं स्तनरोगं वन्ध्यकर्कोट्याः ।

निर्वाप्य तप्तलौहं सलिले तद्वा पिबेत्तत्र ॥"

इति भावप्रकाशः ॥

स्तननं, क्ली,(स्तन शब्दे+ल्युट् ।) ध्वनिमात्रम् । मेघशब्दः । कुन्थितम् । इति मेदिनी ॥

स्तनन्धयः,पुं,स्त्री, (स्तनं धयति पिबतीति स्तन +धेट् पाने+"नासिकास्तनयोर्ध्माधेटोः ।"३ । २ । २९ । इति खश् । अरुर्द्विषदिति मुम् ।) अतिशिशुः । तत्पर्य्यायः । उत्तानशयः २ उत्तानशया ३ डिम्भः ४ डिम्भा ५ स्तनपः ६ स्तनपा ७ स्तनन्धयी ८ स्तनन्धया ९ । इत्यमरभरतौ ॥ (यथा, रघुः । १४ । ७८ ।

"पयोधरैरायमवालहस्तकान्
संवर्द्धयन्ती स्वबलानुरूपैः।
असंशयं प्राक् तनयोपपत्तेः
स्तनन्धयप्रीतिमवाप्स्यसि त्वम्॥")

स्तनन्धया, स्त्री, (स्तनन्धय+टाप्।) अतिबालिका। इत्यमरटीकायां भरतः।२।६।४१॥

स्तनन्धयी, स्त्री, (स्तनन्धय+टित्वात् ङीप्।) अतिबालिका। इत्यमरः।२।६।४१॥

स्तनपः, पुं, स्तनं पिबतीति। पा+कः।) अतिशिशुः। इति भरतः॥ स्तनपानकर्त्तरि, त्रि॥

स्तनपा, स्त्री (स्तनं पिबति या। पा+कः। टाप्।) अतिबालिका। इत्यमरः।२।६।४१॥

स्तनपायिका, स्त्री, अतिबालिका। दुग्धपोष्या। स्तनशब्दपूर्व्वकपाधातोर्ण्वक्(ण्वुल्) प्रत्यये आप्प्रत्ययेन निष्पन्नम्॥

स्तनभरः, पुं, (स्तनयोर्भरः।) स्थूलस्तनभारः। तत्पर्य्यायः। स्तनभोगः २। इति त्रिकाण्डशेषः॥

स्तनभवः,पुं,(स्तनाभ्यां भव उत्पत्तिर्यस्य। रतिबन्धविशेषः। यथा,—
"स्वऊरुद्वयमध्ये तु कृत्वा योषित्पदद्वयम्।
स्तनौ धृत्वा रमेत् कामी बन्धः स्तनभवः स्मृतः॥"
इति स्मरदीपिका॥

स्तनजाते, त्रि॥

स्तनमुखः, पुं, (स्तनयोर्मुखम्। अभिधानात् पुंस्त्वम्।) स्तनाग्रभागः। यथा। चूचुकन्तु स्तनाग्रन्तशिखास्तुखाः। इति हेमचन्द्रः।३।२६७॥

स्तनयित्नुः, पुं,(स्तनयतीति। स्तन त्वाभ्रशब्दे+"स्तनिहृषिपुषीति।" उणा॰ ३।२९। इति इत्नुच्। "अयमन्तेति।" ६।४।५५। इति अयादेशः।) मेघः। इत्यमरः।१।३।६॥ (यथा, उत्तररामचरिते ३ अङ्के।
"किमप्यत्रेऽसि निनदे कुतस्त्येऽपि त्वमीदृशी।
स्तनयित्नोर्मयूरीव चकितोत्कण्ठिता स्थिता॥")
मुस्तकः। इति चामरः।२।४।१५८॥ मेघध्वनिः। इति मेदिनी॥ विद्युत्। इति शब्दरत्नावली॥ मृत्युः। रोगः। इति हेमचन्द्रः॥

स्तनवृन्तः, पुं, (स्तनयोर्वृन्तम्। अभिधानात् पुंस्त्वम्।) स्तनमुखम्। इति हेमचन्द्रः।३।२६७॥ स्तनेर बोंटा इति भाषा॥

स्तनशिखा, स्त्री (स्तनयोः शिखा।) स्तनवृन्तः। इति हेमचन्द्रः।३।२६७॥

स्तनाग्रं, क्ली, (स्तनयोरग्रम्।) स्तनवृन्तम्। इति राजनिर्घण्टः॥

स्तनान्तरं, क्ली, (स्तनयोरन्तरम्।) हृदयम्। इति हेमचन्द्रः॥ (यथा, रघुः।१०।६२।
"बिभ्रता कौस्तुभन्यास स्तनान्तरविलम्बिनम्
[illegible] च पद्मव्रजनस्पृता॥")
[illegible] वरविशेष। इति केचित्॥

[illegible] पुं, (स्तनयोराभोगः।) स्तनभरः। [illegible] परिपूर्णता च॥

स्तनितं, क्ली,(स्तन+क्तः।) मेघनिर्घोषः। इत्यमरः।१।३।८॥ (यथा, मनुः। ४।१०३।
"विद्युत्स्तनितवर्षेषु महोल्कानाञ्च संप्लवे।
आकालिकमनध्यायमेतेषु मनुरब्रवीत्॥")
करतालिशब्दः। इति केचित्॥ (शब्दमात्रम्। यथा, हरिवंशे। ८९।४८।
"आर्त्तस्तनितसंनादे रुधिराम्बुह्रदाकुले॥")
शब्दिते, त्रि॥

स्तनितफलः, पुं, (स्तनितानि फलानि यस्य।) विकण्टकवृक्षः। इति राजनिर्घण्टः॥

स्तन्यं, क्ली, (स्तने भवम्। स्तन+"शरीरावयवाच्च।" ४।३।५५। इति यत्।) दुग्धम्। इति हेमचन्द्रः॥ (यथा, रघुः।२।६९।
"स नन्दिनीस्तन्यमनिन्दितात्मा
सद्वत्सलो वत्सहुतावशेषम्।
पपौ वशिष्ठेन कृताभ्यनुज्ञः
शुभ्रं यशो मूर्त्तमिवातितृष्णः॥"
स्तनाय हितमिति।"शरीरावयवात् यत्।"५।१।६। इति यत् स्तनहिते, त्रि॥)

स्तब्धः, त्रि, स्तम्भितः। जडीकृतः। स्तम्भधातोः क्तप्रत्ययेन निष्पन्नः॥ (यथा, कथासरित्सागरे।२०।८६।
"स्वयमुत्थितकलसस्तब्धबाहुरभूत्तदा॥")

स्तब्धरोमा, [न्] पुं, (स्तब्धानि रोमाणि यस्य।) शूकरः। इत्यमरः।२।५।२॥ स्तम्भितलोमयुक्ते त्रि॥ (यथा, आर्य्यासप्तशत्याम्।५३२।
"विमुखे चतुर्मुखेऽपि स्थितवति धानीशभावमौनेऽपि।
मग्नमहीनिस्तारे हरिः परं स्तब्धरोमाभूत्॥")

स्तभ, इ ङ स्तम्भे। इति कविकल्पद्रुमः॥(भ्वा॰-आत्म॰-अक॰-सक॰-च सेट्।) दन्त्यादिः। इ, स्तम्भ्यते। ङ, स्तम्भते। तिष्टम्भयिषति। तिस्तम्भयिषति। स्तम्भो जडीभावस्तत्करणञ्च। स्तम्भः स्थूणाजडीभावावित्यमरोक्तेः। भीतेनावस्तब्धो जडीकृतः इत्यर्थ इति क्रमदीश्वरोऽपि य। स्तम्भ इह क्रियानिरोधः इति भीमः। दीपङ्गहिरिति गोविन्दभट्टः। स्तम्भो रुद्धीकरणञ्च। स्तम्भते कपाटेन द्वारं लोकः। इति दुर्गादासः॥

स्तभः, पुं, छागः। इति शब्दरत्नावली॥

स्तम्बः पुं, (तिष्ठतीति। स्था+"स्थः स्तोऽम्बजवकौ।" उणा॰ ४।९६। इति अम्बच्। स्तादेशश्च।) प्रकाण्डरहितवृक्षः। स तु झिण्टिकादिः। तत्पर्य्यायः। गुल्मः २। इत्यमरः।२।४।८॥ तृणादिः। तत्पर्य्यायः। गुच्छः २। इति चामरः॥ गुल्मः ३। इति तट्टीका॥ विटपः ४। इति जटाधरः॥

स्तम्बकरिः,पुं,(स्तम्बं करोतीति। स्तम्ब+कृ+"स्तम्बशकृतोरिन्।" ३।२।२४। इति इन्।) धान्यम्। इत्यमरः।२।९।२१॥ व्रीहि च। "पुंसि स्तम्बकरिर्धान्यं व्रीहिर्ना धान्यमात्रके।" इति शब्दरत्नावली॥

स्तम्बकारः, त्रि, (स्तम्बं करोतीति। गुच्छकारकः। स्तम्बशब्दात् कृञधातोः अण्प्रत्ययेन निष्पन्नः॥

स्तम्बघनः,त्रि, (स्तम्बः हन्यतेऽनेनेति। हन्+"स्तम्बे क च।"३।३।८३। इति अप् घनादेशश्च।) तृणाद्युत्पाटनसाधनं कुद्दालादिः। तत्पर्य्यायः। स्तम्बघ्नः २ इत्यमरः।३।२।३५॥ स्तम्बहननः ३। इति [illegible]

स्तम्बघ्नः, त्रि, (स्तम्बो हन्यते येनेति। हन्+"स्तम्बे क च।"३।३।८३ इति कः।) स्तम्बघनः। इत्यमरः।३।२।३५॥

स्तम्बपूः,[र्]स्त्री,(स्तम्बानां पूरिव।) पुरीभेदः। तत्पर्य्यायः।
"तामलिप्तं दामलिप्तं तामलिप्ती तमालिनी।
स्तम्बपूर्व्विष्णुगृहञ्च स्यादिदमोत्तु [illegible]"
इति हेमचन्द्रः॥

स्तम्बहननः, त्रि, (स्तम्बो हन्यतेऽनेनेति। हन करणे ल्युट्।) स्तम्बघनः। इत्यमरटीकासारसुन्दरी।३।२।३५॥

स्तम्बेरमः,पुं, (स्तम्बे रमते इति। स्तम्ब+रम+"स्तम्बकर्णयो रमिजपोः।"३।२।१३। इत्यच्। "तत्पुरुषे कृति बहुलम्।"६।३।१४। इति सप्तम्या अलुक्।) हस्ती। इत्यमरः।२।८।३४॥ (यथा, रघुः।५।७२।
"शय्यां जहात्युभयपक्षविनीतनिद्राः
स्तम्बेरमा मुखरशृङ्खलकर्षिणस्ते॥")

स्तम्भ, ग न उ रोधने। इति कविकल्पद्रुमः॥ (क्र्या॰ स्वा॰ च॰-पर॰-सक॰-सेट्। क्त्वावेट्।) ग, स्तभ्नाति। न, स्तभ्नोति। उ, स्तम्भित्वा स्तब्ध्वा। रोधनमावरणम्। इति दुर्गादासः। सौत्रधातुरयम्॥

स्तम्भः, पुं,(स्तभ्नातीति। स्तम्भ+पचाद्यच्।) स्थूणा। थाम इति खुँटी इति च भाषा। जडीभावः। स तु निष्क्रियता। इत्यमरभरतौ।३।३।१२४॥ (यथा, माघे।५।४८।
"स्तम्भं महान्तमुचितं सहसा मुमोच
दानं ददावतितरां सहमायहस्तः।
बद्धापराणि परितो निगडान्यलावीत्
स्वातन्त्र्यमुज्ज्वलमवाप करेणुराजः॥"
"महान्तं स्तम्भं आलानं जायच सहसा मुमोच। स्तम्भः स्थूणाजड़त्वयोरिति विश्वः।" इति तट्टीका॥ काण्डम्। यथा, रघुः।४।६६।
"आरण्यकोपात्तफलप्रसूतिः
स्तम्बेन नीवार इवावतिष्ठः॥")

स्तम्भकरः, पुं,(करोतीति। कृ+अच्। स्तम्भस्य करः।) वेष्टनम्। इति केचित्॥ स्तूपाकारके जाड्यकारके च त्रि॥

स्तम्भकी, [न्] पुं, वाद्यविशेषः। इति केचित्॥

स्तम्भनं, क्ली, (स्तम्भ+ल्युट्।) जडीकरणम्। यथा, बगलामुखीस्तोत्रे।
"दुष्टस्तम्भनमुग्रविघ्नशमनं दारिद्र्यविद्रावणम्।"
षट्कर्म्मान्तर्गताभिचारकर्म्मविशेष। यथा,—

'स्तम्भनाकयोः पत्नी गृहीत्वा मन्त्रवित्तमः।
शालिञ्च वै गृहीत्वा निशायान्तु माच्छादर-
संपुटितम् ॥
मन्त्रं भावितपवनं सहस्रजप्तं चतुष्पथे निखनेत्
स्तम्भनमेतदवश्यं भविता जगतामत्र नाव
सन्देहः ॥"
भावितपवनं कृतप्राणप्रतिष्ठम्।
"कृत्वा प्रतिकृतिमथवा
श्मशानाङ्गारकेशभवशमनलाम्।
सम्यगधिष्ठितपवनां
हृतलाम्नीं ममन्त्रललाटाम् ॥
यमनाधिष्ठितपवनां
मण्डलमां तद्वज्ञया यमनाम्।
दग्धां कृत्वा निखनेत्
श्मशानदेशे सपदि वाक्स्तम्भः ॥
शालिश्च चेटकायुगले मन्त्रं मनासपुटितम्।
निशया निशीथकाले सहस्रजप्तं प्रतिष्ठित-
प्राणम् ॥
बन्धनमतितीक्ष्णतरं स्तम्भनमतितीक्ष्णाम्बु-
निःक्षिप्तम्।
लिखितमन्त्रचितामयकीलकं,
सहितकर्मा सनाम समाहृतम् ॥
कृतजपं त्रिसहस्रकसंख्यया
पथि खनेदथ याननिवारणम्।
विहितनिम्बतरौ रिपुनामयुतं
मनुमिमं निशया कृतनासकम्।
नवसहस्रजपादिसुसाधितं
पथि खनेदथ सैन्यनिरोधनम् ॥"
इति स्तम्भनम् ॥
इति फेत्कारिणीतन्त्रे ५ पटलः ॥ * ॥
अथाग्निस्तम्भनम्।
"मालूरस्य रसं गृह्य जलौकां तत्र पेषयेत्।
हस्तौ तु लेपयेत्तेन अग्निस्तम्भनमुत्तमम् ॥
शाल्मलीरसमादाय खरमूत्रे निधाय तम्।
अग्न्यागारे क्षिपेत्तेन अग्निस्तम्भनमुत्तमम् ॥
वायसी उदरं गृह्य मण्डूकवसया सह।
गुड़िकां कारयेत्तेन ततोऽग्नौ प्रक्षिपेद्वशी ॥
एवमेतत्प्रयोगेण अग्निस्तम्भनमुत्तमम् ॥
रक्तपाटलमूलन्तु अवष्टभ्य मूलकैः।
दिव्यं स्तम्भयते क्षिप्रं पयः पिण्डं जलान्तकम् ॥
मुण्डीतकवचाकुष्ठं मरीचं नागरं तथा।
चर्व्वित्वा च इमं सद्यो जिह्वया ज्वलनं लिहेत्
गोरोचनां भृङ्गराजं चूर्णीकृत्य घृतं समम्।
दिव्यस्तम्भश्च पीत्वा स्यात् मन्त्रे पानेन वै तथा
ॐ ह्रीं अग्निस्तम्भनं कुरु ॥ ॐ नमो भगवते
जलं स्तम्भय स्तम्भय सं सं सं कं कं कचर।
जलस्तम्भनमन्त्रोऽयं जलं स्तम्भयते ध्रुव ॥"
इति गारुडे पूर्व्वखण्डे। १८६। ११—१८ ॥
प्रकारान्तरं षट्कर्म्मशब्दे द्रष्टव्यम् ॥
स्तम्भनः, पुं, (स्तम्भयतीति। स्तम्भ + णिच् + ल्युः।)
कामदेवस्य पञ्चबाणान्तर्गत-बाण-विशेषः।
यथा,—
"उन्मादनः शोषणश्च तापनस्तम्भनस्तथा।
सम्मोहनश्च पञ्चैते विख्याताः कामसायकाः ॥"
इति जटाधरः ॥
(स्तम्भके, त्रि। यथा, सुश्रुते। १। ४२।
"कषायः संग्राहको रोपणः स्तम्भनः शोधनो
लेखनः शोषणः पीड़नः क्लेदोपशोषणश्चेति ॥")
स्तम्भितः, त्रि, जड़ीभूतः। जड़ीकृतः। इति स्तम्भ-
शब्दात् इतोऽस्य जाते इतप्रत्ययेन स्तम्भधातोः
क्तप्रत्ययेन वा निष्पन्नः ॥
स्तरिमा, (न्) पुं, (स्तृणोति आच्छादयतीति।
स्तृ + "हृसृधृसस्तृभ्य इमनिच्।" उणा० ४।
१४१। इति इमनिच्।) तल्पम्। इत्युणादि-
कोषः ॥
स्तरी, स्त्री, (स्तृणोति आच्छादयतीति। स्तृ +
"अवितृस्तृतन्त्रिभ्य ईः।" उणा० ७। १५८।
इति ईः।) धूमः। इति हेमचन्द्रः ॥
स्तवः, पुं, (स्तूयतेऽनेनेति। स्तु + अप्।) प्रशंसा।
तत्पर्य्यायः। स्तोत्रम् २ नुतिः ३ स्तुतिः ४।
इत्यमरः। १। ६। ११ ॥ स्तवनम् ५। इति
शब्दरत्नावली ॥ वर्णः ६। इति जटाधरः ॥
(यथा, हरिवंशे। १२८। २८।
"तुष्टाव च तमीशानं मारीचः कश्यपस्तदा।
वेदोक्तैः स्वकृतैश्चैव स्तवैः स्तुत्यं जगद्गुरुम् ॥")
स्तवकः, पुं, (तिष्ठतीति। स्था + "स्थः स्तोऽम्ब-
जवकौ।" उणा० ४। ८६। इति अवकः
धातोश्च स्तादेशः।) गुच्छकः। इत्यमरः।
२। ४। १६ ॥ "द्वे स्तवके यत्नो इति ख्याते
बहुभिः पुष्पैः फलैर्व्वा संबाधः पल्लवग्रन्थिः
गुच्छः। गूयते ध्वन्यते भ्रमरैरत्र गुच्छः। गु
घु ङ ङ ध्वनौ नाम्नीति छक्।
'पुष्पादिस्तवके गुच्छो मुक्ताहारकलापयोः।'
इति चवर्गान्तेषु रन्तिदेवः ॥
'स्यात् गुच्छः स्तवके स्तम्बे हारभेदकलापयोः॥'
इति चवर्गद्वितीयान्ते मेदिनी ॥
स्वार्थे के गुच्छकः गुत्सकः इति च पठन्ति। नदा
वुध्यति वेष्टते इति गोधन्ते क्रीड़न्ति भ्रमरा
अत्रेति वा गुत्सः। गुध्य वेष्टे गुध ङ क्रीड़े
इत्यस्माद्वा नाम्नोति सः। स्वार्थे कः गुत्सकः।
'स्तवके हारभेदे च गुत्सः स्तम्बे च कीर्त्तितः॥'
इति दन्त्यान्तेषु रुद्रः।
'गुत्सः स्यात् स्तवके स्तम्बे हारभिद्ग्रन्थि-
पर्णयोः।'
इति दन्त्यसान्तेषु मेदिनी।
'मुकुरः कुट्मलश्चापि स्तवको गुत्सकाविति॥'
इति हड्डः।
स्तूयते इति स्तवकः। ष्टुञ् ल स्तुतौ अल् स्तवः
स्वार्थे अभिधानात् नित्यकः। इति भरतः ॥ *
स्तुतिः। इतिविश्वः॥ ग्रन्थपरिच्छेदः। समूहः।
इति केचित् ॥ स्तवकारके, त्रि ॥
स्तवरकः, पुं, आवरकः। इति केचित् ॥
स्तावः, पुं, स्तवः। स्तुधातोर्भावे घञ् प्रत्ययेन
निष्पन्नः ॥
स्तावकः, त्रि, (स्तौतीति। स्तु + ण्वुल्।) स्तव-
कर्त्ता। स्तुधातोर्णकप्रत्ययेन निष्पन्नः ॥ (यथा,
भागवते। ४। १५। २१।
"स्तावकान् तानभिप्रेत्य पृथुर्वैण्यः प्रतापवान्।
मेघनिह्लादया वाचा प्रहसन्निदमब्रवीत् ॥")
स्तिमितः, त्रि, (स्तिम + क्तः।) अचञ्चलः। (यथा,
रघुः। १३। ४८।
"एषा प्रसन्नस्तिमितप्रवाहा
सरिद्विदूरान्तरभावतन्वी।
मन्दाकिनी भाति नगोपकण्ठे
मुक्तावली कण्ठगतेव भूमेः ॥"
आर्द्रः। यथा, "स्तिमितोऽचञ्चलार्द्रयोः।"
इति मेदिनी ॥
स्तिभिः, पुं, (स्तभ्नातीति। स्तम्भ + "क्रमित-
मिशतिस्तम्भामत इच्च।" उणा० ४। १२१।
इति इन् अत इच्च।) समुद्रः। वाधा। इत्यु-
णादिकोषः ॥
स्तीर्व्विः, पुं, (स्तृणातीति। स्तॄ + "स्तॄशॄगॄ-
स्तॄजागृभ्यः क्विन्।" उणा० ४। ५४। इति
क्विन्।) नभः। रुधिरम्। तृणजातिः। अध्वर्युः।
पयः। शक्रः। इति संक्षिप्तसारोणादिवृत्तिः ॥
स्तुतः, त्रि, (स्तु + क्तः।) स्तुतिविषयः। तत्-
पर्य्यायः। ईलितः २ शस्तः ३ पणायितः ४
पनायितः ५ प्रणुतः ६ पणितः ७ पनितः ८
अपिगीर्णः ९ वर्णितः १० अभिष्टुतः ११। इत्य-
मरः। ३। १। ११० ॥ गीर्णः १२ ईड़ितः १३। इति
शब्दरत्नावली ॥ नुतः १४। इति जटाधरः ॥
(यथा, महाभारते। १२। २८४। १८।
"नमः स्तुताय स्तुत्याय स्तूयमानाय वै नमः॥")
स्तुतिः, स्त्री, (स्तु + क्तिन्।) स्तवः। इत्यमरः।
१। ६। ११ ॥ (यथा, नैषधे। ३। ११६।
"इतः स्तुतिः का खलु चन्द्रिकाया
यदब्धिमप्युत्तरलीकरोति ॥")
दुर्गा। यथा,—
"स्तुतिः सिद्धिरिति ख्याता श्रियाः संश्रयणाच्च
सा।
लक्ष्मीर्वा ललना वापि क्रमात् सा कान्तिरुच्यते"
इति देवीपुराणे ४५ अध्यायः ॥
स्तुतिपाठकः, पुं, (स्तुतिं पठतीति। पठ + ण्वुल्।)
राजादीनां वार्द्धौ वीर्यस्तुतिकर्त्ता। तत्पर्य्यायः।
वन्दी २। इत्यमरः। २। ८। ९७ ॥ नग्नः ३
स्तुतिव्रतः ४ सूतः ५ मागधः ६ मधुकः ७।
इति जटाधरः ॥ प्रातर्गेयः ८। इति त्रिकाण्ड-
शेषः ॥
स्तुतिव्रतः, पुं, (स्तुतिरेव व्रतं यस्य।) स्तुति-
पाठकः। इति जटाधरः ॥
स्तुत्यः, त्रि, स्तवनीयः। स्तुधातोः क्यप्प्रत्ययेन
निष्पन्नः। इति मुग्धबोधव्याकरणम् ॥ (यथा,
रघुः। ४। ६।
"परिकल्पितसान्निध्या काले काले च वन्दिषु।
स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वती ॥")
स्तुनकः, पुं, छागः। इति शब्दचन्द्रिका ॥

स्तुभ, ग न उ रोधने। सौत्रधातुरयम्। इति कविकल्पद्रुमः॥ (क्रा०-स्वा०-च०-पर०-सक०-सेट्। क्त्वावेट्।) दन्त्यादिः। पञ्चमस्वरी। ग, स्तुभ्नाति। न, स्तुभ्नोति। उ, स्तुभित्वा स्तुब्ध्वा। रोधनमावरणम्। इति दुर्गादासः॥

स्तुभः, पुं, छागः। इत्यमरटीकायां भरतः। २। ८। ७६॥ (अग्निविशेषः। यथा, महाभारते। ३। २२०। १४।
"चातुर्म्मास्येषु नित्यानां हविषां योनिरग्रहः। चतुर्भिः सहितः पुत्त्रैर्भानोरेवान्वयः स्तुभः॥")

स्तुवेय्यः, पुं, (स्तूयते इति। स्तु + "स्तुवः केय्यन्छन्दसि।" उणा० ३। ९८। इति केय्यः। कित्त्वाद्गुणाभावे सत्युवङादेशः।) इन्द्रः। इत्युणादिकोषः॥

स्तुषेय्यः, त्रि, श्रेष्ठः। उत्तमः। वैदिकशब्दोऽयम्। ष्टुञ्धातोरौणादिकमेय्यप्रत्ययेन निष्पन्नम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

स्तूप, क उच्छ्राये। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) षष्ठस्वरी। उच्छ्रायो राशीकरणम्। स्तूपयति धान्यं कृषकः। तुष्टूपयिषति। इति दुर्गादासः॥

स्तूप, य इर उच्छ्राये। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-सेट्।) षष्ठस्वरी। य, स्तूप्यति। इर, अस्तूपत् अस्तूपीत्। अस्मात् पुषादित्वाविल्यं ङ इत्यन्ये। अतुस्तूपत्। इति दुर्गादासः॥

स्तूपः, पुं, (स्तूयते इति। स्तु + "स्तुवो दीर्घश्च।" उणा० ३। २५। इति पः दीर्घश्च।) मृदादिकूटः। राशीकृतमृत्तिकादिः। इति पुंलिङ्गसंग्रहे अमरः। ३। ५। १८॥ संघातः। निष्प्रयोजनम्। बलम्। इति संक्षिप्तसारोणादिवृत्तिः॥

स्तृ, न प्रीतिरक्षापालने। इति कविकल्पद्रुमः॥ (स्वा०-पर०-सक०-अक०-च-अनिट्।) न, स्तृणोति। इति दुर्गादासः॥

स्तृ, न ञ स्तृतौ। इति कविकल्पद्रुमः॥ (स्वा०-उभ०-सक०-अनिट्।) न ञ, स्तृणोति स्तृणुते। स्तृतिराच्छादनम्। इति दुर्गादासः॥

स्तृक्ष, गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) सप्तमस्वरयुक्तमध्यः। स्तृक्षति। तरीस्तृक्षते। इति दुर्गादासः॥

स्तृह, ऊ श वधे। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-वेट्।) ऊ, अस्तर्हीत् अस्तृक्षत्। श, स्तृहति। तिस्तर्हयिषति। इति दुर्गादासः॥

स्तृ ञ नि छादने। इति कविकल्पद्रुमः॥ (क्र्या०-उभ०-सक०-अनिट्।) ञ नि, स्तृणाति स्तृणीते। स्तीर्णः स्तारितः। इति दुर्गादासः॥

स्तृंह, ऊ श वधे। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-वेट्।) ऊ, अस्तृंहीत् अस्तृङ्क्षीत्। श, स्तृंहती स्तृंहन्ती। तिस्तृंहिषति। इति दुर्गादासः॥

स्तेन, त् क चौर्य्ये। इति कविकल्पद्रुमः॥ (अदन्त-चुरा०-पर०-सक०-सेट्।) अतिस्तेनत् धनं चौरः। इति दुर्गादासः॥

स्तेनं, क्ली, (स्तेनत् क चौर्य्ये + भावे अच्।) स्तेयम्। इत्यमरटीकायां भरतः। २। १०। २४॥

स्तेनः, पुं, (स्तेनयतीति। स्तेन + पचाद्यच्।) चौरः। इत्यमरः। २। १०। २४॥ तस्य दण्डनिर्णयो यथा,—
"स्तेनस्यातः प्रवक्ष्यामि विधिं दण्डविनिर्णये।
परमं यत्नमातिष्ठेत् स्तेनानां निग्रहे नृपः।
स्तेनानां निग्रहादस्य यशो राष्ट्रञ्च वर्द्धते॥
अन्नादे भ्रूणहा मार्ष्टि पत्यौ भार्य्यापचारिणी।
गुरौ शिष्यश्च याज्यश्च स्तेनो राजनि किल्बिषम्॥
यस्तु तान्युपक्लृप्तानि द्रव्याणि स्तेनयेन्नरः।
तमाद्यं दण्डयेद्राजा यश्चाग्निं चौरयेद्गृहात्॥
येन येन यथाङ्गेन स्तेनो नृषु विचेष्टते।
तत्तदेव हरेत्तस्य प्रत्यादेशाय पार्थिवः॥"
इति मानवे ८ अध्यायः॥

तद्वैदिकपर्य्यायः। तृपुः १ तक्वा २ रिभ्वा ३ रिपुः ४ रिक्वा ५ रिहायाः ६ तायुः ७ तस्करः ८ वनर्गुः ९ हुरश्चित् १० मुषीवान् ११ मलिम्लुचः १२ अघशंसः १३ वृकः १४। इति चतुर्द्दश स्तेननामानि। इति वेदनिघण्टौ। ३। २४॥ * ॥ देवायानिवेद्यान्नादिभोक्ता। यथा, श्रीभगवद्गीतायाम्। ३। १२।
"इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः।
तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः॥"

स्तेप, क क्षेपे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) एकादशस्वरी। क, स्तेपयति। तिष्टेपयिषति। इति दुर्गादासः॥

स्तेमः, पुं, (स्तिम आर्द्रे + घञ्।) आर्द्रीभावः। इत्यमरः। ३। २। २९॥

स्तेयं, क्ली, (स्तेनस्य भावः कर्म्म वा। स्तेन + "स्तेनाद्यन्नलोपश्च।" ५। १। १२५। इति यत्। नलोपश्च) चौर्य्यम्। तत्तु चौरस्य भावः तस्य कर्म्म च इत्यमरभरतौ। २। १०। २५॥ तस्य लक्षणं यथा, प्रायश्चित्तविवेके।
"प्रत्यक्षं वा परोक्षं वा रात्रौ वा यदि वा दिवा।
यत् परद्रव्यहरणं स्तेयं तत् परिकीर्त्तितम्॥"
तत्करणे नरकं प्रतिप्रसवश्च यथा,—
व्यास उवाच।
"न हिंस्यात् सर्व्वभूतानि नानृतं वा वदेत् क्वचित्।
नाहितं नाप्रियं वाक्यं न स्तेनः स्यात् कदाचन॥
तृणं वा यदि वा शाकं मृदं वा जलमेव वा।
परस्यापहरन् जन्तुर्नरकं प्रतिपद्यते॥
न राज्ञः प्रतिगृह्णीयान्न शूद्रपतितादपि।
न चान्यस्मादशक्तश्च निन्दितान् वर्जयेद्बुधः॥
नित्यं याचनको न स्यात् पुनस्तं नैव याचयेत्।
न नित्यं नित्यमित्याहुर्ब्रह्मघ्नं नित्यमुच्यते।
देवस्वञ्चापि यत्नेन सदा परिहरेत्ततः॥
पुष्पे शाकोदके काष्ठे तथा मूले फले तृणे।
अदत्तादानमस्तेयं मनुराह प्रजापतिः॥
ग्रहीतव्यानि पुष्पाणि देवार्च्चनविधौ द्विजैः।
नैकस्मादेव नियतमननुज्ञाय केवलम्॥
तृणं काष्ठं फलं पुष्पं प्रकाशं वै हरेद्बुधः।
धर्म्मार्थं केवलं ग्राह्यमन्यथा पतितो भवेत्॥
तिलमुद्गयवादीनां मुष्टिर्ग्राह्या पथि स्थितैः।
क्षुधार्त्तैर्नान्यथा विप्र विधिविद्भिरिति स्थितिः॥"
इति कौर्म्मे उपविभागे। १६। १—१०॥

स्तेयप्रायश्चित्तं यथा,—
"एतैर्व्रतैरपोह्यं स्यादेनो हिंसासमुद्भवम्।
स्तेयदोषापहर्त्तॄणां व्रतानां श्रूयतां विधिः॥
धान्यान्नधनचौर्य्याणि कृत्वा कामात् द्विजोत्तम।
स्वजातीयगृहादेव कृच्छ्रार्द्धेन विशुध्यति॥
मनुष्याणान्तु हरणे स्त्रीणां क्षेत्रगृहस्य च।
कूपवापीजलानाञ्च शुद्धिश्चान्द्रायणं स्मृतम्॥
द्रव्याणामल्पसाराणां स्तेयं कृत्वान्यवेश्मतः।
चरेत् सान्तपनं कृच्छ्रं तत्पापपरिशुद्धये॥
भक्ष्यभोज्यापहरणे यानशय्यासनस्य तु।
पुष्पमूलफलानाञ्च पञ्चगव्यं विशोधनम्॥
तृणकाष्ठद्रुमाणान्तु पक्वान्नस्य गुडस्य तु।
चैलचर्म्मामिषाणान्तु त्रिरात्रं स्यादभोजनम्॥
मणिमुक्ताप्रवालानां ताम्रस्य रजतस्य तु।
अयस्कांस्योपलानाञ्च द्वादशाहं कणान्नभुक्॥
कार्पासकीटकोषाणां द्विशफैकशफस्य च।
पक्षिगन्धौषधानाञ्च रज्वाश्चैव त्र्यहं पयः॥
एतैर्व्रतैरपोहेत पापं स्तेयकृतं बुधः॥"
इति मात्स्ये २०१ अध्यायः॥ * ॥
स्तेयस्य दण्डविधिर्दण्डशब्दे द्रष्टव्यः। सुवर्णस्तेयप्रायश्चित्तं प्रायश्चित्तशब्दे द्रष्टव्यम्॥

स्तेयी, [न्] पुं, (स्तेयमस्यास्तीति। इनिः।) चौरः। यथा, सुमन्तुः। सुवर्णस्तेयी मासं सावित्र्यष्टसहस्रं आज्याहुतीर्जुहुयात् त्रिरात्रमुपवसेत् तप्तकृच्छ्रेण वा पूतो भवति। इति प्रायश्चित्तविवेकः॥ स्वर्णकारः। इति केचित्॥

स्तैनं, क्ली, (स्तेनस्य चौरस्य भावः कर्म्म वा। स्तेन + अण्।) चौर्य्यम्। इत्यमरटीकायां भरतः। २। १०। २५॥

स्तैन्यं, क्ली, (स्तेनस्य भावः कर्म्म वा। स्तेन + ष्यञ्।) चौर्य्यम्। इत्यमरभरतौ। २। १०। २५॥ (यथा, महाभारते। १। २०२। ७।
"इमां हि पत्नीमस्माकं धर्म्मज्ञां धर्म्मचारिणीम्। संस्पृशीदोहतो भावः यथ स्तैन्यमिवाचरन्॥")

स्तैन्यः, पुं, (स्तेन एव। स्वार्थे ष्यञ्।) चौरः। इति शब्दरत्नावली॥

स्तैमित्यं, क्ली, (स्तिमितस्य भावः। स्तिमित + ष्यञ्।) जडता। इति राजनिर्घण्टः॥ (आर्द्रत्वम्। यथा, "स्तैमित्यं स्तिमिते वेग।" इति वैद्यमाधवकरकृतरोगविनिश्चयस्य ज्वराधिकारे। "स्तैमित्यमार्द्रवस्त्रावगुण्ठितत्वमिव।" इत्यस्य व्याख्याने विजयरक्षितः।)

(स्तुवर्थ इति । स्तुच प्रसादे + घञ् ।) ... इति मेदिनी ॥ विन्दुः । कणा । ...वन् ॥ (यथा, मार्कण्डेये । ४८ । ५८ ।
...वस्तदेरभवत् स्तोतः स्तालानि निम्नगाः ।
...स्तादपां स्तोका आपया: पृथिवीतले ॥")
...च भागवते । ८ । ६ । ४८ ।
...र्य महैव्यभिरतो विषयान् विविधैः सुखैः ।
...समानो न चातुप्यादान्यस्तोकैरियानल ॥")
...ह्रः, वि, (स्तुच् + घञ् ।) अल्प । इत्यमरः । १ । १ । २१८ ।
...३ । १ ६१ ॥ (यथा, महाभारते । १ । १ । २१८ ।
"सम्प्रेवेगते प्राणांस्त्यक्तुमिच्छामि मारिषम्
स्तोकं यपि न पश्यामि फलं जीवितधारणे ॥")
स्तोककः, पुं, (स्तोक एव । स्वार्थे कन् ।) चातकपक्षी । इत्यमरः ॥ (यथा, मनुः । १२ । ६७ ।
"स्तोकानि हृत्वा वांसासि जायते जीवजीवकः ।
हृत्वा मृगेभं व्याघ्रोऽयं फलमूलन्तु मर्कटः ।
स्तोकप्रस्तोमको वारि यानान्युष्ट्रः पशूनजः ॥")
स्तोता, [ऋ] वि, (स्तौतीति । स्तु + तृच् ।) स्तवकर्त्ता । स्तुधातोस्तृण्प्रत्ययेन निष्पन्नः ॥ (यथा, ऋग्वेदे । ८ । ४४ । १८ ।
"स्तोता स्यां तव शर्म्मणि ॥")
तद्वैदिकपर्य्यायः । रेभ १ जरिता २ कारुः ३ नदः ४ स्तामुः ५ कीरिः ६ गौः ७ सूरिः ८ नादः ९ छन्दः १० स्तुप् ११ रुद्रः १२ कृपण्युः १३ । इति त्रयोदश स्तोतृनामानि । इति वेदनिघण्टौ । ३ । १६ ॥ (विष्णुः । इति महाभारतम् । १३ । १४९ । ८६ ॥)
स्तोत्रं, क्ली, (स्तूयतेऽनेनेति । स्तु + "दाम्नीशस-युयुजेति ।" ३ । २ । १८२ । इति ष्ट्रन् ।) स्तवः । इत्यमरः । १ । ६ । ११ ॥ तच्चतुर्व्विधं यथा, मात्स्ये १२१ अध्याये ।
"अत वो वर्णयिष्यामि विधिं मन्वन्तरस्य तु ।
ऋचो यजूंषि सामानि तथावत् प्रति दैवतम् ।
विधिहोत्रं तथा स्तोत्रं पूर्व्ववत् संप्रवर्त्तते ॥
द्रव्यस्तोत्रं कर्म्मस्तोत्रं विधिस्तोत्रं तथैव च ।
तथैवाभिजनस्तोत्रं स्तोत्रमेतच्चतुष्टयम् ॥
मन्वन्तरेषु सर्व्वेषु यथा भेदा भवन्ति वै ।
प्रवर्त्तयन्ति तेषां वै ब्रह्मस्तोत्रं पुनः पुनः ॥"
स्तोभः, पुं, (स्तुभ + घञ् ।) सामावयवविशेषः । स च त्रयोदशविधो यथा । अयं वावलोको हाउकारो १ वायुर्हाइकारः २ । चन्द्रमा अथकारः ३ । आत्मेहकारो ४ ऽग्निरीकारः ५ आदित्य ऊकारः ६ । निहव एकारो ७ विश्वे देवा औहोइकारः ८ प्रजापतिर्हिंकारः ९ । प्राणः स्वरो १० ऽन्नं या ११ वाग्विराडनिरुक्त १२ स्त्रयोदशः स्तोभः सञ्चरो हुंकारः १३ । दुग्धेऽस्मै वाग्दोहं यो वाचो दोहोऽन्नवानन्नादो भवति य एतामेवं साम्नामुपनिषदं वेद । इति छान्दोग्योप... समासः ॥ * ॥
विषयान्युपासनान्तराणि संहतान्युपदिश्यन्ते । अथान्तरं सामावयवसम्बन्धत्वाविशेषादयं वावाय मिव लोको हाउकारः स्तोभो रथन्तरे साम्नि प्रसिद्ध इयं वै रथन्तरमित्यस्मात् सम्बन्धसामान्याद्धाउकारः स्तोभोऽयं लोक इत्येवमुपासीत ।१।
वायुर्हाइकारो वामदेव्ये सामनि हाइकारः प्रसिद्धो वायुरप्सम्बन्धश्च वामदेव्यस्य साम्नो योनिरित्यस्मात् सामान्याद्धाइकारं वायुदृष्ट्योपासीत ।२।
चन्द्रमा अथकारः चन्द्रदृष्ट्या अथकारमुपासीत । अन्ने हीदं स्थितमन्नात्मा चन्द्रः थकाराकारसामान्याच्च । ३ ।
आत्मा इह कार इहेति स्तोभः प्रत्यक्षो ह्यात्मा इहेति व्यपदिश्यते इहेति च स्तोभः । ४ ।
तत्सामान्यादग्निरीकार इति । ई निधनानि चाग्नेयानि सर्व्वाणि सामानीत्यतः ।५।
तत्सामान्यादादित्य ऊकारः । उच्चैरूर्द्ध्वं सन्तमादित्यं गायन्त्यूकारश्चायं स्तोभ आदित्यदैवत्ये साम्नि स्तोभ इत्यादित्य ऊकारः । ६ ।
निहव एकारः स्तोभः एहीति चाह्वयन्तीति । ७ ।
तत्सामान्याद्विश्वे देवा औहोइकारो वैश्वदेव्ये साम्नि स्तोभस्य दर्शनात् ।८।
प्रजापतिर्हिंकार अनिरुक्ताद्धिंकारस्य चाव्यक्तत्वात् । ९ ।
प्राणः स्वरः स्वर इति स्तोभः प्राणस्य च स्वरहेतुत्वसामान्यात् । १० ।
अन्नं या या इति स्तोभोऽन्नं अन्नेन हीदं यातीत्यतः । ११ ।
तत्सामान्यात् वागिति स्तोभो विराडन्नं देवताविशेषो वा वैराजे साम्नि स्तोभदर्शनात् अनिरुक्तोऽव्यक्तत्वात् इदमिदमिति निर्व्वक्तुं न शक्यत इत्यतः ।१२।
सञ्चरो विकल्पमानस्वरूप इत्यर्थः कोऽसावित्याह हुंकारोऽव्यक्तो ह्ययतोऽनिरुक्तविशेष एवोपास्य इत्यभिप्रायः ॥१३॥
स्तोभाक्षरोपासनाफलमाह । दुग्धेऽस्मै वाग् दोहमित्याद्युक्तार्थं य एतामेव यथोक्तलक्षणं साम्नां सामावयवस्तोभाक्षरविषयामुपनिषदं दर्शनं वेद तस्यैतत् यथोक्तं फलमित्यर्थः । द्विरभ्यासोऽध्यायपरिसमाप्त्यर्थः सामावयवविषयो पासनाशेषः परिसमाप्त्यर्थो वेति ॥ * ॥ इति परमहंसपरिव्राजकाचार्य्यस्य श्रीमच्छङ्करभगवत्पादस्य कृतौ छान्दोग्योपनिषद्भाष्ये प्रथमः प्रपाठकः समाप्तः ॥ * ॥ हेलनम् । स्तम्भनम् । इति हेमचन्द्रः ॥ अपि च ।
... "सांकेत्यं पारिहास्यं वा स्तोभं हेलनमेव वा ।
वैकुण्ठनामग्रहणमशेषाघहरं विदुः ॥"
इति श्रीभागवते । ६ । २ । १४ ॥
... प्रसादौ साङ्केतितम् । पारिहास्यं परिहासेन कृतम् । स्तोभं गीतालापपूरणार्थं कृतम् । हेलनं किं विष्णुनेति सावज्ञमपि च वैकुण्ठनामोच्चारणम् ।" इति तट्टीकायां श्रीधरस्वामी ॥
स्तोम, त् क श्लाघने । इति कविकल्पद्रुमः ॥ अदन्तचुरा०-पर०-सक०-सेट् ।) अतुस्तोमत् । इति दुर्गादासः ॥
स्तोमं, क्ली, (स्तूयते इति । स्तु + "अर्त्तिस्तुसु-" इति मन् ।) उणा० १ । १३९ । लौहाग्रदण्डः । मस्तकम् । धनम् । शस्यम् । इति केचित् ॥
वक्रे, वि । इति केचित् ॥
स्तोमः, पुं, (स्तु + मन् ।) समूहः । इत्यमरः । २ । ५ । ३९ ॥ (यथा, उत्तररामचरिते । १ अङ्के ।
"ऋषीणामुग्रतपसां यमुनातीरवासिनाम् ।
लवणत्रासितः स्तोमस्त्रातारं त्वामुपस्थितः ॥")
स्तवः । इति चामरः । यज्ञः इति हेमचन्द्रः ॥ इति त्रिकाण्ड- ... ३ । ३ । २४१ ॥
स्तौपिकं, क्ली, वुद्धद्रव्यविशेषः । इति त्रिकाण्डशेषः ॥ ओषा इति हिन्दी भाषा ॥
स्त्यानं, क्ली, (स्त्यै + क्तः ।) स्निग्धम् । प्रतिध्वानम् । घनत्वम् । (यथा, उत्तररामचरिते । २ अङ्के ।
"दधति कुहरभाजामत्र भल्लूकयूनामनुरसितगुरूणि स्त्यानमम्बूकृतानि ॥")
आलस्यम् । इति विश्वमेदिन्यौ ॥
स्त्यानः, त्रि, संहतिकर्त्ता । ध्वनिकर्त्ता । इति स्त्यैधातोः कर्त्तरि क्तप्रत्ययेन निष्पन्नः । इति मुग्धबोधव्याकरणम् ॥
स्तेनः, पुं, (स्त्यायतीति । स्त्यै + "स्त्यास्या... इति इनच् ।" उणा० २ । ४६ । इति इन... विस्यइनच् ।" इत्युणादिकोषः ॥ चौरः । अनृतम् । इत्युणादिकोषः ॥
स्त्यै संहतौ । ध्वनौ । इति कविकल्पद्रुमः: ... पर०-अक०-अनिट् ।) दन्त्यादिरन्तः ... युक्तमध्यः । स्त्यायति तिष्ट्यासति । इ... दासः ॥
स्त्री, स्त्री, (स्त्यायति गर्भो यस्यामिति । "स्त्यायतेः ड्रट् ।" उणा० ४ । १६५ ... टित्वात् ङीप् ... डित्वात् टिलोपः । तत्पर्य्यायः । योषित् ... योन्यादिमतौ । तत्पर्य्यायः । योषि... सीमन्तिनी ६ व... योषा ४ नारी ५ सीमन्तिनी ६ ... वनिता १० ... दर्शिनी ८ वामा ९ वनिता १० ... प्रिया ... इत्यमरः । २ । ६ । २ ॥ प्रिया ... योषिता ... जनिः १४ जनी १५ योषिता १६ ... लोपा १८ जोषिता १९ ... महिला २२ । इ... लिका २१ महिला २२ ... शर्व्वरी २३ सिन्दूरतिलका ... सुनयना २६ वाम... लटाधरः ... ललना २८ कान्ता ३० पुर... सुतनुः ३३ तन्वी ३४ त... तन्वङ्गी ३७ रमणी ... भीरुः ४० भामिनी ४१ ... म्विनी ४३ मत्तकाशिनी ...

स्तुम्भ, ग न उ रोधने। सौत्रधातुरयम्। इति कविकल्पद्रुमः॥ (क्र्या०-स्वा०-च०-पर०-सक०-सेट्। क्त्वावेट्।) दन्त्यादिः। पञ्चमस्वरी। ग, स्तुभ्नाति। न, स्तुभ्नोति। उ, स्तुम्भित्वा स्तुब्ध्वा। रोधनमावरणम्। इति दुर्गादासः॥

स्तुभः, पुं, छागः। इत्यमरटीकायां भरतः २। ८। ७६॥ (अग्निविशेषः। यथा, महाभारते। ३। २२०। १४।
"चातुर्मास्येषु नित्यानां हविषां योनिरव्ययः।
चतुर्भिः सहितः पुत्रैर्भानोरिवान्वयः स्तुभः॥")

स्तुवेय्यः, पुं, (स्तूयते इति। स्तु+"स्तुवः केय्यच्छन्दसि।" उणा० ३। ९८। इति केय्यः। क्ङित्वाद्गुणाभावे सत्युवङादेशः।) इन्द्रः। इत्युणादिकोषः॥

स्तुषेय्यः, त्रि, श्रेष्ठः। उत्तमः। वैदिकशब्दोऽयम्। ष्टुधातोरौणादिकसेय्यप्रत्ययेन निष्पन्नम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

स्तूप, क उच्छ्राये। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) षष्ठस्वरी। उच्छ्रायो राशीकरणम्। स्तूपयति धान्यं कृषकः। तुष्टूपयिषति। इति दुर्गादासः॥

स्तूप, य इर उच्छ्राये। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-सेट्।) षष्ठस्वरी। य, स्तूप्यति। इर्, अस्तूपत् अस्तूपीत्। अयमात् पुषादित्वान्नित्यं ङ इत्यन्ये। अतुस्तूपत्। इति दुर्गादासः॥

स्तूपः, पुं, (स्तूयते इति। स्तु+"स्तुवो दीर्घश्च।" उणा० ३। २५। इति प. दीर्घश्च।) मृदादिकूटः। राशीकृतमृत्तिकादिः। इति पुंलिङ्गसंग्रहे अमरः। ३। ५। १८॥ संघातः। निष्प्रयोजनम्। वलम्। इति सच्चिप्तसारोणादिवृत्तिः॥

स्तृ, ञ प्रीतिरक्षासमापने। इति कविकल्पद्रुमः॥ (स्वा०-पर०-सक०-अक०-च-अनिट्।) ञ, स्तृणोति। इति दुर्गादासः॥

स्तृ, ञ अ स्तृतौ। इति कविकल्पद्रुमः॥ (स्वा०-उभ०-सक०-अनिट्।) ञ अ, स्तृणोति स्तृणुते स्तृतिराच्छादनम्। इति दुर्गादासः॥

स्तृक्ष, गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) सप्तमस्वरयुक्तमध्यः। स्तृक्षति। अतस्तृक्षत्। इति दुर्गादासः॥

स्तृह, ऋ श वधे। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-वेट्।) ऋ, अस्तर्हीत् अस्तृहत्। श, स्तृहति। तिस्तर्हयिषति। इति दुर्गादासः॥

स्तृ ञ शि छादने। इति कविकल्पद्रुमः॥ (क्र्या०-उभ०-सक०-अनिट्।) ञ शि, स्तृणाति स्तृणीते। स्तीर्णः स्तीर्णिः। इति दुर्गादासः॥

स्तृह, ऋ श वधे। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-वेट्।) ऋ, अस्तर्हीत् अस्तृहत्। श, स्तृहती स्तृहन्ती। तिस्तृहयिषति। इति दुर्गादासः॥

स्तेन, त् क चौर्य्ये। इति कविकल्पद्रुमः॥ (अदन्त-चुरा०-पर०-सक०-सेट्।) अतिस्तेनत् धनं चौरः। इति दुर्गादासः॥

स्तेनं, क्ली, (स्तेनत् क चौर्य्ये+भावे अच्।) स्तेयम्। इत्यमरटीकायां भरतः। २। १०। २४॥

स्तेनः, पुं, (स्तेनयतीति। स्तेन+पचाद्यच्।) चौरः। इत्यमरः। २। १०। २४॥ तस्य दण्डनिर्णयो यथा,—
"स्तेनस्यातः प्रवक्ष्यामि विधिं दण्डविनिर्णये।
परमं यत्नमातिष्ठेत् स्तेनानां निग्रहे नृपः।
स्तेनानां निग्रहादस्य यशो राष्ट्रञ्च वर्द्धते॥
अन्नादे भ्रूणहा मार्ष्टि पत्यौ भार्य्यापचारिणी।
गुरौ शिष्यश्च याज्यश्च स्तेनो राजनि किल्विषम्॥
यस्तु तान्युपक्लृप्तानि द्रव्याणि स्तेनयेन्नरः।
तमाद्यं दण्डयेद्राजा यश्चाग्निं चोरयेद्गृहात्॥
येन येन यथाङ्गेन स्तेनो नृषु विचेष्टते।
तत्तदेव हरेत्तस्य प्रत्यादेशाय पार्थिवः॥"
इति मानवे ८ अध्यायः॥

तद्वैदिकपर्य्यायः। तृपुः १ तक्वा २ रिभ्वा ३ रिपुः ४ रिक्वा ५ रिहायाः ६ तायुः ७ तस्करः ८ वनर्गुः ९ हुरश्चित् १० मुषीवान् ११ मलिम्लुचः १२ अघशंसः १३ वृकः १४। इति चतुर्द्दशैव स्तेननामानि। इति वेदनिघण्टौ। ३। २४॥ *॥ देवाद्यनिवेद्याद्यादिभोक्ता। यथा, श्रीभगवद्गीतायाम्। ३। १२।
"इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः।
तैर्द्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः॥"

स्तेप, क क्षेपे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) एकादशस्वरी। क, स्तेपयति। तिस्तेपयिषति। इति दुर्गादासः॥

स्तेमः, पुं, (स्तिम आर्द्रे+घञ्।) आर्द्रीभावः। इत्यमरः। ३। २। २९॥

स्तेयं, क्ली, (स्तेनस्य भावः कर्म्म वा। स्तेन+"स्तेनाद्यन्नलोपश्च।" ५। १। १२५। इति यत्। नलोपश्च) चौर्य्यम्। तत्तु चौरस्य भावः तस्य कर्म्म च इत्यमरभरतौ। २। १०। २५॥ तस्य लक्षणं यथा, प्रायश्चित्तविवेके।
"प्रत्यक्षं वा परोक्षं वा रात्रौ वा यदि वा दिवा
यत् परद्रव्यहरणं स्तेयं तत् परिकीर्त्तितम्॥"
तत्करणे नरकं प्रतिप्रसवश्च यथा,—
व्यासोवाच।
"न हिंस्यात् सर्व्वभूतानि नानृतञ्च वदेत् क्वचित्
नाहितं नाप्रियं वाक्यं न स्तेनः स्यात् कदाचन
तृणं वा यदि वा शाकं मृदं वा जलमेव वा।
परस्यापहरन् जन्तुर्नरकं प्रतिपद्यते॥
न राज्ञां प्रतिगृह्णीयात् शूद्रपतितादपि।
न चान्यस्मादशक्तश्च निन्दितान् वर्जयेद्बुधः॥
नित्यं याचनको न स्यात् पुनस्तत् नैव याचयेत्॥
न शिव विषमित्याहुर्ब्रह्मस्वं विषमुच्यते।
देवस्वञ्चापि यत्नेन सदा परिहरेत्ततः॥
पुष्पे शाकोदके काष्ठे तथा मूले फले
अदत्तादानमस्तेयं मनुराह प्रजापतिः॥
ग्रहीतव्यानि पुष्पाणि देवार्च्चनविधौ द्विजैः
नैकस्मादेव नियतमननुज्ञाय केवलम्॥
तृणं काष्ठं फलं पुष्पं प्रकाशं वै हरेद्बुधः।
धर्म्मार्थं केवलं ग्राह्यमन्यथा पतितो भवेत्
तिलमुद्गयवादीनां मुष्टिर्ग्राह्या पथि स्थितैः
[illegible]
इति कौर्म्मे उपविभागे। १६। १—१०॥
स्तेयप्रायश्चित्तं यथा,—
"एतैर्व्रतैरपोह्यं स्यादेनो हिंसासमुद्भवम्।
स्तेयदोषापहर्त्तॄणां व्रतानां श्रूयतां विधिः।
धान्यान्नधनचौर्य्याणि कृत्वा कामात् द्विजोत्तम
स्वजातीयगृहादेव कृच्छ्राब्देन विशुध्यति॥
मनुष्याणान्तु हरणे स्त्रीणां क्षेत्रगृहस्य च।
कूपवापीजलानाञ्च शुद्धिश्चान्द्रायणं स्मृतम्॥
द्रव्याणामल्पसाराणां स्तेयं कृत्वान्यवेश्मनः।
चरेत् सान्तपनं कृच्छ्रं तत्पापपरिशुद्धये॥
भक्ष्यभोज्यापहरणे यानशय्यासनस्य तु।
पुष्पमूलफलानाञ्च पञ्चगव्यं विशोधनम्॥
तृणकाष्ठद्रुमाणान्तु पक्वान्नस्य गुडस्य तु।
तैलचर्म्मामिषाणान्तु त्रिरात्रं स्यादभोजनम्॥
मणिमुक्ताप्रवालानां ताम्रस्य रजतस्य तु।
अयस्कांस्योपलानाञ्च द्वादशाहं कणान्नभुक्॥
कार्पासकीटकोषाणां द्विशफैकशफस्य च।
पक्षिगन्धौषधानाञ्च रज्ज्वाश्चैव त्र्यहं पयः॥
एतैर्व्रतैरपोहेत पापं स्तेयकृतं बुधः॥"
इति मात्स्ये २०१ अध्यायः॥ *॥
स्तेयस्य दण्डविधिर्दण्डशब्दे द्रष्टव्यः। सुवर्णस्तेयप्रायश्चित्तं प्रायश्चित्तशब्दे द्रष्टव्यम्॥

स्तेयी, [न्] पुं, (स्तेयमस्यास्तीति। इनिः।) चौरः। यथा। सुमन्तुः। सुवर्णस्तेयी मासमाविरामटमहस्रं साज्याहुतीर्जुहुयात् त्रिरात्रमुपवसेत् तप्तकृच्छ्रेण वा पूतो भवति। इति प्रायश्चित्तविवेकः॥ स्वर्णकारः। इति केचित्॥

स्तैनं, क्ली, (स्तेनस्य चौरस्य भावः कर्म्म वा) स्तेन+अण्।) चौर्य्यम्। इत्यमरटीकायां भरतः। २। १०। २५॥

स्तैन्यं, क्ली, (स्तेनस्य भावः कर्म्म वा। स्तेन+ष्यञ्।) चौर्य्यम्। इत्यमरभरतौ। २। १०। २५॥ (यथा, महाभारते। १। २०२। ७।
"इमां हि पत्नीमस्माकं धर्म्मज्ञा धर्म्मचारिणीम्
संस्पृशेदीदृशो भावः शुचि स्तैन्यमिवामृतम्॥")

स्तैन्यः, पुं, (स्तेन एव। स्वार्थे ष्यञ्।) चौरः। इति शब्दरत्नावली॥

स्तैमित्यं, क्ली, (स्तिमितस्य भावः। स्तिमित+ष्यञ्।) जडता। इति राजनिर्घण्टः॥ (आर्द्रत्वम्। यथा, "स्तैमित्यं स्तिमितो वेगः।" इति वैद्यमाधवकरहस्तलिखितरोगविनिश्चयस्य ज्वराधिकारे॥ "स्तैमित्यमङ्गस्यार्द्रपटावगुण्ठितत्वमिव॥" इत्यस्य व्याख्याने विजयरक्षितम्।)

[illegible]
[illegible] । [illegible] । [illegible] ।
[illegible] । [illegible] । १० । १४६ ।
"[illegible]
[illegible]"
[illegible] । ८ । ६ । ६९ ।
"[illegible] ।
[illegible] ।")
स्तेय, त्रि, (स्तेन + यत् ।) [illegible] । इत्यमरः ।
३ । १ । १ (यथा, महाभारते । १ । १३ । १८ ।
"[illegible]
[illegible] ।")
स्तैन्य, पुं, (स्तेन + ष्यञ् । स्वार्थे यत् ।) चौरकर्म । इत्यमरः । (यथा, मनुः । १२ । ६७ ।
"[illegible]
[illegible] ।
[illegible] ।")
स्तोक, [क]त्रि, (स्तोकतीति । स्तु + कन् ।) अल्पम् । [illegible] निपात्यः ॥
(यथा, भागवते । ८ । ११ । १८ ।
"स्तोका स्तो [illegible] ।")
तद्वैदिकपर्य्यायः । रेभः १ जरिता २ कारुः ३ नदः ४ स्तामुः ५ कीरिः ६ गौः ७ सूरिः ८ नादः ९ छन्दः १० स्तुप् ११ रुद्रः १२ कृपण्युः १३ । इति त्रयोदश स्तोतृनामानि ॥ इति वेदनिघण्टौ । ३ । १६ ॥ (विष्णुः । इति महाभारतम् । १३ । १४९ । ८६ ॥)
स्तोत्रं, क्ली,(स्तूयतेऽनेनेति । स्तु + "दाम्नीशसयुजेति ।" ३ । २ । १८२ । इति ष्ट्रन् ।) स्तवः । इत्यमरः । १ । ६ । ११ ॥ तच्चतुर्विधं यथा, सामगे १२१ अध्याये ।
"अथ वा वर्णयिष्यामि विधिं मन्वन्तरस्य तु ।
यथो यजूंषि सामानि तथाथर्व प्रति दैवतम् ।
विधिहोत्रं तथा स्तोत्रं पूर्ववत् संप्रवर्त्तते ॥
द्रव्यस्तोत्रं कर्मस्तोत्रं विधिस्तोत्रं तथैव च ।
तथैवाभिजनस्तोत्रं स्तोत्रमेतच्चतुष्टयम् ॥
मन्वन्तरेषु सर्व्वेषु यथा भेदाद्भवन्ति ये ।
प्रवर्त्तयन्ति तेषां वै ब्रह्मस्तोत्रं पुनः पुनः"
स्तोभः, पुं, (स्तुभ + घञ् ।) सामावयवविशेषः गीतालापपूरणाचरः । स च त्रयोदश । यथा । अयं वाक्लोको हाउकारो १ वा ।
इकार२श्चन्द्रमा अथकारः ३ । आत्मेहकारः ४ अग्निरीकारः ५ आदित्य ऊकारः ६ । निहव एकारो ७ विश्वे देवा औहोइकारः ८ प्रजापतिर्हिंकारः ९ । प्राणः स्वरो १० ऽन्नं या ११ वाग्विराङ्निरुक्त १२ स्त्रयोदशः स्तोभः सञ्चरो हुंकारः १३ । दुग्धे ऽस्मै वाग्दोहं यो वाचो दोहोऽन्नवानन्नादो भवति य एतामेवं साम्नामुपनिषदं वेदोपनिषदं वेद । इति छान्दोग्योपनिषद्भाष्ये प्रथमप्रपाठकः समाप्तः ॥ * ॥
अस्य भाष्यम् । भक्तिविषयोपासनं सामावयवसम्बन्धमित्यतः सामावयवान्तरस्तोभाक्षर-
[illegible] इति संहत्य [illegible]
[illegible] सामावयवा [illegible] स्तोभा [illegible] इत्यवधार्य । [illegible]
[illegible] यत् [illegible] स्तोभाः [illegible] इत्येव
भूपासन ॥१॥
वाग्घाउकारो [illegible] सामनि हाउकार
[illegible] वायुरायनहाइ [illegible] योनि-
त्वसम्बन्धात् सामान्याद्धाउकारं वायुदृष्ट्यो-
पासीत ॥२॥
चन्द्रमा अथकारः चन्द्रदृष्ट्या अथकारमुपासीत अन्न [illegible] चन्द्रः अथकाराकारसामान्याच्च । ३ ।
आत्मा इह कार इहेति स्तोभः प्रत्यक्षो ह्यात्मा इहेति व्यपदिश्यते इहेति च स्तोभः । ४ ।
तत्सामान्यादग्निरीकार इति । ई निधनानि चाग्नेयानि सर्व्वाणि सामान्यतः ।५।
तत्सामान्यादादित्य ऊकारः । उच्चैरूर्द्धं सन्तं चादित्यं गायन्त्यूकारश्चायं स्तोभश्चादित्यदैवत्ये साम्नि स्तोभ इत्यादित्य ऊकारः । ६ ।
निहव इत्याह्वानमेकारस्तोभः एहीति चाह्वयन्तीति । ७ ।
तत्सामान्याद्विश्वे देवा औहोइकारो वैश्वदेव्ये साम्नि स्तोभस्य दर्शनात् ।८।
प्रजापतिर्हिंकार अनिरुक्तत्वाद्धिंकारस्य चाव्यक्तत्वात् । ९ ।
प्राणः स्वरः स्वर इति स्तोभः प्राणस्य च स्वरहेतुत्वसामान्यात् । १० ।
अन्नं या या इति स्तोभोऽयमन्नेन होदं यातीत्यतः । ११ ।
तत्सामान्यात् वागिति स्तोभो विराडन्नं दैवताविशेषो वा वैराजे साम्नि स्तोभदर्शनात् अनिरुक्तोऽव्यक्तत्वात् इदमिदमिति निर्व्वक्तुं न शक्यत इत्यतः ।१२।
सञ्चरो विकल्पमानस्वरूप इत्यर्थः कोऽसाविल्याह हुंकारोऽव्यक्तो व्यायतोऽनिरुक्तविशेषअस्य इत्यभिप्रायः ॥१३॥
[illegible] पासनाफलमाह । दुग्धेऽस्मै वाग्
[illegible] तथं य एतामेवं यथोक्तलक्षणं
[illegible] न [illegible] स्तोभाक्षरविषयामुपनिषदं
इति [illegible] यथोक्तं फलमित्यर्थः । हिर-
[illegible] सामावयवविषयो
[illegible] शुभाशुभलक्षणानि वेति ॥ * ॥ इति
[illegible] दशितयस्य परम-
[illegible] भगवत्
[illegible] प्रथमः
पादस्य [illegible] स्तभ-
प्रपाठकः [illegible]
नम् । इति हि [illegible]
साङ्केत्यं पारिहा [illegible]
वैकुण्ठनामग्रहणम् [illegible]
इति स्तोभा [illegible]
"साङ्केत्यं पुत्रादौ साङ्केतितम् । [illegible]
[illegible] वा
[illegible]
[illegible] रम् ।
[illegible] तम् ॥
[illegible] । स्तोभं गीतालापपूरणाचरं स्तभ । किमर्थं किं विगृह्णीति सामगानमपि च प्रस्तरमीयारणम् ।"इति तट्टीकायां बोधरनामी ॥
स्तोम, त् क श्लाघने । इति कविकल्पद्रुमः ॥ (अदन्त चुरा०-पर०-सक०-सेट् ।) अनुस्तोमत् । इति दुर्गादासः ॥
स्तोमं क्ली, (स्तूयते इति । स्तु + "अर्त्तिस्तुसुहु-" इति ।" उणा० १ । १३८ । इति मन् ।) मस्तकम् । धनम् । धान्यम् । लौहाग्रदण्डः । वक्र, त्रि । इति केचित् ॥
स्तोमः, पुं, (स्तु + मन् ।) समूहः । इत्यमरः । २।५।३९ । (यथा, उत्तररामचरिते । १मङ्के
"अयोध्यामपसत्यमा यमुनातीरवासिनाम् ।
लवणत्रासितः स्तोमस्त्रातारं त्वामुपस्थितः॥")
यज्ञ. इति हेमचन्द्रः ॥ स्तवः । इति चामरः ।
३ । ३ । २४१ ॥
स्तोषिकं,क्ली, बुद्धद्रव्यविशेषः । इति त्रिकाण्डशेषः ॥ चौवा इति हिन्दी भाषा ॥
स्त्यानं, क्ली, (स्त्यै + क्तः ।) स्निग्धम् । प्रतिध्वानम् । घनत्वम् । (यथा, उत्तररामचरिते । २ अङ्के ।
"दधति कुहरभाजामत्र भल्लूकयूना-
मनुरसितगुरूणि स्त्यानमम्बूकृतानि ॥")
आलस्यम् । इति विश्वमेदिन्यौ ॥
स्त्यानः, त्रि, संहतिकर्त्ता । ध्वनिकर्त्ता । इति स्त्यैधातोः कर्त्तरि क्तप्रत्ययेन निष्पन्नः । इति मुग्धबोधव्याकरणम् ॥
स्त्येनः, पुं, (स्त्यायतीति । स्त्यै + "श्यास्त्याहृञविभ्य इनच् ।" उणा० २ । ४६ । इति इनच् ।) चौरः । अमृतम् । इत्युणादिकोषः ॥
स्त्यै संहतौ । ध्वनौ । इति कविकल्पद्रुमः ॥(भ्वा-पर०-अक०-अनिट् ।) दन्त्यादिरन्तःस्थायुक्तमध्यः । स्त्यायति तिष्यायति । इति दुर्गादासः ॥
स्त्री, स्त्री, (स्त्यायति गर्भो यस्यामिति । स्त्यै + "स्त्यायतेः ड्रट् ।" उणा० ४ । १६५ । ड्रट् । डित्वात् टिलापः । टित्वात् ङीप् ।) स्तनयोन्यादिमती । तत्पर्य्यायः । योषित् २अबला३ योषा ४ नारी ५ सीमन्तिनी६ वधूः७ प्रतीपदर्शिनी ८ वामा ९ वनिता १० महिला ११ इत्यमरः । २ । ६ । २ ॥ प्रिया १२ रामा १३ [illegible] ललनः १४ जनी १५ योषिता१६ [illegible] जोषा १८ जोषिता १९ व[illegible] लिका २१ महेला २२ [illegible] पाठः । शर्व्वरी २३ [illegible] विपरीतं वशि सन्ततम् । जटाधरः ॥ [illegible] गरिष्ठञ्च महीतले ॥
[illegible] । [illegible] वापि जारं पश्यति कामतः ।
भद्दृष्ट्या कटाक्षेण शश्वत्पापीयसी मुदा ॥
सुवेशं पुरुषं दृष्ट्वा युवानं रतिशूरकम् ।
योनिः क्लिद्यति नारीणां कामुकीनां निरन्तरम्
अधमं चिन्तयेत् शश्वत् जारञ्च परमं मुदा

गुरुभिर्भर्त्सिता सा च रक्षिता च गतेन च ।
तथापि जारं कुरुते नापि साध्वा नृपैरपि ॥
नास्ति तस्याः प्रियं किञ्चित् सर्व्वं कार्य्यवशेन च ।
गावस्तृणमिवारण्ये प्रार्थयन्ती नवं नवम् ॥
शिश्नग्रामा जले रेखा तस्याः प्रीतिस्तथैव च ।
अधर्म्मयुक्ता सततं कपटं वक्ति निश्चितम् ॥
व्रते तपसि धर्म्मे च न मनो सत्यकर्म्मणि ।
न गुरौ न च देवेषु जारे स्निग्धञ्च सन्ततम् ॥
स्त्रीजातिविशिष्टानाञ्च कथा च कथिता मया ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ।८४।२६-४० ॥
स्त्रीसंसर्गे दोषो यथा,—

सनत्कुमार उवाच ।

"अयि भ्रातः किं करोषि कुशलं युवतीपते ।
स्त्रीपुंसोर्म्मैथुने प्रेम नित्यं तन्निन्द्यमुत्तमम् ॥
धर्म्मस्य ज्ञानमार्गस्य अर्गलद्वारकपाटकम् ।
मोक्षमार्गव्यवहितं चिरं बन्धनकारणम् ॥
गर्भवासस्य बीजञ्च परं नरककारणम् ।
पीयूषबुद्ध्या गरलं भुङ्क्ते पापी नराधमः ॥"
इति च तत्रैव । १३० । ११—१३ ॥ * ॥
स्त्रीणां स्वभावो यथा,—
"स्त्रीस्वभावं चरित्रञ्च श्रावयं पापकारकम् ॥
स्थानं नास्ति रहो नास्ति नास्ति तत्र विभावना ।
तेन नारद नारीणां सतीत्वमुपजायते ॥
एकशाला यदा गौरी श्यामा वा वरवर्णिनी ।
मध्यगन्धा ननन्दा च यदा लीलास्तथा स्त्रियः ।
दृष्ट्वैव पुरुषं हृद्या चरन्ति मुनिसत्तम ।
स्वभाव एव नारीणां संस्पर्शस्य तु कारणम् ॥"
इति वाराहे सूर्य्यप्रतिष्ठानामाध्यायः ॥ * ॥
अपि च ।
"विश्वासघाती कृतघ्नाश्च स्त्रीणां चालः कुटिलता
स्वाधीनां भोजनं चौर्य्यं सर्व्वोपायैः प्रगल्भता
साहसञ्च वधी दम्भः कुत्सितं चाप्यभाषणम् ।
इत्थं यथा तु नारीणां ब्राह्मणस्य निरुक्तिता
दुःसहाः छिद्रिणो दोषा दुरन्ताश्च सदैव

स्त्रियः ।
ताडिता मार्द्दवं यान्ति न ते सत्कारभाजनाः ॥
कामोन्मादं च यत्ते यस्मात् बाध्यतां च समागमे ।
किंवचनादि कथिं च भार्य्यांश्च विभजयेत् ॥
स्त्रीणां हिरण्मयाकारः स्वधा धैव पश्चिमा ।
[illegible]
न भार्य्या न स्त्रियो न ज्ञातिन स्त्रियं व्रजेत् ।
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

नदी पातयते कूलं नारी पातयते कुलम् ।
नारीणाञ्च नदीनाञ्च स्वच्छन्दललिता गतिः ॥
नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः ।
नान्तकः सर्व्वभूतानां न पुंसां वामलोचना ॥
मनोऽनुकूलाः प्रमदा रूपवत्यः स्वलङ्कृताः ।
वासः प्रासादपृष्ठेषु स्वर्गः स्याच्छुभकर्म्मणः ॥
न दानेन न मानेन नार्ज्जवेन न सेवया ।
न शस्त्रेण न शास्त्रेण सर्व्वदा विषमाः स्त्रियः ॥
इति गारुडे १०८ अध्यायः ॥ * ॥
स्त्रीवधनिषेधो यथा,—
"अवध्याञ्च स्त्रियं प्राहुस्तिर्य्यग्योनिगतेष्वपि ।
न त्वं सुग्रीवयोपाल न धर्म्मं त्यक्तुमर्हसि ॥"
इति वह्निपुराणे ग्रयोतपाख्याननामाध्यायः ॥
स्त्रीणामात्मदाने अस्वातन्त्र्यं यथा,—
"ततोऽब्रवीत् माधवजा नाहं त्वां पार्थिवात्मज ।
दातुं शक्ता तथात्मानं स्वतन्त्रा न हि योषितः ॥"
इत्युपक्रम्य ॥
"विश्वकर्म्मसुता साध्वी नाम्ना चित्राङ्गदाभवत् ।
सा कदाचिन्महारण्ये सखीभिः परिवारिता ।
जगाम नैमिषं नाम स्नातुं कमललोचना ।
सा स्नातुमवतीर्णा च यथाभ्यागान्नरेश्वरः ॥
सुदेवतनयो धीमान् सुरथो नाम नामतः ।
तां ददर्श च तन्वङ्गीं शुभाङ्गीं मदनातुरः ॥
मंस्तत्तः सा सखी प्राह वचनं सत्यसंयुता ।
धर्मो नराधिपसुतो मदनेन कदर्थ्यते ।
मदर्थञ्च धनं वित्यं त्वप्रदानं सुरूपिणः ॥
सख्यस्तामब्रुवन् बाले न प्रगल्भामि सुन्दरि ।
न स्वातन्त्र्यं तवास्तीह प्रदाने स्वात्मनोऽनघे ॥
पिता तवास्ति धर्म्मिष्ठः सर्व्वशिल्पविशारदः ।
न ते युक्तमिहात्मानं दातुं नरपतेः स्वयम् ॥"
इति वामनपुराणे ४० अध्यायः ॥ * ॥
स्त्रीणां मध्ये गुरवो यथा,—
"मातामही मातुलानी तथा मातुश्च सोदरा ।
श्वश्रूः पितामही ज्येष्ठा धात्री च गुरवः स्त्रीषु ॥
इत्युक्तो गुरुवर्गोऽयं मातृतः पितृतो द्विजाः ।
अनुवर्त्तनमेतेषां मनोवाक्कायकर्म्मभिः ॥"
इत्यादि ॥
"गुरूणामपि सर्व्वेषां पूज्याः पञ्च विशेषतः ।
तेषामाद्यास्त्रयः श्रेष्ठास्तेषां माता सुपूजिता ॥
यावत् पिता च माता च द्वावेतौ निर्व्वि-
कारिणौ ।
तावत् सर्व्वं परित्यज्य पुत्रः स्यात्तत्परायणः ॥
माता पिता च सुप्रीतौ स्यातां पुत्रगुणैर्यदि ।
स पुत्रः सकलं धर्म्मं प्राप्नुयात्तेन कर्म्मणा ॥
नास्ति मातृसमं दैवं नास्ति मातृसमो गुरुः ।
तयोः प्रत्युपकारोऽपि न कथञ्चन विद्यते ॥
तयोर्नित्यं प्रियं कुर्य्यात् कर्म्मणा मनसा गिरा ।
न ताभ्यामननुज्ञातो धर्म्ममन्यं समाचरेत् ॥"
इति कौर्म्मे उपविभागे ।११।७,११,१४-२०॥
अविभक्तानां स्त्रियां विभागकृत्यं यथा,—
"ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव हरेद्धनम् ।
संसृष्टिनस्तु संसृष्टी सोदरस्य तु सोदरः ॥"

स्त्रीणां मेध्यत्वं तात्पर्य्यतश्च यथा,
"सोमः शौचं ददौ तासां गन्धर्व्वश्च

पावकः सर्व्वभक्षित्वं मेध्या वै योषितो
व्यभिचाराद्दतौ शुद्धिर्गर्भे त्यागो विधीयते
गर्भभर्त्तृवधे तासां तथा महति पातके ॥
सुरापी व्याधिता द्वेष्टी ...
मर्त्तव्या चान्यया स्त्री न ज्यायसी हि
तस्याः प्रशंसा यथा,—
"यत्राविरुद्धं दम्पत्योस्त्रिवर्गस्तत्र वर्द्धते ।
मृते जीवति वा पत्यौ या ...
सेह कीर्त्तिमवाप्नोति मोदते चोमया सह ।
सुभां त्यजंस्तृतीयां दाप्यो ह्यामरणं ।
स्त्रीभिर्भर्त्तृवचः कार्य्यं एष धर्म्मः परः ।
स्त्रीगमनार्हकालो यथा,—
षोड़शर्त्तुर्निशाः स्त्रीणां तासु युग्मासु

ब्रह्मचार्य्येव पर्व्वण्याद्याश्चतस्रस्तु वर्ज्जयेत् ।
एवं गच्छन् स्त्रियं क्षामां मघां मूलञ्च
लक्षण्यं जनयेदेव पुत्रं रोगविवर्ज्जितम् ॥
यदा कामी भवेद्वापि स्त्रीणां वरमनुस्मरन् ।
स्वदारनिरतश्चैव स्त्रियो रक्ष्या यतः स्मृताः ॥"
भूषणादिना भर्त्रादिभिः स्त्रियः पूज्या यथा,
"भर्तृभ्रातृपितृज्ञातिश्वश्रूश्वशुरदेवरैः ।
बन्धुभिश्च स्त्रियः पूज्या भूषणाच्छादनाशनैः
स्त्रीभिः श्वशुरयोः पादवन्दनं सदा
यथा,—
"संयतोपस्करा दक्षा हृष्टा व्ययपराङ्मुखी ।
श्वश्रूश्वशुरयोः कुर्य्यात् पादयोर्वन्दनं सदा ।
प्रोषितभर्त्तृकया क्रीड़ादिकं वर्ज्जनीयं यथा
"क्रीड़ां शरीरसंस्कारं समाजोत्सवदर्शनम् ।
हास्यं परगृहे यानं त्यजेत् प्रोषितभर्त्तृका ॥
ज्येष्ठया स्त्रिया सह धर्म्मकर्म्मानुष्ठानं
यथा,—
"ज्येष्ठां धर्म्मविधौ कुर्य्यात् कनिष्ठां ...
दाहयित्वाग्निहोत्रेण स्त्रियं व्रतवतीं पतिः ॥
आहरेद्विधिवद्दारानग्नींश्चैवाविलम्बितः ।
हिता भर्त्तुर्हिते गच्छेदिह कीर्त्तिमवाप्य च ॥
इति गारुड़े । ८५ । १९—३१ ॥
अष्टमस्त्रीणां कुलनाशकत्वं यथा,—
"अष्टमस्त्रीणां नद्यः स्त्रीभिदाम्भश्च मैथुनम् ।
पैशुन्यं जनवार्त्तानां वित्तं दृष्ट्वा परदारकम् ।
राज्यश्रीश्चैव ... ।
आचारं पौरुषार्थं कुमन्त्रं च ...
सर्व्वं तथास्ता नियताः पतन्ता ...
स्त्रियः ॥"

स्त्रीमात्रवधे वारणविधिरादि यथा —
समादत्ते न ... ।
स्त्रीमात्रे न ... ॥
... ।
... ॥
... ।

मर्य्यादपेतमर्य्यादाः स्त्रियस्तिष्ठन्ति भर्तृषु ॥"
इति गारुडे । ११५ । ५८—५८ ; ६२—६५॥
स्त्रियो धन्या यथा,—
"योषितः साधु धन्यास्तास्ताभ्यो धन्यतरोऽस्ति
कः ॥"
इत्युपक्रम्य ।
"कलिः साध्विति यत् प्रोक्तं शूद्रः साध्विति
योषितः ।
तथाह भगवान् साधुर्धन्याश्चेति पुनः पुनः ॥
तत् सर्व्वं श्रोतुमिच्छामो न चेद्गुह्यं महामुने
इत्युक्तो मुनिभिर्व्यासः प्रहस्येदमथाब्रवीत् ॥
योषिच्छुश्रूषणं भर्त्तुः कर्म्मणा मनसा गिरा ।
कुर्व्वती समवाप्नोति तत्सालोक्यं ततो द्विजाः ॥
नातिक्लेशेन महता तानेव पुरुषो यथा ।
तृतीयं व्याहृतं तेन मया साध्विति योषिताम्॥"
इति विष्णुपुराणे । ६ । २ । ८२—८३ ॥
वेश्यास्त्रीणां धर्म्मा यथा,—
श्रीकृष्णमहिष्य ऊचुः ।
वेश्यानामपि यो धर्म्मस्तन्नो ब्रूहि तपोधन ।
दाल्भ्य उवाच ।
यः कश्चित् शुल्कमादाय गृहमेष्यति वः सदा ।
निश्छद्मनैवोपचर्य्यः स तदान्यत्र दाम्भिकात् ॥
देवतानां पितॄणाञ्च पुण्याहे समुपस्थिते ।
गोभूहिरण्यदानानि प्रदेयानि च शक्तितः ॥
ब्राह्मणेभ्यो वरारोहाः कार्य्याणि वचनानि च ।
यच्चाप्यन्यद्व्रतं सम्यगुपदेक्ष्यामि तत्त्वतः ॥
अविचारेण सर्व्वाभिरनुष्ठेयन्तु तत् पुनः ।
संसारोत्तारणायालमेतद्वेदविदो विदुः ॥
यदा सूर्य्यदिने हस्तः पुष्यो वाथ पुनर्व्वसुः ।
भवेत् सर्व्वौषधिस्नानं सम्यङ्नारी समाचरेत् ।
तदा पञ्चशरस्याथ सन्निधात्वमिष्यति ॥
अर्च्चयेत् पुण्डरीकाक्षमनङ्गस्यानुकीर्त्तनैः ।
कामाय पादौ संपूज्य जङ्घे वै मोहकारिणे ॥
मेढ्रं कन्दर्पनिधये कटिं प्रीतिमते नमः ।
नाभिं सौख्यसमुद्राय रामाय च तथोदरम् ॥
हृदयं हृदयेशाय स्तनावाह्लादकारिणे ।
उत्कण्ठायेति वै कण्ठमास्यमानन्दकारिणे ॥
वामांसं पुष्पचापाय पुष्पबाणाय दक्षिणम् ।
नमोऽनङ्गाय वै मौलिं विलोलायेति च ध्वजम्
सर्व्वात्मने शिरस्तद्वद्देवदेवस्य पूजयेत् ।
नमः शिवाय शान्ताय पाशाङ्कुशधराय च ॥
गदिने पीतवस्त्राय शङ्खचक्रधराय च ॥
नमो नारायणायेति कामदेवात्मने नमः
नमः शान्त्यै नमः प्रीत्यै नमो रत्यै श्रियै नमः।
नमः पुष्ट्यै नमस्तुष्ट्यै नमः सर्व्वार्थसम्पदे ॥
एवं संपूज्य गोविन्दमनङ्गात्मानमीश्वरम् ।
गन्धैर्म्माल्यैस्तथा धूपैर्नैवेद्येन च भामिनी ॥
तत आहूय धर्म्मज्ञं ब्राह्मणं वेदपारगम् ।
अव्यङ्गावयवं पूज्य गन्धधूपार्च्चनादिभिः ॥
शालेयतण्डुलप्रस्थं घृतपात्रेण संयुतम् ।
तस्मै विप्राय सा दद्यान्माधव प्रीयतामिति ॥
यथेष्टाहारयुक्तं वै तमेव द्विजसत्तमम् ।
रत्यर्थं कामदेवोऽयमिति चित्तेन धार्य्यताम् ॥
यद्यदिच्छति विप्रेन्द्रस्तत्तत् कुर्य्यात् विलासिनी
एवमादित्यवारेण सदा तद्व्रतमाचरेत् ।
तण्डुलप्रस्थदानञ्च यावन्मासांस्त्रयोदश ॥
ततस्त्रयोदशे मासि सम्प्राप्ते तस्य भाविनी ।
विप्रस्योपकरैर्युक्तां शय्यां दद्याद्विलक्षणाम् ।
सोपधानकविश्रामां स्वास्तरावरणां शुभाम् ॥
दीपिकोपानहच्छत्रं पादुकासनसंयुताम् ।
सपत्नीकमलङ्कृत्य हेमसूत्राङ्गुलीयकैः ॥
सूक्ष्मवस्त्रैः सकटकैर्धूपमाल्यानुलेपनैः ।
कामदेवं सपत्नीकं गुड़कुम्भोपरिस्थितम् ॥
ताम्रपात्रासनगतं हैमं नेत्रपटावृतम् ।
सकांस्यभाजनोपेतमिक्षुदण्डसमन्वितम् ।
दद्यादेतेन मन्त्रेण तथैकां गां पयस्विनीम्॥
यथान्तरं न पश्यामि कामकेशवयोः सदा ।
तथैव सर्व्वकामाप्तिरस्तु विष्णो सदा मम ॥
यथा न कामिनी देहात् प्रयाति तव केशव ।
तथा ममापि देवेश शरीरे त्वं कुरु प्रभो ॥
तथा च काञ्चनं देवं प्रतिगृह्य द्विजोत्तमः ।
कोऽदात् कस्मा अदादिति वैदिकं मन्त्रमी-
रयेत् ॥
ततः प्रदक्षिणीकृत्य विसर्ज्य द्विजसत्तमम् ।
शय्यासनादिकं सर्व्वं ब्राह्मणस्य गृहं नयेत् ॥
ततः प्रभृति योऽन्योऽपि रत्यर्थं गेहमागतः ।
सामान्यं सूर्य्यवारे च स संपूज्यो भवेत्तदा ॥
एवं त्रयोदशं यावत् मासमेकं द्विजोत्तमम् ।
तर्पयीत यथाकालं प्रोषितेऽन्यं समाचरेत् ॥
तदनुज्ञारूपवन्तं यावदस्यागमो भवेत् ।
आत्मनोऽपि तथा विघ्नं गर्भसूतकराजसम् ॥
दैवं वा मानुषं वा स्यादुपरागेण वा ततः ।
साचारानिष्टयशसो यथाशक्त्या समाचरेत् ॥
एतद्वः कथितं सम्यग्भवतीनां विशेषतः ।
स्वधर्म्मोऽयं यतो भाव्यो वेश्यानामिह सर्व्वदा ॥
पुरुहूतेन यत् प्रोक्तं दानवीषु पुरा मया ।
तदिदं साम्प्रतं सर्व्वं भवतीष्वपि युज्यते ॥
सर्व्वपापप्रशमनमनन्तफलदायकम् ।
कल्याणिनीनां कथितं कुरुध्वञ्च वरानना ॥
करोति याशेषमखण्डमेतत्
कल्याणिनी माधवलोकसंस्था ।
सा पूजिता देवगणैरशेषै-
रानन्दकृत् स्थानमुपैति विष्णोः ॥
तपोधनः सोऽप्यभिधाय चैत-
दनङ्गदानव्रतमङ्गनानाम् ।
स्वस्थानमेष्यत्यनु ताः समस्त-
मित्यं करिष्यन्ति च वेदयोने ॥"
इति मत्स्यपुराणेऽनङ्गदानव्रतम्।७०।२०—६४
स्त्रीरोगनाशकौषधं यथा,—
हरिरुवाच ।
"एकं पुनर्नवामूलं अपामार्गस्य वा शिव ।
सरसं योनिर्विक्षिप्तं वराङ्गस्य व्यथां हरेत् ॥
प्रसूतिवेदनाञ्चैव तरुणीनां व्यथां हरेत् ॥
भूमिकुष्माण्डमूलं वै शालितण्डुलवारिणा ।
समाहं दुग्धपीतं स्यात् स्त्रीणां बहुपयस्करम्॥
रुद्रेन्द्रवारुणीमूललेपात् स्त्रीस्तनवेदना ।
नश्येत् घृतविपक्वा च कार्य्यावल्यस्तु पालिका ।
भक्षिता सा महेशान योनिशूलं विनाशयेत् ॥
प्रलेपिता कारवेल्लमूलेनैव विनिर्गता ।
योनिः प्रवेशमायाति नात्र कार्य्या विचारणा ॥
नीलीपटोलमूलानि साज्यानि तिलवारिणा ।
पिष्टान्येषां प्रलेपो वै ज्वालागर्भगरोगनुत् ॥
पाठामूलं रुद्रपीतं पिष्टं तण्डुलवारिणा ।
पापरोगहरं स्याच्च कुष्ठपानन्तथैव च ॥
वाप्योदकञ्च समधु पीतमन्तर्गतस्य वै ।
पापरोगस्य सन्तापनिवृत्तिं कुरुते शिव ॥
कदलीलिकुचं पीतं पिष्टा तण्डुलवारिणा ।
स्त्रीणाञ्चैव महादेव रक्तस्रावं हि वारयेत् ॥
घृततुल्या रुद्र लाक्षा पीता क्षीरेण वै सह ।
प्रदरं हरते रोगं नात्र कार्य्या विचारणा ॥
द्विजयष्टीत्रिकटुकं चूर्णं पीतं हरेच्छिव ।
तिलक्वाथेन संयुक्तं रक्तगुल्मं स्त्रिया हर ॥
कुसुमस्य निवहञ्च तरुणीनां महेश्वर ।
रक्तोत्पलस्य वै कन्दं शर्करातिलसंयुतम् ॥
पीतं सशर्करं स्त्रीणां धारयेत् गर्भपातनम् ।
रक्तस्रावस्य नाशः स्यात् शीतोदकनिषेवणात्॥
पीतन्तु काञ्जिकं रुद्र कथितं शरपुङ्खया ।
हिङ्गु सैन्धवसंयुक्तं शीघ्रं स्त्रीणां प्रसूतिकृत् ॥
मातुलुङ्गस्य वै मूलं कटिबद्धं प्रसूतिकृत् ।
अपामार्गस्य वै मूलं योनिस्थञ्च प्रसूतिकृत् ॥
अपामार्गस्य वै मूले गर्भवत्यास्तु नामतः ।
उत्पाट्यमाने सकले पुत्रः स्यादन्यथा सुता ॥
अपामार्गस्य वै मूले नारीणां शिरसि स्थिते ।
गर्भशूलं विनश्येत नात्र कार्य्या विचारणा ॥
कर्पूरमदनफलं मधुकैः पूरितः शिव ।
योनिः शुभः स्याद्वृद्धाया युवत्याः किं पुन-
र्हर ॥
माषस्य विदलान्येव वितुषाणि महेश्वर ।
घृतभावितशुष्काणि पयसा साधितानि वै ॥
समध्वाज्यपयोभिश्च भक्षयित्वा च कामयेत् ।
स्त्रीणां शतं महादेव तत्क्षणान्नात्र संशयः ॥
रसयेदेरण्डतैलेन गन्धकेन शुभो भवेत् ।
त्रिफलोदकसंघृष्टो वल्कव्रणाद्भवेत् ॥
दुग्धं वितुषमाषैश्च शिम्बीबीजैश्च साधितम् ।
अपामार्गस्य तैलेन पीतं स्त्रीशतकामकृत् ॥"
इति गारुडे १८६ अध्यायः ॥
(स्त्रीसम्भूतेः कारणं यथा,—
"स्त्रीरेतसोऽधिकत्वेन हीनशुक्रं स्त्रियादपि ।
रजसोऽप्यधिकत्वेन स्त्रीसम्भूतिः प्रजायते ॥
सप्तधातुवत्त्वेनापि प्रकृत्या विकृतः समं ।
ऋतुव्यासरजःस्त्रीणां या या भवति भावना ॥
सात्त्विकी राजसी वापि तामसी वापि सत्तम ।
तादृशं जनयेदाशु गुणैर्वा तादृशैरपि ॥"
इति हारीते शारीरस्थाने प्रथमेऽध्याये ॥
द्व्यक्षरच्छन्दोविशेषः । यथा, छन्दोमञ्जर्य्याम् ।
"गौ स्त्री । गोपस्त्रीभिः स्त्री रमे ।")

स्त्रीगवी, स्त्री, (स्त्री चासौ गौश्चेति । समासे टच् । स्त्रियां ङीप् ।) धेनुः । गाइ इति भाषा । तत्पर्य्यायः । तुम्बा २ निलिम्पा ३ गोहिनी ४ । इति त्रिकाण्डशेषः ॥ (यथा, काशिकायाम् । ५ । ४ । ९१ । "स्त्रीगवीषु पुङ्गवानां गर्भाधानाय प्रथममुपसर्गमुपस्थित॥")

स्त्रीगुरु, पुं, (स्त्री चासौ गुरुश्चेति ।) दीक्षाकर्त्री । मन्त्रदात्री । तल्लक्षणं यथा,—
"साध्वी चैव सदाचारा गुरुभक्ता जितेन्द्रिया ।
सर्व्वमन्त्रार्थतत्त्वज्ञा सुशीला पूजने रता ॥
सर्व्वलक्षणसम्पन्ना रूपिका पद्मलोचना ।
रत्नालङ्कारसंयुक्ता वर्णाभरणभूषिता ॥
शान्ता कुलीना कुलजा चन्द्रास्या सर्व्वसुद्धिगा ।
अनन्तगुणसम्पन्ना रुद्रत्वदायिनी प्रिया ॥
गुरुरूपा मुक्तिदात्री शिवज्ञाननिरूपिणी ।
गुरुयोग्या भवेत् सा हि विधवा परिवर्ज्जिता ॥
स्त्रियो दीक्षा शुभा प्रोक्ता मातुश्चाष्टगुणा स्मृता ।
पुत्रिणी विधवा ग्राह्या केवलानन्दकारिणी ॥
सिद्धमन्त्रं यदि तदा वर्ज्जनीयादिविभ्रमः ।
स्वप्ने लब्धे तत्र मातुरष्टगुणं स्मृतम् ॥
सर्व्वं वा प्रविभज्य ददाति यदि सन्ततम् ।
सहस्रगुणमाप्नोति यदि सा पुत्रिणी सती ॥
यदि माता स्वीयमन्त्रं ददाति तनयाय च ।
तदाष्टसिद्धिमाप्नोति भक्तिमार्गे न संशयः ॥
तदेव दुर्ल्लभं देव यदि माता प्रदीयते ।
आदौ भक्तिं ततो मुक्तिं सम्प्राप्य कामरूप
धृक् ।
तत्त्वकोटिसिद्धार्थं जानाति नात्र संशयः ॥
पत्नी वा यदि वा माता ददाति च मनस्त्वयम्
दुर्ल्लभा स्त्रीऽपि कन्या दानस्वत्वमवाप्नुयात् ॥
यदि भाग्यवशेनैव लभ्यते त्वत्सुदर्शिना ।
तदा सिद्धिमवाप्नोति तत्र सर्व्वं विचारयेत् ॥
स्त्रीदत्तमन्त्रदानेन न कुर्य्याद्गुरुविलम्बनम् ॥"
इति मातृगुरुवचनम् ॥
[illegible] प्रथमखण्डे ४ पटल. पूर्व्वखण्डे [illegible] पटलस ॥ ० ॥ [illegible] गुरुमाधनस्य [illegible] पटले तन्[illegible] [illegible] पटले [illegible] । [illegible] पटले [illegible] २ [illegible] ॥

[illegible], पुं, ([illegible] यो [illegible] ।) [illegible] ।
[illegible] ॥
[illegible] [अ] पुं, ([illegible] + [illegible] ।) [illegible] । इति [illegible] ॥
[illegible], ([illegible] ।) [illegible] । इति [illegible] ॥
[illegible] ।) [illegible] । [illegible] ॥

स्त्रीजित, पुं, (स्त्रिया जितः ।) स्त्रैणः । स्त्रीवशीभूतः । यथा, ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे । ४२ । १५ ।
"स्त्रीजितस्पर्शमात्रेण सर्व्वं पुण्यं प्रणश्यति ।
न भूमौ पातकी पापात् पापिनां स्त्रीजितात् परः ॥"

स्त्रीता, स्त्री, स्त्रीत्वम् । स्त्रिया भावः इत्यर्थे तल्-त्वप्रत्ययटाप्प्रत्ययाभ्यां निष्पन्नम् ॥

स्त्रीधनं, क्ली, (स्त्रियाः धनम् ।) स्त्रीस्वत्वास्पदीभूतधनम् । तत् षड्विधम् । यथा,—
"अध्यग्न्यध्यावाहनिकं भर्त्तृदायं तथैव च ।
भ्रातृदत्तं पितृभ्याञ्च षड्विधं स्त्रीधनं स्मृतम् ॥"
इति दायभागधृतनारदवचनम् ॥ * ॥
अथ स्त्रीधनम् । तत्र कात्यायनः ।
"प्राप्तं शिल्पैस्तु यद्वित्तं प्रीत्या चैव यदन्यतः ।
भर्त्तुः स्वाम्यं भवेत्तत्र शेषन्तु स्त्रीधनं स्मृतम् ॥"
अन्यतः पितृमातृभर्त्तृकुलव्यतिरिक्तादुपलब्ध शिल्पेन वा यदर्ज्जितं तत्र भर्त्तुः स्वाम्यं तेन स्त्रिया अपि धनं न स्त्रीधनं अस्वातन्त्र्यात् एतद्द्वयातिरिक्तधने स्वत्वं स्त्रिया एव दानाद्यधिकारात् । मनुविष्णू ।
"पत्यौ जीवति यः कश्चिदलङ्कारो धृतो भवेत् ।
न तं भजेरन् दायादा भजमानाः पतन्ति ते ॥"
पत्युरदत्तेऽपि तदनुमत्या परिहितोऽलङ्कारस्तावता एव भार्य्याया स्त्रीयो भवतीति मेधातिथिः ॥ कात्यायनः ।
"तद्दया काम्यया वापि पत्युः पितृगृहेऽथवा ।
भर्त्तुः सकाशात् पित्रोर्व्वा लब्धं सौदायिकं स्मृतम् ॥
सौदायिकं धनं प्राप्य स्त्रीणां स्वातन्त्र्यमिष्यते
यस्मात्तदानृशंस्यार्थं तैर्दत्तं तत् प्रजीवनम् ॥
सौदायिके सदा स्त्रीणां स्वातन्त्र्यं परिकीर्त्तितम्
विक्रये चैव दाने च यथेष्टं स्थावरेष्वपि ॥"
ऊढया अनूढया वा पितृमातृभर्त्तृकुलसन्निधौ लब्धं सौदायिकम् । पारुष्यमनेष्ठ [illegible] । नारद ।
"भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन् मृतेऽपि तत्
सा यथाकाममश्नीयाद्दद्याद्वा स्थावरादृते ॥"
भर्त्तृदत्तविशेषणात् भर्त्तृदत्तस्थावरादृतेऽन्यस्थावरं देयमेव । अन्यथा यथेष्टं स्थावरेष्वपि इति कात्यायनोक्तं विरुध्यते । कात्यायनवचनाद्वयोः कात्यायनः ।
"अपकारक्रियायुक्ता निर्ल्लज्जा चार्थनाशिनी ।
व्यभिचाररता या च स्त्रीधनं न च सार्हति ॥"
दाम्पत्याः ।
"दुर्भिक्षे धर्म्मकार्य्ये वा व्याधौ सम्प्रतिरोधके ।
गृहीतं स्त्रीधनं भर्त्ता नाकामो दातुमर्हति ॥"
सम्प्रतिरोधके [illegible] [illegible] । [illegible] कात्यायन ।
"न भर्त्ता नैव च सुतो न पिता भ्रातरो न च ।
आदाने वा विसर्गे वा स्त्रीधने प्रभविष्णवः ॥"
[illegible] ।
"[illegible] ॥"
[illegible] ॥"

स्त्रीधनं
अत इत्यनिर्द्देशात् पुत्रक[illegible]
अन्यतराभावे अन्यतरस्य [illegible]
रभावे ऊढाया दुहितुः पुत्र[illegible]
पुत्राभावे तुल्याधिकारः ।
पार्व्वणे ।
"सपिण्डीकरणादूर्द्ध्वं यत् पितृ[illegible]
सर्व्वत्र शङ्करा माता इति धर्म्म[illegible]
इति शातातपोक्तत्वाद्व्यपतित[illegible]
वात् । तथा च नारदः ।
"पुत्राभावे तु दुहिता तुल्यसन्तान[illegible]
अतएव एतादृशदुहित्रभावे पौत्र[illegible]
तदभावे दौहित्राधिकारः ।
"दौहित्रोऽपि ह्यमुत्रैनं सन्तारयति [illegible]
इति मनुवचने दौहित्रे पौत्रधर्म्मातिदेशात्
पुत्रेण परिणीतदुहितुर्व्वाधाद्वाधकपुत्रे[illegible]
दुहितृपुत्रबाधस्य न्याय्यत्वात् । अपि [illegible]
प्रपौत्र तत्रोप्यपिण्डदातृत्वात् । तदभावे
विधवयोर्ग्राह्यधनाधिकारः तयोरपि [illegible]
त्वात् । तदभावे तु भर्त्ता । तत्र न पितृ[illegible]
दत्तधनविषय तत्र भ्रातुरधिकारात् । तथा
वृद्धकात्यायनः ।
"पितृभ्याञ्चैव यद्दत्तं दुहितुः स्थावरं धनम् ।
अप्रजायामतीतायां भ्रातृगामि तु सर्व्वदा ॥
मातुः परिणयनकाललब्धन्तु पुत्रसत्त्वेऽपि [illegible]
नामूढोढदुहितॄणामेवाधिकारः । मातुः पारि[illegible]
णाय्य स्त्रियो भजेरन्निति वशिष्ठोक्तेः । स्त्रीधनं
दुहितॄणामप्रत्तानामप्रतिष्ठितानाञ्चेति गौतम-
वचनेन प्रथममप्रत्तानामवाग्दत्तानां तदभावे
त्वप्रतिष्ठितानां वाग्दत्तानां वैपरीत्ये मनूक्त-
भावे अकारमप्रत्तानामूढानां स्त्रीधनं दुहि-
तॄणामिति सामान्यतः प्राप्तत्वात् अप्रत्ता-
नामित्यादेस्तु क्रमार्थत्वेनोपसंहारार्थत्वात्।
व्यक्तमाह मनुः ।
"मातुस्तु यौतुकं यत् स्यात् कुमारीभाग एव
सः ॥"
यौतुकपदं यु मिश्रणे इत्यस्मात् सिद्धं मिश्रता च
स्त्रीपुंसयोर्व्विवाहादिति । यदेतत् हृदयन्तव
तदस्तु हृदयं मम यदिदं हृदयं मम तदस्तु
हृदयं तव इति मन्त्रलिङ्गात् । यौतुकं तदिति
वाचस्पतिमिश्रः । [illegible] यौतुकं यौत[illegible]
मपि साधु । परिणयनकाल [illegible]
[illegible]
[illegible] । तत्र मनुवचनम् ।
"[illegible] दत्तं [illegible] ।
[illegible] भवेत् ॥"
इति तत् [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

"दुहितॄणामभावे तु रिक्थं पुत्त्रेषु तद्भवेत् ॥"
इति मनुवचनात् ॥
एवं पुत्त्राधिकारात् प्राक् दुहित्रधिकारविधायकवचनान्तराण्येतद्विषयकाणि । पुत्त्राद्यभावे तु ब्राह्मादिपञ्चकविवाहकालीनं स्त्रीधनं भर्त्तुः । आसुरादित्रयविवाहकालीनन्तु मातुः तदभावे पितुः । यथा मनुः ।
"ब्राह्मदैवार्षगान्धर्व्वप्राजापत्येषु यद्धनम् ।
अतीतायामप्रजायां भर्त्तुरेव तदिष्यते ॥
यत्त्वस्याः स्यात् धनं दत्तं विवाहेष्वासुरादिषु ।
अतीतायामप्रजायां मातापित्रोस्तदिष्यते ॥"
कन्याधनाधिकारे क्रममाह बौधायनः ।
'रिक्थं मृतायाः कन्याया गृह्णीयुः सोदराः स्वयम् ।
तदभावे भवेन्मातुस्तदभावे भवेत् पितुः ॥
अत्र क्रमदर्शनात् पूर्व्ववचने मातापित्रोरित्यत्र पाठक्रमेणाधिकारी न तु द्वन्द्वनिर्द्देशात् सहस्थितेन । बृहस्पतिः ।
"मातृष्वसा मातुलानी पितृव्यस्त्री पितृष्वसा श्वश्रूः पूर्व्वजपत्नी च मातृतुल्याः प्रकीर्त्तिताः ॥
यदासामौरसो न स्यात् सुतो दौहित्र एव वा ।
तत्सुतो वा धनं तासां स्वस्रीयाद्याः समाप्नुयुः ॥"
औरसपदं कन्यापुत्त्रोभयपरम् । सुत इति सपत्नीपुत्त्रपरम् ।
"सर्व्वासामेकपत्नीनामेका चेत् पुत्त्रिणी भवेत् ।
सर्व्वास्तास्तेन पुत्त्रेण प्राह पुत्त्रवतीर्म्मनुः ॥"
इति मनुस्मृतेः ।
एकपत्नीनामिति एकः पतिर्यासां ताः । न तु सुतपदमौरसविशेषणं वैयर्थ्यात् । सपत्नीपुत्त्रसद्भावे स्वस्रीयाद्यधिकारापत्तेश्च । तत्सुत इति पौत्त्रः सपत्नीपौत्त्रपरं न तु दौहित्रपुत्त्रपरं तस्य असम्भोग्यभर्त्तृपिण्डदानानधिकारात् । अथ प्रागुक्तानुसारात् दौहित्रपर्य्यन्तानन्तरमेव सपत्नीपुत्त्रतत्पुत्त्रयोरधिकारः । न तु प्रागुक्तभर्त्रादिपितृपर्य्यन्ताभावेऽपीति वाच्यं भर्त्रादीनां धनिभोग्यपार्व्वणपिण्डदानाधिकारात् । तस्मादेतेषां सपत्नीपौत्त्रान्तानां तत्सुतो वेति वाक्यद्वयसमुच्चितानाम् ।
'सामान्यं पुत्त्रकन्यानां मृतायां स्त्रीधनं विदुः ।
अप्रजायां हरेत् भर्त्ता माता भ्राता पितापि वा ॥"
इति देवलोक्तानां भर्त्रादिपितृपर्य्यन्तानामभाव एव तत्स्वपि श्वशुरभ्रातृश्वशुरादिषु स्वस्रीयाद्या इत्यनेन भगिनीसुतभर्त्तृभागिनेयभर्त्तृज्येष्ठकनिष्ठोभयरूपभ्रातृसुत-स्वभ्रातृपुत्त्र-जामातृ-देवराणां मातृस्वस्रादिधने अधिकारः । एतद्वचनैर्ब्बलात् । अत्र ।
"यदासामुद्धृतं कार्य्यं तेषु पिण्डः प्रवर्त्तते ।
चतुर्थः सम्प्रदातैषां पञ्चमो नोपपद्यते ॥"
इति दायभागधृतबौधायनस्मृतेः ।

पिण्डदोंऽशहर इति याज्ञवल्क्यीयात् । मातृतुल्याः प्रकीर्त्तिता इत्यनेन स्वस्रीयादीनां पुत्त्रत्वज्ञापनेन एकप्रयोजनकत्वात् ।
"मातुलो भागिनेयस्य स्वस्रीयो मातुलस्य च ।
श्वशुरस्य गुरोश्चैव सख्युर्मातामहस्य च ॥
एतेषाञ्चैव भार्य्याभ्यः स्वसुर्मातुः पितुस्तथा ।
पिण्डदानन्तु कर्त्तव्यमिति वेदविदां स्थितिः ।
इति शातातपवचनात् ।
पिण्डदानविशेषेणैव एषामेषामधिकारक्रमः प्रतिपत्तव्यः । पाठक्रमादर्थक्रमस्य बलवत्त्वात् । अन्यथा सर्व्वशेषे देवराधिकारे महाजनविरोधः स्यात् । तत्र प्रथमं देवरः तत्पिण्डतद्भर्त्तृपिण्डतद्भर्त्तृदेयपुरुष-त्रय-पिण्डदत्वात् सपिण्डत्वाच्च भ्रातृस्त्रीधने अधिकारी । तदभावे भ्रातृश्वशुरदेवरयोः सुतौ तत्पिण्डतद्भर्त्तृपिण्डतद्भर्त्तृदेयपुरुषद्वयपिण्डदत्वात् सपिण्डत्वाच्च । तयोरभावे त्वसपिण्डोऽपि भगिनीपुत्त्रः तत्पिण्डतत्पुत्त्रदेयतत्पित्रादित्रयपिण्डदत्वात् । तदभावे भर्त्तृभागिनेयः पुत्त्राद्युक्तदुर्ब्बलत्वेन तत्स्थानपातिनोरपि भगिनीपुत्त्रभर्त्तृभागिनेययोस्तथैव बलाबलस्य न्याय्यत्वेन तद्भर्त्तृदेयपुरुषत्रयपिण्डदत्वात् तत्पिण्डदत्वात् तद्भर्त्तृपिण्डदत्वाच्च मातुलानीधने अधिकारी । तदभावे भ्रातृपुत्त्रः तत्पिण्डतत्पुत्त्रदेयतत्पित्रादिपिण्डद्वयदत्वात् पितृस्वसुर्धने अधिकारी । तदभावे श्वशुरयोः पिण्डदानात् जामाता श्वश्रूधने अधिकारीति क्रमः । स्वस्रीयाद्या इति अधिकारिमात्रपरं न पाठिकक्रमपरं एषां एषां प्रातिस्विकोक्तानामभावे सपिण्डानन्तर्य्येण श्वशुरादिवदधिकारी न च सपिण्डाभावे मातृस्वसेति वचनं वाच्यं अस्मिन्नधिकारिगणे देवरतत्सुतभ्रातृश्वशुरसुतानामधिकारज्ञापनादासन्नतरश्वशुरभ्रातृश्वशुरादेः परित्यागादिति । इति दायतत्त्वम् ॥
स्त्रीधर्म्मः, पुं, (स्त्रिया धर्म्मः ।) ऋतुः । तत्पर्य्यायः । पुष्पम् २ आर्त्तवम् ३ रजः ४ । इति हेमचन्द्रः ॥ (मैथुनम् । यथा हरिवंशे । ८४ । ६१ ।
"गृह्णती कामजननीर्व्वाचः स्त्रीसुखावहाः ।
दर्शिनाश्चैव विवृतं खगानाञ्च विकूजितम् ॥
अभीक्ष्णमभिगच्छन्ती स्त्रीधर्म्मं सा व्यरोचयत् ॥"
स्त्रीणां शुभकर्म्मादिः । यथा, मनुः । ११।११४ ।
"स्त्रीधर्म्मयोगं तापस्यं मोक्षं सन्न्यासमेव च ॥")
स्त्रीधर्म्मिणी, स्त्री, (स्त्रीधर्म्मोऽस्या अस्तीति । इनिः । ङीप् ।) ऋतुमती । इत्यमरः । २ । ६ । २० ॥ (यथा, महाभारते । २।६७।१४ ।
"स्त्रीधर्म्मिणी वरारोहा शोणितेन परिप्लुता ।
एकवस्त्राथ पाञ्चाली पाण्डवानभ्यवैक्षत ॥")
अस्य विवरणं रजस्वलाशब्दे द्रष्टव्यम् ॥
स्त्रीधवः, पुं, (स्त्रीणां धवः प्रियः ।) पुरुषः । इति जटाधरः ॥
स्त्रीपरः, पुं, (स्त्रीषु परः निरतः ।) विटः । कामुकः । इति हेमचन्द्रः ॥

स्त्रीपण्योपजीवी, [न्] पुं, (स्त्रीपण्येन उपजीवतीति । उप+जीव+णिनिः ।) सम्भोगार्थमन्यस्मै स्त्रियं दत्त्वा तद्धनोपजीवी । इति महाभारते दानधर्म्मः ॥
स्त्रीपुंधर्म्मः, पुं, (स्त्री च पुमांश्च स्त्रीपुंसौ । तयोर्धर्म्मः ।) स्त्रीपुंसयोर्व्यवहारः । स च अष्टादशविवादपदान्तर्गतविवादविशेषः । यथा,—
"स्त्रीपुंधर्म्मो विभागश्च द्यूतमाह्वयमेव च ।
पदान्यष्टादशैतानि व्यवहारस्थिताविह ॥"
इति मानवे ८ अध्यायः ॥
तद्विवरणं यथा,—
"पुरुषस्य स्त्रियाश्चैव धर्म्मे वर्त्मनि तिष्ठतोः ।
संयोगे विप्रयोगे च धर्म्मान् वक्ष्यामि शाश्वतान् ॥
अस्वतन्त्राः स्त्रियः कार्य्याः पुरुषैः स्वैर्दिवानिशम् ॥
विषयेषु च सज्जन्त्यः संस्थाप्या आत्मनो वशे ॥
पिता रक्षति कौमारे भर्त्ता रक्षति यौवने ।
रक्षन्ति स्थविरे पुत्त्रा न स्त्री स्वातन्त्र्यमर्हति ॥
कालेऽदाता पिता वाच्यो वाच्यश्चानुपयन् पतिः ।
मृते भर्त्तरि पुत्त्रस्तु वाच्यो मातुररक्षिता ॥
सूक्ष्मेभ्योऽपि प्रसङ्गेभ्यः स्त्रियो रक्ष्या विशेषतः ।
द्वयोर्हि कुलयोः शोकमावहेयुररक्षिताः ॥
इमं हि सर्व्ववर्णानां पश्यन्तो धर्म्ममुत्तमम् ।
यतन्ते रक्षितुं भार्य्यां भर्त्तारो दुर्ब्बला अपि ॥
स्वां प्रसूतिं चरित्रञ्च कुलमात्मानमेव च ।
स्वञ्च धर्म्मं प्रयत्नेन जायां रक्षन् हि रक्षति ॥
पतिर्भार्य्यां संप्रविश्य गर्भो भूत्वेह जायते ।
जायायास्तद्धि जायात्वं यदस्यां जायते पुनः ॥
यादृशं भजते हि स्त्री सुतं सूते तथाविधम् ।
तस्मात् प्रजाविशुद्ध्यर्थं स्त्रियं रक्षेत् प्रयत्नतः ॥
न कश्चित् योषितः शक्तः प्रसह्य परिरक्षितुम् ।
एतैरुपाययोगैस्तु शक्यास्ताः परिरक्षितुम् ॥
अर्थस्य संग्रहे चैनां व्यये चैव नियोजयेत् ।
शौचे धर्म्मेऽन्नपक्त्याञ्च पारिणाह्यस्य वेक्षणे ॥
अरक्षिता गृहे रुद्धाः पुरुषैराप्तकारिभिः ।
आत्मानमात्मना यास्तु रक्षेयुस्ताः सुरक्षिताः ॥
पानं दुर्ज्जनसंसर्गः पत्या च विरहोऽटनम् ।
स्वप्नोऽन्यगेहवासश्च नारीसन्दूषणानि षट् ॥
नैता रूपं परीक्षन्ते नासां वयसि संस्थितिः ।
सुरूपं वा विरूपं वा पुमानित्येव भुञ्जते ॥
पौंश्चल्याच्चलचित्ताच्च नैःस्नेह्याच्च स्वभावतः ।
रक्षिता यत्नतोऽपीह भर्त्तृष्वेता विकुर्व्वते ॥
एवं स्वभावं ज्ञात्वासां प्रजापतिनिसर्गजम् ।
परमं यत्नमातिष्ठेत् पुरुषो रक्षणं प्रति ॥
शय्यासनमलङ्कारं कामं क्रोधमनार्ज्जवम् ।
द्रोहभावं कुचर्य्याञ्च स्त्रीभ्यो मनुरकल्पयत् ॥
नास्ति स्त्रीणां क्रिया मन्त्रैरिति धर्म्मे व्यवस्थितिः ।
निरिन्द्रिया ह्यमन्त्राश्च स्त्रियोऽनृतमिति स्थितिः ॥
तथा च श्रुतयो बह्व्यो निगीता निगमेष्वपि ।
स्वालक्षण्यपरीक्षार्थं तासां शृणुत निष्कृतीः ॥
यन्मे माता प्रलुलुभे विचरन्त्यपतिव्रता ।
तन्मे रेतः पिता वृङ्क्तामित्यस्यैतन्निदर्शनम् ॥
ध्यायत्यनिष्टं यत्किञ्चित् [illegible]

स्त्रीपुंध
स्त्रीपुंध

तस्यैव व्यभिचारस्य निह्नवः सम्यगुच्यते ॥
यादृग्गुणेन भर्त्रा स्त्री संयुज्येत यथाविधि ।
तादृग्गुणा सा भवति समुद्रेणेव निम्नगा ॥
अक्षमाला वशिष्ठेन संयुक्ताधमयोनिजा ।
शारङ्गी मन्दपालेन जगामाभ्यर्हणीयताम् ॥
एताश्चान्याश्च लोकेऽस्मिन्नपकृष्टप्रसूतयः ।
उत्कर्षं योषितः प्राप्ताः स्वैः स्वैर्भर्त्तृगुणैः शुभैः ॥
एषोदिता लोकयात्रा नित्यं स्त्रीपुंसयोः शुभा ।
प्रेत्येह च सुखोदर्कान् प्रजाधर्म्मान्निबोधत ॥*॥
प्रजनार्थं महाभागाः पूजार्हा गृहदीप्तयः ।
स्त्रियः श्रियश्च गेहेषु न विशेषोऽस्ति कश्चन ॥
उत्पादनमपत्यस्य जातस्य परिपालनम् ।
प्रत्यहं लोकयात्रायाः प्रत्यक्षं स्त्रीनिबन्धनम् ॥
अपत्यं धर्म्मकार्य्याणि शुश्रूषा रतिरुत्तमा ।
दाराधीनस्तथा स्वर्गः पितॄणामात्मनश्च ह ॥
पतिं या नाभिचरति मनोवाग्देहसंयता ।
सा भर्त्तृलोकानाप्नोति सद्भिः साध्वीति चोच्यते ॥
व्यभिचारात्तु भर्त्तुः स्त्री लोके प्राप्नोति निन्द्यताम् ।
शृगालयोनिञ्चाप्नोति पापरोगैश्च पीड्यते ॥
पुत्त्रं प्रत्युदितं सद्भिः पूर्व्वजैश्च महर्षिभिः ।
विश्वजन्यमिमं पुण्यमुपन्यासं निबोधत ॥
भर्त्तुः पुत्त्रं विजानन्ति श्रुतिद्वैधन्तु भर्त्तरि ।
आहुरुत्पादकं केचिदपरे क्षेत्रिणं विदुः ॥
क्षेत्रभूता स्मृता नारी बीजभूतः स्मृतः पुमान् ।
क्षेत्रबीजसमायोगात् सम्भवः सर्व्वदेहिनाम् ॥
विशिष्टं कुत्रचिद्बीजं स्त्रीयोनिस्त्वेव कुत्रचित् ।
उभयन्तु समं यत्र सा प्रसूतिः प्रशस्यते ।
बीजस्य चैव योन्याश्च बीजमुत्कृष्टमुच्यते ।
सर्व्वभूतप्रसूतिर्हि बीजलक्षणलक्षिता ॥
यादृशं तूप्यते बीजं क्षेत्रे कालोपपादिते ।
तादृग्रोहति तत्तस्मिन् बीजं स्वैर्व्यञ्जितं गुणैः ॥
इयं भूमिर्हि भूतानां शाश्वती योनिरुच्यते ।
न च योनिगुणान् कांश्चिद्बीजं पुष्यति पुष्टिषु ॥
भूमावप्येककेदारे कालोप्तानि कृषीवलैः ।
नानारूपाणि जायन्ते बीजानीह स्वभावतः ॥
व्रीहयः शालयो मुद्गास्तिला माषास्तथा यवाः ।
यथाबीजं प्ररोहन्ति लशुनानीक्षवस्तथा ॥
अन्यदुप्तं जातमन्यदित्येतन्नोपपद्यते ।
उप्यते यद्धि यद्बीजं तत्तदेव प्ररोहति ॥
तत् प्राज्ञेन विनीतेन ज्ञानविज्ञानवेदिना ।
आयुष्कामेन वप्तव्यं न जातु परयोषिति ॥
अत्र गाथा वायुगीताः कीर्त्तयन्ति पुराविदः ।
यथा बीजं न वप्तव्यं पुंसा परपरिग्रहे ॥
नश्यतीषुर्यथा विद्धः खे विद्धमनुविध्यतः ।
तथा नश्यति वै क्षिप्रं बीजं परपरिग्रहे ॥
पृथोरपीमां पृथिवीं भार्य्यां पूर्व्वविदो विदुः ।
स्थाणुच्छेदस्य केदारमाहुः शल्यवतो मृगम् ॥
एतावानेव पुरुषो यज्जायात्मा प्रजेति ह ।
विप्राः प्राहुस्तथा चैतद्यो भर्त्ता सा स्मृताङ्गना ॥
न निष्क्रयविसर्गाभ्यां भर्त्तुर्भार्य्या विमुच्यते ।
एवं धर्म्मं विजानीमः प्राक् प्रजापतिनिर्म्मितम् ॥

सकृदंशो निपतति सकृत् कन्या प्रदीयते ।
सकृदाह ददानीति त्रीण्येतानि सतां सकृत् ॥
यथा गोऽश्वोष्ट्रदासीषु महिष्यजाविकासु च ।
नोत्पादकः प्रजाभागी तथैवान्याङ्गनास्वपि ॥
येऽक्षेत्रिणो बीजवन्तः परक्षेत्रप्रवापिणः ।
ते वै शस्यस्य जातस्य न लभन्ते फलं क्वचित् ॥
यदन्यगोषु वृषभो वत्सानां जनयेच्छतम् ।
गोमिनामेव ते वत्सा मोघं स्कन्दितमार्षभम् ॥
तथैवाक्षेत्रिणो बीजं परक्षेत्रप्रवापिणः ।
कुर्व्वन्ति क्षेत्रिणामर्थं न बीजी लभते फलम् ॥
फलन्त्वनभिसन्धाय क्षेत्रिणां बीजिनां तथा ।
प्रत्यक्षं क्षेत्रिणामर्थो बीजाद्योनिर्गरीयसी ॥
क्रियाभ्युपगमात्त्वेतद्बीजार्थं यत् प्रदीयते ।
तस्येह भागिनौ दृष्टौ बीजी क्षेत्रिक एव च ॥
ओघवाताहृतं बीजं यस्य क्षेत्रे प्ररोहति ।
क्षेत्रिकस्यैव तद्बीजं न वप्ता लभते फलम् ॥
एष धर्म्मो गवाश्वस्य दास्युष्ट्राजाविकस्य च ।
विहङ्गमहिषीणाञ्च विज्ञेयः प्रसवं प्रति ॥
एतद्वः सारफल्गुत्वं बीजयोन्योः प्रकीर्त्तितम् ।
अतः परं प्रवक्ष्यामि योषितां धर्म्ममापदि ॥*॥
भ्रातुर्ज्येष्ठस्य भार्य्या या गुरुपत्न्यनुजस्य सा ।
यवीयसस्तु या भार्य्या स्नुषा ज्येष्ठस्य सा स्मृता ।
ज्येष्ठो यवीयसो भार्य्यां यवीयान् वाग्रजस्त्रियम् ।
पतितौ भवतो गत्वा नियुक्तावप्यनापदि ॥
देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ्नियुक्तया ।
प्रजेप्सिताधिगन्तव्या सन्तानस्य परिक्षये ॥
विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि ।
एकमुत्पादयेत् पुत्त्रं न द्वितीयं कथञ्चन ॥
द्वितीयमेके प्रजनं मन्यन्ते स्त्रीषु तद्विदः ।
अनिर्वृत्तं नियोगार्थं पश्यन्तो धर्म्मतस्तयोः ॥
विधवायां नियोगार्थे निर्वृत्ते तु यथाविधि ।
गुरुवच्च स्नुषावच्च वर्त्तेयातां परस्परम् ॥
नियुक्तौ यौ विधिं हित्वा वर्त्तेयातान्तु कामतः ।
तावुभौ पतितौ स्यातां स्नुषागगुरुतल्पगौ ॥
नान्यस्मिन् विधवा नारी नियोक्तव्या द्विजातिभिः ।
अन्यस्मिन् हि नियुञ्जाना धर्म्मं हन्युः सनातनम् ॥
नोद्वाहिकेषु मन्त्रेषु नियोगः कीर्त्त्यते क्वचित् ।
न विवाहविधावुक्तं विधवा वेदनं पुनः ॥
अयं द्विजैर्हि विद्वद्भिः पशुधर्म्मो विगर्हितः ।
मनुष्याणामपि प्रोक्तो वेने राज्यं प्रशासति
स महीमखिलां भुञ्जन् राजर्षिप्रवरः पुरा ।
वर्णानां सङ्करं चक्रे कामोपहतचेतनः ॥
ततः प्रभृति यो मोहात् प्रमीतपतिकां स्त्रियम् ।
नियोजयत्यपत्यार्थं तं विगर्हन्ति साधवः ॥
यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः ।
तामनेन विधानेन निजो विन्देत देवरः ॥
यथाविध्यधिगम्यैनां शुक्लवस्त्रां शुचिव्रताम् ।
मिथो भजेदाप्रसवात् सकृत् सकृदृतावृतौ ॥
न दत्त्वा कस्यचित् कन्यां पुनर्दद्यात् विचक्षणः ।
दत्त्वा पुनः प्रयच्छन् हि प्राप्नोति पुरुषानृतम् ।
विधिवत् प्रतिगृह्यापि त्यजेत् कन्यां विगर्हिताम् ।

व्याधितां विप्रदुष्टां वा
यस्तु दोषवतीं कन्यामनाख्यायोपपादयेत्
तस्य तद्वितथं कुर्य्यात्
विधाय वृत्तिं भार्य्यायाः प्रवसेत्
अवृत्तिकर्षिता हि स्त्री प्रदुष्येत्
विधाय प्रोषिते वृत्तिं
प्रोषिते त्वविधायैव जीवेच्छिल्पैरगर्हितैः ॥
प्रोषितो धर्म्मकार्य्यार्थं प्रतीक्ष्योऽष्टौ नरः
विद्यार्थं षट् यशोऽर्थं वा कामार्थं त्रींस्तु

संवत्सरं प्रतीक्षेत द्विषन्तीं योषितं पतिः ।
ऊर्द्ध्वं संवत्सरात्त्वेनां दायं हृत्वा
अतिक्रामेत् प्रमत्तं या मत्तं रोगार्त्तमेव
सा त्रीन् मासान् परित्याज्या विभूषणपरि-

उन्मत्तं पतितं क्लीवमबीजं पापरोगिणम् ।
न त्यागोऽस्ति द्विषन्त्याश्च न च दायापवर्त्त
मद्यपासाधुवृत्ता च प्रतिकूला च या भवेत्
व्याधिता वाधिवेत्तव्या
वन्ध्याष्टमेऽधिवेद्याब्दे दशमे तु मृतप्रजा ।
एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनी ॥
या रोगिणी स्यात्तु हिता सम्पन्ना चैव
सानुज्ञाप्याधिवेत्तव्या नावमान्या च
अधिविन्ना तु या नारी निर्गच्छेद्रुषिता
सा सद्यः सन्निरोद्धव्या त्याज्या वा कुलस
प्रतिषिद्धा पिबेद्या तु मद्यमभ्युदयेष्वपि ।
प्रेक्षासमाजं गच्छेद्वा सा दण्ड्या
षट्

यदि स्वाश्चापराश्चैव
तासां वर्णक्रमेणैव ज्यैष्ठं पूजा च वेश्म च
भर्त्तुः शरीरशुश्रूषां धर्म्मकार्य्यञ्च नैत्यिकम् ।
स्वा चैव कुर्य्यात् सर्व्वेषां नान्यजातिः
यस्तु तत् कारयेन्मोहात् सजात्या स्थितयान्यया

यथा ब्राह्मणचाण्डालः पूर्व्वदृष्टस्तथैव सः ।
उत्कृष्टायाभिरूपाय वराय सदृशाय च ।
अप्राप्तामपि तां तस्मै कन्यां दद्याद्यथावि
काममामरणात्तिष्ठेद्गृहे कन्यर्त्तुमत्यपि ।
न चैवैनां प्रयच्छेत्तु गुणहीनाय कर्हिचित् ।
त्रीणि वर्षाण्युदीक्षेत कुमार्य्यृतुमती सती ।
ऊर्द्ध्वन्तु कालादेतस्माद्विन्देत सदृशं पतिम् ॥
अदीयमाना भर्त्तारमधिगच्छेद्यदि स्वयम् ।
नैनः किञ्चिदवाप्नोति न च यं साधिगच्छति ॥
अलङ्कारं नाददीत पित्र्यं कन्या स्वयंवरा ।
मातृकं भ्रातृदत्तं वा स्तेना स्यात् यदि तं हरेत् ॥

पित्रे न दद्याच्छुल्कन्तु कन्यामृतुमतीं हरन् ।
स हि स्वाम्यमतिक्रामेदृतूनां प्रतिरोधनात् ॥
त्रिंशद्वर्षो वहेत् कन्यां हृद्यां द्वादशवार्षिकीम् ।
त्र्यष्टवर्षोऽष्टवर्षां वा धर्म्मे सीदति सत्वरः ॥
देवदत्तां पतिर्भार्य्यां विन्दते नेच्छयात्मनः ।
तां साध्वीं बिभृयान्नित्यं देवानां प्रियमाचरन् ॥

प्रजनार्थं स्त्रियः सृष्टाः सन्तानार्थञ्च मानवाः।
तस्मात् साधारणो धर्मः श्रुतौ पत्न्या सहोदितः॥
कन्यायां दत्तशुल्कायां म्रियेत यदि शुल्कदः।
देवराय प्रदातव्या यदि कन्यानुमन्यते॥
आददीत न शूद्रोऽपि शुल्कं दुहितरं ददत्।
शुल्कं हि गृह्णन् कुरुते छन्नं दुहितृविक्रयम्॥
एतत्तु न परे चक्रुर्नापरे जातु साधवः।
यदन्यस्य प्रतिज्ञाय पुनरन्यस्य दीयते॥
नानुशुश्रुम जात्वेतत् पूर्व्वेष्वपि हि जन्मसु।
शुल्कसंज्ञेन मूल्येन छन्नं दुहितृविक्रयम्॥
अन्योन्यस्याव्यभिचारो भवेदामरणान्तिकः।
एष धर्म्मः समासेन ज्ञेयः स्त्रीपुंसयोः परः॥
तथा नित्यं यतेयातां स्त्रीपुंसौ तु कृतक्रियौ।
यथा नाभिचरेतां तौ वियुक्तावितरेतरम्॥
एष स्त्रीपुंसयोरुक्तो धर्म्मो वो रतिसंहितः।
आपद्यपत्यप्राप्तिश्च दायभागं निबोधत॥"
इति मानवे ९ अध्यायः॥

स्त्रीपुंसलक्षणा, स्त्री, स्त्रीपुंसयोर्लक्षणं चिह्नं स्तनश्मश्र्वादिरूपं यस्यां सा। इति भरतः॥ तत्पर्य्यायः। पोटा २। इत्यमरः॥

स्त्रीपुंसौ, पुं, (स्त्री च पुमांश्च। "अचतुरविचतु-रेति।" ५।४।७७। इति अच्प्रत्ययेन साधुः।) स्त्रीपुंसयोर्युग्मम्। तत्पर्य्यायः। मिथुनम् २ द्वन्द्वम् ३। इत्यमरः। २।५।३८। द्विवचनान्तोऽयम्॥ (यथा, मनुः। ८।२५। "एषोदिता लोकयात्रा नित्यं स्त्रीपुंसयोः शुभा॥"

स्त्रीपूर्व्वः, पुं, (स्त्री पूर्व्वं प्रधानतया सर्व्वकार्य्येषु अग्रगामिनीव यस्य।) स्त्रीजितः। इति महाभारते दानधर्म्मः॥

स्त्रीप्रियः, पुं, (स्त्रियाः प्रियः।) आम्रवृक्षः। इति त्रिकाण्डशेषः॥ नारीप्रियद्रव्ये, त्रि॥

स्त्रीमुखपः, पुं, (स्त्रीमुखं पातीति। पा+कः।) दोहलः। इति राजनिर्घण्टः॥

स्त्रीरञ्जनं, क्ली, (स्त्रियमपि रञ्जयति रागेणेति। रञ्ज+ल्युः।) ताम्बूलम्। इति केचित्॥

स्त्रीरोगः, पुं, (स्त्रिया रोगः।) नारीणामामयः। तस्य चिकित्सा यथा,—

धन्वन्तरिरुवाच।

"स्त्रीरोगादिचिकित्सान्तु वक्ष्ये सुश्रुत तां शृणु
योनिव्यापत्सु भूयिष्ठं शस्यते कर्म्म वातजित्॥
वचोपकुञ्चिकाजालीकृष्णावृषकसैन्धवम्।
अजमोदा यवक्षारं चित्रकं शर्करान्वितम्॥
पिष्ट्वालोड्य जलादौच खादयेद्घृतभर्ज्जितम्।
योनिपार्श्वार्त्तिहृद्रोगगुल्मार्शोविनिवृत्तये॥
बदरीपत्रसंलेपात् योनिर्भिन्ना प्रशाम्यति।
लोध्रं तुम्बीफलालेपो योनिदार्ढ्यं करोति च॥
पद्मपत्रवशत्वकमालतीकुसुमैर्घृतम्।
रविपक्वमसृग्धारा योनिगन्धविनाशनम्॥"
असृग्धारास्थाने असृग्बाधा इति च पाठः।
"मकाञ्चिकं जवापुष्पं भृष्टं ज्योतीष्मतीदलम्
दूर्व्वापिष्टञ्च संप्राश्य वनिता नार्त्तवं लभेत्॥
धात्र्यञ्जनाभयाचूर्णं तोयपीतं यदा भवेत्।"
यदा भवेदित्यत्र रक्तो हरेदिति च पाठः।
"सदुग्धा लक्ष्मणा पीता न स्यात् पुत्रदा ह्यतो
दुग्धस्याढकं चाश्वगन्धा च पुत्रदा।
वन्ध्या पुत्रं लभेत् पीत्वा घृतेन व्योषकेशरम्॥
कुशकाशोरुवूकाणां मूलैर्गोक्षुरकस्य च।
दुग्धश्रृतं सितायुक्तं गर्भिण्याः शूलनुत्परम्॥
पाठालाङ्गलिसिंहास्यमयूरकुटजैः पृथक्।
नाभिवस्तिभगालेपात् सुखं नारी प्रसूयते॥
सुताया हृच्छिरोवस्तिशूलं वै मक्कल्लसंज्ञितम्।
यवक्षारं पिबेत्तत्र मस्तुनोष्णोदकेन वा॥
कुशमूलीकृतः क्वाथः साज्यः सूतिरुजापहः।
शालितण्डुलचूर्णन्तु सदुग्धं दुग्धकृद्भवेत्॥
विदारिकुसुमरसं मूलं कार्पासजं तथा।
धात्री स्तन्यविशुद्ध्यर्थं मुद्गयूषरसाशनी॥
कुष्ठा वचाभया ब्राह्मी मधुरी क्षौद्रसर्पिषी।
वर्णायुःकान्तिजननं लेहं बाले प्रदापयेत्॥
स्तन्याभावे पयश्छाग्यं गव्यं वा तद्गुणं भवेत्
मुस्तागुण्डीविषा बाला कुटजा चातिसारनुत्॥
व्योषं मधु मातुलुङ्गं हिक्काच्छर्द्दिनिवारणम्।
कुष्ठेन्द्रयवसिद्धार्थनिशा दूर्व्वा च कुष्ठजित्॥
मसूच्छदामयनिशाचन्दनैश्चानुलेपनम्।
शङ्खालमौजरुद्राक्षवचालोहादिधारणम्॥"
इति गारुडे। १७६। १—१९॥

स्त्रीसभं, क्ली, (स्त्रीणां सभा। "अशालाचेति नपुं-सकत्वम्।) नारीणां सभा। इति केचित्॥

स्त्रीस्वभावः, पुं, (स्त्रीणां स्वभाव इव स्वभावो यस्य।) अन्तःपुरपालकः। इति शब्दमाला॥ नारीणां शीलञ्च॥ (यथा, महाभारते। ३।७१।६।
"स्त्रीस्वभावचलो लोके मम दोषश्च दारुणः।
स्यादेवमपि कुर्य्यात् सा विवशा गतसौहृदा॥")

स्त्रैणं, क्ली, (स्त्रिया इदम्। स्त्री+नञ्।) स्त्रीस्वभावः। यथा, भट्टिः।
"कर्णेजपैराहितराज्यलोभा
स्त्रैणेन नीता विकृतिं लघिम्ना।
रामप्रवासे व्यमृशन्न दोषं
जनापवादं सनरेन्द्रमृत्युम्॥"
(यथा, च भागवते। ४।४।३।
"पितोरगात् स्त्रैणविमूढधीर्गृहान्
प्रेम्णात्मनो योऽर्द्धमदात् सतां प्रियः॥"
स्त्रीणां समूहः। स्त्री+नञ्। स्त्रीसमूहः। इति काशिका। ४।१।८७॥ यथा, शान्तिशतके।
"क्षणे वा स्त्रैणे वा मम समदृशो यान्तु दिवसाः
क्वचित् पुण्येऽरण्ये शिव शिव शिवेति प्रलपतः॥")

स्त्रैणः, त्रि, (स्त्रीषु भवः। स्त्रीभ्य आगतः। स्त्रीभ्यो हितो वा। स्त्री+"स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्।" ४।१।८७। इति नञ्।) स्त्रीसम्बन्धी। इति मुग्धबोधव्याकरणम्॥ स्त्रिया अपत्यं स्त्रैणः। स्त्रिया इदं स्त्रीणां समूहो वा स्त्रैणम्। इति तट्टीकायां दुर्गादासः॥ (रमणीरतः। यथा, भागवते। १।११।४०।
"तं मेनिरेऽबला मौढ्यात् स्त्रैणं चानुव्रतं रहः।
अप्रमाणविदो भर्त्तुरीश्वरं मतयो यथा॥")

स्थः, त्रि, (तिष्ठत्यस्मिन्निति स्था+घञर्थे कः।) स्थानम्। यथा,—
"स्थली दैवकर्त्तृकेऽन्यत् स्थलं क्लीवे स्थ इत्यपि।"
इति शब्दरत्नावली॥
(सुबन्तोपपदे तु "सुपि स्थः।" ३।२।४। इति कप्रत्ययः। स्थितिशीलः। यथा, रघुः। १२।१५।
"चित्रकूटवनस्थञ्च कथितस्वर्गतिर्गुरोः।
लक्ष्म्या निमन्त्रयाञ्चक्रे तमनुच्छिष्टसम्पदा॥"

स्थग,म ए संवृतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) दन्त्यादिस्वमध्यः। म, सिस्थगयिषति। ए, अस्थगीत्। इति दुर्गादासः।

स्थगः, त्रि, (स्थगति संवृणोति आत्मानमिति। स्थग+अच्।) धूर्त्तः। यथा,—
"धूर्त्ते स्थगश्च निर्लज्जः पटुः पाटविकोऽपि च॥"
इति शब्दरत्नावली त्रिकाण्डशेषश्च॥

स्थगनं, क्ली, (स्थग+ल्युट्।) अपवारणम्। यथा,—
"व्यवधानं तिरोधानमन्तर्द्धिस्त्वपवारणम्।
छदनं व्यवधान्तर्द्धापिधानस्थगनानि च॥"
इति हेमचन्द्रः॥

स्थगितं, त्रि, (स्थग+क्तः।) तिरोहितम्। तत्पर्य्यायः। संवीतम् २ रुद्धम् ३ आवृतम् ४ संवृतम् ५ पिहितम् ६ छन्नम् ७ अपवारितम् ८ अन्तर्हितम् ९ तिरोधानम् १०। इति हेमचन्द्रः॥ (यथा, किराते। १४।३१।
"उदूढवक्षः स्थगितैकदिङ्मुखो
विकृष्टविस्फारितचापमण्डलः॥")

स्थगी, स्त्री, (स्थग्यतेऽनयेति। स्थग+घञर्थे कः। गौरादित्वात् ङीष्। ताम्बूलपात्रम्। पानेर वाटा इति भाषा। तत्पर्य्यायः। ताम्बूलकरङ्कः २। इति हेमचन्द्रः॥

स्थगु, क्ली, गडुः। कुज् इति भाषा। यथा,—
"हृदये ते निविष्टास्ता भूयश्चान्याः सहस्रशः।
तदेव स्थगु यद्दीर्घं रथघोणमिवायतम्॥
लब्धार्था च प्रतीता च लेपयिष्यामि ते स्थगु।
मुखे च तिलकं चित्रं जातरूपमयं शुभम्॥"
इति रामायणे अयोध्याकाण्डे ९ सर्गः॥

स्थण्डिलं, क्ली, (तिष्ठत्यस्मिन्निति। स्था+मिथिलादयश्चेति इलच्प्रत्ययेन निपातनात् साधु।) चत्वरम्। इत्यमरः। २।७।१८॥ द्वे वेदीरहितेऽन्यत्र वा यज्ञार्थं परिष्कृतायामनिम्नोन्नतायां विस्तृतायां भूमौ। असंबाधेन तिष्ठन्त्यत्र स्थण्डिलं नाम्नोति डण्डिलः चत्वते निवासाय याच्यते चत्वरं चते ज याचे पूर्व्वेण वरः। इति भरतः॥ यथा च।
"यज्ञे परिष्कृतस्थाने स्याताां स्थण्डिलचत्वरे।"
इति शब्दरत्नावली॥ * ॥
होमनिमित्ताग्निस्थापनार्थं स्थण्डिलविधिर्यथा, वशिष्ठसंहितायाम्।
"तस्मात् सम्यक् परीक्ष्यैवं कर्त्तव्यं शुभवेदिकम्।
हस्तमात्रं स्थण्डिलं वा संमिते होमकर्म्मणि॥"

क्रियासारेऽपि ।
"कुण्डमेवंविधं न स्यात् स्थण्डिलं वा समाश्रयेत् ॥"

शारदातिलकेऽपि ।
"नित्यं नैमित्तिकं काम्यं स्थण्डिले वा समाचरेत् ।
हस्तमात्रन्तु तत् कुर्यात् चतुरस्रं समन्ततः ॥"
इति तिथ्यादितत्त्वम् ॥ * ॥

अपि च । गोभिलः । अनुगुप्ता अप आहृत्य प्रागुदक्प्रवनं देशं समं वा परिसमूह्य उपलिप्य मध्यतः प्राचीं रेखामुल्लिख्य उदीचीञ्च संहतां पश्चान्मध्ये प्राचीस्तिस्र उल्लिख्याभ्युक्षयेत् लक्षणावृदेषा सर्वत्रेति । अनुगुप्ता आच्छादिताः । पतितादिभिरदृष्टा इति यावत् ॥ प्राङ्नीचादिफलमाह गृह्यासंग्रहे गोभिलपुत्रः ।
"प्राङ्नीचं ब्रह्मवर्चस्यमुदङ्नीचं यशोत्तमम् ।
पित्र्यं दक्षिणतो नीचं प्रतिष्ठालम्भकं समम् ॥"

यशोत्तममित्यत्र शान्ता अध्यदन्ता इत्यत्रेरदन्तोऽपि यशशब्दः गयाशिरः इतिवत् । परिसमूह्य सर्व्वतः कुशैः पांश्वादिकमपसार्य्य उत्तरस्यां दिशि सार्द्धहस्तोपरि क्षिपेत् । परिसमूह्य वितस्तिवर्ये उत्तरत उत्कर करोतीति हरियम्मंपद्धतवचनात् । तत उपलेपनम् ॥ * ॥ तत्र कारणमाह गृह्यासंग्रहः ।
"इन्द्रेण वज्राभिहतः पुरा हतो महासुरः ।
मेदसा तस्य संक्लिन्नात्तदर्थमुपलेपयेत् ॥" इति ।

मध्यतः स्थण्डिलाभ्यन्तरे दक्षिणांशे न तु मध्यांशे उदमातैकविंशत्यङ्गुलरेखानुरोधात् । अन्यथा ॥
"कुशैः संमार्ज्जयेद्भूमिं गृहामादौ यथिस्ततः ।
हस्तमात्रां चतुरस्रां गोमयेनोपलेपयेत् ॥"
इति भारद्वाजीयहस्तप्रमाणस्थण्डिले तदनुपपत्तेः । प्राचीं प्रागगताम् । उदीचीञ्च संहतां चयादिति । प्रागगतायाः पश्चिमे भागे संलग्नामुदगग्राम् । मध्ये उदगतायाः प्राचीः प्रागग्रास्तिस्रो रेखा उल्लिख्याभ्युक्षयेदिति । रेखाभ्य उद्धृतमृत्तिकोद्धरणपूर्व्वकमभ्युक्षेत् । उल्लिख्य उद्धृत्याभ्युक्षयेदिति कात्यायनसूत्रात् ॥ * ॥ उत्करमपेदेयमाह गृह्यासंग्रहः ।
"उत्करं स्फ्य रेखाभ्योऽरविभागे निधापयेत् ।"
उत्करमेतत् पदार्थानां प्रागुदीच्यां दिशि स्मृतम् ॥" इति ॥

परिसमूहनादिपरिषेकान्तं कर्म्म लक्षणसंज्ञकं ब्रह्मवत्साहृत प्रक्रिया सर्व्वत्र यत्र यत्राग्निस्थापनं तत्र बोध्या ॥ * ॥ रेखाप्रमाणमाह छन्दोगपरिशिष्टे कात्यायनः ।
"यह्वे प्रागगतायास्तु प्रमाणं द्वादशाङ्गुलम् ।
तत्सम्बद्धा योदीची तस्या एवं मनोत्तरम् ॥
उदगतायाः संलग्नाः शेषाः प्रादेशमात्रिकाः ।
सप्ताङ्गुलान्तरास्ताश्च कुशेनैव समुल्लिखेत् ॥"
मधिकं द्वादशाङ्गुलमेकविंशत्यङ्गुलम् । शेषाः उदग्रेखयोरवशिष्टास्तिस्रः । कुशेन इति सर्व्वत्राभिसम्बध्यते । एवकारेण शाखान्तरोक्तस्य व्यावृत्तिः ॥ * ॥ रेखाणां देवता वर्णांश्चाह स्मृतिः ।
"प्रागगता पार्थिवी ज्ञेया चाग्नेयी चाप्युदग्गता ।
प्राजापत्या तथा चैन्द्री सौमी च प्राकृता स्मृता ॥
पार्थिवी पीतवर्णा स्यादाग्नेयी लोहिता भवेत् ।
प्राजापत्या भवेत् कृष्णा नीला चैन्द्री प्रकीर्त्तिता ॥
श्वेतवर्णेन सौमी स्यात् रेखाणां वर्णलक्षणम् ॥"

अग्निस्थापनपर्य्यन्तं सव्यहस्तमादेशस्य विधानमाह । गृह्यासंग्रहः ।
"सव्यं भूमौ प्रतिष्ठाप्य प्रोक्षिखेद्दक्षिणेन तु ।
तावन्नोत्थापयेत् पाणिं यावदग्निं निधापयेत् ॥"
मानकर्त्तारमाह छन्दोगपरिशिष्टे कात्यायनः ।
"मानक्रियायामुक्तायामनुक्ते मानकर्त्तरि ।
मानकृद्यजमानः स्याद्विदुषामेष निश्चयः ॥"
अङ्गुष्ठाङ्गुलिमानमाह स एव ।
"अङ्गुष्ठाङ्गुलिमानन्तु यत्र यत्रोपदिश्यते ।
तत्र तत्र बृहत्पर्व्वग्रन्थिभिर्म्मिनुयात् सदा ॥"
यजमानाश्रविधौ होमे तु साधारणाङ्गुलिमानम् । यथा कपिलपञ्चरात्रम् ।
"अष्टभिस्तैर्भवेज्ज्येष्ठं मध्यमं सप्तभिर्यवैः ।
कन्यसं षड्भिरुद्दिष्टमङ्गुलं मुनिसत्तमे ॥"
तैः प्रकाश्यमाणयवैः । कन्यसं कनिष्ठम् । मानन्तु पार्श्वेन । षड्यवा पार्श्वसंमिताः । इति कात्यायनवचनात् । इति संस्कारतत्त्वम् ॥

स्थण्डिलशायी, [न्] पु, (स्थण्डिले शेते इति । शी + "शेते ।" ३ । २ । ८० । इति इनि ।) यो व्रतवशात् स्थण्डिले शेते स. । तत्पर्य्यायः । स्थाण्डिलः २ । इत्यमरः । २।७।४४ ॥ स्थण्डिलेशयः ३ । इति शब्दरत्नावली ॥ (वाच्यलिङ्गेऽपि वर्त्तते । यथा, भट्टिः । ३ । ४१ ।
"वाचयमान् स्थण्डिलशायिनश्च
युयुक्षमाणाननिशं मुमुक्षून् ।
अध्यापयन्तं विनयात् प्रणेमुः
पद्गा भरद्वाजमुनिं सशिष्यम् ॥")

स्थण्डिलसिकता, स्त्री, (स्थण्डिले सिकता यत्र ।) वेदिः । इति हारावली ॥

स्थण्डिलेशयः, पुं, (स्थण्डिले शेते इति । शी + अच् । अलुक्समासः ।) स्थण्डिलशायी । इति शब्दरत्नावली ॥ (वाच्यलिङ्गोऽप्ययमिति केचित् ॥ यथा, भागवते । ४ । २१ । ६ ।
"आकण्ठमग्नः शिशिरे उदके स्थण्डिलेशयः ॥")

स्थपतिः, पुं, (तिष्ठन्त्यस्मिन्निति । स्था + कः । स्थः स्थानम् । तं पातीति । पा + बाहुलकात् अतिः । इत्युणादिवृत्तौ उज्ज्वलः । ४ । १८ ।) गोष्पतीष्टियाग्या । बृहस्पतिसवनामकयागकर्त्ता । कारुभेदः । राज् इति भाषा । इत्यमरः । ३ । ३ । ६० ॥ कारुः शिल्पी तद्भेदे यः इति ख्याते । स्थपतिः कारुभेदो मुख्यतश्चेति स्वामी । बृहस्पतियाजिनि कञ्चुकिनि च । ...
लक्षणं यथा,—
"वास्तुविद्याविधानज्ञो ल...
दीर्घदर्शी च शूरश्च स्थपतिः ...
इति मात्स्ये...
कञ्चुकी । इति मेदिनी ॥ कु...
पालः ॥ अधीशः । इति हेम...
रामायणे । २ । ५२ । ५ ।
"स तु रामस्य वचनं निशम्य ...
स्थपतिस्तूर्णमाहूय सचिवानिद...

स्थपतिः, त्रि, (तिष्ठन्ति सधर्म्मे ...
स्तेषां पतिः ।) सत्तमः । इ...

स्थपुटः, त्रि, विषमसञ्चारजीवो ... ।
शेषः ॥ विषमोन्नतम् । इति ध. हेम...

स्थल, ञ स्थाने । इति कविकल्पद्रुमः ॥
(भ्वा०-पर०-सेट् ।) ञ, ...
यिष्यति । अयं मालतीर्थ ... केचित् । ...
दासः ॥

स्थलं, क्लीं, स्त्री, (स्थलन + अच् ।) अक... ।
कृत्रिमभूभागः । शाब्दतत्पर्य्यायः । स्थली ...
मरः । २ । १ । ... १ । स्थलते स्थीयतेऽत्र ...
स्थलज स्थाने स्यात् ... । एवं स्थली गार्गी ...
इत्यादिना ... कृत्रिमत्वे ऽपि स्थली निपात...
कृत्रिमन्ना तु ... तु भावे स्थला । कृत्रिमाकृत्रिम...
सामान्य. ... तु स्थल प्रयुज्यते । इति दुर्गः । ...
शब्दतपिका ... स्थानेषु मङ्गलिङ्गः । इति भरतः ॥ (यथा, ...
"... सभा... ७ । १८२ ।
हयगुल्माह्वयनाम्ने सभे युध्येदश्वे शौरिश्वेस्या ।
... स्थलेभावृषः स्थले ॥"
यथा च तैत्तिरीयसंहितायाम् । १ । ६ । १० । ३ ।
"यत्रो यजमानाय वर्षति स्थलयोदकं परिगृह्णन्ति ॥")

स्थलं, क्लीं, (स्थल + अच् ।) जलशून्यकृत्रिमा कृत्रिमभूभागः । इत्यमरटीकायां भरतः । २ । १ । ५ । (स्थानमात्रम् । यथा, रघुः । ५ । ५२ ।
उवाच वाग्मी दशनप्रभाभिः
संवर्द्धितोरःस्थलतारहारः ॥")।
वस्त्रगृहम् । यथा,—
"पटवासः पटमयं दूष्य वस्त्रगृहं स्थलम् ॥"
इति त्रिकाण्डशेषः ॥

स्थलकन्द, पु, (स्थलजातकन्दः ।) वन्याम्लकन्द । इति रत्नमाला ॥ वनपोल इति भाषा ॥

स्थलकमल, क्लीं, (स्थलस्य कमलम् ।) स्थलपद्मम् । (यथा, गीतगोविन्दे । १० । ७ ।
"स्थलकमलगञ्जन मम हृदयरञ्जनं
जनितरतिरङ्गपरभागम् ॥")
तत्पर्य्यायः । पद्मचारिणी २ अतिचरा ३ अव्यथा ४ पद्मा ५ चारटी ६ । अस्य गुणाः । कनुष्णत्वम् । कटुत्वम् । तिक्तत्वम् । कषायत्वम् । ... मूत्रकृच्छ्राश्मशूलश्वासकासविनाशित्वम् । इति भावप्रकाशः ॥

क्रियासारेऽपि ।
"कुण्डमेवंविधं न स्यात् स्थण्डिलं वा समाश्रयेत् ॥"
शारदातिलकेऽपि ।
"नित्यं नैमित्तिकं काम्यं स्थण्डिले वा समाचरेत्
हस्तमात्रन्तु तत् कुर्य्यात् चतुरस्रं समन्ततः ॥"
इति तिथ्यादितत्त्वम् ॥ * ॥
अपि च । गोभिलः । अनुगुप्ता अप आहृत्य प्रागुदक्प्रवणं देशं समं वा परिसमूह्य उपलिप्य मध्यतः प्राचीं रेखामुल्लिख्य उदीचीञ्च संहतां पश्चान्मध्ये प्राचीस्तिस्र उल्लिख्याभ्युक्षेत् लक्षणावृदेषा सर्व्वत्रेति । अनुगुप्ता आच्छादिताः । पतितादिभिरदृष्टा इति यावत् ॥ प्राङ्नीचादिफलमाह गृह्यासंग्रहे गोभिलपुत्रः ।
"प्राङ्नीचं ब्रह्मवर्च्चस्यमुदङ्नीचं यशोत्तमम् ।
पित्र्यं दक्षिणतो नीचं प्रतिष्ठाकामकं समम् ॥"
यशोत्तममित्यत्र धान्ता अध्यदन्ता इत्युक्तेरदन्तोऽपि यशशब्दः शयाशिरः इतिवत् । परिसमूह्य सर्व्वतः कुशैः पांश्वादिकमपसार्य्य उत्तरस्यां दिशि सार्द्धहस्तोपरि क्षिपेत् । परिसमूह्य वितस्तित्रये उत्तरत उत्करं करोतीति हरिशर्म्मधृतवचनात् । तत उपलेपनम् ॥*॥ तत्र कारणमाह गृह्यासंग्रहः ।
"इन्द्रेण वज्राभिहतः पुरा वृत्रो महासुरः ।
मेदसा तस्य संक्लिन्ना तदर्थमुपलेपयेत् ॥" इति ।
मध्यतः स्थण्डिलाभ्यन्तरे दक्षिणांशे न तु मध्यांशे उदग्गतैकरेखात्वानुरोधात् ।
अन्यथा ॥
"कुशैः संमार्ज्जयेद्भूमिं शुक्लामादौ यथाक्रमात्‌ ।
हस्तमात्रां चतुरस्रां गोमयेनोपलेपयेत् ॥"
इति भारद्वाजीयहस्तप्रमाणस्थण्डिले तदनुपपत्तेः । प्राचीं प्रागग्राम् । उदीचीञ्च संहतां पश्चादिति । प्रागग्रताया पश्चिमे भागे संलग्नामुदगग्राम् । मध्ये उदग्गतायाः प्राचीः प्रागग्रास्तिस्रो रेखा उल्लिख्याभ्युक्षयेदिति । रेखाभ्य उद्धृतमृत्तिकोद्धरणपूर्व्वकमभ्युक्षयेत् । उल्लिख्य उद्धृत्याभ्युक्षयेदिति कात्यायनसूत्रात् ॥ * ॥
उत्करप्रक्षेपदेशमाह गृह्यासंग्रहः ।
"उत्करं गृह्य रेखाभ्योऽरत्निमात्रे निधापयेत् ।
द्वारमेतत् पदार्थानां प्रागुदीच्यां दिशि स्मृतम्
इति ॥
परिसमूहनादिपरिषेकान्तं कर्म्म लक्षणसंज्ञकं तच्च लक्षणस्याहत प्रक्रिया सर्व्वत्र यत्र यत्राग्निप्रणयनं तत्र बोध्या ॥ * ॥ रेखाप्रमाणमाह छन्दोगपरिशिष्टे कात्यायनः ।
"दक्षिणे प्रागग्रतायास्तु प्रमाणं द्वादशाङ्गुलम्
तन्मूललग्ना योदीची तस्या एवं मतोत्तरम् ॥
उदग्गतायाः संलग्नाः शेषाः प्रादेशमात्रिकाः ।
सप्तसप्ताङ्गुलान्यत्रा कुशेनैव समुल्लिखेत् ॥"
मतोत्तरं मताधिकं द्वादशाङ्गुलमित्यर्थः । शेषाः उत्तररेखापरिष्टास्तिस्रः । कुशेन इति सर्व्वत्राभिसम्बध्यते । एवकारेण शाखान्तरोक्तस्य व्यावृत्तिः ॥ * ॥ रेखाणां देवता वर्णांश्चाह स्मृतिः ।
"प्रागग्रता पार्थिवी ज्ञेया चाग्नेयी चापुदग्गता ।
प्राजापत्या तथा चैन्द्री सौमी च प्रागुदग्गता स्मृता ॥
पार्थिवी पीतवर्णा स्यादाग्नेयी लोहिता भवेत्
प्राजापत्या भवेत् कृष्णा नीला चैन्द्री प्रकीर्त्तिता ॥
श्वेतवर्णेन सौमी स्यात् रेखाणां वर्णलक्षणम् ॥"
अग्निस्थापनपर्य्यन्तं सव्यहस्तप्रादेशस्य विधानमाह । गृह्यासंग्रहः ।
"सव्यं भूमौ प्रतिष्ठाप्य मौञ्जिखेदक्षिणेन तु ।
तावन्नोत्थापयेत् पाणिं यावदग्निं निधापयेत् ॥"
मानकर्त्तारमाह छन्दोगपरिशिष्टे कात्यायनः ।
"मानक्रियायामुक्तायामनुक्ते मानकर्त्तरि ।
मानकृद्यजमानः स्याद्विदुषामेव निश्चयः ॥"
अङ्गुष्ठाङ्गुलिमानमाह स एव ।
"अङ्गुष्ठाङ्गुलिमानन्तु यत्र यत्रोपदिश्यते ।
तत्र तत्र बृहत्पर्व्वग्रन्थिभिर्मिनुयात् सदा ॥"
यजमानाङ्गविधौ होमे तु साधारणाङ्गुलिमानम् । यथा कपिलपञ्चरात्रम् ।
"अष्टभिस्तैर्भवेज्ज्येष्ठं मध्यमं सप्तभिर्यवैः ।
कन्यसं षड्भिरुद्दिष्टमङ्गुलं मुनिसत्तमैः ॥"
तैः प्रक्रम्यमाणयवैः । कन्यसं कनिष्ठम् । मानन्तु पार्श्वेन । षड्यवाः पार्श्वसंमिताः । इति कात्यायनवचनात् । इति संस्कारतत्त्वम् ॥
स्थण्डिलशायी, [न्] पुं, (स्थण्डिले शेते इति । शी + "व्रते ।" ३ । २ । ८० । इति णिनिः ।) यो व्रतवशात् स्थण्डिले शेते सः । तत्पर्य्यायः । स्थाण्डिलः २ । इत्यमरः । २।७।४४ ॥ स्थण्डिलेशयः ३ । इति शब्दरत्नावली ॥ (वाच्यलिङ्गेऽपि वर्त्तते । यथा, भट्टिः । ३ । ४१ ।
"वाचंयमान् स्थण्डिलशायिनश्च
युयुक्षमाणाननिशं मुमुक्षून् ।
अध्यापयन्तं विनयात् प्रणेमुः
पद्गा भरद्वाजमुनिं सशिष्यम् ॥")
स्थण्डिलसितकं, क्ली, (स्थण्डिले सिकता यत्र ।) वेदिः । इति हारावली ॥
स्थण्डिलेशयः, पुं, (स्थण्डिले शेते इति । शी + अच् । अलुक्समासः ।) स्थण्डिलशायी । इति शब्दरत्नावली ॥ (वाच्यलिङ्गोऽप्ययमिति केचित् ॥ यथा, भागवते । ४ । २१ । ६ ।
"आकण्ठमग्नः शिशिरे उदके स्थण्डिलेशयः ॥")
स्थपतिः, पुं, (तिष्ठन्त्यस्मिन्निति । स्था + कः । स्थः स्थानम् । तं पातीति । पा + बाहुलकात् अतिः इत्युणादिवृत्तौ उज्ज्वलः ।४।५८।) गोष्पतौ ष्टियज्ञः । बृहस्पतिसवनामकयागकर्त्ता । कारुभेदः । राज् इति भाषा । इत्यमरः ।३।१।६०॥ कारुः शिल्पी तद्भेदे थवइ इति ख्याति । स्थपतिः कारुभेदो मुख्यतक्षेति स्वामी । बृहस्पतियाजिनि कञ्चुकिनि च । इति भरतः ॥ लक्षणं यथा,—
"वास्तुविद्याविधानज्ञो लघुहस्तो जितश्रमः
दीर्घदर्शी [illegible]
इति मात्स्ये । २५५ । १८
कञ्चुकी । इति मेदिनी ॥ कुबेरः । [illegible]पालः ॥ अधीशः । इति हेमचन्द्रः ॥ (कारामायणे । २ । ५२ । ५ ।
"स तु रामस्य वचनं निशम्य प्रतिपद्य च
स्थपतिस्तूर्णमाहूय सचिवानिदमब्रवीत् ॥")
स्थपतिः, त्रि, (तिष्ठन्ति स्वधर्म्मे इति स्थाः स्तेषां पतिः ।) सत्तमः । इति मेदिनी ।
स्थपुटः, त्रि, विषमसञ्चारजोषी ३ । इति त्रिकाण्डशेषः ॥ विषमोन्नतम् । इति हेमचन्द्रः ॥
स्थल, जस्थाने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सेट् ।) ज, स्थालं [illegible] स्थलः । तिष्ठति । अयं मान्तोऽपि । केचित् । इति दुर्गादासः ॥ [illegible]
स्थलं, क्ली, स्थली, (स्थल+अच् ।) जलशून्याकृत्रिमभूभागः । [illegible]तत्पर्य्यायः । स्थली २ । इत्यमरः । २ । १ । [illegible] स्थली स्थलं तत्र स्थलज स्थाने [illegible] एवं स्थली नारी इत्यादिना [illegible] कृत्रिमत्वेऽपि स्थली निपात्यते । कृत्रिमत्वे तु [illegible] स्थला । कृत्रिमाकृत्रिमसामान्य[illegible] स्थलं प्रयुज्यते । इति इक्षाः । [illegible] स्थोनपुंसकलिङ्गः । इति भरतः ॥ (मनुसंहिता । ७ । १९२ ।
"[illegible] समे युद्ध्येतरथाश्वैः [illegible] स्थले ॥"
यथा च तैत्तिरीयसंहितायाम् ।१।६।१०।
"यज्ञो यजमानाय वर्षति स्थलयोदकं परिगृह्णन्ति ॥")
स्थलं, क्ली, (स्थल + अच् ।) जलशून्याकृत्रिमभूभागः । इत्यमरटीकायां भरत । १ । ५ । (स्थानमात्रम् । यथा, रघुः । ५ ।
उवाच वाग्मी दशनप्रभाभिः
संवर्द्धितोरःस्थलतारहारः ॥")।
वस्त्रगृहम् । यथा,—
"पटवासः पटमयं दूष्यं वस्त्रगृहं [illegible]
इति त्रिक[illegible]
स्थलकन्दः, पुं, (स्थलजातकन्दः । [illegible] कन्दः । इति रत्नमाला ॥ [illegible] भाषा ॥
स्थलकमलं, क्ली, (स्थलस्य कमलम् ।) पद्मम् । (यथा, गीतगोविन्दे । १० ।
"स्थलकमलगञ्जनं मम हृदयरञ्जनं जनितरतिरङ्गपरभागम् ॥")
तत्पर्य्यायः । पद्मचारिणी २ अतिचरा ३ अव्यथा ४ पद्मा ५ चारटी ६ । अस्य गुणाः । अनुष्णत्वम् । कटुत्वम् । तिक्तत्वम् । कषायत्वम् । कफवातमूत्रकृच्छ्राश्मशूलश्वासकासविषापहत्वम् । इति भावप्रकाशः ॥

स्थाणीय

...पद्वीपं गतम्, तपनादिकम् ।
...तिरस्कारोदितकलां त्याग इष्यते ॥
...तादिमिहितो येन तं गोत्रमष्टभाष् ।
...तेषु नैष्ण्यलागदोषः क्रोध इष्यते ॥
...र्थेषु संभ्रमः स्थैर्यानुभाव उच्यते ।
...त्का तु लनितं चिन्तयन्त्यद्भयम् ॥
...तिनादिभिर्गद्गा जुगुप्सा विपयोद्भवा ।
...दिषु पदार्थेषु लोकसीमातिवर्त्तिषु ॥
...रो योगतो यस्तु स विस्मय उदाहृतः ।
...कारयोगतो यस्तु स विस्मय उदाहृतम् ।
...मी निर्वेदायन्वायामानविशामत्तं सुगम् ।
...दा मालतीमाधवे रतिः । नटकमेलके हासः ।
...रामायणे शोकः । महाभारते शमः । एवमन्ये
...पि । एते हि रसोपकारा उपपद्यमानेस्त्वैन्ये-
...विरुद्धैरविरुद्धैश्च भावैरनुच्छिद्याः प्रत्युत परि-
— महदयानुभवसिद्धाः ॥” ०॥) स्थिति-
, त्रि ॥ (तथा, महाभारते । ६।३।२६।
रस्थायिनौ च यष्टौ प्रज्वलितायुभौ॥”)
, पुं, (स्थातुं शीलमस्य । स्था + “स्नस-
:ति ।” ३।२।१५४ । इति उकञ् ।) एक-
धिकृतः एकस्मिन् ग्रामे नियोजितः । इत्य-
। २ । ८ । ७ ॥ (स्थितिशीले, त्रि । यथा,
ह: । २ । २२ ।
“आयोधने स्थायुकमस्तजात-
समोघमभ्यर्णमहाहवाय ।
दर्दौ वधाय क्षणदाचराणां
तस्मै मुनिः श्रेयसि जागरूकः ॥”)
स्थालं, क्ली, (तिष्ठत्यस्मिन् अन्नादिकमिति स्था + “स्थाचतिमृजेरिति ।” उणा० १ । ११५ । इति आलच् ।) हेमादिकृतभोजनपात्रम् । थाल
इति भाषा । इत्यमरः । ३।५ । २२ ॥ स्थलति
तिष्ठति अन्नादिकमत्र स्थालं स्थल ज स्थाने
घञ् । इति भरतः ॥ (अस्थिविशेषः । यथा,
याज्ञवल्क्यः । ३ । ८५ ।
“स्थालैः सह चतुःषष्टिर्दशना वै विंशतिर्नखाः ॥”
“स्थालानि दन्तमूलप्रदेशस्थान्यस्थीनि ।” इति
तत्र मिताक्षरा ॥)
...ली, स्त्री, (तिष्ठन्त्यत्रान्नादीनीति । स्था +
आलच् । गौरादित्वात् ङीष् । इत्युणादिवृत्तौ
उज्ज्वलः । १ । ११५ ।) पाकपात्रविशेषः ।
हाँड़ी इति थाली इति च भाषा । तत्पर्य्यायः ।
पिठरः २ उखा ३ कुण्डम् ४ । इत्यमरः । २ ।
९ । ३१ ॥ पिठरी ५ स्थालम् ६ उषा ७ कुण्डी
८ । इति तट्टीका ॥ कुण्डा ८ कुण्डिका १० ।
इति शब्दरत्नावली ॥ पाकः ११ पातिली १२ ।
इति जटाधरः ॥ (यथा, हरिवंशे । २६ । ४० ।
“पूरयित्वाग्निना स्थालीं गन्धर्व्वाय तमब्रुवन् ।
अनेनेष्ट्वा च लोकान्त्वं प्राप्स्यसि त्वं नराधिप ॥”)
पाटलावृक्षः । इत्यमरटीका । २ । ४ । ५४ ॥
मेदिनी च ॥
स्थालीपक्वं त्रि, (स्थाल्यां पक्वम् ।) स्थाल्यां
पक्वान्नादि ॥

स्थालीपाकः, त्रि, (स्थाल्यां पाको यस्य ।) भाजन-
पक्वान्नादिः । यथा, धातुर्म्मात्यन्नतं माल्ये ।
“लभते मङ्गतिं दीर्घां स्थालीपाकमभक्षयन् ॥”
इति तिथ्यादितत्त्वम् ॥
(स्थाल्यां पच्यते इति । पच् + घञ् । स्थाली-
कृतपाकविशेषे, चरुविशेषे च पुं । यथा,
महाभारते । ३ । २६२ । १२ ।
“ये च धर्म्माः कुटुम्बेषु गम्या मे कथिताः पुरा ।
भिक्षावलिश्राद्धमिति स्थालीपाकाय पर्व्वस ॥
मान्यानां मानसत्कारा ये चान्ये विदिता मम
तान् सर्व्वाननुवर्त्तामि दिवारात्रमतन्द्रिता ॥”)
मांसाष्टकाश्राद्धे स्थालीपाकस्य मांसप्रति-
निधित्वं यथा, “पशुभावे स्थालीपाकेन यथा
गोभिलः । ‘अपि वा स्थालीपाकं कुर्व्वीत
इति ।’ तद्विधानन्तु ।
“स्थालीपाकं पशुस्थाने कुर्य्याद्यद्यानुकल्पिकम् ।
श्रपयेत्तं सवत्सायास्तरुण्या गोः पयस्यनु ॥”
अन्विति
इति छन्दोगपरिशिष्टोक्तं ग्राह्यम् । अन्विति
पश्चात् ।” इति तिथ्यादितत्त्वम् ॥
औटनचरोः पश्चात् ।” इति तिथ्यादितत्त्वम् ॥
वैद्यकोक्तस्थालीपाकविधिर्यथा,—
अथ स्थालीपाकविधिः ।
“इत्यमादित्यपाकान्ते स्थाल्यां पाकमुपाचरेत् ।
स्थालीपाके फलग्राह्यमयमस्त्रिगुणोक्तम् ॥
तस्य षोडशिकं तोयमष्टभागावशेषितम् ।
मृदुमध्यकठोराणामन्यो पामयसा समम् ॥
क्वथनीयं समादाय चतुरष्टौ च षोड़श ।
गुणानां स्थाप्यते तोयं शेषयेदयसा समम् ॥
स्वरसस्यापि लौहेन स्थालीपाके समानता ।
स्थाल्यां क्वाथादिकं दत्त्वा यथाविधिविनिर्म्मितम् ।
पाकेन चीयते यस्मात् स्थालीपाक इति स्मृतः ।
हस्तिकर्णपलाशस्य मूलञ्च शतमूलिका ॥
भृङ्गराजाख्यराजानामेषां निजरसैः सह ।
मिलित्वा वा विधातव्यं स्थालीपाके फलादनु ।
यथा दीर्घौषधेनापि स्थालीपाको विधीयते ॥”
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधि-
कारे ॥)
स्थालीपुलाकः, पुं, (स्थालीस्थः पुलाको भक्त-
गुलिका यत्र ।) न्यायविशेषः । यथा,—
“स्थालीस्थास्तण्डुला एते सर्व्वे विक्लित्तिभागिनः
समकालाग्निसंयोगभागित्वात् प्रतिपन्नवत् ॥”
इति स्थालीपुलाकन्यायेन वैदिकलिङ्गत्वाव-
च्छेदेनापूर्व्वं शक्तिकल्पनात् । प्रतिपन्नं हस्त-
मर्दनादिना स्फुटितत्वेन ज्ञातम् । इति मल-
मासतत्त्वम् ॥
स्थालीबिलं, क्ली, (स्थाल्या बिलम् ।) पाकपात्र-
स्याभ्यन्तरम् । स्थाल्याः शून्यभागः । इति
सिद्धान्तकौमुदी ॥
स्थालीबिलीयः, } त्रि, (स्थालबिलमर्हतीति ।
स्थालीबिल्यः, } “स्थालीबिलात् ।” ५।१।७० ।
इति छः यच्च ।) पाकयोग्यतण्डुलादिः । यथा,
स्थालीबिलीयास्तण्डुलाः । स्थालीबिल्याः पाक-
योग्या इत्यर्थः । इति सिद्धान्तकौमुदी ॥

स्थालीवृक्षः, पुं, (स्थालीवत् वृक्षः ।) ...
बेनियापोपर इति हिन्दी भाषा । तत्पर्य्यायः ।
नन्दीवृक्षः २ अश्वत्थभेदः ३ प्ररोही ४ गज-
पादपः ५ स्थालकः ६ क्षीरी ७ वनस्पतिः ८ ।
अस्य गुणाः । लघुत्वम् । स्वादुत्वम् । तिक्त-
त्वम् । तुवरत्वत् । उष्णत्वम् । कटुपाकरसत्वम् ।
ग्राहित्वम् । विषपित्तकफास्रनाशित्वञ्च । इति
भावप्रकाशः ॥
स्थावरं, क्ली, (तिष्ठति धनुषीति स्था + वरच् ।)
धनुर्गुणः । इति त्रिकाण्डशेषः ॥
स्थावरः, पुं, (तिष्ठतीति । स्था + वरच् । पर्व्वतः ।
इति शब्दरत्नावली त्रिकाण्डशेषश्च ॥
स्थावरः, त्रि, (तिष्ठतीति । स्था + “स्थेशभास-
पिसकसो वरच् ।” ३ । २ । १७५ । इति
वरच् ।) जङ्गमेतरः । अचलवस्तु । इत्यमरः ।
३ । १ । ७२ ॥ जङ्गमा गोमक्षिकादयः तती-
ऽन्यो वृक्षादिः स्थावरः । इति भरतः ॥ * ॥
स च ब्रह्मणः सप्तमः सर्गः षड्विधश्च । यथा,—
“सप्तमो मुख्यसर्गस्तु षड्विधस्तस्थुषाञ्च यः ।
वनस्पत्योषधिलता त्वक्सारा वीरुधो द्रुमाः ॥”
तेषां लक्षणं यथा,—
“उत्स्रोतसस्तमःप्राया अन्तःस्पर्शा विशेषिणः ॥”
इति श्रीभागवतम् ॥
“ये पुष्पं विना फलन्ति ते वनस्पतयः । ओषधयः
फलपाकान्ताः । लता आरोहणापेक्षाः ।
त्वक्सारा वेण्वादयः । लता एव काठिन्येन
आरोहणानपेक्षा वीरुधः । ये पुष्पैः फलन्ति ते
द्रुमाः । ऊर्द्ध्वं स्रोत आहारसञ्चारो येषां ते ।
तमःप्रायाः अव्यक्तचैतन्याः । अन्तःस्पर्शाः स्पर्श-
मेव जानन्ति नान्यत् तदापि अन्तरेव न बहिः
विशेषिणः अव्यवस्थितपरिणामादनेकभेदवन्त...
इति तट्टीकायां श्रीधरस्वामी ॥ * ॥ स्थावरध...
सान्निध्ये तरेभ्यो न विक्रेतव्यम् । यथा,—
“स्थावरं धनमन्यस्मै स्थिते सान्निध्यवर्त्तिनि...
योग्ये क्रेतरि विक्रेतुं न शक्तः स्थावराधि...
सान्निध्यवर्त्तिनां ज्ञातिः सवर्णो वा विशि...
तयोरभावे सुहृदो विक्रेविच्छा गरीयसी...
निर्णीतमूल्ये पण्येन स्थावरस्य क्रयोद्यमे...
तन्मूल्यस्तत् समीपस्थो राति क्रेता न...
मूल्यं दातुमशक्तश्चेत् सम्मतो विक्रयेऽ...
सन्निधिस्थस्तदान्यस्मै गृही शक्नोति...
क्रीतश्चेत् स्थावरं देवि ! परोक्षे प्रति...
श्रवणादेव तन्मूल्यं दत्त्वासौ प्राप्नुय...
क्रेता तत्र गृहारामान् विनिर्म्मिति...
मूल्यं दत्त्वापि नाप्नोति स्थावरं स...
इति महानिर्व्वाणतन्त्रे दा...
स्थावरे विशेषो यथा, याज्ञवल्क्यः...
“मणिमुक्ताप्रवालानां सर्व्वस्यैव...
स्थावरस्य तु सर्व्वस्य न पिता न...
अपि च ।
“स्थावरं द्विपदञ्चैव यद्यपि...
असम्भूय सुतान् सर्व्वान् न दा...

स्थिरतरः, त्रि, (अयमनयोरतिशयेन स्थिरः । स्थिर+तरप् ।) अतिशयस्थिरः । तत्पर्य्यायः । स्थास्नुः २ स्थेयान् ३ । इत्यमरः । ३।१।७२ ॥ दृढतरः ४ । इति शब्दरत्नावली ॥ स्थेयः ५ । प्रतिस्थिरः ६ स्थेष्ठः ७ । इति हेमचन्द्रः ॥

स्थिरदंष्ट्रः, पुं, (स्थिरा दंष्ट्रा यस्य ।) भुजङ्गः । वराहाकृतिविष्णुः इति मेदिनी ॥ ध्वनिः । इत्यजयः ॥

स्थिरपत्रः, पुं, (स्थिराणि पत्राणि यस्य ।) हिन्तालः । इति राजनिर्घण्टः ॥

स्थिरपुष्पः, पुं,(स्थिराणि पुष्पाणि यस्य ।)चम्पकवृक्षः । वकुलः । इति राजनिर्घण्टः ॥

स्थिरपुष्पी, [न्] पुं, (स्थिरपुष्पमस्यास्तीति । इनिः ।) तिलकवृक्षः । इति राजनिर्घण्टः ॥

स्थिरफला, स्त्री, (स्थिरं फलं यस्याः ।) कुष्माण्डी । इति केचित् ॥

स्थिरमतिः, स्त्री, (स्थिरा मतिः ।) निश्चला बुद्धिः । यथा,—

"स्थिरमतिं सुमतिं कमनीयतां
कुशलतां हि नृणामुपभोगिताम् ।
उपगतो हिमगुर्भ्रमणादिमित्
सुकृतिनः कृतिनश्च सुखान्यपि ॥"
इति कोष्ठीप्रदीपः ॥

तद्युक्ते, त्रि । स्थिरा मतिर्यस्येति बहुव्रीहिसमासः ॥

स्थिरयोनिः, पुं, (स्थिरा योनिरुत्पत्तिर्यस्य ।) छायातरुः । इति भूरिप्रयोगः ॥

स्थिरयौवनः, पुं, (स्थिरं यौवनं यस्य ।) विद्याधरः । इति त्रिकाण्डशेषः ॥ (स्थिरं यौवनमिति । नित्ययौवने, क्ली । यथा, मार्कण्डेये । ६० । ३ ।

"तस्य ते वै फलरसं पिबन्तः पुरुषाः सदा ।
स्थिरयौवनसम्पन्नाः स्त्रियश्चोत्पलगन्धिकाः ॥")

चिरस्थायितरुणावस्थे, त्रि ॥ (यथा, विष्णुपुराणे । १२१ । ६२ ।

"सत्यभामोत्तमा स्त्रीणां सुभगा स्थिरयौवना ।
जरां न यास्यति वधूर्यावत्त्वं त्वत्र मानुषः ॥")

स्थिररङ्गा, स्त्री, (स्थिरो रङ्गो रागो यस्याः ।) नीली । इति राजनिर्घण्टः ॥

स्थिररागा, स्त्री, (स्थिरो रागो यस्याः ।) दारुहरिद्रा । इति राजनिर्घण्टः ॥

स्थिरशौर्य्यः, त्रि, स्थिरा शौर्य्यं शौर्य्यं यस्य । स्थिरसम्बोधः । यथा, तिथ्यादितत्त्वे मत्स्यपुराणम् ।

"स्थिरोपायो हि पुरुषः स्थिरशौर्य्यैश्च जायते ।
रक्षितुं नैव शक्नोति चपलचपलां श्रियम् ॥"

स्थिरसाधनकः, पुं,(स्थिरं साधयतीति । साधि+ल्युः । ततः कन् ।) सिन्दुवारवृक्षः । इति राजनिर्घण्टः ॥

स्थिरसारः, पुं, (स्थिरः सारो यस्य ।) शाकवृक्षः । इति राजनिर्घण्टः ॥

स्थिरा, स्त्री, (स्था+किरच् । टाप् ।) पृथिवी । इत्यमरः । २।१।२ । २।४।११९ ॥ काकोली । इति जटाधरः ॥ शाल्मलिवृक्षः । इति शब्दचन्द्रिका ॥ स्थैर्य्ययुक्ता स्त्री च ॥

स्थिराङ्घ्रिपः, पुं, (स्थिरः अङ्घ्रिपः वृक्षः ।) हिन्तालवृक्षः । इति राजनिर्घण्टः ॥

स्थिरायुः, [स्] पुं, (स्थिरं आयुर्यस्य ।)शाल्मलिवृक्षः । इत्यमरः ।२।४।४६॥ चिरजीविनि, त्रि॥

स्थुड, शि, वृत्याम् । इति कविकल्पद्रुमः ॥ (तुदा०-कुटा०-पर०-सक० सेट् ।) दन्त्यादिः । शि, स्थुडति अस्थुडीत् तुस्थोड । वृत्यां वरणे । इति दुर्गादासः ॥

स्थूरी, [न्] पुं, स्थौरी । इत्यमरटीकायां रायमुकुटः ॥

स्थूणा, स्त्री, (तिष्ठतीति । स्था+"रास्नासास्थूणावीणाः ।" उणा० ३ ।१५ । इति नप्रत्ययेन साधुः ।) गृहस्तम्भः । खुंटी इति भाषा ॥ (यथा, साहित्यदर्पणे । ३ । १७२ ।

"इतोऽन्य. पतिरेष मधुकगतः स्थूणावशेषं गृहं
कालोऽभ्यर्णजलागमः कुशलिनी वत्सस्य
वार्त्तापि नो ।
यत्नात् सञ्चिततैलविन्दुघटिका भग्नेति पर्य्याकुला
दृष्ट्वा गर्भभरालसां निजवधूं श्वश्रूश्चिरं
रोदिति ॥")

सूर्म्मी । लौहप्रतिमा । इत्यमरः । ३ । ३।५०॥

स्थ्यमः, पुं, दीप्तिः । चन्द्रः । इति केचित् ॥

स्थरः, पुं, (तिष्ठतीति । स्था+"स्थः किच ।" उणा० ५ । ४ । इति उरन् ।) हयः । इति संक्षिप्तसारोणादिवृत्तिः । मनुष्यः । इति सिद्धान्तकौमुदी ॥

स्थूरी, [न्] पुं, सादृश्येन स्थूरी हयोऽस्यास्तीति । इनिः ।) खरहयभवत् पृष्ठेन भारवाहकोऽश्वः । पृष्ठेन वहति पृष्ठ्यमपि भाष्यमुपचारात् पृष्ठ तद्वहति वा पृष्ठ्यः ठचे काठिति यः स्थूयते संस्त्रियते पृष्ठमनया स्थूरा । स्थूल त क ड वृ इणि सेमकात् मरीरिति षः निपातनात् लस्य रत्वं स्थूरा पर्य्ययणं तस्या इदमिति षो स्थौरं पृष्ठारोपितभारादिकं तदस्यास्येति इनि स्थौरी स्थूरी च स्थौरीति स्वामी । इत्यमरटीकायां भरतः ॥

स्थूल, त् क ड वृ इणि । इति कविकल्पद्रुमः ॥ (अदन्तचुरा०-पाम० अक०-सेट् ।) दीर्घी ड, अतुस्थूलत् । वृ इणं वृद्धिः । इति दुर्गादासः ॥

स्थूलं, त्रि, (स्थूलयतीति । स्थूल+अच् ।) उपचितावयवम् । मोटा इति भाषा । तत्पर्य्यायः । पीनम् २ पीवम् ३ पीवरम् ४ । यथा, कुमारे । २ । ११ ।

"द्रवः सङ्घातकठिनः स्थूलः सूक्ष्मो लघुर्गुरुः ।
व्यक्तो व्यक्तेतरश्चासि प्राकाम्यं ते विभूतिषु ॥")

जडः । इत्यमरः । ३ । ३ । २०२ ॥ (यथा, महाभारते । १२ । ३०१ । १६ ।

न यः समतनुं कथयेत् प्रयत्नात् स्थूलबुद्धिमान् ।
स वयं मन्दविज्ञानो गच्छ वर्त्मानि निर्णयात् ॥")

स्थूलं, क्ली, (स्थूल+अच् ।) कूटम् । इति मेदिनी ॥

स्थूलः, पुं,(स्थूलत् क ड वृ इणे+अच् ।) इति राजनिर्घण्टः । (विष्णुः । महाभारतम् । १३ । १४९ । १०३ ॥ रक्तलशुनः । इति केचित् ॥ यथा, १ । ४६ । ... ईषल्लाषायाः कटुका रूक्षा ... कफवातला: पित्तहराश्च । माषकं स्वादु शीतञ्च गुरु चापि स्थूलकन्दस्तु नात्युष्णः सूरणो ...

स्थूलकः, पुं, (स्थूल एव । कन् ।) तृणविशेषः उलु इति भाषा । यथा, रत्नमालायाम् ।

"सूच्ययः स्थूलको दर्भी अर्थाख्यश्च

स्थूलकः, त्रि, (स्थूल+स्वार्थे कन् । यद्वा, प्रकार इति । "स्थूलादिभ्यः प्रकारवचने ५ । ४।३ । इति कन् ।) स्थूलः । स्थूलशब्दात् स्वार्थे कप्रत्ययेन निष्पन्नः ॥

स्थूलकङ्गुः, पुं, (स्थूलः कङ्गुः ।) वरकधान्यम् । इति राजनिर्घण्टः ॥

स्थूलकणा,स्त्री, (स्थूला कणा यस्याः ।) स्थूलजीरकः । इति राजनिर्घण्टः ॥

स्थूलकण्टकः,पुं,(स्थूलाः कण्टका यस्य ।)शाकवर्व्वरः । इति राजनिर्घण्टः ॥

स्थूलकण्टकिका, स्त्री, (स्थूलाः कण्टका यस्याः ततः कापि अत इत्वम् ।) शाल्मलिवृक्षः । इति शब्दचन्द्रिका ॥

स्थूलकण्टा,स्त्री,(स्थूलः कण्टो यस्याः ।)वृहती । इति राजनिर्घण्टः ॥

स्थूलकन्दः, पुं, स्थूलः कन्दः ।) रक्तलशुनः । (यथा, सुश्रुते । १ । ४६ ।

"स्थूलकन्दस्तु नात्युष्णः सूरणो गुदकीलहा ।)

सूरणः । हस्तिकन्दः । माणकन्दः । इति राजनिर्घण्टः ॥

स्थूलकाष्ठधक्, [ह्] पुं (स्थूलकाष्ठं दहतीति । दह+क्विप् । स्थूलकाष्ठस्य धक् इति वा ।) वृहत्काष्ठाग्निः । तत्पर्य्यायः । स्कन्धानलः २ । इति जटाधरः ॥

स्थूलकाष्ठाग्निः,पुं,(स्थूलकाष्ठस्य अग्निः ।) काष्ठानलः । तत्पर्य्यायः । स्कन्धाग्निः २ । इति हारावली ॥

स्थूलक्ष्वेडः, पुं, । (स्थूलः क्ष्वेडः ।) वाणः । इति त्रिकाण्डशेषः ॥

स्थूलचञ्चु, पुं, (स्थूला चञ्चुरिव शिखा यस्य ।) महाचञ्चुशाकः । इति राजनिर्घण्टः ॥

स्थूलचापः, पुं, (स्थूलचापः ।) तूलपरिष्कारार्थधनुः । इति शब्दरत्नावली ॥ तूलचाप इति माधुपाठः ॥

स्थूलजीरकः, पुं, (स्थूलो जीरकः ।) जीरकभेदः । कालजिरा इति वङ्गभाषा । मगरेला इति कलौञ्जी इति च हिन्दीभाषा । तत्पर्य्यायः । पृथ्वी २ उपकुञ्चिका ३ कारवी ४ पृथ्वी ५

१ ... ७ मक्षिका ८ ... ९
... ११ ... १२ ... १३
१४ । अस्य गुणाः । कटुत्वम् । तिक्त-
त्वम् । वातगुल्मादिदोषघ्नवापाक-
त्वम् । ... । दीपनत्वञ्च । इति
... १० विविधक्षौद्रनामगुणाः ।
... कृष्णा ... क्षौद्रम्
... ॥
... मधुपक्षिका दीपकालिका ।
... कालिका पृथ्वी पृथुः स्थूलापकुञ्चिका ।
... कार्यो पृथ्वी पृथुः ... इत्यपि ॥
... कृष्णो च ... ॥
... दीपनं मधु ।
... गर्भाशयविशुद्धिकृत् ॥
... पित्तम् ... कफापहम् ।
... पाचनं ... ॥
... पवनाध्मानगुल्मज्वरार्तिमारघ्नम् ॥"
इति भावप्रकाशः ॥

... (स्थूलस्तालः ।) हिन्तालः ।
स्थूलतालः, पुं, (स्थूलस्तालः ।) हिन्तालः ।
इति राजनिर्घण्टः ॥
स्थूलत्वचा, स्त्री, (स्थूला त्वक् यस्याः ।) काश्मरी ।
इति राजनिर्घण्टः ॥
स्थूलदण्डः, पुं, स्थूलो दण्डो यस्य ।) देवनलः ।
... राजनिर्घण्टः ॥
...ः, पुं, (स्थूलो दर्भो यस्य । मुञ्जः । इति
...निर्घण्टः ॥
...ला, स्त्री, (स्थूलं दलं यस्याः ।) ...
... । इति राजनिर्घण्टः ॥
...नालः, पुं, (स्थूलो नालः देवनलः । इति
राजनिर्घण्टः ॥
स्थूलनासः, पुं, (स्थूला नासा यस्य ।) सूकरः ।
इति हेमचन्द्रः ॥
स्थूलनासिकः, पुं, (स्थूला नासिका यस्य । "अज्ञा-
सिकायाः संज्ञायां नसं चास्थूलात् ।" ५।४ ।
११८ । इत्यत्र स्थूलवर्ज्जनात् न नसादेशः ।)
शूकरः । इति त्रिकाण्डशेषः ॥ पीननासायुक्ते,
त्रि ॥
स्थूलपटः, त्रि, (स्थूलः पटो यस्य । पीवरवस्त्र-
युक्तः । यथा,—
"... स्थूलपटा यवगोधूमशालिनः ।
...पि न सीदन्ति यदि कन्या न विद्यते ॥"
इति पुराणम् ॥

(स्थूलवस्त्रे, पुं क्लो ॥)
स्थूलपट्टः, पुं, स्थूलः पट्टः कौपेय इव ।) कार्पासः ।
इति शब्दरत्नावली ॥
स्थूलपट्टाकः, (पुं, स्थूलपट्टं कार्पासं अकति
प्राप्नोति कारणत्वेनेति । अक गतौ + अण् ।)
स्थूलवस्त्रम् । इति शब्दरत्नावली ॥
स्थूलपादः, पुं, (स्थूलः पादो यस्य ।) हस्ती । इति
शब्दमाला ॥ श्लीपदी च ॥
स्थूलपुष्पः, पुं, (स्थूलं पुष्पमस्य ।) वकवृक्षः । इति
रत्नमाला ॥ झण्टुक्षुपः । इति राजनिर्घण्टः ॥
स्थूलपुष्पा, स्त्री, (स्थूलं पुष्पं यस्याः ।) पर्व्वत-
सातापराजिता । इति रत्नमाला ॥

स्थूलपुष्पी, स्त्री, (स्थूलं पुष्पं यस्याः । ङीप् ।)
यवतिक्ता । इति राजनिर्घण्टः ॥
स्थूलफलः, (स्थूलं फलं यस्य ।) शाल्मलिवृक्षः ।
इति राजनिर्घण्टः ॥
स्थूलफला, स्त्री, (स्थूलं फलं यस्याः ।) शण-
पुष्पी । इति राजनिर्घण्टः ॥
स्थूलभद्रः, पुं, (स्थूलं प्रचुरमित्यर्थः भद्रं शुभं यस्य ।)
स्वनामख्यातजैनभेदः । इति हेमचन्द्रः ॥
स्थूलभूतं, क्ली, (स्थूलं भूतम् ।) पञ्चीकृताकाशा-
दिभूतम् । इति वेदान्तसारः ॥
स्थूलमरिचं, क्ली, (स्थूलं मरिचम् ।) कक्कोलम् ।
इति राजनिर्घण्टः ॥
स्थूलमूलं, क्ली, (स्थूलं मूलमस्य ।) चाणक्यमूलम् ।
इति राजनिर्घण्टः ॥
स्थूललक्षः, त्रि, (स्थूलं प्रचुरं लक्षयति दानाथे-
मिति । लक्ष + अण् ।) बहुप्रदः । इत्यमर-
टीकायां रायमुकुटः । ३ । १ । ६ ॥ (यथा,
याज्ञवल्क्ये । १ । ३०८ ।
"महोत्साहः स्थूललक्षः कृतज्ञो वृद्धसेवकः ।
विनीतः सत्त्वसम्पन्नः कुलीनः सत्यवाक्
शुचिः ॥")

स्थूललक्ष्यः, त्रि, (स्थूलं प्रचुरं वस्तु लक्ष्यमस्य ।)
बहुप्रदः । इत्यमरः । ३ । १ । ६ ॥ (यथा,
महाभारते । ३ । ४५ । ११ ।
"अकत्थनो मानयिता स्थूललक्ष्यः प्रियंवदः ।
सुहृदश्चान्नपानेन विविधेनाभिवर्षति ॥")
स्थूलवर्त्मकृत्, पुं, (स्थूलस्य वर्त्मनः कृत् कारकः ।)
ब्राह्मणयष्टिका । इति शब्दचन्द्रिका ॥
स्थूलवल्कलः, पुं, (स्थूलं वल्कलं यस्य ।) रक्त-
लोध्रः । इति जटाधरः ॥
स्थूलवृत्तफलः, पुं, (स्थूलं वृत्तफलं यस्य ।) स्निग्ध-
पिण्डीतकः । इति राजनिर्घण्टः ॥
स्थूलवैदेही, स्त्री, (स्थूला वैदेही विदेहभवा
च ।) गजपिप्पली । इति राजनिर्घण्टः ॥
स्थूलशरः, पुं, (स्थूलः शरः ।) शरविशेषः । महा-
मोटा शर इति भाषा । तत्पर्य्यायः । महा-
शरः २ स्थूलशायकः ३ इक्षुरकः ४ क्षुरपत्रः ५
बहुमूलः ६ दीर्घमूलकः ७ । अस्य गुणाः ।
मधुरत्वम् । सुतिक्तत्वम् । कोष्णत्वम् । कफ-
भ्रान्तिमदापहरत्वम् । बलवीर्य्यकारित्वम् । इति
निलं सेवितयेत् किञ्चिद्वातकरत्वञ्च । इति
राजनिर्घण्टः ॥
स्थूलशाटकः, पुं, (स्थूलः शाटकः ।) पीनवस्त्रम् ।
मोटा कापड़ इति भाषा । तत्पर्य्यायः ।
वराशिः २ । इत्यमरः । २ । ६ । ११६ ॥
वरासिः ३ । इति जटाधरः ॥
स्थूलशाटका, स्त्री, स्थूलवस्त्रम् । इत्यमरटीका ।
२ । ६ । ११६ ॥
स्थूलशाटिका, स्त्री, (स्थूला शाटिका ।) स्थूल-
वस्त्रम् । इत्यमरटीका । २ । ६ । ११६ ॥
स्थूलशाटिः, पुं, (स्थूलः शाटिः ।) वराशिः । इति
हेमचन्द्रः ॥

स्थूलशा... भेदः । तत्पर्य्यायः । महा...
स्थूलतण्डुलः ४ । अस्य गुणाः । स्वादुत्वम् ।
मधुरत्वम् । शिशिरत्वम् । पित्तशमनत्वम् ।
जीर्णज्वर-दाह-जठररुजा-शीघ्र-शमनत्वम् । सदा
शिशूनां यूनां जरतां च हितकरत्वम् । सदा
सेवनेनानलबलवीर्य्यकारित्वञ्च । इति राज-
निर्घण्टः ॥
स्थूलशिरः, [स्] क्ली, (स्थूलं शिरः ।) बृहन्म-
स्तकम् । (स्थूलं शिरो यस्य । मुनिविशेषः ॥
यथा, महाभारते । २ । ४ । ११ ।
"वको दाल्भ्यः स्थूलशिराः कृष्णद्वैपायनः
शुकः ॥")

स्थूलमस्तकयुक्ते, त्रि । इति केचित् ॥
स्थूलशीर्षिका, स्त्री, शरीरापेक्षया स्थूलं शीर्ष-
मस्याः स्थूलशीर्षा स्वार्थे के स्थूलशीर्षिका ॥
क्षुद्रपिपीलिका । इति हेमचन्द्रः ॥ बृहन्मस्तके,
त्रि ॥
स्थूलषट्पदः, पुं, (स्थूलः षट्पदः ।) वरलः ।
इति भूरिप्रयोगः ॥ बोलता इति भाषा ॥
स्थूलस्कन्धः, पुं, (स्थूलः स्कन्धो यस्य ।) लकुचः ।
इति राजनिर्घण्टः ॥
स्थूलहस्तः, पुं, (स्थूलो हस्तः ।) हस्तिशुण्डम् ।
इति त्रिकाण्डशेषः ॥ (यथा, मेघदूते । १४ ।
"स्थानादस्मात्सरसनिचुलादुत्पतोदङ्मुखः खं
दिङ्नागानां पथि परिहरन् स्थूलहस्ताव-
लेपान् ॥"

स्थूलौ हस्तौ यस्येति ।) पीनभुजे, त्रि ॥
स्थूला, स्त्री, (स्थूल + टाप् ।) गजपिप्पली । इति राजनिर्घण्टः ॥
शब्दचन्द्रिका ॥ एर्व्वारुः । इति राजनिर्घण्टः ॥
बृहदेला । इति रत्नमाला ॥
स्थूलांशा, स्त्री, (स्थूलोऽंशो यस्याः ।) गन्धपत्रा ...
इति राजनिर्घण्टः ॥
स्थूलाम्रः, पुं, (स्थूलः आम्रः ।) महाराजचूतः ।
इति राजनिर्घण्टः ॥
स्थूलास्यः, पुं, (स्थूलं आस्यं यस्य ।) सर्पः । ...
शब्दचन्द्रिका ॥ वृहन्मुखे, त्रि ॥
स्थूली, [न्] पुं, (स्थूलं शरीरमस्यास्ती...
इनिः ।) उष्ट्रः । इति केचित् ॥
स्थूलैरण्डः, पुं, (स्थूल एरण्डः ।) वृहदेरण्ड...
तत्पर्य्यायः । महैरण्डः २ महापञ्चाङ्ग...
अस्य गुणाः ।
"स्थूलैरण्डो गुणाढ्यः स्याद्रसवीर्य्यवि...
इति राजनि...

स्थूलैला, स्त्री, (स्थूला एला ।) एला ...
वड़ एलाचि इति भाषा । तत्पर्य्या...
देला २ त्रिपुटा ३ विदिशोद्भवा ...
त्वक् ५ महैला ६ पृथ्वी० कन्या ८ ...
कायस्था १० गोपुटा ११ भद्रैला १२ ...
घृताचीगर्भसम्भवा १४ इन्द्राणी ...
गन्धा १६ ऐन्द्री १७ । एलाद्वयगु...
त्वम् । तिक्तत्वम् । उष्णत्वम् ...

पिमाति कषायहत्वम् । हृद्रोगमनाशित्वम्ति-
कारित्वम् । पुंस्त्वनाशित्वम् । अव स्थविराया
गुणाश्चत्वम् ॥ स्थूलैलागुणाः । रोचनत्वम् ।
तीक्ष्णत्वम् । लघुत्वम् । उष्णत्वम् । कफपित्त-
श्वासविषवस्त्यास्यशिरोरुग्वमिकासनाशि-
त्वञ्च । इति राजनिर्घण्टः ॥

स्थूलोच्चयः, पुं, (स्थूलानामुच्चयो यत्र ।) गण्डो-
पलः । गजानां मध्यमगतिः । (यथा, माघे ।
१२ । १६ ।
"स्थूलोच्चयेनागमदन्तिकागतां
गजोऽप्रयातापकरः करेणुकाम् ॥")
अपाकत्वम् । वरण्डः । इति मेदिनी ॥ हस्ति-
दन्तारम्भम् । इति शब्दमाला ॥

स्थेयः, पुं, (तिष्ठति विवादनिर्णयार्थमस्मिन्निति ।
स्था + यत् ।) विवादपक्षस्य निर्णेता । (यथा,
राजतरङ्गिण्याम् । ६ । १४ ।
"कार्मान्तिको भिषक् मन्त्री गुरुर्मन्त्री पुरोहित-
दूतः स्थेयो लेखको वा न तदाभूदपण्डितः ॥")
पुरोहितः । इति मेदिनी ॥ स्थिरतरे, त्रि । इति
हेमचन्द्रः ॥ (क्ली, स्था + भावे यत् । स्थात-
व्यम् । यथा, हरिवंशे । ८५ । ७ ।
"बलिनं मलिकयं तु न स्थेयं पण्डितेन वै ।
अपक्रामितं बालकः समर्थो युद्धमाहवे ॥")

स्थेयान् [स्] त्रि, (अयमनयोरतिशयेन स्थिरः ।
स्थिर + ईयसुन् । "प्रियस्थिरेति ।" ६ । ४ ।
१५७ । इति स्थादेशः ।) स्थिरतरः । इत्यमरः ।
३ । १ । ०१ ॥ (यथा, महागणपतिस्तोत्रे ।
१५ ।
"ज्येष्ठः स्थेयः स देवान् मम विमलदृशो बन्धुरं
सिन्धुरास्यः ॥")
यापात. । इति भरतः ॥

स्थेष्ठः, त्रि, (अयमेषामतिशयेन स्थिरः । स्थिर +
इष्ठन् । "प्रियस्थिरेति । ६ । ४ । १५७ । इति
स्थादेशः ।) अतिस्थिरः । इति हेमचन्द्रः ॥

स्थैर्यम्, क्ली, (स्थिरस्य भावः । स्थिर + ष्यञ् ।)
स्थिरत्वम् । सर्वस्त्राङ्गानां स्थैर्यं चतुर्थे मासि
भवति । इति सुश्रुतः ॥ (यथा, शाकुन्तले ।
४ । ८० ।
"स्थैर्यं चतुर्थे तस्यानां दक्षिणे मोचितोदरः ।
पञ्चे हस्तस्य वक्त्रं मणोदोऽस्य ककुदः ॥")
दृढता । यथा, महाभारते । ३ । १३ । ८ ।
"महेन्द्रमहसः स्थैर्यं स्थैर्यं च हिमवानिव ।
समुद्र इव गाम्भीर्यं सहिष्णुत्वे वसुमतः ॥")

स्थौरः [न्] पुं, भारवाहकाश्वः । इति भरत-
द्विरूपकोषः ॥

स्थौणेयम्, क्ली, (स्थूणाया भवम् । स्थूणा + ढक् ।)
ग्रन्थिपर्णभेदस्त्वगन्धद्रव्यम् । इत्यमरः । २ । ४ ।
१२४ ॥ थुनेर इति भाषा ॥ अथ ग्रन्थि-
पर्णभेदः । ग्रन्थिपर्णस्य स्थौणेयस्य च गुणाः ।
इति कोषे ।
"ग्रन्थिपर्णं विषघ्नं स्यात् कटुकम् ।
स्थौणेयं हिमं तत्र बर्हि तद्वद्गुणं तद्वत्स्मृतम् ।

स्थौणेयकं कटु स्वादु तिक्तं स्निग्धं त्रिदोषनुत् ।
मेधाशुक्रकरं लघ्वं रक्षोऽस्त्रीज्वरजन्तुजित् ॥
हन्ति कुष्ठासृक्तृड्दाहदौर्गन्ध्यतिलकालकान् ॥"
अथ ग्रन्थिपर्णस्यैव भेदो भटेउर इति नेपाल-
देशे भवति ।
"निशाचरो धनहरः कितवो गणहासकः ।
रोचको मधुरस्तिक्तः कटुः पाके कटुर्लघुः ॥
तीक्ष्णो हृद्यो हिमो हन्ति कुष्ठकण्डूकफा-
निलान् ।
रक्षोऽस्त्रीस्वेदमेदोऽस्रज्वरगन्धविषव्रणान् ॥"
इति भावप्रकाशः ॥

स्थौणेयकं, क्ली, (स्थौणेयमेव । स्वार्थे कन् ।)
सुगन्धद्रव्यभेदः । थुनिरा इति हिन्दी भाषा ।
तत्पर्यायः । बर्हिशिखम् २ शुकच्छदम् ३
मयूरचूडम् ४ शुकपुच्छकम् ५ विकीर्णरोम ६
कौरवणकम् ७ विकीर्णसञ्ज्ञम् ८ हरितम् ८ ।
अस्य गुणाः । कफवातनाशित्वम् । सुगन्धि-
त्वम् । कटुत्वम् । तिक्तत्वम् । पित्तप्रकोपशम-
नत्वम् । बलपुष्टिविवर्द्धनत्वञ्च । इति राज-
निर्घण्टः । भावप्रकाशोक्तगुणपर्य्यायौ पूर्व्वोक्त-
शब्दे द्रष्टव्यौ ॥

स्थौरी [न्] पुं, खरहयभरत् पृष्ठेन भारवाहको-
ऽश्वः । तत्पर्यायः । पृष्ठ्यः २ । इत्यमरः २।८।
४६ ॥ हे खरहयभरत् पृष्ठेन भारवाहकेऽश्वे ।
पृष्ठेन वहति पृष्ठस्थमपि वाह्यमुपचारात् सह-
इति वा पृष्ठ्यः दघे कादिति य. । स्थूयते
संव्रियते पृष्ठमनया स्थूरा स्थूनत् क ड बृंहणे-
ऽस्मात् सरोरिति च निपातनात् तस्य रत्वं
स्थूरा पर्य्ययण तथ्या इदमिति वा स्थौर पृष्ठा
रोपितभारादिकं तदस्यास्तीति इति स्थौरी
स्थूरी च स्थौरीति स्वामी । इति भरतः ॥

स्थौलपौवं, त्रि, (स्थूलपिरस इदमिति । स्थूल-
पिरम् + अण् । "ऋषि योर्पः ।" ६।२।६२ ।
इति ज्ञापकेत्यः ।) तस्य स्नात्वसम्बन्धि । इति
कापिका ॥

स्थौल्यं, त्रि, (स्थूलस्य भावः । स्थूल + ष्यञ् ।)
स्थूलता । (यथा, भागवते । ३ । ११ । ३ ।
"एव कालोऽप्यनुमितः सौक्ष्म्ये स्थौल्ये च
सत्तम ॥")

स्नपनं, क्ली, (स्ना + णिच् + ल्युट् ।) स्नानम् ।
यथा, दुर्गोत्सवप्रकरणे तिथ्यादितत्त्वे ।
"पूजयात् स्नपन चैव स्नपनादस्य स्मृतम् ।
सर्व्वाकामदानञ्च सर्व्वपापनिवारणम् ॥"

स्नपितः, त्रि, (स्ना + णिच् + क्त ।) कृतस्नानः ।
(यथा, गीतगोविन्दे । १२ । १ ।
"कन्दर्प मर्वोत्तुङ्गे सम्यगसागरनिर्भर-
स्वादरतसाङ्गनम्बोरिष्मित्रमर्दितावधाम् ॥")

स्नसा, पुं, (स्नु प्रस्रवणे + "कसीरट् ।" इत्यट् ।)
अन्नम् । दन्तम् । इत्यमरः । ३ । ३ । ८ ॥
यथा, ध्या, धातु । इति हेमचन्द्रः ॥

स्नातः, त्रि, (स्ना + क्त ।) कृतस्नानः । यथा,—
"अन्नादिप्रभावो भवन्ति देवे देवे च वर्द्धन

अस्नातस्य क्रिय...
स्नातः समाचरेत्...
:

स्नातकः, पुं, (स्नात...
कन् ।" ५ । ४ । ...
आप्लुतव्रती । इत्य...
समाप्तवेदाध्ययने ...
मस्य । स्नातकः त्रि...
स्नानं तत्र व्रती त्रि...
तः आप्लुतव्रतीति ...
त्यक्त्वा यो गृहाश्रमं ग...
वेदाध्ययनो यः स्नात...
सोऽपि स्नातकः । स्नात...
चरणस्य यः शास्त्रबोधि...
सुपाल्यासमाप्तवेद एवा...
व्रतस्नातकः । वेदमधीत्य...
यः करोति स विद्यास्नात...
व्रतः प्राप्तवेदो यो द्वितीया...
स्नातकः । इति टीकान्तरे ।

स्नानं, क्ली, (स्ना + ल्युट् ।) ...
गाहनम् । तत्पर्य्यायः । आप्ला...
इत्यमरः । २ । ६ । १२१ ॥ ...
शब्दरत्नावली ॥ उपस्पर्शनम् ५ ...
नम् ७ । इति जटाधरः ॥ त...
विधं । मान्त्रम् १ भौमम् २ आ...
व्यम् ४ दिव्यम् ५ वारुणम् ६ ...
एतेषां विवरणं यथास्थानं स्फुटीभवि...
अस्य गुणाः ।
"स्नानं पवित्रमायुष्यं श्रमस्वेदम...
शरीरबलसन्धानं केशमोजस्करं प...
उष्णाम्बुनाध कायस्य परिषेको बला...
तेनैव तूत्तमाङ्गस्य बलहृत् केशचक्षु...
विनिहन्ति शिरः स्नानं यथाकाल...

सर्व्वाकापीड्कालपड्क्ति शिरोरोगाय वे...
मधुरामलके: स्नानं विशदं तिमिराप...
स्नानं चापर्नरिष्ट श्रेष्ठं तिमिरापह...
स्नानं सभ्यतिमेवापि चक्षुष्यमनिलापह...
अधातस्य शरीरस्य इमा मस्तिष्कगोचर. ॥
स्नानैर्बलमायाति तेन दीप्यति पावकः ।
स्नानमर्हति नैवायं व्याधितानामिषु ॥
आध्मानपीनसाजीर्णभुक्तवत्सु च गर्हितम् ।
दीर्घायुः शौच बलं कान्तिर्मनसरोचकम् ।
...मतः इन्ति शरीरपरिमार्जनम् ॥"
इति राजवल्लभः ॥
अथ स्नानविधिः । दक्षः ।
"चतुर्थे च तथा भागे स्नानार्थं मदमाहरेत् ।
तिलपुष्पकुशादीनि स्नानञ्चाकृत्रिमे जले ॥"
कुर्यादिति शेषः । तथा च ।
"अन्नता चान्तपुत्रा च भूषणं दिवा च
दीयते ।
देवदेवेषु मन्त्रो भवा आर्थं ...

अथ स्नानम्। दक्षः।
"अस्नात्वा नाचरेत् कर्म्म जपहोमादि किञ्चन।
लालास्वेदसमाकीर्णः शयनादुत्थितः पुमान्॥
अत्यन्तमलिनः कायो नवच्छिद्रसमन्वितः।
स्रवत्येव दिवारात्रौ प्रातःस्नानं विशोधनम्॥
प्रातःस्नानं प्रशंसन्ति दृष्टादृष्टफलं हि तत्।
सर्व्वमर्हति पूतात्मा प्रातःस्नायी जपादिकम्॥
अज्ञानात् यदि वा मोहात् रात्रौ दुश्चरितं कृतम्।
प्रातःस्नानेन तत् सर्व्वं शोधयन्ति द्विजातयः॥"
दृष्टं मलापकर्षादि अदृष्टं प्रत्यवायपरीहारादि। प्रातः सूर्य्योदयात् प्राक्कालः। प्रातःस्नायी अरुणकिरणग्रस्तां प्राचीमवलोक्य स्नायात्। इति विष्णूक्तेः॥ * ॥ प्रातःस्नाने मध्याह्नस्नानधर्म्मातिदेशमाह कात्यायनः।
"यथाहनि तथा प्रातर्नित्यं स्नायादनातुरः।
दन्तान् प्रक्षाल्य नद्यादौ गेहे चेत्तदमन्त्रवत्॥"
यथा तथेतिकर्त्तव्यतया। सा च।
"आचरेदुषसि स्नानं तर्पयेत् देवमानुषान्।"
इति जावाल्युक्ता॥
देवे कर्म्मणि वामहस्ते बहुतरकुशान् दक्षिणेन पवित्रं धारयेत्। मार्कण्डेयः।
"सर्व्वकालं तिलैः स्नानं पुण्यं व्यासोऽब्रवीन्मुनिः।
श्रीकामः सर्व्वदा स्नानं कुर्व्वीतामलकैर्नरः।
सप्तमीं नवमीञ्चैव पर्व्वकालञ्च वर्ज्जयेत्॥" * ॥
विष्णुधर्म्मोत्तरे।
"त्वराक्रोधौ तथा वर्ज्यौ देवकर्म्मणि पण्डितैः।
आतुराय पयश्चैव ताम्बूलं फलमौषधम्।
अर्च्चयित्वा तु कर्त्तव्याः स्नानदानादिकाः क्रियाः॥"
भविष्योत्तरे।
"स्नातुस्तु वरुणस्तेजो जुह्वतोऽग्निः श्रियं हरेत्।
भुञ्जानस्य यमस्त्वायुस्तस्मान्न व्याहरेत्त्रिषु॥"
स्नातुः स्नानं कुर्व्वतः। न व्याहरेत् न कथयेत्॥ अशुचेरवगाहनानन्तरं स्नानमाह योगियाज्ञवल्क्यः।
"तृणोमिवावगाहेत यदा स्यादशुचिर्नरः।
आचम्य तु ततः पश्चात् स्नानं विधिवदाचरेत्॥"
वामनपुराणम्।
"नाभिमात्रजले गत्वा कृत्वा केशान् द्विधा द्विजः।
निरुध्य कर्णौ नासाञ्च विधृत्वा मज्जनं ततः॥"
तत्रैव वृद्धयाज्ञवल्क्यः।
"स्रोतसां संमुखो मज्जेत् यत्रापः प्रवहन्ति वै।
तडागेषु गृहे चैव सूर्य्यसंमुख आप्लवेत्॥"
हारीतः। नातुरो न भुक्त्वा न जीर्णवासा न एकवासा न नग्नो नाश्नन् नावसक्थिको नालङ्कृतो नाग्नं नाश्नाति चन्द्रे नाकुले नाशुची न अभृतजले न नाभिरज्जले न चत्वरे गोष्ठाग्रे नो सन्ध्यायां न निशायां स्नायादिति। चत्वरे काकादिवलिस्थले इति श्रीदत्तः॥ उपहारे द्वारसन्नेरे। अत्रैव मुनिना नग्नबहुवाससोर्निषेधविधानात् स्नाने द्विवाससः एवाधिकारः प्रतीयते॥ * ॥ एकवस्त्रस्नाने दोषमाह समुद्रकरकृतभाष्ये गोतमः।
"एकवस्त्रेण यत् स्नानं सूच्या विद्धेन चैव हि।
स्नातस्तु न भवेत् शुद्धः श्रिया च परिहीयते॥"
अतएव।
"स्नानं तर्पणपर्य्यन्तं कुर्य्यादेकेन वाससा।"
इति॥
यदि समूलं तदा प्रेततर्पणपरमिति। अथैकवस्त्रा स्नातय इत्यादिना एकवस्त्रत्वविधानात्। एकेन एकजातीयेन इति वाचस्पतिमिश्रः॥ येन वाससा स्नानं कृतं जलस्थस्य तेनैव तर्पणम्। इति कृत्यतत्त्वार्णवः॥ न च।
"स्नानशाट्यान्तु दातव्या मृदस्तिस्रो विशुद्धये।
जलमध्ये तु यः कश्चित् द्विजातिर्ज्ञानदुर्ब्बलः।
निष्पीडयति तद्वस्त्रं स्नानं तस्य वृथा भवेत्॥"
स्नानशाट्यामिति तद्वस्त्रमिति एकवचननिर्देशेन च स्नानेऽप्येकवस्त्रत्वमिति वाच्यं अत्र विशुद्धये इत्यभिधानेनाधोभूतवस्त्रस्यैव मृत्त्रयेण प्रक्षालनं न तूत्तरीयस्य एतदर्थमेकवचनम्। अत एव मृत्त्रयेणाधरीयवस्त्रं प्रक्षाल्य इत्याह्निकचिन्तामणिः॥ वशिष्ठवचनस्यैकवाक्यतया स्नातो नाङ्गानि निर्मृज्यात् स्नानशाट्या न पाणिना। इति विष्णुपुराणीयेनाधरीयवस्त्रेणैव गात्रमार्ज्जनं निषिध्यते। एतेन निष्पीड्य स्नानवस्त्रमिति कात्यायनवचने एकत्वमविवक्षितमिति निरस्तम्। अतएव सर्व्वत्रैकत्वनिर्देशः। शिष्टानामाचारोऽपि तथेति॥ * ॥ नाजस्रमिति पुनः पुनः स्नाननिषेधः रागप्राप्तस्नानविषयो दृष्टार्थकत्वात्। एवञ्चैकस्मिन् दिने नानातीर्थादिनिमित्तप्राप्तस्नानावृत्तिर्भवत्येव वैधत्वात्। अत्रापि तन्त्रप्रसङ्गयोः सत्त्वे सकृदेवेति॥ * ॥ आतुरं प्रति जावालः।
"अशिरस्कं भवेत् स्नानं स्नानाशक्तौ तु कर्म्मिणाम्।
आर्द्रेण वाससा वापि दैहिकं मार्ज्जनं स्मृतम्॥"
कर्म्मिणाम्।
"शिरःस्नातस्तु कुर्व्वीत दैवं पैत्रमथापि वा।"
इति मार्कण्डेयपुराणोक्तकर्म्मिकर्त्तृणां मार्ज्जनमिह प्रोञ्छनम्। योगियाज्ञवल्क्यः।
"असामर्थ्याच्छरीरस्य कालशक्त्याद्यपेक्षया।
मन्त्रस्नानादितः सप्त केचिदिच्छन्ति सूरयः॥
मान्त्रं भौमं तथाग्नेयं वायव्यं दिव्यमेव च।
वारुणं मानसञ्चैव सप्त स्नानं प्रकीर्त्तितम्॥
आपोहिष्ठेति वै मान्त्रं मृदालम्भस्तु पार्थिवम्।
आग्नेयं भस्मना स्नानं वायव्यं गोरजः स्मृतम्॥
यत्तु सातपवर्षेण स्नानं तद्दिव्यमुच्यते।
वारुणञ्चावगाहस्तु मानसं विष्णुचिन्तनम्॥
समस्तं स्नानमुद्दिष्टं मन्त्रस्नानमथापि तु।
कालदोषादसामर्थ्यात् सर्व्वं तस्य फलं स्मृतम्॥"
आपोहिष्ठेति आपोहिष्ठादि ऋक्त्रयपठनेन शिरसि सिक्तम्। एवञ्च।
"कालदोषादसामर्थ्यात् न शक्नोति यदाम्भसि।
तदा स्नात्वा तु ऋषिभिर्मन्त्रैर्जुष्टन्तु मार्ज्जनम्॥
शन्न आपस्तु द्रुपदा आपोहिष्ठाघमर्षणम्।
एभिश्चतुर्भिर्ऋक्स्नावैर्मन्त्रस्नानमुदाहृतम्॥"
इति योगियाज्ञवल्क्यीयं यन्मन्त्रस्नानान्तरं तत् प्राधान्यख्यापनाय अतएव पितृदयितायां सन्ध्यातः पूर्व्वं तल्लिखितम्। मृदालम्भस्तु गङ्गादिमृत्तिकातिलकरूपः। भस्मना संस्कृतभस्मना इति छन्दोगाह्निकः। अवगाह्य मन्त्राद्यङ्गशून्यावगाहनमात्रं विवक्षितं अतो मुख्यावगाहनरूपस्नानानुकल्पत्वमप्युक्तम्। कालदोषोऽतिवृष्ट्यादिः। असामर्थ्यं शरीरापाटवहेतुः। जलस्य स्वल्पत्वेन सम्पूर्णवारुणस्नानविधिकालायोग्यत्वं वेति। एतन्मूलकं गेहे चेत्तदमन्त्रवदिति छन्दोगपरिशिष्टीयं पूर्व्वोक्तं अन्यथा मूलभूतश्रुत्यन्तरकल्पनापत्तेः॥ सामर्थ्ये तूद्धृतजलेनापि समन्त्रकस्नानमाह पराशरभाष्ये व्यासः।
"शीतास्त्वपो निषेव्योष्णा मन्त्रसम्भारसंस्कृताः।
गेहेऽपि शस्यते स्नानं तद्धीनमफलं स्मृतम्॥"
पद्मपुराणम्।
"नैर्मल्यं भावशुद्धिश्च विना स्नानं न जायते।
तस्मान्मनोविशुद्ध्यर्थं स्नानमादौ विधीयते।
अनुद्धृतैरुद्धृतैर्व्वा जलैः स्नानं समाचरेत्।
तीर्थं प्रकल्पयेद्विद्वान् मूलमन्त्रेण मन्त्रवित्॥
नमो नारायणायेति मूलमन्त्र उदाहृतः।
दर्भपाणिस्तु विधिना आचान्तः प्रयतः शुचिः॥
चतुर्हस्तसमायुक्तं चतुरस्रं समन्ततः।
प्रकल्प्यावाहयेद्गङ्गां एभिर्मन्त्रैर्विचक्षणः॥
विष्णोः पादप्रसूतासि वैष्णवी विष्णुपूजिता।
पाहि नस्त्वेनसस्तस्मादाजन्ममरणान्तिकात्॥
तिस्रः कोट्योऽर्द्धकोटी च तीर्थानां वायुरब्रवीत्।
दिवि भुव्यन्तरीक्षे च तानि ते सन्ति जाह्नवि॥
नन्दिनीत्येव ते नाम देवेषु नलिनीति च।
वृन्दा पृथ्वी च सुभगा विश्वकाया शिवा सिता॥
विद्याधरी सुप्रसन्ना तथा लोकप्रसादिनी।
क्षमा च जाह्नवी चैव शान्ता शान्तिप्रदायिनी॥
एतानि पुण्यनामानि स्नानकाले प्रकीर्त्तयेत्।
भवेत् सन्निहिता तत्र गङ्गा त्रिपथगामिनी॥
सप्तवाराभिजप्तेन करसंपुटयोजितम्।
मूर्द्ध्नि दद्यात् जलं भूयस्त्रिचतुः पञ्च सप्त वा।
स्नानं कुर्य्यान्मृदा तद्वदामन्त्र्य विचक्षणः॥
अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे।
मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतम्॥
उद्धृतासि वराहेण कृष्णेन शतबाहुना।
आरुह्य मम गात्राणि सर्व्वं पापं प्रमोचय।
नमस्ते सर्व्वभूतानां प्रभवारणि सुव्रते॥" * ॥
नमो नारायणाय इत्यष्टाक्षरमूलमन्त्रं च [illegible] चतुरस्रं [illegible] समन्ततः सर्व्वदिक्षु चतुर्हस्तं [illegible] तीर्थं प्रकल्पयेत्। [illegible] [illegible]। [illegible]

...मनोत्यन्तेन मन्त्रेण गङ्गामावाहयेत्
सप्तवाराभिजप्तेनेति सप्तवाराभिजप्तेन नमो नारायणायेति मन्त्रेणाभिमन्त्र्येति शेषः। एक-वचननिर्देशात् तस्य मूलमन्त्रतोऽस्या च अथापि विनियोगोऽवगम्यते। ततश्च सप्तवारपठितनारा-यणमन्त्रेण जलमभिमन्त्र्य करयुगेन त्रिवारादि मूर्द्ध्नि क्षिपेत्। ततश्चाश्वक्रान्ते इति मन्त्राभ्यां मद्दिति जप्ताभ्याम्।

"मृत्तिकाः सप्त न ग्राह्या वल्मीके मूषिकोत्करे
अन्तर्जले श्मशाने च वृक्षमूले सुरालये।
परस्नानावशिष्टे च श्रेयस्कामैः सदा नरैः॥"

इति दक्षप्रतिषिद्धेतरां मृदमामन्त्र्य तया मृदा शिरःप्रभृत्यालभ्यानुकृतैर्वा जलैः शिरः प्रभृत्यङ्ग-क्षालनमवगाहनरूपमधानं वारुणस्नानं समा-चरेदिति पूर्व्वोक्तेनान्वयः। मृदग्रलग्नमन्त्रे प्रभ वारिणि इति प्रभवमुत्पत्तिमन्तुं प्रापयितुं शीलमस्यास्तस्य शोधनमिदम्। अवगाहनन्तु चक्षुःकर्णनासिकामङ्गुलीभिराच्छाद्य कुर्य्यात्।

"अङ्गुलीभिः पिधायैवं श्रोत्रदृङ्नासिकामुखम्
निमज्जेत प्रतिस्रोतस्त्रिः पठेदघमर्षणम्॥"

इति समुद्रकरधृतात्।

अवागुह्ते वारत्रयमेवावगाहनं प्रागुक्तवामन-पुराणात्। एष विधिः पौराणिकत्वात् सर्व्व-शास्त्रिसाधारणः। वेदमन्त्ररहितत्वादनधीत-वेदानामपि सर्व्वथादरणीयः॥ *॥ मत्स्यपुरा-णम्।

"नद्यां प्रत्येकशः स्नाने भवेद्गोदानजं फलम्।
गोप्रदानैश्च दशभिस्तासां पुण्यन्तु सङ्गमे॥"

वशिष्ठः।

"योऽनेन विधिना स्नाति यत्र तत्राम्भसि द्विज।
स तीर्थफलमाप्नोति तीर्थे तु द्विगुणं फलम्॥"

अनेन तीर्थावाहनादिना। अतो गङ्गायामप्या-वाहनं कुर्व्वन्ति शिष्टाः। अत्र च। माघमस्या-दिनिमित्तकतीर्थविशेषनिमित्तकमन्त्रपाठस्तु ...दास्नानानन्तरं कार्य्यः। आगन्तुकानामन्ते ...भिनिवेश इति न्यायात्। एवं गङ्गायां विशेष-...स्नानान्तरमेव दशहरादिमन्त्राः पाठ्याः। तत्र ...ङ्गायां विशेषमन्त्रौ विद्याकरधृतौ।

"...विष्णुपादार्घ्यसम्भूते गङ्गे त्रिपथगामिनि।
...द्रवीति विख्याते पापं मे हर जाह्नवि॥
...या भक्तिमम्पन्ने श्रीमातर्देवि जाह्नवि।
...तेनाम्बुना देवि भागीरथि पुनीहि माम्॥"

...दशहरायां स्नाने गङ्गायां पद्मपुराणीयो ...।

"...जातकर्मजानि यानि पापानि सन्ति मे।
...दशहरी प्राप्य तानि मे हर जाह्नवि॥"
...मरमङ्गमे मन्त्रः।
"... सरितां नाथ त्वं देवि सरितांवरे।
...ङ्गमे स्नात्वा मुञ्चामि दुरितानि वै॥"
...स्नाने तु मन्त्रः।
"...महाभाग शान्तनोः कुलनन्दन।
...र्थसम्भूत पापं लौहित्य मे हर॥"*॥

करतोयास्नानमन्त्रः॥

"करतोये सदानीरे सरिच्छ्रेष्ठे सुविश्रुते।
पौण्ड्रान् प्लावयसे नित्यं पापं हर करोद्भवे॥"*॥

विष्णुः। स्नातः शिरो नावधुनेत् नाङ्गेभ्यस्तोय-मुद्धरेत्। न तैलं वा संस्पृशेत् नाभोचितं पूर्व्वं धृतं वासो बिभृयात्। स्नात एव सोष्णीषो धौते वाससी बिभृयात् न म्लेच्छान्त्यजपतितैः सह सम्भाषणं कुर्य्यात् इति। नाङ्गेभ्यस्तोयमुद्धरे-दिति स्नानपाठीपाठिभ्यां पूरणीयम्।

"स्नातो नाङ्गानि निर्म्मृज्यात् स्नानशाट्या न पाणिना॥"

इति विष्णुवचनात्।

अत्र वासोऽन्तरधारणात् प्राक्कृततैलस्पर्श-निषेधः प्रतीयते।

"शिरःस्नातस्तु तैलेन नाङ्गं किञ्चिदुपस्पृशेत्॥"

इति मनुवचनमेतत्परम्॥*॥

याज्ञवल्क्यः।

"ब्रह्मक्षत्रविशामेव मन्त्रवत् स्नानमिष्यते।
तूष्णीमेव हि शूद्रस्य सनमस्कारकं मतम्॥
अगम्यागमनात् स्तेयात् पापिभ्यश्च प्रतिग्रहात्
रहस्याचरितात् पापात् मुच्यते स्नानमाचरन्॥
प्रकर्तुमसमर्थश्चेत् जुहोति यजति क्रियाः।
स्नानध्यानजपैर्दानैरात्मानं शोधयेद्बुधः॥"

ब्रह्मपुराणम्।

"नद्यां प्रत्येकशः स्नाने भवेत् गोदानजं फलम्
गोप्रदानैस्तु दशभिस्तासां पुण्यन्तु सङ्गमे॥"*

मनुः।

"न स्नानमाचरेत् भुक्त्वा नातुरो न महानिशि।
न वासोभिः सहाजस्रं नाविज्ञाते जलाशये॥"

न स्नानमाचरेद्भुक्त्वेति रागप्राप्तस्नाननिषेधः। नित्यस्याप्राप्तत्वात्। नैमित्तिकस्य च निषद्धुम-शक्यत्वात्। आतुरः स्नानसम्बर्द्धकरोगवान्।

"महानिशा तु विज्ञेया मध्यमं प्रहरद्वयम्।
तस्यां स्नानं न कर्त्तव्यं काम्यनैमित्तिकादृते॥"

न वासोभिः सह इत्यनेन बहुवासोनिषेधात् स्नाने द्विवासस्त्वं प्रतीयते। अजस्रं पुनः पुनः। तेन वारुण्यादिसंक्रान्त्यादि-निमित्तभेद-प्राप्त-मेकदा नानास्नानं निषिध्यते। किन्तु तन्त्रेण प्रसङ्गेन चैकं स्नानम्। तथा च निगमः।

"नावर्त्तयेत् पुनः कर्म्म तर्पणादिकमन्वहम्।
काम्यनैमित्तिके हित्वा एक एकत्र वासरे॥
विषुवद्ग्रहणे प्राप्ते पञ्चतीर्थ्यां विधानतः।
स्नात्वा सङ्कर्षणं दृष्ट्वा मद्राश्च मो द्विजाः।
नरः समस्तयात्रानां फलं प्राप्नोति दुर्लभम्॥"

इति ब्रह्मपुराणीयमार्कण्डेयह्रदे प्रद्युम्नसरोवरे समुद्रकूपादितीर्थादौ तन्त्रप्रसङ्गयोरभावात् पुन-पुनरेकदिनेऽपि नानास्नानमिति॥*॥

"परकीयनिपानेषु स्नायाद्वै कदाचन।
निपानकर्तुः स्नात्वा हि दुष्कृतांशेन लिप्यते॥"

निपानं जलाधारमात्रम्। तथा च याज्ञवल्क्यः।

"पञ्च पिण्डाननुद्धृत्य न स्नायात् परवारिषु॥"

योगियाज्ञवल्क्यः।

"अनुद्धृत्य तु यः स्नायात्
हथा तस्य भवेत् स्नानं कर्त्तु...
स्नानं दानं तपो ध्यानं पित्र...
पावनानि मनुष्याणां दुष्कृत...

छन्दोगपरिशिष्टम्।

"यद्यहयं श्रावणादि सर्व्वा नद्यो...
तासु स्नानं प्रकुर्व्वीत वर्ज्जयित्वा...
उपाकर्म्मणि चोत्सर्गे प्रेतस्नाने त...
चन्द्रसूर्य्यग्रहे चैव रजोदोषो न वि...

निगमः। न दुर्ध्वतीरवासिनाम्।
अभावे कूपवापीनामन्येनापि समु...
रजोदुष्टेऽपि पयसि ग्रामभोगो न ...
अन्येन कुम्भादिना।

"अन्त्यैरपि कृते कूपे सेतौ वाप्यादिके...
तत्र स्नात्वा च पीत्वा च प्रायश्चित्तं समा...

तथा।

"प्रभूते विद्यमाने तु उदके सुमनोहरे।
नाल्पोदके द्विजः स्नायात् नदीञ्चोत्सृज्य ...
कृत्रिमे...

इति वहुभिर्ष्टनम्...

ब्रह्मपुराणे।

"नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमिष्यते
तर्पणन्तु भवेत्तस्य अङ्गत्वेन व्यवस्थितम्॥
श्मश्रुकर्म्माण्युपातस्य मैथुनं छर्दनं तथा।
अस्पृश्यस्पर्शनं कृत्वा स्नायाद्यज्ञो...

यत्र तु रोगादिना स्नानं न कृतं तत्रापि गात्रमार्जनादिनाशौचमुत्पाद्य पितृदर्श... तर्पयेत्। तदाह शातातपः।

"तर्पणन्तु शुचिः कुर्य्यात् प्रत्यहं स्नातको द्विजः।
देवेभ्यश्च ऋषिभ्यश्च पितृभ्यश्च यथाक्रमम्॥*॥
पुष्ये वा जन्मनक्षत्रे व्यतीपाते च वैधृतौ।
अमावास्यां नदीस्नानं दहत्याजन्मदुष्कृतम्॥"

वराहपुराणम्।

"दक्षिणावर्त्तशङ्खे च पात्रे ऽप्यौडुम्बरे स्थितम्।
उदकं यः प्रतीच्छेत शिरसा हृष्टमानसः।
तस्य जन्मकृतं पापं तत्क्षणादेव नश्यति॥
अच्छिन्नपत्रपत्रेण सर्व्वरत्नोदकेन च।
स्रोतसा वै नरः स्नात्वा सर्व्वपापैः प्रमुच्यते॥"

विष्णुधर्म्मोत्तरे।

"तथा दर्भोदके स्नानं सर्व्वपापप्रणाशनम्।
गोशृङ्गेण च यत् स्नानं सर्व्वाघविनिसूदनम्॥
तथा पुष्पोदकस्नानं भवेदारोग्यकारकम्।
केतमेध्यां तिलैः स्नानं पयसा गौरसर्षपैः।
स्नानं प्रियङ्गुणा प्रोक्तं तथा सौभाग्यवर्द्धनम्॥
आयुष्यञ्च यशस्यञ्च धर्म्मं मेधा...
स्नानं पवित्रं माङ्गल्यं तथा का...

शङ्खः।

"स्नातस्य वह्नितोयेन तथा च पर...
कायशुद्धिं विजानीयात् न तु स्नान...

स्नानफलं वैधम्। आयुर्वेदायन्तु अत्र...

"नित्यं नैमित्तिकञ्चैव क्रियाङ्गमल...
तीर्थाभावे च कर्त्तव्यमुष्णोदकपरोद...

[illegible]नम्।
"[illegible] शर्करोदेन पूर्वं परिवर्त्तयेत्।"
इत्याह्निकतत्त्वम्॥११
[illegible]मन्त्रलिङ्गम्। तत्र स्नानादौ वैदिक-
[illegible] कृत्वा तान्त्रिकस्नानमाचरेत्। तथा च
[illegible]।
"[illegible] स्नानं तदा कुर्य्यात् यथाशास्त्र-
विधानवित्।
[illegible] स्नानं यथाशक्ति समाचरन्।
[illegible]स्नानं ततः कुर्य्यात् कर्म्मणां सिद्धिहेतवे"
[illegible]। सर्व्वत्रादि अमुकदेवतार्पणार्थे मन्त्र
[illegible] करिष्ये इति सङ्कल्पं कुर्य्यात्।
[illegible] च कुलचूड़ामणौ।
"[illegible] मन्त्रज्ञ सलिलं मज्जनं ततः।
[illegible]कदेवस्य प्रीतये स्नानमाचरेत्॥"
[illegible] षडङ्गन्यासप्राणायामौ कृत्वा गङ्गे च इत्यने-
[illegible]मुद्रया सूर्य्यमण्डलात्तीर्थमावाह्य वमिति
[illegible]मुद्रयामृतीकृत्य अवधेनावगुण्ठ्यास्त्रेण
[illegible] मूलेन एकादशधाभिमन्त्र्य स्वशिखाभि-
मुखं द्वादशधारा विनिःक्षिप्य तन्निविष्टदेव-
ताचरणारविन्दनिःसृतसलिले निमज्य देवतां
ध्यायन् मूलमन्त्रं यथाशक्ति जपन् उन्मज्य उद-
केन त्रिवारसलिलं कलसमुद्रया त्रिवारमात्मा-
नमभिषिच्य वैदिकसन्ध्यादिकं कृत्वा सूर्य्यार्घ्यं
दत्त्वा तान्त्रिकाघमर्षणादिविधिधारान्तं कर्म्म
कुर्य्यात्। इति तन्त्रसारः॥७॥ अन्यच्च।
"जन्मान्तरसहस्रेण यत् पापं कुरुते नरः।
मुच्यते सर्व्वपापेभ्यः स्नात्वा क्षारार्णवे सकृत्॥
याम्यं हि यातनादुःखं नित्यस्नायी न पश्यति
स्नानं मध्यं दिने कुर्य्यात् जीर्णेऽन्ने तु निरामयः
नद्यामस्तमिते स्नानं न कुर्व्वीत सदा बुधः।
नद्यां स्नात्वा नदीं चान्यां न प्रशंसेत पण्डितः॥
अपशस्तं निशि स्नानं राहोरन्यत्र दर्शनात्।
स्नानं दानं तपः श्राद्धमनन्तं राहुदर्शने।
आसुरो रात्रिरन्यत्र तस्मात्तां परिवर्ज्जयेत्॥
नदीदेवनिखातेषु तड़ागेषु सरःसु च।
स्नानं समाचरेन्नित्यं गर्त्तप्रस्रवणेषु च॥
निपातनादुद्धृतं पुण्यं ततः प्रस्रवणादिकम्।
ततोऽपि सारसं पुण्यं ततो नादेयमुच्यते।
तीर्थतोयं ततः पुण्यं गङ्गातोयं ततोऽधिकम्॥"
इति वह्निपुराणे आह्निकतपोनामाध्यायः॥
किञ्च।
नित्यं नैमित्तिकं काम्यं क्रियाङ्गं मलकर्षणम्
क्रियास्नानं तथा षष्ठं षोढ़ास्नानं प्रकीर्त्तितम्॥
अस्नातस्तु पुमानार्हो जप्यादिहवनादिषु।
प्रातःस्नानं तदर्थन्तु नित्यस्नानं प्रकीर्त्तितम्॥
चाण्डालशवविष्ठादेः स्पृष्टा स्नानं रजस्वलाम्।
स्नानार्हस्तु यदा स्नाति स्नानं नैमित्तिकं हि
तत्॥
पुष्यस्नानादिकं स्नानं दैवज्ञविधिचोदितम्।
तद्धि काम्यं समुद्दिष्टं नाकामस्तत् प्रयोजयेत्
जप्तुकामः पवित्राणि अर्च्चिष्यन् देवतातिथीन्।
स्नानं समाचरेद्दृष्टम् क्रियाङ्गं तत् प्रकीर्त्तितम्
मलापकर्षणं नाम्ना स्नानमभ्यङ्गपूर्व्वकम्।
मलापकर्षणार्थाय प्रवृत्तिस्तत्र नान्यथा॥
सरःसु देवखातेषु तीर्थेषु च नदीषु च।
स्नानमेव क्रिया यस्मात् क्रियास्नानमतः स्मृतम्
इति गारुड़े १०५ अध्यायः॥८॥
कृतस्नानस्य वैष्णवविशेषस्य स्नानादिनिषेधो
मानसस्नानप्रशंसा च यथा,—
"सर्व्वकर्म्मफलत्यागी हरेः सङ्कल्पवर्ज्जितः।
यो द्विजः कृतस्नानः स्यात् स्नानपूजाजपादिषु॥
कदाचिदपि धर्म्मज्ञो न त्यक्तकामस्तु वैष्णवः।
स्नानादिषु च कल्पेषु गोविन्दस्यार्च्चनादिषु॥
कृतापनः कृशकरो वैष्णवो न भवेद्द्विज।
हरेः कुर्य्यात् प्रयत्नेन सर्व्वमेवाजपादिषु॥
अस्नातो न जपेन्मन्त्रं गोविन्दस्य महात्मनः।
कदाचिदप्यविभूत्याप्यस्नातोऽपि च मानवः॥
मानसस्नातको लोको मुकुन्दस्यार्च्चनादिषु।
पूतात्मा यदि सत्यस्य शुद्धो भवति जापकः॥
भवेत्तु मानसस्नायी यो बाह्याभ्यन्तरः शुचिः।
जपाधिकारी स भवेत् कृष्णमन्त्रस्य मानवः॥
ऐन्द्रस्नानादरं काम्यं काम्यादाग्नं यमेव च।
आग्नेयादाशुचं श्रेष्ठं वारुणञ्चाशुचादपि॥
अवगाहं वारुणात्तु वैदिकञ्चावगाहनात्।
वैदिकादपि नैमित्तं तस्माद्दै मार्ज्जनं वरम्॥
मार्ज्जनान्मान्त्रिकं श्रेष्ठं भौमं स्यान्मान्त्रिका-
धिकम्।
भौमस्नानादरं ब्राह्मं ब्राह्मतः पौष्णमेव च॥
पौष्णतो नैर्म्मलं स्नानं वायव्यञ्च ततोऽधिकम्।
वायव्यान्मानसञ्चैव सर्व्वस्नानात् परं वरम्॥
मत्तोयं तु मानसस्नातः सर्व्वत्र विजयी भवेत्।
गोविन्दसर्व्वसेवासु चार्हतामिति धारणा॥
स जापको वैष्णवः स्यात् हरेर्भजनतत्त्ववित्।
मानसस्नानवान् यो वा भक्तयाव सदा सुखी॥"
इति पाद्मोत्तरखण्डे १०८ अध्यायः॥ *॥
अन्यच्च।
"मानसं वैदिकं चैव मान्त्रिकं मार्ज्जनं तथा।
अवगाहनञ्च नैमित्तमाशुचं पुण्यमेव च॥
नैर्म्मलं वारुणं ब्राह्मं मैत्रं काम्यञ्च नारद।
वायव्यं भौममाग्नेयं षोड़शस्नानमीरितम्॥
गोविन्दमन्त्रग्रहणं दीक्षया तु गुरोर्नृणाम्।
यदाभिषिक्तं चित्तं स्यात्तत्स्नानं मानसं शुभम्
मर्त्त्यस्य नामग्रहणं यदा कार्य्याभ्वरे गुरोः।
स्नानदेहेन्द्रियमनस्तत् स्नानं मानसं भवेत्॥
नामसंकीर्त्तनं विष्णोर्नरः कुर्य्यादकैतवात्।
सदैव चेन्महास्नानं शरीरसुखकारणम्॥
कथा कस्त्वा स्वस्ति नर्य्यं तु यदि वैदेय वैदिकम्
दर्भशान्त्युदकैः स्नानं यथास्त्रं अभिषेचनम्।
सहस्रशीर्षा तद्विष्णोरिति मन्त्रादिभिर्द्विज।
चेत् पयोऽभ्युक्षणं स्नानं मान्त्रिकं समुदाहृतम्
ॐ शन्न आपो [illegible] स्त्वत्वित्यादिभिर्यदि।
पाठे कुर्य्यात् [illegible] मार्ज्जनं द्विज ईरितम्
जलेषु मज्जतां [illegible] तु यदा शिरः।
तदा सर्व्वपुण्यं स्यादवगाहनमुच्यते।
गोविन्दद्वादशीमाघीशाकम्भर्य्यादयादिषु।
स्नानं यत्तच्च नैमित्तं ग्रहणे चन्द्रसूर्य्ययोः॥
मैथुने वमने रेतःपतने मृतके तथा।
विरमूत्रादिसम्पर्शे शवानुगमनेऽपि च॥
निद्रान्ते स्नातकेनृणामस्पृश्यस्पर्शनादिषु।
रजस्वलाचतुर्थाहे यत् स्नानं स्यात्तदाशुचम्॥
गङ्गादिसर्व्वतीर्थेषु विष्णुपादोदकैस्तथा।
यत् स्नानमभिषेकञ्च पुण्यं तत् परिकीर्त्तितम्
ईदृशया श्रद्धया नृणां भक्त्या यत्नेन नारद।
गङ्गाम्भोयदिवत्स्नानं महापापादिनाशनम्॥
गङ्गास्नानं मनुष्याणां सर्व्वकल्मषनाशनम्।
स्नानश्चापि काष्ठस्य भवेन्मूलवत् यदि॥
स्नानं स्यात् सर्व्वतीर्थेषु नानायज्ञफलप्रदम्।
शालग्रामशिलावारि योऽभिषेकं समाचरेत्॥
अकालमृत्युहरणं सर्व्वव्याधिविनाशनम्।
विष्णोः पादोदकं पीत्वा शिरसा धारयेद्यदि
यदि सर्व्वमनुष्याणां बाह्यान्तर्म्मलशोधनम्।
तदैव नैर्म्मलस्नानं शरीराणां भवेत् ध्रुवम्॥
स्वेदाम्बुसल्लाविस्मूत्रचिकुराः घृतजा वसा।
दूषिका कर्णविट् श्लेष्मा नृणां बाह्यमलाः स्मृताः
मलैस्तु मलिनो देहो नवच्छिद्रैश्च छिद्रितः।
सवत्यविरतं पूर्णो दिवारात्रौ मलानतः॥
अद्भिश्च गोमयैश्चापि मलानामपमार्ज्जनम्।
सर्व्वत्र चालनं कृत्वा सर्व्वाङ्गमयतो मुनिः॥
अष्टाङ्गयोगाभ्यासैश्च देहप्रचालनं ततः।
नरोऽम्भमज्जनं कुर्व्वन् स्नानं भवति नैर्म्मलम्॥",
इति पाद्मे उत्तरखण्डे ११३ अध्यायः॥ *॥
किञ्च।
"तुलामकरमेषेषु प्रातःस्नानं विधीयते।
हविष्यं ब्रह्मचर्य्यञ्च महापातकनाशनम्॥
अमास्नानं गयाश्राद्धं दक्षिणामुखभोजनम्।
न जीवत्पितृकः कुर्य्यात् कृते च पितृहाभवेत्
करेण मार्ज्ज येद्गात्रं स्नानवस्त्रेण वा यदि।
शुनास्पृष्टं भवेद्गात्रं पुनः स्नानेन शुध्यति॥
अप्रचाल्य तु पादौ यः स्नात्वा गच्छति मन्दिरम्
संवत्सरकृतं पुण्यं तत्क्षणादेव नश्यति॥
स्नानं रक्तकतीर्थेषु भोजनं गणिकालये।
शयनं पूर्व्वपादे च ब्रह्महत्या दिने दिने॥"
इति कर्म्मलोचनः॥
अन्यत् मत्स्यसूक्ततन्त्रे ३८ पटले द्रष्टव्यम्॥
स्नानद्रव्यं, क्लो, (स्नानाय द्रव्यम्।) कुशः। इति
शब्दमाला॥
स्नानयात्रा, स्त्री, (स्नानस्य यात्रा उत्सवः।)
ज्यैष्ठपौर्णमास्यां श्रीविष्णोर्महास्नानरूपोत्सवः।
यथा, ब्रह्मपुराणम्।
"मासि ज्यैष्ठे तु संप्राप्ते
पौर्णमास्यां तदा
तस्मिन् काले तु
बलभद्र
स्कन्दपुरा
"ज्य

तस्यां मे स्नपनं कुर्य्यान्महास्नानविधानतः ॥
ज्यैष्ठ्यां प्रातःस्नानकाले ब्रह्मणा सहितस्य माम् ।
रामं सुभद्रां संस्नाप्य मम लोकमवाप्नुयात् ॥"
इति तिथ्यादितत्त्वम् ॥
अन्यत् यात्राशब्दे द्रष्टव्यम् ॥

स्नानीयं, त्रि, (स्नात्यनेनेति । स्ना+करणे अनीयर् । यद्वा, स्नानाय हितम् । स्नान+छः ।) स्नानयोग्यम् । स्नानसम्पादकद्रव्यम् । यथा,—
"गङ्गादीनाञ्च तीर्थानां वारि कुम्भप्रपूरितम् ।
स्नानीयं ते प्रयच्छामि स्नानं कुरु विलोचने ॥"
इति दुर्गोत्सवपद्धतिः ॥

स्नायी, [न्] त्रि, (स्नातीति । स्ना+णिनिः ।) स्नानकर्त्ता । यथा, तिथ्यादितत्त्वे ।
"प्रातःस्नायी भवेन्नित्यं द्वौ मासौ माघफाल्गुनौ ॥"

स्नायुः, स्त्री, (स्ना+बाहुलकात् उण् । "आतो युक् चिण्कृतोः ।" ७ । ३ । ३३ । इति युक् । इत्युणादिवृत्तौ उज्ज्वलः । १ । १ ।) वायुवाहिनी नाड़ी । नहर इति ख्याता । इति भरतः ॥ तत्पर्य्यायः । वस्नसा २ इत्यमरः । २ । ६ । ६६ ॥ स्नसा ३ नसा ४ । इति राजनिर्घण्टः ॥ स तु गर्भस्थस्य मांसभिन्मांसैर्भवति । इति मुग्धबोधः ॥ (यथा, याज्ञवल्क्यः । ३ । १०० ।
"शिराः शतानि सप्तैव नवस्नायुशतानि च ॥"
"नवस्नायुशतानि तासां शाखासु षट्शतानि । द्वे शते त्रिंशच्च कोष्ठे । ग्रीवां प्रत्यूर्द्ध्वं सप्ततिः ॥ एकैकस्यान्तु पादाङ्गुल्यां षट्निचितास्तास्त्रिंशत् तावत्य एव तलकूर्च्चगुल्फेषु । तावत्य एव जङ्घायाम् । दश जानुनि । चत्वारिंशदूरौ । दश वङ्क्षणे । शतमध्यर्द्धमेवमेकस्मिन् सक्थ्नि भवन्ति । एतेनेतरसक्थि बाहू च व्याख्यातौ । षष्टिः कट्याम् । अशीतिः पृष्ठे । पार्श्वयोः षष्टिः । उरसि त्रिंशत् ॥ षट्त्रिंशद्ग्रीवायाम् मूर्द्ध्नि चतुस्त्रिंशत् । एवं नव स्नायुशतानि व्याख्यातानि । भवन्ति चात्र ।
स्नायुश्चतुर्व्विधा विद्यात्तास्तु सर्व्वा निबोध मे ।
प्रतानवत्यो वृत्ताश्च पृथ्वाश्च सुषिरास्तथा ॥
प्रतानवत्यः शाखासु सर्व्वसन्धिषु चाप्यथ ।
वृत्तास्तु कण्डराः सर्व्वा विज्ञेयाः कुशलैरिह ॥
आमपक्वाशयान्तेषु वस्तौ च सुषिराः खलु ।
पार्श्वोरसि तथा पृष्ठे पृथुलाश्च शिरस्यथ ॥
नौर्य्यथा फलकास्तीर्णा बन्धनैर्बहुभिर्युता ।
भारक्षमा भवेदप्सु नृयुक्ता सुसमाहिता ।
एवमेव शरीरेऽस्मिन् यावन्तः सन्धयः स्मृताः ॥
स्नायुभिर्बहुभिर्बद्धास्तेन भारसहा नराः ।
न ह्यस्थीनि न वा पेश्यो न सिरा न च सन्धयः ॥
व्यापादितास्तथा हन्युर्यथा स्नायुः शरीरिणम् ।
यः स्नायुः प्रविजानाति बाह्याश्चाभ्यन्तरास्तथा ।
स गूढं शल्यमाहर्त्तुं देहाच्छक्नोति देहिनाम् ॥"
इति सुश्रुते शरीरस्थाने पञ्चमेऽध्याये ॥)

स्नायुर्म्मं, [न्] क्ली, नेत्ररोगभेदः । तस्य लक्षणं यथा
"क्षिरं प्रस्तारि मांसाढ्यं श्यावं स्नायुर्म्म पञ्चमम् ॥"
इति माधवकरः ॥ अन्यत् नेत्ररोगशब्दे द्रष्टव्यम् ॥

स्नावा, [न्] पुं, (स्ना+"स्नामदिपदीति ।" उणा॰ ४ । ११२ । इति वनिप् ।) स्नायुः । इति केचित् ॥ (यथा, वाजसनेयसंहितायाम् ३९ । १० ।
"मांसेभ्यः स्वाहा स्नावभ्यः स्वाहा ॥"
"स्नवभ्यः स्नावानः स्नायवो नमः ।" इति तद्भाष्यम् ॥ * ॥ त्रि, रसिकः । इत्युणादिवृत्तौ उज्ज्वलदत्तः ॥)

स्निग्धं, क्ली, (स्निह+क्तः ।) सिक्थकम् । इति राजनिर्घण्टः ॥

स्निग्धः, पुं, (स्निह्यति स्नेहति । स्निह+अकर्म्मकत्वात् कर्त्तरि क्तः ।) वयस्यः । इत्यमरः । २ । ८ । १२ ॥ रक्तैरण्डः । सरलद्रुमः । इति राजनिर्घण्टः ॥

स्निग्धः, त्रि, (स्निह+क्तः ।) स्नेहयुक्तः । अरूक्षः । (यथा, महाभारते । १ । १५२ । ८ ।
"अष्टौ दंष्ट्राः सुतीक्ष्णाग्राश्चिरस्यापातदुःसहाः देहेषु मज्जयिष्यामि स्निग्धेषु पिशितेषु च ॥")
तत्पर्य्यायः । चिक्कणम् २ मसृणम् ३ । इत्यमरः । २ । ८ । ४६ ॥ चास्टम् ४ चिक्कम् ५ चक्कणम् ६ । इति वैश्यवर्गे शब्दरत्नावली ॥
"स्निग्धस्तु वत्सलो वत्सः स्नेहयुक्तजने भवेत् ।"
इति च विशेष्यनिघ्नवर्गे शब्दरत्नावली ॥

स्निग्धतण्डुलः, पुं, (स्निग्धस्तण्डुलः ।) षष्टिशालिः । इति राजनिर्घण्टः ॥

स्निग्धता, स्त्री, (स्निग्धस्य भावः । तल् ।) प्रियता । यथा,—
"हार्दं प्रियत्वं प्रियता स्निग्धतायां निगद्यते ।"
इति शब्दरत्नावली ॥
स्नेहः । इति राजनिर्घण्टः ॥

स्निग्धदारु, पुं, (स्निग्धं चिक्कणं दारु काष्ठं यस्य ।) सरलद्रुमः । इति जटाधरः । देवदारुः । इति राजनिर्घण्टः ॥

स्निग्धपत्रकः, पुं, (स्निग्धानि पत्राणि यस्य । कप् ।) गजरक्षणम् । घृतकरञ्जः । गुच्छकरञ्जः । इति राजनिर्घण्टः ॥

स्निग्धपत्रा, स्त्री, पुं, (स्निग्धं पत्रं यस्याः ।) बदरी ॥ इति जटाधरः ॥ पालक्यम् । काश्मरी । इति राजनिर्घण्टः ॥

स्निग्धपिण्डीतकः, पुं, (स्निग्धः पिण्डीतकः ।) मदनवृक्षविशेषः । यथा,—
"वाराहोऽन्यः कृष्णवर्णो महापिण्डीतको महान् स्निग्धपिण्डीतकश्चान्यः स्थूलवृक्षफलस्तथा ॥
अन्यो च मदनो श्रेष्ठो कटुतिक्तरसान्वितौ ।
छर्द्दनो कफहृद्रोगपक्वामाशयशोधनौ ॥"
इति राजनिर्घण्टः ॥

स्निग्धफला, स्त्री, (स्निग्धं फलं यस्याः ।) नाकुली । इति राजनिर्घण्टः ॥

स्निग्धा, स्त्री, (स्निग्ध+टाप् ।) मेदा । इति राजनिर्घण्टः ॥

स्निट, क स्नेहे । इति कविकल्पद्रुमः ॥ (चुरा॰-पर॰-सक॰-सेट् ।) क, स्नेटयति । इति दुर्गादासः ॥

स्नुः, पुं, (स्नु प्रस्रवणे+ [illegible]) सानुः । पर्व्वतस्य समभूमागः । इत्यमरः ३ । ५ ॥

स्नुः, स्त्री, (स्नु+डुः ।) स्नायुः । यथा,—
"त्रिष्टुप् मांसात् स्नुतोऽनुष्टुप् जगत्यस्थ्नः [illegible]
तस्योष्णिगासील्लोमभ्यो [illegible]"
इति श्रीभागवते । ३ । १२ । २ [illegible]

स्नुक्, [ह्] स्त्री, (स्नुह+क्विप् ।) [illegible] इत्यमरः । २ । ४ । ५ ॥

स्नुक्छदः, पुं, चीरकस्नुहीवृक्षः । इति [illegible]

स्नुतः, त्रि, (स्नु+क्तः ।) क्षरितजलादिः । [illegible] मरः । ३ । १ । ९२ ॥ (सिक्तः । यथा, [illegible] वते । १ । ११ । ३० ।
"ताः पुत्रमङ्कमारोप्य स्नेहस्नुतपयोधराः ।
हर्षविह्वलितात्मानः सिषिचुर्नेत्रजैर्जलैः ॥")

स्नुषा, स्त्री, (स्नौति मनो यस्यामिति । स्नु प्रस्रवणे+"स्नुव्रश्चिकृत्यृषिभ्यः कित् ।" उणा॰ ६६ । इति सः । स च कित् ।) पुत्रवधूः इत्यमरः । २ । ६ । ९ ॥ (यथा, रघुः । ८ । १ ।
"स किलाश्रममन्त्यमाश्रितो
निवसन्नावसथे पुराद्बहिः ।
समुपास्यत पुत्रभोग्यया
स्नुषयेवाविकृतेन्द्रियः श्रिया ॥")
श्वश्र्वा सह तस्या विरोधकारणं [illegible] द्रष्टव्यम् ॥ स्नुहीवृक्षः । इति शब्दचन्द्रिका ॥

स्नुहा, स्त्री, (स्नुह+भागुरिमते टाप् । स्नुही वृक्षः इत्यमरटीकायां भरतः । २ । ४ । १०५ ॥

स्नुहिः, स्त्री, (स्नुह+इन् ।) स्नुही । इत्यमरटीका । २ । ४ । १०५ ॥

स्नुही, स्त्री, (स्नुहि+कृदिकारादिति ङीष् ।) वृक्षविशेषः । मनसासिज इति भाषा । तत्पर्य्यायः । मोहुण्डः २ व्रजद्रुः ३ स्नुक् ४ [illegible] समन्तदुग्धा ६ । इत्यमरः । २ । ४ । १०५ ॥ सिहुण्डः ७ थोहुण्डः ८ वज्रः ९ स्नुहा १० स्नुहिः ११ गुडा १२ गुडः १३ । इति तट्टीका ॥ वज्री १४ इति शब्दरत्नावली ॥ सुधा १५ वज्रकण्टकः १६ क्षीरसारः १७ । इति जटाधरः ॥ अस्या दुग्धगुणाः ।
"बहुदोषे प्रयोक्तव्यमग्निसुल्यं सुधापयः ।"
इति राजवल्लभः ॥
राजनिर्घण्टोक्तपर्य्यायगुणौ सेहुण्डशब्दे द्रष्टव्यौ ॥ तत्र मनसा पूज्या । यथा,—
"शुभे जनार्द्दने सुप्ते पञ्चम्यां भवनाङ्गने ।
पूजयेन्मनसादेवीं स्नुहीविटपसंस्थिताम् ॥
पद्मनाभे गते शय्यां देवैः सर्व्वैरनन्तरम् ।
पञ्चम्यामसिते पक्षे समुत्तिष्ठति पन्नगी ॥"
इति तिथ्यादितत्त्वे देवीपुराणम् ॥

स्नेहः, पुं, (स्निह+घञ् ।) प्रेम । इत्यमरः । ११ ७ । २७ ॥ (तल्लक्षणं यथा,—
"दर्शने स्पर्शने वापि श्रवणे भाषणेऽपि वा ।
यत्र द्रवत्यन्तरङ्गं स स्नेह इति कथ्यते ॥")

V. 15—17.

शब्दकल्पद्रुमः ।

अर्थात्

एतद्देशव्यवहृतसमस्तकोषाशेषशास्त्रसङ्कलिताकारादिवर्णक्रमविन्यस्तशब्द-तल्लिङ्ग-नानार्थ-पर्य्याय-प्रमाण-प्रयोग-धातु-तदनुबन्धाभिधेय-
सहित-तत्तच्छब्दप्रसङ्गोत्थित-वेद-वेदाङ्ग-वेदान्त-न्याय-पुराणेतिहास-सङ्गीत-शिल्प-सूपकारशास्त्र-ज्योतिष-
तन्त्राख्यान-काव्यालङ्कार-च्छन्दःप्रभृति-नाम-लक्षणोदाहरण-द्रव्यगुण-रोगनिदानौषध-
सदयुक्तव्यवस्थादिसंयुक्त-सर्व्वदर्शनमतानुसारि-संस्कृताभिधानग्रन्थः ।

स्यार-राजा-राधाकान्तदेव-बाहादुरेण

विरचितः ।

पाणिनिमतानुसारि-प्रत्येकशब्दव्युत्पत्ति-मूलग्रन्थातिरिक्तबहुलशब्दार्थ-प्रमाण-प्रयोग-पर्य्याय-धातुपदोदाहरणादिभिः
नूतनसङ्कलितबहुलशब्द-तदर्थ-तत्प्रमाण-प्रयोगादिसहित-
उपक्रमपरिशिष्टेन च सार्द्धम्

श्रीवरदाप्रसादवसुना तदनुजेन श्रीहरिचरणवसुना च

अशेषशास्त्रविशारदकोविदवृन्दसाहाय्येन संपरिवर्द्धितः । नागराक्षरैः प्रकाशितश्च ।

पञ्चमः काण्डः ।

१५श-१६श-१७श-खण्डाः ।

कलिकाता-राजधान्यां

यन्त्रे मुद्रितः । ७१ नं पाथुरियाघाट-ष्ट्रीट्-स्थितभवनात् प्रकाशितश्च । शकाब्दाः

PRINTED BY [illegible] PRESS; AND CONSIDERABLY IMPROVED, CAREFULLY REVISED AND PUBLISHED
BY BARADA PRASAD BASU, AND HARI CHARAN BASU. 71, PATHURIAGHATA STREET CALCUTTA:

To be had at the Sabdakalpadruma Office, No. 71, Pathuriaghata Street, Calcutta: and at the Baptist Mission Press, No. 41 Lower Circular Road,
Calcutta: Rates for Subscribers in India, Re 1 and Countries out of India [illegible] for each [illegible].

[illegible]
[illegible] ।
"[illegible]"
इति [illegible] । १४ ॥
[illegible] । [illegible] ।
[illegible]
[illegible] ।
[illegible] ।"
[illegible] । ४ । ५ ।
[illegible] शीतं शीतमसारं [illegible]म् ।
[illegible] सर्वेषाम् [illegible] ।")
[illegible] । [illegible]
। [illegible] । [illegible] प्रवर्षी
[illegible] भवति यथा,—
[illegible] स्निग्धोऽपि [illegible] ।
[illegible] [illegible] ।"
इति भाषापरिच्छेदः ॥
[illegible] (स्निह्यन्तीति । स्निह + ल्युट् ।)
[illegible] । पर्य्यायः । स्नेहः २ स्निग्धता ३
[illegible] ४ स्नेहः ५ अभ्यङ्गः ६ अभ्यञ्जनम् ७ ।
[illegible] निर्घण्टः ॥ (स्नेहयतीति । स्निह +
+ ल्युः । स्निग्धकारिणि, त्रि । यथा,
। १ । ४५ ।
सौम्यं शीतवीर्य्यं मृदुमधुररसमभिष्यन्दि
[illegible]ति ॥")
[illegible], पुं, (स्नेहः प्रियो यस्य ।) प्रदीपः ।
हेमचन्द्रः ॥ तैलादिप्रिये, त्रि ॥
[illegible], पुं, (स्नेहयुक्तानि बीजानि यस्य ।)
[illegible] । इति राजनिर्घण्टः ॥ स्नेह-
[illegible], क्ली ॥
[illegible], पुं, (स्नेहात् भूरुत्पत्तिर्यस्य ।) श्लेष्मा ।
हेमचन्द्रः ॥ (स्नेहो भूरिति ।) स्निग्धभूमौ,
[illegible] (स्नेहान्विता भूर्यस्येति स्निग्धभूमि-
[illegible], त्रि ॥)
[illegible], पुं, (स्नेहेन रज्यते इति । रञ्ज + घञ् ।)
[illegible] इति शब्दरत्नावली ॥
[illegible], स्त्री, (स्नेहोऽस्या अस्तीति । स्नेह +
[illegible] । मत्व वा । ङीप् ।) मेदा । इति राज-
[illegible] ॥ (तैलादिरसविशिष्टे प्रीतिविशिष्टे
[illegible] । यथा, मार्कण्डेये । २३ । ७७ ।
[illegible] ततस्तेन पिता स्नेहवता तु तौ ।
[illegible] पुरं सत्यं रेमाते तेन धीमता ॥")
[illegible], स्त्री, (स्नेहस्य वस्तिः ।) अनुवासन-
[illegible] । तैलपिचकारी इति भाषा । यथा,—
[illegible] निरूहय ततः परः ।
[illegible] स स्यादनुवासननामकः ॥"
इति भावप्रकाशः ॥
[illegible] वस्तिशब्दे द्रष्टव्यम् ॥
[illegible], क्ली, (स्नेहेन विद्धम् ।) देवदारु ।
[illegible] जटाधरः ॥
[illegible] [न्] पुं, (स्निह्यतीति । स्निह + "श्वन्नुक्षन्
[illegible] दिति ।" उणा॰ १ । १५८ । इति कनिन्-

[illegible] स्कन्देन भावः ।) रोगविशेषः । इत्युणादि-
कोषः ॥ रुद्रः । स्कन्दः । इति सिद्धान्तकौमुद्या-
मुणादिवृत्तिः ॥
[illegible], पुं, (स्नेहमहार्हतीति । [illegible] +
[illegible] ।) [illegible] । इति त्रिकाण्डशेषः ॥
स्नेहितः, पुं, (स्नेहोऽस्य जातः । स्नेह + इतच् ।
[illegible] । स्नेहयुक्ते, त्रि ॥
स्नेही, [न्] पुं, (स्नेहोऽस्यास्तीति । इनि ।)
[illegible] । इति त्रिकाण्डशेषः ॥ चित्रकरः । इति
केचित् ॥ स्नेहयुक्ते, त्रि ॥
स्नेहः, पुं, (स्निह्यतीति । स्निह + "गृधृविह्निकुषि [illegible]भ्यश्चेति ।"
उणा॰ १ । ११ । इति उः ।) रोगभेदः ।
इत्युणादिकोषः ॥ चन्द्रः । इति सिद्धान्त-
कौमुद्यामुणादिवृत्तिः ॥
स्पद, इ ङ ईषत्कम्पे । इति कविकल्पद्रुमः ॥
(भ्वा॰-आत्म॰-सक॰-सेट् ।) इ, स्पन्दते ।
ङ, स्पन्दते चक्षुः । पस्पन्दे । कामं स्पन्दं कृते
स्पन्द स्पन्दनं शुभमस्त्रके । इत्यादौ गणकृता-
नित्यत्वमिति रमानाथः । वस्तुतस्तु स्पन्दते
स्पन्दः पचादित्वादच् ततः स्पन्द इवाचरति
इति क्वौ सिद्धिः । इति दुर्गादासः ॥
स्पन्दः, पुं, (स्पन्द + घञ् ।) प्रस्फुरणम् । ईषत्-
कम्पनम् । यथा,—
"अशुभस्पन्दं भुजस्पन्दं तदा दुःस्वप्नदर्शनम् ।
शकुनाद्यसमुत्थानमसत्यं शमयाशु मे ।
असत्यरूपो भगवान् प्रीयतां मे जनार्दनः ॥"
इति मलमासतत्त्वम् ॥ * ॥
अङ्गविस्फुरणे शुभाशुभफलं यथा,—
मनुरुवाच ।
"ब्रूहि मे त्वं निमित्तानि अशुभानि शुभानि च ।
सर्व्वधर्म्मभृतां श्रेष्ठ ! त्वं हि धर्म्मविदुच्यसे ॥
मत्स्य उवाच ।
अङ्गदक्षिणभागे तु शस्तं प्रस्फुरणं भवेत् ।
अप्रशस्तं तथा वामे पृष्ठस्य हृदयस्य च ॥
मनुरुवाच ।
अङ्गानां स्पन्दनञ्चैव शुभाशुभविचेष्टितम् ।
तन्मे विस्तरतो ब्रूहि येन स्युस्तद्विदो भुवि ॥
मत्स्य उवाच ।
पृथ्वीलाभो भवेत् मूर्द्ध्नि ललाटे रविनन्दन ! ।
स्थानं विवृद्धिमायाति भ्रूनसोः प्रियसङ्गमः ॥
भृत्यलब्धिश्चाक्षिदेशे दृगुपान्ते धनागमः ।
उत्कण्ठोपशमो मध्ये दृष्टं राजन् ! विचक्षणैः ॥
दृगुबन्धने सङ्गरे च जयं शीघ्रमवाप्नुयात् ।
योषित्प्राप्तिरपाङ्गदेशे श्रवणान्ते प्रिया श्रुतिः ॥
नासिकायां प्रीतिसौख्यं प्रियाप्तिरधरोष्ठयोः ।
कण्ठे तु भोगलाभः स्यात् भोगवृद्धिरथांसयोः ॥
सुहृत्स्नेहश्च बाहुभ्यां हस्ते चैव धनागमः ।
पृष्ठे पराजयो योधे जयो वक्षःस्थले भवेत् ॥
कुक्षिभ्यां प्रीतिरुद्दिष्टा स्त्रियाः प्रजननं स्तने ।
स्थानभ्रंशो नाभिदेशे अन्त्रे चैव धनागमः ॥
जानुसन्धौ परैः सन्धिर्बलवद्भिर्भवेन्नृप ! ।
दिशैकदेशनाशोऽथ जङ्घाभ्यां रविनन्दन ! ॥

उत्तमं स्थानमाप्नोति पद्भ्यां प्रस्फुरणान्नृप ! ।
सलाभञ्चाध्वगमनं भवेत् पदतले नृप ! ॥
लाञ्छनं पिटकञ्चैव ज्ञेयं प्रस्फुरणं तथा ।
विपर्य्ययेण विहितं सर्व्वं स्त्रीणां विपर्य्ययम् ॥
दक्षिणेऽपि प्रशस्तेऽङ्गे प्रशस्तं स्याद्विशेषतः ।
अप्रशस्तं तथा वामे त्वप्रशस्तं विशेषतः ॥
अतोऽन्यथासिद्धिरुदाहृतानाम्
फलस्य शस्तस्य च निन्दितस्य ।
अनिष्टचिह्नोपगमे द्विजानां
कार्य्यं सुवर्णेन च तर्पणं स्यात् ॥"
इति मात्स्ये यात्रानिमित्ताङ्गस्पन्दनं नाम
२४१ । ३—१४ ॥
स्पन्दनं, क्ली, (स्पन्द + ल्युट् ।) प्रस्फुरणम् । ईषत्-
कम्पनम् । (यथा, याज्ञवल्क्ये । १ । ११ ।
"गर्भाधानमृतौ पुंसःसवनं स्पन्दनात् पुरा ।
षष्ठेऽष्टमे वा सीमन्तो मास्येते जातकर्म्म च ॥")
स्पन्दिता, [ऋ] त्रि, दुःखकारणम् । तत्र शत्रु-
दर्शनरोगादि । इति केचित् ॥
स्पन्दितः, पुं, स्पर्शः । इति केचित् ॥
स्पर्द्ध, ङ संघर्षे । इति कविकल्पद्रुमः ॥ (भ्वा॰-
आत्म॰-सक॰-सेट् ।) संघर्षः परिभवेच्छा ।
इति वोपदेवः ॥ ङ, स्पर्द्धते बलिनं बली ।
पस्पर्द्धे । इति दुर्गादासः ॥
स्पर्द्धा, स्त्री, (स्पर्द्ध + भिदादित्वादङ् । टाप् ।)
संघर्षः । (यथा, महाभारते । १ । २१ । १७ ।
"महानदीभिर्बह्वीभिः स्पर्द्धयेव सहस्रशः ।
अभिसार्य्यमाणमनिशं ददृशाते महार्णवम् ॥")
क्रमसमुन्नतिः । साम्यम् । इति मेदिनी ॥
स्पर्श, क ङ ग्रहणे । श्लेषे । इति कविकल्पद्रुमः ॥
(चुरा॰-आत्म॰-सक॰-सेट् ।) क ङ, स्पर्शयते ।
इति दुर्गादासः ॥
स्पर्शः, पुं, (स्पृश संस्पर्शने, स्पर्श ग्रहणे वा + घञ् ।)
रुजा । दानम् । स्पर्शनम् । (यथा, उत्तर-
रामचरिते । १ अङ्के ।
"विनिश्चेतुं शक्यो न सुखमिति वा दुःख-
मिति वा
प्रमोहो निद्रा वा किमु विषविसर्पः किमु मदः ।
तव स्पर्शे स्पर्शे मम हि परिमूढेन्द्रियगणो
विकारश्चैतन्यं भ्रमयति च संमीलयति च ॥")
स्पर्शकः । सम्परायः । प्रणिधिः । इति मेदिनी ॥
उपतप्ता । इत्यमरः । ३ । ३ । २ । १४ ॥ वर्गाक्षरम् ।
इति हेमचन्द्रः ॥ (यथा, भागवते । २ । ८ । ६ ।
"स चिन्तयन् द्व्यक्षरमेकदाम्भ-
स्युपाशृणोत् द्विर्गदितं वचो विभुः ।
स्पर्शेषु यत् षोडशमेकविंशं
निष्किञ्चनानां नृप ! यद्धनं विदुः ॥")
वायुः । इति केचित् ॥ कामिनां बन्धभेदः । इति
शब्दरत्नावली ॥ कादिवर्गपञ्चकम् । यथा,—
"स्पर्शास्तस्याभवन् जीवः स्वरो देह उदाहृतः ॥"
इति श्रीभागवते ३ स्कन्धे १२ अध्यायः ॥
स्पर्शाः कादिवर्गपञ्चकम् । इति तट्टीकायां
श्रीधरस्वामी ॥ न्यायमते त्वगिन्द्रियग्राह्यगुण-

विशेषः। त्वगुपकारकः। स च त्रिविधः। उष्णः। शीतः। अनुष्णाशीतः। पृथिव्याः स्पर्शः काठिन्यादिः पाकजः। जलपरमाणुस्पर्शः नित्यः। अन्यथानित्यः। वैशेषिकमते पार्थिवपरमाणुमात्रस्य पाकजस्पर्शः। नैयायिकमते तु द्व्यणुकादिस्पर्शोऽपि पाकजः। यथा,—

"स्पर्शस्त्वगिन्द्रियग्राह्यस्त्वचः स्यादुपकारकः।
अनुष्णाशीतशीतोष्णभेदात् स त्रिविधो मतः॥
काठिन्यादिः क्षिताविव नित्यतादि च पूर्ब्बवत्।
एतेषां पाकजत्वन्तु क्षितौ नान्यत्र कुत्रचित्॥
तत्रापि परमाणौ स्यात् पाको वैशेषिके नये।
नैयायिकानान्तु नये द्व्यणुकादावपीष्यते॥"

इति भाषापरिच्छेदः॥

स्पर्शं निरूपयति। स्पर्श इति। उपकारक इति स्पर्शनप्रत्यक्षे स्पर्शः कारणमित्यर्थः। अनुष्णाशीतेति। पृथिव्या वायोः स्पर्शोऽनुष्णाशीतः जलस्य शीतः। तेजस उष्णः। काठिन्येति। कठिनसुकुमारस्पर्शः पृथिव्या एव इत्यर्थः। कठिनत्वादिकन्तु न संयोगनिष्ठो जातिविशेषः चक्षुर्ग्राह्यतापत्तेः। पूर्ब्बवत् जलतेजोवायुपरमाणुस्पर्शा नित्याः इत्यर्थः। तद्भिन्नाः स्पर्शास्त्वनित्या इत्यर्थः। एतेषां रूपरसगन्धस्पर्शानाम्। नान्यत्रेति। पृथिव्या हि रूपरसगन्धस्पर्शपरावृत्तिः पाकरससंयोगादुपलभ्यते। न हि शतधापि ध्मायमाने जलादौ रूपादिकं परावर्त्तते नीरे सौकरमौष्ण्यञ्च नयव्यतिरेकाभ्यामुपाधेरेवेति निर्णीयते पवनपृथिव्योः शीतस्पर्शादिवत् पृथिवीष्वपि मध्ये परमाणावेव रूपादीनां पाकः इति वैशेषिका वदन्ति। नैयायिकानामिति नैयायिकानां मते द्व्यणुकादौ अवयविन्यपि पाको भवति। इति सिद्धान्तमुक्तावली॥ * ॥

पुराणमते एकादशविधस्पर्शो यथा। उष्णः १ शीतः २ सुखः ३ दुःखः ४ स्निग्धः ५ विशदः ६ खरः ७ मृदुः ८ श्लक्ष्णः ९ लघुः १० गुरुः ११। इति महाभारते मोक्षधर्मः॥ कठिनः। इति तत्रैव आश्वमेधिकपर्व्व॥ आचमनाङ्गस्पर्शनं आचमनशब्दे द्रष्टव्यम्॥ * ॥ उच्छिष्टस्य स्पर्शनिषेधो यथा,—

"न स्पृशेत् पाणिनोच्छिष्टो विप्रगोब्राह्मणानलान्।
न चासनं पदा वापि न देवप्रतिमां स्पृशेत्॥"

इति कौर्म्मे उपविभागे। १६। ३५॥

अथ उच्छिष्टस्य चाण्डालादिस्पर्शप्रायश्चित्तम्। आपस्तम्बः।

"भुक्तोच्छिष्टस्त्वनाचान्तश्चाण्डालैः श्वपचेन वा।
प्रमादात् स्पर्शनं गच्छेत् तत्र कुर्य्याद्विशोधनम्॥
गायत्र्यष्टसहस्रन्तु द्रुपदां वा शतं जपेत्।
त्रिरात्रोपोषितो भूत्वा पञ्चगव्येन शुध्यति॥
भुक्तोच्छिष्टोऽन्त्यजैः स्पृष्टः प्राजापत्यं समाचरेत्।
अर्द्धोच्छिष्टे कृतः पादः पाद आचमने तथा॥"

प्राजापत्यं स्नाने। अर्द्धोच्छिष्टो पीत आचमनःस्वौष्ठे शिष्टः स तु निर्णोजः। टच.।

"पाने मैथुनसंसर्गे तथा मूत्रपुरीषयोः।
स्पर्शनं यदि गच्छेत्तु शवोदक्यान्त्यजैः सह॥
दिनमेकं चरेन्मूत्रे पुरीषे तु दिनद्वयम्।
दिनत्रयं मैथुने स्यात् पाने स्याच्च चतुष्टयम्॥"

काश्यपः।

"श्वशूकरान्त्यचाण्डालमद्यभाण्डरजस्वलाः।
यद्युच्छिष्टः स्पृशेत् तत्र कृच्छ्रं सान्तपनं चरेत्॥"

एतज्ज्ञानाभ्यासे। सान्तपने धेनुद्वयम्। ब्रह्मपुराणे।

"उच्छिष्टेन तु शूद्रेण विप्रः स्पृष्टस्तु तादृशः।
उपवासेन शुद्धिः स्यात् शुना संस्पृष्ट एव वा॥
उच्छिष्टेन तु विप्रेण विप्रः स्पृष्टस्तु तादृशः।
उभौ स्नानं प्रकुरुतः सद्य एव समाहितौ॥"

अनुच्छिष्टब्राह्मणस्य नक्तमिति प्रायश्चित्तविवेकः॥ * ॥ अथ रजस्वलास्पर्शप्रायश्चित्तम्। काश्यपः।

"रजस्वला तु संस्पृष्टा ब्राह्मण्या ब्राह्मणी यदि।
एकरात्रं निराहारा पञ्चगव्येन शुध्यति॥
रजस्वला तु संस्पृष्टा राजन्या ब्राह्मणी तु या।
त्रिरात्रेण विशुद्धिः स्यात् व्यासस्य वचनं यथा॥
रजस्वला तु संस्पृष्टा वैश्यया ब्राह्मणी च या।
पञ्चरात्रनिराहारा पञ्चगव्येन शुध्यति॥
रजस्वला तु संस्पृष्टा शूद्रया ब्राह्मणी यदि।
षड्रात्रेण विशुध्येत्तु ब्राह्मणी कामचारतः॥
अकामतश्चरेदर्द्धं ब्राह्मणी सर्व्वजातिषु॥"

एतेन रजस्वलाया ब्राह्मण्याः सवर्णरजस्वलास्पर्शे एकरात्रोपवासः पञ्चगव्यपानं कामतः। अकामतस्त्वर्द्धं नक्तव्रतम्। असवर्णरजस्वलास्पर्शे त्रिरात्रपञ्चरात्रषड्रात्रोपवासाः। अकामतस्त्वर्द्धं एतच्चतुर्थाह्नानन्तरं कर्त्तव्यम्।

"चाण्डालेन श्वपाकेन संस्पृष्टा चेद्रजस्वला।
अतिक्रम्य तान्यहानि प्रायश्चित्तं समाचरेत्॥
त्रिरात्रमुपवासः स्यात् पञ्चगव्येन शुध्यति।
तां निशान्तु व्यतिक्रम्य स्वजात्युक्तन्तु कारयेत्॥"

इति वचनान्तरदर्शनात्॥

एतत् कामतः। अत्र दिनभेदोऽपि नास्ति। अत्रान्ने बृहस्पतिः।

"पतितान्त्यश्वपाकैस्तु संस्पृष्टा स्त्री रजस्वला।
तान्यहानि व्यतिक्रम्य प्रायश्चित्तं समाचरेत्॥
प्रथमेऽह्नि त्रिरात्रन्तु द्वितीये द्व्यहमाचरेत्।
अहोरात्रं तृतीयेऽह्नि चतुर्थे नक्तमाचरेत्॥"

चतुर्थेऽह्नीति शुद्धिस्नानात् पूर्ब्बम्। व्याघ्रः।

"रजस्वला यदा स्पृष्टा श्वजम्बुकखरैः क्वचित्।
निराहारा भवेत्तावत् यावत् स्नानेन शुध्यति॥"

अत्रापि बृहस्पत्युक्तदिनभेदव्यवस्था। वृद्धशातातपः।

"रजस्वले तु ये नार्य्यावन्योऽन्यं स्पृशतो यदि।
सवर्णे पञ्चगव्यन्तु ब्रह्मकूर्च्चमतः परम्॥"

पञ्चगव्यपानं व्रतरूपं तेनोपवासः। ब्रह्मकूर्च्चमाह जाबालः।

"अहोरात्रोषितो ...
पञ्चगव्यं पिबेत् ...
तदशक्तौ पुराणैकं दानकम्।
स्पर्शे बृहस्पतिः।
"शुना चोच्छिष्टया शूद्रा संस्पृष्टा ...
अहोरात्रं तृतीयेऽह्नि परतो
परतश्चतुर्थदिने स्नानात् पूर्व्वमिति
इति प्रायश्चित्ततत्त्वम्॥

स्पर्शनप्रायश्चित्तं स्नानशब्दे द्रष्टव्यम्

स्पर्शकः। आनन्दजनकः। यथा ३। २१। ८।

"श्वेतोत्पलक्रीडनकं मन.

स्पर्शकः, त्रि, (स्पृशतीति। स्पृश ... कर्त्ता। स्पृशधातोः कर्त्तरि निष्पन्नः॥

स्पर्शनं, क्ली, (स्पृश + ल्युट्।) दानम्। इति मेदिनी॥ (यथा, भागवते। ११। ...

"तस्मिन्नस्तधियः पार्थाः ...
दर्शनस्पर्शनालापशयनासनभोजनैः॥"

सम्बन्धः। इति मल्लिनाथः॥ यथा, २। ५०।

"तद्रत्न कल्याणपरम्पराणां
भोक्तारमूर्ज्जस्वलमात्मदेहम्।
महीतलस्पर्शनमात्रभिन्न-
मृद्धं हि राज्यं पदमैन्द्रमाहुः॥")

स्पर्शनः, पुं, (स्पृशतीति। स्पृश + ल्युः।) इत्यमरः। १। १। ६४॥

स्पर्शमणिः, पुं, (स्पर्शप्रधानो मणिः। स्वर्णोत्पादकत्वात् तथात्वम्।) स्वर्णजनकप्रस्तरविशेषः। परशपाथर भाषा। इति वक्ष्यमाणशब्ददर्शनात्॥

स्पर्शमणिप्रभवं, क्ली, (स्पर्शमणिः प्रभवो ... स्वर्णम्। इति शब्दरत्नावली॥

स्पर्शलज्जा, स्त्री, (स्पर्शात् लज्जा संकोचरूपा यस्याः।) लज्जालुवृक्षः। इति चन्द्रिका॥

स्पर्शशुद्धा, स्त्री, (स्पर्शे शुद्धा।) शतमूली शब्दचन्द्रिका॥

स्पर्शस्यन्दः, पुं, (स्पर्शेन स्यन्दते स्यन्द + अच्।) भेकः। इति केचित्॥

स्पर्शा, स्त्री, (स्पृशति परपुरुषमिति। अच्। टाप्।) कुलटा। इति धरणिः॥

स्पर्शानन्दा, स्त्री, (स्पर्शेन आनन्दो ... अप्सरसः। इति त्रिकाण्डशेषः॥

स्पर्ष्टा, [ऋ] त्रि, (स्पृशतीति। ... उपतापकमात्रम्। रोगः। इत्येके। टीकायां भरतः। ३। २। १४॥

स्पश, ज ग्रन्थबाधयोः। इति (भ्वा०-उभ०-सक०-सेट्।) ज, पस्पाश। अन्यस्थाने स्पर्शनं पठन्ति केचित् इति दुर्गादासः॥

[illegible] । [illegible] । [illegible] ।
[illegible] । १ । १६८ । १५ ।
[illegible]
[illegible]
। । [illegible] । १ । ८ । २११ । [illegible]
[illegible] । [illegible] । [illegible]
[illegible]
। [illegible] । [illegible] । इति भरत: ॥
[illegible] । [illegible] + क्विप् + क: ।
[illegible] ।" ५ । ४ । २०१ । इति
[illegible] । [illegible] । तत्पर्य्याय: । स्पर्शम् २
[illegible] ४ । इत्यमर: । ३।१।८१ ।
[illegible] ५ [illegible] ६ । इति जटाधर: ॥
[illegible] । ४ । १५ । २२ ।
"[illegible]
[illegible]
[illegible]
[illegible] ॥")
[illegible] त्रि, स्पर्शान्वितम् । तत्पर्य्यायः पर्य स्पृष्ट-
[illegible] विप्रलम्भेन निष्पन्नम् ॥
[illegible] । इति कविकल्पद्रुम: ॥
[illegible]-पर०-सका०-सेट् ।) न, स्पृणोति । इति
[illegible]दास: ॥
[illegible] स्त्री, पृक्का । स्पृश्यते सौगन्ध्यात् स्पृश संस्पर्शे
[illegible]स्यात् क: पृषोदरादित्वात् शस्य क: स्पृक्का
[illegible]दिरिति केचित् । इत्यमरटीकायां भरत: ।
।१३२ ॥ यथा, बृहत्संहितायाम् । ७७।५ ।
"त्वमुरुवकनलिका-
स्पृक्कारसतगरवाम्रकैस्तुल्यै: ।
केसरपत्रविमिश्रै-
र्नरपतियोग्यं शिर:स्नानम् ॥")
[illegible] स्पृशि । इति कविकल्पद्रुम: ॥
[illegible]०-पर०-सक०-अनिट् ।) श, स्पृशति । स्पृशी,
[illegible]क्षीत् अस्पृक्षत् । हस्तेन पस्पर्श तदङ्ग-
[illegible] । इति कुमार: । इति दुर्गादास: ॥
[illegible], स्त्री. (स्पृशतीति । स्पृश + क: । टाप् ।)
[illegible]घातिनीक्षुप: । घाङ्गालिका इति ख्याता ।
। शब्दचन्द्रिका ॥
[illegible] स्त्री, कण्टकारी । इत्यमर: । २।४।९३ ॥
[illegible] त्रि. (स्पृश + क्त: ।) कृतस्पर्श: । यथा,
[illegible]श्चित्ततत्त्वधृतब्रह्मपुराणवचनम् ।
[illegible]च्छिष्टेन तु शूद्रेण विप्र: स्पृष्टस्तु तादृश: ।
[illegible]वासेन शुद्धि: स्यात् शुना संस्पृष्ट एव वा ॥"
[illegible]स्पृष्टं, क्ली. (स्पृष्टेन सा सम्यक् स्पृष्टम् ।)
[illegible]परस्पर्शनम् । यथा,—
[illegible] ज्ञातिगुणान् वक्ष्ये स्पृष्टास्पृष्टं महेश्वरि ! ।
[illegible]र्मै: शिष्टसंस्पर्शे प्रायश्चित्तं यथाविधि ॥
[illegible]शस्य गवाञ्च क्षत्त्रियार्थ: कदाचन ।
[illegible]वस्य हरिं स्मृत्वा उपवासेन क्षत्त्रिय: ॥
[illegible]शूद्रस्पर्शेऽपि हरिसंस्मरणे शुचि: ।
[illegible]योपस्पृशेद् यस्तु प्रायश्चित्तं न विद्यते ॥
[illegible]शौ यस्तु शूद्रस्य सेवयोपस्पृशेत् क्वचित् ।

[illegible] हरिं स्मृत्वा उपवासेन शुध्यति ॥
स्पृष्टस्[illegible] निर्दिष्टो [illegible] तत्क्षणेनास्य: स्मृत: ।
[illegible] मतो मिथ्याचारोऽधर्मो मत: ॥
[illegible] स्पृष्ट उपस्पृश्य द्विज: शुचि: ।
[illegible] स्पृष्ट: शुध्यति ब्राह्मण: ॥"
इति ब्रह्मपुराणे ९८ अध्याय: ॥
स्पृष्टास्पृष्टि, व्य. (स्पृष्टेन स्पृष्टेन यत् भवति । "इच्
कर्मव्यतिहारे ।" ५ । ४ । १२७ । इति इच् ।
"अन्येषामपि दृश्यते ।" ६ । ३ । १३७ । इति
दीर्घ: ।) परस्परस्पर्शनम् । छोयाछुँयि इति
भाषा । यथा, रत्नाकरे बृहस्पति: ।
"तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे ।
नगरग्रामदाहे च स्पृष्टास्पृष्टि न दुष्यति ॥
आपद्यपि च कष्टायां कष्टभद्रे गोऽङ्किते तथा ।
आत्माभिर्वीर्गृहीतेव निर्दिष्टे यन्नादया ॥"
स्पृष्टास्पृष्टि इत्यव्ययं क्रियाव्यतीहारे । तदेति
न दुष्यतीत्यर्थ: । इति प्रायश्चित्ततत्त्वम् ॥ मत्स्य-
सूक्ते ३८ पटलेऽप्यस्य द्रष्टव्यम् ॥
स्पृष्टि:, स्त्री, (स्पृश + क्तिन् ।) स्पर्श: । तत्प-
र्य्याय: । पृक्ति: २ । इत्यमर: । ३ । २ । ८ ॥
स्पर्शनम् ३ । इति शब्दरत्नावली ॥
स्पृह, त् क ईप्से । इति कविकल्पद्रुम: ॥ (अदन्त
चुरा०-पर०-सक०-सेट् ।) ईप्स आप्तुमिच्छा ।
स्पृहयति । इति दुर्गादास: ।
स्पृहणीयं, त्रि, (स्पृह + अनीयर् ।) वाञ्छनीयम् ।
यथा, ऋतुसंहारे । १ । १ ।
"प्रचण्डसूर्य्य: स्पृहणीयचन्द्रमा:
सदावगाहक्षतवारिसञ्चय: ।
दिनान्तरम्योऽभ्युपशान्तमन्मथो
निदाघकाल: समुपागत: प्रिये ॥"
स्पृहयालु:, त्रि, (स्पृहयति तच्छील: । स्पृह +
"स्पृहिगृहिपतीति । ३ । २ । १५८ । इति
आलुच् ।) स्पृहाशील: । लोभी । इति मुग्ध-
बोधव्याकरणम् ॥ (यथा, रघु: । १४ । ४५ ।
"प्रजावती दोहदशंसिनी ते
तपोवनेषु स्पृहयालुरेव ॥")
स्पृहा, स्त्री, (स्पृह + अङ् । टाप् ।) इच्छा ।
इत्यमर: । १ । ७।२७ ॥ तस्या: निन्दाप्रशंसे
यथा, ब्रह्मवैवर्त्ते गणपतिखण्डे ।३५।७३—७५;
८४—८५ ।
"तपो धनं ब्राह्मणानां तप: कल्पतरुस्तथा ।
तपस्या कामधेनुश्च सन्ततं तपसि स्पृहा ॥
ऐश्वर्य्ये क्षत्त्रियाणाञ्च वाणिज्ये च तथा विशाम् ।
शूद्राणां विप्रसेवायां स्पृहा वेदेष्वनिन्दिता ॥
क्षत्त्रियाणाञ्च तपसि स्पृहातीवप्रशंसिता ।
ब्राह्मणानां विवादेषु स्पृहातीव विनिन्दिता ॥
क्षत्त्रियाणां रणो धर्म्मो रणे मृत्युर्न गर्हित: ।
रणे स्पृहा ब्राह्मणानां लोके वेदे विडम्बना ॥
तपोधनानां विप्राणां वाग्बलानां युगे युगे ।
शान्तिस्वस्त्ययनं कर्म्म विप्रधर्म्मो न सङ्गर: ॥"
स्पृह्य:, पुं, (स्पृह्यते इति । स्पृह + यत् ।) मातु-
लुङ्गक: । इति शब्दचन्द्रिका ॥ वाञ्छनीये, त्रि ॥

स्प्रष्टा, [ष्ट्] त्रि, (स्पृशतीति । स्पृश + तृच् ।)
उपतापकसामान्यम् । इत्यमर: । ३ । २ । १४ ॥
रोग: । इत्येके । इति भरत: ॥ (स्पर्शक: ।
यथा, महाभारते । १४ । २० । २१ ।
"घ्राता भक्षयिता द्रष्टा स्प्रष्टा श्रोता च पञ्चम: ।
मन्ता बोद्धा च सप्तैते भवन्ति परमर्त्विज: ॥")
स्फट ड } शीर्णौ । इति कविकल्पद्रुम: ॥ (भ्वा०-
स्फट } पर०-अक०-सेट् ।) द्वावाद्यस्वरिणा-
वेतावेर्गद्वितीययुक्तौ । पञ्चमस्वरिणावितिभ्रमो
हेय: । तथात्वे सजातीयतया स्फुटक् भिदीला-
दीनां सन्निधावेवापठिष्यत् । एवं संख्यापि न
संगच्छते । स्फुटिविसरणे इत्यनेनैवेष्टसिद्धे
सेपधातीय वैयर्थ्यं स्यात् । अतएव रमा-
नाथोऽपि स्फुटिविशरणे इत्यत्र उकारशून्य:
स्फट इति केचित् पठन्ति । पचादित्वादनि०
स्फटा फणा इति सुभूतिरित्यन्तमाह । ड,
स्फण्टते । स्फटति गात्रे वाण: । पस्फट पस्फाट
स्फटिकम् । इति दुर्गादास: ॥
स्फट:, पुं, (स्फटतीति । स्फट + अच् ।) फणा ।
इत्यमर: । १ । ८ । ८ ॥
स्फटा, स्त्री, (स्फट + अच् । टाप् ।) फणा ।
इत्यमर: । १ । ८ । ८ ॥
स्फटिक:, पुं, (स्फट शीर्णौ + बाहुलकात् इकन् ।)
सूर्य्यकान्तमणि: । इति हलायुध: ॥ स्वनाम-
ख्यातमणि: । फटिक् इति भाषा । तत्पर्य्याय: ।
स्फाटिकम् २ स्फाटकम् ३ । इति शब्दरत्ना-
वली ॥ भासुर: ४ स्फाटिकोपल: ५ शालि-
पिष्टम् ६ धौतशिलम् ७ । इति त्रिकाण्डशेष: ॥
सितोपल: ८ विमलमणि: ९ निर्म्मलोपल: १०
स्वच्छ: ११ स्वच्छमणि: १२ अमररत्नम् १३
निस्तुषरत्नम् १४ शिवप्रिय: १५ । अस्य गुणादि
यथा,—
"स्फटिक: समवीर्य्यश्च पित्तदाहार्त्तिदोषनुत् ।
तस्याक्षमालां जपता दत्ते कोटिगुणं फलम् ॥"
तत्परीक्षा यथा,—
"यद्गङ्गातोयबिन्दुच्छविविमलतमं निस्तुषं नेत्र-
हृद्यं
स्निग्धं शुद्धान्तरालं मधुरमतिहिमं पित्त-
दाहापहारि ।
पाषाणे यन्निघृष्टं स्फुटितमपि निजां स्वच्छतां
नैव जह्यात्
तज्जात्यं जातु लभ्यं शुभमुपचिनुते शैवरत्नञ्च
रत्नम् ॥"
बिन्दुस्थाने विद्युदिति च पाठ: । इति राज-
निर्घण्ट: ॥ अपि च ।
"मुक्ताविद्रुमवज्रेन्द्रवैदूर्य्यस्फटिकादिकम् ।
मणिरत्नं सरं शीतं कषायं स्वादु लेखनम् ।
चक्षुष्यं धारणात्तच्च पापालक्ष्मीविनाशनम् ।'
इति राजवल्लभ: ॥ ० ॥
तस्य उत्पत्तिपरीक्षे यथा,—
"कावेरविन्ध्ययवनचीननेपालभूमिषु ।
लाङ्गली व्यकिरन्मेदो दानवस्य प्रयत्नत: ॥

[illegible]

[illegible] समादि [illegible]

[illegible] ब्याप्य [illegible]

[illegible] ब्यापार: [illegible]

[illegible]

[illegible] व्याप्याप्यापकत्व [illegible]

[illegible] वाच्य: [illegible]

[illegible] व्यापकमिति [illegible]

[illegible] तत: [illegible]

[illegible] इति [illegible]

[illegible] इति [illegible]

[illegible]

...ि गात्रं वाणः । विसरण इति दन्त्य-
...े विकसन इत्यर्थः । स्फोटति मल्लिका-
। ॥
क भिदि । इति कविकल्पद्रुमः ॥ (चुरा०-
-सक०-सेट् ।) क, स्फोटयति कण्टकः
। इति दुर्गादासः ॥
ङ विसरणे । इति कविकल्पद्रुमः ॥ (भ्वा०-
०-सक०-सेट् ।) ङ, स्फोटन्ते नवकुड्म-
कुटजप्रायेषु दृत्तेष्विति हलायुधः । इति
दासः ॥
त् क विसरणे । इति कविकल्पद्रुमः ॥
(चुरा०-पर०-सक०-सेट् ।) विसरणं
सनम् । स्फुटयति चम्पककलिका । अपु-
त् । इति दुर्गादासः ॥
श विकासे । इति कविकल्पद्रुमः । (तुदा०-
-सक०-सेट् ।) विकास इति कस ज
विति दन्त्यान्तस्य घञि रूपं विपूर्व्वेणार्था-
चितया विकसनमित्यर्थः । शि, स्फुटति
कोरकः । अस्फुटीत् पुस्फोट । इति
दासः ॥
क हिंसे । आङ्पूर्व्वोऽयम् । इति कविकल्प-
॥ (चुरा०-पर०-सक०-सेट् ।) आङ् उप-
। क, आस्फोटयति । इति दुर्गादासः ॥
त्रि, (स्फुटति प्रकाशते इति । स्फुट् + कः ।)
। (यथा, रघुः । ३ । ६३ ।
"अवेहि मां प्रीतमृते तुरङ्गमात्
किमिच्छसीति स्फुटमाह वासवः ॥")
: । इति मेदिनी ॥ शुक्लः । इत्यजयः ॥
: । इति स्फुटधात्वर्थदर्शनात् ॥ ॥ स्फुट-
यथा,—
"स्यात् संस्कृतौ मध्यफलेन मध्यो
मन्दस्फुटः स्यात् चलकेन्द्रमुक्तम् ।
विधाय शैघ्रेण चलेन चैवं
खेटस्फुटः स्यादसकृत् फलाभ्याम् ॥"
अत्र विशेषमाह ।
"दलीकृताभ्यां प्रथमं फलाभ्यां
ततोऽखिलाभ्यामसकृत् कुजस्तु ।
स्फुटौ रवीन्दू मृदुनैव वेद्यौ
शीघ्राख्यतुङ्गस्य तयोरभावात् ॥"
इति सिद्धान्तशिरोमणिः ॥
ं, क्ली, (स्फुट् + ल्युट् । कुटादित्वात् न गुणः ।)
रणम् । इत्यमरः । ३ । २ । ५ ॥ विक-
म् । इति स्फुटधात्वर्थदर्शनात् ॥
बन्धनी, स्त्री, (स्फुटं बन्धनं यस्याः । ङीप् ।)
रावतपदी । मफट्की इति भाषा । इति
माला ॥ स्फुटवल्कलीति केचित् ॥
, स्त्री, (स्फुटति विकाशते इति । स्फुट +
: । टाप् ।) फटा । फणा । इत्यमरटीकायां
मागमः । १ । २ । ५ ॥
ट, स्त्री, (स्फुटतीति । स्फुट + इन् ।) पाद-
ोटरोगः । निर्भिन्नकर्कटीफलम् । इति
दिनी ॥

स्फुटितः, त्रि, (स्फुट + क्तः ।) विकसितः । इति
हेमचन्द्रः ॥ भिन्नः । (यथा, मृच्छकटिके
३ अङ्के ।
"असदृशजनसंप्रयोगभीरो-
र्हृदयमिव स्फुटितं महाण्टहस्य ॥")
परिहसितः । इति स्फुटधात्वर्थदर्शनात् ।
व्यक्तीकृतः । इति स्फुटशब्दार्थदर्शनात् ॥
स्फुटी, स्त्री, (स्फुटि + कृदिकारादिति ङीप् ।)
पादस्फोटरोगः । कर्कटीफलम् । फुटी इति
भाषा । इति शब्दरत्नावली ॥
स्फुट्ट, क अनादरे । इति कविकल्पद्रुमः ॥ (चुरा०-
पर०-सक०-सेट् ।) क, स्फुट्टयति । इति दुर्गा-
दासः ॥
स्फुण्ड, इ क नर्म्मणि । इति कविकल्पद्रुमः ॥(चुरा०-
पर०-सक०-सेट् ।) नर्म्म इह परीहासः ।
इ क, स्फुण्डयति सखायं लोकः । पुस्फुण्डयिषति ।
आयस्वरौति कातन्त्राद्याः । पञ्चमस्वरयुक्तो
नर्म्मे । इति गोविन्दभट्टः । इति दुर्गादासः ॥
स्फुण्ड, इ ङ फुल्ले । इति कविकल्पद्रुमः ॥ (भ्वा०-
आत्म०-अक०-सेट् ।) फुल्लं विकसनम् । इ,
स्फुण्ड्यते । ङ, स्फुण्डते कुन्दकोरकः । पुस्फुण्डे ।
इति दुर्गादासः ॥
स्फुड, शि हत्याम् । इति कविकल्पद्रुमः ॥ (तुदा०-
पर०-सक०-सेट् ।) शि, स्फुडति । अस्फुडीत् ।
पुस्फोड । हत्यां वरणे । इति दुर्गादासः ॥
स्फुत्करः, पुं, (करोतीति । कृ + अच् । स्फुदित्य-
व्यक्तशब्दस्य करः ।) अग्निः । इति शब्द-
चन्द्रिका ॥
स्फुत्कारः, पुं, फुत्कारः । स्फुदिति क्रियते
इति स्फुत्शब्दपूर्व्वकृधातोर्भावे घञ्प्रत्ययेन
निष्पन्नः ॥
स्फुर, शि स्फूर्त्तौ । चले । इति कविकल्पद्रुमः ॥
(तुदा०-चुरा०-पर०-अक०-सेट् ।) स्फूर्त्तिः
प्रकाशः । चलनम् । शि, स्फुरति चामरम् ।
अस्फुरीत् । पुस्फोर । इति दुर्गादासः ॥
स्फुरः, पुं, (स्फुरतीति । स्फुर + कः ।) फलकम् ।
इति हेमचन्द्रः ॥ (स्फुर + भावे घञ् ।)
स्फुरणम् । इत्यमरटीका । ३ । २ । ८ ॥
स्फुरणं, क्ली, (स्फुर + ल्युट् ।) किञ्चिच्चलनम् ।
इति भरतः ॥ तत्पर्य्यायः । स्फरणम् २ । इत्य-
मरः । ३ । २ । ८ ॥ स्फुलनम् ३ स्फोरणम् ४
स्फुरः ५ स्फुरणा ६ स्फारणम् ७ । इति तट्टीका ॥
स्फूर्त्तिः । इति शब्दरत्नावली ॥ ॥ अङ्ग-
स्फुरणस्य शुभाशुभफलं यथा,—
"मूर्द्धोऽधुनाङ्गस्फुरितस्य सम्यक्
प्रत्येकमव्यक्तफलप्रभावम् ।
सर्व्वत्र यत्रावगते सदैहा-
दुत्पद्यते कर्म्मविपाकसंवित् ॥
मूर्द्ध्नि स्फुरत्याशु पृथिव्यवाप्तिः
स्थानप्रवृद्धिश्च ललाटदेशे ।
भ्रूघ्राणमध्ये प्रियसङ्गमः स्यात्
नासाक्षिमध्ये च सदा...

दृगन्तमध्यस्फुरणेऽर्थलाभौत्-
कण्ठौ क्रमाद्विस्फुरिते दृगाढौ ।
जयो दृगाधःस्फुरणे रणः स्यात्
प्रियश्रुतिः स्यात् स्फुरिते च कर्णे ॥
योषित्समृद्धिः स्फुरिते च गण्डे
घ्राणे तु सौमुख्यमुदौ भवेताम् ।
भोज्येष्टसद्भावधरोष्ठयोश्च
स्कन्धे गले भोगविवृद्धिलाभौ ॥
स्कन्दो भुजस्येष्टसमागमाय
स्कन्दः करस्य द्रविणाप्तहेतुः ।
स्कन्दश्च पृष्ठस्य पराजयाय
स्कन्दो जयायोरसि मानवानाम् ॥
पार्श्वप्रकम्पे विषयस्य लाभः
कटिप्रकम्पे तु वनप्रमोदौ ।
नाभिप्रकम्पे निजदेशलाभः
धनर्द्धिवस्तुश्च भुवि प्रकम्पे ॥
दुःखं धनाप्तं हृदयस्य कम्पे
स्फिक्पायुकम्पेऽपि च वाहनाप्तिः ।
वराङ्गकम्पे वरयोषिदाप्ति-
र्मुष्कौ सकम्पे तनयस्य जन्म ॥
वस्तौ सकम्पे युवतिप्रवृत्तिः
दीपश्च कम्पे पुनरूरुपृष्ठे ।
ऊरः पुनः स्यात् सुसहायलाभः
स्याज्जानुकम्पे त्वचिरेण सिद्धिः ॥
जङ्घाप्रकम्पे निजदेशनाशः
स्थानाप्तिरुद्यचरणस्य कम्पे ।
यात्रा सलाभाङ्घ्रितलप्रकम्पे
पुंसां सदा दक्षिणदेहभागे ॥
स्त्रीणाञ्च वामावयवे प्रजातः
स्कन्दः फलानि प्रदिशत्यवश्यम् ॥"
इति वसन्तराजशाकुने नरेङ्गितेऽङ्गस्फुरण-
प्रकरणं चतुर्थम् ॥
स्फुरणा, स्त्री, (स्फुर + णिच् + युच् । टाप् ।)
स्फुरणम् । इत्यमरटीका । ३ । २ । १० ॥
स्फुरन्, [त्] त्रि, (स्फुर + शतृ ।) कम्पनयुक्तः ।
स्फूर्त्तिविशिष्टः । यथा,—
"गङ्गोत्तुङ्गतरङ्गमङ्गुजटाजूटाग्रजाग्रत्फणि-
स्फूर्जत्फुत्कृतिभीतिसम्भृतचमत्कारस्फुरत्-
सम्भ्रमा ।
आनन्दामृतवापिकां विदधती चित्ते गिरीश-
प्रभो-
स्त्वां पायात्प्रसङ्गमे भगवती सञ्चायती
पार्व्वती ॥"
इति काव्यचन्द्रिका ॥
स्फुरितं, क्ली, (स्फुर + क्तः ।) स्फुरणम् । स्फुरण-
विशिष्टे, त्रि । यथा । मूर्द्धोऽधुनाङ्गस्फुरित च
सम्यक् इति । प्रिया श्रुतिः ... च ।
कर्णे इति च । ...
स्फूर्च्छा, आ विस्मृतौ ... कल्पद्रुमः ॥
(भ्वा०-पर०-सक० ...) ...
... इति दुर्गादासः ॥

[illegible]

...सहस्रं स्तूयते ... ॥

...पवादं प्रशमयितुम् ...

...ष्णो भृ (?) ... आख्या ...

...मी सात्वतां वर भोजवृष्णि ...

...सहामुख्य मणिं समादाय ...

...सा नात्मा कल्याणी ...

...शोकं भवाम्यहम् ...

...स्मरन् ...

...द्वारवतीं नाथ गोविन्द यदुनन्दन ॥

...भवानि सदिला त्वां दिदृक्षुर्मायत ।

...न् त्वामनिशं यत्ने मया दर्शितस्तत्वविभवः ॥

...न्त्यतो नित सार्धं विलोक्य यविधुर्वपभाः ।

...द्य कृतं यद्भूत्तु दृष्टुं त्वां वाक्यतः प्रभो ॥

श्रीकृष्ण उवाच ।

...द्य दानवमर्दं प्रसाद्यमुमलोचनः ।

...नामा यदिदेवः सत्राजित्प्रिया पतन् ॥

...जित् करणं श्रीमत् सनयौनिव सन्ततम् ।

...य देवसदनं मणिं विभ्रद्विगयत् ॥

...दिने स्वर्णभारानष्टौ स सृजति प्रभो ।

...रिस्माद्वरिष्टानि सर्वाधिव्याधयोऽस्मभाः ॥

...नि साविनस्तव यदास्तेऽर्थसिनी मणिः ।

...र्थितो मणिं तापि यदुराजाय शौरिणा ।

...मिकामुकः प्रादात् यादवाभङ्गमतकथन् ॥

...दा मणिं कण्ठे प्रतिमुच्य महाप्रभम् ।

...रो दृष्टमारुह्य मृगयां व्यचरद् वने ॥

...र्वं मदयं हत्वा मणिमाच्छिद्य केसरी ।

...र्वं विगन् जाम्बवता निहतो मणिमिच्छता ॥

...पि सर्वं कुमारस्य मणिं क्रीडनकं गले ।

...न् भ्रातरं भ्राता सत्राजित् पर्यतप्यत ॥

...कणेन निहतो मणिग्रावा वनं गतः ।

...ना समेति तत् श्रुत्वा कर्णे कर्णेऽजपन् जनाः ॥

...स्तदुपश्रुत्य दुर्यशो लिप्तमात्मनि ।

...र्दं प्रसेनपदवीमन्वपद्यत नागरैः ॥

...नं प्रसेनमश्वञ्च दोष्य केसरिणा वने ।

...रिदृष्टे निहतस्तेन दद्दृशुर्जनाः ॥

...जराजविलं भीममन्धेन तमसावृतम् ।

...को विवेश भगवानवस्थाप्य बहिः प्रजाः ॥

...दृष्ट्वा मणिश्रेष्ठं बालक्रीडनकं कृतम् ।

...ं हर्तुं कृतमतिस्तस्मिन्नवतस्थेऽर्भकान्तिके ॥

...अद्भुत मम दृष्ट्वा यथा पुर्वेण भ्रष्टम् ।

...तत् ...तस्मात् ... दर्शिता

यशः ॥

[illegible] सप्तर्षि कालिकालनः ।

[illegible] मूर्ति ।

[illegible] ।

[illegible] यातः मया वीर्य, दर्शयन् ।

[illegible] ॥

इति [illegible] ।

[illegible] ॥

[illegible] ।

[illegible] ॥

[illegible] ।

[illegible] ॥

[illegible] सर्वोविधो ।

[illegible] मणिं तस्मैन्द्रमर्पयत् ॥

[illegible] ।

[illegible] कथम् ॥

एवं व्यवसितो बुद्धा सत्राजित् स्वसुतां शुभाम् ।

मणिञ्च स्वयमुद्यम्य कृष्णायोपजहार सः ॥

भगवानाह न मणिं प्रतीच्छामो वयं नृप ।

तवास्तु देवभक्तस्य वयञ्च फलभागिनः ॥"

इति भागवते १० स्कन्धे ५६ अध्यायः ॥

भीष्मभाद्रीयचतुर्थ्यां चन्द्रदर्शने तदुपाख्यानश्रवण-विधिर्यथा, ब्रह्मपुराणे शिवार्काधिकारे ।

"नारायणोऽभिशापस्तु निशाकरमरीचिषु ।

सितचतुर्थ्यांस्थापि मनुष्यायापतेश्च सः ॥

यतदनुयां यन्त्रन् प्रमादाद्वेषा मानवः ।

पठेदावेयिकाख्यानं प्राप्नुयो वाप्युदत्पुषः ॥"

अभिशापः परीवादविषयाभृतः । सोऽभिशापः ।

आर्घविद्याखंदं विष्णुपुराणे ।

"सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः ।

सुकुमारक मारोदीस्तव ह्येष स्यमन्तकः ॥"

अनेन मन्त्रेणाभिमन्त्रितं जलं पेयम् । आचारात् स्यमन्तकोपाख्यानञ्च श्रोतव्यम् । इति तिथ्यादितत्त्वम् ॥

स्यमीकः, पुं. (स्यमतीति । स्यमु शब्दे + "स्यमि-राट् च ।" उणा॰ ३।४६। इति कन् । ईट् च ।) वल्मीकम् । वृक्षविशेषः । इति मेदिनी ॥ कालः । मेघः । इति केचित् ॥

स्यमीका, स्त्री, नीलिका । इति मेदिनी ॥

स्यालः, पुं श्यालकः । इत्यमरटीकायां स्वामी । २ । ६ । ३२ ॥ (यथा कथासरित्सागरे ।४।८६ ।

"अतः स्यालः स ते किञ्चित् त्वद्गुणैः सम-वाप्यते ॥")

स्युन्नं, क्ली, आह्लादः । इति केचित् ॥

स्यूतः, त्रि, (षिव्यु तन्तुसन्ताने + क्तः । च्छ्वोरि-त्यूट् ।) सूचितः । तन्तुसन्ततम् । वोना इति भाषा ॥ तत्पर्य्यायः । ऊतम् २ उतम् ३ । इत्य-मरः ॥ (यथा, महाभारते । ३ । १५७ । ४२ ।

"जडिमोऽयं त्वया ग्रस्तः कालसूत्रेण लम्बितः ।

मत्स्योऽम्भसीव स्यूतास्यः कथमद्य भविष्यसि ॥")

स्यूतः, पुं (सिव + क्तः ।) प्रसेवितभाण्डम् । थोलङ्गा इति ख्यातम् । तत्पर्य्यायः । प्रसेवः २ । इत्यमरः । २ । ६ । २६ । स्यूनः ३ स्योनः ४ धौतकटः ५ स्योमः ६ । इति भरतः ॥

स्यूतिः, स्त्री, (सिव + क्तिन् । ऊट् ।) सूच्यादिना वस्त्रादिसीवनम् । सेलाइ इति सेलाइ इति च भाषा । तत्पर्य्यायः । सेवनम् २ सीवनम् ३ । इत्यमरः । ३ । २ । ५ ॥ ऊतिः ४ स्यूतिः ५ । इति शब्दरत्नावली ॥

स्यूनः, पुं. (साध्यते इव येनेति । सिव + "सिविटे-र्थ्वे च ।" उणा॰ ३ । ८ । इति नः । टेर्यू च ।) किरणः । सूर्यः । इति मेदिनी ॥ स्यूतः । धुकड़ी इति भाषा । इत्यमरटीकायां भरतः । २ । ८ । २६ ॥ शब्दरत्नावली च ॥

स्यूमं, क्ली, (सिव + "अर्त्तिस्तुसुहुसृधृक्षिक्षुभा-यावापदियक्षिनीभ्यो मन् ।" उणा॰ १ । १४३ । इति मन् । ज्वरत्व-रेत्यूट् ।) जलम् । रश्मिः । इति संक्षिप्तसारो-णादिवृत्तिः ॥

स्यूमः, पुं. (सिव + मन् । ऊट् ।) किरणः । इत्युणादिकोषः ॥

स्योतः, पुं, स्यूतः । इत्यमरटीकायां भरतः । २ । ८ । २६ ॥

स्योनः, पुं, (सिव + बाहुलकात् केवलोऽपि नः ऊडादेशो गुणश्च । इत्युणादिवृत्तौ उज्ज्वलः । ३ । ८ ।) धौतकटः । धुकड़ी इति भाषा ॥ इत्यमरटीकायां भरतः । २ । ८ । २६ ॥ सूर्यः । किरणः । इति मेदिनी ॥ आनन्दे, क्ली । इति केचित् ॥

स्रंसनं, क्ली, (स्रंस + ल्युट् ।) कोष्ठगतदोषस्याधो-नयनम् । इति सुश्रुतटीका ॥ (यथा, सुश्रुते । ६ । १० ।

"पित्तस्यन्दे पैत्तिके चाधिमन्थे

रक्तास्रावः स्रंसनञ्चापि कार्य्यम् ॥"

अधःपतनम् । भ्रंशः । इति स्रंसधात्वर्थदर्श-नात् ॥ * ॥ स्रंसयतीति । स्रंस + णिच् + ल्युः । अधःपतनकारके, त्रि । यथा, सुश्रुते । १ । ४६ ।

"स्रंसनं कटुकं पाके लघुवातकफापहम् ॥")

स्रंसिनीफलः, पुं, शिरीषवृक्षः । इति शब्दमाला ॥

स्रंसी, [न्] पुं. (स्रंसते इति । स्रंस + णिनिः ।) पीलुवृक्षः । इत्यमरः । २ । ४ । २८ ॥ अधः-पतनशीले, त्रि ॥

स्रक, इ ङ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा॰-आत्म॰-सक॰-सेट् ।) इ, स्रङ्कते । ङ, स्रङ्कते । इति दुर्गादासः ॥

स्रक्, [ज्] } स्त्री,(सृजति शोभामिति सृज्यते
स्रग्, [ज्] } इति वा । सृज + ऋत्विगादिना कर्त्तरि कर्म्मणि वा क्विन् ।) माल्यम् । मूर्ध्नि न्यस्तपुष्पदाम । इत्यमरः । २ । ६ । १३५ ॥ (यथा, मनुः । ४ । ६६ ।

"उपानहौ च वासश्च धृतमन्यैर्न धारयेत् ।

उपवीतमलङ्कारं स्रजं करकमेव च ।")

अस्याः पर्य्यायादि मालाशब्दे द्रष्टव्यम् ॥

मन्यच ।
"अनुभूतं प्रियादिनामर्थानां चिन्तनं स्मृतिः ।
तत्र कम्पाङ्गवैवर्ण्यश्वासनिश्वसितादयः ॥"
इत्युज्ज्वलनीलमणिः ॥
तत्पर्य्यायः । चिन्ता २ आध्यानम् ३ । इत्यमरः । १ । ७ । २८ ॥ चिन्तिया ४ । इति भरतधृतरभसः ॥ चिन्तः ५ । इति क्षीरस्वामी ॥ आध्या ६ । इति रामाश्रमः ॥ चिन्तितिः ७ ध्यानम् ८ । इति शब्दरत्नावली ॥ स्मरणम् ९ चर्चा १० । इति जटाधरः ॥ सा तु गर्भस्थस्य अष्टभिर्मासैर्भवति । इति सुखबोधः ॥ * ॥
स्मृतिकारकौषधं यथा,—
"शङ्खपुष्पी वचा सोमा ब्राह्मी ब्रह्मसुवर्चला ।
अभया च गुडूची च अटरूषकवाकुची ॥
एतैरक्षसमैर्भागैर्घृतं प्रस्थं विपाचयेत् ।
कण्टकार्य्या रसं प्रस्थं बृहत्या च समन्वितम् ॥
एतद्ब्राह्मीघृतं नाम स्मृतिमेधाकरं परम् ॥"
इति गारुडे १९८ अध्यायः ॥ * ॥
मन्वादिमुनिप्रणीतशास्त्रविशेषः । स्मरन्ति वेदमनया स्मृतिः । महर्षिभिर्वेदार्थचिन्तनं स्मृतिः । तद्योगात् ग्रन्थोऽपि स्मृतिरिति मुकुटः । स्मृतिकर्तॄणां नामानि धर्म्मशास्त्रशब्दे द्रष्टव्यानि । तत्र मनोः स्मृतेः प्राधान्यम् । यथा,—
"वेदार्थोपनिबन्धृत्वात् प्राधान्यं हि मनोः स्मृतम् ।
मन्वर्थविपरीता तु या स्मृतिः सा न शस्यते ॥"
इतिकुल्लूकभट्टधृतबृहस्पतिवचनम् ॥
तत्पर्य्यायः । धर्म्मसंहिता २ । इत्यमरः । १ । ६ । ६ ॥ धर्म्मशास्त्रम् ३ । इति जटाधरः ॥ संहिता ४ श्रुतिजीविका ५ । इति शब्दरत्नावली ॥ सा च सात्त्विकराजसतामसभेदेन त्रिविधः । यथा,—
"तथैव स्मृतयः प्रोक्ता ऋषिभिस्त्रिगुणान्विताः ।
सात्त्विका राजसाश्चैव तामसाः शुभदर्शने ॥
वाशिष्ठं चैव हारीतं व्यासं पाराशरं तथा ।
भारद्वाजं काश्यपञ्च सात्त्विका मुक्तिदाः शुभाः ॥
याज्ञवल्क्यं याज्ञवल्क्यञ्च आत्रेयं दाक्षमेव च ।
कात्यायनं वैष्णवञ्च राजसाः स्वर्गदा मताः ॥
गौतमं बार्हस्पत्यञ्च संवर्त्तञ्च यमं स्मृतम् ।
सांख्यं चौशनसं देवि तामसा निरयप्रदाः ॥
किमत्र बहुनोक्तेन पुराणेषु स्मृतिष्वपि ।
तामसा नरकायैव वर्जयेत्तान् विचक्षणः ॥
अतो हि राजसं कर्म्म तामसञ्च वरानने ।
प्राणान्ते नैव कुर्व्वीत विवेकी तत्त्वविस्तरः ॥
... न तु सात्त्विकं कर्म्म यथासाधारणं हरेः ।
...राजसं कार्य्यं मानसैस्तामसं न तु ॥
... [illegible] ...रागेष्वागमेषु च ।
... [illegible] ...न्ते यामलादिषु ।
... [illegible] ...भतः ॥"
... [illegible] ...णे ४३ अध्यायः ॥

स्मृतिमान्, [त्] त्रि, (स्मृतिर्व्विद्यतेऽस्येति । स्मृति+मतुप् ।) स्मृतिविशिष्टः । चिन्तावान् । (यथा, मनुः । ७ । ६४ ।
"अनुरक्तः शुचिर्दक्षः स्मृतिमान् देशकालवित् ।
वपुष्मान् वीतभीर्व्वाग्मी दूतो राज्ञः प्रशस्यते ॥")
स्मृतिविरुद्धः, त्रि, (स्मृतेर्व्विरुद्धः ।) धर्म्मशास्त्रविपरीतः । यथा, कूर्म्मपुराणे हिमालयं प्रति देवीवाक्यम् ।
"यानि शास्त्राणि दृश्यन्ते लोकेऽस्मिन् विविधानि च ।
श्रुतिस्मृतिविरुद्धानि निष्ठा तेषां हि तामसी ॥
करालभैरवञ्चैव यामलं वाम यत् कृतम् ।
एवमादीनि चान्यानि मोहनार्थानि तानि वै ॥
मया सृष्टानि चान्यानि मोहायैषां भवार्णवे ॥"
इति मलमासतत्त्वम् ॥
स्मृतिशास्त्रं, क्ली, (स्मृतिरेव शास्त्रम् ।) धर्म्मसंहिता । यथा, एकादशीतत्त्वधृतभविष्यपुराणवचनम् ॥
"स्मृतिशास्त्रे विकल्पस्तु आकाङ्क्षापूरणे सति ॥"
स्मृतिहेतुः, पुं, (स्मृतेर्हेतुः ।) स्मरणकारणम् । तत्पर्य्यायः । वासना २ संस्कारः ३ भावना ४ । इति जटाधरः ॥
स्मृत्यपेतः, त्रि, (स्मृतेरपेतः ।) स्मृतिविरुद्धः । इति केचित् ॥
स्मेरः, त्रि, (स्मि ङ ईषद्धसने+"नमिकम्पिस्म्यजसकमहिंसदीपो रः ।" ३ । २ । १६७ । इति रः ।) विकशितः । इति हेमचन्द्रः ॥ (यथा, साहित्यदर्पणे । ३ । १०० ।
"कान्तिः काञ्चनचम्पकप्रतिनिधिर्व्वाणी सुधास्यन्दिनी ॥
स्मेरेन्दीवरदामसोदरवपुस्तस्याः कटाक्षच्छटा ॥")
ईषद्धसनशीलः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (यथा, कुमारे । ५ । ७० ।
"इयञ्च तेऽन्या पुरतो विडम्बना
यदूढया वारणराजहार्य्यया ।
विलोक्य वृद्धोक्षमधिष्ठितं त्वया
महाजनः स्मेरमुखो भविष्यति ॥")
स्मेरविष्किरः, पुं, (स्मेरः प्रफुल्लः विष्किरः पक्षी ।) मयूरः । इति केचित् ॥
स्यदः, पुं, (स्यन्द+घञ् । "स्यदो जवे ।" ६ । ४ । २८ । इति निपातनात् साधुः ।) वेगः । इत्यमरः । १ । १ । ६० ॥
स्यन्द, ऋ ङ व ल स्रुतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आ०-सक०-वेट् ।) अन्तःस्थाद्ययुक्तः । ऋ, असस्यन्दिष्ट असस्यन्त । ङ, स्यन्दते । व, स्यन्त्स्यति स्यन्दिष्यति । ल, अस्यदत् । स्रुतिः क्षरणम् । प्रस्यन्दस्यादगात्स्वस्थमध्युपेत्यत्र गणकृतानित्यत्वमिति रमानाथः । वस्तुतस्तु प्रस्यन्दने प्रस्यन्दः पचादित्वादच् ततः प्रस्यन्द इवाचरतीति क्विप् शत्रन्तम् । इति दुर्गादासः ॥
स्यन्दः, पुं, स्यन्दनम् । स्यन्दधातोर्घञ् प्रत्ययेन निष्पन्नः ॥ (यथा, राजतरङ्गिण्याम् । ६ । २४ ।
"तदमन्दमस्यन्दसुन्दरं निपीयताम् ।
श्रोत्रशुक्तिपुटैः स्पष्टमङ्गराजतरङ्गिणी ॥"
रोगविशेषः । यथा, सुश्रुते । २ । ४६ ।
... [illegible] ...
स्वेदोद्गमः । इति श्रीधरस्वामी ॥ यथा, भागवते । ५ । ११ । ८ ।
"यत्रोदिते तस्य समानसूत्रनिपाते ...
यत्र क्वचन स्यन्देनाभितपतीति ॥")
स्यन्दनं, क्ली, (स्यन्द+ल्युट् ।) क्षरणम् । इति । स्यन्द+"बहुलमन्यत्रापि ।" ७८ । इति युच् ।) जलम् । इति गमनञ्च ॥
स्यन्दनः, पुं, (स्यन्दते चलतीति । स्यन्द+ युच् ।) युद्धप्रयोजनयानम् । रथ इति (यथा, रघुः । १ । ३६ ।
... [illegible] ...
प्रावृषेण्यं पयोवाहं विद्युदैरावताविव ॥")
तिनिशवृक्षः । इत्यमरः । २।४।२६ ॥ ... विशेषः । इति हेमचन्द्रः ॥ वायुः । इति केचित् ॥ शीघ्रे, त्रि ॥ (स्यन्दके, च । यथा, कथासरित्सागरे । १०३ । ६२ ।
"यद्वैः परिवृतं चन्द्रमवतीर्णमिवाम्बरात् ।
रूपोपमानमन्येषाममृतस्यन्दनं दृशोः ॥")
स्यन्दनद्रुमः, पुं, (स्यन्दन एव द्रुमः ।) वृक्षः । इति शब्दरत्नावली ॥
स्यन्दनारोहः, पुं, (स्यन्दनमारोहतीति । रुह+अण् ।) रथस्थितयोद्धा । रथी । इत्यमरः । २ । ८ । ६० ॥
स्यन्दनिः, पुं, तिनिशवृक्षः । इति रत्नमाला ॥
स्यन्दनी, स्त्री, (स्यन्दते इति । स्यन्द+ ङीप् ।) लाला । इति राजनिर्घण्टः ॥ नाड़ीति केचित् ॥
स्यन्दिनी, स्त्री, (स्यन्दते इति । स्यन्द+ ङीप् ।) लाला । इत्यमरः । २ । ६ । ६७ ॥
स्यन्दी, [न्] त्रि, स्रवति यः । स्रावकः । धातोर्णिन्प्रत्ययेन निष्पन्नः । इति रामाश्रमः ॥ (यथा, उत्तररामचरिते १
"जीवयन्निव समाध्वसश्रम-
स्वेदबिन्दुरधिकण्ठमर्प्यताम् ।
बाहुरैन्दवमयूखचुम्बित-
स्यन्दिचन्द्रमणिहारविभ्रमः ॥")
स्यन्नः, त्रि, (स्यन्द+क्तः ।) स्रुतः । ३ । १ । ८२ ॥ (यथा, भट्टिः । ५ । ८३ ।
"सरायास्यन् कषायाक्षः ...
स्यन्दिताम्रतराकृतस्वामवादीत्समानगः ॥")
स्यमीकः, त्रि, (स्यमा वीणा यत्र ।) इति हेमचन्द्रः ॥
स्यम, उ ण श ध्वनने । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-सेट् क्वावेट् ।) दन्त्यादियुक्तः । उ, स्यमित्वा स्यान्त्वा । ण, स्यमितः स्यमतुः । श, स्यमती स्यमन्ती । इति दुर्गादासः ॥

[illegible]

आसद उवाच ।

[illegible]

:राव [illegible] गोविन्द यदुनन्दन ॥
याति सविता त्वां दिदृक्षुर्जगत्पते ।
शाखिलपङ्क्तीन नृणां चक्षूंषि तिग्मगु: ॥
न्वन्ति ते मार्गं विलीनं त्रिपुरर्षभा: ।
द्र गूढं यदुषु दृष्ट्वा त्वां यात्यज: प्रभो ॥
श्रासद उवाच ।
र बालवचनं प्रहस्याम्बुजलोचन: ।
हाता रविर्देव: सत्राजिन्मणिना ज्वलन् ॥
जित् स्वगृहं श्रीमत् कृतकौतुकमङ्गलम् ।
र देवसदने मणिं विप्रैर्न्यवेशयत् ॥
दिने स्वर्णभारानष्टौ स सृजति प्रभो ।
समार्तिरिष्टानि सर्पाधिव्याधयोऽशुभा: ॥
न मायिनस्तत्र यत्रास्तेऽभ्यर्चितो मणि: ।
चितो मणिं क्वापि यदुराजाय शौरिणा ।
कामुक: प्रादात् याच्ञाभङ्गमतर्कयन् ॥
दा मणिं कण्ठे प्रतिमुच्य महाप्रभम् ।
। हयमारुह्य मृगयां व्यचरद् वने ॥
मश्वं हत्वा मणिमाच्छिद्य केशरी ।
विशन् जाम्बवता निहतो मणिमिच्छता ॥
पि चक्रे कुमारस्य मणिं क्रीड़नकं गले ।
यन् भ्रातरं भ्राता सत्राजित् पर्य्यतप्यत ॥
कृष्णेन निहतो मणिग्रीवो वनं गत: ।
ा ममेति तत् श्रुत्वा कर्णे कर्णेऽजपन् जना: ॥
ांस्तदुपश्रुत्य दुर्यशो लिप्तमात्मनि ।
ई प्रसेनपदवीमन्वपद्यत नागरै: ॥
प्रसेनमश्वञ्च वोच्य केशरिणा वने ।
ाद्रिपृष्ठे निहतमृक्षेण ददृशुर्जना: ॥
राजविलं भीममन्धेन तमसावृतम् ।
ो विविश भगवानवस्थाप्य बहि: प्रजा: ॥
दृष्ट्वा मणिश्रेष्ठं बालक्रीड़नकं कृतम् ।
ो कृतमतिस्तस्मिन्नवतस्थेऽर्भकान्तिके ॥

[illegible]

तस्य [illegible] ॥

[illegible]

सत्राजितं समाहूय सभायां राजसन्निधौ ।
प्राप्तिञ्चाख्याय भगवान् मणिं तस्मै न्यवेदयत् ॥
[illegible]
[illegible]
पदं व्यवसितो हुत्वा सत्राजित् स्वसुतां शुभाम् ।
मणिञ्च स्वयमुद्यम्य कृष्णायोपजहार स: ॥
भगवानाह न मणिं प्रतीच्छामो वयं नृप ।
तवास्तु देवभक्तस्य वयञ्च फलभागिन: ॥”
इति भागवते १० स्कन्धे ५६ अध्याय: ॥
भाद्रचतुर्थ्यां चन्द्रदर्शने तदुपाख्यानश्रवण-
विधिर्यथा, ब्रह्मपुराणे सिंहार्काधिकारे ।
“नारायणोऽभिशप्तस्तु निशाकरसरोषितु ।
स्थितवतुर्थ्यादापि मनुष्यायावतेश स: ॥
चतुर्थ्यां चन्द्रस्य प्रमादाद्दृष्ट्वा मानव: ।
पठेद्वायवियकावाक्यं प्राप्नुयो वाप्युदघु.व: ॥”
अभिशाप: परीवादविषयीभूत: । सोऽभिशाप: ।
धात्रेयिकावाक्यं विष्णुपुराणे ।
“सिंह: प्रसेनमवधीत् सिंहो जाम्बवता हत: ।
सुकुमारक मारोदीस्तव ह्येष स्यमन्तक: ॥”
अनेन मन्त्रेणाभिमन्त्रितं जलं पेयम् । आचारात्
स्यमन्तकोपाख्यानञ्च श्रोतव्यम् । इति तिथ्यादि-
तत्त्वम् ॥

स्यमीक:, पुं, (स्यमतीति । स्यमु शब्दे+“स्यमे-
रीट् च ।” उणा० ३।४६। इति कन् । ईट् च ।)
वल्मीकम् । वृक्षविशेष: । इति मेदिनी ॥
काल: । मेघ: । इति केचित् ॥

स्यमीका, स्त्री, नीलिका । इति मेदिनी ॥

स्याल:, पुं, श्यालक: । इत्यमरटीकायां स्वामी ।
२ । ६ । ३२ ॥ (यथा कथासरित्सागरे ।४।८६ ।
“अत: स्याल: स ते किञ्चित् त्वद्गुणै: सम-
वाप्यते ॥”)

स्युजं, क्ली, आह्लाद: । इति केचित् ॥

स्यूत:, त्रि, (षिवु तन्तुसन्ताने+क्त: । च्छ्वो: शू-
ठ् ।) सूचित: । तन्तुसन्ततम् । वोना इति
भाषा ॥ तत्पर्य्याय: । ऊतम् २ उतम् ३ । इत्य-
मर: ॥ (यथा, महाभारते । ३ । १५७ । ४२ ।
“वड़िशोऽयं त्वया ग्रस्त: कालसूत्रेण लम्बित: ।
मत्स्योऽम्भसीव स्यूतास्य: कथमद्य भविष्यसि ॥”)

स्यूत:, पुं (सिव+क्त: ।) सूत्रग्रथितभाण्डम् ।
धोकड़ा इति ख्यातम् । तत्पर्य्याय: । प्रसेव: २ ।
इत्यमर: । २ । ८ । २६ । स्यून: ३ स्योन: ४
धौतकट: ५ स्योत: ६ । इति भरत: ॥

स्यूति:, स्त्री, (सिव+क्तिन् । ऊठ् ।) सूच्यादिना
वस्त्रादिसीवनम् । सीयनी इति सेलाइ इति च
भाषा । तत्पर्य्याय: । सेवनम् २ सीवनम् ३ ।
इत्यमर: । ३ । २ । ५ ॥ ऊति: ४ व्यूति: ५ ।
इति शब्दरत्नावली ॥

स्यून:, पुं, (सीव्यते इव येनेति । सिव+“सिविटे-
र्यूच ।” उणा० ३ । ८ । इति न: । टेर्यू च ।)
किरण: । सूर्य्य: । इति मेदिनी ॥ स्यूत: ।
धुकड़ी इति भाषा । इत्यमरटीकायां भरत: ।
२ । ८ । २६ ॥ शब्दरत्नावली च ॥

स्यूमं, क्ली, (सिव+“अर्त्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्य: मन्” ... “षिविसिधिसिनुपिश्य:
कित् ।” उणा० १ । १४३ । इति मन् । च्छ्वो:
शूठ् ।) जलम् । रश्मि: । इति संक्षिप्तसारो-
णादिवृत्ति: ॥

स्यूम:, पुं, (सिव+मन् । ऊठ् ।) किरण: ।
इत्युणादिकोष: ॥

स्योत:, पुं, स्यूत: । इत्यमरटीकायां भरत: । २ ।
८ । २६ ॥

स्योन:, पुं, (सिव+बाहुलकात् केवलोऽपि न:
ऊड़ादेशो गुणश्च । इत्युणादिवृत्तौ उज्ज्वल: ।
१ । ८१ ।) धौतकट: । धुकड़ी इति भाषा ॥
इत्यमरटीकायां भरत: । २ । ८ । २६ ॥ सूर्य्य: ।
किरण: । इति मेदिनी ॥ आनन्दे, क्ली । इति
केचित् ॥

स्रंसनं, क्ली, (स्रंस+ल्युट् ।) कोष्ठगतदोषस्याधो-
नयनम् । इति सुश्रुतटीका ॥ (यथा, सुश्रुते ।
६ । १० ।
“पित्तस्यन्दे पैत्तिके चाधिमन्थे
रक्तास्रावः स्रंसनञ्चापि कार्य्यम् ॥”
अध:पतनम् । भ्रंश: । इति स्रंसधात्वर्थदर्श-
नात् ॥ * ॥ स्रंसयतीति । स्रंस+णिच्+ल्यु: ।
अध:पतनकारके, त्रि । यथा, सुश्रुते । १ ।४६ ।
“स्रंसनं कटुकं पाके लघुवातकफापहम् ॥”)

स्रंसिनीफल:, पुं, शिरीषवृक्ष: । इति शब्दमाला ॥

स्रंसी, [न्] पुं, (स्रंसते इति । स्रंस+णिनि: ।)
पीलुवृक्ष: । इत्यमर: । २ । ४ । २८ ॥ अध:-
पतनशीले, त्रि ॥

स्रक, ङ ङ गत्याम् । इति कविकल्पद्रुम: ॥ (भ्वा०-
आत्म०-सक०-सेट् ।) ङ, स्रङ्कते । ङ, स्रङ्कते ।
इति दुर्गादास: ॥

स्रक्, [ज्] } स्त्री,(सृजति शोभामिति सृज्यते
स्रग्, [ज्] } इति वा । सृज+ऋत्विगादिना
कर्त्तरि कर्म्मणि वा क्विन् ।) माल्यम् । मूर्ध्नि
न्यस्तपुष्पदाम । इत्यमर: । २ । ६ । १३५ ॥
(यथा, मनु: । ४ । ६६ ।
“उपानहौ च वासश्च धृतमन्यैर्न [illegible]त ।
उपवीतमलङ्कारं स्रजं करकमेव [illegible] ॥”)
अस्या: पर्य्यायादि मालाशब्दे [illegible]म् ॥

स्वकर्म्म, [न्] क्ली, (स्वस्य कर्म्म ।) आत्मकृत-कार्य्यम् । यथा,—

कुन्त्युवाच ।
"स्वकर्म्मफलनिर्द्दिष्टां यां यां योनिं व्रजाम्यहम् ।
तस्यां तस्यां हृषीकेश त्वयि भक्तिर्दृढास्तु मे ॥"
इति पाण्डवगीता ॥

स्वकर्म्मकृत्, त्रि, निजकार्य्यकारी । इति स्वकर्म्म-शब्द-पूर्व्वक-कृधातोः कर्त्तरि क्विप्-प्रत्ययेन निष्पन्नः ॥

स्वकीयः, त्रि, (स्वस्यायमिति । गहादिषु स्वस्य चेति छः कुगागमश्च ।) स्वीयः । तत्पर्य्यायः । निजः २ आत्मीयः ३ स्वः ४ । इति हेमचन्द्रः ॥

स्वकुलक्षयः, पुं, (स्वकुलस्य क्षयो यस्मात् ।) मत्स्यः । इति हेमचन्द्रः ॥ निजवंशनाशश्च । तत्कर्त्तरि तद्विशिष्टे च त्रि ॥

स्वग, इ सर्पणे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) वकारमध्यः । इ, स्वङ्गते । इति दुर्गादासः ॥

स्वगतं, क्ली, (स्वगतम् ।) मनोगतम् । (तत्तु नाट्योक्तीनामन्यतमम् । तल्लक्षणं यथा, साहित्य-दर्पणे । ६ । ४२५ ।
"अश्राव्यं खलु यद्वस्तु तदिह स्वगतं मतम् ॥")
यथा । अहम् । स्वगतम् । इभयाद्धोऽयं देशः । भवत्विमासने उपविशामि । इति प्रबोध-चन्द्रोदयनाटके २ अङ्कः ॥ आत्मगामे तदाश्रिते च त्रि ॥

स्वगुप्ता, स्त्री, (स्वेन गुप्ता ।) शूकशिम्बी । इति शब्दरत्नावली ॥ लज्जालुः । इति राजनिर्घण्टः ॥

स्वगृहः, पुं, (स्वकृतं गृहं यस्य ।) कलिकारपक्षी इति जटाधरः ॥ निजालये, पुं, क्ली ॥

स्वङ्गः, त्रि, (सु शोभनानि अङ्गानि यस्य ।) सुन्दराङ्गविशिष्टः । तत्पर्य्यायः । सिंहसंहननः २ । इति हेमचन्द्रः ॥ (सु शोभनमङ्गमिति ।) शोभनावयवे, क्ली ॥

स्वच्छं, क्ली, (सुष्ठु अच्छम् ।) विमलोपरसः । मुक्ता । इति राजनिर्घण्टः ॥

स्वच्छः, त्रि, (सुष्ठु अच्छः ।) रोगविमुक्तः । इति शब्दरत्नावली ॥ शुक्लः । निर्म्मलः । इति [illegible]चित् ॥ (यथा, महानिर्व्वाणतन्त्रे । ८ । ८१ ।
"[illegible]मनं वमनं पानं शय्या यानं निकेतनम् ।
[illegible]कं वस्तुजातञ्च स्वच्छात् स्वच्छं प्रशस्यते ॥"
[illegible]तादिदोषशून्यः । यथा, तत्रैव । ८ । ४३ ।
[illegible]द्दो मन्त्रः सुविद्वांश्च गुरुः स्यात् सर्व्व-कर्म्मसु ॥")

[illegible] पुं, (सुष्ठु अच्छः निर्म्मलः ।) स्फटिकः । [illegible]जनिर्घण्टः ॥

[illegible] त्रि, (स्वस्य छन्दोऽभिप्रायो यत्र ।) [illegible] । स्वैरः । इत्यमरः । ३ । १ । १५ ॥ [illegible]कथामरित्सागरे । २३ । १८५ ।
[illegible]णो न ते राजन् [illegible]
[illegible] ॥"
[illegible]

"बुभुक्षा वा पिपासा वा ग्लानिर्वाप्यथवा जरा ।
देववद्धारयन्त्यास्ते स्वच्छन्दो न भविष्यति ॥")

स्वच्छपत्रं, क्ली (स्वच्छं पत्रं यस्य ।) अभ्रकम् । इति हेमचन्द्रः ॥

स्वच्छमणिः, पुं, (स्वच्छो मणिः ।) स्फटिकः । इति राजनिर्घण्टः ॥

स्वच्छवालुकं, क्ली, (स्वच्छं वालुकम् ।) विमलो-परसः । इति राजनिर्घण्टः ॥

स्वच्छा, स्त्री, (सुष्ठु अच्छा ।) श्वेतदूर्व्वा । इति राजनिर्घण्टः ॥

स्वजं, क्ली, (स्वस्मात् जायते इति । जन+डः ।) रक्तम् । इति मेदिनी ॥

स्वजः, पुं, (स्वस्मात् जायते इति । जन+डः ।) पुत्रः । स्वेदः । इति मेदिनी ॥ त्रि, आत्मजातः ॥ (स्वाभाविकः । यथा, रामायणे । ७ । १२ । १६ ।
"आगता त्वामियं बुद्धिः स्वजा वैनयिकी च या ।
भृशमुत्सहसे तात रचितुं पृथिवीमपि ॥")

स्वजनः, पुं, (स्वस्य जनः ।) ज्ञातिः । इत्यमरः । २ । ६ । ३४ ॥ आत्मीयलोकश्च ॥ (यथा, कुमारे । ४ । २६ ।
"स्वजनस्य हि दुःखमग्रतो
विवृतद्वारमिवोपजायते ॥")

स्वजा, स्त्री, (स्वस्मात् जायते या । जन+डः । टाप् ।) कन्या । इति शब्दरत्नावली ॥

स्वठ, क गत्यसंस्कृतसंस्कृतेषु । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट्) । क, स्वाठयति । इति दुर्गादासः ॥

स्वतः [स्] व्य, (स्व+तसिल् ।) आत्मन । आपन हइते इति भाषा । यथा । मृतोऽङ्गमरणं स्वत । इत्यमरः । १ । १० । ११ ॥ (यथा, रघुः । २ । ५८ ।
"भतिप्रबन्धप्रहितास्त्रवृष्टिभि-
स्तमाश्रयं दुष्प्रसहस्य तेजसः ।
शशाक निर्व्वापयितुं न वासवः
स्वतश्च्युतं वह्निमिवाद्भिरम्बुदः ॥"
धनात् । यथा, मनुः । ८ । १६६ ।
"ग्रहीता यदि नष्टः स्यात् कुटुम्बार्थे कृतोऽव्ययः ।
दातव्यं बान्धवैस्तत् स्यात् प्रविभक्तैरपि स्वतः ॥")
अस्य अव्ययत्वप्रमाणं यथा । तद्धितश्चासर्व्व-विभक्तिः । यस्मात् सर्व्वा विभक्तिर्नोत्पद्यते स तद्धितान्तोऽव्ययं स्यात् । परिगणनं कर्त्तव्यम् । तसिलादयः प्राक् पाशपः । इति सिद्धान्त-कौमुदी ।

स्वतन्त्रः, त्रि, (स्वस्य तन्त्रं प्राधान्यं यत्र ।) स्वाधीनः । तत्पर्य्यायः । अपावृतः २ स्वैरी ३ स्वच्छन्दः ४ निरवग्रहः ५ । इत्यमरः । ३ । १ । १५ ॥ निर्य्यन्त्रणः ६ यथाकामी ७ निर-ङ्कुशः ८ । इति जटाधरः ॥ निर्गलः ९ [illegible] स्ववशिः १० । इति हेमचन्द्रः ॥ स्वतन्त्रास्वतन्त्र-[illegible] यथा, नारदः ।
"[illegible] गुरवस्ततम् ।

अस्वतन्त्राः प्रजाः [illegible]
अस्वतन्त्रः स्मृतः शिष्य [illegible]
अस्वतन्त्राः स्त्रियः सर्व [illegible]

परिग्रहा अनुजीविभृत [illegible]
"स्वतन्त्रस्तत्र तु गृही य [illegible]

गर्भस्थैः सदृशो ज्ञेयो अष्टम [illegible]
वान् प्रापोडशाद्वर्षात् पौग [illegible]
परतो व्यवहारज्ञः स्वतन्त्रः [illegible]
जीवतोर्न स्वतन्त्रः स्यात् जर [illegible]
तयोरपि पिता श्रेयान् बीजप्र [illegible]
अभावे बीजिनो माता तदभा [illegible]
स्वतन्त्रोऽपि हि यत् कार्य्यं कुर्य [illegible]

तदप्यकृतमेव स्यादस्वातन्त्र्यस्य [illegible]
इति व्यव [illegible]

स्वदः, पुं, अन्धः । इति केचित् ॥

स्वत्वं, क्ली, (स्वस्य भावः । स्व+त्व [illegible]) सम्मतयथेष्टविनियोगार्हत्वम् । अस [illegible] रिक्तपदार्थः । निरूपकतासम्बन्धेन स [illegible] यथा । स्वत्वञ्च यथेष्टविनियोगार्हत्वे [illegible] बोधितत्वमिति प्राञ्चः ॥ अतिरिक्तपद [illegible] शिरोमणिः ॥ स्वामित्वञ्च तन्निरूप [illegible] निरूपकतया तदेव वा । तच्च द्रव्यगा [illegible] गतञ्च द्रव्यस्य दानादिश्रुतेः । मौनं वा [illegible] सृजेदित्यादौ लौहित्यादिगुणविशि [illegible] पिकनीलहृषोत्सर्गश्रुतेश्च । वस्तुतस्तु समवेतं स्वामित्वमेवातिरिक्तपदार्थः । दानादीनां तन्नाशकत्वे प्रथम [illegible] तद्धेतुत्वे सम्बन्धप्रायसम्भवात् तदेव [illegible] कतया स्वत्वव्यवहारहेतुः । अतएव नि [illegible] भाविन्यपि स्वत्वमिति । अन्यथा प्रतिमास [illegible] वर्षं वा देयत्वेन प्रतिश्रुतधान्यादिरूपस्य तत्र तदुत्पत्त्यनुपपत्तेरिति सौनावतोरहस्यपन्थाः समीचीनः । तत्र धारावारणाय सजातीयस्वत्वं प्रतिस्वत्वं विर [illegible] सजातीयमिति करणात् पराजितनृपा [illegible] समर्व्वर्त्तितत्पुत्रपौत्रक्रमागतस्वत्वादौ च दिना जेतुर्नृपतेः करग्रहणोपयोगि [illegible] तथा क्रीत प्रतिग्रहादराज्याद्यावर्त्तिनि स्वाकरादौ च क्रेत्रादेः प्रायाद्यधीनस्वत्वो पादेऽपि न व्यभिचार इति संक्षेपः । इति दायभागटीकायां श्रीकृष्णतर्कालङ्कारः ॥

स्वदनं, क्ली, (स्वद+ल्युट् ।) भक्षणम् । इति हेमचन्द्रः ॥ लेहः । इति राजनिर्घण्टः ।

स्वदाराः, पुं, (स्वस्य दाराः ।) स्वस्त्री । यथा, पाद्मोत्तरखण्डधृतविष्णुपुराणवचनम् ।
"मृतो नरकमभ्येति हीयतेऽत्रापि चायुषः ।
परदाररतिः पुंसामुभयत्रापि भीतिदा ॥
इति मत्वा स्वदारेषु ऋतुमत्सु बुधो व्रजेत् ।
यथोक्तदोषहीनेषु [illegible]

...ली. (स्वस्य धर्मः ।) स्वज्ञात्युक्ताचारः ।

...धर्म्मो विगुणः परधर्म्मात् स्वनुष्ठितात् ।
...धनं श्रेयः परधर्म्मो भयावहः ॥"
श्रीभगवद्गीतायां ३ अध्यायः ॥ ० ॥

... ।
...स्य विहितो धर्मः स तज्जातिः प्रकी-
र्त्तितः ।

...त् स्वधर्म्मं कुर्व्वीत द्विजो नित्यमनापदि ॥
...ो वर्णा राजेन्द्र चरेयुश्चापि वाग्यमाः ।
... स्वधर्म्मं विपुलं न ते यान्ति परां गतिम् ॥
...वर्णेण यथा नृणां नरसिंहः प्रतुष्यति ।
... तुष्यति तथान्येन वेदवाक्येन कर्म्मणा ॥"
इति श्रीनारसिंहपुराणम् ॥ ० ॥
...धर्म्मत्यागी कृतघ्नः । यथा,—
सनातन उवाच ।
...धर्म्मं हन्ति यो विप्रः सन्ध्यात्रयविवर्ज्जितः ।
...तर्पणञ्च यत् स्नानं विष्णुनैवेद्यवर्ज्जितः ॥
...मन्त्रविष्णुपूजाविष्णुभक्तिविहीनकः ।
...एकादशीविहीनश्च श्रीकृष्णजन्मवासरे ॥
...शिवरात्रौ च यो भुङ्क्ते श्रीरामनवमीदिने ।
...कृत्यं दैवकृत्यं स कृतघ्न इति स्मृतम् ॥"
...ब्रह्मवैवर्त्ते प्रकृतिखण्डे । ५१ । ४५—४७ ॥
... स्वद आस्वादने+
...धः, (स्वद्यतेऽनेनेति । स्वद आस्वादने+
... "स्वदेर्धश्च ।" इति दस्य धः । इत्युणादि-
...ज्ज्वलदत्तः ।) देवहविर्दानमन्त्रः । यथा,
देवहविर्दाने श्रौषट् वौषट् वषट्
स्वधा ॥"
इत्यमरः । ३ । ४ । ८ ॥
...रा श्रौषट् वौषट् वषट् स्वधा एते पञ्च-
...ा देवहविर्दाने वह्निमुखहुतौ वर्त्तन्ते
...ण हविषो दानं देवहविर्दानं तत्र देवा
...यः । अत्र पितरो देवताः इति स्मृतिस्ते-
...देवाः । हविर्दान इत्यनेन एते मन्त्रा इति
...नम् ।
...मन्त्रे स्वाहयैव हविर्भुजम् ।' इति रघुः ।
... मन्त्रभेदे स्त्रियां स्वाहाग्नियोपि-
...कोपान्तरम् । स्वाहा दन्त्यादिः । श्रौषट्
...आदिमूर्द्धन्यमध्यम् । वौषट् वषट्द्वयं
...मध्यम् । स्वधा दन्त्यादि । इन्द्राय
इत्यादिप्रयोगः ।" इति भरतः ॥ ० ॥
... दानमन्त्रः । यथा,—
...ऽन्नं हरिः पूष्णे वषट् सख्यो हितं
सुखम् ।"
...ये स्वधा पित्रे स्वस्ति धात्रे नमः सते ॥"
इति मुग्धबोधव्याकरणम् ॥
...देवेभ्योऽन्नं समयः पूष्णे वषट् सख्यो हितं
...धाः सुखं अग्नये स्वाहा पित्रे स्वधा धात्रे
...न्तु एतानि स्पष्टानि । नमः सते इति सते
... सर्व्वत्र भवत्ते-
...वषट्-

मिद्धौ पृथग्ग्रहणं मन्त्रान्तर्गतानामपि प्राप्तर्थं तेन शिखायै वषट् शिरसे स्वाहा पितृभ्यः स्वधोच्यताम् । हृदयाय नमः । इत्यादि सिद्धम् इति तट्टीकायां दुर्गादासः ॥ पितॄणामन्नम् । यथा,—

"भुङ्क्ते त्वं यया वै स्वधाख्या
तद्वत् स्वाहा हव्यभोक्ता स्वयं देवि ।"
इति ऋग्वेदे देवीसूक्तम् ॥

स्वधा वै पितृणामन्नम् । इति श्रुतिश्च ॥

स्वधा, स्त्री, (स्वान् दधातीति । धा + क्विप् ।) दक्षकन्या । सा तु पितॄणां पत्नी । तस्या द्वे कन्ये । यमुना धारिणी च । एतयोस्तपस्विन्योः सन्ततिर्नास्ति । इति श्रीभागवतमतम् ॥ सा च ब्रह्मणो मानसी कन्या । यथा,—

श्रीनारायण उवाच ।
"शृणु नारद वक्ष्यामि स्वधोपाख्यानमुत्तमम् ।
पितॄणाञ्च तृप्तिकरं श्राद्धानां फलवर्द्धनम् ॥
सृष्टेरादौ पितृगणान् ससर्ज्ज जगतां विधिः ।
चतुरश्चतुर्म्मूर्त्तिमतस्त्रींश्च तेजःस्वरूपिणः ॥
दृष्ट्वा सप्त पितृगणान् सिद्धरूपान्मनोहरान् ।
आहारं संसृजे तेषां श्राद्धं तर्पणपूर्व्वकम् ॥
स्नानं तर्पणपर्य्यन्तं श्राद्धान्तं देवपूजनम् ।
आह्निकञ्च त्रिसन्ध्यान्तं विप्राणाञ्च श्रुतौ
श्रुतम् ॥

नित्यं न कुर्य्याद्यो विप्रस्त्रिसन्ध्यं श्राद्धतर्पणम् ।
वलिं वेदध्वनिं सोऽपि विषहीनो यथोरगः ॥
हरिसेवाविहीनश्च श्रीहरेरनैवेद्यभुक् ।
भस्मान्तं सूतकं तस्य न कर्म्मार्हः स नारद ॥
ब्रह्मा श्राद्धादिकं सृष्ट्वा जगाम पितृहेतवे ।
न प्राप्नुवन्ति पितरो ददति ब्राह्मणादयः ॥
सर्व्वे प्रजग्मुः क्षुधिता विषण्णा ब्रह्मणः सभाम् ।
सर्व्वं निवेदनं चक्रुस्तमेव जगतां विधिम् ॥
ब्रह्मा च मानसीं कन्यां ससृजे तां मनोहराम् ।
रूपयौवनसम्पन्नां शतचन्द्रसमप्रभाम् ॥
विद्यावतीं गुणवतीमतिरूपवतीं सतीम् ।
विद्यावतीं गुणवतीमतिरूपवतीं सतीम् ।
श्वेतचम्पकवर्णाभां रत्नभूषणभूषिताम् ॥
विशुद्धां प्रकृतेरंशां सस्मितां वरदां शुभाम् ।
स्वधाभिधानां सुदतीं लक्ष्मीलक्षणसंयुताम् ॥
शतपद्मदलन्यस्तपादपद्मञ्च बिभ्रतीम् ।
पत्नीं पितॄणां पद्मास्यां पद्मजां पद्मलोचनाम् ॥
पितृभ्यस्तां ददौ ब्रह्मा तुष्टेभ्यस्तुष्टिरूपिणीम् ।
ब्राह्मणांश्चोपदेशञ्च चकार गोपनीयकम् ॥
स्वधान्तं मन्त्रमुच्चार्य्य पितृभ्यो देहि चेति च ।
क्रमेण तेन विप्राश्च पित्रे दानं ददुः पुरा ॥
स्वाहा शस्ता देवदाने पितृदाने स्वधा परा ।
सर्व्वत्र दक्षिणा शस्ता हतयज्ञमदक्षिणम् ॥
पितरो देवता विप्रा मुनयो मनवस्तथा ।
पूजां चक्रुः स्वधां शान्तां तुष्टाव परमादरम् ॥
देवादयश्च सन्तुष्टाः परिपूर्णमनोरथाः ।
विप्रादयश्च पितरः स्वधादेवीवरेण च ॥
इत्येवं कथितं सर्व्वं स्वधोपाख्यानमुत्तमम् ।
... हरिकरं किं भूयः श्रोतुमिच्छसि ॥०॥

नारद उवाच ।
स्वधापूजाविधानञ्च ध्यानं स्तोत्रं तथा मुने ।
श्रोतुमिच्छामि यत्नेन वद वेदविदांवर ॥
श्रीनारायण उवाच ।
तद्ध्यानं स्तवनं ब्रह्मन् वेदोक्तं सर्व्वसम्मतम् ।
सर्व्वं जानासि च कथं ज्ञातुमिच्छसि हृद्गये ॥
शरत्कृष्णत्रयोदश्यां मघायां श्राद्धवासरे ।
स्वधां संपूज्य यत्नेन ततः श्राद्धं समाचरेत् ॥
स्वधां नाभ्यर्च्य यो विप्रः श्राद्धं कुर्य्यादहम्मतिः ।
न भवेत् फलभाक् सत्यं श्राद्धस्य तर्पणस्य च ॥
ब्रह्मणो मानसीं कन्यां शश्वत् सुस्थिरयौवनाम् ।
पूज्यां पितॄणां देवानां श्राद्धानां फलदां भजे ॥
इति ध्यात्वा शालग्रामेऽप्यथवा मङ्गले घटे ।
दद्यात् पाद्यादिकं तस्यै मूलेनेति श्रुतौ श्रुतम् ॥
ॐ ह्रीं श्रीं क्लीं स्वधादेव्यै स्वाहेति च महा-
मनुम् ।
समुच्चार्य्य च संपूज्य स्तुत्वा तां प्रणमेद्द्विजः ॥२॥

स्तोत्रं शृणु मुनिश्रेष्ठ ब्रह्मपुत्र विशारद ।
सर्व्ववाञ्छाप्रदं नृणां ब्रह्मणा यत् कृतं पुरा ॥
ब्रह्मोवाच ।
"स्वधोच्चारणमात्रेण तीर्थस्नायी भवेन्नरः ।
मुच्यते सर्व्वपापेभ्यो वाजपेयफलं लभेत् ॥
स्वधा स्वधा स्वधेत्येवं यदि वारत्रयं स्मरेत् ।
श्राद्धस्य फलमाप्नोति वलेश्च तर्पणस्य च ॥
श्राद्धकाले स्वधास्तोत्रं यः शृणोति समाहितः ।
लभेत् श्राद्धशतानाञ्च पुण्यमेव न संशयः ॥
स्वधा स्वधा स्वधेत्येवं त्रिसन्ध्यं यः पठेन्नरः ।
प्रियां विनीतां स लभेत् साध्वीं पुत्त्रं गुणान्वि-
तम् ...

पितॄणां प्राणतुल्या त्वं द्विजजीवनरूपिणी ।
श्राद्धाधिष्ठातृदेवी च श्राद्धादीनां फलप्रदा ...
बहिर्गच्छ मन्मनसः पितॄणां तुष्टिहेतवे ।
संप्रीतये द्विजातीनां गृहिणां वृद्धिहेतवे ...
नित्या त्वं नित्यरूपासि पुण्यरूपासि सुव्र...
आविर्भावतिरोभावौ सृष्टौ च प्रलये तव ...
ॐ स्वस्ति च नमः स्वाहा स्वधा त्वं दक्षि...

निरूपितायतुर्व्वेदे षट् प्रशस्ताय कर्म...
पुरासीस्त्वं स्वधा गोपी गोलोके राधिक...
धृतासि स्वमासानं कृष्णत्वेन स्वधा ...
ध्वस्ता त्वं राधिकाशापात् गोलोकादि...
कृत्वाश्लिष्टा तया दृष्टा पुरा वृन्दावने...
कृष्णालिङ्गनपुण्येन भूता मे मानसी...
वृन्दासा सुरतौ तेन चतुर्णां स्वामिनी...
स्वाहा च सुन्दरी गोपी पुरासीद्रा...
सं कृष्णमाह रत्ये तेन स्वाहा प्र...
कृष्णेन सार्द्धं सुचिरं रतेन रासम...
प्रमत्ता सुरतौ दृष्टा दृष्टा सा ...
तस्याः शापेन प्रध्वस्ता गोलोका...
कृष्णालिङ्गनपुण्येन ह्यभूत् दक्षि...
दक्षिणा त्वं पुरा देवानां ...
यज्ञाभीष्टाभ्येतैश्च सा । पूज...

स्वकर्म्म, [न्] क्ली, (स्वस्य कर्म
कार्य्यम्। यथा,—
कुन्त्युवाच।
"स्वकर्म्मफलनिर्द्दिष्टां यां यां
तस्यां तस्यां हृषीकेश त्वयि भ
इति
स्वकर्म्मकृत्, त्रि, निजकार्य्यकार
शब्द-पूर्व्वक-कृधातोः । कर्त्तरि
निष्पन्नः॥
स्वकीयः, त्रि, (स्वस्यायमिति।
येति छः कुगागमश्च।) स्वो
निजः २ आत्मीयः ३ स्वः ४।
स्वकुलक्षयः, पुं, (स्वकुलस्य
मत्स्यः। इति हेमचन्द्रः॥
तत्कर्त्तरि तद्विशिष्टे च त्रि॥
स्वग,'इ सर्पणे) इति कविक
पर०-सक०-सेट्।) इकारान
इति दुर्गादासः॥
स्वगतं, क्ली, (स्वगतम्।)
नाट्योक्तीनामन्यतमम्। त
दर्पणे। ६। ४२५।
"अश्राव्यं खलु यद्वस्तु तदि
यथा। अहम्। स्वगतम्।
भवत्स्विमासने उपविश
चन्द्रोदयनाटके २ अङ्कः।
कृते च त्रि॥
स्वगुप्ता, स्त्री, (स्वेन गुप्ता
शब्दरत्नावली॥ सम्यान्
स्वग्रहः, पुं, (स्वकृतं ग्रह
इति जटाधरः॥ निग्रा
स्वङ्गः, त्रि, (सु शोभना
सुन्दराङ्गविशिष्टः। तत्
इति हेमचन्द्रः॥ (
शोभनावयवे, क्ली।
स्वच्छं, क्ली, (सुष्ठु च
सुक्ता। इति राजनि
स्वच्छः, त्रि, (सुष्ठु च
शब्दरत्नावली॥
केचित्॥ (यथा, म
"स्वच्छं स्वच्छं याव
स्वच्छं वस्तुजातच
स्वच्छतादिदोषयुक्त
"स्वच्छो नभः इ

स्वच्छः, पुं, (सुष्ठु च
इति शब्दचन्द्रिका।
स्वच्छन्दः, त्रि, (स्व
स्वाधीनः। स्वतन्त्रः
। यथा, स्वच्छन्दचारि
"स्वच्छन्दचारी च

…मुड्क्ते तडागे वा नदीतटे ।
…वे च सोऽपि राजा भविष्यति ॥
…ने पद्मपत्रे इति वा पाठः ।
…श्चिकञ्च सर्पञ्च यदि पश्यति ।
…विजयं प्रतिष्ठाञ्च लभेदिति ॥
…कोलैर्वानरैः पीडितो यदि ।
…भवेद्राजा धनञ्च विपुलं लभेत् ॥
…मं मौक्तिकञ्च शङ्खचन्दनहीरकम् ।
…यति स्वप्नान्ते विपुलं धनमाप्नुयात् ॥
…रुधिरं स्वर्णं भुक्त्वा विष्ठां धनं लभेत् ।
…गं शिवलिङ्गञ्च लभेदृष्ट्वा जयं धनम् ॥
…पुष्पितं बिल्वमाम्रं दृष्ट्वा लभेत् धनम् ।
…पुष्पितं विल्वमाम्रं दृष्ट्वा श्रियं लभेत् ॥
…च ज्वलदग्निञ्च धनं बुद्धिं श्रियं लभेत् ।
…आमलकं धात्रीफलं उत्पलञ्च धनागमम् ।
…देवताञ्च द्विजा गावः पितरो लिङ्गिनस्तथा ।
…देवतास्थाने तत्पत्रमिति वा पाठः।
…मिपं स्थाने तत्पत्रमिति ॥ तत्रैव भविष्यति ॥
…ति मिश्रः स्वप्ने तत्रैव भविष्यति ॥
…शुक्लाम्बरधरां नारीं शुक्लमाल्यानुलेपनाम् ।
…समाश्लिष्यति यः स्वप्ने तस्य श्रीः सर्वतः सुखम् ॥
…पीताम्बरधरां नारीं पीतमाल्यानुलेपनाम् ।
…समालिङ्गति यः स्वप्ने कल्याणं तस्य जायते ॥
…पश्यति शुक्लानि प्रशंसितानि
सर्वाणि शुक्लानि प्रशंसितानि ।
भस्मास्थि कार्पासविवर्ज्जितानि ।
भस्मानि कृष्णानि विनिन्दितानि
सर्वाणि देवद्विजवर्जितानि ॥
गोवर्द्धितदेवद्विजवर्जितानि ।
…दिव्या स्त्री सस्मिता विप्रा रत्नभूषणभूषिता ।
…यस्य मन्दिरमायाति स प्रियं लभते ध्रुवम् ॥
…स्वप्ने च ब्राह्मणी देवी ब्राह्मणी देवकन्यका ।
…कुमारी चारुवर्णाया रत्नभूषणभूषिता ।
…यस्य तुष्टा भवेत् स्वप्ने तस्य तुष्टा च पार्व्वती ॥
…स्य तुष्टा भवेत् कविपण्डितः इति च पाठः ।
…रत्नव स भवेत् कविपण्डितः सस्मिता सती ।
…ब्राह्मणो ब्राह्मणी वापि सन्तुष्टः सस्मिता सती ।
…फलं ददाति यस्मै च तस्य पुत्रो भविष्यति ॥
…स्वप्ने ब्राह्मणो नन्द । करोति च शुभा-
शिषम् ।

…ददाति भवेत्तस्य तन्येश्वर्यं भवेद्ध्रुवम् ॥
परितुष्टो द्विजश्रेष्ठोऽयाति यस्य मन्दिरम् ।
नारायणः शिवो ब्रह्मा प्रविशेत्तु तदाश्रमम् ॥
सम्पत्तिस्तस्य भवति यशश्च विपुलं शुभम् ।
पदे पदे सुखं तस्य सम्मानं गौरवं लभेत् ॥
…कस्मादपि स्वप्ने तु लभते सुरभीं यदि ।
भूमिलाभो भवेत्तस्य भार्य्या चापि पतिव्रता ॥
करेण कृत्वा कश्चित् यं मस्तके स्थापयेद्यदि ।
राज्यलाभो भवेत्तस्य निश्चितञ्च श्रुतौ श्रुतम् ॥
स्वप्ने तु ब्राह्मणस्तुष्टः समाश्लिष्यति यं व्रज ।
तीर्थस्नायी भवेत् सोऽपि निश्चितञ्च श्रिया-
न्वितः ।
स्वप्ने ददाति पुष्पञ्च यस्मै पुष्पवते द्विजः ।
…ययुक्तो भवेत् सोऽपि यशस्वी च धनी सुखी ॥
स्वप्ने दृष्ट्वा च तीर्थानि …
…र्थयात्री भवेद्ध्रुवः ॥
… ददाति वा ।

पुत्रलाभो भवेत्तस्य सम्पत्तिं वा समाप्नुयात् ॥
दत्ते कृत्वा तु कुड्वं आढकं वापि सुन्दरी ।
यस्य मन्दिरमायाति स लक्ष्मीं लभते ध्रुवम् ॥
दिव्या स्त्री यद्गृहं गत्वा पुरीषं विसृजेद्द्विज ।
अर्थलाभो भवेत्तस्य दारिद्र्यञ्च प्रयाति च ॥
यस्य गेहं समायाति भार्य्यया सह ब्राह्मणः ।
पार्व्वत्या सह शम्भुर्व्वा लक्ष्मीर्नारायणोऽथवा ।
ब्राह्मणो ब्राह्मणी वापि स्वप्ने यस्मै ददाति वा ।
धान्यं पुष्पाञ्जलिं वापि तस्य श्रीः सर्व्वतोसुखी ॥
सर्व्वतोसुखीत्यत्र सर्व्वतः सुखीति च पाठः ।
मुक्ताहारं पुष्पमाल्यं चन्दनञ्च शुभं व्रज ।
शुभं व्रज स्थाने लभेद्द्विज इति वा पाठः ।
स्वप्ने ददाति विप्रश्च तस्य श्रीः सर्व्वतः सुखी ॥
गोरोचनां पताकां वा हरिद्रामिक्षुदण्डकम् ।
सिद्धान्नञ्च लभेत् स्वप्ने तस्य श्रीः सर्व्वतः सुखी ॥
स्निग्धान्नस्थाने सिद्धान्नमिति वा पाठः ।
ब्राह्मणो ब्राह्मणी वापि ददाति यस्य मस्तके ।
छत्रं वा शुक्लधान्यं वा स च राजा भविष्यति ॥
स्वप्ने रथस्थः पुरुषः शुक्लमाल्यानुलेपनः ।
तत्रस्थो दधि भुङ्क्ते च पायसं वा नृपो भवेत् ॥
स्वप्ने ददाति विप्रश्च ब्राह्मणी वा सुधां दधि ।
प्रशस्तपात्रं तस्मै वा सोऽपि राजा भवेद्ध्रुवम् ॥
ददाति पुस्तकं स्वप्ने यस्मै पुष्पवते द्विजः ।
स भवेद्विश्वविख्यातः कवीन्द्रः पण्डितेश्वरः ॥
यं पाठयति स्वप्ने या मातेव च सुतं यथा ।
सरस्वतीसुतः सोऽपि तत्परो नास्ति पण्डितः ॥
ब्राह्मणः पाठयेद्यञ्च पितेव यत्नपूर्व्वकम् ।
ददाति पुस्तकं प्रीत्या स च तत्सदृशो भवेत् ॥
प्राप्नोति पुस्तकं स्वप्ने पथि वा यत्र तत्र वा ।
स पण्डितो यशस्वी च विख्यातश्च महीतले ॥
स्वप्ने यस्मै महामन्त्रं विप्रो विप्रा ददाति चेत् ।
स भवेत् पुरुषः प्राज्ञो धनवान् गुणवान् सुधीः ॥
स्वप्ने ददाति मन्त्रं वा प्रतिमां वा शिलामयीम् ।
यस्मै ददाति विप्रश्च मन्त्रसिद्धिञ्च तद्भवेत् ॥
विप्रा विप्रसमूहश्च दृष्ट्वा नत्वाशिषं लभेत् ।
राजेन्द्रः स भवेदापि किम्वा च कविपण्डितः ॥
शुक्लधान्ययुतां भूमिं यस्मै विप्रः समुत्सृजेत् ।
स्वप्ने च परितुष्टश्च स भवेत् पृथिवीपतिः ॥
स्वप्ने विप्रो रथे कृत्वा नानास्वर्गं प्रदर्शयेत् ।
चिरजीवी भवेदायुर्धनर्द्धिर्भवेद् ध्रुवम् ॥
विप्रा विप्रश्च सन्तुष्टो यस्मै कन्यां ददाति च ।
स्वप्ने च स भवेद्विद्वान् धनाढ्यो भूपतिः स्वयम् ॥
स्वप्ने सरोवरं दृष्ट्वा समुद्रं वा नदीं नदम् ।
मलाढ्यं शुक्लशैलञ्च दृष्ट्वा प्रियमवाप्नुयात् ॥"
मलाढ्यं शुक्लशैलञ्च दृष्ट्वा प्रियमिति च पाठः ।
प्रियं स्थाने श्रियमिति च पाठः ।
यः पश्यति मृतं स्वप्ने स भवेच्चिरजीवनः ।
अरोगी रोगिणं दृष्ट्वा सुखिनञ्च सुखी भवेत् ॥
दिव्या स्त्री यं प्रवदति मम स्वामी भवान् भव ।
स्वप्ने दृष्ट्वा च आगत्तिं स च राजा भवेद्ध्रुवम् ॥
स्वप्ने च बालिकां दृष्ट्वा लब्ध्वा स्फाटिक-
शालिकाम् ।
स्वप्ने च बालिकां दृष्ट्वा लभेद् ध्रुवम् ॥
इन्द्रचापं शुक्लघनं स प्रतिष्ठां लभेद् ध्रुवम् ॥

स्वप्ने विप्रो वदति यं मम दासो भवान् …
हरिदासस्य तद्भक्तिं लब्ध्वा स वैष्णवो भवेत् ॥
स्वप्ने विप्रो हरिः शम्भुर्ब्राह्मणी कमला शिवा ।
शुक्ला स्त्री वेदमाता वा जाह्नवी वा सरस्वती ॥
गोपालिकावेशधरा बालिका राधिका मम ।
बालश्च बालगोपालः स्वप्नविद्भिः प्रकाशितः ॥
एवं ते कथितो नन्द सुस्वप्नः पुण्यहेतुकः ।
श्रोतुमिच्छसि किं वा त्वं किं भूयः कथयामि
ते ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे सुस्वप्नदर्शनं
७७ अध्यायः ॥ * ॥
अक्रूरदृष्टसुस्वप्ना यथा,—
"अथाक्रूरः स्वभवनं गत्वा कंसेन प्रेरितः ।
भुक्त्वा मिष्टान्नमुत्तमम् ॥
चकार शयनं तल्पे भुक्त्वा वासितं जलम् ।
सकर्पूरञ्च ताम्बूलं चखाद वासितं जलम् ।
जगाम निद्रां सुखतः सुखसम्भोगमावतः ॥
ततो ददर्श सुस्वप्नं पुराणश्रुतिसम्मतम् ।
निशावशेषसमये वाद्यादिपरिवर्जितः ।
अरोगो वस्त्रकेशश्च वस्त्रयुग्मसमन्वितः ।
सुतल्पशायी सुस्निग्धश्चिन्ताशोकविवर्जितः ॥
किशोरवयसं श्यामं द्विभुजं मुरलीधरम् ।
पीतवस्त्रपरीधानं वनमालाविभूषितम् ॥
चन्दनोक्षितसर्व्वाङ्गं मालतीमाल्यशोभितम् ।
भूषितं भूषिताङ्गञ्च सद्रत्नमणिभूषणैः ॥
मयूरपुच्छचूडञ्च सस्मितं पद्मलोचनम् ।
एवम्भूतं द्विजशिशुं ददर्श प्रथमे मुने ॥
ततो ददर्श रुचिरां पतिपुत्रवतीं सतीम् ।
पीतवस्त्रपरीधानां रत्नभूषणभूषिताम् ॥
ज्वलत्प्रदीपहस्ताञ्च शुक्लमाल्यकरां वराम् ।
शरच्चन्द्रनिभास्याञ्च सस्मितां वरदां शुभाम्
ददर्श विप्रञ्च कुर्व्वन्तञ्च शुभाशिषम् …
ततो ददर्श विप्रञ्च कुर्व्वन्तं सरोवरम् ॥
श्वेतपद्मगतं हंसं तुरगञ्च सरोवरम् …
ददर्श चित्रितं चारु फलितं पुष्पितं शुभ…
आम्रनिम्बनारिकेलगुवाककदलीतरुम् …
आत्मानं पर्व्वतस्थित…
ददर्श श्वेतसर्पं च स्वात्मानं पर्व्वतस्थित…
ददर्श श्वेतसर्पञ्च तरिस्थं तुरगस्थित…
हस्त्यश्च गजस्थञ्च भुञ्जन्तञ्च पाय…
वीणां वादितवन्तञ्च पद्मपत्रस्थसौवित…
दधिक्षीरयुताञ्च पद्मपत्रस्थसौवित…
कृमिविष्ठादिलिप्ताञ्च रुदन्तं मोदि…
शुक्लधान्यपुष्पधरं धनं चन्दनचर्चि…
समुद्रस्थं प्रासादस्थमात्मानञ्च समी…
छिन्नभिन्नक्षताङ्गञ्च मेदःपूयसमनि…
ततो ददर्श रजतं मणिमुक्ताञ्च क…
मुक्तामाणिक्यरत्नञ्च पूर्णकुम्भं च…
सुरभिञ्च सवत्साञ्च हर्षितं मय…
शुक्लञ्च मारं शङ्खं दिव्यं स्वच्छ…
ताम्बूलं पुष्पमाल्यञ्च स्वर्णदा…
पार्व्वतीप्रतिमां कृष्णप्रतिमां …
विप्रबालाञ्च ब्राह्मणं …
देवस्थानं …
दृष्ट्वा स्वप्नं …
उवाच …

सम्पूर्णे वहते चन्द्रः सूर्यो नैव च दृश्यते ।
मासेन दृश्यते मृत्युः कालज्ञानेन भाषितम् ॥
मूत्रं पुरीषं वायुश्च समकालं प्रजायते ।
तदासौ चलितो ज्ञेयो दशाहे म्रियते ध्रुवम् ॥
एवं चन्द्रप्रवाहश्च सुषुम्नाभञ्जनस्तथा ।
सूर्यचन्द्रविनाशे तु सद्यो मृत्युर्न संशयः ॥
अरुन्धती ध्रुवञ्चैव विष्णोस्त्रीणि पदानि च ।
आयुर्हीना न पश्यन्ति चतुर्थं मातृमण्डलम् ॥
अरुन्धती भवेज्जिह्वा ध्रुवो नासाग्रमुच्यते ।
भ्रुवोर्मध्ये विष्णुपदं तारकं मातृमण्डलम् ॥
नवध्रुवं सप्तघोषं पञ्चतारा त्रिनासिका ।
जिह्वामेकदिनं प्रोक्तं म्रियते मानवो ध्रुवम् ।
कोणमक्ष्णोरङ्गुलीभ्यां किञ्चित् पीड्य निरी-
क्षयेत् ।
यदा न दृश्यते बिन्दुर्दशाहेन मृतो नरः ॥
इति कालज्ञानम् ॥२॥

इडा गङ्गेति विज्ञेया पिङ्गला यमुना नदी ।
मध्ये सरस्वती विद्यात् प्रयागादि समस्ततः ॥
आदौ साधनमाख्यातं सद्यः प्रत्ययकारकम् ।
बद्धपद्मासनो योगी बध्नीयादुड्डियानकम् ॥
पूरकं कुम्भकञ्चैव रेचकञ्च तृतीयकः ।
ज्ञातव्यो योगिभिर्नित्यं देहसंशुद्धिहेतवे ॥
पूरकः कुरुते पुष्टिं धातुसाम्यं तथैव च ।
कुम्भकः स्तम्भनं कुर्यात् जीवरक्षाविवर्द्धनम् ॥
रेचको हरते पापं कुर्याद्योगपदं व्रजेत् ।
पश्चात् संग्राममभ्येत्य स्थिरो भूत्वा च धारयेत् ॥
कुम्भयेत् सहजं वायुं यथाशक्त्या प्रकल्पयेत् ।
रेचयेच्चन्द्रमार्गेण सूर्येण पूरयेत् सुधीः ॥
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
विम् ॥
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

सर्व्वदुःखैर्व्विनिर्म्मुक्तो लभते वाञ्छितं फलम् ॥
स्वरज्ञानं गिरो यस्य लक्ष्मीः करतले भवेत् ।
पतन्तु शरीरे यस्य सुखं तस्य सदा भवेत् ॥
प्रणवः सर्व्ववेदानां ब्रह्माण्डे भास्करो यथा ।
मर्त्त्यलोके तथा पूज्यः स्वरज्ञानी पुमानपि ॥
नाड़ीत्रयं विजानाति तत्त्वज्ञानं तथैव च ।
नैव तेन भवेत्तुल्यं लक्षकोटिरसायनम् ॥
एकाक्षरप्रदातारं नाड़ीभेदनिवेदकम् ।
पृथिव्यां नास्ति तद्द्रव्यं यद्दत्त्वा चानृणी भवेत् ॥
स्वरस्तत्त्वं तथा युद्धं देवयश्यं स्त्रियस्तथा ।
गर्भाब्दरोगकालाख्यं नवप्रकरणान्वितम् ॥
एवं प्रवर्त्तितं लोके सिद्धिदं सिद्धयोगिभिः ।
चायन्द्रार्कं शरो जीयात् पठनात् सिद्धि-
दायकम् ॥
सुखासने समासीनं निद्रामाहारमल्पकम् ।
गिलयेत् परमात्मानं यद्देहं न हि पश्यति ॥"
इति शिवगौरीसंवादे नवप्रकरणान्वितपवन-
विजयं नाम स्वरोदयं समाप्तम् ॥

स्वर्गः, पुं, (स्वरिति गीयते इति । गै+कः । यद्वा, सुष्ठु अर्ज्यते इति । सु+ऋजँ अर्जने+घञ् । न्यङ्क्वादित्वात् कुत्वम् ।) देवतानामाश्रयः । तत्-पर्य्यायः । स्वः २ नाकः ३ त्रिदिवः ४ त्रिदशा-लयः ५ सुरलोकः ६ द्यौः ७ द्यौ ८ त्रिपि-ष्टपम् ९ । इत्यमरः । १ । १ । ६ ॥ मन्दरः १० अमरावः ११ गौः १२ ऊर्द्ध्व १३ ऊर्द्ध्वलो-कः १४ । इति जटाधरः ॥ देवलोकः १५ स्वर्लोकः १६ ऊर्द्ध्वलोकः १७ सुधाधारः १८ सौरिकः १९ नाकभुवनम् २० दिवालय २१ । इति शब्दरत्नावली ॥ * ॥ तस्य गुणदोषा यथा,—

वृहस्पतिरुवाच ।
"स्वर्गस्य मे गुणान् ब्रूहि साम्प्रतं द्विजसत्तम ।
एतत् सर्व्वं द्विजश्रेष्ठ करिष्यामि न संशयः ॥

जैमिनिरुवाच ।
नन्दनादीनि दिव्यानि रम्याणि विविधानि च ।
सर्व्वकामानि पुण्यानि सर्व्वकामशुभानि च ॥
सर्व्वकामफलैर्वृक्षैः शोभितानि समन्ततः ।
विमानानि सुदिव्यानि पवित्राण्यमलानि च ॥
सर्व्वत्र विचरन्ति स्म रम्याणि रमणानि च ।
[illegible]
[illegible]
सर्व्वकाममयाश्चैव सुखदुःखविवर्जिताः ॥
[illegible]
न तत्र सन्ति वै [illegible]
न [illegible] न [illegible] न च [illegible] ।
[illegible]
[illegible]
न [illegible] न [illegible] ॥
न तत्र [illegible] दृश्यते ।
[illegible]
[illegible]
[illegible]

न चात्र क्रियते भूयः सोऽत्र दोषो
पतनश्चैव भवति दृष्टा दासो
सर्व्वासां कर्म्मणामन्ते सहसा पतनं
इह यत् क्रियते कर्म्म फलं तत्रैव
कर्म्मभूमिरियं राजन् फलभूमिस्त्वसौ
इति पाद्मे भूखण्डे ९०
अन्यत् वह्निपुराणे
मात्स्ये १०३ । १०४ अध्याययोरपि
अपि च ।

सुनन्द उवाच ।
'शृणु राजन् प्रवक्ष्यामि
विराड्रूपस्य सत्याख्यान
यावतो भू समुद्दिष्टा ससमुद्रादि
प्रतिभाता महाराज किरणैश्चन्द्रसूर्य्ययोः
विस्तृता तावदुपरि
पञ्चविंशतिकोट्यस्तु योजनानान्तु
नवतीनां सहस्राणि योजनानि महीपते
भूमिरूर्द्ध्वलोकानां
ये च विद्याधरा
भूतप्रेतपिशाचाश्च तथा
ततो राहुर्ग्रहाणाञ्च
योजनानां प्रविस्तारं मण्डलं तस्य
अरत् येरं पुरा प्राप्तं यः पर्व्वणि
चामाय धावति क्रोधात् पुष्पदन्तो
तदैव भगवच्चक्रं सहस्रार्च्चिः प्रयुक्तं ।
उपतिष्ठति तद्भीत्या पुनरेव निवर्त्तते ।
उपरागं वदन्त्येवं पुण्यकालञ्च कथ्यते ।
अन्योऽन्यतो भानुभूर्गेव व्यवस्थितः ।
भानोः सकाशादुपरि लक्षे लक्षः
लक्षमण्डलं चन्द्रात्र तयोर्जनमुच्छितम्
नक्षत्रमण्डलात् सौम्य उपरिष्टाद्विलक्ष
बुधात् शुक्रो द्विलक्षे तु शुक्राद्भौमो
अङ्गारादुपरिष्टाच्च गीष्पतिर्लक्षद्वये ।
[illegible]
[illegible]
[illegible]
पारगम्यं हि यत्किञ्चिदूर्द्धलोके
तत्सर्व्वं हि इति ख्यातं भास्करीयादि
भूर्लोकाश्च भुवर्लोकः स्वर्गाद्दिवःपदीरित
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
भूर्लोकात् परिसंख्यात कोटिदशद्वय
[illegible]
[illegible]
[illegible]
[illegible]
इति पाद्मे [illegible]
[illegible]
यथा,—

[illegible] [illegible] द्वितीय [illegible] ।
[illegible] [illegible] ॥
[illegible] [illegible] ।
[illegible] [illegible] स्थित: ॥
[illegible] [illegible] ।
[illegible] [illegible] ॥
[illegible] सर्गो [illegible] ।
[illegible] [illegible] ॥
[illegible] [illegible] ।
[illegible] [illegible] ॥
[illegible] [illegible] ।
[illegible] [illegible] ॥
[illegible] सर्गो [illegible] ।
[illegible] [illegible] ॥
[illegible] [illegible] ।
[illegible] [illegible] ॥
[illegible] नाकपृष्ठो [illegible] ।
[illegible] सर्गाः शृङ्गे च मध्यमे ॥
[illegible]य प्रमोदस्य सर्गाः शृङ्गे च [illegible] ।
[illegible] पौष्टिकश्चैव [illegible]सकर्थो ।
[illegible]: सर्वराजस्य सर्गाः शृङ्गे तु पश्चिमे ॥
[illegible]लो निरहङ्कारः सौभाग्यपालिनिर्मलः ।
[illegible] निर्वृतिश्चैव पुष्पाढ्यश्च तथा द्विज ॥
[illegible]ये द्विजश्रेष्ठ पूर्वशृङ्गे समर्पिताः ।
[illegible]विंशति ये स्वर्गा निविष्टा मेरुमूर्द्धनि ॥
[illegible]भूमिदानकर्त्तारो यज्वानो तपसां तथा ।
[illegible]षु वसन्ति स्म जनाः क्रोधविवर्जिताः ॥
[illegible]वेशो चानन्दं प्रमोदं वह्निसाह्वः ।
[illegible]प्रयाति सोऽप्यन्तु रवि चैवाप्य निर्मलः ॥
[illegible]पाने तु सत्यानि सृतो गच्छेत्त्रिविष्टपम् ।
[illegible]नुयाजी नाकपृष्ठमम्निहोत्री च निर्वृतम् ॥
[illegible]ागकूपकर्त्ता च लभते पौष्टिकं द्विज ।
[illegible]वर्णदायो सौभाग्यं लभेत् स्वर्गं महातपाः ॥
[illegible]नकाले महार्घाढ्यं प्रत्यामयति यो नरः ।
[illegible]सर्वसत्त्वहितार्थाय स्वर्गं चाप्सरसं लभेत् ॥
[illegible]गोप्रदानेन निरहङ्कारमवाप्नुयात् ।
[illegible]मिदानेन शुद्धेन लभते शाश्वतं पदम् ॥
[illegible]प्रदानेन शुद्धेन स्वर्गं गच्छति निर्मलम् ।
[illegible]प्रदानेन पुष्पाढ्यं कन्यादानेन मङ्गलम् ॥
[illegible]दानेन [illegible] वस्त्राणि भक्तितः ।
[illegible]तर्पणं कृत्वा दत्त्वा वस्त्राणि भक्तितः ।
[illegible]नन्तु लभते स्वर्गं यत्र गत्वा न शोचति ॥
[illegible]कपिलागोप्रदानेन परार्द्धं चानुभूयते ।
[illegible]वृषस्य प्रदानेन स्वर्गं मन्मथमश्नुते ॥
[illegible]मासि सरित्स्नायी तिलधेनुप्रदस्तथा ।
[illegible]मासे सरित्स्नायी तिलधेनुप्रदस्तथा ।
[illegible]पानहदाता च स्वर्गं यात्युपशोभनम् ॥
देवायतनकर्त्ता यै शुश्रूषणपरस्तथा ।
तीर्थयात्रापरश्चैव स्वर्गराज्ये महीयते ॥
एकान्नभोजी यो मर्त्यो नक्तभोजी च नित्यशः ।
उपवासी विरात्रार्द्धः शान्तिस्वर्गं शुभं लभेत् ॥
सरित्स्नायी जितक्रोधी ब्रह्मचारी दृढव्रतः ।
निर्मलं स्वर्गमाप्नोति तथा भूतहिते रतः ॥
[illegible] निरहङ्कारमाप्नुयात् ।

[illegible] दिन दिन [illegible] प्रयाति ।
[illegible] [illegible] सानव: ॥
[illegible] [illegible] प्रयच्छति ।
[illegible] [illegible] नामसनामयम् ॥
स [illegible] निर्वाण दिवि [illegible] स्थित: [illegible] ।
[illegible] पश्चिमं [illegible] स्थित: १०॥
पूर्वशृङ्गे स्वर्ग [illegible] चैव [illegible] स्थित: १०॥
[illegible] [illegible] स्वर्गाख्यानमिदं शृणु ॥
[illegible] [illegible] स्वर्गाख्यानमिदं परिमण्डितम् ।
[illegible] विपुलं [illegible]परिमण्डितम् ।
[illegible] तु कुमारस्तु [illegible] सानव: स्थिता: ॥
[illegible] विद्याधरा द्विज ।
[illegible] विगम्य [illegible] विमलाद्युम: ॥
पञ्चमे नागराजस्य षष्ठे तु [illegible]धाहदे ।
सप्तमे दिक्पतयो धर्मराजस्तथाष्टमे ।
नवमे तु तथा [illegible] आदित्या दशमे पथि १०॥
भूर्लोकात्तत्तथाकस्मूर्द्धं चरति भास्कर: ।
[illegible] समन्वित: ॥
योजनानां सहस्रे द्वे विष्कम्भेन समन्वित: ॥
त्रिगुण: परिणाहेन सूर्यविम्बप्रमाणत: ॥
सोमपूर्णो [illegible] मध्याह्ने यदा ।
[illegible] तत्समारोहति भास्कर: ॥
[illegible] यदा भवति भास्कर: ।
मध्याह्ने त्वमरावत्यां यदा भवति भास्कर: ।
तदा संयमने याम्ये तदोर्द्धन्तु प्रदृश्यते ॥
सर्वं प्रदक्षिणं कुर्व्वन् भास्वं सविता सदा ।
ध्रुवाधारश्च तिष्ठन् वालिखिल्यादिभि: स्तुत: ॥
सूर्य्यमण्डलमानात्तु द्विगुणं सोममण्डलम् ।
पूर्णे शतसहस्रे तु तस्मात् नक्षत्रमण्डलम् ॥
पूर्णे शतसहस्रे तु तस्मान्नक्षत्रमण्डलात् ।
द्विलक्षे तु बुधस्यापि स्थानं नक्षत्रमण्डलात् ।
तावत्प्रमाणभागे तु बुधस्याप्युशना स्थित: ॥
अङ्गारकोऽपि शुक्रस्य तावन्माने व्यवस्थित: ।
लक्षद्वये तु भौमस्य स्थितो देवपुरोहित: ॥
शौरिर्द्वे बृहस्पतेश्चोर्द्धं द्विलक्षे तु व्यवस्थित: ।
तस्मात् शनैश्चरादूर्द्ध्वं लक्षे सप्तर्षिमण्डलम् ॥
सप्तर्षिमण्डलादूर्द्धमेकलक्षे ध्रुव: स्थित: ।
मेढीभूत: समस्तस्य ज्योतिश्चक्रस्य सत्तम ॥
भास्वांस्तपति विप्रेन्द्र ऊर्द्धं किरणरश्मिभि: ।
कालसंख्यां त्रिलोकस्य स करोति युगे युगे ॥
अनन्तपस्तथा सत्यमेतान् लोकान् द्विजाश्रया ।
ब्रह्मणो मुनिशार्द्दूल विष्णुशक्तिविदोषित: ॥
ऊर्द्धं गतैर्द्विजश्रेष्ठ रश्मिभिस्तपते रवि: ।
अधोगतैस्तु भूर्लोकं द्योतते दीप्तदीधिति: ॥
तम:पापहर: सूर्य्य: कर्त्ता त्रिभुवनस्य च ।
छत्रवत् परिदृश्येत मण्डलान्मण्डलं परम् ॥
द्विगुणेन च विस्तीर्णं भूतलात्तत् प्रतिष्ठितम् ।
आदित्यमण्डलाधस्तात् भुवो लोक: प्रतिष्ठित: ॥
तदधस्तात्तु विप्रेन्द्र भूर्लोक: संप्रतिष्ठित: ।
एवमेतत्त्रिभुवनं विष्णुकाये व्यवस्थितम् ॥
त्रैलोक्यस्येश्वरत्वञ्च विष्णुदत्तं शतक्रतो: ।
लोकपालैश्च सहितो लोकान् रक्षति धर्मत: ।
वसन् स्वर्गे महाभाग देवेन्द्र: स तु कीर्त्तित: ॥
अतोऽधस्ताद्द्विजश्रेष्ठ पातालन्तु स्वयंप्रभम् ।
न तत्र तपते सूर्य्यो न रात्रिर्न निशाकर: ॥
दिव्यं रूपं समास्थाय तपन्ते सततं जना: ।
पातालस्था: द्विजश्रेष्ठ दीप्यामाना: स्वतेजसा ॥
स्वर्लोकात्तु महर्लोक: कोटिमाने व्यवस्थित: ।

[illegible] द्विगुणो [illegible] ।
शतो योजनमानेन द्विगुणो [illegible] ।
जनोलोकस्ततो विप्र पञ्चमो मुनिसेवित: ।
तस्योपरि तपोलोकस्त्रिभि: कोटिभि: स्मृत: ॥
सत्यलोकोऽष्टकोटीभि: सर्व्वेषामुपरि स्थित: ।
सर्व्वं छत्राकृतिर्ज्ञेया भुवना भुवनोपरि ॥
सत्यलोकाद्द्विगुणोऽसौ द्विगुणेन व्यवस्थित: ।
ब्रह्मलोकाद्विगुणोऽसौ कथितं लोकचिन्तकै: ॥
वाराहं तत्र माहात्म्यं कथितं लोकचिन्तकै: ।
ततः परं द्विजश्रेष्ठ ततो ब्रह्माण्डकपालकम् ।
तत: परं द्विजश्रेष्ठ ततो ह्याण्डकपालकम् ।
ब्रह्माण्डात् परत: साक्षात् निर्लेप: पुरुष: स्थित: ॥
यमुपास्य विमुच्येत तपोज्ञानसमन्विता: ।
यमुपास्य विमुच्येत तपोज्ञानसमन्वित: ॥
इति ते संस्थिति: प्रोक्ता भूर्लोकस्य मयानघ ॥
यस्तु सम्यगिमां वेत्ति स याति परमां गतिम् ।"
इति नृसिंहपुराणे ३० अध्याय: ॥

पारिभाषिकस्वर्गो यथा,—
"मनोऽनुकूला: प्रमदा रूपवत्य: स्वलङ्कृता: ।
वास: प्रासादपृष्ठेषु स्वर्ग: स्याच्छुभकर्म्मण: ॥"
इति गारुडे । १०८ । ४४ ॥

न्यायमते स्वर्गलक्षणं यथा । दु:खासम्भिन्न-त्वादिविशिष्टसुखत्वं स्वर्गत्वं तदेव स्वर्गपदशक्य-तावच्छेदकमिति सिद्धान्त: । आदिपदेन अन-न्तरदु:खग्रस्तभिन्नत्वाभिलाषोपनीतत्वयो: परि-ग्रह: । अतएव ।
"यन्न दु:खेन संभिन्नं न च ग्रस्तमनन्तरम् ।
अभिलाषोपनीतं यत् तत् सुखं स्व:पदास्पदम् ॥"
इति स्वरादिपदशक्तिग्राहकार्थवादोऽपि संग-च्छते । इति गदाधरभट्टाचार्य्यकृतवादार्थ: ॥
किञ्च ।
"मन:प्रीतिकर: स्वर्गो नरकस्तद्विपर्य्यय: ।
नरकस्वर्गसंज्ञे वै पापपुण्ये द्विजोत्तमा: ॥"
इति ब्रह्मपुराणे १८ अध्याय: ॥

स्वर्गगामी, [न्] त्रि, (स्वर्गं गच्छतीति । [illegible]
णिनि: ।) स्वर्गगमनकर्त्ता । यथा,—
"सर्व्वहत्तौ विहिंसा ये ये च सर्व्वसहा [illegible]
सर्व्वस्य प्रियभूताश्च ते नरा: स्वर्गगामि[illegible]
इति कर्म्म[illegible]

स्वर्गङ्गा, स्त्री, (स्वर्गस्य गङ्गा ।) म[illegible]
इति शब्दरत्नावली ॥
स्वर्गजित्, त्रि,(स्वर्गं जयतीति । जि+[illegible]
सत्य ।) स्वर्गजेता । (यथा, [illegible]
१२ । ७५ । ३४ ।
"यस्मिन् भयार्द्दित: सम्यक् चेमं [illegible]
स स्वर्गजित्तमोऽस्माकं सत्यमेत[illegible]
स्वर्गपति:, पुं, (स्वर्गस्य पति: । [illegible]
हेमचन्द्र: ॥
स्वर्गवधू:, स्त्री, (स्वर्गस्य स्वर्गस्थि[illegible]
अप्सरस: । इति हेमचन्द्र: ॥
स्वर्गलोकेश:, पुं, (स्वर्गलोका[illegible]
जन्यकर्म्मपक्वते स्वर्गप्राप्त[illegible]
शरीरम् । इति जटाधर: [illegible]
ईश: ।) इन्द्रश्च ॥

स्वर्गसरिद्वरा, स्त्री, (स्वर्गस्य सरिद्वरा।) गङ्गा। इति राजनिर्घण्टः॥

स्वर्गापगा, स्त्री, (स्वर्गस्य आपगा।) गङ्गा। इति हेमचन्द्रः॥

स्वर्गिगिरिः, स्वर्गगिरिः, पुं, (स्वर्गस्य पक्षे स्वः गिरिः पर्व्वतः।) सुमेरुः। इति हेमचन्द्रः॥

स्वर्गिवधूः, स्त्री, (स्वर्गिणां देवानां वधूः।) अप्सराः। इति हेमचन्द्रः॥

स्वर्गी,[न्]पुं, (स्वर्गोऽस्त्यस्य भोग्यत्वेनेति। स्वर्ग+इनिः।) देवता। इति त्रिकाण्डशेषः॥ (यथा, कुमारे। २। ४५।

"भुवनालोकनप्रीतिः स्वर्गिभिर्नानुभूयते।
खिलीभूते विमानानां तदापातभयात् पथि॥")

स्वर्गगामिनि, त्रि। तल्लक्षणं यथा,—

"दया भूतेषु संवादो परलोकं प्रतिक्रिया।
सत्यं परहिता चास्तिर्य्यदप्रामाण्यदर्शनम्॥
गुरुदेवर्षिपूजा च केवलं साधुसङ्गमः।
सत्क्रियाभ्यसनं मैत्री स्वर्गिणां लक्षणं विदुः॥"
इति गारुडे २२८ अध्यायः॥

स्वर्गौकाः,[स्]पुं, (स्वर्ग ओकः वासस्थानं येषाम्।) देवता। इति हलायुधः॥ (यथा, कुमारे। १। ५८।

"अनर्घ्यमर्घ्येण तमद्रिनाथः
स्वर्गौकसामर्चितमर्चयित्वा।
आराधनायास्य सखीसमेतां
समादिदेश प्रयतां तनूजाम्॥")

स्वर्ग्य, त्रि, (स्वर्गस्य निमित्तं संयोग उत्पातो वा। स्वर्ग+ "गोद्वयचोऽसंख्यापरिमाणाश्वादेर्यत्।" ५। १। ३८। इति यत्। यद्वा स्वर्गः प्रयोजनमस्य। "स्वर्गादिभ्यो यद्वक्तव्यः।" ५। १। १११। इत्यस्य वार्त्तिकोक्त्या यत्।) स्वर्गीयः। स्वर्गजनकः। स्वर्गप्रापकः। स्वर्गहेतुः। उद्वृत्तात् स्वापवर्गीय निम्नः। (यथा, भागवते। ४। १२। ४४।

"धन्यं यशस्यमायुष्यं पुण्यं स्वस्त्ययनं महत्।
स्वर्ग्यं ध्रौव्यं सौमनस्यं प्रशस्यमघमर्षणम्॥")

स्वर्ज्जिकः, पुं, सर्ज्जिकाक्षारः। इति राजनिर्घण्टः॥ सज्जक्षारः। यथा,—

"क्षारकः क्षारो यवक्षारो यावशूको यवाग्रजः।
स्वर्ज्जिकोऽपि स्मृतः क्षारः कापोतः सुवर्चिकः॥
कथितः सर्ज्जिकाभेदो विशेषैः सुवर्चिका।
उष्णक्षारो लघुः स्निग्धः सुसूक्ष्मो वह्निदीपनः।
निहन्ति शूलं वातामगुल्मक्षामनिलामयान्॥
सर्ज्जिकाल्पगुणा तस्मात् विशेषात्[illegible]।
सुवर्चिका स्वर्ज्जिकावत् बोद्धव्या गुणतो बुधैः॥"
इति भावप्रकाशः॥

स्वर्ज्जिकाक्षारः, पुं, सर्ज्जिकाक्षारः। साजिमाटि इति भाषा। अस्य गुणाः।

"स्वर्ज्जिकाक्षारो हन्ति [illegible]।
गुल्मशूलहृद्रोगान्[illegible]।
[illegible] सर्ज्जिकाक्षार उच्यते॥"
इति राजवल्लभः॥

स्वर्ज्जिक्षारः, पुं, (स्वर्ज्जी एव क्षारः।) सर्ज्जिकाक्षारः। तत्पर्य्यायः। स्वर्ज्जिकः २ क्षारः ३ स्वर्ज्जी ४ सुखोर्ज्जिकः ५ सुवर्चिकः ६ सुवर्चिः ७ सुखवर्च्चाः ८। अस्य गुणाः। पटुत्वम्। कटूष्णत्वम्। तीक्ष्णत्वम्। वातकफार्त्तिनाशित्वम्। गुल्माध्मानक्रिमिव्रणजठरदोषनाशित्वञ्च। इति राजनिर्घण्टः॥

स्वर्ज्जी,[न्]पुं, (सुखेन अर्ज्जयतीति। सु+अर्ज्ज+णिनिः।) स्वर्ज्जिक्षारः। इति राजनिर्घण्टः॥

स्वर्णं, क्ली, (सुष्ठु अर्णो वर्णो यस्य।) सुवर्णम्। धुस्तूरः। इत्यमरः। २। ८। ९४॥ गौरसुवर्णशाकम्। नागकेशरम्। इति राजनिर्घण्टः॥ स्वर्णस्योत्पत्तिर्यथा,—

"एकदा सर्व्वदेवाश्च जग्मुः स्वर्गसंसदि।
तत्र कृत्वा च नृत्यञ्च गायन्त्यप्सरसां गणाः॥
विलोक्य रम्भां सुश्रोणीं सकामो वह्निरेव च।
पपात वीर्य्यं चस्कन्द लज्जया वाससा तदा॥
तत्सद्यो स्वर्णपुञ्जञ्च वस्त्रं चिता ज्वलनार्कः।
क्षणेन वर्द्धयामास स सुमेरुर्बभूव ह॥
हिरण्यरेतसं वह्निं प्रवदन्ति मनीषिणः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १३। ३३-३७॥

तस्य गुणाः।

"सुवर्णं तिक्तमधुरं कषायं गुरु लेखनम्।
हृद्यं रसायनं बल्यं चक्षुष्यं कान्तिदं शुचि॥
आयुर्मेधावयःस्थैर्य्यवाग् विशुद्धिस्मृतिप्रदम्।
क्षयोन्मादगदार्त्तानां शमनं परमुच्यते॥"
इति राजवल्लभः॥ ७॥

सुवर्णस्य शोधनमारणविधिर्यथा। मारणाय शोध्यं सुवर्णमाह।

"दाहे रक्तं सितं छेदे निकषे कुङ्कुमप्रभम्।
तारशुल्कोज्झितं स्निग्धं कोमलं गुरु हेम सत्॥"
सत् उत्तमम्।

"तच्छ्वेतं कठिनं रुक्षं विवर्णं समलं दलम्।
दाहे च्छेदेऽसितं श्वेतं कषे स्फुटलघु त्यजेत्॥"
अथ शोधनविधिः।

"पत्रीकृतपत्राणि हेम्नो वह्नौ प्रतापयेत्।
निषिञ्चेत्तत्तप्तानि तैले तक्रे च काञ्जिके॥
गोमूत्रे च कुलत्थानां कषाये तु त्रिधा त्रिधा।
एवं हेम्नः परीपाय धातूनां शोधनं भवेत्॥"
अथाशुद्धस्य सुवर्णस्य दोषमाह।

"बलं च वीर्य्यं हरते नराणां
रोगव्रजं पोषयतीह काये।
असौख्यकार्य्यं च सदा सुवर्ण-
मशुद्धमेतन्मरणञ्च कुर्य्यात्॥"
अथ सुवर्णमारणविधिः।

"स्वर्णस्य द्विगुणं सूतमम्लेन सह मर्द्दयेत्।
तद्गोलकसमं गन्धं निदध्यादधरोत्तरम्॥"
गन्धस्य द्विगुणत्वं [illegible]। तत्र क्रमः[illegible]।
"गोलकञ्च ततो रुद्ध्वा शरावसम्पुटे॥
त्रिंशद्वनोपलैर्दद्यात् पुटान्येवं चतुर्द्दश।
निरुत्थं जायते भस्म गन्धो देयः पुनः पुनः॥"

कज्जली दत्त्वा [illegible]। पलः गोवरा इति लोके। निरुत्थं जीवति॥ ७॥ अथान्यप्रकारः।

"काञ्चने गलिते नागं षोडशांशेन निक्षिपेत्।
चूर्णयित्वा तथाम्लेन घृष्ट्वा कृत्वा तु गोलकम्।
गोलकेन समं गन्धं दत्त्वा [illegible]
सरावसंपुटे धृत्वा पुटे त्रिंशद्वनोपलैः।
एवं सप्तपुटैर्हेम निरुत्थं भस्म जायते
अत्रापि पूर्व्ववद्गन्धः प्रदातव्यः पुनः पुनः
काञ्चनारिरसैर्घृष्ट्वा समसूतकगन्धयोः
कज्जलीं हेमपत्राणि लेपयेत् समया
काञ्चनारत्वचः कल्कैर्मूषायुग्मं
धृत्वा तत् संपुटे गोलं मृन्मूषासंपुटे
निधाय सन्धिरोधञ्च कृत्वा संशोध्य
वह्निं खरतरं कुर्य्यादेवं दद्यात् ४८
निरुत्थं जायते भस्म सर्व्वकर्मसु
काञ्चनारिप्रकारेण लाङ्गली हन्ति
लाङ्गली करिहारी।
ज्वालामुखी तथा दग्धा तथा हन्ति सम
शिलासिन्दूरयोश्चूर्णसमयोरर्कदुग्धकैः
सप्तधा भावनां दद्याच्छोषयेच्च पुनः पुनः
ततस्तु गलिते हेम्नि कल्कोऽयं [illegible]
पुनर्नवेदतितरां यथा कल्को विलीयते।
एवं वेलात्रयं दद्यात् कल्कं [illegible]
एवं मारितस्य सुवर्णस्य गुणाः।

सुवर्णं शीतलं हृद्यं बल्यं गुरु रसायनम्।
स्वादु तिक्तञ्च तुवरं पाके च स्वादु
पवित्रं बृंहणं नेत्र्यं मेधास्मृतिमतिप्रदम्
हृद्यमायुष्करं [illegible]
विषद्वयक्षयोन्मादत्रिदोषज्वरशोषजित्
हृद्यं क्षपाय कामुकाय हितम्॥ ७॥
असम्यङ्मारितं स्वर्णं बलं वीर्य्यञ्च ४८
करोति रोगान् मृत्युञ्च तद्धन्याद्
इति ७।

अन्यत् सुवर्णशब्दे द्रष्टव्यम्॥

स्वर्णकणः, पुं, (स्वर्णवत् पीतः कणो यस्य।) कणगुग्गुलुः। इति राजनिर्घण्टः॥ (स्वर्णस्य कणः।) सुवर्णकणा च॥

स्वर्णकणिका, स्त्री, (स्वर्णस्य कणिका।) [illegible] कणा यथा,—

"कुर्य्यास्याः सरसि स्नानं याः स्याद्याश्च
निःसृताः स्वर्णकणिकास्ता वहन्ति"
इति कालिकापुराणे ८१

स्वर्णकायः, पुं, (स्वर्णं इव पीतः कायो यस्य।) गरुडः। इति हेमचन्द्रः॥ [illegible] त्रि॥

स्वर्णकारः, पुं, (स्वर्णं स्वर्णालङ्कारं करोतीति। स्वर्ण+कृ+अण्।) जातिविशेषः। सेकरा इति भाषा। तत्पर्य्यायः। नाड़िन्धमः २ कलादः ३ मुष्टिकः ४ हेमकारः ५ रुक्मकारः ६ [illegible] ७। इत्यमरः। २। १०। ८॥ ८। इति शब्दरत्नावली॥ हेम[illegible] इति जटाधरः॥ तस्योत्पत्तिर्यथा,—

स्वर्णद्रौति ...

... इव इव ... स्पातः ।
... स्वर्णकृत् ... ।
... विलिपना गरा: ॥
... च ।
... तस्य सर्वकर्म ... ॥
... ना ... नाम् ... ।
... ॥"
... । १० । १८—२३।८१
... यथा,—
... यो ... ।
... ॥"
... । ८५।१२८॥
... स्वर्णकारं करोतीति ।
... । इति शब्द-
...) स्वर्णकारः । इति शब्द-

...ती, (स्वर्णवर्णा दन्तो ।) कविरा-
... । तत्पर्यायः । हेमदन्ती २
... ३ ... ४ ... ५ विधा-
... ६ ... ७ ... कामफलप्रदा ८ । चम्पा
... पुष्पी ९ कामफलप्रदा ८ ।

... सर्वं ... ।
... च ॥
... विषकफापहः ।
... परः ॥"
इति राजनिर्घण्टः ॥

...री, स्त्री, (स्वर्णवर्णा चौरी ।) ओषधि-
... । तत्पर्यायः पटुपर्णी २ हैमवती ३
... । इत्यमरः । २ । ४ । १५८ ॥
...वती ४ । इयं पीतचोरा नाग-
... स्वर्णचीर्याम् । इयं पीतचोरा नाग-
...आरा ।
पयस्तस्या हिमवद्भूमिसम्भवा ।
... तन्मूलं नागजीवन-
मिति ॥"
... पर्णानि यस्याः पटुपर्णी
... इति दंष् । हिमवति जाता हैमवती
... स्वर्णमिव पीतत्वात् चोरमस्याः स्वर्ण-
... हिमवदुत्पत्तिस्थानयोगात्
... नदादिः । ... यतः नाम्नस्वर्यं
... । ... इति भरतः ॥ ० ॥ अपि च ।
... स्वर्णाह्वा रुक्मिणी तथा ।
स्वर्णचीरी स्वर्णदुग्धा स्वर्णाह्वा रुक्मिणी तथा ।
...र्णा हेमदुग्धी च हेमचोरी च काञ्चनी ॥
स्वर्णचीरी हिमा तिक्ता क्रमिपित्तकफापहा ।
मूत्रकृच्छ्राश्मरीशोफदाहज्वरहरा परा ॥"
इति राजनिर्घण्टः ॥

स्वर्णगैरिकं, क्ली, (स्वर्णवत् पीतं गैरिकम् ।) सुवर्णगैरिकम् । वर्णक् माटी इति भाषा । इति राजनिर्घण्टः ॥ अस्य विवरणं गैरिक-शब्दे द्रष्टव्यम् ॥

स्वर्णग्रीवा, स्त्री, (स्वर्णवर्णा ग्रीवा यस्याः ।) नाटकशैलपूर्वभागाश्रितस्रुतनदीविशेषः । यथा,—
"या निःसृता पूर्वभागात् तस्माद्गिरिवरान्नदी ।

स्वर्णद्रौति त्रियामा सा गङ्गामहानदी ॥"
इति कालिकापुराणे ८२ अध्यायः ॥

स्वर्णचूडः, पुं, (स्वर्णवर्णा चूडा यस्य ।) पक्षि-विशेषः । यथा,—
"चाषः किकीदिविः स्वर्णचूडोऽथ पीतमुण्डकः ॥"
इति हेमचन्द्रः ॥

स्वर्णजं, क्ली, (स्वर्णात् जायते इति । जन + डः) वङ्गम् । यथा,—
"यद् वपुः स्वर्णजलागजीवने
गदहरे गलपदविनष्टे ।
व्यालमसंज्ञ समस्त नागजं
कलौ स्मर्त्तास्तकर्मिहन्ति धपि ॥"
इति हेमचन्द्रः ॥

स्वर्णजीवन्ती, स्त्री, (स्वर्णवर्णा जीवन्ती ।) क्षुप-विशेषः । सोनाजीयन्ती इति हिन्दी भाषा । तत्पर्यायः । हेमाह्वा २ हेमजीवन्ती ३ स्वर्ण-पर्णी ४ सुजीवन्तिः ४ हिमायया ५ स्वर्णपर्णी ६ सुजी-... कर्णिका ८ हेमपुष्पा ... ७ स्वर्णजीवा ८ ... हेमलता १३ । १० स्वर्णलता ११ हेमवल्ली १२ हेमलता १३ । अस्या गुणाः । वृष्यत्वम् । मधुरत्वम् । चक्षुष्य-त्वम् । शिशिरत्वम् । वातपित्तास्रदाहनाशि-त्वम् । बलवर्द्धकत्वञ्च । इति राजनिर्घण्टः ॥

स्वर्णदी, स्त्री, (स्व. स्वर्गस्य नदी ।) मन्दाकिनी । इति शब्दमाला ॥ हरिकाली । इति त्रिकाण्डशेषः । १ । १ । ५२ ॥ सा तु कामा-राजनिर्घण्टः ॥ ललितगङ्गा । सा तु कामा-ख्यायाः पूर्वभागे दिक्करवासिन्याः प्रान्ते ललिता । यथा,—
"नद्याः स्वर्णश्रिया पूर्वं नदी ललिताख्यया तथा ।
ललिताख्यायाः पूर्वभागे नदी सौमामनाख्यया ।
सौमामनायाः पूर्वस्यां नदी नाम्ना हयोदका ॥
ततः पूर्वं कामरूपपीठान्ते जगतां प्रसूः ।
जगन्माया महामाया देवी दिक्करवासिनी ॥
एता या कथिता नद्यः सकला दक्षिणस्रवाः ।
तासु स्नात्वा च पीत्वा च स्वर्गलोकमवाप्नुयात् ॥
तासु स्नात्वा च पीत्वा च स्वर्गलोकमवाप्नुयात् ॥ स्वर्णदी ।
प्रान्ते दिक्करवासिन्याः सदा वहति स्वर्णदी ।
ललितगङ्गाख्यया लोके साक्षात् गङ्गाफलप्रदा ॥
ललितगङ्गाख्यया लोके साक्षात् गङ्गाफलप्रदा ॥
सा भूमिपीठसंस्था तु देवी दिक्करवासिनी ।
अन्तर्जलैः प्लावयन्ती याति प्रत्यक्षतां सुरैः ॥
ललितगङ्गाजले स्नात्वा दृष्ट्वा शम्भुं हरिं
विधिम् ।
इष्ट्वा ललितकान्ताख्यां पुनर्योनौ न जायते ॥"
इति कालिकापुराणे ८२ अध्यायः ॥

स्वर्णदीधितिः, पुं, (स्वर्णवत् दीधितिः किरणं यस्य ।) अग्निः इति त्रिकाण्डशेषः ॥

स्वर्णद्रुः पुं, (स्वर्णवर्णो द्रुः ।) आरग्वधः । इति राजनिर्घण्टः ॥

स्वर्णपक्षः, पुं, (स्वर्णवत् पीतौ पक्षौ यस्य ।) गरुडः । इति त्रिकाण्डशेषः ॥

स्वर्णपद्मा, स्त्री, (स्वर्णस्य पद्मं यस्यामिति ।) स्वर्गङ्गा । इति शब्दरत्नावली ॥

स्वर्णपाटकः, पुं (स्वर्णं पाटयतीति । पट + णिच् + ण्वुल् ।) टङ्कणः । इति शब्दमाला ॥ (क्वचित् स्वर्णपाचकः पर्यायः । इति वैद्यकरत्नमालायाम् ॥)

स्वर्णपाचकः । इति वैद्यकरत्नमालायाम् ॥)

स्वर्णपारेवतं, क्ली, (स्वर्णवर्णं पारेवतम् ।) महा-पारेवतम् । इति राजनिर्घण्टः ॥

स्वर्णपुष्पः, पुं, (स्वर्णवर्णं पुष्पमस्य ।) आरग्वधः । इति राजनिर्घण्टः । चम्पकपुष्पे-चम्पकः । इति राजनिर्घण्टः ।

... पूजाफलं यथा,—
"माघे चम्पकपुष्पेण योऽर्चयेत् कमलापतिम् ।
स गच्छेत् परमं धाम विमुक्तः सर्वपातकैः ॥
यावन्ति स्वर्णपुष्पाणि दीयन्ते चक्रपाणये ।
तावद्युगसहस्राणि स्तूयते विष्णुमन्दिरे ॥
मेरुतुल्यसुवर्णानि दत्त्वा भवति यत् फलम् ।
एकेन स्वर्णपुष्पेण दत्त्वा भवति तत् फलम् ॥
सुवर्णपुष्पं विप्रेन्द्र सर्वदा केशवप्रियम् ।
माघे मासि विशेषेण पवित्रं केशवार्चने ॥
सुवर्णकुसुमैर्दिव्यैर्येन नाराधितो हरिः ।
सुवर्णाद्यैः स भवेज्जन्मजन्मनि ॥"
... सुवर्णाद्यैः स भवेज्जन्मजन्मनि ॥" ... ८ अध्यायः ॥
इति पाद्मे क्रियायोगसारे ८ अध्यायः ॥
इति शब्दचन्द्रिका ॥

स्वर्णपुष्पा, स्त्री, (स्वर्णवत् पुष्पं यस्याः) कलि-कारिः । स्वर्णली । सातला । इति राज-निर्घण्टः ॥ (स्वर्णोऽस्या गुणाः सातलावत् ॥)

स्वर्णपुष्पी, स्त्री, (स्वर्णवत् पीतं पुष्पं यस्याः । ङीष् ।) आरग्वधः । इति शब्दचन्द्रिका ॥

स्वर्णकेतकी । इति राजनिर्घण्टः ॥

स्वर्णफला, स्त्री, (स्वर्णवत् पीतं फलं यस्याः ।) पीतरम्भा । इति राजनिर्घण्टः ॥

स्वर्णवणिक्, [ज्] पुं, (स्वर्णस्य वणिक्) वर्ण-सङ्करजातिविशेषः । सोनार वेणे इति भाषा ॥
तस्य कर्मविपाको यथा,—
"तैलचौरस्तैलकीटो मूर्द्धि कीटस्तिजन्मकम् ।
ततो भवेत् स्वर्णकारो जन्मैकं दुष्टमानसः ॥
ततो भवेत् स्वर्णकारो जन्मैकं दुष्टमानसः ॥ स्वर्णवणिग् भवेत् ।
तमःकुण्डे वर्षशतं स्थित्वा स्वर्णवणिग् भवेत् ।
अलेकश्च दुराचारो जन्मैकं करणो भवेत् ।
विशेकलिपिकर्त्ता च मसदातुर्धनं हरेत् ।
... मातुर्मांसं न खादितम् ...
कायस्थेनोदरस्थेन मातुर्मांसं न खादितम् ...
तत्र नास्ति कृपा तस्य दन्ताभावेन केवलम् ...
स्वर्णकारः स्वर्णवणिक् कायस्थश्च व्रजेषु ...
नरेषु मध्ये ते धूर्त्ताः कृपाहीना महीतले ...
हृदयं क्षुरधाराभं तेषाञ्च नास्ति सादरम् ...
शतेषु सज्जनः कोऽपि कायस्थो नेतरी च ...
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८५।१२ ...

स्वर्णबिन्दुः, पुं, (स्वर्णस्य बिन्दुर्यत्र ।). ... सुवर्णकणिका ... इति त्रिकाण्डशेषः ॥

स्वर्णभृङ्गारः, पुं, (स्वर्णवर्णो भृङ्गारः ।) सु... भृङ्गराजः । इति राजनिर्घण्टः ॥ सु...

... ॥

स्वर्णमहा, स्त्री, नदीविशेषः । यथा, ...
"ततोमायाः शरीरात्तु संस्रवन्ति ...
ततः स्वर्णमहा नाम स्वर्णयीः सर्व...
एतासु चैत्रमासि तु स्नात्वा ...
कृष्णपक्षे चतुर्दश्यां त्रिक..."

चिरं मित्रपदे स्थित्वा शेषे ब्रह्मपदं व्रजेत्।
भूमारवंमन: पश्चात् सार्व्वभौमनृपो भवेत्॥"

इति कालिकापुराणे ८२ अध्यायः॥

स्वर्णमाक्षिकं, क्ली, (स्वर्णवत् पीतं माक्षिकम्।) स्वनामख्यात उपधातुः। तस्य नामानि गुणाश्च।
"स्वर्णमाक्षिकमाख्यातं तापिच्छं मधुमाक्षिकम्।
तीक्ष्णं माक्षिकधातुश्च मधुधातुश्च स स्मृतः॥
किञ्चित्सुवर्णसाहित्यात् स्वर्णमाक्षिकमीरितम्।
उपधातुः सुवर्णस्य किञ्चित्स्वर्णगुणान्वितम्॥
तथा च काञ्चनाभावे दीयते स्वर्णमाक्षिकम्।
किन्तु तस्मात्तदल्पत्वात् किञ्चिद्धीनगुणास्ततः॥
न केवलं स्वर्णगुणा वर्त्तन्ते स्वर्णमाक्षिके।
द्रव्यान्तरस्य संसर्गात् सन्त्यन्येऽपि गुणास्ततः॥
सुवर्णमाक्षिकं स्वादु तिक्तं वृष्यं रसायनम्।
चक्षुष्यं वस्तिरुक्कण्डुपाण्डुमेहविषोदरम्।
अर्शः शोथं विषं कण्डूं त्रिदोषमपि नाशयेत्॥"

अशुद्धस्वर्णमाक्षिकस्य दोषमाह।
"मन्दानलत्वं बलहानिमुग्रां
[illegible] मसृणाम्।
[illegible]
कुर्य्यादसाध्यं खलु माक्षिकं च॥"

[illegible] शोधनमाह।
"माक्षिकस्य त्रयो भागा भागैकं सैन्धवस्य च।
[illegible] दद्यात्।
[illegible]
[illegible] स्वर्णमाक्षिकमारणं [illegible]॥"

[illegible] यथा,—
"[illegible] पुटेत्।
[illegible] स्वर्णमाक्षिकम्॥"

इति भावप्रकाशः।

([illegible] यथा —
"स्वर्णं [illegible]।
[illegible]
[illegible] माक्षिकम्॥"
इति वैद्यकरसेन्द्रसारसंग्रहे [illegible]।)

स्वर्णयूथी, स्त्री, (स्वर्णवर्णा यूथी।) [illegible]। तत्पर्य्यायः। [illegible] २ [illegible] ३ [illegible] ४। इति [illegible]॥ [illegible]
इति शब्दरत्नावली॥

स्वर्णरेखा, स्त्री, (स्वर्णस्य रेखा।) [illegible]। [illegible]॥ ([illegible] कुण्डलम्॥)

स्वर्णरेणुः, स्त्री, (स्वर्णस्य रेणुः।) [illegible]
[illegible]
[illegible]
"[illegible] स्वर्णं
[illegible]
[illegible]
[illegible]॥")

स्वर्णवल्कलः, पुं, (स्वर्णवत् वल्कलं यस्य) श्योणाकवृक्षः। इति शब्दचन्द्रिका॥

स्वर्णवल्ली, स्त्री, (स्वर्णवर्णा वल्ली।) लताविशेषः। तत्पर्य्यायः। रक्तफला २ काकायुः ३ काकवल्ली ४। अस्या गुणाः। शिरःपीडात्रिदोषनाशित्वम्। दुग्धदायकत्वञ्च। इति राजनिर्घण्टः॥ (तथास्याः पर्य्याया गुणाश्च।
"स्वर्णवल्ली रक्तफला काकायुः काकवल्लरी।
स्वर्णवल्ली शिरःपीडां त्रिदोषान् हन्ति दुग्धदा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

स्वर्णशेफालिका, स्त्री, (स्वर्णवर्णा शेफालिका।) आरग्वधः। इति शब्दमाला॥ पीतशेफालिका च॥

स्वर्णाङ्गः, पुं, (स्वर्णवत् पीतमङ्गं यस्य।) आरग्वधः। इति राजनिर्घण्टः॥ (तथास्य पर्य्यायाः।
"आरग्वधो राजवृक्षः शम्पाकश्चतुरङ्गुलः।
आरेवतो व्याधिघातः कृतमालः सुवर्णकः॥
कर्णिकारो दीर्घफलः स्वर्णाङ्गः स्वर्णभूषणः।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

स्वर्णारिः, पुं, (स्वर्णस्य अरिः।) गन्धकम्। इति वैद्यकम्॥

स्वर्णुली, स्त्री, क्षुपविशेषः। तत्पर्य्यायः। हेमपुष्पी २ स्वर्णपुष्पा ३ अधःगा ४। अस्या गुणाः। कटुत्वम्। शीतलत्वम्। कषायत्वम्। कृमिनाशकत्वञ्च। इति राजनिर्घण्टः॥

स्वर्त्त, क गत्यातङ्के। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-आतङ्के अक०-सेट्।) तङ्को दुःखेन जीवनम्। क, स्वर्त्तयति जनं गच्छति दुःखेन जीवति वेत्यर्थः। अभिधानात्। इति दुर्गादासः॥

स्वर्द, ङ, प्रीतिविशेषः। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) प्रीतिः प्रीतिकरणम्। निष्टम्भोपादानम्। ङ, स्वर्दते विशिष्टाध्वादं स्वादने च रसायनमिति रमानाथः। इति दुर्गादासः॥

स्वर्णदी, स्त्री, (स्वः स्वर्गस्य नदी।) स्वर्गङ्गा। इत्यमरः॥ स्वः स्वर्गस्य नदी स्वर्णदी पृ० न इति [illegible] अल्वम्। पूर्व्वपदे संज्ञायां अल्पमिति पाठात् प्रकरणे गिरिनद्यादीनामुपसंख्यानमिति वा णत्वम्। इति भरतः॥ स्वर्णदी इत्यत्र णत्वं [illegible]। इति भरतः॥

स्वर्भाणव, पुं, (स्वर्भानोरिदं [illegible]। स्वर्भानु + अण्।) [illegible]। इति राजनिर्घण्टः॥

स्वर्भानुः, पुं, (स्वः आकाशे भातीति। स्वर् + भा + "[illegible]" [illegible] इति नुः।) राहुः। इत्यमरः। १। ३। २६॥ (यथा, माघे। २। ३८।
"[illegible] मम्।
[illegible]॥"
[illegible]। यथा, [illegible]। १०। ६१। ११।
"भानुः सुभानुः स्वर्भानुः
चन्द्रभानुर्बृहद्भानुरतिभानुस्तथाष्टमः।
श्रीभानुः प्रतिभानुश्च सत्यभामात्मजा"

स्वर्भानुसूदनः, पुं, (स्वर्भानोः सूदनं) सूर्य्यः। इति पुराणम्॥ (यथा, ३। १०१। १८।
"तच्छ्रुत्वा भगवान् देवो भानुः
उवाच तं तथेत्येव कर्णं सूर्य्यः [illegible]"

स्वर्यातः, त्रि, (स्वः स्वर्गं यातः।) मृतः। याज्ञवल्क्यः।
"पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा।
तत्सुतो गोत्रजो बन्धुः शिष्यः
एषामभावे पूर्व्वस्य धनभागुत्तरोत्तरः।
स्वर्यातस्य ह्यपुत्रस्य सर्व्ववर्णेष्वयं [illegible]"
इति

स्वर्लोकः, पुं, (स्वरेव लोकः।) स्वर्गः। शब्दरत्नावली॥ (यथा, भागवते २।१।
"भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य
स्वर्लोकः कल्पितो मूर्ध्ना इति वा लोककल्पना")

स्वर्व्वधूः, स्त्री, (स्वः स्वर्गस्य वधूः।) [illegible]। इति हेमचन्द्रः॥ (यथा, १७। ११।
"अथाजगाम भूलोकं तामादाय [illegible]
स्वर्वधूदर्शनार्थमपंयन् [illegible]
स्वर्गीयसीमा [illegible]॥"

स्वर्व्वापी, स्त्री, (स्वः स्वर्गस्य वापी) [illegible]। इति हेमचन्द्रः॥

स्वर्व्वेश्या, स्त्री, (स्वः स्वर्गस्य वेश्या।) अप्सरसः। इत्यमरः। १। १। ५२॥

स्वर्व्वैद्यौ, पुं, (स्वः स्वर्गस्य वैद्यौ।) कुमारौ। तत्पर्य्यायः। अश्विनीसुतौ २ [illegible] ३ अश्विनौ ४ दस्रौ ५ आश्विनेयौ ६। [illegible] अमरः। १। १। ५५॥ [illegible] भावः। इति स्वामी। सर्व्वं पदं [illegible] नाम्ना पञ्चालिकायां पञ्चत्वमाप्ता यथा,—
"नासत्यश्चैव दस्रश्च स्मृतौ द्वौ [illegible]"
इति मार्कण्डेयपुराणम्॥ इति [illegible]

स्वलीनः, पुं, (स्वस्मिन् लीनः।) [illegible] यथा,—
"[illegible] लीनो [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]॥"
इति वह्निपुराणे [illegible]॥

...सन्य: ।) स्वल्प: । यथा,—
...मौर्णि प्रत्ययाणो न विद्यते ।
...र्मस्य त्रायते महतो भयात् ॥"
...ति भगवद्गीतायाम् । २ । ४० ॥
...] पुं, (स्वल्प: केशरोऽस्यास्तीति ।
...ोविदार: । इति राजनिर्घण्ट: ॥
...स्व यथा,—
...स्वर्णिक: कुद्दालो युगपत्रक: ।"
...ासपुष्पस्य पल्लक: स्वल्पकेशरो ॥"
...प्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
...[न्] पुं, (स्वल्प: केशोऽस्यास्तीति ।
...) भृतकेश: । यथा,—
...र्मी स्वल्पकेशी च भृतकेशय केशक् ॥"
इति शब्दचन्द्रिका ॥
...दीर्घविशिष्टे, त्रि ॥
...तक:, पुं, (स्वल्पानि पत्राणि यस्य । कप् ।)
...ाक: । न तु मधूकभेद: । यथा,—
...ाक: । स तु मधूकोऽसौ गिरिज: स्वल्पपत्रक: ॥"
इति रत्नमाला ॥
...ल्पा, स्त्री, (स्वल्पं फलं यस्या: ।) कपूर-
...: । तत्पर्य्याय: । कच्छूरी २ ...
...त्रक: ४ विदर्भी ५ कफघ्नी ६ ...
...र्णा ७ । अस्या गुणा: ...
...राजनिर्घण्ट: ॥
...िनी, स्त्री, (स्वस्मिन् पिधानचे वसतीति ।
...+णिनि: । ङीप् ।) जटा ... पितृ-
...स्थिता । तत्पर्य्याय: । चिरिण्टी २ । इत्य-
...पितृगृहस्थिता:
...र्य: । "हे ऊढायामनूढायां वा पितृगृहस्थिता:
...म् । पितृकुलवेहात् चिरं पटति गच्छति
...टी । इट गतौ अन् मनोषादि: ।
...चिरण्टी । इट गतौ ... द्वितीयवयसि
...र्वासिन्यां चिरिण्टी स्यात् द्वितीयवयसि
स्त्रियाम् ॥"
इति रुद्र: ॥
...त्यक्ते । स्वेषु ज्ञातिषु वसति स्ववासिनी
... सुखेन वसति सुवासिनीति
...दिवासिन् । सुखेन ...टीकायां भरत: ॥
...वीड़ा: ।" इत्यमरटीकायां भरत: ॥
...बीज:, पुं, (स्वं एव बीजं यस्य ।) आत्मा । इति
... निजकार्य्ये स्वोयवीर्य्यं च क्लो ॥
...हारावली ॥ निजकार्य्ये स्वोयवीर्य्यं क्षिप्यते इति ।
...स्र, [स्त्री] स्त्री, (सुष्ठु अस्यते क्षिप्यते इति ।
सु+अस्+"सुञसिभ्यां ...।" उणा० २ । ९७ ।
...ति सन् यणादेशय । भगिनी । इत्यमर: ।
... २ । ५० ।
। ६ । २८ ॥ (यथा, मनु: । २ । ५० ।
"मातरं वा स्वसारं वा मातुलां भगिनीं निजाम् ।"
...भिक्षेत भिक्षां प्रथमं या चैनं नावमानयेत् ॥")
...स्क, ङ गत्याम् । इति कविकल्पद्रुम: ॥ (भ्वा०-
...आत्म०-सक०-सेट् ।) ङ, स्वस्कते । इति दुर्गा-
दास: ॥
स्वस्ति, व्य, (सु+अस्+"भावसे: ।" उणा० ४ ।
१८० । इति ति: । बहुलवचनात् न भूभाव: ।)
आशी: । क्षेमम् । (यथा, महाभारते । ३ ।
१११ । १३ ।
"स्वस्ति प्राप्नुहि कौन्तेय काम्यकं पुनराव्रजम् ॥"
पुण्यादि । इत्यमर: । ३ । ४ । २४० ॥ आशी-
र्वाद: । क्षेमं निरुपद्रव: । पुण्यं पाप-
क्षयार्थम् । एषु । आदिना मङ्गलादौ च
प्रयोज्यम् । स्वस्ति मङ्गलाशीर्व्वादपापनिर्णेजनादि-
ष्वपि । स्वस्ति मङ्गलाशीर्व्वाद पाप इति भरत: ॥ दानस्वीकार-
स्यपि । इति भागुरि: । इति भरत: ॥ दानस्वीकार-
मन्त्र: । यथा, "श्रोमित्युक्त्वा प्रतिग्रह्य स्वस्ती-
त्युक्त्वा सावित्रीं पठित्वा कामस्तुतिं पठेत् ॥"
इति शुद्धितत्त्वम् ॥ तद्योगे चतुर्थी स्यात् ।
यथा,—
"स्वाहाग्नये स्वधा पित्रे स्वस्ति धात्रे नम: मते ॥"
इति मुग्धबोधव्याकरणम् ॥
(क्लोलिङ्गेऽपि दृश्यते । यथा, भागवते ।
४ । २४ । ३३ ।
"जितं त आत्मविद्वर्य स्वस्तये स्वस्तिरस्तु मे ।
भवता राधसा राद्धं सर्व्वस्मा आत्मने नम: ॥"
तथा च वाजसनेयसंहितायाम् । १३ । १८ ।
"अग्निष्टाभिपातु मह्या स्वस्त्या छर्दिषा शन्त-
मेन ॥")
स्वस्तिक:, पुं, क्लो, (स्वस्ति क्षेमं कायति कथय-
तीति । कै+क: ।) आढ्यानां गृहविशेष: ।
इत्यमर: । २ । २ । १० ॥ तस्य लक्षणं यथा,—
"अलिन्दं प्राक्पुरं यत् स्यादलिन्द्यानुगतं भवेत् ।
तत्प्राक्ज्ञमपरं वान्यो तदन्तगतोऽपर: ॥"
इति भरतधृतवाक्य: ॥ वितानकमात: । इति
मन्त्रशास्त्रग्रन्थे द्रष्टव्यम् ॥ वितानकमात: । इति
राजनिर्घण्ट: ॥
("गिरिवार: गिरिवर: स्वस्तिक: सुनिषण्णक: ।
श्रावारक: सूचिपत्र: पर्णक: कुक्कुट: शिखो ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
योगाङ्गासनविशेष: । तस्य लक्षणं योगशास्त्रे
द्रष्टव्यम् ॥
स्वस्तिक:, पुं, (स्वस्ति क्षेमं कायतीति । कै+क:)
तण्डुलचूर्णनिर्म्मितचतुष्कोणा-
मङ्गलद्रव्यम् । तत्तु तण्डुलचूर्णनिर्म्मितचित्रकोणा-
कारांशवशद्रव्यम् । चतुष्पथ: । लशुन: ।
इति मेदिनी ॥ पिष्टकविकार: । रक्तालिक: ।
इति विश्व: ॥ जिनानां चतुर्व्विंशतिचिह्नान्त-
र्गतचिह्नविशेष: । यथा,—
"हयो गजोऽस्य: ... क्रौञ्चोऽब्जं स्वस्तिक:
शशी ।
मकर: श्रीवत्स: खड्गी महिषा सूकरस्तथा ॥
श्येनो वज्रं मृगश्छागो नद्यावर्त्तो घटोऽपि च ।
कूर्म्मो नीलोत्पलं शङ्ख: फणी सिंहोऽर्हतां
ध्वजा: ॥"
इति हेमचन्द्र: ॥
इति त्रिकाण्डशेष: । (सर्पफणा-
रसोनक: । इति त्रिकाण्डशेष: । यथा, रामायणे ।
स्थितनीलरेखाविशेष: । यथा, रामायणे ।
१ । १८५ ।
"गिरिभि: पूर्णमिन्नाभि: व्यक्तस्वस्तिकलक्षणै: ।
वमन्त: पावकं घोरं ददृशुर्दशनै: शिला: ॥")
स्वस्तिमुख:, पुं, (स्वस्ति मुखे प्रथमे वदने वा
यस्य ।) लेख: । ब्राह्मण: । वन्दि... इति
मेदिनी ॥
स्वस्तिवाचनं, क्लो, (स्वस्ति मङ्गलस्य वाचनम् ।)
माङ्गल्यकर्म्मारम्भकालीनवक्ष्यमाणमन्त्रोच्चारण-
पूर्व्वकतण्डुलविकिरणम् । तन्मन्त्रो यथा । अमुक-
कर्म्मणि पुण्याहं भवन्तो ब्रुवन्तु । इत्युक्ते
पुण्याहमिति ब्राह्मणैस्त्रिरुक्ते अमुककर्म्मणि
ऋद्धिं भवन्तो ब्रुवन्तु । तत: ऋद्ध्यतामिति
ब्राह्मणास्त्रिर्ब्रूयु: । एवं स्वस्ति भवन्तो ब्रुवन्तु ।
इत्युक्ते स्वस्ति इति ब्राह्मणास्त्रिर्ब्रूयु: । तत: ॥
स्वस्ति न इन्द्रो वृद्धश्रवा: स्वस्ति न: पूषा
विश्ववेदा: । स्वस्ति नस्तार्क्ष्योऽरिष्टनेमि: स्वस्ति
नो बृहस्पतिर्दधातु ॥ इति पठित्वा तण्डुलान्
विकिरेत् ॥ * ॥ प्रमाणं यथा, व्यास: ।
"सम्पूज्य गन्धपुष्पाद्यैर्ब्राह्मणान् स्वस्ति वाचयेत् ।
धर्म्मे कर्म्मणि माङ्गल्ये संग्रामाद्भुतदर्शने ॥"
धर्म्मे कर्म्मणि इति कर्म्मनिर्देशात् अमुक-
कर्म्मणि स्वस्ति भवन्तो ब्रुवन्तु इति ब्रूयात् । यम: ।
"पुण्याहवाचनं दैवे ब्राह्मणस्य विधीयते ।
एतदेव निरोङ्कारं कुर्य्यात् क्षत्रियवैश्ययो: ॥
ओङ्कारं ब्राह्मणे ब्रूयात् निरोङ्कारं महीपतौ ।
उपांशु च तथा वैश्ये शूद्रे स्वस्ति प्रयोजयेत् ॥"
इत्युद्वाहतत्त्वम् ॥ * ॥
अपि च ।
नन्द उवाच ।
"अलक्षितोऽस्मिन् रहसि मामकैरपि गोव्रजे ।
कुरु द्विजातिसंस्कारं स्वस्तिवाचनपूर्व्वकम् ॥"
इति श्रीभागवते १० स्कन्धे ८ अध्याय: ॥
स्वस्थ:, त्रि,(स्वस्मिन् तिष्ठतीति । स्व+स्था+क: ।
सुस्थ: । यथा,—
"दुर्गे स्मृता हरसि भीतिमशेषजन्तो:
स्वस्थै: स्मृता मतिमतीव शुभां ददासि ।"
इति देवीमाहात्म्यम् ॥
("स्वस्थस्यापि समधातूनां साम्यानुग्रहार्थमेव
... रसगुणमाहारविकारांश्च पर्य्यायेण
...उपयोक्तुम् । मात्रासमाख्यातानिकप्रकार...
भूयिष्ठोपयुक्तानामविपरीतकरगुणलक्षण...
...ातचेष्टया समभिच्छन्ति कर्त्तुम् । ...
...ात्मगुणविपरीतानां हि कर्म्मणां ...
विकाराणाञ्च क्रमेणोपयोग: सम्यक् । ...
योगोऽनुदीर्णानां सन्धारणमसन्धारण...
नाञ्च गतिमतां ... वर्ज्जनम् । ...
... साम्यानुग्रहार्थमुपदिश्य...
इति चरके शारीरस्थाने षष्ठेऽध्याये ॥ ...
"तथायोलाय सततं स्वस्थेनारोग्यमिच्छ...
धीमता यदनुष्ठेयं तत् सर्व्वं संप्रवक्ष्यते ॥
...टलपवनं द्वादशाङ्गुलमायतम् ...
...कनिष्ठिकापरीणाहम्...
...द्रवस्वेदः सर्वे वातार्तिहारिणः ॥"
...उपस्वेदय ताभ्यां संज्ञितः । उप-
...उपनाहस्वेदः ।
...तापोष्माणौ प्रायः श्लेष्मघ्नौ मरुदोषिनौ ।
...वातघ्नः पित्तरोगे द्रवो हितः ॥"
...महाव्याधौ शीते स्वेदो महान् स्मृतः ।
...महाव्याधौ शीते स्वेदो मध्यमे मध्यमो मतः ॥
...दुर्बलस्वेदो मध्यमे मध्यमो मतः । कफा-
...रक्षणः स्वेदो रूक्षः स्निग्धः कफा-
निले ॥"
...रूक्षयतीति रूक्षणः नन्द्यादित्वात्
...
...स्वेदोऽति वाते कोष्णेऽहं रवेः करात् ।
...मार्गगमनं गुरुप्रावरणं भुवम् ॥
...व्यायामसंभारांश्च सेवितामयमुक्तये ।
...रूपं प्रदातव्यं वस्तितापि हि देहिनाम् ।
...पोयाय यो देवित् पूर्वं स्वेदाय ते मताः ।
...तः उर्ध्वं वयोऽपोह मगन्धकर्मस्तथा ।
...गतयो सन्तः गमवेक्ष्य कर्मणः ॥"
...दई पयार्जति मुखते ।
...वेधा हृत सर्वं सहमर्दे तथा ।
...अतिक्रान्ति वा यथात् ...
...स्वेदाविवाते च औदेव ता ...
...वातुभिता दोषा स्वेदनिम्य ...
...माग्य कोष्ठान्तगता यान्ति विदविनाम ।
...

गीतैर्गर्दवस्त्रादिभिः ॥
"अजीर्णो दुर्बलो मेही क्षतक्षीणः पिपासितः ।
अतीसारी रक्तपित्ती पाण्डुरोगी तथोदरी ।
मेदस्वी गर्भिणी चैव न हि स्वेद्या विजानता ।
स्वेदादेषां यान्ति देहा विनाशं
सो साध्यत्वं यान्ति चैषां विकाराः ॥
एतानपि मृदुस्वेदैः स्वेदसाध्यानुपाचरेत् ।
मृदुस्वेदं प्रयुञ्जीत तथा हृन्मुष्कदृष्टिषु ॥
मतिस्वेदात् सन्धिपीडा दाहतृष्णा क्लमो भ्रमः ।
पित्तासृक्पिडकाकोपस्तत्र शीतैरुपाचरेत् ॥"
तत्र तापस्वेदमाह ।
"तत्र तापाभिधः स्वेदो वालुकावस्त्रपाणिभिः ।
...कर्पटैः ॥" ७ ॥
प्रतप्तैरसमिहैव कार्येऽङ्गकवेदिति ॥" ८ ॥
उष्मस्वेदमाह ।
"अथवा वातनिर्णाशद्रव्यक्काथरसादिभिः ।
कुम्भीं पूरयित्वा पार्श्वे छिद्रं विधाय च ॥
विमुच्याच्छं विगण्डस्थ जानुनां काष्ठजामुत ।
पडङ्गुलास्यां गोपुच्छां नाडीं युञ्ज्यात् द्विह-
स्तिकाम् ॥
सुखोपविष्टं स्वभ्यक्तं गुरुप्रावरणावृतम् ।
हस्तिगुण्डिकया नाड्या स्वेदयेद्वातरोगिणम् ॥"
पडङ्गुलास्या-
हस्तिगुण्डिकया नाड्या स्वेदमीकार्यादिम् । पडङ्गुलास्या-
विगण्डमिति स्वेदमीकार्यादिम् । गोपुच्छमिव
मिति मूले पडङ्गुलविशालमुखाम् । गोपुच्छमिव
क्रमकृशां तेनाग्रे गोपुच्छाग्रपरिमाणेन कृशां
नाडीं अतः सरल्याम् । द्विहस्तिकां हस्तद्वय-
परिमाणाम् । हस्तिगुण्डिकयेति हस्तिशुण्डवत्
क्रमकृशत्वात् नाड्या इयं संज्ञा ।
"पुरुषायाममात्रान्तु भूमिं संमार्ज्य खादिरैः ।
काष्ठैर्दग्ध्वा तथाभ्युक्ष्य क्षीरधान्याम्लवारिभिः ।
वातघ्नपत्रैराच्छाद्य शयानं स्वेदयेन्नरम् ।
एवं माषादिभिः स्विन्नैः शयानः स्वेदमाचरेत् ॥"
उपनाहस्वेदः ।
"तथोपनाहस्वेदश्च कर्याद्वातहरौषधैः ॥
प्रदिह्य देहं वातार्तं क्षीरमांसरसादिभिः ॥
अम्लपिष्टैः सलवणैः सुखोष्णैः स्नेहसंयुतैः ।
ततो ग्राम्यानूपमांसैर्जीवनीयगणेन च ॥
दधिसौवीरकक्षीरैर्वीरतर्वादिना तथा ।
कुलत्थमाषगोधूमैरतसीतिलसर्षपैः ।
शतपुष्पादेवदारुशेफालीस्थूलजीरकैः ।
एरण्डमूलबीजैश्च रास्नामूलकशिग्रुभिः ।
मिशिकृष्णाकुठेरैश्च लवणैरम्लसंयुतैः ।
प्रसारण्यश्वगन्धाभ्यां बलाभिर्दशमूलकैः ।
गुडूच्या वानराबीजैर्यथालाभं समाहृतैः ।
...
...
...

...पिण्डैः सुखोष्णैः पटस्थितैः । सेचनैः स्वेदयेत् ।
किंवा स्विन्नैः कोष्णैः पटस्थितैः ॥ * ॥ द्रवस्वेद-
माह ।
"द्रवस्वेदस्तु वातघ्नद्रव्यक्काथेन पूरिते ।
कटाहे कोष्ठके वापि सुपविष्टोऽवगाहयेत् ॥
सौवर्णं राजतं वापि ताम्रं लौहञ्च दारुजम् ।
कोष्ठकं तत्र कुर्वीतोच्छ्राये षड्विंशदङ्गुलम् ।
आयामे तावदेव स्याच्चतुष्कोणन्तु चिक्कणम् ॥"
पश्चात्तरमाह ।
"नाभेः षडङ्गुलं यावन्मग्नः क्काथस्य धारया ।
कोष्णया स्कन्धयोः सिक्तस्तिष्ठेत् स्निग्धतनु-
र्नरः ॥"
अयमर्थः । प्रथमतो वातघ्नद्रव्यक्काथेन कटाहं
पूरिते कोष्ठके कटाहे वा सुपविष्टस्तिष्ठेत्
अथवा नाभेः षडङ्गुलमूर्द्धं यावत् क्काथे मग्न
उपविष्टः । पश्चात् क्काथस्य धारया स्कन्धयोः
सिच्यमानस्तिष्ठेत् । तथा च कोष्ठकं परिपूर्णं
भवतीत्यर्थः । क्काथपक्षे प्रथमतः स्नेहाभ्यक्त-
तनुरुपविशेत् ।
"मुहूर्त्तं समारभ्य यावत् स्यात् घटिकाद्वयम् ।
तावत्तदवगाहेत यावदारोग्यनिश्चयम् ॥
एवं तैलेन दुग्धेन सर्पिषा स्वेदयेन्नरम् ।
एकान्तरे द्व्यन्तरे वा युक्तः स्नेहावगाहने ॥
एतावता क्वाथो द्रवस्नेह स्निग्धमेव कुर्वते ।"
स्नेहस्तु दिनमेकं द्वे वा दिने समतीत्य कुर्यात् ।
अग्निमान्द्यादृष्टेति भावः ।
"सिरामुखैर्लोमकूपैर्धमनीभिश्च तर्पयन् ।
शरीरे बलमाधत्ते युक्तः स्नेहावगाहने ॥
जलसिक्तस्य वर्द्धन्ते यथा मूले दुमाङ्कुराः ।
तथैव धातुवृद्धिर्हि स्नेहसिक्तस्य जायते ॥
नातः परतरः कश्चिदुपायो वातनाशनः ।
...
...ऽतिक्रमा ।"
इति भावप्रकाशः ॥
स्वेदचूषः, पुं, (स्वेदं चूषति निरसोति । चूष +
अण् ।) ... ।
स्वेदज, त्रि, (स्वेदात् जायते इति । जन + ड ।
...) ... ।
...
...

वति विकाराय करोपेभ्यो भवन्ति हि ॥
मादिरसख्यातो गण: संस्वेदजो मया ।
मामाविहितो ह्येष प्राक्कर्मवशज: स्मृत: ॥"
इति वह्निपुराणे काश्यपोयवंशनामाध्याय: ॥
नं, क्लो, (स्विद्+ल्युट् ।). स्वेद: । इति
दिनी ॥ स्वेदनयन्त्रं यथा,—
निबद्धमौषधं सूतं भूर्जे तत्त्रिगुणाम्बरे ।
मपोटलिकां काष्ठे दृढं बद्धा गुणेन हि ॥
मम्भानपूर्णे कुम्भान्त: स्वावलम्बनसंस्थितम् ।
मधस्ताज्ज्वालयेद्वह्निं तत्तदुक्तक्रमेण हि ।
दोलायन्त्रमिदं प्रोक्तं स्वेदनाख्यं तदेव हि ॥"
मम्भानं काञ्जिकादि ।
"माण्डुम्लानोमुखे बद्धे वस्त्रे स्वेद्यं निधाय च ।
पिधाय पच्यते यत्र तद्यन्त्रं स्वेदनं स्मृतम् ॥"
इति भावप्रकाश: ॥

(स्वेदयतीति । स्विद्+णिच्+ल्यु: । स्वेदके,
त्रि । यथा, सुश्रुते । ३ । ४ ।
"स्वेदनो दुर्गन्ध: पीतशिथिलाङ्गत्वमनव-
मयनतालुजिह्वोष्ठपाणिपादतल इत्यादि ॥"
स्वेदनिका, स्त्री, (स्वेदनमस्त्यस्या इति । ठन् ।)
कन्दु: । इति हेमचन्द्र: ॥ भक्ष्यं न पाकम् । भक्ष्यं न-
शाला च ॥
स्वेदनी, स्त्री, (स्विद्यतेऽनयेति । स्विद्+ल्युट् ।
ङीप् ।) लौहमयपात्रम् । तावीया इति
लोहता इति च ख्यातम् । इति भरत: ॥
तत्पर्याय: । कन्दु: २ । इत्यमर: । २ । ९ । ३१ ॥
स्वेदनिका ३ । इति हेमचन्द्र: ॥
स्वेदमलोज्झितदेह:, पुं, (स्वेदमलेन उज्झित:
देहो यस्य ।) सप्तकल्पीयजिनोत्तम: । इति
हेमचन्द्र: ॥ स्वेदमलरहितकायश्च । तद्युक्ते, त्रि ॥
स्वेदविप्रुट्, [ष्] स्त्री, घर्मबिन्दु: । स्वेदस्य विप्रुट्
बिन्दु: । इति षष्ठीतत्पुरुषसमासनिष्पन्ना ॥
स्वैर:, त्रि, (स्वेन स्वातन्त्र्येण ईर्त्तं इति । ईर गतौ
+घञ् । "स्वादीरेरिणो: ।" ६ । १ । ८९ ।
इत्यस्य वार्त्तिकोक्त्या वृद्धि: ।) स्वच्छन्द: ।
(यथा, रघु: । २ । ५ ।
"प्रस्थापितै: स्वैरगतै: स तस्या:
सम्राट् समाराधनतत्परोऽभूत् ।")
मन्द: । इति मेदिनी ॥ (यथा, महाभारते ।
४ । ६६ । ४८ ।
"पद्मोत्तर: सर्वगन्धैर्माल्यैश्च विविधैस्तथा ।
पाञ्चालस्य: संहृष्टो नगरं स्वैरमागमत् ॥" ॥
स्वैरालाप: । यथा, तत्रैव । १ । ४२ । २ ।
"नैतावदिदं भविता पितरेव ब्रवामि ते ।
नाहं मया ममेवैव मे स्वैरपि कृत: पुरा ।")
स्वैरता, स्त्री, (स्वैरस्य भाव: । स्वैर+तल् ।)
स्वैरिता । इत्यमरटीकायां रायमुकुट: । ३ । २ । २ ।
स्वैरिणी, स्त्री, (स्वेनैव ईरितुं शीलमस्या: ।
ईर+णिनि: । ङीप् । स्वादीरेरिणोरिति
वृद्धि: ।) व्यभिचारिणी । इत्यमर: । २ । ६ । १० ॥
(यथा, महाभारते ।
"… स्वैरिणी …")
। १२१ । १२–२१ ।

"पाण्डुस्तु पुनरेवैनां पुत्त्रलोभात् महायशा: ।
वक्तुमैच्छद्धर्मपत्नीं कुन्ती त्वेनमथाब्रवीत् ॥
नातश्चतुर्थं प्रसवमापत्स्वपि वदन्त्युत ।
अत: परं स्वैरिणी स्याद्बन्धकी पञ्चमे भवेत् ॥")
स्वैरिता, स्त्री, (स्वैरिणो भाव: । तल् । टाप् ।)
स्वच्छन्दता । तत्पर्याय: । यदृच्छा २ । इत्य-
मर: । ३ । २ । २ ॥
स्वैरिन्ध्री, स्त्री, परवेश्मस्था स्ववशा शिल्पकारिणी
नारी । इति शब्दरत्नावली ॥ परगृहस्था
स्वतन्त्रा प्रसाधनानुलेपनादिशिल्पकारिणीति
विशेषणत्रययुक्ता या सा सैरिन्ध्री । स्वैरं
स्वाच्छन्द्यं धरतीति स्वैरिन्ध्री निपातनात् ।
स्वैरिन्ध्री परवेश्मस्था शिल्पकृत् स्ववशा
स्त्रियाम् । इति दन्त्यादौ रभस: । इत्यमर-
टीकायां भरत: ॥ अस्या रूपान्तरं सैरन्ध्री
सैरिन्ध्रि: इति च टीकान्तरम् ॥
स्वैरी, [न्] त्रि, स्वेनैव ईरितुं शीलमस्य । ईर
गतौ+णिनि: । स्वतन्त्र: । इत्यमर: । ३ । १ । १५ ॥
(यथा, महाभारते । १२ । १४२ । २१ ।
"सिद्धवादेषु संसिद्धास्तथा वननिवासिन: ।
स्वैरिणो दारसंयुक्तास्तेषां धर्म: कथं स्मृत: ॥")
स्वोपार्ज्जित:, त्रि, (स्वेनोपार्ज्जित: ।) स्वयम-
र्ज्जित: । स्वयमुपात्त: । यथा, पिता चेत् पुत्त्रान्
विभजेत् तस्य स्वेच्छा स्वयमुपात्तेऽर्थे पैतामहे
तु पितापुत्त्रयोस्तुल्यं स्वामित्वम् । इति विष्णु-
सूत्रम् । अपि च । मनुविष्णू ।
"पैतृकन्तु पिता द्रव्यमनवाप्तं यदाप्नुयात् ।
न तत् पुत्त्रैर्भजेत् सार्द्धमकाम: स्वयमर्ज्जितम् ॥"
न तत् पुत्त्रैर्भजेत् सार्द्धमकाम: स्वयमर्ज्जितम् इत्यन्वय: ।
तत् स्वयमर्ज्जितमिति कृत्वा न विभजेदित्यन्वय: ।
एतत्तु स्थावरविषयम् । मण्यादावनुकृतेऽपि पितु-
रेव स्वाच्छन्द्यम् ।
"स्थावरं द्विपदञ्चैव यद्यपि स्वयमर्ज्जितम् ।
असम्भूय सुतान् सर्व्वान् न दानं न च विक्रय: ॥
पितु: प्रसादात् भुज्यन्ते वस्त्राण्याभरणानि च ।
स्थावरन्तु न भुज्येत प्रसादे सति पैतृके ॥"
इति मिताक्षराधृतवचनमपि पितामहधन-
परम् । पित्रा च स्वोपार्जितं स्थावरं दत्त-
भुज्यत एवेति । अन्यथा मूलभूतस्य तत्र-
कल्पनापत्ति: । इति दायतत्त्वम् ॥ ॥ स्वोपा-
र्ज्जितं द्विविधम् । पित्रादिधनानुपघातेन स्वो-
पार्जितम् । तदनुपघातेन उपार्जितञ्च । तत्र
विभागविधिर्यथा । व्यास: ।
"अनाश्रित्य पितृद्रव्यं स्वशक्त्याप्नोति यद्धनम् ।
दायादेभ्यो न तद्दद्यात् विद्यालब्धं यदेव च ॥"
कात्यायन: ।
"… पुत्त्र धनार्जनात् पिता ।"
… पुत्त्रा … ।
… इति न्यायात् पुत्त्राः … ।
… द्रव्यानुपघातायत्तं … ।
… । अत्र तु … ।
धनोपघाते तु तेषामप्यंशित्वं … ।
मात् । पितुरंशद्वयन्तु पितृद्रव्योपघातादगुण
दांशहर: । …
इतरेषामंशित्वम् । स्वात्मव्योपघाते तु
सप्येकांश: । इति दांशाद्वांशयोर्भेदक
साधारणधनार्जितेऽपि विशेषमाह व्य
"साधारणं समाश्रित्य यत्किञ्चित्
शौर्यादिनाप्नोति धनं भ्रातरस्तत्र
तस्य भागद्वयं देयं शेषास्तु समभागिन:
अत्र भ्रातर इत्युपलक्षणं …
बोद्धव्या: । तस्यार्ज्जकस्य ।
यस्य यावतोंऽशस्यास्य महतो वा
स्तस्य तदनुसारेण भागकल्पना कार्य्या ।
दायभाग: ॥ इति च दायतत्त्वम् ॥
स्वोरस:, पुं, शिलापिष्टकल्क: । यथा,—
"स्वोरस: स्वरस: प्रोक्त: कल्को दृषदि पि
इति शब्दच

—

ह

ह, हकार: । स तु व्यञ्जनवर्णस्त्रिंशवर्ण: ।
वर्गीयचतुर्थवर्णश्च । तस्य उच्चारणस्थानं
इति व्याकरणम् ॥ (यथा च शिक्षायाम्
"कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजा
अस्य स्वरूपं यथा,—
"हकारं शृणु चार्व्वङ्गि ! चतुर्व्वर्गप्रदायकं
कुण्डलीद्वयसंयुक्तं रक्तविद्युल्लतोपमम् ।
रज:सत्त्वतमोयुक्तं पञ्चदेवमयं सदा ।
पञ्चप्राणात्मकं वर्णं त्रिशक्तिसहितं सदा ।
त्रिबिन्दुसहितं वर्णं हृदि भावय पार्व्वति
इति कामधेनुतन्त्र
(वङ्गीयवर्णमालायाम्) अस्य लेखन
यथा,—
"ऊर्द्ध्वादाकुञ्चिता मध्ये कुण्डल्यूर्द्ध्वं गता
ऊर्द्ध्वं गता पुन: सैव तासु ब्रह्मादय: क्र
मात्रा च पार्व्वती ज्ञेया ध्यानमस्य …
करीषभूषिताङ्गीञ्च साट्टहासां दिगम्बरा
अस्थिमाल्यामष्टभुजां वरदामम्बुजेक्षणाम्
नागेन्द्रहारभूषाढ्यां जटामुकुटमण्डिता
सर्व्वसिद्धिप्रदां नित्यां धर्म्मकामार्थमोक्ष
एवं ध्यात्वा हकारन्तु तन्मन्त्रं दशधा ज
इति वर्णोद्धारतन्त्रम्

अस्य नामानि यथा,—
"ह: शिवो गगनं हंसो नागलोकोऽम्बि

नकुलीशो जगत्प्राण: प्राणेश: कपिला
परमात्मात्मजा आद्या द्याक्ष शाम्भ
सुगा मयाऽदन्ता स्यात् कटकुटविरा
अक्षार्द्धं विहर: स्रष्टा, प्राणशक्तिमेंषा
शकोपचारण: शूला चैतन्यं पादपूर
महालक्ष्मी: परं स्रष्टा प्राणेश मांस
इति वर्णाभिधा

च।
...य हकारोऽङ्गः प्राणः मान्तः शिवो
वियत्।
...कुलो नकुलीशश्च हंसः शून्यश्च डाकिनी।
...नकुली जीवः परमात्मा ललाटजः॥"
इति बीजवर्णाभिधानम्।
...पि च।
...कारो नकुलीशोऽपि हंसः प्राणोऽङ्कुशः
पिये।
...शो नकुलो चैव वराहो गगनं रविः।
... शून्यो महाशून्यः प्राणश्च परमेश्वरि!॥"
इति श्रीरुद्रयामले ८ पटले मन्त्राभिधानम्॥
...त्र. (हन हिंसागत्योः + अन्येभ्योऽपीति डः।)
...दिपूरणम्। इत्यमरः। ३। ४। ५॥ (यथा,
...मायणे। १। १। ५८।
...म्पातीरे हनुमता मङ्गलो वानरेण च॥")
...बोधनम्। विनिग्रहः। नियोगः। चेपः।
...ता। इति मेदिनीशब्दरत्नावल्यौ॥
...[मं] व्य, रूपोक्तिः। अनुनयः। इति मेदिनी॥
पुं, शिवः। जलम्। शून्यम्। धारणम्।
...लम्। गगनम्। नकुलीशः। रक्तम्। स्वर्गः।
...ति मेदिनी॥ पापहरणम्। चन्द्रः। इति
...ब्दरत्नावली॥ सकोपवारणः। शुष्कः।
...चेकाचरकोषः॥
..., पुं, (हन्ति सुन्दरं गच्छतीति। हन
...सागत्योः + "वृतृवदिहनीति।" उणा० ३।
...। इति सः।) पक्षिविशेषः। हांस इति
...षा। तत्पर्य्यायः। श्वेतगरुत् २ चक्राङ्गः ३
...नसौकाः ४। इत्यमरः। २।५।२३॥ कल-
...रुठः ५ सितच्छदः ६। इति जटाधरः॥
...तपत्रः ७ मरालकः ८ पुरुदंशकः ९।
...नि शब्दरत्नावली॥ धवलपक्षः १० मान-
...लयः ११। इति राजनिर्घण्टः॥ अस्य
...मांसगुणाः। वातहरत्वम्। हृद्यत्वम्। स्थैर्य्य-
...म्। मांसबलप्रदत्वञ्च। इति राजवल्लभः॥
...पि च।
"स्निग्धं हिमं गुरु हृद्यं मांसं जलपक्षिणान्तु
वातघ्नम्।
...पि च हंसमांसं दृष्यतमं तिमिरहरञ्च॥"
इति राजनिर्घण्टः॥
...पि च।
"हंससारसकाचाचवकक्रौञ्चसरारिकाः।
नन्दीमुखी सकादम्बा बलाकाद्याः प्लवाः स्मृताः।
प्लवन्ते सलिले यस्मात् एते तस्मात् प्लवाः
स्मृताः॥"
काचाचः कर्पदिकाचो वृहद्बकः। क्रौञ्चः
...टिकः स्यात्। टेक इति लोके। सरारिका
...सिमु इति लोके।
"कृष्णा कठोरा हृस्वा च यस्यास्तूर्ध्वंवस्थिता।
गुटिकाचञ्चुसदृशो ज्ञेया नन्दीमुखीति सा॥"
...दम्बः कराँवा इति लोके। बला बगुली इति
लोके।

"प्लवाः पित्तहराः स्निग्धा मधुरा गुरवो हिमाः।
वातश्लेष्मप्रदाश्चापि बलशुक्रकराः सराः॥"
इति भावप्रकाशः॥ ० ॥
(यथा च।
"गुरूष्णस्निग्धमधुराः स्वरवर्णबलप्रदाः।
वृंहणाः शुक्रलाश्चोक्ता हंसा मारुतनाशनाः॥"
इति चरके सूत्रस्थाने २७ अध्याये॥)
अस्या डिम्बगुणाः हंसबीजशब्दे द्रष्टव्याः॥ ० ॥
तस्य शकुनं यथा,—
"काष्ठासु सर्व्वास्वपि दर्शनेन
हंसस्य शब्देन तु सर्व्वसिद्धिः।
नामानि हंसस्य शृणोति यस्तु
प्रयान्ति नाशं दुरितानि तस्य॥
चौरैः समं दर्शनमाद्यशब्दे
निषिद्धितोऽद्य भयं द्वितीये।
युद्धं चतुर्थे नृपतिप्रमादः
स्यात् पञ्चमे हंसरवे नराणाम्॥"
इति वसन्तराजशाकुने ८ वर्गः॥
निर्लोभनृपः। विष्णुः। (यथा महाभारते। १२।
४३। ७।
"शुचिश्रवा हृषीकेशो घृतार्चिर्हंस उच्यते॥")
सूर्य्यः। (यथा, महाभारते। ३। ३। ६१।
"त्वं हंसः सविता भानुरंशुमाली वृषाकपिः॥")
परमात्मा। मत्सरः। योगिभेदः। मन्त्रभेदः।
शरीरस्थवायुविशेषः। तुरङ्गमप्रभेदः। इति
मेदिनी॥ (गोविशेषः। यथा, वृहत्संहिता-
याम्। ६१। १७।
"सितवर्णः पिङ्गाक्ष-
स्ताम्रविषाणेक्षणो महावक्त्रः।
हंसो नाम शुभफलो
यूथस्य विवर्द्धनः प्रोक्तः॥")
गुरुः। पर्व्वतः। इति शब्दरत्नावली॥
शिवः। इत्यनेकार्थकोषः॥ अचलः स्थितः।
श्रेष्ठः। इति हेमचन्द्रः॥ विग्रहः। इत्यजयः।॥
अथ हंसमन्त्रविवरणम्। अस्याजपागायत्री-
मन्त्रस्य शिरसि हंसऋषये नमः। मुखे अव्यक्त-
गायत्रीच्छन्दसे नमः। हृदि परमहंसदेवतायै
नमः। लिङ्गे हं बीजाय नमः। पाधारे सः
शक्तये नमः। परमात्मप्रीतये उच्छ्वासनिश्वा-
साभ्यां षट्शताधिकैकविंशतिसहस्रजपेन पूर्व्व-
भूतेभ्यो निवेदयामि। मूलाधारमण्डपे स्वर्णवर्ण-
चतुर्दलपद्मे वादिसान्तचतुर्वर्णान्विते गायत्री-
सहिताय गणनाथाय षट्शतसंख्यजपसहर्निशं
समर्पयामि नमः। स्वाधिष्ठानमण्डपे अनेक-
विद्रुमाभे वादिलान्तषड्वर्णान्विते षड्दलपद्मे
सावित्रीसहिताय ब्रह्मणे षट्सहस्रजपं
निवेदयामि नमः। मणिपूरमण्डपे नीलोत्पल-
नेत्रसन्निभे डादिफान्तदशवर्णान्विते दशदलपद्मे
लक्ष्मीसहिताय विष्णवे षट्सहस्रजपं समर्पयामि
नमः। अनाहतमण्डपे तरुणादित्यनिभे द्वादश-
वर्णयुते द्वादशदलपद्मे गौरीसहिताय शिवाय
षड्जपाषट्सहस्रजपं समर्पयामि नमः। विशुद्ध-

मण्डपे षोडशदलकर्णिकामध्ये जीवात्मने
अकारादि-अःकारान्ते अजपासहस्रसंख्यजपं
निवेदयामि नमः। आज्ञामण्डपे श्रीचन्द्रप्रभे
द्विदलपद्मे ह-क्ष-वर्णान्विते मायासहितगुरुमूर्त्तये
एकसहस्रजपं निवेदयामि नमः। ब्रह्मरन्ध्रमण्डपे
नानावर्णोज्ज्वले सहस्रपद्मस्थिताय परमात्मने
अकारादिक्षकारान्तसहिताय एकसहस्रजपं
निवेदयामि नमः। सहस्रशब्दोऽसंख्यपर इति
बोध्यम्। उक्तञ्च पद्मं कोटिसमन्वितमिति।
इति जपं समर्प्य अष्टोत्तरशतसंख्यमजपाजपं
कुर्य्यात्। अकारादिक्षकारान्ता वर्णा हंस इति
शिवशक्तिबिन्दुना ब्रह्म च इति विसर्गरूप-
बिन्दुभ्यां हरिहरयोरभेदः। सोऽहमित्यभेद-
भावनया ब्रह्मरूपतां स्वं स्वं परिभाव्य उक्तः।
षट्शताधिकैकविंशतिसहस्रजपेन परदेवतारूपः
श्रीपरमेश्वरः प्रीयतामित्येकवारं सहस्रधा
ध्यायेत्॥ ० ॥ हंसस्य ध्यानं यथा,—
"आराधयामि मणिसन्निभमात्मलिङ्गं
मायापुरीहृदयपङ्कजसन्निविष्टम्।
श्रद्धानदीविमलचित्तजलावगाहं
नित्यं समाधिकुसुमैरपुनर्भवाय॥" ० ॥
प्रसङ्गादजपारहस्यं लिख्यते। पञ्चाशद्वर्ण-
संपुटत्वेनानुलोम्यप्रातिलोम्येन मन्त्ररूपं मेरु
चकारं परिकल्प्य तया मन्त्र जपं कुर्य्यादिति
टीपलेशैर्न वाध्यते। एतेन विज्ञेनैव हंसमाल-
कयोरेकाकारेण कालात्मना लोके चिदात्म
उच्यते। अजपाविधानं विना श्रीविद्यादिसकल-
विद्याया अनधिकारी भवेत्। तदुक्तम्।
"हंसज्ञानविमुखेन कृतमप्यकृतं भवेत्।" इति।
"अजपाधारणं देवि! कथयामि तवानघे!।
यस्य विज्ञानमात्रेण परं ब्रह्मैव दैशिकः॥
हंसः पदं परेशानि प्रत्यहं जपयेन्नरः।
मोहबन्धं न जानाति मोक्षस्तस्य न विद्यते॥
श्रीगुरोः कृपया देवि! ज्ञायते जप्यते यदा।
उच्छ्वासनिश्वासतया तदा बन्धक्षयो भवेत्॥
उच्छ्वासे चैव निश्वासे हंस इत्यक्षरद्वयम्।
तस्मात् प्राणस्तु हंसात्मा आत्माकारेण संस्थितः।
नाभेरुच्छ्वासनिश्वासात् हृदयाग्रे व्यवस्थितः॥"
इति राघवभट्टधृतदक्षिणामूर्त्तिसंहितायां ७
पटलः॥ ० ॥ अहोरात्रमध्येऽजपाजपसंख्या
यथा,—
"षष्टिश्वासैर्भवेत् प्राणः षट्प्राणा नाडिका
मता।
षष्ट्या नाड्या अहोरात्रं जपसंख्याक्रमो मतः॥
एकविंशतिसाहस्रं षट्शताधिकमीश्वरि!।
जपते प्रत्यहं प्राणी सान्द्रानन्दमयीं पराम्।
उत्पत्तिर्जपमारभ्य मृत्युस्तत्र निवेदनम्॥"
इति तत्रैव ७ पटलः॥ ० ॥
अजपानामकारणमपि तत्रैव।
"विना जपेन देवेशि! जपो भवति मन्त्रिणः।
अजपेयं ततः प्रोक्ता भवपाशनिकृन्तनी॥
एवं जपं महेशानि प्रत्यहं विनिवेदयेत्।

गणेशब्रह्मविष्णुभ्यो हराय परमेश्वरि ! ॥
जीवात्मने क्रमेणैव तथैव परमात्मने ।
षट्शतानि सहस्राणि सहस्रञ्च तदेव हि ।
पुनः सहस्रं गुरवे क्रमेण च निवेदयेत् ।"*॥
एवं यथास्थानावस्थितेभ्यो गणेशादिभ्यस्तज्जपसमर्पणमुक्त्वा तत्तत्स्थानानां तत्तदवस्थितमातृकावर्णानाञ्च रूपमाह तत्रैव ।
"आधारे स्वर्णवर्णेऽस्मिन् वादिसान्तानि संस्मरेत् ।
द्रुतसौवर्णवर्णानि वर्णानि परमेश्वरि ! ॥
स्वाधिष्ठाने विद्रुमाभे वादिलान्तानि च स्मरेत् ।
विद्युत्पुञ्जप्रभाभानि सुनीले मणिपूरके ॥
डफान्तानि महानीलप्रभाणि च विचिन्तयेत् ।
पिङ्गवर्णे महावह्निकलिकाभानि चिन्तयेत् ॥
कादिठान्तानि वर्णानि चतुर्थेऽनाहते प्रिये ।
विशुद्धौ धूम्रवर्णे च रक्तवर्णान् स्वरान् यजेत् ॥
आज्ञायां विद्युदाभायां शुभ्रौ हक्षौ विचिन्तयेत् ॥
कर्पूरद्युतिसंराजत्सहस्रदलनीरजे ।
नादात्मकं ब्रह्मरन्ध्रं जानीहि परमेश्वरि ।
एतेषु सप्तचक्रेषु स्थितेभ्यः परमेश्वरि ! ॥
जपं निवेदयित्वा तं अहोरात्रभवं प्रिये ।
सहजं परमेशानि न्यासं कुर्य्याद्विचक्षणः ॥
ऋषिर्हंसोऽव्यक्तरूपगायत्री छन्द उच्यते ।
देवता परमादिस्तु हंसोऽहं बीजमुच्यते ॥
सः शक्तिः कीलकं सोऽहं प्राणवस्तु त्वमेव हि ।
नेत्रस्थलं भवेत् श्वेतं वर्णञ्च परमेश्वरि ! ॥
तदा तत्त्वं इत्येवं मनोरस्य प्रकीर्त्तितः ।
मोक्षार्थे विनियोगः स्यादेवं जानीहि पार्व्वति ॥
ततः षडङ्गविन्यासं कुर्य्याद्देहस्य सिद्धये ।
सूर्य्यं सोमं महेशानि निरञ्जनमतः परम् ॥
निराभासं चतुर्थ्यन्तं स्वाहान्ते क्रमतो न्यसेत् ।
कवचान्तं प्रविन्यस्य ततोऽनन्तपदं स्मरेत् ॥"
इति च तत्रैव ७ पटलः ॥*॥
अजपाया द्वैविध्यमुक्तं यथा,—
"हंसेति प्रकृतिर्ज्ञेया ॐकारः प्रकृतेर्गुणः ।
हंकारेण बहिर्याति सकारेण विशेत् पुनः ॥
हंसेति परमं मन्त्रं जीवा जपति सर्व्वदा ।
षट्शतानि दिवारात्रौ सहस्राण्येकविंशतिः ॥
अजपा नाम गायत्री योगिनां मोक्षदायिनी ।
अजपा द्विविधा देवि ! व्यक्ता गुप्ता क्रमेण च ।
व्यक्ता च द्विविधा प्रोक्ता शब्दज्योतिःस्वरूपिणी ।
ज्योतीरूपा च सा देवी हृदिस्थाने प्रतिष्ठिता ।
ठकाररूपा गुप्ता च शिवशक्तिः प्रकीर्त्तिता ।
शब्दबीजं ठकारस्तु बोधितः स्वर उच्यते ॥
अजपार्थमयी गुप्ता वह्निजाया प्रकीर्त्तिता ।
यस्याः सहस्रमात्रेण पुरश्चरणमुच्यते ॥"
इति निरुत्तरतन्त्रे ४ पटलः ॥
(जरासन्धनृपतेः सेनापतिविशेषः । यथा, महाभारते । २ । २२ । ३१—३२ ।
"स तु सेनापतिं राजा सस्मार भरतर्षभ ।
कौशिकं चित्रसेनञ्च तस्मिन् युद्ध उपस्थिते ॥
ययोस्ते नामनी राजन् ! हंसेति डिम्भकेति च ।
पूर्व्वं संकथिते पुम्भिर्नृलोके लोकसत्कृते ।"*॥
मेरोरुत्तरस्थपर्व्वतविशेषः । यथा, विष्णुपुराणे । २ । २ । २८ ।
"शङ्खकूटोऽथ ऋषभो हंसो नागस्तथा परः ।
कालञ्जराद्याश्च तथा उत्तरे केशराचलाः ॥")
हंसकः, पुं, (हंस इव कायति मधुरध्वनित्वात् । कै शब्दे + कः ।) पादकटकः । यथा,—
"पादाङ्गदं तुलाकोटिर्मञ्जीरो नूपुरोऽस्त्रियाम् ।
हंसकः पादकटकः किङ्किणी क्षुद्रघण्टिका ॥"
इत्यमरः । २ । ६ । १०८ ॥
"पट् नूपुरे । केचित्तु पादाङ्गदादिचतुष्कं चरणभूषणे नूपुर इति ख्याते । हंसकादिद्वयं रवशून्ये हंसाकृतिचरणभूषणे इत्याहुः । हंस इव कायति मधुरध्वनित्वात् हंसकः । कै शब्दे डः । हंसाकृतित्वात् हंस इव हंसकः इति वा । इवार्थे विकारसंघ इत्यादिना कः ।" इति भरतः ॥
(हंस इवेति । इवे प्रतिकृताविति कन् । स्वार्थे कन् वा) राजहंसः । इति शब्दचन्द्रिका ॥
(यथा, माघे । ७ । २३ ।
"सरित इव सविभ्रमप्रयातप्रणदितहंसकभूषणा विरेजुः ॥"
तालप्रभेदः । यथा,—
"लघुर्गुरुर्लघुर्यत्र स तालो हंसकः स्मृतः ॥"
इति सङ्गीतदामोदरः ॥
हंसकीलकः, पुं, (हंस इव कीलतीति । कील बन्धने + ण्वुल् ।) रतिबन्धविशेषः । यथा,—
"नारीपादद्वयं कृत्वा कान्तस्योरुयुगोपरि ।
कटिमान्दोलयेद् यत्नात् बन्धोऽयं हंसकीलकः ॥"
इति स्मरदीपिका ॥
हंसकूटः, पुं, ककुत् । इति केचित् ॥ (पर्व्वतविशेषः । यथा, महाभारते । १ । ११८ । ४८ ।
"इन्द्रद्युम्नः सरः प्राप्य हंसकूटमतीत्य च ।
शतशृङ्गे महाराज तापसः समतप्यत ॥")
हंसगद्गदा, स्त्री, (हंस इव गद्गदो यस्याः ।) मधुरभाषिणी । तत्पर्य्यायः । मधुरनिस्वना २ । इति त्रिकाण्डशेषः ॥
हंसगामिनी, स्त्री, (हंस इव गच्छतीति । गम + णिनिः । ङीप् । हंसगमनमिव गमनं यस्याः सा इति वा ।) नारीविशेषः । (हंसेन गच्छतीति ।) ब्रह्माणी । इति हंसारूढाशब्ददर्शनात् ॥
हंसदाहनं, क्ली, (हंसं श्रेष्ठं सुरभित्वात् दाहनं यस्य ।) अगुरु । इति शब्दचन्द्रिका ॥ (गुणादयोऽस्या अगुरुशब्दे ज्ञातव्याः ।)
हंसनादिनी, स्त्री, (हंस इव नदतीति । नद + णिनिः । ङीप् । नारीविशेषः । तस्या लक्षणं यथा, शब्दमालायाम् ।
"गजेन्द्रगमना तन्वी कोकिलाना कलान्विता ।
नितम्बगुर्व्विणी या सा कथ्यते हंसनादिनी ॥"
हंसपदी, स्त्री (हंसस्येव पादा [illegible] ङीप् । पादस्य पद्भावः ।) गोधापदी । [illegible] राजनिर्घण्टः ॥ हंसपदीविशेषः । [illegible] मधुस्रवा २ हंसपादी ३ त्रिपदी ४ । [illegible] माला ॥ (अस्याः पर्य्यायो यथा,—
"हंसपादी हंसपदी कीटमाता [illegible]
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे [illegible]
हंसपादं, क्ली, (हंसस्य पाद इव वर्णो [illegible] हिङ्गुलम् । इति हलायुधः ॥ (पुं, यथा,
हिङ्गुलन्दरदं म्लेच्छमिङ्गुलञ्चूर्णपारदम् ।
दरदस्त्रिविधः प्रोक्तश्चर्म्मारः शुकतुण्डकः ॥
हंसपादस्तृतीयः स्यात् गुणवानुत्तरोत्तरम्
चर्म्मारः शुक्लवर्णः स्यात् सपीतः [illegible]
जवाकुसुमसङ्काशो हंसपादो महोत्तमः ॥
इति भावप्रकाशस्य पूर्व्वखण्डे [illegible]
हंसचरणे च पुं ॥
हंसपादिका, स्त्री, (हंसपादी एव स्वार्थे टाप् ।) हंसपदी । इति राजनिर्घण्टः ॥
हंसपादी, स्त्री, (हंसस्य पादा इव [illegible] ङीप् ।) हंसपदीविशेषः । इति [illegible]
(अस्याः पर्य्यायो गुणाश्च यथा,—
"हंसपादी हंसपदी कीटमाता [illegible]
हंसपादी गुरुः शीता हन्ति [illegible]
विसर्पदाहातिसारलूताभूताग्निरोहिणीः
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे
हंसबीजं, क्ली, (हंसस्य बीजम् ।) [illegible]
तस्य गुणाः यथा, राजनिर्घण्टे ।
"हंसबीजं परं बल्यं बृंहणं वातनाशनम् ।
पाके लघुतरं प्रोक्तं सर्व्वामयविनाशनम् ॥"
हंसमाला, स्त्री, (हंसस्य माला ।) [illegible]
इति शब्दचन्द्रिका ॥ हंससमूहः । यथा,—
"तां हंसमालाः शरदीव गङ्गां
महौषधीं नक्तमिवात्मभासः ।
स्थिरोपदेशामुपदेशकाले
प्रपेदिरे प्राक्तनजन्मविद्याः ॥"
इति कुमारसम्भवे । १ । ३० ॥
हंसमाषा, स्त्री, (हंसः श्रेष्ठो माषो यस्याः ।) माषपर्णी । इति राजनिर्घण्टः ॥
हंसरथः, पुं, (हंसो रथो वाहनं यस्य ।) ब्रह्मा । इति त्रिकाण्डशेषः ॥
हंसलोमशं, क्ली, (हंस इव लोमशम् ।) [illegible] सम् । इति राजनिर्घण्टः ॥
हंसलोहक, क्ली, (हंसं श्रेष्ठं लोहमिव । कन् ।) पित्तलम् । इति हेमचन्द्रः ॥ ([illegible] पित्तलशब्दे ज्ञातव्यम् ॥)
हंसवती, स्त्री, (हंस इव हंसपदाकारमूलमस्त्यस्या इति । हंस + मतुप् । ङीप् । मस्य वः ।) हंसपदीलता । इति जटाधरः ॥
हंसयुक्ते, त्रि ॥
हंसवाहनः, पुं, (हंसो वाहनं यस्य ।) ब्रह्मा । इति कश्चिदमरः । १ । १ । १७ । (यथा, श्रीमद्भागवते । ७ । ३ । १६ ।

तमसा लोकान् यथाभ्रापिहितं रविम् ।
विस्मितः प्राह हंसस्तं हंसवाहनः ॥")
, पुं, (हंसस्य अङ्घ्रिरिव रक्तवर्णत्वात् ।)
हिङ्गुलम् । इति केचित् ॥ हंसपादश्च ॥
धरूढ़ा, स्त्री, (हंसमधिरूढा ।) सरस्वती ।
यथा,—
"वाणीं पूर्णनिशाकरोज्ज्वलमुखीं कर्पूरकुन्दप्रभां
चन्द्रार्द्धाङ्कितमस्तकां निजकरैः संबिभ्रतीमादरात् ।
वीणामक्षगुणं सुधाढ्यकलसं विद्याञ्च तुङ्गस्तनीं
दिव्यैराभरणैर्विभूषिततनुं हंसाधिरूढ़ां भजे ॥"
इति तन्त्रसारः ॥
नाभिख्यं, क्ली, (हंसस्येव अभिख्या शोभा यस्य शुक्लवर्णत्वात् ।) रूप्यम् । इति हेमचन्द्रः ॥
आरूढ़ः, पुं, (हंसमारूढ़ः ।) ब्रह्मा । यथा ।
"रक्तवर्णं चतुर्मुखं द्विभुजं अक्षसूत्रकमण्डलुकरं हंसारूढ़ं ब्रह्माणम् । इति वैदिकसन्ध्याप्रातःकाले ब्रह्मध्यानम् ॥ (यथा, बृहत्संहितायाम् । ५१ ।
"दण्डी यमो महिषगो
हंसारूढ़श्च पाशभृद्वरुणः ॥")
आरूढ़ा, स्त्री, (हंसमारूढ़ा ।) ब्रह्माणी । यथा,
"चतुर्मुखीं जगद्धात्रीं हंसारूढ़ां वरप्रदाम् ।
सृष्टिरूपां महाभागां ब्रह्माणीं तां नमाम्यहम् ॥"
इति बृहन्नन्दिकेश्वरपुराणोक्तदुर्गोत्सवपद्धतिः ॥
हंसिका, स्त्री, (हंसी एव । स्वार्थे कन् । टाप् ।)
हंसी । इति शब्दरत्नावली ॥
हंसी, स्त्री, (हंसस्य पत्नी । हंस+ङीप् ।) हंसभार्या । तत्पर्य्यायः । चक्राङ्गी २ वरटा ३ चक्राकी ४ वरटी ५ मरालिका ६ हंसिका ७ मराला ८ हंसयोषित् ९ । इति शब्दरत्नावली ॥ मराला १० मराली ११ मञ्जुगमना १२ मृदुगामिनी १३ । इति राजनिर्घण्टः ॥ द्वाविंशत्यक्षरपादच्छन्दोविशेषः । यथा,—
"मौ गौ नायत्वारो गौ गौ वसुभुवनयतिरिति भवति हंसी ।
यद्वै कान्तेनैकान्तेऽसौ विकचकमलमधुसुरभि पिबन्ती
कामक्रीड़ाकूतस्फीतप्रमदसरभसभरमलघु रवन्ती ।
कालिन्दीये पद्मारण्ये पवनपतनपरितरलपरागे
कंसाराते पश्य स्वेच्छं रसभसगतिरिह विलसति हंसी ।"
इति छन्दोमञ्जर्य्यां २ स्तवकः ।
हंसोजातिः । इति मुग्धबोधव्याकरणम् ॥
हंसोदकं, क्ली, (हंसं श्रेष्ठमुदकम् ।) पानीयविशेषः । यथा,—
"नादेयं नवरुद्रेषु निहितं सन्ततमर्कांशुभियामिन्याञ्च निविष्टमिन्दुकिरणैर्मन्दानिलान्दोलितम् ।
एलाद्यैः परिवासितं ज्वरहरं पित्तोग्रदाहे विषे
मूर्च्छारक्तमदात्ययेषु च हितं शंसन्ति हंसोदकम् ॥"
इति राजनिर्घण्टः ॥
हंहो, व्य, सम्बोधनम् । (यथा, महाभारते । १२ । २६७ । ८ ।
"तां गात्यपि: स्यूमरश्मिः प्रविश्य यतिमब्रवीत् ।
हंहो वेदा यदि मता धर्म्माः केनापरे मताः ॥")
दर्पः । दम्भः । प्रश्नः । इति शब्दरत्नावली ॥
हक्कः, पुं, (हक् इत्यव्यक्तशब्देन कायतीति । कै+कः ।) गजसमाह्वानम् । इति जटाधरः ॥
हक्कारः, पुं, (हक् इत्यव्यक्तशब्दस्य कारः करणम् ।) आह्वानम् । इति केचित् ॥
हञ्जा, व्य, नाट्योक्तौ चेटीसम्बोधनम् । इत्यमरटीकायां भरतः ॥
हञ्जिः, पु, क्षुत् । इति जटाधरः ॥
हञ्जिका, स्त्री, भार्गी । इति भावप्रकाशः ॥
(अस्याः पर्य्यायो गुणाश्च । यथा,—
"ब्राह्मणयष्टिकाङ्गारवल्ली च खरशाखा च हञ्जिका ।
अनुष्णा कफपित्तास्त्रहिक्काकासज्वरप्रणुत् ॥
अरोचकतवोमपेक्तमिकुष्ठगदापहा ।
अलर्को गुणैस्तद्वत् विशेषाद्ग्रहनाशनः ॥")
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
हञ्जे, व्य, नाट्योक्तौ चेटीसम्बोधनम् । यथा,—
"हण्डे हञ्जे हलाह्वानं नीचं चेटीं सखीं प्रति ।"
इत्यमरः । १ । ७ । १५ ॥
"हण्डे नीचसम्बोधनम् । हञ्जे चेटीसम्बोधनम् ।
हला सखी सम्बोधनम् । त्रयमिदमव्ययम् । यथा ।
हण्डे कुम्भिल । अरे हञ्जे काञ्चनमाले । हला मउन्तले इति । त्रयमप्यादन्तमव्ययमस्ति ।
हण्डा हञ्जा हला शब्दास्त्रयः सम्बोधनवाचकाः ।
इति प्राकृतवृत्तावव्ययपरिच्छेदे वसन्तराजः ॥
'हञ्जेति चेटिकाह्वानं सख्याह्वानं हलेति च ।
हण्डेति कुत्सिताह्वानमार्य्यो मारिष उच्यते ॥"
इति भागुरिश्च ॥
अनव्ययश्च हलाशब्दः सखीपर्य्यायोऽस्ति । वाला वासः सखी हलेति त्रिकाण्डशेषे वोपालितः ॥'
अद्यासोऽहं मरिष्यामि हे हले भाषितस्य चेति तद्धितगिरः । त्रयमिदमच्युतपदम् ।" इति भरतः ॥
हट, त्विषि । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) त्विषि दीप्तौ । । हटति । इति दुर्गादासः ॥
हटपर्णि, क्ली, शैवालम् । इति शब्दरत्नावली ॥
हट्टः, पुं, क्रयविक्रयस्थानम् । हाट इति भाषा ।
इत्यमरः । ३ । ५ । ८८ ॥
हट्टचौरकः, पुं, (हट्टस्य चौरः । ततः कन् ।) चौरविशेषः । हाटचोर इति भाषा । तत्पर्य्यायः । मलीकरः २ मादनः ३ विहाम्य ४ ।
इति शब्दरत्नावली ॥ वन्दीकारः ५ प्रसह्यचौरः ६ । इति त्रिकाण्डशेषः ॥
हट्टविलासिनी, स्त्री, (हट्टे विलसतीति । वि+लस+णिनि । ङीप् ।) गन्धद्रव्यविशेषः । तत्पर्य्यायः । धमनी २ अञ्जनकेशी ३ हनुः ४ ।
इत्यमरः । २ । ४ । १३० ॥ अस्याः पर्य्यायो यथा,—
"नखं व्याघ्रनखं व्याघ्रायुधन्तच्चक्रकारकम् ।
नखं खल्पनखी प्रोक्ता हनुर्हट्टविलासिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
हरिद्रा । इति भावप्रकाशः ॥ पुस्तकान्तरे हरिविलासिनीति च पाठः ॥ (वाराङ्गना ।
यथा, आर्य्यासप्तशत्याम् । ४३३ ।
"मृगमदनिदानमटवी कुङ्कुममपि जापकवाटिका वहति ।
हट्टविलासिनि भवती परमेका पौरसर्व्वस्वम् ॥")
हठ, कीलबन्धे । बलात्कृतौ । प्लुतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक-प्लुतौ अक०-सेट् ।) कीले बन्धः कीलबन्धः । हठति छागं कीले बध्नाति इत्यर्थः । कातन्त्रादौ बलात्कारभावे । हठति परचक्रं वली । इति दुर्गादासः ॥
हठः, पुं (हठ+पुंसीति घः ।) बलात्कारः ।
इत्यमरः । २ । ८ । १०८ ॥ प्रसभो । इति मेदिनी ॥
(हठयोगः । यथा, हठयोगप्रदीपिकायाम् । १ । १० ।
"अशेषतापतप्तानां समाश्रयमठो हठः ।
अशेषयोगयुक्तानामाधारकमठो हठः ॥)
हठपर्णी, स्त्री, (हठति प्लवते । इति । हठ+अच् । तादृशं पर्णमस्याः । ङीप् ।) शैवालः ।
इति त्रिकाण्डशेषः ॥
हठयोगः, पुं, (हठेन योगः ।) योगविशेषः ।
यथा,—
"इदानीं हठयोगन्तु वक्ष्यते हठसिद्धिदः ।
स्वस्त्यासनं पवनाशं शरीरे रोगहारकम् ॥
पूरकं कुम्भकञ्चैव रेचकं वायुना भजेत् ।
इत्थं क्रमात्क्रमं ज्ञात्वा पवनं साधयेत् सदा ॥
धौत्यादिकर्म्मषट्कञ्च सम्यग्ध्याद्धठसाधकः ।
एतत्राधानु देवेशि । वायुपूर्णं प्रतिष्ठितम् ॥
ततो मनो निश्चलं स्यात्तत आनन्द एव हि ।
हठयोगाच्च कामः स्यान्मनः शून्यं भवेद्यदि ॥
इदानीं हठयोगस्य द्वितीयं शृणु ।
आकाशे नाभिशय्ये तु मूर्द्धकोटिसमं स्मरेत् ॥
श्वेतं रक्तं तथा पीतं कृष्णमित्यादिरूपतः ।
एवं ध्यात्वा चिरायुः स्यादनुध्यानवर्जितः ॥
शिवतुल्यो महालाभो हठयोगप्रसादतः ।
हठाभ्यासनियोगी भूत्वा वायुरोधेन सिध्यति ।
एतोऽयं हठयोगः स्यात् सिद्धिदः सिद्धसेवितः ॥"
इति योगस्वरोदयः ॥
हठालु, क्ली, (हठे हठेन चलति पर्णमस्येति ।
हठ+आलुच् ।) कुम्भिका । इति रत्नमाला ॥
हठी, स्त्री, वारिपर्णी । इति धरणिः ।

तत्क्षणादेव चाप्नोति सत्यं सत्यं सुनिश्चितम् ॥"
इति च तन्त्रसारः ॥

हनूः, स्त्री, (हनु+पक्षे ऊङ्।) हनुः। इत्यमरटीकायां भरतः ॥ (यथा,—
"शाखासु हन्वोः कक्ष्यासु चेष्टावन्तस्तु सन्धयः ॥"
इति सुश्रुते शारीरस्थाने पञ्चमेऽध्याये ॥)

हनूमान्, [त्] पुं, (हनूरस्यास्तीति। हनू+मतुप्।) हनुमान्। इति त्रिकाण्डशेषः ॥ (यथा, महाभारते। ३। १४७। २७।
"अहं केशरिणः क्षेत्रे वायुना जगदायुना।
जातः कमलपत्राक्ष हनूमान्नाम वानरः ॥")

हनूषः, पुं, (हन्ति मानुषानिति। हन+"क्लुह-निभ्यामूषन्।" उणा० ४।७३। इति ऊषन्।) राक्षसः। इति त्रिकाण्डशेषः ॥

हन्त, व्य, हर्षः। अनुकम्पा। (यथा, गीतायाम्। १०। १९।
"हन्त ते कथयिष्यामि दिव्या ह्यात्मविभूतयः।
प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे ॥")
वाक्यारम्भः। विषादः। इत्यमरः। ३।३।२४३ ॥ (यथा, भ्रमराष्टके। ८।
"रात्रिर्गमिष्यति भविष्यति सुप्रभातं
भास्वानुदेष्यति हसिष्यति पद्मजालम्।
इत्थं विचिन्तयति कोषगते द्विरेफे
हा हन्त हन्त नलिनीं गज उज्जहार ॥")
अर्त्तिः। वादः। संभ्रमः। इति शब्दरत्नावली ॥ खेदः इति मेदिनी ॥ (यथा, रामायणे।
"काचमूल्येन विक्रीतो हन्त चिन्तामणिर्मया ॥"
अस्तकल्पनम्। इत्यजयपालः ॥

हन्तकारः, पुं, (हन्त इत्यस्य कारः करणम्।) अतिथिदेयतण्डुलम्। इति केचित् ॥ हन्तशब्दः। यथा। यत्तु।
"निवीती हन्तकारेण मनुष्यांस्तर्पयेदथ।
कुशस्य मध्यदेशेन तृतीयेन उदङ्मुखः ॥"
इति लघुविष्णुनाम ॥
हन्तप्रयोगेण जलदानमुक्तं तत् सनकादिप्रत्येकतर्पणे। यथा। सनकस्तृप्यतां तस्यैतदुदकं हन्त इत्यादौ। न तु पद्मपुराणीयमिलिततर्पणे। इत्याह्निकाचारतत्त्वम् ॥ * ॥ अतिथये दानार्थषोडशग्रासाः। यथा,—
"पूजयेदतिथिं नित्यं नमस्येदर्चयेद्द्विजम्।
मनोवाक्कर्म्मभिः शान्तमागतं स्वगृहन्ततः ॥
हन्तकारमथाग्रं वा भिक्षां वा शक्तितो द्विजः।
दद्यादतिथये नित्यं बुद्ध्येत परमेश्वरम् ॥
भिक्षामाहुर्ग्रासमात्रमग्रञ्च स्याच्चतुर्गुणम्।
पुष्कलं हन्तकारञ्च तच्चतुर्गुणमुच्यते ॥"
इति कूर्म्मपुराणे उपविभागे। १८।११३-११५ ॥
अपि च।
"भिक्षाञ्च याचतां दद्यात् परिव्राड्ब्रह्मचारिणाम्।
ग्रासप्रमाणं भिक्षा स्यादग्रं ग्रासचतुष्टयम् ॥
अग्रं चतुर्गुणं प्राहुर्हन्तकारं द्विजोत्तमाः।
भोजनं हन्तकारं वा अग्रं भिक्षामथापि वा।
अदत्त्वा तु न भोक्तव्यं यथाविभवमात्मनः ॥"
इति मार्कण्डेयपुराणे मदालसोपाख्याने। २९। ३४—३६ ॥

हन्ता, [ऋ] त्रि, (हन्तीति। हन+तृच्।) हननकर्त्ता। यथा, भट्टौ ५ सर्गे।
"भवन्तं कार्त्तवीर्य्यो यो हीनमब्धिमचीकरत्।
जिगाय तस्य हन्तारं स रामः सार्व्व-
लौकिकः ॥"

हन्तुः, पुं, मृत्युः। नृपः। हनधातोः तुप्रत्ययेन निष्पन्नः। इति केचित् ॥ (विनाशः। यथा, भागवते। ११। ५। ५०।
"भूभारासुरराजन्यहन्तवे गुप्तये सताम्।
अवतीर्णस्य निर्वृत्यै यशो लोके वितन्यते ॥")

हन्तोक्तिः, स्त्री, (हन्त इत्यस्य उक्तिः।) अनुकम्पोक्तिः। इति केचित् ॥

हन्नः, त्रि, (हद्+क्तः।) कृतपुरीषोत्सर्गः। इत्यमरः। ३। १। ८६ ॥

हन्यमानः, त्रि, (हन+कर्म्मणि शानच्।) वर्त्तमानहननीयवस्तु। हनधातोः कर्म्मणि शानप्रत्ययेन निष्पन्नः। यथा,—
"हन्यमानं महासैन्यं विलोक्यमर्षमुद्वहन्।
अभ्यधावन्निशुम्भोऽथ मुख्ययासुरसेनया ॥"
इति मार्कण्डेये देवीमाहात्म्यम् ॥

हपुषा, स्त्री, वणिग्द्रव्यविशेषः। तत्तु मरीचह्रस्वदीर्घकृष्णवर्णवस्तु। हबुष् इति ख्यातम्। इति वैद्याः ॥ हौहवेर इति हिन्दीभाषा। तत् द्विविधम्। तन्मध्ये प्रथमं फलं मत्स्यसदृशं विस्रगन्धम्। द्वितीयमश्वत्थफलसदृशं मत्स्यगन्धम्। तयोर्नामानि गुणाश्च।
"हपुषा वपुषा विस्रा पराश्वत्थफला स्मृता।
मत्स्यगन्धा प्लीहहन्त्री विषघ्नी ध्वाङ्क्षनाशिनी ॥
हपुषा दीपनी तिक्ता मृदूष्णा तुवरा गुरुः।
पित्तोदरप्रमेहार्शोग्रहणीगुल्मशूलहृत् ॥
पराप्येतद्गुणा प्रोक्ता रूपभेदो द्वयोरपि ॥"
इति भावमिश्रकृतभावप्रकाशः ॥ * ॥
अपि च।
"हपुषा हवुषा विस्रा विस्रगन्धा विगन्धिका।
अन्या चामी स्वल्पफला कच्छुघ्नी ध्वाङ्क्षनाशिनी ॥
प्लीहघ्नवृषविषघ्नी च कफघ्नी चापराजिता।
पूर्व्वा तु पञ्चनाम्नी स्यादपरा सप्तधाभिधा ॥
हपुषा कटुतिक्तोष्णा गुरुश्लेष्मबलामजित्।
प्रदरोदरविष्टम्भशूलगुल्मार्शसां हरा ॥"
इति श्रीनरहरिपण्डितविरचितराजनिर्घण्टे शताह्वादिवर्गश्चतुर्थः ॥

हबुषा, स्त्री, हपुषा। इति राजनिर्घण्टः ॥

हम्बा, स्त्री, गोध्वनिः। तत्पर्य्यायः। हम्भा २ रैभणम् ३। इति जटाधरः ॥ हम्भा ४ रम्भा ५। इति हेमचन्द्रः ॥ (यथा, महाभारते। १। १६६। ३१।
"क्रोधरक्तेक्षणा सा गौर्हम्बारवघनस्वना।
विश्वामित्रस्य तत्सैन्यं व्यद्रावयत सर्व्वशः ॥")

हम्भा, स्त्री, गोध्वनिः। इति हेमचन्द्रः। ^ शेषश्च ॥

हम्म, गतौ। इति कविकल्पद्रुमः ॥ (भ्वा-सक०-सेट्।) मद्दयान्तः। हम्मति। दुर्गादासः ॥

हय, क्लमे। गतौ। इति कविकल्पद्रुमः ॥ (पर०-क्लमे अक०-गतौ सक०-सेट्।) क्लमो ग्लानिः। इति दुर्गादासः ॥

हयः, पुं, (हयति गच्छतीति। हय+अच्। हिनोतीति। हि+अच् वा।) इत्यमरः। २। ८। ४४ ॥ अथ हयायुर्व्वेदः।
धन्वन्तरिरुवाच।
"हयायुर्व्वेदमाख्यास्ये हये सर्व्वार्थरक्षणम्।
काकुटो कृष्णजिह्वश्च कृष्णास्यः कृष्णतालुकः
करालो हीनदन्तश्च शृङ्गी चाधिकदन्तकः।
एकाण्डश्चैव जाताण्डः कञ्चुकी [illegible]
मार्ज्जारपादो व्याघ्राभः कुष्ठविद्रधिसन्निभः।
यमजो वामनश्चैव मार्ज्जारकपिलोचनः ॥
एतद्दोषा हयस्याज्य उत्तमोऽश्वश्चतुष्करः।
एते दोषाश्च कथिता हयहस्त्यादिपुत्तमाः ॥
मध्योऽर्द्धहस्तहीनोऽश्वो मुष्टिहस्तविहीनकः।
कनीयांश्चार्द्धमानः स्यादर्द्धसप्तमु दीर्घतः ॥
पञ्चमुष्टिहीनः पञ्चोन उत्तमाश्चात्तु दीर्घतः।
असंहता ये च वाशा ह्रस्वकर्णास्तथैव च ॥
स्वनेत्रप्रभावेषु न दीनाश्चिरजीविनः।
रेवन्तपूजनाद्धोमाद्रक्षा स्यात् द्विजभोजनात्
लोहकं निम्बपत्राणि गुग्गुलुसर्षपा घृतम्।
तिलश्चैव वचा हिङ्गु बध्नीयाद्वाजिनां गले ॥
आगन्तुकं दोषजन्तु व्रणं द्विविधमीरितम्।
चिरपाकं खरं वातात् पित्तजं क्षिप्रपाकिकम्
कण्डुदाहात्मकं पित्तात् सोष्मादं मन्दवेदनम्
घनं कफात् सन्निपातात् [illegible]
आगन्तुकन्तु शस्ताद्यैर्दुष्टव्रणविशोधनम्।
दन्तीमूलं हरिद्रे द्वे चित्रकं त्रिवभेषजम् ॥
रसोनं सैन्धवं वापि तक्रकाञ्जिकपेषितम्।
तिलशक्तुकपिण्डीका दधियुक्ता ससैन्धवा ॥
निम्बपत्रयुतं पिण्डं तिलैः शोधनरोपणम्।
करवीरकदस्यर्कघृष्टीकुटजचित्रकैः ॥
भल्लातस्य पचेत्तैलं नाडीव्रणहरं परम्।
पद्मपल्लवकल्केन घृतेन च प्रलेपयेत् ॥
द्वे हरिद्रे विडङ्गानि तथा लवणपञ्चकम्।
पटोलं निम्बपत्रञ्च वचा चित्रकमेव च ॥
पिप्पली शृङ्गवेरञ्च चूर्णमेकत्र कारयेत्।
एतत्पानं कृमिश्लेष्ममदानिलविनाशनम् ॥
निम्बपत्रं पटोलञ्च त्रिफला खदिरं तथा।
क्वाथयित्वा ततो वाहं स्नपयेच्च विचक्षणः।
वाहमेव प्रदातव्यं पानं कुष्ठापशान्तये ॥
व्रणेषु च कुष्ठेषु तैलं सर्षपजं हितम्।
पञ्चवल्कलतैलं वा दशमूलञ्च शोधनम् ॥
लशुनादीन् वदे कल्पान् सुक्तिपानात्तलेपतः।
मातुलुङ्गरसोपेतं मांसलारसकेन वा ॥"
मांसलास्थाने मांसानामिति च पाठः।

दत्वाश्वेभ्यः पर्षौतां निम्बसंयुतेः ।
…त्सोऽपि पर्षवत्प्रग्रहितः ॥
…र्णिपूर्णां ध्यानकाध्न्यगसाकरे ।
…स्नुहीन स्वरधोऽपह्रस्वानि च ॥
… पयोऽपि देयो नैव तु दापयेत् ।
…दालिके पित्ते गर्करास्यपयोऽन्वितः ॥
…: कर्षे घोषैः कर्षे मुहान् कुलत्थकान् ।
…लिपदिश्वद्रुग्धाणी हयोऽनिलशुगुषितः ॥
…नदृनिभो हेमवर्णः श्वेतश्च गुग्गुलुः ।
…हरेत् पूर्वं गुग्गुलुं पाययेद्धयम् ॥
…ने पायसं दुग्धं नाडोम्लिम्नमतनोति सः ।
…ने भोजयेदश्वं शाल्यन्नं वातले ददेत् ॥
…नाश्च रसैः पित्ते मधुमुद्गरसान्ययोः ।
… मुद्गान् कुलत्थान् वा काटुनिमान् घृतान् हये ॥
…धिये व्याधिते श्वासे त्रिदोषादौ तु गुग्गुलुम् ।
…द्वर्वा सर्व्वरोगे प्रथमेऽह्नि पलं ददेत् ॥
…र्दयेत् ततो वर्षमेकादिपलपञ्चकम् ।
…मे ध्याश्च चत्वारि त्रीणि मध्यजघन्ययोः ॥
…िन भोजनेनैव अशीतिपलकं वरं ।
…े षष्टिश्चाधमेऽथ चत्वारिंशच्च भोगिषु ॥
… कुष्टेषु खल्वेषु त्रिफलाक्वाथसंयुतम् ।
…ाग्नौ शोथरोगे च गवां मूत्रेण योजयेत् ॥
…पित्तोल्वणे व्याधौ गोक्षीरघृतसंयुतम् ।
…क्षपाणां पुष्टार्थं मापैर्म्मुद्गैश्च भोजनम् ॥
…दायाः प्रदातव्यं गुडूच्याः पलपञ्चकम् ।
…ते घृतसंयुक्तं शरद्ग्रीष्मेषु वाजिनाम् ॥
… पुष्टिदस्तापि बलतेजोविवर्द्धनम् ।
…वाश्वाय दद्याद्वै क्षीरयुक्तमथापि वा ॥
…डूचीकल्कयोगेन शतावर्य्यश्वगन्धयोः ।
…त्वारि त्रीणि मध्यस्य जघनस्य पलानि हि ॥
…स्मादेव वाहानामेकरूपं यदा भवेत् ।
…म्रियते च तदा चिप्रं उपसर्गं तमादिशेत् ॥
…मादेरत्नया विप्रभोजनैर्वलिकर्म्मणा ।
…न्यो ऽमर्गशान्तिः स्याद्धरीतक्यादिकल्पतः ॥
…तकी मगोमूत्रा तैलेन लवणान्विता ।
…दौ पञ्च ततः पञ्चवृद्धा पूर्णा शतावधि ।
…तमाश्वे शतं प्रोक्तमशीतिः षष्टिरुत्तरे ।६॥
…आयुर्व्वेदमाख्यास्ये उक्ताः कल्पा गजे हिताः ।
…जे चतुर्गुणा मात्रा ताभिर्गजरुगर्द्दनम् ॥
…ओपसर्गव्याधीनां शमनं शान्तिकर्म्म च ।
पूजयित्वा सुरान् विप्रान् ब्राह्मणे कपिलां ददेत् ॥
…न्तिदन्तहये मालां विषघ्नीयाद्दुपोषितः ।
…ष्वणं मन्त्रिता वेद्यो वचासिद्धार्थकामले ॥
सूर्य्याद्याः शिवदुर्गाश्रीर्विष्णुता रक्षसां गणः ।
बलिं दद्याच्च भूतेभ्यः स्नापयेच्च चतुर्घटैः ॥
भोजनं मन्त्रितं दद्यात् भक्षनोऽङ्गनयेद्गजम् ।
भूतौ रक्षा शुभा मेध्या वारुणी रक्षसां सदा ॥
त्रिफला पञ्चकोलं च दशमूलं विडङ्गकम् ।
शतावरी गुडूची च निम्बवासककिंशुकाः ॥
…

आयुर्व्वेदो गजाश्वानामुक्तः संक्षेपभारतः ॥"

इति गारुडे हयायुर्व्वेदः २०१ अध्यायः ॥ शुक्तिकल्पतरूक्तहयपरीक्षा घोटकशब्दे द्रष्टव्या ॥ ० ॥ हये वर्णनीयानि यथा। वेगः १ धीरत्वम् २ तेजः ३ समचरणस्थितिः ४ खुरोत्खातरजः ५ रूपम् ६ जातिः ७ गतिविचित्रता ८। इति कविकल्पलता ॥ ० ॥ अथ हयशकुनः ।

"हेषारवं मुञ्चति वामतो यः
खुराञ्चितिर्दक्षिणपादघातैः ।
कण्डूयते दक्षिणमङ्गभाग
तुङ्गं तुरङ्गः स पदं ददाति ॥"

इति वसन्तराजे हयशकुनः १३ वर्गः ॥

हयकातरा, स्त्री, (हयः कातरो यस्याः ।) अश्वकातराह्वयः । घोड़कायरा इति हिन्दी भाषा ॥

हयकातरिका, स्त्री, (हयकातरा एव । स्वार्थे कन् । टाप् अत इत्वम् ।) अश्वकातराह्वयः । घोड़कायरा इति हिन्दी भाषा । यथा,—

"कातरा हयपर्य्यायैः कातरान्तैः प्रकीर्त्तिता ।
अश्वकातरिका तिक्ता वातघ्नी दीपनी परा ॥"

इति राजनिर्घण्टः ॥

हयगन्धं, क्ली, (हयस्येव गन्धो यस्य ।) काचलवणम् । इति राजनिर्घण्टः ॥ (विवरणमस्य काचलवणशब्दे ज्ञातव्यम् ॥)

हयगन्धा, स्त्री, (हयस्येव गन्धो यस्याः ।) अश्वगन्धा । इति रत्नमाला ॥ (अस्याः पर्य्यायो यथा,—

"गन्धान्ता वाजिनामादिरश्वगन्धा हयाह्वया ।
वराहकर्णी वरदा बलदा कुष्ठगन्धिनी ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ अजमोदा । इति राजनिर्घण्टः ॥

हयग्रीवः, पुं, (हयस्य ग्रीवा इव ग्रीवा यस्य ।) मधुकटभहृतवेदोद्धारार्थं विष्णोरवतारविशेषः । तस्य रूपं यथा,—

"सुनासिकेन कायेन भूत्वा चन्द्रप्रभस्तदा ।
कृत्वा हयशिरः शुभ्रं वेदानामालयं प्रभुः ॥
तस्य मूर्द्धा समभवत् द्यौः सनक्षत्रतारका ।
केशाश्चास्याभवद्दीर्घा रवेरंशुसमप्रभाः ॥
कर्णावाकाशपाताले ललाटं भूतधारिणी ।
गङ्गा सरस्वती श्रोण्यौ भ्रुवावास्तां महोदधी ॥
चक्षुषी सोमसूर्य्यौ ते नासा सन्ध्या पुनः स्मृता ।
प्रणवस्त्वथ संस्कारो विद्युज्जिह्वा च निर्म्मिता ॥
दन्ताश्च पितरो राजन् सोमपा इति विश्रुताः ।
गोलोको ब्रह्मलोकश्च ओष्ठावास्तां महात्मनः ॥
ग्रीवा चास्याभवद्राजन् कालरात्रिर्गुणोत्तरा ।
एतद्धयशिरः कृत्वा नानामूर्त्तिभिरावृतम् ॥"

इति महाभारतम् ॥ ॥

(हयग्रीवदैत्यवधार्थमेव भगवान् हयग्रीवमूर्त्तिरभवत् । इति देवीभागवतमतम् ॥ अस्य विवरणन्तु तत्रैव १ स्कन्धे ५ अध्याये द्रष्टव्यम् ।)

… ॥ स च

कल्पान्ते ब्रह्मणि प्रसुप्ते वेदं हृतवान् । तद्वेदोद्धारणार्थं विष्णुना मत्स्यावतारेण स हतः । इति केचित् ॥ ० ॥ अपि च ।

"हडगङ्गाजलस्यान्तस्तोरे ब्रह्मसुतस्य च ।
विमनायाद्धयो देवः शिवलिङ्गसमन्वितः ।
विश्वदेवो महादेवो योनिमण्डलरूपिणी ॥
हयग्रीवेण युयुधे तत्र देवो जगत्पतिः ।
हयग्रीवं यत्र हत्वा मणिकूटं तथागमत् ॥"

इति कालिकापुराणे ८२ अध्यायः ॥

हयग्रीवहा, [न्] पुं, (हयग्रीवं हन्तीति । हन् + क्विप् ।) विष्णुः । इति हेमचन्द्रः ॥

हयग्रीवा, स्त्री, दुर्गा । यथा,—

"नारसिंही हयग्रीवा हिरण्याक्षविनाशिनी ।"

इति तस्याः सहस्रनामस्तोत्रम् ॥

हयङ्कषः, पुं, (हयं उच्चैःश्रवसं कषतीति । कष + खच् ।) मातलिः । स तु इन्द्रसारथिः । इति त्रिकाण्डशेषः ॥

हयनं, क्ली, (हयति गच्छत्यनेनेति । हय + ल्युट् ।) कर्णीरथः । इत्यमरः ॥ तस्य रूपान्तरं डयनम् । इति तट्टीकायां भरतः ॥

हयपुच्छी, स्त्री, (हयस्य पुच्छमिव आकृतिर्यस्याः । ङीष् ।) माषपर्णी । इत्यमरः । २ । ४।१३८ ॥

हयप्रियः, पुं, (हयस्य प्रियः ।) यवः । इति हेमचन्द्रः ॥ (यवशब्देऽस्य गुणादयो ज्ञेयाः ॥)

हयप्रिया, स्त्री, (हयस्य प्रिया ।) अश्वगन्धा । खर्ज्जूरी । इति राजनिर्घण्टः ॥

हयमारः, पुं, (हयं मारयतीति । मृ + णिच् + अण् ।) करवीरः । इति राजनिर्घण्टः ॥

हयमारकः, पुं, (हयं मारयतीति । मृ + णिच् । ण्वुल् ।) करवीरवृक्षः । इत्यमरः । २।४।७६ ॥

हयमारणः, पुं, (हयं मारयतीति । मृ + णिच् + ल्यु ।) अश्वत्थवृक्षः । इति शब्दचन्द्रिका ॥

हयवाहनः, पुं, (हयो वाहनमस्य ।) रेवन्तः । स तु सूर्य्यपुत्रः । इति हेमचन्द्रः ॥ कुबेरः । इति केचित् ॥

हयवाहनशङ्करः, पुं, रक्तकाञ्चनः । इति शब्दचन्द्रिका ॥

हयशाला, स्त्री, (हयस्य शाला ।) अश्वालयः । यथा, मात्स्ये । २१७ । १८—२३ ।

"गवां स्थानं तथैवात्र तुरगाणान्तथैव च ।
उत्तराभिमुखा श्रेणी तुरगाणां विधीयते ॥
दक्षिणाभिमुखा वाथ परिशिष्टास्तु गर्हिताः ।
तुरगास्तु तथा धार्य्याः प्रदीपैः सर्व्वरात्रिकैः ॥
कुक्कुटा वानराश्चैव मर्कटाश्च नराधिप ! ।
धारयेदश्वशालायां सवत्सां धेनुमेव च ।
अजाश्च धार्य्या यत्नेन तुरगाणां हितैषिणा ॥
गोगजाश्वादिशालासु ततपुरीषस्य निर्गमम् ।
अस्तं गते न कुर्व्वीत दे[illegible]दिवाकरे ॥"

हयशीर्षः, पुं, ([illegible] शीर्षं यस्य ।) विष्णुः । [illegible]—

"ततो [illegible] ; वाजिमुखं

तत्र देवह्रदे स्नात्वा तर्पयित्वा पितॄन् सुरान्।
संपूज्य हयशीर्षञ्च जगाम गजसाह्वयम्॥"
इति वामनपुराणे ७१ अध्यायः॥

हया, स्त्री, (हयस्तद्गन्धोऽस्त्यस्या इति। अच्। टाप्।) अश्वगन्धा। इति राजनिर्घण्टः॥

हयाध्यक्षः, पुं, (हयस्य अध्यक्षः।) अश्वाध्यक्षः। तस्य लक्षणं यथा,—
"हयशिक्षाविधानज्ञस्तच्चिकित्सितपारगः।
अश्वाध्यक्षो महीभर्त्तुः स्वासनश्च प्रशस्यते॥"
इति मात्स्ये। २१५। ३७॥

हयानन्दः, पुं, (हयस्य आनन्दो यस्मात्।) मुद्गः। इति राजनिर्घण्टः॥ (गुणादयोऽस्य मुद्गशब्दे ज्ञातव्याः॥)

हयायुर्व्वेदः, पुं, (हयस्य आयुर्व्वेदः।) घोटकचिकित्साशास्त्रविशेषः। तच्छास्त्रं हयशब्दे द्रष्टव्यम्॥

हयारिः, पुं, (हयस्य अरिः।) करवीरः। इति रत्नमाला॥

हयाशना, स्त्री, (हयानामशनं यस्याः।) शल्लकीवृक्षः। इति शब्दचन्द्रिका॥

हयी, स्त्री, (हयस्य स्त्री। हय+ङीप्।) घोटकी। इति जटाधरः॥

हयेष्टः, पुं, (हयानामिष्टः।) यवः। इति राजनिर्घण्टः॥

हयोत्तमः, पुं, (हयेषु उत्तमः।) कुलीनाश्वः। तत्पर्य्यायः। वाताश्वः २ जात्यः ३ अजानेयः ४। इति त्रिकाण्डशेषः॥

हरः, पुं, (हरति पापानीति। हृ+अच्।) शिवः। इत्यमरः। १। १। ३५॥ (यथा, रघुः। ४। ३२।
"स सेनां महतीं कर्षन् पूर्व्वसागरगामिनीम्।
बभौ हरजटाभ्रष्टां गङ्गामिव भगीरथः॥")
अग्निः। गर्द्दभः। इति केचित्॥ त्रि, हरणम्। इत्यङ्गशास्त्रम्॥ त्रि, हरणकर्त्ता। (यथा, भागवते। ३। १८। ११।
"एते वयं न्यासहरा रसौकसां
गतह्रियो गदया द्रावितास्ते॥")

[हर]कः, पुं, (हर एव। स्वार्थे कन्।) शिवः। [चौ]रः। इति केचित्॥ हरणकर्त्तरि, त्रि॥

[हर]गौरी, स्त्री, (हरेण सह गौरी।) अर्द्धनारीश्वरमूर्त्तिः। यथा,—
देव्युवाच।
[यथा] तथाहं सततं छायेवानुगता हर।
[...]ं माहचर्य्येण तथा मां कर्त्तुमर्हसि॥
[...]नाचेव संस्पर्शं नित्यालिङ्गनविभ्रमम्।
[...]मिच्छामि भवतस्त्वं चेत् कर्त्तुमर्हसि॥
श्रीभगवानुवाच।
[...]तम्मह्यमपि यत्त्वमिच्छसि भाविनि!।
[...]यमहं वक्ष्ये यदि शक्नोषि तत् कुरु॥
[...] शरीरस्य ग्रहाण त्वं मनोहरे।
[...]र्द्धं मे नारी तथैवाहं पुमानिति॥
[...]न हि शक्नोषि हर्त्तुं त्वमर्द्धमीदृशम्।

तदाहं ते हरिष्यामि शरीरार्द्धं वरानने!॥
तथैवाहं तथा नारी अर्द्धं भवतु पूरुषः।
विद्यते तव शक्तिश्चेत् त्वमनुष्ठातुमर्हसि॥
श्रीदेव्युवाच।
"तथैवाहं हरिष्यामि शरीरार्द्धं वृषध्वज!।
किन्त्वहं त्वैकमिच्छामि यथेत्थं हर इच्छसि॥
तथाहमर्द्धं भवतो हृत्वा तिष्ठामि तावता।
त्यजाम्यहं यदा तेऽर्द्धं सम्पूर्णं स्यात्तदा हयम्॥
इत्यर्द्धभागहरणं भवेद्यदि यथेप्सितम्।
तदैवाहं तदा शम्भोः शरीरार्द्धं हराम्यहम्॥"
ईश्वर उवाच।
एवमस्तु भवेन्नित्यं यथा त्वं कर्त्तुमिच्छसि।
शरीरार्द्धस्य हरणं भूयात्तव यथेप्सितम्॥
श्रीऔर्व्व उवाच।
अथ गौरी तदा पूर्व्वमनुभूतं तपःस्थितौ।
योगनिद्रास्वरूपं तदात्मानोऽचिन्तयत्प्रिया॥
हरं प्रणम्य प्रथमं ब्रह्माणञ्च ततः परम्।
ततस्त्रिजगतामीशं हरिं नारायणं प्रभुम्॥
चिन्तयित्वा तथा तेषामेकतां सा जगन्मयी।
आत्मानं योगनिद्राञ्च चिन्तयित्वा मनस्विनी॥
दक्षिणे स्वशरीरस्य भागार्द्धं शशभृतः।
शरीरस्य तथा वाममतिप्रेम्णा निजं हरे॥
हरोऽपि स्वशरीरार्द्धं गौरीकार्थे तदा स्वयम्।
प्रेम्णानिवेशयत्तस्याश्चिकीर्षुः प्रियमद्भुतम्॥
अथ स्थित्वा तदा भर्गः कान्त्या सह चिरं तदा।

परित्यज्य शरीरार्द्धं पृथगेव बभौ रुचा॥
कालो भूत्वा स्वर्णगौरी शरीरार्द्धन्तु शाङ्करम्।
प्राप्य सोदात्तदात्मानं सन्तुष्टा च जगन्मयी॥
एवं यदा शरीरार्द्धमादाय परमेश्वरी।
हरस्य तिष्ठति तदा राजतेऽतीवशोभना॥
अर्द्धं धम्मिल्लसंयुक्तं जटाजूटार्द्धयोजितम्।
एकस्मिन् श्रवणे भोगी भोगिजाम्बूनदोचितम्।
कुण्डलं श्रवणेऽन्यस्मिन् शीर्षे तस्या व्यराजत॥
अर्द्धं मृगाक्षि चाप्यार्द्धं हपभाक्षि व्यराजत।
अर्द्धं स्थूलनसं चारु तिलपुष्पसमं परम्॥
दीर्घश्मश्रु तथैवार्द्धमर्द्धं श्मश्रुविवर्ज्जितम्।
आरक्ताधरदशनं रक्तौष्ठमेकतस्तथा॥
अपरं शुक्लविपुलदीर्घाकृति रदं परम्।
अर्द्धं नीलगलश्चार्द्धमपरं हारसंयुतम्॥
अर्द्धं कङ्कणकेयूरयुक्तबाहु तथापरम्।
नागकेयूरसंयुक्तस्थूलबाहु निकृन्तिकम्॥
अर्द्धं विपायतभुजं करिहस्तभुजं परम्।
एकत्र सौम्यिकाः शाखाः करस्यान्यत्र तां विना॥
एकस्तनन्तु हृदयं रोमावल्यर्द्धसंयुतम्।
रम्भास्तम्भनिभानीव सुपार्ष्णि मृदुपादकम्॥
एकं तथाऽरं स्थूलमंहतोरु पदाम्बुजम्।
एकञ्चारु मृदु स्थूलजघनं सुमनोहरम्॥
तथापरं दृढकटि महतोर्द्धपदाम्बुजम्।
एकं वैयाघ्रचर्म्मावृतं भूतिविलेपनम्॥
अपरं मृदुकौषेयवसनं चन्द्रभोभितम्।

एवमर्द्धं तया जातं यौषित्त्वं [...]
अपरं शम्भुरभवत् सुदृढं पुरु[...]
एवमर्द्धं स्मरारिर्यो अहार गिरि[...]
हिताय सर्व्वजगतां कामाख्या[...]
तस्याः शरीरं राजेन्द्र हरस्यार्द्ध[...]
शैलोपमेयं तत्रास्ति मार्गितं भुव[...]
सन्तानः पारिजातो वा
अमोघया तया वन्द्यौ तौ चापि
बहुधा च प्रयत्नेन तौ रेमाते शरी[...]
अर्द्धनारीश्वरो भूत्वा स तु रेमे [...]
इति यद्यपि भूतेशः स्वयं शक्नोति
गौरीं कर्त्तुं तदा सर्व्वभूतकारणकार[...]
तथापि तां गिरिसुतां संयोज्य विविधै[...]
तपस्ययोजयद्देव क्रियोपायैरनेकशः॥
तपोनिर्धूतसर्व्वांहो यथा गौरीमयाकरो[...]
अर्द्धञ्च प्रददौ तस्यै शरीरस्य महेश्वरः॥
नैवास्य तत्त्वं जानन्ति शक्राद्याः सकलाः [...]

शरीरार्द्धप्रदानस्य तपसो योजनस्य च।
एतस्य तत्त्वं जानन्ति महात्मानो
नन्दी भृङ्गी महाकालो वेतालो
भैरवभूता महेशस्य वीतभीतास्तपोधनाः।
ये मा[...] उत्तमा[...]तपसो बलात्।
गणाना[...] च [...]
एवं स[...] जानन्ति हरं
वनिताः सत्क्रियोपायैस्ततो
य इदं शृणुयान्नित्यमद्भुतं पुण्यदायकम्।
शिवयोः प्रीतिकरणं शरीरार्द्धप्रदं तथा॥
गौरीत्वापादनञ्चैव कालिकायाः
न तस्य विघ्ना जायन्ते स च पुण्यतमो मत[ः]
दीर्घायुः स सुखी भूयात्
सततं परिशृण्वानः शिवयोश्चरितं महत्।
शिवलोकमवाप्नोति सुचिरं शिववल्लभः॥"
इति श्रीकालिकापुराणे ४४ अध्यायः॥

हरचूडामणिः, पुं, (हरस्य चूडामणि[रिव] भूषणमिव।) चन्द्रः। इति भूरिप्रयोगः। शिरोरत्नञ्च॥

हरणं, क्ली, (ह्रियते इति। हृ+ल्युट्।) यौतकादिदेयद्रव्यम्। (यथा, रघुः। ७। ३२।
"स त्वानुरूपाहरणीकृतश्रीः
प्रास्थापयत् राघवमन्वगाच्च॥")
तत्पर्य्यायः। दायः २। इत्यमरः। २। ७। २८॥
यौतकं शादिना उपनयनभिक्षाप्रसादादि च यत् देयं तत् दायहरणपदवाच्यं कन्यादानकाले जामात्रादिभ्यो व्रतभिक्षादौ ब्रह्मचार्य्यादिभ्यश्च यद् द्रव्य दीयते तत्र दायादिद्वयमित्यर्थः। युतकं यानिसम्बन्धः तत्र भवमिति अणि यौतकं युतयोर्वधूवरयोरिदमिति वा कचि यौतकं यौतुकसकारमध्यमपि। यौतकं यौतुकञ्च तत् इति वाचस्पतिः। दीयते दायः, कर्म्मणि घञ्। सुदीयते सुदायः इति पाठः क्वचित्। ह्रियते हरणं कर्म्मणि अनट्। [...]

शुक्। ध्वनि:। इति मेदिनी॥ (यथा, भागवते। १०। ५०। ८।
"अवतीर्णोऽयमंशेन भूभारहरणाय मे।
संरक्षणाय साधूनां कृतोऽन्येषां वधाय च॥")
गन्धम्। स्वर्णम्। कपर्दकम्। उत्पाटकम्। इति केचित्॥ आच्छादनात् आहरणात् भागपहरणम्। इति सोमावती॥
हरतेज:, [स्] क्ली, (हरस्य तेज:।) पारदम्। इति राजनिर्घण्ट:॥ शिववीर्य्यञ्च॥
हरनेत्रं, क्ली, (हरस्य नेत्रम्।) शिवचक्षु:। संख्यात्रयम्। इति ज्योति:शास्त्रम्॥
हरबीजं, क्ली, (हरस्य बीजम्।) पारदम्। इति भूरिप्रयोग:॥
हररूप:, पुं, (हरस्य रूपमिव रूपमस्य।) शिव:। इति शब्दरत्नावली॥
हरशेखरा, स्त्री, (हरस्य शेखरं आयामत्वेनास्त्यस्या इति। अच्।) गङ्गा। इति हेमचन्द्र:॥
हरहूरा, स्त्री, हारहूरा। द्राक्षा। इति केचित्॥
हराद्रि:, पुं, (हरस्य अद्रि:।) कैलासपर्व्वत:। इति केचित्॥ (यथा, कथासरित्सागरे। ११२। ६६।
"विद्याधरा: शृणुत य: कुरुते समाज
धर्म्मव्यतिक्रममित: प्रभृति प्रजासु।
वध्य: स मे नियतमित्यभितो हराद्रि-
मुद्घोषणाञ्च स ततो भ्रमयाञ्चकार॥")
हरि:, पुं, (हरति पापानीति। हृ+"हृपिषि-रुहीति।" उणा० ४। १२८। इति इन्।) विष्णु:। (यथा, रघु:। १०। ८६।
"हरिरिव युगदीर्घैर्दोर्भिरंशैस्तदीयै:
पतिरवनिपतीनां तैश्चकाशे चतुर्भि:॥")
सिंह:। (यथा, रघु:। २। ५९।
"स न्यस्तशस्त्रो हरये स्वदेह-
मुपानयत् पिण्डमिवामिषस्य॥")
शुकपक्षी। सर्प:। वानर:। भेक:। इत्यमर:॥ चन्द्र:। सूर्य्य:। वायु:। अश्व:। (यथा, महाभारते। ७। १६६। ५।
"तत: स हरिभिर्युक्तं जाम्बूनदपरिष्कृतम्।
मेघनादिनमारुह्य श्रिया परमया ज्वलन्॥")
यम:। शिव:। ब्रह्मा। किरण:। इन्द्र:। (यथा, रघु:। १२। १०३।
"यन्ता हरे: सपदि संहृतकार्म्मुकज्य-
मापृच्छ्य राघवमनुष्ठितदेवकार्य्यम्॥")
वर्णविशेष:। इति मेदिनी॥ मयूर:। कोकिल:। हंस:। अग्नि:। इति शब्दरत्नावली॥ भर्त्तृहरि:। इति त्रिकाण्डशेष:॥ पिङ्गवर्ण:। हरिद्वर्ण:। इति हेमचन्द्र:॥ *॥ हरेरष्टोत्तरशतनामानि यथा,—

श्रीसदाशिव उवाच।

श्रीकृष्णाष्टोत्तरशतं नाम मङ्गलदायकम्।
तत् शृणुष्व महाभाग! सर्व्वकल्मषनाशनम्॥
श्रीकृष्ण: पुण्डरीकाक्षो वासुदेवो जनार्द्दन:।
नारायणो हरिर्व्विष्णुर्माधव: पुरुषोत्तम:॥
गोविन्द: केशवोऽनन्तो वामनो मधुसूदन:।
दामोदरो हृषीकेश: पद्मनाभस्त्रिविक्रम:॥
वैकुण्ठश्चाच्युतो रामश्चक्रपाणिरधोक्षज:।
पीताम्बरो जगन्नाथो नृसिंहो गरुड़ध्वज:॥
राधिकापतिरानन्दस्वरूपो विश्वमोहन:।
यशोदानन्दन: सत्य: श्रीगोपीजनवल्लभ:॥
गदाधरो हयग्रीवो वराहश्च गवीश्वर:।
गोवर्द्धनधरो विश्ववीजं कमललोचन:॥
सर्व्वान्तर्य्यामी जगदीशश्चाणूरमर्द्दन: प्रभु:।
विश्वम्भरो यज्ञभोक्ता वनमाली सनातन:॥
पुराणपुरुषो नन्दात्मज: श्रीवत्सलाञ्छन:।
देवकीनन्दन: श्याम: श्रीश्यामाप्राणवल्लभ:॥
अनिरुद्ध: परं ब्रह्म मुरारि: श्रीधरस्तथा।
श्रीगोपीमोहन: शार्ङ्गधन्वा तु ब्राह्मणप्रिय:॥
ब्रह्मण्यदेव: शिवब्रह्मापवयविनाशन:।
कैटभारिर्गुणातीतो रुक्मिणीरमणो विराट्॥
महदर्ण: शेषशायी दैत्यारिरेकभक्तिस्तथा॥
सर्व्वशास्त्रप्रणेता च मुकुन्दो भक्तवत्सल:॥
अघासुरघ्न: प्रद्युम्नो हंसश्च मुरलीधर:।
कुवलयापीड़घाती च पद्मधारी चतुर्भुज:॥
भक्तलोकैकशरणो गोपालो वैष्णवप्रिय:।
वंशीपाणिर्गुणमय: कोटिकन्दर्पमोहन:॥
वेणुवाद्यविनोदी च कंसारिर्य्यादवस्तथा।
चतुर्व्वेदमयो नित्य: सच्चिदानन्दविग्रह:।
दीनानाथैकशरणं भक्तानुग्रहकारक:॥*॥
एतदष्टोत्तरशतं कृष्णनाम सुमङ्गलम्।
प्रत्यहं य: पठेत् प्रातस्त्रिसन्ध्यां वा विशेषत:॥
दिवादिद्येश्वरो भक्त्या शृणोति जपति स्मरेत्।
दु:स्वप्ननाशनं तस्य मनोमलविनाशनम्।
सर्व्वापराधशमनं सर्व्वपापक्षयो भवेत्।
पावनं शान्तिदं पुण्यं तापत्रयविनाशनम्॥
आयुष्यं सर्व्वसुखदं सर्व्वदु:खापहं मुने!।
व्रतयज्ञतपोदानयशतीर्थफलप्रदम्॥
पुष्टिदं चापि सन्ध्यानां ग्रहपीड़ादिनाशनम्।
सर्व्वाभीष्टप्रदं सर्व्वैश्वर्य्यदं विघ्ननाशनम्॥
सर्व्वोपद्रवदारिद्र्यनाशनं मानवस्य तु।
सद्बुद्धिविद्याविज्ञानयशोधर्म्मप्रदं तथा॥
सर्व्वभीतिहरं भक्तिमुक्तिधान्यधनप्रदम्।
सर्व्वरोगक्षयकरं वाह्यान्त:शुद्धिदं परम्॥
फलकामिनो वैष्णवस्य सर्व्वकामफलप्रदम्।
सर्व्वशत्रुक्षयो याति हरिभक्तिश्च जायते॥
सरस्वती च वशगा कमलाविरतं भवेत्।
सेवतीर्थे च मरणं गङ्गायां वा विशेषत:॥
मोचनं भवबन्धस्य यमभीतिविनाशनम्।
निष्कामिनस्त्वनन्यस्य प्रेमभक्तिसुखप्रदम्।
भवेदहैतुकं ध्यानं साक्षात् कृष्ण: प्रसीदति॥"
इति पाद्मोत्तरखण्डे १११ अध्याय:॥*॥
श्रीहरिपादचिह्नानि यथा,—

श्रीसदाशिव उवाच।

"सच्चिदानन्दरूपस्य कृष्णस्याद्भुतकर्म्मण:।
संस्मरेत् पादचिह्नानि प्रातर्भक्त्या नरोत्तम:॥
अतिगुह्यानि देवर्षे! यानि भक्तिप्रदानि च।
सर्व्वसुखप्रदानीह तव प्रोक्तानि वैधस॥
मयापि भुवनेश्वर्य्यै कथितानि प्रयत्नत:।
पुरासौ तुष्टचित्ताभूत् श्रुत्वा कृष्णसुखप्रदा

दिलीप उवाच।

कानि कानि च चिह्नानि कृष्णस्य पादयो-मुंः
वशिष्ठ! श्रोतुमिच्छामि कथयस्वानुपूर्व्वश

वशिष्ठ उवाच।

यदूचिवान् स्वयं ब्रह्मा नारदाय नराधिप
तत् शृणुष्व महत् पुण्यमतिगोप्यतमं वच:
विधिर्देवर्षिणा पृष्ट उपाख्यानमिदं पुरा।
महाभागवतं पुण्यमेकदा तमुवाच ह॥

ब्रह्मोवाच।

शृणु नारद वक्ष्यामि पादयोश्चिह्नलक्षणम्।
भगवत्कृष्णरूपस्य ह्यानन्दैकरसस्य च॥
अवतारा: ह्यसंख्याश्च कथिता ये तवाग्रत:
परं सम्यक् प्रवक्ष्यामि कृष्णस्तु भगवान् स्वय
देवानां कार्य्यसिद्ध्यर्थमृषीणां वा नृणां तथ
आविर्भूतस्तु भगवान् स्वानां प्रियचिकीर्षय
केनैव प्रार्थितो देवो भगवान् भक्तवत्सल:।
तान्यहं वेद्मि नान्योऽस्ति सत्यमेतन्मयोदित:
ऊनविंशतिचिह्नानि मया दृष्टानि तत्पदे।
दक्षिणे दश चिह्नानि वामे च नव नारद!
ध्वजातपत्रं कमलं वज्राङ्कुशमङ्कुशो यव:।
स्वस्तिकं चोर्द्धरेखा चाष्टकोणं चक्रमेव च॥*॥
नवान्यानि प्रवक्ष्यामि साम्प्रतं वैष्णवोत्तम!
चिह्नानि वामचरणे गोविन्दस्याङ्कितानि च॥
इन्द्रचापं त्रिकोणञ्च कलसञ्चार्द्धचन्द्रकम्।
शङ्खोऽम्बरं मत्स्यचिह्नं गोष्पदं जाम्बवं स्मृतम्
अङ्कान्येतानि भो विप्र! दृश्यन्ते च यदा कद
कृष्णाख्यन्तु परं ब्रह्म भुवि जातं न संशय:॥
हरितालिका, स्त्री, दूर्व्वा । इति त्रिकाण्डशेष: ॥ सौरभाद्रशुक्लचतुर्थी हरितालिका । सौरभाद्रकृष्णचतुर्थ्यामुदितचन्द्रस्य नष्टचन्द्र इति संज्ञा । इति पञ्जिकायां प्रसिद्धा । तत्र चन्द्रदर्शननिषेधो यथा । भोजदेव: ।

"शुक्लपक्षे चतुर्थ्यान्तु सिंहे चन्द्रस्य दर्शनम् ।
मिथ्याभिशापं कुरुते न पश्येत्तत्र तन्तत: ॥"

चतुर्थ्यां दर्शननिषेधात् तत्रोदितस्य चन्द्रस्य पञ्चम्यां दर्शने तु न दोष: । अत: ।

"पञ्चाननगते भानौ पक्षयोरुभयोरपि ।
चतुर्थ्यामुदितश्चन्द्रो नेक्षितव्य: कदाचन ॥"

चतुर्थ्यां नेक्षितव्य इति मुनिभिरुदित उक्त इत्यर्थ: । अथवा चतुर्थ्यामित्यस्य प्रधानक्रियान्वयाभ्यर्हितत्वादीक्षितव्य इत्यनेनान्वयो न तूदित इत्यनेन । तथा च अव्यक्तं प्रधानगामि इति सूत्रे अव्यक्तस्य शब्दस्य प्रधानेन सह सम्बन्ध इति भट्टनारायणव्याख्यानं इति । उदितस्त्वदर्शितव्यावृत्तिपर: स्वरूपाख्यानपरो वा ।

"ब्राह्मणो तु शुना दष्टा जम्बुकोष्ट्रेण वा गवा ।
उदितं सोमनक्षत्रं दृष्ट्वा सद्य: शुचिर्भवेत् ॥"

इति पराशरोक्तोदित इतिवत् ॥ * ॥

नन्वेकपदस्य कथमनेकार्थता इति चेन्न यावन्तोऽर्थास्तावन्ति पदानीति । तथा चोक्तम् ।

"यावतामेव धातूनां लिङ्गं रूढ़िगतं भवेत् ।
अर्थश्चैवाभिधेयस्तु तावद्भिर्गुणविग्रह: ॥"

लिङ्गं समार्थम् । रूढ़िगतं प्रसिद्धम् । न त्वप्रसिद्धम् । हन हिंसागत्योरित्यादौ गमनादिकम् । अभिधेयो वाच्य: । तावद्भिर्धातुभिर्गुणविग्रहो गुणैर्गणनाभिर्विग्रहो ग्रहणं यत्रार्थे स तथा । एतेन धातुसमसंख्यार्थत्वं पदस्य । ब्रह्मपुराणे सिंहार्काधिकारे ।

"नारायणोऽभिशप्तस्तु निशाकरमरीचिषु ।
स्थितश्चतुर्थ्यामद्यापि मनुष्याय पतेच्च स: ॥
अतश्चतुर्थ्यां चन्द्रन्तु प्रमादाद्वीक्ष्य मानव: ।
पठेद्धात्रेयिकावाक्यं प्राङ्मुखो वाप्युदङ्मुख: ॥
अभिशप्त: परीवादविषयीभूत: । सोऽभिशाप: ।
धात्रेयिकावाक्यं विष्णुपुराणे ।

"सिंह: प्रसेनमवधीत् सिंहो जाम्बवता हत: ।
सुकुमारक मा रोदीस्तव ह्येष स्यमन्तक: ॥"

अनेन मन्त्रेणाभिमन्त्रितं जलं पेयं प्राशयेत् स्यमन्तकोपाख्यानञ्च श्रोतव्यम् । इति तिथ्यादितत्त्वम् ॥

[illegible] (हरिद्र । [illegible]) [illegible] हेमचन्द्रः । [illegible]

[illegible]

पुष्प सामान्ये [illegible] वर्णिनी २० मम निशा [illegible] इति रत्नमाला ॥ हरित् कम [illegible] कम्चनी २३ सुवर्णी २४ [illegible] २७ हलही २८ वराङ्गी [illegible] ३० शा ३१ वर्णदात्री ३२ पवित्रा ३३ [illegible] ३४ निशाह्वा ३५ पिङ्गा ३६ मङ्गल्या ३७ मङ्गला ३८ लक्ष्मीः ३९ भद्रा ४० शिवा ४१ शोभा ४२ शोभना ४३ सुभगाह्वया ४४ श्यामा ४५ जयन्तिका ४६ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कफवातास्र कुष्ठमेहव्रणकण्डूविषापहत्वम् । देहवर्णविधायित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।

"हरिद्रा कफपित्तास्रशोथकण्डूव्रणापहा ।"

इति राजवल्लभः ॥

अपि च ।

"हरिद्रा काञ्चनी पीता निशाख्या वरवर्णिनी ।

कृमिघ्ना हलदी योषित्प्रिया हट्टविलासिनी ॥

हरिद्रा कटुका तिक्ता रूक्षोष्णा कफपित्तनुत् ।

वर्ण्या त्वग्दोषमेहास्रशोथपाण्डुव्रणापहा ॥"

अथ वनहरिद्रा ।

"वनहरिद्रा कुष्ठवातास्रनाशनः ।"

अथ आम्रहरिद्रा ।

"दार्वी निशा [illegible] सुरभिर्दारु च ।

[illegible] [illegible] सुरभि [illegible] ॥

[illegible] हरिद्रा या सा पीता [illegible] मता ।

[illegible] सर्वकण्डूविनाशिनी ॥"

इति भावप्रकाशः ॥

हरिद्रागणेशः, पुं. (हरिद्रावर्णो गणेशः ।) गणेशविशेषः । तस्य ध्यानं यथा,—

अथ हरिद्रागणेशः ।

"[illegible] विघ्नविनाशक । [illegible] सर्वकामप्रदः ॥"

अथ हरिद्र [illegible] हरिद्रागण- [illegible] ।

"हरिद्रा [illegible] हरिद्रागणेश विभुम् । [illegible] ॥"

[illegible]

हरिद्राभः, पुं. (हरिद्रायाः आभा इव आभा यस्य ।) [illegible] इति शब्दचन्द्रिका ॥

[illegible]

हरिद्रारागः, त्रि. (हरिद्राया राग इव रागो यस्य । अचिरस्थायित्वात्तथात्वम् ।) अस्थिरसौहृदः । इति हेमचन्द्रः ॥ चपलमात्रानुरागी २ । हरिद्राराग इव अस्येति हरिद्रारागः । [illegible] स्थायित्वात् तथेति यावत् । यथा,—

"चपलमात्रानुरागी च हरिद्राराग इति ।

हरिद्रुः, पुं. (हरिद्वर्णः द्रुमः ।) वृक्षः । हेमचन्द्रः ॥ दारुहरिद्रा । इत्यमरः ॥ तथा चोक्तम् ।

"दार्वी दारुहरिद्रा च पर्जन्या [illegible]

कटङ्कटेरी पीता च भवेत् सैव च

सैव कालीयकः प्रोक्तस्तथा [illegible]

पीतद्रुश्च हरिद्रुश्च पीतदारु कपीतकम् ।

दार्वी निशागुणा किन्तु नेत्रकर्ण [illegible]

इति

वृक्षविशेषः । हलदीया इति हिन्दी भाषा । तत्पर्यायः । पीतदारु १ पीतसारः २ पीतदारुकः ३ सुपुष्पः ४ सुरागः ५ पीत- [illegible] अस्य गुणाः । शीतलत्वम् । तिक्तत्वम् । [illegible] । पित्तवातशमनत्वम् [illegible] । इति निर्घण्टः ॥

हरिद्वारं, क्ली, (हरेः प्राप्त्यर्थं द्वारमिव ।) [illegible] । तत् तीर्थविशेषः । यथा,

"गङ्गा देवि सदा [illegible] नारायणेन यत् पूर्णं [illegible] । प्रयागे [illegible] हरिद्वारे [illegible] । [illegible] ॥"

इति [illegible] तत्र गङ्गाद्वारम् [illegible] तत्र [illegible] यथा —

"[illegible]

[illegible]

[illegible]

[illegible]

[illegible] ॥"

इति [illegible] ॥

अपि च ।

"[illegible]

[illegible]"

[illegible]

हरिन्मणिः, [illegible] [illegible]

कैवल्यदो नित्यशोऽस्मि हरेर्नामानि सुव्रत ।
नामं देवकीनं ध्यानं धारणा निखिलो गणः ।
...कारः समाधिश्च हरिनामसमं न च ॥"
इति पाद्मोत्तरखण्डे ८० अध्यायः ।
अपि च ।
"हरेर्नाम हरेर्नाम हरेर्नामैव केवलम् ।
कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा ॥"
इति श्रीहरिभक्तिविलासस्य ११ विलासे वृह-
न्नारदीयपुराणवचनम् ॥ ० ॥ वैष्णवानां जप्य-
हरिनामानि यथा,—
"हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे ।
हरे राम हरे राम राम राम हरे हरे ॥"
अस्य प्रमाणादि यथा,—

त्रिपुरोवाच ।

"वासुदेव महाबाहो ! शृणुष्व परमं वचः ।
त्वं हि देव सुरश्रेष्ठः किमर्थं तप्यते तपः ॥
कुलाचारं विना पुत्त्र ! नहि सिद्धिः प्रजायते ।
शक्तिहीनस्य ते सिद्धिः कथं भवति रे सुत ! ॥
समागमभवां लक्ष्मीं त्वया किं तप्यते तपः ।
वृथा यत्नं वृथा पूजां जपश्च विफलं सुत ! ॥
संयोगं कुरु यत्नेन शक्त्या सह तपोधन ! ।
शक्तिं विना सुतश्रेष्ठ ! विद्यासिद्धिर्न्न जायते ॥
साधके क्षोभमापन्ने देवता क्षोभमाप्नुयात् ।
तस्माद्योगयुतो भूत्वा जपकर्म्म समारभेत् ॥
योगं विना सुतश्रेष्ठ ! नहि मोक्षः प्रजायते ।
शृणु पुत्त्र सुतश्रेष्ठ दीक्षाया आनुपूर्व्विकीम् ॥
अष्टवर्षे तु संप्राप्ते द्वादशाभ्यन्तरे सुत ! ।
शृणुयाद्धरिनामानि षोड़शानि पृथक् पृथक् ।
हरिनाम विना पुत्त्र ! कर्णशुद्धिर्न्न जायते ॥

श्रीवासुदेव उवाच ।

शृणु मातर्म्महामाये विश्वबीजस्वरूपिणि ! ।
हरिनाम महामाये क्रमात्तव मतं वद ॥ ० ॥

त्रिपुरोवाच ।

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे ।
हरे राम हरे राम राम राम हरे हरे ॥
द्वात्रिंशदक्षराण्येवं कलौ नाममतं सदा ।
शृणु छन्दः सुतश्रेष्ठ ! हरिनाम्नस्तु चैव हि ॥
छन्दो हि परमं गुह्यं महत् पदमनव्ययम् ।
सर्व्वशक्तिमयं तत्त्वं हरिनाम तपोधन ! ॥" ० ॥
अस्य श्रीहरिनाममन्त्रस्य वासुदेव ऋषिर्गायत्री
छन्दः श्रीत्रिपुरा देवता मम महाविद्या-
सिद्धार्थे विनियोगः ॥ ० ॥
"एतन्मन्त्रं सुतश्रेष्ठ ! प्रथमं शृणुयान्नरः ।
श्रुत्वा द्विजमुखात् पुत्त्र दक्षकर्णे तपोधन ! ॥
आदौ छन्दस्ततो मन्त्रं श्रुत्वा शुद्धो भवेन्नरः ।
द्वादशाभ्यन्तरे श्रुत्वा कर्णशुद्धिमवाप्नुयात् ॥
कर्णशुद्धिं विना पुत्त्र महाविद्यामुपालभेत् ।
नारी वा पुरुषो वापि तत्क्षणान्नारकी भवेत् ।
ततस्तु षोड़शे वर्षे संप्राप्ते सुरवन्दित ! ।
महाविद्यां ततः शुद्धां नित्यां ब्रह्मस्वरूपिणीम् ।
श्रुत्वा कुलमुखाद्विप्रात् साक्षात् ब्रह्ममयी भवेत् ।
कुर्य्यादेवद्रहस्यं यः शिवोक्तञ्च तपोधन ! ।
तस्य सिद्धिर्भवेद्दिव्या सर्व्वशास्त्रमवाप्नुयात् ॥
रहस्यं हि विना पुत्त्र ! श्रम एव हि केवलम् ।
अतएव सुतश्रेष्ठ ! रहस्यं नित्यमाचर ।
रहस्यरहितां विद्यां न जपेत्तु कदाचन ॥ ० ॥
हकारस्तु सुतश्रेष्ठ ! शिवः साक्षान्न संशयः ।
रेफस्तु त्रिपुरादेवी मम मूर्त्तिमयी सदा ॥
एकारश्च भगं विद्यात् साक्षाद्योनिं तपो-
धन ! ।
एकारः शून्यरूपो च रेफो विग्रहधारिणः ।
हरे तु त्रिपुरा साक्षान्मम मूर्त्तिर्न्न संशयः ॥
ककारः कामदा कामरूपिणी स्फुरदव्ययम् ।
ऋकारश्च सुतश्रेष्ठ ! ज्येष्ठा शक्तिरितीरिता ॥
षकारश्च ऋकारश्च कामिनी वैष्णवी कला ॥
णकारश्चन्द्रमा देवः कलाषोड़शसंयुतः ॥
णकारश्च सुतवर ! साक्षान्निर्वृतिरूपिणी ।
द्वयोरैक्यं तपःश्रेष्ठ ! महामाया जगन्मयी ॥
कृष्ण कृष्ण सुतश्रेष्ठ ! महामाया जगन्मयी ।
हरे हरे ततो देवि ! शिवशक्तिस्वरूपिणी ॥
हरे रामेति च पदं शिवशक्तिमयं सुत ! ।
हरे हरे इति पदं शक्तिद्वयसमन्वितम् ॥
आद्यन्ते प्रणवं दत्त्वा यो जपेद्दशधा द्विजः ।
स भवेत् सुतवर ! श्रेष्ठो महाविद्यासु सुन्दरः ॥
हरिनाम सुतश्रेष्ठ ! ज्येष्ठं तु वैष्णवं मतम् ॥
एवं षोड़श नामानि द्वात्रिंशदक्षराणि च ।
आद्यन्ते प्रणवं दत्त्वा चतुस्त्रिंशदनुत्तम ! ॥
हरिनाम विना पुत्त्र ! दीक्षा च विफला सदा ।
कुलदेवमुखाच्छ्रुत्वा हरिनाम पराक्षरम् ॥
ब्राह्मणक्षत्रवैश्याश्च शूद्रः श्रुत्वा पराक्षरम् ।
दीक्षां कुर्य्यात् सुतश्रेष्ठ ! महाविद्यासु सुन्दर ! ॥
दीक्षां वापि हरेर्न्नाम यदि शूद्रमुखात् प्रिये ! ।
अज्ञानाद्यदि गृह्णीयात् तस्य पापफलं शृणु ॥
शूद्रः शूद्रमुखात् श्रुत्वा विद्यां वा मन्त्रमुत्तमम् ।
कोटिवंशान् समादाय रौरवं प्रति गच्छति ।
अपि दारुशिलोर्व्वीर्व्वा द्वयोरपि समं फलम् ॥
ब्रह्महत्यामवाप्नोति अक्षरं अक्षरं प्रति ।
शृणु पुत्त्र ! वासुदेवप्रसङ्गाद्वचनं मम ॥"
इति श्रीवासुदेवमाहात्म्ये राधातन्त्रे त्रिपुरा-
वासुदेवसंवादे द्वितीयपटलः ॥

हरिनामा, [न्] पुं, (हरेर्नाम नाम यस्य ।) मुद्गः । इति त्रिकाण्डशेषः ॥

हरिनेत्रं, क्ली, (हरेर्नेत्रमिव ।) श्वेतपद्मम् । इति राजनिर्घण्टः ॥ श्रीहरेर्लोचनम् । यथा,—
"विबोधनार्थाय हरेर्हरिनेत्रशतालयाम् ।
विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम् ॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम् ॥
हरिद्वर्णचक्षुश्च ॥

हरिनेत्रः, पुं, (हरेर्मर्कटस्येव नेत्रमस्य) पेचकः । इति त्रिकाण्डशेषः ॥

हरिन्मणिः, पुं, (हरिद्वर्णो मणिः ।) मरकतमणिः । इत्यमरः । २।९।९२ ॥ (यथा, माघे । १।४८ ।
"हरिन्मणिश्यामतृणाभिरामै-
र्गृहाणि नीप्रैरिव यत्र रेजुः ॥")

हरिन्मुद्गः, पुं, (हरिद्वर्णो मुद्गः ।) शारदमुद्गः । इति राजनिर्घण्टः ॥

हरिपर्णं, क्ली, (हरि हरिद्वर्णं पर्णं यस्य ।) मूलकम् । इति हेमचन्द्रः ॥

हरिप्रियं, क्ली, (हरेः प्रियम् ।) कृष्णचन्दनम् । इति शब्दचन्द्रिका ॥ तत्तु कालीयकम् कालियाकाष्ठमिति ख्यातम् । इति रत्नमाला ॥ (यथा,
"कालीयकन्तु कालीयं पीताभं हरिचन्दनम् ।
हरिप्रियं कालसारं तथा कालानुसार्य्यकम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
उशीरम् । इति राजनिर्घण्टः ॥

हरिप्रियः, पुं, (हरेः प्रियः ।) कदम्बवृक्षः । इति शब्दचन्द्रिकामरौ । २ । ४ । ४२ ॥ पीतभृङ्गराजः । विष्णुकन्दः । करवीरः । शङ्खः । बन्धूकः । इति राजनिर्घण्टः ॥ शिवः । वातुलः । कन्दुकः । इति केचित् ॥

हरिप्रिया, स्त्री, (हरेः प्रिया ।) लक्ष्मीः । इत्यमरः । १ । १ । २८ ॥ तुलसी । द्वादशीतिथिः । पृथिवी । इति केचित् ॥

हरिवालुकं, क्ली, (हरिप्रिया वालुका यत्र) एलवालुकम् । इत्यमरः । २ । ४ । १२१ ॥

हरिभक्तः, पुं, (हरेर्भक्तः ।) हरिसेवकः । तस्य लक्षणं यथा,—
"सर्व्वजीवेषु यो विष्णुं भावयेत् समताधिया ।
हरौ करोति भक्तिञ्च हरिभक्तः स च स्मृतः ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ३५ अध्यायः ॥

हरिभद्रं, क्ली, (हरेर्भद्रं यस्मात् ।) हरिवालुकम् । इति शब्दचन्द्रिका ॥

हरिभाविनी, स्त्री, हरिं भावयितुं शीलं यस्याः सा । (हरि+भू+णिनि । ङीप् ।) हरिभावनाशीला । इति मुग्धबोधव्याकरणम् ॥

हरिभुक्, [ज्] पुं, (हरिं भेकं भुङ्क्ते इति । भुज्+क्विप् ।) सर्पः । इति शब्दरत्नावली ॥

हरिमन्थः, पुं, गणिकारिका । इति शब्दरत्नावली ॥ चणकः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—
"चणको हरिमन्थः स्यात् सकलप्रिय इत्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
देशविशेषः । इति हरिमन्थजशब्दटीकायां भरतः ॥

हरिमन्थकः, पुं, (हरिमन्थ एव । स्वार्थे कन् ।) चणकः । इत्यमरः । २ । ९ । १८ ॥

हरिमन्थजः, पुं, चणकः । इत्यमरः । २ । ९ । १८ ॥ हरिमन्थे देशे प्राचुर्य्येण जातवान् हरिमन्थजः । सनजनादिति डः । इति भरतः ॥ (क्लीवेऽपि दृश्यते । यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।
"स्वादुपाकरसं शाकं दुर्ज्जरं हरिमन्थजम् ॥")
कृष्णमुद्गः । इति हेमचन्द्रः ॥

हरियः, पुं, (हरिं पीतवर्णं याति प्राप्नोति । या+कः ।) पीतवर्णघोटकः । इति हेमचन्द्रः ॥

हरिले, अव्य, नाट्योक्तौ चेटीसम्बोधनम् । इति केचित् ॥

हरिलोचनः, पुं, (हरेरिव लोचनमस्य ।) कुलीरः । इति त्रिकाण्डशेषः ॥ पेचकः । इति केचित् ॥

हरिद्वर्णचक्षुर्युक्ते, त्रि ॥

हरिवर्षं, क्ली, (हरिप्रियं वर्षम् ।) जम्बुद्वीपस्य नववर्षान्तर्गतवर्षविशेषः । इति त्रिकाण्डशेषः ॥ स तु निषधहेमकूटपर्व्वतयोर्म्मध्ये वर्त्तते । यथा, एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादयः । अयुतयोजनोत्सेधा हरिवर्षकिम्पुरुषभारतानां यथासंख्यम् । इति श्रीभागवते ५ स्कन्धे १६ अध्यायः ॥ किञ्च । हरिवर्षे चापि भगवान् नरहरिरूपेणास्ते । तद्रूपग्रहणनिमित्तमुत्तरत्राभिधास्ये तद्दयितं रूपं महापुरुषगुणभाजनो महाभागवतो दैत्यदानवकुलतीर्थीकरणशीलाचरितः प्रह्लादोऽव्यवधानानन्यभक्तियोगेन सह तद्वर्षपुरुषैरुपास्ते । इति च तत्रैव १८ अध्यायः ॥

हरिवंशः, पुं, (हरेर्वंशः ।) श्रीकृष्णस्य सन्तानः । यथा,—

"हरिवंशं प्रवक्ष्यामि सम्यगाख्यानलक्षणम् ।
वसुदेवात् देवक्यां वासुदेवो बलोऽभवत् ॥
रुक्मिणीसत्यभामाद्या अष्टौ पत्न्यो हरेः पुरा ।
षोड़शस्त्रीसहस्राणि यथोन्यासन् महात्मनः ॥
नाम्ना पुत्राश्च दीप्ताद्याः शतशोऽथ सहस्रशः ।
रुक्मिण्याश्चैव प्रद्युम्न अनिरुद्धो महाबलः ॥
तस्य पुत्रोऽनिरुद्धोऽभूत् उषापतिः ।
अनिरुद्धादभूद्वज्रः स च राजा गते हरौ ।
वार्णोषमिव गृध वज्रो मधुपं यादवाधिप ॥"

इति गारुडे १४८ । १ ; ६—८ ; ११ ॥

विस्तारस्तु महाभारतीयहरिवंशपर्व्वणि द्रष्टव्यः ॥

हरिवल्लभा, स्त्री, (हरेर्वल्लभा ।) जया । तुलसी । इति राजनिर्घण्टः ॥ लक्ष्मीश्च ॥

हरिवान्, [त्] पुं, (हरिरश्वोऽस्यास्तीति । मतुप् । "छन्दसीरः ।"८।२।१५ । इति मस्य वः ।) इन्द्रः । इति हलायुधः ॥ हरिविशिष्टे, त्रि ॥ (यथा, वाजसनेयसंहितायाम् । २० । ३८ ।

"सुयासो बर्हिरासदाय इन्द्र:
प्रावःमं क्रीदतमदिया पृथिव्या ॥")

हरिवासरं, क्ली, (हरेर्वासरम् ।) श्रीहरेर्दिनम् । तत्तु एकादशीद्वादशीतिथिद्वयम् । यथा,—
"एकादशी द्वादशी च प्रोक्ता श्रीहरिवासरः ॥"
"एकादशीमुपोष्यैव द्वादशीं समुपोषयेत् ।
न चात्र विधिलोपः स्यादुभयोर्द्देवता हरिः ॥"

इति च तिथ्यादितत्त्वम् ॥

अपि च ।
"दानि यानि च पापानि ब्रह्महत्यादिकानि च ।
अन्नमाश्रित्य तिष्ठन्ति सम्प्राप्ते हरिवासरे ।
तानि तु केवलं भुङ्क्ते यो भुङ्क्ते हरिवासरे ॥"

इत्येकादशीतत्त्वम् ॥ * ॥

तत्र जागरणम् । यथा । विष्णुधर्म्मोत्तरे,
"जागरणं प्रवक्ष्यामि हरिवासरजं यथा ।
सर्व्वेषाम् कुर्व्वन् सर्व्वं विष्णुप्रियम् ॥"

इति तिथ्यादितत्त्वम् ॥ * ॥

अथ हरिवासरे जागरणादिविधिः । स्कान्दे श्रीब्रह्मनारदसंवादे ।
"शृणु नारद ! वक्ष्यामि जागरस्य तु लक्षणम् ।
येन विज्ञातमात्रेण दुर्लभो न जनार्द्दनः ॥
गीतं वाद्यं च नृत्यं च पुराणपठनं तथा ।
धूपं दीपं च नैवेद्यं पुष्पगन्धानुलेपनम् ॥
फलमर्घ्यञ्च श्रद्धा च दानमिन्द्रियनिग्रहः ।
सत्यान्वितं विनिद्रञ्च मुदा युक्तं क्रियान्वितम् ॥
साश्चर्य्यं चैव सोत्साहं पापालस्यादिवर्ज्जितम् ।
प्रदक्षिणाभिसंयुक्तं नमस्कारपुरःसरम् ॥
नीराजनसमायुक्तमनिर्व्विण्णेन चेतसा ।
यामे यामे महाभाग ! कुर्य्यादारात्रिकं हरेः ।
एतैर्गुणैः समायुक्तं कुर्य्याज्जागरणं हरेः ॥" * ॥

किञ्च ।
"य एवं कुरुते भक्त्या वित्तशाठ्यविवर्ज्जितः ।
जागरं वासरे विष्णोर्लीयते परमात्मनि ॥
धनवान् वित्तशाठ्येन यः करोति प्रजागरम् ।
तेनात्मा हारितो नूनं कितवेन दुरात्मना ॥"

तत्रैव श्रीमदुमामहेश्वरसंवादे ।
"समाप्य जागरं यत्र नृत्यगान्धर्व्वसंयुतम् ।
सवाद्यं तालसंयुक्तं सदीपं साधुभिर्युतम् ॥
उपचारैश्च संयुक्तं यथोक्तैर्भक्तिभावितैः ।
मनसस्तुष्टिजननं समुदं लोकरञ्जनम् ॥
गुणैर्द्वादशभिर्युक्तं जागरं माधवप्रियम् ।
कर्त्तव्यं तत् प्रयत्नेन पक्षयोः शुक्लकृष्णयोः ॥" * ॥

किञ्च ।
"परापवादयुक्तं तु मनः प्रसभवर्ज्जितम् ।
शाकाहारमगान्धर्व्वं तथा दीपविवर्ज्जितम् ॥
गन्धोपचाररहितमुदासीन सनिद्रकम् ।
अनियुक्तं विशेषेण जागरं त्वधमाधमम् ॥" * ॥

किञ्च । तत्रैव ।
"अभावे वाचकस्याथ गीतं नृत्यञ्च कारयेत् ।
वाचके सति देवेशि ! पुराणं प्रथमं पठेत् ॥" * ॥

अथ जागरणनित्यत्वम् ।

स्कान्दे ब्रह्मनारदसंवादे ।
"पातालानागतान् वापि पातयिष्यन्ति पूर्व्वजान् ।
अकुर्व्वाणाः प्रपश्यन्ति पुत्रधर्म्मत्रयुक्तयम् ।
जायते नरके वासः पितृभिः सह कानन: ॥
न पुनरस्मात् पापं व्रतैर्दानैः समाधिभिः ।
विनश्यति द्विजेन्द्र ! विना द्वादशीजागरम् ॥"

तत्रैवोमामहेश्वरसंवादे ।
"संप्राप्ते जागरं विष्णोर्ये न कुर्व्वन्ति जागरम् ।
अप्राप्ते सुव्रतं तेषां वैष्णवानाञ्च निन्दया ॥
मलिनं जायते यस्य द्वादश्यां जागरं प्रति ।
न हि तस्याधिकारोऽस्ति पूजने वैष्णवस्य हि ॥"

पद्मपुराणे ब्रह्मणा । तत्रैव ।
"हरौ वर्णे यस्य सदा योगिनाशो हरिः ।
प्रतिबन्धदने तस्य द्वादशीजागरोपरि ॥ * ॥
कामार्थेन पुरार्थेण सौनद्यादिनियन्त्रणा ।
अधुना निरत्वे हित्वा जागरे च विशेषतः ॥"

अथ जागरे गीतादिनित्यत्वम् । स्कान्दे उमामहेश्वरसंवादे ।

"मूकवत्तिष्ठते यो वै ...
सप्त जन्मानि मूकत्वं ...
यो न नृत्यति मूढात्मा ...
पङ्गुत्वं जायते तस्य सप्त ...
पाद्मे पद्मनेत्रोपनत्वे ।
"स्तुवन्ति न प्रशंसन्ति ...
मोत्सवो भवति तेषां गृहे ...
स्तुवन्ति ये प्रशंसन्ति जा...
नित्योत्सवो भवेत्तेषां जन्म...

अथ जागरणमा...

स्कान्दे ब्रह्मनारदसंवादे तत्र...
याञ्च ।
"न गयापिण्डदानेन न ...
पूर्व्वजा मुक्तिमायान्ति वि...
सर्व्वावस्थोऽपि यः कुर्य्याद्...
यामैकेन दहते पापं जन्म...
यः कुर्य्याद्दीपदानन्तु रात्रौ ...
निमिषे निमिषे विप्र ! लभते ...
यः कुर्य्याज्जागरे पूजां द्वादश्य...
पुष्पे पुष्पेऽश्वमेधस्य फलमाप्नोति ...
यो दहेत्सागुरुं विष्णोः पूजां ...
निमिषार्द्धेन लभते तिलपावगत...
निमेषञ्च दहेद्धूपं सघृतं गुग्गुलुं ...
लभते जागरे विप्र ! पुण्यं मासम...
यो दद्याज्जागरे विष्णोर्हविष्याक...
नैवेद्यं लभते पुण्यं शालिग्रामसमुद्भ...
पक्वान्नानि च यो दद्यात् फलानि वि...
जागरे पद्मनाभस्य लभते गोऽयुतं फ...
सकर्पूरञ्च ताम्बूलं यो ददाति हि जा...
पद्मनाभसमादेन ब्रह्मलोके वसेच्चिरम् ॥
जागरे पद्मनाभस्य यः कुर्य्यात् पुष्पमण्ड...
स पुष्पकविमानेषु क्रीड़ते ब्रह्मसद्मनि ॥
जागरे पद्मनाभस्य सकर्पूरं तथागुरुम् ।
दहते दहतां पापं जन्मजन्ममुद्भवम् ॥
धामं ददाति सत्याय दधिक्षीरघृतादिभि...
रात्रौ जागरणे विप्र ! मुक्तिभागी भवेन्न...
दिव्याम्बराणि यो दद्याज्जागरे मनोरमे ।
सप्ततानि वसेत्तत्र सहस्राण्यमानि वै ।
दद्यादाभरणं विष्णोर्भावसं रत्नसम्भवम् ।
सप्तकल्पानि वसते भोगन् सत्यो हि सः ॥
आचम्य मकर्पूरं सागुरुं तु सचैतम् ।
युक्तं कुसुमदेनापि यच्छते हरिजागरे ॥
एकैकं मुनिशार्दूल ! पायसभावितं फलम् ।
कल्पो भवेत् सन्देहो वासुदेवप्रसादतः ॥
घृतेन दीपकं विष्णोस्तैलेन च विशेषतः ।
ज्वालयेज्जागरे रात्रौ निमिषे गोऽयुतं फलम् ॥
जागरे वासुदेवस्य कर्पूरेण च दीपकम् ।
यो ज्वालयति कोटीनां कपिलानां भवेत्
फलम् ।
पादाधिकं हरेर्यस्तु नवप्रदीपं जागरे ।
कुरुते मोक्षमाप्नोति कुलायुतसमन्वितः ।
विना हि योगिन ...

विष्णोरपि जागरे विष्णोर्दीना भुक्तिफलं लभेत् ।
वारिणं वारिणा पूर्णं शिरसि धारयेद्धरिम् ।
बिभर्त्ति शिरसा गौर्य्यं गङ्गास्नानफलं फलम् ॥
कृत्वा पूजां हरेर्यस्तु जागरे पुरत: शुचि: ।
दद्याद्वासमहस्त्रन्तु गोनां नागविमोचनम् ॥
माहात्म्यपठनं पुण्यं स्तवराजमनुस्मृतिम् ।
वैदिकानि च शाप्यानि भक्त्या रात्रौ मुहुर्मुहु: ॥
भवेत् पञ्चतरं पुण्यं कपिलागोशतोद्भवम् ।
जागरे यस्तपस्य पुरत: पठतो हरे: ॥
य: पुन: कुरुते गीतं सनृत्यं वाद्यसंयुतम् ।
न तत् क्रतुशतै: पुण्यं व्रतदानशतैरपि ॥
य: पुन: कुरुते गीतं विलज्जो नृत्यते यदि ।
लभते निमिषार्द्धेन चतुराश्रमजं फलम् ॥
जागरे पद्मनाभस्य कुर्य्यात् पद्मकथाचनम् ।
लोकसंख्यां वसेत् स्वर्गे युगानि हरिसन्निधौ ॥
कुर्य्याद्वन्दनमालां यो रम्भास्तम्भै: सुशोभनै: ।
पुनरुद्भवै: पत्रैर्जागरे चक्रपाणिन: ॥
युगानि पत्रसंख्यानां स्वर्गे तस्योत्सवो भवेत् ।
पूज्यते वासवाद्यैश्च क्रीड़ते चाप्सरोवृत: ॥
नृत्यमानस्य मर्त्त्यस्य ये केचिन्निरयं गता: ।
विमुक्ता धर्म्मराजेन मुक्तिं यान्ति हरे: पदम् ॥
गीतध्वनिसुसन्तुष्टो जागरे तु रमापति: ।
वासवस्याधिकं सौख्यं दद्यान्मन्वन्तरं शतम् ॥
नृत्येन मर्त्त्ये सौख्यं तु स्वर्गे नृत्येन जागरे ।
रसातले तथा सौख्यं मुक्तिर्नृत्यादवाप्यते ॥
नैवेद्यप्रदानेन यत् पुण्यं कथितं बुधै: ।
न तत् कोटिमखै: पुण्यं योगै: सांख्यैरवाप्यते ॥
दीपमालां हरेरग्रे य: करोति प्रजागरे ।
विमानकोटिसंयुक्त: कल्पान्तं वसते दिवि ॥*॥
चरितं रामचन्द्रस्य य: शृणोति हरेर्द्दिने ।
रात्रौ वाल्मीकिना प्रोक्तं तत्समो न हि वैष्णव: ॥
य: पुन: पठते रात्रौ महाभारतसम्भवाम् ।
कथां जागरणे विष्णो: कुलकोटिं नयेद्दिवम् ॥
औत्तानपादेश्चरितं ध्रुवस्य च महात्मन: ।
कृष्णस्य बालचरितं जागरे पठते हि य: ॥
युगकोटिसहस्रस्य क्षय: पापस्य जायते ।
तस्माज्जागरणं कार्य्यं पक्षयो: शुक्लकृष्णयो: ॥
श्रीमद्भागवतं भक्त्या पठते विष्णुसन्निधौ ।
जागरे तत्पदं याति कुलवृन्दसमन्वित: ॥
अष्टादश पुराणानि पुराणपुरुषस्य च ।
दयितानि सदा विष्णोर्विशेषेण तु जागरे ॥
यो गीतां पठते रात्रौ विष्णोर्नामसहस्रकम् ।
वेदोक्तानां पुराणानां जागरो पुण्यमाप्नुयात् ॥
धेनुदानं तु य: कुर्य्याज्जागरे चक्रपाणिन: ।
लभते नात्र सन्देह: सप्तद्वीपावनीफलम् ॥
जागरे पद्मनाभस्य य: कुर्य्याच्छुभमण्डपम् ।
मण्डले भुवर्लोकस्य यावत्तिष्ठति पद्मभू: ॥ * ॥
सर्व्वेषामेव पुण्यानां महत् पुण्यं महीतले ।
द्वादश्यां जागरे विप्र ! प्रसिद्धं भुवनत्रये ॥
जागरं ये चिकीर्षन्ति कर्म्मणा मनसा गिरा ।
न तेषां पुनरावृत्तिर्विष्णुलोकात् कथञ्चन ॥
जागरे नृत्यमानन्तु दृष्ट्वा वै द्वादशीदिने ।
रात्रौ मार्ज्जयते शौरि: पापं तस्य युगा-
र्ज्जितम् ॥”

इति श्रीहरिभक्तिविलासे १३ विलास: ॥

हरिवाहन:, पुं, (हरेर्वाहन: ।) गरुड़: । इति हारावली ॥ (हरिरश्वोऽथवा वाहनं यस्येति । इन्द्र: । यथा, महाभारते । १ । २६ । १ ।
“एवं स्तुतस्तदा कद्र्वा भगवान् हरिवाहन: ।
नीलजीमूतसङ्घातै: सर्व्वमम्बरमावृणोत् ॥”
तथाच तत्रैव । ३ । ४६ । ५२ ।
“तत आनाय्य तनयं विविक्ते हरिवाहन: ।
सान्त्वयित्वा शुभैर्व्वाक्यै: स्मयमानोऽभ्यभा-
षत ॥”)

हरिवीजं, क्ली, (हरेर्वीजं वीर्य्यम् ।) हरितालम् । इति जटाधर: ॥

हरिवर्षं, क्ली, हरिवर्षम् । इति भूरिप्रयोग: ॥

हरिशयनं, क्ली, (हरे: शयनम् ।) श्रीहरेर्निद्रा । यथा । उपनयने दीपिकायाम् ।
“जीवार्केन्दूड़शुद्धौ हरिशयनवहिर्भास्करे चोत्त-
रस्थे
स्वाध्याये वेदपर्णाधिप इह शुभदे चौरभे
नादितो च ।”
इत्यादि ज्योतिस्तत्त्वम् ॥*॥
तद्विधिर्यथा । वामनपुराणे ।
“एकादश्यां जगत्स्वामिशयनं परिकल्पयेत् ।
शेषाहिभोगपर्य्यङ्कं कृत्वा संपूज्य केशवम् ॥
अनुज्ञां ब्राह्मणेभ्यश्च द्वादश्यां प्रयत: शुचि: ।
लब्ध्वा पीताम्बरधरं देवं निद्रां समानयेत् ॥”
अनुज्ञां लब्ध्वेत्यन्वय: । एकादशीसमये दिवा शयनं परिकल्पयेत् रात्रौ द्वादशीक्षणे निद्रेति ॥ * ॥ व्यक्तं वाराहे ।
“आषाढ़शुक्लद्वादश्यां पौर्णमास्यामथापि वा ।
चातुर्म्मास्यव्रतारम्भं कुर्य्यात् कर्कटसंक्रमे ॥
अभावे तु तुलार्केऽपि मन्त्रेण नियमं व्रती ।
कार्त्तिके शुक्लद्वादश्यां विधिवत्तत् समापयेत् ॥
चतुर्धापि हि तच्चीर्णं चातुर्म्मास्यं व्रतं नर: ।
कार्त्तिक्यां शुक्लपक्षे तु द्वादश्यां तत्समापयेत् ॥”
मात्स्ये ।
“चतुरो वार्षिकान् मासान् देवस्योत्थापना-
वधि ।
मधुस्वरो भवेन्नित्यं नरो गुड़विवर्ज्जनात् ॥
तैलस्य वर्ज्जनादेव सुन्दराङ्ग: प्रजायते ।
कटुतैलपरित्यागात् शत्रुनाश: प्रजायते ॥
लभते सन्ततिं दीर्घां स्थालीपाकमभक्षयन् ।
सदा मुनि: सदा योगी मधुमांसस्य वर्ज्जनात् ॥
निराधिर्नीरुगोजस्वी विष्णुभक्तश्च जायते ।
एकान्तरोपवासेन विष्णुलोकमवाप्नुयात् ॥
धारणान्नखलोम्नाञ्च गङ्गास्नानं दिने दिने ।
ताम्बूलवर्ज्जनाद्भोगी रक्तकण्ठश्च जायते ॥
घृतत्यागात् सुलावण्यं सर्व्वं स्निग्धं वपुर्भवेत् ।
फलत्यागात्तु मतिमान् बहुपुत्रश्च जायते ॥
नमो नारायणायेति नक्तानशनजं फलम् ।
पादाभिवन्दनाद्विष्णोर्लभेद्गोदानजं फलम् ।
एवमादिव्रतै: पार्थ ! तुष्टिमायाति केशव: ॥ *
सनत्कुमार: ।
“इदं व्रतं मया देव ! गृहीतं पुरतस्तव ।
निर्व्विघ्नां सिद्धिमाप्नोतु प्रसन्ने त्वयि केशव ! ॥
गृहीतेऽस्मिन् व्रते देव ! यद्यपूर्णे त्वहं म्रिये ।
तन्मे भवतु संपूर्णं त्वत्प्रसादाज्जनार्द्दन ! ॥”
समाप्तौ च ।
“इदं व्रतं मया देव ! कृतं प्रीत्यै तव प्रभो ! ।
न्यूनं संपूर्णतां यातु त्वत्प्रसादाज्जनार्द्दन ! ॥”*॥
अत्रैव यतिमधिकृत्य काठकगृह्यम् ।
“एकरात्रं वसेद् ग्रामे नगरे पञ्चरात्रकम् ।
वर्षाभ्योऽन्यत्र वर्षासु मासांश्च चतुरो वसेत् ॥”
एतदशक्तविषयम् । ऊर्द्ध्वं वार्षिकाभ्यां मासाभ्यां नैकस्थानवासीति शङ्खोक्ते: ॥ * ॥ मात्स्ये ।
“शेते विष्णु: सदाषाढ़े भाद्रे च परिवर्त्तते ।
कार्त्तिके परिवुध्येत शुक्लपक्षे हरेर्द्दिने ॥”
भविष्यनारदीययो: ।
“मैत्राद्यपादे स्वपितीह विष्णु-
र्वैष्णव्यमध्ये परिवर्त्तते च ।
पौष्णावसाने च सुरारिहन्ता
प्रवुध्यते माससतुष्टयेन ॥”
मैत्रमनुराधा वैष्णव्यं श्रवणा । पौष्णं रेवती ॥*॥
भविष्ये ।
“निशि स्वापो दिवोत्थानं सन्ध्यायां परिवर्त्त-
नम् ।
अन्यत्र पादयोगेऽपि द्वादश्यामेव कारयेत् ॥”
अन्यत्र स्वापादिविहितरात्र्यादीतरकाले दश-
मीप्रदीपदोष ।
“किं तन्मैत्राद्यपादेन दशम्यंशेन यो दिवा ।
पौष्णशेषेण किन्तेन प्रतिपच्च यो निशि ॥”
दशम्यंशेन दशम्या अंशो यत्र पादे तेन य: पादो दिवा प्राप्तस्तेन वा किम् । अत्र दशमीप्रतिपदोर्व्वर्ज्जनात् तदितरैकादश्यादि-पञ्चतिथिषु मैत्रादिनक्षत्रपादविशेषलाभे द्वादशीं विनापि शयनादिरिति प्रतीयते ॥ * ॥
वचनान्तरम् ।
“रेवत्यन्तो यदा रात्रौ द्वादश्या च समायुत: ।
तदा विबुध्यते विष्णुर्द्दिनान्ते प्राप्य रेवतीम् ॥”
दिनान्तेत्रिधाविभक्तदिनतृतीयभागे दिवो-त्थानमित्यनुरोधात् । विष्णुधर्म्मोत्तरे ।
“विष्णुर्द्दिवा न स्वपिति न च रात्रौ प्रबुध्यते ।
द्वादश्यामृक्षसंयोगे पादयोगो न कारणम् ॥
अप्राप्ते द्वादशीमृक्षे उत्थानशयने हरे: ।
पादयोगेन कर्त्तव्ये नाहोरात्रं विचिन्तयेत् ॥”
वराहपुराणम् ।
“द्वादश्यां सन्धिसमये नक्षत्राणामसम्भवे ।
आ-भा-का-सितपक्षेषु शयनावर्त्तनादिकम् ॥”
आ-भा-कानां आषाढ़भाद्रकार्त्तिकानाम् ॥ * ॥
यतश्च द्वादश्यां निशादौ नक्षत्रमात्रयोगात् ।
द्वादश्यामृक्षाभावे तिथ्यन्तरे निशाद्यनादरेण पादविशेषयोगात् । तदभावे द्वादश्यां सन्ध्यायामेव शयनादिकम् । वोधनन्तु द्वादश्यां रात्र

रेवत्यन्तपादयोर्भे दिनत्रतीयभागे इति विशेषः ॥ शयने मन्त्रमाह वराहपुराणम् ।
"नमो नारायणायेत्युक्त्वा इमं मन्त्रमुदीरयेत् ।
पश्यन्तु मेघान्यपि मेघश्यामं
ह्युपागतं सिच्यमानं महीमिमाम् ।
निद्रां भगवान् गृह्णातु लोकनाथ
वर्षास्विमं पश्यतु मेघवृन्दम् ॥
ज्ञात्वा च पश्यैव च देवनाथ
मासांश्चत्वारि वैकुण्ठस्य तु पश्यनाथ ! ॥"
ततश्च ।
"सुप्ते त्वयि जगन्नाथे जगत् सुप्तं भवेदिदम् ।
विबुद्धे त्वयि बुध्येत जगत् सर्व्वं चराचरम् ॥"
इत्यनेन पूजयेत् ॥*॥ पार्श्वपरिवर्त्तने तु ।
"वासुदेव जगन्नाथ प्राप्तेयं द्वादशी तव ।
पार्श्वेन परिवर्त्तस्व सुखं स्वपिहि माधव ! ॥"
इति पठेत् ॥
"त्वयि सुप्ते जगन्नाथे जगत् सुप्तं भवेदिदम् ।
विबुद्धे त्वयि बुध्येत जगत् सर्व्वं चराचरम् ॥"
इत्यनेन पूजयेत् ॥
नैयतकालिककल्पतरौ ब्रह्मपुराणम् । कार्त्तिकशुक्लपक्षमधिकृत्य ।
"उपवासः प्रकर्त्तव्य एकादश्यां प्रजागरः ।
द्वादश्यां वासुदेवश्च पूजितव्यः प्रयत्नतः ॥"*॥
उत्थानमन्त्रस्तु ।
महेन्द्ररुद्रैरभिनूयमानो
भवानृषिर्वन्दितवन्दनीयः ।
प्राप्ता तवेयं किल कौमुदाख्या
जागृष्व जागृष्व च लोकनाथ ! ॥
मेघा गता निर्म्मलपूर्णचन्द्रः
शारद्यपुष्पाणि च लोकनाथ ! ।
अहं ददानीति च पुण्यहेतो-
र्जागृष्व जागृष्व च लोकनाथ ! ॥"
ततः ।
"उत्तिष्ठोत्तिष्ठ गोविन्द त्यज निद्रां जगत्पते !
त्वया चोत्थीयमानेन उत्थितं भुवनत्रयम् ॥"
इति पठित्वा पूजयेत् ॥
इति तिथ्यादितत्त्वम् ॥
हरिशरः, पुं, (हरिः शरो यस्य ।) शिवः । इति केचित् ॥ त्रिपुरदहनार्थं हरिरेव यतस्तस्य शरोऽभूत्तस्मात् । यथा, पुष्पदन्तः ।
"रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर इति । दिधक्षोस्ते कोऽयं त्रिपुरतृणमाडम्बरविधिर्विधेयैः क्रीडन्त्यो न खलु परतन्त्राः प्रभुधियः ॥"
हरिश्चन्द्र, पुं, नृपविशेषः । स त्रेतायुगे सूर्य्यवंशीयः षटाविंशराजः । तत्पर्य्यायः । त्रिशङ्कुजः २ । इति हेमचन्द्रः ॥ अपि च । त्रिशङ्कोर्हरिश्चन्द्रस्तस्माद्रोहिताश्वस्ततश्च हरितः । इति विष्णुपुराणे । ४ । ३ । १५ ॥
हरिश्चन्द्रपुरं, क्लो, (हरिश्चन्द्रस्य पुरम् ।) हरिश्चन्द्रराजनगरम् । तत्पर्य्यायः सौभपुरम् २ । इति त्रिकाण्डशेषः ॥

हरिषः, पुं, हर्षः । इति केचित् ॥
हरिषेणः, पुं, जिनचक्रवर्त्तिविशेषः । तत्पर्य्यायः । हरिसुतः २ । यथा,—
"हरिषेणो हरिसुतो जयो विजयनन्दनः ।
ब्रह्मसूनुर्ब्रह्मदत्तः सर्व्वे चेक्ष्वाकुवंशजाः ॥"
इति हेमचन्द्रः ॥
हरिसङ्कीर्त्तनं, क्ली, (हरेः सङ्कीर्त्तनम् ।) श्रीहरेर्नामोच्चारणम् । यथा,—
"दानं व्रतं तपो यज्ञः श्राद्धं वा पितृतर्पणम् ।
सकलं निष्फलं राजन् ! हरिसङ्कीर्त्तनं विना ॥"
इति कर्म्मलोचनम् ॥
अपि च ।
"नरके पच्यमानानां नराणां पापकर्म्मिणाम् ।
मुक्तिः संजायते तस्मात् नामसंकीर्त्तनाद्धरेः ॥"
इति हरिभक्तिविलासधृतं इतिहासोत्तमवचनम् ॥
हरिसुतः, पुं, (हरेः सुत इव ।) हरिषेणराजा । इति हेमचन्द्रः ॥ हरेः पुत्रश्च ॥
हरिहयः, पुं, (हरिरिव हयो यस्य ।) इन्द्रः । इत्यमरः । १ । १ । ४६ ॥ (यथा, महाभारते । १ । ६७ । ५० ।
"द्वितीयस्तु ततस्तेषां श्रीमान् हरिहयोपमः ।
अपराजित इत्येव स बभूव नराधिपः ॥")
सूर्य्यः । कार्त्तिकेयः । गणेशः । इति केचित् ॥
हरिहरः, पुं, (हरिणा सह हरः ।) संयुक्तहरिहरमूर्त्तिः । यथा,—
पुलस्त्य उवाच ।
"विमुक्तपापा देवेशं वासुदेवमथाब्रुवन् ।
क्वासौ वद जगन्नाथ ! शम्भुस्तिष्ठति केशव ।
यं क्षीराद्यभिषेकेण स्नापयामो विधानतः ॥
अथोवाच सुरान् विष्णुरेष तिष्ठति शङ्करः ।
मद्देहे किन्न पश्यध्वं योगश्चायं प्रतिष्ठितम् ॥
तमूचुर्नैव पश्यामस्त्वत्तो वै त्रिपुरान्तकम् ।
सत्यं वद सुरेशान ! महेशानः क्व तिष्ठति ॥
ततोऽव्ययात्मा स हरिः स्वहृत्पङ्कजशायिनम् ।
दर्शयामास देवानां मुरारिर्लिङ्गमैश्वरम् ॥
ततः सुराः क्रमेणैव क्षीरादिभिरनन्तरम् ।
स्नापयाञ्चक्रिरे लिङ्गं शाश्वतं ध्रुवमव्ययम् ॥
गोरोचनया त्वालिप्य चन्दनेन सुगन्धिना ।
बिल्वपत्राम्बुजैर्देवं पूजयामासुरञ्जसा ॥
पूजयित्वा गुरुं भक्त्या निवेद्य परमौषधीः ।
जप्त्वाष्टशतनामानि प्रणामं चक्रिरे ततः ॥
इत्येवं चिन्तयन्तश्च देवा देवौ हराच्युतौ ।
कथं योगत्वमापन्नौ संराध्यतममात्मनः ॥
सुराणां चिन्तितं ज्ञात्वा विश्वमूर्त्तिरभूद्विभुः ।
सर्व्वलक्षणसंयुक्तः सर्व्वायुधधरोऽव्ययः ॥
सार्द्धं त्रिनेत्रं कमलाहिकुण्डलं
जटासटाभारशिरोजमण्डितम् ।
हरिं हरश्चैव नगेन्द्रभूषणं
पीताजिनाच्छन्नकटिप्रदेशकम् ॥
चक्रासिहस्तं धनुःशार्ङ्गपाणिं
पिनाकशूलाजगवान्वितञ्च ।
कन्दर्पखट्वाङ्गकपालघण्टा-
समङ्खचक्राश्रधरं महर्षे ! ॥
दृष्ट्वैव देवा हरिशङ्करं तं
नमोऽस्तु ते सर्व्वगताव्ययेति ॥"
इति वामनपुराणे ५८ अध्यायः ॥
शिवविष्णोरभेदेनार्चनस्य फलं त्वेवम् ।
"निरामया नाम गणाः समायाता जगद्-
[illegible]
सार्द्धद्विनेत्राः पद्माक्षाः [illegible]
समायाताः खगारूढ़ा वृषभध्वजिनोऽव्ययाः ।
महापाशुपता नाम शूलचक्रधरास्तथा ।
भैरवो विष्णुना सार्द्धमभेदेनार्च्चितो हि यैः ॥"
इति तत्रैव ९४ ॥
अन्यच्च ।
"अथवा विष्णुरूपेण पूजयेच्छेखरं सदा ।
शङ्करं वामभागस्थं सर्व्वकाममवाप्नुयात् ॥"
इति देवीपुराणे १२ ॥
हरिहरक्षेत्रं, क्ली, (हरिहरस्य क्षेत्रम् ।) [illegible] विशेषः । स तु [illegible] त्तरपारे वर्त्तते । तस्य नामान्तरं [illegible] तद्देशीया वदन्ति । तत्र गङ्गागण्डक [illegible] कार्त्तिकपौर्णमास्यां स्नानार्थं [illegible] भवति । तस्य नामकारणं यथा,—
"ततः स पञ्च रात्राणि स्थित्वा वै [illegible]
गोधनान्यग्रतः कृत्वा हरिक्षेत्रं जगाम ह ।
हरिणाधिष्ठितं क्षेत्रं हरिक्षेत्रं ततः [illegible]
सदा नन्दी शूलपाणिर्गौरीवनेन पुरस्कृतः ।
स्थितवांस्तद्दिनादेव तत्क्षेत्रं [illegible]
देवानामटनाच्चैव देवाट इति कथ्यते ॥"
इति वाराहे भगवच्छास्त्रे [illegible] महिमाविमुक्तक्षेत्रत्रिवेण्यादिमहिमानामाध्यायः ॥
हरिहरात्मकः, पुं, (हरिहरौ आत्मानौ यस्य । कप् ।) गरुडः । शिवदूतः । इति [illegible]
हरिहरक्षेत्रे, क्ली ॥ (हरिहरात्मकरूपे, क्ली ॥ यथा, हरिवंशे । १८१ । ३० ।
"अनादिमध्यनिधनमेतदक्षरमव्ययम् ।
तदेव ते प्रवक्ष्यामि रूपं हरिहरात्मकम् ॥")
हरितकी, स्त्री, (हरि पीतवर्णं फलमिता प्राप्ता इति हरीता । ततः संज्ञायां कन् गौरादित्वात् ङीष् ।) स्वनामख्यातवृक्षः । हरड़ा इति हिन्दी भाषा । तत्पर्य्यायः । अभया २ अव्यथा ३ पथ्या ४ वयःस्था ५ पूतना ६ अमृता ७ हैमवती ८ चेतकी ९ श्रेयसी १० शिवा ११ । इत्यमरः । २ । ४ । ५८ ॥ सुधा १२ कायस्था १३ कन्या १४ रसायनफला १५ । इति शब्दरत्नावली ॥ विजया १६ । इति जटाधरः ॥ अव्यथा १७ चेतनकी १८ रोहिणी १९ प्रपथ्या २० जीवप्रिया २१ जीवनिका २२ भिषग्वरा २३ जीवप्रिया पुस्तकान्तरे भिषक्प्रिया इति पाठः । जीवन्ती २४ प्राणदा २५ जीव्या २६ देवी २७ दिव्या २८ । अस्या गुणाः ।

"हरीतकी पञ्चरसा च रेचनी
शोफानहा मर्दनदर्शिनी सा।
रसायनी दीपनपाचनीर्नि।
वर्णप्रदा नित्य योगवाहिता ॥"
अन्यच्च।
"शीतास्तितिका मधुरा तदम्ल-
रसप्रमाणतः सा कटुका च पार्श्वा।
मांसांशतयास्त्रकषायतृप्ता
हरीतकी पञ्चरसा स्मृतेयम् ॥
पथ्यामज्जा तु चक्षुष्यो वातपित्तहरो गुरुः ॥"
तस्या भेदा यथा,—
"शैलस्वन्तीत्पन्ना सप्तविधेह हरीतकी।
तस्या नामानि वर्णांश्च वच्म्यहं च यथाक्रमात्।
विजया रोहिणी चैव पूतना चामृताभया।
जीवन्ती चेतकी चेति नाम्ना सप्तविधा स्मृता ॥
अलाबुवृत्ता विजया सुवृत्ता रोहिणी मता।
स्वल्पत्वक् पूतना चैव स्थूलमांसामृता स्मृता ॥
पञ्चास्रा चाभया ज्ञेया जीवन्ती स्वर्णवर्णभाक्।
त्र्यस्रा तु चेतकी विद्यादित्यासां रूपलक्षणम् ॥
विन्ध्याद्रौ विजया हिमाचलभवा स्याच्चेतकी पूतना
सिन्धौ स्यादथ रोहिणी तु विजया जाता प्रतिष्ठानके।
चम्पायाममृताभया च जनिता देशे सुराष्ट्राह्वये
जीवन्तीति हरीतकी निगदिता सा सप्तभेदा बुधैः ॥ ७ ॥
सर्व्वप्रयोगे विजयाथ रोहिणी
क्षतेषु लेपेषु च पूतनोदिता।
विरेचने स्यादमृता गुणाधिका
जीवन्तिका स्यादिह जीर्णरोगजित् ॥
स्याच्चेतकी सर्व्वरुजापहारिका
नेत्रामयघ्नीमभयां वदन्ति ताम्।
इत्थं यथारोगमियं प्रयोजिता
ज्ञेया गुणाढ्या न कदाचिदन्यथा ॥
चेतकी च धृता हस्ते यावत्तिष्ठति देहिनः।
तावद्विरिच्यते वेगात्तत्प्रभावान्न संशयः ॥
सप्तानामपि जातीनां प्रधानं विजया स्मृता।
सुखप्रयोगसुलभा सर्व्वव्याधिषु शस्यते ॥
चिराप्सु निमज्जति या सा ज्ञेया गुणवती भिषग्वरैः।
यस्या यस्या भूयो निमज्जनं सा गुणाढ्या स्यात् ॥
हरते प्रसभं व्याधीन् भूयस्तकति यद्वपुः।
हरीतकी तु सा प्रोक्ता तकतिर्दीप्तिवाचिका ॥
हरीतकी तु तृष्णायां हनुस्तम्भे गलग्रहे।
शोषे नवज्वरे क्षीणे गुर्विण्यां नैव शस्यते।"
इति राजनिर्घण्टः ॥ * ॥
अपि च।
"दक्षं प्रजापतिं स्वस्थं अश्विनौ वाक्यमूचतुः।
कुतो हरीतकी जाता तस्यास्तु कति जातयः ॥
रसाः कति समाख्याताः कति चोपरसाः स्मृताः।
नामानि कति चोक्तानि किं वा तासां च लक्षणम् ॥
के च वर्णा गुणाः के च का च कुत्र प्रयुज्यते।
केन द्रव्येण संयुक्ता कांश्च रोगान् व्यपोहति ॥
पृच्छाम्येतद्यथा पृष्टं भगवन् ! वक्तुमर्हसि।
अश्विनोर्व्वचनं श्रुत्वा दक्षो वचनमब्रवीत् ॥
पपात बिन्दुर्म्मेदिन्यां शक्रस्य पिबतोऽमृतम्।
ततो दिव्यात् समुत्पन्ना सप्तजातिर्हरीतकी ॥
हरीतक्यभया पथ्या कायस्था पूतनामृता।
हैमवत्यव्यथा चापि चेतकी श्रेयसी शिवा।
वयःस्था विजया चापि जीवन्ती रोहिणीति च।
विजया रोहिणी चैव पूतना चामृताभया।
जीवन्ती चेतकी चेति पथ्यायाः सप्तजातयः ॥ ७ ॥
अलाबुवृत्ता विजया वृत्ता सा रोहिणी स्मृता।
पूतनास्थिमती सूक्ष्मा कथिता मांसलामृता ॥
पञ्चरेखाभया प्रोक्ता जीवन्ती स्वर्णवर्णिनी।
त्रिरेखा चेतकी ज्ञेया सप्तानामियमाकृतिः ॥ ८ ॥
विजया सर्व्वरोगेषु रोहिणी व्रणरोहिणी।
प्रलेपे पूतना योज्या शोधनार्थेऽमृता हिता ॥
अक्षिरोगेऽभया शस्ता जीवन्ती सर्व्वरोगहृत् ॥
चूर्णार्थे चेतकी शस्ता यथा युक्तं प्रयोजयेत् ॥ ९ ॥
चेतकी द्विविधा प्रोक्ता श्वेता कृष्णा च वर्णतः।
षडङ्गुलायता शुक्ला कृष्णा चैकाङ्गुलायता ॥
काचिदास्वादमात्रेण काचिद्गन्धेन भेदयेत्।
काचित् स्पर्शेन दृष्टान्या चतुर्द्धा भेदयेच्छिवा।
चेतकीपादपच्छायामुपसर्पन्ति ये नराः।
भिद्यन्ते तत्क्षणादेव पशुपक्षिमृगादयः ॥
चेतकी तु धृता हस्ते यावत्तिष्ठति देहिनः।
तावद्भिद्येत वेगैस्तु प्रभावान्नात्र संशयः ॥
नृपादिसुकुमाराणां कृशानां भेषजद्विषाम्।
चेतकी परमा शस्ता हिता सुखविरेचनी ॥
सप्तानामपि जातीनां प्रधाना विजया स्मृता।
सुखप्रयोगा सुलभा सर्व्वरोगेषु शस्यते ॥
हरीतकी पञ्चरसालवणा तुवरा परम्।
रूक्षोष्णा दीपनी मेध्या स्वादुपाका रसायनी।
चक्षुष्या लघुरायुष्या बृंहणी चानुलोमिनी।
श्वासकासप्रमेहार्शःकुष्ठशोथोदरक्रिमीन् ॥
वैस्वर्य्यग्रहणीरोगविबन्धविषमज्वरान् ॥
गुल्माध्मानव्रणच्छर्द्दिहिक्काकण्डूहृदामयान् ॥
व्रणस्थाने तृषा इति क्वचित् पुस्तके पाठः।
कामलां शूलमानाहं प्लीहानञ्च यकृत्तथा।
अश्मरीं मूत्रकृच्छ्रञ्च मूत्राघातञ्च नाशयेत् ॥
स्वादुतिक्तकषायत्वात् पित्तहृत् कफहृत्तु सा।
कटुतिक्तकषायत्वादम्लत्वाद्वातहृच्छिवा ॥
पित्तकृत् कटुकाम्लत्वात् वातकृन्न कथं शिवा।
प्रभावाद्दोषहन्तृत्वं सिद्धं यत्तत् प्रकाश्यते ॥
हेतुभिः शिष्यबोधार्थं न पूर्व्वं क्रियतेऽधुना।
कर्म्मान्यत्वं गुणैः साम्यं दृष्टमाश्रयभेदतः।
यतस्ततो नेति चिन्त्यं धात्रीलकुचयोर्यथा ॥
पथ्याया मज्जनि स्वादुः स्नायावम्लो व्यवस्थितः।
वृन्ते तिक्तस्त्वचि कटुरस्थिस्थस्तु[illegible] ॥ १० ॥
नवा स्निग्धा घना वृत्ता गुर्व्वी क्षिप्ता च याम्भसि।
निमज्जेत् सा प्रशस्ता कथितातिगुणप्रदा ॥
नवादिगुणयुक्तत्वं तथैकत्र द्विकर्षता।
हरीतक्याः फले यत्र द्वयं तच्छ्रेष्ठमुच्यते ॥
चर्व्विता वर्द्धयत्यग्निं पेषिता मलशोधिनी।
स्विन्ना संग्राहिणी पथ्या भृष्टा प्रोक्ता त्रिदोषनुत् ॥
उन्मीलिनी बुद्धिबलेन्द्रियाणां
निर्म्मूलिनी पित्तकफानिलानाम्।
विस्रंसिनी मूत्रशकृन्मलानां
हरीतकी स्यात् सह भोजनेन ॥
अन्नपानकृतान् दोषान् वातपित्तकफोद्भवान्।
हरीतकी हरत्याशु भुक्तस्योपरि योजिता ॥
लवणेन कफं हन्ति पित्तं हन्ति सशर्करा।
घृतेन वातजान् रोगान् सर्व्वरोगान् गुडान्विता।
सिन्धूत्थशर्कराशुण्ठीकणामधुगुडैः क्रमात्।
वर्षादिष्वभया प्राश्या रसायनगुणैषिणा ॥
अध्वातिखिन्नो बलवर्ज्जितश्च
रूक्षः कृशो लङ्घनकर्षितश्च।
पित्ताधिको गर्भवती च नारी
विमुक्तरक्तस्त्वभयां न खादेत् ॥"
इति भावप्रकाशः ॥ * ॥
अन्यच्च।
"जीवन्ती रोहिणी चैव विजया चाभयामृता।
पूतना कालिका चेति सप्तजातिर्हरीतकी ॥
सुवर्णवर्णा जीवन्ती रोहिणी कपिलद्युतिः।
अलाबुवृत्ता विजया पञ्चांगा चाभया स्मृता ॥"
पञ्चांगा पञ्चशिरा।
"स्थूलमांसामृता ज्ञेया पूतनास्थिमती मता।
वंशगा च कालिकेत्येवं सप्तजातिर्हरीतकी ॥
स्नेहपानेषु सर्व्वेषु जीवन्ती तु प्रशस्यते।
रोहिणी क्षतरोगेषु विजया सर्वकर्म्मसु ॥
पूतना लेपने ज्ञेया अमृता तु विरेचने।
अभया नेत्ररोगेषु गन्धयुक्ता तु कालिका ॥
हरस्य भवने जाता हरिता च स्वभावतः।
हरते सर्व्वरोगांश्च तेन नाम्ना हरीतकी ॥ ७ ॥
पीयूषं पिबतस्त्रिपिष्टपपतेर्ये बिन्दवो निर्गता-
स्तेभ्योऽभूदभया दिवाकरकरश्रेणीव दोषापहा।
कालिन्दीव बलप्रमोदजननी गौरीव शूलिप्रिया
वह्निद्योतकरी हुताहुतिरिव श्रीरीव नानारसा ॥
पथ्या पञ्चरसायुष्या चक्षुष्यालवणा सरा।
मेध्योष्णा दीपनी कुष्ठदोषशोथव्रणापहा ॥" ६ ॥
पञ्चरसस्य विवरणम्। त्वक् कटुः। मांसं अम्ल-कषायम्। अस्थि तिक्तम्। तन्मध्ये माधुर्य्यम् ॥ ७ ॥
तन्मज्जगुणाः।
"पथ्यामज्जा तु चक्षुष्यो वातपित्तहरो गुरुः ॥"
इति राजवल्लभः ॥

हरीपा, स्त्री, मांसव्यञ्जनविशेषः। काम इति हिन्दी भाषा। यथा,—
"पाकपात्रे तु बृंहति [illegible]

वातकार्द्धविबन्धाध्मानशूलगुल्मनाशित्वम् ।
बल्यञ्च । इति राजनिर्घण्टः ॥ अपि च ॥
हृद्यं पाचनं रुच्यं तीक्ष्णं वातबलासहृत् ।
पाके च कटुकं स्निग्धञ्च वह्निदीपनम् ।
शूलगुल्मोदरानाहकृमिघ्नं पित्तवर्द्धनम् ॥"
इति भावप्रकाशः ॥*॥

अन्यच्च ।
हिङ्गु तीक्ष्णं कटुरसं शूलाजीर्णविबन्धनुत् ।
लघूष्णं पाचनं स्निग्धं दीपनं कफवातजित् ॥"
इति राजवल्लभः ॥
वंशपत्री । इति भावप्रकाशः ॥ (काकादनी ।
तदर्थे पर्य्यायो यथा,—
"हिङ्गु काकादनी मता ।"
इति गारुडे २०८ अध्याये ॥
कश्चिद्रामठार्थे, पुं । तत्पर्य्यायो यथा,—
"रामठं हिङ्गुरुच्यते ।"
इति च तत्रैव २०८ अध्याये ॥)
हिङ्गुनाडिका, स्त्री, (हिङ्गुनः नाडिरिव नाडि-
र्यस्याः । कप् ।) नाडीहिङ्गु । इति राज-
निर्घण्टः ॥
हिङ्गुनिर्यासः, पुं, (हिङ्गुन इव निर्य्यासोऽस्य ।)
निम्बवृक्षः । इत्यमरः । २ । ४ । ६२ ॥
(पर्य्यायो यथा,—
"निम्बः स्यात् पिचुमर्दश्च पिचुमन्दश्च तिक्तकः ।
अरिष्टः पारिभद्रश्च हिङ्गुनिर्यास इत्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
हिङ्गुरसः । इति मेदिनी ॥
हिङ्गुपत्रः, पुं, (हिङ्गुन इव पत्रमस्य ।) इङ्गुदी-
वृक्षः । इति राजनिर्घण्टः ॥ (विवरणमस्ये-
ङ्गुदीशब्दे ज्ञातव्यम् ॥)
हिङ्गुपत्री, स्त्री, हिङ्गुनः पत्रम् । हिङ्गुपत्रमिव
पत्रमस्याः । इत्यमरटीकायां भरतः ॥ तत्-
पर्य्यायः । कारवी २ पृथुला ३ पृथुः ४
बाष्पीका ५ कवरी ६ पृथ्वी ७ तनुपत्री ८
कवरी ९ । इति जटाधरः ॥ पृथ्वीका १०
वाष्पिका ११ बाष्पका १२ बाष्पा १३ पत्री १४ ।
इति शब्दरत्नावली ॥ दीर्घिका १५ तन्वी १६
दारुपत्री १७ विल्वी १८ वाप्ती १९ । अस्या
गुणाः । कटुत्वम् । तीक्ष्णत्वम् । तिक्तत्वम् ।
उष्णत्वम् । कफवातामकृमिहरत्वम् । रुच्यत्वम्
पथ्यत्वम् । दीपनत्वम् । पाचनत्वञ्च । इति
राजनिर्घण्टः ॥ अपि च ।
"हिङ्गुपत्री भवेद्धृद्या तीक्ष्णोष्णा पाचनी कटुः ।
हृद्वस्तिरुग्विबन्धार्शःश्लेष्मगुल्मानिलापहा ॥"
इति भावप्रकाशः ॥
हिङ्गुपर्णी, स्त्री, (हिङ्गुन इव पर्णमस्याः । ङीप् ।)
वंशपत्री । इति रत्नमाला ।
हिङ्गुलः, पुं, क्ली, (हिङ्गु तदर्थं लातीति । ला+
कः ।) रागद्रव्यविशेषः । तत्पर्य्यायः । हिङ्गुलः २ ।
इत्यमरभरतौ । २ । ५ । २० ॥ हिङ्गुलम् ३
रक्तम् ४ म्लेच्छभोजनम् ५ दरदः ६ रसः ७ ।
इति रत्नमाला ॥ हंसपादम् ८ कुरुविन्दः ८ ।
इति हेमचन्द्रः ॥ हिङ्गुलिः १० रक्तपारदः ११ ।
इति जटाधरः ॥ बर्ब्बरम् १२ सुरङ्गम् १३
सुपरम् १४ रञ्जनम् १५ दरदम् १६ म्लेच्छम् १७
चित्राङ्गम् १८ चूर्णपारदम् १८ चर्म्मारकम् २०
मणिरागम् २१ रसोद्भवम् २२ रञ्जकम् २३
रसगर्भम् २४ । अस्य गुणाः । मधुरत्वम् ।
तिक्तत्वम् । उष्णत्वम् । वातकफविदोषदन्तदोष-
ज्वरनाशित्वञ्च । इति राजनिर्घण्टः ॥ * ॥
अपि च ।
अथ हिङ्गुलस्य नामानि लक्षणानि गुणाश्च ।
"हिङ्गुलं दरदं म्लेच्छं चित्राम चूर्णपारदम् ।
दरदस्त्रिविधः प्रोक्तश्चर्म्मारः शुकतुण्डकः ।
हंसपादस्तृतीयः स्याद्गुणवानुत्तरोत्तरः ॥
चर्म्मारः शुक्लवर्णः स्यात् सपीतः शुकतुण्डकः ।
जवाकुसुमसङ्काशो हंसपादो महोत्तमः ॥
तिक्तं कषायं कटु हिङ्गुलं स्या-
न्नेत्रामयघ्नं कफपित्तहारि ।
हृल्लासकुष्ठज्वरकामलाश्च
प्लीहामवातौ च गरं निहन्ति ॥
ऊर्द्ध्वपातनयुक्त्या तु डमरुयन्त्रपाचितम् ।
हिङ्गुलं तस्य सूतं तु शुद्धमेव न शोधयेत् ॥"
इति ॥ * ॥

तत्र हिङ्गुलस्य शोधनविधिः ।
"मेषीक्षीरेण दरदमम्लवर्गैश्च भावितम् ।
सप्तवारान् प्रयत्नेन शुद्धिमायाति निश्चितम् ॥"
एवं शोधितस्य हिङ्गुलस्य गुणाः ।
"तिक्तं कषायं कटु हिङ्गुलं स्या-
न्नेत्रामयघ्नं कफपित्तहारि ।
हृल्लासकुष्ठज्वरकामलाश्च
प्लीहामवातौ च परं निहन्ति ॥" इति ॥*॥
(पर्य्यायः शोधनप्रकारान्तरञ्च यथा,—
"हिङ्गुले हिङ्गुलुर्याति दरदः शुकतुण्डकः ।
रसगन्धकसम्भूतो हिङ्गुलो दैत्यरक्तकः ॥
अम्लवर्गद्रवैः पिष्टा दरदो माहिषेण च ।
दुग्धेन सप्तधा पिष्टः शुक्लीभूतो विशुध्यति ॥"
तथाच प्रकारान्तरम् ।
"आर्द्रकैर्लकुचद्रावैः सप्तधा भावितो यदि ।
हिङ्गुलः शुद्धतां याति निर्दोषो जायते खलु ॥
हिङ्गुलः शुद्धतां याति निर्दोषो जायते खलु ॥
विम्बाभं हिङ्गुलं दिव्यं रसगन्धकसम्भवम् ॥
मेहकुष्ठहरं रुच्यं बल्यं मेधाग्निवर्द्धनम् ॥"
इति हिङ्गुलग्रहः ॥ * ॥
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधि-
कारे ।) अथ हिङ्गुलात्सूताकर्षणविधिः ।
"निम्बरसैर्निम्बपत्ररसैर्वा याममात्रकम् ।
पिष्ट्वा दरदमूर्द्धं तु पातयेत् सूतयुक्तिवत् ॥
तत्र सूतं समादाय पश्चाद्ग्राह्यं गुणोत्तमम् ।
तथोर्द्धं पिठरीलग्नं गृह्णीयाद्रसमुत्तमम् ।
शुद्धमेव हि तत् सूतं सर्व्वकर्म्मसु योजयेत् ॥"
इति च भावप्रकाशः ॥
हिङ्गुला, स्त्री, देवीविशेषः । यथा,—
"ब्रह्मरन्ध्रं हिङ्गुलायां भैरवो भीमलोचनः ।
कोट्टरी सा महामाया त्रिगुणा या दिगम्बरी ॥"
इति तन्त्रचूडामणौ पीठमाला ॥ * ॥
अन्यच्च ।
"कान्या चोत्स्वेदसंजाता सायविलिनिर्गता ।

ततस्तामाह बालार्कप्रभो भैरवमूर्त्तिमान् ॥
शङ्करो वरदो लोकश्रेयार्थाय वचो महत् ।
त्वां पूजयिष्यन्ति सुरा ऋषयः पितरस्तथा ॥
यक्षविद्याधराश्चैव मानवाश्च शुभङ्करि ॥
त्वां स्तोष्यन्ति सदा देवि बलिपुष्पोत्करैः करैः ॥
चर्च्चिकेति शुभं नाम यस्माद्रुधिरचर्च्चिता ॥
इत्येवमुक्ता वरदेन चर्च्चिका
भूतानुयाता हरिचर्म्मवासिनी ।
मही समन्तादिचचार सुन्दरी
स्थलं गता हैङ्गुलमाद्यमुत्तमम् ॥"
इति वामनपुराणे १७ अध्यायः ॥
हिङ्गुलिः, पुं, (हिङ्गु इव वर्णं लातीति । ला+
किः ।) हिङ्गुलः । इति जटाधरः ॥
हिङ्गुलिका, स्त्री, (हिङ्गुल इव वर्णोऽस्या अस्तीति ।
हिङ्गुल+ठन् ।) कण्टकारी । इति शब्द-
चन्द्रिका ॥ (कण्टकारीशब्देऽस्या विवृती
ज्ञातव्यः ॥)
हिङ्गुली, स्त्री, वार्त्ताकी । इत्यमरः । २ । ४ । ११५ ॥
वृहती । इति भावप्रकाशः ॥
हिङ्गुलुः, पुं, क्ली, हिङ्गुलः । इत्यमरः । २ । ५ । २० ॥
(पर्य्यायोऽस्य यथा,—
"हिङ्गुले हिङ्गुलुर्याति दरदः शुकतुण्डकः ।
रसगन्धकसम्भूतो हिङ्गुलो दैत्यरक्तकः ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधि-
कारे ॥)
हिङ्गुशिराटिका, स्त्री, (हिङ्गुन इव शिरो अट-
तीति । अट्+ण्वुल् । टापि अत इत्वम् ।)
वंशपत्री । इति रत्नमाला ॥
हिङ्गूलं क्ली, मधुमूलम् । इति शब्दचन्द्रिका ॥
आलु इति ख्यातम् ॥
हिज्जः, पुं, हिज्जलवृक्षः । इति शब्दचन्द्रिका ।
हिज्जलः, पुं, (हिज्ज इति नाम लातीति ।
ला+कः ।) वृक्षविशेषः । हिजल इति
भाषा । इजर इति हिन्दी भाषा । तत्पर्या[illegible]
निचुलः २ इज्जलः ३ । इति हेमच[illegible]
पिचुलः ४ नदीकान्तः ५ अम्बुजः ६ । [illegible]
जटाधरः ॥ धनदः ७ कान्तः ८ जल[illegible]
दीर्घपत्रकः १० नदीजः ११ रक्त[illegible]
कार्मुकः १३ । अस्य गुणाः । क[illegible]
उष्णत्वम् । पवित्रत्वम् । भूतवातामयना[illegible]
धारादिदोषनाशित्वञ्च । इति राजनि[illegible]
अपि च ।
"इज्जलो हिज्जलश्चापि निचुलश्चाम्बुज[illegible]
सलघुतसवदेवो हिज्जलोऽयं विषाप[illegible]
इति भाव[illegible]

हिञ्जीरः, पुं, हस्तिपादबन्धः । यथा,—
"विन्दुजालं पुनः पद्मं शङ्खो निगड[illegible]
हिञ्जीरश्च पादपाशो वारिस्तु गज[illegible]
इति [illegible]

हिड, इ ङ गतौ अनादरे। इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट्।) इ, हिण्ड्यते। ङ, हिण्डते। इति दुर्गादासः ॥

हिडिम्बः, पुं, राक्षसविशेषः। स भीमसेनेन हतः। इति महाभारतम् ॥ (एतद्विवरणन्तु तत्रैव आदिपर्व्वणि १५२ अध्यायादारभ्य द्रष्टव्यम् ॥) हिड़म्ब इति च पाठः ॥

हिडिम्बजित्, पुं, (हिडिम्बं जितवानिति। जि+क्विप्।) भीमसेनः। इति त्रिकाण्डशेषः ॥

हिड़म्बनिषूदनः, पुं, (हिड़म्बं निषूदयतीति। नि+सूद+णिच्+ल्युः।) भीमसेनः। इति भूरिप्रयोगः ॥

हिड़म्बभित्, [द्] पुं, (हिड़िम्बं भिनत्तीति। भिद्+क्विप्।) भीमसेनः। इति भूरिप्रयोगः ॥

हिड़िम्बा, स्त्री, हिड़िम्बराक्षसभगिनी। यथा,—

"इहो मानुषमांसस्य महाकायो महाबलः।
आघ्राय मानुषं गन्धं भगिनीमिदमब्रवीत् ॥
उपपन्नश्चिरस्याद्य भक्षोऽयं मम सुप्रियः।
स्नेहस्रवान् प्रस्रवति जिह्वा पर्य्येति मे मुखम् ॥
एवमुक्ता हिड़िम्बा तु हिड़िम्बेन तदा वने।
भ्रातुर्व्वचनमाज्ञाय त्वरमाणेव राक्षसी ॥"

इति महाभारते आदिपर्व्वणि १५२ अध्यायः ॥

तद्गर्भे भीमसेनौरसेन घटोत्कचो जातः। यथा,

"प्रजज्ञे राक्षसी पुत्त्रं भीमसेनान्महाबलम्।
विरूपाक्षं महावक्त्रं शङ्कुकर्णं विभीषणम् ॥
प्रणम्य विकचः पादावगृह्णात् स पितुस्तदा।
मातुश्च परमेष्वासस्तौ च नामास्य चक्रतुः ॥
घटो हास्योत्कच इति माता तं प्रत्यभाषत।
अब्रवीत्तेन नामास्य घटोत्कच इति स्म ह ॥"

इति महाभारते आदिपर्व्वणि १५६ अः ॥

हिड़िम्बापतिः, पुं, (हिड़िम्बायाः पतिः।) हनूमान्। इति शब्दरत्नावली ॥

हिड़िम्बारमणः, पुं, (हिड़िम्बाया रमणः।) हनूमान्। इति त्रिकाण्डशेषः ॥

हिण्डनं, क्ली, (हिण्ड+ल्युट्।) भ्रमणम्। रतम्। इति मेदिनी ॥ लेखनम् इति विश्वः ॥

हिण्डकः, पुं, लग्नाचार्य्यः। इति हारावली ॥

हिण्डिरः, पुं, हिण्डीरः। इति शब्दरत्नावली ॥

हिण्डी, स्त्री, दुर्गा। इति त्रिकाण्डशेषः ॥

हिण्डीप्रियतमः, पुं, (हिण्ड्याः दुर्गायाः प्रियतमः।) शिवः। इति शब्दरत्नावली ॥

हिण्डीरः, पुं, (हिण्डते इतस्ततो गच्छतीति। हिण्ड+ईरन्। इत्युणादिवृत्तौ उज्ज्वलदत्तः। ४। ३०।) समुद्रफेनः। इत्यमरः। २। ८। १०५ ॥ (यथा, साहित्यदर्पणे। १०। ६८२।

"एतद्विभाति चरमाचलचूड़चुम्बि
हिण्डीरपिण्डरुचिशीतमरीचिबिम्बम्।
उज्ज्वालितस्य रजनीं मदनानलस्य
धूमं दधत्प्रकटलाञ्छनकैतवेन ॥")

वार्त्ताकुः। पुरुषः। इति मेदिनी ॥ रुचकम्। इत्युणादिकोषः ॥ (क्ली, दाड़िमम्। इत्युज्ज्वलदत्तहारावली। ४। ३० ॥)

हितं, त्रि, (हि गतिवृद्ध्योः धा धारणे पुष्टौ वा+क्तः।) पथ्यम्। गतम्। धृतम्। इति मेदिनी ॥ इष्टसाधनम्। इति मुग्धबोधटीकायां दुर्गादासः ॥ मङ्गलम्। यथा,—

"गच्छतस्तिष्ठतो वापि जाग्रतः स्वपतो न यत्।
सर्व्वसत्त्वहितार्थाय तत् पशोरिव चेष्टितम् ॥
अहितहितविचारशून्यबुद्धेः
श्रुतिसमयैर्बहुभिर्विवर्जितस्य।
उदरभरणमात्रतुष्टबुद्धेः
पुरुषपशोः पशोश्च को विशेषः ॥"

इति गारुड़े ११५ अध्यायः ॥

मित्रम्। यथा,—

"हितसमरिपुसंज्ञा ये निसर्गे निरुक्ता
अधिहितहितमध्यास्तेऽपि तत्कालमित्रैः।"

इति ज्योतिस्तत्त्वम् ॥

हितकः, पुं, (हितमर्हतीति। हि+संज्ञायां कन्।) शिशुः। इति राजनिर्घण्टः ॥

हितकारी, [न्] त्रि, (हितं करोतीति। कृ+णिनिः।) मङ्गलकारकः। शुभकारकः। यथा,—

"लक्ष्मणेन च धर्म्मात्मन्! भ्रात्रा तद्धितकारिणा।
मातृभिर्भ्रातृसहितं पश्यामोऽद्य वयं नृप! ॥"

इति श्रीरामायणे उत्तरकाण्डे १ सर्गः ॥

हितप्रणीः, पुं, (हितं प्रणयतीति। प्र+नी+क्विप्।) चारः। इति शब्दरत्नावली ॥

हितवादी, [न्] त्रि, हितकथनशीलः। सत्परामर्शी। हितशब्दपूर्व्वकवदधातोर्णिन्प्रत्ययेन निष्पन्नः ॥

हितावली, स्त्री, (हितानां आवली यत्र।) औषधविशेषः। हियावली इति हिन्दी भाषा। तत्पर्य्यायः। हृद्यावली २ कुष्ठघ्नः ३ अङ्गारकुष्ठकः ४ अङ्गारग्रन्थिः ५ ग्रन्थः ६ ग्रन्थिलः ७। अस्या गुणाः। सारकत्वम्। तिक्तत्वम्। प्लीहगुल्मोदरक्रिमिकुष्ठगदात्युग्रखर्ज्जुकण्डूतिनाशित्वञ्च। इति राजनिर्घण्टः ॥

हितैषी, [न्] त्रि, (हितमिच्छतीति। इष+णिनिः।) हितेच्छाकारी। यथा, बृहद्राजमार्त्तण्डे।

"धावापिवापव्रतयज्ञदेश-
प्रासादचूड़ाकरणं हितैषी।
नष्टे भृगौ नोपदिशेन्नराणां
देवप्रतिष्ठामपि कर्णवेधम् ॥"

इति मलमासतत्त्वम् ॥

हितोक्तिः, स्त्री, (हितस्य उक्तिः।) पथ्यवचनम्। इति धनञ्जयः ॥

हितोपदेशः, पुं, (हितानामुपदेशः।) सत्परामर्शदानम्। यथा, महाभारते। १।२।१०१।

"हितोपदेशश्च पथि धर्म्मराजस्य धीमतः।
विदुरेण कृतो यत्र हितार्थं म्लेच्छभाषया ॥"

हितानामुपदेशो यत्र।) विष्णुशर्म्मकृतमित्रलाभसुहृद्भेदविग्रहसन्धिनामकथाचतुष्टयात्मकनीतिशास्त्रम्। यथा,—

"सिद्धिः साध्ये सतामस्तु प्रसादात्तस्य धूर्ज्जटेः।
जाह्नवीफेनरेखेव यन्मूर्द्ध्नि शशिनः कला ॥
श्रुतो हितोपदेशोऽयं पाटवं संस्कृतोक्तिषु।
वाचां सर्व्वत्र वैचित्र्यं नीतिविद्यां ददाति च ॥"

इति हितोपदेशप्रथमश्लोकद्वयम् ॥

हिन्तालः, पुं, वृक्षविशेषः। हैंताल इति भाषा। तस्य फलं उद्वेगम्। इत्यमरः। २। ४। १६८ ॥ तत्पर्य्यायः। पूगरोटः २। तत्फलम् किरिटि। इति त्रिकाण्डशेषः ॥ * ॥ तस्य पर्य्यायान्तरं गुणाश्च।

"हिन्तालः स्थूलतालश्च वल्कपत्रो बृहद्दलः।
स्थिरपत्रो द्विधालेख्यः शिरापत्रोऽस्थिराङ्घ्रिकः ॥
गर्भस्रावी नीलतालो भीषणो बहुकण्टकः।
मल्लसारो बृहत्तालः स्याच्चतुर्द्दशधाभिधः ॥
हिन्तालो मधुराम्लश्च कफकृत् पित्तदाहनुत्।
श्रमतृष्णापहारी च शिशिरो वातदोषकृत् ॥"

इति राजनिर्घण्टः ॥

(व्यवहारोऽस्य यथा,—

"गुडूचीबालहिन्तालवानरीनीलझिण्टिकाः ॥"

इति वैद्यकरसेन्द्रसारसंग्रहे कुष्ठाधिकारे माणिक्यरसे ॥) स तु तृणराजविशेषः। यथा, क्रियाकौमुद्यां वशिष्ठः।

"गुवाकतालहिन्तालास्तथा ताड़ी च केतकी।
खर्ज्जूरनारिकेलौ च सप्तैते तृणराजकाः ॥
तृणराजशिरापत्रैर्यः कुर्य्याद्दन्तधावनम्।
तावद्भवति चण्डालो यावद्गां नैव पश्यति ॥"

इत्याह्निकाचारतत्त्वम् ॥

हिन्दुः, पुं, (हीनं दूषयतीति। दुष+डुः। पृषोदरादित्वात् साधुः।) जातिविशेषः। हिंदु इति भाषा। यथा,—

"पश्चिमाम्नायमन्त्रास्तु प्रोक्ताः पारस्यभाषया।
अष्टोत्तरशताशीतिर्येषां संसाधनात् कलौ ॥
पञ्च खानाः सप्त मीरा नव शाहा महाबलाः।
हिन्दुधर्म्मप्रलोप्तारो जायन्ते चक्रवर्त्तिनः ॥
हीनञ्च दूषयत्येव हिन्दुरित्युच्यते प्रिये! ॥
पूर्व्वाम्नाये नवशतं षड़शीतिः प्रकीर्त्तिताः।
फिरङ्गभाषया मन्त्रास्तेषां संसाधनात् कलौ ॥
अधिपा मण्डलानाञ्च संग्रामेष्वपराजिताः।
इंरेजा नव षट् पञ्च लण्ड्रजाश्चापि भाविनः ॥"

इति मेरुतन्त्रे २३ प्रकाशः ॥

हिन्दोलः, पुं, (हिन्दोल+घञ्।) श्रावणशुक्लपञ्चविहितभगवद्यात्राविशेषः। झूलनयात्रा इति यस्य प्रसिद्धिः। षड़्रागान्तर्गतरागविशेषः। हिंडोल इति हिन्दी भाषा। यथा,

"भैरवः कौशिकश्चैव हिन्दोलो दीपकस्तथा।
श्रीरागो मेघरागश्च षड़ेते पुरुषाह्वयाः ॥"

अस्य स्त्रियः।

"वेलावती रामकेली देशाख्या पटमञ्जरी।
ललिता सहिता एता [illegible] सराङ्गनाः ॥"

अथ हि [illegible]

"हिल [illegible]
दोल [illegible] धानः।

सर्व्वैः कपोलद्युतिकामयुक्तो
हिन्दोलरागः कथितो मुनीन्द्रैः ॥"
तत्पुत्रा यथा, सङ्गीतदर्पणे ।
"आभीरः शुभ्रधवलौ चन्द्रकामविमोहकाः ।
चन्द्रकान्तः श्वेतवेदः हिन्दोलात्मजकीर्त्तितः ॥"
तस्य गानसमयो यथा,—
"हिन्दोलः पञ्चमः सिन्धुर्ललितश्च वसन्तकः ।
भल्लारो भटीयारो च प्रातर्यामे प्रगीयते ॥"
इति वृहत्सङ्गीतरत्नाकरः ॥ * ॥
हनूमन्मते षड्रागाणां मध्ये द्वितीयरागः । ब्रह्मणः शरीराद्विर्गतः । केचिन्मते नाभितः । अस्य जातिः षौड़वः । अर्थात् प ग म प नि इति पञ्चस्वरमिलितः । अस्य ग्रहं षड्जस्वरः । वसन्तर्त्तौ दिवाप्रथमभागे गानसमयः । रागमालायामस्य रूपम् । अल्पवयःसुन्दरः पीतवर्णः खर्व्वाङ्गः स्वर्णमयहिन्दोलारूढः सुसज्जितसुन्दरीस्त्रीभिः गीतं गायन्तीभिः हिन्दोलान्दोलयन्तीभिश्च सह परमानन्देन हास्यकौतुककारी । अस्य पञ्च रागिण्यः । यथा । रामकरी १ देशाक्षी २ ललिता ३ विलावली ४ पटमञ्जरी ५ । अस्य पुत्रा अष्टौ यथा । चन्द्रबिम्बः १ मङ्गलः २ शुभः ३ आनन्दः ४ विनोदः ५ मधनः ६ गौरः ७ विभासः ८ ॥ * ॥ भरतमते अस्य रागिण्यो यथा । रामकली १ मालावती २ आशावरी ३ देवारी ४ गुणकली ५ । तन्मते पुत्रा यथा । वसन्तः १ मालवः २ साकः ३ कुसुमः ४ शङ्करचन्द्रः ५ प्रह्लादनः ६ मागधनः ७ धवलः ८ । एषां भार्य्या यथा । लीलावती १ कैरवी २ चयती ३ पूरवी ४ पारावती ५ तिरवणी ६ देवगिरी ७ सुरमधी ८ । इति सङ्गीतशास्त्रम् ॥
हिन्दोलकः, पुं, (हिन्दोल एव । कन् ।) यानविशेषः । तत्पर्य्यायः । प्रेङ्खा २ दोला ३ । इति जटाधरः ॥ दोलिका ४ हिन्दोला ५ । इति शब्दरत्नावली ॥
हिन्दोला, स्त्री, (हिन्दोल+घञ्+टाप् ।) दोलिका । हिंदला इति भाषा । इति शब्दरत्नावली ॥
हिम, त्रि, (हन्ति उष्णत्वमिति । हन+"हन्तेर्ह्रि च ।" उणा० १ । १४६ । इति मक् ह्रि च ।) शीतगुणविशिष्टः । शीतलवस्तु । तत्पर्य्यायः । सुषीमः २ शिशिरः ३ जडः ४ तुषारः ५ शीतलः ६ शीतः ७ । इत्यमरः । १ । ३ । १८ ॥ (यथा, सुश्रुते । ४ । २८ । "अवरात्रे हिमाभिवर्षैः परिषिच्यमानः मानीनां घटीकानाञ्च पयसा सशर्करामधुरेणोदकसङ्घातात् ॥")
हिमं, क्ली, (हन+मक् । हन्तेर्ह्रि च ।) प्रालेयः । तत्पर्य्यायः । अवश्यायः २ नीहारः ३ तुषारः ४ तुहिनम् ५ प्रालेयम् ६ महिका ७ । इत्यमरः । १ । ३ । १८ ॥ धूमिकाः ८ प्रालेयः ९ रजनीजलम् १० । इति शब्दरत्नावली ॥ (यथा, रघुः । ८ । ४५ ।
"अथवा मृदुवस्तु हिंसितुं
मृदुनैवारभते प्रजान्तकः ।
हिमसेकविपत्तिरत्र मे
नलिनी पूर्व्वनिदर्शनं मता ॥")
अस्य गुणः । कफवायुवर्द्धकत्वम् । इति राजवल्लभः ॥ चन्दनम् । इति मेदिनी ॥ पद्मकाष्ठम् । रङ्गम् । मौक्तिकम् । इति राजनिर्घण्टः ॥ नवनीतम् । इति शब्दचन्द्रिका ॥ शीतम् । इति हेमचन्द्रः ॥ (कर्पूरः । पर्य्यायो यथा,—
"पुंसि क्लीवे च कर्पूरः सिताभ्रो हिमवालुकः ।
घनसारश्चन्द्रसंज्ञः हिमनामापि स स्मृतः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
हिमः, पुं, (हन+मक् हन्तेर्ह्रि च ।) चन्दनवृक्षः । इति हेमचन्द्रः । चन्द्रः । इति शब्दचन्द्रिका ॥ कर्पूरः । इति राजनिर्घण्टः ॥ हेमन्तर्त्तुः । स तु अग्रहायणपौषमासात्मकः । यथा,—
"हिमशिशिरवसन्तग्रीष्मवर्षाशरत्सु
स्तनतपनवनाभोहर्म्म्यगोक्षीरपानैः ।
सुखमनुभव राजंस्तद्द्विषो यान्तु नाशं
दिवसकमलजाशार्व्वरीरेणुपङ्काः ॥"
इति ऋतुसंहारः ॥
हिमालयपर्व्वतः । इति हिमजादिशब्ददर्शनात् ॥
हिमकः, पुं, (हिमेन कायतीति । कै+क ।) विकङ्कतवृक्षः । इति राजनिर्घण्टः ॥
हिमकरः,पुं,(हिमः शीतलः करः किरणो यस्य ।) चन्द्रः । यथा,—
"दृशा द्राघीयस्या दरदलितनीलोत्पलरुचा
दवीयांसं दीनं स्नपय कृपया मामपि शिवे ! ।
अनेनायं धन्यो भवति न च ते हानिरियता
वने वा हर्म्ये वा समकरनिपातो हिमकरः ॥"
इत्यानन्दलहरी ॥
कर्पूरः । इति राजनिर्घण्टः ॥
हिमकूटः, पुं,(हिमस्य कूटो यत्र ।) शिशिरर्त्तुः । इति राजनिर्घण्टः ॥ (हिमस्य कूट इति । हिमालयशृङ्गे, पुं, क्ली ॥ यथा, भागवते । ५ । १७ । ८ । "ततश्चालकनन्दा दक्षिणेन ब्रह्मसदनाद्बहूनि गिरिकूटान्यतिक्रम्य हेमकूटहिमकूटान्यतिरभसतररंहसा लुठतीति ॥")
हिमगिरिः, पुं, (हिमप्रधानो गिरिः ।) हिमालयपर्व्वतः । यथा,—
"धनुः पौष्पं मौर्व्वी मधुकरमयी पञ्च विशिखा
वसन्तः सामन्तो मलयमरुदायोधनरथः ।
तथाप्येकः सर्व्वं हिमगिरिसुते ! कामपि कृपा-
मपाङ्गात्ते लब्ध्वा जगदिदमनङ्गो विजयते ॥"
इत्यानन्दलहरी ।
(यथा च ।
"दाक्षेया विन्ध्यशैलाद्याः सौम्या हिमगिरिस्मृताः ।"
इति पूर्व्वखण्डे द्वितीयेऽध्याये शार्ङ्गधरेणोक्तम् ।)
हिमजः, पुं, (हिमात् हिमालयात् जायते इति । जन+डः ।) मैनाकगिरिः । इति मेदिनी ॥
हिमजा, स्त्री, (हिमात् हिमालयात् इति । जन+डः । टाप् ।) पार्व्वती । इति मेदिनी ॥ क्षीरिणी । इति
हिमझण्टिः, पुं, (हिमानां कुज्झटिः । दन्त्यादित्वात् साधुः ।) कुज्झटिः । इति त्रिकाण्डशेषः ॥ क्वचित् पुस्तके हिमझण्टिरिति
हिमतैलं, क्ली, (हिमजातं तैलमिति ।) तैलम् । इति राजनिर्घण्टः ॥
हिमदुग्धा, स्त्री, (हिमवत् शुभ्रं दुग्धमस्याः क्षीरिणी । इति राजनिर्घण्टः ॥
हिमदुर्दिनं, क्ली, (हिमेन दुर्द्दिनम् ।) हिमसमूहपातेन दुःखदायकदिनम् । तत्पर्य्यायः । पवहिमम् २ । इति त्रिकाण्डशेषः
हिमद्युतिः, पुं, (हिमा द्युतिर्यस्य ।) चन्द्रः । इति शब्दमाला ॥ (यथा, माघे । ८ । १२ ।
"अविभाव्यतारकमदृष्टहिम-
द्युतिबिम्बमस्तमितभानुनभः ॥")
हिमद्रुमः, पुं, (हिमो द्रुमः ।) महानिम्बः । इति राजनिर्घण्टः ॥
हिमधातुः, पुं, (हिमो धातुरिव यत्र ।) हिमालयपर्व्वतः । इति केचित् ॥
हिमप्रस्थः, पुं, (हिमप्रधानः प्रस्थो यत्र ।) हिमालयः । इति हेमचन्द्रः ॥
हिमवत्सुतः, पुं, (हिमवतः सुतः ।) मैनाकपर्व्वतः । इति त्रिकाण्डशेषः ॥
हिमवत्सुता, स्त्री, (हिमवतः सुता ।) गङ्गा । इति धनञ्जयः ॥ (यथा, महाभारते । ३ । १०८ ।
"ततः पपात गगनाद्गङ्गा सा हिमवत्सुता ।"
उमा च ।
हिमवान्, [त्] पुं, (हिममस्यास्तीति । हिम+मतुप् । मस्य वः ।) हिमालयपर्व्वतः । इत्यमरः । २ । ३ । ३ ॥ तत्कन्या गङ्गा । यथा,—
"गङ्गा हिमवतो जज्ञे सर्व्वलोकैकपावनी ।
स्वयोगाग्निबलाद्देवी लेभे पुत्री महेश्वरात् ॥"
इति देवीपुराणे १२ अध्यायः ॥
हिमविशिष्टे, त्रि ॥
हिमवालुकः, पुं, (हिमस्य वालुका इव ।) कर्पूरः । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्य यथा भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"पुंसि क्लीवे च कर्पूरः सिताभ्रो हिमवालुकः ।
घनसारश्चन्द्रसंज्ञः हिमनामापि स स्मृतः ॥")
हिमवालुका, स्त्री,(हिमस्य वालुकेव ।) कर्पूरः । इत्यमरः । २ । ६ । १३० ॥ (यथा,—
"प्रवालमौक्तं हिमवालुका च
मिश्रं कृतं स्यात् सति मूत्रकृच्छ्रे ॥"
इति वैद्यकपथ्यविधौ मूत्रकृच्छ्राधिकारे ।)
हिमशर्करा, स्त्री, (हिमस्य शर्करा ।) यावनाली । इति राजनिर्घण्टः ॥
हिमशैलजा, स्त्री, (हिमशैलात् जायते इति । जन+डः ।) दुर्गा । इति शब्दरत्नावली ।
(हिमालयोद्भवे, त्रि । यथा, रामायणे । ...
"एवमुक्ता प्रियं रामं भक्ष्येत् हिमशैलजम् ।"

हिमसंहतिः, स्त्री, (हिमानां संहतिः ।) हिमसमूहः । बरफ् इति पारस्यभाषा । तत्पर्य्यायः । हिमानी २ । इत्यमरः । १ । ३ । १८ ॥ महाहिमम् ३ । इति जटाधरः ॥

हिमह्रासकः, पुं, (हिममपि ह्रसति शीतलत्वात् । ह्रस+ण्वुल् ।) हिन्तालवृक्षः । इति शब्दरत्नावली ॥

हिमा, स्त्री, (हिम+अर्श आद्यच् । टाप् ।) सूक्ष्मैला । रेणुका । भद्रमुस्ता । नागरमुस्ता । दूर्व्वा । चणिका । इति राजनिर्घण्टः ॥

हिमांशुः, पुं, (हिमा अंशवो यस्य ।) चन्द्रः । इत्यमरः । १ । ३ । १३ ॥ (यथा, रघुः । ५ । १६ ।

"पर्य्यायपीतस्य सुरैर्हिमांशोः
कलाक्षयः श्लाघ्यतरो हि वृद्धेः ॥")

कर्पूरः । इति राजनिर्घण्टः ॥

हिमांशुभिख्यं, क्ली, (हिमांशोरिव अभिख्या शोभा यस्य ।) रौप्यम् । इति हेमचन्द्रः ॥

हिमागमः, पुं, (हिमस्य आगमो यत्र ।) हेमन्तः । इति राजनिर्घण्टः ॥ (यथा, महाभारते । ५ । ८३ । ७ ।

"कौमुदे मासि रेवत्यां शरदन्ते हिमागमे ।
स्फीतसस्यसुखे काले कल्यः सत्त्ववतां वरः ॥")

हिमाद्रिः, पुं, (हिमप्रधानोऽद्रिः ।) हिमालयपर्व्वतः । इति भूरिप्रयोगः ॥ (यथा, रघुः । ४ । ७८ ।

"परस्परेण विज्ञातस्तेषूपायनपाणिषु ।
राज्ञा हिमवतः सारो राज्ञः सारो हिमाद्रिणा ॥")

हिमाद्रिजा, स्त्री, (हिमाद्रौ जायते इति । जन+डः ।) क्षीरिणी । इति राजनिर्घण्टः ॥ पार्व्वती च ॥ (यथा, वक्रोक्तिपञ्चाशिकायाम् । १ ।

"सेयं वच्मि किं वनं ननु घनं मूर्द्धा मयैवोह्यते
इत्थं [illegible] हिमाद्रिजासवचनं कुर्व्वन् हरः पातु वः ॥")

हिमाद्रितनया, स्त्री, (हिमाद्रेस्तनया ।) दुर्गा । इति वक्ष्यमाणशब्ददर्शनात् ॥

हिमाद्रितनयापतिः, स्त्री, (हिमाद्रितनयाया दुर्गायाः पतिः) शिवः । इति कविकल्पलता ॥

हिमानी, स्त्री, (महद्हिममिति । "हिमारण्ययोर्महत्त्वे ।" ४ । १ । ४९ । इत्यस्य वार्त्तिकोक्त्या ङीप् आनुक् च ।) हिमसंहतिः । इत्यमरः । १ । ३ । १८ ॥ (यथा, राजतरङ्गिण्याम् । १ । १८० ।

"हिमान्यां योद्धाधाय पतन्त्यां प्रतिवत्सरम् ।
शीते [illegible] पालिया [illegible]"

यावनालशर्करा । इति राजनिर्घण्टः ।

हिमाम्बु, क्ली, (हिमे शैत्ये [illegible]) उत्पलम् । इति राजनिर्घण्टः ।

हिमारातिः, पुं, (हिमस्य अरातिः ।) वह्निः । इति मेदिनी । [illegible]

वृक्षः । इत्यमरे वह्निसंज्ञकार्कोव्रणशब्दयोर्दर्शनात् ॥

हिमालयः, पुं, (हिमस्य आलय इव शुक्लत्वात् ।) शुक्लखदिरः । इति शब्दचन्द्रिका ॥ (हिमानामालयः ।) स्वनामख्यातपर्व्वतः । तत्पर्य्यायः । नगपतिः २ मेनाधवः ३ उमागुरुः ४ । इति त्रिकाण्डशेषः ॥ हिमाद्रिः ५ नगाधिपः ६ । इति जटाधरः ॥ उदगद्रिः ७ अद्रिराट् ८ मेनकाप्राणेशः ९ हिमवान् १० हिमप्रस्थः ११ भवानीगुरुः १२ । इति हेमचन्द्रः ॥ (यथा, कुमारे । १ । १ ।

"अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः ।
पूर्व्वापरौ तोयनिधी वगाह्य
स्थितः पृथिव्या इव मानदण्डः ॥")

स तु लङ्काया उत्तरे वर्त्तते । भारतवर्षस्य सीमापर्व्वतोऽयम् । अस्य दैर्घ्यं दशसहस्रयोजनानि । पक्षे द्विसहस्रयोजनानि । यथा,—
"एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालयः इति प्रागायता यथा नीलादयः । अयुतयोजनोत्सेधा हरिवर्षकिंपुरुषभारतानां यथासंख्यम् ।" इति श्रीभागवते ५ स्कन्धे १६ अः ॥

हिमालयसुता, स्त्री, (हिमालयस्य सुता ।) उमा । इति कविकल्पलता ॥

हिमालया, स्त्री, (हिमस्य शीतस्य आलयो यत्र ।) भूम्यामली । इति राजनिर्घण्टः ॥

हिमावती, स्त्री स्वर्णक्षीरी । इत्यमरः । २ । ४ । १३८ ॥ (पर्य्यायो यथा,—
"कटुपर्णी हैमवती हेमक्षीरी हिमावती ।
हेमाह्वा पीतदुग्धा च तन्मूलञ्चोकमुच्यते ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

हिमाह्वः, पुं, (हिममपि आह्वयते स्पर्द्धते वर्णेनेति । ह्वे + क ।) कर्पूरः । इति केचित् ॥ (वर्षविशेषः । यथा, मार्कण्डेये । ५३ । ४० ।
"हिमाह्वं दक्षिणं वर्षं तस्य नाम्ना महात्मनः ॥")

हिमाह्वय, पुं, (हिममाह्वयते स्पर्द्धते वर्णेनेति । आ+ह्वे+घञ् । हिमस्य आह्वा आख्या यस्येति वा ।) कर्पूरः । इति त्रिकाण्डशेषः । (वर्षविशेषः । यथा, मार्कण्डेये । ५३ । ३६ ।
"यानि किं पुरुषाद्यानि वर्षाण्यष्टौ हिमाह्वयम् ।
तेषां स्वभावतः सिद्धिः सुखप्राया ह्ययत्नतः ॥")

हिमाह्वया, स्त्री । (हिमस्य शीतलस्य आह्वया यस्याः ।) स्वर्णक्षीरी । इति राजनिर्घण्टः ॥

हिमिका, स्त्री, हिमपरिपतितहिमम् । इति केचित् ॥

हिमेलुः, त्रि, (हिमं न सहते इति । [illegible]) [illegible] हिमालुः । इति केचित् ॥

[illegible]

हिमोत्पन्ना, स्त्री, (हिमे हिमप्रधाने उत्पन्ना ।) यावनाली । इति राजनिर्घण्टः ॥

हिमोद्भवा, स्त्री, (हिमे हैमन्ते उद्भवो यस्याः ।) शटी । इति राजनिर्घण्टः ॥

हिम्यः, त्रि, हिमभवः । हिमशब्दात् यत्प्रत्ययेन निष्पन्नः । इति सिद्धान्तकौमुदी । ५।२।१२० ॥

हिरङ्गुः, पुं, राहुः । इति केचित् ॥

हिरणं, क्ली, रेतः । स्वर्णम् । वराटकः । इति मेदिनी ॥

हिरण्मयं क्ली, (हिरण्यस्य विकारः । हिरण्य+मयट् । "दाण्डिनायनहास्तिनायनेति ।" ६।४।१७४ । इति निपातितः ।) भारतवर्षादिनववर्षान्तर्गतवर्षविशेषः । इति त्रिकाण्डशेषः ॥ तद्विवरणं यथा । उत्तरोत्तरेणेलावृतं नीलः श्वेतः शृङ्गवान् इति त्रयो रम्यकहिरण्मयकुरूणां वर्षाणां मर्य्यादागिरयः प्रागायता उभयतः क्षारोदावधयो द्विसहस्रयोजनपृथव एकैकशः पूर्व्वस्मात् पूर्व्वस्मादुत्तरोत्तरो दशांशाधिकांशेन दैर्घ्य एव ह्रसन्ति । इति श्रीभागवते ५ स्कन्धे १६ अध्यायः ॥

हिरण्मयः, पुं, (हिरण्य+मयट् ।) ब्रह्मा । सुवर्णमये, त्रि । इति मेदिनी ॥ (यथा, भट्टिः । २ । ४७ ।

"हिरण्मयी शालनतेव जङ्गमा
च्युता दिवः स्थास्नुरिवाचिरप्रभा ॥")

हिरण्यं, क्ली, (हर्य्यति दीप्यते इति । हर्य्य गतिकान्त्योः+"हर्य्यतेः कन्यन् हिर च ।" उणा० ५ । ४४ । इति कन्यन् । हिरादेशश्च धातोः ।) सुवर्णम् । (यथा, मनुः । २ । २४६ ।
"क्षेत्रं हिरण्यं गामश्वं छत्रोपानहमासनम् ।
धान्यं शाकञ्च वासांसि गुरवे प्रीतिमावहेत् ॥")
तद्वैदिकपर्य्यायाः । हेम १ चन्द्रम् २ रुक्मम् ३ अयः ४ हिरण्यम् ५ पेशः ६ कृशनम् ७ लोहम् ८ कनकम् ९ काञ्चनम् १० भर्म्म ११ अमृतम् १२ मरुत् १३ दत्रम् १४ जातरूपम् १५ । इति पञ्चदश हिरण्यनामानि । इति वेदनिघण्टौ १ अध्यायः ॥ [illegible] इत्यमरः । २ । ८ । ९४ । रेतः । द्रव्यम् । वराटः । अक्षयम् । मानभेदः । धुस्तूरम् । इति मेदिनी ॥ कनकम् । धनम् । इति [illegible] ॥ (पुं, [illegible] यथा,—
"[illegible]"
[illegible]

मद्गर्भयोषितौ तौ तु पुनर्जातौ महाबलौ ।
पुनस्त्वस्य कुले देव ! रावणेन्द्रावरौ च तौ ॥
तयोस्तु पादविन्यासमसहन्ता जनार्दन ! ।
तवाग्निकमनुमाना हृताख्य कुम्भकर्णयोः ॥"
इति वह्निपुराणे वंशवर्णनवरप्रदाननामाध्यायः ॥
तदुत्पत्त्यादि यथा,—
"दित्याः पुत्रद्वयं जज्ञे कश्यपादिति नः श्रुतम् ।
हिरण्याक्षश्च दुर्द्धर्षो हिरण्यकशिपुस्तथा ॥
कश्यपस्याश्वमेधोऽप्यासीत् पुण्ये वै पुष्करे पुरा ।
ऋषिभिर्देवताभिश्च गन्धर्व्वैरुपशोभितः ॥
आसनान्युपक्लृप्तानि काञ्चनानि तु पञ्च वै ।
कुशपोतास्त्रयस्ते वै उपविष्टा यथाक्रमात् ॥
होतुस्तत्रासनं यत्तु ह्यविस्तृतं शुभव्रतः ।
पत्न्याश्रमे दितिश्चैव पत्नी च समुपागता ॥
दशवर्षसहस्राणि गर्भस्तस्यामवर्त्तत ।
स तु गर्भो विनिःसृत्य मातुर्वै उदरात्तदा ॥
निषसादासने गर्भः कश्यपस्यापि सन्निधौ ।
तं दृष्ट्वा मुनयस्तस्य नामाकुर्व्वंस्त तत्क्षणम् ।
हिरण्यकशिपुस्तस्मात् कर्म्मणानेन स स्मृतः ।
हिरण्याक्षोऽनुजस्तस्य सिंहिका च तथानुजा ।
राहोः सा जननी देवी विप्रचित्तेः परिग्रहः ।
हिरण्यकशिपुर्दैत्यश्चकार परमं तपः ।
शतं वर्षसहस्राणि निराहारो ह्यधःशिराः ॥
तं ब्रह्मा छन्दयामास दैत्यं तुष्टो वरेण तु ।
…र्व्वामरत्वं वव्रे स ब्रह्मणो न दिवा निशि ।
… सर्व्वं विनिर्जित्य सर्व्वदेवसमास्थितः ।
…विमादिगुणैश्वर्य्यमिव मे दीयतां वरः ॥
…युक्तो ब्रह्मा तु तस्मै दत्त्वा यथेप्सितम् ।
…ा चास्य सभा दिव्या तथैवान्तरधीयत ॥
…शिपुर्दैत्यः प्रोक्तोऽग्निः पुरातनः ॥
… हिरण्यकशिपुर्दैत्यो यां यां निषेवते ।
… तस्यां नायकदेवता ऋषिभिः सह ॥
…भागो देवोऽभूत् हिरण्यकशिपुः पुरा ॥
…विद्य सर्व्वेषु वायुरिन्द्रो बलं धनम् ।
… चकार राज्य स सम्यक् अनुदैत्य ॥
…ीत् नरसिंहस्तु यत्विन्द्र पुरा किल ।
… विनिर्भिन्नो नाहंकर्त्ता महाः
स्मृताः ॥
…सुताः पञ्च विक्रान्ताः सुमहाबलाः ।
…दितेः पुत्रास्ततः सुमहाबलाः ॥
…अनेनामनुह्रादस्तथैव च ।
… ह्रादश्च ह्रादपुत्राः समुत्पन्नाः ।"
…पुराणे कश्यपवंशवर्णनं नामाध्यायः ॥
…पुः, [स्] पु, (हिरण्यकशिपु इत-
…पु+शिव ।) विष्णुः । इति हेम-
…ग. स्त्री, (हिरण्यनिर्म्मिता काम-
… षोडशमहादानान्तर्गतमहादान-
…था —
…मत्स्य उवाच ।
…क्ष्यामि कामधेनुविधिं परम् ।
… सर्व्वपापहरं शुभम् ॥

लोकेशावाहनं तद्वद्धोमकार्य्याधिवासनम् ।
तुलापुरुषवत् कार्य्यं कुण्डमण्डपवेदिकम् ॥
स्वल्पेष्वेकाग्निवत् कुर्य्याद्गुरुरेकः समाहितः ।
काञ्चनस्यातिशुद्धस्य धेनुं वत्सञ्च कारयेत् ॥
उत्तमा पलसाहस्रा तदर्द्धेन तु मध्यमा ।
कनीयसी तदर्द्धेन कामधेनुः प्रकीर्त्तिता ।
शक्तितस्त्रिपलादूर्द्ध्वमशक्तोऽपीह कारयेत् ॥
वेद्यां कृष्णाजिनं न्यस्य गुडप्रस्थसमन्वितम् ।
न्यसेदुपरि तां धेनुं महारत्नैरलङ्कृताम् ॥
कुम्भाष्टकसमोपेतां नानाफलसमन्विताम् ।
तथाष्टादशधान्यानि समन्तात् परिकल्पयेत् ॥
इक्षुदण्डाष्टकं तद्वत् नानाफलविभूषितम् ।
भाजनञ्चासनं तद्वत्ताम्रदोहनकं तथा ॥
कौषेयवस्त्रद्वयसंयुतां
दीपातपत्राभरणाभिरामाम् ।
सचामरां कुण्डलिनीं सघण्टां
मणिविकां चन्द्रकरौप्यपादाम् ॥
रसैश्च सर्व्वैः परितोऽभिजुष्टां
हरिद्रया पुष्पफलैरनेकैः ।
अजाजिकुस्तुम्बुरुशर्कराभि-
र्वितानकञ्चोपरि पञ्चवर्णम् ॥
स्नानं ततो मङ्गलवेदघोषैः
प्रदक्षिणीकृत्य स पुष्पहस्तः ।
आवाहयेत् तां गुडधेनुमन्त्रै-
र्द्विजाय दद्यादथ दर्भपाणिः ॥
त्वं सर्व्वदेवगणमन्दिरमङ्गभूता
विश्वेश्वरि त्रिपथगोदधिपर्व्वतानाम् ।
त्वद्दानशस्त्रशकलीकृतपातकौघः
प्राप्तोऽस्मि निर्वृतिमतीव परां नमामि ॥
लोके यथेप्सितफलार्थविधायिनीं त्वा-
मासाद्य को हि भवदुःखमुपैति मर्त्त्यः ।
संसारदुःखशमनाय यतस्व कामं
त्वां कामधेनुमिति वेदविदो वदन्ति ॥
आमन्त्र्य शीलकुलरूपगुणान्विताय
विप्राय यः कनकधेनुमिमां प्रदद्यात् ।
प्राप्नोति धाम स पुरन्दरदेवजुष्टं
कन्यागणैः परिवृतं पदमिन्दुमौलेः ॥"
इति मात्स्ये हिरण्यकामधेनुप्रदानिको नाम
२११ अध्यायः ॥
हिरण्यकोषः, पुं, (हिरण्यस्य कोष इव ।) कृता-कृतस्वर्णरूप्यम् । इति हेमचन्द्रः ॥
हिरण्यगर्भः, (हिरण्यं हेममयाण्डं गर्भं उत्पत्तिस्थानमस्य ।) ब्रह्मा । इत्यमरः । १।१।१६ ॥ हिरण्यं गर्भं उत्पत्तिस्थानमस्य हिरण्यस्य गर्भो भ्रूण इति वा हिरण्यगर्भः । यतस्त्वण्डं हिरण्यवर्णमभवत् । तथा च स्मृतिः ।
"हिरण्यवर्णमभवत्तदण्डमुदकेशयम् ।
तत्र जज्ञे स्वयं ब्रह्मा स्वयम्भूरिति विश्रुतः ॥"
इति ।
तस्मादागात् हिरण्यवर्णमण्डं हिरण्यम् । इति भरतः ॥ अपि च ।
"हिरण्यगर्भोऽङ्गभुवा तेन दृष्टिगोचरा दृशौ ।"

इति देवीपुराणे देवीनिबन्धे …
षोडशमहादानान्तर्गतद्वितीय…
मत्स्य उवाच ।
"अथातः संप्रवक्ष्यामि महादान…
नाम्ना हिरण्यगर्भाख्यं महापात…
पुण्यां तिथिं समासाद्य तुलापुरु…
ऋत्विङ्मण्डपसम्भारभूषणाच्छाद…
कुर्य्यादुपोषितस्तद्वल्लोकेशावाहनं …
पुण्याहवाचनं कृत्वा तद्वत् कृत्वाधि…
ब्राह्मणैरानयेत् कुम्भं तपनीयमयं …
द्वासप्ततिसमुच्छ्रायं हेमपङ्कजगर्भ…
त्रिभागहीनं विस्तारमाज्यक्षीराभि…
दशास्त्राणि सरत्नानि दाम सूची त…
हेमनालं सपिटकं बहिरादित्यसंयुत…
तथैवावरणं नाभिरुपवीतञ्च काञ्चनम् …
पार्श्वतः स्थापयेत्तद्वद्धेमदण्डं कमण्डलु…
पद्माकारं पिधानं स्यात् समन्तादङ्गुल…
मुक्तावलीसमोपेतं पद्मरागदलान्वितम् …
तिलद्रोणोपरिगतं वेदमध्ये ततोऽर्च्चयेत् …
ततो मङ्गलशब्देन ब्रह्मघोषरवेण च ॥
सर्व्वौषध्युदकैः स्नानं स्नापितो वेदपुङ्गवैः ।
शुक्लमाल्याम्बरधरः सर्व्वाभरणभूषितः ।
इममुच्चारयेन्मन्त्रं गृहीतकुसुमाञ्जलिः ॥
नमो हिरण्यगर्भाय हिरण्यकवचाय च ।
सप्तलोकसुराध्यक्ष जगद्धात्रे नमो नमः ।
भूर्लोकप्रमुखा लोकास्तव गर्भे व्यवस्थिताः ।
ब्रह्मादयस्तथा देवा नमस्ते विश्वधारिणे ॥
नमस्ते भुवनाधार ! नमस्ते भुवनाश्रय ! ।
नमो हिरण्यगर्भाय गर्भो यस्य पितामहः ॥
यतस्त्वमेव भूतात्मा भूते भूते व्यवस्थितः ।
तस्मान्मामुद्धराशेषदुःखसंसारसागरात् ॥
एवमामन्त्र्य तन्मध्यमाविश्याथ उदङ्मुखः ।
मुष्टिभ्यां परिसंगृह्य धर्म्मराजचतुर्मुखौ ।
जानुमध्ये शिरः कृत्वा तिष्ठेत श्वासपञ्चकम् ॥
गर्भाधानं पुंसवनं सीमन्तोन्नयनं तथा ।
कुर्य्युर्हिरण्यगर्भस्य ततस्ते द्विजपुङ्गवाः ॥
गीतमङ्गलघोषेण गुरुरुत्थापयेत्ततः ।
जातकर्म्मादिकाः कुर्य्यात् क्रियाः षोडश चापराः
सूच्यादिकञ्च गुरवे दत्त्वा मन्त्रमिमं जपेत् ॥
नमो हिरण्यगर्भाय विश्वगर्भाय वै नमः ।
चराचरस्य जगतो गृहभूताय वै नमः ॥
मातार्हं जनितः पूर्व्वं मर्त्त्यधर्म्मा सुरोत्तम ।
त्वद्गर्भसम्भवादेष दिव्यदेहो भवाम्यहम् ॥
चतुर्भिः कलशैर्भूयस्ततस्ते द्विजपुङ्गवाः ।
स्नानं कुर्य्युः प्रसन्नाङ्गाः सर्व्वाभरणभूषिताः ॥
देहस्थितेति मन्त्रेण स्थितस्य कनकासने ।
चत्र भानस्य मेऽद्यापि पवित्रैरर्च्चनं भवेत् ॥
द्विजेनानेन वपुषा स्थितं लोके सुखी भव ।
ततो हिरण्यगर्भन्तु तेभ्यो दद्याद्विचक्षणः ।
ते पूज्याः सर्व्वभावेन बहवो वा तदाज्ञया ।
सर्व्वोपस्करणं सर्व्वं गुरवे विनिवेदयेत् ।

पादुकोपानहं छत्रं चामरासनभोजनम् ।
ग्रामं वा विषयं वापि यदन्यद्दयितं भवेत् ॥
एतेन विधिना यस्तु पुण्येऽह्नि विनिवेदयेत् ।
हिरण्यगर्भदानं स ब्रह्मलोके महीयते ॥
पुरेषु लोकपालानां प्रतिमन्वन्तरं वसेत् ।
कल्पकोटिशतं यावत् ब्रह्मलोके महीयते ॥
कलिकलुषविमुक्तः सेवितः सिद्धसंघै-
रमरचमरमालावीज्यमानोऽप्सरोभिः ।
पितृशतमथ बन्धून् पुत्रपौत्रप्रपौत्रा-
नपि नरकनिमग्नांस्तारयेदेक एव ॥
इति पठति य इत्थं यः शृणोतीह सम्यक्
मधुमुररिपुलोके पूज्यते सोऽपि सिद्धैः ।
मतिमपि च जनानां यो ददाति प्रियार्थं
विबुधपतिजनानां नायकः स्यादमोघम् ॥”
इति मात्स्ये २७५ अध्यायः ॥८॥

विष्णुः । इति तस्य सहस्रनामस्तोत्रम् ॥ सूक्ष्मशरीरसमष्ट्युपहितचैतन्यम् । तत्पर्य्यायः । प्राणात्मा २ सूत्रात्मा ३ । इति वेदान्तसारः ॥

हिरण्यदः, पुं, (हिरण्यं ददातीति । दा + कः ।) समुद्रः । इति केचित् । हिरण्यदातरि, त्रि ॥ (यथा, मनुः । ४ । २३० ।
“भूमिदो भूमिमाप्नोति दीर्घमायुर्हिरण्यदः ।
गृहदोऽग्र्याणि वेश्मानि रूप्यदो रूपमुत्तमम् ॥)

हिरण्यदा, स्त्री, (हिरण्यं ददातीति । दा + कः । टाप् ।) पृथिवी । इति केचित् ॥

हिरण्यनाभः, पुं, (हिरण्यं नाभौ यस्य ।) मैनाकपर्व्वतः । इति हेमचन्द्रः ॥ (मुनिविशेषः । यथा, भागवते । ९ । १५ । १५ ।
“हिरण्यनाभः कौशल्यः सुतदेव श्रुतध्वजः ।
[illegible] सिद्धायदस्ति ज्ञानहेतवः ।”)

हिरण्यबाहुः, पुं, (हिरण्यवत् बाहुर्यस्य ।) शोणनदः । इत्यमरः । १ । १० । ३४ ॥ शिवः । इति केचित् ॥ (यथा, महाभारते । १४ । ८ । १८ ।
“हिरण्यबाहवे राजनुग्राय पतये दिशाम् ॥”)

हिरण्यरेताः, [स्] पुं, (हिरण्यं रेतो यस्य ।) वह्निः । (यथा, महाभारते । १ । ५५ । १० ।
“[illegible]
हिरण्यरेता हुतभुग् हव्यवर्त्ता ।”)
चित्रभानुः । इत्यमरः । १ । १ । ५८ ॥ सूर्य्यः । इति मेदिनी ॥ शिवः । इति शब्दरत्नावली ॥ ([illegible]
[illegible] यथा,—
“[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

पश्चिमभावं जग्राह तेज ऐशं महापगा ।
ततस्त्वधारयद्देवो शार्व्वं तेजः स्वपूपुषत् ।
हुताशनोऽपि च भयाद्यत्र तत्र परिभ्रमन् ॥
पञ्चवर्षसहस्राणि श्लाघ्यास्ते हव्यभुक् ततः ।
मांसमस्थीनि रक्तानि मेदोमज्जत्वचस्तथा ॥
रोमाणि चाक्षिकेशाद्याः सर्व्वे जाता हिरण्मयाः ।
हिरण्यरेता लोकेऽस्मिन् विख्यातः पावकस्तदा ॥”
इति वामने ५४ अध्यायः ॥

हिरण्यवः, पुं, (हिरण्यानि सन्त्यत्रेति । हिरण्य + “वप्रकरणेऽन्येभ्योऽपि दृश्यते इति वक्तव्यम् ।” ५ । २ । १०९ । इत्यस्य वार्त्तिकोक्त्या वः ।) दैवधनम् । देवस्वम् । इति केचित् ॥

हिरण्यवर्णा, स्त्री, (हिरण्यवत् वर्णो यस्याः ।) नदी । इति हेमचन्द्रः ॥

हिरण्यवाहः, पुं, (हिरण्यं वहतीति । वह + अण् ।) शोणनदः । इति शब्दरत्नावली भरतश्च ॥

हिरण्याक्षः, पुं, (हिरण्यवत् पीते अक्षिणी यस्य । षच् समासे ।) आद्यदैत्यविशेषः । स च दितिगर्भे कश्यपाज्जातः वराहरूपिविष्णुना हतः । यथा,—
“दितिस्तु भर्त्तुरादेशादपत्यपरिशङ्किनी ।
पूर्णे वर्षशते साध्वी पुत्रौ प्रसुषुवे यमौ ॥
प्रजापतिर्नाम तयोरकार्षीत्
यः प्राक् स्वदेहात् यमयोरजायत ।
तं वै हिरण्यकशिपुं विदुः प्रजा
यं तं हिरण्याक्षमसूत साग्रतः ॥”
इति श्रीभागवते ७ स्कन्धे १० । २ ; १८ ।
“हतो हिरण्यकशिपुर्हरिणा सिंहरूपिणा ।
हिरण्याक्षो धरोद्धारे बिभ्रता शौकरं वपुः ॥”
इति तत्रैव ७ स्कन्धे १ अध्याये ४० श्लोकः ॥
अपिच ।
“तेजस्वी नाम वै शक्रो हिरण्याक्षो रिपुः स्मृतः ।
हतो वराहरूपेण हिरण्याक्षोऽथ विष्णुना ।”
इति गारुडे । ८७ । ३० ।
(पीठस्थानविशेषः । यथा, देवीभागवते । ७ । ३० । ६४ ।
“उत्पलाक्षी सहस्राक्षे हिरण्याक्षे महोत्पला ।”)

हिरण्याश्वः, पुं, (हिरण्मयः अश्वः यत्र ।) तुलापुरुषादिषोडशमहादानान्तर्गतमहादानविशेषः । यथा,—
[illegible]
“[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

स्थापयेद्वेदिमध्ये तु कृष्णाजिनतिलोपरि ।
कौशेयवस्त्रसंवीतं कारयेद्धेमवाजिनम् ॥
शक्तितस्त्रिपलादूर्द्ध्वमासहस्रपलाद्बुधः ।
पादुकोपानहच्छत्रचामरासनभाजनैः ॥
पूर्णकुम्भाष्टकोपेतं माल्येक्षुफलसंयुतम् ।
शय्यां सोपस्करां तद्वद्धेममार्त्तण्डसंयुताम् ॥
ततः सर्व्वौषधीस्नातः स्नापितो वेदपुङ्गवैः ।
इममुच्चारयेन्मन्त्रं गृहीतकुसुमाञ्जलिः ॥
नमस्ते सर्व्वदेवेश ! वेदाहरणलम्पट ! ।
वाजिरूपेण मामस्मात् पाहि संसारसागरात् ॥
त्वमेव सप्तधा भूत्वा छायारूपेण भास्करम् ।
यस्माद्भ्रमयसे लोकानतः पाहि सनातन ! ॥
एवमुच्चार्य्य गुरवे तमश्वं विनिवेदयेत् ।
दत्त्वा पापक्षयाप्नोति लोकमभ्येति शाश्वतम् ॥
गोभिर्विभवतः सर्व्वानृत्विजश्चापि पूजयेत् ।
सर्व्वधान्योपकरणं गुरवे विनिवेदयेत् ॥
सर्व्वशय्यादिकं दत्त्वा भुञ्जीतातैलमेव हि ।
पुराणश्रवणं तद्वत् कारयेद्भोजनादनु ॥
इमं हिरण्याश्वविधिं करोति यः
पुण्यं समासाद्य दिनं नरेन्द्र ! ।
विमुक्तपापः स पुरं मुरारेः
प्राप्नोति सिद्धैरभिपूजितः सन् ॥
इति पठति य इत्थं हेमवाजिप्रदानं
सकलकलुषमुक्तः सोऽग्रपूजितः ...
कनकमयविमानेनार्कलोकं प्रयाति
विदशपतिवधूभिः पूज्यते योऽथ पश्चात् ॥
यो वा शृणोति पुरुषोऽल्पधनः स्मरेद्वा
हेमाश्वदानमभिनन्दयतीह लोके ।
सोऽपि प्रयाति [illegible]
स्थानं पुरन्दरमहेश्वरलोकजुष्टम् ॥”
इति मात्स्ये हिरण्याश्वप्रदाननामा २८० अध्यायः ॥

हिरण्याश्वरथः, पुं, (हिरण्मयाः अश्वाः रथश्च यत्र ।) षोडशमहादानान्तर्गतमहादानविशेषः । यथा, मात्स्ये ।
“[illegible]
हिरण्यगर्भदानस्य ब्रह्माण्डस्य [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
इति [illegible]
[illegible] —
[illegible]
“[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

हन्याग्निर्नेतिमान् लत्वा काञ्चनं कारयेद्द्वयम् ।
मनाग्रं चतुरस्रं वा चतुष्कं सकूबरम् ।
टिन्नमोहेन कुम्भेन ध्वजदंपेन संयुतम् ।
मौक्तमालाटकोदितं पद्मरागदलान्वितम् ॥
चतुरः पूर्वक्रमात् धान्याष्टादशैव तु ।
कौवेदपद्मयुक्तमुपरिष्टादिनामकम् ॥
माल्येयुक्तसंयुक्तं पुष्पेन समन्वितम् ।
दो दद्म: पुनः कुर्यात् स तथाधिवासनम् ॥
इन्द्रचामरकोपदसोपानहशादुकाः ।
गोभिर्विभवतः साई दद्याद् शयनादिकम् ॥
चभावात् विदमाद्र्धं शक्तितः कारयेच्छुभम् ।
चनाटकेन संयुक्तं चतुर्भिरथ वाजिभिः ।
पात्रादय युतं दद्यादिमं मन्त्रमुदीरयेत् ॥
न्मो नमः पापविनाशनाय
विशालनेत्रे वेदपुरुषाय ।
धान्यामयोगाय महाभुजाय
दधीचदासाय देहि शर्म्मिम् ॥

[illegible]

चपि च ।
"हिन्नमोचो सरा तिक्ता कुठघ्नो कफवातजित् ।"
श्लेष्मपित्तजित् इति वा पाठः । इति राज-
वल्लभः ॥

हिन्नमोची, स्त्री, (हिन्नमोचि+कृदिकारादिति
ङीष् ।) हिन्नमोचिका । इति शब्दरत्नावली ॥
(तथाऽस्या गुणाः ।
"हिन्नमोची सरा तिक्ता कुठघ्नो कफपित्तजित् ॥"
इति वैद्यकराजवल्लभे चतुर्थपरिच्छेदे ॥)

हिम्रः, पुं, मरारिपक्षी । इति शब्दचन्द्रिका ॥

हिम्मोल, तृ क दोलने । इति कविकल्पद्रुमः ॥
(चदन्तचुरा०-पर०-सक०-सेट् ।) चन्त:स्थ-
वतीयद्वयमध्यस्तदेश्योपधोऽयम् । चजिहि-
म्मोलदायुर्नतनाम् । इति दुर्गादासः ॥

हिम्मोल, पुं, (हिम्मोलयति दोलयतीति । हिम्मोलत्
क दोलने + चच् ।) तरङ्गः । ढेउ इति भाषा ।
यथा,—
"प्राच्यं मोरमकाउतानानगतं प्राच्यः प्रचण्डा-
तपः
कोणः प्राच्यतरः सुपद्मनिचयः प्राच्योऽति-
दाहामनः ।
यम्नालाकुलकुम्भवाहुनतिशाहिम्मोललोला-
सुर्ग
नय कुम्भर । तथा न हि सुमं दु:खेर्व्विना
लभ्यते ॥"
इति कालिदासकृतश्रृङ्गारतिलके ॥ ० ॥
रतिबन्धविशेष । स च षोडशबन्धान्तर्गताष्टम-
बन्ध: । तस्य लक्षण यथा,—
"हृदि कान्ताप्रिया पादौ कराभ्यां धारयेत्करौ ।
दद्यात्‌ ताडयेद्यानि बन्धो हिम्मोलसंज्ञकः ॥"
इति रतिमञ्जरी ॥

हिन्नया, स्त्री, मृगशिरोनक्षत्रशिरोदेशस्था पञ्च
तारका । यथा,—
"मृगशीर्षशिरोदेशे तारका या वसन्ति हि ।
हिन्नया इल्वकाख्याः । मृगहिन्नया इति
कुत्रचित् ।"
इति शब्दरत्नावली ।

हिम, ह प्रीणने । इति कविकल्पद्रुमः ॥ (भ्वा०-
पर०-सक०-सेट् ।) ह, हिम्मति । प्रीतिरिह
सन्तिरणम् । हिम्मति मोकः पितरम् । इति
दुर्गादासः ॥

हिमु, क्ली, [illegible]
चपि च ।
[illegible]
इति ज्योतिस्तत्त्वम् ॥

हिम ह च हि हिमि । इति कविकल्पद्रुमः ॥
[illegible]

हिडि, च्य, पाञ्चा[illegible]
केचित् ॥ दीर्घान्त[illegible]
ही, च्य, विस्मयः । [illegible]
हेतुः । विषादः । [illegible]
शब्दरत्नावली ॥ [illegible]
कायाम् । २१ ।
"ही नाहं भवतोऽतिच[illegible]
का ते सुन्दरि । हीनता[illegible]

हीनः, त्रि, (चो हा क लि[illegible]
तच ।" ८ । २ । ४५ । [illegible]
त्यागापाजहातीति ।" [illegible]
ईत्वम् ।) ऊनः । (यथा[illegible]
"तया हीनं विधातर्मां कथं[illegible]
मिलं स्वयमिव चेदाद् मध्यम[illegible]
गर्ह्यः । इत्यमरः । ३ । १ । [illegible]
इति जटाधरः ॥ (यथा, मनौ[illegible]
"चाधमाधमयो मध्यामनुगच्छा[illegible]
उत्तमेषुत्तमं कुर्यात् हीनं हीनं[illegible]
मतिवादिविशेषः । स च पञ्चवि[illegible]
नारदः ।
"चन्यवादी क्रियाद्वेषी नोपस्थायी[illegible]
चाहूतमपलायी च हीनः पञ्चविधः[illegible]
इति व्यवहा[illegible]

हीनजातिः, त्रि, (हीना जातिर्यस्य[illegible]
वर्ण । इति केचित् ॥ (यथा, मनु. । [illegible]
"हीनजातिस्त्रियं मोहादुद्वहन्तो द्विज[illegible]
कुलान्येव नयन्त्याशु ससन्तानानि शूद्रता[illegible]

हीनवर्णः, त्रि, (हीनो वर्णो यस्य ।) [illegible]
जाति यथा,—
"हीनवर्णोपभुक्ता या त्याज्या वध्यापि वा[illegible]
इति प्रायश्चित्त[illegible]

हीनवादी, [न्] त्रि, (हीनं वदतीति । [illegible]
णिनि ।) वाक्यवर्जितः । बोवा इति भाषा[illegible]
तत्पर्यायः । चपरः ॥ । इति हेमचन्द्रः ॥ [illegible]
कार्यवादी । यथा, नारदः ।
"पूर्ववाद परित्यज्य योऽन्यमालम्बते पुनः ।
वादसंक्रमणाज्ज्ञेयो हीनवादी स वै नरः ॥"
इति ।
हीनवादी दण्ड्यो भवति न प्रकृतार्थदर्शनैः[illegible]
इति च मिताक्षरा ॥

[illegible]

...हः पुरा प्राह यैर्दानैर्विहितम् ।
...यथा पर्वताशोऽस्मभाषत ॥"
इति कालिकापुराणे ४४ अध्यायः ॥
...री, स्त्री, (... ...लात् ...)
...ङीष् ।) ...पिपीलिका । इति हेम-
चन्द्रः ॥
...क, पुं, हिन्तालवृक्षः । इत्यमरटीका ॥
...रं, क्ली, (हरति सार्द्दमिति । हृ+अच् ।
...रादित्वात् साधुः । यद्वा, ही विस्मयं
...तीति । रा+कः ।) वज्रम् । इति राज-
...ण्टः ॥ (यथा, रसेन्द्रसारसंग्रहे ।
"हीरं सुवर्णं सुरतञ्च तार-
...षां समं तीक्ष्णरजस्तुलाम् ॥")
...र, पुं, (हरति सर्व्वं प्रलये इति । हृ+
...क् । पृषोदरादित्वात् ईत्वम् ।) शिवः ।
...म् । इति मेदिनी ॥ सर्पः । इति हेम-
...न्द्रः ॥ हारः । इति जटाधरः ॥ सिंहः ।
...ति केचित् ॥ श्रीहर्षपिता । यथा,—
...श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
...हीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च
यम् ।
...चिन्तामणिमन्त्रचिन्तनफले शृङ्गारभङ्ग्या महा-
...व्ये चारुणि नैषधीयचरिते सर्गो निसर्गो-
ज्ज्वलः ॥"
इति नैषधे २ सर्गः ॥
...कः, पुं, (हीर एव । स्वार्थे कन् ।) रत्न-
...शेषः । अयं सितवर्णः वज्रसूत्रः गुरु-
...नाश्च । तत्पर्य्यायः । वज्रः २ हीरः ३
...र्द्दि ४ वज्रकम् ५ । इति शब्दरत्नावली ॥
...मुखम् ६ वराटकम् ७ रत्नमुख्यम् ८
...र्य्यायनाम ९ । विराटदेशजहीरकपर्य्यायः ॥
...टजः १० राजपट्टः ११ राजावर्त्तः १२ ।
...ति हेमचन्द्रः ॥ अस्य गुणाः । मारकत्वम् ।
...त्वम् । कषायत्वम् । स्वादुत्वम् । कान्ति-
...रित्वम् । चक्षुर्हितकारित्वम् । धारणे पापा-
...नाशित्वञ्च । इति राजवल्लभः ॥ अन्यत्
...शब्दे द्रष्टव्यम् ॥ (यथास्य पर्य्यायादि ।
...रकः पुंसि वज्रोऽस्त्री चन्द्रो मणिवरश्च सः ।
...श्वेतः स्मृतो विप्रो लोहितः क्षत्रियः
स्मृतः ॥
...वैश्योऽसितः शूद्रश्चतुर्व्वर्णात्मकश्च सः ॥"
...ति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
...स्त्री, लक्ष्मीः । तैलाम्बुकः इति मेदिनी ॥
...लिका । इति हेमचन्द्रः ॥ काश्मरी ।
...राजनिर्घण्टः ॥ (पर्य्यायो यथा,—
...री भद्रपर्णी च श्रीपर्णी मधुपर्णिका ।
...री काश्मरी हीरा कम्भर्य्यः पीत-
रोहिणी ।
...हन्त्री मधुरसा महाकुसुमिकापि च ॥"
...भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
..., पुं, (हीरस्येव कठिनं अङ्गं यस्य ।)
...वज्रम् । इति शब्दमाला ॥

हीलं, क्ली, (ही विस्मयं लातीति । ला+कः ।)
रेतः । इति केचित् ॥
हीलुकं, क्ली, गोर्हीमवम् । इति शब्दचन्द्रिका ॥
हीही, अव्य, विस्मयः । हास्यम् । इति मेदिनी ॥
हु, लि होमे । अदने । इति कविकल्पद्रुमः ॥
(जु०-पर०-सक०-अनिट् ।) होमो देवता-
सम्प्रदानकयज्ञाधिकरणकद्रव्यत्यागः । लि,
जुहोति हृतमग्नौ स्वाहाय होता । प्रक्षेपे-
ऽप्ययम् ।
"चिराय सन्तर्प्य समिद्भिरग्निं
यो मन्त्रपूतां तनुमप्यहौषीत् ।"
इति रघुः ।
"जटाधरः सन् जुहुधीह पावकम् ।"
इति किराते प्रीणनार्थोऽपि । इति दुर्गादासः ॥
हुंकृतं क्ली, (हुं इत्यव्यक्तशब्दस्य कृतं करणम् ।)
हुङ्कारः । इति धरणिः ॥ (यथा, भागवते ।
४ । १४ । ३४ ।
निजघ्नुर्हुङ्कृतैर्वेणं हतमच्युतनिन्दया ॥")
वन्यवराहशब्दः । इति केचित् ॥ हुं इति मन्त्रो-
च्चरिते, त्रि ॥ (हुं इत्यनेन तिरस्कृतः । यथा,
महाभारते । १२ । ११८ । १ ।
"स श्वा प्रकृतिमापन्नः परं दैन्यमुपागतः ।
ऋषिणा हुंकृतः पापस्तपोवनबहिष्कृतः ॥"
हुङ्कृतमस्यास्तीति । अच् । हुङ्कारविशिष्टः ।
यथा वृहत्संहितायां । ४८ । ११ ।
"अचिरप्रसूतहुङ्कृतवल्गितवत्सोत्सवे गोष्ठे ॥")
हुड, ङ ङ संहे । इति कविकल्पद्रुमः ॥ (भ्वा०-
आत्म०-सक०-सेट् ।) इ, हुण्ड्यते । ङ, हुण्डते
धनं लोकः । राशीकरोतीत्यर्थः । इति दुर्गा-
दासः ॥
हुड, ऋ ङ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-
आत्म०-सक०-सेट् ।) ऋ, अजुहोड़त् । ङ,
होड़ते । इति दुर्गादासः ॥
हुड,शि मग्ने । संहे । इति कविकल्पद्रुमः ॥ (तुदा०-
पर०-मग्ने अक०-संहे सक०-सेट् ।) शि,
हुड़ति अहुड़ीत् जुहोड़ । मग्नमिह मज्जनम् ।
इति दुर्गादासः ॥
हुड़ः, पुं, (हुड़तीति । हुड़+कः ।) मेषः । इति
हेमचन्द्रः राजनिर्घण्टश्च ॥ चौरादिनिवार-
णार्थभूमिनिहितलौहमयतीक्ष्णशङ्कुविशेषः ॥
तस्य नामान्तरं गुड़ः । पाँजिकाटा इति
भाषा । लगुड़ः । इति महाभारतम् ॥ सैन्या-
श्रयस्थानम् । बुरुज् इति भाषा । रथोपरि
विरूवत्याशस्त्रम् । यथा,—
"पुरी समन्ताद्विहिता सपताका सतोरणा ।
सचक्रा सहुड़ा चैव सयन्त्रखनका तथा ।"
इति महाभारते वनपर्व्वणि सौभवधे १५
अध्यायः ॥ पताका ध्वजाञ्चलः । तोरणानि
वहिर्द्वाराणि । चक्राणि शोधनानि । हुड़ा-
स्तदाश्रयस्थानानि ... ...कसंज्ञानि ।
अन्ये तु विर ... ...णि हुड़ा
...

"कल्पान्ते हुड्गन्त्राणि रथ्योपरि सूरिभिः ।
विरूवत्यशस्त्रकार्यकारादिरूपं उच्यते ॥"
इति ॥
यन्त्राणि आग्नेयौषधबलेन दृषत्पिण्डोत्क्षेपणानि ।
महान्ति कामानसंज्ञानि क्षुद्राणि सीसगुलि-
कोत्क्षेपणानि बन्दुकसंज्ञानि । खनकाः सुरङ्ग-
द्वारा गुप्तमार्गकर्त्तारः । इति तट्टीकायां नील-
कण्ठः ॥
हुडुकः, पुं, (हुडुक् इति शब्देन कायति शब्दा-
यते इति । कै+कः ।) वाद्यभेदः । दात्यूह-
पक्षी । मदमत्तः । इति मेदिनी ॥ ढक्कः ।
हुड़का इति भाषा । इति शब्दरत्नावली ॥
तत्र हुड्डुक इति च पाठः ॥
हुड़त्, क्ली, वृषशब्दः । इति काशीखण्डमिति
केचित् ॥
हुडुम्बः पुं, भ्रष्टचिपिटः । हुड़म् इति भाषा ।
इति शब्दमाला ॥
हुण्डः, पुं, व्याघ्रः । ग्राम्यशूकरः । मूर्खः । राक्षसः ।
इति केचित् ॥
हुतं, त्रि, (हु+क्तः ।) अग्नौ प्रक्षिप्तं घृतादि ।
तत्पर्य्यायः । वषट्कृतम् २ । इत्यमरः ॥ (यथा,
गीतायाम् । ९ । १६ ।
"अहमग्निरहं हुतम् ॥"
तर्पितम् । यथा, रघुः । २ । ७१ ।
"प्रदक्षिणीकृत्य हुतं हुताश-
मनन्तरं भर्त्तुररुन्धतीञ्च ॥")
होमे, क्ली ॥
हुतभुक्, [ज्] पुं, (हुतं भुङ्क्ते इति । भुज्+
क्विप् ।) अग्निः । (यथा, भागवते । ३।१६।८।
"नाहं तथाद्मि यजमानहविर्वितानै
श्च्योतद्घृतप्लुतमदन् हुतभुङ्मुखेन ॥")
चित्रकवृक्षः । इत्यमरः । १ । १ । ५८ ॥ (यथा,
सुश्रुते । ६ । ५३ ।
"पाठाविड़ङ्गोपविड़ङ्गसिन्धु-
विकण्टरास्नाहुतभुग्बलाभिः ॥"
महादेवः । इति महाभारतम् । १३ । १७ ।
८१ ॥ विष्णुः । इति च तत्रैव ।१३।१४९।१०८ ।)
हुतभुक्प्रिया, स्त्री, (हुतभुजो वह्नेः प्रिया ।)
अग्निभार्य्या । स्वाहा इत्यमरः । २ । ७ । २१ ॥
हुतवहः, पुं, (वहतीति । वह+अच् । हुतस्य
वहः ।) अग्निः । इति हेमचन्द्रः ॥ (यथा,
महाभारते । १ । २२४ । ५८ ।
"एतच्छ्रुत्वा हुतवहात् भगवान् सर्व्वलोककृत् ।
हव्यवाहमिदं वाक्यमुवाच प्रहसन्निव ।")
हुताशः, पुं, (हुतं अश्नाति इति । अश+अण् ।)
अग्निः । इति शब्दरत्नावली ॥ (यथा, भाग-
वते । १ । १२ । २१ ।
"धन्विनामग्रणीरेषः तुल्यश्चार्ज्जुनयोः ...
हुताश इव दुर्द्धर्षः समुद्र इव ...
भयम् ॥ इति ...
... वायुर्व्विद्युत्गतिः ...

"भग्नं समासाद्विविधं हुताश !
काण्डे च सन्धौ च हि तत्र सन्धौ ॥"

इति वैद्यकचक्रविनिश्चयसंग्रहे भग्नाधिकारे ॥ हुताश इति अग्निवेशसम्बोधनं चरके हुताशशब्देनाग्निवेशोऽभिधीयते पदैकदेशे पदप्रवृत्तेः। इति तट्टीकायां श्रीकण्ठदत्तः ॥)

हुताशनः, पुं, (हुतं आहुतद्रव्यं अशनमस्य।) अग्निः। यथा, गोभिलपुत्रकृतगृह्यासंग्रहे।
"लक्षहोमे तु वह्निः स्यात् कोटिहोमे हुताशनः।
पूर्णाहुत्यां मृडो नाम शान्तिके वरदः सदा ॥"
इति तिथ्यादितत्त्वम् ॥

अपि च।
"आरोग्यं भास्करादिच्छेद्धनमिच्छेद्धुताशनात्।
ज्ञानन्तु शङ्करादिच्छेन्मुक्तिमिच्छेज्जनार्द्दनात् ॥"
इति गुणविष्णुधृतमत्स्यपुराणम्।

शिवः। इति केचित् ॥ (वटिकौषधविशेषः।) तद्यथा,—
"एकद्विकद्वादशभागयुक्तं
योज्यं विषं टङ्कणमूषणञ्च।
हुताशनो नाम हुताशनस्य
करोति वृद्धिं कफजित्वराणाम् ॥"
इति हुताशनो रसः ॥०॥

इति वैद्यकरसेन्द्रसारसंग्रहेऽजीर्णाद्यधिकारे ॥)

हुतिः, स्त्री, हवनम्। हुधातोः क्तिप्रत्ययेन निष्पन्ना ॥

हुम्, व्य, (हूयते इति। हु+बाहुलकात् मः।) स्मृतिः। अपाकृतिः। अर्थप्रश्नः। अभ्यनुज्ञा। इति मेदिनी ॥ तर्के वितर्के हूँ शब्दो दीर्घादिरपीति केचित्। इत्यमरटीकायां भरतः ॥

हुर्च्छ, आ कौटिल्ये। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट्।) हूर्च्छी। क्विपि राल्लोपे हूः हुरौ हुरः। आ हुर्च्छितं हूर्णं तेन। हुर्च्छति खलः कुटिलः स्यादित्यर्थः। हुर्च्छति चौरः अपसरतीत्यर्थः। इति धातुप्रदीपः। इति दुर्गादासः ॥

हुल, ज, हृतिसम्वरणयोः। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट्।) ज, होलः हुलः। इति दुर्गादासः ॥

हुलहुली, स्त्री, (हुल+क। आभीक्ष्ण्ये द्वित्वं गौरादित्वात् ङीप्।) स्त्रीणां मङ्गलजनकमुखशब्दः। उलु उलु इति भाषा। तत्पर्य्यायः। मुखघण्टा २। इति त्रिकाण्डशेषः ॥

हुहुः, } पुं, (आह्वयतीति। ह्वे+निपातनात्
हूहू, } हुः हूश्च।) गन्धर्व्वविशेषः। यथा,—
"हाहाहूहूश्च द्विविधो हुहुर्हूहुश्च कुत्रचित्।"
इति शब्दरत्नावली ॥

(यथा, महाभारते। १। ८३। ८।
"पर्य्युपासन् कौरव्य ! कदाचिद्वै पितामहम्।
नारदः पर्व्वतश्चैव विश्वावसुर्हाहा हुहुः ॥")

(ह्वे+हूः। निपातनम्।) आह्वानम्। । । अहङ्कारः। शोकः। इति केचित् ॥

हू

हूँ, व्य, मन्त्रविशेषः। तदुद्धारपर्य्यायो यथा,—
"हकारो वामकर्णाढ्यो नादबिन्दुविभूषितः।
कूर्च्चं क्रोध उपदर्पो दीर्घहुङ्कार उच्यते।
शब्दश्च दीर्घकवचं ताराप्रणव इत्यपि ॥"

किञ्च।
"शिखावषट् च कवचं क्रोधो वर्म्म हमित्यपि।
क्रोधाख्यो हूँ तनुत्रञ्च शस्त्रादौ रिपुसंज्ञकः ॥"

अपि च।
"व्योमस्थं तानजङ्घास्थं नादबिन्दुविभूषितम्।
कूर्च्चं कालो महाकालः क्रोधबीजं निरञ्जनम् ॥"
इति नानातन्त्रम् ॥

हूङ्कारः, पुं, (हूम्+कृ+भावे घञ्।) हूमिति भयानकध्वनिः। यथा,—
"इत्युक्तः सोऽभ्यधावत्तामसुरो धूम्रलोचनः।
हूङ्कारेणैव तं भस्म सा चकाराम्बिका ततः ॥"
इति मार्कण्डेये देवीमाहात्म्यम् ॥

हूड, ऋ ड गतौ। इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट्।) ऋ, अजुहूडत्। ड, हूडते। इति दुर्गादासः ॥

हूतं, त्रि, (ह्वे+क्त।) आहूतम्। आह्वानीकृतम्। ह्वे ञ धातोः क्तप्रत्ययेन निष्पन्नम् ॥

हूतिः, स्त्री, (ह्वे+क्तिन्+सम्प्रसारणम्।) आह्वानम्। इत्यमरः १। ६। ८।

हूनः, पुं, (ह्वे+नक् सम्प्रसारणञ्च।) म्लेच्छजातिविशेषः। यथा,—
"सपादश्च तुरुष्कस्तु हूनो यवन इत्यपि।
लोकवाह्यस्तु यो वाजिगवाद्याचारवर्जितः।
म्लेच्छः किरातशबरपुलिन्दाद्यास्तु तद्भिदा ॥"
इति जटाधरः ॥

मान्द्राजदेशीयस्वर्णमुद्राविशेषश्च ॥

हूम्, व्य, हूयते इति। बाहुलकात् मः। प्रश्नः। वितर्कः। इत्यमरः। ३। ४। १८ ॥ सम्मतिः। क्रोधः। भयम्। निन्दा। अवज्ञा। इत्यमरटीकायां नारायणचक्रवर्त्ती ॥ वितर्के हूँ चैत्रोऽपि पण्डितः। प्रश्ने हूँ को लङ्काधिपतिः। अनुमतौ च हूँ लब्धं हूम्। भये च हूँ न गन्तव्यम्। इत्यमरटीकायां भरतः ॥ अन्यत् हुंशब्दे द्रष्टव्यम् ॥

हूरवः, पुं, (हू इति रवोऽस्य।) शृगालः। इति हेमचन्द्रः ॥

हूर्च्छनं, क्ली, (हूर्च्छ+भावे ल्युट्।) कौटिल्यम्। इति केचित् ॥

हूहुः, } पुं, (आह्वयतीति। ह्वे स्पर्द्धायाम्।
हूहूः, } क्विप्। सम्प्रसारणम्। आभीक्ष्ण्ये द्वित्वं निपातनात् ह्रस्वः। पक्षे तु न।) गन्धर्व्वविशेषः। इति शब्दरत्नावली ॥ (यथा, भागवते। ८। ४। ३।
"योऽसौ ग्राहः स वै सद्यः परमाश्चर्य्यरूपधृक्।
मुक्तो देवलशापेन हूहूर्गन्धर्व्वसत्तमः ॥")

हृ, ञ हृत्याम्। इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-द्विक०-अनिट्।) हृतिर्दंशाद्देशान्तरप्रापणा। ञ, हरति हरते गां वनं गोपः। इति दुर्गादासः ॥

हृ, लि र प्रसह्यकृत्याम्।
(जु०-पर०-सक०-अनि...
कारः। लि, जहर्त्ति धन...
इति दुर्गादासः ॥

हृच्छयः, पुं, (हृदि शेते ...
करणे शेतेः।" ३। २। १...
कामदेवः। इति हलायुध...
भारते। ३। ४६। ४२।
"तत् प्रसीद न मामार्त्तां ...
हृच्छयेन च मन्मथ भक्ताश्च ...
हृदयशायिनि, त्रि ॥ (यथा, ...
८५। १७।
"जगत्पतिरनिर्द्देश्यः सर्व्वगः स...
हृच्छयः सर्व्वभूतानां ज्येष्ठो रुद्र...
पुं, कामः। यथा, भागवते। १...
"सकृद्यद्दर्शितं रूपमेतत् कामा...
मत्कामः शनकैः साधुः सर्व्वान् ...

"हृच्छयान् कामान्।" ...

हृच्छूल, क्ली, (हृदयजातं ...
समासः।) हृदयजातशूलरोगः।
यथा, गारुडे १८८ अध्याये।
"क्वथितोदकपानन्तु शम्बूका क्षारकं ...
मृगशृङ्गं अग्निदग्धं गव्याज्येन
पीतं हृत्पृष्ठशूलानां भवेन्नाशकरं प्रिय ...
अपि च।
" ...

प्रसारण्यश्वगन्धा च बृहती कण्टकारिका।
बलाचातिबला रास्ना श्वदंष्ट्रा च पुनर्नवा।
एरण्डशारिवा पर्णी गुडूची कपिकच्छुरा।
एषां दश पलिकान् भागान्

तेन पादावशेषेण तैलं पात्रे विपाचयेत्।
आजं वा यदि वा गव्यं क्षीरं दत्त्वा ...
शतावरीरसञ्चैव तैलतुल्यं प्रदापयेत्।
द्रव्याणि यानि पेष्याणि तानि वक्ष्यामि ...

शतपुष्पा देवदारु शालपर्णी वचागुरु।
कुष्ठं मांसी सैन्धवञ्च पलमेकं पुनर्नवा।
पाने नस्ये तथाभ्यङ्गे तैलमेतत् प्रदापयेत्।
हृच्छूलं पार्श्वशूलञ्च गण्डमालाञ्च नाशयेत्।
अपस्मार वातरक्तमायुष्मांश्च पुमान् भवेत्।"
इति च गारुडे ...

हृणिया, स्त्री, (हृणीयते इति। कण्ड्वादित्वात् यक्। तत अः। ...
ह्रस्वः।) हृणीया। इत्यमरटीकायां मुकुटः। १। २। २२ ॥

हृणीया, स्त्री, (हृणीङ्+कण्ड्वादित्वात् यक्। अः।) निन्दा। इत्यमरः। १। २। २२ ॥

हृत्, [द्] क्ली, (हरति ह्रियते वेति। हृ+"हृञः पुक् दुक् चेति।" उणा० ४। १००। इतिवाहु...
काल ...

[illegible] चेतो हृदयं स्वान्तं हृन्मानसं मनः।"
इत्यमरः। १। ४। ३१॥
[illegible] मांसखण्डे द्वितीये भागे।
"[illegible]गारिपक्वानां मूत्रस्य रुधिरस्य च।
[illegible] फुस्फुसश्च कोष्ठ इत्यभिधीयते॥")
[illegible], पुं, (हृदयस्य कम्पः। हृदादेशः।)
[illegible]स्पन्दनम्।। यथा,—
"[illegible] जायते तावत् यावत् तस्य कृपा
न चेत्॥"
[illegible] पञ्चाचारतन्त्रोक्तं भद्रकालीकवचम्॥
[illegible], त्रि, (हृ+क्तः।) अपहृतवस्तु। यथा,—
"[illegible] शुम्भनिशुम्भाभ्यामसुराभ्यां शचीपतेः।
[illegible] यज्ञभागाश्च हृता मदबलाश्रयात्॥"
इति देवीमाहात्म्ये ५ अध्यायः॥
[illegible], क्ली, (हृ+बाहुलकात् दुक्।) हृदयम्।
[illegible]। इत्यमरः। २। ६। ६४॥
[illegible], क्ली, (ह्रियते विषयैरिति। हृ+"वृञो:
[illegible]। उणा० ४। १००। इति कयन्
[illegible]) बुक्कम्। वक्षः। मनः। यथा,—
"[illegible] च बुक्कायां हृदयं मानसेऽपि च॥"
इति त्रिकाण्डशेषः॥
[illegible] पृथ्वं हृदिति। चत्वारि हृदये।
[illegible]

प्रतिष्ठार्थं हि भावानामेषां हृदयमिष्यते।
गोपानसीनामागारकर्णिकेवार्थचिन्तकैः।
तस्योपघातान्मूर्च्छायं भेदान्मरणमिच्छति॥
यद्धि तत् स्पर्शविज्ञानन्धारि तन्तत्र संश्रितम्।
तत् परस्यौजसः स्थानन्तत्र चैतन्यसंग्रहः॥
हृदयं महदर्थञ्च तस्मादुक्तं चिकित्सकैः।
तेन मूलेन महता महामूला मता दश॥"
इति चरके सूत्रस्थाने त्रिंशेऽध्याये॥
"हृदयमिति क्षतवीर्य्यो बुद्धेर्मनसश्च स्थानत्वात्॥"
इति सुश्रुते शारीरस्थाने तृतीयेऽध्याये।
"शोणितकफप्रसादजं हृदयं यदाश्रया हि
धमन्यः प्राणवहाः। तस्याधो वामतः प्लीहा
फुस्फुसश्च दक्षिणतो यकृत् क्लोम च।
तद्धृदयं विशेषेण चेतनास्थानमतस्तस्मिंस्तमसा-
वृते सर्व्वप्राणिनः स्वपन्ति। भवति चात्र।
पुण्डरीकेण सदृशं हृदयं स्यादधोमुखम्।
जाग्रतस्तद्विकसति स्वपतश्च निमीलति॥"
इति च सुश्रुते शारीरस्थाने चतुर्थेऽध्याये॥)
हृदयग्रन्थिः, पुं, (हृदयस्य ग्रन्थिरिव ग्रन्थिः [illegible]
[illegible] दुर्भेद्यत्वात्।) [illegible]। यथा,—
"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्व्वसंशयाः।
क्षीयन्ते चास्य कर्म्माणि [illegible]॥"
इति श्रीभागवते। [illegible]
हृदयङ्गमं, क्ली, (हृदयं गच्छतीति। [illegible]
[illegible]) [illegible]
[illegible]

हृदयेशः, पुं, (हृदयस्य ईशः।) भर्त्ता। इति
त्रिकाण्डशेषः॥ तत्पर्य्यायः।
"प्रियस्यायाः पुंसि पत्नी भर्त्ता सेशा पतिर्वरः।
विवोढा रमणो मोक्ता स्वामी दयितो [illegible]॥"
इति हेमचन्द्रः॥
हृदयेशा, स्त्री, (हृदयस्य ईशा।) भार्य्या। यथा,
"प्रेयसी दयिता कान्ता प्राणेशा वल्लभा
प्रिया।
हृदयेशा प्राणसमा प्रेष्ठा प्रणयिनी च सा॥"
इति हेमचन्द्रः॥
हृदावर्त्तः, पुं, (हृदयस्थितः आवर्त्तः।) [illegible]
[illegible]। तत्पर्य्यायः। [illegible]। इति
त्रिकाण्डशेषः॥
हृदिस्पृक्, [श्] त्रि, (हृदि स्पृशति [illegible]
[illegible]। "स्पृशोऽनुदके क्विन्।" ३। २।
५८। इत्यस्य [illegible]
हृद्यः। इति [illegible]। (यथा, [illegible]
१४। ६६।
[illegible]

हृद्रोगः, पुं, कुम्भराशिः । इति शब्ददीपिका ॥ (हृदयस्य रोग इव ।) कामः । यथा,—
"हृद्रोगमाश्वपहिनोत्यचिरेण धीरः ।"
इति श्रीभागवतम् ॥
हृदयस्य रोगः ।) हृदयपीड़ा । तत्र हृद्रोगस्य विप्रकृष्टं निदानमाह ।

"अत्युष्णगुर्व्वम्लकषायतिक्त-
श्रमाभिघाताध्ययनप्रसङ्गैः ।
सञ्चिन्तनैर्व्वेगविधारणैश्च
हृदामयः पञ्चविधः प्रदिष्टः ॥"

प्रसङ्गः सततं सेवा । सञ्चिन्तनमतिचिन्ता राजभयादिकमिति यावत् । पञ्चविधः वातिकः पैत्तिकः श्लैष्मिकः सान्निपातिकः क्रिमिजश्चेति ॥ ० ॥ तस्य संप्राप्तिपूर्व्वकं लक्षणमाह ।
"दूषयित्वा रसं दोषा विगुणा हृदयङ्गताः ।
हृदि बाधां प्रकुर्व्वन्ति हृद्रोगं तं प्रचक्षते ॥"
विगुणाः दुष्टाः । बाधां दोषभेदे नानाविधां व्यथाम् । अङ्गवत् पीड़ामिति गयदासः ॥ ० ॥ वातिकं हृद्रोगमाह ।
"आयम्यते मारुतजे हृदयं तुद्यते तथा ।
निर्मथ्यते दीर्य्यते च स्फोट्यते पाट्यतेऽपि च ॥"
मारुतजे हृद्रोगे इति शेषः । आयम्यते व्यथया विस्तार्य्यते इव । तुद्यते सूचीभिरिव । निर्मथ्यते मन्थानेनेव । दीर्य्यते करपत्रेण द्विधा क्रियत इव । स्फोट्यते भार्य्येव । पाट्यते कुठारेण बहुधा क्रियत इव ॥ ० ॥ पैत्तिकमाह ।
"तृष्णोष्मदाहचोषाः स्युः पैत्तिके हृदये क्लमः ।
धूमायनञ्च मूर्च्छा च स्वेदः शोषो मुखस्य च ॥"
उष्मा शीतगात्रस्यैव शीतवाताभिलाषहेतुः किञ्चिदन्तस्तापः । दाहः पार्श्वस्थेन वह्निनेव दुःसहहेतुर्विषमस्तापः । चोषः चूषणेनेव पीड़ा । हृदये क्लमः हृदयाकुलत्वं ग्लानिरित्यर्थः । धूमायनं कण्ठाद्धूमनिर्गम इव । स्वेदः किञ्चिद्दुर्गन्धः मटित इव ॥ ० ॥ श्लैष्मिकमाह ।
"गौरवं कफसंस्रावोऽरुचिस्तम्भोऽग्निमार्द्दवम् ।
माधुर्य्यमपि चास्यस्य बलासा वत्तते हृदि ॥"
बलासा वर्त्तते हृदि कुपितकफस्थाने । गौरवं हृदयस्य । स्तम्भो जड़ता । मार्द्दवं जलप्लुतमिव । माधुर्य्यं मुखे ॥ ० ॥ त्रिदोषजमाह ।
"विद्यात् त्रिदोषमप्येवं सर्व्वलिङ्गं हृदामयम् ॥"
क्रिमिजमाह । क्रमयो जायन्ते यस्मिन्निति क्रिमिज इति निरुक्तिः ॥ ० ॥ तस्य निदानपूर्व्विकां संप्राप्तिमाह ।
"त्रिदोषहेतुहृद्रोगे यो दुरात्मा निषेवते ।
तिलक्षीरगुड़ादीनि ग्रन्थिस्तस्योपजायते ॥
मर्म्मैकदेशसंक्लेदं रसश्चाप्युपगच्छति ।
संक्लेदात् क्रमयश्चास्य भवन्त्युपहतात्मनः ॥"
मर्म्मैकदेशे हृदयैकदेशे संक्लेदं मटितत्वं रस उपगच्छति संक्लेदात् । रसस्य मटितत्वात् । उपहतात्मनः तिलाद्यहिताहारेण ॥ ० ॥ तस्य लक्षणमाह ।
"उत्क्लेदः ष्ठीवनं तोदः शूलं हृल्लासकस्तमः ।
अरुचिः श्यावनेत्रत्वं शोषश्च क्रिमिजे भवेत् ॥"
उत्क्लेदः वमनमिवोपस्थितम् । शोषो यक्ष्मा ॥ हृद्रोगस्योपद्रवानाह ।
"क्लमसादो भ्रमः शोषो ज्ञेयास्तेषामुपद्रवाः ।
क्रिमिजे तु क्रमीणां ये श्लैष्मिकाणां हि ते
मताः ॥"
क्लमः पिपासाश्रमस्य सादः शोषः । शोषो मुखस्य । तेषां हृद्रोगाणाम् । क्रिमिजे तु हृद्रोगे श्लैष्मिकाणां क्रमीणां ये उपद्रवा हृल्लासात् प्रस्रवणान्ता विपाकादयस्ते मताः ॥ ० ॥ अथ हृद्रोगस्य चिकित्सा ।

"घृतेन दुग्धेन गुड़ाम्भसा वा
पिबन्ति चूर्णं ककुभत्वचो ये ।
हृद्रोगजीर्णज्वररक्तपित्तं
हत्वा भवेयुश्चिरजीविनस्ते ॥ १ ॥

हरीतकी वचा रास्ना पिप्पली नागरोद्भवम् ।
पटी पुष्करमूलोत्थं चूर्णं हृद्रोगनाशनम् ॥२॥
पुटदग्धहरिणशृङ्गपिष्टं गव्येन सर्पिषा पिबतः ।
हृत्पृष्ठशूलमचिरादुपैति शान्तिं सुकष्टमपि ॥३॥
तैलाज्यगुड़विपक्वं चूर्णं गोधूमपार्थोत्थम् ।
पिबति पयोऽनुक् स भवति गतसकलहृदामयः
पुरुषः ॥
पार्थः कोह इति लोके ॥ ४ ॥
गोधूमककुभचूर्णं पक्वमजाक्षीरगव्यसर्पिर्भ्याम् ।
मधुशर्कराससमेतं शमयति हृद्रोगमुल्बणं
पुंसाम् ॥ ५ ॥

पार्थस्य कल्केन रसेन सिद्धं
शस्तं घृतं सर्व्वहृदामयेषु ॥

अर्ज्जुनघृतम् ॥ ६ ॥

घृत बला नागबलार्ज्जुनानां
क्वाथेन कल्केन च यष्टिकायाः ।
सिद्धं निहन्याद्धृदयामयं हि
सवातरक्तक्षतरक्तपित्तम् ॥"

बलादिघृतम् ॥ ७ ॥ इति हृद्रोगाधिकारः । इति भावप्रकाशः ॥ ० ॥ अपि च ।

धन्वन्तरिरुवाच ।

"हृद्रोगादिनिदानं ते वक्ष्येऽहं सुश्रुताधुना ।
क्रिमिहृद्रोगलिङ्गेश्च स्मृताः पञ्च तु हृद्गदाः ॥
वातेन शूल्यतेऽत्यर्थं तुद्यता हृद्रतीति च ।
भिद्यते शुष्यते स्तब्धं हृदयं शून्यताद्रवः ॥
अकस्माद्दीनता शोको भयं शब्दोऽसहिष्णुता ।
वेपथुर्व्वेपनं मोहः श्वासरोधोऽल्पनिद्रता ॥
पित्ताद्दृष्णा भ्रमो दाहः स्वेदोऽम्लः कफजः
क्लमः ।
छर्दनञ्चाम्लपित्तस्य धूमकम्पितता ज्वरः ॥
श्लेष्मणा हृदयस्तब्धं भावितं चाश्मगर्भवत् ।
कासाग्निसादनिष्ठेव निद्रालस्यारुचिज्वरः ॥
सर्व्वलिङ्गं त्रिभिर्दोषैः क्रिमिभिः श्यामनेत्रता ।
तमःप्रवेशो हृल्लासः शोफः कण्डुः कफस्रुतिः ॥
हृदयं प्रततञ्चात्र क्रकचेनेव दार्य्यते ।
निकिम्मेदामयं घोरं तच्छीघ्रं शीघ्रकारणम् ॥"
इति गारुड़े । १५८ । १—७ ॥ ० ॥

"शुण्ठी सौवर्च्चलं हिङ्गु पोस्ता हृदयरोगनुत् ॥"
इति च गारुड़े । १८८ । ११ ॥
हृद्रोगवैरी, [न्] पुं, (हृद्रोगस्य वैरी ।) अर्ज्जुनवृक्षः । इति शब्दचन्द्रिका ॥
हृद्वण्टकः, पुं, (हृदो वण्टकः ।) जठरम् । इति शब्दचन्द्रिका ॥
हृल्लासः, पुं, (हृदयस्य भासोऽत्र । हृल्लेखयदण्ड्लासेषु । ६ । ३ । ५० । हृदादेशः ।) हिक्का । यथा,—
"हिक्का हिक्का च हृल्लासः ...
इति ...
(यथा, सुश्रुते सूत्रस्थाने २६ ...
"धमनीस्थे सफेनं ...
निर्गच्छत्यङ्गमर्द्दः पिपासा ...
निदानादि हिक्काशब्दे द्रष्टव्यम् ॥
हृल्लेखः, पुं, (हृदयं लिखतीति ... हृल्लेखेति ।" ६ । ३ । ५० । ... ज्ञानम् । इति ... त्रिकाण्डशेषः ॥
हृल्लेखा, स्त्री, (हृल्लेख + ... औत्सुक्यम् । ...
हृष, उ हृष्टौ । इति ... पर०-अक०-सेट् । ... उ, हर्षित्वा हृष्ट्वा । ... रोमादिना हृष्ट ... अस्मात् ... दुर्गादासः ॥
हृष, उ जि अलीके । (भ्वा०-पर ... हृष्टः । जि, हृषितः ... हर्षति कथां ... इति दुर्गादासः ॥
हृष, य जि हर ... (दिवा०-पर० ... सुखात् । जि, ... र्षीत् । अस्मात ... इति दुर्गादासः ॥
हृषितं, त्रि, (... प्रीतम् । ... प्रणतम् । वर्म्मि ...
हृषी, पुं, ... धर्म्मः ॥
हृषीकं, क्ली, (हृष्यत् ... किच ।" उणा० ... स कित् ।) इन्द्रि ... (यथा भागवते ।
"न भारती ...
न मे क्वचिन्मे ...
न मे ...
हृषीकेशः, पुं, (... इत्यमरः । १।१।१८ ॥

योगी हृषीकेशः केवलरूपकत्वात् परमात्म-
तात्। इन्द्रियाणि यद्वशे वर्त्तन्ते स पर-
मात्मा। इति शङ्कराचार्य्यः। पौराणिका-
स्त्वाहुः। हृष्टा जगत् प्रीतकराः केशा रश्मयो-
ऽस्य हृषीकेशः। पृषोदरादिः। अयं हि
सूर्य्यरूपचन्द्ररूपश्च। तथा च मोक्षधर्म्मे।
"सूर्य्याचन्द्रमसोः शश्वत् अंशुभिः केशसंज्ञितैः।
बोधयंस्तापयंश्चैव जगदुत्तिष्ठते पृथक्।
बोधनात् तापनाच्चैव जगतो हर्षणं भवेत्॥
अग्नीषोमकृतैरेव कर्म्मभिः पाण्डुनन्दन।
हृषीकेशोऽहमीशानो वरदो लोकभावनः॥"
इति भरतः॥
अपि च।
"हृषीकाणि निरुध्याहं यतः प्रत्यक्तां गतः।
हृषीकेश इति ख्यातो नाम्ना तेनैव संस्थितः॥"
इति वाराहे [illegible]
ध्यायः॥ ८॥
"इहा धर्म्म [illegible]
[illegible]

[illegible]

स्वाह्वानम्। अव्ययादि। इति मेदिनी॥ आह्वानस्य
पर्य्यायः। प्याट् २ पाट् ३ अङ्ग ४ हे ५ भोः ६।
इत्यमरः। ३। ४। ७॥ हंहो ७ हुंहो ८
अरे ९ अये १० अयि ११। इति भरतः॥
हिक्का, स्त्री, (हिक् इति अव्यक्तं शब्दं कायतीति।
कै + कः। टाप्।) हिक्का। इति हेमचन्द्रः॥
हेठ, बाधे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-
सक०-सेट्।) हेठति। बाधो विहतिः। इति
दुर्गादासः॥
हेठ, ऋ ङ बाधे। इति कविकल्पद्रुमः॥ (भ्वा०-
आत्म०-सक०-सेट्।) ऋ, अजिहेठत्। ङ,
हेठते खलः साधुम्। इति दुर्गादासः॥
हेठ, श भवे। इति कविकल्पद्रुमः॥ (क्र्या०-
पर०-उत्पत्तौ अक०-पवित्रीकरणे सक०-सेट्।)
भवो भूतिपूर्व्वोत्पत्तिः। श, हेठती हेठन्ती।
इति दुर्गादासः॥
हेठः, पुं, (हेठ + घञ्।) बाधा। विहेठः। इति
मेदिनी॥
हेड, ङ ऋ अनादरे। इति कविकल्पद्रुमः॥
(भ्वा०-आत्म०-सक०-सेट्।) ङ, हेडते
[illegible]। ऋ, अजिहेडत्। इति दुर्गादासः॥
हेड, म वेष्टे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-
सक०-सेट्।) म, हेडयति [illegible]

[illegible]

हेतुः, पुं, (हिनोति व्याप्नोति कार्य्यमिति। हि +
"कमिमनिजनिगाभायाहिभ्यश्च।" उणा० १।
७३। इति तुः।) कारणम्। इत्यमरः।१।४।२८॥
यथा, मनुः। ८। ३।
"प्रत्यहं देशदृष्टैश्च शास्त्रदृष्टैश्च हेतुभिः।
अष्टादशसु मार्गेषु निबद्धानि पृथक् पृथक्॥"
न्यायमते व्यापकज्ञापकः। व्याप्य इति यावत्।
तमेव लिङ्गमामनन्ति। तस्य लक्षणं यथा।
हेतुत्वञ्च अनुमितिकारणीभूतलिङ्गपरामर्श-
प्रयोजकशाब्दज्ञानकारणसाध्याविषयकशाब्द-
बोधजनकहेतुविभक्तिमत्त्वम्। हेतुत्वप्रति-
पादकविभक्तिमदवयववत्त्वं वा। [illegible]
[illegible]
इति गङ्गेशोपाध्यायकृततत्त्व-
चिन्तामणिः॥ [illegible]
[illegible]
यथा,—
[illegible]

यः सपक्षे विपक्षे च स तु साधारणो मतः ।
यस्तूभयस्माद्व्यावृत्तः स त्वसाधारणो मतः ॥
तथैवानुपसंहारी केवलान्वयिपक्षकः ।
यः साध्यवति नैवास्ति स विरुद्ध उदाहृतः ॥
आश्रयासिद्धिराद्या स्यात् स्वरूपासिद्धिरप्यथ ।
व्याप्यत्वासिद्धिरपरा स्यादसिद्धिरतस्त्रिधा ॥
पक्षासिद्धिर्यत्र पक्षो भवेत्काञ्चनमयो गिरिः ।
ह्रदो द्रव्यं धूमवत्त्वादत्रासिद्धिरथापरा ॥
व्याप्यत्वासिद्धिरपरा नीलधूमादिके भवेत् ।
विरुद्धयोः परामर्शे हेत्वोः सत्प्रतिपक्षता ॥
साध्यशून्यो यत्र पक्षस्त्वसौ बाध उदाहृतः ।
उत्पत्तिकालीनघटे गन्धादिर्यत्र साध्यते ॥"
इति भाषापरिच्छेदः ॥ * ॥

तस्य सामान्यलक्षणानि यथा । अनुमितिकारणीभूताभावप्रतियोगि- यथार्थज्ञानविषयत्वम् । यद्विषयत्वेन लिङ्गज्ञानस्यानुमितिप्रतिबन्धकत्वम् । ज्ञायमानं सत् यदनुमितिप्रतिबन्धकं तत्त्वं वा हेत्वाभासत्वम् ॥ * ॥ तस्य विशेषलक्षणानि यथा । उभयकोट्युपस्थापकतावच्छेदकरूपवत्त्वं तत्त्वम् । विरुद्धान्यपक्षवृत्तित्वे सति अनुमितिविरोधिसम्बन्धाव्यावृत्तित्वम् अनैकान्तिकः । विपक्षवृत्तित्वं साधारणत्वम् । सर्व्वसपक्षव्यावृत्तो हेतुरसाधारणः । व्याप्तिग्रहानुकूलधर्म्युपसंहाराभावो यत्र स हेतुरभिमतोऽनुपसंहार्य्यः ॥ * ॥ साध्यव्यापकाभावप्रतियोगित्वं विरुद्धत्वम् ॥ * ॥ साध्यविरोध्युपस्थापनसमर्थसमानबलोपस्थित्या प्रतिरुद्धकार्य्यलिङ्गत्वं सत्प्रतिपक्षितत्वम् ॥ * ॥ व्याप्तिपक्षधर्म्मतान्यतरविरोधिरूपवत्त्वं असिद्धिः । पक्षनिष्ठ-प्रमाविषयत्व-प्रकाराभाव-प्रतियोगि-साध्यकत्वं बाधः । इति चिन्तामणिः ॥

हेम, [न्] क्ली, (हिनोति वर्द्धते स्फुटति वेति । हि + मनिन् ।) स्वर्णम् । यथा, रघौ ।१।१० ।
"हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा ॥")
धुस्तूरम् । इत्यमरः । १।८।८४ ; ३।५।२३॥ केशरम् । इति राजनिर्घण्टः ॥ हिमः । इति हेमन्तशब्दटीकायां भरतधृतमाधवी ॥

हेमं, क्ली, (हि + मन् ।) सुवर्णम् । इति केचित् ॥

हेमः, पुं, (हि + मन् ।) माषकपरिमाणम् । इति वैद्यकपरिभाषा ॥ कृष्णवर्णाश्वः । बुधः । इति केचित् ॥ (ययातिवंशजरुषद्रथपुत्रः । यथा, विष्णुपुराणे । ४ । १८ । १ । "तितिक्षो रुषद्रथः पुत्रोऽभूत ततो हेमः हेमात् सुतपाः ॥")

हेमकन्दलः, पुं, (हेमवर्णं कन्दलं नवाङ्कुरोऽस्य । यद्वा, हेमवर्णं कन्दं कलतीति । कल + कः ।) प्रवालः । इति हेमचन्द्रः ॥

हेमकान्तिः, स्त्री, (हेमवत् कान्तिरस्याः ।) दारुहरिद्रा । इति राजनिर्घण्टः ॥ स्वर्णद्युतिमति, त्रि ॥ (यथा, बृहत्संहितायाम् । ७ । २० ।
"हेमकान्तिरथवा शुकवर्णः
सस्फुरेण मणिना सदृशो वा ।

स्निग्धमूर्त्तिरलघुश्च हिताय
व्यत्ययेन शुभकृच्छशिपुत्रः ॥")

हेमकारः, पुं, (हेम हेममयं भूषणं करोतीति । कृ + अण् ।) हेमकर्त्ता । स्वर्णकारः । यथा,
"सर्व्वसङ्करपापिष्ठं हेमकारं नराधिपः ।
अन्याये वर्त्तमानञ्च छेदयेत्क्षुरशः शरैः ॥"
इति मत्स्यपुराणे । २२७ । १८५ ॥

हेमकिञ्जल्कं, क्ली, (हेमवर्णं किञ्जल्कमस्य ।) नागकेशरम् । इति राजनिर्घण्टः ॥ (नागकेशरशब्देऽस्य विषयो ज्ञातव्यः ॥)

हेमकूटः, पुं, (हेममयः कूटो यस्य ।) पर्व्वतविशेषः । इत्यमरः । २।३।१ ॥ स तु किंपुरुषवर्षस्य सीमापर्व्वतः । नवतिसहस्रयोजनदीर्घः । द्विसहस्रयोजनप्रस्थः । द्विसहस्रयोजनविस्तारः । हिमालयादुत्तरे स्थितः । इति श्रीभागवतमतम् । (यथा, महाभारते । ३ । ११० । २ ।
"पर्व्वतं स समासाद्य हेमकूटमनामयम् ।
अचिन्त्यानद्भुतान् भावान् ददर्श सुबहून्नृपः ॥")

हेमकेतकी, स्त्री, (हेमवर्णा केतकी ।) स्वर्णकेतकी । इति राजनिर्घण्टः ॥

हेमकेलिः, पुं, (हेमवर्णः केलिः कम्पनादिः यस्य ।) अग्निः । इति शब्दमाला ॥

हेमकेशः, पुं, (हेमवर्णाः केशोऽस्य । जटाया पीतत्वात् तथात्वम् ।) शिवः । इति केचित् ॥

हेमक्षीरी, स्त्री, (हेमेव पीतवर्णं क्षीरं निर्य्यासो यस्याः । ङीप् ।) स्वर्णक्षीरी । इति राजनिर्घण्टः ॥ पर्य्यायोऽस्या यथा,—
"हेमक्षीरी स्मृता पीता गौरी च कालदुग्धिका ।"
इति गारुडे २०८ अध्यायः ॥
"कटुपर्णी हेमवती हेमक्षीरी हिमावती ।
हेमाह्वा पीतदुग्धा च तन्मूलञ्चोकमुच्यते ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

हेमगन्धिनी, स्त्री, (हेम्नः नागकेशरस्येव गन्धोऽस्ति यस्याः । इनिः ।) रेणुकाख्यगन्धद्रव्यम् । इति रत्नमाला ॥

हेमगौरः, पुं, (हेमवत् गौरः ।) किङ्किरातवृक्षः । इति राजनिर्घण्टः ॥ (यथास्य पर्य्यायः ।
"किङ्किरातो हेमगौरः पीतकः पीतभद्रकः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।) स्वर्णवद्गौरवर्णयुक्ते, त्रि ॥

हेमगौराङ्ग, त्रि, (हेमानीव गौराणि अङ्गान्यस्य ।) स्वर्णतुल्यगौरवर्णाङ्गविशिष्टः । यथा,
"विपिनोत्तिष्ठमानेन कामानलसमत्विषा ।
निर्द्दग्धहेमगौराङ्गः क्षतः कण्ठो जनार्द्दनः ॥
तं दृष्ट्वा हेमगौराङ्गं क्षतं कण्ठं जनार्द्दनम् ।
ततः सर्व्वे वयं भीतास्त्वामेव शरणं गताः ॥"
इति स्कान्दे नीलकण्ठस्तोत्रम् ॥

हेमचन्द्रः, पुं, अभिधानचिन्तामणिनामकोषकर्त्ता । यथा,—
"सार्हदादिनाममालामकः कोषवरः शुभः ।
हेमचन्द्रप्रणीताभिधानचिन्तामणिर्मणिः
इति तस्य ...
स्वर्णमयगणौ च । मोणार चाँद ...

हेमज्वालः, पुं, (हेमवर्णा ज्वालास्य ।) इति शब्दमाला ॥

हेमतारं, क्ली, (हेम तारयति उत्कर्षं तॄ + णिच् + अच् ।) तुत्थम् । इति (तुत्थशब्देऽस्य विवृतिर्ज्ञातव्या ॥)

हेमदुग्धः, पुं, (हेमवर्णं दुग्धं ...) उडुम्बरवृक्षः । इति शब्दरत्नावली ॥

हेमदुग्धकः, पुं, (हेमवर्णं ... कप् ।) उडुम्बरवृक्षः । इत्यमरः । १ । ४ । (पर्य्यायो यथा,—
"उदुम्बरो जन्तुफलो यज्ञाङ्गो हेमदुग्धकः ।"
